CC-0. In Public Domain. Digitization by eGangotri

Almira 3
Shelf 1
9

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३८८४ श्राद्ध[illegible]
सर्वस्व

३८८५ शान्तिरत्नम्

३८८६ प्रायश्चित्तेन्दुशेखर

३८८७ श्राद्धविवेक

३८८८ दान [illegible] चा.

३८९० [illegible]

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ां नं. ७०।   फो नं. १८४

हाम्रो जस्तो अविकसित देशमा आज जसरी हुन्छ छिटो उन्नति हुनुपरेको छ। —श्री ५ महेन्द्र

दैनिक गोरखापत्र
THE GORAKHAPATRA (Daily)

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया । सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःख भाग्भवेत् ॥

गजेटको मोल

सदरलाई	
वार्षिक ने. रू.	१६।
अर्ध वार्षिक ने. रू.	६।
एकप्रतिको	।४०
भारतलाई	
वार्षिक भा. रू.	२४।
अर्धवार्षिक भा. रू.	१३।

भाग १, संख्या १२६] काठमाडौं, भाद्र ५ गते सोमबार सम्वत् २०१८ साल [KATHMANDU. AUGUST 21, 1961

गुप्तरूपमा रहेका गुणको विकास गरी सत्मार्गमा फलाउनु फुलाउनु नै विद्यार्थीहरूको प्रथम कर्तव्य

विद्यार्थी मातृभूमि प्रतिको गहन जिम्मेदारी बोक्न सक्ने सामर्थ्यवान् नेपाली बनून्

श्री ५ बाट त्रि-चन्द्र कालेज वार्षिक जयन्तीको शुभअवसरमा शुभकामना सन्देश

काठमाडौं, भाद्र ५ गते । हाम्रो देशका कर्मठ वीर पुरुषहरू यसै संस्थाका स्नातकहरू थिए र हुन्छन् । यसैमा यस कालेजको गौरव छ ।

माथिका पंक्तिहरू आज त्रिचन्द्र कालेजको वार्षिक जयन्तीको शुभ अवसरमा श्री ५ महाराजाधिराजबाट बक्सिएको सन्देशमा उल्लिखित छन् ।

सन्देश बक्सदै श्री ५ बाट हुकुम भएको छ– "आज हाम्रो मातृभूमि नेपालको एउटा पुरानो शैक्षिक संस्थाको शुभ दिवसको सुअवसरमा शुभकामना पठाउन पाउंदा मलाई हर्ष लागेको छ । हाम्रो देशका कर्मठ वीर पुरुषहरू यसै संस्थाका स्नातक... गौरव छ । देश बनाउने काम सबै अहिलेको विद्यार्थीहरूमै हुन्छ। गुप्त रूपमा रहेको गुणलाई विकसित गरी सत्मार्गमा फलाउने फुलाउने काम नै विद्यार्थीहरूको पहिलो कर्तव्य हो। यो काम अति गहन विषयको हो। यसलाई सविस्तार विकसित गरी देखाउने गहन जिम्मेदारी प्राध्यापकहरूमा पनि अवश्य निहित भएको हुन्छ। यसको लागि अनुशासनले सिञ्चिएको वातावरण अत्यावश्यक छ। विद्यार्थीहरूलाई मेरो यति मात्र भन्नु छ कि आजको युगमा एक पठक वा देशलाई राम्रोसंग सोची आत्मसंयम र अनुशासनको अभ्यास गरी आफ्नो दैनिक पठन पाठनमा अघि बढ्दै गए ...

उच्च सम्मेलनमा भाग लिन महानुभाव बेलग्रेड तर्फ

नयाँ दिल्ली, भाद्र ५ गते । कम्बोडियाका राष्ट्राध्यक्ष राज कुमार नरोत्तम सिंहानुक हिजो दिल्ली हुँदै बेलग्रेड तर्फ जानु भयो । उहाँ बेलग्रेडमा तटस्थ राष्ट्रहरूको उच्च सम्मेलनमा भाग लिन जाँदै हुनुहुन्छ ।

हिजो बेलग्रेडमा घोषणा गरिए अनुसार युगोस्लाभियाको तर्फबाट तटस्थ राष्ट्रको उच्च सम्मेलनमा भाग लिने प्रतिनिधिमंडलको नेतृत्व श्री टिटोले गर्नुहुने छ । प्रे.ट्र.

विजार्ता बारे राष्ट्र संघको विशेष अधिवेशन प्रारम्भ

राष्ट्रसंघ, भाद्र ५ गते । विजार्ता सम्बन्धी ... विवाद उपर आकस्मिक ... साधारण सभाले विचार गर्‍यो ।

बहस एक सातासम्म चालु रहने अनुमान छ । ... महीना ... तथा ट्यूनीसियाली सैन्यको ... एशियाली तथा अफ्रिकी राष्ट्रहरूले राष्ट्र संघीय साधारण सभाको विशेष अधिवेशनको माग गरेका थिए ।

सभाको अवसरमा फ्रान्सले ट्यूनीसियाली ... कब्जा गरेको ... फ्रान्स सैन्यहरूलाई प्रत्यावर्तन गराउनेएक प्रस्ताव ... ट्यूनीसियाले उपस्थित गर्नेछ । फ्रान्सले साधारणसभाप बहसमा भाग लिने छैन भनी घोषणा गरेकोछ ।

ट्यूनीसियाले नौसैनिक अड्डालाई खाली गर्ने माग गरेर प्रदर्शन गर्ने काम नरोकेसम्म राष्ट्रपति देगालले विजार्ता दैनिक तथा ... हवाई अड्डाबाट फ्रेञ्च सैन्यहरूलाई फर्काउन इन्कार गर्नु होला ।

वर्षापछि पुरातात्विक खनन कार्य प्रारम्भ गरिने
चिडियाखानालाई समृद्ध पारिने

... पुरातत्व विभागले वर्षा पछि पुरातात्विक खनन कार्य प्रारम्भ गर्ने निश्चय गरेको छ भनी पुरातत्व विभागका एक प्रवक्ताले बताएका छन्। खनन कार्य लुम्बिनी र कपिलवस्तुमा प्रारम्भ गरिने छ। नेपालमा पुरातात्विक कार्यका बारेमा एक पुस्तक तयार पार्ने पनि विभाग विचार गर्दैछ ।

वर्तमान चिडियाखानालाई समृद्ध पार्ने दिशातर्फ श्री ५ को सरकार विचार गर्दैछ र हाल चिडियाखाना रहेको स्थान सानो हुनाले बालाजू निर कहीं उक्त चिडियाखानालाई सार्ने बारे विचार हुदैछ । पुरातात्विक कार्यका लागि १ लाख ५० हजार र चिडियाखानाका लागि १ लाख ...

कवि एवं लेखकहरूको रसिलो मिलन समारोह

काठमाडौं, भाद्र ५ गते । स्थानीय गोल्डेन भ्याली होटेलमा श्रीबालकृष्ण सम, श्रीपूर्णविक्रम ज्ञवाली, श्रीमाधवप्रसाद घिमिरे, श्रीभवानी भिक्षु, श्रीलैन सिंह बाङ्देल र भाषा शास्त्री श्रीमहानन्द सापकोटा एवं ... कृष्ण पोखरेलले 'सभ्यता कि संस्कृति' भन्ने विषयमाथि अस्तिको दिन प्रामाणिक व्याख्यान दिनुभयो ।

झापाका एक साहित्यप्रेमी युवक श्रीवसन्तकुमार खड्काले उपत्यकामा रहेका विशिष्ट कवि र लेखकहरूको सम्मानमा आयोजना गर्नुभएको समारोहमा उक्त कार्यक्रम भएको थियो । काठमाडौंमा यस्तो किसिमको रसिलो र लेखक एवं कविहरूमा आपसी जानकारी गर्ने मौका मिल्ने कार्यक्रम विरलै मात्र भएका छन् ।

त्यो मिलन समारोहमा श्रीलैन सिंह बाङ्देलले आफ्नो यूरोप भ्रमणको अनुभव सुनाउनु भयो र एक घण्टा जति विभिन्न कविता पाठ ...

राप्तीदून ग्राम विकास केन्द्रको प्रगति

काठमाडौं, भाद्र ४ गते । प्रचार तथा सूचना केन्द्र, वीरगंजबाट प्राप्त समाचार अनुसार त्रिभुवन ग्राम विकास केन्द्र राप्तीदूनले गत आर्थिक वर्षमा गरेको कार्यहरूको प्रगति रिपोर्ट प्रकाशित गरेको छ ।

रिपोर्टमा उक्त केन्द्रले सुलभ तरीकाले सिंचाई गर्न मिलोस् भन्ने अभिप्रायले २२ मील लामो नहर मर्मत गरी ५ हजार रोपनी जमीनमा सिंचाईको व्यवस्थाको साथै उन्नत तरीकाबाट खेती गर्ने सिकाएको र रासायनिक मलको प्रयोग गरेको कुरा उल्लेख गरिएको छ ।

उक्त केन्द्रले ७ हजार १ सय ३४ विभिन्न किसिमका रोगग्रस्त पशुहरूलाई उपचार गर्नुको साथै २० इनार तथा १२ कलभर्टको निर्माण गरेको पनि समाचार छ ।

पानी पोतबारे स्पष्टीकरण

काठमाडौं, भाद्र ४ गते । आर्थिक वर्ष ०१८।१९ को निमित्त पानी पोत बारे स्पष्ट गर्दै अर्थ आर्थिक कार्य विषय मन्त्रालयले एक सूचना प्रकाशित गरेको छ ।

सूचनामा भनिएको छ– आर्थिक वर्ष ०१८।१९ को निमित्त पानी पोत काठमाडौं उपत्यका पहाडी तथा तराई क्षेत्रमा लगाइएको हो । यस सम्बन्धमा केवल सरकारबाट बनाइएको कच्चा वा पक्का बाँध, पैन, नहर इत्यादिबाट पाइने जग्गाहरूमा मात्र निर्धारित दरमा पानी पोत लाग्ने छ। यस बारे सर्वसाधारणमा भ्रम नपरोस् भन्ने हेतुले यो सूचना प्रकाशित गरिएको छ।

चिडियाखानाको लागि विभिन्न देशहरूबाट पशुपक्षीहरू मगाइने

ललितपुर, भाद्र ५ गते । गत वर्ष १ लाख ६ हजार ...

श्री ५ युवराजाधिराजबाट बनेपा अग्निकाण्ड स्थलको निरीक्षण

मौसूफबाट पीडितहरू प्रति सहानुभूति प्रकट
अग्निपीडितहरूद्वारा मौसूफका हजूरमा बिन्तिपत्र

बनेपा, भाद्र ५ गते । विगत २ गतेका दिन श्री ५ युवराजाधिराज वीरेन्द्र वीर विक्रम शाहदेव दिउंसो १ बजे यहां सवारी भइबक्स्यो । मौसूफबाट यहांको गत ०१७ साल वैशाखमा भएको अग्निकाण्ड स्थलको निरीक्षण गरिबक्स्यो ।

अग्निपीडितहरूले मौसूफका हजूरमा एउटा संयुक्त बिन्तीपत्र चढाए । मौसूफबाट अग्निकाण्ड र त्यसबाट पीडितहरूको संक्षिप्त विवरण सुनिबक्स्यो । श्री ५ को सरकारले अग्निकाण्ड स्थलमा शहर योजना गरेको र त्यसको लागि एउटा उप समिति समेत गठन भइसकेको कुरा पनि मौसूफमा बिन्ती चढाइयो ।

मौसूफबाट अग्निपीडितहरू प्रति सहानुभूति प्रकट गरिबक्स्यो । मौसूफ त्यसैदिन राज दरबार फिरिबक्स्यो । स.स.स.

पश्चिम २ नं. मा राष्ट्रिय युवक संगठन

काठमाडौं, भाद्र ४ गते । पश्चिम २ नं. गोस्वाराबाट प्राप्त समाचार अनुसार त्यहां हाल राष्ट्रिय युवक संगठनको गठन भयो।

त्यस अवसरमा भएको युवक सम्मेलनमा बोल्दै स्थानीय राष्ट्रिय निर्देशन अधिकारीले नयां व्यवस्थाको अनुकूल रही आफ्नो वर्गको वास्तविक हितको साथै राष्ट्र निर्माणको महान कार्यमा दृढ प्रतिज्ञ रहन देशका समस्त युवकहरूलाई आव्हान गर्नु भयो ।

गलत समाचार बारे स्पष्टीकरण

काठमाडौं, भाद्र ४ गते । अर्थ तथा आर्थिक कार्य विषय मन्त्रीज्यूको निजी सचिवालयले एक स्पष्टीकरण प्रकाशित गरी त्रिभुवन विश्वविद्यालयको 'आर्थिक समाज' मा अर्थमन्त्री श्रीहृषीकेश शाहले गत शुक्रवार दिनु भएको प्रवचनलाई लिएर स्थानीय दैनिकहरूमा प्रकाशित स्थानीय कुनै संवाद समितिको बिलकुल निराधार रिपोर्ट तर्फ जनताको ध्यान आकर्षित गरेको छ । स्पष्टीकरणमा भनिएको छ– "कम पूंजी र थोरै श्रमले विकास गर्न सक्नु परेको छ ...." भन्ने भनाई एकदम वाहियात, बेबुनियाद तथा साधारण समझले शुद्ध नखाने कुरा हो । अर्थ मन्त्रीको भाषणको दलील बिलकुलै विपरीत किसिमको गरिएकोमा यस सचिवालयले ज्यादै खेद प्रकट गरेको छ ।

स्पष्टीकरणमा अगाडि भनिएको छ– अर्थ मन्त्रीज्यूको आशयको बिलकुलै विपरीत किसिमको उक्त समितिको दरसर बिरोधी रिपोर्ट उपर कोही कोहीले बेबुनियाद उठन्ते खबरको भरमा संपादकीय समेत लेख्ने धृष्टता

(बाँकी चौथो पेजको चौथा कालममा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ट्यूनीशियाले नौसैनिक अड्डालाई खालि गर्ने माग गरेर प्रदर्शन [illegible] काम नरोकेसम्म राष्ट्रपति [illegible]ालले विजार्ता नौनिक तथा [illegible]ाई अड्डावाट फ्रेञ्च सैन्यहरूलाई [illegible]र्काउन इन्कार गर्नु भएकोछ ।

ट्यूनीशियाले विजर्तावाट पूर्ण फ्रेञ्च प्रत्यावर्तनको लागि कमसेकम फ्रान्सवाट एक समय तालिका बारे सम्झौता वार्ता गर्ने वचनको माँग गरेको छ ।

राष्ट्र संघमा बहस हुने अवसर पारेर धेरै ट्यूनीशियाली शहरहरूमा फ्रेञ्च सैन्यको प्रत्यावर्तनको माग गर्दै प्रदर्शनहरू हुंदैछन् । प्रे ट्र.

ब्रिटिश गाइनामा संघर्ष

[illegible] टाउन, भाद्र ५ गते । डा० [illegible] जगनको पिपुल्स प्रोग्रेसिभदलका ३ सय समर्थकहरूले पुलिस माथि हमला गरेका थिए र त्यसमा पुलिसका ३ जवानहरू घाइते भए । यसमा २७ व्यक्ति पक्राउमा परेकाछन् । भीडले बोतल र अरू यस्तै हतियारहरूको पुलिस माथि प्रहार गर्‍यो ।

ब्रिटिश गाइनामा भोलिदेखि [illegible] हुंदैछ । यस उपनिवेशलाई [illegible] शासन प्रदान गर्न नयां संविधा[illegible] अनुसार निर्वाचित हुनाका ३५ [illegible] [illegible] छानिने छन् । प्रे.ट्र.

विद्यार्थीहरूलाई मेरो यही [illegible] छ कि आजको युगमा एक पठक या देशहरूमाई राम्रोसंग सोची आत्म-संयम र अनुशासनको अभ्यास गरी आफ्नो दैनिक पठन पाठनमा अघि बढ्दै गए कठिनाइ या आपत अवश्य कुनै विद्यार्थीमा आइपरोइन । आज सम्मको हाम्रो परम्परा र संस्कृतिले पनि यही मन मंत्र हाम्रो अगाडि ल्याइदिएको छ । आजको शुभदिनमा विद्यार्थीहरू प्रति यही शुभकामना गर्छु कि सबैले पढाइमा तनमन दिई सफल भै मातृभूमि प्रतिको गहन जिम्मेवारी बोक्न सक्ने सामर्थ्यवान् नेपाली बनुन् ।

"जय नेपाल"

अर्थमन्त्री श्रीहृषीकेश शाहको अध्यक्षतामा भएको उक्त त्रि-चन्द्र कलेज दिवस समारोहमा शिक्षामन्त्री श्री विश्वबन्धु थापा तथा अर्थमन्त्री श्रीहृषीकेश शाहले पनि वर्तमान व्यवस्था र श्री ५ को सरकारले शिक्षा लगायत विभिन्न क्षेत्रमा के गर्न लागेको छ भन्ने बारेमा बोल्नु भएको थियो ।

बुर्गिवालाई नेहरूको पत्र

रबात्, भाद्र ५ गते । ट्यूनीशियाका राष्ट्रपति श्रीहबिब बुर्गिबाले भारतीय प्रधान मन्त्री श्री नेहरूको एक पत्र पाउनु भएको छ तर पत्रको [illegible] भने बाहिर [illegible] । प्रे.ट्र.

निर कहीं उक्त चिडियाखानालाई सार्ने बारे विचार हुंदैछ । पुरातात्विक कार्यका लागि १ लाख ५० हजार र चिडियाखानाका लागि १ लाख ८० हजारको रकम पनि श्री ५ को सरकारले २०१८–०१९ सालको बजेटमा खर्चको लागि छुट्याएको छ । हि.स.

नयां कार्य समितिको गठन

काठमाडौं, भाद्र ५ गते । 'महेन्द्र संगीत निकेतन' का कलाकारहरूको एक सभा कुसुम बियालाछी टोलमा बसेको थियो । उक्त सभाले पहिलेको कार्य समिति विघटन गरी नयां कार्य समितिको गठन गरेको समाचार छ । ने.सं.स.

[illegible] एक घण्टा जति विभिन्न कविता पाठ जस्ता कार्यक्रम पनि भएको थियो । स.स.स.

ओखलढुङ्गामा अनेक विकास योजनाहरू पूर्ण

ओखलढुङ्गा, ५ गते । स्थानीय जिल्ला विकास समितिद्वारा शुरू गरिएका २६ वटा योजना मध्ये २३ वटाको निर्माण [illegible] भैसकेकोछ।

उक्त योजनाको सबै काम समाप्त गर्न जिल्ला विकास कोषबाट ५६३०४।– रुपियां व्यय हुने अनुमान गरिएको छ । अन्तर्गत यहां केही स्कूल भवन, काटपुल र पिउने पानीको निमित्त धाराहरू तैयार भैसकेका छन् ।

[illegible] चिडियाखानाको लागि [illegible] देशहरूबाट पशुपक्षीहरू मगाइने

ललितपुर, भाद्र ५ गते । गत वर्ष १ लाख ६ हजार ३ सय दर्शकहरूको स्थानीय चिडियाखाना हेरे। चिडिखाना हेर्नेहरूको संख्या विगत वर्षमा धेरै बृद्धि भएको छ ।

यसै सिलसिलामा थाहा भए अनुसार चिडियाखानाकोलागि विभिन्न देशहरूबाट पशु पक्षीहरू मगाइने भएका छन् । यसरी मगाइनेमा थाइल्याण्डबाट हुक्कू र ऊंठ एवं भारतबाट लंगूर धानम तथा सारस आदि पनि छन् । यस्तै प्रकारले नेपालको वारा जिल्लाबाट हात्ती ल्याइने भएको छ जुन हात्ती यसै महीना भित्र यहां ल्याइने आशा गरिएको छ । ने सं स

पन्ध्र सय अमेरिकी सैनिक पश्चिम बर्लिनमा

बर्लिन, भाद्र ५ गते । पश्चिम बर्लिनस्थित अमेरिकी नगररक्षी सेनामा थप अमेरिकी सेना हिजो पूर्वी जर्मनी पार गरेर यहां आइपुग्यो । अमेरिकी उप-राष्ट्रपति श्रीलिण्डन जोन्सनले स्वयं १५०० अमेरिकी सैनिकहरूको यस नगरमा स्वागत गर्नुभयो ।

अमेरिकी सेनाले नगर प्रवेश गर्दा पश्चिम बर्लिनका नागरिकहरूले सैनिकहरूको अपार हर्षका साथ स्वागत गरे । उप-राष्ट्रपति पनि त्यहां उपस्थित हुनुहुन्थ्यो । पछि उहांले सेनाको निरीक्षण [illegible] । उहांले सैनिकहरूलाई भन्नुभयो– उनीहरू पश्चिम बर्लिनमा युद्धको निम्ति होइन शान्तिको निमित्त आएका हुन् ।

अमेरिकी उपराष्ट्रपतिले पश्चिम बर्लिनका मेयरलाई लेखिएको राष्ट्रपति श्रीकेनेडीको पत्र आफूसंग ल्याउनु भएको थियो ।

बोनमा एक सरकारी प्रवक्ताले भने– पश्चिम बर्लिन बारे अमेरिका [illegible]

वाशिंगटनको एक समाचार अनुसार– राष्ट्रपति श्रीकेनेडीले आफ्नो अवकाशको अवधि पूरा नगरिकन नै पश्चिम जर्मनी र पश्चिम बर्लिनबाट फर्कनु हुने उप-राष्ट्रपति श्रीजोन्सन–संग भेट्न आज व्हाइट हाउस फर्कंदै हुनुहुन्छ ।

श्रीकेनेडीले श्रीजोन्सनलाई पश्चिम बर्लिनस्थित अमेरिकी नगररक्षी सेनालाई बलियो पार्ने कामको सिलसिलामा पठाउन भएको थियो । प्रे. ट्र.

कार्यमा दृढ प्रतिज्ञ रहन देशका समस्त युवकहरूलाई आव्हान गर्नु भयो ।

[illegible] भरमा सपाबकाय समेत लक्ष्य धृष्टता [illegible]

(बांकी चौंथा पेजको चौथा कालममा)

विराटनगरमा काठचिर्ने कारखाना स्थापना गरिने

हेटौंडाको काठचिर्ने कारखानालाई विस्तृत रूपदिने र कैलालीमा प्लाइउड कारखाना खोल्ने बारे विचार

उद्योग-वाणिज्य मंत्रीज्यूद्वारा योजनाहरूमा प्रकाश

काठमाडौं, भाद्र ५ गते । विराटनगरमा काठ चिर्ने कारखाना (स-मिल) स्थापना गरिनेछ । हेटौंडामा रहेको स-मिललाई विस्तृत रूपदिने र कैलाली जिल्लामा प्लाइ उडको कारखाना स्थापना गर्ने कुरामाथि विचार हुंदैछ ।

उक्तकुरा वन, कृषि, खाद्य एवं उद्योग वाणिज्यमन्त्री श्री सूर्यबहादुर थापाले हाम्रो प्रतिनिधि संगको एक भेटमा भन्नुभयो ।

श्री थापाले अगाडि भन्नुभयो– प्लाइउडको कारखाना खडा गरिने बारे अहिले भारतका एकजना उद्योगपति संग कुरा हुंदैछ । कैलालीमा खोलिने प्रस्तावित प्लाइउड कारखाना सम्बन्धी कुराकानी गर्न उक्त उद्योगपति चांडै नै नेपाल आउने भएको कुराबाट पनि उहांले अवगत गराउनु भयो ।

(बांकी चौंथा पेजको तेस्रा कालममा)

रूस उपर पारमाणविक आक्रमणको योजना

पाकद्वारा रूसी आरोपको खण्डन

कराची, भाद्र ५ गते । पाकिस्तानको विदेश मन्त्रालयका एक प्रवक्ताले अमेरिका र "सेण्टो" राष्ट्रहरूको सोभियत संघ उपर परमाणविक आक्रमण गर्ने योजना छ भन्ने कुराको खण्डन गरे ।

संघर्ष प्रारम्भ भएको [illegible] सोभियत संघ उपर परमाणविक [illegible]

(बांकी चौंथा पेजको चौथा कालममा)

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सद्‌उपदेश

नयां व्यवस्था र नयां कार्यहरूमा प्रत्येक देशभक्त नेपालीको सहयोग अनिवार्य छ ।

—श्री ५ महाराजाधिराज

गोरखापत्र

२०१८ साल भाद्र ५ गते सोमबार

विर्ता प्रथाको समाप्ति

'वीरता' बाट विग्रिएर विर्तामा पुगेको हाम्रो भाषामा प्रचलित शब्दले धेरै समयदेखि राष्ट्रलाई ठग्दै आएको छ । देशको कल्याणका निमित्त काम गर्ने वीरहरूलाई सम्मान गर्ने काम राम्रो हो र योराम्रो परम्परा हाम्रो देशमा पनि प्रचलित थियो र अहिले छ पनि । यस्ता राष्ट्रिय वीरहरूलाई जीवित रहुन्जेल उपभोग गर्न र मरेपछि उनीहरूका सन्तानहरूको भरण–पोषणका निमित्त जिन्सी जमीन 'वीरता' दिने चलन चल्यो तर एकतन्त्रीय शासकहरूले 'वीरता' को दुरुपयोग गर्नथाले र आफ्ना छोरा–नाति र कर–कुटुम्ब अनि चाकडीदारहरूलाई 'वीरता' जमीन दिनथाले र वीरतालाई विर्ता भनेर पुकारिन थाल्यो । विर्ताका धनीहरूलाई एक रुपियां पनि बाली–सेर्मा भनौं अथवा कुत तिर्न नपर्किन जमीनको उपभोग गर्न पाइन्छ । सरकारी राजस्वमा कतिपनि जम्मा नगरिकन लाखौंको आमदानी विर्त–जमीनबाट गर्ने मानिस छन्, हजारौं गर्ने त कति छन् कति । विर्ताबाट यति रकम असूल गर्ने र विस्तार विस्तार विर्ताप्रथालाई नै समाप्त पार्ने निश्चय वर्तमान सरकारले जुन दृढताका साथ गरेको छ, यो अति प्रशंसनीय छ । गरीब जनता

तटस्थ शिखर सम्मेलनः– ३

तटस्थ शिखर सम्मेलनमा श्री ५ महेन्द्र

– श्रीऋषिराम ढकाल –

तटस्थ शिखर सम्मेलनका विभिन्न पक्ष छन् र यिनका बारेमा स्पष्ट हुन प्रत्येक नेपालीका निमित्त वाञ्छनीय छ । नेपाली आज एक यस्तो व्यक्तित्वको छहारीमा निरापद भएर ढुक्कले बसेको छ, [illegible] व्यक्तित्व नै दुनियांमा तटस्थ विदेश नीतिको नियोक्ताहरू मध्ये एक छ । यो व्यक्तित्व " श्रेयांसि बहु विघ्नानि " भन्ने आर्ष प्रयोगमाथि पूर्णतः विश्वस्त छ त्यसैले विघ्न बाधाहरू आइपर्नुलाई स्वाभाविक मान्दछ परन्तु आइपरेका विघ्नबाधा–हरूको निराकरण दृढतापूर्वक गर्नु र यिनमाथि विजय प्राप्त गर्नु आफ्नो कर्तव्य संझन्छ । बिना अवरोध मानिसमा जांगरको प्रस्फुटन हुंदैन किनभने रोकावटबाट नै यसको निराकरण गरी लक्षित दिशातिर लम्कने साहस र दृढता प्राप्त हुन्छ । कुनै पनि राष्ट्र वा व्यक्ति, जसका निमित्त पनि अवरोधात्मक स्थिति अवश्यम्भावी भए जस्तै उक्त स्थितिमाथि विजय नपाइ व्यक्ति या राष्ट्र कोही पनि सम्पन्न गतिशील बन्न सक्तैन, यो ध्रुव निश्चित कुरा हो । त्यसैले असंलग्न विदेश नीतिको प्रयोगमा निकै तीक्ष्ण बुद्धिको जरूरत पर्दछ । हामीले उक्त व्यक्तित्व श्री ५ महेन्द्रबाट यस्तै किसिमको तीक्ष्ण बौद्धिक चातुर्यले असंलग्न विदेशनीतीलाई खुबीले सञ्चालित पारिबक्सिएको देखिरहेका छौं ।

यही सन्दर्भमा तटस्थ शिखर सम्मेलनको आयोजना भैरहेको छ । असंलग्न देशहरूको शिखर सम्मेलनको आयोजना भैरहेको छ । यो शिखर सम्मेलन किन र कसरी हुन लागि-रहेकोछ, शङ्का गर्ने चासो नेपाल संझन्न । नेपाल आफ्नो नीतिमा अटल छ त्यसैले आफ्नो एतत्संबन्धी शक्तिका बारेमा विश्वस्त छ ।

स्पष्टता नेपालको लक्ष

नेपाल प्रस्तावित तटस्थ शिखर सम्मेलनका बारेमा कहिल्यै पनि अलमलिएन । भाग नलिएर अर्कोलाई तर्साउन खोज्ने, अनावश्यक किसिमबाट अर्काको चाकडी खोज्ने बानी नेपाल-सित छैन । नेपाल असंलग्न विदेश नीतिका अवलम्बन तेस्रो गुटको निर्माणको निमित्त गर्न चाहन्न किनभने गुटहीन विश्वबाट नै शान्ति र मैत्रीको माग पूरा हुन सक्तछ, गुटमाथि गुट थप्दै गएर त विश्वशान्तिलाई छिन्न भिन्न पारिदिन्छ र विकासोन्मुख मानव समाजको मनस्थितिलाई विध्वंसात्मक बाटोतिर लम्कन बाध्य बनाउ छ । हाम्रो असंलग्न विदेशनीति [illegible]

प्रारम्भिक सम्मेलनको नतीजा

प्रस्तावित शिखर सम्मेलनको उपलब्धि कति कारगर होलान्, प्रारम्भिक सम्मेलनको पृष्ठभूमिमा सोच्ने हो भने थाहा पाउन सकिन्छ । तटस्थ नीति अपनाउने देशहरूका बारेमा निर्णायक स्थितिमा पुग्न धेरै खुडकिलाहरू उकलिनु पर्ने आवश्यकता छ तापनि चाहिने कुरामा मतैक्यता सबै राष्ट्राध्यक्षहरूमा हुन सक्यो भने यी खुडकिलाहरूलाई सजिलैसित पार गर्न सकिने छ भन्ने विश्वास गर्न नसकिने कुनै कारण छैन । तटस्थ विचारधाराका पोषक देशहरूको साथमा शक्ति कम छैन । यिनीहरूको साथमा नैतिक शक्ति ठेसम ठेस छ । यो कुरालाई प्रार-म्भिक सम्मेलनले पारेको प्रभावबाट पनि अडकल लगाउन सकिन्छ । प्रारम्भिक सम्मेलनले शक्तिगुटमा बिभाजित विश्वका नाइकेहरूलाई असंलग्न नीतिको लोहालाई स्वीकार गर्न बाध्य बनाएको छ । हाले अमेरिकी उपविदेशमन्त्री बोल्सले 'अमेरिका तटस्थ शिखर सम्मेलनको [illegible]

आर्थिक [illegible] का सवाल छ, ठूला र केही अगाडि बढिसकेका देशहरूले कम विकसित साना देशहरूलाई सहायता गर्नुपर्दछ, यसलाई सम्मेलनले मान्न इन्कार गर्ने छैन होला । केवल विश्वशान्तिका नारा मात्र लगाउने र विश्वशान्तिका निमित्त सबभन्दा ठूलो चुनौति आर्थिक विषमतालाई हटाउने प्रयास नगर्ने हो भने असंलग्न विदेश नीतिलाई अपनाउने देशहरू-लाई सही अर्थमा विश्वशान्तिका पक्षपाति मान्न व्यावहारिक दृष्टिबाट मुश्किलनै पर्नेछ । सक्नेले असक्तलाई मद्दत गरी सबैलाई उन्नतिका निमित्त अवसर दिने वायुमण्डलको सीर्जना नभइज्जेल विश्वशान्तिको उपलब्धि असंभव नै हुनेछ । जस्तो एक शोषक ग्रामीण भनौं या केही शोषक शहरी उन्नतिका निमित्त बाधक हुन्छन् र अरूको उन्नतिको तगारो बनिरहन्छन् किन भने अरूको उन्नति (जागरण) ले त्यस्ता व्यक्तिहरूको बजार कायम रहन सक्तैन यसबाट उनीहरूको मोज मज्जाका साधन [illegible] यस्तै [illegible]

एक सोभियत संवाददाता पत्रकार रेलीबाट निष्कासित

बोन, भाद्र ५ गते । श्री मिक्टर ग्लासुनोभ नामक एक मास्को रेडियोका सम्वाददाता पूर्व अनुमति बिना टेप रिकार्डिङ्ग गरेको अभियोगमा पश्चिमी जर्मनीको तल्लो सदनको पत्रकारहरू बस्ने स्थानबाट हटाइए भन्ने समाचारमा उल्लेख गरिएको छ ।

उक्त घटना बर्लिनस्थिति उपर बोलिरहनु भएका एक सानो राजनीतिक दलका सदस्यको प्रवचनको सिलसिलामा भएको थियो ।

उक्त सदनका अध्यक्षले प्रवचन-लाई रोक्दै भन्नु भयो– उहांलाई कसैले यहां रिकार्डिङ्ग गर्दैछ भन्ने कुरा थाहा भएको छ । चांडै नै उक्त रिकार्डिङ्गलाई बन्द गर्ने आदेश दिंदै उहांहरूसित पनि उक्त कुराको आफ्नो सुविधा छ भन्ने कुरा पत्रकारहरूलाई बताउनु भयो ।

अध्यक्षका आदेशद्वारा हटाइन लाग्नु भएका श्री ग्लासुनोभको तर्फबाट बोल्दै एक सोभियत संवाददाताले भन्नु भयो– श्री ग्लासु-नोभलाई पूर्व आदेश बिना यहां टेपरेकार्डिङ्ग गर्न अनुमति छैन भन्ने कुरा थाहा थिएन ।

हुरीले गर्दा दुई जनाको मृत्यु

त्रिचर, भाद्र ५ गते । प्राप्त एक समाचार अनुसार– आज बेल्लाका-रीथाटन नामक क्षेत्रमा आएको एक ठूलो हुरीको फलस्वरूप एक बालक र एक जना वयस्कको मृत्यु हुनाका साथै अन्य तीन जनाहरु पनि हताहत भएको खबर छ ।

विज्ञानको प्रगति

विज्ञानको क्षेत्रमा आगामी दश वर्ष भित्रमा अनेक महत्वपूर्ण आविष्कार हुने आशा गर्न सकिन्छ । वर्तमान अनुसंधान कार्यक्रमहरूको गतिबाट यो थाहा हुन्छ कि आफ्नो पृथ्वी, आकाश, समुद्र जीवन तथा जीव–शास्त्रको क्षेत्रमा अनेकानेक नयां कुराहरूको ज्ञान प्राप्त हुने छ ।

यो वर्ष १९६१ हो र १९७० आउनमा अहिले लगभग सवा नौ वर्ष शेष छ । बिज्ञानको प्रगति यी वर्ष भित्रमा धेरै छिटो हुनेछ भन्ने वैज्ञा-निकहरूको भनाइ छ । मानव अन्तरिक्ष यात्रामा उत्तरोत्तर अगाडि बढदै गइरहेछ । यसकारण यो कुरामा [illegible] कि १९७० सम्म

पृथ्वीको सम्बन्धमा ज्ञान

सन १९५७–५८ मा मनाइएको अन्तर्राष्ट्रिय भू–भौतिक वर्ष धेरै सफल रह्यो । यसमा लगभग ७० देशका वैज्ञानिकहरूले भाग लिनुका साथै पृथ्वी एवं आकाशको खोज गरेका थिए । हामीहरूको समुद्री एवं भूकम्प सम्बन्धी ज्ञान पनि बढेको छ । तर यी क्षेत्रहरूसित सम्बन्धित प्राकृतिक घटनाहरू यति जटिल छन् कि यिनको बारेमा अहिले धेरै कुराहरू जान्न सकेका छैनौं । अब मौसमको हाल बताउने गणहरू (कम्प्यूटर्स) को सहायताबाट यी जटिल समस्याहरूलाई समाधान गर्न सकिने छ ।

सम्पादकलाई चिठ्ठी

चिट्ठीपत्रको सत्य साचो झुट्ठोको जिम्मेवारी लेखक उपर नै हुनेछ । –सम्पादक

गोरखापत्रद्वारा अखबारी [illegible] शान्त

सम्पादक महोदय,

तपाईंको गोरखापत्रको चन्दा समाप्त हुने [illegible] पाएं धन्यवाद ।

तपाईं गोरखापत्रले मेरो अखबारी [illegible]लाई शान्त दिएको [illegible] मैले झिकाइनेका अरूसब पत्र पत्रिकाहरूलाई रज गरी तपाईंको [illegible] लिइरहेको छु । नेपालीलाई चाहिने खाजा तपाईं पत्रबाट प्रशस्त मात्रमा पुगिरहेका छ तपाईंलाई धन्यवाद नदिई रहन सक्दिन, धन्यवाद छ ।

भवदीय

राममणि आ. दी.

कागज कारखाना

सम्पादकज्यू

हाम्रो देशमा कयौं किसिमका कोरा मालसामानहरू पाइछन् तर ती माल सामानहरूलाई अहिले सम्म उपयोगी ढंगमा लगाउन सकेका छैनौं । ती सामानहरू यथावत्नै छन् ।

बागलुङ जिल्लामा तयार गरिएको नेपाली कागज समस्त नेपाल अधिराज्यभर प्रसिद्ध छ । यो कागज केवल स्थानीय जिल्लाका श्रमिकहरूको हातबाट तयार गरिएका हुन् ।

कुनै पनि सामान नभई कोरा मानिसहरूले तयार गरिएका कागज-हरू निकै सस्तोमा किन्न पाइन्छ ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

... वाला–समा मनो अथवा कुत तिर्न नपरिकन जमीनको उपभोग गर्न पाइन्छ। सरकारी राजस्वमा कत्तिपनि जम्मा नगरिकन लाखौंको आमदानी विर्ता–जमीनबाट गर्ने मानिस छन, हजारौं गर्ने त कति छन् कति। विर्ताबाट जति रकम असूल गर्ने र विस्तार विस्तार विर्ताप्रथालाई नै समाप्त पार्ने निश्चय वर्तमान सरकारले जुन दृढताका साथ गरेको छ, यो अति प्रशंसनीय छ। गरीव जनता पनि आफूले उपभोग गर्ने जमीनको तिरो तिर्दछन् र सरकारलाई विकास कार्यमा र राजकाजको सञ्चालनमा आर्थिक मद्दत गर्दछन्। उल्टो हजारौं र लाखौंको आमदानी गर्ने (विर्तावाल) हरू एकपैसा पनि तिरो सरकारलाई दिंदैनन्, यो कम असन्तोषजनक कुरा होइन। आज धेरैजसो वीरहरूका सन्तति खान नपाएर हिंडीरहेका छन र यिनीहरूको नामबाट दोस्रोले भुंडी पल्टाएर खाइरहेको छ, यस्तो खराव चलन समाप्त हुनुपर्ने थियो, वर्तमान सरकारले यसै दिशामा पाइला चालेर ... ठूलो आर्थिक राहत देशलाई दिन लागिरहेको छ।

हाल ... मन्त्री श्री शाहले "यसरी विर्ताप्रथालाई प्रोत्साहित पार्दै लैजाने हो भने एकदिन देशको समस्त जमीन विर्ता नै छ र सरकारले जमीनबाट कपनि तिरो पाउने छैन" भन्नु भ' उक्त प्रथालाई समाप्त पार्नु छ भन्ने राय जाहेर गर्नुभएको छ उहांको भनाइ शत् प्रतिशत सत्यमा आधारित छ र सरकारलाई आमदानी गराएर देशलाई आत्मनिर्भर बनाउने दृढतापूर्ण अठोटको परिचायक छ। विर्तावालहरूले समयको माग साथमा आएको यो अठोटलाई बुझेर मद्दत गर्नु नितान्त जरुरी छ। आफ्नो आंठा जोरिएको आफूभन्दा कमजोर मानिस सरकारलाई सधैं तिरो तिर्दछ र देशको प्रत्येक कामको सञ्चालनमा मद्दत गर्दछ, आफू बलियो भैकन पनि केही मद्दत नगर्ने परम्पराबाट लाभको अनुभव विर्तावालहरूले गर्नु पर्दछ। विर्तामा ... तिरो लगाउने अठोट सरकारले गरेको छ, यसबाट सरकारको आमदानी त पर्याप्त बढ्ने नै छ ... विर्तावालाहरूलाई पनि कुनै मर्का पर्ने छैन।

सित छैन। नेपाल असंलग्न विदेश नीतिका अवलम्बन तेस्रो गुटको निर्माणको निमित्त गर्न चाहन्न किनभने गुटहीन विश्वबाट नै शान्ति र मैत्रीको माग पूरा हुन सक्तछ, गुटमाथि गुट थप्दै गएर त विश्वशान्तिलाई छिन्न भिन्न पारिदिन्छ र विकासोन्मुख मानव समाजको मनस्थितिलाई विध्वंसात्मक बाटोतिर लम्कन बाध्य बनाउ छ। हाम्रो असंलग्न विदेशनीति भगवान बुद्धले २५ सय वर्षभन्दा पनि अघि बोधेका शान्तिपूर्ण सहअस्तित्वका ५ सिद्धान्त (पञ्चशीला) मा आधारित छ त्यसैले नेपाल स्पष्टताको हिमायती छ। प्रस्तावित शिखर सम्मेलनमा भाग लिने या नलिने द्विविधात्मक कुराहरू गरेर दुवै गुटलाई खुशी राख्ने प्रयास कतिपय क्षेत्रबाट भैरहेको थियो तापनि नेपालले स्पष्टतालाई अपनाउन बिर्सिएन। सकभर तटस्थ शिखर सम्मेलन हुनै नदिने र भैहाले पनि आफ्नो कठपुतली सम्मेलनलाई बनाउन खोज्ने नीति अख्तियार गरी अव्यावहारिक प्रस्ताव प्रारम्भिक सम्मेलनमा नेपालले पेश गरेन। जसले यसो गरे, तिनलाई आज सानो मुख लाउनु परिरहेको छ। नेपाल सानो छ, यसको मतलब यो कदापि पनि होइन कि नेपालको नेतृत्वमा दूरदर्शिताको र बौद्धिक उच्चताको पनि कमी छ। नेपाली जनता राष्ट्रिय नेतृत्वमा देखिएको दूरदर्शिता र बौद्धिक उच्चताबाट गौरवान्वित छन र यसमाथि गर्व गर्दछन्। वितेको जेठ २० गते हाम्रो राष्ट्रिय नेतृत्व श्री ५ महाराजाधिराजबाट "सम्मेलनमा भाग लिंदा हाम्रो देशको भलाइ नै हुने र संभव भए मै जाने छु" भन्ने हुकुम भएर नेपाली जनताको साथै शिखर सम्मेलनका आयोजकलाई समेत पनि आश्वस्त बनाइबक्सिएको थियो। यो नेपालको असंलग्न विदेश नीतिका स्रष्टा श्री ५ महाराजाधिराजको स्पष्टोक्ति समस्त नेपालीको अन्तःस्थलमा रहेको स्पष्टवादी विचारधाराको प्रतिनिधि वाक्य हो, भावी नेपालको सिर्जना गर्ने अंशियार वाक्य हो। नेपाल व्यावहारिकतामा विश्वास गर्दछ, चापलूसीमा विश्वस्त छैन।

... ठेसम ठेस छ। यो कुरालाई प्रारम्भिक सम्मेलनले पारेको प्रभावबाट पनि अडकल लगाउन सकिन्छ। प्रारम्भिक सम्मेलनले शक्तिगुटमा विभाजित विश्वका नाइकेहरूलाई असंलग्न नीतिको लोहालाई स्वीकार गर्न बाध्य बनाएको छ। हालै अमेरिकी उपविदेशमन्त्री बोल्सले "अमेरिका तटस्थ शिखर सम्मेलनको हार्दिक स्वागत गर्दछ" भन्नु भएको छ। अमेरिकाको यो दृष्टिकोण असंलग्न विदेशनीतिको भर्त्सना गर्ने अमेरिकाको पुरानो बानीको पराजय हो भन्न सकिन्छ। प्रारम्भिक सम्मेलनले निकालेको उपलब्धिले रूसी धारणामा पनि पर्याप्त प्रभाव पारेको छ। अतः असंलग्न विदेशनीतिका प्रवर्तक र उन्नायक देशहरूबाट आफ्नो नैतिक शक्तिलाई यो भन्दा पनि बढी सक्रियतापूर्वक नियोजित पार्ने बल बटुल्नमा केन्द्रित पार्नुपरेको छ। प्रारम्भिक सम्मेलनको नतीजाको छहारीमा उभिएर शिखर सम्मेलनले विश्वशान्ति र आपसी हितका अन्यान्य बाटोहरूलाई खोज्न थाल्यो भने लक्षप्राप्ति अवश्यंभावी छ भन्न सकिन्छ।

समान विचारको सम्मेलन

असंलग्न विदेशनीति अपनाउने देशहरूमा साना – ठूला सबै छन तापनि आर्थिक दृष्टिबाट प्रायशः सबैको स्थिति समान छ। यिनीहरूको राजनीतिक विश्वासमा प्रशस्त मतविभिन्नता छ तापनि गुटबन्दीबाट अलग हुने विचारमा सबको दृष्टिकोण समान छ। घानाका प्रतिनिधिले के भारत, इण्डोनेशिया जस्ता देशहरूलाई पनि साना भन्ने? प्रश्न प्रारम्भिक सम्मेलनमा उपस्थित गराएर गम्भीर कुरातिर सम्मेलनको ध्यान तान्न खोज्नु भएको थियो तर असंलग्न देशहरूका टाउकेहरूको सम्मेलनमा यो प्रश्न त्यति महत्वपूर्ण मानिन सक्तैन किन भने उक्त सम्मेलन सानो र ठूलो छुट्याउन होइन, साना–ठूला समान कुर्सीमा बसी विश्वशान्तिका उपाय निकाल्न र आपसी हितका अन्यान्य समस्याहरूमा छलफल गर्न आयोजित हो त्यसैले यसमा सानो ठूलाको सवाल छैन - असंलग्न विदेश नीतिको सवाल छ। ज...

... मभइज्जल विश्वशान्तिको उपलब्धि असम्भव नै हुनेछ। जस्तो एक शोषक ग्रामीण भनौं या केही शोषक शहरी उन्नतिका निमित्त बाधक हुन्छन् र अरूको उन्नतिको तगारो बनिरहन्छन् किन भने अरूको उन्नति (जागरण) ले त्यस्ता व्यक्तिहरूको बजार कायम रहन सक्तैन जसबाट उनीहरूको मोज मज्जाका साधन चकनाचूर हुन्छन्। यस्तै दृष्टिकोण लिई अनुन्नत देशहरूलाई सबनेले मद्दत गर्ने उदारता नदेखाइ ती देशहरूमा आफ्नो बजार कायमै राख्ने लोभानी पापानिमा लाग्ने हो भने यो निश्चय छ कि विश्वशान्तिका नारा नाममात्रमा सीमित हुनेछन्। असंलग्न विदेश नीतिका प्रवर्तकहरूले यो मूलभूत प्रश्नतिर विचार गर्न कि मार्थ पनि बिर्सनु हुन्न भन्ने मानवतावादी दृष्टिकोण छ। नेपालको पनि यही दृष्टिकोण छ।

श्री ५ महेन्द्रको उपस्थिति

नेपालले तटस्थ शिखर सम्मेलनमा श्री ५ महाराजाधिराजको नेतृत्वमा भाग लिन लागिरहेको छ। यस्ता सम्मेलनमा उपस्थित हुने राष्ट्रनायकको यो पहिलो अवसर हो तापनि बेला बेलामा भै रहेका यस्तै खालका सम्मेलनहरूमा मौसूफको निर्देशन मुताबिक नेपालले आफ्नो विचार राख्दै आएको छ। बांडुङ्ग सम्मेलन र राष्ट्र संघका विभिन्न बैठकहरूमा राष्ट्रनायक श्री ५ महेन्द्रका उच्चतम भावनाहरूलाई नेपालले दृढतापूर्वक राख्दै आएको छ। श्री ५ बाटै पनि आफ्नो विश्वयात्रा क्रममा शक्तिगुटका नाइके देशहरूमा दृढतापूर्वक नेपाललाई असंलग्न नीतिको छहारीमा उभ्याई बक्सिएको छ। श्री ५ महेन्द्रको असंलग्न नीतिको ... निमित्तको देन समस्त मानवताको पक्षमा छ र अब शिखर सम्मेलनले यही कुरा श्री ५ बाट पुनः प्राप्त गर्ने छ। आज केही सहर नै भए पनि लोककल्याणका खातिर राष्ट्रनायकको सवारी ...

... को ज्ञान प्राप्त हुने छ।

यो वर्ष १९६१ हो र १९७० आउनमा अहिले लगभग सवा नौ वर्ष शेष छ। विज्ञानको प्रगति यी वर्ष भित्रमा धेरै छिटो हुनेछ भन्ने वैज्ञानिकहरूको भनाइ छ। मानव अन्तरिक्ष यात्रामा उत्तरोत्तर अगाडि बढ्दै गइरहेछ। यसकारण यो कुरामा आश्चर्य प्रकट गर्न हुन्न कि १९७० सम्म हामी मानवलाई चन्द्रमा या ग्रहहरूसम्म पुगेको देख्ने छौं। विगत पाँच वर्ष भित्र कृत्रिम उपग्रहहरूको उडान पछि मानवले अन्तरिक्षमा उडान गरेको छ। अब अन्तरिक्षमा अन्य आश्चर्यजनक प्रयोगहरू हुन सक्दछन् जसको अहिले कल्पना पनि गर्न सक्तिंदैन।

भावी आविष्कारहरूको भविष्यवाणी गर्ने त अपठ्यारो हुन्छ त्यै पनि आफ्नो वर्तमान ज्ञान र त्यसबाट बनाइएका नयां यन्त्रहरूको सहायताबाट यो त अवश्य नै भन्न सकिन्छ कि अमूक क्षेत्रमा अमूक आविष्कार सम्भव छ।

ब्रह्माण्ड दर्शन

आगामी दश वर्ष भित्रमा खगोल शास्त्रीले आकाश तर्फ धेरै निकटताका साथ हेर्न सक्ने छन्। यसको अर्थ यो हो कि शक्तिशाली दूरवीक्षण यन्त्रहरू तयार हुनेछन् जसलाई कृत्रिम उपग्रहहरूमा लगाई खगोल शास्त्रीहरूले आकाशबाट नै तारा एवं ग्रहहरूको नजिकबाट अध्ययन गर्न सक्ने छन्।

केही रेडियो दूरवीक्षण यन्त्रहरूको सहायताबाट टाढा एवं नजिकका ताराहरूको विषयमा नयां ज्ञान आर्जित गरिएको छ। जसरी शनैः शनैः मानिसहरू पृथ्वीको वायुमण्डल भन्दा माथि आउने छन् त्यसरी नै ब्रम्हाण्डको विषयमा धेरै ज्ञान प्राप्त हुनेछ। ब्रम्हाण्डको उत्पत्तिको बारेमा पनि जानकारी प्राप्त गर्न सम्भव हुने छ।

जीवनको सम्बन्धमा

अन्तरिक्ष–अनुसन्धानबाट जीवनको अनेक रहस्यहरूको पनि उद्घाटन हुने सम्भावना छ। यदि वैज्ञानिकहरू अन्य ग्रहहरूबाट जीवनको चिन्हहरूलाई पृथ्वीमा ल्याउन र तिनीहरूको अध्ययन गर्नमा सफल भए भने यो ब्रम्हाण्डमा जीवनका विषयमा धेरै कुराहरू थाहा हुन सक्ने छन्।

थिए। हामीहरूको समुद्री एवं भूकम्प सम्बन्धी ज्ञान पनि बढेको छ। तर यी क्षेत्रहरूसित सम्बन्धित प्राकृतिक घटनाहरू यति जटिल छन् कि यिनको बारेमा अहिले धेरै कुराहरू जान्न सकेका छैनौं। अब मौसमको हाल बताउने गणहरू (कम्प्यूटर्स) को सहायताबाट यी जटिल समस्याहरूलाई समाधान गर्न सकिने छ।

समुद्रहरूको खोजको निम्ति ... छन्। यी जहाजहरू आधुनिक यन्त्रहरूले सुसज्जित हुनेछन्। आगामी वर्षमा हिन्द महासागरको विस्तृत खोजको कार्यक्रम बनाइएको छ।

दक्षिणी ध्रुव क्षेत्र

दक्षिणी ध्रुव क्षेत्रमा विभिन्न राष्ट्रहरूका बीच एक सन्धि भएको छ जसको द्वारा पृथ्वीको यो विशेष परिस्थितिहरूले युक्त भएको यो भाग एक वैज्ञानिक प्रयोगशाला भएको छ। यी अन्तर्राष्ट्रिय सम्बन्धहरूका साथ साथै विज्ञानको पनि एक ठूलो सफलता भएको छ। यसबाट यो थाहा हुन्छ कि राष्ट्रहरूका बीच सहयोग तथा सद्भावना ल्याउनमा विज्ञान एक शक्तिशाली माध्यम हुन आएको छ।

अन्तर्राष्ट्रिय भू-भौतिक वर्ष पछि अब खोजेको जुन कार्यक्रम रहेको छ त्यसमा जीव विज्ञान, भूगर्भ विज्ञान तथा मानचित्र कलाको क्षेत्र शामेल छ।

आगामी दश वर्ष भित्रमा दक्षिणी ध्रुव क्षेत्रको सम्पूर्ण मानचित्र तयार हुने आशा छ र हामीलाई थाहा हुनेछ कि यो हिमाच्छादित महाद्वीपको रूप र प्रकृति के रहेछ। यो पनि जान्न सकिने छ कि बरफ घटो रहेछ या बढी रहेछ। यो ज्ञानद्वारा दक्षिणी ध्रुव क्षेत्रको उपयोगको पनि योजनाहरू बनाउन सकिने छ।

वस्तुतः विज्ञानको समस्त इतिहास यो कुराको साक्षी छ कि कुनै जटिल समस्याको हल बिल्कुल अज्ञात सूक्ष्मद्वारा हुन्छ। कहिले कांही कुनै एक क्षेत्रको खोजको प्रभाव बिल्कुल भिन्न क्षेत्रमा पर्छ। उदाहरणतः राकस किरणहरूको खोजको प्रभाव आधुनिक चिकित्सा उपर यति परेको छ कि यस क्षेत्रको रूप नै बदलिएको छ।

छन्।

बागलुङ जिल्लामा तयार गरिएको नेपाली कागज समस्त नेपाल अधिराज्यभर प्रसिद्ध छ। त्यो कागज केवल स्थानीय जिल्लाका श्रमिकहरूको हातबाट तयार गरिएका हुन्।

कुनै पनि सामान नभई कोरा मानिसहरूले तयार गरिएका कागजहरू निकै नै सस्तोमा किन्न पाइन्छ। त्यस जिल्लामा कागज बनाउने कोरा सामानहरूलाई ... आधुनिक ढंगबाट काममा लगाउनको निम्ति एउटा कागज कारखाना ... राम्रो खालको कागज उत्पादन हुनुको साथै कागजको मूल्यमा पनि केही कमी अवश्य आउने थियो। अतः यसमा सम्बन्धित विभागले ध्यान देलान् कि भन्ने अनुरोध गर्दछु।

कृष्ण प्रसाद, "दुखी"
बागलुंग

चर्पी ...

सम्पादकज्यू,

जुन सुकै ठाउंमा पनि स्कूल कलेज भएपनि त्यस ठाउंमा पानी र दिशा खड नभई नहुने कुरा विदितै छ। विहान १० देखि दिनको ४ बजेसम्म आ–आफ्ना कलेजहरूमा छात्र छात्राहरू अध्ययन गरिरहन्छन्। तर उनीहरूलाई दिसा पिसाब लाग्दा ठाउं नहुनाले कत्तिको मर्का पर्दछ भन्ने कुरा यहां उल्लेख गरिरहनु पर्दैन। दरबार कलेज ताहाचलमा र त्यस्तै आदर्श हाईस्कूल गणबहालमा यस्तै अन्य स्कूल कलेजहरूमा पनि दिशाखंड र शौचालयहरू छैनन्। उक्त दिशा खंड नभएका स्कूल, कलेजहरूले दिशाखड बनाएर आफ्ना छात्र छात्राहरूलाई सुविधा देलान् भन्ने आशा राख्दछु।

एक कलेज छात्र

हाम्रो देशमा पनि अब वैज्ञानिक अनुसन्धान उपर धेरै जोड दीइखिएको छ र आशा छ कि आगामी दशवर्ष भित्रमा यहां यस्ता अनेक खोजीहरू हुनुका साथै यस्ता वस्तुहरू निर्माण गरिने छन जो औद्योगीकरणमा ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३५५० ३५५०

॥ श्रीः ॥

॥ ॐ तत्सद्ब्रह्मणे नमः ॥

श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयाह्निकसूत्रावलिः

पुरन्दरोपाह्वविठ्ठलात्मजवैद्यनारायणशर्मणा

अनेकग्रन्थेभ्यः सङ्गृहीता.

तस्या इयं विशिष्टसंङ्ग्रहयुता

द्वितीयावृत्तिः,

मुम्बापुर्यां

पञ्चाधिकाष्टादशशत (१८०५) सङ्ख्याके शालिवाहनशाके

आषाढशुक्लैकादश्यामिन्दुवासरे,

निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रापयित्वा

प्राकाश्यं नीता.

अस्याः पुनर्मुद्रणादिः सर्वोऽप्यधिकारो ग्रन्थकर्त्रा स्वाधीनः स्थापितः। इयं च १८६७-ऍः २५ तिसङ्ख्याकराजनियमानुसारतो लेखारूढीकृताऽस्ति ॥

मौल्यं रूप्यकत्रयम् (३).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"अथ श्रीकामाक्षीवर्णनम्." कालिकापुराणे । श्रीभगवानुवाच—कामार्थमागता यस्मान्मया सार्द्धं महागिरौ । कामाख्या प्रोच्यते देवी नीलकूटे रहोगता । १ ॥ कामदा कामिनी कामा कान्ता कामाङ्गदायिनी । कामाङ्गनाशिनी यस्मात्कामाख्या तेन चोच्यते । २ ॥ एका समस्तजगतां प्रकृतिः सा यतस्ततः । ब्रह्मविष्णुशिवैर्देवैः स्तुता सा जगतां प्रसूः । ३ ॥ तत्र पूर्वो ब्रह्मशैलः श्वेत इत्युच्यते बुधैः । मद्रूपधारी शैलस्तु नील इत्युच्यते तथा । ४ ॥ अजीर्णपत्रः सुच्छायो वृक्षस्तत्र तु संस्थितः । आम्रातकः कल्पवृक्षः कल्पवल्लीसमन्वितः । ५॥ पीठे तु सिद्धगङ्गाख्या स्वयं गङ्गा समुत्थिता । आम्रातकस्य निकटे ममप्रीतिविवृद्धये । ६ ॥ तत्रत्या पृथिवी सर्वा देवीरूपा स्मृता बुधैः । नातः परतरं स्थानं पूज्यमस्ति जगत्त्रये । ७ ॥ इति कामाक्षीवर्णनम् ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

॥ श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयाह्निकसूत्रावलिः ॥

॥ श्रीगणेशाय नमः ॥ ॐतत्सत् ॥ अथ श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयब्राह्मणानां नित्यान्हिकसूत्रावलिः प्रारभ्यते ॥ तत्रादौ "मङ्गलाचरणम्"– नमामि देवं करुणाकरं तं विनायकं विघ्नगणं हरन्तम् । गौरीसुतं गौररुचिं गजास्यं वृन्दारकैर्वर्णितचारुलास्यम् ॥ १ ॥ शारदाम्भोजवदनां शारदां वन्दितां सुरैः । वन्दे च कामदां देवीं कामाक्षीं कुलदेवताम् ॥२॥ नमस्कृत्य तातं निजं विठ्ठलं च प्रसूमन्नपूर्णां गुरुं याज्ञवल्क्यम् । तदुक्तान्हिकाचारसूत्रप्रमाणान्मया रच्यते स्वल्पसूत्रावलीयम् ॥ ३ ॥ भिन्नैर्भिन्नैर्मुनीनां वचनजलगणैः पूर्णमाचारसिन्धुं निर्मथ्याचारसारग्रहणमपि बुधैर्दुष्करं चेत्तथापि । निर्वाहार्थं प्रडीनं क्रियत इह न किं खे खगैः स्वात्मशक्त्या तद्वत्सूत्रावलीयं क्रियत इह मया वेद्यमेवं सुधीभिः ॥ ४ ॥

॥ अथ ब्रह्मकर्मविचारः ॥

१. "ब्रह्मकायस्य लक्षणम्." भगवान्धन्वन्तरिः– ...उप०
...नयनः आस्तिक्यमभ्यासो वेदेषु गुरुपूजनम् । प्रियातिथित्वमि...
...ता जगती छन्दः॥
...स्य लक्षणम् ॥ आन्हिककारिकासु–शान्ताः ...स्वरू०–तीक्ष्णश्चण्डः
भूतहिते रताः।क्रोधं कर्तुं न जानन्ति एतद्ब्राह्मण...
...मात्रः अस्य दध्यङ्ङाथर्वण
शीलश्च सौम्यचित्तो दृढव्रतः । समः ...
रश्च संतुष्टः स्वल्पाशी स्वल्पमैथुनः ...तर्धृतिः शिवा शक्तिश्चतस्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परान्नं परवित्तं च पथि वा यदि वा गृहे । अदत्तं नैव गृह्णाति ए० । सत्यं ब्रह्म तपो ब्रह्म ब्रह्म चेन्द्रियनिग्रहः । सर्वभूतदया ब्रह्म ए० ॥ **वसिष्ठः**– योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम् । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् ॥ **महाभारते**– संपतन्मोहजालेषु कदाचिदिह मानुषे । ब्राह्मण्यं लभते जन्तुस्तत्पुत्र परिपालय ॥ **कात्यायनः**– वेदे तथात्मज्ञाने च ब्राह्मणो यत्नवान्भवेत् । एष धर्मस्य सर्वस्य चतुर्वर्गस्य साधकः ॥ **अङ्गिराः**– अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ॥

२. " **भारतवर्षे जन्मफलम्.** " **विष्णुपुराणे**– अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने । यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः॥ कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात् ॥गायन्ति देवाः किलगीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गस्य च हेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥

३. "**ईश्वराराधने साधनानि.**" **याज्ञवल्क्यः**–पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ **मनुः**– वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ **अत्रिः**– वेदं गृहीत्वा यः कश्चिच्छास्त्रं चैवावमन्यते । स सद्यः पशुतां याति संभवानेकविंशतिः॥ **व्यासः**– ब्राह्मणक्षत्रियविशस्त्रयो वर्णा द्विजातयः । श्रुतिस्मृतिपुराणोक्तधर्मयोग्यास्तु नेतरे । तस्मादहरहर्वेदं द्विजोऽधीयीत वाग्यतः । धर्मशास्त्रेतिहासादि सर्वेषां शक्तितः पठेत् ॥ उक्तं च प्रतिषिद्धं च पुनः संभावितं तथा । साक्षेपं निरपेक्षं च ऋषिवाक्यमनेकधा । वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् ॥ एतत्त्रयं यत्र भवेत्प्रमाणं तद्वा-
...कं कुरु तत्प्रमाणम् ॥ **मनुः**– प्रजापतिरिदं शास्त्रं तपसैवासृज-
इत्युच्यते ... वेदानृषयस्तपसा प्रतिपेदिरे । ऋक्संहितां त्रिरभ्यस्य
अजीर्णपत्रः सुच्छ... । साम्नां वा सरहस्यानां सर्वपापैः प्रमुच्यते ॥
कल्पवल्लीसमन्वितः । ...**पुराणोक्तफलप्राप्त्यर्थमित्युक्तम्**। अस्यार्थः
त्थिता । आम्रातकस्य ।... विधिर्नाम **ब्राह्मणम्**। विधेयोनाम **मन्त्रः**।
थिवी सर्वा देवीरूपा स्मृता ...त्यनिन्दान्यतरलक्षणया विधिशेषभूतं
जगत्त्रये । ७ ॥ इति कामाक्षी...

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४. "ईश्वराराधनाऽवश्यकता." विश्वामित्रकल्पे याज्ञवल्क्यः— आत्मनो न सहायार्थं पिता माता च तिष्ठति । न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलम् ॥व्यासः— आलोड्य सर्वशास्त्राणि विचार्यैवं पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ विष्णुशर्मा— आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् । धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥

५. "ब्राह्मणानां वेदाध्ययनावश्यकता." याज्ञवल्क्यः— यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् । वेद एव द्विजातीनां निःश्रेयसकरं परम् । मधुना पायसेनैव स देवांस्तर्पयेद्द्विजः । पितॄन्मधुघृताभ्यां च ऋचोऽधीते हि योऽन्वहम् । यजूंषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः । प्रीणाति देवानाज्येन मधुना वा पितॄंस्तथा । स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत् । सामानि तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा । मेदसा तर्पयेद्देवानथर्वाङ्गिरसं पठन् । पितॄंश्च मधुसर्पिभ्यामन्वहं शक्तितो द्विजः ॥ व्यासः— श्रुतिः स्मृतिश्च विप्राणां नयने द्वे विनिर्मिते । एकेन विकलः काणो द्वाभ्यामन्धः प्रकीर्तितः ॥ तस्माद्ब्राह्मणेन वेदाध्ययनमवश्यमेव कर्तव्यम् ॥

६. "वेदाः." मनुः— त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयम्भुवः । अचिन्त्यस्याप्रमेयस्य कार्यतत्वार्थवित्प्रभो ॥ चरणव्यूहे— तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवन्ति ॥ ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणवेदश्चेति ॥ तत्र ऋग्वेदस्यायुर्वेद उपवेदः अत्रिगोत्रं स्वरूपं तु— पद्मपत्रायताक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णः पञ्चवितस्तिमितः अस्य मधुच्छन्दा ऋषिः सोमो देवता गायत्री छन्दः॥ यजुर्वेदस्य धनुर्वेदउप० काश्यपगोत्रं स्वरू०— पिङ्गाक्षः कृशमध्यः स्थूलगलकपोलस्ताम्रवर्णः षट्प्रादेशदीर्घः अस्य परमेष्ठीऋषिः इन्द्रो देवता त्रिष्टुप् छन्दः ॥ सामवेदस्य गान्धर्ववेदउप० भारद्वाजगोत्रं स्वरू०— स्रग्वी शुचिः वृहच्छरीरः काञ्चननयनः आदित्यवर्णः षडरत्निमात्रः अस्य गौतम ऋषिः अग्निर्देवता जगती छन्दः॥ अथर्वणवेदस्य शिल्पशास्त्राद्युप० वैखानसगोत्रं स्वरू०—तीक्ष्णश्चण्डः कामरूपी विश्वात्मा नीलोत्पलवर्णः दशारत्निमात्रः अस्य दध्यङ्ङाथर्वण ऋषिः आपो देवता अनुष्टुप् छन्दः ॥ ईतिर्धृतिः शिवा शक्तिश्चतस्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदयोषितः । भवन्ति यज्ञकालेऽस्मिन्नीशानादि व्यवस्थिताः॥ "**वेदाङ्गानि**" शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतींषि षड्वेदाङ्गानि ॥ **छन्दः** पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । **शिक्षा** घ्राणं तु वेदस्य मुखं **व्याकरणं** स्मृतम् ॥ लक्षं तु वेदाश्चत्वारो लक्षं भारतमेव च । लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्योतिषम् ॥ **महाभारते**— ब्रह्मन् वेदरहस्यं च यच्चान्यत्स्थापितं मया । साङ्गोपानिषदां चैव वेदानां विस्तरक्रिया । इतिहासपुराणानामुन्मेषं निर्मितं च यत् । भूतं भव्यं भविष्यच्च त्रिविधं कालसंज्ञितम् ॥ श्रुतिस्मृतिसमं पुण्यं पापनाशनमुत्तमम् । चिन्तयेद्ब्राह्मणो भक्त्या धर्मसंस्थापनाय च ॥

७. "**वेदप्रशंसा.**" **पाराशरस्मृतौ**— न कश्चिद्वेदकर्ता स्याद्वेदस्मर्ता चतुर्मुखः । वेदो **नारायणः** साक्षात्स्वयम्भूरिति शुश्रुम॥**मनुः**-श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् । श्रुतिर्वेदस्तु विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्ममे । वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

८. "**शुक्लयजुर्वेदप्रशंसा.**" **यजुर्वेदकल्पतरौ**— सन्मूलो यजुराख्यवेदविटपी जीयात्स माध्यन्दिनिः शाखा यत्र युगेन्दुकाण्डसहिता यत्रास्ति सा संहिता । यत्राभ्रोऽब्धिलता विभान्ति शरशैलाङ्केन्दुभी ऋग्दलैः पञ्चद्वीपुनभोङ्कवर्णमधुपैः खाग्न्यर्कगुञ्जुञ्जितैः॥ **चरणव्यूहे**— द्वेसहस्रे शतन्यूने मन्त्रे वाजसनेयके । इत्युक्तं परिसंख्यातमेतत्सर्वं सशुक्रियम् ॥ **देवीभागवते**—अयातयामानि तु भानुगुप्तान्यन्यानि यातान्यतिनीरसानि । यजूंषि तेषामथ याज्ञवल्क्यो ह्ययातयामानि रवेरवाप ॥ **उक्तं च**— कलौ माध्यन्दिनी शाखा कलौ चण्डीविनायकाविति स्मृतिः ॥ **वायुपुराणे**—शक्रसोमाग्निरुद्राश्च विश्वेदेवास्त्रिलोचनः । विधाता शङ्खपाणिश्च तथा सप्तर्षयोऽमलाः । मृकुण्डकपिलव्यासयाज्ञवल्क्यपराशराः । वाल्मीकिर्नारदोऽगस्त्य इत्येते वाजिशाखिनः ॥

(१) काण्डानि १४ । (२) अध्यायाः ४० । (३) मन्त्राः १९७५ । (४) अक्षराणि ९०५२५ । (५) ॐइत्याकाराण्यनुस्वारचिन्हानि १२३० ।

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९. "यजुर्वेदीयब्राह्मणप्रशंसा." होलिर्भाष्ये– ऋग्वेदी च पितृस्थाने यजुर्वेदी पितामहः । त्रिवेदी प्रपितुः स्थाने विश्वेदेवा ह्यथर्ववित् । वाजिविप्रविशेषेण श्राद्धकर्म निरन्तरम् । शुक्ला प्रशस्ता कृष्णा तु यजुरुक्तनिषेधतः ॥ तस्मात्कव्यानि हव्यानि दातव्यानि द्विजातये । वजिने दत्तमेकं तु तत्कोटिगुणितं भवेत् ॥

१०. "दक्षिणद्वारनिर्णयः"– क्षीराम्भोनिधिमध्यगे सुलसिते चिन्तामणेरालये गीर्वाणद्रुमवाटिकापरिवृते सिद्धयष्टकेऽनावृते । वैडूर्याष्टदलाम्बुजे जनकजायुक्तं वृहत्तारकं सानन्दं तदुपास्महे परतरं रामाभिधानं महः ॥१॥ इह किल पूर्तादौ मण्डपप्रतिष्ठायां दक्षिणद्वारं याजुषानामिति निश्चितम् ॥ तदुक्तं मात्स्ये— बह्वृचौ पूर्वतः स्थाप्यौ दक्षिणे तु यजुर्विदौ । सामगौ पश्चिमे तद्वदुत्तरेण त्वथर्वणौ ॥ अत्र तैत्तिरीया विवदन्ते ॥ अस्माभिरेव पूर्वयजुष्ट्वात्तत्र स्थेयम् ॥ तन्न । तेषां पूर्वत्वाभावात् । तथाहि वेदविभागात्पूर्वमेव दीर्घदर्शितया भगवता भास्करेण सारभागोद्धरणाच्छुक्लानामेव पूर्वत्वं सारत्वं चोक्तं । किञ्च– माध्यन्दिनी तु या शाखा सर्वसाधारणी हि सा । तामेव च पुरस्कृत्य वसिष्ठेन प्रभाषितामिति कल्पद्रुमे-वसिष्ठवचनात् ॥ सर्वेषु वेदमात्रेषु साधारणी तारतम्यरहितेति तस्यार्थः.॥ कात्यायनोऽपि सर्वानुक्रमस्यारम्भे— मण्डलं दक्षिणमक्षिहृद्यश्चाधिष्ठितं येन शुक्लानि यजूंषि भगवान् याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिध्याय माध्यन्दिनीयवाजसनेयके यजुर्वेदाम्नाये सर्के सखिले सशुक्रिये इति । अत्र यजुर्वेदाम्नाय इति वेदाम्नायशब्दयोः पर्यायत्वाद्विरुक्तिः प्रसज्येतेति आम्नायशब्दो मुख्यार्थकः । एवं च शुक्लानां मुख्यत्वं भगवता सूत्रकारेणापि प्रतिपादितम् । अत एव होलिर्भाष्ये— यजुर्वेदस्य मूलं हि भेदो माध्यन्दिनीयकः । सर्वानुक्रमणी तस्याः कात्यायनकृता तु येति ॥ शौनकोऽपि– यजुर्वेदलक्षणकथनमुखेन शुक्लानां मुख्यत्वं प्रतिपादितवान् । यथा मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते । यजुर्वेदः स विज्ञेयो ह्यन्ये शाखान्तराः स्मृताः ॥ अस्यार्थः– मन्त्रब्राह्मणयोर्वेदसंज्ञा यत्र मन्त्रब्राह्मणात्मके वेदे त्रिगुणं विधिविधेयतर्करूपं पठ्यते । तथा च भगवता सूत्रकारेण वेदलक्षणमुक्तम्—विधिर्विधेयं तर्कश्च वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति । अस्यार्थः— विधिर्विधायकं वाक्यम् । विधेयो मन्त्रः तर्कोऽर्थवादः । एतत्रयं माध्यन्दिनीयवेदे एव पठ्यते नान्यत्र ॥ तथा च **शतपथे**— सोऽसावाज्यमधिश्रयतीषेत्वेति वृष्ट्यै तदाह । यदाहेषेत्वेति । अत्र सोऽसावाज्यमधिश्रयतीति विधिः । इषेत्वेति विधेयो मन्त्रः । वृष्ट्यै इत्याद्यर्थवादः ॥ **शुद्धमालायामन्यथैव** त्रिगुणत्वमुक्तम्— माध्यन्दिनयजुर्वेदे खंब्रह्मान्तमुदाहृतम् । तारपूर्वं हि त्रिगुणं नान्यशाखासु मुख्यतः ॥ **पराशरोऽप्येवमेवाह**—समाप्य चोत्तरादिर्यन्मन्त्रब्राह्मणयोर्द्विजाः ॥ ॐ खंब्रह्मेति यो ध्यायन् दर्शकश्चोपवेधसः ॥ ॐकारस्त्रिगुणः प्रोक्तः खंब्रह्म त्रिगुणं तथा । माध्यन्दिनीयशाखायां यजुर्वेदे पठन्ति हीति ॥ यद्वा—ऋषिच्छन्दोदैवतरूपं त्रिगुणं यत्र पठ्यते । मन्त्रब्राह्मणात्मके वेदे स यजुर्वेदो मुख्यः ॥ अतएव **श्रीमतानन्तदेवेन** खंब्रह्मान्तताया अभावाद्गौणत्वं काण्वशाखीयानामप्युक्तम् ॥ **श्रुतिरपि** तेषां गौणत्वमाह । **तानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते** इति ॥ एवमेतेषां यजुषां शुक्लत्वं प्रतिपादयन्त्या श्रुत्या तेषामर्थात्कृष्णत्वमुक्तं भवति ॥ उभयोरेकपण्डित इत्युक्त्या इतरस्य बालिशत्ववत् ॥ व्याख्यातं च **गङ्गाभट्टैः** । शुक्लानि शुद्धानि । **श्रीभगवत्पादैरपि** ॥ शुक्लानि शुभ्राणीत्येतदिति ॥ एवं च तेषां शुभ्रत्वशुद्धत्वे वदद्भ्यां **श्रीभगवत्पादगङ्गाभट्टाभ्यामर्थादन्ये**षामशुद्धत्वकृष्णत्वे सूचिते ॥ अतएव **वेदभाष्यकारेण** शुक्लानीत्यस्य शुद्धानि शुभ्राणि पवित्राणीत्यर्थमुक्त्वा । अर्थादन्येषामशुद्धत्वं कृष्णत्वमपवित्रत्वं च सूचितमित्युक्तम् । **महीधरेणापि**— तानि यजूंषि बुद्धिमालिन्यात्कृष्णानि जातानीति बुद्धिवैशद्याच्छुक्लानीति च ॥ ननु तेषां कृष्णत्वे किं प्रमाणमिति चेच्छृणु—कुपितेन श्रीयोगीश्वरेण वान्तानि अङ्गारभूतानि यजूंषि तित्तिरयो भूत्वा आशुः। इति **भागवते** कथनाद्वान्ताशित्वाच्च । तदुक्तं **श्रीमद्भागवते**— यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः ॥ तैत्तिरीया इति यजुःशाखा आसन्सुपेशला इति ॥ शुक्लानां मुख्यत्वमपि **तत्रैव** । यजूंष्ययातयामानि मुनयेऽदात्प्रसादित इति । अर्थादन्येषामशुद्धत्वं कृष्णत्वमपवित्रत्वं सूचितमित्युक्तं । एवंच शुक्लानामयातयामतां वदता **श्रीमद्भा**-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेनापि । एतेषां यातयामतारूपदोषवत्त्वं सूचितं । अत एव **श्रीभगवत्पादैरपि** बृहदारण्यकान्तिमकण्डिकायां शुक्लानीत्यस्यायातयामानीत्यर्थ उदाहृतः । किंच । स्तोमादेव शाखाविभागात्प्राक् पञ्चदशशाखोद्धरणेऽपि एतेषां यजुष्ट्वव्यवहारात् । स्तोमश्च यजुष्ट्वमेवेति गम्यते ॥ तथाच श्रुतिः— **स्तोमश्च यजुश्च ऋक्चेत्यादिः** । तथा च **यजुरेव शिर** इत्यादीनामपि शुक्लयजुःपरत्वमेवेति गम्यते । एतेन ऋग्वेदोऽथ यजुर्वेद इति । ऋग्वेदस्य प्रथमत्वं वदन्तोऽपि परास्ताः । तैत्तिरीयादिभ्यः पूर्वत्वेऽपि शुक्लेभ्यः पूर्वत्वाभावात् ॥ अत एव **श्रीमतानन्तदेवेन कल्पद्रुमे** कृष्णरुद्रस्यापठनीयत्वमुक्तम् ॥ अत एव **प्रतिज्ञासूत्रभाष्ये** ॥ **अनन्तदेवेन** स्मृतिरुदाहृता ॥ शुक्लं कृष्णमिति द्वेधा यजुश्च समुदाहृतम् । शुक्लं वाजसनेयं तु कृष्णं स्यात्तैत्तिरीयकम् ॥ बुद्धिमालिन्यहेतुत्वात्तद्यजुः कृष्णमीर्यते ॥ व्यवस्थितप्रकरणात्तद्यजुः शुक्लमीर्यत इति ॥ तस्मान्नैतेषां दक्षिणद्वारे स्थातुमधिकारः ॥ शुभ्रकृष्णयोः शुद्धमलिनयोः पवित्रापवित्रयोर्यातयामायातयामयोः शुभ्रशुद्धपवित्रायातयामानामेवाश्रयादित्यलम् ॥ अत एव **दानमयूखे**— दक्षिणे तु द्वारपालौ रुद्रान्पुरुषसूक्तकम् । श्लोकाध्यायं शुक्रियं च मण्डलाध्यायमेव चेत्युक्त्वा ॥ श्लोकाध्यायो देवसवितः । शुक्रियं **ऋचंवाचं** । मण्डलाध्यायं यदेतन्मण्डलं तपतीति शुक्लयजुषामेव सूक्तान्युक्तानि ॥ **गङ्गाभट्टैश्च**—दक्षिणद्वारे अथ कात्यायनानामित्युक्त्वा कात्यायनानामेव मधुपर्क उक्तः ॥ **नारायणभट्टाश्च**—अथ दक्षिणकुण्डे माध्यन्दिनीययजुर्वेदिनो होमविधिः इत्यारामोत्सर्गपद्धतौ प्राहुः ॥ एवमेव **प्रतिष्ठामयूखेऽपि— कमलाकरभट्टा** अप्येवमेवाहुः—न च तैत्तिरीयसूक्तानां जपस्य क्वचिदुक्तत्वान्माध्यन्दिनीयानां होतृत्वेऽपि तेषां जापकत्वं शङ्कनीयम् । हुत्वेतिक्त्वाप्रत्ययस्य समानकर्तृत्वे एव संभवात् ॥ होमकर्तृभिरेव जपः कार्य इति तैरेव व्याख्यातत्वात् । तैरेव च पूर्वश्लोकव्याख्यायां यदेतन्मण्डलमित्यस्यैव पठनीयत्वमुक्तम् । **प्रतिष्ठामयूखेऽपि**—आनोभद्रानुवाकश्च आशुःशिशानकस्तथा । यद्देवास्त्रीणि च पठेत्ततोऽष्टौ च पुनन्तु मा ॥ अभिधा असि सप्तैव दीर्घायुस्ते ऋचं पठेत् ॥ आप्यायस्वेति षट् । नमोस्तु सर्पेभ्यः० । आकृष्णेन० । नमः शम्भवाय० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येका । अग्निर्देवता० । त्रातारमिन्द्रम्० । सोमꣳराजानं० । अन्नपते० । महाँइन्द्रः० । ऋचंवाचं० । इत्यादिशुक्लसूक्तानामेव पठनीयत्वमुक्तम् । न च प्रतिष्ठायाम् । आदित्यो वा एष एतन्मण्डलमिति **गागाभट्टै**रुक्तत्वात्कृष्णैर्विवदितव्यम् । श्लोकाध्यायमित्यस्यैव पद्यस्य तत्रैतादृशव्याख्यानेन शाखानुक्तत्वेऽपि बह्वृचानां श्रीसूक्तपठनमिव तत्र तस्यैव पठनस्य बोधनेन शुक्लानामभावे न किंचित्प्रमाणं गम्यते। किञ्च यदि तस्य तैत्तिरीयास्थितिरेवाभिप्रेता स्यात्तेषामेव मधुपर्कवरणादि ब्रूयात् । न च तदुक्तम् । तस्मात्सूक्तपठनकथनेऽपि स्थितिः शुक्लानामेवेति सर्वमनवद्यम् । एतेन **त्रिविक्रमोऽपि** व्याख्यातो भवति । एतेनोत्सर्गादिविषये **मयूखकारेण** पठितस्य तैत्तिरीयसूक्तकथनस्य सानुकूलत्वं वदन्तः परास्ताः । न च कात्यायनानामिति **गागाभट्टोक्तौ** कात्यायनान्यैः कण्वशाखिभिर्विवदितव्यम् । तेषां काण्वानां कात्यायनत्वाभावात् । तथाहि—मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च । समानप्रवरां चैव द्विजश्चाण्डालतां व्रजेत् ॥ प्रवरान्पितृगोत्रेषु मातृगोत्रे न चिन्तयेत् । गोत्रमेव त्यजेन्मातुरिति कात्यायनोऽब्रवीत् ॥ इत्यादि कात्यायनेनोक्तत्वेऽपि मातुलकन्यापरिणेतृत्वात्सत्वे वा गुरुवचनपालकत्वाभावेन विश्वामित्रज्येष्ठपञ्चाशत्पुत्रवद्दूषितत्वात् । अत एव पञ्चदशशाखान्तर्गतत्वेऽपि न तैरस्माभिः सह विवाहादिः । अपि च गौणमुख्ययोर्मुख्यस्यैव स्वीकरणीयतया तेषां मुख्यत्वाभावान्न तेषामधिकारः । तथाहि—यस्यां सूत्रं भवेत्सा हि मुख्या शाखेति कीर्त्यत इति प्रसिद्धेर्भगवतः **श्रीमत्कात्यायनस्य** माध्यन्दिनीयशाखानुसारेणैव प्रवृत्तेः तेषामेव मुख्यत्वात् । तथाहि—एषा हि भगवतां **सूत्रकाराणां** शैली लक्ष्यते । यन्मुख्यशाखोक्तमन्त्रप्रतीकमुपाददते इतरशाखोक्तांश्च सकलान्पठन्ति । इति सकलप्रसिद्धा । तथा च—श्रीमता **सूत्रकारेण** माध्यन्दिनीशाखोक्ता मन्त्राः । **अयमग्निः पुरीष्यो रयिमान् शिवोनामासीत्यादयः** प्रतीकमात्रेणोक्ताः। उलूखले मुसले आप्यायताम् ध्रुवा हविषा इत्यादयश्च कण्वशाखोक्ताः संपूर्णाः । तथा च माध्यन्दिनीयानुसारेणैव भगवतः सूत्रकृतः प्रवृत्तेस्तेषामेव मुख्यत्वम् । अत एव **बृहन्नारदीये**—यजुर्वेदमहाकल्पतरोरेकोत्तरं शतम् । शाखास्तत्र शिखाकारा दशपञ्चाथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लगाः । तत्रापि मुख्यं विज्ञेयं शाखा माध्यन्दिनी यजुरिति । किञ्च केषांचिन्मते कात्यायनाभिधायाः सप्तदशशाखायाः सत्वान्नैतेषां कात्यायनत्वम् । न चास्तु तेषामेव दक्षिणद्वारपालत्वम् । तदभावे च प्रथमशाखीयत्वादस्माभिरेव स्थेयमिति वाच्यम् । माध्यन्दिनशाखायाः सर्वशाखासाधारणस्य वसिष्ठेनाभिहितत्वान्नारदेन च मुख्यत्वाभिधानादन्यासां गौणत्वाद्द्वयोर्गौणयोः परस्परकार्यसंपादकत्वाभावान्माध्यन्दिनीयानामेव मुख्यत्वात्सकलशाखाकार्यसंपादकत्वात्तैरेव दक्षिणद्वारि स्थेयम् । न कृष्णैर्न वा काण्वैरिति सकलमभिरामम् ॥ यत्पादाम्बुरुहार्चनात्समभवन्विष्णवीशपद्मोद्भवास्त्रैलोक्यावननाशसर्गनिपुणा यस्यैव कारुण्यतः ॥ दक्षद्वारविनिर्णयः समभवत्तस्यामरेशस्य च श्रीरामस्य पदाम्बुजातयुगुले नारायणेनार्पितः । यद्वा मयात्र लिखितं सदथाप्यसद्वा ग्रन्थान्विलोक्य विविधान्स्वमतानुरूपम् । माध्यन्दिनीयविबुधा अवलोक्य तच्च दीने मयि प्रददतु ध्रुवमाशिषोर्याः ॥ इतिश्रीमच्छुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायी देवोपनामक-नारायणसूरिकृतो दक्षिणद्वारनिर्णयः समाप्तः ॥

११. **"नित्यकर्मणि विशेषविचारः."** छान्दोग्योपनिषदि— **यदेव विद्यया करोति श्रद्धया वीर्यवत्तरं भवति॥** बुधः—न्यायागतेन द्रव्येण कर्माणि कुर्यादिति ॥ **याज्ञवल्क्यः**— योऽसौ विस्तरशः प्रोक्तः स्नानस्य विधिरुत्तमः । असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते । स्नानमन्तर्जले चैव मार्जनाचामने तथा । जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम् । अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः । स्नानाचरणमित्येतत्समुद्दिष्टं महात्मभिः । यथाहनि तथा [illegible]नं स्नायादनातुरः । दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तद[illegible]ब्रूवत् ॥ (गेहे चेत्तदमन्त्रवदित्यस्य वर्षासु वृष्ट्यतिशयजनितशीतभयेन[illegible]मना[illegible]शिशिरयोरत्यन्तशीतभयेन च यदा गृहाभ्यन्तरेऽवश्यक[illegible] भवे[illegible] प्रातःस्नानं करोति तदा तेन मलप्रक्षालनंरूपकममन्त्रकमेव स्ना[illegible]यकाले कार्यमित्यर्थः) ॥ **कात्यायनः**— अल्पत्वाद्धोमकालस्य बहुत्वात्स्ना[illegible]

* अयं दक्षिणद्वारनिर्णयसंग्रहः त्र्यम्बकक्षेत्रनिवासिनो धारणेत्युपनाम्नः परलोकगतस्याम्बादासात्मजबाबाशास्त्रीसंज्ञकस्य ग्रन्थसंग्रहात् करवीरक्षेत्रस्थबावामहाराजानुजनानामहाराजद्वारा महता प्रयत्नेन संपादितः ॥

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकर्मणः । प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः ॥ (तनुयाद्वि-स्ताराविधिना न कुर्यादित्यर्थः । यदा तु निरग्नेर्होमादिनिमित्तत्वेन स्ना-नादेरतित्वरा नास्ति तदा तेनासङ्गवकालपर्यन्तं यथाविधिना स्नानस-न्ध्यादिकर्माणि कार्याणि) **उक्तं च**—अस्नात्वा स्वमलं भुङ्क्ते अज-प्त्वा पूयशोणितम् । अजुह्वंश्च कृमीन्कीटानददंश्च शकृत्तथा ॥ **मनुः**— नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् । देवताभ्यर्चनं चैव नित्यहोमं तथैवच । देवतानां गुरो राज्ञः स्नातकाचार्ययोस्त-था । नाक्रमेत्कामतश्छायां बभ्रुणो दीक्षितस्य च । मैत्रप्रसाधनं स्नानं दन्तधावनमञ्जनम् । पूर्वाण्हे एव कुर्वीत देवतानां च पूजनम् । दै-वतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् । ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु । गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् । सर्वतः प्रति-गृण्हीयान्नतु तृप्येत् स्वयं ततः । नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् । द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् । देव-स्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः । स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥ उद्धृत्य वामहस्तेन पानीयं न पिबेद्द्विज इति ॥ **हारीतः**— अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितम् । नानुष्ठेयं मनुष्यै-स्तत्तदुक्तं कर्म चाचरेत् ॥ **वराहपुराणे**—स्नानसन्ध्यातर्पणादिजपहो-मसुरार्चनम् । उपवासवता कार्यं सायंसन्ध्याहुतिस्तथा ॥ **कर्मप्रदीपे**—पित्र्यमन्त्रानुद्रवणे आत्मालम्भे अवेक्षणे । अधोवायुसमुत्सर्गे प्रहासेऽ-नृतभाषणे । मार्जारमूपकस्पर्शे आक्रुष्टे क्रोधसंभवे । निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत् । तथा च तैलयन्त्रस्य शब्दो यावत्प्रवर्त्तते । ताव[illegible] न कर्तव्यं शूद्रान्त्यजगणस्य च । भोजने वहने दाने उप-हारे प्र[illegible]ग्रहे । सन्ध्यात्रयेऽम्बुपाने च पूर्वं पश्चाद्द्विराचमेत् ॥ **मण्डनः**—म[illegible] यदावश्यं कर्म कर्तुं न शक्यते । गौणकालेऽपि कर्तव्यं [illegible]यत्रेदृशो भवेत् ॥ **याज्ञवल्क्यः**— देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः । नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादिवा । देवतातिथि-कार्यार्थं गुरुभृत्यार्थमेव च । सर्वतः प्रतिगृण्हीयादात्मवृत्त्यर्थमेव च ॥ **अग्निपुराणे**— सायं प्रातश्च यः सन्ध्यामुपास्ते शुद्धमानसः । जप-न् हि पावनीं देवीं गायत्रीं वेदमातरम् । यावन्तश्च पृथिव्यां हि चीर्ण-वेदव्रता द्विजाः । अचीर्णव्रतभेदा वा विकर्मपथमाश्रिताः । तेषां हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पावनार्थाय गायत्री नित्यमेव हि ॥ **सन्ध्याकल्पे**— कुशहीना तु या सन्ध्या तिलहीनं तु तर्पणम् । दानं च दक्षिणाहीनं तत्सर्वं निष्फलं भवेत् ॥ सन्ध्या येन न विज्ञाता सन्ध्या नैवाप्युपासिता । जीवन्नेव भवेच्छूद्रो मृतः श्वा चाभिजायते । न तिष्ठति तु यः पूर्वां नोपास्ते यस्तु पश्चिमाम् । स साधुभिर्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः॥ **भरद्वाजः**—सूतके मृतके वापि प्राणायाममम‌न्त्रकम् । तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत् । गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् । मार्जनं तु न वा कार्यमुपस्थानं न चैव हि ॥ **उक्तंच**— तिलकं ब्रह्मसूत्रं च पाद्यमाचमनीयकम् । तिष्ठन्नैव सदा कुर्यात्सद्यः शूद्रो भवेद्द्विजः । दीर्घकाष्ठे शिलापृष्ठे नौकायां शकटे तटे । विवाहे बहुसंपर्के स्पर्शदोषो न विद्यते ॥ **अङ्गिराः**—अग्न्यागारे गवां गोष्ठे देव ब्राह्मणसन्निधौ। आहारे जपकाले च पादुकानां विसर्जनम्॥ **नागदेवः**—दिवोदितानि कर्माणि प्रमादाद्द्विकृतानि वै । शर्वर्याः प्रथमे यामे तावत्कुर्याद्यथाक्रमम् । राष्ट्रक्षोभे नृपक्षोभे रोगार्ते क्षयसूतके । सन्ध्यावन्दनविच्छित्तिर्न दोषाय कदाचन । देवाग्निद्विजवैद्यादिकार्ये महति वा भवेत् । सन्ध्यालोपो न दोषोऽस्ति येन तत्पुण्यसाधनम् ॥ **ब्राह्मणसर्वस्वे हलायुधः**— शिरसोऽक्षरदैवत्यमाव्हानं च विसर्जनम् । ध्यानं जपप्रयोगं च येषु कर्मसु यादृशम् । ज्ञातव्यं ब्राह्मणैर्यत्नाद्ब्राह्मण्यं येन वै भवेत् । स्त्रीशूद्रपतितांश्चैव पाखण्डं च रजस्वलाम् । स्नानकाले न संभाषेज्जपहोमादिकेषु च ॥ **स्मृतिसंग्रहे**—समयाचारिको धर्मो जातिदेशकुलोद्भवः । ग्रामाचाराः परिग्राह्याः सर्वत्रैव यथोदितम् । **याज्ञवल्क्यः**— देशे काल उपायेन द्रव्यं श्रद्धासमन्वितम् । पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥ **बृहस्पतिः**—अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । स्वधर्मे च । व्रतस्थानं शौचमेतत्प्रकीर्तितम् ॥ **गृह्यपरिशिष्टे**— बव्हल्पं वा स्वगृह्योक्तं यस्य यावत्प्रचोदितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ यन्नाम्नातं स्वशाखायां पारक्यमविरोधि च । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥ **मनुः**— कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः॥ **ब्राह्मे**—ब्रह्मण्याधायकर्माणि निःसंगः कामवर्जितः । प्रसन्नेनैव मनसा कुर्वाणो याति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्पदम् ॥ **याज्ञवल्क्यः**— आर्षं छन्दश्च दैवत्यं विनियोगं तथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः । अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपम् । होममन्तर्जलादीनि तस्य चाल्पफलं लभेत् । यजुर्वेदस्य मन्त्राणां सम्यक्पाठस्य सिद्धये । प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् । सावित्रीं चानुपूर्व्येण ततो वेदं समारभेत् ॥ आत्मशाखामधीत्यादावन्यशाखामतः परम् । स्वशाखां यः परित्यज्य शाखारण्डः स उच्यते ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ **आश्वलायनः**— ऋषि दैवतच्छन्दांसि प्रणवं ब्रह्मयज्ञके । मन्त्रादौ नोच्चरेच्छ्राद्धे यागकालेऽपि चैव हि ॥ **श्रावणिपद्धतिः**— स्वरवर्णलयोपेतं मन्त्रस्थानक्रियान्वितम् । वेदमेवं पठेद्यस्तु स्वाध्यायफलमश्नुते ॥ **शौनकः**— ॐकारे व्याहृतीस्तिस्रो गायत्रीं त्रिपदां तथा । मनसैवमनुस्मृत्य वेदादिकमुपक्रमेत् ॥ **मनुः**— वेदापाकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥ नैत्यके नास्त्यनध्यायो ब्रह्मसूत्रं हि तत्स्मृतम् ॥ **स्मृतिमहार्णवे**— अन्वाधाने ऋषिच्छन्दौ यजुषां नैव कारयेत् ॥ **कात्यायनपरिभाषाखण्डे**— **एकश्रुति दूरात्संबुद्धौ यज्ञकर्मणि ॥ प्रतिज्ञासूत्रे— तानुस्वराणि छन्दोवत्सूत्राणि ॥ पारस्करगृह्यसूत्रे हरिहरभाष्ये**— स्वाहां कुर्यान्न मन्त्रान्ते न चैव जुहुयाद्धविः । स्वाहाकारेण हुत्वाग्नौ पश्चान्मन्त्रं समापयेत् ॥ **कृष्णभट्टीये**— न च स्मरेदृषिच्छन्दः श्राद्धे वैतानिके मखे । अग्निहोत्रे वैश्वदेवे विवाहादिविधौ तथा । होमकाले न द[illegible] प्रायश्छन्दर्षिदेवताः । शान्तिकादिषु कर्मेषु मन्त्रपाठजपादिषु । होमे नैव प्रकर्त्तव्याः कदा[illegible]र्षिदेवताः ॥ **होलिर्भाष्ये**— ॐ[illegible]ज्ञं त्रिगुणं त्र्यक्षरं च त्रिदैवतम् । त्रिब्रह्मेति त्रिषु स्थानं त्रि[illegible]प्रतिष्ठितम् ॥ **आपस्तम्बः**— तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् । त्रिमात्रस्तु प्रयोक्तव्यः कर्मारम्भेषु सर्वशः । तिस्रः सार्द्धाश्च कर्त्तव्या मात्रास्तत्वार्थचिन्तकैः ॥ **शौनकः**— मन्त्रब्राह्मणयोर्वेदस्त्रिगुणो यत्र पठ्यते । यजुर्वेदः स विज्ञेयो ह्यन्ये शाखान्तराः स्मृताः ॥

१२. "ऋषिच्छन्दादि." छन्दोगब्राह्मणम्—यो हि वार्षो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्निहोत्रं न दक्षिणा। हीनाचाराश्रितं भ्रष्टं तारयन्ति कथञ्चन। तपोदानोपवासेषु व्रतेषु नियमेषु च। इज्याध्ययनधर्मेषु योऽनासक्तः स निष्क्रियः॥ **पराशरः**— सन्ध्यास्नानं जपो होमः स्वाध्यायो देवतार्चनम्। वैश्वदेवाऽतिथेयश्च षट् कर्माणि दिने दिने॥ **दक्षः**— आचारः प्रथमो धर्मः श्रुत्युक्तः स्मार्त एव च। तस्मादेतत्समायुक्तं गृह्णीयादात्मनो द्विजः। आचाराल्लभ्यते पूजा आचाराल्लभ्यते प्रजा। आचारादन्नमक्षय्यं तदाचारस्य लक्षणम्। आचारात्प्राप्यते स्वर्ग आचारात्प्राप्यते सुखम्। आचारात्प्राप्यते मोक्ष आचारात्किन्न लभ्यते॥ **तस्मात्**—चतुर्णामपि वर्णानां आचारो धर्मपालनम्। आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः। दुराचारो हि पुरुषो लोके भवति निन्दितः। दुःखभोगी च सततं रोगी चाल्पायुषी भवेत्॥ **दक्षः**— अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः। आश्रमेण विना तिष्ठन्प्रायश्चित्ती भवेद्द्विजः॥ **विष्णुपुराणे**— यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन यत्। द्वापरे यच्च मासेन अहोरात्रेण तत्कलौ। तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः। प्राप्नोति पुरुषस्तेन कलिमाप्नोति मानवः॥ **कपर्दिकायाम्**— यत्रैविद्यात्मकं कर्म श्रौतं तदभिधीयते। श्रुतिस्मृत्यात्मकं कर्म स्मार्तं चैव तदुच्यते। याजुर्वेद्यो मखेऽध्वर्युर्होता ऋक्शाखिकस्तथा। उद्गाता सामवेदी च श्रौतं कर्म त्रिधा स्मृतम्॥

१६. **“सर्वकर्मसिद्ध्यर्थं सङ्कल्पावश्यकता.” यजुःसंहितायाम्— अग्ने व्रतपते व्रतं चरिष्यामि। इदमहमनृतात्सत्यमुपैमि सत्यं देवा अनृतं मनुष्या इति श्रुतेः॥ बृहद्यमः**—सङ्कल्पं च यथा कुर्यात्स्नानदानव्रतादिके। अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति च॥ **मार्कण्डेयः**—सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसंभवाः। व्रतं नियमधर्मौ च सर्वे सङ्कल्पजाः स्मृताः॥ **ऋषिभट्टीये**—सङ्कल्पश्चेन्मनसि मननं प्रोक्तरीत्याथ वाचा व्याहर्तव्यं तदनु च करेणाम्बुसेकस्त्रिधेति। वाङ्मात्रेण त्वरितकरणे केचिदिच्छन्ति चाम्बुक्षेपस्थानेऽञ्जलिमुपदिशन्त्यन्य एष्विष्ट आद्यः॥

१७. **“समावर्तनोत्तरं ब्राह्मणस्य सदावर्तनम्.” पारस्करगृह्यसूत्रे— स्नातस्य यमान्वक्ष्यामः। कामादितरो नृत्यगीतवादित्रा-**

Nepal Sanskrit University, Balmeeki Campus, Kathmahdu

CC-0. In Public Domain. Digitization by eGangotri

णि न कुर्यान्न च गच्छेत्कामं तु गीतं गायति चैव गीते वा रमत इति श्रुतेर्ह्यपरं क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेदुदपानावेक्षणवृक्षारोहणफलप्रपतनसंधिसर्पणविवृतस्नानविषमलङ्घनशुष्कवदनसन्ध्यादित्यप्रेक्षणभैक्षणानि न कुर्यान्न ह वै स्नात्वा भिक्षेताप ह वै स्नात्वा भिक्षां जयतीति श्रुतेर्वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदित्यप्स्वात्मानं नावेक्षेताजातलोम्नीं विपुᳲपीᳲषण्ढं च नोपहसेन्न च गच्छेद्गर्भिणीं विजन्येति ब्रूयात्सकुलमिति न कुलं भगालमिति कपालं मणिधनुरितीन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीतोर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात्स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृञ्जीत विकृतं वासो नाच्छादयीत दृढव्रतो वधत्रः स्यात्सर्वत आत्मानं गोपायेत्सर्वेषां मित्रमिव ॥ ९ ॥ तिस्रो रात्रीर्व्रतं चरेदमाᳲसाश्यमृन्मयपायी स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसंभाषणं च तैः शवशूद्रसूतकान्नानि च नाद्यान्मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्सूर्याच्चात्मानं नान्तर्दधीत तप्तेनोदकार्थान्कुर्वीतावज्योत्य रात्रौ भोजनᳲसत्यवदनमेव वा दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवांश्चेत् ॥ १० ॥

१८. "नित्यकर्मविधौ संक्षेपेण कारिकाः." वाचस्पतौ दक्षः— प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् । उदयास्तमयं यावन्न विप्रः क्षणिको भवेत् । नित्यनैमित्तिकैर्मुक्तः काम्यैश्चान्यैरगर्हितैः । यः स्वकर्म परित्यज्य यदन्यत्कुरुते द्विजः । अज्ञानाद्यदि वा मोहात्स तेन पतितो भवेत् । दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते । द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा । षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् । विभागेष्वेषु यत्कर्म तत्प्रवक्ष्याम्यशेषत इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ प्रथमभाँगकृत्यानि ॥

१९. "कारिकाः." वाचस्पतौ दक्षः—उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत् । ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम् । सन्ध्यायां च प्रभाते च मध्याह्ने च ततः पुनः । सन्ध्यां नोपासते यस्तु ब्राह्मणो हि विशेषतः । सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते । स्वयं होमे फलं यत्तु तदन्येन न जायते । ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि । देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् । देवकार्याणि पूर्वाण्हे मनुष्याणां च मध्यमे । पितृणामपराण्हे च कार्याण्येतानि यत्नतः । पौर्वाण्हिकं तु यत्कर्म यदि तत्सायमाचरेत् । न तस्य फलमाप्नोति वन्ध्या स्त्री मैथुनाद्यथा । दिवसस्याद्यभागे तु सर्वमेतद्विधीयते ॥

२०. "प्रातरुत्थानकालः." मनुः—ब्राह्मे मुहूर्ते बुध्द्येत धर्मार्थावनुचिन्तयेत् । कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च । वेदतत्त्वार्थ ईश्वरः ॥ " ब्राह्ममुहूर्तः " विष्णुपुराणे— रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः । स ब्राह्म इति विज्ञेयो विहितः स प्रबोधने॥ पञ्चपञ्च उषःकालः सप्तपञ्चारुणोदयः । अष्टपञ्च भवेत्प्रातस्ततः सूर्योदयः स्मृतः ॥ धन्वन्तरिः— धर्मार्थकामप्रीत्यर्थं सतां ग्रहणमुत्तमम् । प्राप्नुयात्स्वर्गवासं च नित्यमेव समाचरेत् । " प्रातरुत्थानाभावे दोषः " रत्नावल्याम्—ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी । तां करोति द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति ॥

२१. "ईश्वरनामोच्चारणम्." व्यासः—हेजिव्हे रससारज्ञे सर्वदा मधुरप्रिये । नारायणाख्यपीयूषं पिब जिव्हे निरन्तरम् । त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव । प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये । सुप्तः प्रबोधितो विष्णो हृषीकेशेन यत्त्वया । यद्यत्कारयते कर्म तत्करोमि तवाज्ञया । तस्मान्नारायण, रामकृष्ण, राधाकृष्ण, गौरीशङ्कर, विष्णो, गजानन, सच्चिदानन्द इत्यादि नामस्मरणं नित्यमेव कर्त्तव्यम् ॥

---

*टीप प्रथमादिभागास्त्वष्टधा विभक्तदिवसांशाः ते च प्रत्येकं स्थूलमानेन पादोनचतुर्घटिकात्मका ज्ञातव्याः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२. "शुचिर्भूतता." कात्यायनः—उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः । परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ॥ अङ्गिराः—उत्थाय पश्चिमे रात्रे तत आचम्य चोदकम् । मुखशुद्ध्यर्थमादौ तु गण्डूषत्रितयं चरेत् ॥

२३. "स्वकरतलाद्यवलोकनम्." आचारप्रदीपे—कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती । करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥ अन्यच्चः— भारद्वाजमयूराणां चाषस्य नकुलस्य च । प्रभाते दर्शनं श्रेष्ठं वामपृष्ठे विशेषतः ॥ आचारप्रदीपे नागदेवः—श्रोत्रियं सुभगां गां च अग्निमग्निचितिं तथा । प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते ॥

२४. "प्रातःकाले दर्शनायोग्याः पदार्थाः." नागदेवः—पापिष्ठं दुर्भगं चान्धं नग्नमुत्कृत्तनासिकम् । प्रातरुत्थाय यः पश्येत्तत्कलेरुपलक्षणम् । भल्लातकं कर्षफलं काकमार्जारमूषकान् । क्लीबं च गर्दभं चैव न पश्येत्प्रातरेव हि ॥

२५. "भूमिस्पर्शनम्." मदनपारिजाते—समुद्रवसने देवि पर्वतस्तनमण्डले । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

२६. "प्रारुत्थानानन्तरं नद्यादौ जलग्रहणप्रकारः." नागदेवः—अभावे कूपवापीनामनपाये पयोभृताम् । रजोदुष्टेऽपि पयसि उपभोगो न दुष्यति । तस्मात्प्रथममुद्धृत्य जलं भूम्यां परित्यजेत् ॥ व्यासः—सरित्सरस्सु वापीषु गर्त्तप्रस्रवणादिषु । स्नायात्प्रथममुद्धृत्य पञ्च पिण्डांस्तु वारिणा ॥

२७. "विण्मूत्रोत्सर्गविधिः." पारस्करगृह्यसूत्रे—तिष्ठन्न मूत्रपुरीषे कुर्यात्स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृञ्जीत । विकृतं वासो नाच्छादयीत । मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात् ।

२८. "शौचस्थलम्." अङ्गिराः—अयज्ञियैरनार्द्रैश्च तृणैः संछाद्य मेदिनीम् ॥ कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः ॥ बौधायनः—देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं विधीयते ॥ दशहस्तान्परित्यज्य मूत्रं कुर्याज्जलाशये । दश हस्तान्पुरीषार्थे तीर्थे नद्यां चतुर्गुणम् ॥ अवकृष्य च विण्मूत्रं काष्ठलोष्ठतृणादिना । उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः । धाराशौचं न कुर्वीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौचशुद्धिमभीप्सता । चुलकैरेवे कर्तव्यं हस्तशुद्धिविधानतः । तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा ॥

२९. "**शौचे उक्ता दिशः.**" **पराशरः**—ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेम च । नैर्ऋत्यामिषुविक्षेपादतीत्याभ्यधिकं भुवः॥ **यमः**—प्रत्यङ्मुखस्तु पूर्वाह्णेऽपराह्णे प्राङ्मुखस्तथा । उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥ **मनुः**—छायायामन्धकारे च रात्रावहनि वा-द्विजः । यथासुखं मुखं कुर्यात्प्राणबाधाभयेषु च । रात्रौ गृहेऽपि यथा-सुखं मुखं कुर्यात् ॥

३०. **शौचे उपवीतधारणप्रकारः.**" **अमरे**—उपवीतं ब्रह्म-सूत्रं प्रोद्धृते दक्षिणे करे । प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् । **आ०का०**—मूत्रे तु दक्षिणे कर्णे पुरीषे वामकर्णके । उपवीतं सदा धार्यं मैथुने तूपवीतिवत् ॥ **अङ्गिराः**—कृत्वा यज्ञोपवीतं तु पृष्ठतः कण्ठल-म्बितम् । विण्मूत्रं तु गृही कुर्याद्वामकर्णे समाहितः ॥ **सायणीये**—मल-मूत्रं त्यजेद्विप्रो विस्मृत्यैवोपवीतधृक् । उपवीतं तदुत्सृज्य धार्यमन्य-न्नवं तदा ॥

३१. "**शौचे जलपात्रादिग्रहणविचारः.**" **सायणीये**—गृहीत्वा जलपात्रं तु विण्मूत्रं कुरुते यदि । तज्जलं मूत्रसदृशमतश्चान्द्रायणं च-रेत् । शौचोत्तरमिति शेषः ॥ "**मृत्तिकाग्रहणम्.**" **यमः**—आहरे-न्मृत्तिकां विप्रः कूलात्ससिकतां तथा । विप्रे तु शुक्ला ग्राह्योक्ता रक्ता क्षात्रे विधीयते । हरिद्रवर्णा वैश्ये तु शूद्रे कृष्णा प्रकीर्तिता ॥ **भृगुः**—यस्मिन् देशे तु यत्तोयं या च यत्रैव मृत्तिका । सैव तत्र प्रशस्ता स्यात् तया शौचं विधीयते ॥

३२. "**शौचे मृत्तिकालेपनम्.**" **याज्ञवल्क्यः**—गृहीतशिश्नश्चो-त्थाय मृद्भिरभ्युद्धृतैर्जलैः । गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥ "**मृत्तिकाप्रमाणम्.**" **भृगुः**—द्वे लिङ्गे मृत्तिके देये गुदे पञ्च करे दश । उभयोः सप्त दातव्या विट्शौचे मृत्तिकाः स्मृताः । एकं शौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । वानप्रस्थस्य त्रिगुणं यतीनां च चतु-र्गुणम् । यद्दिवा विहितं शौचं तदर्धं निशि कीर्तितम् । तदर्धमातुरे प्रोक्तमातुरस्यार्धमध्वनि ॥ **शौनकः**—आर्द्रामलकमात्रास्तु मूत्रशौचे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि मृत्तिकाः। शातातपः–आर्द्रामलकमात्रास्तु ग्रासा इन्दुव्रते स्थिताः। तथैवाहुतयः सर्वाः शौचे देयास्तु मृत्तिकाः । अन्तर्जलाद्देवगृहाद्वल्मीकान्मूषकगृहात् । कृतशौचस्थलाच्चैव न ग्राह्याः पञ्च मृत्तिकाः ॥ आदित्यपुराणे–स्त्रीशूद्रयोरर्धमानं शौचं प्रोक्तं मनीषिभिः । दिवा शौचस्य निश्यर्धं पथि पादो विधीयते । आर्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितम् ॥

३३. "**लिङ्गगुदप्रक्षालनम्.**" **आश्वलायनः**–लिङ्गशौचं पुरा कृत्वा गुदशौचं ततः परम् ॥ **देवलः**–धर्मविद्दक्षिणं हस्तमधःशौचे न योजयेत् । तथा च वामहस्तेन नाभेरूर्ध्वं न शोधयेत् ॥

३४. "**शौचाऽवश्यकता.**" **दक्षः**–शौचे यत्नः सदा कार्यः शौचमूलो यतो द्विजः । शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥ **व्याघ्रपादः**—शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धं तथान्तरम् ॥

३५. "**पाणिपादप्रक्षालनम्.**" **नागदेवः**–एकैकया मृदा पादौ हस्तौ प्रक्षाल्य यत्नतः । निबद्धशिखाकच्छस्तु द्विज आचमनं चरेत् ॥ **चन्द्रिकायाम्**–पादतले तिस्रो मृत्तिका गुल्फयोश्चतस्र इति । अरण्ये निर्जले रात्रौ चौरव्याकुलिते पथि । कृत्वा मूत्रपुरीषं च द्रव्यहस्तेन शुद्ध्यति । गङ्गातोयेन कृत्स्नाया मृदो भारैश्च गोमयैः । आमृतेराचरन् शौचं भावदुष्टो न शुद्ध्यति ॥ **वृद्धपराशरः**– कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः ॥

३६. "**गण्डूषादिविधिः.**" **नागदेवः**– मूत्रे पुरीषे भुक्त्यन्ते रेतःप्रस्रवणे तथा । चतुरष्ट द्विपट् द्व्यष्ट गण्डूषैः शुद्धिमाप्नुयात् । अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः । प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमपः स्पृशेत् ॥ **आश्वलायनः**–कुर्याद्द्वादश गण्डूषान् पुरीषोत्सर्जने ततः। मूत्रोत्सर्गे च चतुरो भोजनान्ते तु षोडश । भक्ष्यभोज्यावसाने तु गण्डूषाष्टकमाचरेत् । **प्रयोगपारिजाते**–पुरतः सर्वदेवाश्च दक्षिणं पितरस्तथा । ऋषयः पृष्ठतः सर्वे वामे गण्डूषमाचरेत् ॥

३७. "**कच्छविचारः.**" **ग्रन्थान्तरे**—कच्छेन सहितो विप्रो मूत्रोत्सर्गं करोति चेत् । अज्ञानाज्ज्ञानतो वापि पादकृच्छ्रेण शुद्ध्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुह्यं प्रक्षाल्य सलिलैर्मूत्रोत्सर्गादनन्तरम् । गण्डूषत्रितयं कृत्वा तेन शुद्धो भवेद्द्विजः । मुक्तकच्छस्तु यो विप्रो धरण्यां पादतश्चरेत् । पदे पदे सुरापानं प्रायश्चित्तं न विद्यते ॥

३८. "मौनधारणम्." हारीतः–उच्चारे मैथुने चैव प्रस्रावे दन्तधावने । श्राद्धे भोजनकाले च षट्सु मौनं समाचरेत् ॥ अङ्गिराः–सन्ध्ययोरुभयोर्जाप्ये भोजने दन्तधावने । पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः । गुरूणां संनिधौ दाने योगे चैव विशेषतः । एतेषु मौनमातिष्ठन्स्वर्गं प्राप्नोति मानवः ॥

३९. "मुखमार्जनविधिः." दन्तधावनमन्त्रः— **औदुम्बरेण दन्तान्धावयेदान्नाद्यायव्यूहध्वꣳ सोमो राजायमागमत् । समे मुखं प्रमार्क्ष्यते यशसा च भगेन चेति** ॥ हरिहरभाष्ये–**औदुम्बरेण द्वादशाङ्गुलसंमितेन कनिष्ठिकाग्रवत् स्थूलेनोदुम्बरकाष्ठेन दन्तान्धावयेत्** ॥

४०. "दन्तधावनावश्यकता." अत्रिः–मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः । दन्तधावनमुद्दिष्टं जिह्वोल्लेखनिका तथा ॥

४१. "दन्तधावने उक्तकाष्ठानि." नागदेवः–करञ्जोदुम्बरौ चूतः कदम्बो लोध्रचम्पकौ । बदरीति द्रुमाश्चैते प्रोक्ता दन्तप्रधावने ॥ वाचस्पतिः–अथो मुखविशुद्ध्यर्थं गृह्णीयाद्दन्तधावनम् । आचान्तोऽप्यशुचिर्यस्मादकृत्वा दन्तधावनम् । आम्राम्रातकधात्रीजमङ्कोटखदिरोद्भवम् । शम्यपामार्गखर्जूरीशेलुश्रीपर्णिपीलुजम् । राजादनं च नारङ्गं कषायं कटुकण्टकम् । क्षीरवृक्षोद्भवं वापि प्रशस्तं दन्तधावनम् । जिह्वोल्लेखनिकां वापि कुर्याच्चापाकृतिं शुभाम् । ततः कुर्यात्प्रयत्नेन शुद्ध्यर्थं दन्तधावनम् ॥ नृसिंहपुराणे–तिन्तिणिर्वेणुपृष्टं च आम्रनिम्बौ तथैव च । सर्जे धैर्यं वटे दीप्तिः करञ्जे विजयो रणे । प्लक्षजे चार्थसम्पत्तिर्बदर्यां मधुरः स्वरः । खादिरे चैव सौभाग्यं बिल्वे तु विपुलं धनम् । उदुम्बरे च वाक्सिद्धिर्बन्धूके च दृढा मतिः । सैध्रे च कीर्त्तिः सौभाग्यं पालाशे सिद्धिरुत्तमा । कदम्बे सकला लक्ष्मीराम्र आरोग्यमेव च । अपामार्गे स्मृतिर्मेधा प्रज्ञा वाणी वपुर्धृतिः । आयुः शीलं यशो लक्ष्मीः सौभाग्यं चोपजायते । अर्केण हन्ति रोगां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तु बीजपूरेण तु व्यथाम् । दाडिमे सिन्दुवारे च उटजे कुटजे तथा । जाती च करमर्दी च दुःस्वप्नं नाशयेदिति । ककुभेन तथायुष्मान्भवेत्पलितवर्जितः ॥ तत्स्माच्छुष्कं तथार्द्रं वा भक्षयेद्दन्तधावनम् ॥

४२. "**दन्तधावनकाष्ठाभावे.**" **आचारार्के**–तिन्तिण्यादिविहितवृक्षोद्भवेन चूर्णीकृताग्रेण प्रक्षालितेन शुष्केणार्द्रेण वा दन्तधावनं कुर्यात् ॥ **नागदेवः**–अभावे दन्तकाष्ठस्य प्रतिषिद्धदिने तथा । अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् । यद्वा तृणपर्णोदकैरङ्गुल्या वा दन्तान्धावयेत् ॥

४३. "**वर्ज्यदन्तधावनकाष्ठानि.**" **गर्गः**– कुशं काशं पलाशं च निशुपं यस्तु भक्षयेत् । तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥ अर्धशुष्कं त्वचा हीनं यत्नेन परिवर्जयेत् । पतितं चातिरिक्तं च कीटविद्धं तथैव च ॥

४४. "**वनस्पतिप्रार्थना.**" **विश्वामित्रकल्पे**–आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥

४५. "**दन्तधावनकाष्ठप्रमाणम्.**" **गर्गः**–चतुरङ्गुलमात्रं तु नारीणां नात्र संशयः ॥ **नागदेवः**–दशाङ्गुलं तु विप्राणां क्षत्रियाणां नवाङ्गुलम् । अष्टाङ्गुलं तु वैश्यानां शूद्राणां सप्तसंमितम् । नाङ्गुलीभिश्च मृद्भिश्च पर्णैर्लोष्ठैश्च भस्मना । नायसैश्च तथा लौहैः सदा दन्तान् मृजेद्द्विजः ॥

४६. "**दन्तधावनकाष्ठवर्जनकालः.**" **व्यासः**–प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे । दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥ **आचार्यः**–अष्टम्योश्च चतुर्दश्योः पञ्चदश्यां त्रिजन्मसु । व्यतीपाते च संक्रान्त्यां दन्तकाष्ठं न भक्षयेत् ॥

४७. "**दन्तधावने दिग्विशेषः.**" **विष्णुः**–प्राङ्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च । दक्षिणेन तथा कष्टं पश्चिमेन पराजयः । उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च । पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात् ॥

४८. "**दन्तघर्षणान्ते गण्डूषविधिः.**" **शौनकः**– पश्चाद्द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् । स्मृत्वोङ्कारं च गायत्रीं बध्नीयाद्दै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिखां ततः ॥ वृद्धपराशरः—कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः निबद्धशिखाकच्छस्तु द्विज आचमनं चरेत् ॥

४९. "दन्तधावनविधिः" धन्वतरिः—तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरीणाहमृज्वग्रन्थितमव्रणम् अयुग्मग्रन्थि यच्चापि प्रत्यग्रं शस्तभूमिजम्। अवेक्ष्यर्तुं च दोषं च रसं वीर्यं च योजयेत्। कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः। निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा। मधुको मधुरे श्रेष्ठः करञ्जः कटुके तथा। क्षौद्रव्योषत्रिवर्गोक्तं सतैलं सैन्धवेन च। चूर्णेन तेजोवत्याश्च दन्तान्नित्यं विशोधयेत्। एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च। दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्। जिव्हानिर्लेखनं रौप्यं सौवर्णं वार्क्षमेव च। तन्मलापहरं शस्तं मृदु श्लक्ष्णं दशाङ्गुलम्। मुखवैरस्यदौर्गन्ध्यशोफजाड्यहरं परम्। दन्तदार्ढ्यकरं रुच्यं स्नेहगण्डूषधारणम्। क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः। भिल्लोदककषायेण तथैवामलकस्य वा। प्रक्षालयेन्मुखं नेत्रे स्वस्थः शीतोदकेन वा ॥

५०. "मुखप्रक्षालनानन्तरं देहशुद्धिः" व्यासः—अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा। यः स्मरेत्पुंण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः। अनेन प्रकारेणाद्भिः शरीरं मार्जयेत्। ततः सवितारं नमस्कुर्यात् ॥ आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने। जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते। पश्चात् तुलसीं गां च नमस्कुर्यात् तत्र मन्त्रौ—महाप्रसादजननी सर्वसौभाग्यवर्धिनी। आधिव्याधिहरा नित्यं तुलसी त्वं नमोस्तु ते ॥ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

५१. "प्रातःस्मरणे नारायणस्तुतिः" आचारमयूखे व्यासः—प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमञ्जनाभम्। ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम्। प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगुलं परमस्य पुंसः। नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य। प्रातर्भजामि भजतामभयङ्करं तं प्राक्सर्वजन्मकृतपापभयापहत्यै। यो ग्राहवक्त्रपतितांघ्रिगजेन्द्रघोरशोकप्रणाशनकरो धृतशङ्खचक्रः। श्लोकत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमिदं पुण्यं प्रातः प्रातः पठेन्नरः । लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥

९२. "गणेशस्तुतिः." सद्धर्मचिन्तामणौ– प्रातः स्मरामि गणनाथमनाथबन्धुं सिन्दूरपूर्णपरिशोभितगण्डयुग्मम् । उद्दण्डविघ्नपरिखण्डनचण्डदण्डमाखण्डलादिसुरनायकवृन्दवन्द्यम्। प्रातर्नमामि चतुराननवन्द्यमानमिच्छानुकूलमखिलं च वरं दधानम् । तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं पुत्रं विलासचतुरं शिवयोः शिवाय । प्रातर्भजाम्यभयदं खलु भक्तशोकदावानलं गणविभुं वरकुञ्जरास्यम् । अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्धनमहं सुतमीश्वरस्य । श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् । प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥

९३. "सूर्यस्तुतिः."– प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि । सामानि यस्य किरणाः प्रभवादिहेतुब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् । प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च । वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च। प्रातर्भजामि सवितारमनन्तशक्तिपापौघशत्रुभयरोगहरं परं च । तं सर्वलोककलनात्मककालमूर्तिं गोकण्ठबन्धनविमोचनमादिदेवम् । श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः । स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् ॥

९४. "देवीस्तुतिः."–प्रातः स्मरामि शरदिन्दुकरोज्ज्वलाभां सद्रत्नवन्मकरकुण्डलहारभूषाम् । दिव्यायुधोर्जितसुनीलसहस्रहस्तां रक्तोत्पलाभचरणां भवतीं परेशाम् । प्रातर्नमामि महिषासुरचण्डमुण्डशुम्भासुरप्रमुखदैत्यविनाशदक्षाम् । ब्रह्मेन्द्ररुद्रमुनिमोहनशीललीलां चण्डीं समस्तसुरमूर्तिमनेकरूपाम् । प्रातर्भजामि भजतामभिलाषदात्रीं धात्रीं समस्तजगतां दुरितापहन्त्रीम् । संसारबन्धनविमोचनहेतुभूतां मायां परां समधिगम्य परस्य विष्णोः । श्लोकत्रयमिदं देव्याश्चण्डिकायाः पठेन्नरः । सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥

९५. "शिवस्तुतिः."–प्रातः स्मरामि भवभीतिहरं सुरेशं गङ्गाधरं वृषभवाहनमम्बिकेशम् । खट्वाङ्गशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम् । प्रातर्नमामि गिरिशं गिरिजार्द्धदेहं सर्गस्थितिप्रलयकारणमादिदेवम् । विश्वेश्वरं विजितविश्वमनोभिरामं संसाररो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गहरमौषधमद्वितीयम् । प्रातर्भजामि शिवमेकमनन्तमाद्यं वेदान्तवेद्यमखिलं पुरुषं महान्तम् । नामादिभेदरहितं षड्भावशून्यं संसाररोगहरमौषधमद्वितीयम् । प्रातः समुत्थाय शिवं विचिन्त्य श्लोकत्रयं येऽनुदिनं पठन्ति । ते दुःखजातं बहुजन्मसंचितं हित्वा पदं यान्ति तदेव शम्भोः ॥

९६ **"रामस्तुतिः" आन्हिककर्मप्रकाशे**–प्रातः स्मरामि रघुनाथमुखारविन्दं मन्दस्मितं मधुरभाषि विशालभालम् । कर्णावलम्बिचलकुण्डलशोभिगण्डं कर्णान्तदीर्घनयनं नयनाभिरामम् ॥ प्रातर्भजामि रघुनाथकरारविन्दं रक्षोगणाय भयदं वरदं निजेभ्यः । यद्राजसंसदि विभज्य महेशचापं सीताकरग्रहणमङ्गलमाप सद्यः ॥ प्रातर्नमामि रघुनाथपदारविन्दं वज्राङ्कुशादि शुभरेखि सुखावहं मे । योगीन्द्रमानसमधुव्रतसेव्यमानं शापापहं सपदिगौतमधर्मपत्न्याः ॥ प्रातर्वदामि वचसा रघुनाथनाम वाग्दोषहारि सकलं शमलं निहन्ति । यत्पार्वती स्वपतिना सह भोक्तुकामा प्रीत्या सहस्रहरिनामसमं जजाप ॥ प्रातः श्रयेच्छ्रुतिनुतां रघुनाथमूर्त्तिं नीलाम्बुदोत्पलसितेतररत्ननीलाम् । आमुक्तमौक्तिकविशेषविभूषणाढ्यां ध्येयां समस्तमुनिभिर्जनमुक्तिहेतुम् ॥ यः श्लोकपञ्चकमिदं प्रयतः पठेद्धि नित्यं प्रभातसमये पुरुषः प्रबुद्धः । श्रीरामकिङ्करजनेषु स एव मुख्यो भूत्वा प्रयाति हरिलोकमनन्यलभ्यम् ॥

९७. **"ग्रहादिस्तुतिर्वामनपुराणे"**–ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसूतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ **"ऋषिस्तुतिः"**–भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः । रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वन्तु सर्वे मम सुप्रभातम् । सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च । सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् । सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त । भूरादिकृत्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् । पृथ्वी सगन्धा सरसास्तथापः स्पर्शी च वायुर्ज्वलितं च तेजः । नभः सशब्दं महता सहैव कुर्वन्तु सर्वे मम सुप्रभातम् । इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च तद्वत् । दुःखप्रणाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९८. "पुण्यश्लोकजनस्तुतिः." आचारमयूखे– पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः। पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः। अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः। सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम्। जीवेद्वर्षशतं सोऽपि सर्वव्याधिविवर्जितः॥ अहल्या द्रौपदी सीता तारा मन्दोदरी तथा। पञ्चकं ना स्मरेन्नित्यं महापातकनाशनम्॥ मदनपारिजाते–अविमुक्तचरणयुगलं दक्षिणमूर्तेश्च कुक्कुटचतुष्कम्। स्मरणमपि वाराणस्या निहन्ति दुःस्वप्नमपशकुनं च॥ पद्मपुराणे–उमा उषा च वैदेही रमा गङ्गेति पञ्चकम्। प्रातरेव पठेन्नित्यं सौभाग्यं वर्धते सदा॥ सोमनाथो वैद्यनाथो धन्वन्तरिरथाश्विनौ। पञ्चैतान् यः स्मरेन्नित्यं व्याधिस्तस्य न बाधते॥ कपिला कालियोऽनन्तो वासुकी तक्षकस्तथा। पञ्चैतान्स्मरतो नित्यं विषबाधा न बाधते॥ हरं हरिं हरिश्चन्द्रं हनूमन्तं हलायुधम्। पञ्चकं वै स्मरेन्नित्यं घोरसंकटनाशनम्॥ रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्। पञ्चैतान् संस्मरेन्नित्यं भवबाधा विनश्यति॥ आदित्यश्च उपेन्द्रश्च चक्रपाणिर्महेश्वरः। दण्डपाणिः प्रतापी स्यात्क्षुद्बाधा च न बाधते॥ वसुर्वरुणसोमौ च सरस्वती च सागरः। पञ्चैतान्संस्मरेद्यत्र तृषा तत्र न बाधते॥ सनत्कुमारदेवर्षिशुकभीष्मप्लवङ्गमाः। पञ्चैतान् स्मरतो नित्यं कामस्तस्य न बाधते॥ रामलक्ष्मणौ सीता च सुग्रीवो हनुमान् कपिः। पञ्चैतान्स्मरतो नित्यं महाबाधा प्रमुच्यते॥

९९. "स्नानात्पूर्वं भक्षणयोग्याः पदार्थाः." चतुर्विंशतिमते– इक्षुरापः फलं मूलं पयस्ताम्बूलमौषधम्। भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः। आरोग्याभाव एवायं विधिः। आरोग्ये सति तु स्नानसन्ध्यादिकं कृत्वैवेक्ष्वादिभक्षणं कार्यम्॥

१००. "स्नानम्." कात्यायनपरिशिष्टसूत्रे– अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्योरुꣳ हीति तोयमामन्त्र्यावर्त्तयेद्येते शतमिति सुमित्रिया न इत्यपोञ्जलिनादाय दुर्मित्रिया इति द्वेष्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिनिषिञ्चेत् कटिबस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदंविष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्य निमज्योन्मज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति । ततोभिषिञ्चेदिमं मे वरुणेति चतुसृभिर्मापउदुत्तमं मुञ्चन्त्वेवभृथेत्यन्ते चैतन्निमज्योन्मज्याचम्य दर्भैः पावयेदापोहिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपोदेवा द्रुपदादिव शन्नोदेवीरपाꣳ रसमपोदेवीः पुनन्तु मेति नवभिश्चित्पतिर्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद्रुपदादिवायङ्गौरिति वा त्र्यृचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम् ॥

६१. "स्नानकालः." हेमाद्रौ—अरुणकिरणयुक्तां प्राचीं दिशमवलोक्य स्नायादिति ॥ याज्ञवल्क्यः— प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकृतं हि तत् । सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् । अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः । स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनम् ॥ आ० का०— घटिकाद्वयावशिष्टायां रात्र्यां गच्छेज्जलाशये ॥ तिलगन्धाक्षतापुष्पैर्दर्भाद्यैः सहितः शुचिः । प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः। यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः। प्रातःस्नानं सनक्षत्रं सन्ध्या नक्षत्रसंयुता । होमः प्रागुदयाद्भानोर्गायत्र्यास्तु ततो जपः ॥

६२. "प्रातःस्नानफलम्." याज्ञवल्क्यः—गुणा दश स्नानपरस्य साधो रूपं च तेजश्च बलं च शौचम् । आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा ॥ दक्षः—प्रातः स्नानं चरित्वाथ शुद्धे तीर्थे विशेषतः । प्रातःस्नानाद्यतः शुद्ध्येत्कायोऽयं मलिनः सदा । नोपसर्पन्ति वै दुष्टाः प्रातःस्नायिजनं क्वचित् । दृष्टादृष्टफलं तस्मात् प्रातःस्नानं समाचरेत ॥ नागदेवः—अगम्यागमनाच्चैव पापेभ्यश्च परिग्रहात् । रहस्याचरितात्पापान्मुच्यते स्नानयोगतः ॥

६३. "प्रातःस्नानाभावे दोषः." याज्ञवल्क्यः—अस्नात्वा ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरेत्कर्म जपहोमादिकं तथा । लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान् । स्विद्यन्ते हि सुषुप्तस्य इन्द्रियाणि स्रवन्ति च । अङ्गानि समतां यान्ति चोत्तमान्यधमैः सह ॥ **नागदेवः**–अस्नातस्य क्रियाः सर्वा भवन्ति निष्फला यतः । प्रातः समाचरेत्स्नानं तच्च नित्यमुपस्थितम् । अस्नातस्तु पुमान्नार्हो जपहोमादिकर्मसु । प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्त्तितम् ॥ **योगियाज्ञवल्क्यः**—स्नानमूलाः क्रियाः सर्वाः स्मृतिश्रुत्युदिता नृणाम् । तस्मात्स्नानं निषेवेत श्रीपुष्ट्याऽरोग्यवर्धनम् ॥

६४. **"स्नानार्थे उक्तं जलम्."** **मरीचिः**–भूमिष्ठमुद्धृतं वापि शीतमुष्णमथापि वा । गाङ्गं पयः पुनात्येव पापमामरणात्कृतम् ॥ **यमः**–आप एव सदा पूतास्तासां वह्निर्विशोधकः । तस्मात्सर्वेषु कालेषु उष्णाम्भः पावनं स्मृतम् । नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् । तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः ॥ **गार्ग्यः**–कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च । नित्यं याद‍ृच्छिकं चैव यथारुचि समाचरेत् ॥ **नागदेवः**–सरित्सु देवखातेषु तीर्थेषु च नदीषु च। क्रियास्नानं समुद्दिष्टं स्नानं तत्रामलाः क्रियाः । वाप्यां कूपे तडागे वा नद्यां वा चोष्णवारिणा । प्रातःस्नानं सदा कुर्यादुष्णेनैव सदातुरः ॥

६५. **"उष्णोदकस्नाननिषेधः."** **वृद्धमनुः**–संक्रान्त्यां रविवारे च सप्तम्यां राहुदर्शने । आरोग्ये पुत्रमित्रार्थे न स्नायादुष्णवारिणा ॥ मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा । अस्पृष्टस्पर्शने चैव न स्नायादुष्णवारिणा ॥

६६. **"स्नानभेदाः."** **नागदेवः**–असामर्थ्याच्छरीरस्य देशकालाद्यपेक्षया । मन्त्रस्नानादिकाः सप्त केचिदिच्छन्ति सूरयः । स्नानं तु द्विविधं प्रोक्तं मुख्यगौणप्रभेदतः । चतुर्विधं तत्र मुख्यं गौणं वै षड्विधं भवेत् । सजीवपितृकः स्नायान्न्यस्तदक्षिणतःकचः । प्रमीतपितृकः स्नायात्सव्यभागकचः पुमान् ॥ क्वचित्स्थले मुसलस्नानमप्युक्तं तच्चैवम्– निरुद्धकर्णनासस्तु मुसलस्नानमाचरेत् ॥ उभे सन्ध्ये च स्नातव्यं ब्राह्मणैश्च गृहाश्रितैः । तिसृष्वपि हि सन्ध्यासु स्नातव्यं तु तपस्विभिः ॥

६७. **"प्रत्यक्षस्नानाभावे गौणस्नानानि."** **योगियाज्ञवल्क्यः**–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मान्त्रं भौमं तथाऽऽग्नेय्यं वायव्यं दिव्यमेव च । वारुणं मानसं चैव सप्त-स्नानान्यनुक्रमात् । आपोहिष्ठादिभिर्मान्त्रं मृदालम्भं च पार्थिवम् । आग्नेय्यं भस्मना स्नानं वायव्यं गोरजःकृतम् । यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते । वारुणं चावगाहं तु मानसं विष्णुचिन्तनम् ॥ जाबालिः—अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् । आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः । ज्वराऽभिभूता या नारी रजसा च परिप्लुता । कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा । चतुर्थे हनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम् । सा सचैलाऽवगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् । दशद्वादशकृत्वो वा आचमेच्च पुनः पुनः । अन्ते च वाससां त्यागस्तथा शुद्धा भवेत्तु सा ॥

६८. **"स्नानादौ निषिद्धजलम्."** **वाचस्पतौ**—स्नानमाचमनं दानं देवतापितृतर्पणम् । शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः । मासद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः । तासु स्नानादिकं वर्ज्यं वर्जयित्वा सुरापगाम् ॥ यदि विप्रः प्रमादेन शूद्रतोयं पिबेत्स्वयम् । उपोष्य बिल्वपद्मानां पलाशस्य कुशस्य च । एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात् ॥ **धन्वन्तरिः**— तृणपर्णोत्करयुतं कलुषं विषसंयुतम् । योऽवगाहेत वर्षासु पिबेद्वापि नवं जलम् । सबाह्याभ्यन्तरान्रोगान् प्राप्नुयात्क्षिप्रमेव हि ॥ **यमः**—अन्त्यजैः खानिताः कूपास्तडागानि तथैव च ॥ एषु स्नात्वा च पीत्वा च पञ्चगव्येन शुद्ध्यति ॥ **वृद्धशातातपः**— अन्त्यजैः खानिते कूपे सेतौ वाप्यादिके तथा । तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते । एतद्वचनद्वयमापदनापद्विषयकमिति वाचस्पतौ स्पष्टीकृतम् ॥

६९. **"स्नानार्थे उक्तदिशः."** **विष्णुः**— स्रोतसोऽभिमुखं स्नायान्नदीषु प्रवहज्जले । स्थावरे च तडागे च रवेरभिमुखं सदा । स्रोतसोऽभिमुखो मज्जेद्यत्रापः प्रवहन्ति वै । स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथा । गृहे गृहमुखः कूपे तडागे सूर्यसन्निधौ । प्रातः संक्षेपतः स्नानं शौचार्थे तु तदिष्यते । **रेणुः**— तडागादिषु तोयेषु प्रत्यर्कं स्नानमाचरेत् । नद्यादौ तु प्रवाहाभिमुखो वा स्नानमाचरेत् । नद्यां स्रवत्सु च स्नायात्प्रतिस्रोतःस्थितो द्विजः । या याः समुद्रगा नद्यस्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सु स्नानं तु संमुखम् । सर्वेषां शाखिनामेवं विना वाजसनेयिनः ॥

७०. "**गृहेस्नानादिविचारः.**"—**बौधायनः**—गृहस्नाने न तु प्रोक्तं मार्जनं तर्पणादिकम् । नान्तराचमनं प्रोक्तं पश्चादाचम्य शुद्ध्यति ॥ **आ० का०**—पादौ प्रक्षालयेत्पूर्वं मुखं यज्ञोपवीतकम् । द्विराचम्य कराभ्यां तु दर्भान्धृत्वा शिखां स्पृशेत् । द्वौ कुशौ दक्षिणे हस्ते त्रयः सव्ये तथासने । पादमूले शिखायां च एकैकं धारयेत्कुशम् । प्राणायामत्रयं कृत्वा कालज्ञानं ततः स्मरेत् ॥ **वृद्धयमः**—सङ्कल्पश्च यथा कुर्यात्स्नानदानव्रतादिके । तद्यथा—आचम्य अञ्जलावुदकं गृहीत्वा स्नानसंकल्पं कुर्यात् ॥ **अद्य पूर्वोच्चरित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम इह जन्मनि कायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पर्शास्पर्शासनभोजनशयनगमनकृतकर्मदोपनिरासद्वारा त्रिविधतापोपशमनार्थं श्रीपरमेश्वरप्रीत्यर्थं प्रातःस्नानमहं करिष्ये** । इति संकल्प्य स्नानं कुर्यात् ॥ "**स्नाने आसनम्.**" **कालिकापुराणे**—तोये शिलामयं कुर्यादासनं कौशमेव वा ॥ "**जलादिविचारः.**"—अभावे देवखातानां सरितां सरसां तथा । उद्धृत्य चतुरः पिण्डान् पारके स्नानमाचरेत् । (पारके इत्यनुत्सृष्टजले) चतुर्हस्तसमायुक्तं समंताच्चतुरस्रकम् । प्रकल्प्यावाहयेद्गङ्गामेभिर्मन्त्रैर्विचक्षणः । हस्ताभ्यामञ्जलिं कृत्वाऽनामिकामूलपर्वणोः । अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा चावाहनी स्मृता । विष्णोः पादप्रसूताऽसि वैष्णवी विष्णुदेवता । त्राहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् । पश्चाद्गङ्गादितीर्थानि प्रार्थयेच्च समन्ततः ॥

७१. **तीर्थप्रार्थनाः.**" **यथा**—गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु । नन्दिनी नलिनी सीता मालती च मलापहा । विष्णुपादाब्जसंभूता गङ्गा त्रिपथगामिनी । भागीरथी भोगवती जान्हवी त्रिदशेश्वरी । द्वादशैतानि

---

* एतेन वाजसनेयिनां समुद्रगामिनीषु नदीषु प्रवाहाभिमुखस्नाननिषेधेन ततः प्रत्यक्षसमुद्रसंगमवतीष्वपि गङ्गागोदादिनदीषु सूर्याभिमुखं स्नानं कर्तव्यम् । समुद्रगा इत्युक्तत्वात् । गङ्गादिनदीसंगमपर्यंतं प्रवाहनामादिधारकासु यमुनाभीमातुङ्गभद्रादिषु तु स्वतः सागरगामित्वायोगात्प्रवाहाभिमुखमेव स्नानं कर्तव्यमिति प्रतिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७८. "**वस्त्रधारणम्.**" तत्रमन्त्रः–**परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि॥ शतं च जीवामि शरदः सुवर्चा रायस्पोपणभिसंव्ययिष्ये॥ पा० गृ० सूत्रे**–अहतं वासो धौतं वामौत्रेण आच्छादयीत परिधास्य इति ॥ **हरिहरभाष्ये**–अहतं नवं सदशं पवित्रं वासः आच्छादयीत परिदध्यात् । तदलाभे अमौत्रेण अरजकेण धौतं क्षालितं परिधास्या इत्यादिना अभिसंव्ययिष्य इत्यन्तेन मन्त्रेण ॥

७९. "**धौतवस्त्रप्रसारणम्.**" **शातातपः**–प्रागग्रमुदगग्रं वा धौतं वासः प्रसारयेत् । दक्षिणाग्रं पश्चिमाग्रं पुनः प्रक्षालनं भवेत् ॥

८०. "**उक्तवस्त्रधारणम्.**" **मनुः**–ब्राह्मणस्य सितं वस्त्रं माञ्जिष्ठं नृपतेः स्मृतम् । पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते ॥ **देवलः**–स्वयं धौतेन कर्त्तव्याः क्रियाधर्मा विपश्चिता । न तु नेजकधौतेन नाहतेन च कर्हिचित् ॥ **याज्ञवल्क्यः**–अष्टहस्तं नवं श्वेतं सदशं नान्यधारितम् । अहतं तद्विजानीयात्सर्वकर्मसु पावनम् । यन्त्रनिर्मुक्तं प्रक्षालितमप्यहतमित्याह॥ **सत्यातपः**–अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयम्भुवा। शस्तं माङ्गलिकेष्वेतत्तावत्कालं प्रकीर्तितम्॥

८१. "**स्नानानन्तरं वस्त्रपरिधानम्.**" **नागदेवः**–स्नात्वैव वाससी धौते अक्लिन्ने परिधापयेत् । प्रक्षाल्य चरणद्वन्द्वं हस्तौ प्रक्षालयेत्ततः । अभावे धौतवस्त्रस्य पट्टक्षौमादिकानि च । कुतपं योगपट्टं वा विवासा येन नो भवेत् ॥ **याज्ञवल्क्यः**–वामकुक्षौ च नाभौ च पृष्ठे चैव यथाक्रमम् । त्रिकच्छेन समायुक्तो द्विजोऽसौ मुनिरुच्यते ॥

८२. "**वर्ज्यवस्त्राणि.**" **दक्षः**–ईषद्धौतं स्त्रिया धौतं शूद्रधौतं तथैव च । प्रसारितं यमदिशि गर्हितं सर्वकर्मसु ॥ **आपस्तम्बः**–आर्द्रवासास्तु यः कुर्याज्जपहोमपरिग्रहान् । सर्वं तद्राक्षसं विन्द्यात्कर्मजातं च यत्कृतम् । यज्जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा । जपो होमस्तथा दानं तत्सर्वं निष्फलं भवेत् । न स्यूतेन न दग्धेन पारक्येण विशेपतः । मूपकोत्कीर्णजीर्णेन कर्म कुर्याद्विचक्षणः ॥ **आ० का०**–आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम् । शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपम् ॥ नानारङ्गविराजितं गतदशं कोशोद्भवं वासितं नीलीरङ्गसमन्वितं च समलं नैवायतं चास्ति यत् । दग्धं चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च दण्डितं च बहुधा युद्धादिकैश्चित्रितं तद्वर्ज्यं खलु देवपूजनविधौ वस्त्रं कुसुम्भारुणम् ॥

८३. "उपवस्त्रपरिधानाऽवश्यकता." विष्णुपुराणे—होमदेवार्चनाद्यासु क्रियासु पठने तथा । नैकवस्त्रः प्रवर्त्तेत द्विजो नाचमने जपे ॥ व्याघ्रपादः—नैकवस्त्रो द्विजः कुर्याद्भोजनं च सुरार्चनम्॥ आ०का०—एकवस्त्रं विनापात्रं सव्ययज्ञोपवीतकम् । प्रत्यक्षं तु नदीशौचं कुर्वञ्छूद्रत्वमाप्नुयात् ॥ "उपवस्त्रधारणमन्त्रः"— पारस्करः— यशसा मा द्यावापृथिवी यशसेन्द्रा बृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् ॥ हरिहरभाष्ये— अथोत्तरीयं यशसामेति अथोत्तरीयपरिधानानन्तरं तादृशमेवोत्तरीयं वासो यशसा मेत्यादिना यशोमा प्रतिपद्यतामित्यन्तेन आच्छादयीतेतिगतेनाख्यातेन संबन्धः । एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत ॥

८४. "उपवस्त्राभावे प्रतिनिधिः." स्मृत्यन्तरे—यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थं वस्त्राभावे चतुर्थकम् ॥ परशुरामनिबन्धे तु—उपवस्त्रं यदा न स्यात्तदा चत्वारि धारयेत् । तस्मात्सन्ध्यादिकर्मसमये उपवस्त्रमवश्यमेव धार्यम् ॥

८५. "वस्त्रादिशुद्धिः." योगीश्वरः—निष्पीड्य स्नानवस्त्रं तु आचम्य विधिना ततः । देवानामर्चनं कुर्याद्ब्रह्मादीनामनन्तरम् ॥ आ० का०—गृहस्नानं यदा कुर्याद्वस्त्रमूर्ध्वं परित्यजेत् । अधोग्रेण च संपीड्य पराशरवचो यथा । स्नानं कृत्वार्द्रवस्त्रं च ऊर्ध्वमुत्तारयेद्द्विजः । आर्द्रवस्त्रमधः क्षिप्त्वा पुनः स्नानेन शुद्ध्यति ॥ मनुः—काकस्पृष्टानि वस्त्राणि प्रोक्षितानि शुचीनि हि । प्रोक्षणाद्भूमिशुद्धिः स्याद्वाससामपि सर्वदा ॥ योगी—प्रोक्षणेनैव शुद्धिः स्याद्दुकूले नैव कम्बले । प्रक्षालनेन वस्त्रस्य संपर्के सूतके रजे । नीली पट्टे जलं तक्रे गावश्चाण्डालमन्दिरे । पञ्चगव्येन भिक्षान्नं पवित्राणि दिने दिने । द्रव्यस्यान्तर्गता नीली न दूष्यति कदाचन । कम्बले पट्टसूत्रे च नीलीदोषो न विद्यते ॥ धौमिः—अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् । प्रक्षालनेन स्वल्पानामद्भिः शौचं विधीयते । वीर्यस्पृष्टं शवस्पृष्टं स्पृष्टं मूत्रपुरीषयोः । रजस्वलादिसंस्पृष्टमाविकं तु सदा शुचि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रपुसीसकताम्राणां क्षीराम्लोदकवारिभिः । भस्मभिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु । घृतस्य नवनीतस्य आढकादिप्रमाणस्य श्वकाकादिदुःस्पर्शे प्रत्यक्षस्पर्शयुक्तं तद्गतनवनीतादिकं त्यक्त्वान्यद्भाण्डे प्रक्षिप्याग्नौ प्रताप्य वस्त्रेण परिशोध्य गायत्र्याभिमन्त्रितजलाभ्युक्षणाच्छुद्ध्यति । एवं तक्रतैलक्षीरदध्नां द्रोणप्रमाणानां काकाद्युपहतौ शुद्धिं कुर्यात् ॥ सर्वत्र वसुधा पूता यत्र लेपो न विद्यते । यत्र लेपो भवेत्तत्र पुनर्लेपेन शुद्ध्यति ॥ पञ्चगव्यं पिबेद्विप्रो त्रिभूयाच्छिरसा नृपः । वैश्यस्याभ्युक्षणं प्रोक्तं शूद्रस्य तु निरीक्षणम् ॥ अतीव तृषितो विप्रस्तोयं शूद्रस्य चेत्पिबेत् । उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति॥

८६. "**सन्ध्योपासनम्.**" का० प० सूत्रे–उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य । त्रिरायम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति ॥ पा० गृ० सूत्रे–वाक्प्राणश्चक्षुः श्रोत्रं यशोबलमिति त्र्यायुषाणि करोति ॥

८७. "**आसनविधिः.**" व्यासः–कौशेयं कम्बलं चैव अजिनं पट्टमेव च । दारुजं तालपत्रं वा आसनं परिकल्पयेत् ॥ "**आसनगुणाः**"–कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि । वशाजिने व्याधिनाशः कम्बले दुःखमोचनम् । अभिचारे नीलवर्णं रक्तं वश्यादिकर्मणि । शान्तिके कम्बलः प्रोक्तः सर्वेष्टं चित्रकम्बलम् । वंशासने तु दारिद्र्यं पाषाणे व्याधिसंभवः । धरण्यां दुःखसंभूतिर्दौर्भाग्यं छिद्रिदारुजे । तृणे धनयशोहानिः पल्लवे चित्तविभ्रमः ॥

८८. "**आसनपरिमाणम्.**" कालीपुराणे–चतुर्विंशत्यङ्गुलैस्तु दीर्घं काष्ठासनं मतम् । षोडशाङ्गुलविस्तीर्णमुत्सेधे चतुरङ्गुलम् । पञ्चाङ्गुलं वा कुर्यात्तु नोच्छ्रितं चात्र कारयेत् । वास्त्रं द्विहस्तान्नो दीर्घं सार्द्धहस्तान्न विस्तृतम् । त्र्यङ्गुलं तु तथोच्छ्रायं पूजाकर्मणि संश्रयेत् । सर्वेषां तैजसानां च आसनं श्रेष्ठमुच्यते ॥ "**वर्ज्यासनम्**"–आयसं वर्जयित्वा तु कांस्यसीसकमेव च ॥ "**प्रौढपादासनम्.**" आचारमयूखे–दानमाचमनं होमं भोजनं देवतार्चनम् । प्रौढपादेन कुर्वीत

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाध्यायं पितृतर्पणम् ॥ आ०का०–आसनारूढपादस्तु जानुनोर्वाथ जङ्घयोः । कृतावसक्थिको यश्च प्रौढपादः स उच्यते ॥ "स्वस्तिकासनम्." कालीपुराणे–सव्यमाकुञ्चितचरणं दक्षिणजङ्घोर्वन्तरे दक्षिणं च सव्यजङ्घोर्वन्तरे निक्षिपेदिति ॥ "पद्मासनम्"– पद्मासनमिदं प्रोक्तं योगिनां हृदयङ्गमम् । जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे । एतदासनं सूर्यार्घ्यप्रदाने योजनीयम् ॥

८९. "दिग्विचारः." परिभाषाकर्मप्रदीपे–यत्रोपदिश्यते कर्म कर्त्तुरङ्गं न तूच्यते । दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः । यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु । तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्याऽपराजिता ॥ गौतमः–रात्रावुदङ्मुखः कुर्याद्दैवं कार्यं सदैव हि । शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः ॥ तन्त्रान्तरे–यत्रैव भानुः सततं ह्युदेति प्राचीति तां वेदविदो वदन्ति । ततोऽपरां पूजकपूज्ययोश्च सदागमज्ञाः प्रवदन्ति तां तु । इयं पूज्यपूजकान्तर्वर्तिनी प्राच्यागमोक्तपूजायामेव ग्राह्या ॥ तत्परिभाषायामुक्तत्वात् । अन्यत्र तु सूर्योदयोपलक्षितैव प्राची ग्राह्या ॥

९०. "भस्मधारणम्." पा० गृ० सूत्रे–भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम् ॥ प्रातः ससलिलं भस्म मध्यान्हे गन्धमिश्रितम् । सायान्हे निर्जलं भस्म एवं भस्म विलेपयेत् ॥

९१. "ग्राह्यं भस्म." ब्राह्मे–गङ्गातीरसमुद्भूतां मृदं मूर्ध्ना बिभर्ति यः । बिभर्ति सोऽर्कस्य तेजस्तमोनाशाय केवलम् ॥ काशीखण्डे– आग्नेय्यमुच्यते भस्म दग्धगोमयसम्भवम् । तदेव द्रव्यमित्युक्तं त्रिपुण्ड्रस्य महामुने ॥ संग्रहे–अग्निहोत्राग्निजं भस्म विरजाहोमजं तथा । औपासनसमुत्पन्नं समिदग्निसमुद्भवम् । समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणा । शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवम् । अन्येषामपि सर्वेषां धार्यं दावानलोद्भवम् ॥ प्रयोगपारिजाते–मृद्भस्म चन्दनं प्रोक्तं तोयं चैव चतुर्थकम् । स्नात्वा पुण्ड्रं मृदा कुर्यात्प्रक्षाल्यैव तु भस्मना । देवानभ्यर्च्य गन्धेन जलमध्ये जलेन तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९२. "**भस्मधारणफलम्.**" **कात्यायनः**–श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः ॥

९३. "**भस्मधारणप्रकाराः.**" **कात्यायनः**–ऊर्ध्वपुण्ड्रं मृदा कुर्याद्भस्मना तु त्रिपुण्ड्रकम् । उभयं चन्दनेनैव अभ्यङ्गोत्सवरात्रिषु ॥ **प्र० पारि०**–धार्यं भस्मत्रिपुण्ड्रं तु गृहिणा जलसंयुतम् । सर्वं कालं भवेत्स्त्रीणां यतीनां जलवर्जितम् । वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा । मध्यान्हात्प्राग्जलैर्युक्तं परतो जलवर्जितम् । मध्याङ्गुलित्रयेणैव स्वदक्षिणकरस्य च । त्रिपुण्ड्रं धारयेद्विद्वान् सर्वकल्मषनाशनम् ॥ **भविष्यपुराणे**–सितेन भस्मना कुर्यात्रिसन्ध्यं च त्रिपुण्ड्रकम् । सर्वपापविनिर्मुक्तः शिवेन सह मोदते । सत्यं शौचं जपो होमस्तीर्थदेवादिपूजनम् । तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत् ॥ **स्मृतिरत्नावल्याम्**–ललाटे हृदये नाभौ गलेंऽसे बाहुसंधिषु । पृष्ठदेशे शिरस्येवं स्थानेष्वेतेषु धारयेत् । मध्यमाऽनामिकाङ्गुष्ठैरनुलोमविलोमतः । अतिस्वल्पमनायुष्यमतिदीर्घं तपःक्षयम् । नेत्रयुग्मप्रमाणेन त्रिपुण्ड्रं धारयेद्द्विजः । षडङ्गुलप्रमाणेन ब्राह्मणानां त्रिपुण्ड्रकम् । नृपाणां चतुरङ्गुल्यं वैश्यानां द्व्यङ्गुलं मतम् । शूद्राणामथ सर्वेषामेकाङ्गुल्यं त्रिपुण्ड्रकम् ॥ **काशीखण्डे**–भ्रुवोर्मध्यं समारभ्य यावदन्तो भवेद्भ्रुवोः । मध्यमाऽनामिकाङ्गुल्योर्मध्ये तु प्रतिलोमतः । अङ्गुष्ठेन कृता रेखा त्रिपुण्ड्रः सोभिधीयते ॥ **पुलस्त्यः**–अग्निरित्यादिभिर्मन्त्रैः शुद्धं ब्रह्माभिमन्त्रितम् । शिवमन्त्रेण तद्धार्यं मन्त्रेणाष्टाक्षरेण वा । गायत्र्या वा च देवर्षेमन्त्रेण प्रणवेन वा । करोति शिवमन्त्रेण यस्त्रिपुण्ड्रं द्विजोत्तमः । त्र्यक्षः शुद्धतरः सौम्यः शिवलोके महीयते । अष्टाक्षरेण मन्त्रेण यः करोति त्रिपुण्ड्रकम् । विष्णोः पदमवाप्नोति नान्यथा श्रुतिचोदितम् । सौरं पदमवाप्नोति गायत्र्या मुनिसत्तम । प्राप्नोति ब्रह्मणो रूपं प्रणवेन न संशयः ॥ **क्रियासारे**– वामहस्ततले भस्म क्षिप्त्वाऽच्छाद्यान्यपाणिना । अग्निरित्यादिमन्त्रेण स्पृशन् भस्माभिमन्त्र्य च ॥

९४. "**भस्मधारणाभावे दोषः.**" **बृहन्नारदीये**–स्नानं दानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपो होमः सन्ध्यास्वाध्यायकर्मसु । ऊर्ध्वपुण्ड्रविहीनश्चेत्तत्सर्वं निष्फलं भवेत् ॥ **प्र० पारि०**–ललाटे तिलकं कृत्वा सन्ध्याकर्म समाचरेत् । अकृत्वा भालतिलकं तस्य कर्म निरर्थकम् ॥

९५. "**रुद्राक्षधारणफलम्.**" **वाचस्पतौ ईश्वरः**– रुद्राक्षा यस्य गात्रेषु ललाटे च त्रिपुण्ड्रकम् । स चाण्डालोपि संपूज्यः सर्ववर्णोत्तमो भवेत् । अभक्तो वापि भक्तो वा नीचो नीचतरोपि वा । रुद्राक्षान्धारयेद्यस्तु मुच्यते सर्वपातकैः । सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः । तं नमन्ति सुराः सर्वे यथा रुद्रस्तथैव सः ॥

९६. "**मालालक्षणम्.**" आ०का०–मध्यमादिद्वयं पर्व जपकाले तु वर्जयेत् । तं वै मेरुं विजानीयात्कथितं ब्रह्मणा पुरा ॥ मेरुहीना च या माला मेरूल्लङ्घ्या च या भवेत् । अशुद्धप्रतिकाशा च सा माला निष्फला भवेत् । चित्रिणी बिसतन्त्वाभा ब्रह्मनाडीगतान्तरा । तया संग्रथिता माला सर्वकामफलप्रदा ॥ **नागदेवः**–अरिष्टपत्रं वीजं च शङ्खपद्मौ मणिस्तथा । कुशग्रन्थिश्च रुद्राक्ष उत्तमं चोत्तरोत्तरम् । प्रवालमुक्तास्फटिकैर्जपः कोटिफलप्रदः । तुलसीमणिभिर्येन गणितं चाक्षयं फलम् । **व्यासः**–हिरण्यगर्भमणिभिर्जप्तं शतगुणं भवेत् । सहस्रगुणमिन्द्राक्षै रुद्राक्षैर्नियुतं भवेत् । नियुतं प्रयुतं वास्यात्पद्माक्षैस्तु न संशयः ॥ अष्टोत्तरशतं कुर्यात् चतुःपञ्चाशिकापि वा । सप्तविंशतिका वापि ततो नैवाधमा हिता । अक्षुद्रा समरन्ध्रा च परिपूर्णा दृढापि च । सशब्दा च चला या तु त्रुटिता ग्रथिता तथा । छिन्ना सूत्रेषु ग्रथिता पापाणस्यापुरातना । निश्चला ग्रथितान्योन्यं संघर्षणविवर्जिता । माला दुःखप्रदायिन्यो ग्रथिता निन्द्यतन्तुषु । तर्जन्या न स्पृशेदक्षं जपयेन्न विधूनयेत् । अङ्गुष्ठस्य तु मध्यस्य परिवर्त्तं समाचरेत् । मध्यमाऽकर्षणं त्वस्याः सर्वसिद्धिप्रदायकम् ॥

९७. "**रुद्राक्षधारणाभावे दोषः.**"–अरुद्राक्षो जपः पुंसां तावन्मात्रफलप्रदः । यस्याङ्गे ह्यस्ति रुद्राक्ष एकोऽपि वहुपुण्यदः । विभूतिर्यस्य नो भाले नाङ्गे रुद्राक्षधारणम् । नहि वाण्यां शिवोच्चारस्तं त्यजेदन्त्यजं यथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९८. "कुशपवित्रम्." **कात्यायनः**— अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्रकुत्रचित् ॥ **मार्कण्डेयः**—चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पावित्रकम् । एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् । सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् ॥ **सुमन्तुः**—समूलाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे करे । सव्ये चैव तथा त्रीन्वै बिभृयात्सर्वकर्मसु ॥ **अत्रिः**—ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते । भोजने वर्तुलं प्रोक्तमेवं धर्मो न हीयते ॥ **बौधायनः**— हस्तयोरुभयोर्द्वौ द्वा वासनेऽपि तथैव च ॥ **हारीतः**—वामहस्ते कुशान् कृत्वा समाचामति यो द्विजः । उपस्पर्शो भवेत्तुल्यो रुधिरेण मलेन च । उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः । सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेत् ॥ **प्र० पारि०**—स्नाने होमे जपे दाने स्वाध्याये पितृकर्मणि । करौ सदर्भौ कुर्वीत तथा सन्ध्याभिवादने ॥

९९. "कर्मविशेषे दर्भप्रमाणम्." **कुशकण्डिकासूत्रभाष्ये—ब्रह्मयज्ञे गोकर्णमात्रप्रमाणौ द्वौ दर्भौ । तर्पणे हस्तमात्रप्रमाणास्त्रयो दर्भाः** ॥ **अमरः**—प्रादेशतालगोकर्णास्तर्जन्यादियुते तते । अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुल इति ॥ **अत्रिः**—अनामिकामूलदेशे पवित्रं धारयेद्विजः ॥

१००. "कुशपवित्रप्रमाणम्.—" द्व्यङ्गुलं मूलवलयं ग्रन्थिरेकाङ्गुलिर्भवेत् । चतुरङ्गुलमग्रं स्यात्पवित्रस्य प्रमाणकम् । पौष्टिके पञ्चदर्भाणि चतुर्दर्भाणि शान्तिके । पैत्रिके तु त्रिदर्भाणि द्वौ दर्भौ नित्यकर्मणि ॥ **आ० का०**—यथा वज्रं सुरेन्द्रस्य यथा चक्रं हरेस्तथा । त्रिशूलं च त्रिनेत्रस्य ब्राह्मणस्य पवित्रकम् ॥ **तत्र च** ॥ द्विगुणीकृतानां दर्भशिखानां पाशः प्रदक्षिणमर्द्धवेष्टनं विधाय पश्चाद्भागेन यदा प्रवेश्यते तदा वर्तुलो ग्रन्थिः । यदा प्रादक्षिण्येन सर्ववेष्टनं विधाय पुरोभागेन प्रवेश्यते तदा ब्रह्मग्रन्थिरिति ॥ ब्रह्मयज्ञे जपेचैव ब्रह्मग्रन्थिर्विधीयते । भोजने वर्तुलं प्रोक्तमेवं धर्मो नहीयते ॥

१०१. "कुशपवित्राभावेऽन्यपवित्रम्." **हेमाद्रौ**—अन्यान्यपि पवित्राणि कुशदूर्वामयानि च । हेमात्मकपवित्रस्य कलां नार्हन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशीम् ॥ **कातीयसूत्रभाष्ये**–कुशाभावे तु काशाः स्युः काशाः कुशसमाः स्मृताः। काशाभावे गृहीतव्या अन्ये दर्भा यथोचिताः ॥ दर्भाभावे स्वर्णरूप्यताम्रैः कर्मक्रियाः सदा। कुशाः काशाः शरा दूर्वा यवगोधूमबल्वजाः ॥ सुवर्णं राजतं ताम्रं दश दर्भाः प्रकीर्तिताः। स्नाने होमे तथा दाने स्वाध्याये पितृतर्पणे । सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा ॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रन्थितं न वा। सपवित्रः सदर्भोवा कर्माङ्गाचमनं चरेत्। नोच्छिष्टं तत्सदर्भं च दर्भोच्छिष्टं तु वर्जयेत् ॥

१०२. **"हेमादिपवित्रप्रमाणम्."** **नागदेवः**–माषाणां षोडशादूर्ध्वं कुर्याद्धेमपवित्रकम्। तेभ्यः स्वल्पतरं न्यूनं न कुर्वीत कदाचन। हीनकर्मणि चोच्छिष्टे कुशजातं पवित्रकम् । निर्माल्यरूपं भवति न हेम्नस्तु पवित्रकम् ॥ **शारदायाम्**–ताम्रतारसुवर्णानामर्कषोडशखेन्दुभिः। कृता त्रिशक्तिमुद्रेयं तीव्रदारिद्र्यनाशिनी । इदं पवित्रं तर्जन्यां धारयन्ति सदा द्विजाः ॥ **योगियाज्ञवल्क्यः**–अनामिकाधृतं हेम तर्जन्यां रूप्यमेव च। कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः। रौप्यधारणमिदं जीवत्पितृकभिन्नविषयम् ॥ **प्र० पारि०**–उत्तरीयं योगपट्टं तर्जन्यां रजतं तथा । न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदि ॥ **ब्राह्मे**–मन्त्रं विना धृतं यत्तत्पवित्रं विफलं भवेत् ॥

१०३. **"सन्ध्याफलम्."** **अत्रिः**–सन्ध्यामुपासते ये तु सततं शंसितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥ **याज्ञवल्क्यः**–यावन्तोऽस्यां पृथिव्यां हि विकर्मस्थास्तु वै द्विजाः। तेषां वै पावनार्थाय सन्ध्या सृष्टा स्वयम्भुवा ॥ निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रिकालसन्ध्याकरणात्तत्सर्वं हि प्रणश्यति ॥

१०४. **"सन्ध्याभावे दोषः."** **मरीचिः**–सन्ध्या येन न विज्ञाता सन्ध्या येनानुपासिता। जीवमानो भवेच्छूद्रो मृतः श्वा चाऽभिजायते ॥ **दक्षः**–सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥

१०५. **"सन्ध्याव्याख्या."** **नागदेवः**–अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः। सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०६. "सन्ध्याकालः." —नागदेवः—सूर्योदयात्पूर्वं द्वे घटिके सन्ध्याकालः ॥ अग्निस्मृतौ—सन्ध्याकालः प्रागुदयाद्विप्रस्य द्विमुहूर्तकः। क्षत्रियस्य तदर्धं स्यात्तदर्धं स्याद्विशोऽच्युत ॥ धर्मसारे—उत्तमा तारकोपेता मध्यमा लुप्ततारका । अधमा सूर्यसहिता प्रातःसन्ध्या त्रिधा मता ॥

१०७. "त्रिकालसन्ध्यानामानि." व्यासः—गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने । सरस्वती च सायान्हे एवं सन्ध्या त्रिधा स्मृता॥

१०८. "सन्ध्यावर्णाः." व्यासः—गायत्री तु भवेद्रक्ता सावित्री शुक्लवर्णिका । सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥ तत्रैव—गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी । सरस्वती विष्णुरूपा उपास्या वर्णभेदतः ॥

१०९. "सन्ध्योपासने दिशः." बृहत्पाराशरः—ईशान्याभिमुखो भूत्वा द्विजः पूर्वमुखोऽपि वा । सन्ध्यामुपासयेन्नित्यं यथावत्तन्निबोधत ॥

११०. "सन्ध्यास्थलम्." शारदायाम्—पुण्यक्षेत्रं नदीतीरं गुहापर्वतमस्तकम् । तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं सरः । उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः । देवाद्यायतनं कूलं समुद्रस्य निजं गृहम् ॥ शातातपः—अनृतं मद्यगन्धं च दिवामैथुनमेव च । पुनाति वृपलस्थानं बहिः सन्ध्या ह्युपासिता ॥

१११. "सन्ध्योपयोगिजलपात्राणि." प्र० पारि०—धाराच्युतेन तोयेन सन्ध्योपास्तिर्विगर्हिता । नद्यां तीर्थे न्हदे वापि भाजने मृन्मयेपि वा । औदुम्बरे च सौवर्णे राजते दारुसंभवे । कृत्वा तु वामहस्ते वा सन्ध्योपास्तिं समाचरेत् ॥ मरीचिः—गोकर्णाकृतिवत्पात्रं ताम्रं रौप्यं च हाटकम् । जलं तत्र विनिक्षिप्य सन्ध्योपासनमाचरेत् ॥ आ० का०—कांस्येनायसपात्रेण त्रपुसीसकपित्तलैः । आचान्तः शतकृत्वोऽपि न कदाचन शुद्ध्यति ॥

११२. "जपस्थलम्." वाचस्पतौ ईश्वरः—गृहे जपः समः प्रोक्तो गोष्ठे शतगुणः स्मृतः । आरामे च तथाऽरण्ये सहस्रगुण उच्यते । अयुतः पर्वते पुण्ये नद्यां लक्षगुणस्तु सः । कोटिर्देवालये प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुरनन्तः शिवसन्निधौ ॥ **याज्ञवल्क्यः**—शतेन गायत्र्या स्नायात् शतमन्तर्जले जपेत । आपः शतेन पीत्वा तु सर्वपापैः प्रमुच्यते ॥

११३. "**कालातिक्रमणे सन्ध्योपासनम्.**" **मदनपारिजाते**—कालातिक्रमणे चैव चतुर्थार्घ्यं प्रदापयेत् ॥

११४. "**शिखाबन्धनम्.**" **चतुर्विंशतिमते**— मध्ये तु बह्वृचाश्चैव निबध्नीयुः शिखां ततः । माध्यन्दिनाश्च ये विप्राः पार्श्वे दक्षिणतः क्रमात् ॥ **नागदेवः**— मस्तके वामभागे च ब्रह्मग्रन्थिर्विधीयते । अमन्त्रो दीयते ग्रन्थिर्जपो होमो वृथा भवेत् । स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः । पुनराचम्य हृदयं बाहू स्कन्धौ च संस्पृशेत् । मानस्तोकेति मन्त्रेण शिखाबन्धं तु कारयेत् ॥ **संस्कारभास्करे**—खल्वाटत्वादिदोषेण विशिखश्चेन्नरो भवेत् । कौशीं तदा धारयीत ब्रह्मग्रन्थियुतां शिखाम् ॥ **अन्यच्च**—सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

११५. "**शिखाबन्धनविचारः.**" **ग्रन्थान्तरे**— स्नाने दाने जपे होमे सन्ध्यायां देवतार्चने । शिखाग्रन्थिं विना कर्म न कुर्याद्वै कदाचन । आसने शयने सङ्गे भोजने दन्तधावने । शिखामुक्तिं सदा कुर्यादित्येतन्मनुरब्रवीत् ॥

११६. "**आचमनम्.**" **कात्या० प० सूत्रे**—**आचम्य प्राणान्संमृशति आचामति आमागन्यति** ॥ **आ० का०**—प्रणवं पूर्वमुच्चार्य चतुर्विंशतिसंख्यया । स्वाहान्तं प्राशयेद्वारि नमोन्तं स्पर्शयेत्तथा । स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्याप्रसर्पणे । आचान्तः पुनराचामेद्वाससी परिधाय च । दक्षिणेनोदकं पेयं दक्षं वामेन संस्पृशेत् । तावन्न शुध्यते तोयं यावद्वामो न युज्यते । गोकर्णाकृतिहस्तेन मापमात्रं जलं पिबेत् ॥ **तन्त्रसारे**—दध्ना सह पलैकं तु शुद्धं वारि तथाचमेत् ॥ स्नानं सन्ध्या क्रियाः सर्वाः । कर्तव्याः शीतवारिणा । तथैवाचमनं प्रोक्तं कर्मानुष्ठानसिद्धये ॥

११७. "**आचमनप्रकाराः.**" **नागदेवः**— संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः । मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत् । माषमात्रसुवर्णस्य यत्र मज्जति वै मणिः । एतदाचमनं प्रोक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पवित्रं कायशोधनम् ॥ **भरद्वाजः**—आयतं पर्वणां कृत्वा गोकर्णाऽकृतिवत्करम् । एतेनैव विधानेन द्विज आचमनं चरेत् ॥ **बृहत्पाराशरः**— आमणेर्बन्धनाद्धस्तौ पादौ चाजानुतः शुचिः । प्रक्षाल्याचमयेद्विद्वानन्तर्जानुकरो द्विजः । प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम् । सुमृष्टाङ्गुष्ठमूलेन विमृज्य कृती मुखम् (अङ्गुष्ठमूलेन निर्लोमप्रदेशेन) । दक्षिणे च स्थितं तोयं तर्जन्या सव्यपाणिनः । तत्तोयं संस्पृशेद्यस्तु सोमपानसमं स्मृतम् ॥ **बौधायनः**— ॐ पूर्वाभिः सर्वाभिर्व्याहृतिभिराचामेत् । यत् प्रथममाचमति तेन ऋग्वेदं प्रीणाति । यद्द्वितीयं तेन यजुर्वेदम् । यत्तृतीयं तेन सामवेदम् । यत्प्रथमं संमार्ष्टि तेनाथर्वणवेदम् । यद्द्वितीयं तेनेतिहासादीन् । यत्सव्यं पाणिं प्रोक्षति पादौ शिरो हृदयं चक्षुः कर्णौ नासां नाभिं चोपस्पृशति तेनौषधिवनस्पतिप्रभृतीन्सर्वांश्च देवान् प्रीणाति ॥ **शङ्खः**—त्रिः प्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्य देवताः । ब्रह्मा विष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम । गङ्गा च यमुना चैव प्रीयेते परिमार्जनात् । नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये । स्पृष्टे लोचनयुग्मे तु प्रीयेते शशिभास्करौ । कर्णयुग्मे तथा स्पृष्टे प्रीयेते अनिलानलौ । स्कन्धयोः स्पर्शनादस्य प्रीयन्ते सर्वदेवताः । मूर्ध्नः संस्पर्शनादस्य प्रीतस्तु पुरुषो भवेत् ॥

११८. **"आचमनफलम्."** **ब्राह्मे**—होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेदन्यत्रापि सकृत्सकृत् । द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम् ॥ **व्यासः**— शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा । अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् । अपः पाणिनखस्पृष्टा आचामेद्यस्तु वै द्विजः । सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥ **पैठीनसिः**— जानुदघ्नजले नद्यास्तिष्ठन्नेवाचमेद्द्विजः । जानोरूर्ध्वं जले तिष्ठन् नाचान्तः शुचितामियात् ॥

११९. **"आचमनप्रकाराः."** **विश्वामित्रकल्पे**—शुद्धं स्मार्तं तथा चैव पौराणं वैदिकं तथा । तान्त्रिकं श्रौतस्मार्तं च षड्विधं श्रुतिनोदितम् । विण्मूत्रादिकशौचेषु शुद्धं च परिकीर्त्तितम् । स्मार्त्तं पौराणिकं कर्मण्याचमेद्विधिपूर्वकम् । वैदिकं श्रौतमित्यादि ब्रह्मयज्ञादिपू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकम् । अस्त्रविद्यादिकार्याणां तान्त्रिको विधिरुच्यते । "श्रौताचमनम्." आ० का०—प्रणवं पूर्वमुच्चार्य सावित्रीं तदनन्तरम् । तथैव व्याहृतीस्तिस्त्रः श्रौताचमनमुच्यते ॥ "स्मार्ताचमनम्." भरद्वाजः—केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ॥ द्वाभ्यामोष्ठौ तु संमृज्य द्वाभ्यामुन्मार्जनं तथा । एकेन हस्तौ प्रक्षाल्य पादावपि तथैव च । संप्रोक्ष्यैकेन मूर्द्धानं ततः संकर्षणादिभिः । आस्यनासाक्षिकर्णौ च नाभ्युरस्कं भुजौ क्रमात् । एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥

१२०. "जलाभावे आचमनम्." आचारमयूखे—क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते । पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् । अग्निरापश्च वेदाश्च सोमः सूर्योऽनिलस्तथा । सर्वे देवास्तु विप्रस्य कर्णे तिष्ठन्ति दक्षिणे ॥ सांख्यायनः—आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट् । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः । क्षुते निष्ठीवने सुप्ते परिधानेऽश्रुपातने । कर्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत् ॥ पराशरः—प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा । विप्रस्य दक्षिणे कर्णे वसन्ति मुनिरब्रवीत् ॥ गङ्गा च दक्षिणे श्रोत्रे नासिकायां हुताशनः । उभयोः स्पर्शने चैव तत्क्षणादेव शुद्ध्यति ॥ नागदेवः—अशब्दाभिरनुष्णाभिस्त्यक्ताभिः फेनबुद्बुदैः । आपद्गतानां शुद्धिः स्यादुष्णेनापि च वारिणा । पादक्षालनशेषेण नाचामेद्वारिणा द्विजः । शुद्धाभावे पिबेत्किञ्चित्त्यक्त्वा भूमौ तु तज्जलम् ॥ (आचमनार्थं तु नित्यमेव शीतोदकं ग्राह्यम्) ॥ मार्कण्डेयः—कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् । कुर्वीतालम्भनं चापि दक्षिणश्रवणस्य च ॥

१२१. "सन्ध्यामुद्राः." हेमाद्रौ—संमुखीकृत्य हस्तौ द्वौ किञ्चित्सङ्कुचिताङ्गुली । मुकुली तु समाख्याता पङ्कजा प्रसृतेव सा । पूर्वोक्ता मुकुली या च प्रादेशी निःसृताङ्गुली । व्याकोशमुद्रा मुकुला पञ्च मुद्राः प्रदर्शयेत् । अङ्गुष्ठौ कुञ्चितान्तौ तु स्वकीयाङ्गुलिचेष्टितौ । उच्चौ वाभिहतौ हस्तौ योजयित्वा तु निष्ठुरा । तर्जन्यौ कुञ्चिते कृत्वा तथैव च कनीयसी । अधोमुखी दृष्टनखा स्थिता मध्ये करस्य तु । चतस्त्रश्चोत्थिताः पृष्ठे अङ्गुष्ठावेकतः कुरु । नालम्ब्यावस्थितौ द्वौ तु योगमुद्रा प्रकीर्तिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२२. "प्राणायामः." का० परि० सूत्रे- वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजो रिष्टानि मेङ्गानि तनूस्तन्वा मे सह॥ योगियाज्ञवल्क्यः—सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिःपठेदायतप्राणः प्राणायामः स उच्यते ॥ अगस्त्यसंहितायाम्—प्राणायामैर्विना यद्यत्कृतं कर्म निरर्थकम् । अतो यत्नेन कर्तव्यः प्राणायामः शुभार्थिना ॥ देवीपुराणे—श्रुतिस्मृत्यादि कर्मादौ सगर्भः प्राणसंयमः । अगर्भो ध्यानमात्रं तु सचामन्त्रः प्रकीर्त्तितः ॥

१२३. "प्राणायामसंख्या."— प्रायश्चित्तत्वश्रवणात् । द्वौ द्वौ प्रातस्तु मध्याह्ने त्रिस्त्रिः सन्ध्यासुरार्चने । भोजनादौ भोजनान्ते प्राणायामास्तु षोडश ॥

१२४. "प्राणायामप्रकाराः."—योगियाज्ञवल्क्यः—नासापुटेनानिलमेव बाह्यमाकृष्य तेनैव शनैः समस्तम् । नाडीषु सर्वासु च पूरयेद्यः स पूरको नाम महान्निरोधः । न रेचकं नैव तु पूरकं वा नासाग्रभागे स्थितमेव वायुं । सुनिश्चलं धारयति क्रमेण कुम्भाख्यमेतं प्रवदन्ति तज्ज्ञाः । निःसार्य नासाविवरादशेषं प्राणं बहिः शून्य इवानिलेन । निरुच्छ्वसंस्तिष्ठति चोर्ध्ववायुः स रेचको नाम महान्निरोधः । नासिकाविष्ट उच्छ्वासो ध्मातः पूरक उच्यते । कुम्भो निश्चलनिःश्वासो रिच्यमानस्तु रेचकः । न प्राणेनाप्यपानेन वेगाद्वायुं समुत्सृजेत् । येन सक्तून् करस्थांश्च निःश्वासो नैव चालयेत् । शनैर्नासापुटाद्वायुमुत्सृजेन्न तु वेगतः ॥ "काम्यः" अङ्गिराः—दह्यमानोऽनुतापेन कृत्वा पापानि मानवः । शोचमानस्त्वहोरात्रं प्राणायामैर्विशुद्ध्यति ॥ पीडयेद्दक्षिणां नाडीमङ्गुष्ठेन तथोत्तराम् । कनिष्ठिकानामिकाभ्यां मध्यमां तर्जनीं त्यजेत् ॥ नीलोत्पलदलश्यामं नाभिमध्ये प्रतिष्ठितम् । चतुर्भुजं महात्मानं पूरके चिन्तयेद्धरिम् ॥ शौनकः— प्राणानायम्य विधिवद्वाग्यतः संयतेन्द्रियः । अथ सन्ध्यामुपासिष्य इति सङ्कल्प्य मार्जयेत् ॥ स एव— नासिकामङ्गुलीभिस्तु तर्जनीमध्यमाद्दते । सव्येन तु समाकृष्य दक्षिणेन विसर्जयेत् ॥ प्रणवं व्याहृतीः सप्त गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णायामः स उच्यते ॥ **कात्यायनः**— दक्षिणे रेचयेद्वायुं वामेनापूरीतोदरम् । कुम्भकेन जपं कुर्यात्प्राणायामो भवेदिति ॥ **प्र० पारि०**—पञ्चाङ्गुलीभिर्नासाग्रं पीडयेत्प्रणवेन वै ॥ मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थयोः ॥ कनिष्ठानामिकाङ्गुष्ठैर्यतेश्च ब्रह्मचारिणः॥ **नागदेवः**—बाह्यवायोरन्तः प्रवेशनं पूरकः । प्रवेशितस्य धारणं कुम्भकः । धृतस्य बहिर्निःसारणं रेचकः ॥ **यथा**—पूरणं दक्षया नाड्या कुम्भनं हृदयस्थया । रेचनं वामया कुर्यात्प्राणायामस्य लक्षणम् ॥ रेचकः पूरकश्चैव प्राणायामोऽथ कुम्भकः । प्रोच्यते सर्वशास्त्रेषु योगिभिर्यतमानसैः॥ रेचकोऽजस्त्रनिःश्वासः पूरकस्तन्निरोधनम् ॥ साम्येन संस्थितिर्या सा कुम्भकः परिगीयते । विरेच्य पवनं पूर्वं संकोच्य गुदमण्डलम् । पूरयित्वा विधानेन स्वशक्त्या कुम्भके स्थितिः । कुम्भके तु हृदि स्थाने ध्यायेत्तं कमलासनम् । ब्रह्माणं रक्तगौराभं चतुर्वक्त्रं पितामहम् । रेचके केशवं ध्यायेज्जलाधस्थं महेश्वरम्। शुद्धस्फटिकसंकाशं निर्मलं पापनाशनम् । पूरके विष्णुसायोज्यं कुम्भके ब्रह्मणोन्तिकम् । रेचकेन तृतीयं तु प्राप्नुयादैश्वरं पदम् । एतद्धि योगिनामुक्तं प्राणायामस्य लक्षणम् । ओमिति व्याहरन् विप्रो यथाविधि समाहितः । प्राणायामैस्त्रिभिः पूतस्तत्क्षणाज्ज्वलतेऽग्निवत्। यथा पर्वतधातूनां दोषान् हरति पावकः। एवमन्तर्गतं पापं प्राणायामेन दह्यते ॥

१२५. **" मार्जनम्."** **विश्वामित्रकल्पे**—भूमौ शिरसि चाकाशे आकाशे भुवि मण्डले । मण्डले च तथाकाशे एवं च नवधा क्षिपेत् । सेसथत्रयमाकाशे ववरत्रयं मस्तके । नकाराणां त्रयं भूमौ नान्यथा पावितं भवेत् । एवमापोहिष्ठेति तृचेन मार्जनं कुर्यात् ॥ **योगियाज्ञवल्क्यः**—अर्धर्चया क्षिपेदूर्ध्वमर्धर्चया क्षिपेदधः । अधोभागे विसृष्टाभिरसुरा यान्ति संक्षयम् । सर्वतीर्थाभिषेकं च ऊर्ध्वसंमार्जनाद्भवेत् । सिन्धुद्वीपं भवेदार्षं गायत्रं छन्द एव हि । आपस्तु दैवतं प्रोक्तं विनियोगश्च मार्जने ॥ सर्वत्र मार्जनं कर्म आन्हिकानामुदाहृतम् ॥ **छंदोगप०**—रक्षार्थं वारिणात्मानं परिक्षिप्य समन्ततः । शिरसो मार्जनं कुर्यात्कुशैः सोदकबिन्दुभिः ॥

१२६. **" सन्ध्यामन्त्रक्रमः."** **योगियाज्ञवल्क्यः**—ओंकारो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याहृतयश्चैव गायत्री सशिरा तथा । आपोहिष्ठा ऋचस्तिस्रः सूक्तमेवाघमर्षणम् । आदित्यरक्षणार्थं तु सायंप्रातर्दिनेदिने । सृष्टाः स्वयम्भुवा पूर्वं ब्रह्मणस्तन्मुखं स्मृतम् ॥

१२७. "अघमर्षणं तदेव पापपुरुषनिरसनम्." हरिहरभाष्ये—सुमित्रिया न आप इति यजुषा । आपो जलमञ्जलिना करद्वयपुटेनादाय । दुर्मित्रियास्तस्मै सन्त्विति यजुषा द्वेष्यं शत्रुं प्रतिनिषिञ्चेत् ॥ **नागदेवः**—जुम्बकायेति मन्त्रेण विदध्यादघमर्षणम् । जपेद्द्वादशवारं तु महापापापनुत्तये ॥ **हारीतः**—जुम्बकी नाम गायत्री वेदे वाजसनेयके । अन्तर्जले सकृज्जप्ता ब्रह्महत्यां व्यपोहति ॥ **शौनकः**—उद्धृत्य दक्षिणे हस्ते जलं गोकर्णवत्कृते । निःश्वासं नासिकाग्रे तु पाप्मानं पुरुषं स्मरेत् । ऋतश्चेति त्र्यृचं वापि द्रुपदां वा जपेदृचम् । दक्षनासापुटेनैव पाप्मानमपसारयेत् । तज्जलं नावलोक्याथ वामभागे क्षितौ क्षिपेत् ॥ **कात्यायनः**—करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च । जपेदनियताः सर्वास्त्रिः सकृद्वाघमर्षणम् ॥ **स्मृत्यन्तरे**— तत्संयोगिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् । उपपातकरोमाणं रक्तश्मश्रुविलोचनम् । खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिन्तयेदिति ॥ "**द्रुपदा गायत्री.**" **बृहस्पतिः**—द्रुपदानामयो मन्त्रो वेदे वाजसनेयके । अन्तर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्यते ॥ **योगियाज्ञवल्क्यः**— द्रुपदानाम सा देवी यजुर्वेदे प्रतिष्ठिता । अन्तर्जले त्रिरावर्त्य मुच्यते ब्रह्महत्यया । आचान्तः पुनराचामेन्मन्त्रवत्स्नानभोजने । द्रुपदां तु त्रिरावर्त्य तथा चैवाघमर्षणम् । सोपांशु प्रणवं वापि घ्राता ह्यापो विसर्जयेत् । **तथा**— कोकिलराजपुत्रस्तु द्रुपदाया ऋषिः स्मृतः । अनुष्टुप् च भवेच्छन्द आपश्चैव तु दैवतम् ॥

१२८. "**अर्घ्यम्.**" **आश्वलायनः**— ततस्तिष्ठन् जलं प्रगृह्य प्राङ्मुखोऽञ्जलिना स्मरेत् । स्थानादौ तु स्थितं तेजः स्फाटिकं ज्योतिषा समम् । उत्तीर्य तच्च संप्राप्तं दक्षिणेन पथाञ्जलीन् । व्या-

१ यजुर्वेदे पञ्चविंशाध्याये विधृतिन्नाभ्या इति यो नवमो मन्त्रः सा जुम्बकानाम्नी गायत्री ज्ञेया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि जपेन्मन्त्रं स्मृत्वैवं परितो रवेः । मन्देहान् युध्यतः क्रूरान्निक्षिपेत्तेष्वथाञ्जलीन् । षोडशाक्षरमन्त्रेण पुनराकृष्य सत्वरः । पुनर्जलं गृहीत्वैवं तेजोमन्त्रं च संस्मरन् । पूर्ववद्वाममार्गेण स्मृत्वा संस्थाप्य चात्मनि । प्रदक्षिणं समावर्त्य जलं गृह्याचमेत्ततः ॥ **शौनकः**—ईषन्नम्रः प्रभाते तु मध्याह्ने ऋजुसंस्थितः । द्विजोऽर्घ्यं प्रक्षिपेद्देव्या सायं तूपविशन्भुवि ॥ **व्यासः**—कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम् । आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वं सन्ध्ययोः क्षिपेत् । सकृदेव तु मध्याह्ने क्षेपणीयं द्विजातिभिः ॥ **अन्यच्च**—प्रातर्मध्याह्नयोः सन्ध्यां तिष्ठन्नेव समापयेत् । उपविश्य तु सायान्हे जले ह्यर्घ्यं न निक्षिपेत् ॥ एकं वाहननाशाय द्वितीयं शस्त्रनाशनम् । असुराणां वधार्थाय तृतीयार्घ्यं विदुर्बुधाः ॥

१२९. “ **जलाभांवेऽर्घ्यविचारः.** ” **अग्निस्मृतौ**—जलाभावे महामार्गे बन्धने त्वशुचावपि । उभयोः सन्ध्ययोः काले रजसा वार्घ्यमुच्यते ॥

१३०.“ **अर्घ्यफलम्.** ” **संग्रहे**– मुक्तहस्तेन दातव्यं मुद्रां तत्र न कारयेत् । तर्जन्यङ्गुष्ठयोगे तु राक्षसी मुद्रिका स्मृता । राक्षसी मुद्रिकार्घ्ये चेत्तत्तोयं रुधिरं भवेत् । जलेष्वर्घ्यं प्रदातव्यं जलाभावे शुचि स्थले । संप्रोक्ष्य वारिणा सम्यक् ततोऽर्घ्यं तु प्रदापयेत् । गायत्रीं शिरसा हीनां महाव्याहृतिपूर्विकाम् । प्रणवाढ्यां जपंस्तिष्ठन् क्षिपेद्वा अञ्जलित्रयम् । तेन वज्रोदकेनाशु मन्देहा नाम राक्षसाः । सूर्यारयः प्रलीयन्ते शैला वज्रहता इव । काललोपो न कर्तव्यो द्विजेन स्वहितेप्सुना । अर्धोदयास्तसमये तस्माद्वज्रोदकं क्षिपेत् । द्वौ पादौ तु समौ कृत्वा पूरयेदुदकाञ्जलीन् । गोशृङ्गमात्रमुत्क्रम्य जलमध्ये जलं क्षिपेत् । प्रायश्चित्तार्थमाचम्य मुच्यते दैत्यहत्यया । हस्ताभ्यां स्वस्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरम् । मध्यान्हे तु ऋजू बाहू सायं मुकुलितौ करौ ॥ **नागदेवः**—यदा रात्रौ माध्याह्नसन्ध्यां करोति तदा गायत्र्यार्घ्यं दद्यात् ॥

१३१. “**उपस्थानम्.**” **शौनकः**—सायंप्रातरुपस्थानं कुर्यान्मन्त्रैर्यथाक्रमम् ॥ **बृहत्पाराशरः**—उदत्यं चित्रंदेवानाममुपस्थाने नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योजयेत् । **योगियाज्ञवल्क्यः**— गायत्र्यास्तु जपं कृत्वा पूर्वं चैव यथाविधि । उपस्थानं स्वकैर्मन्त्रैरादित्यस्य तु कारयेत् । उदुत्यं चित्रंदेवानामुद्वयन्तमसस्परि । तच्चक्षुर्देव इति च एकचक्रेति वैधि च । उदगादित्ययं मन्त्र आकृष्णेनेति वै ऋचा । तृप्तात्मा संप्रयुञ्जीत शक्त्यान्यानि जपेत्सदा ॥ सन्ध्याद्वये प्युपस्थानमेवमाहुर्मनीषिणः । मध्यान्हे उदये चैव विभ्राडादीच्छया भवेत् । तदसंयुक्तपार्ष्णिर्वा एकपादो द्विपादपि । जपेत्कृताञ्जलिर्वाऽपि उर्ध्वबाहुरथापि वा। यत्रस्यात्कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनीषिणः । भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयोह्यवाप्यते ॥ **व्यासः**—उदुत्यं जातवेदेति ऋषिः प्रस्कण्व उच्यते । छन्दो गायत्रमेवास्य सूर्यो दैवतमेव च । अग्निष्टोम उपस्थाने विनियोगः प्रकीर्तितः । चित्रं देवेति च ऋच ऋषिः कौत्स उदाहृतः । त्रिष्टुप् छन्दो दैवतं च सूर्योऽस्य परिकीर्तितः ॥

१३२. "**गायत्रीवर्णदेवताः**" **योगियाज्ञवल्क्यः**—अक्षराणां तु दैवत्यं संप्रवक्ष्याम्यतः परम् । आग्नेयं (**तत्**) प्रथमं ज्ञेयं वायव्यश्च (**स**) द्वितीयकम् । तृतीयं (**वि**) सूर्यदैवत्यं चतुर्थं (**तुः**) वैद्युतं तथा । पञ्चमं (**व**) यमदैवत्यं वारुणं (**रे**) षष्ठमुच्यते । बार्हस्पत्यं सप्तमं तु (**ण्**) पार्जन्यमष्टमं (**यम्**) विदुः । ऐन्द्रं तु नवमं (**भ**) ज्ञेयं गान्धर्वं दशमं (**र्गः**) तथा । पौष्णमेकादशं (**दे**) प्रोक्तं मैत्रावरुणं द्वादशम् । (**व**) त्वाष्ट्रं त्रयोदशं (**स्य**) ज्ञेयं वासवं तु चतुर्दशम् (**धी**) मारुतं पञ्चदशकं (**म**) सौम्यं षोडषकं (**हि**) स्मृतम् । सप्तदशं (**धि**) त्वाङ्गिरसं वैश्वदेवमतः परम् । (**यः**) आश्विनं चैकोनविंशं (**यः**) प्राजापत्यं तु विंशकम् (**नः**) । सर्वदेवमयं प्रोक्तमेकविंश(**प्र**)मतः परम् । रौद्रं द्वाविंशकं (**चो**) प्रोक्तं त्रयोविंशं तु (**द**) ब्राह्मकम् । वैष्णवं तु (**यात्**) चतुर्विंशमेता ह्यक्षरदेवताः । जपकाले तु संस्मृत्य तासां सायुज्यतां व्रजेत् । गायत्री वेदजननी गायत्रीं पापनाशिनी । गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम् । हस्तत्राणप्रदा देवी पततां नरकार्णवे । तस्मात्तामभ्यसेन्नित्यं ब्राह्मणोऽनुदये शुचिः । गायत्रीनिरतं हव्यकव्येषु विनियोजयेत् । तस्मिन्न लिप्यते पापमब्बिन्दुरिव पुष्करे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३३. " गायत्रीशब्दस्यार्थः. " नागदेवः—गायन्तं त्रायते यस्माद्गायत्री तेन सोच्यते ॥

१३४. "जपनियमाः." याज्ञवल्क्यः— ध्यायेत्तु मनसा मन्त्रं जिह्वोष्ठौ न विचालयेत् । न कम्पयेच्छिरो ग्रीवां दन्तान्नैव प्रकाशयेत् । यक्षरक्षःपिशाचाश्च सिद्धविद्याधरा गणाः । यस्मात्प्रभावं गृण्हन्ति तस्माद्गुह्यं तु कारयेत् ॥ धर्मप्रवृत्तौ—प्रातर्नाभौ करं कृत्वा मध्यान्हे हृदि संस्थितम् । सायं जपति नासाग्रे जपस्तु त्रिविधः स्मृतः । प्रातर्मध्याह्नयोस्तिष्ठन् गायत्रीजपमारभेत् । ऊर्ध्वजानुस्तु सायान्हे ध्यानालोकनतत्परः । कृत्वोत्तानौ करौ प्रातः सायं न्युब्जौ करौ तथा । मध्यान्हे हृदयस्थौ तु कृत्वा जपमुदीरयेत् ॥ व्यासः—धृत्वा पवित्रं संप्रोक्ष्य जपस्थानं कुशोदकैः । आधारादीन् नमस्कृत्य कुशाग्रैरासनं ततः । बद्ध्वा पद्मासनं वापि स्वस्तिकं वा यथासुखम् । ॐ भुर्भुवः स्वरोमिति जपित्वासनमुपविशेत् ॥ पटले—अप्रोक्षितजपस्थानाच्छक्रो हरति यज्जपम् । (तस्माज्जपान्ते तत्प्रोक्ष्य ललाटे तिलकं क्रियात्)॥ वृद्धमनुः—वस्त्रेणाच्छाद्य तु करं दक्षिणं यः सदा जपेत् । तस्य स्यात्सफलं जाप्यं तद्धीनमफलं स्मृतम् । अत एव जपार्थं सा गोमुखी ध्रियते जनैः॥

१३५. " जपसंख्या. " स्मृत्यन्तरे–सायं प्रातश्च मध्यान्हे सावित्रीं वाग्यतो जपेत् । सहस्रपरमां देवीं शतमध्यां दशावराम् ॥ मनुः–विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥ व्यासः–अष्टोत्तरशतं नित्यमष्टाविंशतिरेव वा । विधिना दशकं वापि त्रिकालेषु जपेद्बुधः । तत उद्वास्य गायत्रीमुत्तमेत्यनुवाकतः ॥

१३६. " जपफलम्. " नृसिंहपुराणे–त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत । वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः । त्रयाणां जपयज्ञानां श्रेयान्स्यादुत्तरोत्तरः ॥ एतेषां लक्षणान्याह । विश्वामित्रः– यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः । मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः । शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ च चालयेत् । अपरैर्न श्रुतः किंचित् स उपांशुर्जपः स्मृतः । धिया य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् । शब्दार्थचिन्तनं भूप कथ्यते मानसो जपः ॥

१३७. "जपलक्षणम्." स्मृत्यन्तरे– सम्पुटैकषडोङ्कारा गायत्री त्रिविधा मता । तत्रैकप्रणवा ग्राह्या गृहस्थैर्ब्रह्मचारिभिः ॥ गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत् । अन्ते यः प्रणवं कुर्यान्नासौ वृद्धिमवाप्नुयात् । सम्पुटां च षडोङ्कारां गायत्रीं च जपेद्यतिः ॥ गायत्रीकल्पे– पर्वभिस्तु जपेद्देवीं माला काम्यजपे स्मृता । गायत्री वेदमूला स्याद्वेदः पर्वसु गीयते । आरभ्यानामिकामध्यं पर्वाण्युक्तान्यनुक्रमात् । तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु । मध्यमाङ्गुलिमूले तु यत्पर्वद्वितयं भवेत् । तं वै मेरुं विजानीयाज्जपे तं नातिलङ्घयेत् ॥

१३८. "गायत्रीजपविधिः." बौधायनः— दर्भेष्वासीनो दर्भान् धारयमाणः प्राङ्मुखः सावित्रीमावर्त्तयेत् ॥ शङ्खः—कुशमयासनासीनः कुशोत्तरीयवान् कुशपवित्रपाणिः प्राङ्मुखः सूर्याभिमुखो वा अक्षमालामादाय देवताध्यायी जपं कुर्यात् ॥ तत्र ॐभूर्भुवः स्वरित्यनेन त्रिवारं हृदयशिरःशिखास्थानानि मार्जयेत् ॥ योगियाज्ञवल्क्यः—सविता देवता ह्यस्या मुखमग्निस्तदित्यृचः । विश्वामित्र ऋषिच्छन्दो गायत्रं च विधीयते । कर्मेन्द्रियाणि पञ्चैव पञ्च बुद्धीन्द्रियाणि च । पञ्च पञ्चेन्द्रियार्थाश्च भूतानां चैव पञ्चकम् । मनोबुद्धिस्तथात्मा च अव्यक्तं च यदुत्तमम् । चतुर्विंशत्यथैतानि गायत्र्या अक्षराणि तु । प्रणवं पुरुषं विद्धि सर्वगं पञ्चविंशकम् । ॐकारः पूर्वमुच्चार्यो भूर्भुवःस्वस्तथैव च । गायत्री प्रणवश्चान्ते जप एवमुदाहृतः । सप्तभिः पावयेद्देहं दशभिः प्रापयेद्दिवम् । विंशत्यावर्तिता देवी नयते चेश्वरालयम् । अष्टोत्तरशतं जप्ता तारयेज्जन्मसागरात् । तीर्णो न पश्यति प्रायो जन्ममृत्युं हि दारुणम् ॥ दशभिर्जन्मजनितं शतेन तु पुरा कृतम् । त्रिजन्मजं सहस्रेण गायत्री हन्ति किल्बिषम् ॥ छन्दोगपरिशिष्टे—सर्वेषामेव वेदानां गुह्योपनिषदां तथा । सारभूता तु गायत्री निर्गता ब्रह्मणो मुखात् ॥ बृहद्यमः—न तथा वेदजपतः पापं निर्दहति द्विजः । यथा सावित्रिजपतः सर्वपापैः प्रमुच्यते ॥ कूर्मपुराणे—गायत्रीं चैव वेदांश्च तुलया समतोलयत् । वेदा एकत्र साङ्गास्तु गायत्री चैकतः स्मृता ॥ योगि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्यः—वेदाः साङ्गास्तु चत्वारोऽधीताः सर्वेऽथ वाङ्मयाः । गायत्रीं यो न जानाति वृथा तस्य परिश्रमः । गायत्रीमात्रसंतुष्टः श्रेयान्विप्रः सुयन्त्रितः । न यन्त्रितस्त्रिवेदी च सर्वाशी सर्वविक्रयी ॥

१३९. "**सप्त महाव्याहृतयः.**" **योगियाज्ञवल्क्यः**—व्याहृतीनां तु सर्वासामार्षं चैव प्रजापतिः । सप्त छन्दांसि प्रोक्तानि छादनानि तु सर्वशः । गायत्र्युष्णिगनुष्टुप् च जगती त्रिष्टुबेव च । पङ्क्तिश्च बृहती चेति सप्त छन्दांसि तानि वै । अग्निर्वायुस्तथादित्यो बृहस्पतिरपांपतिः । इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः । अनाम्नातेषु नित्येषु प्रायश्चित्तेषु सर्वदा । प्राणायामप्रयोगे च विनियोग उदाहृताः ॥

१४०. "**सन्ध्यास्तुतिः.**" **विश्वामित्रकल्पे**–विप्रो वृक्षस्तस्य मूलं च सन्ध्या वेदः शाखा धर्मकर्माभिपत्रे । तस्मान्मूलं यत्नतो रक्षणीयं छिन्ने मूले नैव शाखा न पत्रे ॥ ॐकारप्रौढमूलः क्रमपदसहितच्छन्दविस्तीर्णशाखो ऋक्पत्रः सामपुष्पो यजुरधिकफलोऽथर्वगन्धं दधानः । यज्ञच्छायासमेतो द्विजमधुपगणैः सेव्यमानः प्रभाते मध्ये सायं त्रिकालं सुचरितचरितः पातु वो वेदवृक्षः ॥ स्वकाले सेविता नित्यं सन्ध्या कामदुघा भवेत् । अकाले सेविता सा च सन्ध्या वन्ध्या वधूरिव ॥

१४१. "**अभिवादनम्.**" **होलिर्भाष्ये**–यस्य देशो न विज्ञातो नाम गोत्रं त्रिपूरुषम् । कन्यादाने पितृश्राद्धे नमस्कारे च वर्जयेत् ॥ **नागदेवः**–पाखण्डं पतितं व्रात्यं महापातकिनं शठम् । सोपानत्कं कृतघ्नं च नाभिवादेत्कदाचन । धावन्तं च प्रमत्तं च शूद्राचारकरं तथा । भुञ्जानमप्यनाचान्तं नास्तिकं नाभिवादयेत् । जपन्तं च जलस्थं च समित्पुष्पकुशानलान् । उदपात्रं तथा भैक्ष्यं वहन्तं नाभिवादयेत् ॥ **जमदग्निः**– देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनम् । नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेद्द्विजः ॥ **उक्तंच**–दूरस्थं जलमध्यस्थं धावन्तं धनगर्वितम् । स्नातं मूढं चाशुचिकं नमस्कारांस्तु वर्जयेत् ॥ नमस्कारं विना विप्र आशीर्वादं प्रयच्छति । विप्रो भवति चाण्डालो गृण्हानो नरकं व्रजेत् ॥ सभायां यज्ञशालायां देवतायतनेषु च । प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुरा कृतम् ॥ यदि स्नातो भवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विप्रो मस्तके तिलकं विना । नमस्कारं न कुर्यात्तमिति प्रोचुर्मनीषिणः ॥ आ० का०—लौकिकं वैदिकं कर्म तथाध्यात्मिकमादितः । भोशब्दं कीर्त्तयेदन्ते स्वस्य नामाभिवादने । सभासु चैव सर्वासु यज्ञे राजगृहेषु च । नमस्कारं प्रकुर्वीत ब्राह्मणं न पृथङ्नमेत् । समित्पुष्पकुशान्यम्बुमृत्तिकाक्षतपाणिनः । जपं होमं च कुर्वाणा नाभिवाद्यास्तथा द्विजाः । योगिनं च तपःसक्तं ध्यानस्थं नाभिवादयेत् । धावन्तं च प्रमत्तं वा मूत्रोच्चारकरं तथा ॥

१४२. " सन्ध्याविसर्जनम्. " स्मृतौ— स्वस्तिकाकारहस्ताभ्यां कर्णौ स्पृष्ट्वा । पश्चात्स्वस्य नामगोत्रप्रवरोच्चारपूर्वकं देवगुरुवृद्धानभिवादयेत् ॥ धर्मसिन्धौ— सन्ध्याङ्गभूतन्यासप्राणायामादि विधेयम् । मुद्रातर्पणादिविधिः कृताकृत इति ॥

[illegible] " अथ प्रातःसन्ध्याप्रयोगः. " — यथोक्तस्नानानन्तरं [illegible]देव यज्ञ[illegible] गृहीत्वानन्तरं कुशासने स्वस्तिकादौ पर[illegible]भूतविश्वामित्र [illegible]न्ध्योपासनमारभेत् ॥ तत्रादौ मा[illegible]त्य[illegible]यन । वाग्देहा गाय[illegible]भस्म गृहीत्वा पश्चादुदक- [illegible]पापक्ष[illegible]ायणः प्रीयतां न मपे विनियोगः । गायत्र्य[illegible] मन्त्राः— ॐ [illegible]नं तु यद्भवेत् । ताः । देवाश्चक्रिरे विश्वसृष्टिं त[illegible] । स्थल- ' मिष्टकरनिसर्जय । यन्मुखान्निसृतोऽखिलवेदगर्भः । श[illegible] । मन ' तु गायत्री सफला न कदाचन । शापादुत्तरिता स[illegible] ' भुक्तिमुक्तिफलप्रदा ॥ इति शापविमोचनं कृताकृतम् ॥ "अथ ' गायत्र्यस्त्रोपाहरणम् " ॥ अस्य गायत्र्यस्त्रोपाहरणमन्त्रस्य ' ' ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि छन्दांसि । ' ' क्रियामयं वपुः । परात्परशक्तिर्देवता । हं बीजम् । संशक्तिः । ' ' सोहं कीलकम् । अस्त्रोपसंहरणार्थे जपे विनियोगः । ॐ ब्र- ' ' ह्मतेजोज्वालामालिनीं देवीं ह्रां अङ्गुष्ठाभ्यां नमः । ॐ वि- ' ' ष्णुतेजोज्वालामालिनीं देवीं ह्रीं तर्जनीभ्यां नमः । ॐ रुद्र- ' ' तेजोज्वालामालिनीं देवीं ह्रूं मध्यमाभ्यां नमः । ॐ अग्नि- ' ' तेजोज्वालामालिनीं देवीं ह्रैं अनामिकाभ्यां नमः । ॐ ज्ञान- '

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नो॑ व्वी॒रान्रु॑द्रभा॒मिनो॑ व्वधीर्हविष्म॑न्त॒ः सद॒मित्त्वा॑ हवामहे ॥
॥ ४ १६/१६ ॥ " कण्ठे रुद्राक्षमालाधारणम् "– ॐ त्र्यम्बकं
यजामहे० । ५ ६०/३ ॥ "आचमनम् "– सन्ध्यायां स्मार्ताचमनं कु-
र्यात् । ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा ।
ॐ माधवाय नमः स्वाहा । इत्याचम्य । ॐ गोविन्दाय नमः–
इति दक्षिणकरं प्रक्षाल्य । ॐ विष्णवे नमः ॐ मधुसूदनाय
नमः —इति ओष्ठौ प्रक्षाल्य । ॐ त्रिविक्रमाय नमः– इति
ओष्ठप्रोक्षणम् । ॐ वामनाय नमः– इत्युदकमभिमन्त्र्य । ॐ
श्रीधराय नमः–इति वामकरं प्रक्षाल्य । ॐ हृषीकेशाय नमः–
इति दक्षिणपादं प्रक्षाल्य । ॐ पद्मनाभाय नमः—इ[illegible] ऽथर्वगन्धं
प्रक्षाल्य । ॐ दामोदराय नमः–इति शिरसि प्रो[illegible]
ङ्कर्षणाय नमः–इत्यधरोष्ठप्रोक्षणम् [illegible] सन्ध्यमानः प्रभाते मध्ये
दक्षिणनासापुटस्पर्शनम् । [illegible] पातु वो वेदवृक्षः ॥ स्वकाले सेविता
र्शनम् । ॐ अ[illegible] भवेत् । अकाले सेविता सा च सन्ध्या
षोत्तमाय [illegible] " अभिवादनम्. " होलिर्भाष्ये–यस्य देशो न विज्ञा-
इति द[illegible] मि गोत्रं त्रिपूरुषम् । कन्यादाने पितृश्राद्धे नमस्कारे च वर्जये-
त् ॥ नागदेवः–पाखण्डं पतितं व्रात्यं महापातकिनं शठम् । सोपा-
नत्कं कृतघ्नं च नाभिवादेत्कदाचन । धावन्तं च प्रमत्तं च शूद्राचारकरं
तथा । भुञ्जानमप्यनाचान्तं नास्तिकं नाभिवादयेत् । जपन्तं च जल-
स्थं च समित्पुष्पकुशानलान् । उदपात्रं तथा भैक्ष्यं वहन्तं नाभिवाद-
येत् ॥ जमदग्निः– देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनम् ।
नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेद्द्विजः ॥ उक्तंच–दूरस्थं जलम-
ध्यस्थं धावन्तं धनगर्वितम् । स्नातं मूढं चाशुचिकं नमस्कारांस्तु वर्ज-
येत् ॥ नमस्कारं विना विप्र आशीर्वादं प्रयच्छति । विप्रो भवति
चाण्डालो गृण्हानो नरकं व्रजेत् ॥ सभायां यज्ञशालायां देवतायतनेषु
च । प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुरा कृतम् ॥ यदि स्नातो भवे-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा च । आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः । ब्रह्माग्निवायुसूर्या देवताः यजुश्छन्दः । प्राणायामे विनियोगः—]" ॐ नमो भगवते वासुदेवाय " इति मन्त्रेणात्मनः प्रदक्षिणमुदकं क्षिपेत् । ततः कनिष्ठिकाऽनामिकाभ्यां वामनासापुटं संपीड्य दक्षिणेन वायुं पूरयेत् । [ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ६ $\frac{३५}{३}$ ॥ ॐ आपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम्]। ततोङ्गुष्ठेन दक्षिणनासापुटं सम्पीड्य । एवमुभयनासापुटनिरोधे सति । पुनः ॐ भूरित्यादि-[illegible]रोमित्यन्तेनैकावृत्तिपठितेन कुम्भकं कृत्वा । ततः कनिष्ठानामिके [illegible] ॐ भूरित्यादिस्वरोमित्यन्तमेकावृत्या पाठित्वा वायुं [illegible] देव यज्ञ[illegible] पर[illegible]भूर्विश्वामित्र[illegible]"— ॐ पवित्रेस्थोवैष्णव्यौ मा[illegible]त्य[illegible]ख्येन । वाग्देहा गायवित्रेण सूर्यस्य रश्मिभिः [illegible]रायणः प्रीयतां न मपे विनियोगः । गायत्री[illegible]त्कामः पुनेतच्छे-[illegible]नं तु यद्भवेत् । ताः । देवाश्चक्रिरे विश्वसृष्टिं तश्चेत्तेन कुश-' मिष्टकरं निसृज्य । यन्मुखान्निसृतोऽखिलवेदगर्भः । श[illegible] ॐ त्रि-' तु गायत्री सफला न कदाचन । शापादुत्तरिता सा । ' भुक्तिमुक्तिफलप्रदा ॥ इति शापविमोचनं कृताकृतम् ॥ "अथ ' ' गायत्र्यस्त्रोपाहरणम् " ॥ अस्य गायत्र्यस्त्रोपाहरणमन्त्रस्य ' ' ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि छन्दांसि । ' ' क्रियामयं वपुः । परात्परशक्तिर्देवता । हं बीजम् । सं शक्तिः । ' ' सोहं कीलकम् । अस्त्रोपसंहरणार्थे जपे विनियोगः । ॐ ब्र-' ' ह्मतेजोज्वालामालिनीं देवीं ह्रां अङ्गुष्ठाभ्यां नमः । ॐ वि-' ' ष्णुतेजोज्वालामालिनीं देवीं ह्रीं तर्जनीभ्यां नमः । ॐ रुद्र-' ' तेजोज्वालामालिनीं देवीं ह्रूं मध्यमाभ्यां नमः । ॐ अग्नि-' ' तेजोज्वालामालिनीं देवीं ह्रैं अनामिकाभ्यां नमः । ॐ ज्ञान-'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥ " भूतशुद्धिः "– अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया । अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् । सर्वेषामविरोधेन सन्ध्याकर्म समारभे ॥ अनेन मन्त्रेण वामपादपार्ष्णिना त्रिवारं भूमिं ताडयेत् । तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम । भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ " मार्जनम् "– ॐ भूः पुनातु– शिरसि । ॐ भुवः पुनातु– नेत्रयोः । ॐ स्वः पुनातु—कण्ठे । ॐ महः पुनातु– हृदये । ॐ जनः पुनातु—नाभ्याम् । ॐ तपः पुनातु—पादयोः । ॐ सत्यं पुनातु— पुनः शिरसि । ॐ खं ब्रह्म पुनातु– सर्वत्र । ॐ आपोहिष्ठामयोभुवं÷। ॐमपदंस-
ऊर्जेदधातन । ॐमहेरणायचक्षसे ॥ ९१४ ...वकफलोऽथर्वगन्धं
...पगणैः सेव्यमानः प्रभाते मध्ये
मोरसं÷। ॐ तस्यभाजय... पातु वो वेदवृक्षः ॥ स्वकाले सेविता
॥ १०$\frac{१५}{३६}$ ॥ ॐ तस्मा... भवेत् । अकाले सेविता सा च सन्ध्या
ॐ आपोजन...॥

" व्याहृ... " अभिवादनम्. " होलिभाष्ये–यस्य देशो न विज्ञा- ...न गोत्रं त्रिपूरुषम् । कन्यादाने पितृश्राद्धे नमस्कारे च वर्जये- ...त् ॥ नागदेवः–पाखण्डं पतितं व्रात्यं महापातकिनं शठम् । सोपानत्कं कृतघ्नं च नाभिवादेत्कदाचन । धावन्तं च प्रमत्तं च शूद्राचारकरं तथा । भुञ्जानमप्यनाचान्तं नास्तिकं नाभिवादयेत् । जपन्तं च जलस्थं च समित्पुष्पकुशानलान् । उदपात्रं तथा भैक्ष्यं वहन्तं नाभिवादयेत् ॥ जमदग्निः– देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनम् । नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेद्विजः ॥ उक्तंच–दूरस्थं जलमध्यस्थं धावन्तं धनगर्वितम् । स्नातं मूढं चाशुचिकं नमस्कारांस्तु वर्जयेत् ॥ नमस्कारं विना विप्र आशीर्वादं प्रयच्छति । विप्रो भवति चाण्डालो गृण्हानो नरकं व्रजेत् ॥ सभायां यज्ञशालायां देवतायतनेषु च । प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुरा कृतम् ॥ यदि स्नातो भवे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नार्थे जपे विनियोगः । गायत्रीं ब्रह्मेत्युपासीत यद्रूपं ब्रह्मवि-
दो विदुः । तां पश्यन्ति धीराः सुमनसा वाचामग्रतः । ॐ
वेदान्तनाथाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म
प्रचोदयात् ॥ ॐ देवी गायत्री त्वं ब्रह्मशापाद्विमुक्ता भव ॥
अस्य श्री वसिष्ठशापविमोचनमन्त्रस्य निग्रहानुग्रहकर्त्ता व-
सिष्ठ ऋषिः । वसिष्ठानुगृहीता गायत्रीशक्तिर्देवता । विश्वो-
द्भवा गायत्री छन्दः । वसिष्ठशापविमोचनार्थे जपे विनियो-
गः । ॐ सोहमर्कमयं ज्योतिरात्मज्योतिरहं शिवः । आत्म-
ज्योतिरहं शुक्रः सर्वज्योती रसोस्म्यहम् ॥ इत्युक्त्वा योनिमुद्रां
[illegible] गायत्रीत्रयं पठित्वा ॥ ॐ देवी गायत्री त्वं वसिष्ठशा-
[illegible] देव युज्ञ२९ ॥ अस्य श्री विश्वामित्रशापविमोचनमन्त्रस्य
पर[illegible]भूर्विश्वामित्र ऋषिः । विश्वामित्रानुगृहीता
मावत्र्यैत्यरेणरयन । वाग्देहा गायत्री छन्दः । विश्वामित्र-
ायणः प्रीयतां न मपे विनियोगः । गायत्रीं भजाम्यग्निमुखीं
नं तु यद्भवेत् । ताः । देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणी-
मिष्टकरीं प्रपद्ये । यन्मुखान्निसृतोऽखिलवेदगर्भः । शापयुक्ता
तु गायत्री सफला न कदाचन । शापादुत्तरिता सा तु
भुक्तिमुक्तिफलप्रदा ॥ इति शापविमोचनं कृताकृतम् ॥ "अथ
गायत्र्यस्त्रोपाहरणम्" ॥ अस्य गायत्र्यस्त्रोपाहरणमन्त्रस्य
ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि छन्दांसि ।
क्रियामयं वपुः । परात्परशक्तिर्देवता । हं बीजम् । सं शक्तिः ।
सोहं कीलकम् । अस्त्रोपसंहरणार्थे जपे विनियोगः । ॐ ब्र-
ह्मतेजोज्वालामालिनीं देवीं ह्रां अङ्गुष्ठाभ्यां नमः । ॐ वि-
ष्णुतेजोज्वालामालिनीं देवीं ह्रीं तर्जनीभ्यां नमः । ॐ रुद्र-
तेजोज्वालामालिनीं देवीं ह्रूं मध्यमाभ्यां नमः । ॐ अग्नि-
तेजोज्वालामालिनीं देवीं ह्रैं अनामिकाभ्यां नमः । ॐ ज्ञान-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'तेजोज्वालामालिनीं देवीं ह्रौं कनिष्ठिकाभ्यां नमः। ॐ सत्य-'
'तेजोज्वालामालिनीं देवीं ह्रः करतलकरपृष्ठाभ्यां नमः । ब-'
'ह्रुरूपिणि गायत्रि दिव्यसन्ध्ये सरस्वति ॥ अजरे अमरे देवि'
'ब्रह्मयोनि नमोऽस्तु ते । इति गायत्र्यस्त्रोपाहरणं कृताकृतम् ॥'

सुमुखं संपुटं चैव विततं विस्तरं तथा । द्विमुखं त्रिमुखं चैव चतुःपञ्चमुखं तथा । षण्मुखाधोमुखं चैव व्यापकाञ्जलिकं तथा । शकटं यमपाशं च ग्रन्थितं चोन्मुखोन्मुखम् । प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम् । सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ॥ एता मुद्रा न जानाति गायत्री निष्फला भवेत् । (तस्मादाचार्येणाध्येतृणामेताश्चतुर्विंशतिर्मुद्रा इतिकर्तव्यतयावश्यमेव शिक्षणीयाः । तेन गायत्री सुप्रतिष्ठिता सफला च [illegible]यमानः प्रभाते [illegible] लां वस्त्राच्छादितां नाभिदेशे धृत्वा ॥ गायत्रीज[illegible]ः ॥ स्वकाले सेविता ब्रह्मा ऋषिः। परमात्मा देवता। गायत्री छन्[illegible]विता सा च सन्ध्या [illegible] पतिर्ऋषिः । अग्निवायुसूर्या देवताः। गाय[illegible] यार्थे गायत्रीमन्त्रजपे विनियोगः ॥ "गाय[illegible]यस्य देशो न वि[illegible]भू-र्भुवः स्वः ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि । धियोयोनः प्रचोदयात्। ॐ २२$\frac{३५}{३}$ ॥ "तथोत्तरं धेनुमुद्रा"– सुरभिर्ज्ञानयोनी च मत्स्यः कूर्मोऽथ पङ्कजम् । लिङ्गं निर्वाणकं चैव जपान्तेऽष्टौ प्रदर्शयेत् ॥ (आचार्येण एता अप्यष्ट मुद्राः शिक्षणीयाः) ॥ "सूर्यप्रदक्षिणा"– विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्मा भौवन ऋषिः । विश्वकर्मा देवता। त्रिष्टुप् छन्दः। सूर्यप्रदक्षिणायां विनियोगः । ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् । सम्बाहुभ्यांधमति सम्पतत्रैर्द्यावाभूमी जनयन्देवएकः २३$\frac{१९}{१७}$ ॥ "सूर्यादिदिग्देवतानां नमस्काराः"– एकचक्र इत्यस्य नारायण ऋषिः। सूर्यो देवता । उष्णिक् छन्दः । सूर्यनमस्कारे विनियोगः । एकचक्रो रथो यस्य दिव्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कनकभूषितः । स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥ ॐ गायत्र्यै नमः । ॐ सावित्र्यै नमः । ॐ सन्ध्यायै नमः । ॐ सरस्वत्यै नमः ॐ पूर्वे इन्द्राय नमः । ॐ आग्नेय्यां अग्नये नमः । ॐ दक्षिणस्यां यमाय नमः । ॐ नैर्ऋत्यां निर्ऋतये नमः । ॐ पश्चिमे वरुणाय नमः । ॐ वायव्यां वायवे नमः । ॐ उत्तरस्यां कुबेराय नमः । ॐ ईशान्यां ईश्वराय नमः । ॐ ऊर्ध्वायां दिशि ब्रह्मणे नमः । ॐ अधस्ताद्विष्णवे नमः ॐ अनन्ताय नमः ॥ "जपनिवेदनम्" देवागातुविद इत्यस्य मनसस्पतिर्ऋषिः । वातो देवता । विराट् छन्दः । जपनिवेदने विनियोगः । ॐ देवा॑गातुविदो गा॒तुंवि॒त्वा गा॒तुमि॑त । मन॑सस्पत इ॒मन्दे॑व य॒ज्ञꣳस्वाहा॒ वाते॑धाः ॥ २४$\frac{२१}{८}$ ॥ "जपार्पणम्"—अनेन पराङ्गत्वेन गायत्र्या न्यङ्गभूतेनामुकसंख्याकेन अथवा यथाशक्ति गायत्रीजपाख्येन कर्मणा श्रीभगवान् ब्रह्मस्वरूपी सूर्यनारायणः प्रीयतां न मम ॥ "प्रार्थना"—यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् । तत्सर्वं क्षम्यतां देवि काश्यपप्रियवादिनि ॥ "सन्ध्याविसर्जनम्"—उत्तरे शिखरे इत्यस्य कश्यप ऋषिः । सन्ध्या देवता । अनुष्टुप् छंदः । सन्ध्याविसर्जने विनियोगः । उत्तरे शिखरे देवि भूम्यां पर्वतमस्तके । ब्राह्मणेभ्यो विनिर्मुक्ता गच्छ देवि यथासुखम् ॥ "गोत्रप्रवरोच्चारणम्"—अमुकगोत्रोत्पन्नोऽहं अमुकप्रवरान्वितोऽहं शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनवाजसनेयशाखाध्यायी अमुकशर्माऽहं इत्युच्चारयेत् ॥ ("यथोदाहरणम्"— गौतमगोत्रोत्पन्नोऽहं गौतमाङ्गिरसऽआयासेति त्रिप्रवरान्वितोऽहं शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनवाजसनेयशाखाध्यायी नारायणभट्टशर्माऽहमिति) ॥ "अभिवादनम्"—भो आचार्य त्वां अभिवादयामि । भो वैश्वानर त्वां अभि० । भो सूर्यचन्द्रमसौ युवां अभि० । भो याज्ञवल्क्य त्वां अभि० । भो ई-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वर त्वां अभि०॥ आकाशात्पतितं तोयं यथा गच्छति सागरम्। सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥ ततो द्विराचमनम् ॥ "ईश्वरस्तुतिः"–यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ "अर्पणम्"– अनेन प्रातःसन्ध्योपासनाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम॥ ॐ विष्णवे नमः। इतित्रिः॥ "शिखामुक्तिः"– ब्रह्मपाशसहस्रेण रुद्रशूलशतेन च। विष्णुचक्रसहस्रेण शिखामुक्तिं करोम्यहम् ॥ पुनः शिखाबन्धनं तूष्णीम् ॥ सन्ध्यादेवपूजातर्पणादौ धृतं कुशपवित्रं तत्तत्कर्मसबन्धि जलतीर्थादिकं च तुलसीमूले पवित्रस्थले वा विसर्जयेत्॥ इति प्रातःसन्ध्याप्रयोगः॥

१४४. "गायत्रीतर्पणम्"– गायत्र्या विश्वा[illegible]मित्र ऋषिः[illegible]काले सेविता सविता देवता। गायत्री छन्दः। गायत्रीतर्पणे [illegible] च [illegible] ऋदैवता ॐ भूः ऋग्वेदपुरुषं तर्पयामि। ॐ भुवः यजुर्वेदपुरुषं त०। ॐ स्वः सामवेदपुरुषं त०। ॐ महः अथर्ववेदपुरुषं त०। ॐ जनः इतिहासपुराणपुरुषं त०। ॐ तपः सर्वागमपुरुषं त०। ॐ सत्यम् सत्यलोकपुरुषं त०। ॐ भूः भूर्लोकपुरुषं त०। ॐ भुवः भुवर्लोकपुरुषं त०। ॐ स्वः स्वर्लोकपुरुषं त०। ॐ भूः एकपदां गायत्रीं त०। ॐ भुवः द्विपदां गायत्रीं त०। ॐ स्वः त्रिपदां गायत्रीं त०। ॐ भूर्भुवःस्वः चतुष्पदां गायत्रीं त०। ॐ उपसीं त०। ॐ गायत्रीं त०। ॐ सावित्रीं त०। ॐ सरस्वतीं त०। ॐ वेदमातरं त०। ॐ पृथिवीं त०। ॐ अजां त०। ॐ कौशिकीं त०। ॐ सांकृतीं त०। ॐ सर्वजितं त०॥ इति गायत्रीतर्पणम्॥ एतत्कृताकृतमस्ति॥

१४५. "अथ कात्यायनादिपरिशिष्टसूत्रोक्तत्रिकालसन्ध्याप्रयोगः" "भस्मधारणम्"– ॐ त्र्यायुषं जमदग्नेः–ललाटे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्यपस्य त्र्यायुषम्—ग्रीवायाम् । यद्देवेषु त्र्यायुषम्—दक्षिणांसे । तन्नो अस्तु त्र्यायुषम् हृदये ॥ “ आचमनम् ”— ॐ आमागन्यशसासꣳसृज वर्चसा । तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनाम् ॥ “ प्राणायामः ”—ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितु० $१\frac{३५}{३}$ ॥ ॐ आपोज्योती रसोमृतं ब्रह्म भूर्भुवःस्वरोम् ॥ एवं त्रिवारं प्राणायामः कर्त्तव्यः ॥ “ न्यासः ”—वाङ्म आस्येऽस्तु—मुखं कराग्रेण स्पृशेत् । नसोर्मे प्राणोऽस्तु—तर्जन्यङ्गुष्ठाभ्यां नासारन्ध्रद्वयं स्पृशेत् । अक्ष्णोर्मे चक्षुरस्तु—अनामिकाङ्गुष्ठाभ्यां चक्षुर्द्वयं स्पृशेत् ॥ कर्णयोर्मे श्रोत्रमस्तु—मध्यमाङ्गुष्ठाभ्यां दक्षिणकर्णं स्पृशेत् । कर्ण[illegible] श्रोत्रमस्तु—मध्यमाङ्गुष्ठाभ्यां वामकर्णं स्पृशेत् ॥ बाह्वोर्मे बलो[illegible] दक्षिणबाहुं स्पृशेत् । बाह्वोर्मे बलमस्तु—करा[illegible] स्पृशेत् । ऊर्वोर्मे ओजोऽस्तु—युगपद्धस्तेनोरू स्पृशेत् । अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह— शिरःप्रभृति पादान्तानि सर्वाङ्गान्युभाभ्यां हस्ताभ्यामालभते ॥ “ सङ्कल्पः ”—ॐ तत्सत्परमेश्वरप्रीत्यर्थं प्रातःसन्ध्योपासनमहं करिष्ये— ॥ “ अर्घ्यम् ”— सुपुष्पाण्यम्बुमिश्राण्यूर्ध्वं प्रक्षिप्य—ॐ भूर्भुवः स्वः ॐ तत्सवि० $२\frac{३५}{३}$ इति गायत्रीमन्त्रेणार्घ्यत्रयं दद्यात् ॥ “ सूर्योपस्थानम् ”— ॐ उद्वयंतमसस्परिस्वꣳपश्यन्तऽउत्तरम् । देवंदेवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ $३\frac{२४}{३९}$ ॐ उदुत्यंजातवेदसं देवंवहन्ति केतवः दृशेविश्वाय सूर्यम् ॥ $४\frac{३१}{३३}$ ॥ ॐ चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षꣳ सूर्यआत्मा जगतस्तस्थुषश्च ॥ $५\frac{४६}{१३}$ ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदः शतंजीवेमशरदः शतꣳशृणुयाम शरदः शतंप्रब्रवाम शरदः शतमदीनाꣳस्याम शरदः शतंभूयश्च शरदः शतात् ॥ $६\frac{२४}{३७}$ ॥ “गायत्रीमन्त्रजपः”— गायत्र्या च यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शक्ति ॥ "उपस्थानम्"– ॐ विभ्राड् बृहत्० १७ ॥ ॐ सहस्रशीर्षा पुरुषः० १६ ॥ ॐ यज्जाग्रतः० ६ ॥ ॐ यदेतन्मण्डलं तपति० १३ ॥ इत्युपस्थाय प्रदक्षणीकृत्य नमस्कृत्योपविशेत् ॥ "अर्पणम्"–अनेन यथाशक्ति गायत्रीजपादिकृतेन ब्रह्मस्वरूपी सविता देवता प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति कात्यायनादिपरिशिष्टसूत्रोक्तत्रिकालसन्ध्याप्रयोगः समाप्तः ॥

१४६. "सायंप्रातर्होमः." कात्यायनसूत्रे—उद्धरेति यजमानो ब्रूयात् । सायंप्रातरग्निहोत्रे गार्हपत्यादाहवनीयस्योद्धरणमनस्तमितानुदितयोः प्रत्यङ्मुखो वा सायं निदध्यात्तस्मिन्सायंप्रातर्होममेके । नित्यो दक्षिणाग्निः सर्वेगतश्रियः सदा वा [illegible] मेकेषामुपवसथेन वावसिते वा तस्मिन्पचेयुरमा [illegible] गोः पयोधिश्रपितं वै ब्रूयात्तद्ब्राह्मणं पाययति वै [illegible] णापराग्निं गत्वा दक्षिणेन वा प्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः पत्नी च पूर्ववदपरेणाहवनीयं कूर्चं निदधाति कुशान्वा परिस्तरणं वा सर्वेषां प्रागुदग्भिरुदगग्रान्दक्षिणाग्रान् करोतीति श्रुतेराहवनीयं पर्युक्ष्योदधारान्निनयत्यागार्हपत्यात्तं च ततो दक्षिणाग्निं जुहुते च धारावर्ज्यम् ॥ १३ ॥ अग्निहोत्रीं दोहयति । पुंवत्सामशूद्रेण स्थाल्यामार्यकृत्त्यामूर्ध्वकपालायां दक्षिणतः प्राचीमुदीचीं वा पूर्वेणाहवनीयमाहृत्य गार्हपत्येधिश्रपयत्युत्तरतो निरूह्याङ्गारानेवमन्यत्रापि होमार्थस्याहरणं दक्षिणेन वौषधं तृणेनावज्योत्यासिच्यापः पुनरवज्योत्य निधाय त्रिरुद्वासयत्युदगस्तमिते जुहोति वैकंकत९स्रुक्स्रुवं प्रतप्य पाणिना संमार्ष्टि पुनः प्रतप्योन्नेष्यामीत्याहो ३ मुन्नयेति यजमान-

१, २, ३ एते क्रमेण सप्तदश, षोडश, षट्च मन्त्रा रुद्राध्याये द्रष्टव्याः ॥
४ एतद्ब्राह्मणं सूर्योपस्थाने द्रष्टव्यं ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तिष्ठंश्चतुरः स्रुवाननुन्नयति स्थाल्यां परिशिनष्टि तद्ब्राह्मणः पि-
वेदुपरि समिधं धारयन्वार्क्षीमध्यधिगार्हपत्यादाहवनीयꣳ हरति
मुखमात्रे धारयन् मध्ये निगृह्योद्गृह्योपविश्य समिधमादधात्यग्नि-
ज्योतिषं त्वा वायुमतीं प्राणवतीꣳ स्वर्ग्याꣳ स्वर्गायोपदधामि भा
स्वतीमिति प्रदीप्तामभिजुहोत्यग्निर्ज्योतिरिति सजूरिति वाग्निर्वर्च
इति ब्रह्मवर्चसकामस्य कूर्चे निधाय गार्हपत्यमवेक्षते होष्यन्न-
स्मिस्तूष्णीमुत्तरां भूयसीं भूयिष्ठꣳ स्रुचि द्विः प्रकम्प्य निदधा-
त्युपमृज्य स्रुचं कूर्चे निमार्ष्टि नमो देवेभ्यः स्वधा पितृभ्य इति
दक्षिणत उत्तानमप उपस्पृश्येतरयोश्च पुष्टिकामः स्थाल्याः स्रुवे-
णेह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः ॥ अग्नये
गृहपतयेरयिमते पुष्टिपतये स्वाहेति गार्हपत्ये तूष्णीम् द्वितीया-
लौ [illegible]न्नादायान्नपतये स्वाहेति दक्षिणाग्नौ तूष्णीम् द्वितीयामना-
परम् [illegible]त्युत्सृप्य निर्लोढ्याचम्योत्सिञ्चति देवांजि-
मावा[illegible]यात्यये [illegible]
[illegible] तृतीया[illegible]दुक्षति सप्तर्षीन् जिन्वेति चतुर्थीं कूर्च-
स्थाने त्रिर्निषिञ्चत्यग्नये पृथिवीक्षिते स्वाहा पृथिव्या अमृतं
जुहोमि स्वाहामृते अमृतं जुहोमि स्वाहेति स्रुक् स्रुवमाहवनीये
प्रतप्य निदधाति समिध आदधाति सर्वेषु यथा पर्युक्षितꣳ स-
मिदसि समिद्धोमे अग्ने दीदिहि समेद्धा ते अग्नेदीद्यासमिति
वाग्यतो दोहप्रभृत्याहोमात् ॥ १४ ॥ क्षीरहोताचेत्प्रातर्जुहोति ।
अनुदिते तरणावपराग्निं गत्वा दक्षिणेन वा प्रदक्षिणं गार्हपत्यं
परीत्योपविशति यजमानः पत्नी च यथा देशमप आचामति
वृष्टिरसि वृश्चमे पाप्मानꣳ सत्येन व्रतमुपैम्यापः सत्यं मयि व्रत-
मिति वाचं विसृज्य पुनराचामति विद्युदसिविद्युन्मे पाप्मानं जह्य-
पोवभृथमभ्युपैमि मयि सत्यं गोषु मे व्रतमित्युन्नयामीत्याह
प्रातः प्राक्सꣳस्थꣳसमित्पर्युक्षणं धारा चोभयत्र वाग्निशब्दे सू-
र्यो राज्युपसाङ्केति वा ज्योतिः सूर्य इति वा प्रातः प्रथमास्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिते पर्युदयं च स्वर्गकामस्य तमोऽभ्यये सायं जुहुयाद्व्रियति प्रातरायुःकामस्यान्तः पशौ पशुकामस्य सायंप्रातः शयाने श्रीकामस्य प्रातः प्रथमसमिद्धे हूयमाने प्रजासु निहत्येव सहसान्नमश्नतो भूयिष्ठार्चिषि गृहीत्वेत्र सहसा प्रदीप्ततमे श्रीयशस्कामस्यार्चिः प्रत्यवाये मैत्रेणां नमत्स्यतोङ्कारेषु चाकरुयमानेषु ब्रह्मवर्चसकामस्य पयसा स्वर्गकामः पशुकामो वा यवाग्वा ग्रामकामस्तण्डुलैर्बलकामो दध्नेन्द्रियकामोऽनधिश्रयणं च श्रुतिसामर्थ्याभ्यां घृतेन तेजस्कामः संवत्सरं जुहुयादेतेषामेकैकेन कामसंयोगे सायंप्रातर्वा दक्षिणेन प्रवेशनमग्निहोत्रेष्टिषु सायंप्रातराहवनीयस्यासनोपस्थाने शय्यासनं वा गार्हपत्येसंव्रजन्मनसोपस्मृत्य दक्षिणाग्निमनशित्वा प्रातर्मुहूर्त्तं सभासनं सभ्यस्य भस्मोद्धृतमुपेयात्स्वयं वा जुहुयादुपवसथे नियम उपवसथे नियमः ॥ ८ [illegible]

१४७. पा० गृ० सूत्रे—परिचरण[illegible]दैवता तण्डुलैरक्षतैर्वाग्नये स्वाहा प्रजापतये स्वाहेति सायं सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ । पुमानिन्द्रश्च सूर्यश्च पुमांसं वर्त्ततां मयि पुनः स्वाहेति पूर्वां गर्भकामा ॥ ९ ॥ राज्ञोक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाज्यं संस्कृत्येहरतिरिति जुहोति नानामन्त्राभ्यामन्ययानमुपकल्प्यतत्रोपवेशयेद्राजानं स्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्यमिति चैतया धुर्यो दक्षिणा प्रायश्चित्तिस्ततो ब्राह्मणभोजनम् ॥ १० ॥ पक्षादिषु स्थालीपाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्टकृते स्वाहेति प्राशनान्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाह्यतः स्त्रीबलिं हरति नमः स्त्रियै नमः पुंसे वयसे नमः शुक्लाय कृष्णदन्ताय पापिनां पतये नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददत्विति शेषमद्भिः संप्लाव्य ततो ब्राह्मणभोजनम् ॥ १२ ॥

१४८. "होमप्रकारः." स्मृतिः— अन्यैःशतहुताद्धोमादेकदा स्वहुतो वरम् । शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरम् ॥ पुत्रैः शतहुताद्धोमादेक आत्महुतो वरम् । तस्मात्सदैव होमं तु प्रकुर्वीत स्वयं द्विजः ॥ कात्यायनः—असमक्षं तु दम्पत्योर्होतव्यं नर्त्विगादिना । द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकम् । निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा । प्रवसेत्कार्यवान्विप्रो वृथा नैवाचरेत्क्वचित् । यावन्नापैति लौहित्यं तावत्सायं तु हूयते । प्रातः सूर्योदयात्पूर्वं प्रायश्चित्तमतः परम् । पौर्णमास्यात्यये हव्यं होतव्यं यदहर्भवेत् । तदहर्जुहुयादेवममावास्यात्ययेऽपि च ॥ मरीचिः— शरीरार्तिर्भवेद्यत्र द्रव्यार्तिर्वा प्रजायते । तथान्यास्वपि चापत्सु पक्षहोमो विधीयते ॥ अनातुरोऽप्रवासी च विरोगो निरुपद्रवः । पक्षहोमं तु यो दद्यात्साचारो व्यतितव्रतः । पक्षहोमं प्रकुर्वीत प्रवसन्नग्निमान्पदे । पञ्चयज्ञविधानं तु लौकिकेऽग्नौ विधीयते ॥ परेणाग्नौ हुते स्वार्थे परस्याग्नौ हुते स्वयम् । पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च । अन्वष्टकाख्ययज्ञे च नवान्नप्राशने तथा । इष्टिं वैश्वानरीं कुर्यादेकान्नेन चरुः स्मृतः । पक्षहोमं तु यो दत्वाऽकस्माच्चैव निवर्तितः । होमं पुनः प्रकुर्वीत न वासौ दोषभाग्भवेत् । प्रवासी नाग्निहोत्री च त्रिपञ्चाशीति सप्त च । दातव्यो होम एकाहे सायंप्रातः पृथक् पृथक् ॥ कात्यायनः—कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् । व्रीह्यादि चाकृतं प्रोक्तमिति वेद्यं त्रिधा बुधैः ॥ स्मृत्यन्तरे—हविष्यान्नं तिला माषा नीवारा व्रीहयो यवाः । इक्षवः शालयो मुद्गाः पयो दधि घृतं मधु। हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः । व्रीहीणामप्यलाभे तु दध्ना वा पयसापि वा । यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकल्पतः । यवानामिव गोधूमा व्रीहीणामिव शालयः ॥ बृहस्पतिः—प्रस्थं धान्यं चतुःषष्टिराहुतेः परिकीर्तित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् । तिलानां तु तदर्धं स्यात्तदर्धं स्याद्घृतस्य च ॥ बौधायनः– व्रीहीणां च यवानां च शतमाहुतिरिष्यते इति ॥

* १ × २





१४९. "अथाग्निहोत्रशालाकुण्डरचनाप्रकारः." कुण्डतत्त्वप्रदीपे बलभद्रसूरिणोक्तः । यथा– ब्राह्मीमविभ्रंशवतीं परीक्ष्य संशोध्य भूमिं सुसमां समुच्चाम् । प्रगृह्य तस्यामनुलिप्य शालां कृत्वा निदध्याद्दृढमाद्यशङ्कुम् ॥ प्राचीं ततःपूर्ववदुक्तयुक्त्या संसाध्य देशे परितः प्रशस्ते। नर्यस्य विश्वाद्द्विगुणाङ्गुलादि व्यासार्द्धमित्याविलिखेत्सुवृत्तम्॥ तन्मध्यचिन्हाद्वसुविक्रमेषु वैकादशद्वादशसु स्वमत्या । वाशंस्य मध्यं परिकल्प्य कुर्यात्कुण्डं चतुष्कोणमरत्निमात्रम् ॥ मध्यञ्च नर्याहवनीययोस्तु विभज्य षोढाप्यथ सप्तधा वा । लब्धांशकागंतुसमं त्रिधात्तमंशं च हित्वा परदक्षिणेऽग्नि ॥ अग्नेरुदक् सार्द्धनवाङ्गुलेस्मिन् यूकेषुभिर्वेद्धितभूस्थशङ्कौ । एकोनविंशाङ्गुलिभिर्यवैकयूकाद्वयव्यासदलेन वृत्तम् ॥ विलिख्य पूर्वापरसंस्थजीवां कृत्वा च हित्वोत्तरकार्मुकं हि । याम्याद्भवेत्कुण्डमथर्यसंज्ञं सभ्यं सभायां चतुरस्रमुक्तम् ॥ उपासनं चैवमथो गृहान्तः कुण्डद्वयं नर्यमिवोक्तवद्वा । उपर्युपर्यर्पितमेखलाभिस्त्रिभिस्त्रिभिः सर्वखरेषु भित्तिः ॥ वेदाङ्गुलोच्चाभिरथो विदध्याद्गुवश्च तारुयङ्गुलविस्तृताभिः । ऋजुं द्विपाशां षडरत्निदीर्घां विचिन्हि-

टीप– * १ आहवनीयकुण्डम् । २ आवसथ्यकुं० । ३ सभ्यकुं० । ४ गार्हपत्यकुं० । ५ दक्षिणाग्निकुं० । ६ ब्रह्मासनम् । ७ यजमानासनम् । × स्मार्तकुण्डम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तां पञ्चसु मध्यभागे ॥ हस्तद्वयेप्यङ्गुलषट्कचिन्हे ह्यष्टादशेषु त्रिषु लक्षिता च । प्राचीभवादाहवनीयशङ्कोः पश्चादरत्नौ प्रतिमुच्य शङ्कुम् ॥ पाशद्वयं सम्प्रतिमुच्य शङ्कोर्विकर्षयेदङ्गुलषट्कचिन्हम् । पाश्चात्यहस्तद्वयरज्जुचिन्हे शङ्कू च याम्योत्तरगौ निखेयौ ॥ तच्छ्रोणियुग्मं त्वथ पूर्वपाशादष्टादशाङ्केन विकृष्य रज्जुम् । अग्निशयोढं संयुगं तथास्याच्छङ्कुद्वयात्सार्द्धकरस्य चिन्हे ॥ सूत्रार्पणात्कोणचतुष्टये तु क्षेत्रं भवेत्ताद्विषमं हि वेद्याः । पूर्वार्द्धशङ्कोरथ चापरार्द्धं यावच्च कोणौ परिवेष्टच रज्वा ॥ अर्द्धी कृतां तामनुवेष्टच शङ्कू याम्योत्तरौ मध्यगतौ निखेयौ । तुरीयभागेन दलीकृताया रज्जोः पृथुत्वादथवापि शङ्कोः ॥ वृत्तार्द्धमानेन च संग्रहौ तु कृत्वा खनेत् त्र्यङ्गुलवेदिमध्यम् । वितानपूर्वापरसौम्यदिक्षु द्वारैर्युतं शंसगृहं पुरस्तात् ॥ याम्येन्द्रदिग्द्वारगृहं द्वयोश्च श्वभ्रं च भस्मोद्धरणाय कुर्यात् । एवं हविर्यज्ञविधौ वितानकुण्डानि साध्यानि समानि सद्भिः ॥ इत्यग्निहोत्रशालांकुण्डविधिः ॥

१५० "यज्ञपात्राणि." कात्यायनसूत्रे—ऋचो यजूꣳषि सामानि निगदा मन्त्रास्तेषां वाक्यं निराकाङ्क्षं मिथः संबद्धं.... वैकङ्कतानि पात्राणि खादिरः स्रुवः स्फ्यश्च पालाशी जुहूराश्वथ्युपभृद्वारणान्यहोमसंयुक्तानि वाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बला हꣳसमुखप्रसेका मूलदण्डा भवन्त्यरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः स्फ्योऽस्याकृतिरादर्शाकृतिः प्राशित्रहरणं चमसाकृति वा चात्वालोत्करावस्तरेण सञ्चरः प्रणीतोत्कराविष्टिषु ॥ ३ ॥ "कातीये"— यज्ञपात्राणि सर्वाणि वैकङ्कतानि । यथा— उलूखलमुसलकूर्चेडापात्रीपिष्टपात्रीपुरोडाशपात्रीशम्याशृतावदानाभ्र्युपवेषान्तर्धानकटप्राशित्रहरणषड्वर्तब्रह्मयजमानासनहोतृपदनादीनि ॥ एतानि वारणान्यहोमसंयुक्तानि ॥ यैः पात्रैर्होमो न क्रियते तानि सर्वाणि वारणानि भवन्तीत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ २ ३ ४



१५१ "पात्राकृतयः." कात्यीये–(१) "आज्यस्थाली" तैजसी वा मृन्मयी वा प्रकीर्तिता। द्वादशाङ्गुलविस्तीर्णा प्रादेशोच्चा शुभा स्मृता, ॥ आज्यस्थालीसमानैव (२) "चरुस्थाली" प्रशस्यते, ॥ (३) "प्रणीता" वारणा ग्राह्या द्वादशाङ्गुलसंमिता । खातेन हस्ततलवदाकृत्या पद्मपत्रवत्, ॥ (४) "पुरोडाशस्य पात्री" तु

५ ६ ७ ८ ९ १०



चतुरस्रा समानतः। खातेन वर्तुलेनैव युता यज्ञे प्रशस्यते, ॥ (९) खादिरो बाहुमात्रस्तु "जुहूस्रुक्संज्ञकः" स्रुवः । अरत्निमात्रो हंसास्यो वर्तुलोङ्गुष्ठपर्ववत् । अर्धपर्वप्रणाल्यां च युक्तो नासाकृतिर्भवेत्, ॥ (६) "उपभृत्स्रुक्," (७) "ध्रुवास्रुक्च," (८) "पुष्करस्रुक्" तथैव च, । (९) "अग्निहोत्रस्य हवणी," तथा (१०) "वैकङ्कतः" स्रुवः, । एते चान्येच बहवः स्रुवभेदाः प्रकीर्तिताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११　१२　१३　१४　१५



वर्तुलास्याः शङ्कुमुखाः पर्वखाताः समानकाः ॥ (११) "उलूखलं" च (१२) "मुसलं" स्वायत्ते सुदृढे तथा । इच्छाप्रमाणे भवतः, (१३) "शूर्पं" वैणवमेव च,॥ अन्यच्च—खादिरं मुसलं कार्यं पालाशः स्यादुलूखलः । यद्वोभौ वारणौ कार्यौ तदभावेऽन्यवृक्षजौ, ॥ (१४) "शम्या" प्रादेशमात्री स्या, त्खादिरः (१५) "स्फ्यः" प्रकीर्तितः, । खड्गाकारोऽरत्निमात्रो वज्ररूपो मखे स्मृतः, ॥ अङ्गुष्ठप-

१६　१७　१८　१९　२०　२१　२२



र्वमात्रं तु तीक्ष्णाग्रं पृथुवक्त्रकम् । (१६) "शृतावदानं" प्रादेशमात्रं दीर्घमुदाहृतम्, ॥ (१७) "उपवेषो" ऽरत्निमात्रो हस्ताकारस्तु खादिरः, ॥ कौशः (१८) "कूर्चो" बाहुमात्रो मकराकार उच्यते, ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इच्छाप्रमाणा तु (१९) "दृषत्प्रोक्ता" पाषाणसंभवा, । (२०) "उ-
पलो" वर्तुलः प्रोक्तो वितस्तिपरिमाणकः, । षडङ्गुलप्रमाणं तु (२१)
"षड्वृत्तं" चतुरस्रकम् । तथाचोभयतःखातं वारणं तत्प्रचक्षते, ॥
(२२) "अभ्रि," स्तीक्ष्णमुखा ज्ञेया खादिरारत्निसंमिता, । अश्व-
त्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः । तस्य या प्राङ्मुखी शाखा

२३ २४ २५ २६



उदीची चोर्ध्वगापि वा । (२३) "अरणी" तन्मयी ज्ञेया, तन्मध्ये
(२४) "चोत्तरारणिः," । यदत्र सारवत्काष्ठ (२९) "मोविली"
ति प्रशस्यते, । संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते । अ-
भावे त्वशमीगर्भादाहरेदविलम्बितः । चतुर्विंशाङ्गुला दीर्घा ।विस्तारेण
षडङ्गुला । चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता । मूलादष्टाङ्गुलं
त्यक्त्वा ह्यग्राच्च द्वादशाङ्गुलम् । अन्तरं देवयोनिः स्यात्तत्र मथ्यो
हुताशनः । मूर्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी । अङ्गुष्ठमात्रा-
ण्येतानि द्व्यङ्गुलं वक्ष उच्यते । अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं तथा।
एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तेर्द्वौ च गुह्यके । ऊरू जङ्घे च पादौ च
एव्वेकैकं यथाक्रमम् । अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः ।
यद्गुह्यमिति हि प्रोक्तं देवयोनिः स उच्यते । तस्यां यो जायते व-
न्हिः स कल्याणकृदुच्यते । प्रथमे मन्थने ह्येष नियमो नोत्तरेषु च,॥
अष्टाङ्गुलः (२६) "प्रमन्थः" स्याच्चात्र स्याद्द्वादशाङ्गुलम्,। ओविली
द्वादशैव स्यादेतन्मन्थनयन्त्रकम्, ॥ गोवालैः शणसंमिश्रैस्त्रिवृद्वृत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनंशकम् । व्यामप्रमाणं (२७) "नेत्रं" स्या,त्तेन मथ्यो हुताशनः । चात्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणैः ॥ (२८) "अन्तर्धान-



२७

कटः" प्रोक्तो द्वादशाङ्गुलसंमितः । अर्धचन्द्रसमाकारः किंचिदुच्छ्रि-तशीर्षकः, ॥ प्रोक्ता (२९) "हविर्धानपात्री" विपुला द्वादशाङ्गुला।

२८ २९ ३० ३१ ३२



पिष्टपात्री च सैवोक्ता चतुरस्रा प्रकीर्तिता, ॥ (३०) "प्राशित्रह-रणं" चान्यत्कीर्तितं द्वादशाङ्गुलम्, । चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः । त्र्यङ्गुलस्तु भवेत्स्कन्धो विस्तारश्चतुरङ्गुलः । पलाशाद्वा

३३ ३४ ३५ ३६



वटाद्वान्यवृक्षाद्वा (३१) "चमसाः" स्मृताः, ॥ (३२) "इडापा-त्री" तथा चान्यारत्निमात्रा प्रकीर्तिता, ॥ (३३) "यजमानासनं," (३४) "पत्न्या आसनं" च पृथक्पृथक्, । (३५) "होत्रासनं,"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा (३६) "ब्रह्मासनं" विस्तारयोगतः । अरत्निमात्राण्येतानि कथितानि मनीषिभिः । (३७) "यजमानस्य पात्री" च (३८) "प-

३७ ३८ ३९



त्नीपात्री" तथैव च, । मखे (३९) "कृष्णाजिनं" ग्राह्यं तदखण्डं विशिष्यते, ॥

१९२ "इध्मादिविचारः." कातीये–इध्मस्तु द्विगुणः कार्यः परिधिस्त्रिगुणः स्मृतः । स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिस्ततः । समित्पवित्रं वेदं च त्रयं प्रादेशसंमितम् ॥ अष्टादशसंख्यसमित्क एकविंशतिसंख्यसमित्को वा अरत्निमात्रः पालाशो वा इध्मः कार्यः । पालाशाभावे वैकङ्कतः कार्यः । तदभावे काश्मर्यमयः । काश्मर्यः श्रीपर्णवृक्षः । तदभावे बैल्वो वा औदुम्बरो वा खादिरो वा ॥ "यज्ञियवृक्षाः" वायुपुराणे– पलाशफल्गुन्यग्रोधाः प्लक्षाश्वत्थविकङ्कताः। उदुम्बरस्तथा बिल्वश्चन्दनो यज्ञियाश्च ये । सरलो देवदारुश्च शालश्च खदिरस्तथा । समिदर्थे प्रशस्ताः स्युरेते वृक्षा विशेषतः । ग्राह्याः कण्टकिनश्चैवं यज्ञिया एव केचन । पूजिताः समिदर्थेषु पितॄणां वचनं यथा ॥ "समिधाविचारः." कात्यायनः— नाङ्गुष्ठादधिका ग्राह्या समित्स्थूलतमा क्वचित् । न निर्मुक्ता त्वचा चैव न सकीटा न पाटिता॥ "समिधाप्रमाणम्"— प्रादेशान्नाधिका नोना न च शाखासमायुता । न त्वग्घीना न निर्वीर्या होमेषु तु विजानता ॥ "इध्मार्थे समिद्ग्रहणम्." मित्रपरिशिष्टे— पर्णाश्वत्थखदिररोहितकोदुम्बराणां तदलाभे सर्ववनस्पतीनां तिन्दुकधवश्लाम्रनिम्बराजवृक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाल्मल्यरत्नकपित्थकोविदारविभीतकश्लेष्मातकसर्वकण्टकवृक्षविवर्जितम् ॥ "यज्ञार्थेऽग्राह्यवृक्षाः." वायुपुराणे— निवासा ये च कीटानां लताभिर्वेष्टिताश्च ये । अयज्ञिया गर्हिताश्च वल्मीकैश्च समावृताः । शकुनीनां निवासाश्च वर्जयेत्तान् महीरुहान् । अन्यांश्चैवंविधान् सर्वान् यज्ञियांश्च विवर्जयेत् ॥ अग्राह्यसमिधः"— विशीर्णा विदला ह्रस्वा वक्राः ससुषिराः कृशाः । दीर्घाः स्थूला घुणैर्दुष्टाः कर्मसिद्धिविनाशकाः ॥ "ग्राह्यसमिधः." प्रागग्राः समिधो देयास्ताश्च यागेषु पातिताः । शान्त्यर्थेषु प्रशस्तार्द्रा विपरीता जिघांसति ॥

१९३ "अग्निप्रज्वलनम्." आपस्तम्बः— न कुर्यादग्निधमनं कदाचिद्व्यजनादिना । मुखेनैव धमेदग्निं धमन्या वेणुजातया । (नाग्निं मुखेनेति तु यल्लौकिके योजयन्ति तत्) ॥

१९४ "होमनिषेधः." हरिहरभाष्ये— क्षुत्तृट्क्रोधसमायुक्तो हीनमन्त्रो जुहोति यः । अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि । स्वल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके । ऊर्द्ध्वं काष्ठैश्च संपूर्णे फूत्कारवति पावके । कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् । आहुतीर्जुहुयाद्यस्तु तस्य नाशो भवेद्ध्रुवम् ॥

१९५ "प्रैषपद्धतिः." ब्राह्मणसर्वस्वे हलायुधः— ऋचो यजूंषि सामानि प्रैषाश्चैते मन्त्रसंज्ञाः । तत्र ऋग्वेदसामवेदयोस्तु मन्त्रा उच्चैः प्रयोज्याः । यजुर्वेदमन्त्रा उपांशु प्रयोज्याः ॥

१९६ "अग्निहोत्रफलम्" गृह्यकाण्डे—नावसथ्यात्परो धर्मो नावसथ्यात्परं तपः । नावसथ्यात्परं दानं नावसथ्यात्परं धनम् । नावसथ्यात्परं श्रेयो नावसथ्यात्परं यशः । नावसथ्यात्परा सिद्धिर्नावसथ्यात्परा गतिः । नावसथ्यात्परं स्थानं नावसथ्यात्परं व्रतम् ॥

१९७ "ब्राह्मणभोजनम्." यज्ञपार्श्वे—गर्भाधानादिसर्वेषु ब्राह्मणान् भोजयेद्दश । आवसथ्ये चतुर्विंशदग्न्याधाने शतात्परम् । आग्रायणे प्रायश्चित्ते ब्राह्मणान् दश पञ्च वा । सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ । चातुर्मास्येषु चत्वारि शतानि च सुरामखे । अयुतं वाजपेये च अश्वमेधे चतुर्गुणम् ॥ कात्यायनः— ब्रह्मणे द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिणा देया या यत्र परिकीर्त्तिता । कर्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत् । यावता बहु भोक्तुस्तु तृप्तिः पूर्णेन जायते ॥

१५८-" **अथ पृष्ठोदिविविधानम्.**" परिशिष्टम्—अथातो धर्मजिज्ञासा केशान्तादूर्ध्वमपत्नीकऽउच्छिन्नाग्निरनग्निको वा प्रवासी ब्रह्मचारी चान्वग्निरिति ग्रामादग्निमाहृत्य पृष्ठोदिवीत्यधिष्ठाप्य समित्तमिति द्वाभ्यामुपस्थानं व्याहृतिभिस्त्रिभिश्च सावित्र्या प्रज्वाल्य ताꣳसवितुस्तत्सवितुर्विश्वानिदेवसवितरिति पुनस्त्वेति समिन्ध्य पूर्ववदक्षतैर्हुत्वा पाकं पचेत्तत्र वैश्वदेवं कुर्याद्ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृत इत्युपस्पृश्य पूर्ववद्बलिकर्म नैवं कृते वृथा पाको भवति । न वृथा पाकं पचेन्न वृथा पाकमश्नीयादत्र पिण्डपितृयज्ञपक्षाद्याग्रयणानि कुर्यात् ॥ इति कात्यायनोक्तं पृष्ठोदिविविधानपरिशिष्टम् ॥

१५९ " **कुण्डसंस्कारादिकर्म.**" पारस्करः—**परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत् प्रोक्ष्य निरूप्याधिश्रित्य पर्यग्निं कुर्यात् स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनकुशानादाय समिधोभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः पर्यग्निकरणं वा कर्त्तव्यम् शृते वारत्रयस्याप्युक्तत्वात् ॥**

१६०"**अग्निनामानि.**"ब्राह्मणसर्वस्वे हलायुधः—आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च । अन्वाहार्यो गार्हपत्य इत्येते पञ्च वह्नयः ॥

१६१ "**अथश्रौतः स्मार्तः सायंप्रातरग्निहोत्रहोमप्रयोगः.**" तत्रादौ **श्रौतः सायंहोमः**। कर्ता स्नात्वाचम्य* प्राणानायम्य देशकालौ संकीर्त्य ॐ तत्सत्परमेश्वरप्रीतये उद्धरणपूर्वकममुकद्रव्येण सा-

* श्रौताचमनं तु देव्यास्त्रयः पादाः ३ आपोहिष्ठेति नव पादाः ९ सप्त व्याहृतयो ७ देवीपादत्रयं ३ द्वेधा विभक्तं देवीशिरश्चेति २ चतुर्विंशति स्थानानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंप्रातरग्निहोत्रं होष्यामि । तत्रेदानीं सायमग्निहोत्रं होष्यामीति संकल्प्य । गार्हपत्याग्नेः सभ्यस्य चोद्धरणं कृत्वा आहवनीयकुण्डे दक्षिणाग्निकुण्डे च पञ्च भूसंस्काराः कार्याः । ते यथा– वज्रं गृहीत्वा १ दर्भैः परिसमुह्य २ गोमयोदकेनोपलिप्य ३ वज्रेणोल्लिख्य ४ अनामिकाङ्गुष्ठाभ्यामुद्धृत्य ५ उदकेनाभ्युक्षणं । ततो गार्हपत्यकुण्डादग्निमाहवनीयदक्षिणाग्निकुण्डयोर्नयेत् । एवं गार्हपत्याहवनीयदक्षिणाग्निसभ्यसंज्ञकानां चतुर्णां (श्रौताग्नीनां) प्रदीपनं कृत्वानन्तरमावसथ्यस्यो-(स्मार्तस्य) द्धरणं कार्यम् । ततः अन्तरेणाग्निं गत्वा दक्षिणेन वा प्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः पत्नी च यथादेशं । अप आचामत उभौ । **तृप्तिरसि तृप्तमे पाप्मान॰ सत्येन व्रतमुपैम्यापः सत्यमयी व्रतम्** । ततो द्विराचमनम् । अपरेणाहवनीयं मकराकारकूर्चं निदधाति । ततस्तमाहवनीयाग्निं निबद्धैः कुशपरिस्तरणैः कुशैर्वा पुरस्ताद्दक्षिणतः पश्चादुत्तरतश्च प्रागुदगग्रतः परिस्तीर्य । इतरथा वृत्तिः । एवं गार्हपत्यदक्षिणाग्न्योः परिस्तरणं कार्यं । पयोहोमे गां धुक्ष्व । गार्हपत्यस्योत्तरतः पृथक्कृतेष्वङ्गारेषु तां दुग्धस्थालीमधिश्रपयति । तृणेनावज्योत्यासिच्यापः पुनरवज्योत्य त्रिरुद्वासयत्युदक् । तण्डुलहोमे तु गां धुक्ष्वेत्यादेरभावः । आदौ गार्हपत्यस्य पर्युक्षणं । गार्हपत्यादुदकधारां निनयत्याहवनीयम् । आहवनीयं पर्युक्ष्य । वैकङ्कत॰ स्रुक्स्रुवं प्रतप्य । पाणिना संमार्ष्टि । पुनः प्रतप्य । **उन्नेष्यामि ॐ उन्नय** । यजमानस्तिष्ठन् । चतुरः स्रुवानुन्नयति । प्रथमः । द्वितीयः । तृतीयः । चतुर्थः । स्रुग्दण्डोपरि समिधं धारयन्नुत्थाय । अध्यधि गार्हपत्यादाहवनीय॰ हरति । मुखमात्रे धारयन् । मध्ये निगृह्य । उद्गृह्य । उपविश्य । समिधमादधाति । **अग्निं ज्योतिषं त्वा वायुमतीं प्राणवती॰ स्वर्ग्या॰ स्वर्गायोपदधामि भास्वती । प्रदीप्तामभिजुहोति** । दक्षिणं जान्वाच्य । **ॐ सजूर्देवेन । सवित्रासजूरात्र्येन्द्रवत्या । जुषाणोऽअग्निर्वेतु स्वाहा** । * * $\frac{१०}{३}$ ॥ चतुर्थांशं हुत्वा । इदमग्नये न मम । स्रुचं कुशेषु निधाय गार्हपत्यमवेक्षते । होष्यन्यसिस्मिन् उत्तरां भूयसीम् । **ॐ उपांशु प्रजापतये**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्चैः स्वाहा। इदं प्रजापतये न मम। स्रुचं द्विः प्रकम्प्य कूर्चे निदधाति। ॐ नमो देवेभ्यः। ॐ स्वधा पितृभ्यः। अप उपस्पृश्य। इतरयोश्च पुष्टिकामः स्थाल्या स्रुवेण। ॐ इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजा ॅं रमयतु प्रजापतिः अग्नये गृहपतेरयिमते पुष्टिपतये स्वाहा। इदमग्नये गृहपतये रयिमते पुष्टिपतये न मम। ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम। दक्षिणाग्नौ। तूष्णीं समित्प्रक्षेपः। ॐ अग्नयेऽन्नादायान्नपतये स्वाहा। इदमग्नयेऽन्नादायान्नपतये न मम। ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। स्रुचिस्थं हुतद्रव्यशेषं पात्रान्तरे गृहीत्वा। भक्षणार्थं बहिर्गत्वा अनामिकया। द्विः प्राश्नाति। पात्रस्यास्वादनं (उत्सृज्य निर्लेढि) आचम्य द्विः। आहवनीयसमीपमागत्य स्रुच्युदकं पूरयित्वा। उत्सिञ्चति। आहवनीयोत्तरतः। ॐ देवाञ्जिन्व। पुनः पूर्य। ॐ पितॄञ्जिन्व। दक्षिणतः पुनः पूर्य। उदुक्षति। ॐ सप्तऋषीञ्जिन्व। ईशान्ये पुनः पूर्य। कुशेषु स्थाने त्रिर्निषिञ्चति। प्राक्संस्थम्। ॐ अग्नये पृथिवीक्षिते स्वाहा। ॐ पृथिव्या अमृतं जुहोमि स्वाहा। ॐ अमृते अमृतं जुहोमि स्वाहा। स्रुक्स्रुवमाहवनीये प्रतप्य। कुशेषु निदधाति। समिधमादधाति। सर्वेषु यथा पर्युक्षितम्। ॐ समिदसि समिद्धोमे अग्ने दीदिहि समिद्धाते अग्ने दीद्यासम्॥ आहवनीयसमीपमागत्य तिष्ठन्। आदौ गार्हपत्यस्योपस्थानम्। "उपस्थानम्"— ॐ भूर्भुवꣳस्वः। सुप्रजाः। प्रजाभिः। स्या ॅं सुवीरो। वीरैः। सुपोषꣳ। पोषैः * * १ ३७/३ ॥ उपविश्य। महेन्द्रायाहवनीयाय नमः। गार्हपत्य। ॐ भूर्भुवः स्वः सुप्र०। * * २ ३७/३ ॥ शय्यासनम्। वा गार्हपत्ये। ॐ यमायराज्ञे गार्हपत्याय नमः। ततः पूर्ववत् धारावर्ज्यम्। पर्युक्षणम् (वाग्विसर्जनम्) उभौ स्वासने उपविश्य। आचम्य। ॐ विद्युदसि विद्यमे पाप्मानं जह्यपोवभृथमभ्युपैमि मयि सत्यज्ञोपु मे व्रतम्। द्विराचम्य। विष्णवे नमः। सञ्चरविमोकः। गा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्हपत्यपश्चादुपविश्य । ॐ नडाय नैषधाय अन्वाहार्यपचनाय नमः । अनंश्रुते साङ्गमनाय सभ्यायनमः । असतेपांसुपाय भस्मोद्वापाय नमः । नर्य भस्म परब्रह्म यतो मुक्तिप्रसाधकम् । तयोरेकतरं सेव्यं संसारभयनाशनम् ॥ यत्कर्मणात्य० ॥ नमस्तेगा०॥ नमः सभ्याव० ॥ चतुर्भि० ॥ यस्यस्मृ० ॥ "अर्पणम्"— अनेन (यजमानानुज्ञया) अमुकद्रव्येण श्रौतसायंहोमाख्येन कर्मणा भगवान् श्रीयज्ञपुरुषः प्रीयतां न मम ॥ ॐ तसद्ब्रह्मार्पणमस्तु ॥ "विशेषप्रार्थना"—ॐ इदंविव० । ३$\frac{१५}{५}$ ॥ ॐ त्रीणिप० । ४$\frac{४३}{३४}$ ॥ ॐ तद्विष्णोः० । ५$\frac{५}{६}$ ॥ ॐ तद्विप्रा० । ६$\frac{४४}{३४}$ ॥ ॐ विष्णोर० । ७$\frac{२१}{५}$ ॥ ॐ त्र्यायुष० । ८$\frac{६२}{४}$ः॥ भस्म ललाटे धारयेत् ॥ ॐ नमो ब्र० अ० । ॐ नमः पृ० । ॐ नमः ओ० । ॐ नमो वाचे । ॐ नमो वा० । ॐ नमो विष्णवे महते करोमि । ॐ शान्तिः शान्तिः शान्तिः ॥ इति श्रौतः सायंहोमः ॥

१६२ "अथ श्रौतप्रातर्होमः"— स्नानं कृत्वा । "पञ्च भूसंस्काराः"— वज्रं गृहीत्वा । दर्भैः परिसमुह्य । गोमयोदकेना लिप्य । वज्रेणोल्लिख्य । अनामिकाङ्गुष्ठाभ्यामुद्धृत्य । उदकेनाभ्युक्ष्य । इदमाहवनीयस्य । एवं दक्षिणाग्नेः ॥ उद्धरेति यजमानो ब्रूयात् । आचम्य । सुमुखश्चेत्यादि० । देशकालौ संकीर्त्य ॥ "संङ्कल्पः"— ॐ तत्सत्परमेश्वरप्रीतये उद्धरणपूर्वकममुकद्रव्येण प्रातरग्निहोत्रं होष्यामि ॥ "उद्धरणम्"— अन्तरेणापराग्नि गत्वा दक्षिणेन वा प्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः पत्नी च यथादेशम् । अप आचामत उभौ । ॐ वृष्टिरसि वृश्चमे पाप्मानꣳ सत्येन व्रतमुपैम्यापः सत्यमयी व्रतम् । ततो द्विराचमनम् । अपरेणावहनीयं कूर्चं निदधाति । आहवनीयस्य परिस्तरणम् । कुशैः परिस्तरणैर्वा पुरस्ताद्दक्षिणतः पश्चादुत्तरश्च प्रागग्रमुदगग्रंच परिस्तीर्य । एवं गार्हपत्यदक्षिणाग्न्योः परिस्तरणं । पयोहोमे गां धुक्ष्व । तण्डुलहोमे गां धुक्ष्वेत्यादेरभावः (केचित्तु उदकधारां निनयंति) । गार्हपत्य-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्योत्तरतः पृथक्कृतेष्वङ्गारेषु तां दुग्धस्थालीमधिश्रपयति । तृणेनावज्योत्य । आसिञ्चापः । पुनरवज्योत्य । त्रिरुद्वासयत्युदक् । ततो गार्हपत्यस्य पर्युक्षणम् । ततो दक्षिणाग्नेः पर्युक्षणम् । गार्हपत्यादुदकधारां निनयत्याहवनीयम् । आहवनीयं पर्युक्ष्य । वैकङ्कत॰ स्रुक् स्रुवं प्रतप्य । पाणिना संमार्ष्टि पुनः प्रतप्य । उन्नेष्यामि ॐ उन्नय ॐ उन्नय । यजमानास्तिष्ठन् । चतुरः स्रुवानुन्नयति । प्रथमः । द्वितीयः तृतीयः चतुर्थः । स्रुग्दण्डोपरि समिधं धारयन्नुत्थाय । अध्यधि गार्हपत्यादाहवनीय॰ हरति । मुखमात्रे धारयन् । मध्ये निगृह्य । उद्गृह्य । उपविश्य । समिधमादधाति । सूर्य्यो ज्योतिषं त्वा व्वायुमतीं स्वर्ग्या॰ स्वर्गायोपदधामि भास्वती । प्रदीप्तामभिजुहोति ॥ दक्षिणं जान्वाच्य । ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहा अग्निर्व्वर्चोज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्चोज्योतिर्व्वर्च्चः स्वाहा । ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा । १.$\frac{3}{2}$ ॥ * * । सजूर्देवेनसवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो व्वेतु स्वाहा । २$\frac{१०}{३}$ ॥ चतुर्थांशं हुत्वा । इदं सूर्याय न मम । स्रुचं कुशेषु निधाय गार्हपत्यमवेक्षते । होष्यन्यसिस्मिन् उत्तरां भूयसीम् ॐ उपांशु प्रजापतये उच्चैः स्वाहा । इदं प्रजापतये न मम । स्रुचं द्विः प्रकम्प्य । निदधाति । ॐ नमो देवेभ्यः । ॐ स्वधा पितृभ्यः । अप उपस्पृश्य इतरयोश्च पुष्टिकामः स्थाल्याः स्रुवेण । ॐ इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजा॰ रमयतु प्रजापतिः अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा । इदमग्नये गृहपतये रयिमते पुष्टिपतये न मम । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । दक्षिणाग्नौ । तूष्णीं समित्प्रक्षेपः । ॐ अग्नयेऽन्नादायान्नपतये स्वाहा । इदमग्नयेऽन्नादायान्नपतये न मम । ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम । स्रुचिस्थं हुतद्रव्यम् । शेषं पात्रान्तरे गृहीत्वा । भक्षणार्थं वहिर्गत्वा अनामिकया द्विः प्रश्नाति । पात्रस्यास्वादनं (उत्सृज्य निर्लेढि) आचम्य द्विः । आहवनीयसमी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पमागत्य स्रुच्युदकं पूरयित्वा उत्सिञ्चति । आहवनीयोत्तरतः ॐ देवाञ्जिन्व । पुनः पूर्य । ॐ पितॄञ्जिन्व । दक्षिणतः पुनः पूर्य । उदुक्षति । ॐ सप्त ऋषीञ्जिन्व । ईशान्ये पुनः पूर्य । कुशेषु स्थाने त्रिर्निषिञ्चति । प्राक्संस्थम् । ॐ अग्नये पृथिवीक्षिते स्वाहा । ॐ पृथिव्याऽअमृतं जुहोमि स्वाहा । ॐ अमृते अमृतं जुहोमि स्वाहा । स्रुक्स्रुवमाहवनीये प्रतप्य । कुशेषु निदधाति । समिधमादधाति । सर्वेषु यथा पर्युक्षितम् ॥ ॐ समिदसिसमिद्धोमे अग्नेदीदिहिसमिद्धा ते अग्ने दीद्यासम् ॥ आहवनीयसमीपमागत्य तिष्ठन् । आदौ गार्हपत्यस्योपस्थानम् ॥ उपस्थानम्– ॐ भूर्भुवः॒स्वः॒ सु॒प्र॒जाः॒ प्र॒जाभि॑स्याᳬ सु॒वीरो॒ व्वी॒रैः सु॒ पो॒षः पो॒षैः॑ ÷ । * * ॥ २ $\frac{३७}{३}$ ॥ उपविश्य । महेन्द्रायाहवनीयाय नमः । गार्हपत्य । ॐ भूर्भुवः॒स्वः॒ सु० ॥ ४$\frac{३७}{३}$ ॥ शय्यासनं वा गार्हपत्ये । ॐ यमाय राज्ञे गार्हपत्याय नमः । ततः पूर्ववत् धारावर्ज्यम् पर्युक्षणम् । (वाग्विसर्जनम्) उभयोः । स्वासने उपविश्य । आचम्य । ॐ विद्युदसिविद्यमे पाप्मानं जह्ययपोवभृथमभ्युपैमि मयि सत्यङ्गोपु मे व्रतम् ॥ द्विराचम्य । विष्णवे नमः । सञ्चरविमोकः । गार्हपत्यपश्चादुपविश्य । ॐ नडाय नैषधाय अन्वाहार्यपचनाय नमः । अनश्रुते साङ्गमनाय सभ्याय नमः । असते पांसुपाय भस्मोद्वापाय नमः । नर्यभस्म परब्रह्म यतो मुक्तिप्रसाधकम् । तयोरेकतरं सेव्यं संसारभयनाशनम् ॥ यत्कर्मणात्यरीरिचं यद्वान्यूनमिहाकरम् । अग्निᳯ स्विष्टकृद्विद्वान्स्विष्टᳬ सुहुतं करो तु स्वाहा ॥ नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये । नमऽआहवनीयाय महावेद्यै नमो नमः ॥ नमः सभ्यावसथ्याभ्यां नमस्ते परमात्मने । विश्वबोधप्रबोधाय नमस्ते श्रौतवह्नये ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥ यस्य स्मृत्या० ॥ " अर्पणम् "— अनेन (यजमाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुज्ञया) अमुकद्रव्येण श्रौतप्रातर्होमाख्येन कर्मणा भगवान् श्रीयज्ञपुरुषः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ "विशेषप्रार्थना"— ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्य पाᳪं सुरे स्वाहा ॥ ५$\frac{१५}{५}$ ॥ ॐ त्रीणिपदा व्विचक्रमे व्विष्णुर्ग्गोपा ऽअदाभ्यः । अतो धर्माणि धारयन् ॥ ६$\frac{४३}{३४}$ ॥ ॐ तद्विष्णोः परमम्पदᳪं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ७$\frac{५}{६}$ ॥ ॐ तद्विप्रासो व्विपन्यवो जागृवाᳪं सः समिन्धते । व्विष्णोर्यत्परमम्पदम् ॥ ८$\frac{४४}{३४}$ ॥ ॐ व्विष्णो रराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोसि । व्वैष्णवमसि व्विष्णवेत्वा ॥ ९$\frac{२१}{५}$ ॐ त्र्यायुषंजमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥ १०$\frac{६२}{४}$ ॥ भस्म ललाटे धारयेत् ॥ ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि ॥११॥ ॐशान्तिः शान्तिः शान्तिः ॥ इति श्रौतप्रातर्होमः ॥

१६३ "अथ सायमौपासनपरिचरणम्-" (आवसथ्ये सायं होमः) स्नात्वा आचम्य प्राणानायम्य ॥ "सङ्कल्पः"— ॐ तत्सत्परमेश्वरप्रीतये उद्धरणपूर्वकममुकद्रव्येण सायंप्रातरौपासनपरिचरणं करिष्यामि । तत्रेदानीं सायमौपासनपरिचरणं करिष्ये ॥ इति सङ्कल्प्य उद्धरणं कुर्यात् ॥ यजमानः पत्नी च यथादेशम् । आप आचामत उभौ । "पात्रोपकल्पनम्"— उपयमनकुशाः समिधस्तिस्रः मणिकोदकं होमद्रव्यं च । उपयमनकुशानादाय तिष्ठन् समिधोऽभ्याधाय मणिकोदकेनाग्नेः प्रदक्षिणं पर्युक्षणम् । वेणुनलिकया प्रदीप्तकरणम् ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ उत्थाय— "उपस्थानम्"— ॐ समास्त्वाग्नऽऋतवो वर्धयन्तु संव्वत्सराऽऋषयो जानिसत्या । संदिव्येन दीदिहिरोचनेन विश्वाऽआभाहि प्रदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शश्वतस्त्वं । १ $\frac{१}{२७}$ ॥ सञ्चेद्ध्यस्वाग्ने प्रचबोधयैनमुच्चंत्तिष्ठ महते सौभगाय । माच रिषदुपसत्तातेऽअग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये । २ $\frac{२}{२७}$ ॥ त्वामग्ने वृणते ब्राह्मणाऽइमे शिवोऽअग्ने संवरणेभवानः । सपत्नहानोऽ अभिमातिजिच्चस्वेगयेजागृह्यप्रयुच्छन् । ३ $\frac{३}{२७}$ ॥ इहैवाग्नेऽअधिधारया रयिमात्वा निक्रन्पूर्वचितो निकारिणः । क्षत्रमग्ने सुयममस्तुतुभ्यमुपसत्ता वर्द्धतान्तेऽअनिष्टृतः । ४ $\frac{४}{२७}$ ॥ क्षत्रेणाग्ने स्वायुः संरभस्व मित्रेणाग्ने मित्रधेयै यतस्व । सजातानाम्मध्यमस्थाऽएधि । राज्ञामग्ने विहव्योदीदिहीह । ५ $\frac{५}{२७}$ ॥ अतिनिहोऽअति स्निधोऽत्यचित्ति मत्यरातिमग्ने । विश्वाह्यग्ने दुरिता सहस्वाथास्मभ्यं सहवीरां रयिंदाः । ६ $\frac{६}{२७}$ ॥ अनाधृष्यो जातवेदाऽ अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह । विश्वाऽआशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्यपरि पाहिनोवृधे । ७ $\frac{७}{२७}$ ॥ बृहस्पते सवितर्बोधयैनं संशितञ्चित्सन्तरां सं शिशाधि । वर्द्धयैनं महते सौभगाय विश्वेऽएन मनुमदन्तु देवाः । ८ $\frac{८}{२७}$ ॥ अमुत्रभूयादधयद्य मस्यबृहस्पते अभिशस्ते रमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने । भिषजाशचीभिः । ९ $\frac{९}{२७}$ ॥ ॐ सदसस्पति मद्भुतंप्रियमिन्द्रस्य काम्यम् । सनिम्मेधामयासिषं स्वाहा ।१० $\frac{१३}{३२}$ ॥ यांमेधांदेवगणाः पितरश्चोपासते । तयामामद्य मेधयाग्ने मेधाविनंकुरु स्वाहा । ११ $\frac{१४}{३२}$ ॥ मेधांमेव्वरुणो ददातुमेधामग्निः प्रजापतिः । मेधामिन्द्रश्च व्वायुश्च मेधांधाता ददातुमे स्वाहा । १२ $\frac{१५}{३२}$ ॥ इदंमे ब्रह्मचक्षत्रञ्चोभे श्रियमश्नुताम् । मयिदेवा दधतुश्रियमुत्तमांतस्यै ते स्वाहा । १३ $\frac{१६}{३२}$ ॥ ॐ अग्नेनय । सुपथारायेऽ अस्मान्विश्वानि देवव्वयुनानि व्विद्वान् । युयोद्ध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिंव्विधेम १४ $\frac{३६}{५}$ ॥ ॐ तनूपाऽअग्ने । सितन्वंमे पाह्यायुर्दाऽअग्ने स्यायुर्मेदेहि व्वर्चोदाऽअग्ने । सिव्वर्चोमेदेहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नेयन्मे तन्वाऽऊनंतन्मऽआपृण । १५ $\frac{१७}{३}$ ॥ श्रद्धां० । १६ ॥ काण्डद्व० । १७ । अपुत्राः० । १८ ॥ चतुर्भि० । १९ ॥ प्रमादा० । २० ॥ कालेव० । २१ ॥ सर्वेपि० । २२ ॥ यस्य स्मृ० । २३ ॥ ॐ त्र्यायुषं० । २४ ॥ भस्म ललाटे धारयेत् ॥ "प्रार्थना"—ॐ नमोत्र०॥ ॐ शान्तिः शान्तिः शान्तिः ॥ "अर्पणम्"—अनेन (यजमानानुज्ञया) सायमौपासनपरिचरणाख्येन कर्मणा भगवान् यज्ञरूपी श्रीमहाविष्णुः प्रीयतां न मम ॥ विष्णवे नम इति त्रिः ॥ इति सायमौपासनपरिचरणम् ॥

१६४. "अथ प्रातरौपासनपरिचरणम्." (आवसथ्ये प्रातर्होमः)— स्नानं कृत्वा आचम्य प्राणानायम्य ॥ "सङ्कल्पः"— ॐ तत्सत्परमेश्वरप्रीत्यर्थं उदकसिद्ध्यर्थं मणिकोदकं करिष्ये इति सङ्कल्प्य पश्चादुद्धरणं कुर्यात् ।"उद्धरणम्"—आपोरेवतीति परमेष्ठी प्रजापतिर्ऋषिः। आपो देवता। त्रिष्टुप् छन्दः। उदकासेके विनियोगः— ॐ आपोरेवति क्षयथा हिवस्वक्रतञ्चर भृतामृतञ्चराय स्वस्छश्च पत्नी सरस्वती वयोधाः । १ $\frac{\text{सौत्रमन्त्रः ॥}}{\text{पा० गृ० सू०}}$ आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिः। आपो देवता । गायत्री छन्दः । उदकासेके विनियोगः— ॐ आपोहि० । २ $\frac{५०}{११}$ ॥ ॐ योवं० । ३ $\frac{५१}{११}$ ॥ ॐ तस्मा० । ४ $\frac{५२}{११}$ ॥ देशकालौ संकीर्त्य ॐ तत्सत्परमेश्वरप्रीत्यर्थं प्रातरौपासनस्य परिचरणमहं करिष्ये । सूर्याय स्वाहा प्रजापतये स्वाहेत्यनयोर्मन्त्रयोः प्रायोमेधा ऋषिः। सूर्यप्रजापती देवते । गायत्रीत्रिष्टुप् छन्दसी प्रातर्होमे विनियोगः—(तत्र सूर्यं प्रजापतिं तन्दुलैर्यक्ष्ये) उत्तरतः पात्रोपकल्पनम् । उपयमनकुशाः । समिधस्तिस्रः । मणिकोदकम् । होमद्रव्यं च । उपयमनकुशानादाय । तिष्ठन् । समिधोऽभ्याधाय । मणिकोदकेनाग्नेः प्रदक्षिणम् पर्युक्षणम् । वेणुधमन्या (नलिकया) प्रदीप्तकरणम्— ॐ सूर्याय स्वाहा इदं सूर्याय न मम ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ "उप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थानम्''—विभ्राडित्यस्य विभ्राट् सूर्य ऋषिः। सूर्यो देवता। त्रिष्टुप् छन्दः। उदुत्यमिति तिसृणां प्रस्कण्व ऋषिः। सूर्यो देवता। गायत्री छन्दः। तंप्रत्नथेत्यस्य काश्यपावत्सारावृषी। सोमो देवता। त्रिष्टुप् छन्दः। अयंवेन इत्यस्य वेन ऋषिः। सोमो देवता। त्रिष्टुप् छन्दः। चित्रमित्यस्य कुत्साङ्गिरस ऋषिः। सूर्यो देवता। त्रिष्टुप् छन्दः। आन इत्यस्य अगस्त्य ऋषिः। सूर्यो देवता। त्रिष्टुप् छन्दः। यदद्येत्यस्य श्रुतकक्षसुतकक्षावृषी। सूर्यो देवता। गायत्री छन्दः तरणिरित्यस्य प्रस्कण्व ऋषिः। सूर्यो देवता। गायत्री छन्दः। तत्सूर्यस्येति द्वयोः कुत्स ऋषिः। सूर्यो देवता। त्रिष्टुप् छन्दः। वण्महाँ इति द्वयोर्जमदग्निर्ऋषिः। सूर्यो देवता। आद्यस्य बृहती छन्दः। द्वितीयस्य सतो बृहती छन्दः। श्रायन्तइवेत्यस्य नृमेधा ऋषिः। सूर्यो देवता। बृहती छन्दः। अद्यादेवा इत्यस्य कुत्स ऋषिः। सूर्यो देवता। त्रिष्टुप् छन्दः। आकृष्णेनेत्यस्य हिरण्यस्तूपाङ्गिरसावृषी। सूर्यो देवता त्रिष्टुप् छन्दः। सूर्योपस्थाने विनियोगः— ॐ विभ्राड्बृह०। ५$\frac{३०}{३३}$ ॥ उदुत्यम्०। ६$\frac{३१}{३३}$ ॥ येनापावक०। ७$\frac{३२}{३३}$ ॥ दैव्याव०। ८$\frac{३३}{३३}$ ॥ तंप्रत्नथा०। ९$\frac{१२}{७}$ ॥ अयंवेन०। १०$\frac{१६}{७}$ ॥ चित्रंदेवा०। ११$\frac{४६}{१३}$ ॥ आनऽइडा०। १२$\frac{३४}{३३}$ ॥ यदद्य०। १३$\frac{३५}{३३}$ ॥ तरणिर्वि०। १४$\frac{३६}{३२}$ ॥ तत्सूर्यस्य०। १५$\frac{३७}{३३}$ ॥ तन्मित्रस्य०। १६$\frac{३८}{३३}$ ॥ वण्महाँ०। १७$\frac{३९}{३३}$ ॥ बट्सूर्य०। १८$\frac{४०}{३३}$ ॥ श्रायन्त०। १९$\frac{४१}{३३}$ ॥ अद्यादेवा०। २०$\frac{४२}{३३}$ आकृष्णेन०। २१$\frac{४३}{३३}$ ॥ एते मन्त्राः रुद्रे चतुर्थाध्याये द्रष्टव्याः। ॐ सदसस्पति०। २२$\frac{१३}{३२}$ ॥ ॐ यांमेधां। २३$\frac{१४}{३२}$ ॥ ॐ मेधांमे। २४$\frac{१५}{३२}$ ॥ ॐ इदंमे। २५$\frac{१६}{३२}$ ॥ ॐ तच्चक्षुर्दे०। २६ $\frac{२४}{३७}$ ॥ ॐ इदंविष्णु०। २७ $\frac{१५}{५}$ ॥ ॐ तद्विष्णो०। २८$\frac{५}{६}$ ॥ ॐ तद्विप्रासो०। २९$\frac{४४}{२४}$ ॥ श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं बलम्। तेजऽआयुष्यमारोग्यं देहि मे हव्यवाहन। ३० ॥ काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे। स्वर्गापवर्गदात्रे च यज्ञेशाय नमोनमः। ३१ ॥ अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्धनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ ३२ ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥ ३३ ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति स्मृतिः। ३४ ॥ काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी। देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः। ३५ ॥ सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखमाप्नुयात्। ३६ ॥ यस्यस्मृ०। ३७ ॥ ॐ त्र्यायुषं०। ३८$\frac{६१}{४}$ ॥ भस्म ललाटे धारयेत् ॥ "प्रार्थना"—ॐ नमो ब्रह्मणे० ॥ अयंमन्त्रः श्रौते द्रष्टव्यः ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ "अर्पणम्"—अनेन (यजमानानुज्ञया) अमुकद्रव्येण प्रातरौपासनपरिचरणाख्येन कर्मणा भगवान् यज्ञरूपी श्रीमहाविष्णुः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु। विष्णवे नम इति त्रिः ॥ इति प्रातरौपासनपरिचणम् ॥

१६९. "निसदानम्." याज्ञवल्क्यः– यत्र विद्या तपः शीलं स्ववर्णाचार एव च। श्रुतं वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम्। सर्वथा प्रभवो विप्राः श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः। गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम्। नापात्रे विदुषा किञ्चिदात्मनः श्रेय इच्छता। न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम् ॥ आन्हिककर्मप्रकाशे—गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम्। सहस्रगुणमाहूय याचिते तु तदर्धकम् ॥ संकीर्त्य देशकालादि तुभ्यं संप्रददे इति। नममेति च सत्ताया निवृत्तिमपि कीर्तयेत्। प्रागग्रेषु स्वयं स्थित्वा दाता च परमेश्वरम्। ध्यात्वा स्वपुण्यमुद्दिश्य दक्षिणां प्रतिपादयेत्। ब्राह्मणं प्रणिपत्याथ ततः पात्रं विसर्जयेत् ॥ वसिष्ठः–नामगोत्रे समुच्चार्य संप्रदानस्य चात्मनः। संप्रदेयं प्रयच्छन्ति कन्यादाने तु पुंत्रयम् ॥ वराहपुराणे–तोयं दद्याद्द्विजकरे दाने विधिरयं स्मृतः। सकुशोदकहस्तश्च ददामीति तथा वदेत् ॥ गौतमः—मनसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत् । विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥ "महाभारते"—एकस्मिन्नप्यतिन्क्रान्ते दिने दानविवर्जिते । दस्युभिर्मुषितस्येव युक्तमाक्रदितुं भृशम् ॥ तस्माद्विभवानुसारेण पूगीफलादिकमपि प्रत्यहं देयमिति नृसिंहः ॥

१६६. "अथ नित्यदानप्रयोगः."—हस्तौ पादौ प्रक्ष्याल्याऽचम्य प्राणानायम्य ॥ सङ्कल्पः—अद्य पूर्वोच्चरित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममाऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममुकब्राह्मणाय अमुकदानमहं करिष्ये इति सङ्कल्प्य ब्राह्मणपूजनं कुर्यात् यथा—ॐ भूर्भवः स्वः ब्रह्मणे इदमासनं—स्वासनम् । ॐ भूर्भुवः स्वः ब्रह्मणे इदं पाद्यं—सुपाद्यम् । ॐ भूर्भवः स्वः ब्रह्मणे इदमर्घ्यम्—अस्त्वर्घ्यम् । ॐ भूर्भुवः स्वः ब्रह्मणे इदमाचमनीयम्— अस्त्वाचमनीयम् । ॐ भूर्भवः स्वः ब्रह्मणे गन्धाः पान्तु— सौमङ्गल्यं चास्तु । अक्षताः पान्तु— आयुष्यमस्तु । पुष्पाणि पान्तु— सौश्रियमस्तु । ताम्बूलं पातु— ऐश्वर्यमस्तु । दक्षिणाः पान्तु— वहुदेयं चास्तु । नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुवाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ सकलाराधनैः स्वर्चितमस्तु । अस्तु स्वर्चितमिति ब्राह्मणः प्रतिवदेत् ॥ इदममुकदानं सदक्षिणाकं गन्धादिभिरर्चितं अमुकप्रवरान्वितायामुकगोत्रोत्पन्नायामुकशर्मणे तुभ्यमहं संप्रददे प्रतिगृह्यताम् प्रतिगृण्हामीति ब्राह्मणो वदेत् । साङ्गदानफलप्राप्त्यर्थमिमां दक्षिणां तुभ्यमहं संप्रददे ॥ ततो ब्राह्मणाशिषो गृण्हीयात् ॥ ॐ स्वस्तिनऽइन्द्रो० । १९/२९ ॥ शतं भवति शतायुर्वै० ॥ तथास्तु—इति यजमानो ब्रूयात् ॥ "अर्पणम्"— अनेन अमुकद्रव्यस्य मया कृतेन निसदानेन श्रीपरमेश्वरः प्रीयताम् ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति नित्यदानप्रयोगः ॥

१६७. "मङ्गलपदार्थदर्शनम्." कात्यायनः—रोचनं चन्दनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्धं मृदं गां दर्पणं मणिम् । गुरुमग्निं रविं पश्येन्नमस्येत्प्रातरेव हि ॥ **नागदेवः**–पूर्वं च सर्पिर्दधि सर्षपांश्च धेनुं सवत्सां वृषभं सुवर्णम् । मृद्गोमयं स्वस्तिकमक्षतांश्च वन्हिं मधुब्राह्मणकन्यकाश्च ॥ श्वेतानि वस्त्राणि तथा शमीं च हुताशनं चन्दनकल्पबीजम् । अश्वत्थवृक्षं च समालभेत ततश्च कुर्यान्निजधर्मकार्यम् । लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः । हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः । एतानि सततं पश्येन्नमस्येदर्चयेद्बुधः । प्रदक्षिणानि कुर्वीत तस्यायुर्न च हीयते ॥ **आयुर्वेदे**–आदर्शालोकनं प्रोक्तं माङ्गल्यं कान्तिकारकम् । पौष्टिकं बलमायुष्यं पापालक्ष्मिविनाशनम् ॥

१६८. **"मातृपितृवन्दनम्."** सुमन्तुः—आयुः पुमान्यशः स्वर्गं कीर्त्तिं पुष्टिं बलं श्रियम् । पशुं सुखं धनं धान्यं प्राप्नुयात्पितृ-वन्दनात् ॥

इति श्रीपुरन्दरोपाह्वविठ्ठलात्मजनारायणेन विरचितायां वाजसनेयान्हिकसूत्रावल्यां प्रथमभागकृत्यानि समाप्तानि ॥

॥ अथ द्वितीयभागकृत्यानि ॥

पुष्पलताकुंडिका । शिष्यगणः । याज्ञवल्क्यः ।

१६९. **दक्षः**–द्वितीये च तथा भागे वेदाभ्यासो विधीयते । वेदा-भ्यासो हि विप्राणां परमं तप उच्यते । ब्रह्मयज्ञः स विज्ञेयः षड-ङ्गसहितस्तु सः । वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । ततो दानं च शिष्येभ्यो वेदाभ्यासो हि पञ्चधा । समित्पुष्पकुशादीनां स कालः समुदाहृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७०. "स्वाध्यायाध्ययनम्." का० प० सूत्रे–अथ प्रतिज्ञामन्त्रब्राह्मणयोर्वेदनामधेयं तस्मिञ्छुक्के याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया हृद्यनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरितः । एवं जात्यादयोऽभिहिता ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ तानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥ अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहल्संयुक्तस्य संयुक्तस्यापि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे जकारोच्चारणं द्विर्भावेऽप्येवमथापरांतस्थस्यायुक्तान्यहल्संयुक्तस्योष्मऽकारैरेकारसहितोच्चारणमेवं तृतीयांतस्थस्य क्वचिद्वकारस्य तु संयुक्तस्यासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तस्थानां पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थवेलायां प्रकृत्या॥ २ ॥ अथानुस्वारस्य ङ्इत्यादेशः शषसहरेफेषु परेषु तस्य त्रैविध्यमाख्यातम् । ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घो गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति ॥ ३ ॥ मध्यन्दिनेन महर्षिणा याज्ञवल्क्याल्लब्धः शाखाविशेषो माध्यन्दिनः उपचारात्तं अधीयते विन्दति वा माध्यन्दिनाः शिष्याः । अण् ॥ तेषामयं स्वाध्यायः वृद्धाच्छः । ततः स्वार्थे कन् । प्रचयजात्यादयः स्वरितभेदाः । तानः एकश्रुतिः स्वरः । उदात्तादिस्वरसंस्कारनियमे सूत्राणि छन्दोवत् । वकारस्त्रिविधो ज्ञेयः गुरुर्लघुर्लघुतरः । आदिर्गुरुः लघुर्मध्ये पदांते च लघुतरः ॥ १ ॥ पदस्याद्यंतमध्ये स्यात् खकारोच्चारणं तथा । तृतीयवर्गयोगे तु ष एव स्यात्सदैव हि ॥२॥

---

* वेदांगत्वात् । १ यकारस्य । २ हः । ३ रस्य । ४ लस्य । ५ वस्य । ६ षस्य ७ संयुक्ताक्षरे परे । ८ शल्परत्वाभावे ।

१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

टुकैयोगे तु नोभवेत् ॥ इति मध्यन्दिनशिक्षा ॥ षः खट्टमृते चेति केशवशिक्षासूत्रं विसर्गेषु किंचिद्विरामः तस्य स्पष्टोच्चारणं पदादेः संयुक्ताकारस्य दीर्घोच्चारणं ॥ अतएवाध्यायसमाप्तौ दीर्घपाठ इति वदंति ॥ छन्दोवदित्यतिदेशात् सूत्रे विसर्गस्य स्पष्टोच्चारणं कुतो नेति न विद्मः ॥ डढौळळ्हावेकेषां । डढौळळ्हौ आपद्येते ॥ स्वरमध्ये समानपदे इत्यर्थः ॥ इति कातीयप्रातिशाख्ये । आश्वलायनप्रातिशाख्ये तु जिह्वामूलं तालु चाचार्य आह स्थानं डकारस्य तु वेदमित्रः ॥ ळकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्तः ॥ १ ॥ द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः ॥ २ ॥ वेदमित्र आचार्यः ॥ डस्य स्थानं तालुसंयुक्तजिह्वामूलं इत्याद्युक्तम् ॥

१७१. "पारस्करगृह्यसूत्रे"—प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय। वेदꣳसमाप्य स्नायाद्ब्रह्मचर्यं वाष्टाचत्वारिꣳशकं द्वादशके द्वादशकेऽप्येके गुरुणानुज्ञातो विधिविधेयस्तर्कश्च वेदः षडङ्गमेके न कल्पमात्रे कामं तु याज्ञिकस्योपसंगृह्य ॥ याज्ञवल्क्यशिक्षासूत्रे— जटा माला शिखा लेखा ध्वजो दण्डो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः । अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमः । विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् । ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोऽन्ततः । अन्तं चादिं नयेदेवं क्रममालेति कीर्त्यते । पदोत्तरां शिखामेव शिखामार्याः प्रचक्षते । क्रमा द्वित्रिचतुःपञ्च पदक्रममुदाहरेत् । पृथक् पृथग्विपर्यस्य लेखामाहुः पुनः क्रमात् । ब्रूयादादेः क्रमं सम्यगन्तादुच्चारयेदिति । वर्गे वा ऋचि वा यत्र पठनं स ध्वजः स्मृतः । क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तमम् । अर्धर्चादेवमेवोक्तः क्रमदण्डो विधीयते । पादशोर्धर्चशो वा पि सहोक्त्वा

१ क्षकारे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डवद्रथः । अन्तक्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् । आदिक्रमं नयेदन्तं घनमाहुर्मनीषिण इति ॥

१७२. "अध्ययनप्रकाराः." याज्ञवल्क्यः— उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् । वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् । वाको वाक्यं पुराणं च नाराशंसीश्च गाथिकाः । इतिहासांस्तथा विद्यां योऽधीते शक्तितोऽन्वहम् ॥ हरिहरभाष्ये— आचार्यलक्षणमुक्तम्— सत्यवाक् धृतिमान् दक्षः सर्वभूतदयापरः । आस्तिको वेदनिरतः शुचिराचार्य उच्यते ॥ अन्यच्च—उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते । एकदेशं तु वेदस्य वेदाङ्गान्यथवा पुनः । योऽध्यापयति वृत्त्यर्थे उपाध्यायः स उच्यते ॥ वेदाध्ययनसंपन्नो वृत्तिमान्विजितेन्द्रियः । न याजयेद्वृत्तिहीनं वृणुयाच्च न तं गुरुम् । पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमगामिति ॥ धन्वन्तरिः— अथ शुचये कृतोत्तरासङ्गायाव्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् । पदं पादं श्लोकं वा ते च पदपादश्लोका भूयः क्रमेणानुसंधेया एवमेकैकशो घटयेदात्मना चानुपठेत् । अद्रुतमविलम्बितमविशङ्कितमननुनासिकं व्यक्ताक्षरमपीडितवर्णमक्षिभ्रुवौष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरैः पठेन्न चान्तरेण कश्चिद्व्रजेत्तयोरधीयानयोः । यथा— शुचिर्गुरुपरो दक्षस्तन्द्रानिद्राविवर्जितः । पठेदेतेन विधिना शिष्यः शास्त्रान्तमाप्नुयात् ॥ वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्मनैपुणे । तदभ्यासे च सिद्धौ च यतेताध्ययनं ततः ॥ पाणिनिः— हस्तेन वेदं योऽधीते स्वरवर्णसमन्वितम् । ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसामभिर्दग्धो वियोनिमनुगच्छति ॥ व्यासः— वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चैव यत् । अजानतोऽर्थं तत्सर्वं तुषाणां कण्डनं यथा ॥ यजुर्वेदभाष्ये— स्वरो वर्णोऽक्षरं मात्रा तत्प्रयोगार्थ एव च । मन्त्रज्ञानं समासेन वेदितव्यं पदे पदे ॥

१७३. "शिक्षायां ताडनम्." मनुः—न निन्दां ताडने कुर्यात् पुत्रं शिष्यं च ताडयेत् । अधोभागे शरीरस्य नोत्तमाङ्गे कदाचन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७४. "वेदाध्ययनफलम्." योगी— वेदाभ्यासरतं श्रौतं महायज्ञक्रियापरम् । न स्पृशन्तीह पापानि महापातकजान्यपि ॥

१७५. "अनध्यायः." पा०गृ०सूत्रे–वातेमावास्यामिति सर्वानध्यायः ॥ श्राद्धाशने चोल्कावꣳस्फूर्ज्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाऽकालमुत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा भुक्त्वार्द्रपाणिरुदके निशायाꣳसन्धिवेलयोरन्तःशवे ग्रामे ग्रामेन्तर्दिवाकीर्तिर्धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालं नीहारे वादित्रशब्द आर्त्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकसृगालसामशब्देषु शिष्टाचरिते च तत्कालं गुरौ प्रेतेपोऽभ्यवेयाद्दशरात्रं चोपरमेत्ससतानूनत्रीणि सब्रह्मचारिणि त्रिरात्रमेकरात्रमसब्रह्मचारिण्यर्धपष्ठान्मासानधीत्योत्सृजेयुरर्धसप्तमासान्वाथेमामृचं जपत्युभाकवीयुवा यो नो धर्मः परापतत् परिसख्यानि धर्मिणो विसख्यानि विसृजामह इति त्रिरात्रꣳसहोपविप्रतिष्ठेरन् ॥ १४ ॥ याज्ञवल्क्यः–सन्ध्यागर्जितनिर्वातभूकम्पोल्कानिपातने ॥ समाप्य वेदं द्युनिशमारण्यकमधीत्य च । पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च । पशुमण्डूकनकुलमार्जारश्वाहिमूषिकैः ॥ कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये । श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिःस्वने ॥ अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके । देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे ॥ भुक्त्वार्द्रपाणिरम्भोऽन्तरर्धरात्रेऽतिमारुते । पांसुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु ॥ धावतः पूतिगन्धे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ॥ सप्तत्रिंशदनध्याया न तांस्तात्कालिकान् विदुः ॥ रुषनः–अयने विषुवे चैव शयने बोधने तथा । अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु ॥

१७६. "देवपूजा." कात्यायनपरिशिष्टसूत्रे—ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिङ्गैर्मन्त्रैरर्चयेत् ॥ योगीश्वरः—ब्राह्मवैष्णवरौद्रैस्तु सावित्रैर्मित्रवारुणैः । तल्लिङ्गैरेव मन्त्रैस्तु अर्चयेत्सुसमाहितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७७. " पूजाविधिः. " नागदेवः— हस्तावारभ्य देवस्य मूर्धान्तं चैव षोडशैः । षोडशाङ्गानि संपूज्य ततो देवाग्रतो जपेत् । हुत्वा षोडशभिर्मन्त्रैः षोडशाज्यस्य चाहुतीः । शेषं निवेदयेत्तास्मिन् दद्यादाचमनं ततः । ॐकारपूर्वकैर्मन्त्रैः षड्भिर्दशभिरेव च ॥

१७८. " देवस्पर्शेऽनधिकारः. " नारदीये—स्त्रीणामनुपनीतानां शूद्राणां च नराधिप । स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च । शूद्रो वाऽनुपनीतो वा स्त्री वापि पतितोऽपि वा । केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते । अत एव देवालये शिवलिङ्गदेव्यादिमूर्तीनां पर्युषितनिर्माल्योत्सर्जनपूर्वकं प्रथमपूजनादौ नियुक्ताः शूद्रा (गुरवा) इत्यभिधानाः सन्तीति सांप्रदायः प्रवृत्तः ॥

१७९. " देवार्चनकाल. " मात्स्ये—प्रातर्मध्यन्दिने सायं देवपूजां समारभेत् । अशक्तौ विस्तरेणैव प्रातः संपूज्य केशवम् । मध्यान्हे चैव सायं च पुष्पाञ्जलिमपि क्षिपेत् ॥ कौर्मे— ब्रह्माणं शङ्करं सूर्यं तथैव मधुसूदनम् । अन्यांश्चाभिमतान्देवान् भक्त्या त्वक्रोधनो नरः । स्वमन्त्रैस्त्वर्चयेन्नित्यं पत्रैः पुष्पैस्तथाम्बुभिः ॥ नृसिंहपुराणे—जलदेवं नमस्कृत्य ततो गच्छेद्गृहं बुधः । पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् ॥ मरीचिः—विधाय देवतापूजां प्रातर्होमादनन्तरम् । गुरूक्तेन तु मार्गेण मूलमन्त्रं जपेद्बुधः ॥

१८०. " मध्यान्हे भुक्तस्यापि रात्रौ पञ्चोपचारपूजाप्रकारः. " शारदातिलके—आसनस्नानवस्त्राणि भूषणं च विवर्जयेत् । रात्रौ देवार्चने तैश्च पदार्थैः पञ्चभिस्तथा । स्नाने वस्त्रे तथा भक्ष्ये दद्यादाचमनीयकम् ॥

१८१. " कालविशेषे पूज्यदेवताः. " स्कान्दे–ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः । द्वापरे भगवान् विष्णुः कलौ देवो महेश्वरः ॥ अन्यत्र–कलौ विष्णुसूर्यादीनामपि पूजोक्ता ॥ एतेन कलौ सर्वेषामपि देवानां पूज्यत्वं विधीयत एवेति सिद्धान्तः ॥

१८२. " गृहे देवागारम्. " नारदपुराणे–स्नानागारं दिशिप्राच्यामाग्नेय्यामग्निमन्दिरम् । अवाच्यां शयनागारं नैर्ऋत्यां वस्त्रमन्दिरम् । प्रतीच्यां भोजनागारं वायव्यां पशुमन्दिरम् । भाण्डकोशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तूत्तरस्यामैशान्यां देवमन्दिरम् । देवानां हि मुखं कार्यं पश्चिमायां सदा बुधैः ॥ अन्यच्च—गृहे देवागारं वास्तुपुरुषसन्निधौ स्थापयन्ति किञ्च—देवपूजासमये वास्तुपुरुषस्याप्यर्चनं गन्धाक्षतपुष्पैः कुर्वन्तीति सांप्रदायः ॥

१८३. " गृहे देवताप्रतिमाविचारः. " मात्स्ये—सौवर्णी राजती वापि ताम्री रत्नमयी तथा । शैली दारुमयी वापि लोहसङ्घमयी तथा (लोहसङ्घः पञ्चधातुरसः) । अङ्गुष्ठपर्वादारभ्य वितस्तिं यावदेव तु । गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥ स्मृत्यन्तरे—एकमूर्तिर्न पूज्यैव गृहिणा स्वेष्टमिच्छता । अनेकमूर्तिसंपन्नः सर्वान्कामानवाप्नुयात् । गृहे लिङ्गद्वयं नार्च्यं गणेशत्रितयं तथा । शङ्खद्वयं तथा सूर्यौ नार्च्यौ शक्तित्रयं तथा । द्वे चक्रे द्वारकायाश्च शालिग्रामशिलाद्वयम् । तेषां तु पूजनेनैव उद्वेगं प्राप्नुयाद्गृही । रविर्विनायकश्चण्डी ईशो विष्णुस्तथैव च । अनुक्रमेण पूज्यन्ते व्युत्क्रमे तु महद्भयम् ॥ अथर्वणरहस्ये हारीतः—शालिग्रामशिला विष्णुर्बाणस्तु शशिशेखरः । चण्डिका काञ्चनी प्रोक्ता स्वर्णमाक्षी तु शौनक । नार्मदेयो विघ्नहरो लोहितः प्रस्तरः शुभः । अर्ककान्तस्तु तरणिर्ग्राह्या ह्येवं समासतः । पञ्चानामपि देवानां यथाभागं क्रमेण वा । स्थापनं कारयेद्भक्त्या मुनिभिस्तत्त्वदर्शिभिः । चक्राङ्कमिथुनं पूज्यं शालग्रामशिलाग्रतः ॥ स्कान्दे—भक्त्या वा यदि वाऽभक्त्या कलौ मुक्तिमवाप्नुयात् । शालिग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ॥ भविष्ये—बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये । न प्रतिष्ठा न संस्कारस्तेषां चावाहनं तथा ॥ भरतमालायां मार्कण्डेयोक्तिः— कम्बुश्चक्रं शैलभवा नार्मदेयाऽब्जिनीपती । बाणो विष्णुशिला चैषां प्रतिष्ठां नैव कारयेत् ॥ नाममालायां वृद्धपराशरः—शैलीं दारुमयीं हैमीं धात्वाद्याकारसंभवाम् । प्रतिष्ठां वै प्रकुर्वीत प्रासादे वा गृहे नृप ॥ कालिकासङ्ग्रहे लौगाक्षिः—गृहे चलार्चा विज्ञेया प्रासादे स्थिरसंज्ञिका । इत्येते कथिता मार्गा मुनिभिः कर्मवादिभिः । कर्मयोगे भगवद्वाक्यम्—ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८४. **"पूजनप्रकाराः" योगीश्वरः**—ध्यात्वा प्रणवपूर्वं तु देवताश्च पृथक् पृथक् । नमस्कारेण मन्त्रेण पुष्पाणि तु निवेदयेत् ॥ **अत्र**—पञ्चानामप्येकस्य मुख्यस्यावाहनादिनमस्कारान्तं पूजनं कृत्वा ततः क्रमादन्येषां पूजेत्येवं काण्डानुसमयः । मुख्ये पुष्पाञ्जलिं दत्वा गणेशाद्यर्चनं भवेत् । गणेश एव मुख्यश्चेत्तत्र सूर्यक्रमाद्भवेदिति वचनक्रमाभिधानात् ॥ **नृसिंहपुराणे**—मन्त्रा वैदिका नाममन्त्रा वा ग्राह्याः । **ब्राह्मे**—ॐकारादिसुसंयुक्तं नमस्कारान्तकीर्त्तितम् । स्वनाम सर्वसत्वानां मन्त्र इत्यभिधीयते । अनेनैव विधानेन गन्धं पुष्पं निवेदयेत् । एकैकस्य प्रकुर्वीत यथोद्दिष्टक्रमेण तु ॥ **तत्रैव**—मन्त्राच्छतगुणं प्रोक्तं भक्त्या लक्षगुणोत्तरम् । भक्तिमन्त्रसमेतं तु कोटिकोटिगुणोत्तरम् ॥

१८५. **"पञ्चोपचाराः" जाबालिः**—ध्यानमावाहनं चैव भक्त्या यच्च निवेदनम् । नीराजनं प्रणामश्च पञ्च पूजोपचारकाः ॥ **अन्यत्र**—गन्धपुष्पे धूपदीपौ नैवेद्यः पञ्च ते क्रमात् ॥

१८६. **"दशोपचाराः." ज्ञानमालायाम्**—अर्घ्यं पाद्यं चाचमनं स्नानं वस्त्रनिवेदनम् । गन्धादयो नैवेद्यान्ता उपचारा दश क्रमात् ॥

१८७. **"षोडशोपचाराः." ज्ञा०**—आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकम् । मधुपर्कार्पणं स्नानं वसनाभरणानि च । सुगन्धः सुमनोधूपौ दीपोनैवेद्य एव च । माल्यानुलेपने चैव नमस्कारो विसर्जनम् ॥ **नागदेवः**—आवाहनासने पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीते च गन्धमाल्यादिभिः क्रमात् । धूपं दीपं च नैवेद्यं नमस्कारं प्रदक्षिणाम् । उद्वासनं षोडशकमेवं देवार्चने विधिः ॥

१८८. **"अष्टत्रिंशदुपचाराः." ज्ञा०**—अर्घ्यं पाद्यमाचमनं मधुपर्कमुपस्पृशम् । स्नानं नीराजनं वस्त्रमाचामं चोपवीतकम् । पुनराचामनं भूषा दर्पणालोकनं ततः । गन्धपुष्पे धूपदीपौ नैवेद्यं च ततः क्रमात् । पानीयं तोयमाचामं हस्तवासस्ततः परम् । (हस्तवासः करोद्वर्त्तनम्) । ताम्बूलमनुलेपं च पुष्पदानं ततः पुनः । गीतं वाद्यं तथा नृत्यं स्तुतिं चैव प्रदक्षिणाः । पुष्पाञ्जलिनमस्कारावष्टत्रिंशत्समीरिताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८९. " षोडशोपचारपूजामन्त्राः. " ऋग्विधाने–आद्यया वाहयेद्देवमृचा तु पुरुषोत्तमम् । द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया । अर्घ्यं चतुर्थ्या दातव्यं पञ्चम्याऽऽचमनीयकम् । षष्ठ्या स्नानं प्रदेयं तु सप्तम्या वस्त्रमेव च । यज्ञोपवीतमष्टम्या नवम्या चन्दनं स्मृतम् । पुष्पं दशम्या दातव्यमेकादश्या तु धूपकम् । द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनम् । चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणाः । उद्वासनं तु षोडश्या ह्युपचारास्तु षोडश । तच्च सर्वं जपेद्भूयः पौरुषं सूक्तमेव च ॥

१९० "स्नानादिपात्रेषु पदार्थनिक्षेपः" मन्त्रतन्त्रप्रकाशे— अक्षतागन्धपुष्पाणि स्नानपात्रे तथा त्रयम् । द्रव्याभावे प्रदातव्याः क्षालितास्तण्डुलाः शुभाः । तण्डुलान्प्रक्षिपेत्तेषु द्रव्याभावे तु तत्स्मरन् ॥ अगस्त्यसंहितायाम्— तथाचमनपात्रेऽपि दद्याज्जातीफलं मुने । लवङ्गमपि कङ्कोलं शस्तमाचमनीयके ॥ शारदातिलके— गन्धतैलमथो दद्याद्देवाय प्रतिमन्त्रतः । दूर्वां च विष्णुक्रान्तं च श्यामाकं पद्ममेव च । पाद्याङ्गानि च चत्वारि कथितानि समासतः । कर्पूरमगरुं पुष्पं द्रव्याण्याचमनीयकम् । सिद्धार्थमक्षतांश्चैव दूर्वां च तिलमेव च । यवगन्धफलं पुष्पमष्टाङ्गं त्वर्घ्यमुच्यते ॥

१९१. " न्यासाः. " सर्वानुक्रमसूत्रे–यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते । द्रष्टारो ऋषयः स्मर्तारः परमेष्ठ्यादयो देवताः । मन्त्रान्तरभूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वा इति ॥

१९२. "पञ्चाङ्गन्यासाः." ऋग्विधाने–हृदयं च शिरः शिखा कवचं चास्त्रमेव च । यथा देहे तथा देवे न्यासं कुर्याद्यथाविधि ॥

---

* टीप– १ सहस्त्रशीर्षेत्यावाहनं । २ पुरुषएवेत्यासनं । ३ एतावानस्येति पाद्यं । ४ त्रिपादूर्ध्वमित्यर्घ्यं । ५ ततोविराडजायतेत्याचमनीयं । ६ तस्माद्यज्ञादिति स्नानं । ७ तस्माद्यज्ञात्सर्वहुत इति वस्त्रम् । ८ तस्मादश्वा इति यज्ञोपवीतं । ९ तंयज्ञमिति गन्धं । १० यत्पुरुषमिति पुष्पं । ११ ब्राह्मणोऽस्येति धूपं । १२ चन्द्रमामनस इति दीपं । १३ नाभ्याआसीदिति नैवेद्यं । १४ यत्पुरुषेणेति ताम्बूलं । १५ सप्तास्या इति प्रदक्षिणा । १६ यज्ञेनयज्ञमिति मन्त्रपुष्पयुक्तो नमस्कारः ॥ एवं वाजसनेयिनां षोडशोपचारप्रकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९३. "अथ षडङ्गन्यासप्रयोगः"–आचम्य प्राणानायम्य । सङ्कल्पः–अद्यपूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममुककर्माङ्गत्वेन षडङ्गन्यासांश्च करिष्ये ॥ मनोजूतिरिति मन्त्रस्य । बृहस्पतिर्ऋषिः । बृहस्पतिर्देवता । बृहती छन्दः । हृदयन्यासे जपे विनियोगः–ॐ मनोजूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳसमिमन्दधातु । व्विश्श्वेदेवासऽइहमादयन्ता मो३म्प्रतिष्ठ । १ ९३/२ ॥ ॐ हृदयाय नमः ॥ अबोध्यग्निरिति मन्त्रस्य । बुधगविष्टरा ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । शिरोन्यासे जपे विनियोगः–ॐ अबोद्ध्यग्निः समिधा जनानाम्प्रति धेनुमिवायतीमुषासम् । यह्वाऽइव प्प्रवयामुज्जिहानाःप्प्र भानवः सिस्रते नाकमच्छ । २ २४/१५ ॥ ॐ शिरसे स्वाहा ॥ मूर्द्धानमिति मन्त्रस्य । भरद्वाज ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः । शिखान्यासे जपे विनियोगः–ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या वैश्श्वानरमृतऽआजातमग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्तदेवाः ॥ ३ २३/७ ॥ ॐ शिखायै वषट् ॥ मर्माणित इति मन्त्रस्य । अप्रतिरथ ऋषिः । मर्माणि देवता । विराट् छन्दः । कवचन्यासे जपे विनियोगः–ॐ मर्म्माणिते व्वर्म्मणाच्छादयामि सोमस्त्वाराजामृतेनानुवस्ताम् । उरोर्व्वरीयो व्वरुणस्तेकृणोतु जयन्तन्त्वानुदेवा मदन्तु । ४ ४९/१७ ॥ ॐ कवचाय हुम् ॥ विश्वतश्चक्षुरिति मन्त्रस्य । विश्वकर्मा भौवन ऋषिः । विश्वकर्मा देवता । त्रिष्टुप् छन्दः । नेत्रन्यासे जपे विनियोगः–ॐ व्विश्श्वतश्चक्षु० । ५ १९/१७ ॥ ॐ नेत्रत्रयाय वौषट् ॥ मानस्तोक इति मन्त्रस्य । परमेष्ठी ऋषिः । एकरुद्रो देवता । जगती छन्दः । अस्त्रन्यासे जपे विनियोगः– ॐ मानस्तोके० हवामहे । ६ १६/१६ ॥ ॐ अस्त्राय फट् ॥ "अर्पणम्"–अनेन यथाशक्त्याऽमुककर्माङ्गत्वेन कृतेन षडङ्गन्यासाख्येन क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मणा श्री अमुकदेवता प्रीयताम् ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

१९४. "षोडशाङ्गन्यासाः." ऋग्विधाने–अर्चनं संप्रवक्षामि विष्णोरमिततेजसः। यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः। अनुष्टुभश्च सूक्तस्य त्रिष्टुबन्तस्य देवताः। पुरुषो यो जगद्बीजं ऋषिर्नारायणः स्मृतः। प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत्। पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत्। सप्तमीं वामकट्यां तु दक्षिणस्यां तथाष्टमीं। नवमीं नाभिमध्ये तु दशमीं हृदये तथा। एकादशीं कण्ठमध्ये द्वादशीं वामबाहुके। त्रयोदशीं दक्षिणे तु तथैवास्ये चतुर्दशीम्। अक्ष्णोः पञ्चदशीं चैव विन्यसेन्मूर्ध्नि शोडशीम्। एवं न्यासविधिं कृत्वा पश्चात्पूजां समारभेत् ॥

१९५. "षोडशाङ्गन्यासप्रयोगः"– आचम्य प्राणानायम्य। सङ्कल्पः– अद्यपूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममुककर्माङ्गत्वेन षोडशाङ्गन्यासांश्च करिष्ये ॥ ॐ सहस्रशीर्षेति षोडशर्चपुरुषसूक्तस्य। नारायणः पुरुष ऋषिः। जगद्बीजं पुरुषो देवता। आद्यानां पञ्चदशानामनुष्टुप् अन्त्यायास्त्रिष्टुप्। न्यासपूजनाभिषेकेषु विनियोगः। इत्युक्त्वा पश्चात् पुरुषसूक्तस्य षोडशभिर्ऋग्भिर्वामहस्तादिषोडशाङ्गेषु न्यासं कुर्यात् ॥

१९६. "पुरुषसूक्तावश्यकता." योगियाज्ञवल्क्यः— दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा। अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥ पुष्करः– प्रतिवेदं महाभाग यत्सूक्तं पौरुषं स्मृतम्। सर्वकर्मकरं पुण्यं पवित्रं पापसूदनम्। एकैकया ऋचा राम स्नातो दत्वा जलाञ्जलिम्। पौरुषेण च सूक्तेन मुच्यतेसर्व किल्बिषात्। अन्तर्जलगतो जप्त्वा तथा सूक्तं तु पौरुषम्। सर्वकिल्बिषनिर्मुक्तो यथेष्टां लभते गतिम्। अकामः पौरुषं सूक्तं जप्त्वा नित्यमतन्द्रितः। नरो याति महाभाग तद्विष्णोः परमं पदम् ॥

१९७. "भूतादिशुद्धिः." रामतापिन्याम्– देवो भूत्वा यजे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवं नादेवो देवमर्चयेत् । देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाचरेत् । भूतशुद्धिं विधायैव प्राणस्थापनमाचरेत् । एवं प्राणान्प्रतिष्ठाप्य मातृकान्यासमाचरेत् ॥ भूतादिशुद्धिमाराध्यदेवतायां कुर्यादिति सांप्रदायः ॥ अन्यच्च–भूशुद्धिः षोडशन्यासा नैव कार्याः सदा बुधैः । नूतनायां तथा मूर्ताविथवा पर्ववासरे ॥

१९८. "अथ भूशुद्ध्यादिप्रयोगाः" "तत्रादौ भूशुद्धिः"–आचमनम्– ॐ नमो भगवते रुद्रायेति दशाक्षरमन्त्रस्य । प्रजापतिर्ऋषिः । रुद्रो देवता । विराट् छन्दः । आचमने विनियोगः । ॐ नमो भगवते रुद्राय स्वाहा । एवं त्रिराचम्य ॥ तद्वत्प्राणायामं च कृत्वा । "सङ्कल्पः"– अद्यपूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अशेषपापक्षयकामो धर्मार्थकाममोक्षाणामन्यतमकामो वाहं श्री अमुकदेवतापूजाङ्गत्वेन भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठाऽन्तर्मातृकाबहिर्मातृकान्यासांश्च करिष्ये ॥ "नमस्कारः"–दक्षिणे–ॐ सरस्वत्यै नमः ॥ ॐ शङ्खनिधये नमः । वामभागे–ॐ लक्ष्म्यै नमः ॥ ॐ पद्मनिधये नमः ॥ "आसनम्"– पृथिवीत्वयेति मन्त्रस्य । मेरुपृष्ठ ऋषिः । कूर्म्मो देवता । सुतलं छन्दः । आसने विनियोगः । ॐ पृथिवि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ "प्रार्थना"–ॐ विश्वशक्त्यै नमः । ॐ महाशक्त्यै नमः । ॐ कूर्मासनाय नमः । ॐ योगासनाय नमः । ॐ अनन्तासनाय नमः । ॐ विमलासनाय नमः । "मध्ये"– ॐ परमसुखासनाय नमः । ॐ भूर्भुवःस्वः आत्मासनाय नमः ॥ अनेन मन्त्रेण पुष्पादिना आत्मनः आसनदानम् ॥ "दिग्वन्धः"– ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने । तिष्ठ देवि शिखाबन्धे चामुण्डे चापराजिते । विष्णोर्नामसहस्रैस्तु शिखाबन्धं करोम्यहम् ॥ इति शिखाबन्धनम् ॥ "अथ दिग्बंधः" अपसर्पन्तु ते भूता ये भूता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमिसंस्थिताः । ये भूता विघ्नकर्त्तारस्ते नश्यं तु शिवाज्ञया । अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् । सर्वेषामविरोधेन ब्रह्मकर्म समारभे । तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम । भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ "तालत्रयकरणम्"—ॐ सर्वभूतनिवारकाय शार्ङ्गाय सशराय सुदर्शनायास्त्रराजाय हुं फट् स्वाहा । अनेन मन्त्रेण तालत्रयं कृत्वा । स्वस्य परितः सर्वदिक्षु अस्त्रमुद्रां प्रदर्शयेत् । ततः स्वदक्षिणभागे– ॐ गुरुभ्यो नमः । ॐ परमगुरुभ्यो नमः । ॐ परमेष्ठीगुरुभ्यो नमः । ॐ पूर्वसिद्धेभ्यो नमः । ॐ आचार्येभ्यो नमः । स्ववामभागे–ॐ गणेशाय नमः । ॐ दुर्गायै नमः । ॐ क्षेत्रपालाय नमः । ॐ योगिनीभ्यो नमः । ॐ क्षेत्रेशाय नमः ॥ "भूमिताडनम्"—अपसर्पन्त्वितिमन्त्रेण स्ववामपार्ष्णिना त्रिवारं भूमिं ताडयेत् । अपसर्पन्तु० ॥ "भूशुद्धिः"—भूरसीत्यस्य प्रजापतिर्ऋषिः । मातृका देवता । प्रस्तारपङ्क्तिश्छन्दः । भूशुद्धौ विनियोगः । भूमौ हस्तौ कृत्वा । पश्चाद्ब्रूयात्तद्यथा—ॐ भूर॑सि॒भूमि॑र॒स्यदि॑तिरसि वि॒श्वधा॑या वि॒श्वस्य॒भुव॑नस्य ध॒र्त्री । पृ॒थि॒वीं॑य॑च्छ पृ॒थि॒वीन्दृ॑ꣳह पृ॒थि॒वीम्मा हि॑ꣳसीः । १ $\frac{१८}{१३}$ ॥ "भैरवनमस्कारः"—यो भूतानामित्यस्य कौण्डिण्य ऋषिः । नारायणो देवता । अनुष्टुप् छन्दः । भैरवनमस्कारे विनियोगः—ॐ योभू॒ताना॒मधि॑पति॒र्यस्मि॑ल्लो॒का ऽअधि॑ श्रि॒ताः । यऽईशे॑मह॒तो म॒हाꣳ ऽस्तेन॑गृह्णा॒मि॒ त्वाम॒हम्मयि॑गृह्णा॒मि॒ त्वाम॒हम् । २ $\frac{३२}{२०}$ ॥ इति भूशुद्धिः ॥

१९९. "अथ भूतशुद्धिः"–मूलाधारात्समुत्थाप्य कुण्डलीं परदेवताम् । सुषुम्नामार्गमाश्रित्य ब्रह्मरन्ध्रगतां स्मरेत् । जीवं ब्रह्मणि संयोज्य हंसमन्त्रेण साधकः । ॐहंसः सोहम् ॥ "मातृकोपसंहारः"–स च । 'क्ष' लयो–'ह' कारे । 'ह' लयः–'स' कारे । 'स' लयः–'ष' कारे । 'ष' लयः–'श' कारे । 'श' लयो–'व' कारे । इत्यादि प्रकारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकारपर्यन्तं 'लयं' भावयित्वा ॥ अकारः सहस्राम्बुजे ब्रह्मरन्ध्रे परमात्मनि 'लयम्' गत इति भावयेत् ॥ तच्च—"भावनम्"—ॐ 'क्ष'कारम्—'ह'कारे उपसंहरामि। ॐ 'ह'कारम्—'स'कारे उप०। ॐ 'स'कारम्—'ष'कारे उप०। ॐ 'ष'कारम्—'श'कारे उप०। ॐ 'श'कारम्—'व'कारे उप०। ॐ 'व'कारम्—'ल'कारे उप०। ॐ 'ल'कारम्—'र'कारे उप०। ॐ 'र'कारम्—'य'कारे उप०। ॐ 'य'कारम्—'म'कारे उप०। ॐ 'म'कारम्—'भ'कारे उप०। ॐ 'भ'कारम्—'ब'कारे उप०। ॐ 'ब'कारम्—'फ'कारे उप०। ॐ 'फ'कारम्—'प'कारे उप०। ॐ 'प'कारम्—'न'कारे उप०। ॐ 'न'कारम्—'ध'कारे उप०। ॐ 'ध'कारम्—'द'कारे उप०। ॐ 'द'कारम्—'थ'कारे उप०। ॐ 'थ'कारम्—'त'कारे उप०। ॐ 'त'कारम्—'ण'कारे उप०। ॐ 'ण'कारम्—'ढ'कारे उप०। ॐ 'ढ'कारम्—'ड'कारे उप०। ॐ 'ड'कारम्—'ठ'कारे उप०। ॐ 'ठ'कारम्—'ट'कारे उप०। ॐ 'ट'कारम्—'ञ'कारे उप०। ॐ 'ञ'कारम्—'झ'कारे उप०। ॐ 'झ'कारम्—'ज'कारे उप०। ॐ 'ज'कारम्—'छ'कारे उप०। ॐ 'छ'कारम्—'च'कारे उप०। ॐ 'च'कारम्—'ङ'कारे उप०। ॐ 'ङ'कारम्—'घ'कारे उप०। ॐ 'घ'कारम्—'ग'कारे उप०। ॐ 'ग'कारम्—'ख'कारे उप०। ॐ 'ख'कारम्—'क'कारे उप०। ॐ 'क'कारम्—'अः'कारे उप०। ॐ 'अः'कारम्—'अं'कारे उप०। ॐ 'अं'कारम्—'औ'कारे उप०। ॐ 'औ'कारम्—'ओ'कारे उप०। ॐ 'ओ'कारम्—'ऐ'कारे उप०। ॐ 'ऐ'कारम्—'ए'कारे उप०। ॐ 'ए'कारम्—'ॡ'कारे उप०। ॐ 'ॡ'कारम्—'ऌ'कारे उप०। ॐ 'ऌ' कारम्—'ॠ'कारे उप०। ॐ 'ॠ'कारम्—'ऋ'कारे उप०। ॐ 'ऋ'कारम्—'ऊ'कारे उप०। ॐ 'ऊ' कारम्— 'उ'कारे उप०। ॐ 'उ'कारम्—'ई'कारे उप०। ॐ 'ई'कारम्—'इ'कारे उप०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ 'इ'कारम्– 'आ'कारे उप० । ॐ 'आ'कारम्– 'अ'कारे उप० । ॐ 'अकारः' सहस्रदलांम्बुजाकारे ब्रह्मरन्ध्रे परमात्मनि 'लयम्' गत इति भावयेत् ॥ "भूतोपसंहारः"– पादादिजानुपर्यन्तं चतुष्कोणं सवज्रकम् । लंबीजाढ्यं स्वर्णवर्णं स्मरेदवनिमण्डलम् । जान्वोरानाभि चन्द्रार्धनिभं पद्मद्वयाकृति । वँ बीजयुक्तं श्वेताभं मँ सोमं मण्डलं स्मरेत् ॥ नाभेर्हृदयपर्यन्तं त्रिकोणं स्वस्तिकासनम् । रँ बीजेन युतं रक्तं स्मरेत्पावकमण्डलम् । हृदो भ्रूमध्यपर्यन्तं वृत्तं षड्बिन्दुलांछितम् । यँ बीजयुक्तं धूम्राभं वायव्यं मण्डलं स्मरेत् । आब्रह्मरन्ध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरम् । हँ बीजयुक्तमाकाशमण्डलं च विचिन्तयेत् । एवं भूतानि संचिन्त्य प्रत्येकं प्रविलापयेत् । भुवं जले जलं वन्हौ वन्हिं वायौ नभस्यमुम् । विलाप्य खमहङ्कारे महत्तत्त्वेप्यहंकृतम् । महान्तं प्रकृतौ मायामात्मनि प्रविलापयेत् । शुद्धः सच्चिन्मयो भूत्वा चिन्तयेत्पापपूरुषम् । वामकुक्षिस्थितं कृष्णमङ्गुष्ठपरिमाणकम् । विप्रहत्याशिरोयुक्तं कनकस्तेयबाहुकम् । मदिरापानहृदयं गुरुतल्पकटीयुतम् । तत्संयोगिपदद्वन्द्वमुपपातकरोमकम् । खड्गचर्मधरं दुष्टमधोवक्त्रं च दुःसहम् । वायुबीजं स्मरन्वायुं संपूर्यैनं विशोषयेत् ॥ यथा– यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ इति षोडश (१६) वारं जपित्वा ॥ वन्हिबीजं स्मरन्नित्यं निर्दहेत्पापपूरुषम् । रँ इति चतुःषष्टि (६४) वारं जपित्वा ॥ वायुबीजेन तद्रक्षां बहिर्निष्कास्य यत्नतः । यँ इति द्वात्रिंशद्वारं (३२) जपित्वा ॥ सुधाबीजेन देहोत्थं भस्मसंप्लावयेत्सुधीः । वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ वँ इति षोडश (१६) वारं जपित्वा ॥ भूबीजेन घनीकृत्य भस्म तत्कनकाण्डवत् । लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ इति षोडश (१६) वारं ज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पित्वा ॥ विशुद्धमुकुराकारं ब्रह्मरन्ध्रगतं स्मरेत् ॥ आकाशादीनि भूतानि पुनरुत्पादयेत्ततः । अखण्डं ब्रह्म तस्मात्स्यात्प्रेरकः पुरुषस्तथा । प्रकृतेर्महदाकारस्ततोहं त्रिगुणात्मकः । तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नाद्रेतः । रेतसः पुरुषः । स वाऽएष पुरुषोऽन्नरसमयः । हँसः सोहम् । कुण्डली जीवमादाय परसङ्गात्सुधामयीम् । संस्थाप्य हृदयाम्भोजे मूलाधारगतं स्मरेत् ॥ इति भूतशुद्धिः ॥

२००. "अथ प्राणप्रतिष्ठा"– अस्य श्री प्राणप्रतिष्ठामन्त्रस्य । ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि छन्दांसि। जगत्स्रष्टिः प्राणशक्तिर्देवता । आँ वीजम् । ह्रीँ शक्तिः । क्रौँ कीलकं । प्राणप्रतिष्ठापने विनियोगः । ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि । ऋग्यजुःसामच्छन्दोभ्यो नमः मुखे । जगत्स्रष्ट्यै प्राणशक्त्यै नमः हृदये । आँम् वीजाय नमः लिङ्गे । ह्रीँ शक्तये नमः पादयोः । क्रौँ कीलकाय नमः सर्वाङ्गेषु । एवं न्यासं कृत्वा । ॐ अँ कँ खँ गँ घँ ङँ आँ–पृथिव्यप्तेजोवाय्वाकाशात्मने अङ्गुष्ठाभ्यां नमः । ॐ इँ चँ छँ जँ झँ ञँ ईँ –शब्दस्पर्शरूपरसगन्धात्मने तर्जनीभ्यां नमः । ॐ उँ टँ ठँ डँ ढँ णँ ऊँ–त्वक्चक्षुश्रोत्रजिव्हाघ्राणात्मने मध्यमाभ्यां नमः। ॐ एँ तँ थँ दँ धँ नँ ऐँ –वाक्पाणिपादपायूपस्थात्मने अनामिकाभ्यां नमः । ॐ ओँ पँ फँ बँ भँ मँ औँ –वचनादानगतिविसर्गानन्दात्मने कनिष्ठिकाभ्यां नमः । ॐ अँ यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः–मनोबुद्ध्यहङ्कारचित्तज्ञानात्मने करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि । नाभेरारभ्य पादान्तम् 'आँ' इति पाशवीजम् । हृदयादारभ्य नाभ्यन्तं 'ह्रीँ' इति शक्तिवीजम् । मस्तकादारभ्य हृदयान्तम् 'क्रौँ' इति अङ्कुशवीजम् न्यसेत् ॥ "अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थ ध्यानम्''–रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यंकुशं पञ्च बाणान् । बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ शिरसि तथा हृदि करं दत्वा ॥ ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ पँ सँ हँ सः–सोहम् प्राणा इह प्राणाः । ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ सः–जीव इह स्थितः । ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ सः–सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थानीहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ इति प्रणवस्य पञ्चदशावृत्तीः (१५) कृत्वा–अनेन मम देहस्य पञ्चदश संस्काराः संपद्यन्ताम् । इत्युक्त्वा पश्चात्त्रीन्प्राणायामान्कृत्वा ॥ यथा पर्वतधातूनां दोषान्दहति पावकः । एवमन्तर्गतं पापं प्राणायामेन दह्यते॥ इति प्राणप्रतिष्ठा ॥

२०१.''अथान्तर्मातृकान्यासः''–अस्य श्री अन्तर्मातृकामन्त्रस्य ब्रह्मा ऋषिः । मातृका सरस्वती देवता । गायत्री छन्दः। हलो बीजानि । स्वराः शक्तयः । 'क्षं' कीलकं मातृकान्यासजपे विनियोगः । अं ब्रह्मऋषये नमः—आं शिरसि । इं गायत्रीछन्दसे नमः–ईं वदने । उं मातृकासरस्वतीदेवतायै नमः–ऊं हृदये । एं हलेभ्यो बीजेभ्यो नमः–ऐं गुह्ये । ओं स्वरशक्तिभ्यो नमः–औं पादयोः । अं क्षं कीलकाय नमः–अः सर्वाङ्गेषु । '' इतिमातृकाऋष्यादिन्यासः'' ॥ ॐ अँ कँ खँ गँ घँ ङँ आम्—अङ्गुष्ठाभ्यां नमः । ॐ इँ चँ छँ जँ झँ ञँ ईँ—तर्जनीभ्यां नमः । ॐ उँ टँ ठँ डँ ढँ णँ ऊँ–मध्यमाभ्यां नमः । ॐ एँ तँ थँ दँ धँ नँ ऐँ –अनामिकाभ्यां नमः । ॐ ओँ पँ फँ बँ भँ मँ औँ –कनिष्ठिकाभ्यां नमः । ॐ अँ यँ रँ लँ वँ शँ षँ सँ अः–करतलकरपृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठाभ्यां नमः । एवं हृदयादि ॥ "अथ ध्यानम्"—पञ्चाशल्लिपिभिर्विभज्य मुखदोर्हृत्पद्मवक्षस्थलां भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् । मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये । ततो दक्षिणकनिष्ठिकाया आद्यं पर्वारभ्य वामाङ्गुष्ठाद्यपर्वपर्यन्तं षोडशसु पर्वसु षोडश स्वरान्विन्यस्य वामतर्जनीमारभ्य दक्षिणतर्जन्यन्तमङ्गुल्यग्रेषु चतुरश्चतुरो वर्णान् क्रमेण कादि सांतान्विन्यस्याङ्गुष्ठयोः "हलौ" सर्वाङ्गुल्यग्रेषु क्षकारं विन्यसेत् । यथा— ॐ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐँ ओँ औँ अँ अः । कँ खँ गँ घँ ङँ । चँ छँ जँ झँ ञँ । टँ ठँ डँ ढँ णँ । तँ थँ दँ धँ नँ । पँ फँ बँ भँ मँ । यँ रँ लँ वँ शँ षँ सँ हँ क्षँ ॥ इत्युक्त्वा पुनः पूर्वोक्तं मातृकान्यासं कुर्यात् ॥ ॐ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐँ ओँ औँ अँ अः–इति षोडशपत्रके–कण्ठे । ॐ कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ–इति द्वादशपत्रके–हृदि । ॐ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ–इति दशपत्रके–नाभौ । ॐ बँ भँ मँ यँ रँ लँ–इति षट्पत्रके–लिङ्गे । ॐ वँ शँ षँ सँ–इति चतुष्पत्रके—गुदे । ॐ हँ क्षँ द्विपत्रके भ्रुवोर्मध्ये ॥ "अथ ध्यानम्"–आधारे लिङ्गनाभौ प्रकटितहृदये तालुमूले ललाटे द्वेपत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के । वासान्ते बालमध्ये ड–फ,क–ठसहिते कण्ठदेशे स्वराणां हं क्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ १ ॥ इति अन्तर्मातृकाः ॥

२०२. "अथ बहिर्मातृकाः"–ॐ अँनमः–केशान्तेः । ॐ आँनमः–मुखे । ॐ इँनमः–दक्षिणनेत्रे । ॐ ईँनमः–वामनेत्रे । ॐ उँनमः–दक्षिणकर्णे । ॐ ऊँनमः–वामकर्णे । ॐ ऋँनमः–दक्षिणनासापुटे । ॐ ॠँनमः–वामनासापुटे । ॐ लृँनमः–दक्षिणगण्डे । ॐ ॡँनमः–वामगण्डे । ॐ एँनमः–ऊर्ध्वोष्ठे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ ऐंनमः–अधरोष्ठे । ॐ ओंनमः–ऊर्ध्वदन्तपङ्क्तौ । ॐ औंनमः अधोदन्तपङ्क्तौ । ॐ अंनमः–मूर्ध्नि । ॐ अःनमः–आस्ये । ॐ कंनमः–दक्षिणबाहुमूले । ॐ खंनमः–दक्षिणकूर्परे । ॐ गंनमः– दक्षिणमणिबन्धे । ॐ घंनमः–दक्षिणकराङ्गुलिमूले । ॐ ङंनमः– दक्षिणकराङ्गुल्यग्रे । ॐ चंनमः–वामबाहुमूले । ॐ छंनमः– वामकूर्परे । ॐ जंनमः–वाममणिबन्धे । ॐ झंनमः–वामाङ्गुलि- मूले । ॐ ञंनमः–वामकराङ्गुल्यग्रे । ॐ टंनमः–दक्षिणपाद- मूले । ॐ ठंनमः–दक्षिणजानुनि । ॐ डंनमः–दक्षिणगुल्फे । ॐ ढंनमः–दक्षिणपादाङ्गुलिमूले । ॐ णंनमः–दक्षिणपादाङ्गु- ल्यग्रे । ॐ तंनमः–वामपादमूले । ॐ थंनमः–वामजानुनि । ॐ दंनमः–वामगुल्फे । ॐ धंनमः–वामपादाङ्गुलिमूले । ॐ नंनमः– वामपादाङ्गुल्यग्रे । ॐ पंनमः–दक्षिणकुक्षौ । ॐ फंनमः–वाम– कुक्षौ । ॐ बंनमः–पृष्ठे । ॐ भंनमः–नाभौ । ॐ मंनमः–उ- दरे । ॐ यं–त्वगात्मने नमः–हृदि । ॐ रं असृगात्मने नमः– दक्षिणांसे । ॐ लं मांसात्मने नमः–ककुदि । ॐ वं मेदात्मने नमः–वामांसे । ॐ शं अस्थ्यात्मने नमः–हृदयादि वामहस्ता- ग्रान्तम् । ॐ षं मज्जात्मने नमः–दक्षिणपादाग्रान्तम् । ॐ सं शुक्रात्मने नमः–हृदयादि पादान्तम् । ॐ हं आत्मशक्त्यात्मने नमः–हृदयादि जठरे । ॐ ळं जीवात्मने नमः–नाभ्यादि हृद- यान्तम् । ॐ क्षं परमात्मने नमः–हृदयादि मस्तकान्तम् । ॐ छन्दःपुरुषाय नमः शिरसि ॥ इति बहिर्मातृकाः ॥ "अर्प- णम्"–अनेन यथाशक्त्या कृतेन भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठा- न्तर्मातृकाबहिर्मातृकान्यासाख्यकर्मणा कर्माङ्गदेवतास्वरूपी पर- मेश्वरः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति भूशु- द्धिभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृकाप्रयोगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२०३. "पञ्चायतनदेवताः." वाचस्पतौ—आदित्यं गणनाथं च देवीं रुद्रं च केशवम् । पञ्चदेवत्यमित्युक्तं सर्वकर्मसु पूजयेत् ॥ तत्रादौ "शालिग्रामः." स्कान्दे—शिलाप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् । यथा यथा शिला सूक्ष्मा तथा स्यात्तु महत्फलम् ॥ "शिववाणः." पुराणसङ्ग्रहे— पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृति । भुक्तिमुक्तिप्रदं चैव वाणालिङ्गमुदाहृतम् ॥ "गणेशः"—शुण्डादण्डेन दन्ताभ्यां शोभनाभ्यामलङ्कृता । एकेन वाथ दन्तेन रक्तबिन्दुभिरन्विता । पार्श्वभागैकवदना वक्राभ्यां शोभिता च या । गणेशमूर्त्तिः सा ज्ञेया विघ्नाद्यौघविनाशिनी ॥ "सूर्यः"—बाह्ये वाभ्यन्तरे वापि चक्रद्वादशसंयुता । सूर्यमूर्त्तिरिति ख्याता सर्वव्याधिविनाशिनी ॥ "देवी"—गर्ते वा गर्तमध्ये वा योन्याकारेण चिन्हिता । योनेरुपरि मध्ये वा कुण्डलीभूतसर्पवत् । अर्धाधिका त्रिरेखाभिर्भूषिता या शिला शुभा । शक्तिकुण्डलिनी सा तु देवानामपि दुर्लभा । शक्तिकुण्डलिनीं देवीं नित्यं यः पूजयेन्नरः । इन्द्रादिदुर्लभान्भोगान् भुक्त्वा निर्वाणमाप्नुयात् ॥

विष्णुपं०

शिवपं०

गणपतिपं०

देवीपं०

सूर्यपं०

२०४. पञ्चायतनस्थापनविचारः." ज्ञानमालायाम्—"गणेशपञ्चायतनम्"—हेरम्बं तु यदा मध्ये ऐशान्यामच्युतं यजेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आग्नेय्यां पञ्चवक्त्रं तु नैर्ऋत्यां द्युमणिं यजेत् । वायव्यामम्बिकां चैव यजेन्नित्यमतन्द्रितः । (गनाशंसूदे) ॥ "शिवपं०"–यदा तु शङ्करं मध्ये ऐशान्यां श्रीपतिं यजेत् । आग्नेय्यां च तथा हंसं नैर्ऋत्यां पार्वतीसुतम् । वायव्यां च सदा पूज्या भवानी भक्तवत्सला । (शंनारगदे) ॥ "विष्णुपं०"–यदा तु मध्ये गोविन्दमैशान्यां शङ्करं यजेत् । आग्नेय्यां गणनाथं च नैर्ऋत्यां तपनं तथा । वायव्यामम्बिकां चैव यजेन्नित्यं समाहितः । (नाशंगरदे) ॥ "देवीपं०"—भवानी तु यदा मध्ये ऐशान्यां माधवं यजेत् । आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां गणनायकम् । प्रद्योतनं तु वायव्यामाचार्यस्तु प्रपूजयेत् । (देनाशंगर) ॥ "सूर्यपं०"–सहस्रांशुर्यदा मध्ये ऐशान्यां पार्वतीपतिम् । आग्नेय्यामेकदन्तं च नैर्ऋत्यामच्युतं तथा । वायव्यां पूजयेद्देवीं भोगमोक्षैकभूमिकाम् । (सूशंगनादे) ॥ बोपदेवः–शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करेभास्येनागसुता रवौ हरगणेशाजाम्बिकाः स्थापिताः । देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरेनार्याः शङ्करभागतोऽतिसुखदा व्यस्तास्तु ते हानिदाः ॥ अन्यच्च-स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः ॥

२०५. "नवग्रहादिप्रतिमाः." याज्ञवल्क्यः–ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णकादुभौ । रजतादयसः सीसात्कार्याः सर्वे ग्रहाः क्रमात् ॥ "मूर्तिलक्षणानि." मात्स्ये—पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः ॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः । द्विभुजश्च गदापाणिः कर्त्तव्यो वरदः शशी ॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः । चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ पीतमाल्याम्बरधरः कर्णिकारदलद्युतिः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ देवदैत्यगुरू (गुरुशुक्रौ) तद्वत्पीतश्वेतौ चतुर्भुजौ । दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः । बाणबाणासनधरः कर्त्तव्योऽर्कसुतः शनिः ॥ करालवदनः खड्गचर्मशूली वरप्रदः । नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः । गृध्रासना गता नित्यं केतवः स्युर्वरप्रदाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वे किरीटिनः कार्या ग्रहा लोकसुखावहाः । स्वाङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा ॥

२०६. "**कलशादिपूजा.**" **धर्मसारे**–कलशं शङ्खघण्टे च पाद्यार्घ्याचमनीयकम् । संपूज्य प्रोक्ष्य चात्मानं पूजासंभारमेव च ॥ ध्यायेदभिमतां देवमूर्त्तिं संपूजयेत्ततः ॥ **पूजासागरे**— सुवासितजलैः पूर्णं सव्ये कुम्भं सुपूजयेत् । कलशस्येति मन्त्रेण तीर्थान्यावाहयेत्ततः ॥ शङ्खमद्भिः पूरयित्वा प्रणवेन च दक्षिणे । संपूज्य त्वंपुरेत्यादि मन्त्रेण प्रार्थयेत्ततः ॥ **तन्त्रान्तरे**— महाभिषेकं सर्वत्र शङ्खेनैव प्रकल्पयेत् । सर्वत्रैव प्रशस्तोऽब्जः शिवसूर्यार्चनं विना । मम नामाङ्कितां घण्टां सुदर्शनयुतां यदि । ममाग्रे स्थापयेद्यस्तु तस्य देहे वसाम्यहम् । घण्टां संपूज्य मध्ये त्वागमार्थमिति वादयेत् । जलैः पाद्यादिपात्राणि गायत्र्यादौ प्रपूजयेत् ॥ **यामले**— निवेशयेत्पुरोभागे गन्धं पुष्पं च भूषणम् । दीपं दक्षिणतो दद्यात्पुरो नैव तु वामतः । वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे ॥ **का० पु०**— स्नाने धूपे तथा दीपे नैवेद्ये भूषणे तथा । घण्टानादं प्रकुर्वीत तथा नीराजनेपि च ॥ **विष्णुधर्मोत्तरे**— धूपे नीराजने स्नाने पूजाकाले विलेपने । ममाग्रे वादयन् घण्टामुत्तमं लभते फलम् ॥ **गौतमीये**— उत्तोल्य दृष्टिपर्यन्तं घण्टां वामदिशि स्थिताम् । वादयन्वामहस्तेन दक्षहस्तेन चार्चयेत् ॥

२०७. "**ध्यानम्.**" **वाचस्पतौ**— ध्यानं तु द्विविधं प्रोक्तं सरूपारूपभेदतः । अरूपं तत्र यद्ध्यानमवाङ्मनसगोचरम् । अव्यक्तं सर्वतो व्याप्तमिदमित्याविवर्जितम् ॥ **याज्ञवल्क्यः**– समाहितेन मनसा चैतन्यान्तस्वर्तिना । आत्मनोऽभीष्टदेवानां ध्यानं ध्यानमिहोच्यते ॥

२०८"**आवाहनम्.**" **वाचस्पतौ**—कुर्यादावाहनं मूर्तौ मृन्मय्यां सर्वदैव हि । प्रतिमायां जले वह्नौ नावाहनविसर्जने ॥

२०९. "**पूजायां मुद्रालक्षणम्.**" **ज्ञानमालायाम्**– देवता न च सन्तुष्टा सर्वदा संमुखी भवेत् । अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी मता । सङ्गृथ्य निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता । अधो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखी त्वियं चेतत्स्यात्स्थापनी मुद्रिका मता। प्रसृताङ्गुलिकौ हस्तौ मिथः श्लिष्टौ तु संमुखौ। कुर्यात्स्वहृदयं सेयं मुद्रा प्रार्थनसंज्ञिका। इत्येवं सर्वदेवानां पूजने पट् प्रदर्शयेत् ॥

२१०. "आसनम्." का०पु०—आसनं प्रथमं दद्यात्पौष्पं दारुजमेव वा। वास्त्रं वा चार्मणं कौशं मण्डलस्थोत्तरेऽर्पयेत् ॥

२११. "आचमनम्." आ० का०—स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं तथा इति ॥

२१२. "देवप्रतिमायां नित्यस्नानविचारः" प्र० पारिजाते—प्रतिमापट्टयन्त्राणां नित्यस्नानं न कारयेत्। कारयेत्पर्वदिवसे यदा वा मलधारणम् ॥ अयं नियमस्तु षडङ्गुलोर्ध्वप्रतिमादिषु बोद्धव्यः। यदि षडङ्गुलन्यूना प्रतिमा वर्तते तर्हि तां नित्यमेव स्नापयेत् ॥

२१३. "पञ्चनद्यः,"—वाचस्पतौ—भागीरथी समाख्याता यमुना च सरस्वती। किरणा धूतपापा च पञ्च नद्यः प्रकीर्तिताः ॥

२१४. "पञ्चगव्यम्." कृत्यकल्पतरौ— पञ्चगव्यं पवित्रं तु आहरेत्ताम्रभाजने। (१) गायत्र्या चैव गोमूत्रं (२) गन्धद्वारेण गोमयम्। (३) आप्यायस्वेति च क्षीरं (४) दधिक्राव्णेति वै दधि ॥ (५) तेजोसिशुक्रमित्याज्यं (६) देवस्यत्वा कुशोदकम् ॥ ॐ तत्सवितु० ।१$\frac{३}{३६}$ ॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। २ श्रीसूक्तमन्त्रः ॥ ॐ आप्यायस्व। समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे। ३$\frac{१२}{१२}$ ॥ ॐ दधिक्राव्णो ऽअकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्रण ऽआयूंषि तारिषत् ।४$\frac{३२}{२३}$॥ ॐ तेजोसि शुक्रमस्यमृतमसि धाम नामासि। प्रियं देवानामनाधृष्टं देवयजनमसि ।५$\frac{३१}{१}$॥ ॐ देवस्य त्वा। सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।६$\frac{१०}{१}$॥ जाताशौचान्ते मृताशौचान्ते उपाकर्मादिनैमित्तिककर्मारम्भे च शरीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्ध्यर्थं पञ्चगव्यप्राशनं कार्यम् । तत्र—**यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥१॥**

२१५. "**पञ्चामृतम्.**" धन्वन्तरिः—गव्यमाज्यं दधि क्षीरं माक्षिकं शर्करान्वितम् । एकत्र मिलितं ज्ञेयं दिव्यं पञ्चामृतं परम् ॥

२१६. "**उद्वर्त्तनम्**"—रजनी सहदेवी च शिरीषं लक्ष्मणापि च । सहभद्रा कुशाग्राणि उद्वर्त्तनमिहोच्यते ॥ "**सौभाग्यद्रव्यम्**"—हरिद्रा कुङ्कुमं चैव सिन्दूरादिसमन्वितम् । कज्जलं कण्ठसूत्रादि सौभाग्यद्रव्यमुच्यते ॥

२१७. "**अथ देवेष्वभिषेकविचारः.**" **रुद्रकल्पद्रुमे**—साङ्गमादौ जपेद्रुद्रं केवलाङ्गानि चान्तरे । साङ्गं सशीर्षकं चान्ते निरङ्गमिति केचन ॥ **गणपतौ**—गणपत्यथर्वशीर्षेण ॥ **देव्यां**—अथर्वणवेदीयलक्ष्मीसूक्तेन देव्यथर्वशीर्षेण वा ॥ **विष्णौ**—नारायणाथर्वशीर्षेण ॥ **सूर्ये**—सूर्याथर्वशीर्षेण ॥ एतान्यथर्वशीर्षाणि पठित्वा धारापात्रेण जलधारयाऽनेकप्रकारेणोक्तयैकादशिन्या **अथवा**—एकाऽवर्त्तनेनैवाभिषेकं कुर्यात् ॥ **विघ्नशान्त्यर्थेतु** एकादशिन्या रुद्राभिषेकं कुर्यात् ।

२१८. "**अथ विष्ण्वादिदेवानां महाभिषेकविधिः**"—एकादशिन्याद्यभिषेककरणात्पूर्वं विष्ण्वाद्याराध्यदेवतायाः पूर्वोक्तप्रकारेण पूर्वपूजां समाप्य निर्माल्यं विसृस्याभिषेकाङ्गत्वेन पञ्चोपचारपूजां कृत्वा तत्तद्देवताप्रियस्य गङ्गाजलदुग्धेक्षुरसरञ्जिकापञ्चामृतादिद्रव्यस्याविच्छिन्नधारया एकादशिनीं पठन्नभिषेकं कुर्यात् । तत्र **विष्णोर्नारायणा**थर्वशीर्षस्य षोडशावृत्तिकरणं । **गणपतेर्ग**णपत्यथर्वशीर्षस्यैकविंशतिसंख्याकावृत्तिकरणं । **सूर्यस्य** सूर्याथर्वशीर्षस्य द्वादशावृत्तिकरणं । **शङ्करस्य** रुद्राध्यायस्यैकादशावृत्तिकरणं । **देव्या** श्चाथर्ववेदोक्तलक्ष्मीसूक्तस्य देव्यथर्वशीर्षस्य वा नवावृत्तिकरणमित्येकादशिनीकरणसांप्रदायो वर्तते । [केचित्तु शिवस्य रुद्रैकादशिनीं कृत्वाऽनन्तरं रुद्राथर्वशीर्षं सकृत्पठित्वाभिषेकं कुर्वन्ति तथापि रुद्राथर्वशीर्षं विनैव रुद्राध्यायेन महाभिषेककरणस्य बहूनां सांप्रदायः]। संक्षिप्तपूजायां तु सर्वदेवानां तत्तदथर्वशीर्षादेः सकृदावर्तनेनाभिषेकं कुर्यात् । केचित्तु पूर्वोक्तप्रकारेणैव तत्तद्देवतानामेकादशिनीं कृत्वाऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिषेकं कुर्वन्ति । अभिषेकोत्तरं पूजाप्रकारः पूर्वोक्त एव द्रष्टव्यः ॥

२१९. "**वस्त्राद्यर्पणम्.**" अन्यच्च—स्नानान्ते चार्पयेद्वस्त्रं देवानां प्रीतये सदा । ब्रह्मसूत्रं च दातव्यं पूजाफलमभीप्सुना ॥

२२०. "**देवे गन्धानुलेपनम्.**" कालिकापुराणे वाचस्पतौ च—चूर्णीकृतो वा घृष्टो वा दाहकर्षित एव वा । रसः संमर्दजो वापि प्राण्यङ्गोद्भव एव वा ॥ गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः । गन्धचूर्णं गन्धपत्रचूर्णं सुमनसां तथा ॥ प्रशस्तगन्ध उक्तानि पत्रचूर्णानि यानि च । तानि गन्धाव्हयानि स्युः स गन्धः प्रथमः स्मृतः ॥ घृष्टो मलयजो गन्धः सरलश्च नमेरुणा । अगरुप्रभृतिश्चापि यस्य पङ्कः प्रदीयते ॥ घृष्ट्वा स घृष्टो गन्धोऽयं द्वितीयः परिकीर्त्तितः । देवदार्वगुरुब्रह्मसालसारान्तचन्दनाः । प्रियादीनां च यो दग्ध्वा गृह्यते दाहजो रसः । सदाहाकार्षितो गन्धस्तृतीयः परिकीर्तितः ॥ सगन्धः करवी बिल्व गन्धिनी तिलकं तथा । प्रभृतीनां रसो योसौ निष्पीड्य परिगृह्यते ॥ स संमर्दोद्भवो गन्धः संमर्दज इतीर्यते । मृगनाभिसमुद्भूतस्तत्कोशोद्भव एव वा ॥ गन्धः प्राण्यङ्गजः प्रोक्तो मोददः स्वर्गवासिनाम् । कर्पूरगन्धसाराद्याः क्षोदे घृष्टे च संस्थिताः । चन्द्रभागादयश्चापि रसे पङ्के च सङ्गताः । गन्धसारस्तु सर्वत्र संसर्गादौ प्रयुज्यते॥मृगनाभिर्भवेद्घृष्टश्चूर्णोऽप्यन्यस्य योगतः। एवं सर्वस्तु सर्वत्र गन्धो भवति पञ्चधा ॥ सर्वेषु गन्धजातेषु प्रशस्तो मलयोद्भवः । तस्मात्सर्वप्रयत्नेन दद्यान्मलयजं सदा ॥ कृष्णागुरुः सकर्पूरः सहितो मलयोद्भवैः । वैष्णवप्रीतिदो गन्धः कामाख्यायाश्च भैरवौ ॥ कुङ्कुमागरुकस्तूरीचन्द्रभागैः समीकृतैः । त्रिदशप्रीतिदो गन्धस्तथा चण्ड्याश्च शम्भुना ॥ गन्धेन लभते कामं गन्धो धर्मप्रदः सदा । अर्थानां साधको गन्धो गन्धे मोक्षः प्रतिष्ठितः ॥ देवानां गन्धं नित्यमनामिकयाऽनुलेपयेत् ॥

२२१. "**पुष्पार्पणप्रकारः.**"—पत्रं वा यदि वा पुष्पं फलं वापि तथैव च । केशवार्थे शिवार्थे वा यथोत्पन्नं तथार्पयेत् । मध्यमाऽनामिकामध्ये पुष्पं सगृह्य पूजयेत् । अङ्गुष्ठतर्जनीभ्यां तु निर्माल्यमपनोदयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२२. "तुलसीग्रहणविचारः." **वायुपुराणे**— अस्नात्वा तुलसीं छित्वा यः पूजां कुरुते नरः । सोऽपराधी भवेत्सत्यं तत्सर्वं निष्फलं भवेत् ॥ **पाद्मे**—देवार्थे तुलसीछेदो होमार्थे समिधां तथा। इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च ॥ पूर्णिमायाममायां च द्वादश्यां रविसङ्क्रमे । तैलाभ्यङ्गे च स्नातेन मध्यान्हे निशि सन्ध्ययोः । अशौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा । तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः शिरः ॥ **वाचस्पतौ**—शालग्रामशिलार्चार्थं प्रत्यहं तुलसीक्षितौ । तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः॥ संक्रान्त्यादौ निषिद्धेऽपि तुलस्यवचयः स्मृतः ॥ **स्कान्दे**—मन्त्रेणानेन यः कुर्यात्तुलसीदलसंचयम् । पूजनं वासुदेवस्य लक्षकोटिफलं लभेत् ॥ "तुलसीपत्रग्रहणमन्त्रः"— **तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया । केशवार्थे चिनोमि त्वां वरदा भव शोभने ॥ त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् । तथा कुरु पवित्राङ्गि कलौ मलविनाशिनी ॥**

२२३. "विल्वपत्रम्." **पटले**—त्रिजटापत्रकैकेन हेम्वं हरिमर्चयेत् । कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः ॥ पत्रं पुष्पं फलं तोयं नैवेद्यं धूपदीपकौ । दत्वा यद्यत्फलं प्राप्यं तस्मात्कोटिगुणं भवेत् ॥ पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् । यथोत्पन्नं तथा देयं विल्वपत्रमधोमुखम् ॥ षण्मासानन्तरं विल्वपत्रं पर्युषितं भवेत् । पूज्या एतेन वै देवाः सूर्यलम्बोदरौ विना ॥

२२४. "पूजायां ग्राह्यपुष्पाणि." **स्मृत्यन्तरे**—समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् । नित्यपूजार्थं परोपवनादेरपि ग्राह्याणि न च तच्चौर्यम् ॥ पङ्कजं पञ्चरात्रं स्याद्दशरात्रं च विल्वकम् । एकादशाहं तुलसी नैव पर्युषिता भवेत् । जाती शमी कुशाः कङ्कु मल्लिकाकरवीरजम् । नागपुन्नागकाऽशोकरक्तनीलोत्पलानि च । चम्पकं बकुलं चैव पद्म विल्वं पवित्रकम् । एतानि सर्वदेवानां सङ्ग्राह्याणि समानि च ॥ अन्यच्च—विल्वापामार्गजातीतुलसिशामिशताकेतकीभृङ्गदूर्वामान्दाभोजा हि दर्भा मुनितिलतगरब्रह्मकल्हारमल्यः । चम्पाश्वारातिकुम्भीदमनमरुबका विल्वतोहानि शस्तास्त्रिशश्च्येकार्यरीशोदधिनिधिवसुभूर्भूयमा भूय एवम् ॥ "**देवतानामतिप्रियाणि पुष्पा-**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णि— शङ्करस्य विल्वपत्रम् । विष्णोस्तुलसी । गणेशस्य दूर्वाङ्कुरः । अम्बाया नानाविधपुष्पाणि । सूर्यस्य रक्तं करवीरपुष्पम् ॥

२२५. "**पुष्पाभावे.**" भविष्ये—अलाभे तु सुपुष्पाणां पत्राण्यपि निवेदयेत् । पत्राणामप्यलाभे तु तृणगुल्मौषधीरपि । औषधीनामलाभे तु भक्त्या भवति पूजनम् । यत्पुण्यं प्रतिपुष्पे तद्दशधा स्वर्णनिर्मिते ॥

२२६. "**वर्ज्यपुष्पाणि.**" भविष्ये—कृमिकीटावपन्नानि शीर्णपर्युषितानि च ॥ स्वयं पतितपुष्पाणि त्यजेदुपहितानि च । [उपहितानि मलादिभिः] । मुकुलैर्नार्चयेद्देवमपक्वं न निवेदयेत् । शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः । तद्धारी चैव नान्यान्वै निर्माल्यं तद्व्रवेत्तयोः । तथा देवोपरि धृतं वामहस्ते धृतं च यत् । अधोवस्त्रधृतं चैव जलेन क्षालितं च यत् । देवतास्तन्न गृह्णति पुष्पं निर्माल्यतां गतम् ॥ **वार्त्तिके**—नाङ्गुष्ठैर्मर्दयेद्देवं नाधःपुष्पैः समर्चयेत् । कुशाग्रैर्न क्षिपेत्तोयं वज्रपातसमं भवेत् । न शुष्कैः पूजयेद्देवं कुसुमैर्न महीगतैः । न विशीर्णदलैः शिष्टैर्नाऽशुभैर्नाविकासितैः । पूतिगन्धोग्रगन्धीनि स्वल्पगन्धीनि वर्जयेत् ॥ **हारीतः**—स्नानं कृत्वा तु यत्किश्चित्पुष्पं गृह्णन्ति वै द्विजाः । पितरस्तन्न गृह्णन्ति न गृह्णन्ति च देवताः ॥ **उक्तं च**—वस्त्रानीतं करानीतं स्वयंपतितमेव च । एरण्डपत्रैरानीतं न तस्य फलभाग्भवेत् ॥**भट्टिः**—अक्षतैर्नार्चयेद्विष्णुं न तुलस्या विनायकम् ॥ न दूर्वया यजेद्दुर्गां नोन्मत्तेन दिवाकरम् ॥ **ज्ञा० मा०**—नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम् । न दूर्वया यजेद्देवीं विल्वपत्रैश्च भास्करम् । उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः ॥ **फलं** च कृमिसंयुक्तं प्रयत्नात्ताद्विवर्जयेत् ॥

२२७. "**पञ्च रत्नानि.**"—नीलकं वज्रकं चेति पद्मरागश्च मौक्तिकम् । प्रवालं चेति विज्ञेयं पञ्चरत्नं मनीषिभिः ॥ सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम् । रत्नपञ्चकमाख्यातमिति ॥ कनकं हीरकं नीलं पद्मरागश्च मौक्तिकमिति ॥ अभावे सर्वरत्नानां हेम सर्वत्र योजयेत् ॥

---

१ शुष्कवस्त्रपरिधानाद्भस्मादिधारणाच्च पूर्वमिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२८. "**पञ्च पल्लवानि.**" आम्रजम्बूकापित्थाना बीजपूरकाविल्वयोः । गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम् ॥ **शब्दचन्द्रिकायाम्**—अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः । पञ्चपल्लवमित्युक्तं सर्वकर्मणि शोभनम् ॥ **तान्त्रिककर्मणि तु**—पनसाम्रं तथाश्वत्थं वटं वकुलमेव च इति ॥

२२९. "**पञ्च पुष्पाणि.**"–**देवीपुराणे**–चम्पकाम्रशमीपद्मकरवीरं च पञ्चकम् ॥

२३०. "**धूपः.**" **वामने**–हिरुका कङ्कणं दारु मल्लिकाऽगुरुवासिता । शङ्खजातिफलं श्रीमात्प्रिया धूपा हरेरिमे ॥ **आयुर्वेदे**–घृतगुग्गुरपाटीरहेगरू (अगरू) शीरचन्दनम् । घनं लाक्षाकुष्ठनखं दशाङ्गः प्रोच्यते बुधैः ॥ **शारदायाम्**— गुग्गुलं सरलं दारु पत्रं मलयसम्भवम् । ह्रीवेरमगुरुं कुष्ठं गुडं सर्जरसं घनम् । हरीतकीं नखीं लाक्षां जटामांसीं च शैलजाम् । षोडशाङ्गं विदुर्धूपं दैवे पैत्र्ये च कर्मणि । यथा गन्धं तथा देवि धूपं दद्याद्विचक्षणः । मध्यमानामिकाङ्गुल्योर्मध्यभागे विधारयेत् । अङ्गुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत् । तथा समर्पयेद्धूपं घण्टावाद्यजयस्वनैः । "**दीपम्.**" **का० पु०**— न मिश्रीकृत्य दद्यात्तु दीपं स्नेहे घृतादिकाम् ॥ घृतेन दीपकं नित्यं तिलतैलेन वा पुनः । ज्वालयेन्मुनिशार्दूल सन्निधौ जगदीशितुः ॥ कार्पासवर्तिका ग्राह्या न दीर्घा न च सूक्ष्मका ॥

२३१. "**नैवेद्यपात्रम्.**" **पाद्मे**–हैरण्यं राजतं कांस्यं ताम्रं मृन्ममयमेव च । पालाशं पद्मपत्रं वा पात्रं विष्णोरतिप्रियम् ॥

२३२. "**देवतानैवेद्यार्पणविधिः.**" **आश्वलायनः**–वैश्वदेवं पुरा कृत्वा नित्येचाभ्युदये तथा । स्वाभीष्टदेवतादिभ्यो नैवेद्यं च निवेदयेत् । अकृत्वा वैश्वदेवं तु नैवेद्यं यो निवेदयेत् । तदन्नं न च गृण्हन्ति देवा विष्ण्वादयो ध्रुवम् ॥ **स्कान्दे**– नानाव्यञ्जनसंयुक्तं रसषट्कैस्तु संस्कृतम् । निवेद्यान्नं समाप्नोति फलं यज्ञाधिकं द्विज ॥ **ब्रह्मसंहितायाम्**—तुलसीगन्धपुष्पैश्च संपूज्याऽन्नं हरेः प्रियम् । संप्रोक्ष्यार्घ्यजलेनैव संरक्ष्यास्त्रेण सर्वदा । धेनुमुद्रां प्रदर्श्याथ ततो देवं निवेदयेत् ॥ **गौतमः**— अथामृतोपस्तरणमासि स्वाहार्पयेज्ज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लम् । **चन्द्रिकायाम्**— प्राणापानव्यानोदानसमानास्तारपूर्वकाः । चतुर्थ्याग्निवधूयुक्ताः प्राणमन्त्राः स्तृता इति ॥ **भविष्ये**—पानीयं चामृतीकृत्य परेशाय निवेदयेत् । मूलमन्त्रं (गायत्रीमन्त्रं) जपेदत्र ततो नारायणात्मकम् । अष्टोतरशतं चैव अष्टाविंशातिमेव वा । क्षणं विमृश्य मतिमान् दद्यादाचमनं ततः । **पाझे** । हविः शाल्योदनं दिव्यमाज्ययुक्तं च शर्कराम् । नैवेद्यं देवदेवाय यावकं पायसं तथा । नैवेद्यवस्त्वलाभे तु फलानि च निवेदयेत् । फलानामप्यलाभे तु तोयान्यपि निवेदयेत् ॥ भोजनोत्तरं सायंकालपूजायां तु सोपस्करं उपहारनैवेद्यं निवेदयेत् नित्यशः पूजासमये शर्कराखण्डखाद्यादि नैवेद्यं समर्प्य देवयज्ञात्पूर्वं देवयज्ञोत्तरं वा पवित्रस्थले चतुरस्रमण्डलोपरि गृहसिद्धशाकाद्यखिलसिद्धान्नपूरितं महानैवेद्यपात्रं निधाय तदन्नं **गायत्रीमन्त्रेण नाभ्याआसी**-दिति मन्त्रेण च तुलसीदलेन संप्रोक्ष्य नैवेद्योपरि तत्तुलसीदलं निधाय धेनुमुद्रां प्रदर्श्य सव्यहस्तस्याङ्गुलयः समानाः कृत्वा नैवेद्यमर्पयेत् । **तद्यथा— ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ ब्रह्मणे नमः ।** इति समर्प्य नैवेद्य मध्ये पानीयं दत्वा **पुनर्नैवेद्यमर्पयित्वोत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनार्थे चन्दनं च समर्पयेत् ॥**

२३३. "**नैवेद्यभक्षणविचारः.**" **पाझे**—द्रव्यमन्नं फलं तोयं शिवस्वं न स्पृशेत्क्वचित् । लङ्घयेन्नैव निर्माल्यं कूपे सर्वं परित्यजेत् ॥ नैवेद्यमन्नं तुलसीविमिश्रं विशेषतः पादजलेन सिक्तम् । योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति लक्षाऽयुतकोटिपुण्यम् ॥ **शिवनारदसंवादे**—बाणलिङ्गे तु चण्डांशोर्न च निर्माल्यकल्पना । सर्वं बाणार्पितं ग्राह्यं भक्त्या भक्तैश्च नान्यथा । ग्राह्याग्राह्यविचारोऽयं बाणलिङ्गे न विद्यते । तदर्पितं जलं चान्नं ग्राह्यं प्रसादसंज्ञया । बाणलिङ्गे स्वयंभूते चन्द्रकान्ते हृदि स्थिते । चान्द्रायणसमं ज्ञेयं शम्भोर्नैवेद्यभक्षणम् ॥ **पाझे**—मक्षिकापादमात्रं यः शिवस्वमुपजीवति । लोभान्मोहात्स पच्येत कल्पान्तं नरके नरः ॥ **पाझस्कान्दब्राह्मपुराणसङ्ग**-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेषु—अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम् । शालग्रामशिलालग्नं सर्वं याति पवित्रताम् । नैवेद्यं मे नरो भुक्त्वा शुद्धो चान्द्रायणं चरेत्॥

२३४. "**ताम्बूलम्.**"—सुपूगं च सुपत्रं च चूर्णेन च समन्वितम् । दद्यात्तु द्विजदेवेभ्यस्ताम्बूलं प्रीतिपूर्वकम् ॥

२३५. "**प्रदक्षिणाः.**" **बह्वृचपरिशिष्टे**—एकां विनायके कुर्याद्वे सूर्ये तिस्र ईश्वरे । चतस्रः केशवे कुर्यात्सप्ताश्वत्थे प्रदक्षिणाः । **अन्यत्र तु**—एका चण्ड्या रवेः सप्त तिस्रः कार्या विनायके । हरेश्चतस्रः कर्तव्याः शिवस्यार्द्धप्रदक्षिणा । वृषं चण्डं वृषं चैव सोमसूत्रं पुनर्वृषम् । चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् । अपसव्यं यतीनां तु सव्यं तु ब्रह्मचारिणाम् । सव्यापसव्यं गृहिणामेवं शम्भोः प्रदक्षिणा ॥ **तथाग्नेय्ये**—सव्यं व्रजेत्ततोऽसव्यं प्रनालं नैव लङ्घयेत् ॥

२३६. "**मन्त्रपुष्पम्.**"—नानासुगन्धपुष्पाणि यथा कालोद्भवानि च । पुष्पाञ्जलिः शुभा देया देवताप्रीतये सदा ॥

२३७. "**साष्टाङ्गनमस्कारः.**" उरसा शिरसा दृष्ट्या मनसा वचसा तथा । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥

२३८. "**देवतीर्थविचारः.**" **हलायुधे**—शिला ताम्रं तथा तोयं शङ्खः पुरुषसूक्तकम् । गन्धं घण्टा च तुलसीत्यष्टाङ्गं तीर्थमुच्यते ॥ **स्कान्दे**—कुङ्कमं चन्दनं पत्रं नैवेद्यं सुसमं जलम् । शालग्रामशिलालग्नं तीर्थं कोटिशताधिकम् ॥ **भविष्ये**—विष्णुपादाभिषिक्तं यः पात्रेणैव पिबेज्जलम् । सर्वपापविनिर्मुक्तः स याति परमां गतिम् । यः पादसलिलं विष्णोः करेण पिबते यदि । स मूढो नरकं याति यावदिन्द्राश्चतुर्दश ॥ **पुलस्त्यः**—शालग्रामशिलावारि सोमपानं दिने दिने । पात्रान्तरेण तद्ग्राह्यं करेण सुरया समम् ॥ **अगस्त्यः**—शालग्रामशिलातोयमपीत्वा यस्तु मस्तके । प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ **गरुडपुराणे**—जलं न येषां तुलसीविमिश्रं पादोदकं चक्रशिलासमुद्भवम् । नित्यं त्रिसन्ध्यं प्लवते च गात्रं खगेन्द्र ते धर्मबहिष्कृता नराः । पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्धरेः । शेषं च मस्तके धार्यमिति वेदानुशासनम् ॥

२३९. "**निर्माल्यग्रहणविचारः.**" **पाद्मे**—विष्णुदेहपरामृष्टं माल्यं पापहरं स्मृतम् । यो नरः शिरसा धत्ते स याति हरिमञ्ज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा ॥ ब्राह्मे—ब्रह्माङ्गलग्नं विप्रेभ्यो वैष्णवं च प्रदीयते । रुद्राङ्गलग्नमग्नौ तु दहेत्सर्वं च तत्क्षणात् । शिष्टेभ्यस्त्वथ देवेभ्यो दत्तं दीनेषु निक्षिपेत् ॥

२४०. " **नवविधा भक्तिः.** " **पिप्पलायनः**—श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा । क्रियते भगवत्यद्धा सोपि याति परां गतिम् ॥

२४१. " **उत्तरपूजाप्रकारः.** " **ब्रा० हलायुधः**—नारायणमन्त्रस्य उत्तर नारायणऋषिः । पुरुषो देवता । आद्यास्तिस्रस्त्रिष्टुभोंऽत्ये द्वे अनुष्टुभौ । उत्तरपूजने विनियोगः— ॐ **अद्भ्यः संभृत** इत्यारभ्य **श्रीश्चतेलक्ष्मीश्चपत्न्या**वित्यन्तैः षण्मन्त्रैरुत्तरपूजा कर्तव्या । (एते च षण्मन्त्रा रुद्रे द्वितीयाध्याये द्रष्टव्याः)॥

२४२. " **पूजाफलम्.** " **शम्भुरहस्ये**—स्वयं यजति चेद्देवमुत्तमा सोदरात्मजैः । मध्यमा या यजेद्भृत्यैरधमा याजनाक्रिया ॥ **भविष्ये**—धर्मार्जितधनक्रीतैर्यः कुर्यात्केशवार्चनम् । उद्धरेत्स्वेन सहितान्दश पूर्वान्दशापरान् ॥ **महाभारते**—कलौ कलिमलध्वंसं सर्वपापहरं हरिम् । येऽर्चयन्ति नरा नित्यं तेऽपि वन्द्या यथा हरिः ॥

देवागारम्.

२४३. " **अथ देवपूजाप्रयोगः.**"– 'आचम्य प्राणानायम्य । '**सुशान्तिर्भवतु** ॥ " **मङ्गलोच्चारणम्** "–ॐ **स्वस्तिनऽइन्द्रो** '

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'न्वृद्धश्रवाःस्वतिनःपूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअ-'
'रिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु । १ १९/२५ ॥ ॐ भद्रङ्कर्णेभिः'
'शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा'
'ᳪ सस्तनूभिर्व्यशेमदेवहितंयदायुः । २ २१/२५ ॥ ॐ तम्प-'
'त्नीभिरनुगच्छेमदेवाःपुत्रैर्भ्रातृभिरुतवाहिरण्यैः । नाकङ्गृ-'
भ्णानाःसुकृतस्यलोकेतृतीये पृष्ठेऽअधिरोचनेदिवः । ३ ५०/१५ ॥'
"नमस्कारः"—श्रीमन्महागणाधिपतये नमः । इष्टदेवताभ्यो नमः । कुलदेताभ्यो नमः । ग्रामदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । वाणीहिरण्यगर्भाभ्यां नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । श्रीउमामहेश्वराभ्यां नमः । शचीपुरदराभ्यां नमः । मातापितृचरणकमलाभ्यां नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः । निर्विघ्नमस्तु ॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः । धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते । शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये । अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः । तदेव लग्नं सुदिनं तदेव तारावलं चन्द्रवलं तदेव । विद्यावलं दैववलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि । लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः । यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्द्दनाः । विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥ "सङ्कल्पः"— विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य ब्रह्मणः द्वितीये परार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे भारतखण्डे जम्बुद्वीपे रामक्षेत्रे परशुरामाश्रमे दण्डकारण्यदेशे श्रीगोदावर्याः पश्चिमदिग्भागे श्रीमल्लवणाब्धेरुत्तरे तीरे [अयं सङ्कल्पः देशविशेषेण ग्राह्यः] श्रीशालिवाहनशाके बौद्धावतारे अस्मिन्वर्त्तमाने अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकवासरे अमुकतिथौ अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं [मम ऐश्वर्याभिवृद्ध्यर्थं । अप्राप्तलक्ष्मीप्राप्त्यर्थं । प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थं । सकलमनईप्सितकामनासंसिध्यर्थं । लोके वा सभायां राजद्वारे वा सर्वत्र यशोविजयलाभादिप्राप्त्यर्थं । इह जन्मनि जन्मान्तरे वा सकलदुरितोपशमनार्थं तथा मम सभार्यस्य सपुत्रस्य सबान्धवस्य अखिलकुटुम्बसहितस्य सपशोः समस्तभयव्याधिजरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्याभिवृद्ध्ययर्थं । तथा मम जन्मराशेराखिलकुटुम्बस्य वा जन्मराशेः सकाशाद्ये केचिद्विरुद्धचतुर्थाष्टमद्वादशस्थानस्थितक्रूरग्रहास्तैः सूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशद्वारा एकादशस्थानस्थितवच्छुभफलप्राप्त्यर्थं । पुत्रपौत्रादिसन्ततेरविच्छिन्नवृद्ध्यर्थं । आदित्यादिनवग्रहानुकूलतासिद्ध्यर्थं । तथा इन्द्रादिदशादिग्पालप्रसन्नतासिद्ध्यर्थं । आधिदैविकाधिभौतिकाध्यात्मिकत्रिविधतापोपशमनार्थं । धर्मार्थकाममोक्षफलावाप्त्यर्थं च] श्री अमुकपञ्चायतनदेवताप्रीत्यर्थं यथा ज्ञानेन यथामिलितोपचारद्रव्यैः पुरुषसूक्तेन ध्यानावाहनादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशोपचारैः पूजनमहं करिष्ये ॥ तत्रादौ षडङ्गन्यासपूर्वकं कलशादिपूजनं च करिष्ये । [ते षडङ्गन्यासाः (१०९) पृष्ठे द्रष्टव्याः] एवं षडङ्गन्यासान्कृत्वा "कलशपूजनं कुर्यात्"— (तत्रादौ कलशे जलं संपूर्य तत्र देवता आवाहयेत्) सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु देवपूजार्थं दुरितक्षयकारकाः। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः । कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ इत्यावाह्य ततो वरुणमावाहयेत्—ॐ तत्त्वांयामि ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानो हविर्भिः । अहेडमानो व्वरुणेहवोध्युरुशꣳ समा नऽआयुः प्रमोषीः । ४$\frac{४२}{१८}$ ॥ अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि (इत्यावाह्य कलशं प्रार्थयेत्) देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयम् । त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । त्वयि स्तिष्ठान्ति सर्वेपि यतः कामफलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव । सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा । प्रसन्नो भव । वरदो भव । कलशदेवताभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि । नमस्करोमि । पश्चाद्धेनुमुद्रां प्रदर्श्य । अनन्तरं कलशोदकेन पूजाद्रव्याणि तथा आत्मानं च "आपोहिष्ठा०" इत्यनेन "अपवित्रः पवित्रो वा०" इत्यनेन वा संप्रोक्ष्य ॥ "शङ्खपूजनम्"— [शङ्खे जलपूरणानन्तरं ब्रूयात्] शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता। पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती। त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया । शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत् । त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते । पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शङ्खः प्रचोदयात् । ॐ अ॒ग्निर्ऋषि॑ः॒ पव॑मान॒ः पाञ्च॑जन्यः पु॒रोहि॑तः । तमी॑महे महाग॒यम् । ९।२६ ॥ शङ्खदेवतायै नमः आ० स० ग० पु० न० । शङ्खमुद्रां प्रदर्श्य ॥ "घण्टापूजनम्"—आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् । घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् । ॐ सु॒प॒र्णो॑ऽसि ग॒रुत्माँ॑स्त्रि॒वृत्ते॒ शिरो॑ गाय॒त्रञ्चक्षु॑र्बृहद्रथन्त॒रे प॒क्षौ । स्तोम॑ऽआ॒त्मा छन्दा॑ᳬस्यङ्गा॑नि॒ यजू॑ᳬषि॒ नाम॑ । साम॑ ते त॒नूर्वा॑मदे॒व्यं य॑ज्ञाय॒ज्ञियं॒ पुच्छं॒ धिष्ण्या॑ः श॒फाः॑ । सु॒प॒र्णो॑ऽसि ग॒रुत्मा॒न्दिवं॑ गच्छ॒ स्वः॑ पत । ८।१२ ॥ घण्टास्थाय गरुडाय नमः आवाहयामि। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि घण्टामुद्रां प्रदर्श्य ॥ "दीपपूजनम्"—भक्त्या दीपं प्रयच्छामि देवाय परमात्मने । त्राहि मां निरयाद्घोराद्दीपज्योतिर्नमोऽस्तु ते । ॐ अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहा॒ सूर्यो॒ ज्योति॒र्ज्योति॒ः सूर्य॒ः स्वाहा॑ । अ॒ग्निर्वर्चो॒ ज्योति॒र्वर्च॒ः स्वाहा॒ सूर्यो॒ वर्चो॒ ज्योति॒र्वर्च॒ः स्वाहा॑ । ज्योति॒ः सूर्य॒ः सूर्यो॒ ज्योति॒ः स्वाहा॑ । ३।९ ॥ दीपस्थदेवतायै नमः आ० स० ग० पु० न० ॥ ["पञ्चायतनध्यानम्"—तत्रादौ "गणपतिध्यानम्"—श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम् । दोर्भिः पाशाङ्कुशाब्जाभयवरमनसं चन्द्रमौलिं त्रिनेत्रं ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ ॐ नमो॑ ग॒णेभ्यो॑ । ग॒णप॑तिभ्यश्च वो॒ नमो॒ नमो॒ व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒ नमो॒ गृत्से॑भ्यो॒ गृत्स॑पतिभ्यश्च वो॒ नमो॒ नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒ नमः॒ सेना॑भ्यः । १६।२५ ॥ "देवीध्यानम्"—नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ ॐ मन॑सः॒ काम॒माकू॑तिं वा॒चः स॒त्यम॑शीय । प॒शू॒नाᳬ रू॒पमन्न॑स्य॒ रसो॒ यश॒ः श्रीः श्र॑यतां॒ मयि॒ स्वाहा॑ । ३९।४ ॥ विष्णुध्यानम्"—शान्ताकारं भुजगशयनं पद्मना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

‘भं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् । लक्ष्मीकान्तं क-’
‘मलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैक-’
‘नाथम् ॥ ॐ व्विष्णोर्रराटमसि व्विष्णोःश्नप्त्रे स्त्थोव्विष्णोः’
‘स्यूरसि व्विष्णोर्ध्रुवोसि । व्वैष्णवमसि व्विष्णवेत्वा । १०$\frac{२१}{५}$ ॥’
‘ “शिवध्यानम्”—ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्राव-’
‘तंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं’
‘समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिल-’
‘भयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ ॐ नमस्तेरुद्र मन्न्यवऽउतो तऽइषे-’
‘वेनमः ब्बाहुब्भ्यामुतते नमः । ११$\frac{१}{१६}$ ॥ “सूर्यध्यानम्”—ध्येयः’
‘सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । के-’
‘यूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥’
‘ॐ सूर्य्यरश्मिर्हरिकेशःपुरस्तात्सविताज्योतिरुदयाँ२ अज-’
‘स्रम् । तस्यपूषाप्प्रसवेयातिव्विद्वान्सम्पश्यन्व्विश्श्वाभुवना-’
‘निगोपाः । १२$\frac{५८}{१७}$ ॥ इदं ध्यानं कृताकृतमस्ति ॥]’ [“पञ्चा-’
‘यतनदेवताऽवाहनम्.”“तत्रगणपतेरा०”—आवाहयेत्तं गणराज-’
‘देवं रक्तोत्पलाभासमशेषवन्द्यम् । विघ्नान्तकं विघ्नहरं गणेशं भजामि’
‘रौद्रं सहितं च सिद्ध्या । ॐ गणानान्त्वा गणपतिꣳ हवामहे प्प्रि’
‘याणान्त्वा प्प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे’
‘व्वसोमम । आहमजानि गब्र्भधमात्त्वमजासिगब्र्भधम् ।२३$\frac{१९}{२३}$॥’
‘ “देव्या आ०”—श्यामाङ्गीं शशिशेखरां निजकरैर्दानं च’
‘ रक्तोत्पलं रत्नाढ्यं कलशं परं भयहरं संबिभ्रतीं शाश्वतीम् । मु-’
‘क्ताहारलसत्पयोधरनतां नेत्रत्रयोल्लासिनीमावाहेत्सुरपूजितां हरवधूं’
‘रक्तारविन्दस्थिताम् । * ॐ अम्बेऽअम्बिकेम्बालिके नमानय-’
‘ति कश्श्चन । ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ।’
‘ १४$\frac{१८}{२३}$ ॥ “ विष्णोरावाहनम् ”— आवाहयेत्तं गरुडोपरि’
‘ स्थितं रमार्द्धदेहं सुरराजवन्दितम् । कंसान्तकं चक्रगदाब्जहस्तं’

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'भजामि देवं वसुदेवसूनुम् । ॐ इदं विष्णुर्विचक्रमे त्रेधा-' 'निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा । १९$\frac{१५}{५}$ ॥ "शिव-' 'स्यावा०"—एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभा-' 'धिरूढ । देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ।' 'ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्क-' 'राय च नमः शिवाय च शिवतराय च । १६$\frac{४१}{१६}$ ॥ "सूर्यावा०"—' 'आवाहयेत्तं द्विभुजं दिनेशं सप्ताश्ववाहं द्युमणिं ग्रहेशम् । सिन्दूर-' 'वर्णप्रतिमावभासं भजामि सूर्यं कुलवृद्धिहेतोः । ॐ आकृष्णेन' 'रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता-' 'रथेना देवो याति भुवनानि पश्यन् । १७$\frac{४२}{३३}$ ॥ ॐ भूर्भुवः स्वः' 'श्री अमुकपञ्चायतनदेवताभ्यो नमः आवाहनं समर्पयामि॥ (प-' 'ञ्चायतनदेवतानां पृथक् आवाहनं यद्यपि नास्ति तथापि आवाहनम-' न्त्रान्पठित्वा पुष्पं तुलसीपत्राक्षतादिकं वा समर्पयेत्) "आवा-हनम्"—आगच्छ भगवन्देव स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव । ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् । १८$\frac{१}{३१}$ ॥ ॐ भूर्भुवः स्वः अ० प० दे० आवाहयामि ॥ "आसनम्"—रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर । ॐ पुरुषएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति । १९$\frac{२}{३१}$ ॥ ॐ भूर्भु० ॥ "पाद्यम्"—उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् । ॐ एतावानस्य महिमातो ज्यायाꣳश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि । । २०$\frac{३}{३१}$ ॥ ॐ भू० ॥ "अर्घ्यम्"—अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह । करुणाकर मे देव गृहाणार्घ्यं नमोऽस्तु ते । ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः । ततो विष्वङ्व्यक्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्साशनानशने ऽअभि । ११$\frac{४}{३१}$ ॥ ॐ भू० ॥ "आचमनम्"—
सर्वतीर्थसमायुक्तं सुगान्धि निर्मलं जलम् । आचम्यतां मया दत्तं गृ-
हीत्वा परमेश्वर । ॐ ततोव्विराडजायतव्विराजोऽअधिपूरुषः ।
सजातोऽअत्यरिच्यत पश्चाद्भूमिमथोपुरः । २२$\frac{५}{३१}$ ॥ ॐ भू०॥
"स्नानम्"— गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः । स्नापितोऽसि
मया देव तथा शान्ति कुरुष्व मे । ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृ-
तम्पृषदाज्ज्यम् । पशूँस्ताँश्चक्रे व्वायव्व्यानारण्याग्ग्राम्याश्श्चये
। २३$\frac{६}{३१}$ ॥ ॐ भू० ॥ "पञ्चामृतस्नानम्"—(एकमन्त्रेण पञ्चा-
'मृतस्नानम्) पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं म-'
'यानीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ पञ्चनद्यः सरस्वती मपियं-'
'न्ति सस्रोतसः । सरस्वतीतु पञ्चधासो देशेभवत्सरित् ।'
'। २४$\frac{११}{३४}$ ॥ ॐ भू० ॥ "पृथक् द्रव्येण पञ्चामृतस्नानम्"—'
"तत्र पयःस्नानम्"— कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ।'
'पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐ पयः पृथिव्व्याम्प-'
'यऽओषधीषु पयोदिव्व्यन्तरिक्षे पयोधाः । पयस्वतीः प्प्रदि-'
'शः सन्तुमह्यम् । २५$\frac{३६}{१८}$ ॥ "दधिस्नानम्"—पयसस्तु समुद्भूतं'
'मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ।'
'ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्श्वस्य व्वाजिनः । सुर-'
'भिनो मुखाकरत्प्रणऽआयूंषि तारिषत् । २६$\frac{३२}{२३}$ ॥ "घृत-'
'स्नानम्"—नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं प्र-'
'दास्यामि स्नानार्थं प्रतिगृह्यताम् । ॐ घृतम्मिमिक्षे घृतमस्ययो-'
'निर्घृते श्रितोघृतम्वस्यधाम । अनुष्ष्वधमावह मादयस्व-'
'स्वाहाकृतं व्वृषभव्वक्षिहव्व्यम् । २७$\frac{८९}{१७}$ ॥ "मधुस्नानम्"—'
'तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजःपुष्टिकरं दिव्यं स्नानार्थं
'प्रतिगृह्यताम् । ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः।'
'माद्ध्वीर्न्नः सन्त्वोषधीः । २८$\frac{२७}{१३}$ ॥ ॐ मधुनक्तमुतोषसो म-'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'धुमत्पार्थिव॒ᳪरज॑÷ । मधुद्यौरस्तुनःपिता । २९$\frac{२८}{१३}$ ॥ ॐ
'मधु॑मान्नो॒व्वन॒स्प्पति॒र्म्मधु॑माँ२ ऽअस्तु॒सूर्य्य॑÷ । माध्वी॒र्गावो॑
'भवन्तुनः । ३०$\frac{२९}{१३}$ ॥ "शर्करास्नानम्"—इक्षुसारसमुद्भूता
'शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्य-
'ताम् । ॐ अपाᳪरस॒मुद्व॑यस॒ᳪ सूर्य्ये॒ सन्त॒ᳪ स॒माहि॑तम् । अ॒-
'पाᳪरस॑स्य॒यो रस॒स्तं॑व्वोगृह्णाम्म्युत्त॒मम्मु॑पया॒मगृ॑हीतो॒सीन्द्रा॑य-
'त्वा जुष्ट॑ङ्गृह्णाम्म्ये॒षते॒ योनि॒रिन्द्रा॑य त्वा॒जुष्ट॑तमम् ॥३१$\frac{३}{६}$ ॥ ॐ,
'भूर्भुवःस्वः श्री अमुकपञ्चायतनदेवताभ्यो नमः पञ्चामृतस्नानं
'समर्पयामि ॥ "षष्ठेन गन्धोदकस्नानम्" मलयाचलसंभूतं च-
'न्दनागरुसंभवम् । चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यतां ॥ गन्ध-
'द्वारां दु॑राध॒र्षां नि॒त्यपु॑ष्टां करी॒षिणी॑म् ॥ ईश्वरीं॑ सर्व॑ भूताना॒ं
'तामि॒होप॑ह्वये॒ श्रियम् ॥ ॐ भूर्भुवःस्वः । श्री अमु० षष्ठेन
'गन्धोदकस्नानं समर्पयामि ॥ "उद्वर्त्तनस्नानम्"—नानासु-
'गन्धिद्रव्यं च चन्दनं रजनीयुतम् । उद्वर्तनं मया दत्तं स्नानार्थं
'प्रतिगृह्यताम् । * * * । ॐ ग॒न्धस्ते॒सोम॑मवतु मदा॑य॒ रसो॒-
'ऽअच्युतः । ३२$\frac{२७}{२०}$ ॥ ॐ भू० । श्री अमु० उद्वर्तनस्नानं
'समर्पयामि ॥ उद्वर्तनस्नानान्ते श्री अमुकपञ्चायतनदेवताभ्यो
'नमः शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आच-
'मनं समर्पयामि सकलपूजापरिपूरणार्थे गन्धाक्षतपुष्पाणि
'समर्पयामीति संक्षिप्तां पूजां कुर्यात् । [अभिषेकार्थे निर्माल्यं
'विसृज्य ॥ पश्चात् स्नापनधारापात्राय गन्धाक्षतपुष्पं समर्प्य । त-
'दनन्तरमभिषेकार्थे देवानां गन्धाक्षतपुष्पाणि समर्पयेत् शालिग्रामोप-
'रि आसनार्थे पूजार्थे च तुलसीदलं समर्प्य शम्भोरासनार्थे पूजार्थे
'च बिल्वपत्रं समर्पयेत् "] अभिषेकः—हरिःॐ—ॐ स॒हस्र॑शी-
'र्षा० ।३३$\frac{१}{३१}$॥ पुरु॑ष ए॒० । ३४$\frac{१}{३२}$॥ ए॒तावा॑न० ।३५$\frac{३}{३१}$॥त्रिपा-'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

' दुर्व्वे० । ३६ ४/३१ ॥ ततोव्विराडे० । ३७ ५/३१ तस्माद्य० । ३८ ६/३१ '
' तस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरे । छन्दाᳪसिज- '
' ज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत । ३९ ७/३१ तस्म्मादश्वाऽ '
' अजायन्त येकेचोभयादतः । गावोहजज्ञिरे तस्म्मात्तस्म्मा- '
' ज्जाताऽअजा वयः । ४० ८/३१ ॥ तंय्यज्ञम्बर्हिषि प्प्रौक्षन्न्पु- '
' रुषञ्जातमग्ग्रतः । तेनदेवाऽअयजन्त साद्ध्याऽऋषयश्चये । '
' । ४१ ९/३१ ॥ यत्पुरुषंव्व्यदधुः कतिधा व्व्यकल्प्पयन् । मुखङ्कि '
' मस्स्यासीत्किम्बाहू किमूरूपादाऽउच्येते । ४२ १०/३१ ॥ ब्राह्म- '
' णोस्स्यमुखमासीद्बाहू राजन्यः कृतः । ऊरूतदस्स्ययद्वैश्यः '
' पद्भ्याᳪशूद्द्रोऽअजायत । ४३ ११/३१ ॥ चन्द्रमामनसो जातश्च- '
' क्षोःसूर्य्योऽअजायत । श्रोत्राद्वायुश्च प्प्राणश्चमुखादग्निरजा- '
' यत । ४४ १२/३१ ॥ नाब्भ्याऽआसीदन्तरिक्षᳪशीर्ष्णोद्यौःसमव- '
' र्त्तत । पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ अकल्पयन् । '
' ४५ १३/३१ ॥ यत्पुरुषेणहविषा देवायज्ञमतन्न्वत । व्वसन्तोऽस्या- '
' सीदाज्ज्यङ्ग्रीष्म्मऽइध्मःशरद्धविः । ४६ १४/३१ ॥ सप्प्तास्स्यास- '
' न्नपरिधयस्त्रिःसप्प्तसमिधःकृताः । देवायद्यज्ञन्तन्न्वानाअ- '
' बध्नन्न्पुरुषम्पशुम् । ४७ १५/३१ ॥ यज्ञेनयज्ञमयजन्त देवास्तानिध- '
' र्म्माणि प्प्रथमान्न्यासन् । तेहनाकम्महिमानःसचन्त यत्रपू- '
' र्व्वेसाद्ध्याःसन्तिदेवाः । ४८ १६/३१ ॥ ॐ द्यौःशान्तिरन्तरि- '
' क्षᳪ शान्तिःपृथिवी शान्तिरापःशान्तिरोषधयःशान्तिः व्व '
' नस्प्पतयःशान्तिर्व्विश्वेदेवाः । शान्तिर्ब्ब्रह्मशान्तिःसर्व्वᳪ '
' शान्तिःशान्ति रेवशान्तिःसामा शान्तिरेधि । ४९ १७/३६ ॥ यतो- '
' यतःसमीहसे ततोनोऽअभयङ्कुरु । शन्नःकुरुप्प्रजाभ्यो भय- '
' न्नःपशुब्भ्यः । ५० २२/३६ ॥ ॐ सर्वेषां वाऽ एषवेदाना '
' ᳪ रसो यत्साम सर्व्वेषामेवैनमे तद्वेदानाᳪ रसे- '
' नाभिषिञ्चति । ५१ (ब्राह्मणमन्त्रः) ॥ पुनश्च " द्यौः शा- '

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'न्तिः०" तथा "सर्व्वेषां०" इति मन्त्राभ्यां शङ्खपूरितोदकेन' 'शालिग्रामं स्नापयेत् । पश्चात् देवतीर्थं धृत्वा ।] ॐ शान्तिः' 'शान्तिः सुशान्तिर्भवतु । सर्वारिष्टशान्तिर्भवतु । ॐ अमृ-' 'ताभिषेकोस्तु ॥" ॐ भूर्भवः स्वः श्री अमुकपञ्चायतनदेव-' 'ताभ्यो नमः अभिषेकं समर्पयामि । अभिषेकान्ते ॐ केश-' 'वाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माध-' 'वाय नमः स्वाहा—इत्याचमनं समर्पयेत् । (पश्चाद्देवान्वस्त्रेण' 'प्रमृज्य । तदनन्तरं देवान् गन्धानुलेपनपूर्वकं स्वस्वस्थाने स्थाप-' 'यित्वा । शालिग्रामस्यासनार्थं तुलसीदलं शिवस्य विल्वपत्रं च' 'दद्यात् ॥) "वस्त्रम्"— सर्वभूषादिके सौम्ये लोकलज्जानिवा-' रणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् । ॐ तस्म्माद्य-ज्ञात्सर्व्वहुतऽऋचःसा० । $५२\frac{०}{३१}$ ॥ ॐ भू० श्री अ० प० दे० नमः वस्त्रं समर्पयामि ॥ "यज्ञोपवीतम्"— नवभिस्तन्तु-भिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं चोत्तरीयं गृहाण परमेश्वर । ॐ तस्मादश्वाऽअ० । $५३\frac{८}{३१}$ ॥ ॐ भू० श्री अ० प० दे० नमः यज्ञोपवीतं समर्पयामि ॥ "गन्धम्"— श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् । ॐ तंयज्ञम्ब० । $५४\frac{९}{३१}$ ॥ ॐ भू० श्री अ० 'प० दे० नमः गन्धं समर्पयामि ॥ ["अक्षताः"—अक्षताश्च सु-' 'रश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण' 'परमेश्वर । ॐ अक्षन्नमीमदन्तह्यवप्प्रिया ऽअधूषत । अस्तोष-' 'तस्वभानवो व्विप्प्रानविष्ठया मतीयोजान्विन्द्रते हरी । ५५' '$\frac{५१}{३}$ ॥ ॐ भू० श्री अ० प० दे० नमः अक्षतान्समर्पयामि] ॥' "पुष्पाणि"— माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयानीतानि पुष्पाणि गृहाण परमेश्वर । ॐ सत्पुरुषं० ॥ ५६ ॥ $\frac{१०}{३१}$ ॥ ॐ भू० श्री अ० प० दे० नमः पुष्पाणि समर्पया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'मि ॥ ["गणेशाय दूर्वाङ्कुरार्पणम्"– विष्ण्वादिसर्वदेवानां'
'दूर्वे त्वं प्रीतिदा सदा । क्षीरसागरसंभूते वंशवृद्धिकरी भव ॥'
'ॐ काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि । एवानो-'
'दूर्वे प्प्रतनुसहस्रेण शतेनच । ५७२०/१३ ॥ "सूर्याय पुष्पार्प-'
'णम्"– भानो दिवाकरादित्य मार्त्तण्ड जगतां पते । अपांनिधे'
'जगद्रक्ष भूतभावन भास्कर । प्रणतार्त्तिहरादित्य विश्वचिन्तामणे'
'विभो । विष्णो हंसादिभूतेश पुष्पाणि प्रतिगृह्यताम् । ॐ सवि-'
'तात्वा सवानाꣳ सुवतामग्निर्ग्गृहपतीनाꣳ सोमो व्वनस्पती-'
'नाम् । बृहस्पतिर्व्वाचऽइन्द्रोज्यैष्ठ्याय रुद्रः पशुब्भ्यो मित्रः'
'सत्योव्वरुणो धर्मपतीनाम् । ५८३९/९ ॥ "देव्यै पुष्पार्पणम्"'
'शेवन्तिकाबकुलचम्पकपाटलाब्जैः पुन्नागजातिकरवीररसालपुष्पैः ।'
'विल्वप्रवालतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वरि मे प्र-'
'सीद । ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे पाश्र्वे नक्षत्राणि'
'रूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्व्व-'
'लोकम्मऽइषाण । ५९२२/३१ ॥ "शङ्कराय विल्वपत्रार्पणम्"–'
'त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् । त्रिजन्मपापसंहारमेक-'
'बिल्वं शिवार्पणम् । ॐ शिवोभवप्प्रजाब्भ्यो मानुषीब्भ्यस्त्व-'
'मङ्गिरः । मायावापृथिवीऽअभिशोचीर्मान्तरिक्षंमा व्वनस्प-'
'तीन् । ६०४५/११ ॥ "विष्णवे तुलसीदलार्पणम्"—तुलसीं हे-'
'मरूपां च रत्नरूपां च मञ्जरीम् । भवमोक्षप्रदां तुभ्यमर्पयामि'
'हरिप्रियाम् । व्विष्णोःकर्म्माणि पश्यत यतोव्व्रतानि पस्पशे ।'
'इन्द्रस्य युज्ज्यःसखा । ६१३३/१३ ॥ "सौभाग्यद्रव्यम्"–हरिद्रां'
'कुङ्कुमं चैव सिन्दूरादिसमन्वितम् । सौभाग्यद्रव्यसंयुक्तं गृहाण प-'
'रमेश्वरि । ॐ अहिरिव भोगैःपर्य्येतिबाहुञ्ज्याया हेतिम्परि-'
'बाधमानः । हस्तघ्नो व्विश्वाव्वयुनानि व्विद्वान्पुमान्पु-'
'मांꣳसम्परि पातुव्विश्वतः । ६२५१/२९ ॥ ॐ भू० श्री अ० प०'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'दे० नमः सौभाग्यद्रव्याणि समर्पयामि]' ॥ "धूपम्"—वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् । ॐ ब्राह्मणो॰ । ६३ ११/३१ ॥ ॐ भू० श्री अ० प० दे० नमः धूपं समर्पयामि ॥ "घृतपूरितनीराजनदीपम्"—आज्यं च वर्त्तिसंयुक्तं वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापह । ॐ चन्द्रमामनसो० । ६४ १२/३१ ॥ ॐ भू० श्री अ० प० दे० नमः घृतपूरितनीराजनदीपं समर्पयामि ॥ "नैवेद्यम्"—शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् । ॐ नाभ्याऽआ० । ६५ १३/३१ ॥ ॐ भू० श्री अ० प० दे० नमः नैवेद्यं समर्पयामि । (नित्यशः पूजासमये शर्कराखण्डखाद्यादि नैवेद्यं समर्पयेत् तद्विधिः (१२४) पृष्ठे द्रष्टव्यः । नैवेद्यार्पणकालः वैश्वदेवप्रयोगे द्रष्टव्यः) ॥ नैवेद्यमध्ये पानीयं उत्तरापोशानं हस्तप्रक्षालनं मुखप्रक्षालनं आचमनीयं च समर्पयामि करोद्वर्त्तनार्थे चन्दनं समर्पयामि । "मुखवासार्थे ताम्बूलम्"—पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसंयुक्तं' ताम्बूलं प्रतिगृह्यताम् । ॐ यत्पुरुषेण० । ६६ १४/३१ ॥ ॐ भू० श्री अ० प० दे० नमः ताम्बूलं समर्पयामि ॥ (अनेनैव मन्त्रेण फलं दक्षिणां चार्पयेदिति गर्भितार्थः ॥) '["फलम्"—इदं फलं
'मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि'
'जन्मनि । ॐ याऽफलिनीर्य्याऽअफलाऽअपुष्पा याश्चपु-'
'ष्पिणीः । बृहस्प्पति प्प्रसूतास्तानो मुञ्चन्त्वᳪहसः । ६७ ८९/१२॥
'ॐ भू० श्री अ० प० दे० नमः फलं समर्पयामि ॥ "द-'
'क्षिणा"—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्य-'
'फलदमतः शान्ति प्रयच्छ मे । ॐ हिरण्यगर्भःसमवर्त्तताग्ग्रे'
'भूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्क-'
'स्म्मै देवायहविषाविधेम । ६८ ४/१३ ॥ ॐ भू० श्री अ० प०'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'दे० नमः दक्षिणां समर्पयामि ॥ "कर्पूरारार्त्तिक्यम्"—कदली-'
'गर्भसंभूतं कर्पूरं च प्रदीपितम् । आरार्त्तिक्यमहं कुर्वे पश्य मे व-'
'रदो भव । ॐ इद९ हविः प्रजननम्मेऽअस्तु दशवीर९ सर्व्वग-'
'ण९ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभय-'
'सनि अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतोऽअस्मासु-'
'धत्त । ६९$\frac{४८}{१८}$ ॥ ॐ भू० श्री अ० प० दे० नमः कर्पूरारा-'
र्त्तिक्यं दर्शयामि ॥]" "प्रदक्षिणा"—यानि कानि च पापानि जन्मान्तरकृतानि वै । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे । ॐ सप्तास्या० । ७०$\frac{१५}{३१}$ ॥ ॐ भू० श्री अ० प० दे० नमः प्रदक्षिणां समर्पयामि ॥ "मन्त्रपुष्पम्"—नानासुगन्धपुष्पाणि यथाकालोद्भवानि च । पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर । ॐ यज्ञेनयज्ञ० । ७१$\frac{१६}{३१}$ ॥ (अनेनैव मन्त्रेण नमस्कारमर्पयेदिति गर्भितार्थः) । ॐ भू० श्री अ० प० दे० नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ॥ मन्त्रपुष्पाञ्जल्यर्पणसमये गृहवास्तुपुरुषदेवतायै पूजार्थं गन्धाक्षतपुष्पाणि समर्प्य नमस्कुर्यात् ॥ "पार्षदपूजा"—विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः । महाविष्णुप्रसादेन सर्वे गृण्हन्तु वैष्णवाः ॥ वाणरावणचंण्डीशनन्दिभृङ्गिरटादयः । सदाशिवप्रसादेन सर्वे गृण्हन्तु शाम्भवाः । इति पार्षदपूजां कृत्वा । ["विशेषा-
'र्घ्यः"—रक्ष रक्ष महादेव रक्ष त्रैलोक्यरक्षक । भक्तानामभयं'
'कर्ता त्राता भव भवार्णवात् । वरद त्वं वरं देहि वाञ्छितं वा-'
'ञ्छितार्थद । (एतेन मन्त्रेण पूगीफलहिरण्यगन्धाक्षतपुष्पैः संयुक्त-'
'जलेन अर्घ्यमेकं दद्यात् ।) अनेन सफलार्घ्येण फलदोऽस्तु सदा'
'मम ॥ ॐ भू० श्री अ० प० दे० नमः विशेषार्घ्यं समर्पयामि ॥'
'"प्रार्थना"—विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सक-'
'लाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय'
'गणनाथ नमो नमस्ते ॥ १ ॥ भूत्यालेपनभूषितः प्रविलसन्नेत्राग्नि-'
'दीपाङ्कुरः कण्ठे पन्नगपुष्पदामसुभगो गङ्गाजलैः पूरितः । ईषत्ता-'
'म्रजटाग्रपल्लवयुतो न्यस्तो जगन्मण्डपे शम्भुर्मङ्गलकुम्भतामुपगतो'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'भूयात्सतां श्रेयसे ॥ २ ॥ पुरारितनुभागिनी दुरितसङ्घसंहारिणी'
'भजन्मतिविवर्धिनी प्रबलदानवोन्मर्दिनी । तुषारगिरिनन्दिनी मु-'
'निहृदन्तरालम्बिनी सदैव शुभवर्द्धिनी हरनितम्बिनी पातु वः ॥३॥'
'कचकुचचुबुकाग्रे पाणिषु व्यापृतेषु प्रथमजलधिपुत्रीसङ्गमेऽनङ्गधा-'
'म्नि । ग्रथितनिबिडनीवीबन्धनिर्मोक्षणार्थं चतुरधिककराशः पातु'
'वश्चक्रपाणिः । ४ ॥ यद्बिम्बमम्बरमणिर्यदपां प्रसूतिर्नक्तं निषि-'
'ञ्चति यदग्निशिखासु भासः । ज्योत्स्ना निशासु हिमधाम्नि च यन्म-'
'यूखाः पूषा पुराणपुरुषः स नमोऽस्तु तस्मै । ५ ॥ ॐ भू० श्री'
'अ० प० दे० नमः प्रार्थनां समर्पयामि ॥ (इयं प्रार्थना कृताकृता-'
'स्ति) ॥ "क्षमापनम्"— आवाहनं न जानामि न जानामि त-'
'वाऽर्चनम् । पूजां चैव न जानामि क्षमस्व परमेश्वर । अन्यथा'
'शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष रक्ष'
'परमेश्वर । गतं पापं गतं दुःखं गतं दारिद्र्यमेव च । आगता सुख-'
'सम्पत्तिः पुण्याच्च तव दर्शनात् । मन्त्रहीनं क्रियाहीनं भक्तिहीनं'
'सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे । यदक्षरपदभ्रष्टं'
'मात्रा हीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥]'

"अर्पणम्"— अनेनावाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणामन्त्रपुष्परूपैः षोडशोपचारैः अन्योपचारैश्च यथा ज्ञानेन यथा मिलितोपचारद्रव्यैः कृतेन पूजनाख्यकर्मणा श्री अमुकपञ्चायतनदेवताः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ यस्य स्मृ० ॥ ॐ विष्णवे नमः ॥ पञ्चायतनदेवतानां विसर्जनं नास्ति ॥ "शङ्खभ्रामणम्"— शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि । अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ इत्युक्त्वा शङ्खं देवोपरि भ्रामयन् तस्योदकेन स्वशरीरं मार्जयेत् ॥ इति देवपूजाप्रयोगः ॥

२४४. "पञ्चायतनार्त्तिः"—करुणापारावारं कलिमलपरिहारं । कद्रूसुतशयितारं करधृतकल्हारम् । घनपटलाभशरीरं कमलोद्भवपितरं। कलये ।विष्णुमुदारं कमलाभर्त्तारम् ॥ जयदेव जयदेव जय केशव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हर गजमुख सवितर्नगतनयेऽहं चरणौ तव कलये जयदेव जयदेव ।१॥ भूधरजारतिलीलं मङ्गलकरशीलं भुजगेशस्मृतिलोलं भुजगावलिमालम् । भूषाऽकृतिमतिविमलं संधृतगाङ्गजलं भूयो नौमि कृपालं भूतेश्वरमतुलम् ॥ जयदेव० । २ ॥ विघ्नारण्यहुताशं विहिताऽनयनाशं विपद्वनीधरकुलिशं विधृताङ्कुशपाशम् । विजयार्कज्वलिताशं विदलितभवपाशं विनताः स्मो वयमनिशं **विद्याविभवेशम्** ॥ जयदेव० ।३ ॥ कश्यपसूनुमुदारं कालिन्दीपितरं कालत्रितयविहारं कामुकमन्दारम् । कारुण्याब्धिमपारं कालानलमदरं कारणतत्त्वविचारं **कामय ऊष्मकरम्** जयदेव० । ४ ॥ निगमैर्नुतपदकमले निहतासुरजाले हस्ते धृतकरवाले निर्जरजनपाले । नितरां कृष्णकृपाले निरवधिगुणलीले निर्जरनुतपदकमले **नित्योत्सवशीले** ॥ जयदे० ।५॥ इति पञ्चायतनार्तिः॥

२४५. "**देव्या आर्त्तिः**"— प्रवरातीरनिवासिनि निगमप्रतिपाद्ये । पारावारविहारिणि नारायणि हृद्ये । प्रपञ्चसारे जगदाधारे श्रीविद्ये । प्रपन्नपालननिरते मुनिवृन्दाराध्ये ॥ जय देवी जय देवी जय मोहिनिरूपे मामिह जननि समुद्धर पतितं भवकूपे । १ ॥ दिव्यसुधाकरवदने कुन्दोज्वलरदने पदनखनिर्जितमदने मधुकैटभकदने । विकासितपङ्कजनयने पन्नगपतिशयने खगपतिवहने गहने सङ्कटवनदहने ॥ जय देवी० । २ ॥ मञ्जीराङ्कितचरणे मणिमुक्ताभरणे कञ्चुकिवस्त्रावरणे वक्राम्बुजधरणे । शक्रामयभयहरणे भूसुरसुखकरणे करुणां कुरु मे शरणे गजनक्रोद्धरणे ॥ जय देवी० । ३ ॥ छित्त्वा राहुग्रीवां पासि त्वं विबुधान् ददासि मृत्युमनिष्टं पीयूषं विबुधाम् । विहरसि दानवऋद्धां समरे संसिद्धां मध्वमुनीश्वरवरदे पालय संसिद्धाम्॥ जय देवी० । ४ ॥ इति देव्या आर्तिः ॥

२४६. "मन्त्रपुष्पाञ्जलिमन्त्राः"— **हरिः ॐ [ॐ गणानांत्वा० । १$\frac{१२}{२३}$ ॥ ॐ श्रीश्चंतेलक्ष्मी० । २$\frac{२२}{३१}$ ॥ * ॐ अम्बेऽअम्बिके० । ३$\frac{१८}{२३}$ ॥] * । ॐ तन्तऽएतमनु जोषंम्भराम्म्येषनेत्वदंपचेतयांताऽअग्ग्नेः । प्प्रियम्पाथोपींतम् । ४$\frac{१७}{२}$ ॥ ॐ सㄹस्रवभांगास्त्थेषा बृहन्तं॑प्प्रस्तरेष्ठाःपंरिधेयांश्चदेवाः ।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

* । ५ १८/२ ॥ ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या व्वैश्वानरमृ-
तऽआजातमग्निम् । कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रं-
ञ्जनयन्तदेवाः । ६ ८/३३ ॥ ॐ प्रोह्यमाणꣳसोमऽआगतो व्वरुण-
ऽआसन्द्यामासन्नोग्निराग्नीध्रऽइन्द्रो हविर्द्धानेथर्व्वोपावह्रियमा-
णो व्विश्वेदेवाऽ । ७ ५६/८ ॥ ॐ व्विश्वेदेवाःऽअꣳशुषुन्न्युप्तो
व्विष्णुराप्प्रीतपाऽआप्प्याय्यमानो यमऽसूयमानो व्विष्णुः स-
म्भ्रियमाणो व्वायुऽपूयमानःशुक्रःपूतःशुक्रःक्षीरश्रीर्म्मन्थी सक्तु-
श्रीर्व्विश्वेदेवाऽ। ८ ५७/८॥ * । ॐ पितेवै धिसूनवऽआसुशेवा स्वा-
वेशातन्न्वा संव्विशस्वाश्विनाद्ध्वर्य्यू सादयत्वामिहत्वा । ९ ३/१४ ॥
ॐ पृथिव्व्याऽपुरीषमस्यप्प्सोनाम तान्त्वा व्विश्वेऽअभिगृणन्तु
देवाऽ । * १० ४/१४ ॥ ॐ षोडशीस्तोमऽओजो द्रविणञ्चतुश्च-
त्वारिꣳशस्तोमो व्वर्चोद्रविणम् । अग्नेऽपुरीषमस्यप्प्सोनाम ता-
न्त्वा व्विश्वेऽअभिगृणन्तुदेवाऽ । * ११ ३/१५ ॥ ॐ समिद्धेऽअ-
ग्नावधि मामहानऽउक्थपत्त्रऽईड्यो गृभीतऽ । तप्तङ्घर्म्मम्परिगृह्या-
यजन्तोर्ज्जायद्यज्ञमयजन्त देवाऽ । १२ ५५/१७ ॥ * । ॐ यस्येमाऽ-
प्प्रदिशो यस्यबाहूकस्मैदेवाय हविषाविधेम ॥ १३ १२/२५ ॥ ॐ
यऽआत्मदा बलदायस्य व्विश्वऽउपासते प्प्रशिषंय्यस्यदेवाऽ ।
* १४ १३/२५ ॥ * । ॐ अनागास्त्वन्नोऽअदितिऽकृणोतु क्षत्र-
न्नोऽअश्वो व्वनताꣳहविष्मान् । १५ ४५/२५ ॥] ॐ इमानुकम्भु-
वना सीषधामेन्द्रश्च व्विश्वेचदेवाऽ । * १६ ४६/२५ ॥ ॐ बृह-
स्प्पते सवितर्व्वोधयैनꣳसꣳशितञ्चित्सन्तराꣳसꣳशिशाधि ।
व्वर्द्धयैनम्महते सौभगाय व्विश्वऽएनमनुमदन्तु देवाऽ ।१७ ८/२७॥
ॐ प्रजापतेस्तपसा व्वावृधानꣳसद्योजातो दधिषेयज्ञमग्ने । स्वा-
हाकृतेन हविषापुरोगा याहिसाद्ध्याहविरदन्तुदेवाऽ । १८ ११/२९ ॥
ॐ सद्योजातोव्व्यमिमीत यज्ञमग्निर्द्देवानामभवत्पुरोगाः । अ-
स्यहोतुः प्प्रदिश्यृतस्य व्वाचिस्वाहाकृतꣳहविरदन्तुदेवाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९$\frac{३६}{२९}$ ॥ ॐ अस्म्मेरुद्द्रामेहना पर्व्वतासोव्वृत्रहत्त्ये भरहूतौस-जोषाः । यःशः सतेस्तुवते धायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँऽअ-वन्तुदेवाः । २०$\frac{५०}{३३}$ ॥ नहिस्पशमविदन्नन्न्यमस्म्माद्वैश्वानरा-त्पुरऽएतारमग्नेः । एमेनमव्वृधन्नमृताऽअमर्त्त्यं व्वैश्वानरङ्क्षेत्रजि-त्याय देवाः । २१$\frac{६०}{३३}$ ॥ (हस्ते पुष्पाणि गृहीत्वा उत्थाय) ॐ यज्ञेनयज्ञ० । २२$\frac{१६}{३१}$ ॥ ॐ राजाधिराजाय प्रसह्य सा-हिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यं । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महा-राजाय नमः । २३ ॥ ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौमः सार्व्वायुष आन्तादापरार्धात् । पृथिव्यै समुद्रपर्य-न्ताया एकराडिति । तदप्येष श्लोकोऽभिगीतो मरुतः परिवे-ष्टारो मरुत्तस्यावसन्गृहे । आविक्षितस्य कामप्रेर्व्विश्वे देवाः स-भासद इति । २४॥ ॐ व्विश्वतश्चक्षुः । २५$\frac{१९}{७}$ ॥ इति मन्त्रैः पुष्पाञ्जलिं समर्प्य ॥ " प्रदक्षिणा "— ॐ सप्तास्या० ।१$\frac{११}{३१}$॥ इति प्रदक्षिणां नमस्कारं च कृत्वा ब्राह्मणाशिषो गृण्हीयात् ॥

२४७. " आशीर्वादमन्त्राः "–हरिः ॐ पृथिव्व्याऽअहमुद-न्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् । दिवोनाकस्य पृष्ठात्स्वज्ज्यो-तिरगामहम् । १$\frac{६७}{१७}$ ॥ स्वर्य्यन्तो नापेक्षन्तऽआद्याः रोहन्ति रोदसी । यज्ञंय्ये व्विश्श्वतोधारः सुव्विद्वाः सो व्वितेनिरे।२$\frac{६८}{१७}$॥ अग्नेप्प्रेहिप्प्रथमो देवयताञ्चक्षुर्द्देवानामुत मर्त्त्यानाम् । इयक्षमाणा भृगुभिःसजोषाःस्वर्य्यन्तु यजमानाःस्वस्ति । ३$\frac{६९}{१७}$ ॥ बोधामेऽ-अस्य व्वचसोयविष्ठमः हिष्ठस्य प्प्रभृतस्यस्वधावः । पीयतित्वो-अनुत्वो गृणातिव्वन्दारुष्टे तन्न्वंव्वन्देऽअग्ने । ४$\frac{४२}{१२}$ ॥ सर्वौ-धिस्सुरिर्म्मघवा व्वसुपते व्वसुदावन् । युयोद्ध्यस्म्मद्द्वेषाः सि व्विश्श्वकर्म्मणेस्वाहा । ५$\frac{४३}{१२}$ ॥ पुनस्त्वाऽदित्या रुद्द्राव्वसवः स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिन्धताम्पुनर्ब्ब्रह्माणो व्वसुनीथयज्ञैः । घृतेनत्वन्तन्न्वं व्वर्द्धयस्व सत्याऽसन्तु यजमानस्यकामाः । ६$\frac{४४}{१२}$ ॥ स्वस्तिनऽइन्द्रो० । ७$\frac{१९}{२५}$ ॥ शतं भवति शतायुर्वै पुरुषः शतेन्द्रियऽआयुरेवेन्द्रियं वीर्य्यमात्मन्धत्ते । ब्राह्मणमन्त्रः ॥ स्वस्तिमन्त्रार्थाः सफलाः सन्तु। आराध्यदेवता सुप्रसन्ना वरदा भवतु । इच्छितमनकामनासंसिद्धिरस्तु ॥ यजमानो ब्रूयात्—तथास्तु ॥ इत्याशीर्वादमन्त्राः ॥

२४८. "मानसपूजा." वराहसंहितायां हयग्रीवः—आवाहनादिपुष्पान्ता विधयः कथिता बुधैः । ते सर्वे ध्यानवद्योज्याः पूजा सा मानसी मता ॥

२४९. "अथ मानसपूजास्तोत्रम्"— रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं नानारत्नविभूषितं मृगमदामोदान्वितं चन्दनम् । जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् । १ ॥ सौवर्णे मणिरत्नखण्डरचिते पात्रे घृतं पायसं भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानसम् । शाकानामयुतं जलं रुचिकरं सुस्निग्धशाल्योदनं ताम्बूलं मनसा मया विरचितं पूजां फलं स्वीकुरु । २ ॥ छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदङ्गकाहलकलागीतं च नृत्यं तथा । साष्टाङ्गप्रणतिः स्तुतिर्बहुविधा चैतत्समस्तं मया सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो । ३ ॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् । ४ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो।५॥ इति श्रीमच्छङ्कराचार्यविरचितं मानसपूजास्तोत्रं समाप्तम् ॥

इति श्रीपुरन्दरोपाह्वविठ्ठलात्मजनारायणेन विरचितायां वाजसनेयान्हिकसूत्रावल्यां द्वितीयभागकृत्यानि समाप्तानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ तृतीयभागकृत्यानि ॥

२५०. "योगक्षेमविधिः." (पोष्यवर्गसाधनम्) कारिका ॥ दक्षः— तृतीये च तथा भागे पोष्यवर्गार्थसाधनम् । पिता माता गुरुर्भार्या प्रजा दीनाः समाश्रिताः । ज्ञातिर्बन्धुजनः क्षीणस्तथाऽनाथः समाश्रितः । अन्येप्यधनयुक्ताश्च पोष्यवर्ग उदाहृतः ॥ मनुः— सत्यचित्तागताद्ध- र्भादायो लाभः क्रयो जयः । प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च॥ अन्यच्च—न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः । शास्त्रवित्सत्यवा- दी च गृहस्थोऽपि विमुच्यते ॥ तस्मात् सद्गृहस्थैर्न्यायागतधर्म्मार्जितेन स्वकष्टसंपादितद्रव्येण वा स्वकुटुम्बोदरभरणं कर्तव्यमिति ॥

२५१. "गृहस्थाश्रमप्रशंसा." वसिष्ठस्मृतौ—गृहस्थ एव यजते गृहस्थस्तप्यते तपः । चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्य- ते । यथा नद्यो नदाः सर्वे समुद्रे यान्ति संस्थितिम् । एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् । यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षुकाः ॥ नित्योदकी नित्ययज्ञोपवीती नित्यस्वाध्यायी पतितान्नवर्जी । ऋतौ गच्छन् विधि- वच्च जुह्वन् न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥ 'सुभाषिते'— सानन्दं सदनं सुताश्च सुधियः कान्ता मृदुर्भाषणी सन्मित्रं स्वधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः । आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥ नारदः— अहिंसा सत्यवचनं सर्वभूतानुकम्पनम् । शमो दानं यथाशक्तिर्गार्हस्थो धर्म उच्यते । परदारेष्वसंसर्गो धर्मस्त्रीपरिरक्षणम् । अदत्तादानविर- मो मधुमांसविवर्जनम् । एष पञ्चविधो धर्मो बहुशाखः सुखोदयः । देहिभिर्देहपरमैः कर्तव्यो देहसंभवः ॥

इति श्रीपुरन्दरोपाह्वविठ्ठलात्मजनारायणेन विरचितायां वाजसनेयाह्निकसूत्रावल्यां तृतीयभागकृत्यानि समाप्तानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ चतुर्थभागकृत्यानि ॥

२९२. कारिका॥ दक्षः—चतुर्थे च तथा भागे स्नानार्थं मृद्रमाहरेत्। तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले ॥ उपस्थानं ततः पश्चात्सावित्र्या जप उच्यते ॥व्यासः—स्नानं मध्यन्दिने कुर्यात्सुजीर्णेऽन्ने निरामयः॥

२९३. "माध्यान्हसन्ध्या." अर्घ्यप्रकारः विश्वामित्रकल्पे—पुष्पाणि तदभावे विल्वादिपत्राण्युदकेन मिश्राणि संयुक्ताञ्जलिनादायोत्थायोर्ध्वमुपरि सूर्याभिमुखं क्षिप्त्वा । आकृष्णेनेति मन्त्रेणैकमर्घ्यं दद्यात् । असावादित्यो ब्रह्मेति प्रदक्षिणीकृत्य । वारिणाञ्जलिपूर्णेन गायत्र्या चाभिमन्त्रितम् । यथा प्रातः पुनस्तद्वदुपसंहारपूर्वकम् । मध्यान्हे केचिदिच्छन्ति सावित्रीं च तादित्यृचम् । असंप्रदायं तत्कर्म कार्यहानिश्च जायते । प्रातः सायमुभे सन्ध्ये मन्देहानाम राक्षसाः । भक्षितुं सूर्यमिच्छन्ति कारणं श्रुतिनोदितम् । अतस्तदैव विप्रेन्द्रः सन्ध्यां कुर्यात्प्रयत्नतः । मूलमन्त्रेण मध्यान्हे प्रक्षिपेच्च जलं बुधः । सन्ध्ययोरुभयोर्नित्यं गायत्र्या प्रणवेन वा । अम्भः संप्रक्षिपेत्तेन नान्यथा श्रुतिघातकः ॥

२९४. "अथ माध्यान्हसन्ध्याप्रयोगः"—यथोक्तस्नानानन्तरं धौतश्वेतवस्त्रादि परिधायासने उपविश्य गन्धमिश्रितं भस्मानुलेपयेत् । गायत्र्यावाहनपर्यन्तः सर्वो विधिः प्रातःसन्ध्यावज्ज्ञातव्यः । "गायत्र्यावाहनम्"—सावित्रीं युवतीं श्वेताङ्गीं श्वेतवाससं त्रिनेत्रां वरदाक्षमालां त्रिशूलाभयहस्तां वृषभारूढां यजुर्वेदसंहितां रुद्रदैवत्यां तमोगुणयुतां भुवर्लोकव्यवस्थितां आदित्यपथगामिनीम् । आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात् । आगच्छ वरदे देवि त्र्यक्षरे रुद्रवादिनि । वरदां त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहम् । सावित्रि छन्दसां माता रुद्रयोनि नमोऽस्तु ते ॥ मार्जनं तथा अघमर्षणं प्रातःसन्ध्यावत् ॥ "अम्बुप्राशनम्"—आपः पुनन्त्विति मन्त्रस्य । नारायण ऋषिः । आपो देवता । गायत्री छन्दः अम्बुप्राशने विनियोगः– ॐ आपः पुनन्तु पृथिवीं पृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् । यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापो सतां च प्रतिग्रहं स्वाहा ॥ गायत्रीमन्त्रेण वा आकृष्णेनेत्यनेन वा मन्त्रेणैकमर्घ्यं दद्यात् । जपमालां हृदयदेशे धृत्वा । शेषं प्रातःसन्ध्यावत् । "अर्पणम्"—अनेन माध्यान्हसन्ध्याङ्गभूतेन यथाशक्ति कृतेन गायत्रीमन्त्रजपकर्मणा श्रीभगवान् रुद्रस्वरूपी सविता देवता प्रीयतां न मम । शेषं प्रातःसन्ध्यावत्कुर्यात् ॥ "इति माध्यान्हसन्ध्याप्रयोगः" ॥

२९९. "अथ पञ्च महायज्ञाः"—ब्रह्मयज्ञो देवयज्ञो मनुष्ययज्ञः पितृयज्ञो भूतयज्ञ इति श्रुतेः ॥ तदुक्तं—पाठो होमश्चातिथीनां सपर्या तर्पणं वलिः । एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥

२९६. "पञ्चमहायज्ञफलम्." याज्ञवल्क्यः—वलिकर्म स्वधा होमः स्वाध्यायोऽतिथिसत्क्रिया । भूतपित्रमरब्रह्ममनुष्याणां महामखाः ॥ मनुः—ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा । नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् । एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः। अनीहमानाः सततमिन्द्रियेष्वथ जुव्हति । वाच्येके जुव्हति प्राणं प्राणे वाचं च सर्वदा। वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम् । यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः। सम्यक् पञ्चमहायज्ञैर्दारिद्र्यं नश्यते क्षणात् ॥ शतपथब्राह्मणे—ॐ पञ्चैव महायज्ञाऽ स्तान्न्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञऽ पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति । १ ॥ अहरहर्भूतेभ्यो बलिᳪ हरेत् । तथैतम्भूतयज्ञᳪ समाप्नोत्यहरहर्दद्यादोदपात्रात्तथैतंमनुष्ययज्ञᳪ समाप्नोत्यहरहः स्वधाकुर्यादोदपात्रात्तथैतंपितृयज्ञᳪ समाप्नोत्यहरहः स्वाहाकुर्य्यादाकाष्ठात्तथैतं देवयज्ञᳪ समाप्नोति । २ ॥ अथ ब्रह्मयज्ञः स्वाध्यायो वै ब्रह्मयज्ञस्तस्य वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्चक्षुर्ध्रुवा मेधा स्तुवः सत्यमवभृथः स्वर्गो लोकउदगयनं यावन्तᳪ हवा इमांपृथिवीं वित्तेन पूर्णांददल्लोकंजयति त्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तावन्तं जयति भूयाꣳसं चाक्षय्यं य ऽएवं विद्वानहरहः स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः । ३ ॥ पय आहुतयो हवा ऽएतान्देवानां यदृचः स य ऽएवं विद्वानृचोहरहः स्वाध्यायमधीते पयआहुतिभिरेव तद्देवाँस्तर्पयति त ऽएनं तृप्तास्तर्पयति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः संपद्भिर्घृतकुल्यामधुकुल्याः पितॄन्स्वधा अभिवहन्ति । ४ ॥ आज्याहुतयो हवा ऽएतान्देवानां यजूꣳषि स य ऽएवं विद्वान्यजूꣳष्यहरहः स्वाध्यायमधीत ऽआज्याहुतिभिरेव तद्देवाँस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः संपद्भिर्घृतकुल्यामधुकुल्याः पितॄन्स्वधाअभिवहन्ति । ५ ॥ सोमाहुतयो ह वा ऽएतान्देवानां यत्सामाश्विनीस य एवं विद्वान्सामान्यहरहः स्वाध्यायमधीते सोमाहुतिभिरेवतद्देवाँस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्तमनात्सर्वाभिः पुण्याभिः संपद्भिर्घृतकुल्यामधुकुल्याः पितॄन्स्वधा अभिवहन्ति । ६ ॥ मेद आहुतयो हवाऽ एतान्देवानां यदथर्वाङ्गिरसःस य ऽएवं विद्वानथर्वाङ्गिरसोहरहः स्वाध्यायमधीते मेद अहुतिभिरेव तद्देवाँस्तर्पयन्ति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः संपद्भिर्घृतकुल्या मधुकुल्याः पितॄन्स्वधाअभिवहन्ति । ७ ॥ मध्वाहुतयो हवा ऽएता न्देवानां यदनुशासनानि विद्या वाको वाक्यामितिहासपुराणं गाथा नाराशꣳस्यः स य एवं विद्वानुशासनानिविद्या वाको वाक्यमितिहासपुराणं गाथानाराशꣳसीरित्यहरहः स्वाध्यायमधीते मध्वाहुतिभिरेवतद्देवाँस्तर्पयति त ऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः संपद्भिर्घृतकुल्या मधुकुल्याः पितॄन्स्वधा अभिवहन्ति । ८ ॥ तस्य वा एतस्य ब्रह्मयज्ञस्य चत्वारो वषट्का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रा यद्वातो वायद्विद्योतत्ते यस्तनयति यदवस्फूर्जति तस्मादेवं विद्वान्तेवाति विद्योतमाने स्तनयत्येव स्फूर्जत्यधिपीतव वषट्कारणामृतसं वषट्कारायाति हवंपुनरमृत्युर्मुच्यते गच्छतिब्रह्मण-स्वात्मता९ सचेदपि प्रबलमिव न शक्नुयादप्येकं देवपदमधीयीतैव तथा प्येतेभ्यो नहीयते ॥ ९ ॥ इति पञ्चमहायज्ञफलम् ॥ एतान्मन्त्रान् श्राद्धीयब्राह्मणभोजनकाले पठन्ति ॥

२९७. "ब्रह्मयज्ञविधिः" योगियाज्ञवल्क्यः— प्रदक्षिणं समावृत्य आसने उपविश्य च । दर्भेषु दर्भपाणिः सन् प्राङ्मुखस्तु कृताञ्जलिः । स्वाध्यायं तु यथा शक्ति ब्रह्मयज्ञार्थमाचरेत् । ऋचां च यजुषां साम्नां गाथागुह्यमथापि वा । आदावारम्य वेदस्तु स्नात्वापर्युपरिक्रमात् । यदधीतेऽन्वहं भक्त्या स स्वाध्याय इति स्मृतः ॥

२९८. "ब्रह्मयज्ञः" कात्यायनपरिशिष्टसूत्रे–विभ्राडित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय । प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्त्यादावारभ्य वेदम् ॥ कात्या० त्रिकण्डिकासूत्रे हरिहरभाष्ये–सन्ध्यावन्दनानन्तरं किं कुर्यादित्यपेक्षायां ब्रह्मयज्ञं कुर्यादित्याह । "सूत्रम्" दर्भेषु दर्भपाणिः स्वाध्यायञ्च यथाशक्त्यादावारभ्य वेदम्– "व्याख्या"–दर्भेषु प्रशस्तदारुनिर्मितासनोपरि निहितेषु प्रागग्रेषु वा त्रिषु कुशेषु आसीनः प्राङ्मुख उपविश्योदङ्मुखो वा दर्भपाणिः दर्भपवित्रोपग्रहयुक्तौ पाणी यस्यासौ दर्भपाणिः स्वाध्यायं ब्रह्मयज्ञं यथाशक्ति । शक्तिमनतिक्रम्य कुर्यात् । किं कृत्वा । आरभ्य उपक्रम्य कं वेदं मन्त्रब्राह्मणात्मकं । कुत आरभ्य । आदौ आदित इषेत्वोर्जेत्वेतदस्मादथ व्रतमुपैष्यं नित्यस्माच्च । अत्र-वेदमित्येकवचनादनेकवेदाध्ययनोप्येकं वेदमारभ्य प्रतिदिनमुपर्युपर्यध्ययनेन समाप्यान्यवेदमारभ्य तथैव समाप्याथर्वाङ्गिरसपुराणेतिहासादीन्यपि तथैवादित आरभ्यैवमेकैकं इत्येवं पाठान्तरः समाप्यापरमपरमारभ्य समापयेत् । न पुनर्यदृच्छया एकदेशं । आदावारभ्येति नियमात् । वेदशब्दोत्राथर्वादेरप्युपलक्षणार्थः । यथाह याज्ञव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्क्यः—वेदाथर्वपुराणानि सेतिहासानि शक्तितः। जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकां जपेत् ॥ सचापि जपयज्ञः कालान्तरेपि क्रियते। यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः। स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदेवावसाने वा नान्यत्र ह्यनिमित्तकात् ॥ पार० गृह्यसूत्रे हरिहरभाष्ये कात्यायनः— "किञ्च"— न हन्तींत न होमं च स्वाध्यायं पितृतर्पणम्। नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचित् ॥ तस्मात्प्रातर्होमानन्तरं वा तर्पणात्पूर्वं वा वैश्वदेवान्ते वा सकृद्ब्रह्मयज्ञं कुर्यादिति सिद्धम्। एतद्वचनाभिप्रायेण वाजसनेयब्राह्मणाः द्विवारं वैश्वदेवं न कुर्वन्ति। तस्मात्तेषां प्रयोगेषु सङ्कल्पेषु वा सायं वैश्वदवो नास्ति ॥

२९९. "अथ सूर्योपस्थानप्रयोगः"— आचम्य प्राणानायम्य ॥ "सङ्कल्पः"— अद्य पूर्वोच्चारितवर्त्तमान एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीसवितासूर्यनारायणप्रीत्यर्थं सूर्योपस्थानमहङ्करिष्ये। ॐ पवित्रेस्थो वैष्णव इति मन्त्रेण दक्षिणवामहस्तयोरनामिकायोः कुशपवित्रे धार्ये। "सूर्यपूजनम्"— ॐ उदुत्यञ्जातवेदसं०। १$\frac{३१}{३३}$ ॥ इति मन्त्रेण सूर्यं गन्धाक्षतपुष्पैः संपूज्य ॥ "सूर्यमुदीक्षन्"—दक्षिणवामपाण्योर्द्वौ द्वौ साग्रदर्भौ गन्धाक्षतपुष्पतुलसीदलसहितौ धृत्वा पश्चादेते मन्त्राः पठनीयाः। "मन्त्राः— ॐ उद्वयन्तमस०। २$\frac{२४}{३८}$ ॥ ॐ उदुत्यञ्जा०। ३$\frac{३१}{३३}$ ॥ ॐ चित्रन्देवाना०। ४$\frac{४६}{१३}$ ॥ ॐ तच्चक्षुर्दे०। ५$\frac{२४}{३७}$ ॥ ॐ तत्सवितु०। ६$\frac{३५}{३}$ ॥ "अनुवाकः"—ॐ विभ्राट्० १७॥ "पुरुषसूक्तम्"— ॐ सहस्रशीर्षा० १६॥ "शिवसङ्कल्पः"—ॐ यज्ज्याग्रंतातसुषारथिरश्वान्तम् ॥६॥ एते मन्त्रा रुद्राध्याये द्रष्टव्याः ॥ "मण्डलब्राह्मणम्"—ॐ यदेतन्मण्डलं तपति तन्महदुक्थन्ता ऽऋचः स ऽऋचां लोकोथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नाँ लोकोथ य ऽएष ऽएतस्मिन्मण्डले पुरुषः सोग्निस्तानि यजूंषि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स यजुषांल्लोकः ॥१॥ सैषात्रय्येव व्विद्या तपति तद्धैतदप्यविद्वाꣳस आहुस्त्रयी वा ऽएषा व्विद्या तपतीति वाग्घैव तत्पश्यन्ती व्वदति । २ ॥ स ऽएष ऽएव मृत्युर्य ऽएष ऽएतस्मिन्मण्डले पुरुषोथैतदमृतं यदेतदर्चिर्द्दीप्यते तस्मान्मृत्युर्न म्रियते मृतेर्ह्यन्तस्तस्मादु नदृश्यते मृतेर्ह्यन्तः । ३ ॥ तदेष श्लोको भवति । अन्तरन्मृत्यो रमृतमित्यवरꣳ ह्येतन्मृत्यो रमृतम्मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुष ऽएतन्मण्डलम्प्रतिष्ठितं तपति मृत्युर्विवस्वन्तं वस्त ऽइत्यसौ वा ऽआदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्व्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डलꣳ ऽएतस्य पुरुषस्यात्मैतदेष श्लोको भवति । । ४ ॥ तयोर्वा ऽएतयोरुभयोरेतस्य चार्च्चिष ऽएतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान्महदुक्थम्परस्मै न शꣳसेन्नेदेतां प्रतिष्ठां छिनदा इत्यताꣳ ह स प्रतिष्ठां छिन्तेऽजो महदुक्थं परस्मै शꣳसति तस्मादुक्थशासम्भूयिष्ठं परिचक्षते प्रतिष्ठा छिन्नो हि भवतीत्यधिदेवतम् । ५ ॥ अथाधियज्ञं यदेतन्मण्डलं तपत्ययꣳसरुक्मोथ यदेतदर्चिर्द्दीप्यत इदं तत्पुष्करपर्णमापो ह्येता ऽआपः पुष्करपर्णमथ य ऽएष ऽएतस्मिन्मण्डले पुरुषोयमेव स योयꣳ हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयꣳ संस्कृत्येहोपधत्ते तद्यज्ञस्यैवानुशꣳस्छामूर्द्धमुत्क्रामति तदेतमप्येति य ऽएष तपति तस्मादग्निन्नाद्रियेत परिहन्तुमामुत्र ह्येष तदा भवतीत्यु ऽएत्वाधियज्ञम् । ६ ॥ "अथाध्यात्मम्"— यदेतन्मण्डलं तपति यश्चैष रुक्म इदं तच्छुक्लमक्षन्नथ यदेतदर्चिर्द्दीप्यते यच्चैतत्पुष्करपर्णमिदं तत्कृष्णमक्षन्नथ य ऽएष ऽएतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोयमेव स योयं दक्षिणेक्षन्पुरुषः । ७ ॥ स ऽएष ऽएव लोकं पृणातामेष सर्वोग्निरभिसम्पद्यते तस्यैतन्मिथुनं सोयꣳस व्येक्षन् पुरुषोर्द्धमुहैतदात्मनोयन्मिथुनं यदा वै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह मिथुनेनाथ सर्वोथ कृत्स्नं कृत्स्नतायै तद्यत्ते द्वे भवतो द्व-
न्द्वं हि मिथुनम्प्रजननं तस्मा द्वे द्वे लोकंपृणे ऽउपधीयेते तस्मा-
दु द्वाभ्यां द्वाभ्यां चितिम्प्रणयन्ति । ८ ॥ स ऽएष ऽएवे-
न्द्रः । योयं दक्षिणेक्षन् पुरुषोथेयमिन्द्राणी ताभ्यां देवा ऽएतां
विधृतिमकुर्वन्नासिकान्तस्माज्जायाया ऽअन्तेनाश्नीयाद्वीर्य्यवा-
न्हास्माज्जायते वीर्य्यवन्तमुह सा जनयति यस्या ऽअन्ते ना-
श्नाति । ९ ॥ तदेतद्देवव्रतं राजन्यबन्धवो मनुष्याणाम्मनु-
त्तमां गोपायन्ति तस्मादु तेषु वीर्य्यवाञ्जायते मृतवाका
वयसा साक्षिप्रश्येनं जनयति । १० ॥ तौ हृदयस्याकाशं
प्रत्यवेत्य मिथुनीभवतस्तौ यदा मिथुनस्यान्तङ्गच्छतोथ हैतत्पु-
रुषः स्वपिति तद्यथा हैवेदम्मानुषस्य मिथुनस्यान्तङ्गत्वा सं-
विद्व इव भवत्येवं हैवैतदसंविद्व इव भवति दैवं ह्येतन्मिथुन-
म्परमो ह्येष ऽआनन्दः । ११ ॥ तस्मादेवं वित्स्वप्यात् ॥ लो-
क्यं हैते ऽएव तद्देवते मिथुनेन प्रियेण धाम्ना समर्द्धयति त-
स्मादुह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनीभवन्त्यौ हि-
नसानीति तस्मादु हैतत्सुखपुषः श्लेष्मणमिव मुखम्भवत्येते ऽएव
तद्देवते रेतः सिञ्चतस्तस्माद्रेतस ऽइदं सर्वं सम्भवति यदिदं
किञ्च । १२ ॥ स ऽएष ऽएव मृत्युः ॥ य ऽएष एतस्मिन्मण्डले
पुरुषो यश्चायन्दक्षिणेक्षन्पुरुषस्तस्य है तस्य हृदये पादावतिहतौ
तौ हैतदाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषो म्रियते
तस्मादुहैतत्प्रेतमाहुराच्छेद्यस्येति । १३ ॥ एष ऽउ एव प्राणः॥
एष हीमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः स्वाः स यदा
स्वपित्यथैनमेते प्राणाः स्वा ऽअपियन्ति तस्मात्स्वाप्ययः
स्वाप्ययो हवैतं स्वप्न ऽइत्याचक्षते परोक्षं परोक्षकामा हि
देवाः । १४ ॥ स ऽएतैः सुप्तो न कस्यचन व्वेद न मनसा
सङ्कल्पयति न वाचान्नस्य रसं व्विजानाति न प्राणेन गन्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वित्रयोश्च पूर्वस्यां दिशि त्यागः कर्तव्यः ॥ (इदं सूर्योपस्थानं श्रावण्यां तथा श्राद्धादिने कुर्वन्ति) ॥ "अर्पणम्"—अनेन यथाशक्त्या कृतेन सूर्योपस्थानकर्मणा श्रीभगवान् सविता सूर्यनारायणः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति सूर्योपस्थानप्रयोगः ॥

२६२. "अथ ब्रह्मयज्ञप्रयोगः"—(सूर्योपस्थानानन्तरं प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् । दर्भेपूपविश्य दर्भपाणिर्भूत्वा स्वाध्यायं च यथाशक्त्यादावारभ्य वेदम्) । आचम्य प्राणानायम्य ॥ "सङ्कल्पः"—अद्य पूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ॐ तत्सत् परमेश्वरप्रीत्यर्थं यथाशक्ति ब्रह्मयज्ञेनाहं यक्ष्ये । ॐ पवित्रेस्थो वै० इति मन्त्रेण दक्षिणानामिकायां कुशपवित्रं धृत्वा । "अथातो ब्रह्मयज्ञं व्याख्यास्यामः"—इषेत्वादिषु मन्त्रेषु खं ब्रह्मान्तेषु दशप्रणवसहितेषु याः क्रियास्तत्र विवस्वानृषिः प्रजापतिर्देवता । सर्वाणि छन्दाꣳसि सर्वाणि सामानि । प्रतिलिङ्गोक्ता देवता । ब्रह्मयज्ञे विनियोगः । इति पुनश्च सङ्कल्प्य ॥ ब्रह्मयज्ञारम्भे यथाविधि स्नात्वा छन्दःपुरुषꣳशरीरे न्यसेत् । तिर्यग्बिलश्चमस ऊर्ध्वबुध्नः छन्दःपुरुषस्य च ॥ "न्यासः"—ॐ गौतमभरद्वाजाभ्यां नमः—नेत्रयोः । ॐ विश्वामित्रजमदग्निभ्यां नमः—श्रोत्रयोः । ॐ वसिष्ठकश्यपाभ्यां नमः—नासिकयोः । ॐ अत्रये नमः—वाचि । ॐ गायत्र्यग्निभ्यां नमः—शिरसि । ॐ उष्णिक्सवितृभ्यां नमः—ग्रीवायाम् । ॐ बृहतीबृहस्पतिभ्यां नमः—हनौ । ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः—बाह्वोः । ॐ त्रिष्टुबिन्द्राभ्यां नमः—नाभौ । ॐ जगत्यादित्याभ्यां नमः—श्रोण्योः । ॐ अतिच्छन्दप्रजापतिभ्यां नमः—लिङ्गे । ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः—गुदे । ॐ अनुष्टुब्विश्वेभ्यो देवेभ्यो नमः—ऊर्वोः । ॐ पङ्क्तिमरुद्भ्यो नमः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जान्वोः । ॐ द्विपदाविष्णुभ्यां नमः—पादयोः । ॐ विच्छन्दावायुभ्यां नमः—नासापुटस्थप्राणेषु । ॐ न्यूनाक्षराछन्दोभ्यो नमः—सर्वाङ्गेषु ॥ एवमेवाङ्गानि योजयित्वा वेदमयः सम्पद्यते । [न कुतश्चिद्भयं विन्दते । शापानुग्रहसामर्थ्यो ब्राह्मं तेजश्च वर्द्धते । स्वर्गलोकं परं साधनम् । धर्मार्थकाममोक्षस्य च । तस्य दारिद्र्यदुःखशोकरोगभयं न भवति । ऋषिर्दैवता छन्दाꣳसि विदित्वा । ऋङ्मयो यजुर्मयः साममयोऽथर्वमयोऽमृतमयो । विष्णुरिदं कात्यायनस्य च ॥] (ततो गोकर्णप्रमाणे वामहस्ते त्र्यधिकान् नव वा तण्डुलाक्षतगन्धपुष्पतुलसीदलसहितान्कुशान् धृत्वा पश्चाद्दक्षिणहस्तेनाच्छादितं करसंपुटं कृत्वा दक्षिणजान्वाच्य ब्रह्मयज्ञसमाप्तिपर्यन्तं करसम्पुटं धारयेत्) ॐ भूर्भुवꣳ स्वः ॐ तत्सवितु० । १ ३/३६ ॥ ॐम्—इषेत्त्वोर्ज्जेत्त्वा व्वायवस्त्थ देवोवं÷सविता प्प्रार्प्पयतुश्श्रेष्ठतमाय कर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्राय भागम्प्रजावती रनमीवाऽअयक्ष्मा मावस्तेनऽईशत माघशꣳसोद्ध्रुवाऽअस्मिन्गोपतौ स्यातबह्वीर्य्यजमानस्य पशून्पाहि । २ १/१ ॥ ॐ व्वसोꣳपवित्रम् ॥ ॐ हिरण्मयेन पात्त्रेणसत्यस्स्यापिहितम्मुखम् । योसावादित्येपुरुषꣳ सोसावहम् । ३ १७/४० ॥ ॐ २ खम्ब्रह्म ॥ ॐ व्रतमुपैष्यनन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राक्तिष्ठन्नप ऽउपस्पृशति । तद्यदप ऽउपस्पृशत्यमेध्यो वै पुरुषो यदनृतम्वदति तेन पूतिरन्तरतो मेध्या वा ऽआपो मेध्यो भूत्वा व्रतमुपयानीति पवित्रम् वा आपꣳ पवित्रपूतो व्रतमुपायानीति तस्माद्वा ऽआप ऽउपस्पृशति । १ ॥ सोग्निमेवाभीक्षमाणो व्रतमुपैति [ॐ पूर्णमदꣳ पूर्णमिदं पूर्णात्पूर्णमुदुच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ खं ब्रह्म । ॐ खं पुराणम् । ॐ वायुरेव खमिति हस्माह कौरव्यायणीपुत्रो वेद यं ब्राह्मणाविदुर्वेदेन न यद्वेदितव्यम्] ॐ प्राश्नीपुत्रादासुरिवासिनꣳ प्राश्नीपुत्र आसुरायणादासुरायण

१ इदं यजुर्वेदोपलक्षणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसुरेरासुरिं । २ ॥ याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालको ऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिव्हावतो बाध्योगाज्जिव्हावान् बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात् कश्यपाद्धरितं कश्यपः शिल्पात्कश्यपाच्छिल्पं कश्यपं कश्यपान्नैध्रुवें कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते । ३ ॥ (इत्युक्तं बृहदारण्योपनिषदि) ॐ अग्निमीळेपुरोहितं यज्ञस्यदेवमृत्विजम् । होतांररत्नधातमम् । १ ॥ ॐ अग्नआयाहिंवीतये गृणानोहव्यदातये । निहोतासत्सिबर्हिषि । २ ॥ ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तुपीतयें । शंय्योरभिस्स्रवन्तुनः । ३ $\frac{12}{36}$ ॥ " चतुर्वेदानन्तरं अङ्गानि पठेत् "—अथानुवाकान्वक्ष्यामि । मण्डलं दक्षिणमक्षिहृदयम् । अथ शिक्षां प्रवक्ष्यामि । अथतोऽधिकारः फलयुक्तानि कर्माणि । अथातो गृह्यस्थालीपाकानां कर्म । वृद्धिरादैच् । समाम्नायः समाम्नातः । ॐ मयरसतजभनलगसंमितम् । पञ्चसंवत्सरं मया युगाध्यक्षम् । गौः ग्माः । अथातो धर्मजिज्ञासा । अथातो ब्रह्मजिज्ञासा । योगीश्वरं याज्ञवल्क्यं । नारायणं नमस्कृत्य । इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः । वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः । (एवं ब्रह्मयज्ञं विधाय करसम्पुटं मुक्त्वा दर्भानुत्तरतो निरस्याचम्य कुशपवित्रत्यागं कुर्यात्) ॥ ॐ यस्य स्मृत्या० " अर्पणम् "—अनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ इति ब्रह्मयज्ञप्रयोगः " ॥

२६३. केचित्तु ब्रह्मयज्ञं तर्पणं चैकतन्त्रेण कुर्वन्ति तत्र सङ्कल्पाऽर्पणे यथा— आचमनप्राणायामानन्तरं— " सङ्कल्पः "—अद्य पूर्वो-

१ इदं ऋग्वेदोपलक्षणम् । २ इदं सामवेदोप० । ३ इदं अथर्ववेदोप० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ब्रह्मयज्ञपूर्वकं देवऋषिमनुष्यपितृतर्पणमहं करिष्ये ॥ "अर्पणम्"— अनेन ब्रह्मयज्ञपूर्वकं देवर्षिमनुष्यपितृतर्पणाख्येन कर्मणा देवादिस्वरूपी भगवान्परमेश्वरः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

२६४. "तर्पणम्." कात्यायनपरिशिष्टसूत्रे— ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णुं रुद्रं प्रजापतिं देवांश्छन्दा९ंसि वेदानृषीन्पुराणाचार्यान्गन्धर्वानितराचार्यान्संवत्सरं सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो मनुष्यान्यक्षान् रक्षा९ंसि पिशाचान्सुपर्णान्भूतानि पशून्वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामित्योङ्कारपूर्वं ततो निवीती मनुष्यान्सनक९ं सनन्दन९ं सनातनं कपिलमासुरिं वोढुं पञ्चशिखं ततोऽपसव्यं तिलमिश्रं कव्यवाडनल९ं सोमं यममर्यमणमग्निष्वात्तान्सोमपो बर्हिषदो यमांश्चैके ॥ यमाय धर्मराजाय मृत्यवेचान्तकायच । वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुम्बराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नम । इत्येकैकस्य तिलैर्मिश्रांस्त्रीस्त्रीन्दद्याज्जलाञ्जलीन् ॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्यतीति जीवत्पितृकोप्येतानन्यांश्चेतर उदीरतामङ्गिरस आयन्तुन ऊर्ज्जं वहन्ती पितृभ्यो ये चेह मधुवाता इति त्र्यृचं जपन्प्रासिञ्चेत्तृप्यध्वमिति त्रिर्नमो व इत्युक्त्वा माता महानां चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवा न तर्पिता देहाद्रुधिरं पिबन्ति वासो निष्पीड्याचम्य ॥ अदृश्रमस्य ह९ंस इत्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्निपृथिव्योषधीर्वाग्वाचस्पतिर्विष्णुर्महद्भ्योऽपांपतये वरुणाय नम इति संवर्चसेति मुखं विमृष्टे देवागातुविद इति विसर्जयेत् ॥ "का० त्रिकण्डिकासूत्रे हरिहरभाष्ये"—ततः किं कुर्यादित्यत आह– सू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रम् । ततस्तर्पयेद्ब्रह्माणं पूर्वमित्यादि । व्याख्या– ततस्तर्पयेत्प्रीणयेत् । ब्रह्माणं कथं पूर्वं आदौ केषां विष्णुमित्यादीनां भूतग्रामान्तानां देवतानाम् । अत्र तर्पयेद्ब्रह्माणमिति तर्पणक्रियायाः कर्म भूतान्ब्रह्मादीनुद्देश्यत्वेन द्वितीययाभिधाय भूतग्रामश्चतुर्विधस्तृप्यतामिति प्रथमया प्रयोगमाचार्यो दर्शयति । ततश्च ब्रह्मा तृप्यतामित्येवं तर्पणप्रयोगः । सूत्रम् । ॐकारपूर्वमिति । व्याख्या— ॐकारपूर्वं यथा स्यात्तथा ब्रह्मादीन्देवांस्तर्पयेत् । सूत्रम् । ततो निवीती मनुष्यान् । व्याख्या– ततो देवतर्पणानन्तरं निवीती कण्ठसंयुक्तब्रह्मसूत्रः सन् मनुष्यान्दिव्यान्मानवांस्तर्पयेदिति पूर्वोक्तेनाख्यातेनानुषङ्गः । केते मनुष्या इत्यपेक्षायामाह । सनकं चेत्यादिना श्लोकेन सप्त । सूत्रम् । ततोऽपसव्यं तिलमिश्रम् । व्याख्या— ततो मनुष्यतर्पणानन्तरमपसव्यं प्राचीनावीती भूत्वा तिलमिश्रं तिलैः संयुक्तं जलं गृहीत्वा तर्पयेदिति संबन्धः । कांस्तर्पयेदित्यत आह कव्यवाडनल इत्यादिना बर्हिषद इत्यन्तेन सूत्रेण पठितान् । तत्र कव्यं हविर्वहतीति कव्यवाट् । अनलोऽग्निः कव्यवाट् चासावनलश्चेति कव्यडनलस्तम् । अत्र केचित्कव्यवाहम् अनलं चेति द्वौ देवौ मन्यन्ते । अनलोऽग्नौ नले राज्ञि पितृदेवे कपीश्वर इति विश्वप्रकाशदर्शनात्॥तदयुक्तंहव्यवाहनो वै देवानां कव्यवाहनः पितॄणामिति श्रुतेः कव्यवाट् गुणविशिष्टोऽनलः पितृगणान्तर्गत इति कव्यवाडनल एकैव देवता । सूत्रम् । यमांश्चैके । व्याख्या—एके आचार्याः यमांश्च तर्पयेदित्याहुः । तद्यथा—यमाय धर्मराजायेत्येवमादिनोक्तम् । पितृतर्पणाञ्जलिसंख्यामाह । सूत्रम् । एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीवकृतं पापं तत्क्षणादेव नश्यति । व्याख्या—एकैकस्य प्रत्येकं कव्यवाडनलादेस्तिलैः कृष्णैर्मिश्रान्संयुक्तांस्त्रींस्त्रीन्त्रित्वसंख्योपेतान् जलाञ्जलीन्जलेन पूर्णा अञ्जलयो जलाञ्जलयस्तान् । अस्य तर्पणस्य नित्यत्वेप्यानुपङ्गिकं फलमाह । यावज्जीवकृतं जन्मत आरभ्य यावत्तर्पणदिनं कृतमाचरितं पापं अशुभं कर्म तत्क्षणादेव तर्पणसमाप्त्यनन्तरमेव नश्यति क्षीयते । सूत्रम् । जीवत्पितृकोऽप्येतानन्याश्चेतरः । व्याख्या—जीवन् विद्यमानः पिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनको यस्य सोऽपि एतान्पूर्वोक्तान्ब्रह्मादीश्चित्रगुप्तांतान्तर्पयेदिति गतेन संबन्धः । अत्र जीवत्पितृकोऽप्येतानिति । वदता सूत्रकारेणैतच्छब्देन ब्रह्मादिचित्रगुप्तान्ताः परिसंख्यातास्तानेव जीवत्पितृक एतानेव तर्पयेत न त्वन्यान् । पितृव्यमातृमातामहादीन् । एवार्थेऽपिः अन्यांश्चेतर इति प्रमीतपितृकस्यैवान्यतरविधानात् । यत्तु स्मृत्यन्तरं—येभ्य एव पिता दद्यात्तेभ्यो दद्यात्सुतः स्वयमिति तत् पतितसंन्यासिजीवत्पितृकविषयं । ब्राह्मणादिषु विशेषस्मरणात् । इतरो जीवत्पितृकादन्यः । मृतपितृकः अन्यानेतेभ्योऽपरान्पित्रादींस्त्रींस्त्रींश्चकारादेतान्ब्रह्मादींश्चित्रगुप्तान्तांस्तर्पयेदिति संबन्धः । तर्पणवाक्यानि तत्प्रयोगे लिख्यन्ते । ततो मृतपितृपितामहप्रपितामहांश्च तर्पयित्वा प्रसेकाख्यं कर्म कथं कुर्यादित्याह । **सूत्रम् । उदीरतामङ्गिरस आयन्तुन ऊर्ज्जं वहन्ति पितृभ्यो येचेह मधुवाता इति । तृचं जपन् प्रसिंश्चेत् । व्याख्या**—उदीरतामित्यादि प्रतीकोक्ताः षडृचः मधुवाता इति तृचं एवं नवर्चो जपन् उपांशु स्वरेण पठन्प्रसिञ्चेत् । अञ्जलिकृता अपः प्रसिञ्चेत् । पितृतीर्थेन तर्पणजलाधिकरणे प्रक्षिपेत् । तृप्यध्वमिति त्रिः । तथा तृप्यध्वमिति प्रतिसेकमुक्त्वा त्रिः प्रसिञ्चेत् । अत्र केचिदुदीरतामित्यादिकानां ऋचां पित्रादितर्पणे जलदानकरणत्वं मन्यन्ते तदसांप्रतं । सूत्रार्थपर्यालोचनेन करणतयाऽप्रतीतेः कथं जपन्प्रसिञ्चेदित्यत्र जपन्निति शतृप्रत्ययेन मन्त्रं जपता सता सततं जलप्रसेकः कार्य इति हि सूत्रात्प्रतीयते । तोयकरणत्वे तु मन्त्रान्तैः कर्मादिः सन्निपात्येति परिभाषया मन्त्रे समाप्ते अञ्जलिर्देयः । तथा सति जपशब्दस्य शतृप्रत्ययस्य चानर्थक्यप्रसङ्गः । प्रसेकशब्दस्य दानार्थताकल्पना च तस्मात्प्रसेकाख्यमिदं कर्मान्तरम् । तथा च **योगियाज्ञवल्क्यः** । पितृन्ध्यायन्प्रसिञ्चेद्वै जपमन्त्रान्यथाक्रममिति तूष्णीं मात्रादीनां प्रसेकनिगमनम् । **सूत्रम् । नमो व इत्युक्त्वा मातामहानां चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवान् । व्याख्या**—नमो वः पितरो रसायेत्यादीन्यष्ट यजूंष्युक्त्वा पठित्वा मातामहानां मातुः पितृपितामहप्रपितामहानां च । एवमेकैकस्य तिलमिश्राञ्जलित्रयेण तर्पणं कृत्वा । गुर्वाचार्यादयोऽपि एकैकाञ्जलिना तर्प्याः । अत्र गुरुं मन्त्रोपदेष्टारमाचार्यमुपनयनपूर्वकं वेदाध्यापकमित्यर्थः शिष्यं विद्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थिनं गुरुकुलवासिनं ऋत्विजो याजकान् ज्ञातीन् । पितृव्यभ्रात्रादि सपिण्डान्सगोत्रान् । मातुलेयपितृस्वस्रेयादीन्तर्पयेदित्यनुवर्त्तते मातृसख्यादीन् । **सूत्रम् । अतर्पिता देहाद्रुधिरं पिबन्ति । व्याख्या**— एते पूर्वोक्ता ब्रह्मादयोऽतर्पिताः सन्तो देहात् अतर्पयितुः शरीराद्रुधिरं पिबन्ति तपर्णस्याकरणप्रत्यवायाद्देहरुधिरशोषो भवतीत्यर्थः । एतदनिष्टापत्तिवचनं तर्पणस्यावश्यकरणीयत्वज्ञापनार्थम् । **सूत्रम् । वासो निष्पीड्याचम्य । व्याख्या**—एवं तर्पणं विधाय तदन्ते स्थले वासो वस्त्रं भूमौ निष्पीड्य पीडयित्वा पूर्ववदाचामेत् । निष्पीडयति यः पूर्वं स्नानवस्त्रमतर्पिताः । निराशाः पितरो यान्ति शापं दत्वा सुदारुणम् । द्वादश्यां पञ्चदश्यां च संक्रान्तौ श्राद्धवासरे । वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेत् ॥ एतच्च तर्पणं प्रातःस्नानान्तरं प्रातः कार्यम् । मध्यान्हे स्नानं न कृतं चेत्तदाऽपराण्हादिषु स्नानं कृत्वा कुर्यात् । पूर्वाह्णे वै देवानां मध्यन्दिने मनुष्याणामपराह्णः पितॄणामिति श्रुतिस्तर्पणव्यतिरिक्तविषया । प्रातश्चेत्तर्पणं कृतं तर्हि मध्याह्नादिषु न कर्त्तव्यमेव ॥ स्नानाङ्गतर्पणं वैधस्नानानन्तरं कार्यम् ॥

२६५. **"तर्पणादौ पितृणामनुक्रमः."** सङ्ग्रहे—ताताम्बात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रि स्त्री तनयादि तातजननीस्वभ्रातरः सस्त्रियः । ताताम्बात्मभगिन्यपत्यधवयुग्जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ॥

२६६. **"तर्पणे पात्राणि."** **पितामहः**—हैमं रौप्यमयं पात्रं ताम्रकांस्यसमुद्भवम् । पितॄणां तर्पणे पात्रं मृन्मयं तु परित्यजेत् ॥ **अङ्गिराः**—मार्जनं तर्पणं श्राद्धं न कुर्याद्वारिधारया ॥ **मरीचिः**—सौवर्णेन तु पात्रेण ताम्ररूप्यमयेन वा । औदुम्बरेण खड्गेन पितॄणां दत्तमक्षयम् । विना रूप्यसुवर्णेन विना ताम्रमयेन वा । विना तिलैश्च दर्भैश्च पितॄणां नोपातिष्ठते । यवाद्भिस्तर्पयेद्देवान्सतिलाद्भिः पितॄंस्तथा॥ **हारीतः**—वसित्वा वसनं शुष्कं स्थले विस्तीर्णबर्हिषि । विधिज्ञस्तर्पणं कुर्यान्न पात्रेषु कदाचन । पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षिपेत्। जलपूर्णेऽथवा गर्ते न स्थले तु विबर्हिषि ॥ **शङ्खः**— उदके नोदकं दद्यात्पितृभ्यश्च कदाचन । उत्तीर्य च शुचौ देशे कुर्यादुदकतर्पणम् ॥

२६७. **"तर्पणस्थलम्."** **योगियाज्ञवल्क्यः**— यथाशुचिस्थलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा स्यादुदके देवताः पितॄन् । तर्पयेच्च यथाकाममप्सु सर्वं प्रतिष्ठितम्॥

२६८. "तर्पणे तिलग्रहणविचारः." **स्नानसूत्रभाष्ये**–कठाः काण्वाश्च जाबाला ये च वाजसनेयिनः । निषिद्धेऽपि दिने कुर्युस्तर्पणं तिलमिश्रितम् ॥ **कात्यायनः**– उपरागे (ग्रहणे) पितृश्राद्धे पातेऽमायां च संक्रमे । निषेधेऽपीह सर्वत्र तिलैस्तर्पणमाचरेत् ॥ **गर्गः**–कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् । पितॄणां प्रत्यहं कार्यं निषिद्धाहेऽपि तर्पणम् ॥ **पृथ्वीचन्द्रोदये**–तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके । निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥ **वायुपुराणे**–तिलदर्भैस्तु संयुक्तं श्रद्धया यत्प्रदीयते तत्सर्वममृतं भूत्वा पितॄणामुपतिष्ठते ॥ **याज्ञवल्क्यः**–तिलानामप्यभावे तु सुवर्णरजतान्वितम् । तदभावे निषिञ्चेत्तु दर्भैस्तोयैर्न चान्यथा ॥ यद्युद्धृतं निषिञ्चेत्तु तिलान्संमिश्रयेज्जले । अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः । शुक्लैस्तु तर्पयेद्देवान्मनुष्याञ्छबलैस्तिलैः । पितॄंस्तु तर्पयेत्कृष्णैस्तर्पणे सर्वदा द्विजः ॥

२६९. " तर्पणे तिलनिषेधः. " **मरीचिः**—सप्तम्यां भानुवारे च गृहे जन्मदिने तथा । भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणम् ॥ **सङ्ग्रहे**–नन्दायां भार्गवदिने कृत्तिकासु मघासु च । भरण्यां भानुवारे च गजच्छायाह्वये तथा । तर्पणं नैव कुर्वीत तिलमिश्रं कदाचन ॥ **बौधायनः**–विवाहे चोपनयने चौले सति यथाक्रमम् । वर्षमर्धं तदर्धं च नेत्येके तिलतर्पणम् ॥ **वन्हिपुराणे**—दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च । न जीवत्पितृको भूप कुर्यात्कृत्वाघमाप्नुयात् ॥

२७०. " वस्त्रनिष्पीडनम्. " **योगियाज्ञवल्क्यः**—वस्त्रनिष्पीडितं तोयं स्नातस्योच्छिष्टभागिनः । भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थले ॥ **वृद्धयोगी**–यावदेतानृषींश्चैव पितॄंश्चापि न तर्पयेत् । तावन्न पीडयेद्वस्त्रं येन स्नातो भवेन्नरः ॥ **स्मृत्यन्तरे**—वस्त्रं चतुर्गुणीकृत्य पीडयेच्च जलाद्बहिः । वामप्रकोष्ठे निक्षिप्य द्विराचम्य शुचिर्भवेत् ॥

२७१. " तर्पणप्रकारः." **स्मृत्यन्तरे**— संबन्धनामगोत्रेण स्वधान्ते च नमो नमः । वस्वादिरूपं सङ्कीर्त्य तर्पयेत्पितृपूर्वकम् ॥ **वसिष्ठः**–संबन्धमनुकीर्त्यैव नामगोत्रमनन्तरम् । वस्वादिरूपं सङ्कीर्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वधाकारेण तर्पयेत् ॥ **बौधायनः**— शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु । गुप्तान्तं चैव वैश्यस्य दासान्तं शूद्रजन्मनः । चतुर्णामपि वर्णानां गोत्रत्वे पितृगोत्रता । पितृगोत्रं कुमारीणामूढानां भर्तृगोत्रता ॥ **योगियाज्ञवल्क्यः**—सवर्णेभ्यो जलं देयं नान्यवर्णेभ्य एव च॥ **वृद्धयाज्ञवल्क्यः**— अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । सव्योत्तराभ्यां पाणिभ्यामथवा तर्पणं भवेत् ॥ तृप्यतामिति वक्तव्यं नाम्ना तु प्रणवादिना । आवाह्य पूर्ववन्मन्त्रैरास्तीर्य च कुशांश्च तान् । सव्यजानुं तथा स्थाप्य पाणिभ्यां दक्षिणामुखः । तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान्पितृगणांस्तथा ॥ **गोभिलसूत्रे**—**स्त्रीणां दान्तं नाम ज्ञेयम्** ॥ **व्यासः**—एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः । अर्हन्ति पितरस्त्रींस्त्रींस्त्रिय एकैकमञ्जलिम् ॥ **साङ्ख्यायनः**— मातृमुख्यास्तु यास्तिस्रस्तासां त्रींस्त्रीन् जलाञ्जलीन् । सपत्नाऽचार्यपत्नीनां द्वौ द्वौ दद्याज्जलाञ्जली ॥ **शातातपः**—तर्पणं तु शुचिः कुर्यात्प्रत्यहं स्नातको द्विजः । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥ **अग्निपुराणे**—प्रागग्रेषु सुरांस्तृप्येन्मनुष्यांश्चैव मध्यतः । पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन् ॥ **दक्षः**—प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् । उदङ् मनुष्यांस्तृप्येत्तु पितॄन्दक्षिणतस्तथा । अग्रैस्तु तर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमम् । **एवञ्च**— गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् (इति यमवचनस्थगोशृङ्गपदं प्रादेशमात्रपरम्) ॥ **गोभिलः**—बह्वृचा देवपित्रर्षींस्तपर्यन्ति द्वितीयया । कात्यायनानां सर्वत्र तर्पणे प्रथमा मता॥ (कात्यायना इति वाजसनेयब्राह्मणाः) ॥ "**देवतर्पणविधौ**"—ब्रह्माद्यानुपवीती तु देवतीर्थेन तर्पयेत् । निवीती कायतीर्थेन मनुष्यान्सनकादिकान् । **स्वाहाकारवषट्कारौ नमस्कारो दिवौकसाम्** । **स्वधाकारः पितॄणान्तु हन्तकारो नृणां मतः** । **स्वधाकारेण निर्वापे**

---

१ ॐ हन्तेति वा हन्तकारं मनुष्या इति श्रुतेः । यथा देवानामश्वमेधादियज्ञेषु स्वाहाकारवषट्कारशब्दौ पितॄणां **स्वधा**शब्दश्च प्रयुज्यते तथा मनुष्याणां **हन्तका**रशब्दो ज्ञेयः । **हन्तशब्दस्यार्थः**-हन्र्हिंसागत्योः । ये ये धातवो गत्यर्थास्ते ते प्राप्त्यर्थाः । तेन हन्ततिर्नाम प्राप्तिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पित्र्यं वलिमतः सदा ॥ वाचस्पतौ—निवीती हन्तकारेण मनुष्यांस्तर्पयेदथ । कुशस्य मध्यदेशेन नृतीर्थेन उदङ्मुखः ॥ व्यासः—पितृभ्यः प्रथमं दद्यात्ततो मातृभ्य एव च । ततो मातामहानां च तत्पत्नीनां ततो जलम् । अन्तर्मातामहान्कृत्वा मातॄणां यः प्रयच्छति ॥ मरीचिः—मुक्तहस्तं च दातव्यं न मुद्रां दर्शयेत्क्वचित् । वामहस्ते तिला ग्राह्या मुक्तहस्तं च दक्षिणम् ॥ वायुपुराणे— शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः । तिलदर्भैस्तु संयुक्तं श्रद्धया यत्प्रदीयते । तत्सर्वममृतं भूत्वा पितॄणामुपतिष्ठते ॥ ब्रह्माण्डपुराणे—नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते । तर्पणं तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥

२७२. "अथ तर्पणप्रयोगः"—आचम्य प्राणानायम्य । " सङ्कल्पः"— तिथिर्विष्णुस्तथा वारो नक्षत्रं विष्णुरेव च । योगश्च करणं चैव सर्वं विष्णुमयं जगत् ॥ ॐ विष्णवे नमः—अद्यपूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ॐ तत्सत्परमेश्वरप्रीत्यर्थं देवऋषिमनुष्यपितृतर्पणमहं करिष्ये— ॐ पवित्रेस्थोवै०—इति मन्त्रेण अनामिकायां कुशपवित्रं धृत्वा । तदनन्तरं तर्पणार्थे ताम्राद्युक्तपात्रे जलं पूरयेत् । तस्य मन्त्राः— ॐ विश्वान्देवान् [भवत्सुशब्दप्रयोगः श्राद्धकर्मणि कुर्यात् नतु तर्पणे] आवाहयिष्ये ॐ आवाहय । ॐ विश्वेदेवासऽआगत शृणुताम॑ऽइमꣳहवम् । एदम्बर्हिर्निषीदत । * १ $\frac{३४}{७}$ ॥ ॐ विश्वेदेवाःशृणुतेमꣳहवम्मेयेऽअन्तरिक्षे यऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवा यजत्राऽआसद्यास्मिन्बर्हिषि मादयद्ध्वम् । २ $\frac{५३}{३३}$ ॥ (पश्चात्तस्मिञ्जलपूरितपात्रे यवान्तदभावे तण्डुलाक्षतान् श्वेतगन्धश्वेतपुष्पाणि तुलसीदलसहितानि निदध्यात् । ततो हस्तप्रमाणांस्त्रीन्कुशानुदकयुक्तान् श्वेतगन्धश्वेतपुष्पतुलसीदलयवाक्षतैस्तदभावे तण्डुलाक्षतैः सह करसंपुटे धृत्वा पश्चाद्देवानावाहयेत्)॥ तद्यथा— ॐ आगच्छन्तु महाभागा विश्वे देवा महाबलाः । ये तर्पणेऽत्र विहिताः सावधाना भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताम् । इदं जलं तस्मै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रः अस्मत्प्रपितामहः अमुकशर्मा आदित्यरूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रा अस्मन्माता अमुकदा वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रा अ० पितामही अमुकदा रुद्ररूपा तृप्यताम्। इदं जलं तस्यै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रा अ० प्रपितामही अमुकदा आदित्यरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रा अ० सापत्नमाता अमुकदा वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इ० । इ० ॥ पश्चादेतान्मन्त्रान्पठेत्– ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः ऽपितरँः सोम्म्यासः । असुंयऽईयुरँवृकाऽऋतज्ञा-
'स्तेनोवन्तु पितरोहवेषु । ५ ४९/१९ ॥ "[ॐ अङ्गिरसोनः पितरो'
'नवग्ग्वाऽअथर्व्वाणो भृगवःसोम्म्यासः । तेषांव्वयँ सुमतौ य-'
'ज्ञियानामपि भद्रेसौमनसेस्याम । ६ ५०/१९ ॥ ॐ आयन्तुनःपितरँः'
'सोम्म्यासोग्निष्वात्ताःपथिभिर्देवयानैः । अस्मिन्यज्ञेस्व-'
'धया मदन्तोधिब्रुवन्तुतेवन्त्वस्म्मान् । ७ ५८/१९ ॥ ॐ ऊर्ज्जं-'
'व्वहन्तीरमृतङ्घृतम्पयःकीलालम्परिस्रुतम् । स्वधास्थ त-'
'र्प्पयतमेपितॄन् । ८ ३४/२ ॥ ॐ पितृब्भ्यः स्वधायिब्भ्यः स्व-'
'धानमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधानमः प्रपिताम-'
'हेब्भ्यः स्वधायिब्भ्यः स्वधानमः । अक्षन्पितरोमीमदन्त'
'पितरोतीतृपन्त पितरःपितरःशुन्धद्ध्वम् । ९ ३६/१९ ॥ ॐ येचेह-'
'पितरो येचनेहयाँश्च व्विद्मयाँ२ ऽउँचनप्रविद्म । त्वंव्वेत्थ'
'यतिते जातवेदःस्वधाभिर्यज्ञँ सुकृतञ्जुषस्व । १० ६७/१९ ॥ ॐ'
'मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माद्ध्वीर्न्नःसन्त्वोष-'
'धीः । ११ २७/१३ ॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवँ रजः।'
'मधुद्यौरस्तुनःपिता । १२ २८/१३ ॥ ॐमधुमान्नो व्वनस्पतिर्म-'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'ध्रुंमाऽ॒ अस्तुसूर्य्यः । माद्ध्वीर्गावोंभवन्तुनः । १३ २९/१३ ॥]"
ॐ मधु । मधु । मधु । तृप्यध्वम् । तृप्यध्वम् । तृप्यध्वम् ॥
ॐ नमोवंःपितरोरसाय नमोवःपितरःशोषाय नमोवःपितरोजीवाय नमोवःपितरःस्वधायै नमोवःपितरोघोराय नमोवःपितरोमन्यवे । नमोवःपितरःपितरोनमोवो गृहान्नःपितरो दत्तसतोवःपितरो देष्मैतद्वःपितरो व्वास । १४ ३२/२ ॥ आधत्तपितरो गर्भङ्कुमारम्पुष्करस्रजम् । यथेहपुरुषोसत् । १५ ३३/२ ॥ "द्वितीयगोत्रम्"—अमुकगोत्रः अस्मन्मातामहः अमुकशर्मा वसुरूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रः अ०प्रमातामहः अमुकशर्मा रुद्ररूपस्तृप्यताम् इ० । इ० । इ० ॥ अमुकगोत्रः अ०वृद्धप्रमातामहः अमुकशर्मा आदित्यरूपस्तृप्यताम् । इ० । इ० । इ० ॥ अमुकगोत्रा अस्मन्मातामही अमुकदा वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः इ० । इ० ॥ अमुकगोत्रा अ०प्रमातामही अमुकदा रुद्ररूपा । तृप्यताम् इ० । इ० । इ० ॥ अमुकगोत्रा अ०वृद्धप्रमातामही अमुकदा आदित्यरूपा तृप्यताम् इ० । इ० । इ० ॥ (पत्न्याद्याप्तान्तपितृगणस्य अस्मत्पत्नी अस्मत्सुतः अस्मात्पितृव्य इत्यादिसंबन्धं गोत्रं नामचोच्चार्य वसुरूपं त्रींस्त्रीनञ्जलीन्दत्वा तर्पणं कुर्यात्)। तद्यथा—अमुकगोत्रा अस्मत्पत्नी अमुकदा वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इ० इ० ॥ अमुकगोत्रः अस्मत्सुतः अ० शर्मा (यदि तस्य भार्या सुतो वा मृतस्तर्हि सपत्निकः ससुत इत्यूहः कार्यः। एवं पितृव्यादौ ज्ञेयं । सुतादीनां वहुत्वे ज्येष्ठाद्यनुक्रमो ग्राह्यः ।) वसुरूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इ० । इ० ॥ अमुकगोत्रा अस्मत्कन्या अमुकदा। (यदि तस्या भर्त्ता सुतो वा मृतस्तर्हि सभर्तृका ससुता इत्यूहः कार्यः । एवं पितृभगिन्यादौ) । वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इ० । इ० ॥ अ०गोत्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मत्पितृव्यः– अमुकशर्मा वसुरूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इ० । इ० ॥ (एवं द्वितीयतृतीयादिर्ग्राह्यः) ॥ अमुकगोत्रः अस्मन्मातुलः । इ० । इ० । इ० ॥ अमुकगोत्रः अस्मद्भ्राता[1] इ० । इ० । इ० ॥ अमुकगोत्रा अस्मत्पितृभगिनी । इ० । इ० । इ० ॥ अमुकगोत्रा अ०मातृभगिनी । इ० । इ० । इ० ॥ अमुकगोत्रा अ०आत्मभगिनी । इ० । इ० । इ० ॥ अमुकगोत्रः अ०श्वशुरः । इ० । इ० । इ० ॥ अमुकगोत्रः अ०गुरुः । इ० । इ० । इ० ॥ अमुकगोत्रः अ०शिष्यः इ० । इ० । इ० ॥ अमुकगोत्रः अ०मित्रः । इ० । इ० । इ० ॥ अमुकगोत्रः अस्मदाप्तः । इ० । इ० । इ० ॥ "वस्त्रनिष्पीडनम्"– 'पितृवंशे मृता ये च मातृवंशे तथैव च । गुरुश्वशुरबन्धूनां ये चान्ये बान्धवाः स्मृताः ! ये मे कुले लुप्तजलाः पुत्रदारविवर्जिताः । क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा । विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम । तेभ्यो जलं मया दत्तमक्षय्यमुपतिष्ठताम्' ॥ ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः । तृप्यन्तु पितरः सर्वे मातृमातामहादयः । अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् । आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् । येऽबान्धवा बान्धवा ये येऽन्यजन्मनि बान्धवाः । ते सर्व्वे तृप्तिमायान्तु मया दत्तेन वारिणा । ये केचास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः । ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ (वस्त्रं चतुर्द्धा कृत्वा भूमौ वामभागे निष्पीडयेत् । तर्पितजले पवित्रं विसृजेत् । यदि गृहे मृततिथौ सांवत्सरिकश्राद्धादि कर्म स्यात्तर्हि वस्त्रनिष्पीडनं न कुर्यादिति) । सव्येन शुद्धोदकेनाचम्य प्राणायामं कुर्यात् ॥ "अर्घ्यः"—(पात्रे सव्येन शुद्धोदकं पूरयित्वा तन्मध्येऽनामिकया षड्दलं कृत्वा तत्पात्रे श्वेतगन्धाक्षतपुष्पाणि तुलसीदलानि च प्रक्षिप्य पश्चाद्देवेभ्योऽर्घ्यं दद्यात्)– ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ता द्विसीमतःसुरुचो व्वेनऽ



१ एवं सापत्नभ्राता सापत्नभगिनी च ग्राह्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवः । सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः । १६ ३/१३ । ॐ ब्रह्मणे नमः ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳪं सुरे स्वाहा । १७ १५/५ । ॐ विष्णवे नमः ॥ ॐ नमस्ते रुद्र मन्यव ऽउतो त ऽइषवे नमः । बाहुभ्यामुत ते नमः । १८ १/१६ । ॐ रुद्राय नमः ॥ ॐ तत्सवितु० । १९ ३५/३ । ॐ सवित्रे नमः ॥ ॐ मित्रस्य चर्षणीधृतोवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् । २० ६२/११ । ॐ मित्राय नमः ॥ ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके । २१ १/२१ । ॐ वरुणाय नमः ॥ " सूर्योपस्थानम् "– ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ२ ऽअनु । भ्राजन्तोऽअग्नयो यथा । उपयामगृहीतोसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय । सूर्य्य भ्राजिष्ठ भ्राजिष्ठस्त्वन्देवेष्वसि भ्राजिष्ठोहम्मनुष्येषु भूयासम् । २२ ४०/८ ॥ ॐ हᳪं सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् । २३ २४/१० ॥ " दिग्देवतानमस्कारः "—ॐ प्राच्यै दिशे–इन्द्राय नमः ॥ ॐ आग्नेय्यै दिशे–अग्नये नमः ॥ ॐ दक्षिणायै दिशे–यमाय नमः ॥ ॐ नैर्ऋत्यै दिशे–निर्ऋतये नमः ॥ ॐ पश्चिमायै दिशे–वरुणाय नमः ॥ ॐ वायव्यै दिशे–वायवे नमः ॥ ॐ उदीच्यै दिशे–सोमाय नमः ॥ ॐ ईशान्यै दिशे–ईशानाय नमः ॥ ॐ ऊर्ध्वायै दिशे–ब्रह्मणे नमः ॥ ॐ अवाच्यै दिशे–अनन्ताय नमः ॥ जलमध्ये–ॐ ब्रह्मणे नमः । ॐ अग्नये नमः ॐ पृथिव्यै नमः । ॐ ओषधिभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ महद्भ्यो नमः । ॐ विष्णवे नमः । ॐ अद्भ्यो नमः । ॐ अपाम्पतये नमः । ॐ वरुणाय नमः ॥ ततो "मुखविमार्जनम्"– (शुद्धोदकेन संवर्चसेति मन्त्रेण मुखं विमृजेत्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ संव्वर्चसापयसा सन्तनूभिरगन्महि मनसासꣳ शिवेन । त्वष्टासुदत्रोव्विदधातु रायोनुमार्ष्टुतन्न्वो यद्विलिष्टम् । २४ $\frac{१४}{८}$ ॥ " विसर्जनम् "–ॐ देवागातुविदोगातुंव्वित्वागातुमित । मनसस्पतऽइमन्देव यज्ञꣳस्वाहा । २५ $\frac{२१}{८}$ ॥ "अर्पणम्"— व्वातेधाऽ अनेन यथाशक्ति देवऋषिमनुष्यपितृतर्पणाख्येन कर्मणा भगवान् मम समस्तपितरस्वरूपी- जनार्दनवासुदेवः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु । श्रीगयागदाधरस्तुष्यतु । ॐ विष्णवे नम इतित्रिः ॥ इतितर्पणप्रयोगः ॥

इति श्रीपुरन्दरोपाह्वविठ्ठलात्मजनारायणेन विरचितायां वाजसनेयान्हिकसूत्रावल्यां चतुर्थभागकृत्यानि समाप्तानि ॥

॥ अथ पञ्चमभागकृत्यानि ॥

२७३. कारिका । दक्षः—पञ्चमे च तथा भागे संविभागो यथार्हतः । पितृदेवमनुष्याणां कीटानां चोपदिश्यते । देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते । गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठाश्रमी गृही । संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् ॥

२७४. "अथ श्राद्धसूत्रम्." का० प० सूत्रे—अपरपक्षे श्राद्धं कुर्वीतोर्द्ध्वं वा चतुर्थ्यायदहः संपद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा स्नातकानेके यतीन्गृहस्थान् साधून् वा श्रोत्रियान्वृद्धाननवद्यान्स्वकर्मस्थानभावेऽपि शिष्यान् स्वाचारान्द्विर्नग्नशुक्लविक्लिधश्यावदन्तविद्धप्रजननव्याधितव्यङ्गिश्वित्रिकुष्ठिकुनखिवर्ज्यमनिन्द्येनामन्त्रितो नापक्रामेदामन्त्रितो वान्यदन्नं न प्रतिगृह्णीयात्स्नाताञ्छुचीनाचान्तान्प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान्यथाशक्ति पित्र्यऽ एकैकस्योदङ्मुखान्द्वौ वा दैवे त्रीन् पित्र्यऽ एकैकमुभयत्र वा मातामहानामप्येवं तत्र वा वैश्वदेविकꣳ श्रद्धान्वितः श्राद्धं कुर्वीत शाकेनापि वापरपक्षमतिक्रामेन्मासि मासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोशनमिति श्रुतेस्तदहःशुचिरक्रोधनो त्वरितो प्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेदावाहनादि वाग्यतः औपस्पर्शनादामन्त्रिताश्चैवम् ॥ १ ॥ दैवपूर्वꣳ श्राद्धम्–पिण्डपितृयज्ञवदुपचारः पित्र्ये द्विगुणास्तु दर्भाः पवित्रपाणिर्दद्यादासीनः सर्वत्र प्रश्नेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्वान्वासनेषु दर्भानास्तीर्य विश्वान्देवानावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयावाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयावाह्यावकीर्य्यायन्तुन इति जपित्वा यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नपऽ आसिञ्चति शन्नोदेवीरित्येकैकस्मिन्नेव तिलानावपति तिलोसिसोमदैवत्यो गोसवे देवनिर्मितः । प्रत्नमद्भिः प्रत्तः स्वधया पितॄँल्लोकान्प्रीणयाहिनः स्वाहेति सौवर्णरजतौदुम्बरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते पत्रपुटेष्वेकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु या दिव्याऽआपः पयसा सम्बभूवुर्याऽ आन्तरिक्षाऽउतपार्थिवीर्याः ॥ हिरण्यवर्णा यज्ञियास्तानऽ आपः शिवाः शिवतमा शꣳस्योनाः सुहवा भवन्त्वित्यसावेष तेऽर्घ इति प्रथमे पात्रे सꣳस्रवान्समवनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधात्यत्र गन्धपुष्पधूपदीपवाससां च प्रदानम् ॥ २ ॥ उद्धृत्य घृताक्तमन्नं पृच्छति–अग्नौ करिष्य इति कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं दत्वा पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौष्पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति वैष्णव्यर्चायजुरेवाङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्योष्णꣳ स्विष्टमन्नं दद्याच्छक्त्या वाश्नत्सु जपेत् व्याहृतिपूर्वां गायत्रीꣳ सप्रणवाꣳ सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि तृप्तान् ज्ञात्वान्नं प्रकीर्य सकृत्सकृदपो दत्वा पूर्ववद्गायत्रीं जपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा मधुमतीर्मधुमध्विति च तृप्ताः स्थेति पृच्छति तृप्तास्म ऽइत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रींपिण्डानवनेज्य दद्यादाचान्तेष्वित्येक आचान्तेषु उदकं पुष्पाण्यक्षतानक्षैय्योदकं च दद्यादघोराः पितरः सन्तु सन्त्वित्युक्ते गोत्रं नोवर्धतां वर्द्धतामित्युक्ते दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो माव्यगमद्बहुदेयं च नोस्त्वित्याशिषः प्रतिगृह्य स्वधा वाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्य ऽइति पृच्छति वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामित्यस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चत्यूर्जमित्युत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणांदद्याद्ब्राह्मणेभ्यो विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजेवाजेवतेति विसृज्यामावाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्योपवेशयेत् ॥ ३ ॥ अथैकोद्दिष्टम्— एकोर्घ एकं पवित्रमेकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरतास्म इतीतरे ॥ ४ ॥ ततः संवत्सरे पूर्णे— त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितृणामेके प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्यामेतेनैव पिण्डो व्याख्यातोऽत ऊर्ध्वंᳬ संवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यात् ॥५॥ आभ्युदयिके प्रदक्षिणार्थमुपचारः— पूर्वाण्हे पित्र्यमन्त्रवर्ज्यं जप ऋजवो दर्भा यवैस्तिलार्थाः सम्पन्नमिति तृप्तिप्रश्नः सुसम्पन्नमितीतरे ब्रूयुर्दधिबदराक्षतमिश्राः पिण्डा नान्दीमुखान्पितृनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्पितॄन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति न स्वधां प्रयुञ्जीत युग्मानाशयेदत्र ॥ ६ ॥ अथ तृप्तिर्ग्राम्याभिरोषधीभिर्मासं तृप्तिस्तदभाव आरण्याभिर्मूलफलैरोषधीभिर्वा सहान्नेनोत्तरास्तर्पयन्ति छागोस्रमेषानालभ्य क्रीत्वा लब्ध्वा वा न स्वयं मृतानाहृत्य पचेन्मासद्वयं तु मत्स्यैर्मासत्रयं तु हारिणेन चतुरऽऔरभ्रेण पञ्च शाकुनेन षट् छागेन सप्त कौर्मेणाष्टौ वाराहेण नव मेषमाᳫंसेन दश माहिषेणैकादश पार्षतेन संवत्सरं तु गव्येन पयसा पायसेन वा वार्ध्रीणसमाᳫंसेन द्वादशवर्षाणि ॥ ७ ॥ अथाक्षय्यतृप्तिः—खड्गमाᳫंसकालशाकलोहच्छागमाᳫंसमधुमहाशल्को वर्षासु मघाश्राद्धᳫंहस्तिच्छायायां च मन्त्राध्यायिनः पूताः शाखाध्यायी षडङ्गविज्ज्येष्ठसामगो गायत्रीसारमात्रोपि पञ्चाग्निः स्नातकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी द्रोणपाठको ब्राह्मोढापुत्रश्चेति पङ्क्तिपावना वागीश्वरो याज्ञिकश्च नियोज्या अभावेऽप्येकं वेदविदं पङ्क्तिमूर्द्धनि नियुज्यादासहस्रात्पङ्क्तिं पुनातीति वचनात् ॥ ८ ॥ अथ काम्यानि भवन्ति—स्त्रियो प्रतिरूपाः प्रतिपदि द्वितीयायाᳫंस्त्रीजन्माश्वास्तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पञ्चम्याᳫंषष्ठ्यांद्यूतर्द्धिः कृषिः सप्तम्यां वाणिज्यमष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारका एकादश्यां धनधान्यᳫं हिरण्यं तु द्वादश्यां कुप्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्याममावास्यायाᳫं सर्व्वमित्यमावास्यायाᳫं सर्व्वमिति ॥९॥ इति कात्यायनोक्तः नवकण्डिकासूत्रः श्राद्धकल्पः समाप्तः ॥

२७९. "श्राद्धकारिकाः"—श्राद्धारम्भेऽवसाने च पादशौचे तथार्चने। विकिरे पिण्डदाने च पङ्क्तिराचमनं स्मृतम् ॥ विसर्गश्चुलकश्चैव विकिरं पाङ्क्तिवारणम् । करशुद्धिरपोशानं पितृपूर्वाणि षट् सदा॥ मण्डलं बाहुमात्रं च कुर्याद्वै श्राद्धकर्मणि । यजुर्वेदाश्रिता शाखा कात्यायन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचो यथा ॥ गृहस्य दक्षिणे भागे कुर्याद्गोमयमण्डलम् । वदन्ति मुनयः सर्वे चतुरस्रं स्वहस्तकम् ॥ तीर्थश्राद्धे गयाश्राद्धे श्राद्धे मातामहे तथा । विकिरं नैव दातव्यं श्राद्धे षोडशके तथा ॥ उच्छिष्टं शिवनिर्माल्यं वमनं मृतकर्पटम् । श्राद्धे सप्त पवित्राणि, दौहित्रः कुतपस्तिलाः ॥ अक्षय्यासनयोः षष्ठी द्वि[illegible]ासनस्ि अन्नदाने चतुर्थी स्यात् शेषाः संबुद्धयः स्मृताः ॥ [illegible] चैव द्विजाङ्गुष्ठनिवेशनम् । विकिरं तृप्तिप्रश्नं च तीर्थे [illegible] विवर्जयेत् ॥ इष्टिश्राद्धे क्रतुदक्षौ नान्दौ सत्यवसू तथा । [illegible]रवार्द्रवौ चाब्दे तीर्थे स्तो धूरिलौचनौ ॥ कालकामौ सपिण्ड्यां च कुरुकुत्सौ महालये । तर्पणे चैव विज्ञेया विश्वेदेवास्त्रयोदश ॥ **"श्राद्धे ग्राह्याणि पुष्पादीनि"**- कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः । कुशाग्रे शङ्करं विन्द्यात्रयो देवाः कुशे स्थिताः ॥ तुलसी शतपत्राणि भृङ्गराजस्तथैव च । मालती मोगरं चैव पितृणां दत्तमक्षयम् ॥ **"श्राद्धे पिण्डप्रमाणम्"**– सांवत्सरे कपित्थं स्याद्गयायामामलकं तथा । उच्छिष्टे मुष्टिमात्रं च जम्बीरं प्रेतपिण्डके ॥ नारिकेलं सपिण्ड्यां च कुक्कुटाण्डं महालये । प्रमाणमेतत्पिण्डानां वसिष्ठः प्रब्रवीत्सदा ॥ यजुषां पिण्डदाने तु माषान्नं यः परित्यजेत् । वृथा च तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठते ॥ माषान्नं पायसं चान्नं भक्ष्यभोज्यादिकं च यत्। यद्यद्भुक्तं द्विजैः श्राद्धे सर्वं पिण्डार्थमुद्धरेत् ॥ **" श्राद्धे तिथिविचारः"**– देशान्तरे मृतस्यैव तिथिर्न ज्ञायते यदि । कृष्णाष्टमी वाऽमावास्या कृष्णा चैकादशी त्रयं । उदकं पिण्डदानं च तत्र श्राद्धं च कारयेत् ॥**"कात्यायनः**– एकपङ्क्तौ स्थितो भोक्तुं विप्रो विप्रं स्पृशेद्यदि । तदन्नं न त्यजेद्भुक्त्वा गायत्र्यष्टशतं जपेत् ॥ **श्राद्धे पात्रादिविचारः**– न दीर्घं नातिविस्तारं हस्तमात्रं प्रमाणतः । असंलग्नं तु पादाभ्यां पितृपात्रं विधीयते ॥ पलाशमधुकाश्मर्यपात्रं यदि न लभ्यते । कांस्ये तिलोदकं कुर्यान्मृन्मयं च विवर्जयेत् ॥ यत्र पात्रान्तरे प्राप्ते अन्योन्यं समुपस्पृशेत् । देवास्तत्र न गृह्णन्ति दत्तं च पितरस्तथा ॥ अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि । आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ॥ कूष्माण्डं महिषीक्षीरं आढको राजसर्षपः । चणका राजमाषाश्च पितृश्राद्धे विव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्जयेत् ॥ पकान्नं नूतने भाण्डे दीयते शाकमुत्तमम् । न तु जीर्णे रसाः सर्वे मधुराद्याः सुशोभने ॥ पितृश्राद्धेषु दातव्या मल्लिकाः श्वेतपुष्पिकाः । जलोद्भवानि पुष्पाणि शतपत्राणि चम्पकान् । पुष्पाणि रक्तवर्णानि वर्जयित्वा च यत्नतः । शमी भृङ्गारकश्चैव ग्राह्यं च पद्मपत्रकम् ।ग्रोम्थां शतपत्रं च मालतीपुष्पचम्पकम् ॥ तगरं मारकं चैव पितॄणा भिर्वा सम् ॥ देवानां श्राद्धकर्त्ता च नाभ्यङ्गे नैव सूतके । गोपीचन्दनः न स याादित्येवं मनुरब्रवीत् ॥ महालये गयाश्राद्धे पित्रोः प्रत्याब्दिकेऽपि । कृतोद्वाहादिकः कुर्यात्पिण्डदानं च तर्पणम् ॥ पुनर्भुक्तिश्चाध्ययन भारं मार्गं च मैथुनम् । दानं प्रतिग्रहं होमं श्राद्धकृच्चाष्ट वर्जयेत् ॥ मृन्मयेषु च पात्रेषु यः श्राद्धे भोजयेद्द्विजान् । अन्नदाता च भोक्ता च पितरो यान्त्यधोगतिम् ॥ कुर्याच्छ्राद्धावसाने च पादशौचे तथार्चने । विकिरे पिण्डदाने च सद्य आचमनं स्मृतम् ॥ उदकं हस्त आदाय सङ्कल्पं यस्तु कारयेत् । निराशास्तत्र गच्छन्ति देवाः पितृगणैः सह । भूमिर्जनित्री सर्वेषां भूतानां च विशेषतः । तत्र दत्तेन तृप्यन्ति न हस्ते च कदाचन । सिद्धान्नस्य तु सङ्कल्पः क्रियते भूतले तथा । दीयमानं जलं हस्ते दहत्यासप्तमं कुलम् ॥ सर्वदानानि विप्रस्य करे दद्याच्च दक्षिणे । दीयमानं च पिण्डं च भूमौ दद्याद्विचक्षणः । असगोत्रे हविर्दद्यान्मूर्खाभावे च पण्डितः । सगोत्रेऽपि हविर्दद्याद्दैवे पित्र्ये च कर्मणि ॥ सर्वेषामेव दानानां श्राद्धदानं विशिष्यते । मेरुतुल्यं महापापं श्राद्धदानं व्यपोहति ॥ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमतः परम् । पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं स्मृतम् ॥

२७६. **"श्राद्धे ब्राह्मणलक्षणम्"**— सर्वलक्षणसंयुक्तैर्विद्याशीलगुणान्वितैः । पुरुषत्रयविख्यातैः सर्वं श्राद्धं प्रकल्पयेत् ॥ **"आसनम्"**—पितॄणामासनं दद्याद्वामपार्श्वे तथा सुधीः । दक्षिणे चैव देवानां सर्वदा श्राद्धकर्मणि ॥ **"श्राद्धे पिण्डनिषेधः**—व्रतबन्धाद्वत्सरार्धं वत्सरं पाणिपीडनात् । पिण्डनिर्वापकरणाविहीनं श्राद्धमाचरेत् ॥ **"तीर्थश्राद्धे वर्ज्यानि"**— अर्घ्यमावाहनं चैव द्विजाङ्गुष्ठनिवेशनम् । तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागे चतुर्हस्तं सव्यभागे त्रिहस्तकम् । स्रुवं स्रुचश्च शक्तिं च अक्षमालां च दक्षिणे । तोमरं व्यजनं चैव घृतपात्रन्तु वामके । बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम् । दक्षिणे च चतुर्जिह्वं त्रिजिह्वमुत्तरे मुखम् । द्वादशकोटिमूर्त्याख्यं द्विपश्चाशत्कलायुतम् । स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम् । रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् । रौद्रं तु वन्हिनामानं वन्हिमावाहयाम्यहम् ॥

याजकः ।

अग्निः ।

२८८. " अथ वैश्वदेवप्रयोगः "— आचम्य प्राणानायम्य ॥ " सङ्कल्पः "—अद्यपूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम गृहे पञ्चसूनाजनितसकलदोषपरिहारपूर्वकं नित्यकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पञ्चमहायज्ञैरहं यक्ष्ये । ॐ पवित्रेस्थोवै० इति मन्त्रेण दाक्षिणह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तानामिकायां कुशपवित्रं धार्यम् । पश्चात्कुण्डस्थमग्निं वेणुधमन्या प्रबोध्य ध्यायेत् । ॐ चत्वारिशृङ्गा त्रयोऽअस्यपादा द्वेशीर्षेसप्त हस्तासोऽअस्य । त्रिधाबद्धो व्वृषभोरोरवीति महोदेवो मर्त्याँ २ आविवेश । १ $\frac{९१}{१७}$ ॥ ॐ एषोहदेवः प्प्रदिशोनु सर्व्वाः पूर्व्वोहं जातःसऽउगर्भेऽअन्तः । सऽएवजातःसजनिष्ष्यमाणः प्प्रत्यङ्जनांस्तिष्ठति सर्व्वतोमुखः । २ $\frac{४}{३२}$ ॥ मुखं यः सर्वदेवानां हव्यभुक्कव्यभुक् तथा । पितॄणां च नमस्तस्मै विष्णवे पावकात्मने ॥३॥ पावकनाम्ने वैश्वानराय नमः । अग्नये अत्रं नमः । अग्नये गन्धं नमः । अग्नये अक्षतान्पुष्पं च नमः । अग्नये नमो नमः । अग्ने शाण्डिल्यगोत्र मेषध्वज प्राङ्मुख संमुखो भव ॥ (ततः प्रदक्षिणमग्निं पर्युक्ष्य इतरथा तदावृत्तिः । मध्यमानामिकाङ्गुष्ठैर्घृतप्रोक्षितौदनस्य बदरीफलप्रमाणाः कुण्डस्थाग्नावाहुतीर्जुहुयात्) यथा—१—ॐ भूःस्वाहा इदमग्नये न मम । २ —ॐ भुवः स्वाहा इदं वायवे न मम । ३—ॐ स्वः स्वाहा इदं सूर्याय न मम । ४—ॐ भूर्भुवःस्वःस्वाहा इदं प्रजापतये न मय । ५—ॐ देवकृतस्यैनसो वयजनमसि स्वाहा इदमग्नये न मम । ६—ॐ मनुष्यकृतस्यैनसो वयजनमसि स्वाहा इदमग्नये न मम । ७—ॐ पितृकृतस्यैनसो वयजनमसि स्वाहा इदमग्नये न मम । ८—ॐ आत्मकृतस्यैनसो वयजनमसि स्वाहा इदमग्नये न मम । ९—ॐ एनसऽएनसो वयजनमसि स्वाहा इदमग्नये न मम । १०—ॐ यच्चाहमेनोव्विद्वाँश्चकार यच्चाव्विद्वाँस्तस्यसर्व्वस्यैनसोवयजनमसि स्वाहा इदमग्नये न मम । ११—ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम । १२—ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ (इति द्वादशाहुतिरूपो गृहदेवतानां नैवेद्यार्पणरूपश्च देवयज्ञः ॥ तत्र पञ्चायतनदेवतानां नैवेद्यार्पणं कुर्यात् । स च विधिः (१२३ पृष्ठे) द्रष्टव्यः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पूर्व.

" **मण्डलम्** "– भूमौ चतुरङ्गुलमात्रं वितस्तिमात्रं वा उदकेन मण्डलं कृत्वा तदुपरि **बलिहरणं** कुर्यात् । तद्यथा–

उत्तर. | दक्षिण.

(१) **भूतयज्ञः**

१ ॐ धात्रे नमः इदं धात्रे न मम

७ ॐ प्राच्यै दिशे नमः इ०

२ ॐ विधात्रे नमः इदं विधात्रे न मम

३ ॐ वायवेनमः इ० वा०

८ ॐ दक्षिणायै दिशे नमः इ० द०

४ ॐ वायवे नमः इ० वायवे०

१० ॐ उदीच्यै दिशे नमः इ० उदीच्यै०

६ ॐ वायवे नमः इ० वायवे०

१७ ॐ भूतानां च पतये नमः इ० भू०

१६ ॐ उषसे नमः इ० उषसे०

१३ ॐ सूर्याय नमः इ० सू०

१२ ॐ अंतरिक्षाय० इ० अं०

११ ॐ ब्रह्मणे नमः इ० ब्र०

१५ विश्वेभ्यो भूतेभ्यो० इ० वि०

१४ विश्वेभ्यो दे० इ० विश्वे०

(२) ***नित्यश्राद्धम्**
(अपसव्यम्)

१८ ॐ पितृभ्यः स्वधा नमः इ० पि०

(३) **मनुष्ययज्ञः**
(सव्यं उदको०)

१९ ॐ हन्तते सनकादि मनुष्येभ्यो० इ० हं०

(४) †**निर्णेजनम्**

ॐ यक्ष्मैतत्ते निर्णेजनं न मम

(५) **ब्रह्मयज्ञः**
(ब्रह्मयज्ञसिद्ध्यर्थे तिस्रो गायत्रीर्जपेत्)

५ ॐ वायवे नमः इ० वायवे०

९ ॐ पश्चिमायै दिशे नमः इ० प०

पश्चिम.

* (१८) इयमाहुतिः पित्रादि समस्तपितृणां गोत्रोच्चारपूर्वकं नाम गृहीत्वाऽपसव्येन देया ।

† पा० गृ० सूत्रे— यक्ष्मैतत्ते निर्णेजनमिति पात्रं प्रक्षाल्य तज्जलं वायव्यां दिशि निनयेत् ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" अथ गोग्रासादिसमर्पणम् "—सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता । गोग्रासं तु मया दत्तं सुरभिः प्रतिगृह्यताम् । ४ । इदं गोभ्यो न मम ॥ द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यामन्नं प्रदास्यामि रक्षेतां पथि मां सदा । ५ । इदं श्वभ्यां न मम ॥ यमोऽसि यमदूतोऽसि वायसोऽसि महामते । अहोरात्रकृतं पापं बलिं भक्ष तु वायस । ६ । इदं वायसेभ्यो न मम ॥ (देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसङ्घाः । प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् । ७ । इदं देवादिभ्यो न मम) ॥ पिपीलिकाकीटपतङ्गकाद्या बुभुक्षिताः कर्मनियोगबद्धाः । प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्योऽवसृष्टं सुखिनो भवन्तु । ८ । इदं पिपीलिकाकीटपतङ्गकेभ्यो न मम ॥ (हस्तं प्रक्षाल्य प्रथमानुलेपितं भस्म निःसार्य गन्धादितिलकं कुर्यात्) ॥ ॐ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषम् । यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् । ९ $\frac{६१}{४}$ ॥ इति मन्त्रेण भस्म ललाटे ग्रीवायां दक्षिणबाह्वोर्हृदि च धार्यम् ॥ शतायुषं बलायुषम् ॥ " अग्निविसर्जनम् "— गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ १० ॥ ॐयज्ञयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वांयोनिङ्गच्छस्वाहा । एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसर्व्ववीरस्तञ्जुषस्वस्वाहा । ११ $\frac{२२}{८}$ ॥ (कुशपवित्रत्यागः कार्यः) ॥ " अर्पणम् "— अनेन वैश्वदेवाख्येन कर्मणा श्रीयज्ञनारायणस्वरूपी परमेश्वरः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ यस्य स्मृ० ॥ ॐ विष्णवे नमः इति त्रिः ॥ [ततो भोजनात्प्राक् दत्तं बलिं गृहाद्बहिः गोभ्यो वायसादिभ्यश्च समर्प्य हस्तौ पादौ प्रक्षाल्याऽचम्य गृहं गच्छेत्] ॥ इति वैश्वदेवप्रयोगः ॥

२८९. "अथ नानाविधकर्मसु प्रोक्तान्यग्निनामानि." वाचस्पतौ— लौकिके पावऽकोऽह्यग्निः प्रथमः परिकीर्तितः । अग्निस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारुतो नाम गर्भाधाने प्रकीर्त्तितः। पुंसवे चमसो नाम शोभनः शुभकर्मसु। (पुंसवः सीमन्तान्तर्गतः कर्मभेदः।) सीमन्ते ह्यनलो नाम प्रगल्भो जातकर्मणि। पार्थिवो नामकरणे प्राशनेऽन्नस्य वै शुचिः। सभ्यनामा तु चूडायां व्रतादेशे समुद्भवः। गोदाने सूर्यनामा स्यात्केशान्ते याजकः स्मृतः। वैश्वानरो विसर्गे स्याद्विवाहे बलदः स्मृतः। चतुर्थीकर्मणि शिखी धृतिरग्निस्तथाऽपरे। आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः। ब्रह्माग्निर्गार्हपत्ये स्याद्दक्षिणाग्निरथेश्वरः। विष्णुराहवनीये स्यादग्निहोत्रे त्रयो मताः। लक्षहोमेऽभीष्टदः स्यात्कोटिहोमे महाशनः। एके घृतार्चिषं प्राहुरग्निध्यानपरायणाः। रुद्रादौ तु मृडो नाम शान्तिके शुभकृत्तथा। (आदिशब्दाल्लघुरुद्रशतरुद्रातिरुद्रा लक्ष्यन्ते।) पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारके। वश्यार्थे वशकृत्प्रोक्तो वनदाहे तु पोषकः। उदरे जठरो नाम क्रव्यादः शवभक्षणे। समुद्रे वाडवो ह्यग्निर्लये संवर्तकस्तथा। सप्तविंशति संख्याता अग्नयः कर्मसु स्मृताः॥ कराली धूमिनी श्वेता लोहिता नीललोहिता। सुवर्णा पद्मरागा च सप्त जिव्हा विभावसोः। पीता श्वेताऽरुणा कृष्णा धूम्रा तीव्रा स्फुलिङ्गिनी। ज्वलिनी ज्वालिनी चेति कृशानोर्नव शक्तयः॥

२९०. "गन्धे उक्तद्रव्याणि." वाचस्पतिः— कस्तूरी कुङ्कुमं फल्गु सिन्दूरं रक्तचन्दनम्। गोरोचना गन्धकाष्ठं जलं चागरुगोमयम्। धात्रीमूलस्य मृद्गन्धो हरिद्रा गोगृहस्य च। स्नानान्ते सर्ववर्णानामाश्रमाणां तथैव च। एतानि तिलकान्याहुः सन्ध्यादि सर्वकर्मसु। काम्यं नैमित्तिकं नित्यं यत्किञ्चित्कर्म नारद। वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना। कर्म वर्णाश्रमाणां स्याद्दैवं पित्र्यं न तत्फलम्। स्नानं सन्ध्या पञ्चयज्ञान् पैत्र्यं होमादि कर्म यः। विना तिलकदर्भाभ्यां कुर्यात्तन्निष्फलं भवेत्॥ **नागोजीभट्टसंहितायाम्**— शिवागमे दीक्षितैस्तु धार्यं तिर्यक् त्रिपुण्ड्रकम्। विष्णवागमे दीक्षितैस्तु ऊर्ध्वपुण्ड्रं विधारयेत्॥

२९१. "गन्धधारणप्रकारः." ब्राह्मे— अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमा पुष्टिकारिणी। अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी। एतैरङ्गुलिभेदैस्तु कारयेन्न नखैः स्पृशेत्॥ अन्यच्च—वर्त्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीपाकृतिर्वापि वेणुपत्राऽकृतिस्तथा । पद्मं च मुकुलो वाऽपि शङ्खाकारमतः परम् । मत्स्यकूर्माऽकृतिर्वापि तथैव मुकुलाकृति । ब्राह्मणैस्तिलकं कुर्यादनेन विधिना सह ॥ अभ्यङ्गस्नानं कुर्याच्चेद्धार्यं चन्दनमेव च । ललाटे भस्म नो धार्यं सन्ध्योपासनकर्मणि ॥ अनामिक्या च देवस्य ऋषीणां च तथैव च । गन्धानुलेपनं कार्यं प्रयत्नेन विशेषतः । पितॄणामर्पयेद्गन्धं तर्जन्या च सदैव हि । तथैव मध्यमाङ्गुल्या धार्यं गन्धं स्वयं बुधैः ॥

२९२. " गन्धस्थानानि. " ब्रह्माण्डे-- ललाटे केशवं विन्द्यान्नारायणमथोदरे । माधवं हृदये न्यस्य गोविन्दं कण्ठकूर्परे । विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनम् । त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनम् । श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः । पद्मनाभं पृष्ठदेशे ककुद्दामोदरं न्यसेत् । मूर्ध्नि मूलेन मन्त्रेण शेषे द्वादश नामभिः । सङ्कर्षणादिभिः कृष्णे शुक्ले चेत्केशवादिभिः ॥ **शौनकः**— निटिले (भाले) बाहुवच्चैव दण्डवत्कर्णपल्लवे । हृदये कमलाकारमुदरे दीपवाल्लिखेत् । वेणुपत्रसमाकारं बाहुमध्ये समालिखेत् । अधः पृष्ठे स्कन्धदेशे लिखेज्जम्बूफलाकृतिम् । दशाङ्गुलप्रमाणं तु उत्तमोत्तममुच्यते । नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतः परम् ॥ लिङ्गाकारं ललाटे तु हृदयेऽश्वत्थपत्रकम् । वंशपत्राकृतिर्बाह्वोः शेषा दीपकलाः स्मृताः ॥

२९३. "गन्धगुणाः" ब्राह्मे— श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत् । श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ॥

२९४. "मुद्राधारणम्." शङ्खः— शङ्खचक्राद्यङ्कनं च तुलसीदलभक्षणम् । यः कुर्यान्नियतं भक्त्या स याति परमां गतिम् ॥ **नागदेवः**— न पादुकास्थो नादर्शे न जले वा विलोकयेत् । न प्रावृताशिराः कुर्यात्तिलकं धर्मवर्धनम् । प्रभाते विपुलं विन्द्यान्मध्यान्हे च त्रिपुण्ड्रकम् । अपराण्हे पर्वमात्रं तिलकं त्रिविधं स्मृतम् । गोपीचन्दनलिप्ताङ्गो यं यं पश्यति चक्षुषा । तं तं पूतं विजानीयान्नात्र कार्या विचारणा । ऊर्ध्वपुण्ड्रं द्विजस्येष्टं क्षत्रियस्य त्रिपुण्ड्रकम् । अर्धचन्द्रं तु वैश्यस्य तुर्वलं शूद्रजातिषु । गन्धार्थे सर्वदा श्वेतचन्दनं तु प्रशस्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२९५. "अतिथिपूजनम्." मनुः—निवृत्ते वैश्वदेवे च यदान्योऽतिथिराव्रजेत् । तस्मा अन्नं यथाशक्त्या प्रदद्यान्न बलिं हरेत् ॥ शातातपः— प्रियं वा यदिवा द्वेष्यं मूर्खं पण्डितमेव वा । अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना । तथासनप्रदानेन पादप्रक्षालनेन च । श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च ॥ हारीतः— एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ अग्नयोऽतिथिमिच्छन्ति सोऽतिथिः स्वर्गमिच्छति । स्वर्गेऽपीच्छन्ति दातारं सम्यक् सुकृतकारिणम् ॥ याज्ञवल्क्यः— अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः । मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥ शङ्खः— नाग्निहोत्रेण दानेन नोपवासोपसेवनैः । देवाश्च परितुष्यन्ति यथा त्वतिथिपूजनात् ॥ आ० का०— ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः । दुर्भगः क्षीणवित्तश्च षडेते भिक्षुकाः स्मृताः ॥

२९६. "अथ ब्राह्मणसुवासिनीनां समाराधनप्रयोगः." सङ्कल्पः— अद्यपूर्वोच्चारित एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अमुकदेवताप्रीत्यर्थं अमुककर्माङ्गदेवताप्रीत्यर्थं वा ब्राह्मणसुवासिनीसमाराधनं करिष्ये॥ तदङ्गत्वेन ब्राह्मणसुवासिनीपूजनं च करिष्ये॥ इति सङ्कल्प्य। अक्षतान्गृहित्वा ॐ भूर्भुवःस्वः ब्रह्मणे इदमासनम् । स्वासनम् । ब्रह्मणे इदं पाद्यं सुपाद्यम् । ब्रह्मणे इदमर्घ्यं अस्त्वर्घ्यम् । ब्रह्मणे इदमाचमनीयम् । अस्त्वाचमनीयम् । ब्रह्मणे गन्धाः पान्तु । सौमङ्गल्यं चास्तु । अक्षताः पान्तु । आयुष्यमस्तु । पुष्पाणि पान्तु । सौश्रियमस्तु । ताम्बूलं पातु । ऐश्वर्यमस्तु । दक्षिणाः पान्तु । वहुदेयं चास्तु । नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः । १ ॥ एवं ब्राह्मणपूजां विधाय सुवासिनीभ्यः सौभाग्यद्रव्यादि दत्वा । पात्रपरिवेषणानन्तरं गायत्रीमन्त्रेण पात्रप्रोक्षणं कृत्वा देवेभ्यो नैवेद्यं समर्प्य भोजनसंङ्कल्पं कुर्यात् । ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता वभूव । यत्कामास्ते जुहुमस्तन्नो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुव्वयꣳ स्याम पतयो रयीणाम् । २ $\frac{६५}{२३}$ ॥ एको विष्णुर्महद्भूतं पृथक्भूतान्यनेकशः । त्रीँल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः । ३ ॥ "अर्पणम्"—अनेन ब्राह्मणसुवासिनीभोजनेन अमुकदेवता अमुककर्माङ्गदेवता वा प्रीयतां न मम ॥ ॐतत्सद्ब्रह्मार्पणमस्तु ॥

२९७. "भोजनम्." कात्यायनपरिशिष्टसूत्रे—अथातः श्रुतिस्मृतीरनुस्मृत्य भोजनविधिं व्याख्यास्यामः । आचान्तो धृतोत्तरीयवस्त्रो धृतश्रीखण्डगन्धत्रिपुण्ड्रो भोजनशालायामागत्य गोमयलिप्ते शुचौ देशे विहितपीठाधिष्ठितो नित्यं प्राङ्मुखो नोदङ्मुखो न दक्षिणामुखो न प्रत्यङ्मुखो न विदिङ्मुखः श्रीकामश्चेत्प्रत्यङ्मुखः सत्यकामश्चेदुदङ्मुखो यशस्कामश्चेद्दक्षिणामुखो (जीवन्मातृकवर्ज्यं) हस्तपादास्येषु पञ्चस्वार्द्रो नीवारचूर्णैर्गौरमृदा भस्मनोदकेन वा मण्डलं कुर्याच्चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलाकृति वैश्यस्याभ्युक्षणꣳ शूद्रस्य । यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत्सर्वभूतानि रक्षत्विति ॥ तत्र भूमौ निहितपात्रेऽन्ने परिविष्टे पितुन्नुस्तोषमित्यन्नꣳ स्तुत्वा मानस्तोके नमोवः किरिकेभ्यो नमः शम्भवेचेत्येभिरभिमन्त्र्य प्रोक्षयेत् । सत्यन्त्वर्त्तेन परिषिञ्चामीति प्रातः ऋतन्त्वा सत्येन परिषिञ्चामीति सायं तेजोसि शुक्रमस्यमृतमसीति यजुपान्नमभिमृश्याग्निरस्मीत्यात्मानमग्निं ध्यात्वा भूपतये भुवनपतये भूतानाम्पतये इति प्रणवादिकैः स्वाहानमोन्तैर्मन्त्रैः प्रतिमन्त्रं बलीन् हरेदन्तश्चरति भूतेषु गुहायां विश्वतोमुखः । त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदम् । अमृतोपस्तरणमसि स्वाहेति विष्णुमभिध्यायन्नाचम्यान्नममृतं ध्यायन् मौनी हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुतीर्जुहोति ॥ । १ ॥ ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहा ॐ व्यानाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहा ॐ समानाय स्वाहोदानाय स्वाहेति क्रमं याज्ञवल्क्यो मन्यत । उदानाय स्वाहा समानाय स्वाहेति क्रमं शौनकवोधायनौ याज्ञवल्क्योदितक्रमो वाजसनेयिनामित्यूचतुः । दन्तैरनुपस्पृशन् जिह्वया ग्रसेदङ्गुष्ठप्रदेशिनीमध्यमाभिः प्रथमाङ्गुष्ठमध्यमानामिकाभिर्द्वितीयाङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयां कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीं सर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमीमङ्गुष्ठानामिकामात्रग्राह्यान्नेनैता आहुतय इति हारीतव्याख्यातारः । सर्वाभिरङ्गुलीभिरेता इति वौधायनः । मौनं त्यक्त्वा प्राक् द्रवरूपमश्नीयान्मध्ये कठिणमन्ते पुनर्द्रवाशी स्यान्मधुरं पूर्वं लवणाम्ले मध्ये कटुतिक्तादिकान्पश्चाद्यथासुखं भुञ्जीत भुञ्जानो वामहस्तेनान्नं न स्पृशेन्न पादौ न शिरो न वस्तिं न पदा भाजनं स्पृशेदेवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय । मद्भुक्तोच्छिष्टशेषं ये भुञ्जन्ते पितरोऽधमाः । तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठत्विति पितृतीर्थेन दक्षिणतो दत्वामृतापिधानमसि स्वाहेति हस्ते गृहीतानामपामर्द्धं पीत्वार्द्धं भूमौ निक्षिपेत् । रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् । अर्थिनां सर्वभूतानामक्षय्यमुपतिष्ठत्विति तस्माद्देशादपसृत्य गण्डूषशलाकादिभिस्तर्जनीवर्जमास्यं संशोधयेत् । २ ॥ न भार्यादर्शनेऽश्नीयान्न भार्यया सह न सन्ध्ययोर्न मध्यान्हे नार्द्धरात्रे नायज्ञोपवीति नार्द्रशिरा नार्द्रवासा नैकवासा न शयानो न ताम्रभाजने न भिन्ने न ताम्रराजतसौवर्णशङ्खस्फाटिकाश्मभाजनवर्ज्जे न लौहे न मृन्मये न सन्धिसंस्थिते न भुवि न पाणौ न सर्वभोजी स्यात्किञ्चिद्भोज्यं परित्यजेदन्यत्र घृतपायसदधिसक्तुपललमधुभ्यः साध्वाचान्तो दक्षिणपादाङ्गुष्ठे पाणिं निःस्रावयेदङ्गुष्ठमात्रः पुरुषो अङ्गुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुगिति श्वात्राः पीता इति नाभिमालभत अमृता इत्यतः प्राग-
गस्त्यं वैनतेयं च शनिं च वडवानलम् । अन्नस्य परिणामार्थं
स्मरेद्भीमं च पञ्चममित्युदरमालभ्येन्द्राश्विनौ च्यवनशर्यातिसुक-
न्याश्च । भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्नहीयत इति वचनात्स्मृ-
त्वा मुखशुद्धिं कुर्यान्नमो भगवते वाजसनेयाय याज्ञवल्क्याय
नमो भगवते वाजसनेयाय याज्ञवल्क्याय । २ ॥

२९८. "भोजनकालः." वृहद्विष्णुः—स्नात्वा यथावद्धुत्वा च-
देवर्षिपितृतर्पणम् । प्रशस्तपाणिपादस्तु भुञ्जीत प्रयतो गृही । कृते जाप्ये
हुते वन्हौ शुद्धवस्त्रसमन्वितः ॥ देवलः— स्नात्वा प्रक्षाल्य पादौ च
स्रग्दाम्नालङ्कृतः शुचिः । पञ्चयज्ञावशिष्टं च यो भुङ्क्ते सोऽमृताशनः ॥
मनुः—सायंप्रातर्द्विजातीनामशनं श्रुतिनोदितम् । नान्तरा भोजनं
कुर्यादग्निहोत्रसमो विधिः ॥ कात्यायनः— द्विरन्नं मुनिभिः प्रोक्तं
विप्राणामप्रवासिनाम् । नित्यमन्हि तमस्विन्यां सार्धप्रथमयामतः ॥
ब्राह्मणानां सूर्यास्तपर्यन्तं द्वितीयभोजनं नोक्तम् । यथाह श्रुतिः—
दिवारात्रं वा भोजनꣳ इति ॥

२९९. "भोजने वर्ज्यासनानि." प्रचेताः— गोशकृन्मृन्मयं
भिन्नं तथा पालाशपिप्पलम् । लोहबद्धं तथैवार्कं वर्जयेदासनं बुधः ॥

३००. "भोजने वर्ज्यपात्राणि." व्यासः— मृन्मये पत्रपृ-
ष्टे वा आयसे ताम्रभाजने । नाऽश्नीयादपि चेद्भुङ्क्ते नरकं प्रतिपद्यते ॥
पैठीनसिः— वटार्काश्वत्थपत्रेषु कुम्भीतिन्दुकजेषु च । श्रीकामो
न तु भुञ्जीत कोविदारकरञ्जयोः ॥ प्रचेताः— ताम्बूलाभ्यञ्जने चैव
कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

३०१. "भोजने ग्राह्यपात्राणि." पैठीनसिः— सौवर्णे रा-
जते ताम्रे पद्मपालाशपत्रयोः । भाजने भोजने चैव त्रिरात्रं फलमश्नु-
ते ॥ (ताम्रपालाशग्रहणं यतिविषयम्) । पालाशपद्मपत्रेषु गृही
भोजनमाचरेत् ॥ व्यासः— एक एव तु यो भुङ्क्ते गृहस्थः कांस्य-
भाजने । चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् । भूमौ पात्रं
प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः । भोजने भोजने चैव त्रिरात्रफ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लमश्नुते ॥ आ०का० ब्रह्मपत्रेषु यो भुङ्क्ते मासमेकं निरन्तरम् । चान्द्रायणसमं पुण्यं कृतस्यापि चतुर्गुणम् ॥

३०२. " हस्तेनाग्राह्यपदार्थाः. " पैठीनसिः— लवणं व्यञ्जनं चैव घृतं तैलं तथैव च । लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ॥ शातातपः— हस्तदत्तानि चान्नानि प्रत्यक्षं लवणं तथा । वर्जनीयं प्रयत्नेन ब्राह्मणेन विशेषतः ॥ अत्रिः— घृतं वा यदि वा तैलं ब्राह्मणो नखनिःसृतम् । न भुञ्जीत न दद्याच्च भुक्त्वा पादं समाचरेत् ॥ मनुः— दर्व्या देयं शृतान्नं च समस्तं व्यञ्जनादिकम् । अपक्वं स्नेहपक्वं च न तु दर्व्या कदाचन ॥

देशे च व्यानं " अन्नग्रासप्रमाणम्. " विश्वामित्रकल्पे— कुक्कुटा- ... नं विधीयते ॥

३१४. " प्राणाहु... दिशमाह. " देवलः— उपलिप्ते शुचौ पञ्चभ्यः स्वाहाप्रणवसंयुता... । प्राङ्मुखोऽन्नं तु भुञ्जीत शुचि पीठम- च ॥ शङ्खः—प्राणार्थं मनसा ... प्राङ्मुखो भुङ्क्ते यशस्वी दक्षिणामुखः । णिना पात्रं गृहित्वा भुवि संस्थितम् ॥ ...खः । पुत्रवांस्तु गृहे नित्यं माङ्गुष्ठैः प्राणस्यैवाहुतिं क्षिपेत् । मध्यमाऽ... र्पयेत्तु सदा बुधः ॥ क्षिपेत् । कनिष्ठानामिकाङ्गुष्ठैर्व्यानस्य तदनन्तरम् । कनि...मुखः । तयो- रुदाने चाहुतिं क्षिपेत् । समाने सर्वाङ्गुलिभिः सदा चैवाहुतिर्भवे...ग्रासं शौनकः—तर्जनीमध्यमाङ्गुष्ठैर्लग्नात्प्राणाहुतिर्भवेत् । कनिष्ठानामिकाङ्गुष्ठैरपाने जुहुयाद्धविः । मध्यमाऽनामिकाङ्गुष्ठैर्व्यानाय जुहुयाद्बुधः । कनिष्ठातर्जन्यङ्गुष्ठैरुदानाय त्वुदाहृतम् । सर्वाङ्गुलीभिरादाय समानायाहृतं बुधैः । तथैव पष्ठीं दद्यात्तु चैतन्याय सदा बुधः ॥

३१९. " क्षुत्तृडुपशमनार्थमन्नार्पणम्. " स्मृतिचन्द्रिकायाम्— भोज्यान्नात्किञ्चिदन्नस्य धर्मराजाय वै बलिम् । दत्वाथ चित्रगुप्ताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुष्कोणं वर्तुलं पितृकर्मणि । त्रिकोणं हि प्रकुर्वीत प्रेतकर्मणि सर्वदा । विधाय दैवे पैत्र्ये च वेदाङ्गुलप्रमाणतः ॥ अन्यच्च— वितस्तिमात्रं चतुरङ्गुलं वा कोणैश्चतुर्भिर्विदधीत मण्डलम् । प्राणाग्निहोत्रार्थमिदं समुक्तं महाऽनुभावेन हि हारितेन ॥ द्वादशाङ्गुलमानं तु व्रतिनां योगिनां सदा । चतुरङ्गुलं विधातव्यं त्रिकोणं प्रेतकर्मणि ॥ हस्तौ पादौ मुखं पात्रं मण्डलं चार्द्रपञ्चकः । प्रकुर्याद्भोजनं राजन् गृहस्थाश्रमतत्परः ॥ दैवे कायेऽथवा पैत्र्ये उक्तवान्कमलापतिः ॥

३०८. "मण्डलाभावे दोषः." मार्कण्डेयपुराणे—यातुधानाः पि-
शाचाश्च क्रूराश्चैव तु राक्षसाः । हरन्ति रसमन्नं च मण्डले
ऽमृताशनः ॥
३०९. " पङ्क्तिवारणम्. " नागदेवः—
भस्मना पाङ्क्तिवारणम् ॥ गोभिलः—अग्नि । नान्तरा भोजनं
सलिलेन च । द्वारेण चैव मार्गेण पङ्क्तिभे — द्विरन्नं मुनिभिः प्रोक्तं
रणाभावे दोषः. " गोभिलः- स्वन्यां सार्धप्रथमयामतः ॥
त्मनः । सर्वेषां तत्समं तेषां यभोजनं नोक्तम् । यथाह श्रुतिः—
ङ्क्त्युपविष्टानां विप्रा इति ॥
न भोजयेत भोजने वर्ज्यासनानि. " प्रचेताः— गोशकृन्मृन्मयं
कृ तथा पालाशपिप्पलम् । लोहबद्धं तथैवार्कं वर्जयेदासनं बुधः ॥

३००. " भोजने वर्ज्यपात्राणि. " व्यासः— मृन्मये पत्रपृष्ठे वा आयसे ताम्रभाजने । नाऽश्नीयादपि चेद्भुङ्क्ते नरकं प्रतिपद्यते ॥ पैठीनसिः— वटार्काश्वत्थपत्रेषु कुम्भीतिन्दुकजेषु च । श्रीकामो न तु भुञ्जीत कोविदारकरञ्जयोः ॥ प्रचेताः— ताम्बूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

३०१. " भोजने ग्राह्यपात्राणि. " पैठीनसिः— सौवर्णे राजते ताम्रे पद्मपालाशपत्रयोः । भाजने भोजने चैव त्रिरात्रं फलमश्नुते ॥ (ताम्रपालाशग्रहणं यतिविषयम्) । पालाशपद्मपत्रेषु गृही भोजनमाचरेत् ॥ व्यासः— एक एव तु यो भुङ्क्ते गृहस्थः कांस्यभाजने । चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् । भूमौ पात्रं प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः । भोजने भोजने चैव त्रिरात्रफ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अम्बु हस्तेन चादाय यः कुर्यात्तु प्रदक्षिणम् । हिंसितं तत्पिशाचेन अभोज्यं मनुरब्रवीत् ॥ आपोशानमकृत्वा तु यो भुङ्क्तेऽनापदि द्विजः। भुञ्जानो वा तथा ब्रूयाद्गायत्र्यष्टशतं जपेत् ॥

३१३. "**प्राणाग्निहोत्रम्.**" **नागदेवः**—ब्राह्मणो भोजनं कुर्यात्प्राणाग्निहोत्रपूर्वकम् । यथोक्तविधिना नित्यं न चैतदवगर्हयेत् ॥ **विश्वामित्रकल्पे**—प्राणाग्निहोत्रं वक्ष्यामि सर्वयज्ञेषु दुर्लभम् । यं ज्ञात्वा मुच्यते जन्तुर्जन्ममृत्युजरादिभिः। विधिना भुज्यते येन मुच्यते च ऋणत्रयात् । कुलानुद्धरते विप्रो नरकानेकविंशतिम् । सर्वयज्ञफलप्राप्तिः सर्वलोकेषु गच्छति । हृत्पुण्डरीकमरणिं मनोन्मथनसंज्ञकम् । वायुरज्वा मथेदग्निमात्माध्वर्युः प्रकीर्तितः ॥ "**प्राणाग्निहोत्रे पञ्चाग्निनामानि**"—मुखे—**आहवनीयः** । हृदि—**गार्हपत्यः** । नाभौ—**दक्षिणाग्निः** । दक्षिणे—**आवसथ्यः** । उत्तरे—**सभ्य** इति ॥ **धन्वन्तरिः**—हृदि **प्राणो** गुदेऽ**पानः समानो** नाभिमण्डले । **उदानः** कण्ठदेशे च **व्यानः** सर्वशरीरगः ॥

३१४. "**प्राणाहुतिग्रहणम्.**" **विष्णुपुराणे**—प्राणेभ्य स्त्वथ पञ्चभ्यः स्वाहाप्रणवसंयुताः । पञ्चाहुतीस्तु जुहुयात्प्रणवाग्निनिभेषु च ॥ **शङ्खः**—प्राणार्थं मनसा ध्यायेत्समासं पूजयेत्सदा । वामेन पाणिना पात्रं गृहित्वा भुवि संस्थितम् ॥ **विश्वामित्रकल्पे**—तर्जनीमध्यमाङ्गुष्ठैः प्राणस्यैवाहुतिं क्षिपेत् । मध्यमाऽनामिकाङ्गुष्ठैरपाने चाहुतिं क्षिपेत् । कनिष्ठानामिकाङ्गुष्ठैर्व्यानस्य तदनन्तरम् । कनिष्ठातर्जन्यङ्गुष्ठैरुदाने चाहुतिं क्षिपेत् । समाने सर्वाङ्गुलिभिः सदा चैवाहुतिर्भवेत् ॥ **शौनकः**—तर्जनीमध्यमाङ्गुष्ठैर्लग्नात्प्राणाहुतिर्भवेत् । कनिष्ठानामिकाङ्गुष्ठैरपाने जुहुयाद्धविः । मध्यमाऽनामिकाङ्गुष्ठैर्व्यानाय जुहुयाद्बुधः । कनिष्ठातर्जन्यङ्गुष्ठैरुदानाय त्युदाहृतम् । सर्वाङ्गुलीभिरादाय समानायाहृतं बुधैः । तथैव षष्ठीं दद्यात्तु चैतन्याय सदा बुधः ॥

३१५. "**क्षुत्तृडुपशमनार्थमन्नार्पणम्.**" **स्मृतिचन्द्रिकायाम्**—भोज्यान्नात्किञ्चिदन्नस्य धर्मराजाय वै बलिम् । दत्वाथ चित्रगुप्ताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेतेभ्यश्चेदमुच्चरेत् । यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् । प्रेतानां तृप्तयेऽक्षय्यमिदमस्तु यथा सुखम् ॥

२१६. "भोजने विशेषनियमाः–आ० का०— वामहस्ते जलं धृत्वा मणिबन्धे निधाय च । भुञ्जमानः पिबन्वारि नोच्छिष्टं मनुरब्रवीत् । यः पुनर्भोजनं कुर्वन्नश्नन्तं संस्पृशेद्द्विजः । ततस्तेन न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् । अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् । वैश्यस्य चान्नमेवान्नं शूद्राणामधमं स्मृतम् ॥ व्यासः– षड्भ्योऽन्नमन्वहं दद्यात्पितृयज्ञविधानतः । ततोऽन्यदन्नमादाय निर्गत्य भवनाद्बहिः । काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च । उपविश्य गृहद्वारे तिष्ठेद्यावन्मुहूर्त्तकम् । अप्रमत्तोऽतिथिं लिप्सुर्भावशुद्धः प्रतीक्षकः । आगतं दूरतः शान्तं भोक्तुकाममकिञ्चनम् ॥ दक्षः–विभागशीलो यो नित्यं क्षमायुक्तो दयापरः । भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् ॥ व्यासः–विप्रभोजी भवेन्नित्यं नित्यं चामृतभोजनः । विप्रसंभुक्तशेषं तु यज्ञशिष्टं तथाऽमृतम् । पञ्चार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमाश्रितः । हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता ॥ बृहस्पतिः–न स्पृशेद्वामहस्तेन भुञ्जानोऽन्नं कदाचन । न पादौ न शिरो बस्तिं न पदा भाजनं स्पृशेत् ॥ बौधायनः–भोजनं हवनं दानमुपहारः प्रतिग्रहः । बहिर्जानु न कार्याणि तद्वदाचमनं स्मृतम् ॥ बृहस्पतिः–घृतपात्रस्तु भुञ्जीत पञ्चग्रासान्महामुने । शेषमुद्धृत्य भोक्तव्यं पित्र्यर्थे न तु चोद्धरेत् ॥ अन्यच्च–नृणां भोजनकाले तु यदि दीपो विनश्यति । तदन्नं पाणिना स्पृष्ट्वा सावित्रीं मनसा स्मरेत् । पुनर्दीपं ततो लब्ध्वा शेषं भुञ्जीत कामतः । अन्यदन्नं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् ॥ भोजनान्ते शतपदं गत्वा ताम्बूलभक्षणम् । शयनं वामकुक्षौ चेद्द्वेषज्यं किं प्रयोजनम् ॥ नारदः–अगस्त्यं कुम्भकर्णं च शनिं च वडवानलम् । आहारपचनार्थाय स्मरेद्भीमं वृकोदरम् । आतापी मारितो येन वातापी च निपातितः । समुद्रः शोषितो येन समेऽगस्त्यः प्रसीदतु ॥ इत्युक्त्वा तु स्वहस्तेन परिमार्ज्य निजोदरम् । अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः । निर्माल्यं तुलसीपत्रं भक्षयेद्भोजनोत्तरम् । शुद्धो भवति तत्काले एवं सर्वं विधीयते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुः–ताम्बूले च फले चैव मुक्ते स्नेहानुलेपने । दन्तलग्नस्य संस्पर्शे नोच्छिष्टं मनुरब्रवीत् ॥ **देवलः**–भुक्तोच्छिष्टं समाघ्राय सर्वेभ्यो घृतवर्जितम् । उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि । अमृतापिधानमसीत्यपः प्राश्य भुवि क्षिपेत् । अनन्तरं शिखां चैव बध्नीयाद्वामपाणिना । उत्थाय बहिरागत्य मुखहस्तादि शोधयेत् । आचम्य च ततः कुर्याद्दन्तकाष्ठस्य भक्षणम् । दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत् । न तत्र बहुशः कुर्याद्यत्नमुद्धरणं प्रति ॥ **अत्रिः**–आचान्तोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् । उद्धृतेऽप्यशुचिस्तावद्यावन्नो मृज्यते मही । भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान् । आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीम् ॥ **नारदः**–सर्वं सशेषमश्नीयाद्घृतपायसवर्जितम् । अग्राङ्गुलिषु तच्छेषं निधाय भोजनोत्तरम् । जलपूर्णाञ्जलिं कृत्वा पीत्वाचैव तदर्धकम् । अग्राङ्गुलिस्थितं शेषं भूमौ दत्वांजलेर्जलम् । शेषं निषिञ्चेत्तत्रैव पठन्मन्त्रमिमं बुधः । (**रौरवेत्यादि०**) । भोजनानन्तरं विष्णोरर्पितं तुलसीदलम् । भक्षयेद्देहशुद्ध्यर्थं चान्द्रायणशताधिकम् ॥

३१७. "**भोजनप्रकारमाह.**" **पुलस्त्यः**–अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरान्नकम् । लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः ॥ **विष्णुपुराणे**–प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनः । अन्ते पुनर्द्रवाशी तु बलारोग्यैर्न मुञ्चति । जठरं पूरयेदर्धमन्नैर्भागं जलस्य च । वायोः सञ्चारणार्थाय चतुर्थमवशेषयेत् ॥

३१८. "**भोजने मिताहारः.**" **मनुः**–अनारोग्यमनायुष्यमस्वर्ग्यमतिभोजनम् । अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ **आपस्तम्बः**–अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशाऽरण्यवासिनः । द्वात्रिंशत्तु गृहस्थस्य ह्यमितं ब्रह्मचारिणः ॥

३१९. "**अथ भोजनप्रयोगः**"–(वैश्वदेवोत्तरं काकादिभ्यो बलिं दत्वा । अनन्तरमतिथिं भोजयित्वा ततः स्वकुटुम्बेन सह भोजनं कुर्यात्) "**देवतीर्थग्रहणम्.**"– **अकालमृत्युहरणं सर्वव्याधिविनाशनम् । विष्णुपादोदकं तीर्थं जठरे धारयाम्यहम्** । (भोजनपात्रस्याधो दक्षिणत उदकेन चतुरस्रं चतुरङ्गुलं मण्डलं कृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुपरि भोजनपात्रं घृताक्तान्नेन सह स्थापयेत् । तत उदकपात्राणि स्वदक्षिणतो निधाय । " पङ्क्तिवारणम् " – [पात्रस्य समन्तात् ॐ नमो भगवते वासुदेवाय इति मन्त्रेण दक्षिणतः समंताज्जलधारां कुर्यात्] । पात्रेऽन्ने परिविष्टे सति " अन्नस्तुतिः " – ॐ पितुन्नुस्तोषम्महो धर्म्माणन्तविषीम् । यस्यत्रितोव्व्योजसा व्वृत्रंव्विपर्व्वमर्दयत् । १३४ ॥ ॐ मानस्तोके तनयेमानऽआयुषि मानोगोषु मानोअश्श्वेऽषु रीरिषः । मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्वा हवामहे । २१६/१३ ॥ * ॐ नमोवःकिरिकेभ्यो देवानाꣳ हृदयेभ्यो नमोव्विचिन्वत्केभ्यो नमोव्विक्षीणत्केभ्यो नमऽआनिर्हतेभ्यः । ३४६/१६ ॥ ॐ नमः शम्भवायच मयोभवायच । नमः शङ्करायच मयस्करायच नमः शिवायच शिवतरायच । ४४१/१६ ॥ " अन्नाभिमन्त्रणम् " — गायत्रीमन्त्रेण तथा सत्यन्त्वर्त्तेन परिषिञ्चामि (इति मन्त्रेण प्रातः अन्नप्रोक्षणं) तद्वत् गायत्रीमन्त्रेण तथा ऋतं त्वा सत्येन परिषिञ्चामि (इति मन्त्रेण सायमन्नप्रोक्षणम्) ॥ " अन्नाभिस्पर्शनम् " – ॐ तेजोसिशुक्रमस्यमृतमसि धामनामासि । प्रियन्देवाना मनाधृष्टंदेवयजनमसि । ५३१/१ ॥ " आत्मन्यग्निध्यानम् " – ॐ अग्निरस्मिजन्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽआसन् । अर्क्कस्त्रिधातूरजसोव्विमानोजस्रोघर्मोहविरऽस्म्मिनाम । ६६६/१८ ॥ " भूमौ बलिः " – ॐ भूपतये स्वाहा नमः । ॐ भुवनपतये स्वाहा नमः । ॐ भूतानां पतये स्वाहा नमः ॥ (इति मन्त्रेण भोजनपात्राद्घृताक्तमोदनं गृहीत्वा पात्राद्दक्षिणभागे बदरीफलप्रमाणाः प्राक्संस्था उदक्संस्था वा आहुतीर्दातव्याः ततो हस्तं प्रक्षाल्य आपोशनार्थे आचमनवदुदकं सव्यहस्ते गृहीत्वा) " आपोशनम् " – अन्नं ब्रह्मरसो विष्णुर्भोक्ता देवो महेश्वरः । एवं ध्यात्वा द्विजो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते । अन्तश्चरति भूतेषु गुहायां विश्वतोमुखः ।

* भुवपतये स्वाहानम इत्यपि पाठः । संहितायां तथोक्तत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदम् ॥ ॐ अन्न॑प॒तेन्न॑स्य नोदेह्यनमी॒वस्य॑ शु॒ष्मिण॑÷ । प्रप्र॑दा॒तारं॑न्तारिष॒ऽऊर्ज्जं॑न्नोधेहि द्वि॒पदे॒चतु॑ष्पदे । ७$\frac{८३}{११}$ ॥ ॐ अमृतोपस्तरणमसि स्वाहा ॥ (इति मन्त्रेण आपोशनस्यार्धमुदकं पिबेत् । शेषमुदकं प्रजापतितीर्थेन बल्याहुतिस्थलेऽर्पयेत् । ततो वामहस्तेन पात्रमालभ्य । पश्चाद्विष्णुं ध्यात्वा घृताक्तौदनस्य बदरीफलप्रमाणाः पञ्च प्राणाहुती मुखे जुहुयात् ।) "प्राणाहुतयः"— ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ ब्रह्मणे नमः इति केचित् ॥ (ततो वामहस्तेन नेत्रयोरुदकस्पर्शनम्) "पश्चाच्छिखामुक्तिः"— ब्रह्मपाशसहस्राणि रुद्रशूलशतानि च । विष्णुचक्रसहस्राणि शिखामुक्तिं करोम्यहम् ॥ ततो यथेच्छं भुक्त्वा भोजनान्ते उच्छिष्टशेषान्नस्य पात्रवामभागे भूम्यां चित्राहुतिं दद्यात्—मद्भुक्तोच्छिष्टशेषं ये भुञ्जन्ति पितरोऽधमाः । तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु ॥ पश्चादुत्तरापोशानार्थमुदकं दक्षिणहस्ते गृहीत्वा ॐ अमृतापिधानमसि स्वाहा । इति मन्त्रेणार्धं पीत्वा शेषमुदकमुच्छिष्टान्नचित्राहुतौ पितृतीर्थेन निक्षिपेत् ॥ यथा—रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् । अर्थिनां सर्वभूतानामक्षय्यमुपतिष्ठतु । अङ्गुष्ठमात्रः पुरुषो अङ्गुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुगिति ॥ पश्चाद्वामहस्तेन शिखां बद्ध्वा तूष्णीं [भोजनपात्राद्बलिं वा चित्राहुतिमादायोत्थाय तदन्नं काकानामर्पयेत्] पश्चाद्धस्तौ मुखं च सम्यक् क्षालयेत् ॥ तत आचम्य प्राणानायम्य । "नेत्रोपस्पर्शनम्"— शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ । भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न नश्यति ॥ "उदरालम्भनम्"— ॐ श्वा॒त्राऽ॑पी॒ता भ॑वत यू॒यमा॑पोऽअ॒स्माक॑म॒न्तरु॒दरे॑ सु॒शेवा॑÷ । ताऽअ॒स्मभ्य॑मय॒क्ष्माऽअ॑नमी॒वाऽअना॑गस॒ऽ स्वद॑न्तु दे॒वी÷ । । ७$\frac{१२}{४}$ ॥ अगस्त्यं वैनतेयं च शनिं च वडवानलम् । अन्नस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिणामार्थं स्मरेद्भीमं च पञ्चमम् ॥ पश्चान्निर्माल्यतुलसीपत्रं भक्षयित्वा शतपदीं गच्छेत् । इति भोजनप्रयोगः ॥

३२०. "ताम्बूलभक्षणम्." मार्कण्डेयः— सुपक्कं च सुपत्रं च चूर्णेन च समन्वितम् । अदत्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद्बुधः । एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् । अतिश्रेष्ठं त्रिपूगं च त्वधिकं चैव दुष्यति । पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः । जीर्णपत्रं हरत्यायुः शिरा बुद्धिविनाशिनी । तस्मादग्रं च मूलं च शिरां चैव विशेषतः । चूर्णपर्णं वर्जयित्वा ताम्बूलं खादयेद्बुधः ॥ वाचस्पतिः— प्रभाते पूगमधिकं माध्यान्हे खादिरं तथा । निशासु चूर्णमधिकं ताम्बूलं भक्षयेत्सदा । आद्यं विषोपमं पानं द्वितीयं भेदि दुर्जरम् । तृतीयादनु पातव्यं सुधातुल्यं रसायनम् । ताम्बूलं नातिसेवेत न विरक्तो बुभुक्षितः । देहदृक्केशदन्ताग्निश्रोत्रेन्द्रियबलक्षयः । विना पर्णं मुखे दत्वा गुवाकुं भक्षयेद्यदि । तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥ सङ्ग्रहे— काश्मीरैलालवङ्गैश्च जातिक्रमुकचूर्णकैः । ताम्बूलं खादयेन्नित्यं खादिरेण समन्वितम् ॥ (रात्रौ तु खादिरं वर्ज्यं इति बहूनां सांप्रदायो वर्तते) ॥ "ताम्बूलवर्जनम्." वाचस्पतौ— ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् । तपस्विनां च विप्रेन्द्र सर्वपुण्यहरं स्मृतम् ॥

इति श्रीपुरन्दरोपाव्हविठ्ठलात्मजनारायणेन विरचितायां वाजसनेयान्हिकसूत्रावल्यां पञ्चमभागकृत्यानि समाप्तानि ॥

अथ षष्ठसप्तमभागकृत्यानि.

३२१."कारिका." दक्षः— इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ॥ अत्रिः— इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत् । वृथा विवादवाक्यानि परिवादांश्च वर्जयेत् । दिवा स्वापं न कुर्वीत स्त्रियं चैव विवर्जयेत् । आयुर्हन्ति दिवानिद्रा दिवास्त्री पुण्यनाशिनी ॥

इतिश्रीपु० विठ्ठ० वाज० षष्ठसप्तमभा० समाप्तानि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाष्टमभागकृत्यानि ·

३२२. " कारिकाः. " दक्षः— अष्टमे लोकयात्रा तु बहिः सन्ध्या ततः. पुनः । होमो भोजनकं चैव यच्चान्यद्गृहकृत्यकम् । कृत्वा चैवं ततः पश्चात्स्वाध्यायं किञ्चिदाचरेत् । प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् । यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते । नैमित्तिकानि काम्यानि निपतन्ति यथा यथा । तथा तथैव कार्याणि न कालस्तु विधीयते । सर्वत्र मध्यमौ यामौ हुतशेषं हविश्च यत् । भुञ्जानश्च शयानश्च ब्राह्मणो नावसीदति ॥ " लोकयात्रा "— ग्रामे च यान्यगाराणि देवतानां तदीक्षणात् । लोकयात्रेति कथिता तां कुर्वन्पुण्यभाग्भवेत् ॥

३२३. " सायंसन्ध्याकालः. " यमः— रवेरस्तमयात्पूर्वं घटिकैका यदा भवेत् । सायंसन्ध्यामुपासीत कुर्याद्धोमं च पूर्ववत् ॥ भविष्ये— शौचं कृत्वा यथान्यायमर्द्धास्तामितभास्करे । सायंसन्ध्यामुपस्थाय आसीनस्त्वथ वाग्यतः ॥ शौनकः— अर्धास्तमित आदित्ये पश्चिमाया य उत्तरः । भागस्तन्मुख आसीनः सावित्रीं वाग्यतो जपेत् ॥

३२४. " सायंसन्ध्यास्थलम्. " व्यासः— बहिः सन्ध्या दशगुणा ह्रदप्रस्रवणेषु च । सा च तीर्थे शतगुणा सहस्रा जान्हवीतटे ॥

३२५. " कालातिक्रमे सायंसन्ध्या. " जमदग्निः— एकाहं चाप्यतिक्रम्य सन्ध्यावन्दनकर्म च । अहोरात्रोषितो भुक्त्वा गायत्र्या अयुतं जपेत् । द्विरात्रे द्विगुणं प्रोक्तं त्रिरात्रे त्रिगुणं भवेत् । त्रिरात्रानन्तरं चेत्स्याच्छूद्र एव न संशयः ॥ गौतमः— सन्ध्याकाले त्वतिक्रान्ते स्नात्वा चैव यथा विधि । जपेदष्टशतं देवीं ततः सन्ध्यां समाचरेत् ॥ वसिष्ठः— कालातिक्रमणे चैव त्रिसन्ध्यमपि सर्वदा । चतुर्थार्घ्यं प्रकुर्वीत भानोर्व्याहृतिपूर्वकम् ॥ यमः— प्राणायामत्रयं प्रातः सङ्गवे द्विगुणं चरेत् । माध्यान्हे त्रिगुणं प्रोक्तमपराण्हे चतुर्गुणम् । सायान्हे पञ्चगुणकं सन्ध्यातिक्रमणे भवेत् ॥

३२६. " सायंसन्ध्यायां दिग्विचारः. " शौनकः—दिशोऽष्टधा विभक्तायाः प्रतीच्या भागसप्तकम् । हित्वा दक्षिणतोऽन्यस्तु यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽष्टमो भाग उत्तरः । अस्याभिमुखतो विप्रो भूत्वा प्रयतमानसः । जपन्नासीत सावित्रीं सन्ध्यां कृत्स्नामतन्द्रितः ॥

३२७. "सायंसन्ध्यायां मन्त्राचमनम्." शौनकः—अग्निश्चेत्यनुवाकेन सायंकाले पिबेदपः ॥

३२८. "सायंसन्ध्यायामर्घ्यम्." गृह्यपरिशिष्टसूत्रे—अथाचम्य दर्भपाणिः पूर्णमुदकाञ्जलिमुद्धृत्यादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सावित्र्या त्रिरर्घ्यं निवेद्य क्षिपेदिति ॥

३२९. "सायंसन्ध्यायां जपविचारः." कात्यायनः—सन्ध्याकाले व्यतीते तु जपं कृत्वा पुनर्मनः । ऋचं वाचं त्र्यृचं जप्त्वा ततः सन्ध्यामुपासते ॥ व्यासः—जपेद्वारुणमन्त्रांस्तु इमम्मेवरुणादिकान् । चतुर्मन्त्रान्विशेषज्ञः सन्ध्याफलमवाप्नुयात् ॥

३३०. "सायंसन्ध्याफलम्." बौधायनः—यदुपस्थकृतं पापं यच्च योनिकृतं भवेत् । सायंसन्ध्यामुपस्थाय तेन तस्मात्प्रमुच्यते ॥

३३१. "अथ सायंसन्ध्याप्रयोगः"—(यथोक्तस्नानानन्तरं यथाविधि भस्मधारणं कुर्यात्) ॥ मन्त्रोक्तस्नानकारी चेत्तर्हि तेन निर्जलं भस्म धार्यम्)॥ भस्मधारणादारभ्य हृदि पवित्रकरणपर्यन्तं सर्वो विधिः प्रातःसन्ध्यावज्ज्ञेयः ॥ "सङ्कल्पः"—अद्येत्यादि ममोपात्तदुरितक्षयार्थं श्रीविष्णुप्रीत्यर्थं सायंसन्ध्योपासनमहं करिष्ये ॥ "आवाहनम्"—वृद्धां सरस्वतीं कृष्णां पीतवस्त्रां चतुर्भुजाम् । शङ्खचक्रगदापद्महस्तां गरुडवाहिनीम् । सामवेदकृतोत्सङ्गां सर्वलक्षणसंयुताम् । वैष्णवीं विष्णुदैवत्यां विष्णुलोकनिवासिनीम् । आवाहयाम्यहं देवीमायान्तीं विष्णुमण्डलात् । आगच्छ वरदे देवि त्र्यक्षरे विष्णुवादिनि । सरस्वति छन्दसां मातर्विष्णुयोनि नमोऽस्तु ते ॥ मार्जनादिविधिः प्रातःसन्ध्यावत् ॥ "अम्बुप्राशनम्" अग्निश्चमेति नारायण ऋषिः । अग्निर्देवता । अनुष्टुप् छन्दः । अम्बुप्राशने विनियोगः । ॐ अग्निश्चमामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदन्हा पापमकार्षं । मनसा वाचा हस्ताभ्यां । पद्भ्यामुदरेण शिश्ना । अहस्तदवलुम्पतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्किञ्चित् दुरितं मयि । इदमहं मामसृतयोनौ । सत्ये ज्योतिषि जुहोमि स्वाहा ॥ शेषो विधिः प्रातःसन्ध्यावत् ॥ (सायान्हे पश्चिमाभिमुखस्तिष्ठन्नर्घ्यत्रयं दद्यात्) ॥ शेषं प्रातःसन्ध्यावत् । (जपमालां नासिकाग्रदेशे धृत्वा) । " अर्पणम् "—अनेन सायंसन्ध्याङ्गभूतेन कात्यायनगोत्रधारिण्या गायत्र्या यथाशक्त्या कृतेन जपकर्मणा श्रीभगवान् विष्णुस्वरूपी सविता देवता प्रीयतां न मम । शेषं गायत्रीतर्पणं विना प्रातःसन्ध्यावत् ॥ इति सायंसन्ध्याप्रयोगः ॥

३३२. वाजसनेयानां सायं तर्पणं वैश्वदेवश्च नास्ति अतस्तद्विधिर्नोक्तः । प्रदोषव्रतं चेत्तर्हि सायं भोजनात्प्राग्वैश्वदेवः कर्त्तव्यः । परन्तु तर्पणं दिवा कुर्यात् ॥ इति कात्यायनवचनात् ॥ (अयं प्रकारः १६० पृष्ठे द्रष्टव्यः) ॥

३३३. "दीपकालः दीपगुणाश्च." मरीचिः—रवेरस्तं समारभ्य यावत्सूर्योदयो भवेत् । यस्य तिष्ठेद्गृहे दीपस्तस्य नास्ति दरिद्रता॥ आयुर्दः प्राङ्खो दीपो धनदः स्यादुदङ्मुखः । प्रत्यङ्मुखो दुःखदोऽसौ हानिदो दक्षिणामुखः । (प्रत्यङ्मुखनिषेधस्तु नित्यदीपविषयः । श्रीकार्त्तवीर्यादिदीपः प्रत्यङ्मुख एव स्थापनीयः) ॥

३३४ "दीपलक्षणम्"—सुदर्शने—नेत्राल्हादकरः सार्चिर्दूरतापविवर्जितः । सुशिखः शब्दरहितो निर्धूमो नातिन्हस्वकः ॥ कोशजं रोमजं वस्त्रं वर्तिकार्ये न योजयेत् । न मिश्रीकृत्य दद्यात्तु दीपं स्नेहे घृतादिकं ॥ कार्पासवर्त्तिका प्रोक्ता दीपकृत्येषु सर्वदा । नचैव स्थापयेद्दीपं साक्षाद्भूमौ कदाचन ॥ "पुरुषस्य दीपनिर्वापणे दोषः"—दीपनिर्वापणात्पुंसः कूष्माण्डच्छेदनात् स्त्रियः । अचिरेणैव कालेन वंशनाशो भवेद् ध्रुवम् ॥ "दीपस्तुतिः—"दीपो ज्योतिः परब्रह्म दीपो ज्योतिर्जनार्दनः । दीपो हरतु मे पापं सन्ध्यादीप नमोऽस्तु ते ॥ शुभं करोतु कल्याणमारोग्यं सुखसंपदम् । शत्रुबुद्धिविनाशं च दीपज्योतिर्नमोऽस्तु ते ॥ इति दीपं नत्वा तत्सन्निधावाप्तादिकानां कुशलाभिवादनं कुर्यात् ॥ पश्चाद्गृहदेवादीनां पञ्चोपचारैः पूजां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वा । यदि प्रदोषोपवासस्तर्हि षोडशोपचारैर्देवं संपूज्य सायं भोजनं कृत्वा ॥ ग्रन्थाद्यवलोकनेन शर्वरीप्रथमभागं नीत्वा स्वपेत् ॥

३३९.“स्त्रीपुरुषयोर्व्यवायः.” पा०गृह्यसूत्रे—चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोत्यग्नेः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा । वायोः प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । सूर्यप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । चन्द्रप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा । गन्धर्वप्रायाश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति हुत्वा हुत्वैतासामाहुतीनामुदपात्रे सꣳस्रवां समवनीय तत एनां मूर्द्धन्यभिषिञ्चति या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहसाविसथैनाꣳ स्थालीपाकं प्राशयति प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनि माꣳसैर्माꣳसानि त्वचा त्वचमिति । तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति तामुदुह्य यथर्त्तुप्रवेशनं याथाकामी वा काममाविजनितोः सम्भवामेति वचनादथास्यै दक्षिणाꣳसमधिहृदयमालभते यत्ते सुशी मे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदःशतं जीवेम शरदःशतꣳ शृणुयाम शरदःशतमित्येवमत ऊर्ध्वम् । ११ ॥ अथर्त्तुमतीं जायामभिगच्छे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पिण्डपित्रयज्ञेन यजेत मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा तत एतामाहुतिं जुहोत्याधत्त पितर इत्यलङ्कारमवजिघ्रत्यायन्तु न इति जपत्येवमथर्तुमती जाया हृदयमालभ्य पूर्ववत्सव्येन पाणिनोपस्थमभिमृशति भगप्रणेतरिति प्राशुतेदानीमिति रेतोमूत्रमिति सन्धत्ते गायत्रेणेति प्रतिमन्त्रं मन्थति पुत्रकामोऽभिगच्छेन्नियम् । १३ ॥ अथ गर्भाधानꣳ स्त्रियाः पुष्पवत्याश्चतुरहादूर्ध्वꣳ स्नात्वा विरजायास्तस्मिन्नेव दिवा आदित्यं गर्भमित्यादित्यमवेक्षते गृहे वा स्नापयित्वा तामभिगच्छेदिति श्रुतेस्तस्मिन्प्रजायाः संभवकाले निशायां कुर्याद्यदि दिवा मैथुनं वर्जयेत् क्लीवा अल्पवीर्या अल्पायुषाश्च प्रसूयन्ते तस्मादेतद्वर्जयेत्प्रजाकामो गृही। श्रुतिस्मृत्यविरोधाभ्यां दक्षिणेन पाणिना उरू प्रसार्य प्रजास्थानमभिमृशति पूषा भगꣳसविता मे ददातु रुद्रः कल्पयति ललामगुं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति सꣳसृजेथास्तेजो वैश्वानरो दद्याद्ब्रह्माणमामन्त्रयते ब्रह्मा गर्भं दधात्विति प्राङ्मुख उदङ्मुखो वोपविष्टो मन्थेद्रेतो मूत्रमिति चैके स्नावणं कुर्यात् । १४ ॥ सा यदि गर्भं न दधीत सिꣳह्याः श्वेतपुष्पाया उपोष्य पुष्पेण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीयमोषधी त्रायमाणा सहमाना सरस्वती । अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति। १५ ॥ यथाह सुश्रुते भगवान् धन्वन्तरिः—

अथास्मै पञ्चविंशतिवर्षाय द्वादशवर्षां पत्नीमावहेत् । पित्र्यधर्मार्थकामप्रजाः प्राप्स्यतीति ॥ किञ्च—तद्वर्षाद्द्वादशात्काले वर्तमानमसृक् पुनः । जरापक्वशरीराणां याति पञ्चाशता क्षयम् ॥ ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम् । यद्याधत्ते पुमान्गर्भं कुक्षिस्थः स विपद्यते । जातो वा न चिरञ्जीवेज्जीवेद्वा दुर्बलेन्द्रियः । तस्मादत्यन्तबालायां गर्भाधानं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारयेत् । अतिवृद्धायां दीर्घरोगिण्यामन्येन वा विकारेणोपसृष्टायां गर्भाधानं नैव कुर्वीत । पुरुषस्याप्येवंविधस्य त एव दोषाः संभवन्ति॥ ततः स्त्रियं सुस्नातां चतुर्थेऽहनि धौतवाससमलङ्कृतां कृतमङ्गलस्वस्तिवाचनां भर्ता पश्येत् । तत्र—रात्रौ— परस्परोपकारात्परस्परानुग्रहात्परस्परानुप्रवेशाच्च । ततः स्त्रीपुंसंयोगे तेजः शरीराद्वायुरुदीरयति । ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते । संसृज्यते चार्त्तवेन । ततोऽग्निसोमसंयोगात्संसृज्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते ॥ आचारार्के—धौतवस्त्रं च ताम्बूलं संयोगे च सुखावहम् । भर्तुः पादौ नमस्कृत्य पश्चाच्छय्यां समाविशेत् । संस्मृत्य परमात्मानं पत्न्या नङ्के प्रसारयेत् । रेतः सिञ्चेत्ततो योन्यां तस्माद्गर्भं विभर्त्विति ॥ उज्ज्वलायाम्— उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् । एकशय्यासनक्रीडाश्रुम्बनालिङ्गने तथा ॥ कोपो रोषश्च निर्भर्त्सः संभोगे च न दोषभाक् । कञ्चुकेन समं नारी भर्तुः सङ्गं समाचरेत् । त्रिभिर्वर्षैश्च मध्ये वा विधवा भवति ध्रुवम् ॥ उक्तं च शम्भुरहस्ये—गवां पश्चाद्द्विजस्याङ्घ्रिर्योगिनां हृत्कवेर्वचः । परं शुचितमं विद्यान्मुखं स्त्रीवन्हिवाजिनाम् ॥ धन्वन्तरिः—तत्रैव— शुक्रबाहुल्यात्पुमानार्त्तवबाहुल्यात्स्त्री साम्यादुभयोर्नपुंसकमिति । ऋतुस्तु द्वादशरात्राद्भवति नष्टार्त्तवः इति । विकल्प्येवं चतुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां द्वादश्यां चोपेयादयं पुत्रकामः । अतःपरं पञ्चम्यां सप्तम्यां नवम्यामेकादश्यां च स्त्रीकामः । त्रयोदशीप्रभृतयो निन्द्याः ॥

३३६ "स्त्रीणां मैथुनात्प्राग्विधिः"—लब्धगर्भायाश्चैतेष्वहःसु लक्ष्मणावटशृङ्गासहदेवाविश्वदेवानामन्यतमां क्षीरेणाभिपुत्य त्रींश्चतुरो वा बिन्दून्दद्याद्दक्षिणे नासापुटे पुत्रकामायै न च तान्निष्ठीवेत् ॥ उक्तञ्च— आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ । स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः ॥ परञ्च— कर्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत् । यथा तथा दैवयोगाद्दौहृदं जनयेद्धृदि ॥ "वर्ज्यस्त्री"— स्तोकां तु न स्त्रियं गच्छेन्नातुरां न रजस्वलाम् । नातिबालां न कुपितामप्रशस्तां च गर्भिणीम् ॥ शिवसंहितायां— मासे षष्ठे सप्तमे वाऽष्टमे वा प्राप्ते पत्न्या नैव कुर्यात्कदाचित् । होमं यानं देवयात्रां तथैव तस्या हस्तेनाशनं विप्र पुण्यम् ॥ "रतिवर्ज्यदिनानि."

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुः—तासामाद्याश्चतस्रस्तु निन्दितैकादशी तथा । त्रयोदशी च शेषास्तु प्रशस्तास्त्वत्र रात्रयः । अमावास्याष्टमी चैव पौर्णमासी चतुर्दशी । ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥

३३७. **"शयनकालः."** **याज्ञवल्क्यः**—उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च । भृत्यैः परिवृतो भुक्त्वा नातितृप्याथ संविशेत्॥ **धन्वन्तरिः**—पूर्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः । रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् ॥ **यमः**—पूर्वरात्रे व्यतीते तु संगच्छेद्रतिमन्दिरम् । पादौ प्रक्षालयेत्पूर्वं पश्चाच्छय्यां समाविशेत् ।

३३८. **"शयने भूमिः."** **मात्स्ये**—शुचिदेशं विविक्तं तु गोमयेनोपलेपयेत् । वैदिकैर्गारुडैर्मन्त्रैरभिमन्त्र्य स्वपेत्ततः । माङ्गल्यं पूर्णकुभं च शिरःस्थाने निधापयेत् ॥ रात्रिसूक्तं जपन् रात्रौ रात्रिक्षेमो भवेन्नरः ॥

३३९. **"शय्याविचारः."** **शिल्पशास्त्रे**—चतुराशीतिपर्वाणि दैर्घ्येण परिकल्पयेत् । षष्टयङ्गुलानि विस्तारं मश्चकं हस्तसंमितम् । एवं शय्या विधातव्या सर्वेषां शयनोचिता । मानाधिक्ये दरिद्रः स्यान्मानहीने सुखक्षयः ॥ **विष्णुपुराणे**—न विशालां न वा भग्नां नासमां मलिनां न च । न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम् ॥ **"पर्यङ्कोऽप्युक्तस्तत्रैव"**—आयामः सप्ततालः स्याच्चतुस्तालं तु विस्तृतः। द्वितालमुन्नतो ज्ञेयमेतत्पर्यङ्कलक्षणम् ॥ **"तालादिप्रमाणम्"**—अङ्गुष्ठादिकनिष्ठान्तं भवेन्मानचतुष्टयम् । प्रादेशतालगोकर्णा वितस्तिस्तु यथाक्रमम् ॥ **"निषिद्धशय्यागारम्."** **मार्कण्डेयः**—नार्द्रवासाश्च नग्नश्च नोत्तरापरमस्तकः । नाकाशे सर्वतः शून्ये न च चैत्यद्रुमे तथा ॥ **गार्ग्यः**—शून्यालये स्मशाने च एकवृक्षे चतुष्पथे । महादेवगृहे वापि मातृवेश्मनि न स्वपेत् । न यक्षनागायतने स्कन्दस्यायतने तथा । कूलच्छायासु च तथा शर्करालोष्ठपांसुषु । न स्वपेच्च तथा भूमौ विना दीक्षां कथञ्चन । धान्यगोधनविप्राणां गुरूणां च तथोपरि । मृतदन्तमये चैव विद्युद्दग्धे पलाशजे । न शयीत नरो धान्ये शयने पञ्चदारुजे ॥ **"पञ्च दारूणि"**—पञ्च दारूणि चोक्तानि चूतजम्बूद्रुमौ तथा । अश्मपीठोत्थितश्चैव स्वेन सिक्तस्तरुस्तथा । करिभग्नस्तथा चैव न शयीत क्वचिन्नरः ॥ **"उक्तशय्या."** **धन्वन्तरिः**—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयनासनयानानि मनोज्ञानि मृदूनि च । निद्रानाशे तु कुर्वीत तथान्यानपि बुद्धिमान् ॥

३४०. "शयने दिग्विचारः". मार्कण्डेयः–प्राक्शिराःशयने विन्द्याद्धनमायुश्च दक्षिणे । पश्चिमे प्रबला चिन्ता हानिर्मृत्युरथोत्तरे॥ गार्ग्यः–स्वगृहे प्राक्शिराः शेते श्वाशुर्ये दक्षिणाशिराः । प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः ॥ विष्णुपुराणे–प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप । सदैव स्वपतः पुंसो विपरीतं तु रोगदम् "दिवाशयने योग्याः". धन्वन्तरिः–दिवास्वप्नं च तृट्शूलहिक्काऽजीर्णातिसारिणाम् ॥

३४१. "शयने आवश्यककर्माणि." मार्कण्डेयः— रात्रिसूक्तं जपन्स्मृत्वा देवांश्च सुखशायिनः । नमस्कृत्वाव्ययं विष्णुं समाधिस्थं स्वपेन्निशि ॥ दक्षः– निद्रासमयमासाद्य ताम्बूलं वदनात्त्यजेत् । पर्यङ्कात्प्रमदां भालात्पुण्ड्रं पुष्पाणि मस्तकात् ॥ गार्ग्यः–यानि कानि च पुष्पाणि यत्किञ्चिदनुलेपनम् । अलक्ष्मीपरिहारार्थं नित्यं कुरु युधिष्ठिर ॥ (रात्रौ वामकुक्षिशयनं नित्यमेव कर्तव्यम्) ॥

३४२. "सुखशायिनां स्मरणम्." गोभिलः—अगस्तिर्माधवश्चैव मुचुकुन्दो महाबलः । कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः ॥ हारीतः— नर्मदायै नमः प्रातर्नर्मदायै नमो निशि । नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः । सर्पापसर्प भद्रं ते दूरं गच्छ महाविष । जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर । आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्त्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥ एतान् गारुडमन्त्रांस्तु निशायां पठते यदि । मुच्यते सर्वबाधाभ्यो नात्र कार्या विचारणा ॥

३४३. "अथ रात्रिस्मरणसूक्तम्"— (एतत्सूक्तं शयनात्प्राक् हस्तौ पादौ प्रक्षाल्याचम्य पठेत्) हरिः ॐ— आरात्त्रि पार्थिवꣳरजः पितुरप्प्रायिधामभिः । दिवः सदाꣳसि बृहती वितिष्ठस आत्त्वेषं वर्त्तते तमः । १ $\frac{32}{34}$ ॥ उपस्तचित्रमाभर ऽस्म्मभ्यं वाजिनीवति । येनं तोकञ्च तनयञ्च धामहे । २ $\frac{33}{34}$ ॥ इति रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावित्र्या गायत्री गायत्र्या लोका भवन्ति । अर्चयन्ति तपः सत्यं मधुरक्षन्ति यद्भुवम् । एतद्धि परमं तपः । आपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरों नम इति ॥ ६ ॥ य इदमथर्वशिरो ब्राह्मणोऽधीते अश्रोत्रियः श्रोत्रियो भवति अनुपनीत उपनीतो भवति सोऽग्निपूतो भवति स वायुपूतो भवति स सूर्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स सर्वैर्देवैर्ज्ञातो भवति स सर्वैर्वेदैरनुध्यातो भवति स सर्वेषु तीर्थेषु स्नातो भवति तेन सर्वैः क्रतुभिरिष्टं भवति गायत्र्याः षष्टि सहस्राणि जप्तानि भवन्ति प्रणवानामयुतं जप्तं भवति । स चक्षुषः पङ्क्तिं पुनाति । आसप्तमात् पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति । द्वितीयं जप्त्वा गणाधिपत्यमवाप्नोति । तृतीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यमों सत्यं । इत्यथर्ववेदे शिवाथर्वशीर्षम् (इति शिरउपनिषत्) ॥

४. अथ सूर्याथर्वशीर्षम्— अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः ॥ ब्रह्मा ऋषिः । आदित्यो देवता । गायत्री छन्दः । हंसाद्यग्निनारायणयुक्तं बीजं । हृल्लेखा शक्तिः । द्विपदादि सर्गसंयुक्तं कीलकं धर्मार्थकाममोक्षेषु जपे विनियोगः । षट्स्वरारूढबीजेन षडङ्गं रक्ताम्बुजसंस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं च श्रीसूर्यनारायणं यऽएवं वेद स वै ब्राह्मणः ॥ ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यं । ॐ तत्सवि० । परोरजसेसावदोम् । ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम् । सूर्य आत्मा जगतस्तस्थुषश्च । सूर्याद्वै खल्विमानि भूतानि जायन्ते । सूर्याद्यज्ञाः पर्जन्योऽन्नमात्मा । नमस्ते आदित्याय त्वमेव केवलं कर्त्तासि । त्वमेव प्रत्यक्षं विष्णुरसि । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं रुद्रोऽसि । त्वमेव प्रत्यक्षमृगसि । त्वमेव प्रत्यक्षं यजुरसि । त्वमेव प्रत्यक्षं सामासि । त्वमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षमथर्वासि । त्वमेव सर्वं छन्दोसि । आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापो जायन्ते । आदित्याज्ज्योतिर्जायते । आदित्याद्व्योम दिशो जायन्ते । आदित्याद्वेदा जायन्ते ।-आदित्याद्देवा जायन्ते । आदित्यो वा एष एतन्मण्डलं तपति । आसावादित्यो ब्रह्म । आदित्योऽन्तःकरणमनोबुद्धिचित्ताहङ्काराः । आदित्यो वै व्यानसमानोदानापानप्राणाः । आदित्यो वै श्रोत्रत्वक्चक्षूरसनानासाः । आदित्यो वै वाक्पाणिपादोपस्थपायूनि । आदित्यो वै शब्दस्पर्शरूपरसगन्धाः ॥ आदित्यो वै वचनादानगमनानन्दविसर्गाः आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः । नमो मित्राय भानवे मृत्योर्मा पाहि भ्राजिष्णवे विश्वहेतवे नमः । सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् । अग्निर्नः पार्थिवेभ्यः । सूर्याद्भवन्ति भूतानि । सूर्येण पालितानि तु । सूर्ये लयं प्राप्नुवन्ति । यः सूर्यः सोहमेव च । चक्षुर्नो देवः सविता । चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः । आदित्याय विद्महे सहस्रकराय धीमहि । तन्नः सूर्यः प्रचोदयात् । सविता पश्चात्तात् सविता पुरस्तात् । सवितोत्तरात्तात् । सविताधरात्तात् । सविता नः सुवतु सर्वतातिम् । सवितानो रासतां दीर्घमायुः । ओमित्येकाक्षरं ब्रह्म घृणिरितिद्वे अक्षरे सूर्य इत्यक्षरद्वयम् । आदित्य इति त्रीण्यक्षराणि एतद्वैसूर्यस्याष्टाक्षरं मनुम् । यः सदाहरहर्जपति । सो ब्रह्मण्यो ब्राह्मणो भवति सूर्याभिमुखं जप्त्वा महाव्याधिभयात्प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्यभक्षणात्पूतो भवति । अपेयपानात्पूतो भवति । अगम्यागमनात्पूतो भवति । व्रात्यसंभाषणात्पूतो भवति । मध्यान्हे सूर्याभिमुखः पठेत् । सद्यः पञ्चमहापापात्प्रमुच्यते । सैषा सावित्री विद्या न कस्यचित्प्रशंसेत् । एतन्महाभागः प्रातःपठति स भाग्यवान् जायते । पशून् विन्दति । वेदार्थं लभते । त्रिकालं जप्त्वा । क्रतुशतफलं प्राप्नोति । हस्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्ये जपति स महामृत्युं तरति । य एवं वेद । इत्युपनिषत् ॥
इति सूर्याथर्वशीर्षम् ॥

५. अथ देव्यथर्वशीर्षम्—ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवी साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्यं च अहमानन्दानानन्दौ अहं विज्ञानाविज्ञाने अहं ब्रह्माब्रह्मणी द्वे ब्रह्मणीवेदितव्ये । इति वाथर्वणी श्रुतिः । अहं पञ्चभूतानि अहं पञ्चतन्मात्राणि अहमखिलं जगत् वेदोहमवेदोहम् विद्याहमविद्याहम् अजाहमनजाहम् अधःश्चोर्ध्वं च तिर्यञ्चाहम् अहꣳ रुद्रेभिर्वसुभिश्चरामि अहमादित्यै... ...तविश्वेदेवैः अहंमित्रावरुणावुभौ विभर्मि अहमिन्द्राग्नी अहमश्विनावुभौ अहꣳ सोमं त्वष्टारं पूषणं भगं दधामि अहं विष्णुमुरुक्रमम् ब्रह्माणमुत्प्रजापतिं दधामि अहं दधामि द्रविणꣳ हविष्मते सुप्राव्ये यजमानाय सुन्वते अहꣳ राष्ट्रीसङ्गमनीव वसूनाम् चिकितुषी प्रथमा यज्ञियानाम् अहꣳ सुवे पितरमस्य मूर्द्धन्मम यो निरस्वात् समुद्रे य एवं वेद सदैवीꣳ संपदमाप्नोति ते देवा अब्रुवन् । नमो देव्यै महादेव्यै शिवायै सततं नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः । देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥ कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् । सरस्वतीमदितिं दक्षदुहितरं नमामः ॥ पावनां शिवाम् । महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि । तन्नो देवी प्रचोदयात् । अदितिर्ह्यजनिष्ट दक्षया दुहिता तव । तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥ कामो योनिः कमला वज्रपाणिर्गुहाहंसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया चा पृथक्क्लेशा विश्वमाता दिविद्याः ॥ एषात्मशक्तिः । एषा विश्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहिनी पाशाङ्कुशधनुर्बाणधरा । एषा श्री महाविद्या । ए एवं वेद स शोकं तरति नमस्ते भगवति मातरस्मान्पाहि सर्वतः । सैषा वैष्णवा वसवः सैवैकादश रुद्राः सैषा द्वादशादित्याः सैषा विश्वे देवाः सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचयक्षसिद्धाः सैषा सत्वरजस्तमांसि सैषा ब्रह्मविष्णुरुद्ररूपिणी सैषा प्रजापतीन्द्रमनवः सैषा ग्रहनक्षत्रज्योतिष्कलाकाष्ठादिविश्वरूपिणी तामहं प्रणौमि नित्यम् । पापापहारिणी देवी भुक्तिमुक्तिप्रदायिनी । अनन्तां विजयां शुद्धां शरण्यां सर्वदा शिवाम् ॥ वियदाकारसंयुक्तं वीतिहोत्रसमन्वितम् । अर्द्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ॥ एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः । ध्यायन्ति परमो. सूर्येण ज्ञानाम्बुराशयः ॥ वाङ्मया ब्रह्मभूस्तस्मात् षष्ठवक्त्रसमन्वितम् ॥ सूर्योवामश्रोत्रबिन्दुसंयुक्ताष्टतृतीयकम् ॥ नारायणेन संमिश्रो वायुश्चाधारयुक्तयः । विच्चे नवार्णकोणस्य महामानन्ददायकः ॥ हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ॥ त्रिनेत्रां रक्तवसनां भक्तकामदुहं भजे । भजामि त्वां महादेवि महाभयविनाशिनि ॥ महादारिद्र्यशमनी महाकारुण्यरूपिणी । यस्याः स्वरूपं ब्रह्मादयो न जानन्ति ॥ तस्मादुच्यते अज्ञेया । यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता । यस्या लक्षं नोपलक्ष्यते तस्मादुच्यते अलक्षा । यस्या जननं नोपलक्ष्यते तस्मादुच्यते अजा । एकैव सर्वत्र वर्त्तते तस्मादुच्यते एका । एकैव विश्वरूपिणी तस्मादुच्यतेऽनेका । अत एवोच्यतेऽज्ञेयानन्तलक्ष्याजैकानेका । मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी । ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ॥ यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्त्तिता । तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ॥ नमामि भवभीतोऽहं संसारार्णवतारिणीम् । इदमथर्वशीर्षं योऽधीते । स पञ्चाथर्वशीर्षफलप्राप्नो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति। इदमथर्वशीर्षमज्ञात्वा योर्चां स्थापयति शतलक्षं प्रजप्तापि नार्चा शुद्धिं च विन्दति। शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः। दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते। महादुर्गाणि तरति महादेव्याः प्रसादतः॥ सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायंप्रातः प्रयुञ्जानो अपापो भवति। निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति। नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति स महामृत्युं तरति। य एवं वेद इत्युपनिषत्॥ इति देव्यथर्वशीर्षम्॥

६. "अथाथर्ववेदीयलक्ष्मीसूक्तम्"– ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह॥ १॥ तांमऽआवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ २॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम्॥ ३॥ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥ ४॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियंलोके देवजुष्टामुदाराम्। तां पद्मनेमिं शरणमहं प्रपद्येऽअलक्ष्मीर्मेनश्यतां त्वां वृणोमि॥५ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। यस्य फलानि तपसानुदंतु मायांतरायाश्च बाह्याऽअलक्ष्मीः॥६॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतो सुराष्ट्रेस्मिन् कीर्तिं वृद्धिं ददातु मे॥ ७॥ क्षुत्पिपासामलाज्येष्ठा अलक्ष्मीर्नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुदमेगृहात्॥ ८॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रीयम्॥ ९॥ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ १०॥ कर्दमेन प्रजाभूता मयि सम्भ्रम कर्दम। श्रियं वासय मे कुले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातरं पद्ममालिनीम् ॥ ११ ॥ आपः सृजन्तु स्निग्धानि चिक्लीत वसमे गृहे । नीचदेवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १३ ॥ आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १४ ॥ तांमऽआवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतिं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥ १६ ॥ सरसिजनिलये सरोजहस्ते धवलान्तरे शुभगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १७ ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ॥ धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ ॥ १८ ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ॥ सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ १९ ॥ नक्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥ भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२० पद्मानने पद्मऊरू पद्माक्षी पद्मसंभवे ॥ तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ २१ ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ २२ ॥ महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ॥ तन्नो लक्ष्मीः प्रचोदयात् ॥ २३ ॥ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ॥ विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधस्व ॥ २४ ॥ आनन्दः कर्दमः श्रीदः श्चिक्लीत इति विश्रुताः । ऋषयः श्रियपुत्राश्च मयि श्रीर्देवी देवता ॥ २५ ॥ ऋणरोगादि दारिद्र्यं पापञ्च अपमृत्यवः । भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥ २६ ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥२७॥

॥ इत्यथर्ववेदीयलक्ष्मीसूक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. "अथ रुद्राभिषेकविधिः"—आचम्य प्राणानायम्य । देशकालौ सङ्कीर्त्य । "सङ्कल्पः"—अद्यपूर्वोच्चरित एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धिद्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशङ्करमृत्युंजयमहारुद्रदेवताप्रीत्यर्थं अमुकदेवताप्रीत्यर्थं वा रुद्रैकादशिन्यभिषेकयुक्तं सकृदावर्तनाभिषेकयुक्तं वामुकदेवतापूजनमहं करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं स्मरणं वा करिष्ये इति सङ्कल्प्य । गणपतिपूजां स्मरणं वा कृत्वा षडङ्गादिन्यासोत्तरं ध्यानावाहनादिपूर्वपूजां पञ्चामृतस्नानादियुक्तां विधाय जलदुग्धाद्यविच्छिन्नधारया रुद्राभिषेकं कुर्यात् ॥ तद्यथा—

"अथ रुद्रे प्रथमोऽध्यायः"—हरिः ॐ— गणानान्त्वा गणपतिꣳहवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहेव्वसोमम । आहमजानि गर्ब्भधमात्त्वमजासि गर्ब्भधम् । १ $\frac{१९}{२३}$ ॥ गायत्त्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह । बृहत्युष्णिहा ककुप्प्सूचीभिः शम्यन्तुत्त्वा । २ $\frac{२३}{२३}$ ॥ द्विपदायाश्चतुष्प्पदा स्त्रिपदायाश्च षट्पदाः । व्विछन्दायाश्च सछन्दाः सूचीभिः शम्म्यन्तुत्त्वा । ३ $\frac{३४}{२३}$ ॥ सहस्तोमाः सहछन्दसऽआवृत्तः सहप्प्रमाऽऋषयः सप्प्त दैव्व्याः । पूर्व्वेषाम्पन्थामनुदृश्य धीराऽअन्वालेभिरे रत्थ्योनरश्म्मीन् । ४ $\frac{४९}{३४}$ ॥ यज्जाग्ग्रतो दूरमुदैति दैवन्तदु सुप्प्तस्यतथैवैति । दूरङ्गमञ्ज्योतिषाञ्ज्योति रेकन्तन्न्मेमनः शिवसङ्कल्प्पमस्तु । ५ ॥ येनकर्म्माण्यपसो मनीषिणोयज्ञे कृण्वन्तिव्विदथेषु धीराः । यदपूर्व्वंय्यक्षमन्तःप्प्रजानान्तन्न्मेमनः शिवसङ्कल्पमस्तु । ६ ॥ यत्प्रज्ञानमुत्त चेतोधृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु । यस्म्मान्नऽऋते किञ्चनकर्म्मक्रियते तन्न्मेमनः शिवसङ्कल्प्पमस्तु । ७ ॥ येनेदम्भूतम्भुवनम्भविष्ष्यत्परिगृहीत ममृतेनसर्व्वम् । येनयज्ञस्तायते सप्प्तहोता तन्न्मे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनं÷शिवसंङ्कल्पमस्तु । ८ ॥ यस्मिन्नृचऽ साम यजूꣳषि यस्मिन्न्प्रतिष्ठिता रथनाभाविवाराः । यस्मिँश्चित्तꣳ सर्व्वमोतं प्रजानान्तन्मेमनं÷शिवसङ्कल्पमस्तु । ९ ॥ सुषारथिरश्वानिव यन्न्मनुष्यान्नेनीयते भीशुभिर्व्वाजिनऽइव । हृत्प्रतिष्ठन्यद जिरञ्जविष्ठन्तन्मेमनं÷शिवसंङ्कल्पमस्तु । १० ॥ इति रुद्रे प्रथमोऽध्यायः ॥ (एते ६ मन्त्राः ३४ अध्यायोक्ताः ५माद्याः) ॥

"अथ रुद्रे द्वितीयोऽध्यायः"—हरिः ॐ—सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳ सर्व्वतस्पृत्वा त्यतिष्ठद्दशाङ्गुलम् । १ ॥ पुरुषएवेदꣳ सर्व्वंय्यद्भूतं य्यच्चभाव्व्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ।२॥ एतावानस्य महिमा तोज्ज्यायाँश्चपूरुषः । पादोस्यविश्वा भूतानित्रिपादस्या मृतन्दिवि ।३॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादो स्येहाभवत्पुनः÷ । ततोव्विष्वङ्व्यक्रामत्साशनानशनेऽअभि । ४ ॥ ततोव्विराडजायत व्विराजोऽअधिपूरुषः । सजातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम् । पशूँस्ताँश्चक्रे व्वायव्व्यानारण्या ग्ग्राम्म्याश्चये ।६॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्माद जायत । ७॥ तस्मादश्वाऽअजायन्त येकेचोभयादतः। गावोहजज्ञिरे तस्मात्तस्माज्जाताऽअजावयः÷ । ८॥ तँय्यज्ञम्बर्हिषि प्रौक्षन्न्पुरुषञ्जातमग्ग्रतः। तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषंव्व्यदधुःकतिधा व्व्यकल्पयन् । मुखङ्किमस्स्यासीत्किम्बाहू किमूरू पादाऽउच्च्येते। १० ॥ ब्राह्मणोस्यमुखमासीद्बाहू राजन्न्यः÷कृतः। ऊरूतदस्स्य यद्वैश्यः÷पद्भ्याꣳ शूद्रोऽअजायत । ११ ॥ चन्द्रमामनसो जातश्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत । १२॥ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौःसमवर्त्तत । पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाꣳ ऽअकल्पयन् । १३॥ यत्पुरुषे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोयस्स्यक्षयायजिन्वथ । आपोजनयथाचनः । ४$\frac{१६}{३६}$ ॥ ततो यज्ञोपवीतानि प्रक्षाल्यानन्तरं दशगायत्रीमन्त्रैरभिमन्त्र्य ॥ "तन्तु-देवतानामावाहनम्"–प्रणवस्य । ब्रह्मा ऋषिः । परमात्मा देवता गायत्री छन्दः । प्रथमतन्तौ ॐकारावाहने विनियोगः । ॐप्रथम-तन्तौ ॐकारमावाहयामि ॥ अग्निं दूतमिति मेधातिथिर्ऋषिः । अग्निर्देवता । गायत्री छन्दः । द्वितीयतन्तौ अग्न्यावाहने वि०–ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्ब्रुवे । देवाँऽआसादयादिह । ५$\frac{१७}{२२}$ ॥ द्वितीयतन्तौ अग्निमा० । नमोऽस्तु सर्पेभ्य इत्यस्य । प्रजापतिर्ऋषिः । सर्प्पा देवताः । अनुष्टुप् छन्दः । तृतीयतन्तौ सर्प्पावाहने वि०–ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु । येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः । ६$\frac{६}{१३}$ ॥ तृतीयतन्तौ सर्पानावा० । वयः सोमेत्यस्य बन्धुर्ऋषिः । सोमो देवता । गायत्री छन्दः । चतुर्थतन्तौ सोमावाहने वि०–ॐ व्वयः सोमव्व्रतेतवमनस्तनूषुबिब्भ्रतः । प्रजावन्तः सचेमहि ॥ ७$\frac{५६}{३}$ ॥ चतुर्थतन्तौ सोमावा० । उदीरतामित्यस्य । शङ्ख ऋषिः । पितरो देवता । त्रिष्टुप् छन्दः । पञ्चमतन्तौ पित्रावाहने वि०– ॐउदीरतामवरऽउत्परासऽउन्मद्ध्यमाः पितरः सोम्म्यासः । असुंयऽईयुरव्वृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ।८$\frac{४९}{१९}$ ॥ पञ्चमतन्तौ पितॄनावा० प्रजापतेरित्यस्य हिरण्यगर्भ ऋषिः । प्रजापतिर्देवता । त्रिष्टुप् छन्दः । षष्ठतन्तौ प्रजापत्यावाहने वि०–ॐ प्रजापतेन त्वदेतान्न्यन्न्यो-व्विश्वारूपाणिपरितावभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयः स्यामपतयोरयीणाम् ।९$\frac{६५}{२३}$॥षष्ठतन्तौ प्रजापतये नमः प्रजापतिमावा० । आनोनियुद्भिरित्यस्य । वसिष्ठ ऋषिः । अनिलो देवता । त्रिष्टुप् छन्दः।सप्तमतन्तौ अनिलावाहने वि०–ॐ आनोनियुद्भिः शतिनीभिरध्वरः सहस्रिणीभिरुपयाहियज्ञम्।व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः । १०$\frac{२८}{२७}$ ॥ सप्तमतन्तौ अनिलाय नमः अनिलमावा० । सुगाव इत्यस्यात्रिर्ऋषिः । गृहपतयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवता। आर्षी त्रिष्टुप् छन्दः। अष्टमतन्तौ यमावाहने वि०—ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेद सवनञ्जुषाणाः। भरमाणाव्वहमानाहवींष्यस्म्मेधत्तव्वसव्वोव्वसूनिस्वाहा।११$\frac{१८}{८}$॥ अष्टमतन्तौ यमाय नमः यममावा०। विश्वेदेवा सऽआगत इत्यस्य मधुच्छन्दा ऋषिः। विश्वे देवा देवताः। त्रिष्टुप् छन्दः। नवमतन्तौ विश्वेषां देवानामावाहने वि०— ॐ व्विश्वेदेवासऽआगत शृणुतामऽइमं हवम्। एदम्बर्हिर्न्निषीदत। * १२$\frac{३४}{७}$॥ नवमतन्तौ विश्वेभ्यो देवेभ्यो नमः विश्वान्देवाना०॥ "यज्ञोपवीतग्रन्थिदेवताऽवाहनम्"—ब्रह्मयज्ञानमित्यस्य। प्रजापतिर्ऋषिः। ब्रह्मा देवता। गायत्री छन्दः। ग्रन्थिमध्ये ब्रह्मावाहने वि०— ॐ ब्रह्मयज्ज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः। सबुध्न्याऽउपमाऽअस्यव्विष्ठाःसतश्चयोनिमसतश्चव्विवः। १३$\frac{३}{१३}$॥ इदंविष्णुरित्यस्य। मेधातिथिर्ऋषिः। विष्णुर्देवता। गायत्री छन्दः। ग्रन्थिमध्ये विष्णवावाहने वि०— ॐ इदंव्विष्णुर्व्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपाःसुरेस्वाहा। १४$\frac{१५}{५}$॥ त्र्यम्बकमित्यस्य। वसिष्ठ ऋषिः। रुद्रो देवता। विराट् ब्राह्मी त्रिष्टुप् छन्दः। ग्रन्थिमध्ये रुद्रावाहने विनियोगः—ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात्। * १५$\frac{६०}{३}$॥ यज्ञोपवीतग्रन्थिदेवताभ्यो नमः ग्रन्थिदेवताः आवाहयामि॥ प्रणवाद्यावाहितदेवताभ्यो नमः यथास्थानमहं न्यसामि। मानसोपचारैः संपूज्य॥ "अथ ध्यानम्"—प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवं ब्रह्मसूत्रम्। ब्रह्मत्वसिद्ध्यै च यशःप्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम्॥ ॐ युवासुवासाः परिवीत आगात्स उश्रेयान्भवति जायमानः। तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः। "यज्ञोपवीतधारणम्"—यज्ञोपवीतमिति मन्त्रस्य। परमेष्ठी ऋषिः। लिङ्गोक्ता देवता। त्रिष्टुप् छन्दः। यज्ञोपवीतधारणे वि०— ॐ यज्ञोपवीतम्परमम्पवित्रम्प्रजापतेर्यत्सहज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्पुरस्तात्। आयुष्यमग्र्यम्प्रतिमुञ्च शुभ्रं यज्ञोपवीतम्बलमस्तु-तेजः॥ यज्ञोपवीतिमसयज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि॥ अनेन मन्त्रेण यज्ञोपवीतानां पृथक् पृथक् धारणं कुर्यात्। प्रतियज्ञोपवीत धारणस्याद्यन्तयोराचमनम्। धारणान्ते "जीर्णसूत्रत्यागमन्त्रं पठेत् तद्यथा"—एतावद्दिनपर्यन्तं ब्रह्म त्वं धारितं मया। जीर्णत्वा-त्वत्परित्यागो गच्छ सूत्र यथासुखम्॥ इति मन्त्रेण जीर्णयज्ञो-पवीतं शिरोमार्गेण निःसार्य भूमौ त्यजेत्॥ पश्चाद्यथाशक्ति गायत्री-मन्त्रजपं कुर्यात्॥ "अर्पणम्"—अनेन नवयज्ञोपवीतधारणार्थे कृतेन यथाशक्ति गायत्रीजपकर्मणा श्रीसविता देवता प्रीयतां न मम॥ ॐ तत्सद्ब्रह्मार्पणमस्तु॥ यस्य०॥ इति यज्ञोपवी-तधारणप्रयोगः॥

१२ "अथ संक्षेपतो यज्ञोपवीतधारणप्रयोगः"—यज्ञोपवीतान्यु-दकेन प्रक्षाल्यानन्तरमाचम्य प्राणानायम्य॥ "सङ्कल्पः"—अद्ये-त्यादि मम श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं अमुककर्माङ्गत्वेन नवीनयज्ञोपवीतधारणमहं करिष्ये। इति सङ्कल्प्य यज्ञोपवीतानि क-रसम्पुटे दशगायत्रीमन्त्रैः अभिमन्त्रयेत्। तदनन्तरं ॐ यज्ञोप-वीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्र-तिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ ॐ यज्ञोपवीतमसि-यज्ञस्त्वा यज्ञोपवीतेनोपनह्यामि॥ इति मन्त्रौ पठित्वा पृथक् पृ-थक् यज्ञोपवीतानि सव्यहस्तद्वारा धार्याणि। प्रतियज्ञोपवीतधारणा-न्ते आचम्य। पश्चात् यथाशक्ति गायत्रीर्जपेत्॥ ततो जीर्णयज्ञो-पवीतत्यागः कार्यः॥ "अर्पणम्"— अनेन नवयज्ञोपवीतधारणा-र्थे कृतेन यथाशक्ति गायत्रीजपाख्येन कर्मणा श्री सूर्यनाराय-णः प्रीयतां न मम। ॐ तत्सद्ब्र०॥ इति संक्षेपतो यज्ञोपवीत-धारणप्रयोगः॥

१३. "अथ संक्षेपतः सन्ध्याप्रयोगः" "भस्मधारणम्"—ॐ-त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नोऽअ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुत्यायुषम् ॥ "शिखाबन्धनम्"–ॐ मानस्तोकेतनये मानऽ आयुषि मानो गोषु मानोऽअश्वेषु रीरिषः । मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्वा हवामहे ॥ "आचमनानि"–ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा ॥ "हस्तादिप्रक्षालनम्"–ॐ गोविन्दाय नमः । ॐ विष्णवे नमः । ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः । ॐ वामनाय नमः । ॐ श्रीधराय नमः । ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः । ॐ दामोदराय नमः । ॐ सङ्कर्षणाय नमः । ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः । ॐ अच्युताय नमः । ॐ जनार्दनाय नमः । ॐ उपेन्द्राय नमः । ॐ हरये नमः । ॐ श्रीकृष्णाय नमः ॥ "प्राणायामः"–ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवि० । "हृदिपवित्रकरणम्"–ॐ विष्णुर्विष्णुः । ॐ वाग्वाक् । ॐ प्राणः प्राणः । ॐ चक्षुश्चक्षुः । ॐ श्रोत्रं श्रोत्रं । ॐ नाभिः । ॐ हृदयं । ॐ कण्ठः । ॐ मुखं । ॐ शिरः । ॐ शिखा । ॐ बाहुभ्यां यशोबलं ॥ अपवित्रः पवित्रेत्यस्य वामदेव ऋषिः । विष्णुर्देवता । अनुष्टुप् छन्दः । मुखे हृदि पवित्रकरणे विनियोगः– ॐ अपवित्रः पवित्रो वा सर्वाऽवस्थाङ्गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ "सङ्कल्पः"–ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसन्ध्योपासनमहङ्करिष्ये । "भूप्रार्थना"–पृथिवीत्यस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता । सुतलं छन्दः । आसने विनियोगः–ॐ पृथिवि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ "अभिषेकः"– ॐ भूः पुनातु । ॐ भुवः पुनातु । ॐ स्वः पुनातु । ॐ महः पुनातु । ॐ जनः पुनातु । ॐ तपः पुनातु । ॐ सत्यं पुनातु । ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गायत्रीमन्त्रेण सर्वं पुनातु ॥ "अम्बुप्राशनम्"— सूर्यश्चमेति नारायण ऋषिः । सूर्यो देवता । अनुष्टुप् छन्दः । अम्बुप्राशने विनियोगः—ॐ सूर्यश्चमामन्न्युश्च मन्न्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्राञ्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्चिदुरितं मयि इदमहं माममृतयोनौ सूर्य्येज्ज्योतिषिजुहोमि स्वाहा ॥ ततो द्विराचमनम् ॥ "मार्जनम्"— आपोहिष्ठेति तिसृणां सिन्धुद्विप ऋषिः । आपो देवता । गायत्री छन्दः । मार्जने विनियोगः— ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे । ॐ योवः शिवतमो रसस्तस्यभाजयतेहनः । उशतीरिवमातरः । ॐ तस्माऽअरङ्गमामवो यस्यक्षयायजिन्वथ । आपोजनयथाचनः ॥ "जलावग्रहणम्"— सुमित्रियादुर्म्मित्रियाइतिद्वयोः प्रजापतिर्ऋषिः । आपो देवता । अनुष्टुप् छन्दः । जलावग्रहणे विनियोगः— ॐ सुमित्रियानऽआप ओषधयः सन्तु दुर्म्मित्रियास्तस्मै सन्तुयोस्मान्द्वेष्टियञ्चवयंद्विष्मः । "अघमर्षणम्"— द्रुपदादिवेत्यस्य कोकिलराजपुत्र ऋषिः । आपो देवता । अनुष्टुप् छन्दः । अघमर्षणे विनियोगः—ॐ द्रुपदादिव मुमुचानः । स्विन्नःस्नातोमलादिव । पूतंपवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ "पापपुरुषनिरसनम्"— ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणिविदधद्विश्वस्य मिषतोवशी । सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् । दिवंचपृथिवींचान्तरिक्षमथोस्वः ॥ "अर्घ्यम्"— गायत्रीमन्त्रेणार्घ्यत्रयं दद्यात् ॥ "सूर्योपस्थानम्"— उद्वयमुदुत्यमितिद्वयोः प्रस्कण्व ऋषिः । सूर्यो देवता । अनुष्टुप् छन्दः । चित्रन्देवानामित्यस्य कुत्साङ्गिरस ऋषिः । सूर्यो देवता । त्रिष्टुप् छन्दः । तच्चक्षुरित्यस्य दध्यङ्ङाथर्वण ऋषिः । सूर्यो देवता । उष्णिक् छन्दः । सूर्योपस्थाने विनियोगः— ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्वयं तमसस्प्परिस्वः पश्यन्तऽउत्तरम् । देवं देवत्रा सूर्य्यमगन्न्मज्ज्योतिरुत्तमम् । १ ॥ ॐ उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः । दृशेव्विश्श्वाय सूर्य्यम् । २ ॥ ॐ चित्रं देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः । आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳ सूर्य्यऽआत्माजगतस्तस्थुषश्श्च । ३ ॥ ॐ तच्चक्षुर्द्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येमशरदः शतं जीवेमशरदः शतꣳ शृणुयाम शरदः शतम्प्रब्ब्रवाम शरदः शतमदीनाः स्यामशरदः शतं भूयश्च शरदः शतात् ॥ "गायत्र्यावाहनम्"— तेजोसीत्यस्य परमेष्ठी प्रजापतिर्ऋषिः । आज्यं देवता । जगती छन्दः । गायत्र्यावाहने विनियोगः— ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासि । प्रियन्देवानामनाधृष्टं देवयजनमसि ॥ "गायत्र्युपस्थानम्"— तुरीयपदस्य विमल ऋषिः । परमात्मा देवता । गायत्री छन्दः । गायत्र्युपस्थाने विनियोगः— ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसिनहिपद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोम् ॥ "गायत्रीजपः"—ॐ भूर्भुवः स्वः ॐ तत्स० ॥ "जपान्ते षडङ्गन्यासाः"— ॐ अङ्गुष्ठाग्रेतु गोविन्दं ॥ ॐ तर्जन्यां तु महीधरम् । ॐ मध्यमायां हृषीकेशं । ॐ अनामिक्यां त्रिविक्रमम् । ॐ कनिष्ठिक्यां न्यसेद्विष्णुम् ॥ ॐ करमध्ये तु माधवम् ॥ "प्रदक्षिणा"— व्विश्वतश्चक्षुरिति विश्वकर्मा भौवन ऋषिः । विश्वकर्मा देवता । त्रिष्टुप् छन्दः । प्रदक्षिणायां विनियोगः ॥ ॐ विश्वतश्चक्षुरुतव्विश्श्वतो मुखोव्विश्श्वतोबाहुरुतव्विश्श्वतस्प्पात् । सम्बाहुब्भ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ "जपनिवेदनम्"—देवागातुविद इत्यस्य मनसस्पतिर्ऋषिः । वातो देवता । विराट् छन्दः । जपनिवेदने विनियोगः— ॐ देवागातुविदोगातुंवित्वागातुमित । मनसस्पतऽइमन्देवयज्ञꣳस्वाहा वातेधाः ॥ "अर्पणम्"— अनेनयथाशक्तिसङ्ख्याकेन प्रातःसन्ध्याङ्गभूतगायत्रीमन्त्रजपाख्येन कर्मणा श्रीसूर्यनारायणः प्रीयतां न म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म ॥ गोत्रादिनामोच्चारः कर्त्तव्यः । इति संक्षेपतः सन्ध्याप्रयोगः॥

१४. "अथ संक्षेपतो भोजनप्रयोगः"—यथोक्तमण्डलोपरि पात्रं निधाय तस्मिन् घृतादियुतमन्नं परिवेष्यानन्तरं तदन्नं गायत्रीमन्त्रेण संप्रोक्ष्य ततः (सत्यन्त्वर्त्तेन परिषिञ्चामि इति मन्त्रेण दिवा ऋतं त्वा सत्येन परिषिञ्चामि इति मन्त्रेण रात्रौ) पात्रसमन्तात्पङ्क्तिवारणार्थं जलधारां कुर्यात् । ततः पात्राद्दक्षिणे भूमौ ॐ भूपतये स्वाहा नमः ॐ भुवनपतये स्वाहा नमः। ॐ भूतानांपतये स्वाहा नमः। इति त्रीन्बलीन्दद्यात् । हस्तपादमुखार्द्रं आपोशनार्थं जलं गृहीत्वा पश्चात् । अन्नं ब्रह्मरसो विष्णुर्भोक्ता देवो महेश्वरः । एवं ध्यात्वा द्विजो भुङ्क्ते सोऽन्नदोषैर्न लिप्यते । एवं स्तुत्वा वामकरेण पात्रमालभ्य ॐ अमृतोपस्तरणमसि स्वाहा। इति मन्त्रेण आपोशनोदकमर्धं पीत्वा अर्धं बल्याहुतिस्थलेऽर्पयेत् ॥ तदनन्तरं मौनी स्यात्। ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ समानाय स्वाहा । ॐ उदानाय स्वाहा । (क्वचित् ब्रह्मणे नमः) इति पञ्चाहुतयः सघृताः सक्षीरा वा सर्वग्रासान् ग्रसन् मुखे जुहुयात्। पश्चात् पात्रलम्भनं मौनत्यागः। शिखामुक्ति नेत्रयोरुदकस्पर्शं च कृत्वा यथेच्छं भुञ्जीत ॥ भोजनोत्तरं शेषान्नस्य पात्रवामभागे एकां चित्राहुतिं दद्यात्। ततः ॐ अमृतापिधानमसि स्वाहा इति मन्त्रेण उत्तरापोशनस्य अर्धमुदकं पिबेत् अर्धं चित्राहुतिष्वर्पयेत्। शिखां बध्वा। उत्थाय मुखहस्तोच्छिष्टं सम्यक् प्रक्षालयेत् ॥ आचम्य । इति संक्षेपतो भोजनप्रयोगः ॥

१५. "अथ महामृत्युञ्जयमन्त्रजपः." सङ्कल्पः—अद्येत्यादिपूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं यजमानस्य शरीरेऽमुकपीडानिरासद्वारा सद्यः आरोग्यप्राप्त्यर्थं श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थं श्रीमहामृत्युञ्जयमन्त्रजपमहं करिष्ये—ॐ अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वसिष्ठ ऋषिः । श्रीमृत्युञ्जयरुद्रो देवता । अनुष्टुप् छन्दः । हौं बीजम् । जूंशक्तिः । सः कीलकम् । मृत्युञ्जयप्रीत्यर्थे जपे विनियोगः—"न्यासाः"— वसिष्ठ ऋषये नमः शिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सि । अनुष्टुपछन्दसे नमः मुखे । श्रीमहामृत्युञ्जयरुद्रदेवतायै नमः हृदये । हौं वीजाय नमः गुह्ये । जूं शक्तये नमः पादयोः । सः कीलकाय नमः सर्वाङ्गेषु । ॐ त्र्यवकं अङ्गुष्ठाभ्यां नमः । ॐ यजामहे तर्जनीभ्यां नमः । ॐ सुगन्धिं पुष्टिवर्द्धनं मध्यमाभ्यां नमः । ॐ उर्व्वारुकमिववन्धनात् अनामिकाभ्यां नमः । ॐ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः । ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ "ध्यानम्"— चन्द्रोद्भासितमूर्धजं सुरपतिं पीयूपपात्रं महद्धस्ताब्जेन दधन्सुदिव्यममलं हास्यास्यपङ्केरुहम् । सूर्येन्द्वग्निविलोकनं करतलैः पाशाक्षसूत्राङ्कुशाम्भोजं विभ्रतमक्षयं पशुपतिं मृत्युञ्जयं तं स्मरे ॥ १ ॥ मानसोपचारैः संपूज्य ॥ ॐ लं पृथिव्यात्मकंगन्धं समर्पयामि। ॐ हं आकाशात्मकं पुष्पं स० । ॐ यं वाय्वात्मकं धूपं स० । ॐ रं तेजात्मकं दीपं स० । ॐ वं अमृतात्मकं नैवेद्यं स० । ॐ सं सर्वात्मकं मन्त्रपुष्पं स० ॥ "मन्त्रोद्धारः"— ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्वकं यजामहे ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ । उत्तरन्यासं कृत्वा ॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ मृत्युञ्जय महारुद्र त्राहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं कर्मवन्धनैः ॥ "अर्पणम्"— अनेन महामृत्युञ्जयजपाख्येन कर्मणा श्रीमहामृत्युञ्जयः प्रीयतां न मम।

१८. "अथ षट्प्रणवयुक्तमृत्युञ्जयमहा मन्त्रः"— सङ्कल्पः पूर्ववत् ॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्वकं यजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिववन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ अर्पणम् पूर्ववत् ॥ इति षट्प्रणवयुक्तमृत्युञ्जयमहामन्त्रः ॥ एवं जपानन्तरं देवपूजनं कृत्वा ॥ "प्रार्थना"—मृत्युञ्जय महादेव त्राहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं कर्मवन्धनैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावकस्त्वद्गतप्राणः स्त्वच्चित्तोऽहं सदा मृड । इति विज्ञाप्य देवेशं जपेन्मन्त्रं तु त्र्यम्बकम् ॥ "जपनिवेदनम्"– जपसाङ्गतासिद्ध्यर्थं यथाकामनया द्रव्येण दशांशहोमतर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ "होमद्रव्याणि"–पुत्रार्थे शालिबीजेन धनार्थे बिल्वपत्रकैः । दूर्वाभिरायुष्कामस्तु पुष्टिकामस्तु वेतसैः । कन्याकामस्तु लाजाभिः पशुकामो घृतेन तु । विद्याकामस्तु पालाशैर्दशांशेन तु होमयेत् । धान्यकामो यवैश्चैव गुग्गुलेन रिपुक्षये । तिलैरारोग्यकामस्तु व्रीहिभिः सुखमश्नुते ॥ "अथजपप्रकारः"– शान्तः स्वरान्तसंयुक्तो बिन्दुभूषितमस्तकः । प्रसादाख्यो मनुः प्रोक्तो भजतां कल्पभूरुहः । मनः संवरणं शौचं मौनं मन्त्रार्थचिन्तनम् । अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः । धीरो धृतव्रतो मौनी जितक्रोधो जितेन्द्रियः । धौतवासाः स्त्वधःशायी रुद्रलोके महीयते । गृहे चैकगुणः प्रोक्तो गोष्ठे दशगुणः स्मृतः । अयुतं पर्वते पुण्ये नद्यां लक्षगुणो जपः । कोटि देवालये प्राप्ते अनन्तः शिवसन्निधौ । एवं यः प्रत्यहं कुर्याच्छिवसायुज्यमाप्नुयात् ॥ यस्मिन् स्थाने जपं कृत्वा शक्रो हरति तज्जपम् । तन्मृदा लक्ष्म कुर्वीत ललाटे तिलकाकृति ॥ इतिमृत्युञ्जयमन्त्रजपविधिः ॥

१७. "अथ वेदोक्तं सबीजं नवग्रहस्तोत्रम्"— आचम्य प्राणानायम्य । "सङ्कल्पः"–अद्य पूर्वोच्चारित एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममाऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम जन्मराशेः सकाशाद्विरुद्धचतुर्थाष्टमद्वादशादिस्थानस्थितामुकग्रहपीडापरिहारद्वाराएकादशस्थानस्थितवदुत्तमफलप्राप्त्यर्थं अमुकग्रहस्य स्तुतिं जपं वा करिष्ये । इति सङ्कल्प्य जपादि कुर्यात् । "तत्रादित्यमन्त्रः"–आकृष्णेति मन्त्रस्य हिरण्यस्तूपाङ्गिरस ऋषिः । सूर्यो देवता । त्रिष्टुप् छन्दः । सूर्यमन्त्रजपे विनियोगः–ॐ ह्रां ह्रीं ह्रौं सः ॐ भूर्भुवः स्वः ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् । ॐ स्वः भुवः भूः ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ह्रौँ ह्रीँ ह्राँ ॐ सूर्याय नमः । १ ४३/३३ ॥ "सोममन्त्रः"– इमन्देवा इति मन्त्रस्य वरुण ऋषिः । अग्निर्देवता । सोममन्त्रजपे विनियोगः– ॐ श्राँ श्रीँ श्रौँ सः ॐ भूर्भुवः स्वः ॐ इमन्देवाऽअसपत्नꣳ सुवध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजा । ॐ स्वः भुवः भूः ॐ सः श्रौँ श्रीँ श्राँ ॐ सोमाय नमः । २ ४०/१० ॥ "भौममन्त्रः"– अग्निमूर्धा इति मन्त्रस्य विरूपाङ्गिरस ऋषिः । अग्निर्देवता । गायत्री छन्दः । भौममन्त्रजपे विनियोगः–ॐ क्राँ क्रीँ क्रौँ सः ॐ भूर्भुवः स्वः ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्व्याऽ अयम् । अपाꣳ रेताꣳसि जिन्न्वति । ॐ स्वः भुवः भूः ॐ सः क्रौँ क्रीँ क्राँ ॐ भौमाय नमः । ३ १०/३ ॥ "सौम्यमन्त्रः"–उद्बुध्य इति मन्त्रस्य परमेष्ठी ऋषिः । बुधो देवता । त्रिष्टुप् छन्दः । सौम्यमन्त्रजपे विनियोगः– ॐ ब्राँ ब्रीँ ब्रौँ सः ॐ भुर्भुवः स्वः ॐ उद्बुद्ध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्श्वेदेवायजमानश्चसीदत । ॐ स्वः भुवः भूः ॐ सः ब्रौँ ब्रीँ ब्राँ ॐ सौम्याय नमः । ४ ६१/१८ ॥ "बृहस्पतिमन्त्रः"– बृहस्पत इति मन्त्रस्य गृत्समद ऋषिः । ब्रह्मा देवता । त्रिष्टुप् छन्दः । बार्हस्पत्यमन्त्रजपे विनियोगः– ॐ ह्राँ ह्रीँ ह्रौँ सः ॐ भूर्भुवः स्वः ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्रविणन्धेहिचित्रम् । ॐ स्वः भुवः भूः ॐ सः ह्रौँ ह्रीँ ह्राँ ॐ बृहस्पतये नमः । ५ ३/२६ ॥ "शुक्रमन्त्रः"– अन्नात्परिस्रुत इति मन्त्रस्य प्रजापतिर्ऋषिः । अश्विसरस्वतीन्द्रा देवताः । जगती छन्दः । शुक्रमन्त्रजपे विनियोगः– ॐ द्राँ द्रीँ द्रौँ सः ॐ भूर्भुवः स्वः ॐ अन्नात्परिस्स्रुतोरसम्ब्रह्मणाव्व्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः । ऋतेनसत्त्यमिन्द्रियव्विपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमिदम्पयोमृतम्मधु । ॐ स्वः भुवः भूः ॐ सः द्रौँ द्रीँ द्राँ ॐ शुक्रायनमः । ६ ७५/१८ ॥ "शनिमन्त्रः"—शन्नोदेवी इति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिः । आपो देवता । गायत्री छन्दः । शनिमन्त्रजपे विनियोगः— ॐ खाँ खीँ खौँ सः ॐ भूर्भुवः स्वः ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंय्योरभिस्स्रवन्तुनः । ॐ स्वः भुवः भूः ॐ सः खौँ खीँ खाँ ॐ शनैश्चराय नमः । ७ १२/३७ ॥ "राहुमन्त्रः"—कयानाश्चित्र इति मन्त्रस्य वामदेव ऋषिः । राहुर्देवता । गायत्रीछन्दः । राहुमन्त्रजपे विनियोगः—ॐ भ्राँ भ्रीँ भ्रौँ सः ॐ भूर्भुवः स्वः ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयाव्वृता । ॐ स्वः भुवः भूः ॐ सः भ्रौँ भ्रीँ भ्राँ ॐ राहवे नमः । ८ ४/३६ ॥ "केतुमन्त्रः"—केतुं कृण्वन्निति मन्त्रस्य मधुच्छन्दा ऋषिः । केतुर्देवता । गायत्री छन्दः । केतुमन्त्रजपे विनियोगः— ॐ प्राँ प्रीँ प्रौँ सः ॐ भूर्भुवः स्वः ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः । ॐ स्वः भुवः भूः ॐ सः प्रौँ प्रीँ प्राँ ॐ केतवे नमः । ९ ३७/२९ "अर्पणम्"— अनेन अमुकग्रहमन्त्रजपकर्मणाऽमुकग्रहरूपी परमेश्वरः प्रीयतां न मम ॥ ॥ इति वेदोक्तं सबीजं नवग्रहस्तोत्रम् ॥

१८. "अथ नवग्रहमङ्गलाष्टकानि"— भास्वान्काश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः षट्त्रिस्छो दशशोभनो गुरुशशीभौमेपुमित्रं सदा । शुक्रोमन्दरिपुः कलिङ्गजनितश्चाग्नीश्वरो देवता मध्येवर्तुलपूर्वदिग्दिनकरः कुर्यात्सदा मङ्गलम् ॥ सुलग्न सावधान् । १ ॥ चन्द्रः कर्कटकप्रभुः सितनिभश्चात्रेयगोत्रोद्भवश्चाग्नेयश्चतुरस्त्रवारुणमुखश्चापोऽप्युमाधीश्वरः । षट्सप्ताग्निदशैकशोभनफलो शौरीगुरोर्कप्रियः स्वामी यामुनदेशजो हिमकरः कुर्या० । २ ॥ भौमो दक्षिणदिक्त्रिकोणयमदिक् विघ्नेश्वरो रक्तभः स्वामी वृश्चिकमेषयोः सुरगुरुश्चार्कः शशीसौहृदः । शौरी षट्त्रिफलप्रदश्च वसुधास्कन्दौ क्रमादेवते भारद्वाजकुलोद्भवः क्षितिसुतः कुर्या० । ३ ॥ सौम्योदङ्मुखपीतवर्णमगध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चात्रेयगोत्रोद्भवो वाणेशानदिशः सुहृच्छनिभृगुः शत्रुः सदा शीतगुः। कन्यायुग्मपतिर्दशाष्टचतुरः षण्नेत्रकः शोभनो विष्णुः पौरुषदेवते शशिसुतः कुर्या० । ४ ॥ जीवश्चाङ्गिरगोत्रजोत्तरमुखो दीर्घोत्तरासंस्थितः पीताश्वत्थसमिच्चसिन्धुजनितश्चापोथ मीनाधिपः । सूर्येन्दुक्षितिजप्रियो बुधसितौ शत्रू समाश्चापरे सप्ताङ्कद्विभवः शुभः सुरगुरुः कुर्या० । ५ ॥ शुक्रो भार्गवगोत्रजः सितनिभः प्राचीमुखः पूर्वदिक्पश्चाङ्को वृषभस्तुलाधिपमहाराष्ट्राधिपोदुम्बरः । इन्द्राणीमघवानुभौ बुधशनी मित्रार्कचन्द्रौ रिपू षष्ठोद्विर्दशवर्जितो भृगुसुतः कुर्या० । ६ ॥ मन्दः कृष्णनिभस्तु पश्चिममुखः सौराष्ट्रकः काश्यपः स्वामी मकरकुम्भयोर्बुधसितौ मित्रे समश्चाङ्गिराः ॥ स्थानं पश्चिमदिक्प्रजापतियमौ देवौ धनुष्यासनः षट्त्रिस्थः शुभकृच्छनीरविसुतः कुर्या० ।७॥ राहुः सिंहलदेशजश्च निर्ऋतिः कृष्णाङ्गशूर्पासनो यः पैठीनसिगोत्रसम्भवसमिद्दूर्वामुखो दक्षिणः। यः सर्पाद्यधिदेवते च निर्ऋतिः प्रत्याधिदेवः सदा षट्त्रिस्थः शुभकृच्चसिंहिकसुतः कुर्या० । ८ ॥ केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणे स्थितश्चित्राङ्गध्वजलाञ्छनोहिमगुहा यो दक्षिणाशामुखः । ब्रह्मा चैव सचित्रचित्रसहितः प्रत्याधिदेवः सदा षट्त्रिस्थः शुभकृच्च बर्बरपतिः कुर्या० । ९ ॥ इत्येतद्ग्रहमङ्गलाष्टनवकं लोकोपकारप्रदं पापौघप्रशमं महच्छुभकरं सौभाग्यसंवर्धनम् । यः प्रातः शृणुयात्पठत्यनुदिनं श्रीकालिदासोदितं स्तोत्रं मङ्गलदायकं शुभकरं प्राप्नोत्यभीष्टं फलम् । इति नवग्रहमङ्गलाष्टकानि॥

१९ "अथ हेमाद्रिकृतः स्नानसंकल्पः*"— आचम्य प्राणानायम्य। श्रीमन्महागणाधिपतयेनमः। श्रीगुरुभ्योनमः। श्रीसर०। वेदाय०। वेदपु०। इष्टदेवताभ्यो०। कुलदे०। स्था०। ग्रामदेवताभ्यो०। वास्तुदेवताभ्यो०।एतत्कर्मप्रधानदेवताभ्यो०। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमोनमः । अविघ्नमस्तु। सुमुखश्चैकदं० । धूम्रकेतुर्गणा० द्वादशै० ॥ सङ्ग्रामे० ॥ प्रसन्न० ॥ सर्ववि० ॥ वक्रतुण्डमहाकायसूर्यकोटिसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु

* टीप—अयं संङ्कल्पः तीर्थस्नानादौ श्रावण्यादि नैमित्तिकस्नानादौ च स्वतः कुर्वन्ति तीर्थोपाध्याया यजमानतः कारयन्ति च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदा ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यन्नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ गणनाथं नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥ स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् । धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिम् ॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरम् । राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥ शक्रादिदेवताः सर्वानृषींश्चैव तपोधनान् । गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा । वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ॥ अगस्त्यं च पुलस्त्यं च दक्षमित्रं पराशरम् । भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम् । अन्ये विप्रास्तपोयुक्ता वेदशास्त्रविचक्षणाः ॥ तान्सर्वान् प्रणिपत्याहं शुभकर्म समारभे ॥ लाभस्ते० ॥ अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकीसुतः । रक्षतां पार्श्वयोर्देवौ भ्रातरौ रामलक्ष्मणौ ॥ ॐ स्वस्तिश्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात् कालकर्मस्वभावाविर्भूतमहत्तत्वोदिताहङ्कारोद्भूतवियदादिपञ्चमहाभूतेन्द्रियदेवतानिर्मितेऽण्डकटाहे, चतुर्दशलोकात्मके, लीलया तन्मध्यवर्त्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भगवतो महापुरुषस्य अचिन्त्यापरिमितशक्त्या ध्येयमानस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते, अस्मिन्महति ब्रह्माण्डखण्डे, आधारशक्तिश्रीमदादिवाराहदंष्ट्राग्रविराजिते, कूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशङ्खाद्यष्टमहानागैर्ध्रियमाणे ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजप्रतिष्ठितानामतलवितलसुतलतलातलरसातलमहातलपाताललोका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्नुपरिभागे, भूर्लोकभुवर्लोकस्वर्लोकमहर्लोक जनोलोकतपोलोकसत्यलोकाख्यसप्तलोकानामधोभागे चक्रवालशैलमहावलयनागमध्यवर्तिनो महाकालमहाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते, दिक्कुदन्तिशुण्डोत्तम्भिते, अमरावत्यशोकवतीभोगवतीसिद्धवतीगान्धर्ववतीकाञ्च्यावन्त्यलकावतीयशोवतीतिपुण्यपुरीप्रतिष्ठिते इन्द्राग्नि यमनिर्ऋतिवरुणवायुकुवेरेशानेष्टदिग्पालप्रतिष्ठिते, वरध्रुवाधरसोमपाप्रभञ्जनानलप्रत्यूषप्रभासाख्याष्टवसुभिर्विराजिते, हरत्र्यम्वकरुद्रमृगव्याधापराजितकपालीभैरवशम्भुकपर्दिवृषाकपीवटुरूपाख्यैकादशरुद्रैः संशोभिते, रुद्रोपेन्द्रसवितृधातृत्वष्ट्रर्यमेन्द्रेशानभगमित्रपूपाख्यद्वादशादित्यप्रकाशिते, यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गनिरतवसिष्ठवालखिल्यविश्वामित्रदक्षकात्यायनकौण्डिण्यगौतमाङ्गिरसपाराशर्यव्यासवाल्मिकशुकशौनकभरद्वाजसनकसनन्दनसनातनसनत्कुमारनारादादिमुख्यमुनिभिः पवित्रिते, लोकालोकाचलवलयिते, लवणेक्षुरससुरासर्पिदधिक्षीरोदकयुक्तसप्तार्णवपरिवृते, जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यसप्तद्वीपयुते, इन्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेति नवखण्डमण्डिते, सुवर्णगिरिकर्णिकोपेतमहासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णभूमण्डले, अयोध्यामथुरामायाकाशीकाञ्च्यवन्तिकाद्वारावतीतिसप्तपुरीप्रतिष्ठिते, महामुक्तिप्रदस्थले, शालग्रामशम्भलनन्दिग्रामेति ग्रामत्रयविराजिते, चम्पकारण्यवदरिकारण्यदण्डकारण्यार्बुदारण्यधर्मारण्यपद्मारण्यगुह्यारण्यजम्बुकारण्यविन्ध्यारण्यद्राक्षारण्यनहुपारण्यकाम्यकारण्यद्वैतारण्यनैमिषारण्यादीनां मध्ये सुमेरुनिषधकूटशुभ्रकूटश्रीकूटहेमकूटरजतकूटचित्रकूटत्रिकूटकिष्किन्धश्वेताद्रिकूटहिमविन्ध्याचलानांहरिवर्षकिम्पुरुषवर्षयोश्च दक्षिणे, नवसहस्रयोजनविस्तीर्णे, भरतखण्डे मलयाचलसह्याचलविन्ध्याचलानामुत्तरेण स्वर्णप्रस्थचण्डप्रस्थसूक्तिक आवन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करमणकमहारमणकपाञ्चजन्यसिंहललङ्काऽशोकवत्सलकावतीसि-
द्धवतीगान्धर्ववत्यादिपुण्यपुरीविराजिते नवखण्डोपद्वीपमण्डिते,
दक्षिणावस्थितरेणुकाद्वयसूकरकाशीकाञ्चीकालिकालवटेश्वरका-
लञ्जरमहाकालेतिनवोखरयुते,द्वादशज्योतिर्लिङ्गगङ्गा (भागीरथी)
गोदा (गौतमी) क्षिप्रायमुनासरस्वतीनर्मदातापीपयोष्णीचंद्रभा-
गाकावेरीमन्दाकिनीप्रवराकृष्णावेण्याभीमरथीतुङ्गभद्रामलापहा-
कृतमालाताम्रपर्णीविशालाक्षीवञ्जुलाचर्मण्वतीवेत्रवतीभोगावती-
विशोकाकौशिकीगण्डकीवासिष्ठीप्रमदाविश्वामित्रीफल्गुनीचि-
त्रकाश्यपीसरयूसर्वपापहारिणीकरतोयाप्रणीतावज्रावक्रगामिनी-
सुवर्णरेखाशोणाभवनाशिनीशीघ्रगाकुशावर्त्तिनीब्रह्मानन्दा महि-
तनयेत्यनेकपुण्यनदीभिर्विलसिते, ब्रह्मपुत्रसिन्धुनदादिपरमप-
वित्रजलविराजिते,हिमवन्मेरुगोवर्धनक्रौञ्चचित्रकूटहेमकूटमहेन्द्र-
मलयसह्येंद्रकीलपारियात्राद्यनेकपर्वतसमन्विते, मतङ्गमाल्यकि-
ष्किन्धऋष्यश्रृङ्गेतिमहानगसमन्विते, अङ्गवङ्गकलिङ्गकाश्मीरकां-
बोजसौवीरसौराष्ट्रमहाराष्ट्रमगधनेपालकेरलचोरलपाञ्चालगौड-
मालवमलयसिंहलद्रविडकर्नाटकललाटकरहाटवरहाटपानाटपा-
ण्ड्यनिषधमागधआन्ध्रदशार्णभोजकुरुगान्धारविदर्भविदेहवा-
ल्हीकवर्बरकैकेयकोसलविराटशूरसेनकोङ्कणकैकटमत्स्यमद्रपार-
सिकखर्जूरयावनम्लेच्छजालन्धरेतिसिद्धवत्यन्यदेशविशेषभा-
षाभूमिपालविचित्रिते, इलावृतकुरुभद्राश्वकेतुमालकिंपुरुषरमण-
कहिरण्मयादिनववर्षाणां मध्ये, भरतखण्डे, वकुलचम्पकपाटला-
ब्जपुन्नागजातिकरवीररसालकल्हारकेतक्यादिनानाविधकुसुम-
स्तवकविराजिते, कोकन्तहिरण्यश्रृङ्गकुब्जार्बुदमणिकर्णीवटशा-
लग्रामसूकरमथुरागयानिष्क्रमणलोहार्गलपोतस्वामिप्रभासवदरी-
ति चतुर्दशगुह्यविलसिते, जम्बुद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः
पश्चिमदिग्भागे,कुलमेरोर्दक्षिणदिग्भागे विन्ध्यस्य दक्षिणे देशे श्री-
शैलस्य वायव्यदेशे, कृष्णावेण्योर्मध्यदेशे, मत्स्यकूर्मवराहनृसिंहवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनपरशुरामरामकृष्णबुद्धकल्किरितिदशावताराणांमध्ये बौद्धावतारे गङ्गादिसरिद्भिः पाविते, एवं नवसहस्रयोजनविस्तीर्णभारतवर्षे, निखिलजनपावनपरमभागवतोत्तमशौनकादिनिवासिते, नैमिषारण्ये, आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे सूर्यान्वयभूभृत्प्रतिष्ठिते,श्रीमन्नारायणनाभिकमलोद्भूतसकलजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे, प्रथममासे प्रथमपक्षे, प्रथमदिवसे, अन्हो द्वितीये यामे, तृतीये मुहूर्त्ते, रथन्तरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे, स्वायम्भुवादिमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे, तत्प्रथमे विभागे, (पादे) श्रीमन्नृपविक्रमार्कात् श्रीमन्नृपशालीवाहनाद्वा यथा संख्यागमेन चान्द्रसावनसौरनाक्षत्रादिप्रकारेणागतानां प्रभवादिषष्टिसंवत्सराणां मध्ये अमुक नाम्नि संवत्सरे, उत्तरगोलावलम्बिनि श्रीमार्तण्डमण्डले, अमुकर्तौ, अमुकमासे, अमुकपक्षे, अमुकतिथौ, अमुकवासरे, अमुकनक्षत्रे, अमुकयोगे, अमुककरणे, अमुकराशिस्थे चन्द्रे, अमुकस्थे सूर्ये, अमुकस्थिते देवगुरौ, शेषेषु ग्रहेषु, यथायथास्थानस्थितेषु सत्सु, एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ, अमुकशर्मणः (भार्यया सहाधिकृतस्य) मम इह जन्मनि जन्मान्तरे वा बाल्ययौवनवार्द्धक्यावस्थासु वाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुःस्पर्शनश्रोत्रमनोभिचरित–ज्ञाताज्ञातकामाकाममहापातकोपपातकादिसञ्चितानां पापानां, ब्रह्महननसुरापानसुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां बुद्धिपूर्वकाणां मनोवाक्कायकृतानां बहुकालाभ्यस्तानां उपपातकानां च, स्पृष्टास्पृष्टसङ्कलीकरण मलिनीकरणापात्रीकरणजातिभ्रंशकरणविहिताकरणकर्मलोपजनितानां, रसविक्रयकन्याविक्रयहयविक्रयगोविक्रयखरोष्ट्रविक्रयदासीविक्रयअजादिपशुविक्रयस्वगृह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रयनीलीविक्रयअक्रेयविक्रयपण्यविक्रयजलचरादिजन्तुविक्रयस्थलचरादिविक्रयखेचरादिविक्रयसंभूतानां, निरर्थकवृक्षच्छेदनऋणानपाकरणब्रह्मस्वापहरणदेवस्वापहरणराजस्वापहरणपरद्रव्यापहरण तैलादिद्रव्यापहरणफलाहरणलोहादिहरणनानावस्तुहरणरूपाणां, ब्राह्मणनिन्दागुरुनिन्दावेदनिन्दाशास्त्रनिन्दापरनिन्दाभक्ष्यभक्षणाभोज्यभोजनाचोष्यचोषणालेह्यलेहनापेयापेयास्पृश्यस्पर्शनाश्राव्यश्रवणाहिंस्यहिंसनावन्द्यवन्दनाचिन्त्यचिन्तनायाज्ययाजनापूज्यपूजनरूपाणां, मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनविधवागमनवेश्यागमनदासीगमनचाण्डालादिहीनजातिगमनगुदगमनरजस्वलागमनपश्वादिगमन रूपाणां, कूटसाक्षित्वपैशून्यवादमिथ्यापवादम्लेच्छसंभाषणब्रह्मद्वेपकरणब्रह्मवृत्तिहरणवृत्तिछेदनपरवृत्तिहरणरूपाणां, मित्रवञ्चनगुरुवञ्चनस्वामिवञ्चनासत्यभाषणगर्भपातनपथि ताम्बूलचर्वणहीनजातिसेवनपरान्नभोजनगणान्नभोजनलशुनपलाण्डुगृञ्जनभक्षणतालवृक्षफलभक्षणोच्छिष्टभक्षणमार्जारोच्छिष्टभक्षणपर्युषितान्नभक्षणरूपाणां, पङ्क्तिभेदकरणभ्रूणहिंसापशुहिंसाबालहिंसाद्यनेकहिंसोद्भूतानां, शौचत्यागस्नानत्यागसन्ध्यात्यागौपासनाग्नित्यागवैश्वदेवत्यागरूपाणां, निषिद्धाचरणकुग्रामवासब्रह्मद्रोहगुरुद्रोहपितृमातृद्रोहपरद्रोहपरनिन्दात्मस्तुतिदुष्टप्रतिग्रहदुर्जनसंसर्गरूपाणां, गोयानवृषभयानमहिषीयानगर्दभयानोष्ट्रयानाजयानभृत्याभरणस्वग्रामत्यागगोत्रत्यागकुलत्यागदूरस्थमन्त्रणविप्राशाभेदनावन्दिताशीर्वादग्रहणपतितसंभाषणरूपाणां, पतितजनपङ्क्तिभोजनाहःसङ्गमवृथामनोरथादिपापानां तथा—
"महापापोपपापाभ्यां नानायोनिषु यत्कृतम् । बालभावेन यत्पापं क्षुतृडर्थे च यत्कृतम् ॥ आत्मार्थं चैव यत्पापं परार्थे चैव यत्कृतम् । तीर्थेषु चैव यत्पापं गुर्ववज्ञाकृतं च यत् ॥ रागद्वेषादिजनितं कामक्रोधेन यत्कृतम् । हिंसानिद्रादिजं पापं भेदद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ट्या च यन्मया ॥ देहाभिमानजं पापं सर्वदा यन्मया कृतम् । भूतं भव्यं च यत्पापं भविष्यं चैव गौतमि ॥ शुष्कमार्द्रं च यत्पापं जानताजानताकृतम् । महल्लघु च यत्पापं तन्मे नाशय जाह्नवि ॥ ब्रह्महा मद्यपः स्तेयी तथैव गुरुतल्पगः । महापापानि चत्वारि तत्संसर्गी तु पञ्चमः ॥ अतिपातकमन्यच्च तन्यूनमुपपातकम् । गोवधो व्रात्यता स्तेयं ऋणानां चानपक्रियाः ॥ अनाहिताग्नितापण्यविक्रयः परिवेदनम् । इन्धनार्थे द्रुमच्छेदः स्त्रीहिंसौषधिजीवनम् ॥ हिंसायात्राविधानं च भृतकाध्यापनं तथा । प्रथमाश्रममारभ्य यत्किञ्चित्किल्बिषं कृतम् ॥ कृमिकीटादिहननं यत्किञ्चित्प्राणिहिंसनम् । मातापित्रोरशुश्रूषा तद्वाक्याकरणं तथा । अपूज्यपूजनं चैव पूज्यानां च व्यतिक्रमः ॥ अनाश्रमस्थताग्न्यादिदेवाशुश्रूषणं तथा । परकार्यापहरणं परद्रव्योपजीवनम् ॥ ततोऽज्ञानकृतं वापि कायिकं वाचिकं तथा । मानसं त्रिविधं पापं प्रायश्चित्तैरनाशितम् ॥ तस्मादशेषपापेभ्यस्त्राहि त्रैलोक्यपावनि । निष्पापोऽस्म्यधुना देवि प्रसादात्तव नान्यथा ॥ "स्त्रीणां विशेषः"— पाणिग्रहणमारभ्य स्वकर्मापरिपालनम् । इन्द्रियाभिरतिः पुंस्सु नानायोनिषु या भवेत् । कृमिकीटादिहननं पङ्क्तिभेदादिकं तथा । स्पृष्टास्पृष्टमनाचारं मनसा दोषकल्पनम् ॥ तत्सर्वं नाशय क्षिप्रं गंगे त्वं यात्रयानया ॥ इत्यादिप्रकीर्णपातकानां एतत्कालपर्यन्तं सञ्चितानां लघुस्थूलसूक्ष्माणां च निःशेषपरिहारार्थं दशावरान् दशापरान् आत्मनासहितान् एकविंशति पुरुषानुद्धर्तुं ब्रह्मलोकावधि पञ्चाशत्कोटियोजनविस्तीर्णेऽस्मिन्भूमण्डले सप्तर्षिमण्डलपर्यन्तं वालुकाभिः कृतराशेः वर्षसहस्रावसाने एकैकवालुकापकर्षक्रमेण सर्वराश्यपकर्षसंमितकालपर्यन्तं ब्रह्मलोके ब्रह्मसायुज्यताप्राप्त्यर्थं कुरुक्षेत्रादिसर्वतीर्थेषु स्नानपूर्वकं सहस्रगोदानजन्यफलप्राप्त्यर्थं तथा मम समस्तपितॄणां आत्मनश्च विष्ण्वादिलोकप्राप्तये, अधी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानामध्येष्यमाणानां चाध्यायानां स्थापनविच्छेदक्रोशघोषण-दन्तविष्टतिदुष्टैत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविद्युतोच्चारितवर्णानां, श्लिष्टास्पष्टवर्णवियट्टनादिभिः पठितानां श्रुतीनां, यद्यातयामत्वं तत्परिहारार्थं, अष्टात्रिंशदनध्यायाध्ययने, रथ्यासञ्चरतः शूद्रस्य शृण्वतोऽध्ययने, म्लेच्छान्त्यजादेः शृण्वतोऽध्ययने, अशुचि देशेऽध्ययने, आत्मनोशुचित्वेऽध्ययने, अक्षरस्वरानुस्वारपदच्छेदकण्डिकाव्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्द्धन्योष्ठ्यदन्त्यनासिकानुनासिकरेफजिन्हामूलीयोपध्मानीयोदात्तानुदात्तस्वरितादीनां व्यत्ययेनोच्चारे, माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं, सर्वस्य वेदस्य सवीर्यत्वसंपादनद्वारा यथावत्फलप्राप्त्यर्थं, श्रीपरमेश्वरप्रीत्यर्थं देवब्राह्मणसवितासूर्यनारायणसंनिधौ गङ्गाभागीरथ्यां अमुकतीर्थे वा प्रवाहाभिमुखं स्नानमहङ्करिष्ये ॥ इति सङ्कल्प्य स्नायात् ॥ (यदि यजमानो वेदाधिकारी न स्यात्तर्हि तेनायं सङ्कल्पः पुराणोक्तविधिना कार्यः उपाध्यायेन तत्करतः कारयितव्यश्च) ॥ इति हेमाद्रिकृतः सङ्कल्पप्रयोगः ॥

२०. अथ वाजसनेयब्राह्मणानां शान्तिसूक्तपाठः"—स च अस्या बालसहितायाः प्रसूतिकाया आयुरारोग्यैश्वर्याभिवृद्धिद्वारा सर्वारिष्टशान्त्यर्थं नूतनदेवप्रतिष्ठावास्तुकर्मानन्तरं वा दीपकाले यजमानेन ब्राह्मणद्वारा पाठयितव्यः । तत्र सूतिकाबालकयोः सर्वारिष्टशान्त्यर्थं प्रथमदिवसमारभ्य दशमदिनपर्यन्तं प्रदोषकाले दीपस्थापनोत्तरं शुचिर्भूतो ब्राह्मणः सूतिकायाः श्रवणपथगं पाठं पठित्वा तदभिमन्त्रितं भस्म सूतिकाबालकयोर्धारणार्थं दद्यात् । तत्रादौ हस्तौ पादौ प्रक्षाल्याचम्य प्राणानायम्य । "सङ्कल्पः"—अद्य मम अमुक शर्मणो यजमानस्य प्रसूताया बालसहिताया अस्याः स्त्रिया आयुरारोग्यैश्वर्याभिवृद्धिद्वारा सकलारिष्टशान्त्यर्थं आराध्यदेवताप्रीत्यर्थं प्रजापतिदेवताप्रीत्यर्थं च शान्तिसूक्तपाठमहं करिष्ये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सङ्कल्प्य शान्तिसूक्तपाठं कुर्यात् । तद्यथा— हरिः ॐ रक्षोहणंव्वलगहनं व्वैष्णवीमिदमहन्तं व्वलगमुत्किरामि यम्मेनिष्ट्योयममात्यो निचखानेदमहन्तं वलगमुत्किरामि यम्मे समानोयमसमानो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मेसबन्धुर्यमसबन्धुर्न्निच खानेदमहन्तं व्वलगमुत्किरामि यम्मेसजातोयमसजातो निचखानोत्कृत्याङ्किरामि । १$\frac{२३}{५}$ ॥ रक्षोहणोवो व्वलगहनं प्प्रोक्षामि व्वैष्ष्णवान्रक्षोहणोवो व्वलगहनोवनयामि वैष्ष्णवान्रक्षोहणोवो व्वलगहनोवस्तृणामि व्वैष्ष्णवान्रक्षोहणोवां व्वलगहनाऽउपदधामि व्वैष्णवीरक्षोहणौवां व्वलगहनौ पर्य्यूहामिव्वैष्ष्णवी व्वैष्ष्णवमसि व्वैष्णवास्त्थ । २ $\frac{२५}{५}$ ॥ रक्षसाम्भागोसि निरस्तꣳरक्षऽइदमहꣳ रक्षोभितिष्ठामीदमहꣳ रक्षोवबाध ऽइदमहꣳ रक्षोधमन्तमो नयामि । घृतेनद्यावापृथिवी प्प्रोर्णुवाथां व्वायोव्येस्तोकानामग्निराज्ज्यस्य व्वेतुस्वाहास्वाहा कृतेऽऊर्ध्वनभसम्मारुतङ्गच्छतम् । ३$\frac{१६}{६}$ ॥ रक्षोहाव्विश्श्वचर्षणि रभियोनिमयोहते । द्रोणेसधस्त्थमासदत् । ४ $\frac{२६}{२६}$ ॥ (अपसर्प्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया) ॥ ॐ गणानान्त्वा० । ४$\frac{१५}{२३}$ ॥ श्रीश्चतेलक्ष्मी० । ५$\frac{१९}{२३}$ ॥ आकृष्णेनरजसा० । ६$\frac{४२}{३३}$ ॥ इमन्देवाऽअसपत्नꣳसुवध्वम्महतेक्षत्राय महतेज्ज्यैष्ठ्याय महतेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्ष्य पुत्रममुष्ष्यै पुत्रमस्यै व्विशऽएषवोमीराजा सोमोस्म्माकम्ब्राह्मणानाꣳराजा । ७$\frac{४०}{१०}$॥ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्व्याअयम् । अपाꣳ रेताꣳ सिजिन्वति * । ८$\frac{१४}{१३}$ ॥ उद्बुद्ध्यस्वाग्ग्नेप्प्रति जागृहित्वमिष्टापूर्तेसꣳसृजेथामयञ्च । अस्मिन्त्सधस्त्थेऽ अद्ध्युत्तरस्मिन्न्विश्श्वेदेवा यजमानश्श्च सीदत । ९$\frac{६१}{१८}$ ॥ बृहस्प्पतेऽअति यदर्य्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजा तदस्म्मासु द्द्रविणन्धेहिचित्रम् । * १०$\frac{३}{२६}$ ॥ अन्नात्परिस्रुतो रसम्ब्रह्मणाव्व्यपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षत्रम्पयꣳसोमम्प्रजापतिः। ऋतेनसत्त्यमिन्द्रियं विपानꣳ शुक्र-
मन्धसऽ इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ।११ ७५/१९॥ शन्नोदे-
वीर०।१२ १२/१६॥ कयानश्चित्र०।१३ ४/३६॥ केतुङ्कृण्वन्नके-
तवे पेशोमर्य्याऽअपेशसे। समुषद्भिरजायथाः।१४ ३७/२९॥ त्र्यं-
म्बकंयय०।१५ ६०/३॥ सजोषाऽइन्द्रसगणो मरुद्भिꣳसोमम्पिबव्वृ-
त्रहा शूरव्विद्वान्। जहिशत्रूँ १ रपमृधो नुदस्वाथाभयङ्कृणुहि
व्विश्वतोनः। * ।१६ ३७/७॥ त्रातारमिन्द्रमवितारमिन्द्रꣳ
हवेहवे सुहवꣳ शूरमिन्द्रम्। व्हयामि शक्रम्पुरुहूतमिन्द्रꣳ स्व-
स्तिनो मघवाधात्विन्द्रः।१७ ५०/२०॥ त्वन्नोऽअग्नेतव देवपायु-
भिर्मघोनो रक्षतन्न्वश्चव्वन्द्य। त्रातातोकस्यतनये गवामस्यनि-
मेषꣳ रक्षमाणस्तवव्व्रते।१८ १३/३४॥ यमायत्वाङ्गिरस्स्वते पितृमते-
स्स्वाहा। स्वाहाघर्म्मायस्स्वाहा घर्मःपित्रे । * ।१९ ९/३८॥
अमुन्न्वन्तमयंजमानमिच्छस्तेनस्येत्यामन्न्विहितस्करस्य। अन्न्य-
मस्म्मदिच्छसातऽइत्त्यानमो देविनिर्ऋतेतुब्भ्यमस्तु।२० ६२/१२॥ त-
त्वायामिब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः। अ-
हेडमानो व्वरुणेहबोध्युरुशꣳ समानऽ आयुःप्रमोषीः।२१ ४२/२८॥
आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्।
व्वायोऽअस्स्मिन्त्सवने मादयस्वयूयम्पात स्वस्तिभिःसदानः
।२२ २८/२७॥ वयꣳ सोमव्र०।२३ ५६/३॥ तमीशानञ्जगतस्तस्त्युष-
स्प्पतिन्धियञ्जिन्न्वमवसे हूमहेव्वयम्। पूषानोयथाव्वेदसा म-
सद्वृधेरक्षिता पायुरदब्धःस्वस्तये।२४ १८/२५॥ अस्स्मेरुद्रा मेह-
नापर्व्वतासो व्वृत्रहत्ये भरहूतौ सजोषाः। यःशꣳ सतेस्तुवते
धायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽ अस्म्माꣳऽअवन्तुदेवाः।२५ ५०/३३।
स्योनापृथिवि०।२६ १३/३६॥ आनोभद्राःक्रतवो यन्तुव्विश्वतो-
दब्धासोऽ अपरीतासऽउद्भिदः। देवानोयथा सदमिद्वृधेऽअस-
न्नप्प्रायुवो रक्षितारोदिवेदिवे।२७ १४/२५॥ देवानाम्भद्रा सुमति-
र्ऋजूयतान्देवानाꣳ रातिरभिनोनिवर्त्तताम्। देवानाꣳ सख्यमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पसेदिमाव्वय न्देवानऽआयुᳬंप्रतिरन्तुजीवसे। २८ १५/२५ ॥ तान्पूर्व्वयानिविदा हूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् । अर्य्यमणंव्वरुणᳬसोममश्विना सरस्वतीनᳬ सुभगामयस्करत् । २९ १६/२५ ॥ तन्नोव्वातो मयोभुव्वातुभेषजन्तन्माता पृथिवीतत्पिताद्यौः । तद्ग्रावाणᳬसोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्यायुवम् । ३० १७/२५ ॥ तमीशानञ्जगतस्त० ।३१ १८/२५॥ स्वस्तिनऽइन्द्रोव्वृ० । ३२ १९/२५ ॥ पृषदश्वामरुतᳬ पृश्निमातरᳬ शुभंय्यावानो व्विदथेषुजग्मयᳬ । अग्निजिह्वा मनवᳬसूरचक्षसो व्विश्वेनोदेवाऽ अवसागमन्निह । ३३ २०/२५ ॥ भद्रङ्कर्णेभिᳬ शृ० । ३४ २१/२५ शतमिन्नुशरदोऽ अन्तिदेवायत्रानश्चक्रा जरसन्तनूनाम् । पुत्रासोयत्रपितरो भवन्तिमानो मध्यारीरिषतायुर्गन्तोᳬ। ३५ २२/२५॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपितासपुत्रᳬ । व्विश्वेदेवाऽ अदितिᳬपञ्चजनाऽ अदितिर्ज्जातमदितिर्ज्जनित्वम् । ३६ २३/२५ ॥ ऋचं वाचं । ३७ १/३६ ॥ यन्मेछि० । ३८ २/३६ ॥ कयानश्चित्र० । ३९ ४/३६ ॥ कस्त्वासत्यो० ।४० ५/३६॥ अभीषुण÷स० ।४१ ६/३६॥ कयात्वन्नऽऊ० । ४२ ७/३६ ॥ इन्द्रोव्विश्वस्स्यरा० । ४३ ८/३६॥ शन्नोमित्रᳬ शं० । ४४ ९/३६ ॥ शन्नो व्वात÷प० ।४५ १०/३६ ॥ अहानिश० । ४६ ११/३६॥ शन्नोदेवीरभि० । ४७ १२/३६॥ स्योनापृथि० । ४८ १३/३६ ॥ आपोहिष्ठा० । ४९ १४/३६ ॥ योव÷शिव० । ५० १५/३६ तस्माऽअ० । ५१ १६/३६ द्यौःशान्तिरन्त० । ५२ १७/३६ ॥ दृतेदᳬहमामित्र० । ५३ १८/३६ ॥ दृतेदᳬहमाज्यो० । ५४ १९/३६ ॥ नमस्तेहरसे० । ५५ २०/३६ ॥ नमस्तेऽअस्तु० । ५६ २१/३६ ॥ यतोयतᳬसमि० । ५७ २२/३६॥ सुमित्रियानऽआ० । ५८ २३/३६ ॥ तच्चक्षुर्देवहि० । ५९ २४/३६ ॥ अभिधाऽअसि भुवनमसि यन्तासिधर्त्ता । सत्वमग्निंव्वैश्वानरᳬ सप्प्रथसङ्गच्छस्वाहा कृतᳬ । ६० ३/२२ ॥ स्वगात्वादेवेभ्य÷ प्रजापतये ब्रह्मन्नश्वम्भन्त्स्यामि देवेभ्य÷प्रजापतये तेनराद्ध्यासम् । तम्बधानदेवेभ्य÷प्रजापतये तेनराध्नुहि । ६१ ४/२२ ॥ प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जापतयेत्वा जुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वा जुष्टम्प्रोक्षामिव्वायवे-त्वा जुष्टम्प्रोक्षामिव्विश्श्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामि सर्व्वे-भ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामि । योऽअर्व्वन्तञ्जिघांᳪ सतित-मभ्यमीति व्वरुणः । परोमर्त्तः परःश्श्वा । ६२ ५/२२ अग्नयेस्वा-हा सोमायस्वाहा पाम्मोदायस्वाहा सवित्रेस्वाहा व्वायवेस्वाहा व्विष्णवे स्वाहेन्द्रायस्वाहा बृहस्पतयेस्वाहा मित्रायस्वाहा व्व-रुणायस्वाहा । ६३ ६/२२ ॥ हिङ्कारायस्वाहा हिङ्कृतायस्वाहा क्रन्दतेस्वाहा वक्रन्दायस्वाहा प्प्रोथतेस्वाहाप्प्रप्रोथायस्वाहा ग-न्धायस्वाहा घ्घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहा । स-न्दितायस्वाहा व्वल्गतेस्वाहा सीनायस्वाहा शयानायस्वाहा स्वप-ते स्वाहा जाग्ग्रतेस्वाहा कूजतेस्वाहा प्प्रबुद्धायस्वाहा व्विजृम्भ-माणायस्वाहा व्विचृतायस्वाहा सᳪ हानायस्वाहोपस्थितायस्वा-हा यनायस्वाहा प्प्रायणायस्वाहा । ६४ ७/२२ ॥ यतेस्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुतायस्वाहा शूकारायस्वाहा शूकृतायस्वाहा निषण्णायस्वाहोत्थितायस्वाहा जवायस्वाहा वलायस्वाहा व्विव-र्त्तमानायस्वाहा व्विवृत्तायस्वाहा व्विधुन्वानायस्वाहा व्विधूता-यस्वाहा शुश्श्रूषमाणायस्वाहा श्शृण्वते स्वाहेक्षमाणायस्वाहेक्षिता-य स्वाहा व्वीक्षितायस्वाहा निमेषायस्वाहा यदत्तितस्म्मैस्वाहा यत्पिबतितस्म्मैस्वाहा यन्मूत्रङ्करोतितस्मैस्वाहा कुर्व्वतेस्वाहा । कृतायस्वाहा । ६५ ८/२२ ॥ आशुःशिं० । ६६ ३३/१७ ॥ सङ्क्रन्दनेना० । ६७ ३४/१७ ॥ सऽइषुहस्तैः । ६८ ३५/१७ ॥ बृहस्पतेपरि० । ६९ ३६/१७ ॥ वलविज्ञाय० । ७० ३७/१७ ॥ गोत्रभिदं० । ७१ ३८/१७ ॥ अभिगोत्रा० । ७२ ३९/१७ ॥ इन्द्रऽआसान्नेता । ७३ ४०/१७ ॥ इन्द्रस्यवृष्णो० । ७४ ४१/१७ ॥ उद्धर्षयमघ० । ७५ ४२/१७ ॥ अस्म्माकमिन्द्रः स० । ७६ ४३/१७ ॥ अमी-षांचि० । ७७ ४४/१७ ॥ अवसृष्टाप० । ७८ ४५/१७ ॥ प्रेत्ताजय० । ७९ ४६/१७ असौयासे० । ८० ४७/१७ ॥ यत्रबाणाःस० । ८१ ४८/१७ ॥ मर्म्माणिते-व्व० । ८२ ४९/१७ ॥ नमोस्तु सर्प्पेभ्यो येकेचपृथिवीमनु । येऽअ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तरिक्षेये दिवितेभ्यः सर्प्पेभ्योनमः । ८३ ६/१३ ॥ याऽइषवो यातुधानानां य्येवाव्वनस्प्पतीँ१ । रनु । येवावटेषुशेरते तेभ्यः सर्प्पेभ्योनमः । ८४ ७/१३ ॥ येवामीरोचनेदिवोयेवा सूर्य्यस्यरश्मिषु । येषामप्प्सुसदस्कृतन्तेभ्यः सर्प्पेभ्योनमः । ८५ ८/१३ ॥ यद्देवादेवहेडनन्देवासश्चकृमाव्वयम् । अग्निर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः । ८६ १४/२० ॥ यदिदिवा यदिनक्तमेनाꣳ सिचकृमा व्वयम् । व्वायुर्मातस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः । ८७ १५/२० ॥ यदिजाग्रद्यदि स्वप्नऽएनाꣳ सिचकृमाव्वयम् । सूर्य्योमातस्मादेनसो विश्वान्मुञ्चत्वꣳ रक्षः । ८८ १६/२० ॥ देवस्यत्वा । सवितुःप्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् । सरस्वत्यैव्वाचो यन्तुर्य्यन्त्रियेदधामि ब्बृहस्प्पतेष्ट्वा साम्म्राज्ज्येनाभिषिञ्चाम्यसौ । ८९ ३०/९ ॥ देवस्यत्वा । सवितुःप्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् । सरस्वत्यैव्वाचो यन्तुर्य्यन्त्रेणाग्नेःसाम्म्राज्ज्येनाभिषिञ्चामि । ९० ३७/१८ ॥ देवस्यत्वा । सवितुःप्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्ज्येन तेजसेब्ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यैभैषज्ज्येन व्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलायश्रियैयशसे भिषिञ्चामि । ९१ ३/२० ॥ अग्निर्देवताव्वातोदेवतासूर्य्योदेवता चन्द्रमादेवताव्वसवोदेवता रुद्रादेवतादित्यादेवता मरुतोदेवताव्विश्वेदेवादेवता बृहस्प्पतिर्देवतेन्द्रोदेवता व्वरुणोदेवता । ९२ २०/१४ ॥ दीर्घायुस्तऽओषधे खनितायस्मैचत्वा खनाम्म्यहम् । अथोत्वन्दीर्घायुर्भूत्वा शतवल्शा व्विरोहतात् । ९३ १००/१२ ॥ "अथ ब्राह्मणम्" — ॐ अथैनाऽआप्यानवतीभ्या मभिमृशतिदमेवैतद्रेतः सिक्तमाप्यायति तस्माद्योनौरेतः सिक्तमाप्यायते सौमीभ्याम्प्राणोवै सोमःप्राणंतद्रेतसि दधातितस्माद्रेतःसिक्तं प्राणमभिसम्भवति पूर्येद्धयद्रेते प्राणात्सम्भवेदेषोहैवात्र सूददोहाःप्राणोवैसोमः प्राणःसूददोहाः । १ ॥ आप्यायस्वसमेतुते वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।९।। "त्रया हि देवाऽएकादशेति" प्रनन्तं हितद्यदिदमाहुर्दीर्घंऽ
देवाऽएकादश त्रयस्त्रिंशाऽसुरऽएतत्तेस्त्विति हैवैतत्पश्यन्ती-
बृहस्पतिपुरोहिताऽइति ब्रह्मवैबृहानमासान्जीवीपुत्रात्साक्षीवि-
ह देवस्युसवितुंसवऽइति देवेनम्म्माण्डव्यान्माण्डव्यं कौत्सा-
देवैरवन्तुमेति देवाह्येतंदेवैरकिक्षायणाद्गामकक्षायणोवात्स्याद्वा-
तीयैरिति "– प्रथमाह्येतंकुश्रेंकुश्रिर्यब्रवचसो राजस्तम्बाय-
ति द्वितीयाह्येतंतृतीयैरस्तुरात्कावषेयात्तुरं कावषेयंप्रजाप-
तंसत्येनाभिषिञ्चन्ति स्वयम्भूः ब्रह्मणेनमः । २२ ॥ सुशा-
सज्ञोसजुर्भिरिति सूतिकाबालकयोः आयुष्याभिवृद्धिर-
भिरिति सजूं पि –अनेन शान्तिपाठाख्येन कर्मणा श्रीआ-
ति सामानिह्येतंतदेवता च प्रीयतां न मम । (अस्मिन्पाठे
ह्येतंपुरोनुवाक्यान्त्रा रुद्राध्याये द्रष्टव्याः) ॥ इति वाजसनेय-
षिञ्चन्ति याज्यान्तसूक्तपाठः ॥
वषट्काराऽश्रावणीपद्धतिः"–पारस्करगृह्यसूत्रे–पौषस्य रो-
न्त्याहुतयो यां वाष्टकायामध्यायानुत्सृजेयुरुदकान्तं गत्वाद्भि-
परोवरमभिसिवेदानृषीन्पुराणाचार्यान् गन्धर्वानितराचार्यान्
न्त्यथर्ति सावयवं पितृनाचार्यान् स्वांश्च तर्पयेयुः । सावित्रीं
वमिच्छस विरताःस्म इति प्रब्रूयुः क्षपणं प्रवचनं च पूर्ववत् ।
आनि "तत्रैव"– अर्धषष्ठान्मासानधीत्योत्सृजेयुरर्धसप्तमासा-
रिमामृचं जपत्युभाकवीयुवा योनो धर्मः परापतत् । परिस-
तेयानि धर्मिणो विसृजामह इति त्रिरात्रं सहोपविप्रतिष्ठेरन्
। १४ ॥ "तथा च"–अथातोऽध्यायोपाकर्मौषधीनां प्रादुर्भावे
श्रवणेन श्रावण्यां पौर्णमास्यां श्रावणस्य पञ्चम्यां हस्तेन वा-
ज्यभागाविष्ठ्वाज्याहुतीर्जुहोति इति । १३ ॥ याज्ञवल्क्यः–अधीत-
वेदोपाकर्म श्रावण्यां श्रवणेन च । हस्तेनौषध्यभावे वा पञ्चम्यां श्रा-
वणस्य तु । पौषमासस्य रोहिण्यामष्टकायामथापि वा । जलान्ते छ-
न्दसां कुर्यात्तदुत्सर्गविधिं बहिः । त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वतꣳसोमवृष्णमिति रेतोवैव्वृष्णमाप्यायस्वसमेतुते सर्वतꣳसो-
मरेतऽइत्येतद्भवाव्वाजस्य संगथऽइत्यन्नंवैवाजो भवान्नस्यसंग-
थऽइत्येतत्सन्तेपयाꣳसि समुजन्तुवाजाऽइति रसोवैपयोन्नंव्वाजाꣳ
सन्तेरसः समुजंत्वन्नानीत्येतत्संव्वृष्ण्यान्यभिमातिषाहऽ इति
सꣳरेताꣳसिपाप्मासहऽ इत्येतदाप्यायमानोऽ अमृतायसोमेति प्र-
जात्यान्तदमृतंदधाति तस्मात् प्रजातिरमृता दिविश्रवाꣳस्युत्तमा-
निधिष्वेति चन्द्रमावाऽअस्य दिविश्रवऽउत्तमꣳ सह्येनममुष्मिँल्लोके
श्रावयतिद्वाभ्यामाप्याययति गायत्र्याचत्रिष्टुभाच तस्योक्तोबन्धुः
।२॥ "अथातꣳसम्पदेव"- चतस्रो लोगेष्टकाऽउपदधाति
पङ्क्त्येनविपति द्वाभ्यामाप्याययति द्वादश द्वादशमासाꣳ संव-
त्सरꣳसंवत्सरोग्निर्य्यावानग्निर्य्यावत्यस्य । मात्रातावत्तद्भवति
।३॥ "अथ सामगायति"-क्षत्रं वैसामक्षत्रेणैवैनमेतदभिषिञ्चत्यथो
साम्राज्यंवैसामसाम्राज्येणैवैनꣳ साम्राज्यंगमयति सर्वेषांवाऽएष-
वेदानाꣳ रसोयत्सामसर्व्वेषामेवैनमेतद्वेदानाꣳ रसेनाभिषिञ्चति
।४॥ "बृहत्यांगायति"-बृहत्यां वाऽआसावादित्यः श्रियांप्रतिष्ठा-
यां प्रतिष्ठितस्तपति बृहत्यामेवैनमेतच्छ्रियांप्रतिष्ठायां प्रातिष्ठापयति
।५॥ "ऐन्द्र्यांबृहत्यांगायति"-ऐन्द्रोवाऽएषयज्ञो यत्सौत्राम-
णीन्द्रायतनऽएषऽएतर्हियोयजते स्वऽएवैनमेतदायतने भिषिञ्चति
।६॥ अथयस्मात्सꣳशानानि नामैतवैसामभिर्देवाऽइन्द्रमिन्द्रियाय
वीर्य्यायसमश्यंस्तथोऽएवैतमृत्विजो जमानमेतैरेवसामभिरिन्द्रि-
याय वीर्य्यायसꣳ स्यंति सꣳश्रवसेविश्रवसे सत्यश्रवसेश्रवसऽइति
सामानिभवन्त्येष्वेवैनमेतंलोकेपुश्रावयन्ति चतुर्न्निधनंभवति चत-
स्रोवैदिशꣳसर्वास्वेवैनमेतद्दिक्षुप्रतिष्ठापयन्ति सर्वेनिधनमुपावयन्ति
संविदानऽएवास्मिमस्तच्छ्रियंदधाति।७॥ "तदाहुः"-तदाहुर्य्यदेत-
त्सामगीयतेथक्वैतस्यसाम्नऽउक्थमेकाप्रतिष्ठा व्यञ्जद्धꣳ हितद्य-
स्तुतमननुशस्तमिति।८॥ त्रयाहिदेवाऽएकादशेत्येतद्वाऽएतस्य-
साम्नऽउक्थमेषा प्रतिष्ठाव्यञ्जद्धꣳ हितद्यस्तुतमननुशस्तमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्धृतकौशिकः पाराशर्य्यायणात्पाराशर्य्यायणः पारशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् । ६ ॥ आत्रेयादात्रेयोमाण्टेर्माण्टि० ब्रह्मणे नमः ॥ ७ ॥ वंशोक्ता० ॥ अथ वंशस्तदिदंव्वयं भारद्वाजीपुत्राद्भारद्वाजीपुत्रो व्वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो बाडेयीपुत्राद्बाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो हारिकर्णीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्राच्छौनकीपुत्रः । ८ ॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्रऽआत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो व्वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपत्रः पाराशरीपुत्रात्पाराशरीपुत्रो व्वार्क्कारुणीपुत्राद्वार्क्कारुणीपुत्रऽआर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रःसाङ्कृतीपुत्रात्साङ्कृतीपुत्रः । ९ । आलम्बीपुत्रादालम्बीपुत्र ऽआलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौश्चिकीपुत्राभ्यां क्रौश्चिकीपुत्रो वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्साञ्जीवीपुत्रः रकार्शकेयीपुत्रात्कार्शकेयीपुत्रः । १० ॥ प्राश्नीपुत्रादासुरिवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।९॥ "त्रयाहिदेवाऽएकादशेति"—त्रयस्त्रिᳫंशग्रहंजुहोति त्रयाहि-
देवाऽएकादश त्रयस्त्रिᳫंशाᳫंसुराधसऽइति त्रयस्त्रिᳫंशद्धिदेवा
बृहस्पतिपुरोहिताऽइति ब्रह्मवैबृहस्पतिर्ब्रह्मपुरोहिताऽइत्येवैतदा-
ह देवस्यसवितुᳫंसवऽइति देवेनसवित्राप्रसूताऽइत्येवैतदाह देवा-
देवैरवन्तुमेति देवाह्येतंदेवैरभिषिञ्चन्ति । १० ॥ "प्रथमाद्वि-
तीयैरिति"— प्रथमाह्येतंद्वितीयैरभिषिञ्चन्ति द्वितीयास्तृतीयैरि-
ति द्वितीयाह्येतंतृतीयैरभिषिञ्चन्ति तृतीयाᳫंसत्येनेति तृतीयाह्ये
तᳫंसत्येनाभिषिञ्चन्ति [illegible] सत्यंयज्ञेनेतिसत्यᳫंह्येतंयज्ञेनाभिषिञ्चति
यज्ञोयजुर्भिरिति यज्ञोह्येतंयजुर्भिरभिषिञ्चन्ति यजूᳫंषिसाम-
भिरिति यजूᳫंषि [illegible]ह्येतᳫंसामभिरभिषिञ्चन्ति सामान्यृग्भिरि-
ति सामानिह्येत[illegible]न्त्येमृग्भिरभिषिञ्चन्त्यृचᳫंपुरोनुवाक्याभिरित्यृचो-
ह्येतंपुरोनुवाक्या[illegible]नेयाज्याभिरिति पुरोनुवाक्याह्येतंयाज्याभिरभि-
षिञ्चन्ति याज्या[illegible]वषट्कारैरिति याज्याह्येतंवषट्कारैरभिषिञ्चन्ति
वषट्काराऽआ[illegible]हुतिभिरिति वषट्काराह्येतमाहुतिभिरभिषिञ्च-
न्त्याहुतयो [illegible]कामान्समर्द्धयन्तुभूᳫंस्वाहेति तदेनमेताभिर्देवताभिᳫं
परोवरमभि[illegible]पिञ्च्याथास्माऽआहुतिभिᳫं सर्वान्कामान्समर्द्धय-
न्त्यथर्त्वि[illegible]श्चैव क्षूपहवमिष्ट्वा भक्षयत्यृतवोवाऽऋत्विजऽऋतुष्वेवैतदुपह-
वमिच्छ[illegible]ते । ११ ॥ "सभक्षयति"—लोमानिप्रयतिर्मत्वङ्मऽ
आन[illegible]वर्ता तरागतिᳫं । माᳫंसम्मऽउपनतिर्वस्वस्थिमज्जामऽआनति-
रि[illegible]णोते ह्येववाऽएषलोकाँश्चदेवताश्च विशतियᳫंसौत्रामण्याभिषिच्य-
ते [illegible]वेनांᳫं तदेतद्यातरामात्मानमुᳫंह्यते तथाकृत्स्नऽएवसर्वतनुᳫंसाङ्गःस-
९ म्भवति । १२ ॥ "चित्रावसोस्वस्ति"— तेणरमशीयेति । त्रिरे-
तज्जपति रात्रिर्वैचित्रावसुᳫंसाहीयᳫं संगृह्येवचित्राणिवसति त-
स्मान्नारकाश्चित्रंददृशᳫं । १३ ॥ एतेनहस्मावाऽऋषयᳫं । तद्वाऽ
अग्नयऽइति क्रियतेग्निर्वैसदेवतस्यैतानि नामानिशर्वऽइतियथाप्रा-
च्याऽआचक्षतेभवऽइति यथावाहीकाᳫंपशूनांपतीरुद्रोग्निरिति
तान्यस्याशान्तान्येवैतराणि नामान्यग्निरित्येवशान्ततमंतस्माद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्नयऽइति क्रियतेस्विष्टकृतऽइति नि॰ सायकायनात्सायकायन॰
गणोविद्वांश्चकार साहजनकंवैदे तकौशिकाद्धृतकौशिक॰ पाराश-
ह्मणेष्वन्विवेषतामुह याज्ञवल्क्य राशर्य्यात्पाराशर्य्यो जातूकर्ण्या-
ल्क्यदध्मो यस्मिन्नवयंत्वयिमित्र ॰ भारद्वाजाद्भासुरायणाच्च या-
त्रं राष्ट्रमस्यभवत्यपपुनर्मृत्युंजयति न्धनेरौपजन्धनिरासुरेरासुरि-
येष्ट्या यजतेऽखेवैतदेवंवेद । १५ ॥ ॥ आत्रेयादात्रेयोमाण्टेर्मा-
म् ”—चत्वारिवाक्परिमितापदानि ॥ अथ वंशस्तदिदंव्वयं
षिण॰ गुहात्रीणिनिहितानेङ्गयन्ति तु ण्डवीपुत्राद्वात्सीमाण्डवी-
। १६ ॥ “ अथातःस्वाध्यायप्रशंसा ” पुत्राद्वार्गीपुत्र॰ पारा-
भवतोयुक्तमनाभवत्यपराधीनोहरहरर्थान्साद गार्गीपुत्राद्वार्गीपुत्रो
परमचिकित्सकऽआत्मनो भवतीन्द्रियसंयमश्च मौषिकीपुत्रान्मौ-
वृद्धिर्यशोलोकपङ्क्तिःप्रज्ञावर्द्धमानाचतुरो धर्मा रद्वाजीपुत्राद्भारद्वा-
ष्पादयति ब्राह्मण्यंप्रतिरूपचर्य्यां यशोलोक कीपुत्र॰ । ८ ॥
च्च्यमानश्चतुर्भिर्धर्म्मैर्ब्राह्मणं भुनक्त्यर्चयाचदानेन ाठरीपुत्र॰ कौ-
वध्यतयाच । १७ ॥ “ येहवैकेचश्रमा॰ ”—सऽउदी लङ्कायनीपुत्रा-
रसि श्रेष्ठोरश्मिरित्येषवैश्रेष्ठो रश्मिर्यत्सूर्यस्तस्माद नमीपुत्राद्गौत-
सि श्रेष्ठोरश्मिरितिवर्चोदाऽअसि वर्चोमेदेहीतित्वेव त्रो व्वा-
ति हस्माहयाज्ञवल्क्यस्तद्धेवब्राह्मणेनैष्टव्यं जद्ब्रह्मवर्चसी राशरीपु-
त्युतोह स्माहौपोदितेयऽएषवावयज्ञांगादास्यति गोदाग र्तभागी-
त्येवंयंकामंकामयते सोस्मैकाम॰समृध्यते । १८ ॥ “ एषवाऽ तीपु-
शीर्जिवेयम् ”—प्रजामेस्याछ्रियंगच्छेयमिति तद्यत्पशूनाशास्ते तत्ना-
छ्रियमाशास्ते श्रीर्हिपशवस्तदेताभ्यामेवैतदाशीर्भ्यां॰ सर्वमाप्तं त-
स्माद्वाऽएतेऽअत्रद्वेऽआशिषौ क्रियेते । १९ ॥ “ तदेषश्लोकोभ-
वति ”—विद्ययाचहारोहन्ति यत्रकामाःपरागताः नतत्रदक्षिणा-
यन्ति नाविद्वा॰ सस्तपस्विनऽइति नहैवतंलोकंदक्षिणाभिर्नतपसा-
नेवं विद्रश्नुतएवंविदा॰ हैवासालोकोभ्रंपुरीषम् ।२०॥ “ तदेत-
दृचाभ्युक्तम् ”—विभक्तार॰ हवामहेवसोश्चित्रस्य राधसःसविता-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिनः । प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्य्याज्ञवल्क्याद्याज्ञवल्क्यऽ उद्दालकादुद्दालकोऽरुणादरुणऽ उपवेशेरुपवेशिः कुश्रेः कुश्रिर्व्वाजश्रवसो व्वाजश्रवा जिह्वावतो व्वाध्योगाज्जिह्वावान्बाध्योगो ऽसिताद्वार्षगणादसितो व्वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैर्ध्रुवेः कश्यपोनैर्ध्रुविर्व्वाचो वागंभिण्या ऽअम्भिण्याऽदित्यादादित्यादिमानि शुक्लानि यजूꣳषि व्वाजसेनेयेन याज्ञवल्क्येनाख्यायन्ते । ११ ॥ वंशोक्ता० ॥ ॐ तत्सवितुरिति चतुर्वारं गायत्रीं पठेत् ॥ इति प्रतिवंशवंशोक्तानामृषीणां तर्पणम् ॥

ततः "अयं पुरः पञ्चभिः"– ॐ अयं पुरो भुवस्तस्य प्राणो भौवायनो व्वसन्तः प्राणायनोगायत्री व्वासन्ती गायत्र्यै गायत्रङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथन्तरं व्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणङ्गृह्णामि प्रजाभ्यः ॥१॥ अयं दक्षिणा व्विश्वकर्म्मातस्य मनो व्वैश्वकर्म्मणङ्ग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳ स्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः । २ ॥ अयं पश्चात् अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्व्वैश्वव्यचसंवर्षाश्चाक्षुष्यो जगतीव्वार्षीजगत्या ऽऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्रजापतिगृहीतयात्वयाचक्षुर्गृह्णामि प्रजाभ्यः । ३ ॥ इदमुत्तरात्स्वस्तस्यश्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऽऐडमैडान्मन्थीमन्थिनं ऽएकविꣳश ऽएकविꣳशाद्वै राजं व्विश्वामित्रऋषिः प्रजापतिगृहीतयात्वयाश्रोत्रं गृह्णामि प्रजाभ्यः । ४ ॥ इयमुपरि । मतिस्तस्यैव्वाङ्मात्याहेमन्तोव्वाच्यः पङ्क्तिर्हैमन्ती पंक्त्यै निधनवन्निधनवत ऽआग्रयण ऽआग्रयणात्त्रिणवत्रयस्त्रिꣳशौत्रिणवत्रयस्त्रिꣳशाभ्याꣳशाकररैवते व्विश्वकर्म्मऽऋषिः प्रजापतिगृहीतयात्वयाव्वाचं गृह्णामि प्रजाभ्यो लोकन्ता ऽइन्द्रम् ।५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्द्धा व्वयः प्रजापतिश्छन्दः क्षत्रं व्वयो मयन्दं छन्दो व्विष्टम्भो व्वयोधिपतिश्छन्दो व्विश्वकर्म्मा व्वयः परमेष्ठी छन्दो वस्तो व्वयो व्विबलं छन्दो व्वृष्णिर्व्वयो व्विशालं छन्दः पुरुषो व्वयस्तन्द्रं छन्दो व्याघ्रो व्वयो नाधृष्टं छन्दः सिꣳहो व्वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा व्वयः ककुप्छन्द ऽऋषभो व्वयः सतोबृहती छन्दो नड्वान्वयः । ६ ॥ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्व्वयो जगती छन्दस्त्र्यविर्व्वयस्त्रिष्टुप् छन्दो दित्यवाड्वयो व्विराट्छन्दः पञ्चाविर्व्वयो गायत्री छन्दस्त्रिवत्सो व्वयऽउष्णिक्छन्दस्तुर्य्यवाड्वयो ऽनुष्टुप्छन्दो लोकन्ता ऽइन्द्रम् ।७॥ माच्छन्दः प्रमाच्छन्दः प्रतिमाच्छन्दो ऽअस्त्रीवयश्छन्दः पङ्क्तिश्छन्द ऽउष्णिक्छन्दो बृहती छन्दो नुष्टुप्छन्दो व्विराट्छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः पृथिवी छन्दः । ८ ॥ पृथिवी छन्दोन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो व्वाक्छन्दो ऽमनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोजाश्छन्दो ऽश्वश्छन्दः । ९ ॥ ॐ अग्निर्द्देवता व्वातो देवता सूर्य्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रो देवतादित्या देवता मरुतो देवता व्विश्वे देवा देवता बृहस्पतिर्द्देवतेन्द्रो देवता व्वरुणो देवता । १०$\frac{२०}{१४}$ ॥ इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं भारद्वाज इमावेव व्विश्वामित्रजमदग्नी अयमेव व्विश्वामित्रोऽयं जमदग्निरिमावेव व्वसिष्ठकश्यपावयमेव व्वसिष्ठोऽयं कश्यपो व्वागेवात्रिर्व्वाचा ह्यन्नमद्यतेतिर्हवै नामैतद्यदत्रिरिति सर्व्वस्यात्ता भवति सर्व्वस्यान्नं भवति य एवं वेद ।२॥ एभिर्मन्त्रैस्तर्पयेत् ॥ ततः ॐ भूर्भुव० तत्सवितुर्व० सावित्र्याश्चतुः कृत्वानुव्रवणम् । सर्वेषां तदन्ते ॐ विरतास्म इति सकृदुच्चैर्ब्रूयात् । ततो मन्त्रब्राह्मणयोरध्ययनादि । अन्त्यकण्डिकाफक्किकापर्यन्तं पठणं सर्वेषाम् । तदेतदृचाभ्युक्तमित्यन्तस्य च । तत्रादौ मन्त्रस्य " अध्यायाः "– इषेत्वा । १ ॥ कृष्णोसि । २ ॥ समि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धाग्निम् । ३ ॥ एदम् । ४ ॥ अग्नेस्तनूः । ५ ॥ देवस्यत्वा ।६॥ व्वाचस्पतये । ७॥ उपयामगृहीतोसि । ८ ॥ देवसवितः । ९॥ अपोदेवाः । १० ॥ युञ्जानः प्रथमम् । ११ ॥ इशानोरुक्मः।१२॥ मयिगृह्णामि । १३ ॥ ध्रुवाक्षितिर्ध्रुवयोनिः । १४ ॥ अग्नेजाता-न् । १५ ॥ नमस्ते । १६ ॥ अश्मन्नुर्ज्जम् । १७ ॥ व्वाजश्च । १८ ॥ स्वादींत्त्वा । १९ ॥ क्षत्रस्य योनिः । २० ॥ इमम्मे । २१ ॥ तेजोसि । २२ ॥ हिरण्यगर्भः सम् । २३ ॥ अश्व-स्तूपरः । २४ ॥ शादन्दद्भिः । २५ ॥ अग्निश्च । २६ ॥ समा-स्त्वा । २७ ॥ होतायक्षत् । २८ ॥ समिद्धो अञ्जन् । २९ ॥ देवसवितः । ३० ॥ सहस्रशीर्षा पुरुषः । ३१ ॥ तदेव । ३२॥ अस्याजरासः । ३३ ॥ यज्जाग्रतः । ३४ ॥ अपेतः । ३५ ॥ ऋचंवाचम् । ३६ ॥ देवस्यत्वा । ३७ ॥ देवस्य । ३८ ॥ स्वा-हा प्राणेभ्यः । ३९ ॥ ईशाव्वास्यम् । ४० ॥ ॐ हिरण्मयेन पात्रेण । सत्यस्यापिहितम्मुखम् । योसावादित्ये पुरुषः सोऽ सावहम् । $\frac{१७}{४०}$ ॥ ॐ ३ म् ॥ ॐ खम्ब्रह्म । अध्यायोक्ता ऋ-षयस्तृप्यन्ताम् ।

"अथ शतानि"– ॐ इषेत्वा । १ । परिते । २ । अग्नेनय । ३ । उपयामगृहीतोसि सुशर्म्मासि । ४ । प्रथमावाम् । ५ । सोमस्यत्विषि ।६। परस्याअधि ।७। अन्यावः ।८। राज्ञसि।९। नमोहिरण्यवाहवे । १० । इन्द्रेभम् । ११ । इमौते । १२ । अ-ग्नात्परिस्रुतः । १३ । अश्विनातेजसा । १४ । पृथिव्यैस्वाहा । १५ । प्रजापतये च ।१६। तेऽअस्य ।१७। तनूनपात्पथः ।१८। अयमिह । १९ । अनुनः । २० । इयत्यग्रे । २१ । शेषं पञ्चसप्त-तिः । हिरण्मयेन पात्रेण० । ॐ खम्ब्रह्म ॥"अथ कण्डिकाः"– व्रतमुपैष्यन् । १ । सवैकपालान्येवान्यतर उपदधाति । २ । सवैस्रुचः संमार्ष्टि । ३ । हिङ्कृत्यान्वाह । ४ । सवैप्रवरायाश्रा-वयति । ५ । ऋतवोहवै देवेषु यज्ञेभागमीषिरे । ६ । सवैपर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाखयान्वत्सानपाकरोति । ७ । मनवेहवैप्रातः । ८ । सयत्रा ह्र । ९ । ससयद्वाइतश्चेतश्च सम्भरति । १० । उद्धृत्याहवनीयम्पूर्णाहुतिं जुहोति । ११ । सूर्य्योहवाऽअग्निहोत्रम् । १२ । अथ हुतेग्निहोत्रमुपतिष्ठते । १३ । प्रजापतिर्हवा इदमग्र एकएवास । १४ । पित्रा महाहविषाहवैदेवा व्वृत्रं जघ्नुः । १५ । देवयजनं जोषयन्ते । १६ । दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिनेऽउपस्तृणाति । १७ । सप्तपदान्यनुनिक्रामति । १८ । शिरोवैयज्ञस्यातिथ्यं वाहू प्रायणीयोदयनीयौ । १९ । तद्य एष पूर्वोर्ध्यो व्वर्षिष्ठ स्थूणराजो भवति । २० । उदरमेवास्यसदः । २१ । अभ्रिमादत्ते । २२ । तद्यत्रैतत्प्रवृत्तो होताहोतृषदन उपविशति । २३ । प्रजापतिर्वै प्राजाः ससृजानो रिरिचान इवामन्यत । २४ । प्राणोहवा अस्योपाꣳशुः । २५ । चक्षुषीहवा अस्य शुक्रामन्थिनौ । २६ । भक्षयित्वा समुपहूताः स्मइत्युक्त्वोत्तिष्ठति । २७ । मनोहवा अस्य सविता । २८ । आदित्येन चरुणोदयनीयेन प्रचरति । २९ । प्रजापतिर्व्वा एषसदꣳशुः । ३० । देवाश्च वा असुराश्च । ३१ । अथ स्रुवञ्चाज्यविलापनींचादाय । ३२ । अरण्योरग्नी समारोह्य । ३३ । केशवस्य पुरुषस्य । ३४ । आग्नेयोष्टाकपालः पुरोडाशो भवति । ३५ । असद्वा इदमग्र आसीत् । ३६ । प्रजापतिरग्नि रूपाण्यभ्यध्यायत् । ३७ । द्वितीयमेतद्धै देवा अब्रुवन् । ३८ । अथैनमतः खनत्येव । ३९ । पर्णकषाय निष्पक्वाएता आपो भवन्ति । ४० । भूयाꣳसि हवीꣳषि भवन्ति । ४१ । रुक्मम्प्रतिमुच्यविभर्त्ति । ४२ । व्वनीवाह्येताग्निं विभ्रदित्याहुः । ४३ । गार्हपत्यंचेष्यन्पलाशशाखया व्युदूहति । ४४ । अथालो नैर्ऋतीर्हरन्ति । ४५ । चितोगार्हपत्यो भवति । ४६ । आत्मन्नग्निं गृह्णीतेचेष्यन् । ४७ । कूर्म्ममुपदधाति । ४८ । प्राणभृतउपदधाति । ४९ । द्वितीयां चितिमुपदधाति । ५० । तृतीयां चितिमुपदधाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

। ५१ । चतुर्थीञ्चितिमुपदधाति । ५२ । पञ्चमीञ्चितिमुपदधाति । ५३ । नाकसद उपदधाति । ५४ । ऋतव्या उपदधाति । ५५ । अथातः शतरुद्रियं जुहोति । ५६ । उपवसथीये हन् प्रातरुदित आदित्ये । ५७ । अथातो वैश्वानरं जुहोति । ५८ । अथातो राष्ट्रभृतो जुहोति । ५९ । अथातं पयो व्रततायै । ६० । अग्निरेष पुरस्ताच्चीयते । ६१ । प्रजापतिः स्वर्गँल्लोकमजिगाँ सत् । ६२ । प्राणो गायत्री । ६३ । प्रजापतिं विस्रस्तम् । ६४ । तस्य वा एतस्याग्नेः । ६५ । अथ हैतेरुणे । ६६ । संवत्सरो वै यज्ञं प्रजापतिः । ६७ । त्रिर्हवै पुरुषो जायते । ६८ । वाग् घवा एतस्याग्निहोत्रस्याग्निहोत्री । ६९ । उद्दालको हारुणिं । । ७० । उर्वशीहाप्सराः । ७१ । भृगुर्हवै वारुणिः । ७२ । पशुबन्धेन यजते । ७३ । तद्यथा हवै । ७४ । अयं वै यज्ञो योयं पवते । ७५ । समुद्रं वा एते प्रचरन्ति । ७६ । यद्वालोके । ७७ । दीर्घसत्रँ हवा एत उपयन्ति । ७८ । तदाहुर्यदेष दीर्घसत्री । । ७९ । सोमो वै राजा यज्ञं प्रजापतिं । ८० । विश्वरूपं वै त्वाष्ट्रमिन्द्रो हन् । ८१ । इन्द्रस्य वै यत्र । ८२ । एतस्माद्वै संज्ञात्पुरुषो जायते । ८३ । ब्रह्मौदनं पचति । ८४ । प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् । ८५ । प्रजापते रक्षस्ययत् । ८६ । उत्तमं प्रजापतिरकामयत । ८७ । अथ प्रातर्गौतमस्य । ८८ । पुरुषो ह नारायणो कामयत । ८९ । ब्रह्मवै स्वयम्भु तपो तप्यत । ९० । अथास्मै श्मशानं कुर्वन्ति द्यौः शांतिः । ९१ । देवा हवै सत्रं निषेदुं । ९२ । अथातो रौहिणौ जुहोति । ९३ । सवै तृतीये हन् । ९४ । द्वयाह प्राजापत्याः । ९५ । दृप्तबालाकिर्हानूचानो गार्ग्य आस । ९६ । जनकोह वैदेहः । ९७ । जनकँ हवैदेहं याज्ञवल्क्यो जगाम । ९८ । पूर्णमदं पूर्णमिदं । ९९ । श्वेतकेतुर्हवाआरुणेयं । १०० । प्राश्नीपुत्रादासुरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासिनः ॥ इति ब्राह्मणाध्यायाः ॥ चतुर्दशकाण्डेष्वध्यायोक्ता ऋषयस्तृप्यन्ताम् ॥

"अथ शतस्थानानि"—व्रतमुपैष्यन् ।१। तद्यदेवं पिनष्टि ।२। अथाज्यलिप्ताभ्यां पवित्राभ्याम् ।३। वृहच्छौचायविष्टयेति ।४। व्वसूना ऽ रातौस्याम । ५ । अग्निर्वैदेवानामद्धातमाम् । ६ । तद्यथायोनौरेतः सिञ्चेत् । ७ । तांवै प्राश्नन्त्येव । ८ । अथ वेदपत्नी व्विस्त्रंऽ सयति । ९ । अयं वै यज्ञो योऽयं पवते । १० । अथ यदस्तमेति । ११ । रेवतीरमध्वमिति । १२ । सवा आग्नेयोष्टा कपालंऽ पुरोडाशो भवति ।१३। तद्ये सोमेनेजानाः । १४ । अथोत्तरेण शालां परिश्रयन्ति । १५ । अथोल्लिखति । १६ । साया वभ्रुंऽ पिङ्गाक्षी सा सोमक्रयणीस्यात् । १७ । प्रथमं ते देवाऽ । १८ । इन्द्रघोषऽ प्रोक्षणीरध्वर्य्युरादत्ते । १९ । साहाकद्रूरुवाच । २० । तद्य एत उच्छ्रिता देवा हवै यज्ञन्तन्वानाः ।२१। अथ पार्श्वेनवासिना वाम्रयौति । २२ । सजुहोति शृणोत्वग्निः समिधा हवंम इति । २३ । इयऽ हवा उपाऽ शुंऽ । २४ । तस्यासावेव ध्रुव आयुः । २५ । यत्र द्यावापृथिव्यऽ शस्यते । २६ । सआज्यस्योपस्तीर्य द्विश्वरोरवद्यति । २७ । इन्द्रो हवै षोडशी । २८ । तासां द्वादश गर्भाः । २९ । द्वितीया तद्ये हस्म पुराव्वाजपेयेन यजन्ते । ३० । अथ दिशोनुवीक्षमाणो जपति । ३१ । सवै दीक्षते । ३२ । अथै तमभिषेकम् कृष्णविषाणया नुविमृष्टे । ३३ । षडेवोत्तरेचरवः । ३४ । अथो आहुंऽ प्रजापतिरेव विस्रस्तंऽ । ३५ । अमावास्यायां दीक्षते । ३६ । अश्वस्य पदे जुहोति । ३७ । अथैनां धूपयति । ३८ । तमुपरिणाभि विभर्ति । ३९ । अथोपान्निवपति । ४० । द्वितीया चतस्रः सीता यजुषा कृपति । ४१ । तं प्रत्यञ्चयन्तम् । ४२ । अपाङ्म्भत्सीदेति । ४३ । तस्य मनोव्वैश्वकर्मणमिति । ४४ । तद्यैषा मध्यमा स्वयमातृष्णां । ४५ । एकादशभिरस्तुवतेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

। ४६ । तावा एताः विराडेषा । ४७ । अथ स्वयमातृण्णामुप-
दधाति । ४८ । अथोत्तरार्धेन प्राक् । ४९ । सयः स ᳪ वैश्वा-
नरइमेसलोकाः । ५० । यास्तेऽग्ने सूर्य्ये रुचᳪ । ५१ । ना-
म कृत्वा थैनमुपतिष्ठते । ५२ । यावा इयंवेदिᳪ सप्तविधस्य
। ५३ । अयमेवाकाशोजूर्योयमन्तरात्मन्नाकाशᳪ । ५४ ।
सोऽयमात्मा त्रेधाविहित एव । ५५ अथवᳪ शः । ५६ । अथ
यामेतामाहुतिं जुहोति । ५७ । अथ यदनुवाक्यामनूच्य । ५८ ।
ब्रह्मचार्यसीत्याह । ५९ । सयत्पशुबन्धे न यजतेऽग्नीनेवैतत्पुन-
र्नवान्कुरुते । ६० । दशेति होवाच । ६१ । अथ यत्रस्कन्नᳪ
स्यात् । ६२ । अथ यदि प्रस्तुतᳪ । ६३ । सर्व अश्विना भवन्ति
। ६४ । प्रजापतिर्यज्ञमसृजत । ६५ । किम्वा वपनं महदिति
। ६६ । अथ योस्य निष्कः प्रतिमुक्तो भवति । ६७ । एतेन
हेन्द्रो तो दैवा प÷ शौनकᳪ । ६८ । चतस्रᳪ सीता यजुषा कृ-
षति । ६९ । अथोत्तरतᳪ सिकता उपकीर्णा भवन्ति । ७० ।
अथ रौहिणौ जुहोति । ७१ । ते देवा अब्रुवन् तावद्वाऽइदᳪ
सर्वयदन्नम् । ७२ । तानि यदा गृह्णाति । ७३ । योऽग्नौतिष्ठन्
। ७४ । कतम आत्मेति । ७५ । अथ हैनं मनुष्या ऊचु÷ । ७६ ।
अथ यामिच्छेद्गर्भन्दधीतेति । ७७ । सप्तसहस्रᳪ पट्शतᳪ
शेषं चतुर्विᳪ शतिः । ७८ । माश्रीपुत्रादासुरिवासिनᳪ
। ७९ । इति शतस्थानानि ॥ चतुर्दश काण्डेषु शतोक्ता ऋषय-
स्तृप्यन्ताम् ॥

अथ प्रपाठकाः— व्रतमुपैरुयन् । १ । चतुर्धा विहितो हवाऽ
अग्नेरिरास । २ । तेवा आर्द्राᳪ स्युः । ३ । सस्रुचोत्तरमाघा-
रमाघारयिष्यन् । ४ । यज्ञेन वै देवाᳪ । ५ । यज्ञेन वै देवादि-
वमपोदक्रामन् । ६ । सवै स्रुचौ व्यूहति । ७ । स यद्वा इतश्चे
तश्च सम्भरति । ८ । व्वरुणो हैनद्राज्यकाम आदधे । ९ । यत्र
वै प्रजापतिᳪ प्रजाᳪ ससृजे । १० । प्रजापतिर्हवा एतेनाग्रे य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनो त्वरिष्टंय्यज्ञं समिमन्द
न्विश्श्वे देवासऽइहमादयन्ता मोरम्प्रतिष्ठ । १ $\frac{१३}{२}$ ॥
न्त्रेण ऋष्युपरि अक्षतान् निक्षिपेत् । "ऋषिप्रार्थना"–इ
तमभरद्वाजा वयमेव गौतमोऽयं भारद्वाज इमावेव वि
मदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव व्वसि
वयमेव व्वसिष्ठोऽयं कश्यपो व्वागेवात्रिर्व्वाचा ह्यन्नमद्यते
नामैतद्यदत्रिरिति सर्व्वस्यात्ता भवति सर्व्वस्यान्नम्भव
एवं वेद । २॥ "ध्यानम्"– ॐसप्तऽ ऋषयः प्रति
शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो
सुस्तत्र जागृतोऽअस्वप्नजौसत्रसदौ च देवौ । २ $\frac{५५}{३४}$ ॥ इदं
व्विष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳫंसुरे स्वाहा
४ $\frac{१५}{५}$ ॥ ॐसहस्रशी० । ५ $\frac{१}{३१}$ ॥ ॐभूर्भुवःस्वः अरुन्धतीसहि
कश्यपादिऋषिभ्यो नमः ध्यानं समर्पयामि ॥ "आसनम्"– सु-
वर्णघटितं दिव्यं नानारत्नसमान्वितम् । आसनं रुचिरं यच्च गृह्यतां भो
मुनीश्वराः ॥ ॐपुरुषए० । ६ $\frac{२}{३१}$ ॥ ॐभूर्भुवःस्वः अरुन्ध० नमः
आसनं समर्पयामि ॥ "पाद्यम्"– गङ्गाजलं समानीतं गन्धद्र-
व्येण संयुतम् । पाद्यार्थं प्रतिगृह्णन्तु कश्यपाद्या महर्षयः ॥ ॐएता-
वान० । ७ $\frac{३}{३१}$ ॥ ॐभूर्भुवःस्वः अरु० नमः पाद्यं समर्पयामि ॥
"अर्घ्यम्"– सुवर्णपात्रसंयुक्तं गन्धपुष्पाक्षतैर्युतम् । सप्तर्षयः प्र-
गृह्णन्तु इदमर्घ्यं मयार्पितम् । ॐत्रिपादू० । ८ $\frac{४}{३१}$ ॥ ॐभूर्भुवःस्वः
अरु० नमः अर्घ्यं समर्पयामि ॥ "आचमनम्"– कर्पूरवासितं
तोयं सुवर्णकलशे स्थितम् । दत्तमाचमनीयं च ऋषीणां प्रीतये सदा ॥
ॐततो व्वि० । ९ $\frac{५}{३१}$ ॥ ॐभूर्भुवःस्वः० अरु० नमः आचम-
नीयं समर्पयामि ॥ "पञ्चामृतस्नानम्"– पयो दधि घृतं चैव
मधु च शर्करान्वितम् । पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥
ॐपञ्चन० । १० $\frac{११}{३४}$ ॥ ॐभूर्भुवःस्वः अरु० नमः पञ्चामृतस्नानं
समर्पयामि ॥ "गन्धोदकस्नानम्"– ॐगन्धद्वारांदु० ॥ ॐभूर्भुवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रु० गन्धस्नानं समर्पयामि । "शुद्धोदकस्नानम्"—सुग-
शुक्लं पवित्रं मङ्गलं जलम् । स्नानार्थं वः समानीतं मुनीनां प्र-
॥ ॐआपोहि० । ॐसोवः० । ॐतस्म्मा० ।१२ ५०/३१॥
१३ ५२/३१ ॥ ॐभूर्भुवःस्वः अरु० नमः शुद्धोदकस्नानं
म ॥ पूर्वपूजां समाप्य । पुरुषसूक्तेनाभिषेकं कुर्यात् ॥ ॐ
स्वः अरु० नमः महाभिषेकस्नानं समर्पयामि ॥ "वस्त्रम्"—
यतीव शुभ्राणि वस्त्राणि विविधानि च । ऋषयः प्रतिगृह्णन्तु
निवारणे ॥ ॐतस्म्माद्य० । १४ ७/३१ ॥ ॐभूर्भुवः स्वः अरु०
समर्पयामि ॥ "यज्ञोपवीतम्"—नानामन्त्रैः समुद्भूतं त्रिवृतं
त्रकम् । प्रत्येकं दीयते स्वच्छं ऋषयः प्रतिगृह्यताम् ॥ ॐत-
दश्वा० । १५ ८/३१ ॥ ॐभूर्भुवःस्वः अरु० नमः यज्ञोपवी-
नि समर्पयामि ॥ "गन्धम्" —आत्मसन्तापहारं च सुगन्धद्र-
व्यसंयुतम् । चन्दनं तत्प्रयच्छामि ऋषीणां प्रीतिहेतवे ॥ ॐतंयज्ञ०।
१६ ९/३१ ॥ ॐभूर्भुवःस्वः अरु० नमः गन्धं समर्पयामि ॥ "अ-
क्षताः" —शुभ्रतन्दुलजाः शुक्लाः शङ्खशुभ्रा मनोरमाः । अक्षतान्संप्र-
यच्छामि गृह्णन्तु मुनिपुङ्गवाः ॥ ॐ अक्षन्नमी० ।१७ ५१/३॥ ॐभूर्भुवः
स्वः अरु० नमः अक्षतान् समर्पयामि ॥ हरिद्रां कुङ्कुमं चैव कज्जलं
भूषणानि च ॥ कङ्कणं कण्ठसूत्रं च गृहण परमेश्वरि । ॐ अहिरि०
। १८ ५१/२९ ॥ ॐभूर्भु० अरु० हरिद्राकुङ्कुमादिद्रव्याणि समर्पयामि।
"पुष्पाणि"—माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमाः। मयार्पिता-
नि पुष्पाणि गृह्णन्तु मुनिपुङ्गवाः ॥ ॐयत्पुरुषं० ।१९ १०/३१॥ ॐभूर्भु०
अरु० कालोद्भवपुष्पाणि सम० । (तुलसीदलानि बिल्वपत्राणि कम-
लानि च ऋषिभ्यो विशेषतः समर्प्य ।) "धूपम्"—कृष्णागुरुसमुद्भू-
तो धूपोऽयं च दशाङ्गकः । सुगन्धः कश्यपादिभ्य ऋषिभ्यो दीयते-
ऽधुना ॥ ॐब्राह्मणोस्स्ये० । २० ११/३१ ॥ ॐभूर्भुवःस्वः अरु० नमः
धूपं समर्पयामि ॥ "दीपम्"—पञ्चवर्त्तिसमायुक्तः सर्वमङ्गलशोभनः ।
मया निवेदितो भक्त्या दीपोऽयं प्रतिगृह्यताम् ॥ ॐचन्द्रमामा० ।

CC-0. In Public Domain. Digitization by eGangotri

२१ $\frac{१२}{३१}$ ॥ ॐ भूर्भुवःस्वः अरु० नमः दीपं समर्पयामि ॥णाभिस्मुरू धम् "–फलमूलसमायुक्तं नानाशाकसमन्वितम् । शर्कराद्यैः अस्मति वेद्यं प्रतिगृह्यताम् ॥ ॐनाभ्या आ० । २२ $\frac{१३}{३१}$ ॥ ॐ ...गोत्र अरु० नमः नैवेद्यं समर्पयामि ॥ नैवेद्यमध्ये पानीयं स... उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनार्थे च... समर्पयामि ॥ "फलम्" —नारिकेलं च कूष्माण्डं कदली...त्रैः फलम् । ऋतुकालोद्भवं चान्यद्दीयतेऽद्य मुनीश्वराः ॥ ...चार्य्रस फलि० । २३ $\frac{८९}{१२}$ ॥ ॐभूर्भुवःस्वः अरु० नमः फलानि पि... यामि ॥ "ताम्बूलम्"– पूगीफलं सकर्पूरं नागवल्लीदलैर्युत्य सर्वे ... लालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐयत्पुरुषे० । २४नां श्रवणम् ॐ भूर्भुवःस्वः अरु० नमः ताम्बूलं समर्पयामि ॥ "दक्षिणमाण्डूकायने... हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शा... प्रयच्छ मे ॥ ॐ हिरण्यगर्भ० । २५ $\frac{५७}{२३}$ ॥ ॐ भूर्भुवः स्वः अरु० नमः दक्षिणां समर्पयामि ॥ "कर्पूरारार्त्तिक्यम्"– ब्रह्मिष्ठा ब्रह्मरूपाश्च कश्यपाद्या महर्षयः । ब्रह्मप्रज्ञादिदातारः सन्तु मे कीर्तिकर्माणि ॥ ॐ इद ँ् ह० । २६ $\frac{४८}{१८}$ ॥ ॐ भूर्भुवःस्वः अरु० नमः कर्पूरारार्त्तिक्यं समर्पयामि ॥ "प्रदक्षिणा"– यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि विनश्यन्ति प्रदक्षिणपदे-पदे । ॐ सप्तास्यां० । २७ $\frac{१५}{३१}$ ॥ ॐ भूर्भु० अरु० प्रदक्षिणां समर्पयामि । "नमस्कारः"– शरणागतदीनार्तपरित्राणपरायणाः रक्षन्तु मुनयः सर्वे मामद्य शरणागतम् । ॐ भूर्भु० अरु० नमस्कारान् सम० ॥ "मन्त्रपुष्पम्"– सप्तर्षयः शुभाः श्रेष्ठाः सर्वेषां च शुभप्रदाः । पुष्पाञ्जलिं मया दत्तं गृह्णन्तु मुनिसत्तमाः । ॐ यज्ञेनयज्ञ० । २८ $\frac{१६}{३१}$ ॥ ॐ भूर्भु० अरु० मन्त्रपुष्पाञ्जलिं समर्पयामि ॥ "प्रार्थना"– मन्त्रहीनं क्रियाहीनं भक्तिहीनं मुनीश्वराः । यत्पूजितं मया सर्वं परिपूर्णं तदस्तु मे ॥ ॐ भूर्भु० अरु० प्रार्थनां सम० ॥ अनेन मया वेदोत्सर्जनाङ्गत्वेन कृतेन ध्यानावाहनादि षोड-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

: पूजनेन अरुन्धतीसहितकश्यपादिसप्तर्षयः प्रीयंतां न मम ॥
ब्रह्मार्पणमस्तु ॥
स्पितृभ्यो यज्ञोपवीतदानम्"—प्राचीनावीति दक्षिणा-
र्म कुशोदकं गृहीत्वा पुरतो यज्ञोपवितानि निधाय अमुक-
अस्मत्पितृपितामहप्रपितामहेभ्यः। तथा द्वितीयं— अमुक-
यः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः। तृतीयं—क-
नलादि दिव्यपितृभ्यः इमानि यज्ञोपवीतानि स्वधा स-
म् इति समर्पयेत्। जीवत्पितृकैरपि पितुः पित्रादिभ्यो माता-
श्च यज्ञोपवीतानि देयानि। ततः सव्यं कृत्वा सर्वान्ब्राह्मणा-
दिना संपूज्य तेभ्यो यज्ञोपवीतानि दत्वा सर्वैः स्वयमपि धार्याणि।
पवीतधारणप्रयोगः (२४ पृष्ठे) द्रष्टव्यः। ततः जीर्णयज्ञो-
तानि शिरोमार्गेण निःसारयेत्। "अथोत्सर्गतर्पणम्" —आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य छन्दसां क्वचिदनध्यायादिकाले पठनादनधिकारिभिः श्रवणाच्च प्राप्तमालिन्यस्य निरासार्थमुत्सर्गाख्यतर्पणमहं करिष्य इति सङ्कल्प्य। दक्षिणजान्वाच्येशानाभिमुखः सव्येन प्रागग्रैर्दर्भैर्देवतीर्थेन देवानामञ्जलित्रयं दद्यात्। तद्यथा—ॐ विश्वे देवास॒ ऽआग॑तश्शृणु॒ता म॑ऽइ॒मꣳ हव॑म्। एदम्ब॒र्हिर्निषी॑दत * । २९$\frac{३४}{७}$ ॥ ॐ विश्वे॑ देवाः॒ शृणु॒तेमꣳ हव॑म्मे॒येऽ अ॒न्तरि॑क्षे॒य ऽउप॒द्यवि॒ष्ठ। ये ऽअ॑ग्निजि॒ह्वाऽ उ॒तवा॒यज॑त्राऽ आ॒सद्या॒स्मिन्न्ब॒र्हिषि॑मादयध्वम्। ३०$\frac{५३}{३३}$ ॥ इति मन्त्राभ्यां देवानावाह्य। ॐ देवास्तृप्यन्तु। ॐ छन्दाꣳसि तृप्यन्तु। ॐ वेदास्तृप्यन्तु। ॐ ऋषयस्तृप्यन्तु। ॐ पुराणाचार्यास्तृप्यन्ताम्। ॐ गन्धर्वास्तृप्यन्ताम्। ॐ इतराचार्यास्तृप्यन्ताम्। ॐ संवत्सरः सावयवस्तृप्यताम्। [केचित्संवत्सरावयवान्पृथक्त्वेन तर्पयन्ति। तद्यथा— ॐ अहोरात्रास्तृप्यन्ताम्। ॐ अर्धमासास्तृप्यन्ताम्। ॐ मासास्तृप्यन्ताम् ॐ ऋतवस्तृप्यन्ताम्। ॐ संवत्सरः सावयवस्तृप्यताम्।] ॐ पितरस्तृप्यन्ताम्। ॐ आचार्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तृप्यन्ताम् ॥ ततः सव्यं जान्वाच्य दक्षिणाभिमुख
मिश्रितं जलमञ्जलौ गृहीत्वा अमुकगोत्राः अस्मत्
र्माणो वसुरूपास्तृप्यध्वं स्वधा नमः ... गोत्र
महाः अमुकशर्म्माणो रुद्ररूपास्तृ...
आभिराद्भिः उदीरतामित्यादि ...
णेन सर्वान् पितॄन् तर्पयन्ति ॥ ...वर्तिपितृकैः पुत्रैः ।
तर्पणं कार्यम् ॥ तच्च—अमुकगोत्राः अस्मदाचार्य्यस्...
मुकशर्माणस्तृप्यध्वं स्वधा ॥ एवमाचार्यस्य पित...
हानां । एवं तर्पणं कृत्वा यज्ञोपवीतानि धृत्वाचम्य सर्वे ...
सन्तः वंशानां श्रवणं तर्पणं च कुर्युः । "वंशानां श्रवणम्
थवꣳशꣳ समानमासाजीवीपुत्रात्साजीवीपुत्रो माण्डूकायने...
कायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थि-
र्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छा-
ण्डिल्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्त-
म्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्र-
ह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः । १ ॥ वंशोक्ता ऋषयस्तृप्य-
न्ताम् ॥ अथवꣳशस्तदिदं वयꣳ शौर्पणाय्याच्छौर्पणाय्यो
गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्य्याच्च पारा-
शर्य्यः साङ्कृत्याच्च भारद्वाजाच्च भारद्वाज ऽऔदवाहेश्च शाण्डि-
ल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च
वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः
शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्या-
यनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौ-
ण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च । २ ॥ आग्निवेश्यः सैतवात् सै-
तवः पाराशर्य्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भा-
रद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भार-
द्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।४६। ः पूजनेन शकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराश-
दधाति । र्ण्यात्पर्ण जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भार-
नरइमेसलोके सपिाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौ-
म कृत्वा थै र्न कुशंसुरिर्भारद्वाजाद्भारद्वाज ऽआत्रेयात्। २ ॥ आत्रे-
। ६३ असमातिन्टिर्गौतमाद्गौतमो गौतमाद्गौतमो व्वात्स्याद्वात्स्यः
सोऽयम ः अस्मन्माडल्यः कैशोर्य्यात्काप्यात्कैशोर्य्यः काप्यः कु-
स्रामेताम नलादिभारद्वारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विद-
ब्रह्मचार्य म् इत्त्रिवत्सनपातोबाभ्रवाद्वत्सनपाद्वाभ्रवः पथःसौभरा-
नैवाऽकुरुतेश्व.यरोऽयास्यादाङ्गिरसादयास्यऽ आङ्गिरस ऽआभूते-
स्यात्। द्वाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्वि-
। ६४ श्विनौ दधीचाथर्वणाद्दध्यङ्ङाथर्व्वणो दैवादथर्व्वा दैवो-
मृत्योःप्राध्वꣳसनान्मृत्युःप्राध्वꣳसनः प्राध्वꣳसनात्प्राध्वꣳसनऽ
एकर्षेरेकर्षिर्विप्रजितेर्विप्रजितिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः
सनातनात्सनातनः सनगात्सनगः परमेष्ठिनःपरमेष्ठी ब्रह्मणो ब्र-
ह्मस्वयम्भु ब्रह्मणे नमः। ४ ॥ वंशोक्ता० ॥ अथवꣳशस्तदिदं
व्वयꣳ शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो व्वात्स्याद्वात्स्यो
व्वात्स्याच्चपाराशर्य्याच्चपाराशर्य्यःसाङ्कृत्याच्च भारद्वाजाच्च भारद्वा-
ज औदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौ-
तमो वैजवापायनाच्च व्वैष्टपुरेयाच्च व्वैष्टपुरेयः शाण्डिल्याच्च रौ-
हिणायनाच्च रौहिणायनः शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रै-
भ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौ-
ण्डिन्याभ्यां कौण्डिन्य ऽऔर्णवाभेभ्य ऽऔर्णवाभाः कौण्डि-
न्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवे-
श्याच्च। ५ ॥ आग्निवेश्यःसैतवात्सैतवः पाराशर्य्यात्पाराशर्य्यो
जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुराय-
णाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजोवलाकाकौशिका-
द्धलाका कौशिकःकाषायणात्काषायणः सौकरायणात्सौकराण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।चखलठा॑.. ।वष्यति । ......पप.

सखाराम गोपाळ जोशी अग्निहोत्री.ति सविनयं मे प्रार्थना । शुक्लपक्षो-

चेम्बूर. (साष्टी.)

रामचन्द्र दाजीबा देव.

जुन्नर. (जीर्णापूर.)

चिन्तो बल्लाळ नाकिल अग्निहोत्री.

विष्णु गोपाळ उपासने.

शङ्कर दाजी नाकिल.

जुनागड. (कांठेवाड.)

आनन्द्राम द्वारकादास वैष्णव.

मूळशंकर मयाराम व्यास.

जूं (साष्टी.)

पुण्डलिक जगन्नाथ देव.

३०३. रामचन्द्र वैद्य देव.

ण्डप्रमाणं तु ग्रासमभहनिलवाडा.)

३०४. " भोजने ये क्षीरसागर.

देशे पादौ प्रक्षाल्य वाग्यत. क्षीरसागर. २

विष्ठितः ॥ मनुः—— आयुष्यं क्षीरसागर.

श्रियं प्रत्यङ्मुखो भुङ्क्ते श्रेयो भुङ्क्ते उदङ्मु

ग्ते । विद्वद्वर्येषु बहुलेखने-

नीयं । अस्य ग्रन्थस्यो-

गोपिनार्दूलविक्रीडितं वृत्तं ।

महादेव शार्दूलरचना यो-

बाबाभट्ट आङ्गाध्रीनारायण

नासिक. (सौम्य-

गङ्गाधर बापू पञ्चाक्षरी.

गोविन्द आबा शौचे.

रघुनाथ विन बापाजी गायधनी.

सदाशिव सिद्धेश्वर दीक्षित शौचे

नाळें (पञ्चक्रोशी.)

जगन्नाथ प्राणशङ्कर शुक्ल.

लक्ष्मण गोविन्द जोशी पुरन्दरे.

पनवेल.

भवानराव बाबुराव आचार्य.

प्रवरासंगम.

दामोदर नानाजी जोशी.

प्रयाग. (अलाहाबाद.)

नाश्नीयादुत्तरामुखः । सोमवारे तथाऽभ्यङ्गे ...नाथ विठ्ठलभट्ट पैठणकर.

प्र० ...जाते—— पितरौ जीवमानौ चेन्नाश्नीयाद्दक्षिण... ...भट्ट शिरसालकर.

(पण्यपत्तन.)

स्तु जीवतोरेकस्तथैव नियमः स्मृतः । अनिशं मातृहीनानां ये... र.

दक्षिणामुखम् ॥

३०५. " अन्नपरिवेषणम्. " स्मृत्यन्तरे—— शाकादीन्दक्षिणे स्थाप्य भक्ष्यं भोज्यं च वामतः । अन्नं मध्ये प्रतिष्ठाप्य दक्षिणे घृतपायसम् । ओदने परमान्ने च आज्यपात्रं यदि स्थितम् । (घृतमपि भोजनात्प्रागेवान्नशुद्धयर्थं ग्राह्यम् । न तु भोजनारम्भानन्तरमिति) ॥

३०६. " भोजनादौ देवतीर्थग्रहणम्. " प्रथमात्कायशुद्धिश्च द्वितीयाद्धर्मसङ्ग्रहः । तृतीयान्मोक्षमाप्नोति देवतीर्थं त्रिरापिबेत् ॥

३०७. " भोजने मण्डलम्. " ब्रह्मपुराणे—— उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते । चतुरस्रं त्रिकोणं च वर्तुलं चार्धचन्द्रकम् । कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम् ॥ शङ्खः—— आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः । मण्डले तूपजीवन्ति तस्मात्कुर्वीत मण्डलम् ॥ ".मण्डलप्रमाणादि." ग्रन्थान्तरे——देहे देवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

। ४६ । ः पूजनेन शकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराश-
दधाति । झार्पण जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भार-
नरइमेस लो स्वपिाच्च यास्काचासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौ-
म कृत्वा थै कुरासुरिर्भारद्वाजाद्भारद्वाज ऽआत्रेयात् । २ ॥ आत्रे-
। ६३ अस्मतिन्टिर्गौतमाद्गौतमो गौतमाद्गौतमो व्वात्स्याद्वात्स्यः
सोऽयम ः अस्मन्ण्डल्यः कैशोर्य्यात्काप्यात्कैशोर्य्यः काप्यः कु-
यामेताम नलादि भारद्वारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विद-
ब्रह्मचार्य म इव्वित्सनपातोबाभ्रवाद्वत्सनपाद्बाभ्रवः पथःसौभरा-
र्नवान्कुरुते . रोऽयास्यादाङ्गिरसादयास्यऽ आङ्गिरस ऽआभूते-
स्यात् । द्वाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वा न विवर्जितः
। ६४ श्विनौ दधीचाथर्वणाद्दध्यङ्ङाथर्व्वणो क्षाल्य पाणी पात्रं तु
मृत्योऽप्राध्वँ सनान्मृत्युऽप्राध्वँसनऽ प्राध्व ना भस्मना चैव स्तम्भने
एकर्षेरेकर्षिर्विप्रजितेर्विप्रजितिर्व्यष्टेर्व्यष्टि बुधैः स्मृतः ॥ "पङ्क्तिवा-
सनातनात्सनातनऽ सनगात्सन पङ्क्त्युपविष्टानां दुष्कृतं यद्दुरा-
ह्मस्वयम्भु ब्रह्मणे याावत्पङ्क्तिर्न भिद्यते ॥ पराशरः—एकप-
व्वय शौ णां सह भोजने । यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं
व्व ॥ करमध्ये स्थिता देवाः करपृष्ठे तु राक्षसाः । तस्मात्तु-
पृष्ठेन नान्नं कुर्यात्प्रदक्षिणम् ॥

३१०. "अन्नस्तुतिः." ब्राह्मे— अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिं कारयेततः । अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वन्दयेत् ॥ अन्यच्च—अमृतोपस्तरणमसि स्वाहेत्यपः पिबेत् । करेण सलिले विष्णुं ध्यात्वा ब्रह्म पिबेदपः । प्राणाग्निहोत्रं जुहुयाच्छेषं भुङ्क्ते द्विजोत्तमः । स्वाहान्ताः प्रणवाद्याश्च नाम्ना मन्त्राः प्रकीर्तिताः । जिव्हया च ग्रसेदन्नं दन्तान्तैस्तन्न संस्पृशेत् । अनिन्द्यं भक्षयेदन्नं वाग्यतोऽन्नमकुत्सयन् । पञ्चग्रासान्महामौनं प्राणाद्यांश्च समाचरेत् ॥

३११. "चित्राहुतयः." मनुः—चित्राहुतिबलीन्दद्याद्बलिहीनं न भोजयेत् । तत्र स्थाने करस्पर्शो न भोक्तव्यं कदाचन ॥

३१२. "आपोशनम्." याज्ञवल्क्यः—आपोशानेनोपरिष्टादधस्तादश्नता तथा । अनग्नममृतं चैव कार्यमन्नं द्विजन्मना ॥ पुलस्त्यः—

CC-0. In Public Domain. Digitization by eGangotri

।चखल्ठा॰.. ।वष्पति । ....पच.

सखाराम गोपाळ जोशी अग्निहोत्री.

चेम्भूर. (साष्टी.)

रामचन्द्र दाजीबा देव.

जुन्नर. (जीर्णापूर.)

चिन्तो बल्लाळ नाकिल अग्निहोत्री.
विष्णु गोपाळ उपासने.
शङ्कर दाजी नाकिल.

जुनागड. (कांठेवाड.)

आनन्द्राम द्वारकादास वैष्णव.
मूळशंकर मयाराम व्यास.

जूं (साष्टी.)

पुण्डलिक जगन्नाथ देव.
बालकृष्ण रामचन्द्र वैद्य देव.

ठाणें. (अहनिलवाडा.)

आपाजी बाजी उपाध्ये क्षीरसागर.
गोपाळ महादेव छत्रे.
दाजी रामचन्द्र उपाध्ये क्षीरसागर. २
मळवन्तराव बाजी उपाध्ये क्षीरसागर.
बाबा भाऊ कावळे.
शेवकराम भूदेवभट्ट पुजारी.

त्र्यम्बक.

अनन्त विष्णु सुन्दरपाठक.
आबा रामचन्द्र दीक्षित.
गोविन्द रामचन्द्रभट्ट ढेर्गे.
चिन्तामण मोरेश्वर शुक्ल.
नारायण बाबा शास्त्री धारणे.
नारायण त्र्यम्बक दीक्षित.
ब्रह्मदेव काकाभट्ट देवकुटे २
बाबाभट्ट भाऊभट्ट तानपाठक.
बाळम्भट्ट गणेश कण्व.
रांघो गणेश हरदास तानपाठक.
वामन रामचन्द्र वाडेकर.
वामन बाळम्भट्ट कण्व.
वासुदेव गणेश दीक्षित. २
साम्भ अनन्त शौचे.

...ति सविनयं मे प्रार्थना । शुक्लपक्षो-
...गते । विद्वद्वर्येषु बहुलेखने-
...नीयं । अस्य ग्रन्थस्यो-
गोपिनार्क्लविक्रीडितं वृत्तं ।
महादेव शास्त्रीरचना यो-
बाबाभट्ट आङ्ग।श्रीनारायण

नासिक. (सौम्य-

गङ्गाधर बापू पञ्चाक्षरी.
गोविन्द आबा शौचे.
रघुनाथ विन बापाजी गायधनी.
सदाशिव सिद्धेश्वर दीक्षित शौचे

नाळें (पञ्चक्रोशी.)

जगन्नाथ प्राणशङ्कर शुक्ल.
लक्ष्मण गोविन्द जोशी पुरन्दरे.

पनवेल.

भवानराव बाबुराव आचार्य.

प्रवरासंगम.

दामोदर नानाजी जोशी.

प्रयाग. (अलाहाबाद.)

एकनाथ विठ्ठलभट्ट पैठणकर.
काशिनाथभट्ट शिरसालकर.

पुणें. (पुण्यपत्तन.)

अनन्त बाळकृष्ण मोहळे.
गोपाळ ब्रह्माजी निजामपूरकर.
रामचन्द्र केशव लिमये वकील.
रामचन्द्र सदाशिव.
श्री. वासुदेव महाराज पण्डित.
रा. ब. गोपाळराव हरी देशमुख.
सदाशिवभट्ट विन हरभट्ट माधवी.
हरि नारायण शास्त्री पुराणिक.
हरिश्चन्द्र सुन्दर पण्डित चामरे.

पुणतांबें. (पुण्यस्तम्भ.)

जनार्दन ब्रह्मगिरी गोन्हे पुराणिक.
यादव जनार्दन शास्त्री लमपाठक.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।४६। ः पूजनेन शकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराश-
दधाति। ऋष्णार्पण जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भार-
नरइमेसलो स्वापिच्च यास्काच्चासुरायण ... (फदलाग्राम.)
म कृत्वा थै कुशसुरभारद्वाज
। ९३ असमतिन्टिगौ(ड)
सोऽयम ः असमन्कडल
सामेताम नलादि
ब्रह्मचार्यम्
नैवाञ्क
स्यात्

...कृष्ण शास्त्री पाठक पञ्चानने.
पुरुषोत्तम कृष्णाचार्य.
मुकुन्द नारायण पाठक पञ्चानने.
रामकृष्ण सखाराम पुरन्दरे.
हरीभाऊ शामराव पुरन्दरे.

...नाशिनी.)
...र्म आचार्य.
...वैद्य पुरन्दरे.
धोण्डजोशी पुरन्दरे.
...वामन पण्डित.
...शिवराम शास्त्री आचार्य.
लक्ष्मण गोविन्द जोशी पुरन्दरे.
विठ्ठल नीलकण्ठ जोशी पुरन्दरे.
विष्णु लक्ष्मण दांतीर महाजन.

इन्दूर.
नारायण विन भटंभट गवळी पुराणिक.

उमरखेड. (वऱ्हाड.)
रावजी रघुनाथ (आपा) शास्त्री पाध्ये.७
शार्ङ्गधर शास्त्री योगी मुनावरकर.

कालगांव. (सातारा.)
शामाचार्य नारायणाचार्य शास्त्री खुपेरकर.

कोचीन. (मलबार.)
अनन्त नारायण शास्त्री गोरे.

काशी. (वाराणशी.)
गोविन्द विनायक भट्ट वैद्य.
चिन्तामण भिकम्भट्ट जावजे.
चिन्तामण पुरुषोत्तम भट्ट पाठक कावळे.
जगन्नाथभट्ट सप्तर्षि.
बाळम्भट्ट सखारामभट्ट पुराणिक.
मङ्गळेश्वर सखारामभट्ट पाठक पञ्चानने.
मनूजी गदाधरभट्ट गणूरकर.
महादेव आत्मारामभट्ट बाजपे.

केळवें माहीम. (महिकावती.)
काशिनाथ विठ्ठल पण्डित.
गोपाळ रामराव दाण्डेकर.
दिनकर रामचन्द्र आचार्य.
नाना चिन्तामण शासनकर.
नारायण अनन्त पण्डित.
परशुराम आपा कीर्तने.
परशुराम अनन्त उपाध्ये.
बाळाजी पाण्डुरङ्ग कोशे.
भिकम्भट्ट सदाशिव पाराशरे.
यशवन्त अमृत आचार्य.
वासुदेव चिन्तामण आचार्य.
विश्वनाथ दामोदर आचार्य वैद्य.
हरिश्चन्द्र चिन्तामण शासनकर.

कोल्हापूर. (करवीर.)
श्री० बाबामहाराज रावजी महाराज राजगुरु.

गणदेवी. (गुणदेवी.)
नरोत्तम गौरीशङ्कर शुक्ल.
मणिशङ्कर हरिशङ्कर शुक्ल.
रामचन्द्र विश्वनाथ शुक्ल.

गया.
भिकम्भट्ट मेघश्यामभट्ट यजुर्वेदी.
राजारामभट्ट चिमूटे.
विनायकभट्ट दीक्षित.

ग्वाल्हेर. (लश्कर.)
गङ्गाधर बाबावैद्य नगरकर रामदासी.

चिञ्चणी. (तारापुर.)
गङ्गाधर तुकाराम शासनकर.

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...वष्यति । ... ...
...य इति सविनयं मे प्रार्थना । शुक्लपक्षो-
...वृद्धिङ्गतोऽपेक्ष्यते । विद्वद्वर्येषु बहुलेखने-
...न्थसंबन्धि बहु किं लेखनीयं । अस्य ग्रन्थस्यो-
...स्य प्रार्थनास्ति ॥ श्लोकः । शार्दूलविक्रीडितं वृत्तं ।
माध्यन्दिनानामियं शास्त्रोक्ताखिलनित्यकर्मरचना यो-
नानाशास्त्रपुराणभाष्यनिगमस्मृत्याश्रयान्निर्मिता । श्रीनारायण
...त्ये सतामस्त्विह ॥ कार्तिके सितेतरे पक्षे चैकादश्यां तिथौ सौम्य-
...८०४ । ... ... सही. **गोविन्द** आवाजी शौचे.

...मदनवद्यवन्द्यवेदविद्यानिरन्तर......पुरन्दरोपाव्हविठ्ठलात्मजवैद्यनारायण-
सङ्गमनेरस्थ**वामन**शास्त्रिणो नतयः समुल्लसन्तुतराम् । युष्माभिः "श्रीशुक्लय-
...दायमाध्यन्दिनवासनेयान्हिकसूत्रावलि" नामको ग्रन्थः कृतः तेन सर्वेषां ब्रह्म-
वृन्दानामुपर्युपकृतिः कृता । किञ्च—येषां ब्रह्मवृन्दानामनेकग्रन्थज्ञानमेकसमया-
वच्छेदेन न भवेत् तज्ज्ञानं युष्माभिरनेकग्रन्थानवलोक्यैकस्मिन्ग्रन्थे प्रकटीकृतं ए-
तत्समीचीनं कृतं ... ... अस्तु—सर्वान्ग्रन्थस्थान्विषयानवलोक्य मम ब्रह्मानन्दः
समुल्लसतितराम् ॥ सङ्गमनेर—**वामन** श्रीधर शास्त्री मुळे । माघ शुद्ध ९ म्यां
शके १८०४.

८. वे. शा. सं. रा. रा. नारायण विठ्ठल वैद्यपुरन्दरे यांशीं **अण्णा** शास्त्री जोशी मु० वडोदें नमस्कार वि. मी वैशाख शु० १० गुरुवार पावेतों सुखरूप असों वि० आपणांकडून "श्री शुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयान्हिकसूत्रावलि" नामक पुस्तक पाठविल्याप्रमाणें सदक्षिण पावलें. अशाच स्वशाखोत्तेजक गोष्टी आपण कराल अशी आशा पूर्ण धरून आहों, तरी शाखेला उत्तेजन येईल तें करावें. आमचे पित्याचें नांव सीताराम जोशी, आडनांव जोशी, नाशिककर— गोत्र भारद्वाज कळावें. मि० शके १८०४. पुस्तक सदक्षिण डाकमार्गे पाठविल्याप्रमाणें पावलें. सही. **अण्णा** शास्त्री जोशी नाशिककर.

९. ...... झाला माधवराव पुत्र पहिला जी अन्नपूर्णा तिला । श्रीनारायण हा दुजा शुभमती वैद्याग्रणी त्या तिला । ज्याणें वाजसनेय सूत्र सगळें नित्यान्हिकीं गोंविलें । केला यत्न भगीरथासम अहो मुक्तामणी ओंविले ॥ ... ... त्याणें शुक्लयजूंत जन्म धरुनी सूत्रावली ग्रन्थ हा । केला सादर याज्ञवल्क्य करुणें नित्यान्हिक श्री महा ॥सही. **राघोगणेश** तानपाठक त्र्यंबककर. माघ शु० ५ शके १८०४.

१०. श्रीमन्त रा. रा. नारायण विठ्ठल वैद्य पुरन्दरे मु. मुंबई यांशीं रा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।४६। ः पूजनेन शैक्ः पाराशर्य्यायणात्पाराशर्य्यायणः पाराश-
... कृष्णार्पण जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भार-
त्रावलीचा बहुत स्तुति केली ती ... (फादरग्राम.)
नाशिक, वैशाख शुद्ध १३ सोमवार श... कृष्ण शास्त्री पाठक पञ्चानने.
...षोत्तम कृष्णाचार्य.
११. वेदशास्त्र सं. रा. रा. नारायण विट्ठ... नारायण पाठक पञ्चानने.
सङ्गमनेरकर मु. बडोदें कृतानेक नमस्कार. वि. ... सखाराम पुरन्दरे.
न्दिनवाजसनेयान्हिकसूत्रावलि" नामक पुस्तक ...राव पुरन्दरे.
त्याबद्दल मी तर मोठा आभारी आहेंच, परन्तु आपली (महिकावर्ती.)
सनेय मण्डळी आहे तितक्यांनी आपले आभार अवश्यमेव ...
कारण, असें जगडपयोगार्थ सत्कर्म त्याविषयीं पुरस्कर्ते होऊन श...
त्यनुसार द्रव्यानें लोकोपकार करणें हें जे खरे उत्तम पुरुष आहेत ...
च्या कालमानामुळें फार वैरल्य दृष्टिगोचर होत आहे; असें असून स्वश...
मानानें ही सत्कृत्याची सरणी तयार करून स्वशाखीय ब्रह्मवृन्दास साद...
त्यामुळें माझे ठिकाणीं संतोष कितपत झालेला आहे, तें मी पत्रीं लिहूं श...
नाहीं. ... ... माझे एका विद्वान् मित्रानें आपली सूत्रावलि पाहून तिजविषयीं त्यानें आपलें चांगलें मत प्रदर्शित केलें. .... माझें गोत्र कौशिक, पित्याचें नांव यशवन्त शास्त्री. प्रवर—कौशिक, विश्वामित्र, अघमर्षण. **बाळशास्त्री** सङ्गमनेरकर. ज्येष्ठ शुद्ध १२ सोमवार शके १८०४.

अन्यान्यपि बहूनि पत्राणि सन्ति तथापि तानि ग्रन्थविस्तरभयान्नात्र लिखितानि ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दारभ्य मूलप-
निदध्यात् । आ-
निदध्यात् ।पवि-
। आज्यमवेक्ष्य । अपद्र-
नादाय । तिष्ठन् समिधोऽभ्याधाय । प्रो-
हस्तेनेशानमारभ्येशानपर्यन्तं प्रदक्षिण-
त्तिः । पवित्रयोः प्रणीतासु निधानम् । सोपग्रहं
हृदि निधाय दक्षिणजानुनिपातः ब्रह्मणोन्वारम्भः । द-
स्रुवेण होमः । मनसा—ॐ प्रजापतये स्वाहा इदं प्रजाप-
मम ॥ त्यागान्ते द्रव्यप्रक्षेपः । प्रोक्षणीपात्रे संस्रवधारणम् ॥
इन्द्राय स्वाहा । इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इद-
न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥१ ऋ-
पृथिव्यै स्वाहा इदं पृथिव्यै न मम । ॐ अग्नये
मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न
स्वाहा इदं छन्दोभ्यो न मम ॥ २ यजु-
स्वाहा इदमन्तरिक्षाय न मम ॥ ॐ
न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे
भ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ३ सा-
स्वाहा इदं दिवे न मन ॥ ॐ सूर्य्याय स्वा-
मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न
भ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ४ अ-
दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम ॥ ॐ चन्द्र-
इदं चन्द्रमसे न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्म-
म ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥
ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ देवेभ्यः स्वा-
हा इदं देवेभ्यो न मम ॥ ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो
न मम ॥ ॐ श्रद्धायै स्वाहा इदं श्रद्धायै न मम ॥ ॐ मेधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यङ्मुखेभ्य
न्प्रब्रूयादृषि-
सूक्तान्याथर्वणानाꣳ
सह न इदं वीर्यवदस्तु ब्रह्म
ह इति त्रिरात्रं नाधीयीरँल्लोम-
गुत्सर्गात् ॥ १३ ॥
कर्मप्रयोगः"—गुरुः हस्तौ पादौ प्रक्षाल्य द्विराच-
लौकिकाग्नेर्वा पश्चाच्छिष्यैः सह प्राङ्मुख उपविश्य प्राणा-
य कृत्वा देशकालौ सङ्कीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अध्यायो-
र्मणि पञ्चभूसंस्कारपूर्वकमग्निस्थापनमहं करिष्य इति सङ्कल्प्य
भूसंस्कारान्कुर्यात् ॥ ते च—१ दर्भैः परिसमुह्य । २ गोमयोदके-
लिप्य । ३ स्रुवेणोल्लिख्य । ४ अनामिकाङ्गुष्ठाभ्यामुद्धृत्य । ५
ततः अग्निं प्रतिष्ठाप्य पात्रस्थापनादि कुर्यात् । त
म् । अग्नेरुत्तरतः पात्रासादनम् । द्वे पवित्रे ताम्र-
पालाश्यः समिधः । प्राज्यावाघारौ । समिद्धतमे
सावित्रीमन्त्रेण । पूर्णपात्रं दक्षिणा । त्रि-
तनम् । "ऋषिच्छन्ददेवतास्मरणम्"—
खम्ब्रह्मान्तस्य माध्यन्दिनीयस्य वाजसनेयकस्य
विवस्वानृषिः । वायुर्देवता । गायत्र्यादीनि स-
। अध्यायोपाकर्मणि विनियोगः—"देवताभि-
—प्रजापतिम् । इन्द्रम् । अग्निम् । सोमम् । पृथ्वी-
। ब्रह्माणम् । छन्दाꣳसि । अन्तरिक्षम् । वायुम् ।
। छन्दाꣳसि । दिवम् । सूर्य्यम् । ब्रह्माणम् । छन्दाꣳ
दिशः । चन्द्रमसम् । ब्रह्माणम् । छन्दाꣳसि । प्रजापतिम् ।
देवान् । ऋषीन् । श्रद्धाम् । मेधाम् । सदसस्पतिम् । अनुमतिम् ॥
एताः प्रधानदेवता आज्येन । सदसस्पतिम् धानाभिः । सवितारं
तिलैः । अग्निं स्विष्टकृतं धानाशेषेण । अग्निम् । वायुम् । सूर्य्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नीवरुणौ । ...
विष्णुम् । विश्वान् ...
तिम् । एता अङ्गप्र ...
वरणम्—दक्षिणतो ब्रह्मासनमा ...
ब्रह्मा भव । भवामीति प्रतिवचनम् । ब्रह्मा ...
नात्तृणनिरसनञ्च कृत्वा उपविशेत् । अग्ने ...
निधाय । प्रणीताचमसं वामहस्ते कृत्वा आत्मा ...
थमासने निधाय चमसदण्डमालभ्य ब्रह्माणमवलोक्य ...
ऽनुज्ञातः प्रणीयोत्तरासने निदध्यात् । तत उदगग्रैः प्रागग्रै ...
परिस्तीर्य । अथैवदासाद्य । अग्नेरुत्तरतः प्राक्संस्थमुदक्संस्थं ...
पात्रासादनम् । पवित्रच्छेदनार्थं दर्भास्त्रयः । पवित्रे द्वे । ... ॐ
त्रम् । आज्यस्थाली । सम्मार्जनकुशास्त्रिप्रभृतयः । उ ... भगव
सप्तप्रभृतयः । समिधस्त्रिप्रभृतयः । स्रुवः । आज्यम् । ...
पात्रं च ॥ " अथोपकल्पनीयानि "— प्रतिशिष्यं ...
आर्द्राः सपत्रा औदुम्बरस्य । दधि भक्षणार्थं । लौ ...
मात्रमौदुम्बरकाष्ठं तिलस्थापनस्थाने सर्व ...
(औदुम्बरस्य या शाखा फलकद्वयसंयुता ...
ज्ञिकैः परिकल्पितम्) । तिलाश्चेति । पवित्रकरणम् ...
निधाय द्विमूलेन द्वौ कुशौ प्रदक्षिणीकृत्य सर्वान्यु ...
ष्ठाभ्यां च्छित्वा तानुत्तरतः प्रक्षिपेत् । प्रोक्षणीपात्रं ...
धाय । प्रोक्षणीपात्रे पात्रान्तरेण प्रणीताद्भिस्तासां ...
त्रहस्तेनोत्तानेन पात्रप्रोक्षणम् । आज्यस्थाल्याः प्रोक्ष ...
कुशानां प्रोक्षणम् । उपयमनकुशानां प्रोक्षणम् । समिधां ...
स्रुवस्य प्रोक्षणम् । आज्यस्य प्रोक्षणम् । धानानां प्रोक्षणम् । ...
त्रस्य प्रोक्षणम् । प्रणीताग्न्योर्मध्येऽसञ्चरे प्रोक्षणीं निधाय । कुशोपग्र-
हेण आज्यस्थाल्यामाज्यनिर्वापः । आज्याधिश्रयणम् । ततो ज्वल-
दुल्मुकेन पर्यग्निकरणम् । इतरथावृत्तिः । अर्धश्रिते स्रुवं प्रतप्य । सं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।दारभ्य मूलप-
। निदध्यात् । आ-
।। निदध्यात् ।पवि-
पूय । आज्यमवेक्ष्य । अपद्र-
।नादाय । तिष्ठन् समिधोऽभ्याधाय । प्रो-
हस्तेनेशानमारभ्येशानपर्यन्तं प्रदक्षिण-
ावृत्तिः । पवित्रयोः प्रणीतासु निधानम् । सोपग्रहं
हृदि निधाय दक्षिणजानुनिपातः ब्रह्मणोन्वारम्भः । द-
य । स्रुवेण होमः । मनसा—ॐ प्रजापतये स्वाहा इदं प्रजाप-
मम ॥ त्यागान्ते द्रव्यप्रक्षेपः । प्रोक्षणीपात्रे संस्रवधारणम् ॥
इन्द्राय स्वाहा । इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इद-
ये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥१ ऋ-
पृथिव्यै स्वाहा इदं पृथिव्यै न मम । ॐ अग्नये
मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न
: स्वाहा इदं छन्दोभ्यो न मम ॥ २ यजु-
स्वाहा इदमन्तरिक्षाय न मम ॥ ॐ
न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे
ोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ३ सा-
स्वाहा इदं दिवे न मन ॥ ॐ सूर्य्याय स्वा-
न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न
ोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ४ अ-
दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम ॥ ॐ चन्द्र-
इदं चन्द्रमसे न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्म-
मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥
ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ देवेभ्यः स्वा-
हा इदं देवेभ्यो न मम ॥ ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो
न मम ॥ ॐ श्रद्धायै स्वाहा इदं श्रद्धायै न मम ॥ ॐ मेधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त । १४ ॥ ताᳬ हैतांगौतमोराह्
हं प्रत्युत्ससादताᳬ हांगजिब्र
यविवेदसहोवाच सहस्रंभोसाज्ञ
विन्दामन्वविदामेति विन्दते
ति सर्वमायुरेतिय ऽएवंविद्वाने
“ तस्मादेतहृषिणाभ्यनूत्त
तानिविदुर्ब्राह्मणासेमन
रीयंवाचोमनुष्यावदन्ति
–प्रियेस्वाध्यायप्रवचने
यतेसुषᳬ स्वपिति
कारामताच प्रज्ञा-
र्न्ब्राह्मणमभिनि-
पङ्क्तिल्लोंकᳬ प-
वाज्येयतयाचा-
क्षते स्वयम्भु-
हस्वयम्भूर-
हंब्रवीमी-
स्यादि-
मेदेही
ऽआ-
त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृचक्षसमिति तदेतत्सर्वमायुदीर्घ
,नादाय । तिष्ठन् ायुरस्तुसर्वमायुरेहीत्येषुते लोक
हस्तेनेशानमारभ्य ग्वदति । २१ ॥ अथवं शंसम
ात्तः । पवित्रयोः प्रणीतास ो माण्डूकायनेर्माण्डूकायनि
हृदि निधाय दक्षिणजानुनिपातः ोत्सो माहित्थेर्माहित्थिर्वा
य । स्रुवेण होमः । मनसा—ॐ प्रजापत यशाण्डिल्याच्छाण्डिल्य
मम ॥ त्यागान्ते द्रव्यप्रक्षेपः । प्रोक्ष ाद्यजवचा राजस्तम्बायन
इन्द्राय स्वाहा । इदं इन्द्राय न मम तेः प्रजापतिर्ब्रह्मणो ब्र
े न मम ॥ ॐ सोमाय स्वाहा इ न्तिर्भवतु । यजमानस्य
पृथिव्यै स्वाहा इदं पृथि स्तु ॥ "अर्पणम्" न
मम ॥ ॐ ब्रह्म राध्यदेवता प्रजाप
ः स्वाहा इदं संक्षेपतो ऋषिः कलेरारम्भ-
स्वाहा ...नदराकानि सूत्राण्युपनिबद्धानि
तनायंनां गर्भाधानादि षोडशसंस्कारकर्माणि

याज्ञवल्क्यो वैशम्पायनर्षेर्भागिनेयः । तं च वैशम्पायनो यजुः-
शामध्यापयामास । तां च याज्ञवल्क्य उत्सृष्टवान् तत्कारणं त्वे-
कदा सर्वैर्ऋषिभिः कस्मिंश्चित्कारणान्तरे ऐकमत्यार्थं मेरुपर्वते एकत्र
गन्तव्यमिति निश्चयं कृत्वा तत्र कश्चिदृषिर्यदि न गच्छेत्तर्हि स सप्त-
रात्रं वाचिकब्रह्महत्यापातकेन लिप्तो भवेदिति नियमः कृतः । तदनुसारे-
ण तत्समाजे सर्वेऽप्यृषयो मिलिताः । याज्ञवल्क्यगुरोर्वैशम्पायनस्य तु त-
द्दिने पितुः श्राद्धतिथिः । अतो वैशम्पायनस्तद्दिने त्वरया नित्यकर्म
समाप्य श्राद्धविधिं च कृत्वा तत्समाजे गन्तव्यमिति निश्चित्य प्रत्यूष
उत्थाय सर्वतस्तमोव्याप्तायां रात्रावेव स्नानार्थं प्रस्थितः । तदा तद्गृह-
कोणे निद्राणस्य बालस्योपरि तत्पादः पतितः । तेन च स बालः प-
ञ्चत्वमगमत् । तज्ज्ञात्वा तच्छोकव्याकुलस्यर्षेर्वैशम्पायनस्य तद्दि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

...शिष्या...

तथा च वल्क्य आत्मविद्यां त...

शुक्लं वाजसनेयं तत्कृष्णेनैव ...धीमता । प्राप्त...

४. पश्चाद्वेदरहितो दुःखितो याज्ञवल्क्य। ...

निश्चित्य भगवन्तमादित्यमाराध्य प्रसन्नात्तस्मान्मनु...

" अयातयामां शुक्लयजुःशाखां माध्यन्दिनवाजसनेयी...

म्नीमध्यगात् ॥ ततः पुनः स्वतपःसन्तोषितसरस्वतीप्रसादाद्योति ...

ल्क्यः शतपथब्राह्मणं सखिलं सरहस्यं प्रकटयामास। ततश्च पुनस्त—पसा प्रसन्नात्सूर्यादृग्वेदादिकान्वेदान् लब्धवान् । अतो याज्ञवल्क्यश्चतुर्वेदाध्यायी ॥

६. एतच्छ्रुत्वा सर्वैर्ऋषिभिः सह गुरुर्वैशम्पायनो विस्मयमगात् । ततः कृतार्थो योगीश्वरः स्वशिष्येभ्यस्तां शाखामध्यापयदित्युदन्तो महाभारते शान्तिपर्वाणि अष्टादशोत्तरत्रिशततमेऽध्यायेऽस्ति तत्रत्यावेतौ श्लोकौ— ततः शतपथं कृत्स्नं सरहस्यं स संग्रहम् । चक्रे स परिशेषं च हर्षेण परमेण ह । १६ ॥ कृत्वा चाध्ययनं तेषां शि-

---

*एतच्च बृहदारण्यभाष्ये शङ्कराचार्यैर्जनकाद्गोसहस्रानयनप्रकरणे स्पष्टीकृतमस्ति॥

CC-0. In Public Domain. Digitization by eGangotri

...नमन्यत ॥ त-
...श्रेष्ठा यज्ञमकार्षीत् तत्र याज्ञ-
...यैव दत्तं ॥ एकदा मुक्तिप्रदे गङ्गातीरे जन-
...। तत्र स्वयं भगवान् याज्ञवल्क्यो याजको बभूव ॥
... जनकयज्ञस्थानत्वाज्जनस्थानं (नासिकं) इति गीयते ॥
...चेद्वसिष्ठप्रार्थनया याज्ञवल्क्यस्तस्य पुत्रस्य पाराशरस्य विवा-
हं स्वसंपादितायातयामवेदबोधितविधिना कारयामास ॥ पुनरेकदा पु-
ण्यस्तम्भक्षेत्रे (पुणताम्बें इति ख्याते) गोदावरीतीरे चन्द्रपुष्करिणी-
जलसमीपे चन्द्रग्रहणे चन्द्र आत्मनो यक्ष्मरोगपापनिवृत्तये आदित्य-
देवताकं यागं याज्ञवल्क्येन ऋत्विजा सह कृत्वा चन्द्रो यक्ष्मरोगा-
द्विमुक्तोऽभूत् ॥ पुनश्च नर्मदातीरे सूर्यपुष्करणीजलसमीपे मित्रवि-
न्दाख्ये पुरे सूर्यग्रहणे कात्यायनीयसूत्रोक्तप्रकारेण देवा यागं चक्रि-
रे ॥ अपि च परीक्षित्पुत्रं शतानीकं याज्ञवल्क्यः स्वकीयं वेदमध्या-
पयामास ॥ एकदा श्रीकाञ्च्यां श्रीविष्णुप्रीतये चतुर्मुखो ब्रह्माश्वमेधं
चिकीर्षुर्याज्ञवल्क्यं सर्वेषामृत्विजामध्यक्षत्वेन वरयामास ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वल्क्य आत्मविद्यां त…
नुशास्तस्तु याज्ञवल्क्येन धीमता । …
धिपतिस्तदा ” ॥

९. एवमुपरि दर्शितक्रमेण जनकगृहे इतरेषामृषीणा… गार्ग्याश्च संवादोऽभूत् । तस्मिन्याज्ञवल्क्यः सर्वान्यथा जिगायेति बृ… दारण्ये प्रदर्शितं तस्मात्सारवद्यत्किञ्चिदुद्धृत्यात्र प्रदर्श्यते । तद्यथा— चतुर्दशाध्याये मधुकाण्डे—“अथ हैनं भुज्युर्लाह्यायनिः पप्रछ—याज्ञवल्क्येतिहोवाच मद्रेषु चरकाः पर्य्यव्रजाम ते पतञ्जलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाङ्गिरस इति तं यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन् स त्वा पृच्छामि याज्ञवल्क्यः क्व पारिक्षिता अभवन्निति । १ ॥ स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति क्वन्वश्वमेधयाजिनो गच्छन्तीति द्वात्रिंशतं वै देवरथान्ह्यान्ययं लोकस्तं समन्तं पृथिवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...ब्रह्मलोका ओता-
...ामो ते मूर्द्धा व्यपप्तदनति-
...पृच्छासि गार्गि मातिप्राक्षीरिति ततो ह गार्गी
...म" ॥ १ ॥ षष्ठब्राह्मणम् ॥ ६ ॥

...०. 'एवं कहोड ऋगाश्वलायनशाखायाः प्रवक्ता शाकल्यो
...द्वाजो राजा जनकश्च इत्यादीनां प्रत्येकं **योगीश्वरेण** संवादः स-
मभूत् तस्मिन्सर्वानपि जिग्ये तदद्भुतशक्तिविस्मिता गार्गी तं शरणीभूय
तं स्तुवाना स्वालयमगात् तेन विमनाः शाकल्यो याज्ञवल्क्योपहा-
समकरोत् तव द्वेष्टुः शिरःपातो भवेदिति याज्ञवल्क्याय सूर्येण वरो-
दत्तस्तेन शाकल्यस्य शिरोऽपतत् । अनन्तरं जनकस्तस्मादनुग्रहं
सम्पाद्य योगसिद्ध्यै राज्यविरक्तो वनं जगाम । अतो देहातीतात्मज्ञा-
नलाभाद्वैदेह इत्यभिधामाप एवं सर्वेषां जयेन धवलीकृतदिङ्मुखस्त्रै-
लोक्योद्दीपको यशोद्विजराज उदियाय तेनैव **योगीश्वरो याज्ञवल्क्य**
इत्यनन्यलभ्यं पदमाससाद । तत्प्रतिपादितासिद्धान्त इत्थम्— ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथब्राह्मणसर्वस्वप्रारम्भः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री·स ॐ श्रीगणेशाय नमः दीपवद्यो न मतियो भूर्भुवः स्वर्जगत्त्रयं सवितुस्तं वयं भर्गमपवर्गकरं स्तुमः १ दधानं चतुराम्नायपूतां सूक्तचतुष्टयीं मुनिमास्य
१ नमामस्तं पंकजोदरवासिनं २ त्रिदिवाभरणं कालत्रयहेतुस्त्रयीमयः त्रिवर्गप्राप्तसरणिस्तरणिः श्रेयसेऽस्तु नः ३ त्रिलोकपूज्यां नमितित्रिसंध्यं यां त्रिलो
चनः त्रिवर्गफलनिर्मात्रीं गायत्रीं तामुपास्महे ४ वंशे वात्स्यमुनेर्मुनेरिव सदाचारस्य विश्रामभूद्धर्मोध्यस्य धनंजयः समजनि ज्यायान्यज्ज्योतिषः य
स्मिन्नुद्धृतिजातवेदसि हविर्व्योमांगणव्यापिभिर्धूपैर्धूपितमंबुसिद्धसरिन्नोहं दारस्कैः पीयते ५ वांछातिक्रमसंभृतोऽपि विभवे ज्योतिर्जटाभिर्मणी
न्हित्वा यस्य जगन्मयस्य महसो जागर्ति कोषः कुशः अप्येतस्य विलंघ्य शैलसहस्रान् प्राग्द्वारि वद्धान्द्विपान् दूरोद्दंडितयत्नपूपदृषभोत्कर्षेण हर्षेभि
यत् ६ अंतःप्रमोदशवलीकृतपक्ष्मसूचिस्यूताश्रुमौक्तिकभरालसलोचनाभिः गीतं पुरः सुरवधूभिरमुष्य कीर्तिमास्थानसीमनि सुराधिपतिः शृ
णोति ७ गोष्ठीषु देवतममलमतिधैर्यसंपदां वसतिः प्रकृतिरिव परमपुंसस्तस्यासीज्जननी गृहिणी ८ वभूव तस्याः प्रकृतेर्महानिव श्रेयो विलासायतनो·
हलायुधः यत्कीर्तिरंभोनिधिवीचिदंडदोलाधिरोहव्यसनं विभर्ति ९ लब्धजन्मधनंजयाद्भगवतः श्रीलक्ष्मणः क्ष्मापतेरात्मन्यासदृशी निजस्य वयसः
प्राप्तमहापात्रता शब्दब्रह्मधनं करामलकवद्योगेन तृष्णाकराण्यस्ति प्रार्थितव्यमस्य कृतिनः किंचित्तु सांसारिकं १० येनासीदजितेन सिंधुलहरी
धौतांजनायां क्षितौ यस्याज्ञानमभून्न सप्तभुवने नानाविधं वाङ्मयं देवः सत्रिजगन्मयस्य महिमा श्रीलक्ष्मणः क्ष्मापतिस्तेनेयस्य मनीषिताधिकपुरस्का
रोत्तरं संपदं ११ वाल्ये ख्यापितराजपंडितपदं श्वेतार्चिर्विबोज्वलच्छत्रस्फारितमहामहत्तनुपदं दत्वा नवे यौवने यस्मै यौवनशेषयोग्यमखिलक्ष्मा
पालनारायणः श्रीमाल्लक्ष्मणसेनदेवनृपतिर्धर्माधिकारं ददौ १२ आचारप्रयुक्तोऽत्र कतुविधावुत्साहमानन्वतीप्रायश्चित्तविकाशना हि दधती राम
हर्षप्रकर्षं हृदि गार्हस्थ्यांशपरिग्रहग्रहवती निर्व्यूढवर्णस्थितिर्वेदेभ्योऽपि गरीयसी स्मृतिकथा यस्याभवत्प्रेयसी १३ आसीत्कस्य न मंदिरेन १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन योर्या नानकस्यातिथिः क एते केन धृतास्स्यांनकुतुकाद्दृश्यंगनेव श्रुतिः ॥ धर्माध्यक्षहल्लायुधस्य सदृशोनास्याः प्रियः कोप्य भूद्यः कृत्वाहृ
द्येनुरागतरलोनकं दिवं हृष्यति १४ कर्णारोपितहेमकुंडलमिलन्नीलाश्मरश्मिच्छटासंसर्गप्रतिपद्य कृष्णममभवद्यो पिष्टकृष्णाजिनं किं चाप्यनु
स्वलब्धनिष्फलयता यस्याग्निमग्न्यालये लीलाश्रीकररत्नकंकणरणत्कारैः कृतं सन्मनः १५ पात्रेदारुमयं क्वचिद्विजयतेहेमं क्वचिद्भाजनं कु
त्राप्यस्तिदुकूलमिद्धधवलं कुत्रापिकृष्णाजिनं धूमः क्वापि वषट्कृतानाहुतिकृतोधूमः परः क्वाप्यभूद्यत्नेः कर्मफलं च तत्सयुगपज्जागर्ति यन्मंदिरे १६ नि
स्वाध्यायेव्यपगतवषट्कारशब्दोदये स्मिन्वृत्तिच्छेदृश्यसनि विकलावस्थि च मार्वसिष्टः हुत्वाहुत्वाविधिवदमुनादीयमानं त्रिसंध्यं धूमोद्गारं वितन्
रतिहविः प्राश्यमंदाग्निमग्निः १७ आपीयश्रुतिसंपुटेनहृदयेसंस्थापिता सूरिभिर्विन्यस्ताः सरसत्वनिश्चलशिलाः पर्णान्तरेस्त्रिस्त्रियिभिः आवद्धाः
कविभिर्विमृश्य खलकथावंधैः प्रवंधैरपि भ्राम्यन्ति प्रतिपत्तनं प्रतिगृहं प्रत्यंगणं यद्गुणाः १८ मीमांसासर्वस्वं वेदश्चवसर्वस्वं यत्कृतनशैवसर्वस्वं पंडितस
र्वस्वमसौ सर्वस्वसर्वधीरणाम् १९ आसन्वाकति संति वाकति कति क्ष्मामंडले पंडिता व्याख्यानामतिशालिनोथ मुगुडाचार्येण वेदः परं स्पष्टन
दर्पीयनेन विदुषा विस्पष्टप्रसिद्धेः पदैः संध्यादिद्विजकर्ममंत्रवचसो व्याख्यानमेतत्कृतं २० आसन्वाकति सन्तिभोपिन पुमांसस्तस्मात्परः साह
हसी यो वेदार्थविवेचनाय कुरुते सज्जारसज्ञाननं॥ किं त्वस्मिन्मुगुडेनवर्त्मरचितं प्रागेव चेद्विद्यते व्याख्यानं कियदेकवेदवचसांतेनेदमारभ्यते॥
२१ अर्थो येन विचारयन्त्यविदितं येषामृषिच्छंदसी येजानंति न देवतापरिचयो येर्न्यो पयोगे कृतः विज्ञायापिपदक्रमं फलवहिर्भावेन तेः प्रत्यहं तादृग्
वेहवेदभारवहनक्लेशः परप्राप्यते २२ अर्थाववोधेन विना नशब्दश्रद्धां समुन्मीलतिवैदिकेपि अकारिकर्मोचितवेदभागव्याख्याविमृश्येतिहला
युधेन २३ स्नातापद्धतिमग्रजः पशुपतिः श्राद्धादिकृत्येव्यधादीशानः कृतवान्द्विजान्हिकविधौज्येष्ठोपरः पद्धतिं तेनास्मिन्नसुनाफलस्तुतिपरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तुम्यनानास्मृतीः संध्यादिद्विजकर्ममंत्रवचसां व्याख्यापराख्यापिता २४ मीमांसाव्यवसायिभिः स्मृतिपरामर्षप्रमर्षेस्थितैर्गायत्री द्विजपुंग
वैः कतिकिं पत्कृत्तान वा व्याहृता प्रामाण्यस्य कृते विलिख्य वचनं नानामुनीनां मृदु व्याख्यानं च ननाद र्शं भृशमिह प्राज्ञाग्रणीनोंजलिः २५ दत्ता
र्थैरूपं प्रथममदत्तमपरैर्भुवि सर्वसंग्राह्यणानां च शब्दरूपमिमं ददौ २६ सूक्ष्मावबोधकमहत्त्वविनाशकारि निस्सारकं किमपि भूषितकंठदेशः
स्तन्निराशुधमकारि हलायुधेन नेत्रद्वयी विसदृशं नयनं द्विजानां २७ इह प्रथममुद्दिष्टं ग्रंथारंभप्रयोजनं वेदस्याध्ययनं कार्यमतः परमुदाहृतं
२८ वेदार्थविज्ञानफलं तदनंतरमीरितं ऋष्यादीनां तथा ज्ञानं दंतधावनकर्म च प्रातः स्नानं तथा प्रातः संध्या च समुदाहृता २९ माहात्म्यं सप्र
पंचं च प्राणायामस्य दर्शितं प्राणायामस्य गायत्र्या अपि व्याख्यानतः परम् ३० अकारि जप्यं गायत्र्या अपि व्याख्यानतः परं दर्शितं स्नानमंत्राणां व्या
ख्यानं तदनंतरं अघमर्षणमाहात्म्यव्याख्यादिकमुदाहृतं ३१ ब्रह्मयज्ञक्रियामंत्रा मंत्रास्तर्पणकर्मणः सूर्यार्घ्यदानमंत्राश्च तदनंतर मीरिताः ॥
३२ आदित्यादिग्रहाणां च पूजामंत्राः प्रदर्शिताः कृतं पुरुषसूक्तस्य व्याख्यानं तदनंतरं ३३ व्याख्यातंत्र्यंबकमंत्रस्य चंडीमंत्रस्य चेरिता निरुक्ते
वैश्वदेवमंत्राश्च प्रतिपादिताः ३४ श्राद्धस्य पार्वणादेश्च मंत्रव्याख्या निवेदिता भोजनस्योदिता मंत्राः सायंसंध्या च कीर्तिता ३५ उक्ता मंत्राश्च
शयनगर्भाधानविधेरपि मंत्राः पुंसवनस्योक्ताः सीमंतोन्नयनस्य च ॥ ३६ ॥ सोष्यंतीकर्मणां मंत्रा जातकर्मविधेरपि व्याख्याता नामकरणमंत्रा
श्च तदनंतरं ३७ मंत्रा निष्क्रमणस्योक्तास्तथान्नप्राशनस्य च चूडाकरणमंत्राश्च ततः परमुदाहृताः ३८ उक्तास्तथोपनयनमंत्राश्च तदनंतरं स
मावर्तनमंत्राश्च मंत्राः परिणयस्य च ३९ आधानस्यावसथ्यादेर्मंत्राः प्रोक्तास्ततः परं व्याख्याता मणिकाधानमंत्राश्च तदनंतरं ॥ ४० ॥ उक्ता मं
त्रास्तथा पिंडपितृयज्ञविधेरपि पश्वादिकर्मणो मंत्रास्ततः परमुदाहृताः ॥ ४१ ॥ निबंधेन समेतां यत्याकयज्ञस्य पद्धतिं ज्येष्ठः पशुपतिश्चक्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनास्माभिर्न सा कृता ४२ अंत्येष्टिकर्मणो मंत्राव्याख्याताः ख्यातकीर्तिनादंतधावनमारभ्य यावदंत्येष्टिमीरिता ४३ मंत्राणां नावदेवास्मिन् व्या-
ख्यानमुपदर्शितं ॥ अधीत्य स्वशाखादित्यधिकृतस्य स्मर्यते च तावत् ४४ वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमं अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् ४५
अनेन मनुवचनेन वेदत्रयं वेदद्वयं एको वा वेदोऽध्येतव्यत्वेन प्रतिपादितः ४६ तत्रापि पारस्करेण मीमांसा विधिर्विधेयस्तर्कश्च वेदः षडंगमेकत्रेति विशे-
ष उक्तः एतच्चाध्ययनं गुरुकुले स्थित्वा ब्रह्मचारिणा कर्तव्यमित्याह मनुः । तपोविशेषैर्विविधैर्व्रतैश्च विधिनोदितैः वेदः कृत्स्नोधिगंतव्यः सरहस्यो द्वि-
जन्मनेति तदिदं सरहस्यं वेदाध्ययने न कृत्स्न एव वेदो ब्राह्मणेनाध्येतव्यो ग्रंथतश्चाध्येतव्य इति स्थिते वेदाध्ययनवेदार्थज्ञानमंतरेण गार्हस्थ्याधिकार
एव न स्यात् तदधिकारे च सर्वकर्मानधिकार एव यतः योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः इति वदता मनुः
नावेदाध्ययनवेदार्थज्ञानपराङ्मुखब्राह्मणस्य शूद्रत्वमेव प्रतिपादितं तत्र च कलौ आयुष्मत्त्वोत्साहश्रद्धादीनामल्पत्वद्दुष्कलजात्यन्यादिभिर्वेदाध्य-
यनमात्रमेव क्रियते राढीयवारेंद्रैस्तु अध्ययनैर्विना क्रियदेकदेशवेदार्थस्य कर्ममीमांसाद्वारेण ज्ञेय इति कर्तव्यताविचारः क्रियते तेन चैतेनापि मंत्रार्थक-
र्मवेदार्थज्ञानं मंत्रानुज्ञानस्यैव प्रयोजनं यतस्तत्परिज्ञानमेव शुभफलं यदज्ञाने च दोषः श्रूयते । तथा च योगियाज्ञवल्क्यः यस्तु जानाति तत्त्वेन आर्षं
छंदश्च दैवतं । विनियोगं ब्राह्मणं च वेदार्थज्ञानकर्म च एकैकशोऽस्य तत्त्वः सोभिवंद्यो ह्यतिथिवद्भवेत् देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः पूर्वोक्ते-
न प्रकारेण ऋष्यादीन्वेत्ति यो द्विजः । अधिकारो भवेत्तस्य रहस्यादिषु कर्मसु मंत्रे मंत्रप्रयत्नेन ज्ञातव्यं ब्राह्मणेन तु । विज्ञाने परिपूर्णस्तु स्वाध्यायफलमश्नु-
ते छंदांस्ययातयामानि भवंत्यफलदान्यपि तद्व्यतिरेके योगियाज्ञवल्क्यः अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपं होममंतर्जलादीनि तेभ्यो-
ऽल्पफलं भवेत् आपद्यते स्थाणुगर्तं स्वयं वापि प्रमीयते तथा अंतर्जलादिके जप्येऽन्तरेषामज्ञानतो नाधिकारोस्ति मंत्राणामेवं स्मृतिनिदर्शनमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स· अतो वेदाध्ययनानंतरं वेदमंत्रार्थज्ञाने हि तात्पर्यं एतै सुराष्ट्रीयवारेंद्रकेरर्थविचार एव केवलः क्रियते एवं चोभयमपि ग्रंथार्थतो वेदज्ञानं नास्त्येव तद्
३ रं वेदैकदेशस्यापि पद्याविध्यध्ययनं कृत्वा अर्थविचारः क्रियते इत्सु चिंतं भवति तथा च यमः तपूद्रो वृषलो नाम वेदो हि वृष उच्यते यस्य विप्रस्य तेनालं
स वै वृषल उच्यते तस्माद् वृषलभीतेन ब्राह्मणेन प्रयत्नतः एकदेशोऽप्यध्येतव्यो यदि सर्वो न शक्यते तथा च व्यासः अधीत्य यत्किंचिदपि वेदार्थाभिगमे र
तः। स्वर्गलोकमवाप्नोति धर्मानुष्ठानविद् द्विजः॥ तथा समुवित लोकमपिश्रुताधीतं विशिष्यते चतुर्णामपि वेदानां केवलाध्ययनाद् द्विजान् ततश्चैकदेश
स्याध्ययने न गार्हस्थ्याश्रमाधिकारो भवत्येव इत्सम एकदेशस्याध्ययने कर्तव्ये संशयः स्वेच्छया किं तृतीयो भागश्चतुर्थो वाध्येतव्यः उत अनुष्ठानोचितभा
गो वा तत्र च परिवापाठक्रमानुरोधेन प्रथमभाग एवाधीयते तदा यस्मिन् भागे संध्यास्नानाद्याह्निकगर्भाधानादिक्रियाकांडोपयुक्तमंत्रभाग एवाध्येतुं
युज्यते अस्यैवाध्ययनेन वेदस्यैकदेशाध्ययनं पर्यवस्यति यत्तु केचित् गायत्रीमात्रसारोऽपि वरं विप्रः सुयंत्रितः नायंत्रितस्त्रिवेदोऽपि सर्वाशी सर्ववि
क्रयी इति मन्वादिवचनदर्शनाद् एकदेशशब्देन गायत्रीमात्रमेवेत्युक्तिस्तदयुक्तं स्नानाद्यनुष्ठानमंत्रानभिज्ञस्य स्नानादिष्वेवायोग्यत्वात् तेषां गायत्रीज
पाधिकारित्वेन न भवतीति सुदूरं निरस्तं गायत्रीमात्रसारत्वं गायत्रीमात्रे सार इति वचनस्य तु नित्यं दिनप्रतिग्रहाद्यसत्क्रियानिवृत्तस्य स्नानसंध्याद्यनुष्ठानस्य शा
लिनो विज्ञातार्थगायत्रीजपनिरतस्य नित्यं दिनप्रतिग्रहाद्यसत्क्रियायुक्तत्रिवेदविद्ब्राह्मणापेक्षया श्रेष्ठत्वप्रतिपादने तात्पर्येण तु सकलवेदानुष्ठानरहितस्य
गायत्रीमात्रपरत्वेन तात्पर्यमिति तदेवं व्यवस्थिते शास्त्रार्थे कृत्स्नवेदाध्ययनासामर्थ्यानां राष्ट्रीयवारेन्द्रद्विजातीनां काण्वशाखिवाजसनेयिनां कर्मानुष्ठा
नार्थं प्रातर्दंतधावनादिशयनांताह्निकगर्भाधानादिविवाहसंस्कारान्साधनाद्यंतेष्टिपर्यंतगार्ह्यस्थ्यकर्मोपयुक्तमंत्रव्याख्या प्रस्तोतव्या तत्र भारतवर्षे एम·
भूमावस्य नदुर्लभमानुष्यलाभप्रशंसापास्त्रद्वीपानभिधाय जंबूद्वीपाधिकारे विष्णुपुराणम्॥ अत्रापि भारतं श्रेष्ठं जंबूद्वीपे महामुने यतो हि कर्मभूरेषात् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोन्याभोगभूमयः॥ अत्र जन्मसहस्राणां सहस्रैर्द्विजसत्तम कदाचिल्लभते जंतुर्मानुष्यं पुण्यसंचयात्॥ गायंति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे। स्वर्गापवर्गस्य च हेतुभूते भवंति भूयः पुरुषाः सुरत्वात्॥ कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मभूते अवाप्य तां कर्ममहीं पुनं ते प्यस्मिन्लयं ये त्वमलाः प्रयांति॥ जानीम नैतत्क्व वयं विलीनाः स्वर्गप्रदे कर्मणि देहवंधम्। प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते नेंद्रियविप्रहीनाः॥ महाभारते सुदुर्लभतरं प्राप्य मानुष्यमपि यो नरः। धर्मावमंता कामात्मा भवेत्स खलु वंचितः॥ इहैव नरकव्याधिश्चिकित्सां न करोति यः। गत्वा निरौषधस्थानं सरोगी किं करिष्यति॥ अतोपि ब्राह्मण्यप्रशंसायां महाभारते शुकानुशासने। संयतन्मोहजालानि कदाचिच्चेह मानुषे॥ ब्राह्मण्यं लभते जंतुस्तत्पुत्र परिपालय। ब्राह्मणस्य च देहोयं न कामार्थाय जायते॥ इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखम्॥ ब्राह्मण्यं बहुभिरवाप्यते तपोभिस्तल्लब्ध्वा नितरतपरेण पालितव्यम्। स्वाध्याये न तपसि दमे च नित्ययुक्तः क्षेमार्थी कुशलपरः सदा यतस्व॥ कात्यायनः। वेदेन तथात्मज्ञानेन च ब्राह्मणो यत्नवान्भवेत्। एवधर्मस्य सर्वस्य चतुर्वर्गस्य साधकः॥ अथ वेदाध्ययनप्रशंसा। तत्र मनुः। वेदमेव सदाभ्यसेत्तपस्तप्स्यन्द्विजोत्तमः। वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥ याज्ञवल्क्यः। यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्। वेद एव द्विजातीनां निःश्रेयसकरः परः॥ योगियाज्ञवल्क्यः। वेद एव सदाभ्यस्यो वेदश्चक्षुः सनातनः। भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति॥ बृहस्पतिः। एवं दंडादिकैर्युक्तं संस्कृत्य तनयं पिता॥ वेदमध्यापयेद्यत्नाच्छास्त्रं मन्वादिकं तथा॥ व्यासः॥ धर्मशुद्धिमभीप्सद्भिर्न वेदादन्यदिष्यते। धर्मस्य कारणं शुद्धं मिश्रमन्यत्प्रकीर्तितं॥ अतः स परमो धर्मो यो वेदादवगम्यते। अधरः स तु विज्ञेयो यः पुराणादिषु स्थितः॥ याज्ञवल्क्यः। वेदाभ्यासरतं शांतं महायज्ञक्रियापरं। न स्पृशंतीह पापानि महापातकजान्यपि॥ मनुः। आ हैव स नखाग्रेभ्यः परमं तप्यते तपः॥ यो द्विजो भक्तितोऽधीते स्वाध्यायं शक्तितोऽन्वहम्। यमः। न तपस्तप्यते योरण्ये मुनिर्मूलफलाशनः। ऋचमेकां च योधीते तच्च तेन समं भवेत्। दक्षः। वेदस्वीकरणं पू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वं विचारोऽभ्यसनं जपः तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा। यमः॥ नशूद्रवृषलो नामेत्यादि॥ तस्माद्धलभीतेन ब्राह्मणेन प्रयत्नतः। एकदेशोऽप्य
ध्येतव्यो यदि सर्वो न शक्यते। तत्रैकदेशपदेन यावदनुष्ठानोपयुक्तवेदभागोपेक्षितः। मनुः। यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। तथा विप्रोऽनधीयानस्त्र
यस्ते नाम बिभ्रति। तथा। यथा षंढोऽफलः स्त्रीषु यथा गोर्गवि चाफला। यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः। तथा। योऽनधीत्य द्विजो वेदमन्यत्र कुरुते
श्रमं। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ यं खलि खिलो॥ न शास्त्रं सेवनं कुर्यान्न वेदमनधीत्यान्यविद्यामधीयीत अन्यत्र वेदांगस्मृतिभ्यः। व्यासः। श्रु
तिस्मृती च विप्राणां नयने द्वे विनिर्मिते। काणः स्यादेकया हीनो द्वाभ्यामंधः प्रकीर्तितः॥ मनुः॥ तपोविशेषैर्विविधैर्व्रतैश्च विधिनोदितैः॥ वेदः कृत्स्नोऽधिगंत
व्यः सरहस्यो द्विजन्मना॥ तथा। वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्। अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्। योगियाज्ञवल्क्यः। वेदाधीतानये
हृदि भ्रंशितो नरकःप्रदः। न्यायेनेष्टं नये स्वर्गं पुनरावृत्तिलक्षणम्। व्यासः। ऋक्पादमप्यधीयीत मार्गेणोक्तेन धर्मवित्॥ नत्वेवं चतुरो वेदानन्यायेन कदाचन।
मनुः। ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्॥ स ब्रह्मस्तेनसंयुक्तो नरकं प्रतिपद्यते। व्यासः। ऋग्यजुःसामवेदं च न्यायतोऽधिगतं हि तैः। पात्रत्वमापादयति
तान्क्रमेणैव हन्त्यपि। योगियाज्ञवल्क्यः। नासंयममधीतानि तारयंति कदाचन॥ ऋगेकासंयमस्थस्य अधीतानि तारयेदपि। आमपात्रे यथान्यस्तमापो दधि घृतं
पयः नश्यंति पात्रदौर्बल्यात्तेर शास्त्रस्य भाजने॥ इति वेदाध्ययनप्रशंसा॥ अथ वेदार्थज्ञानप्रशंसा॥ तत्र व्याससंहितायां कूर्मपुराणे। न वेदपाठमात्रेण संतो
षं कारयेद्गुरुः॥ पाठमात्रावसानस्तु पंके गौरिव सीदति। योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत्॥ स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते। व्यासः॥ वेदस्या
ध्ययनं सर्वं धर्मशास्त्रस्य वापि यत्॥ अजानतार्थं तत्सर्वं तुषाणां कंडनं यथा। यथा पशुर्भारवाही न तस्य लभते फलम्॥ द्विजस्तथार्थानभिज्ञो न वेदफलम
श्नुते। व्यासः॥ पाठमात्ररतान्नित्यं द्विजातींश्चार्थवर्जितान्। पशूनिव च तान्प्राज्ञो वाङ्मात्रेणापि नार्चयेत्॥ श्रुतिहीनमधीतं यन्नेह नामुत्र तद्भवेत्। श्रुतिस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केवलमपि समुच्चारयकल्पयेत्। तद्यमः। स्थाणुरयं भारवाहः किलाधीत्य वेदं यन्न विवेद यो ऽर्थं यो ऽर्थवित्सकलं न भद्रमश्नुते नाकमेति केवलं विधूतपा
प्मा। व्यासः॥ यो ऽधीते नार्थं न त्वज्ञस्तस्य नद्धारणा तथा। भारवाही च भृतकः केवलं क्लेशभाग्भवेत्। तस्मादर्थपरिज्ञाने यत्नः कार्यो विजानता। व्यासः।
ज्ञानकर्म च संयुक्तं युक्तार्थं कथितं मया। अधीतेऽक्षरसंयुक्तं तथा श्रेष्ठं न केवलम्॥ व्यासः। अधीत्य यत्किंचिदपि वेदार्थाभिगमे रतः स्वर्गलोकमवाप्नो।
ति धर्मानुष्ठानविद्द्विजः। मनुः। वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसेत्। इहैव लोके संतिष्ठन् ब्रह्मलोकाय कल्पते। व्यासः। समुच्चितं स्तोकमपि श्रु
ताधीतं विशिष्यते। चतुर्णामपि वेदानां केवलाध्ययनाद्द्विजाः। व्यासः। अनूचानाद्ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः। धारिभ्यश्चार्थतत्त्वज्ञास्तेभ्यो ऽप्यध्या
त्मचिन्तकाः॥ इति वेदार्थज्ञानप्रशंसा॥ अथ ऋषिदेवता छन्दो ब्राह्मणविनियोगज्ञानप्रशंसा॥ तत्र योगियाज्ञवल्क्यः। यस्तु जानाति तत्त्वेन आर्षं छन्दश्च दैव
तम्। विनियोगं ब्राह्मणं च वेदार्थज्ञानकर्म च। एकैकस्या ऋचः सो ऽभिवंद्यो ह्यतिथिवद्भवेत्॥ देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः। पूर्वोक्तेन प्रकारेण ऋ
ष्यादीन्वेत्ति यो द्विजः। अधिकारो भवेत्तस्य रहस्यादिषु कर्मसु। मंत्रे मंत्रे प्रयत्नेन ज्ञातव्यं ब्राह्मणेन तु। विज्ञानपरिपूर्णस्य स्वाध्यायफलमश्नुते॥ छन्दांस्यया
तयामानि भवंति फलदान्यपि। अपश्चलैर्नेसो ऽत्र धर्ममायुश्च विंदति। दिव्यं वर्षसहस्रं तु स्वस्थाने ऋषिभिः सह। तिष्ठते तत्र ते सार्द्धं तत्तुल्यश्चैव जा
यते। योगियाज्ञवल्क्यः। आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च। वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता। अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपं। होम
मन्तर्जलादीनि तेभ्यो ऽस्य फलं भवेत्। आपद्यते स्थाणुगर्त्तं स्वयं चापि प्रमीयते। यातयामानि छंदांसि प्रभवंत्यफलानि च। अन्तर्जलादिके जप्ये इतरेषा
मजानताम्। नाधिकारो ऽस्ति मंत्राणामेवं श्रुतिनिदर्शनम्। अस्यमात्र फलं तस्य होमादन्तर्जलाज्जपात्। स्वाध्यायाद्याजनाच्चैव भवेन्नात्र संशयः। व्या
सः। अविदित्वा ऋषिं छंदो दैवतं योगमेव च। यो ऽध्यापयेद्याजयेद्वा पापीयान्जायते तु सः। छंदोगब्राह्मणे। यो ह वा अविदितार्षेयच्छंदो दैवतविनियोगेन ब्राह्मणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स· नमंत्रेण याजयति अध्यापयति स्थाणुं वर्च्छति गर्तं वा पद्यते प्रमीयते पापीयान् भवति यातयामानि छंदांसि भवंति। अथ यो मंत्रे मंत्रे वेद स सर्वमाप्नोति अयातया
५ मान्यस्य छंदांसि भवंति। तस्मान्मंत्रे मंत्रे विद्यादिति। योगियाज्ञवल्क्यः। येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै। मंत्रेण तस्य तत्प्रोक्तमृषिभाव स्तदात्मि
कः। तथा च्छादनाच्छंद उद्दिष्टं वाससी वाथवा कृतेः। आत्मानुच्छादितो देवैर्मृत्योर्भीतैस्तु तैः पुरा। आदित्यैर्वसुभी रुद्रैस्तेन छंद इति स्मृतम्। योगियाज्ञव
ल्क्यः। यस्य यस्य तु मंत्रस्य उद्दिष्टा या च देवता॥ तदाकारं भवेत्तस्य दैवतं देवतोच्यते। पुराकल्पसमुत्पन्ना मंत्राः कर्मार्थमेव च॥ अनेनेदं तु कर्तव्यं विनियो
गः स उच्यते। योगियाज्ञवल्क्यः। निरुक्तं यत्तु मंत्रस्य समुत्पत्तिं प्रयोजनम्। प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं श्चाभिधीयते। योगियाज्ञवल्क्यः। एवं पंचविधो यो
गे जप्यकालं त्वनुस्मरेत्। होमे चांतर्जले योगे स्वाध्याये याजने तथा। तथा यजुर्वेदभाष्य स्मृतिः। स्वरो वर्णोक्षरं मात्रा तत्प्रयोगोर्थ एव च मंत्रजिज्ञासमानेन वे
दितव्यं पदे पदे इति ब्राह्मणसर्वस्वे वेदाध्ययन वेदार्थज्ञान प्रशंसा। अथ दंतधावनं तत्र नारदः। उत्थाय नेत्रप्रक्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च
मंत्रेण भक्षयेद्दंतधावनम्। वृद्धशातातपः। मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात्सर्वप्रयत्नेन भक्षयेद्दंतधावनम्। नरसिंहपुराणे। मुखे पर्युषिते नि
त्यं भवत्यप्रयतो नरः। तस्माच्छुष्कमथार्द्रं वा भक्षयेद्दंतधावनम्। भगवंतमधिकृत्य वाराहपुराणे। अकृत्वा दंतकाष्ठं तु यो हि मामुपसर्पति। सर्वकालकृतं
कर्म तेन चैकेन नश्यति॥ विष्णुः। प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे प्रयत्नतः। व्यासः। प्रक्षाल्य च शुचौ देशे दंतधावनमुत्सृजेत्॥ पतितेभिमुखे सम्य
ग्भोज्यमासे त्वभीप्सितम्॥ वाराहपुराणे॥ अमावास्यां तु यो मूढो दंतकाष्ठं तु भक्षयेत्॥ सोमस्तु हिंसितस्तेन हिंसिता च वसुंधरा॥ नरसिंहपुराणे॥ प्रतिपद्द
र्शषष्ठीषु नवम्यां चैव सत्तमाः॥ दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलम्। अलाभे दंतकाष्ठानां निषिद्धायां तथा तिथौ॥ अपां द्वादशगंडूषैर्विदध्याद्दं राम·
तधावनम्। पारस्करः॥ औदुंबरेण दंतान्धावयेत्॥ तत्र मंत्रो यथा अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्। स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च॥ अ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यार्थः हे वनस्पते व्यूहध्वं व्यूह स्वेत्यवगमं कुरु वनस्पतीनां राजा सोमो यं वनस्पतिं त्वां अगमत्। आगमत् भावानस्त्वं चंद्रसहितो वनस्पतिः। मे मुखं प्रमा
र्क्ष्यते शोधयं तु केन केन यशसा च भगेन च किमर्थमन्नाद्याय अन्नं च आद्यं च तदर्थं नीभक्ष्य भोगार्थमित्यर्थः। वनस्पतिशब्दोत्राध्याहरणीयः तेन यत्र वन
स्पतिं चंद्र आगतः स चन्द्रसहितो वनस्पतिः अन्नाद्यर्थं नानाभक्ष्य भागार्थं च मम मुखं यशः सौभाग्याभ्यां शोधयिष्यतीत्यत्र वनस्पते सावधानो भवेत्य
यं च वाक्यार्थः। व्यूहध्वमिति। ऊह वितर्के इत्यस्य स्लोटि व्यत्ययो बहुलं भवतीति मध्यमपुरुषस्यैकवचने बहुवचनम्। प्रमार्क्ष्यत इति मृजू शुद्धौ इत्यस्य ऌ
टूटं तस्य रूपं इति ब्राह्मणसर्वस्वे दंतधावन हेलायुधे गौडमहीमहेन्द्र निसृष्टिधर्महृयकांडकीर्तिः प्राभातिकस्नानविधानमंत्रव्याख्यानमेतद्धितीयं वभूव
तत्र प्रातःस्नानम्। तत्र दक्षः। प्रातरुत्थाय यो विप्रः प्रातःस्नायी भवेत्सदा। सप्तजन्मकृतं पापं त्रिभिर्वर्षैर्व्यपोहति। तथा उषस्युषसि यत्स्नानं संध्यायामुदि
ते रवौ प्राजापत्येन तत्तुल्यं महापातकनाशनम्। उषसरुणोदये। संध्यायांच प्रभाते प्रागुदयात् द्विते उदई मुहूर्ते। एतच्च पूर्वपूर्वासंभवे द्रष्टव्यम्। विष्णुः
प्रातःस्नाय्यरुणकरग्रस्तां प्राचीमालोक्य स्नायात्। विष्णुः। अलक्ष्मीकालकर्णी च दुःस्वप्नं दुर्विचिंतितम्। अब्मात्रेणाभिषिक्तस्य नश्यत इति। धारणा। अत्र
कालकर्णी दुर्गेति विशेषः। दक्षः। स्विद्यंति हि प्रसुप्तस्य इंद्रियाणि ज्वरंति च। अंगानि समतां यांति उत्तमान्यधमानि च। अस्नानाच्च रेत्कर्म जपहोमादि
किंचन। लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्। अत्यंतमलिनः कायो नवच्छिद्रसमन्वितः। स्रवत्येव दिवा रात्रौ प्रातःस्नानं विशोधनम्। प्रातःस्ना
नं प्रशंसंति दृष्टादृष्टकरं हि तत्। सर्वकर्मविमुक्तात्मा प्रातःस्नायी जपादिकम्। योगियाज्ञवल्क्यः। उभे संध्ये च स्नातव्यं ब्राह्मणैश्च गृहाश्रमैः। तिसृष्वपि
हि संध्यासु स्नातव्यं तु तपस्विना। उभे संध्ये इति। प्रातर्मध्यान्हे च तपस्विनेति। यतिना वानप्रस्थेन वा। छंदोगपरिशिष्टे कात्यायनः। अस्नात्वा होमकालस्य
बहुत्वात्स्नानकर्मणः। प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः। न तनुयादिति विस्तारविधिना न कुर्यादित्यर्थः। अनुदयहोमिना साग्निना होमकालातिक्रमभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा॰स॰ ६ यात्संक्षिप्तस्नाने क्षिप्रमाणे कीदृशं कृत्वा करणीयमित्याकांक्षायां योगियाज्ञवल्क्यः। योसौ विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः। असामर्थ्यान्न कुर्याच्चेत्त
त्रायं विधिरुच्यते। स्नानमंतर्जले चैव मार्जनाचमने तथा। जलाभिमंत्रणं चैव तीर्थस्य परिकल्पनम्। अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः। स्नानाचरणमि-
त्येतत्समुद्दिष्टं महात्मभिः। अन्यांश्च वारुणान्मंत्रान्कामतः संप्रयोजयेत्। यथाकालं यथायोग्यं देशं ज्ञात्वा विचक्षणः। अथव्यासोक्तसंक्षिप्तप्रातःसंध्या
स्नानमाचरणीयम्। तथा च व्यासः। अंतर्जले कृतं स्यज्जपेत्त्रिरघमर्षणम्। तथा चापरसंक्षिप्तप्रातस्स्नाने दक्षः। संध्यास्नानमृगं तेन मध्याह्ने च ततः परम्। संध्य
मुपासित्तु प्रातःस्नानमृगं तेन तद्रुपदाघमर्षणादिकान्तेदैवतमंत्रमात्रेण संक्षिप्य करणीयम्। मध्याह्ने च ततः परमिति मध्याह्ने च स्नानं यथोक्तविस्तर
विधिनैव कर्तव्यमिति प्रतिभाति॥ अथवा संक्षिप्तेन पैठीनसिविधिना स्नातव्यम्। तथा च पैठीनसिः। हिरण्यवर्णा सूक्तेन स्नात्वा शौचं कृत्वा अपां मध्ये त्रीन्प्रा
णायामान्कुर्यात् यदा निरग्नेश्च संध्यातिक्रमे त्वरा नास्ति तदा तेन निरस्तेनायथाविधानमेव स्नानं कृत्वा संध्योपासनं करणीयम्। यथा छंदोगपरिशिष्टे कात्या
यनः। यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः। दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत्। गेहे चेत्तदमंत्रवदिति वर्षासु पानीयपतनभये हेमंतशिशिरभये अत्यंत
वा नातपादौ यथा गृहाभ्यंतरे वश्यं कर्तव्यतया प्रातःस्नानं करोति तदा नेनेह प्रक्षालनरूपमंत्रकमेव स्नानं करणीयमित्यर्थः॥ जाबालिः॥ अशिरस्कं भ
वेत्स्नानं स्नानाशक्तौ तु कर्मिणः। आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः। कर्मिणामिति जपहोमादिकर्मिणामित्यर्थः। योगियाज्ञवल्क्यः। कालदो-
षादसामर्थ्यान्न शक्नोति यदा ह्यसौ। तदा ज्ञात्वा ऋषिभ्यस्तु मंत्रैर्देहं तु मार्जयेत्। कालदोषादिति। अतिपीडाहेतोः शैत्यादिरित्यर्थः। असामर्थ्यादि-
ति। स्नानसंवर्द्धनीयपीडायोगादित्यर्थः॥ ज्ञात्वा ऋषिभ्यस्तु मंत्रैरिति॥ ॐ शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणं। एतैश्चतुर्भिर्मंत्रैस्तु मार्जनं समुदाहृतं राम॰
मार्जनमिति। मंत्रस्नानमित्यर्थः। तथा अपापत्ये समुत्पन्ने स्नानमेव तु कारयेत्॥ पूर्वोदिते त्वस्या मंत्रैरन्यथा मार्जनं स्मृतं॥ अपापत्य इति॥ स्नानापने य ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संध्यासंयमाय पावनइत्यर्थः।स्नानमेवतुकारयेदिति।अशक्तमपिस्नानंकारयेदित्यर्थः॥अथकाम्यप्रातःस्नानं॥तत्रविष्णुः।यइच्छेद्विपुलान्भोगान्चन्द्र
सूर्यग्रहोपमान्।प्रातःस्नायीभवेन्नित्यंद्वौमासौमाघफाल्गुनौ।देवान्पितॄन्समभ्यर्च्यसर्वपापैःप्रमुच्यते।विष्णुः।कार्त्तिकंसकलंमासंप्रातःस्नायीजितेन्द्रि
यः।जपन्हविष्यभुग्दान्तःसर्वपापैःप्रमुच्यते।एतच्चकाम्यप्रातःस्नानसंध्योपासनंचकृत्वाप्रातर्होमंचकृत्वास्वकल्पोक्तविस्तरेणैवमध्याह्नस्नानव
त्कर्त्तव्यम्।यतएतन्माघादिविहितस्नानेकिंचिद्दिनेसूर्येक्रियतइतिसदाचारः अथप्रातःस्नानमंत्रव्याख्या।तत्रयोगियाज्ञवल्कीयसंहित्र प्रातःस्नाने
मृत्तोयैरंगशौचादिरूपंमार्जनस्नानमाचार्येतीर्थावगाहनंकुर्यात्।तथास्नानसूत्रेहारीतः।इमंमेतितीर्थावगाहनंतत्रमंत्रोयथा।ॐइमंमेगंगेयमुनेसरस्वतिशुत
द्रिस्तोमंसचतापरुष्ण्याअसिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्याशिषोमया।अस्यार्थः हेगंगेहेयमुनेहेसरस्वतिहेशतद्रुहेमरुद्वृधेहेऋजीकीयमयाम
मआशिषःआशंसाःशृणुहिमदीयाशंसाःशृणुतेत्यर्थः।कासौआशंसाइत्याकांक्षायांमेमदर्थंमदीयस्नाननिमित्तंपरुष्ण्याअसिक्न्यावितस्तयासहइमंस्तो
मंसचताःसमवेताभवतअस्मिन्पुरोवर्त्तिस्नानजलस्तोमेसमवेताःसन्निहिताभवतेत्यर्थः।इतीमंत्रव्याख्या।ततोमार्जनम्।तत्रछंदोगपरिशिष्टम् रक्षार्थंवारि
णात्मानंपरिक्षिप्यसमंततः।शिरसोमार्जनंकुर्यात्कुशैःसोदकविंदुभिः॥तत्रमार्जनप्रशंसायांयोगियाज्ञवल्क्यः॥आपोहि ष्ठेतिमार्जयेत्।अर्द्धर्चेयाःक्षि
पेदूर्द्ध्वमर्द्धयाचक्षिपेदधः।अधोभागविसृष्टाभिरसुरान्यातिसंक्षयम्।सर्वतीर्थाभिषेकश्चऊर्द्ध्वंसंमार्जनेभवेत्॥अग्निपुराणे॥आपोहिष्ठेतिसंध्यायांप
ठेत्प्रयतमानसः।मूर्द्ध्निभूमौतथाकाशेभूमौमूर्द्ध्निपुनर्भुवि।मूर्द्ध्निभूमौपुनर्मूर्द्ध्निभूमौकुर्यात्सुमार्जनम्।शंखः।आचम्यैवंपुरःप्रोक्ष्यतीर्थेसंमार्जनंतुवै
।मंत्रास्त्रैर्मत्रितंतोयंमूर्द्ध्निभूमौतथाक्षिपेत्।क्षिप्तेनमूर्द्ध्नितोयेनपापमस्यप्रणश्यति भूमिक्षिप्तेनहन्यंतेअसुरादेवशत्रवः।व्यासः॥विप्रुषोष्टौक्षिपेदूर्
र्द्ध्वमधोयस्याःक्षयायच।आपोहिष्ठेतिमंत्रस्यऋषिश्चरोदेवताविनियोगकथनेपुनर्योगियाज्ञवल्क्यः।सिंधुद्वीपंभवेदार्षंगायत्रीछन्दएवहि॥आयस्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स· ७ दैवतं प्रोक्तं विनियोगश्च मार्जने। सर्वत्र मार्जनं कर्म अब्दैवतमुदाहृतम्। आपो हि ष्ठेति मंत्रस्य सिंधुद्वीप ऋषिर्गायत्री छंदः आपो देवता मार्जने विनियोगः। मा-
र्जनमंत्रो यथा। ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे। अस्यार्थः हे आपः हि यस्माद्यूयं मयः सुखं तस्य भुवः भावयित्र्यः स्थः भवथ सु-
खदापयित्र्यो भवथेत्यर्थः। तास्तस्मात्त्वो अस्मान् ऊर्जे अन्नाय दधातन स्थापयत। किंच महे महते रणाय रमणीयाय चक्षसे दर्शनीयाय दधातनेति पूर्वेणैव
संबंधः। अथवा वाक्यार्थः। हे आपः हि यस्माद्यूयं सुखस्य प्रापयथ तस्मात्कारणात्तस्मान्नो हि केनार्थेन आमुष्मिकेन महारमणीयदर्शनेन परमब्रह्मणा संयोजय-
तेति अप्सु प्रार्थना। अत्र ष्ठा इति कृतं मूर्द्धन्यस्यास्ते लोडादेशः मध्यमपुरुषवहुवचनान्तस्य प्रयोगः। दधातनेति दधाते लोड्मध्यमपुरुषवहुवचनस्य स्था-
नेतप्तनप्तनथनाश्चेति तनदेशः ता इति नच्छ्वात्त्व से: सुपां सुलुगिति सूत्रेण आडादेशः महतेर्नस्य पदस्य छांदसत्वात् अकारतकारयोर्लोपे सति
महे इति भवति रमणीयायेत्यस्य मकार इकार यकाराणां लोपाद्रणायेति भवति। आपो हि ष्ठा इत्याकारः संहितायां पठ्यमानः पदे इति पठ्यमानस्तन्न्याहृ-
तः ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः अस्यार्थः हे आपः वो युष्माकं यो रसो निर्यासः किंभूतः शिवतमः अत्यंतकल्याणरूपः त-
स्य रसस्य नो अस्मान् भाजयत भागिनः कुरुत। तेन रसेन संवर्द्धान् अस्मान् कुरुतेत्यर्थः किंभूता यूयमापः उशतीः इच्छन्त्यः मातर इव इच्छायुक्ता मातः समा इत्यर्थः
। अथवा वाक्यार्थः हे आपः यथा सस्नेहा मातरः पुत्रान् कल्याणयुक्तान् कुर्वंति तथा यूयमपि कल्याणात्मके युष्मदीयरसेन अस्मान् संवर्द्धान् कुरुतेत्यप्सु प्रा-
र्थना। उशतीरिति वशकान्तौ इत्यस्य शत्रंतस्य प्रथमा वहुवचने रूपं। ग्रहिज्यादिना संप्रसारणम्। ङीप् वा छंदसीति विकल्पेन पूर्वसवर्णादेशनिषेधात्
पक्षे पूर्वसवर्णदीर्घत्वम्। ॐ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः अस्यार्थः। हे आपः वो युष्माकं तस्मै तस्मिन् रसे अरं अलं राम·
पर्याप्तिं गमाम गच्छाम तत्र युष्मदीयरसविषये तृप्तिं गच्छामइत्यर्थः। किंच तद्रसविषये नोस्मान् यूयं जनयथा च तद्रसभोक्तृत्वेन अस्मान्पूर्यां कल्पय ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेत्यर्थः तस्य कस्य यस्य रसस्य स्यया यस्य यस्य। स्थानस्य ब्रह्मादिस्तंबपर्यंतजगतः जिन्वथ प्रीणयथ यस्य रसस्य ब्रह्मादिस्तंबपर्यंतं स्थानं प्रणीपयेत्या-
र्थः। अयं वाक्यार्थः हे आपः वो युष्माकं ब्रह्मादिस्तंबपर्यंतं स्थानं यूयं प्रीणयथ। तस्य रसस्य विषये वयं तृप्तिं गच्छामः यूयं तद्रसभोक्तृत्वमस्माकं स्वय-
थ इत्यस्य प्रार्थना। तस्मै स्याय इत्युभयत्रापि सुपो भवंतीति सप्तमी स्थाने चतुर्थी। जिन्वथेति जिवि प्रीणनार्थः तस्य लोट् मध्यमपुरुषबहुवचनं। तस्य रू-
पम्। अथवा हे आपः वो युष्माकं यस्य रसस्य किंभूतस्य क्षयस्य स्थानस्य ब्रह्मादिस्तंबपर्यंतस्य जगदाधारभूतस्य जिन्वथ प्रीणयथ तस्मै रसाय वयं अ-
रं प्रीत्येन गच्छामः ततश्च नोस्मान् ततोस्माकं यूयं जनयथ अस्माकं तं रसं यूयं च परिकल्पयथेत्यर्थः। इत्यापो हि ष्ठा मंत्रव्याख्या। ततो मार्जनानंतरमाचमन-
मंत्रस्य प्रजापतिर्ऋषिः। सोमो देवता विराट् छंदः ऋजीषकुंभस्नावने विनियोगः। मंत्रो यथा ॐ समुद्रे ते हृदयमप्स्वंतः सं त्वा विशंत्वोषधीरुतापः। यज्ञस्य
त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वाहा। अस्यार्थः हे यज्ञपते सोम ते तव हृदयं समुद्रे अप्स्वंतः जलमध्ये तव हृदयं समुद्रे जलमध्ये गतमित्य-
र्थः जलमध्यस्थो भवानित्यभिप्रायः तत्रस्थं त्वां ओषधीः संविशंतु उत अपि च आपः संविशंतु किं च यज्ञस्य सूक्तोक्तौ यज्ञसंबंधिशोभनवचनोच्चारणेन
नमोवाकेन नमस्कारवचनेन त्वां विधेम स्थापयामः जलपानाहतो स्वाहापदप्रयोगः। अयं वाक्यार्थः हे सोम जलस्थो भवान् ओषधीसहितः यज्ञसंबंधि-
वचनेन नमस्कारेण च त्वां मंत्राचमनजले स्थापयामः तदिदमाचमनजलं ओषधीयुक्तस्य तवाधिष्ठानादतिपुण्यहेतुरिति मां पवित्रीकरोत्विति आशंसा-
वाक्यार्थः। अत्र सूक्तोक्ताविति नमोवाके चेति तृतीयार्थे सप्तम्येकवचनं वाकः भावे घञ्। अथवा योगियाज्ञवल्क्योक्तविधिना ॐ पूर्वाभिः सप्तमहाव्याहृ-
तीभिराचामेदिति॥ इति समुद्रे ते मंत्रव्याख्या। ततो जलमध्ये निमज्य अघमर्षणमंत्रं त्रिधा पठित्वा स्नायात्। ततो घमर्षणसूक्तस्य माहात्म्यं व्याख्यादिक-
मुत्तरत्र मध्यान्हस्नाने एव लिखितत्वादत्र पुनर्नोलिखितमतस्तत्रैवानुसंधेयमिति स्नानं निर्वर्त्य धौतवासः परिदध्यादिति प्रातःस्नानम्॥ अथ प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः संध्या। तत्र योगियाज्ञवल्क्यः। अतः परं प्रवक्ष्यामि संध्योपासननिर्णयम्। अहोरात्रकृतैः पापैर्यामुपास्य प्रमुच्यते। यावंतोस्याः पृथिव्यां हि विकर्म
स्थास्तु वै द्विजाः। तेषां वै पावनार्थाय संध्या सृष्टा स्वयंभुवा। या संध्या सा तु गायत्री द्विधाभूता प्रतिष्ठिता। तथा। सांध्यंतं कर्म विप्राणामहोरात्रकृतस्य च।
पापापनुत्तये तस्मान्नित्यं तस्मात्समाचरेत्। यमः। संध्यामुपासते ये तु सततं शंसितव्रताः। विधूतपापास्ते यांति ब्रह्मलोकं सनातनं। शातातपः। अनृतं मधु
गंधं च दिवा मैथुनमेव च। पुनाति वृषलस्यान्नं बहिः संध्यामुपासिता। याज्ञवल्क्यः। निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रिकालसंध्याकरणात्
तत्सर्वं विप्रणश्यति। देवलः। सायं प्रातः सदा संध्यामुपासीत बहिः शुचि विष्णुपुराणे। सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचवि
भ्रमातुरभीतितः। योगियाज्ञवल्क्यः। सर्वावस्थोपि यो विप्रः संध्योपासनतत्परः। ब्राह्मण्यान्न सहीयेत अंत्यजन्मशतोपि सन्। तथा। संध्या ह्युपासिता येन
तेन विष्णुरुपासितः। दीर्घमायुः स विंदेत सर्वपापैः प्रमुच्यते। तथा। सायं प्रातस्तु यः संध्या सत्कृत्स्नोपर्युपासते। जप्त्वैव पाविनीं देवीं सावित्रीं लोकमातरम्
सतया पावितो देव्या ब्राह्मणो धूतकल्मषः। न सीदेत्प्रतिगृह्णानः पृथिवीं च ससागराम्। अग्निपुराणे। मुनयऊचुः। कथं मुनेद्दिवं याति ब्राह्मणो दग्धकल्मषः
अनग्निको हि नो ब्रूहि यदुक्तं वह्निना पुरा। सूत उवाच। सायं प्रातश्च यः संध्यामुपास्ते स्वस्थमानसः। जपन्हि पाविनीं देवीं गायत्रीं वेदमातरं। तया स पावितो
देव्या ब्राह्मणः धूतकिल्बिषः। न सीदेत्प्रतिगृह्णानो अपि पृथ्वीं ससागराम्। ये चास्य दारुणाः केचिद्ग्रहाः सूर्यादयो दिवि। ते चास्य सौम्यतां यांति सर्वे शिवतमा
स्तथा। यत्र तत्र गतं चैनं दारुणाः पिशिताशनाः। घोररूपा महाकायाः प्रभवंति न राक्षसाः। यावंतश्च पृथिव्यां हि चीर्णवेदव्रता द्विजाः। अचीर्णव्रततंद्राश्चावि
कर्मपथमाश्रिताः। तेषां तु पावनार्थाय गायत्र्या नित्यमेव हि। द्वे संध्ये ह्युपतिष्ठेत नरस्यमहाव्रतम्। तथा। द्वे संध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः। यस्तस्य दु एम
ष्कृतं नास्ति पूर्वेतः परतोपि वा। तथा। एवं किल्बिषयुक्तस्तु विनिर्दहति पातकम्। उभे संध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः। तथा। संध्या येन न विज्ञाता संध्या ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवाप्युपासिता॥जीवन्नेव भवेच्छूद्रो मृतः श्वाचाभिजायते।नोपातिष्ठेत्तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्।स साधुभिर्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः॥व्यासः
।बहिः संध्या दशगुणा गोष्ठप्रस्रवणादिषु।ख्याता तीर्थे शतगुणा सहस्रं जान्हवीजले।बहिरिति अनाच्छादितस्थाने।प्रांगणादौ। शातातपः।गृहेषु प्राकृती
संध्या गोष्ठे शतगुणा स्मृता।नदीषु शतसाहस्रा अनंता शिवसंनिधौ।गृहेष्विति गृहवीथ्यादौ च।योगियाज्ञवल्क्यः।संधौ संध्यामुपासीत नास्तगे नोद्गते
रवौ।संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा।संवर्तः।संध्यां प्रातः सनक्षत्रामुपासीत यथाविधि।सादित्यां पश्चिमां संध्यां यद्वास्तमितभास्करां।नरसिंहपु
राणे।पूर्वां संध्यां सनक्षत्रामुपासीत यथाविधि।गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम्। मनुः॥ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः।प्रज्ञां यशश्च
कीर्तिं च ब्रह्मवर्चसमेव च।दक्षः।उपास्ते ये तु नो संध्यां ब्राह्मणो हि विशेषतः।स जीवन्नेव शूद्रः स्यान्मृतः श्वा चाभिजायते।तथा।संध्याहीनोऽशुचिर्नित्य
मनर्हः सर्वकर्मसु॥यदन्यत्कुरुते किंचिन्न तस्य फलभाग्भवेत्।यमः।अनागतां तु ये पूर्वामनीतां ये तु पश्चिमाम्। विप्राः संध्यां नतिष्ठंति वृषलास्ते उदाहृता
॥छंदोगपरिशिष्टे कात्यायनः॥संध्यालोपस्य नाकर्ता स्नानशीलश्च यः सदा।तं दोषा नोपसर्पंति वैनतेयमिवोरगाः।तथा।एतत्संध्याद्वयं प्रोक्तं ब्राह्मण्यं
यत्र तिष्ठति॥यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते।कूर्मपुराणे।नतिष्ठति तु यः पूर्वां नापि संध्यां तु पश्चिमाम्।स शूद्रेण समो लोके सर्वधर्मविवर्जितः।

अथ प्रातःसंध्योपासनानुष्ठानम्।तत्र बौधायनः।तीर्थं गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादः अप आचम्य।अग्निश्च मामन्युश्चे
ति सायमपः पीत्वा सूर्यश्च मामन्युश्चेति प्रातः।सपवित्रेण पाणिना सुरभिमत्याब्लिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिरन्यैश्च पवि
त्रैरात्मानं प्रोक्ष्य प्रयतो भवति।तथा।सर्वकर्मणामारंभे प्राक्संध्योपासनकालाच्चैव तैर्नैव पवित्रसमूहेनात्मानं प्रोक्ष्य प्रयतो भवति।योगियाज्ञवल्क्यः संं
ध्यास्तूपासते ये तु सततं संशितव्रताः...

CC-0. In Public Domain. Digitization by eGangotri

मन्नपानमलीकृतम् सांवपुराणे। क्रियांय : कुरुते मोहादनाचम्यैव नास्तिकः। भवंति हि वृथा तस्य क्रियाः सर्वा न संशयः। छंदोगपरिशिष्टे कात्याय
नः। सव्ये पाणौ कुशान्कृत्वा कुर्यादाचमनक्रियाम्। सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः। बौधायनः॥ पूर्वभिः सर्वाभिर्व्याहृतिभिः सर्वपापेभ्यः
पूतो भवति आचामेत्। यत्प्रथमेनाचमति तेन ऋग्वेदं प्रीणाति यद्द्वितीयं तेन यजुर्वेदं यत्तृतीयं तेन सामवेदं यत्प्रथमं मार्ष्टि तेनाथर्ववेदं यद्द्वितीयं मार्ष्टि तेने
तिहासादीन् यत्सव्यपाणिं प्रोक्षति पादौ शिरो हृदयं चक्षुः कर्णनासानाभिं चोपस्पृशति तेनौषधिवनस्पतिप्रभृतीन् सर्वांश्च देवान् प्रीणाति आप्नोति तस्मादा
चमनादेव सर्वस्मात्पातकात्पूतो भवति। व्यासः। स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः। पुनराचम्य हृदयं नाभिं स्कंधौ च संस्पृशेत्। शंखः। त्रिः प्राश्नीयाद्यां
दंभस्तु प्रीतास्तेनास्य देवताः। ब्रह्मा विष्णुश्च शंभुश्च भवंतीत्यनुशुश्रुमः। गंगा च यमुना चैव प्रीयेते परिमार्जनात्। नासत्यदस्रौ प्रीयेते स्पृष्टे नासेपुटद्वये॥
स्पृष्टे लोचनयुग्मे तु प्रीयेते शशिभास्करौ। कर्णयुग्मे तथा स्पृष्टे प्रीयेते अनलानिलौ। स्कंधयोः स्पर्शनादस्य प्रीयंते सर्वदेवताः। मूर्ध्नि संस्पर्शनादस्य प्रीतस्तु पुरु
षो भवेत्। याज्ञवल्क्यः। स्नुते निष्ठीवने स्वप्ने परिधाने श्रुपातने। पंचस्वेतेषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्। पाराशरः। अग्निरापश्च वेदाश्च चंद्रादित्यानिलास्तथा। स
र्वएते हि विप्राणां कर्णे तिष्ठंति दक्षिणे। गंगा च दक्षिणे श्रोत्रे नासिकायां हुताशनः। उभयोरस्य स्पर्शने चैव तत्क्षणादेव नश्यति। तथात्रैव ओंकारमाहात्म्यमुक्तं तत्र यो
गियाज्ञवल्क्यः। प्रणवाद्यास्तथा मंत्राश्चतुर्वर्गफलप्रदाः। तस्माच्च निःसृताः सर्वे प्रलीयंते च तत्र वै। मांगल्यं पावनं धर्म्यं सर्वकामप्रसाधनम्। ॐकारं परमं ब्रह्म सर्वमं
त्रेषु नायकम्। प्रजापतेर्मुखोत्पन्नं तपःसिद्धस्य वै पुरा। योगियाज्ञवल्क्यः। यथा पर्णं पलाशस्य शंकुनैकेन धार्यते। तथा जगदिदं सर्वमोंकारेणैव धार्यते। जपेन द
हते पापान् प्राणायामैस्तथामलं। ध्यानेन दहते पापं धारणाभिः प्रमुच्यते। मनुर्हृद्धिस्तुश्च। अकारं चाप्युकारं च मकारं च प्रजापतिः। वेदत्रयान्निरदुहद्भूर्भुवः स्वरिती राम॰
तिवा। योगियाज्ञवल्क्यः। ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन यज्ञाश्च वेदाश्च विहिताः पुरा। तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तं ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ति विधानोक्ताः सततं ब्रह्मवादिनाम्। तथा। सिद्धान्तानां चैव सर्वेषां वेदवेदान्तयोस्तथा॥ अन्येषामपि शास्त्राणां निष्ठा ओंकार उच्यते। प्राणदाः स्मृता वेदाः प्रण
वे पर्युपस्थिताः। वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत्। योगियाज्ञवल्क्यः। आद्यं तमक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदो यो वेदैनं
स वेदवित्। तथा। एक एव तु विज्ञेयः प्रणवो योगसाधनम्। गृहीतस्य प्रसिद्धान्ते रितरैर्ब्रह्मवेदिभिः। वसिष्ठः। चतुर्वेदोऽपि यो विप्रः सूक्ष्मं ब्रह्म न विन्दति। ना
वङ्क्षमति संसारे यावद्ब्रह्म न विन्दति। वेदभारभाराक्रान्तः स वै ब्राह्मणगर्दभः। यो वेत्ति ब्रह्मणोऽप्यन्ते त्रिमात्रोर्ध्वं प्रतिष्ठितम्। तथा। त्रिमात्रार्ध्वं परं ब्रह्म मात्रासर
विवर्जितम्। अचिन्त्यमव्ययं सूक्ष्मं निष्कलं परमं पदम्। मनुः। क्षरन्ति सर्वा वैदिक्यो जुहोति यजति क्रियाः। अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः। वसिष्ठः।
यथामृतेन तृप्तस्य पयसा किं प्रयोजनम्। तथा ओंकारविधिज्ञस्य ज्ञानतृप्तिर्न विद्यते। योगियाज्ञवल्क्यः। सर्वमन्त्रप्रयोगेषु ॐमित्यादौ प्रयुज्यते। तेन संप
रिपूर्णानि यथोक्तानि भवन्ति च। सर्वमन्त्रविधिज्ञेन ॐकारेण न संशयः। यन्न्यूनमतिरिक्तं च यच्छिद्रं यदयज्ञियम्। यदमेध्यमशुद्धं च यातयामं च यद्भवेत्। तदों
कारप्रयुक्तेन मन्त्रेणाविफलं भवेत्। छन्दोगपरिशिष्टे। यदोंकारमकृत्वा किंचिदारभ्यते तद्व्रजं भवति। तस्माद्व्रजभयाद्भीत ओंकारपूर्वमारभेत्। व्यासः। ओंका
रः सत्यद्वारं तस्मात्सर्वेष्वेव कर्मस्वादौ प्रयुज्यते। छन्दोगपरिशिष्टे। ॐकारपूर्वे योगोपासनं यानि नित्यानि पुण्यतमानि कर्माणि दानयज्ञतपःस्वाध्याय
जपध्यानसंध्योपासनप्राणायामहोमदेवपित्र्यमन्त्रोच्चारणब्रह्मारम्भादीनि यच्चान्यत्किंचित्क्रेयस्तत्सर्वं प्रणवमुच्चार्य प्रवर्तयेत् समापयेत्। मनुः। प्रा
क्कूलान्पर्युपासीनः पवित्रैश्चापि पावितः। प्राणायामैस्त्रिभिः पूतस्तत ॐकारमर्हति। योगियाज्ञवल्क्यः। प्रजापतेरित्यनुवृत्तौ। तेनोपास्ततस्तस्य
ब्रह्मर्षित्वं स्वयंभुवः। गायत्र्यस्य भवेच्छन्दो अग्निर्देवत उच्यते। सर्वेष्वादौ प्रयुञ्जीत त्रिविधेष्वेव कर्मसु। विनियोगः समुदिष्टः श्वेतो वर्ण उदाहृतः। व्यास
। प्रणवस्य ऋषिर्ब्रह्मा गायत्री छन्द एव च। देवोऽग्निर्व्याहृतिषु च विनियोगः प्रकीर्तितः। तथा। एवमार्षादिकं स्मृत्वा ततओंकारमभ्यसेत्। सार्धत्रिमात्रमुच्चार्य।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घघंटानिनादवत्। योगियाज्ञवल्क्यः। त्रिमात्रस्तु प्रयोक्तव्यः कर्मारंभेषु सर्वसु। तिस्रः सार्द्धस्तु कर्तव्या मात्रास्तत्वार्थचिंतकैः। देवताध्यानकालेनुल्लु
तं कुर्यान्नसंशयः। तैलधारामिवाच्छिन्नं दीर्घघंटानिनादवत्। अवाग्जं प्रणवस्यांतं यस्तं वेद स वेदवित्। आद्यं यदक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता
सगुह्योन्यस्त्रिवृद्वेदो यो वेदैनं स वेदवित्। छंदोगपरिशिष्टे। स्वरितोदात्त एकाक्षर ॐकार ऋग्वेदे त्रैस्वर्योदात्त एकाक्षर ओंकार यजुर्वेदे दीर्घोदात्त ए
काक्षर ॐकार सामसंक्षिप्तोदात्त एकाक्षर ॐकारोऽथर्ववेदे उदात्तो नात्र संशयः। बौधायनः। अपि वा प्रणवमेव त्रिरंतर्जले पठन् सर्वस्मात्पापात्प्रमुच्यते
। देहन्मनुः। स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मथनाद्विष्णुं पश्येदगिंनिगूढवत्। योगियाज्ञवल्क्यः। ॐ इत्येकाक्षरं ब्रह्म व्याहरन्मामनुस्म
रन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम्। अथ संध्यानुक्रमणिका। तत्र योगियाज्ञवल्क्यः। ॐकारो व्याहृतिश्चैव गायत्री सशिरास्तथा। आपोहिष्ठात्र्यृचं
स्विस्वः सूक्तं चैवाघमर्षणम्। आदित्यरक्षनार्थं तु सायंप्रातर्दिने दिने। सृष्टा स्वयंभुवा पूर्वं ब्रह्मणस्तनुस्वस्मृतम्। गायत्री द्विरस्वंडनी यमपरैर्मंत्राक्षरैर्याक्ष
णात् प्राणायामपुरःसरं व्यवसिता छिंद्यान्महापातकम्। मा स्तर्यं कृतवुद्व्योहदिमनाङ्गिर्वा सततस्याम हा धर्माध्यक्षहलायुधेन रचितव्याख्यानमाक
र्ण्यताम्। अथात्रैव प्रातःसंध्याविधाने प्राणायामविवर्त्ते प्राणायाममाहात्म्यं सव्याहृतिसशिरस्कगायत्रीमाहात्म्यानि। तत्रात्रिः। प्राणायामांश्चरेत्त्रींस्तु यथा
कालमतंद्रितः। अहोरात्रकृतं पापं तत्क्षणादेव नश्यति। विष्णुधर्मोत्तरं शंखश्च। प्राणायामत्रयं कुर्यात्कृत्यमुत्थाय पर्वं द्विजः। अहोरात्रकृतात्पापात्तत्क्षणादेव
मुच्यते। अत्रिः। कर्मणा मनसा वाचा यदन्हा कुरुते लघम्। संतिष्ठन्पूर्वसंध्यायां प्राणायामैस्तु पूयते। तथा बृहद्विष्णुबौधायनवसिष्ठाग्निपुराणशंखयोगि
याज्ञवल्क्यबृहस्पतिस्तंवाः। सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते। ॐकारस्य ब्रह्मा ऋषिर्गायत्री छंदोऽग्निर्देवता शुक्लो
वर्णः सर्वकर्मारंभे विनियोगः। भूरादिसप्तव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसि अग्निवायुसूर्यबृहस्पतिवरुणेंद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वेदेवा देवता अनादिष्ट प्रायश्चित्ते प्राणायामे विनियोगः। गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः उपनयने प्राणायामे जपे विनियोगः।
ओं गायत्रीशिरसः प्रजापतिर्ऋषिर्यजुश्छन्दो ब्रह्माग्निवायुसूर्या देवता प्राणायामे विनियोगः। तत्र प्राणायामविहितसप्रणवसव्याहृतिसमेतसशिरस्का गा
यत्री यथा ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपो ज्योतीरसोऽमृतं ब्रह्म
भूर्भुवः स्वरोम्। अस्यार्थः। तं तस्य भर्गं तेजो धीमहि चिंतयामः अत्र यद्यपि तमिति पदं भर्गविशेषणं नास्ति तथापि यदिति यच्छब्दप्रयोगात्तच्छब्दप्रयोगो
लभ्यते। तथा योगियाज्ञवल्क्यः। तच्छब्देन तु यच्छब्दो बोधव्यः सततं बुधैः। उदाहृते तु यच्छब्दे तच्छब्दस्यादुदाहृतम् इति किं तु तस्य सवितुः सर्वेभावानां प्रसवितुरि
त्यर्थः। तथा योगियाज्ञवल्क्यः। सविता सर्वभूतानां सर्वभावान्प्रसूयते। सवनात्पावनाच्चैव सविता तेन चोच्यते। पुनः किंभूतस्य देवस्य दीप्तिक्रीडादियुक्तस्य॥ त
था च योगियाज्ञवल्क्यः। दीप्यते क्रीडते यस्माद्रोचते द्योतते दिवि। तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतैरिति। पुनः किंविशिष्टं भर्गं यो भर्गो नास्माकं धियो बुद्धीः प्र
चोदयात् प्रेरयति धर्मार्थकाममोक्षेषु अस्माकं बुद्धिं योजयतीत्यर्थः। तथा च योगियाज्ञवल्क्यः। चिंतयामो वयं भर्गं धियो यो नः प्रचोदयात्। धर्मार्थकाममोक्षेषु बु
द्धिवृत्तीः पुनः पुनरिति। इह भर्गशब्देन बहुविधमाहात्म्ययुक्तः सवितृमंडलगतादित्यदेवतास्वरूपः पुरुष उच्यते। तथा च योगियाज्ञवल्क्यः। भृजिः पाके भवेद्धा
तुर्यस्मात्पाचयते ह्यसौ भ्राजते दीप्यते यस्माज्जगच्चांते हरत्यपि। कालाग्निरूपमास्थाय सप्तार्चिः सप्तरश्मिभिः। भ्राजते यत्स्वरूपेण तस्माद्भर्गः स उच्यते। तथा। भे
ति भासयते लोकान् रेति रंजयते प्रजाः। ग इत्यागच्छत्यजस्रं भरगाद्भर्ग उच्यते। अतो यद्यपि सवितुर्भर्ग इति सवितृभर्गयोर्भिन्नता गायत्रीमंत्रे प्रतीयते तथापि परमा
र्थचिंतादृशा यामादित्यभर्गयोर्भेदो न विद्यते। एवं य एव आदित्यः स एव भर्ग इति य एव भर्गः स एव आदित्य इति भर्गादित्ययोरद्वैतमिति स्थितम्। पुनरपि किंभूतं भ
र्गं वरेण्यं वरणीयं प्रार्थनीयं जन्ममृत्युदुःखादिनाशाय ध्यानेनोपासनीयमित्यर्थः। तथा च योगियाज्ञवल्क्यः। वरेण्यं वरणीयं च जन्मसंसारभीरुभिः। आदित्यांतर्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेयश्च भर्गाख्यं वै मुमुक्षुभिः। जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च। ध्यानेन पुरुषोयन्तु द्रष्टव्यः सूर्यमंडल इति। एवं गायत्र्यास्तस्य माहात्म्यमुपवर्ण्य पुनस्तस्यैव म
हाप्रभावत्वं सप्तव्याहृतिभिर्विशेषणभूताभिरभिधीयते। तद्यथा किंभूतं भर्गं भूरादिसप्तलोकप्रकाशकं भूर्भूमिलोकः भुवर्भुवर्लोकोन्तरिक्षं स्वः स्वर्लोकः महो महर्लो
कः जनो जनलोकः तपस्तपोलोकः सत्यं सत्यलोकः एवमुपर्युपरिक्रमेणावस्थितान् सप्तलोकानभिव्याप्यावतिष्ठमानोसौ भर्ग एतान् सप्तलोकानेव प्रदीपवत्प्रका
शयतीत्यर्थः सप्तलोकाः पुनरेताः सप्तव्याहृतय एवेति याज्ञवल्क्यवाक्येन प्रतिपादितम्। यद्वाराहः। भूराद्यश्चैव सत्यांताः सप्तव्याहृतयस्तु याः। लोकास्त एव सप्तैते
उपर्युपरि संस्थिताः। तथा। सप्तव्याहृतयः प्रोक्ताः पुरा कल्पे स्वयंभुवा। ता एव सप्तछंदांसि सप्तलोकाः प्रकीर्तिताः। यया च वासनया सप्तव्याहृतय एव सप्तलोकाः
सा च वासना योगियाज्ञवल्क्येनैव निरुक्तेर्विविच्य प्रतिपादिता। यदाह। भवंति चास्मिन् भूतानि स्थावराणि चराणि च। तस्माद्भूरिति विज्ञेया प्रथमा व्याहृतिः स्मृता। भवंति
भूयभूतानि उपभोगक्षये पुनः। कस्यांते उपभोगाय भुवस्तस्मात्प्रकीर्तिता। शीतोष्णवृष्टितेजांसि जायते तानि वै सदा। आलयः सुकृतीनां च स्वर्लोकः स उदाहृतः। अ
धरोत्तरे स्थो लोके भ्यो महांश्च परिमाणतः। हृदयं सर्वलोकानां महस्तेन निगद्यते। कल्पदाहे प्रलीनास्तु प्राणिनस्तु पुनः पुनः। ———— जायंते तु पुनः स्वर्गे
जनस्तेन प्रकीर्तितः। सनकाद्यास्तपः सिद्धा ये चान्ये ब्रह्मणः सुताः। अधिकारनिवृत्ताश्च वसंत्यस्मिन्तपस्तथा। सत्यं तु सप्तमो लोको ब्रह्मणः सदनं तु सः। सर्वेषां चैव
लोकानां मूर्ध्नि संतिष्ठते सदा। ज्ञानकर्मस्वनुष्ठानात्तथा सत्यस्य भाषणात्। प्राप्यते चोपभोगार्थं प्राप्य न च्यवते पुनः। सत्यं तु सप्तमो लोकस्तस्मादूर्ध्वं न विद्यते। एत
देव तु ज्ञानकर्मनिष्ठस्ति द्वंद्विभिः प्यर्चिरादिमार्गोपासिभिरनुचिंत्यत इति अत्र च सत्यलोकांतं ब्रह्म इति प्रत्यवायपरिहाराय प्रतिव्याहृति। ॐकाराणां प्रयोगः। अथ
वा भूरादिसप्तलोकानां विशेषत्वेन। ॐकारः सप्तैते निर्दिष्टाः ॐकारस्वरूपा एवैते सप्तलोका इत्यभिप्रायः। एवमुक्तप्रकारेणतस्यादित्यदेवतास्वरूपस्य भर्गस्य तथा
विधं प्रभावमुपदर्श्य पुनरिदानीं तस्यैवोत्कर्षप्रतिपादनाय शिरोमंत्रप्रयोजनमाह। पुनरपि किंभूतो भर्गः ब्रह्मस्वरूपः परमात्मस्वरूप इत्यर्थः भर्ग एव परमात्मभूत इत्यभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायः। तथा च योगियाज्ञवल्क्यः। आदित्यो ब्रह्म इत्येषा निष्ठा ह्युपनिषत्सु च। छंदोगे बृहदारण्ये तैत्तिरीयेऽथ चैव च। ईश्वरं पुरुषाख्यं तु सत्यधर्माणमच्युतम्। भर्गाख्यं
विष्णुसंज्ञं तु यं ज्ञात्वामृतमश्नुते। सांबपुराणे। सहस्ररश्मिरेषोऽत्र परमात्मा प्रजापतिः। आदित्य इत्यनुध्यातो भविष्यपुराणे। यस्मादतः परं नास्ति न भूतं न भविष्यति।
अयं वेदेषु सर्वेषु परमात्मेति गीयते। तथा विष्णुधर्मोत्तरीये प्रथमे कांडे वज्रं प्रति मार्कंडेयवाक्यम्। रविमध्ये स्थितः सोमः सोममध्ये हुताशनः। तेजोमध्ये स्थितं सत्यं
सत्यमध्ये स्थितोऽच्युतः। अंगुष्ठमात्रः पुरुषः पूर्वमेव मयेरितः। शंकरेण तथा दृष्टः प्रभवः सर्वतेजसाम्। स विष्णुर्भुवनाधारो यस्येदं सकलं जगत्। वरेण्यं स वि
तुर्भर्गो रमणीयं तु योगिनाम्। ध्येयं वरं तदुद्दिष्टं वह्निरं तत्स्वरेवहि ।किंच प्राणिनां हृदयांतरवर्तीयो जीवात्मा सोऽपि भर्ग एव। तथा च योगियाज्ञवल्क्यः। आदित्यांत
र्गतं यच्च ज्योतिषां ज्योतिरुत्तमम्। हृदये सर्वभूतानां जीवभूतः स तिष्ठति। तथा हृद्व्योम्नि तपति ह्येष वाह्ये सूर्यः स चांतरे। अग्नौ वा धूमकेत्वो वो ज्योतिश्चित्रतरश्च य
त्। हृद्याकाशे च यो जीवः साधकैरुपवर्ण्यते। स एवादित्यरूपेण वहिर्नभसि राजते इति। पुनरपि किं विशिष्टो सौ ब्रह्मरूपो भर्गः ज्योतिः तेजस्वरूपः मणिपा
षाणधातुप्रभृतिषु स्थावरेषु च स एव भर्गस्तेजोरूपेण तपतीत्यर्थः। तथा च योगियाज्ञवल्क्यः। पाषाणमणिधातूनां तेजोरूपेण संस्थितः। पुनरपि कीदृशः स
एव ब्रह्मस्वरूपो भर्गः व्याप्तः। तृणवृक्षौषधिषु च स एव रसस्वरूपेण वसतीत्यर्थः। तथा च योगियाज्ञवल्क्यः वृक्षौषधितृणानां च रसरूपेण तिष्ठति। अयमभिप्रा
यः जंगमेषु देवतासुरनरोरगपशुपक्षिकीटादिषु तावदंतश्चरतया ब्रह्मस्वरूपो सो भर्गो विद्यत एव ये च स्थावराः पाषाणमणिधातुप्रभृतयस्तेषु मूर्त्या स एव भ
र्गः प्रतिवसति। येप्यपरे वृक्षौषधितृणादयः स्थावरास्तेष्वपि रसरूपतया स एव भर्गो वतिष्ठति। एवमखिलस्थावरजंगममेवं तेन भर्गेणापि व्याप्तमिति न केवल
मयं भर्गः परमार्थरूपतयैव जंगमेषु विद्यते अपितु जंगमानाममृतनामा चेतनात्मापि स एव भर्ग इति दर्शयितुमाह। पुनः किंभूतो सो भर्गः अमृतनामा ज्योतिर्मयो।
पश्चेतनात्मा प्राणिनां हृदये वसति सोपि भर्ग एवेत्यर्थः। तथा हि प्राणिनां हृदये सूर्यमंडलमस्ति सूर्यमंडलमध्ये सोममंडलं सोममंडलमध्ये तेजस्तेजोमध्ये सत्यं सत्यमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 परमात्मा यदाह। योगियाज्ञवल्क्यः रविमध्ये स्थितः सोमः सोममध्ये हुताशनः। तेजोमध्ये स्थितं सत्यं सत्यमध्ये स्थितोऽच्युत इति। तत्र सोममध्ये हुताशनो वसति स एवा
 मृतनामा चेतनात्मा। तथा च योगियाज्ञवल्क्यः। केशवर्हिः समाछिन्ने तेजो वेद्यां प्रतिष्ठितं। चित्तात्माधाममात्रस्तु निर्भासं स्वात्मभासकः। एवं हि सोममध्यस्थो अमृतं
ज्योतिरूपकम्। हृदिस्थं सर्वभूतानां चेतसो द्योत्यते त्वसौ इति। तदेवं स्वरूपो अमृतनामा चेतात्मा अपि च तस्य परमात्मस्वरूपस्यैव भर्गस्यैव मूर्त्तिरिति प्रतिपा
दितम। किंच जल एव निखिलं त्रैलोक्यमिदमुत्पन्नं यदाह। आप एव ससर्जादौ तासु वीर्यमवासृजदिति। तत्र जगत्त्रयजन्माधारभूतं जलमपि भर्ग एवेति दर्शा
यितुं भर्गविशेषणमाह। आप इति॥ जलस्वरूपोपि स एव भर्ग इत्यर्थः। तथा च सांबपुराणम्। य एष मंडले ह्यस्मिन् पुरुषो दीप्यते महान्। एष विष्णुर्विनोर्म्मात्र
ह्मा चैव पितामहः। रुद्रो महेंद्रो वरुण आकाशं पृथिवी जलमिति। न केवलं त्रैलोक्यजन्माधारभूतजलमात्रमसौ भर्गः अपि तु ब्रह्मविष्णुरुद्रमूर्त्तितया सृ
ष्टिस्थितिप्रलयानामेव कर्त्ता स भर्ग इति दर्शयितुं पुनर्भर्गविशेषणमाह। भूर्भुवः स्वरिति। एतद्व्याहृतित्रयं सत्त्वरजस्तमोमय ब्रह्मविष्णुरुद्रात्मकम्। य
दाह कूर्मपुराणम्। पूर्वकल्पे समुत्पन्ना भूर्भुवः स्वः सनातनाः। महाव्याहृतयस्तिस्रः सर्वाशुभनिवर्हणाः। प्रधानपुरुषः कालो ब्रह्मविष्णुमहेश्वराः। सत्त्वं रजस्त
मस्तिस्रः क्रमाद्व्याहृतयः स्मृता इति। तदयमर्थः। सत्त्वरजस्तमोमयब्रह्मविष्णुरुद्रस्वरूपश्च स एव भर्ग इति ब्रह्मविष्णुमहेश्वरमूर्त्तितया सृष्टिस्थितिप्रल
यानेवासौ परब्रह्मात्मको भर्गः करोतीत्यभिप्रायः। तथा चादित्यानुवर्त्तनो भविष्यपुराणम्। यस्मादिदं जगज्जातं लयं यास्यति यत्र चेति। इत्थं निखिलचराचरा
त्मकत्रैलोक्यमेव भर्गस्वरूपं त्रैलोक्योत्पत्तिस्थानं त्रैलोक्यपालयिता त्रैलोक्यसंहर्त्ता स एव भर्गः। ततो भर्गादन्यत्किमपि न संभवतीति परब्रह्मस्वरूपत्वं तस्य।
भर्गस्य प्रतिपादितमिति। अत्र सर्वेषामोंकाराणां स्वरत्यनोद्धृतं ब्रह्मेति प्रत्यवायपरिहाराय प्रयोगः अस्यास्तु सप्तव्याहृतियुक्तसशिरस्कगायत्र्या अयं
वाक्यार्थः। यथाभूतो भर्गोऽस्मान्प्रेरयति स एव जलज्योतीरसामृतभूरादिलोकत्रयात्मकसकलचराचरस्वरूपब्रह्मविष्णुमहेश्वरसूर्यादिनानादेवतास ए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वपरब्रह्मरूपो भूरादिसप्तलोकान्प्रतिदीपवत्प्रकाशयन्मदीयजीवात्मानं ज्योतिरूपं सत्याख्यं सप्तमं ब्रह्मलोकं ब्रह्मस्थानं नीत्वा स्वात्मन्येव ब्रह्मणि ब्रह्मज्यो
तिषा सहैकीभावं करोत्विति चिन्तयन्प्राणायामं जपं कुर्यादिति। तदेवं स्वरूपगायत्र्याः संस्मृताया अर्थपरिज्ञानपूर्वकं यथाविधि प्राणायामे जपे च क्रियमा
णे कथं महापातकोपपातकान्यन्यानि च सप्तजन्मकृतानि पापानि नाशमुपयास्यन्ति। एतस्याः गायत्र्याः सम्यगर्थचिंतनेनैव कथमपवर्गसिद्धिर्भविष्यति। त
था चास्याः प्राणायामविधावपि तत्तद्बहुविधमाहात्म्योपवर्णनेन नामानि वचनानि। अत्र अग्निपुराणे गायत्रीप्रतिब्रह्मवाक्यम्। कुर्वन्तोपीह पापानि ये त्वां
ध्यायन्ति पावनि॥ उभे संध्ये न तेषां हि विद्यते भुवि पातकम्। अत्रिः। पठेद्यदि च प्राणः प्राणायामेन यो द्विजः। वर्जितेन सलिलेन पातकैरुपपातकैः। बृहद्विष्णुः
। प्राणायामान्द्विजः कुर्यात्सर्वपापापनुत्तये। दह्यन्ते सर्वपापानि प्राणायामैर्द्विजस्य तु। विष्णुधर्मोत्तराग्निपुराणयोः सर्वदोषहरं प्रोक्तं प्राणायामं द्विजन्मा
नाम्। ततश्चैवाधिकं नास्ति ततः परमपावनम्। अत्रिः। कर्मणा मनसा वाचा यदह्ना कुरुते त्वघम्। आसीनः पश्चिमां संध्यां प्राणायामैस्तु हन्ति तत्। अग्नि
पुराणम्॥ प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिः पुनः। अहोरात्रकृतात्पापान्मुच्यते नात्र संशयः। वशिष्ठः। प्राणायामान्करोति त्रीन्यथाविधि रतो द्विजः
। अहोरात्रकृतं पापं तत्क्षणादेव नश्यति॥ कर्मणा मनसा वाचा यदह्ना कृतमेनसम्। उत्तिष्ठन्पूर्वसंध्यायां प्राणायामैर्व्यपोहति रात्र्यापसत्वं वः पूर्वसु
क्तेषु पापेषु तथान्येषु च सर्वसु॥ प्राणायामास्त्रयोऽभ्यस्ताः सूर्यस्योदयनं प्रति। जायन्ते तद्धि नाशयन्तमसामिव भास्करः। सूर्यस्योदयनं प्राप्य निर्मलाधू
तकल्मषाः। भवन्ति भास्कराकारा विधूमा इव पावकाः। योगियाज्ञवल्क्यः। यदह्ना कुरुते पापं कर्मणा मनसा गिरा। त्रैकाल्यसंध्याकरणात्प्राणायामैर्व्य
पोहति॥ बृहस्पतिः। प्राणायामैर्दहेद्दोषान्मनोवाक्कायसंभवान्। प्राणायामानुवृत्तौ बौधायनः। एतदाद्यं तपः श्रेष्ठमेतद्धर्मस्य लक्षणम्॥ सर्वदोषो
पघातार्थमेतदेव विशिष्यते। अत्रिवसिष्ठौ। आवर्तयेत्सदा युक्तः प्राणायामान्पुनः पुनः॥ आकेशाग्रान्नखाग्राच्च जपस्तप्यत उत्तमम्॥ विष्णुधर्मोत्तरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्निपुराणे॥ आकेशाग्रान्नखाग्राच्च तपस्तप्यंस्तु दारुणम्॥ आत्मानं शोधयेद्यस्तु प्राणायामैः पुनः पुनरिति॥ मनुः। दह्यन्ते ध्मायमानानां धातूनां हि यथा
मलाः॥ तथेंद्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्॥ प्राणायामैर्दहेद्दोषान् प्राणायामः परंतपः। वृहन्मनुः। यथा हि शैलधातूनां धमनोऽग्न्यनेर
जः॥ इंद्रियाणां तथा दोषान्प्राणायामैर्विनिर्दहेत्॥ वृहस्पतिः। धम्यमानं यथा दह्याद्धातूनां सततं मलम्। तथेंद्रियकृतो दोषः प्राणायामेन दह्यते॥
यथा पर्वतधातूनां दोषान्दहति पावकः। एवमंतर्गतं चैनः प्राणायामेन दह्यते॥ अत्रिवसिष्ठौ निरोधाज्जायते वायुर्वायोरग्निः प्रजायते। अग्नेरापोऽभिजायं
ते तैरंतः शुध्यते त्रिभिः॥ विष्णुधर्मोत्तराग्निपुराणयोः। निरोधाज्जायते वायुस्तस्मादग्निस्ततो जलम्। त्रिभिः शरीरं सकलं प्राणायामैर्विशुध्यति॥
याज्ञवल्क्यः॥ तथा निरोधसंयोगाद्देवतात्रयचिंतनात्। अग्नेर्वायोरपां व्योमादात्माशुध्येत वै त्रिभिः। निरोधाज्जायते वायुर्वायोरग्निश्च जायते। अग्नेरापो
भिजायंते तैरंतः शुध्यते त्रिभिः। मनुः। प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः। व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः। योगियाज्ञवल्क्यः॥ प्राणाया
मा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः। व्याहृतिप्रणवैः सार्द्धं विज्ञेयं परमं तपः विष्णुधर्मोत्तराग्निपुराणागमे। प्राणसंधारणं स्थानं कुशाग्रच्युतविंदुना॥
यः कुर्यादंभसा राजन्प्राणायामं च तत्समम्। वृहद्विष्णुबौधायनवसिष्ठात्रि अग्निपुराणशंखयोगियाज्ञवल्क्यवृद्धापस्तंबाः। सव्याहृतिं सप्रणवां गा
यत्रीं शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। याज्ञवल्क्ययोगियाज्ञवल्क्यौ। गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम्। प्रतिप्रणवसंयुक्तां
त्रिरयं प्राणसंयमः। योगियाज्ञवल्क्यः। भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च। प्रत्योंकारसमायुक्तं तत्सवितुर्वरेण्य पि ॐ आपोज्योतिरित्येतच्छि
रः पश्चात्प्रयोजयेत्। एवं मंत्रप्रयोगस्तु प्राणायामनिरोधने। त्रिरावर्तनयोगेन प्राणायामस्तु शब्दितः। शंखः। ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः सुव राम
रोमिति शिरः। योगियाज्ञवल्क्यः। षोडशाक्षरकं ब्रह्म गायत्र्यास्तच्छिरः स्मृतम्। ॐ आपोज्योतिरित्येष मंत्रोऽयस्तु प्रकीर्त्यते। तस्य प्रजापतिर्ऋषिर्यजुषा १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छंदसाधना। ब्रह्माग्निवायुसूर्याश्च देवतां समुदाहृताः॥ प्राणस्यायमने चैव विनियोग उदाहृतः गायत्रीं शिरसा सार्द्धमेवं श्रुतिनिदर्शनम्॥ व्यासः प्र
णवव्याहृतीयुक्तां गायत्रीं शिरसा सह। त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते। आदानं रोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत्। ब्रह्माणं केशवं श
भुं ध्यायेद्देवताननुक्रमात्। रक्तं प्रजापतिं ध्यायेद्धृदि छुं नीलोत्पलप्रभम्। शंकरं त्र्यंबकं श्वेतं ध्यायन्मुच्येत बंधनात्। योगियाज्ञवल्क्यः। पूरके विष्णुसायु
ज्यं कुंभके ब्रह्मलोंतिकम्। रेचकेन तृतीयं तु प्राप्नुयादैश्वरं पदम्। अथ प्राणायामविधिः। तत्र वेदव्यासः। आदौ छंदो देवता ऋषिविनियोगान्निरूप्य गाय
त्रीं शिरसा सार्द्धं सप्तव्याहृतिपूर्विकां प्राणायामे त्रिरावर्तयेत्। ततः शनैः प्रणिश्वसेत्। एवं प्राणायामैर्दग्धदोषो यस्तु तत्र श्रेयः करोति तत्सफलं भवति॥
व्यासः। गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च। त्रिष्टुप् च जगती चेति छंदांस्याहुरनुक्रमात्॥ अग्निवाय्वर्कवरुणा बृहस्पतिशतक्रतू। विश्वेदेवा व्याहृतीनां
दैवतानि यथाक्रमम्। विनियोगः स्मृतश्चासां प्राणायामे महर्षिभिः। योगियाज्ञवल्क्यः। व्याहृतीनां च सर्वासामार्षं चैव प्रजापतिः। सप्त छंदांसि प्रोक्तानि।
छादनानि तु सर्वशः। गायत्र्युष्णिगनुष्टुप् च जगती त्रिष्टुवेव च। पंक्तिश्च बृहती चैव सप्त छंदांसि तानि वै। अग्निर्वायुस्तथादित्यो बृहस्पतिस्तथापर एव च। इंद्रश्च वि
श्वेदेवाश्च देवताः समुदाहृताः। अनादेशेष्वनिन्द्येषु प्रायश्चित्तेषु सर्वदा। प्राणायामप्रयोगे च विनियोग उदाहृतः। बृहस्पतिः। बध्वासने नियम्यासून्स्मृत्वा
र्षादिकं तथा। सन्निमीलितदृङ्मौनी प्राणायामं समभ्यसेत्। बृहस्पतिर्विष्णुधर्मोत्तरे। सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतः प्राणः प्रा
णायामः स उच्यते। आदानं रोधमुत्सर्गं मनसा त्रिः समभ्यसेत्। ब्रह्माणं केशवं शंभुं ध्यायन्मुच्येत बंधनात्। रक्तं पितामहं ध्यायेद्धृदि छुं नीलोत्पलप्रभम्॥
श्वेतं तु त्र्यंबकं चैव संसारार्णवतारणम्। योगियाज्ञवल्क्यः। बाह्यस्थितं नसापुटेन वायुमाकृष्य तेनैव शनैः समस्ता नाडीश्च सर्वाः परिपूरयेत्तु सः पूरको नाम म
हान्निरोधः। न रेचको नैव च पूरको यं नासाग्रचारी स्थित एव वायुः। सुनिश्चलं धारयति क्रमेण कुंभाख्यमेतत्प्रवदंति तज्ज्ञाः। निष्क्रम्य नासाविवराद्श्चे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा॰स॰ ष्प्राणं बहिः शून्यमिवानिलेन निरुध्य संतिष्ठति चैव वायुः। स रेचको नाम महानिरोधः।। नासयाकृष्यमाणं तु ध्यानं पूरक उच्यते। कुंभो निश्चलनिःश्वासो
१४ रिच्यमानस्तु रेचकः। योगियाज्ञवल्क्यः। न प्राणेनाप्यपानेन वेगाद्वायुं समुत्सृजेत्। येन शक्तून् करस्थांश्च निःश्वासेन न चालयेत्। शनैर्नासापुटे वायुमुत्सृजेन्न तु
वेगतः। अथ कास्य प्राणायामः। अंगिराः। दह्यमानो नु तापेन कृत्वा पापानि मानवः। शौचमानस्त्वहोरात्रं प्राणायामैस्तु पूयते। बौधायनः। विधिना शास्त्रदृष्टेन
प्राणायामान् समाचरेत्।। यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत्। बाहुभ्यां मनसा वा वाक्श्रोत्रत्वग्घ्राणचक्षुषा। अपि च। चक्षुःश्रोत्रघ्राणमनोव्यतिक्रमे
षु त्रिभिः प्राणायामैः शुध्यति। शूद्रान्नस्त्रीगमनभोजनेषु केवलेषु पृथक् पृथक् सप्तप्रायाणामान् धारयेत्।। अभक्ष्याभोज्यापेयपान्नप्राशनेषु।। तथा अन्यत्र
विक्रयेषु मधुमांसघृततैलक्षारलवणरसान्नवर्जेषु यच्चान्यदप्येवमुक्तं द्वादशद्वादश प्राणायामान् धारयेत्। पातकपतनीयोपपातकवर्जेषु यच्चा
न्यदप्येवमुक्तं।। अर्द्धमासं द्वादशप्राणायामान् धारयेत्। पातकपतनीयवर्जेषु।। यच्चान्यदप्येवमुक्तं। द्वादशाहान् द्वादशद्वादशप्राणायामान्धारयेत् पा
तकपतनीयवर्जेषु यच्चान्यदप्येवमुक्तम्। द्विमासं द्वादशप्राणायामान् धारयेत्।। अथ पातकेषु संवत्सरं द्वादशद्वादशप्राणायामान् धारयेत्।। योगियाज्ञव
ल्क्यः। द्विगुणं त्रिगुणं कृत्वा नियतात्मा जितेन्द्रियः। प्राणायामैश्चतुर्भिस्तु मुच्यते ह्युपपातकात्। प्राणायामशतं कार्यं सर्वपापापनुत्तये। उपपातकयुक्ता
नामनादिष्टस्य चैव हि।। तथा। ब्रह्महा च सुरापश्चागम्यागामी तथैव च। सुवर्णस्तेयचोरस्तु गोघ्नो विश्वासघातकः। शरणागतघाती च कूटसाक्षी ह्यकार्यकृ
त्। एवमादिषु चान्येषु पापेष्वभिरताश्चिरम्। प्राणायामशतं कृत्वा सूर्यस्योदयनं प्रति। निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा। विष्णुधर्मोत्तराग्निपु
पुराणयोः।। श्रावण्यां पौर्णमास्यां च सोपवासो जितेन्द्रियः।। प्राणायामशतं कृत्वा मुच्यते सर्वकिल्बिषैः। अत्रिवसिष्ठौ च।। प्राणायामैर्येनात्मानं नियम्या १४
सेत्पुनः पुनः। दशद्वादशभिर्वापि चतुर्विंशात्परं तपः।। विष्णुधर्मोत्तराग्निपुराणमनुयोगियाज्ञवल्क्यबृहदापस्तवाः। सव्याहृतीसप्रणवाः प्राणायामास्तु षो·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डश। अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः। बृहद्विष्णुः। प्रत्यहं षोडश प्राणायामान् कृत्वा एककालं हविष्याशी मासेन ब्रह्महापूतो भवति। कर्म्मान्ते पयस्विनीं दद्यात्। वृद्धापस्तम्बः। श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च। नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यति। उष्ट्रयानं समारुह्य खरयानं च कामतः स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति। कात्यायनः। प्राणायामैश्च दुर्गन्धो विशुध्यन्तीति शेषः। सुमन्तुः। मद्यानुवृत्तौ गंधघ्राणे प्राणायाम एकः। गद्यव्यासः। गंधघ्राणे सुरायाः प्राणायामो घृतप्राशनं च। कूर्मपुराणे। सुरां स्पृष्ट्वा द्विजः कुर्यात्प्राणायामत्रयं शुचिः। पराशरः। शातातपश्च। अज्ञानाद्भुक्तसूतकान्नवृत्तौ। ब्राह्मणस्य यदा भुंक्ते प्राणायामेन शुध्यति। पराशरः। ब्राह्मणान्नं द्विजो भुक्त्वा कृत्वा कर्मविगर्हितम्। प्राजापत्येन शुध्येत प्राणायामैस्तु षोडशैः। कूर्मपुराणम्। अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति। मनुयोगियाज्ञवल्क्यौ। अह्ना रात्र्या च याञ्जन्तून्हिनस्त्यज्ञानतो यदि। तेषां स्नात्वा विशुध्यर्थं प्राणायामान्षडाचरेत्। रहस्ये वृद्धयमः। प्राणायामः परं ब्रह्म प्राणायामः परं तपः। तथा। यतिधर्मोऽस्तु निरज्ञानतो जन्तून्यान्हिनस्ति दिवा निशम्। प्राणायामान्विशुद्ध्यर्थं तेषां स्नात्वा षडाचरेत्। वृद्धयमः। चांडालीं पुष्कलीं मित्रकलत्रं स्नुषां वा गत्वा उपस्पृश्य वामदेव्येन त्रीन्प्राणायामान्कृत्वा तदै तस्मात्पूतो भवति। अत्र वामदेव्येन प्राणायामान्कृत्वेति पूरककुंभकरेचकेषु प्रत्येकं पठतो वास्त्रयेण एकः प्राणायामः। एवं क्रमेण नव वारान्पठित्वा प्राणायामत्रयं करणीयमित्यर्थः। तथा रेतोमूत्रपुरीषप्राशनं कृत्वा लशुनपलांडुगृंजनककुंभिकादीनामन्येषां चाभक्ष्याणां भक्षणं कृत्वा हंससूकरकुक्कुटशृगालमांसभक्षणं कृत्वा कस्तामात्रमुदकमवतीर्य शुद्धवतीभिः प्राणायामं कृत्वेति पूरककुंभकरेचकक्रमेण शुद्धवतीनामकं मंत्रत्रयं पठनीयमित्यर्थः। शुद्धवतीमंत्रस्य पूतदक्ष ऋषिरनुष्टुप् छंदः इन्द्रो देवता मार्जने विनियोगः। मंत्रो यथा। ॐ एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु। इन्द्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं निधारय शुद्धो ममद्धि सोम्यः। इन्द्रः शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा·स· श्रुद्धो ह्युत्राणि जिघ्रसे श्रुद्धो वा जं सिषासति। तथा रहस्येऽहन्मनुः। ब्राह्मणोऽथ सुवर्णास्ते यं कृत्वा हिरण्यं शालायां प्रसिच्य अप्सु निमज्य ग्रीवामात्रमुदकम
१५ वतीर्यं च न स्तृभिर्हिरण्यवर्णाभिः प्राणायामं कृत्वा आत्मानं प्रक्षाल्य तस्मात्पापात्पूतो भवति प्राणायाममाहात्म्यम्। अथ सप्रणवसव्याहृतिसशिरस्कगा
यत्रीजपफलम्। तत्र विष्णुधर्मोत्तरीय प्रथमकांडे। सव्याहृतीकां सप्रणवां जप्त्वा शिरसा सह। प्रणवेन तथा व्यस्तां वा व्याहृतयः पृथक्। तथा॥ सव्या
हृतिं सप्रणवां गायत्रीं शिरसा सह। ये जपंति सदा तेषां न भयं विद्यते क्वचित्। दशकृत्वः प्रजप्ता सा रात्र्याह्नापकृतं लघु। तस्मात्पपुनदत्याश्शु नात्र कार्या·
विचारणा। शतजप्ता तु सा देवी पापोपशमनी स्मृता। सहस्रजप्ता सा देवी उपपातकनाशिनी। लक्षजप्तेन च तथा महापातकनाशिनी। कोटिजप्तेन राजेन्द्र य
दिच्छति तदाप्नुयात्। यक्षविद्याधरत्वं वा गंधर्वत्वमथापि वा। देवत्वमथवा राज्यं भूर्लोके हतकंटकम्। दशसाहस्रजप्येन निष्कामः पुरुषोत्तमः। विधिना
राजशार्दूल प्राप्नोति परमं पदम्। यथाकथंचिज्जप्तैषा देवी परमपाविनी। सर्वकामप्रदा प्रोक्ता विधिना किं पुनर्नृप। ऋष्यशृंगः। सर्वात्मना हि या देवी स
र्वभूतानि संस्थिता। गायत्री मोक्षहेतुर्वै मोक्षस्थानमलक्षणम्। षोडशाक्षरकं ब्रह्मगायत्र्याश्च शिरः स्मृतम्। अपि पादमधीयीत गायत्र्याः शिरसा तथा सर्व
पापैः प्रमुच्येत ब्रह्मधाम यतस्तथा। योगियाज्ञवल्क्यः। षोडशाक्षरकं ब्रह्मगायत्रीसशिरस्तथा। सकृदावर्तयेद्यस्तु सर्वपापैः प्रमुच्यते। एवं यस्तु विजा
नाति गायत्रीं ब्राह्मणस्तु सः। अन्यथा शूद्रधर्मा स्याद्वेदानामपि पारगः। तस्मात्सर्वप्रयत्नेन ज्ञातव्या ब्राह्मणेन सा। व्याहृत्योंकारसहिता सशिरस्का·
यथार्थतः। सशिराश्चैव गायत्री यैर्विप्रैरवधारिता। ते जन्मबंधनिर्मुक्ताः परंब्रह्म विशंति च। अग्निपुराणम्। सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। ये ज
पंति सदा तेषां न भयं विद्यते क्वचित्। योगियाज्ञवल्क्यः। आद्या व्याहृतयः सप्त गायत्री सशिरास्तथा। ॐकारं विंदते यस्तु स मु निर्नेतरो जनः। शंखः। सव्या राम·
हृतिं सप्रणवां गायत्रीं शिरसा सह। ये जपंति सदा तेषां न भयं विद्यते क्वचित्। शतजप्ता तु सा देवी दिनपापप्रणाशिनी॥ सहस्रजप्ता तु तथा पातकेभ्यः प्र १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मोचनी। दशसाहस्रजप्येन सर्वकल्मषनाशिनी। लक्षजप्यानुसा देवी महापातकनाशिनी। स्वरितोदात्तएकाक्षर ॐकारं ऋग्वेदे। स्वरितोदात्तएकाक्षरं य
जुर्वेदे। स्वरितोदात्तएकाक्षरं साम्नि॥ संक्षिप्तोदात्तएकाक्षरं अथर्ववेदे। उदात्तो नात्र संशयः। यथाहि प्रबलो वह्निः कक्षं दहति सानिलः। तथा कालाग्नि
रुद्रो रुद्रो सौ काल्यं दहति चांतकः॥ इति वचनमासाद्य वेदाः सांगास्तु चत्वारोऽधीताः सर्वे च मानसाः। गायत्रीं यो न जानाति वृथा तस्य परिश्रमः। पश्यपश्य
गायत्रीं चैव वेदांश्च तुलयासमतोलयेत्। वेदा एकत्र सांगास्तु गायत्री चैकतः स्मृता। योऽधीते नार्थतत्वज्ञानस्य तद्धारणाद्यथा। भारवाही च भृतकः के
वलं क्लेशभाग्भवेत्। तथा। ज्ञानं कर्म च संयुक्तं मुक्त्यर्थं कथितं मया। अधीतं श्रुतिसंयुक्तं तथा श्रेष्ठं न केवलम्। स्थाणुरयं भारवाही किलाधीत्य वेदं न वि
वेद चार्थं। योऽर्थवित्सकलं भद्रमश्नुते नाकमेति विधूतपाप्मा। सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः। सुरापश्च विशुध्यंति लक्षजाप्यान्न संशयः। तथा
हुता देवी विशेषेण सर्वकल्मषनाशिनी। सर्वकामप्रदा देवी वरदा भक्तवत्सला। घृतयुक्तैस्तिलैर्वह्निं हुत्वा तु सुसमाहितः। गायत्र्या प्रयतः शुद्धः सर्व
पापैः प्रमुच्यते। पापात्मा लक्षहोमेन पातकेभ्यः प्रमुच्यते। अभीष्टं लोकमाप्नोति तथा पापविवर्जितः। गायत्रीं देवजननी गायत्री पापनाशिनी। गायत्र्यास्तु
परं नास्ति दिवि चेह च पावनम्। हस्तत्राणप्रदा देवी पततां नरकार्णवे। तस्मात्तदभ्यसेन्नित्यं ब्राह्मणो हृदये शुचिः। गायत्रीं जप्यनिरतं हव्यकव्येषु योज
येत्। तस्मिंश्च तिष्ठते पापमब्बिन्दुरिव पुष्करे। शंखः। अस्तीन्यनुवृत्तौ च व्याहृतीभ्यः परं होमे। योगियाज्ञवल्क्यः। एतास्तु व्याहृतीः सप्त यः स्मरेत्प्राणसंय
मे। उपासितं भवेत्तेन विश्वं भुवनसप्तकम्। सर्वेषु चैव लोकेषु कामचारः स जायते। एषा लोकवती ज्ञेया तत्तु राद्या प्रजापतेः। बौधायनः। प्रायश्चित्तानि
वक्ष्यामि विख्यातानि विशेषतः। समाहितानां प्रयुक्तानां प्रमादेषु कथं भवेत्। ॐ पूर्वाभिर्व्याहृतीभिः सर्वाभिः सर्वपातकेष्वाचामेत्। यत्प्रथममाचामति तेन
ऋग्वेदं प्रीणाति। यद्द्वितीयं तेन यजुर्वेदं यत्तृतीयं तेन सामवेदं यत्प्रथमं मार्ष्टि तेनाथर्ववेदं यद्द्वितीयं तेनेतिहासपुराणादीनि यत्सव्यं पाणिं प्रोक्षति पादौ

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्रास
१६

शिरो हृदयं चक्षुः कर्णनासिकानाभिं चोपस्पृशन्निति तेनौषधिवनस्पतयः सर्वाश्च देवताः प्रीणाति। आप्नोति च तस्मादाचमनाद्देवसर्वस्मात्पापात्प्रमुच्य
ते उपपातकानुवृत्तौ यमः। ॐकाराद्या व्याहृतयः सहस्रमनुमंत्रिताः फलाहारस्तथाभ्यस्य तदन्हैव विशुद्ध्यतीति। ॐकारयुक्ताः स्तिस्रो व्याहृतयः॥
ॐ भूर्भुवः स्वरिति सहस्रमनुमंत्रिताः। सहस्रं जपित्वाभ्यस्य तज्जपित्वा सहस्रत्रयं जपित्वेत्यर्थः। ततः फलाहारस्तिष्ठन् तदन्हैव विशुद्धो भवतीति। वसिष्ठः
। मनसा पापं ध्यात्वा ॐकारपूर्वा भूराद्याः सन्त्यांता व्याहृतीर्जपेत्॥ शातातपः॥ अनुदकमूत्रपुरीषकरणे श्वपाकस्पर्शे सचैलं स्नानं महाव्याहृतीश्च रेत्
। महाव्याहृतिभिरिति भूर्भुवः स्वरिति तिसृभिरित्यर्थः। बृहद्यमः। गोहत्यां स्त्रीहत्यां राजन्यवैश्यहत्यां न्यासापहारं कन्यादूषणं कृत्वा गामास्प्राचीमु
दीचीं वा दिशमुपनिष्क्रम्य प्रभूतेनेधनेनाग्निं प्रज्वाल्य गव्येन घृतेन व्याहृतिभिराहुतिसहस्रं जुहुयात्। गायत्र्या अष्टसहस्रमावर्त्य आदित्यं प्रेक्ष्यमाणस्ति
सृभिर्हिरण्यवर्णाभिरात्मानं प्रोक्षयित्वा वामदेव्यं त्रिरावर्त्यं तेन तस्मात्पूतो भवति। अत्र सर्वत्राविशेषितव्याहृतिशब्देन भूर्भुवः स्वरिति तिस्रो व्याहृतय उ
च्यन्ते। तत्र स्वगृह्योक्तकुशकंडिकाविधानेन परिसमूहनादि पर्युक्षणांतं कृत्वा आघारादि प्राजापत्यांतं हुत्वा व्याहृतित्रयस्य प्रजापतिर्ऋषिरग्निर्वायुः
सूर्यो देवता गायत्र्युष्णिगनुष्टुप्छंदांसि अनादिष्टप्रायश्चित्तेषु प्राणायामे विनियोगः ॐ भूर्भुवः स्वरिति प्रथमतो देवतोद्देशं कृत्वा ॐ भूर्भुवः स्वः स्वाहा। एवंक्रमे
णाहुतिसहस्रं हुत्वा स्विष्टकृद्धोमं समापयेत्। ततो अष्टाधिकसहस्रं गायत्रीं जपित्वा च तिसृभिर्हिरण्यवर्णाभिरिति। मंत्रो यथा ॐ हिरण्यवर्णाः शुचयः पावका या
सुजातः कश्यपो यास्विंद्रः। अग्निं या गर्भं दधिरे विरूपास्तान आपः शंस्योना भवंतु। या सां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम्। मधुश्चुतः ‾‾ शुच
यो याः पावकास्तान आपः शंस्योना भवंतु। यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति। या पृथिवीं पयसोंदंति शुक्रास्तान आपः शंस्योना भवंतु। शिवेन मा चक्षु
षा पश्यतापः शिवया तनुवोपस्पृशत त्वचं मे। सर्वां अग्नींरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥ वामदेव्यं त्रिरावर्त्येति ॐ कया नश्चित्र आभुवदूती।

राम
१६

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदावृधः सखा कया शचिष्ठया वृता इत्यादूतिभिरित्यंतं कंडिकात्रयं। वामदेव्यं अस्य च ऋष्यादिकं व्याख्यानं च शांतिकप्रकरणे लिखितमिति॥ इति ब्राह्मण
सर्वस्वे प्राणायाममाहात्म्ये सव्याहृतिसशिरस्का गायत्री माहात्म्यं नामाध्यायः॥ तत्र प्राणायामानंतराचमने बौधायनः। सूर्यश्च मा मन्युश्चेति प्रातः सपवित्रे।
णपाणिर्नेतित्तत्र मंत्रो यथा। सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अ
ह्नस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा। अस्यार्थः। ममो रक्षंतां के सूर्यश्च मन्युश्च मन्युर्यज्ञः मन्युपतयश्च यज्ञपत
यश्च इंद्रादयः केभ्यो रक्षंतां पापेभ्यः किंभूतेभ्यः मन्युकृतेभ्यः अरागपतत्कृतेभ्यः मन्युः क्रोधो त्वपसे क्रोधपतय इंद्रियाणि क्रोधकृतेभ्यः पापेभ्यः क्रोधाद्रक्षंतामि
ति। किमुक्तं भवति। ममैतादृशः क्रोधो मा भवतु येनाहमकार्यं करोमीति। किंच यत्पापं रात्र्या कार्षं कृतवानस्मि केन केन मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना निग
द्व्याख्यातमेव। तत्पापं अहः दिवसो वलुंपतु नाशयतु यत्किंचिन्मयि मदाश्रितं पापं तदिदमापः अहं सूर्ये जुहोमि किंभूते ज्योतिषि हृदयमध्यस्थितप्रकाशरूपे ज्योति
षि पुनः किंभूते अमृतयोनौ स्वाहा ततः सुहुतं भवतु अत्र मन्युर्यज्ञ इत्यत्र मन्युः क्लेशे क्रतौ क्रुधीत्यमरकोशः प्रामाण्यम्। शिश्नादिति शिश्नेनेति प्रायेण सर्वविधपाठस्व
सिविकल्प्यत इति इत्यादेशेन भवति। आप इति सर्वमापोमयं जगदिति दर्शनात्सकारांत आपः शब्दस्तथा यमिति। इति सूर्यश्च मंत्रव्याख्या। आपोहिष्ठेत्यादि ति
सृभिर्मार्जनं एतत्तु मंत्रत्रयं उपरिगत प्रातःस्नाने एव व्याख्यातमतस्तत्रैवानुसंधेयमिति। ततो मार्जनानंतरं द्रुपदामंत्रं अघमर्षणमंत्रं च प्रत्येकं त्रिरावर्त्य जलगंडूषं
नासिकाग्रे निधाय तज्जलं पूरकोच्छ्वासेनाभ्यंतरं प्रवेश्य देहस्थं सकलपापमादाय रेचकोच्छ्वासेन बहिर्निर्गतमिति विचिंत्य भूमावास्फाल्यमपजेत् तथा छंदोगपरिशि
ष्टे। कात्यायनः। करेणोद्धृत्य सलिलं प्राणमासाद्य तत्र वा। जपेदनायतासुर्वा त्रिः सकृद्वाघमर्षणम्। अनायतासुर्वेति वाशब्ददर्शनात् श्वासं संयम्यासंयम्यापीत्यर्थः।
योगियाज्ञवल्क्यः। द्रुपदां तु त्रिरावर्त्य तथा चैवाघमर्षणम्। सोपांशुप्रणवं वापि घ्राता आपो हि पापहाः। कोकिलो राजपुत्रस्तु द्रुपदाया ऋषिः स्मृतः। अनुष्टुप् च भवेच्छं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा·स· द आपश्चैवन्तु दैवतम्। सौत्रामण्यामवभृथे स्नाने च विनियोजनम्। तत्र द्रुपदामंत्रो यथा। ॐ द्रुपदादिवमुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणेवाज्य
१७ माप: शुन्धन्तु मैनसः। अस्यार्थः। आपो जलानि मां एनसः पापात् शुन्धन्तु शोधयन्तु पवित्रीकुर्वन्तु। अत्र दृष्टान्तमाह। यथा स्विन्नो धर्मोपहतः पुरुषः द्रुपदात् वृक्षमूलात् वृक्षमूलं प्रा
प्य मुमुचानः त्यक्तवान्। किं त्यक्तवान्। अर्थवशात् स्वेदमेव त्यक्तवान्। तथा मां आपः एनसः शुन्धन्तु। द्वितीयं दृष्टान्तमाह। यथा स्नातः पुरुषः मलात् कायमलात् शुद्धो भवति॥ त
था आपः एनसः पापात् मां शोधयन्तु। तृतीयं दृष्टान्तमाह। यथा आज्यं घृतं पवित्रेण प्रादेशपरिमितसाग्रकुशपत्रद्वयेन उत्पवनेन पूतं भवति। तथा मां आपः पवित्रीकुर्व
न्तु। द्रुपदं वृक्षमूलं ल्यब्लोपे पंचमी वक्तव्येति पंचमी। मुमुचान इति मुच्लृ मोक्षणे इत्यस्य लिटि लिटः कानज्वेति कानचो रूपम्। शुन्धन्त्विति। शुन्ध शुद्धौ इत्यस्य धातो रूप
म्। तदयमस्य मंत्रस्य वाक्यार्थः। यथा धर्मोपहतस्य वृक्षच्छायाश्रयणात् घर्मापगमो भवति। यथा वा स्नानात् देहमलापगमः स्यात्। यथा वा पवित्रेण आज्यं पवित्रीक्रियते। तथा
आपः मां पवित्रीकुर्वन्तु। द्रुपदामंत्रमाहात्म्यम् अघमर्षणमंत्रस्य च व्याख्या माहात्म्यं च। मध्याह्नस्नाने एव लिखितमिति तत्रैवानुसंधेयम् इति द्रुपदामंत्रव्याख्या। ततः
सूर्योपस्थानं॥ तत्र छन्दोगपरिशिष्टे कात्यायनः। उत्थायार्कं प्रतिप्रोहेत् त्रिकेणांजलिनांभसः। उच्चित्रमृग्द्वयेनैव उपतिष्ठेदनंतरम्। संध्याद्वयेपि उपस्थानमेवमाहुर्म
नीषिणः। मध्याह्न उदयेचैव विभ्राडादीश्च या जपेत्। तदसंयुक्तपार्ष्णिर्वा एकपाद् द्विपादपि। जपेत्कृतांजलिर्वापि ऊर्ध्ववाहुरथापि वा। यत्र स्यात्कृच्छ्रभूयस्त्वं श्रेय
सोपि मनीषिणः। भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयो ह्यवाप्यते। योगियाज्ञवल्क्यः। गायत्र्यास्तु जपं कृत्वा पूर्वं चैव यथा विधि। उपस्थानं स्वकैर्मंत्रैरादित्यस्य तु कारयेत्। उद्गु
त्यं चित्रं देवानामुद्वयं तमसः स्परि। तच्चक्षुर्देवहितं च एकचक्रेति वै ऋचा। उद्वयादित्रयं मंत्रं आकृष्णेनेति वै ऋचा। दृष्ट्वेतं सम्प्रयुञ्जीत शक्त्या न्यानि जपेत्सदा॥ अत्रिः
उदुत्यं जातवेदसमिति सप्तकृत्व आदित्योपस्थानाद् द्विहस्तकृतैः पूर्वकृतैश्च पापैर्मुच्यते ततो दुम्पमित्याद्येकेके वकंडिका सप्तधा पठितव्या। हारीतः। आकृष्णेनेत्यादि राम
नादित्यमुपतिष्ठन् सर्वत्र पूतात्मा भवति। व्यासः। उदुत्यं जातवेदसित्यृषिः प्रस्कण्व उच्यते। छंदो गायत्र्यमेवास्य सूर्यो दैवतमेव च। अग्निष्टोमे उपस्थाने विनियोगः। १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तथैव च। चित्रं देवेति मंत्रस्य ऋषिः कौत्स उदाहृतः। त्रिष्टुप्छन्दो दैवतं च सूर्योख्याः संप्रकीर्तितः। अग्निष्टोम उपस्थाने विनियोगस्तथैव च। तत्रोत्थाय गायत्र्या
जलांजलित्रयं प्रक्षिप्य उर्ध्वबाहुश्च सूर्यमुपतिष्ठेत्। उदुत्यमंत्रस्य प्रस्कण्व ऋषिर्गायत्री छंदः। सूर्यो देवता आग्निष्टोमे सूर्योपस्थाने विनियोगः। उदु त्यं जात
वसं देवं वहंति केतवः दृशे विश्वाय सूर्यम्॥ अस्यार्थः॥ उदुत्यं सूर्यं देवं केतवः रश्मयः उद्वहंति ऊर्ध्वं वहंति किंभूतं त्वां तवेदसं अग्निं तेजोमयमित्यर्थः
किमर्थं उद्वहंति दृशे दर्शनाय कस्य विश्वाय विश्वस्य। अयं वाक्यार्थः। तेजः स्वरूपं सूर्यं देवं विश्वप्रकाशनार्थं रश्मयः ऊर्ध्वं वहंतीति आदित्यस्वरूपो-
त्कीर्तनमिदम्। उदुत्यमित्यत्र मध्यवर्ती उकारोऽहोत्रार्थः विश्वायेति षष्ठीस्थाने चतुर्थी एवमेव रश्मय उद्वहंति कीदृशोऽसावादित्य इत्याकांक्षायामाह। चित्रं देवेति
मंत्रस्य कौत्स ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता अग्निष्टोमे सूर्योपस्थाने विनियोगः। ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृ
थिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च। अस्यार्थः। असौ सूर्य उदगात् उदितो भवति। किंभूतः मित्रस्य वरुणस्य अग्नेः त्रयाणां देवानां चक्षुः पुनः किंभू
तः देवानामनीकं मित्रादिव्यतिरिक्तानां मध्येऽन्येषामनीकं समूहं कथमुदगात् चित्रमाश्चर्यं यथा स्यात्। उदित्य च द्यावापृथिवी अंतरीक्षं स्वर्गमर्त्याका
शं आप्राः आपूरितवान् स्वरश्मिजालेनेति भावः। पुः किंभूतः जगतो जंगमस्य तस्थुषः स्थावरस्यात्मा स्थावरजंगमात्मकसकलसंसारमयोयमेव स्व
यं इत्यर्थः॥ आप्रा इति आङ्पूर्वस्य प्रा पूरणे इत्यस्य लङ् प्रथमैकवचनस्थाने तिङां तिङो भवंतीति मध्यमपुरुषैकवचनम्। तच्चक्षुः किंभूतमित्याकांक्षायां
पुनराह। तच्चक्षुरिति मंत्रस्य दध्यङ्ङाथर्वण ऋषिः सूर्यो देवता पुरउष्णिक् छंदो महावीराचने तयोः शांतिकरणे विनियोगः। ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चर
त्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्। अस्यार्थः। तत्पूर्वोक्तं चक्षुः किंभूतं देवहितं देवानां समीहितं पुनः किंभूतं शुक्रं शुक्लं निर्मलं
पुनः किंभूतं पुरस्तात्प्राच्यां दिशि उच्चरत् उद्यत् तदेतस्योपस्थानं कृत्वा वयं शरदः शतं शतवर्षाणि पश्येम तथा शरदः शतं जीवेम तथा शरदः शतं शृणु
प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात्। त्रु॰ पं॰ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याम तथा शरदः नथाशतं प्रब्रवाम अस्खलितवाग्भिः इयाभवेम तथा शतं शरदः अदीनाः स्याम नकस्याप्यग्रे दैन्यं कुर्याम यतो नतः शतवर्षोपर्यपि भूयश्च बहुकालं पश्येमेत्यादि
 योज्यं· उद्वयमिति मंत्रस्य प्रस्कण्व ऋषिः सूर्यो देवता ऽनुष्टुप्छंदः सौत्रामण्यवभृथे विनियोगः। ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरं। देवं देवत्रा सूर्य
 मगन्म ज्योतिरुत्तमम्। अस्यार्थः उदित्ययमुपसर्गः अगन्म इत्यनेनान्वयः पादेन सह संबध्यते वयं सूर्यं देवं उदगन्म उद्गच्छाम किंभूता वयं परिपश्यन्तः स
र्वतोभावेन पश्यन्तः किं पश्यन्तः स्वः स्वर्लोकं किंभूतं तमसः अप्रकाशस्वरूपाद्भूर्लोकादुत्तरं उन्नततरं ऊर्ध्वे स्थितमित्यर्थः। अपि किंभूता वयं देवत्राः देवेनसू
र्येण त्राणं येषां ते देवत्राः सूर्यं किंभूतं ज्योतिः स्वरूपं उत्तमं सर्वज्योतिषामग्न्यादीनामुत्कृष्टम्। अयमत्र वाक्यार्थः। वयं सूर्येण रक्षिताः भूर्लोकस्योपरि स्थि
तं पश्यन्तः तमतिक्रम्य परं ज्योतिः स्वरूपं स्वरूपे सूर्ये संगता भवाम इति सूर्यप्रार्थना। व्यत्ययो बहुलमिति बहुलवचनान्मकारस्य नकारः। गम्लृ धातोर्वर्तमाने ल
ङ् उत्तमपुरुषबहुवचनम्। बहुलं छंदसीति शपो लुक् बहुवचनान्मकारस्य नकारः। अगन्म इति सिद्धम्॥ इत्युद्वयंतमिति मंत्रव्याख्या। स्वयंभूरित्यस्य सूर्य ऋ
षिः सूर्यो देवता यजुषां छंदो नास्ति सूर्योपस्थाने विनियोगः। स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि। अस्यार्थः। हे आदित्यरश्मे त्वं स्वयंभूरसि केना
पि नकृतोपि स्वयमेव संभूतोसीत्यर्थः। किं च श्रेष्ठो रश्मिरसि श्रेष्ठः प्रशस्यतमः। अपि च वर्चोदा असि वर्चसस्तेजसस्त द्दासीत्यर्थः। यतस्त्वमेवंभूतः अतस्त्वं मेम
ह्यं वर्चो देहि ब्रह्मतेजो देहीत्यर्थः। आदित्यस्य सप्त रश्मयः तत्र चतुर्दिक्षु चत्वारः ऊर्ध्वाधोगामिनौ द्वौ मध्यवर्त्त्येकः स च हिरण्यगर्भः सर्वरश्मिश्रेष्ठः स स्वा
त्र संबोध्यते च अयं वाक्यार्थः। यस्य स्वयंभूः श्रेष्ठस्तेजोदाता च तेजोरश्मिः तेजोर्थे लोकैरभ्यर्थ्यते स परमेश्वरः सविता अस्माकं प्रीतो भवत्विति स्वयंभूरि
त्यादिभिरादित्यं स्तुत्वा वर्चो मे देहीति तस्मिन्प्रार्थना। स्वयंभूरिति मंत्रव्याख्या। इति सूर्योपस्थानमंत्रव्याख्या। गायत्रीं परिकीर्त्तयेत् इति सुतयो वेदस्य यां मात
रं गायत्र्याः शतधा जपेन दुरितं यस्याः समुच्छिद्यते॥ संतः संहृतमत्सरेण मनसा तस्याः प्रमाणं किल नाधर्मोध्यस्य हलायुधेन रचिता व्याख्येयमाकर्ण्यता
म्॥ अथ प्रातःसंध्यायां गायत्रीजपानुष्ठानादिकं गायत्रीमाहात्म्यं च। तत्र स्नानानंतरं बोधायनः। दर्भेष्वासीनः दर्भान्धारयमाणः प्राङ्मुखः सावित्रीं स।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तं कृत्वा आवर्तयेत्। शतकृत्वः परिमितं कृत्वा वा। शंखः। कुशशय्यामासीनः कुशोत्तरीयवान् कुशपवित्रपाणिः प्राङ्मुखः सूर्याभिमुखो वा अक्षमालामा
दाय देवताध्यायी मंत्रजपं कुर्यात्। सुवर्णमणिमुक्तास्फटिकरुद्राक्षपुत्रजीवकानामन्यतमेनाक्षमालिकां कुर्यात्। कुशग्रंथिकृतां वा हस्तांगुलिभिर्वा गणये
द् अंगुलिपर्वभिरित्यर्थः। योगियाज्ञवल्क्यः। प्रणवो भूर्भुवः स्वश्च अंगानि हृदयादयः। त्रिरावर्त्य ततः पश्चादार्षं छंदश्च दैवतम्। विनियोगस्तथा रूपं ध्यातव्यं
क्रमशस्तु वै। प्रणवो भूर्भुवः स्वश्च अंगानि हृदयादयः त्रिरावर्त्येति। प्रणवादि भूर्भुवः स्वरित्यक्षरचतुष्टयं हृदयशिरःशिखासु स्थानत्रयेष्वेकैकवारन्यासेन त्रि
रावृत्तिकं कर्तव्यमित्यर्थः। तथा श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा। श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता॥ आदित्यमंडलांतस्था ब्रह्मलोकगताथवा। अ
क्षसूत्रधरा देवी पद्मासनगता शुभा। तत्रावाह्य जपित्वा च नमस्कारैर्विसर्जयेत्। तथा सविता देवतास्य स्यान्मुखमग्निस्तदित्यृचा। विश्वामित्र ऋषिश्छंदो
गायत्र्यास्तु विधीयते योगियाज्ञवल्क्यः। विश्वस्य जगतो मित्रं विश्वामित्रः प्रजापतिः। विनियोगोपनयने प्राणायामे जपे तथा। प्राणायामेऽप्यशक्तस्तु विं
शत्यक्षरया गायत्र्या अंतर्भावो विद्यते न त्वतयैव चतुर्विंशत्यक्षरया प्राणायामविधानम्। व्यासः। विश्वामित्रऋषिश्छंदो गायत्री सविता तथा। देवता विनि
योगश्च गायत्र्या जप उच्यते। योगियाज्ञवल्क्यः। आवाह्य यजुषानेन ततो जोसीति विधानतः। एतद्यजुः पुरा प्रोक्तं देवैर्दृष्टं नकोसिभिः। विष्णुधर्मोत्तरे। कर्मेंद्रि
याणि पंचैव पंच बुद्धींद्रियाणि च। पंच पंचेंद्रियार्थाश्च भूतानां चैव पंचकम्। मनो बुद्धिस्तथैवात्मा अव्यक्तं च यदुत्तरम्। चतुर्विंशत्यथैतानि गायत्र्या अक्षराणि
त्वा। प्रणवं पुरुषं विद्धि सर्वगं पंचविंशकम्। योगियाज्ञवल्क्यः। अक्षराणां तु दैवत्यं संप्रवक्ष्याम्यतः परम्। आग्नेयं प्रथमं ज्ञेयं वायव्यं च द्वितीयकम्॥ तृतीयं सू
र्यदैवत्यं चतुर्थं वैद्युतं तथा। पंचमं यमदैवत्यं वारुणं षष्ठमुच्यते। बार्हस्पत्यं सप्तमं च पार्जन्यं चाष्टमं विदुः। ऐंद्रं तु नवमं ज्ञेयं गांधर्वं दशमं तथा॥ पौष्णमेकाद
शं प्रोक्तं मैत्रावरुणं द्वादशम्। त्वाष्ट्रं त्रयोदशं ज्ञेयं वासवं च चतुर्दशम्। मारुतं पंचदशकं सौम्यं षोडशकं स्मृतम्। सप्तदशं त्वांगिरसं वैश्वदेवमतः परम्॥ आश्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रा·स· तेचैकोनविंशंप्राजापत्यंचविंशकम्॥सर्वदेवमयंप्रोक्तमेकंविंशमतःपरम्।ऐंद्रंद्वाविंशकंप्रोक्तंत्रयोविंशंतुब्राह्मकम्।वैष्णवंचचतुर्विंशमेताह्यक्षरदे
१९ वताः।जप्यकालेतुसंचिन्त्यतास्तुसायुज्यतांव्रजेत्।नित्यजपविधौयोगियाज्ञवल्क्यः।ॐकारंपूर्वमुच्चार्यभूर्भुवःस्वस्ततःपरम्।गायत्रीप्रणवश्चान्तेजप्यए
वमुदाहृतम्।सूर्योपस्थानानंतरंनित्यजपविधौव्यासः।प्रणवव्याहृतियुक्तांगायत्रींचजपेत्ततः।समाहितमनास्तूष्णींमनसावापिचिंतयेत्।तथा।दशभिर्जन्म
जनितंशतेनचपुराकृतम्।त्रियुगंतुसहस्रेणगायत्रीहंतिदुष्कृतम्।प्रणवाद्यंतसंबद्धांभूर्भुवःस्वस्तथैवच।जप्यइतिकूर्मपुराणम्।ॐकारमादितःकृत्वाव्या
हृतीस्तदनंतरम्।ततोधीयीतसावित्रीमेकाग्रःश्रद्धयान्वितः।तथा।सहस्रपरमांदेवींशतमध्यांदशावराम्॥गायत्रींवैजपेन्नित्यंजपयज्ञः प्रकीर्तितः
गायत्र्याविश्वामित्रऋषिर्गायत्रीछंदःसवितादेवताउपनयनेविनियोगः।ॐभूर्भुवःस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि।धियोयोनःप्रचोदयात्॥अ
स्यार्थः।तस्यतंभर्गंतेजःधीमहिचिंतयामः।अत्रयद्यपितमितिभर्गविशेषणंनास्तितथापियतइति तच्छब्दप्रयोगाद्देवतमितितच्छब्दोलभ्यते।यथाच
गायत्रीव्याख्यानेएव।योगियाज्ञवल्क्यः।यच्छब्देनतुतच्छब्दोबोधव्यःसततंबुधैः।उदाहृतेतुयच्छब्देतच्छब्दःस्यादुदाहृतः।किंभूतस्यसवितुःसर्वभूतानां
प्रसवितुरित्यर्थः।तथाचयोगियाज्ञवल्क्यः।सवितासर्वभूतानांसर्वभावान्प्रसूयते।सवनात्पावनाच्चैवसवितातेनचोच्यते।पुनःकिंभूतस्यदेवस्यदीप्तिक्री
डायुक्तस्य।तथाचयोगियाज्ञवल्क्यः।दीप्यतेक्रीडतेयस्माद्रोचतेद्योततेदिवि।तस्माद्देवइतिप्रोक्तःस्तूयतेसर्वदैवतैरिति।किंभूतंभर्गंनोस्माकंधियोबुद्धीः
प्रचोदयात् प्रेरयतिधर्मार्थकाममोक्षेषुअस्माकंबुद्धीर्योभर्गोनियोजयतीत्यर्थः।तथाचयोगियाज्ञवल्क्यः।चिंतयामोवयंभर्गंधियोयोनःप्रचोदयात्।ध
र्मार्थकाममोक्षेषुबुद्धिवृत्तीःपुनःपुनःरिति।नदिहभर्गशब्देनबहुविधिमाहात्म्ययुक्तःसवितृमंडलवर्तीआदित्यदेवतास्वरूपःपुरुषउच्यते॥ त राम·
थाचयोगियाज्ञवल्क्यः।भजिःपाकेभवेद्धातुर्यस्मात्पाचयतेह्यसौ।भ्राजतेदीप्यतेयस्माज्जगच्चांतेहरत्यपि।कालाग्निरूपमास्थायसप्तार्चिःसप्तरश्मि १९

CC-0. In Public Domain. Digitization by eGangotri

भिःभ्राजतेतेनस्वरूपेणतस्माद्भर्गःसउच्यते।भेतिभासयतेलोकान्रेतिरंजयतेप्रजाः।गइत्यागच्छत्यजस्रं भरणाद्भर्गउच्यते।अयमेवतुभर्गोवहिरा।
काशेसूर्यमंडलांतस्थोपिसकलप्राणानांहृदयमध्येजीवभूतःप्रतिवसति।तथाच।योगियाज्ञवल्क्यः।आदित्यांतर्गतंयच्चज्योतिषांज्योतिरुत्तमम्।हृद
येसर्वभूतानांजीवरूपःसतिष्ठति।हृद्व्योम्नितपतिह्येषवाह्येसूर्यःसचांतरे।अग्नौवाधूमकेह्येषज्योतिश्चित्रतरंचयत्।हृद्याकाशेचयोजीवःसाधकैरु
पवर्ण्यते।सएवादित्यरूपेणवहिर्नभसिराजतइति।अत्रयद्यपिप्राणिनांहृदिजीवरूपतयायएवभर्गोस्तिइतिसएवाकाशेआदित्यमध्येपुरुषरूपतया
विद्यतेअतोअनयोर्भेदोनास्त्येव।तथापिधियोयोनःप्रचोदयादितिप्राणीनांबुद्धिप्रेरकोवाहृदयवर्त्तीभर्गएवचिंतनीयःअयंतुविशेषः।सूर्यमंडलवर्तिभर्गेण
सहाद्वैतेनएकीभूतश्चिंतनीयइति।पुनःकिंभूतंभर्गंवरेण्यंवरणीयंप्रार्थनीयंजन्ममृत्युदुःखादिनाशायध्यानेनोपासनीयमित्यर्थः।तथाचयोगियाज्ञवल्क्यः
।वरेण्यंवरणीयंचजन्मसंसारभीरुभिः।आदित्यांतर्गतंयच्चभर्गाख्यंवैमुमुक्षुभिः।जन्ममृत्युविनाशायदुःखस्यत्रिविधस्यच।ध्यानेनपुरुषोयस्तुद्रष्टव्यःसूर्यमंड
लइति।पुनःकिंभूतोभर्गःभूर्भुवःस्वरिति।भूर्लोकांतरिक्षलोकस्वर्लोकस्वरूपोपिसएवादित्यदेवतात्मकोभर्गइत्यर्थः।तथाचभविष्यपुराणम्।वासुदेव
उवाच प्रत्यक्षदेवतासूर्योजगच्चक्षुर्दिवाकरः।तस्मादभ्यधिकाकाचिद्देवतानास्तिशाश्वतम्।यस्मादिदंजगज्जातंलयंयास्यतियत्रच।कृतादिलक्षणःका
लोमृत्युःसाक्षाद्दिवाकरः।ग्रहनक्षत्रयोगाश्चराशयःकरणानिच।आदित्यावसवोरुद्राआश्विनौवायवोऽनलः।शक्रःप्रजापतिःसर्वोभूर्भुवःस्वर्दिशस्त
था।तथात्रैलोक्यमिदमादित्यदेवतायाविवर्त्ततइति।योगियाज्ञवल्क्यः।हिरण्मयंडलंदीप्तंतपोज्ञानसमुद्भवम्।एकंद्वादशधाभिन्नमदितिस्तमजीजनत्।
तस्माद्दीतुत्थितोमेरुरुधिरात्सप्तसिंधवः।पर्वताश्चजरायूश्चनद्योधमनिसंततः।द्यौश्चापिपृथिवीचेतिकपालेद्वेव्यवस्थिते।मध्येंतरिक्षमभवत्त्रैलोक्यस्ये
वसंभवः।एतेखंडकपालेद्वेअपांमध्येव्यवस्थिते।एकंधात्रीसमभवद्द्वितीयंनंदनंवनम्।जन्मध्याद्यःशिशुर्जातोमार्तंडःसवितानुसः।इस्थचराचरात्मकत्रैलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा·स· कमेव भर्गस्वरूपं तस्माद्भर्गात् पृथग्भूतं किंचिदपि न संभवतीति भर्गमाहात्म्यमेवं व्याहृतित्रयसमेतगायत्र्याः प्रतिपादितम्॥ अत्र च ॐकाररहितब्रह्मोच्चा
२० रणे प्रत्यवायदर्शनादादावन्ते च॥ ॐकारप्रयोगः। तथाह मनुः॥ ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यत इति॥ अस्यास्तु व्या
हृतित्रययुक्तगायत्र्या अयं वाक्यार्थः॥ सवितुर्देवस्य भर्गाख्यपरब्रह्मस्वरूपं तेजः चिंतनार्थं मम हृत्पद्ममध्यस्थितेनैव भर्गाख्यतेजसा प्रेर्यमाणस्तद्देव
भर्गाख्यं भूर्लोकान्तरिक्षलोकादिब्रह्मांडोदरवर्ती सचराचरत्रैलोक्यस्वरूपं मम हृदयमध्ये बाह्ये च सूर्यमंडलमध्यवर्ति तेजसा सह एकीभूतं परंब्रह्मज्यो
तिरहमिति चिंतयन् जपं कुर्यादिति। इति जपगायत्रीव्याख्या। तदेवं स्वरूपाया गायत्र्याः सम्यगर्थज्ञानपूर्वकजपमात्रेण कथं महापातकोपपातकान्यन्या
नि च सप्तजन्मकृतानि पापानि न नाशमुपयास्यंति। एतस्याः सम्यगर्थचिंतनेन वा कथमपवर्गसिद्धिर्भविष्यतीति तथा चास्यास्तद्बहुविधमाहात्म्योपवर्ण
नेन नानामुनिवचनानि। तत्र गायत्रीस्वरूपव्याख्याने मनुः॥ अकारं चाप्युकारं च मकारं च प्रजापतिः। वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च॥ त्रिभ्य एव तु वेदेभ्य
स्त्रिपादमदूदुहत्। तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥ एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम्। संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते॥ यो
गियाज्ञवल्क्यः॥ तपसा सुसमिद्धस्य आदिसर्गे स्वयंभुवः। ॐकारपूर्वा गायत्री निर्जगाम ततो मुखात्॥ कूर्मपुराणे। पुराकल्पे समुत्पन्ना भूर्भुवः स्वः सनात
नाः। महाव्याहृतयस्तिस्रः सर्वासुरनिबर्हणाः॥ प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः। सत्त्वं रजस्तमस्तिस्रः क्रमाद्व्याहृतयो मताः॥ मनुयमबृहद्विष्ण
वः। ॐकारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः। त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम्॥ कूर्मपुराणे। ॐकारस्तत्पदं ब्रह्म सावित्री स्यात्तदक्षरम्। एष
मंत्रो महायोगः सारात्सार उदाहृतः। छंदोगपरिशिष्टे सर्वेषां वेदानां गुह्योपनिषत्सारभूतं ततो गायत्री। योगियाज्ञवल्क्यकूर्मपुराणयोः॥ गायत्रीं चैव वे राम·
दांश्च तुलया समतोलयत्। वेदा एकत्र सांगास्तु गायत्री चैकतः स्मृता। योगियाज्ञवल्क्यः। सारभूतास्तु वेदानां गुह्योपनिषदो मताः॥ ताभ्यः सारस्तु गा २०

CC-0. In Public Domain. Digitization by eGangotri

यत्रीतिस्रो व्याहृतयस्ततः।तथा गायत्र्याः पदमर्द्धं च ऋचोर्द्धमृचमेव वा।ब्रह्महत्यासुरापानं सुवर्णस्तेयमेव च।गुरुदाराभिगमनं जप्येनैव पुनाति सा।वृहद्
यमः।गायत्र्याः पदमर्धं च ऋचमर्धर्चमेव वा।ब्रह्महत्यासुरापानं गुरुदाराभिगामिनम्।यच्चान्यद्दुष्कृतं किंचित् सर्वमेव पुनाति च।इत्याह वैवस्वतो यमः
तथाॐकारपूर्विकास्तिस्रः सावित्रीं यश्च विंदति।चरितब्रह्मचर्यश्च स वै श्रोत्रिय उच्यते।अग्निपुराणे।दशसाहस्रजप्येन निष्कामः पुरुषो यदि।वि
धिना नियतो ध्यायेत्स प्राप्नोति परमं पदम्।तथा यज्ञदानरतो विद्वान् सांगवेदस्य पाठकः।गायत्रीध्यानपूतस्य कलां नार्हंति षोडशीम्।योगियाज्ञवल्क्यः
।एतया ज्ञातया सर्वं वाङ्मयं विदितं भवेत्।उपासितं भवेत्तेन विश्वं भुवनसप्तकम्।अज्ञात्वा चैव गायत्रीं ब्राह्मण्यादेव हीयते।अपवादेन संयुक्तो भवेच्छ्रु
तिनिदर्शनम्।कूर्मपुराणे।गायत्री वेदजननी गायत्री लोकपावनी।न गायत्र्याः परं जप्यमेतद्विज्ञाय मुच्यते।मनुयमविष्णुधर्मोत्तराणि।सावित्रीमात्रसारो
पि वरं विप्रः सुयंत्रितः।नायंत्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी।वृहद्विष्णुः।एतयर्चा विसंयुक्तः काले च क्रियया स्वया।विप्रक्षत्रियविड्योनिर्गर्हणां या
ति साधुषु।योगियाज्ञवल्क्यः।सावित्र्याश्चैव मंत्रार्थं ज्ञात्वा चैव यथार्थतः।तस्याः पदुक्तं चोपास्य ब्रह्मभूयाय कल्पते।कूर्मपुराणे।योऽधीतेऽहन्यहन्येतां गायत्रीं वेद
मातरम्।विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम्।योगियाज्ञवल्क्यः।वेदाः सांगास्तु चत्वारोऽधीताः सर्वे च वाङ्मयाः।गायत्रीं यो न जानाति वृथा तस्य परिश्र
मः।गायत्रीमात्रसंतुष्टः श्रेयान्विप्रः सुयंत्रितः।नायंत्रितस्त्रिवेदी च सर्वाशी सर्वविक्रयी।मनुयोगियाज्ञवल्क्यौ।एतयर्चा विसंयुक्तः कालेन क्रियया स्वया।वि
प्रक्षत्रियविड्योनिर्गर्हणां याति साधुषु।अथ गायत्रीजपफलम्।तत्र वृहद्यमः।गायत्रीजप्यनिरतो गच्छत्यमृततां द्विजः।अग्निपुराणे।गायत्रीं जपते यस्तु
द्वे काले ब्राह्मणः सदा।अर्थी प्रतिग्रही चापि स गच्छेत्परमां गतिम्।गायत्रीं जपते यस्तु कल्यमुत्थाय यो द्विजः।स न लिप्येत पापेन पद्मपत्रमिवांभसा।अग्नि
पुराणे।एवं गायत्रीं प्रति ब्रह्मवाक्यम्।कुर्वतो पीह पापानि ये त्वां ध्यायंति पावनि।उभे संध्ये न तेषां हि विद्यते देवि पातकम्।गायत्र्याश्च जपान्नास्ति दिवि चेह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा॰स॰ चपावनम्। तथा। यथा कथंचिज्जप्यैषा देवी परमपावनी। सर्वकामप्रदा प्रोक्ता पृथक्कर्मसु निष्ठिता। वसिष्ठः। विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपनित्यकम्॥
२१ सदापि पापकर्माणमेनो न प्रतियुज्यते। यथाग्निर्वायुनो द्धूतो हविषा चैव दीप्यते। एवं जप्यपरो नित्यं मंत्रयुक्तः सदा द्विजः। विष्णुधर्मोत्तरे। गायत्रीं जपते
यस्तु कल्यमुत्थाय यो द्विजः। लिप्यते न स पापेन पद्मपत्रमिवांभसा। कामकामो लभेत्कामं गतिकामस्तु सद्गतिम्। अकामस्तदवाप्नोति तद्विष्णोः परमं पदम्
। दृहद्यमः। न तथा वेदजप्येन पापं निर्दहति द्विजः। यथा सावित्रीजप्येन सर्वपापैः प्रमुच्यते। विष्णुधर्मोत्तरे। गायत्रीं जपते यस्तु द्वौ कालौ ब्राह्मणः सदा। स्याण
जन्त्सविज्ञेयः पंक्तिपावनपावनः। मनुर्बृहद्विष्णू। यो धीते हन्यहन्येतां त्रीणि पर्वाण्यतंद्रितः। स ब्रह्मपरमभ्येति वायुभूतः खमूर्तिमान्। दृहद्यमः। सहस्रपर
मों देवीं शतमध्यां दशोत्तराम्। गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशिनीम्। व्यासगोभिलीयौ। दशभिर्जन्मजनितं शतेन तु पुराकृतम्। त्रियुगं तु सहस्रेण
गायत्री हन्ति पातकम्। अग्निपुराणे। दशाकृत्वः प्रजप्ता सा रात्र्यान्हा यत्कृतं लघु। तत्पापं प्रणुदत्याशु नात्र कार्या विचारणा। शतजप्ता तु सा देवी सर्वपापप्र
णाशिनी। सहस्रजप्ता सा देवी महापातकनाशिनी। लक्षजप्येन सा प्येवं सप्तजन्मोत्थपातकम्। कोटिजप्येन विप्रर्षे यदिच्छति तदाप्नुयात्। यक्षवि
द्याधरत्वं वा गंधर्वत्वमथापि वा। देवत्वमथ विप्रत्वं भूयो निहतकंटकम्। योगियाज्ञवल्क्यः। सप्तावृत्त्या पुनन्देहं दशभिः प्रापयेद्दिवम्। विंशावृत्त्या तु सा देवी नयते
चेश्वरालयम्। अष्टोत्तरशतं जप्ता तारयेज्जन्मसागरात्। जीर्णेन पश्यति प्रायो जन्ममृत्युहि दारुणम्। गायत्रीं च जपेन्नित्यं सोमवद्ब्राह्मणो हि सः। अत्रिबृहद्व्यासस्तवौ॥
सहस्रपरमां देवीं शतमध्यां दशापराम्। गायत्रीं च जपन्विप्रो न पापेन विलिप्यते। कूर्मपुराणे। सहस्रपरमां देवीं शतमध्यां दशापराम्। गायत्रीं वै जपन्नित्यं जपय
ज्ञः प्रकीर्तितः। योगियाज्ञवल्क्यः। दशविंशशतं वापि गायत्र्याः परिवर्तयेत्। अहोरात्रकृतात्तैव पापात्संमुच्यते हि सः। तथा सोंकारा चतुरोष्टत्वा विज्ञेया साशताक्षरा राम॰
प्तता ह्यरासमावर्त्य सर्ववेदफलं लभेत्। गोभिलीये। कदाचिदपि नो विद्वान्गायत्रीमुदके जपेत्। गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्थाय तां जपेत् ॥ यज्ञलेसु २१

CC-0. In Public Domain. Digitization by eGangotri

क्वस्त्रेण स्थाने चैवार्द्रवाससा।जपो होमस्तथा दानं तत्सर्वं निष्फलं भवेत्।गृहेषु तत्समं जप्यं गोष्ठे शतगुणं भवेत्।नद्यां शतसहस्रं तु अनन्तं चाग्निसन्निधौ
।योगियाज्ञवल्क्यः।आर्षं छन्दश्च दैवत्यं विनियोगं च ब्राह्मणम्।शिरसाक्षरदैवत्यमाह्वानं च विसर्जनम्।ध्यानं जपप्रयोगं च येषु कर्मसु यादृशः।ज्ञातव्य
ब्राह्मणे पर्यन्ताद्ब्राह्मण्यं येन वै भवेत्।योगियाज्ञवल्क्यः॥एषा हि त्रिपदा देवी शब्दब्रह्ममयी शुभा।तपसा महता दृष्टा विश्वामित्रेण धीमता।अथाक्षमाल
।तत्र व्यासः।हिरण्यगर्भमणिभिर्जप्तं शतगुणं भवेत्।सहस्रगुणमिन्द्राक्षै रुद्राक्षैरयुतं भवेत्।नियुतं प्रयुतं वा स्यात्पद्माक्षैर्नात्र संशयः।पुत्रजीवकजप्यस्य
परिसंख्या न विद्यते।योगियाज्ञवल्क्यः।स्फटिकेन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः॥अक्षमाला तु कर्तव्या प्रशस्ता ह्युत्तरोत्तरा॥कौशपाधान्तु भवेद्धि द्विरतं।
त्राचात्र संख्यया।अभावे चाक्षमालानां कुशग्रन्थ्याथ पाणिना॥अथ काम्यजपः॥तत्रात्रिवृद्धापस्तम्बौ।सावित्र्यास्तु परं नास्ति शोधनं सर्वकर्मणाम्॥
वसिष्ठः॥सावित्र्यास्तु परं नास्ति पावनं परमं स्मृतम्॥योगियाज्ञवल्क्यः।गोघ्नः पितृघ्नो मातृघ्नो भ्रूणहा गुरुतल्पगः॥ब्राह्मणः स्वर्णहारी च यश्च
विप्रः सुरां पिबेत्।गायत्र्याः शतसाहस्रात्पूतो भवति मानवः।तथा वायुभक्षो दिवा तिष्ठन्रात्रिं नीत्वाप्सु सूर्यदृक्।जप्त्वा सहस्रं गायत्र्याः शुद्धो ब्रह्मवधा
दृते।गौतमः।महापातकचतुष्टयरहस्यप्रायश्चित्ते गायत्रीसहस्रं कृत्वा आवर्तयेत्।पुनीते हि चात्मानम्।अत्र यद्यपि यावन्ति सहस्राणि जप्त्वा निस्फु
टतरं न प्रतिपादितानि तथापि रहस्यकृतस्यापि महापातकस्य गौरवान्मासैकं यावत्प्रतिदिनमेकसहस्रमेवं कृत्वा जप्तव्यम्॥एतच्च मनुविष्णुया
ज्ञवल्क्यैः॥स्फुटमेवाभिहितम्।तथा।सहस्रकृत्वस्त्वभ्यस्य बहिरेव त्रिकं द्विजः।महतोप्येनसो मासात्त्वचेवाहिर्विमुच्यते।पूतो भवतीत्यधिकारे
विष्णुः।दशसाहस्रजप्येन सुवर्णस्तेयकर्मकृत्।योगियाज्ञवल्क्यः।संवत्सरं वा षण्मासान्यो जपेद्धि धिया द्विजः।सोर्चितः सर्वतः कामान् प्राप्नुयान्नात्र
संशयः।तथा।स्नायाच्छुतेन गायत्र्याः शतमन्त्रजले जपेत्।आपः शतेन पीत्वा च सर्वपापैः प्रमुच्यते।शतमन्तर्जले जपेद्दिने जले निमग्नेन शतं गायत्रीजप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रा.स
२२

स्यकर्त्तुमशक्यत्वात्कुंठमात्रमुदकमवनीर्यजपेद्दिनिवोधव्यम।गद्यव्यासः।सावित्र्यावातिलान्गैनोहुत्वासर्वपापेभ्यः प्रमुच्यते।विष्णुधर्मोत्तराग्निपु
राणयोः।हुत्वाचव रद्वादेवीसर्वकामवरप्रदा।गायत्र्याचतिलैर्होमःसर्वपातकनाशनः।वृद्धापस्तंवः।सर्वेषामेवपापानांसंकरेसमुपस्थिते।दशसाहस्र
मभ्यस्तागायत्रीपावनंपरम्।योगियाज्ञवल्क्यः।सर्वेषामेवपापानांसंकरेसमुपस्थिते।दशसाहस्रिकाभ्यासोगायत्र्याःशोधनंपरम्।वसिष्ठः।सह
स्रपरमांदेवींशतमध्यांदशावराम्।शुद्धकामःप्रयुंजीतसर्वपापेष्वपिस्थितः।शंखः।सावित्र्यावातिलैर्गैनोजुहुयात्तेनैवपावनंकुर्यात्॥एवमत्रिःस
र्वपापमपनुदति ।कूर्मपुराणे।उच्छिष्टोयद्य नाचांतश्चांडालादीन्स्पृशेद्द्विजः।प्रमादाद्वैजपेत्स्नात्वागायत्र्यष्टसहस्रकम्।पाराशरः अज्ञानाद्भुंज
तेविप्राःसूतकेमृतकेपिवा।प्रायश्चित्तंकथंतेषां सर्ववर्णेविनिर्दिशेत्।गायत्र्यष्टसहस्रेणब्राह्मणःशूद्रसूतके।वैश्यःपंचशतेनैवक्षत्रियोद्विशतेन
वैशातातपः।अज्ञानाद्भुंजतेविप्राःसूतकेमृतकेपिवा।गायत्र्यष्टसहस्रेणशुध्यंतिशूद्रसूतके।वैश्यस्यसूतकेभुक्त्वागायत्र्याःपंचभिःशतैः।सूतकेक्ष
त्रियस्यैवद्विशतीजपउच्यते।ब्रह्मचारिणउद्दिश्यकूर्मपुराणे।सप्तरात्रमकृत्वातुभैक्ष्यचर्याग्निपूजनम्।रेतसश्चसमुत्सर्गेप्रायश्चित्तंसमाचरेत्।ॐकारपू
र्विकास्तिस्रोमहाव्याहृतिभिःसदा।संवत्सरंतुजुहूनानक्तंभिक्षाशनंशुचिः।सावित्रींवजपेच्चैवनित्यंक्रोधविवर्जितः।नदीतीरेषुतीर्थेषुतस्मात्पापाद्वि
मुच्यते॥ब्रह्मचारिधर्मेसंवर्त्तः।संध्यांचेवाग्निकार्यंचप्रमादान्नकरोतियः।गायत्र्यष्टसहस्रंतुजपेत्स्नात्वासमाहितः।कूर्मपुराणेब्रह्मचार्यधिकरणे॥
अकृत्वासमिदाधानंशुचिस्नात्वासमाहितः।गायत्र्यष्टसहस्रस्यजप्यंकृत्वाविशुध्यति आपस्तंवः।ब्राह्मणस्ययदोच्छिष्टमश्नात्यज्ञानतोद्विजः।अहोरात्रं
तुगायत्र्याजपंकृत्वाविशुध्यति।वृद्धापस्तंवः।यस्तुभुंक्तेएकपंक्त्यांकुत्सितानामजानताम्।गायत्र्यष्टसहस्रेणपंचगव्येनशुध्यति॥संवर्त्तः॥स्नानेतुयदि राम
संप्राप्तेभक्ष्येद्यदिवापिवेत्॥गायत्र्यष्टसहस्रंतुजपेत्स्नात्वासमाहितः॥स्नानेतुयदिसंप्राप्तेइतिस्नानापहारिणीयपापेयद्यस्नात्वाभुंक्तेपिवतिवा २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानदेव प्रायश्चित्तं वोधव्यम्। कूर्मपुराणे। अनुगम्येच्छया शूद्रं प्रेतीभूतं द्विजोत्तमः। गायत्र्यष्टसहस्रस्य जपं कुर्यान्नदीषु च। तथा। बुद्धिपूर्वं त्वभ्युदिते जप्ये
दन्तर्जले द्विजः। गायत्र्यष्टसहस्रं तु त्र्यहं चोपवसेद्व्रती। सूर्याभ्युदितविनिर्मुक्तप्रायश्चित्ताधिकारे। गाय त्र्यष्टसहस्रं तु जपन्नुपवसेद्दिनम्॥ अत्रिः। अ
शान्तमनसः शान्तमनसो वा गायत्र्या अतुशोधनाच्छुद्धिरिति। संवर्त्तः। ब्रह्मचारिधर्मे। अनाचान्तः पिवेद्यस्तु यदि वा भक्षयेद्द्विजः। श्रान्तानित्रीणि गायत्र्याः
प्रायश्चित्तं विशोधनम्। कूर्मपुराणे। प्रायश्चित्तप्रकरणे। स्नात्वा जपेद्वा गायत्रीश्वतुरष्टौ द्विजोत्तमः। शंखलिखितौ। स्वैरिण्यां वृषल्यां च प्रसूतो गायत्री
मेव जपेत्। योगियाज्ञवल्क्यविश्वामित्रौ॥ यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र तिलैर्होमो गायत्र्या जप एव वा रहस्यप्रायश्चित्ते वृद्धयमः
॥ अपेयं पीत्वा अभक्ष्यं भक्षयित्वा उपस्पृश्य ऋषभैणत्रीन्प्राणायामान्कृत्वा गायत्र्यष्टशतमावर्त्य तस्मात्पापात्पूतो भवति। ऋषभस्य परमेष्ठी ऋषि

स्त्रिष्टुप्छन्दो यज्ञपुरुषो देवता पवनयागे यजमानानुवाचने विनियोगः मन्त्रो यथा। ॐ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य। त्रिधा
बद्धो वृषभो रोरवीति महो देवो मर्त्यो आविवेश। अस्यार्थः। वृषभो रोरवीति अत्यर्थं शब्दं करोति अस्य वृषस्य चत्वारि शृंगाणि ब्रह्म उद्गातृ होतृ अध्वर्यवः त
एवास्य चत्वारि शृंगाणि अस्य च त्रयः पादाः ऋग्यजुः साम एव वेदत्रयमस्य पादत्रयं द्वे शीर्षे हविर्द्धानमहावीरौ अस्य सप्तहस्तासः होता मैत्रावरुणब्राह्म
णाच्छंसी ग्रावस्तुतः अच्छावाकनेष्टापोतारः एते सप्त होतारः एवास्य क्रियाकारित्वेन हस्ताः सप्तइत्यर्थः। पुनः किं भूतो वृषभः त्रिधा बद्धः प्रातः सवनमध्यान्ह
सवन तृतीयसवनैस्त्रिभिर्बद्धः अयमेव महान् रमणीयो देवो द्युतिमान् वृषभो धर्मस्वरूपो महादेवः हिरण्यगर्भमूर्त्या मनुष्यान् मर्त्यान् आविवेश प्रविष्टवा
न्। धर्मस्वरूपतया मनुष्येषु प्रविष्ट इत्यर्थः। शृंगा इति। इ शब्दो वहुवचनं सुपामिति लोपः। हस्तास इति आज्जसेरसुगित्यसुगागमः। इति वृषभमन्त्रव्या
ख्या। अथ जपयत्नः। तत्र मनुवृहद्विष्णुवसिष्ठयोगियाज्ञवल्क्याः॥ विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जः। ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः। सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्। जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मै
त्रो ब्राह्मण उच्यते॥ अत्रिः। आसहस्रात्परस्तावाः। विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः। तथा चाप्यायते धे
नुरत्नैरमृतसंभवैः। एवं जप्यैश्च होमैश्च पुनराप्यायते द्विजः। तथा। नास्ति मातृसमा छाया न जप्यात्पावनं परम्। जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते। तथा। विद्यातपोभ्यां संयुक्तो ब्राह्मणो जपनित्यकः। सततं प्रतिगृह्णानः पापं दहति तेजसा। अथ सामान्यजपे
कर्तव्यता। तत्र योगियाज्ञवल्क्यः। जपस्याहं विधिं वक्ष्ये यथा कार्यो विधानतः। न चंक्रमन्न प्रहसन्न पार्श्वमवलोकयन्। नापाश्रितो न जल्पंश्च न प्रावृतशिरा
स्तथा। न पदा पादमाक्रम्य न चैव हि तथा करौ। नैवंविधं जपं कुर्यान्न च संश्रावयन् जपेत्। तिष्ठंश्चेद्वीक्षमाणोऽर्कमासीनः प्राङ्मुखो जपेत्। प्रागग्रेषु कुशेष्वे
वमासीनश्चासने जपेत्। तथा। जपस्त्वेवं हि कर्तव्य एकाग्रमनसापि च। धारयेन्मनसा मंत्रान्न जिह्वोष्ठौ विचालयेत् न कंपयेच्छिरो ग्रीवां दंतान्नैव प्रकाश
येत्। यक्षराक्षसभूतानि सिद्धविद्याधरास्तथा। हरंति प्रसभं यस्मात्तस्माद्गुप्तं समाचरेत्। अग्निपुराणे। नोच्चैर्जपं बुधः कुर्यान्नीचैः कुर्यादतंद्रितः। समाहितमना
स्तूष्णीं मनसा वापि चिंतयेत्। अत्रिः। ध्वनिर्घोषविकारेण निःश्वासोपांशुलक्षणः। निर्विकारेण वक्त्रेण मनसा मानसः स्मृतः। योगियाज्ञवल्क्यः। अग्न्यागारे जलां
ते वा जपेद्देवालयेपि वा। पुण्यतीर्थे गवां गोष्ठे सिद्धक्षेत्रे यथा गृहे। गृहे त्वेकगुणं जप्यं नद्यां तु त्रिगुणं स्मृतम्। गवां गोष्ठे दशगुणं अग्न्यागारे शताधिकम्। सिद्धक्षेत्रे
षु तीर्थेषु देवतायाश्च सन्निधौ। सहस्रं शतकोटीनामनंतं शिवसन्निधौ। नोक्लिन्नवासाः स्थलगो जपादीनाचरेद्बुधः। वस्त्रनिश्च्योतितं प्रेता अवधार्य पिबंति हि॥
व्रतादनेनार्द्रवासा नैकवासाः समाचरेत्। न जीर्णेन न नीलेन परिक्लिन्नेन वा जपेत्। तथा। यदि वाग्यमलोपः स्याज्जपादिषु कथंचन। व्याहरेद्वैष्णवं मंत्रं स्मरे।
द्वा विष्णुमव्ययम्। तथा। शाकपावकभैक्ष्याणि पयो मूलफलानि च। दधि सर्पिरथो ह्यापः प्रशस्तं ह्युत्तरोत्तरम्॥ न चेद्धा ह्युपवासश्च भैक्ष्यं नक्तमयाचितम्। एता

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यत्रक्षतान्याहुः शस्तानि जपकर्मणि। एतेष्वेव च शक्तस्य यागश्चेद्द्विजोत्तमः। अभिवाद्य ततो विप्रं योगक्षेमं च कीर्तयेत्। स्त्रीशूद्रपतितांश्चैव पाखंडांश्च रज
स्वलाम्। स्नानकाले न संभाषेज्जपहोमादिके तथा। तूष्णीमेवावगाहेत चांडालपतितेक्षणात्। दृष्ट्वा चैतान् शुचिः किंचिद्दाचामेत्स यतोपि सन्। तेषां संभाषणं कृत्वा
स्नानमेव समाचरेत्। आचम्य प्रयतो नित्यं जपेदशुचिदर्शने। सौरान्मंत्रान्यथोत्साहं पावमानीश्च शक्तितः। तथा प्रायो जपेद्दिमनु हन्तौ। प्रणवव्याहृतिभ्यां तु
स्वाहांते होमकर्मणि। प्रतिकूले प्रयोक्तव्यं हकारान्ताभिचारिके। इति गायत्रीमाहात्म्ये जपानुष्ठानानि। गायत्रीजपानंतरं सूर्यस्यावर्तनमिति हारीतवचनाद्द
क्षिणावर्तेन परिवर्त्योपवसेत। ततो स्य सूर्य ऋषिः सूर्यो देवता यजुषां छन्दो नास्ति सूर्योपस्थाने विनियोगः। मंत्रो यथा। सूर्यस्यावृतमन्वावर्ते। अस्यार्थः। सूर्य
स्यावृतं आवर्त्तनम् अहमन्वावर्ते यथा सूर्य आवर्त्तमानो जगत्प्रदक्षिणां करोति तथा अहमपि तं देवमनुकुर्वन्पृथिव्याः प्रदक्षिणकरणफलं प्राप्नोमीति वाक्यार्थः। तत्रो
न्वावर्त्त इत्युत्तमपुरुषैकवचनादहमित्यध्याह्रियते। इत्यावसथिकमहाधर्माधिकृतहलायुधकृतौ ब्राह्मणसर्वस्वे प्रातःसंध्यामंत्रव्याख्या॥ हलायुधेन गौडेंद्रम
हाधर्माधिकारिणा। मध्यान्हस्नानमंत्राणां व्याकारोऽयं विभाव्यते। अथ मध्यान्हस्ना नम्। तत्र स्नानप्रशंसायां योगियाज्ञवल्क्यः। स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृ
त्युदिता नृणाम्। तस्मात्स्नानं प्रकुर्वीत श्रीपुष्ट्यारोग्यवर्द्धनम्। दक्षः। मनःप्रसादजननं रूपसौभाग्यवर्द्धनम्। शोकदुःस्वप्नहरणं तेजसानंदनं तथा॥ अग्निपुराणे।
नैर्मल्यं भावशुद्धिश्च विना स्नानं न जायते। तस्मान्मनोविशुध्यर्थं स्नानमादौ विधीयते। विष्णुः। याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति। नित्यस्नानेन पूयंते ये
पि पापकृतो जनाः। जाबालिः। अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्रहात्। रहस्याचरितात्पापान्मुच्यते स्नानमाचरन्। अंगीराः। गवाह्निकं देवपूजा वेदाभ्या
सः सरित्प्लवः। नाशयंत्याशु पापानि महापातकजान्यपि। योगियाग्यवल्क्यः। सवनत्रयं यः कुर्यान्नित्यमेवमतंद्रितः। स व्रजेत्परमं स्थानं ब्रह्मणः सदनं द्विजः। त
था। स्नानं दानं तपो ध्यानं पितृदेवार्चनं तथा। पावनानि मनुष्याणां दुष्कृतस्येह कर्मणाम्। जाबालिः। यदैव कुरुते स्नानं विशुद्धेनांतरात्मना। तनैव सर्वमाप्नोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधियत्क्रियाफलम्।तथा।प्रकर्तुमसमर्थश्चेज्जुहोतियजतिक्रियाः।स्नानदानजपेध्यानेरात्मानंशोधयेद्विजः।अष्टधादिवसविभागेस्नानवेलायांद्रष्टः च
तुर्थेचतथाभागेस्नानार्थंमृदमाहरेत्।तिल पुष्पकुशादीश्चस्नानंचाकृत्रिमेजले।व्यासः।स्नानंमध्यंदिनेकुर्यात्सुजीर्णेन्नेनिरामयः।नभुक्त्वासंकृतोरोगीना
तानेभसिनाकुले।अग्निपुराणे॥नदीदेवनिखातेषुतडागेषुसरःसुच।स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच।निपानादुद्धृतंपुण्यंततःप्रस्रवणोदकम्।त
तोपिसारसंपुण्यंततोनादेयमुच्यते।तीर्थतोयंततःपुण्यंगांगंतोयंततोधिकम्।विष्णुपुराणे।कूपेषूद्धृततोयेनस्नानंकुर्वीतवाभुवि॥स्नापितोद्धृततोयेनप
दिवाभुव्यसंभवे।विष्णुः।स्नायान्नप्रस्रवणोदेवखातसरोवरेषुच।उद्धृताद्भूमिष्टमुदकंपुण्यंस्थावराच्छ्रुतगुणंतस्मान्नादेयंतस्मादपिसाधुपरिगृहीतंसर्वतएव
गांगम्।पराशरः।पंचस्नानानिदिव्यानिकीर्तितानिमहर्षिभिः।तानीहसंप्रवक्ष्यामियथावदनुपूर्वशः।आग्नेयंवारुणंब्राह्मंवायव्यंदिव्यमेवच।आग्नेयंभ
स्मास्नानमवगाहंतुवारुणम्।आपोहिष्ठेतिचब्राह्मंवायव्यंगोरजःस्मृतम्।यत्तुसातपवर्षेणदिव्यंस्नानंतदुच्यते।एतेर्हिश्रद्धयास्नानंगंगास्नानेनतत्समं
म्।तत्रमलस्नानांगशौचसंकल्पग्रहणानंतरंतीर्थावाहनम्।तत्रपद्मपुराणमत्स्यपुराणयोः।अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंसमाचरेत्।तीर्थंप्रकल्पयेद्विद्वा
न्मूलमंत्रेणमंत्रवित्।ॐनमोनारायणायेतिमूलमंत्रउदाहृतः।तथापद्मपुराणम्।विष्णोःपादप्रसूतासिवैष्णवीविष्णुपूजिता।पाहिनस्त्वेनसस्तस्मादा
जन्ममरणांतिकात्।तिस्रःकोट्योऽर्धकोटीचतीर्थानांवायुरब्रवीत्।दिविभुव्यन्तरिक्षेचतानितेसंतिजाह्नवि।नंदिनीत्येवतेनामदेवेषुनलिनीतिच।दक्षापृथ्वी
चसुभगाविश्वकायाशिवासिता।विद्याधरीसुप्रसन्नातथालोकप्रसादिनी।क्षेमाचजाह्नवीचैवशांताशांतिप्रदायिनी।एतानिपुण्यनामानिस्नानकालेतुयःप
ठेत्।भवेत्सन्निहितातत्रगंगात्रिपथगामिनी।ततोमृत्तिकालंभनम्।तत्रमेधातिथि ऋषिर्गायत्रीछंदोविष्णुर्देवताअग्निष्टोमसवितृहोमेविनियोगः।मं
त्रोयथा।ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्।समूढमस्यपांसुरेस्वाहा।अस्यार्थः।विष्णुर्भगवानिदंजगद्विचक्रमेविक्रांतवानाक्रांतवानित्यर्थः।कथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माक्रांतवान् त्रेधा त्रिःप्रकारं पदं निदधे निहितवान् पृथिव्यामाकाशे स्वर्गे च पदत्रयमर्पितवानित्यर्थः। अस्य विष्णोस्तत्पदं पांसुरे समूढं पांसुरे पांसुयु
क्ते अर्थवशात्पृथिव्यामित्यर्थः। समूढं सम्यग्निविष्टम्। अयमत्र वाक्यार्थः। विष्णुर्भूम्याकाशस्वर्गात्मकं जगत्पदेन विक्रांतवान् तदस्य पदं भूम्यां सम्यक्त्वं वद्धमाए
तेन विष्णुपादसंबंधेन भूमिरतीव शुद्धेति भूस्तुतिः। इत्थं स्तुत्वा भूमिर्मा पावयत्विति। अभिप्रेत्य मृद्ग्रहणमनेन क्रियते। इदं विष्णुमंत्रव्याख्या॥ ततो मृत्तिका
लंभनानंतरं गोमयालंभनं कुर्यात्। तत्र कर्दमऋषिरनुष्टुप्छंदः श्रीर्देवता लक्ष्मीकाम्ये गोमयालंभने विनियोगः। मंत्रो यथा। ॐ गंधद्वारां दुराधर्षां नित्य
पुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्। अस्यार्थः। तां श्रियम्। गोमये उपह्वये आह्वयामि तां कां गंधद्वारां गंधो गुणस्तस्यानुभवद्वार
भूतां पृथिवीस्वरूपां यतः पृथिव्यां श्रितस्त्वेव गंधोनुभूयते। पुनः किंभूतां दुराधर्षां अनाधृष्यां तेजोविशेषशालिनीं नित्यपुष्टां सदा स्फीतां करीषिणीं क
रीषं गोमयं तद्युक्तां गोमयस्थामित्यर्थः। सर्वभूतानामीश्वरीं सर्वभूतानां सर्वप्राणिनां पंचमहाभूतानां वा अत्र च पक्षे पंचानामेव भूतानां शब्दस्पर्शरूपरसगंधा
नां गुणाः पृथिव्यामाश्रिता इति सर्वेभ्यो भूतेभ्यः पृथिव्या अधिकत्वादीश्वरीत्वम्। इह गोमये लक्ष्मीमावाह्य गोमयग्रहणं कुर्वतो मम लक्ष्मीर्भवत्विति वाक्यार्थः॥
गंधद्वारां मंत्रव्याख्या ततो गोमयालंभनानंतरं करौ संपुटीकृत्योरुं हि मंत्रेणोदकाभिमंत्रणम्। उरुं। हीत्यस्य मंत्रस्य वारुणस्य माहात्म्ये हारीतः। यत्किंचिद्वा
रुणं मंत्रमन्तर्जले ऋष्यादिकं स्मृत्वा जपेत्सर्वपापेभ्यः समुच्यते। अस्य मंत्रस्य शुनःशेप ऋषिस्त्रिष्टुप्छंदो वरुणो देवता अवभृथे यजमानवाचने विनियोगः
। मंत्रो यथा। उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित्। अस्यार्थः। हि यस्माज्जलस्य राजा वरु
णः सूर्याय सूर्यस्य पंथां पंथानमुरुं विस्तीर्णं चकार कृतवान्। तस्मात्तं पंथानमहं अन्वेतवै अनुगच्छामीत्यर्थः। उपस्थानेरेय एव वरुणस्तमेव पंथानमपदे आका
शे सूर्यस्य पादा पादानां रश्मीनां प्रतिधातवे अर्पणाय अकः कृतवान् उत अपि च स एव वरुणः हृदयाविधश्चित् पिशुनस्यापि अवक्ता नियामकः जलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घा·स· राजाधिश्चुनस्यापि नियामकोवरुणः आक्राशेसूर्यस्यरश्मीनामर्पणायविस्तीर्णपंथानंकृतवानतंपंथानमनुगच्छामीतियाच्चावाक्यार्थः।अत्रसूर्यायेतिष
२५ ष्ठ्यर्थेचतुर्थी।पंथामितिपंथानमित्यत्रनकारलोपेन।अन्वेतवेइणगतावित्येतस्मात्तुमर्थेतवेकेन्यत्वनइतितवेप्रत्ययःकृन्मेजंतइत्यव्ययत्वम्॥
पादाइतिषष्ठीबहुवचनस्थानेछांदसत्वादकारः।प्रतिधानवइतिप्रतिपूर्वाद्धातेःस्तिनतिगमिमसीत्यादिसूत्रेणबहुलवचनाद्भावेतुन।अकइतिकरणेलुङ्।
स्थानेप्रथमैकवचनंत्विप्रत्ययःबहुलंछंदसीतिबहुलवचनादिण्नभवतिधातोर्गुणःरपरत्वंहल्ङ्यादिनाविभक्तिलोपःमंत्रेघसह्वरणेत्यादिनाच्लेर्लोपःह्र
दयाविधइतिहृदयंविध्यतीतिक्विपूनहिवृतीत्यादिनादीर्घत्वंइत्युरुःंहिमंत्रव्याख्या।इतिजलोपस्थानानंतरंजलावतरणम्।शुनःशेपऋषिर्वरुणोदेव
तायजुष्ट्वाच्छन्दोनास्ति अवभृथेयजमानस्यजलावतरणेविनियोगः।मंत्रोयथा।ॐनमोवरुणायाभिष्ठितोवरुणस्यपाशः।अस्यार्थः।नमोवरुणाया
भिष्ठितः आक्रांतोवरुणस्यपाशः।अयंवाक्यार्थः वरुणस्यजलरूपपाशाक्रमणेनयाअप्रीतिर्जायतेसावरुणनमस्कारेणापनीयतेतेनवरुणनमस्का
रपूर्वकंजलावतरणंक्रियते।नमोवरुणायेतिमंत्रव्याख्या।ततोजलेऽवतीर्यतीर्थावाहनंकुर्यात्।मंत्रोयथा पञ्चवीयःइ ॐइमंमेगंगेयमुनेसरस्वतिशतद्रु
स्तोमंसचतापरुष्ण्या।आसिक्न्यामरुद्वृधेवितस्तयार्जिकीयेशृणुह्याशिषोमया अस्यार्थः।हेगंगेहेयमुनेहेसरस्वतिहेशतद्रुहेमरुद्वृधेहेर्जिकीये
मयाममआशिषः आशंसाःशृणुहिमदीयाःशंसांशृणुतेत्यर्थः।काशावाशंसा इत्याकांक्षायांमेमदर्थंमदीयस्नाननिमित्तंपरुष्ण्या।आसिक्न्यावितस्तयासह
इमंस्तोमंसचतसमवेताभवतअस्मिन्पुरोवर्तिस्नानजलसमूहेसमवेताः सन्निहिताभवतेत्यर्थः इतीममेगंगेमंत्रव्याख्या।इतितीर्थावाहनानंतरंमंत्र
त्रयेणजलांजलित्रयंशिरसिदद्यात्।तत्रप्रजापतिऋषिस्त्रिवसानापंक्तिश्छंदःआपोदेवतामार्जनेविनियोगः।मंत्रोयथा।ॐइदमापःप्रवहतयः रम·
त्किंचिदुरितंमयि।यद्वाहमभिदुद्रोहयद्वाशेपउतानृतम्।अस्यार्थः।हेआपःयूयमिदंप्रवहतप्रकर्षेणवहतअपनयतेत्यर्थः।इदंयत्किंचिमयिमत्स्थि २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं दुरितं पापं यद्दूषयदहमभि दुद्रोह परद्रोहरूपं पापं कृतवान् अस्मि यद्वा शेपे पराक्रोशरूपं पापं कृतवान् अस्मीत्यर्थः । उत अपि अर्थः अनृतं मृषावादरूपं पापं वे ।
त्यर्थः । अयं वाक्यार्थः । मम यत्किंचिन्मनःकायवचनैरर्जितं पापं तदनेन स्नानेनापनयेत्यप्सु प्रार्थना । इत्याद्यस्तंवीयेदमापमंत्रव्याख्या । तथा प्रजापतिऋषिस्त्रि
ष्टुप्छंदः आपोदेवता दीक्षायां यजमानस्नाने विनियोगः द्वितीयो मंत्रो यथा । ॐ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु । विश्वं हि रिप्रं प्रवहंति देवीः
अस्यार्थः आपः अस्मान् शुंधयंतु शोधयंतु किंभूता आपः मातरः जगतां जनन्यः अपि च नो अस्मान् घृतेन पुनंतु जलस्य वीर्येण पवित्रीकुर्वंतु किंभूता
घृतप्वः घृतं जलस्य वीर्यं तेन पुनंतीति घृतप्वः आपः । यथा श्रुतिः । घृतं हि अपां परमं तेजः तद्द्वेसु प्रभं घृतेन पुनन्तीति । हि यस्माद्देवीः स्तुत्यादि विषया आपः रि
प्रं पापं प्रवहंति अपनयंति किंभूतं विश्वं सर्वं अयं वाक्यार्थः । आपो जगन्मातरः घृतं च तासां वीर्यं सकलपापक्षयकारिणश्च ताः । इति जलस्तुतिः । ता अस्मा
न्पुनंत्विति याञ्ञा । अत्र शुंधयंत्विति शुंधशुद्धाविन्यस्य णयंतस्य प्रयोगः । घृतप्व इति घृतेन पुनंतीति क्विंतम् । रिप्रमिति पापनाशिनी भवन इति स्तुतिः देवीरिति
वा छंदसीति विकल्पेन पूर्वसवर्णादेशाद्रूपमित्यापो अस्मान्मंत्रव्याख्या । अथ द्रुपदादिवेति तृतीयो मंत्रः । पूर्वं प्रातःस्नान एव व्याख्यात इति तत्रैव तस्येक्र ।
ष्यादिकमप्यैसंधेयमिति । ततः पुनरपि दक्षिणावर्त्तेन जलमावर्त्तनम् । तत्र दध्यङ्ङाथर्वण ऋषिर्गायत्रीछंदः आपो देवता शांतिकर्मणि विनियोगः मंत्रो य
था । ॐ शन्नो देवीरभिष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः । अस्यार्थः । देवी आपः नोस्माकं शं कल्याणं भवंतु किंभूताः देवीः दिव्यस्तुत्यादिविषयाः किम
र्थं अभिष्टये उपचयार्थं पीतये पापाय किं च पुनरभिस्रवंतु अस्मादभिमुखं स्रवंतु किमर्थं शंयोः कल्याणसंयोगाय । अयं वाक्यार्थः । आपो अस्माकमुपचयोपपा
नाय कल्याणसंयोगाय च भवंतु इत्याशंसा । तत्र देवीरिति प्रथमाबहुवचने छंदसीति विकल्पेन पूर्वसवर्णादेशः । अभिष्टय इति ष्टै स्त्यै शब्दसंघातयोरिति अ
स्माद्धातोरभिपूर्वात्क्विपि कृते आदेच उपदेशेऽशितीत्यात्वं तस्य पः पूर्वस्येति योगविभागात्संप्रसारणं तादर्थ्ये चतुर्थी । शंयोरिति शं प्रा व्दारूकं शंभ्यांवभयुक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रा·स·
२६

नुतयसइतिमत्वर्थीययसन्त्ययेकृते शंयुरिति पदं ततो बहुलं छंदसीति चतुर्थ्यर्थे षष्ठ्येकवचनं यद्वा तु शं नैश्वरपूजायामस्य विनियोगस्तद्वा अभिषेकेऽपेक्षित
फलावाप्तये यद्वाश्राद्धे तदापीतये पितॄणां पानायेति विशेषो बोधव्यः इति शब्दो देवी व्याख्या। ततो जले निमज्ज्य मंत्रं पठित्वा त्रिर्निमज्यात्। तत्र प्रजापतिऋषिर्य
ज्ञो देवता यजुषां छंदो नास्ति ऋजीकर्कुंभमार्जने विनियोगः। मंत्रो यथा। ॐ अवभृथ निचुंपुण निचेरुरसि निचुंपुणः। अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्यकृ
तं पुरुराव्णो देव रिषस्पाहि। अस्यार्थः हे अवभृथ यज्ञसमाप्तिस्नान किंभूत निचुंपुण ब्रह्महादिभिरपि नीचैराधार्यमाणं पुनातीति निचुंपुणः त्वं निचेरुरसि त्वं नी
चानपि रौषि आह्वय क्षिपावनायेत्यर्थः। निचुंपुण असि भवसि असीति मध्यमपुरुषदर्शनात् त्वमित्यध्याह्रियते। अहमेनः पापं अवयासिषं अहं अपनीतवा
नस्मि अत्रापि अवयासिषमित्यस्यावइत्यनेन ल??हितेन संबंधः उत्तमपुरुषदर्शनादहमित्यध्याहार्यं किंभूतमेनः देवकृतं देवविषये कृतं वैश्वदेवाकरणेन कृ
तं कैरवासिषं देवैर्यज्ञेह विर्दानेन तोषितैः किंच मर्त्यकृतमप्येनः अवयासिषं अत्रापि अवेत्यानेन तरस्थितेन संबद्धः। मर्त्या मनुष्याः तद्विषये कृतं आतिथ्यपू
जनेन कृतमित्यर्थः कैरवयासिषं मर्त्यैर्मनुष्यैर्यज्ञकर्मणि ऋत्विग्भूतैः तत्र वैश्वदेवातिथिपूजनयोरुपादानं पंचमहायज्ञोपलक्षणार्थम्। यतोऽहं नित्यहोमादि
करणेन पापमपनीतवान् अतो मां पाहि रक्ष अत्रापि पाहीति मध्यमपुरुषान्तक्रियापदस्य साकांक्षत्वान्मामिति कर्मपदं त्वमिति कर्तृपदं चाध्याहरणीयं कस्मात्पा
हि हे देव रिषः हिंसारूपात्पापात् पुनः किंभूतात् पुरुराव्णः बहुपापफलप्रदानात्मकात् अत्रापि देव हिंसारूपात् पापापनोदनं पंचमहायज्ञोपनेय पापोपलक्ष
णार्थम्। अयमत्र वाक्यार्थः यतो मया वैश्वदेवाद्यकरणपापं ऋत्विजः सहकारिणः कृत्वा देवतोषणे अपनीतं अतो हे अवभृथ त्वं मां देव हिंसारूपात्पापाद्रक्ष
। यत्तु केनचिदुक्तमवभृथस्नानमुपांशुकरणीयं तत्र च उपांशु अवभृथेषु चरंतीति श्रुतिः प्रमाणत्वेन लिखितं तत्तुच्छं अवभृथस्नानमवभृथेष्टेर्भिन्न एम
त्वात्। अन्यथा च श्रुत्या अवभृथेष्टेरेवोपांशुकरणं प्रतिपाद्यते न त्ववभृथस्नानस्यापि। पुरुराव्ण इति। पुरुपदं बहुवाचकम्। राद्दाने इत्यस्माद्धातो राततोर्मनिन् २६

CC-0. In Public Domain. Digitization by eGangotri

क्तनिब्वनिपश्चेतिवनिप्प्रत्ययः पुरुपूर्वात् पंचम्यारूपम्। देवरिषइति रिष हिंसायामित्यस्माद्देवपूर्वात् क्विपि कृते पंचम्यारूपम्। इत्यवभृथनिचुंपुणमं
त्रव्याख्या। ततः समुद्रेते इति मंत्रेणाचमनं। अस्य मंत्रस्य व्याख्यादिकमुपरि लिखितमिति तत्रैवानुसंधेयमिति। इत्याचमनानंतरं इमं मे गंगे इति मंत्रेण पुनस्तीर्था
वाहनं॥ अस्यापि मंत्रव्याख्यादिकमत्रैव मध्याह्नस्नाने लिखितत्वादिह पुनर्न लिखितमिति तत्रैवानुसंधेयमिति। तीर्थावाहनानंतरं आपो हिष्ठेति तिसृ-
भिर्मार्जनं कुर्यात्। अस्यापि मंत्रस्य व्याख्यादिकं प्रातःस्नाने एव लिखितत्वादिह न लिखितमिति तत्रैवानुसंधेयमिति। एतन्मार्जनानंतरं चित्पतिर्मेत्यादिमंत्र
त्रयेण पुनर्मार्जनं। तत्र प्रजापतिर्ऋषिः प्रजापतिर्देवता यजुश्छंदो नास्ति यजमानपावने विनियोगः। मंत्रो यथा। चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मास
विता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्। अस्यार्थः। चित्पतिः प्रजापतिर्मा मां पुनातु पवित्रं क
करोतु केन पवित्रेण कुशेन किंभूतेन अच्छिद्रेण अखंडितेन तन केवलं कुशेन सूर्यस्य रश्मिभिरपि मां पुनातु हे पवित्रपते पवित्राणां पते तेन प्रसन्नस्य मम किंभूतस्य
पवित्रपूतस्य पवित्राणां पूतत्वजनकत्वेन तत्पूतस्य मम पवित्रपूतस्य पवित्रैः पवित्रीकृतस्य यत्कामो यदभिलषितं तच्छकेयं प्राप्नुयाम् किं तदभिलषितं पु
नेजलेन आत्मानं पावयामीत्यभिलषितम्। अयं वाक्यार्थः। प्रजापतिना कुशसूर्यरश्मिभ्यां पावितस्य मम जलेनात्मानं पावयामीति यदभिलषितं तत्राहं शक्तो
भवामि। चित्पतिशब्देन प्रजापतिरुच्यते तत्र प्रजापतिर्वै चित्पतिरिति श्रुतिः प्रमाणम्। द्वितीयमंत्रस्य प्रजापतिर्ऋषिर्यजुर्वाक्पतिर्देवता यजमानपावने वि
नियोगः। द्वितीयमंत्रो यथा। ॐ वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्। अत्र वा-
क्पतिर्बृहस्पतिः अपरा सकलैव — चित्पतिव्याख्यानेन तुल्या। तथा तृतीयमंत्रस्य प्रजापतिर्ऋषिर्यजुः सविता देवता यजमानपावने विनियोगः। तृतीयो
मंत्रो यथा ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्। अस्यार्थः। तत्र देवः स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रा·स· विनासूर्यः अपरं सर्वं चित्तशुद्धिर्मंत्रेणतुल्यम्॥ इति चित्तशुद्धिर्मंत्रे त्रयव्याख्या। ततो जले निमग्नीभूयाघमर्षणमंत्रं त्रिरावर्तयेत्। तत्राघमर्षणमंत्रमाहात्म्ये
२७ बौधायनः। ऋतं च सत्यं चेत्यघमर्षणं मंत्रं त्रिरंतर्जले पठेत्सर्वपापात्प्रमुच्यते। व्यासः। ऋतं चेति जपन्स्नात्वापमामरणांतिकम्। मनोवाक्कायजं सर्वं
मर्षयेदघमर्षणमिति। योगी याज्ञवल्क्यः। हन्यालोकानिमांस्त्रीन्हि त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत्॥ तथाश्वमेधः क्रतुराट्
सर्वपापापनोदनः॥ तथाघमर्षणं सूक्तं सर्वपापप्रणाशनम्। हारीतः। पातकोपपातकमहापातकानि पापानां सन्ति पात्रे॥ अघमर्षणमेव जपेत्। अ
थातः सर्वदेवपवित्राणि भवंतीत्यधिकारे हृदिह्रिंसुः स्नानं सर्वैश्चाते मंत्रैर्मार्जनं प्राणसंयमः अघमर्षणसूक्तेन अश्वमेधावभृत्समम्। जले निमग्नः प्रा
णान्संयम्य त्रिरावर्त्याघमर्षणसूक्तेन स्नायादित्यर्थः। शंखः। नास्त्यघमर्षणात्परमंतर्जले। गौतमः। अंतर्जले वा घमर्षणं त्रिरावर्तयेत्सर्वपापेभ्यो हि मु
च्यते॥ अत्रिः। अपि चाप्सु निमज्जित्वा त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथं तथैतन्मनुरब्रवीत्। वसिष्ठः। अपि चाप्सु निमज्जानः त्रिः पठेदघमर्षण
म्। यथाश्वमेधावभृथं तादृशं मनुरब्रवीत्। वृद्धापस्तंबः। अपि चाप्सु निमज्जित्वा त्रिः पठेदघमर्षणम्। यथाश्वमेधयज्ञो हि मनुस्तादृशमाहतत् बौधायनः।
त्रिरात्रं चाप्युपवसेत्त्रिरन्होभ्युपयन्नरः। प्राणानात्मनि संयम्य त्रिः पठेदघमर्षणम्। यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत्। योगि याज्ञवल्क्यः। त्र्यहेचो
पवसेद्यस्तु त्रिरन्होभ्युपयन्नरः। मुच्यते पातकैः सर्वैर्जप्त्वा त्रिरघमर्षणम्। रहस्ये वृहद्यमः। मातरं भगिनीं गत्वा मातृष्वसां स्नुषां सखीम्। अगम्यागमनं कृत्वा अ
घमर्षणेनांतर्जले त्रिरावर्त्येन तस्मात्पापान्मुक्तो भवति तथा। अथ गुरुतल्पगमनं कृत्वाघमर्षणं अंतर्जले त्रिरावर्त्येन देतस्मान्मुक्तो भवति। अत्र पापगौरवमाकलय्य
संयतेन मनसा मासैकं यावत्सम्यक् जले निमग्नीभूयाघमर्षणसूक्तं त्रिरावर्त्य स्नातव्यम्। तथा च लघुयमः। महापातककर्तारश्चत्वारो वा विशेषतः। अग्निं प्रविश्य राम
शुध्यंति स्नात्वा वा महति क्रतौ। रहस्यकरणे चैवमासमभ्यस्य पौरुषम्। अघमर्षणसूक्तं वा शुध्येतांतर्जले स्थितः। वृहद्यमः। अत्र ब्रह्महत्यां कृत्वा प्राचीमुदीचीं दिशं २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपनिष्क्रम्य प्रभूतेनेंधनेनाग्निं प्रज्वाल्याघमर्षणेनाष्टसहस्रमावर्त्य जुहुयात्तस्मात्पापात्पूतो भवति। हारीतः। अघमर्षणमंत्रं जले त्रिरावर्तयित्वा मुच्यते ब्रह्महत्या
याः। अत्रिः। स्त्रियां वै श्याभिगमने अघमर्षणं त्रिरावृत्त्यांतर्जले शुध्यति। बृहद्यापस्तंबः। अकार्यकरणे चैव तथाभक्ष्यस्य भक्षणे। अघमर्षणसूक्तेन पीत्वापः
शुध्यते द्विजः। अत्रिः। अपेयं पीत्वाऽभक्ष्यं भक्षयित्वाऽकार्यं कृत्वाघमर्षणेनापः पीत्वा शुध्येत्। वसिष्ठः। मनसा पापं कृत्वाऽघमर्षणं पठेत्। बृहद्याप
स्तंबः। स्त्रियागमने वैश्यागमने चैव तापसीं त्रिरावर्त्य शुद्धः स्यात् शूद्रागमने त्वघमर्षणम्। तापसीमिति ऋचमित्यर्थः। शंखलिखितौ ब्रह्महा त्रिरात्रोपो
षितोंतर्जलेऽघमर्षणं त्रिर्जपेत्। योगियाज्ञवल्क्यः। त्रिरात्रो पोषितो जप्त्वा ब्रह्महा त्वघमर्षणम्। अंतर्जले विशुध्येत दत्वा गां तु पयस्विनीम्। स्वकाशनविषये
बौधायनः। तीर्थं गत्वा स्नात्वा ततः शुचिर्वा शुद्धकां तेस्थंडिलमुद्धृत्य सकृत्क्लिन्नेन वाससा सकृत्पूर्णेन पाणिना आदित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयी
तः प्रातः शतं मध्याह्ने शतमपराह्णे शतमपरिमितं वोदितेषु नक्षत्रेषु प्रसृतयावकं प्राश्नीयात् ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात्मु
च्यते द्वादशाहाद्भ्रूणहत्यां गुरुतल्पगमनं सुवर्णस्तेयं सुरापानमिति वर्जयित्वा एकविंशतिमं चानुजपति सर्वं तरति सर्वं जयति सर्वक्रतुमाप्नोति सर्वेषु तीर्थेषु स्नातो
भवति सर्वेषु देवेषु चीर्णव्रतो भवति सर्ववेदैर्ज्ञातो भवति आचतुर्थात्पंक्तिं युनक्ति कर्माणि चास्य सिद्ध्यंति। बौधायनः बृहद्धि स्मृत्येतेनाघमर्षणेन सुरापः पूतो भवति
अघमर्षणानुवृत्तो योगियाज्ञवल्क्यः। तत्त्वभूतान्यपिंडस्थित्युत्पत्तिप्रलयास्तथा। सूक्तेस्मिन्वाहृतमेतान्स्व मंत्रार्थ एष वै। तथा। अघमर्षणसूक्तस्य ऋषिरेवा
घमर्षणः अनुष्टुप्च भवेच्छंदो भाववृत्तं च दैवतं। अश्वमेधावभृथके विनियोगोस्य कल्पितः। सर्वपापापनोदार्थं स्मृतिकारैरुदाहृतम्। व्यासः। अघमर्षणस्यार्षः छं
दोनुष्टुप्तथैव च। देवता भाववृत्तं च हयमेधः प्रकीर्तितः। अत्र अघमर्षण ऋषिर्भाववृत्तो देवतानुष्टुप्छंदः। अश्वमेधावभृथे विनियोगः। मंत्रो यथा। ॐ ऋ
तं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा॰स॰ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्। दिवंचपृथिवींचांतरिक्षमथोस्वः। अस्याघमर्षणमंत्रस्यव्याख्यायांहृदिप्रकंपोजायतेयतःसर्ववेदसारभूतोयंमंत्रगु
२८ प्रख्यायंमंत्रःअस्यपदपाठमात्रंचनास्तिब्राह्मणनिरुक्तादिकमप्यस्यनास्तीत्यस्मैतदीयव्याख्यानुगुणकमप्युपायमप्राप्ययदेतस्यस्वकपोलमात्रेणव्या।
ख्यानमाचरणीयं तदतिसाहसंयोगियाज्ञवल्क्येनतुतत्त्वभूतान्श्चपिंडस्थित्युत्पत्तिप्रलयंतथा। सूक्तेस्मिन्व्याहृतमेतत्तुस्वमंत्रार्थएषवेदइतिवचनात्सृष्टि·
स्थितिप्रलयार्थतास्यप्रतिपादिता। पुराणमहाभारतादिष्वपितुसृष्टिस्थितिप्रलयप्रतिपादकार्थकग्रंथभागाःसमासक्तेतेषांचश्रवणेनोत्कीर्तनेनमहालफ
लाभःप्रतिपादितः। तदेतत्सकलंवेदसारभूतस्यसृष्टिस्थितिप्रलयप्रतिपादिताघमर्षणमंत्रस्यस्नानादिनातत्रप्राग्लिखितेनानाश्रुतिवचनप्रतिपादि
तंफलभूयस्त्वमुपपन्नमेव। किंचास्मिन्ग्रंथेसकलकर्मकांडोचितमंत्रव्याख्यानस्यैवमुख्यता। द्यद्यस्यसारभूतमंत्रस्यैवव्याख्यानेनक्रियतेतदास्यग्रंथस्यसां
गतानभवेदित्येतादृशदोषभयमात्रेणस्वप्रतिभानुरूपमेतन्मंत्रव्याख्यानमेतत्क्रियते। यथा। ऋतंचसत्यंचेतिपरंमंत्रब्रह्मउच्यते। तथाचश्रुतिःस्मतिश्चाऋ
तमेकाक्षरंब्रह्म। सत्यंज्ञानमनंतंब्रह्मेति। अत्रासीदित्यध्याहार्यंतेनायमर्थःऋतंचसत्यंपरंब्रह्मआसीत् एतेनमहाप्रलयावस्थाप्रतिपादितामहाप्रलयस
मयेकेवलंपरंब्रह्ममात्रमासीदित्यर्थःततस्तदनंतरंमहाप्रलयावस्थायामेवरात्रिरजायतरात्रिःसमुत्पन्नासकलमंधकारमयमासीदित्यर्थः। तथा
चस्मृतिः। आसीदिदंतमोभूतमप्रज्ञातमलक्षणमिति। ततस्तदनंतरंमहाप्रलयावसानेसृष्ट्यारंभसमयेतपसःअदृष्टात्पुनःकिंभूतात्अभीद्धात्सर्वतो
भावेनदीप्तात्सर्वतोगततृप्तिलब्धादित्यर्थः। एवंभूतादहृष्टात् पुनःसमुद्रोअजायतकिंभूतःसमुद्रःअर्णवःअर्णःपानीयंतद्यस्यास्तीत्यर्णवःपानीय
युक्तःसमुद्रःसंजायतइत्यर्थः। प्रथमतःसकलसृष्टिनिमित्तजलराशिरुत्पन्नइत्यर्थः। तथाचस्मृतिः। अपएवससर्जादौतासुवीर्यमवासृजदिति। ततस्तद एम॰
नंतरंसमुद्रादर्णवाद्धानास्रष्टाअजायतकिंभूतोधातामिषतःप्रकटीभूतोविश्वस्यवशीप्रभुःमहाप्रलयेनविलुप्तस्यास्यत्रैलोक्यस्यनिर्माणेप्रभुरित्यर्थः २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सधाता यथापूर्वं यथाक्रमेण सूर्याचंद्रमसाव कल्पयत् निर्मितवान् किंभूतौ सूर्याचन्द्रमसौ अहोरात्राणि विदधत अहोरात्राणि कुर्वाणौ सूर्य एव दि
वसं करोति चंद्र एव रात्रिं करोतीति ततः सूर्यचंद्रयोरुत्पत्त्यनंतरं संवत्सरोऽप्यजायत समुत्पन्नः सूर्यचन्द्रोत्पत्त्यनंतरमेव रात्रिदिवसविभागोऽभवत् रात्रि
दिवसविभागे सति संवत्सरव्यवस्था भवतीत्यर्थः । अथो अनंतरं दिवं च पृथिवीं च अंतरिक्षं च स्वः स्वर्ग एतान् लोकान् स एव धाता अकल्पयत् सृष्टवान् चराच
रात्मकसकललोकानेव स धाता सृष्टवानित्यर्थः तत्र स्वःशब्देन नक्षत्रलोकोपरिस्थः स्वर्गलोक उच्यते । दिवःशब्देन तदूर्ध्वस्थमहर्लोकादिलोकचतु
ष्टयं तदनेन मंत्रेण सृष्टिस्थितिप्रलयाः प्रतिपादिताः विदधत इति द्विवचने एकवचनम् । अर्णव इति अर्णशब्दादर्णसो लोपश्चेति वप्रत्ययः सकारलोप
श्च । इत्यघमर्षणमंत्रव्याख्या । ततोऽघमर्षणस्नानानंतरं पुनरंतर्जले निमग्नीभूय द्रुपदां त्रिरावर्त्य स्नायात् । तत्र द्रुपदामंत्रमाहात्म्ये बृहस्पतिः । द्रुपदा
नाम यो मंत्रो वेदे वाजसनेयके । अंतर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्यते । योगियाज्ञवल्क्यः । द्रुपदा नाम सा देवी यजुर्वेदे प्रतिष्ठिता । अंतर्जले त्रिरावर्त्य मुच्यते
ब्रह्महत्यया । हारीतः । पवित्रमसि द्रुपदादिवेति चाघमर्षणमंतर्जले त्रिरावर्तयित्वा मुच्यते ब्रह्महत्यया । बौधायनः । द्रुपदादिव मुमुचानेत्यृचा पू
तं त्रिरंतर्जले पठन् सर्वस्मात्पापात्प्रमुच्यते । पराशरः । आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि मानस्तेन शुध्येत द्रुपदां वा शतं जपेत् । योगियाज्ञवल्क्यः । आ
चांतः पुनराचामेन्मंत्रवत्स्नानभोजने । द्रुपदां वा त्रिरावर्त्य तथा चैवाघमर्षणम् । गायत्रीं वा त्रिरावर्त्य महाव्याहृतिभिः सह । सोपांशुप्रणवेनापि आपः
पीता ह्यघापहाः । तथा । कोकिलो राजपुत्रस्तु द्रुपदाया ऋषिः स्मृतः । अनुष्टुप् च भवेच्छंद आपश्चैव तु दैवतम् । सौत्रामण्यावभृथस्नाने च विनियोजनम् ।
अस्य मंत्रस्य व्याख्यादिकं प्रातःसंध्यायामेव लिखितं तत्रैवानुसंधेयमिति । तदनु अधिकपापनिवर्हणेच्छुरंतर्जले एव सप्रणवसव्याहृतिसहितसशि
रस्कगायत्र्या प्राणायामत्रयं कृत्वा स्नायात् । तथा सशिरस्कगायत्रीप्रकरणे शंखः । प्राणायामत्रयं कृत्वा स्नानकाले समाहितः । अहोरात्रकृतात्पापात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरणादेवमुच्यते।तथात्रिपदासावित्रीप्रकरणेबौधायनः।अपिवासावित्रीपच्छोऽर्द्धशस्ततःसमस्तांत्रिरंतर्जलेपठन्सर्वस्मात्पापात्प्रमुच्यते. पच्छइति।
पादशः पादेनपादेनेत्यर्थः एकैकपादेनगायत्र्याः पादत्रयंपठेदित्यर्थः ॐतत्सवितुर्वरेण्यमित्येकंपादं ॐभर्गोदेवस्यधीमहिइति द्वितीयं ॐधियोयोनःप्र
चोदयादितितृतीयम्।अर्धशइति अर्द्धार्द्धक्रमेणपूर्वार्द्धभागंपठित्वोत्तरार्द्धभागंपठेदित्यर्थः तत्र ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिइत्यर्धंप्रथ
मं ॐधियोयोनःप्रचोदयादित्यपरमर्द्धम्।ततःसमस्तांसकलांचतुर्विंशत्यक्षरात्मिकामेवैकवारेणपठेदित्यर्थः।अनेनक्रमेणवारत्रयंगायत्रीपाठः
पर्यवस्यतीति।तथाप्रणवव्याहृतिशिरःसहितगायत्र्यधिकारेविष्णुधर्मोत्तराग्निपुराणयोः।अंतर्जलेत्रिरावर्त्यगायत्रींप्रत्यहंतथा॥मुच्यतेपातकैः
सर्वैर्यदिनब्रह्महाभवेत्।तथा।अंतर्जलेव्यस्तसमस्तमहाव्याहृतिपाठपूर्वकस्नानेबौधायनः।अपिव्याहृतीर्व्यस्ताःसमस्ताश्चत्रिरंतर्जलेपठन्सर्वस्मा
त्पापात्प्रमुच्यते।तत्रव्यस्तसमस्तव्याहृतिर्यथा ॐभूः ॐभुवः ॐस्वः एतास्त्रिरावर्त्यस्नायात्।तथारहस्येदृहद्यमः॥अथचांडालादिकुलेभोज
कुलेष्वनिकुलेदांभिकाभिशस्तकुलेऽन्यस्मिन्वाअभोज्येपापकर्मणःप्रतिगृह्यक्षुधितोभुक्त्वावाग्रामात्प्राचीमुदीचींवादिशमभिनिष्क्रम्यपृथिव्यां
शुचौदेशेअप्स्वुपरिप्लवमानःतरत्समंदीजपति।ॐकारपूर्वाव्याहृतीर्वावर्तयेत्तस्मात्पापात्पूतोभवति।तत्रतरत्समंदीमंत्रस्यमाहात्म्येगौतमः।चतुर्ऋ
चंतरत्समंदीयमप्सुजपेदप्रतिग्राह्यंप्रतिजिघृक्षन्प्रतिगृह्यवाअभोज्यंबुभुक्षमाणःपृथिवीमावपेत्तदंतरारमणःउदकोपस्पर्शनाच्छुचिरेकेस्त्रीषु।
अस्यचअपत्सारअवत्सारऋषिर्गायत्रीछंदःसोमोदेवताआजेनेविनियोगः।मंत्रोयथा।ॐतरत्समंदीधावतिधारासुतस्यांधसः।तरत्समंदीधावति।उस्रा
वेदवसूनांमर्त्यस्यदेव्यवसः।तरत्समंदीधावति।ध्वस्रयोःपुरुषंत्योराससहस्राणिदद्महे।तरत्समंदीधावति।आययोस्त्रिंशतंतनासहस्राणिचदद्महे।तरत्स
मंदीधावति।तथारहस्ये।अथसुरापःकंठमात्रमुदकमवतीर्यसुतसोमस्यप्रसूतस्यप्रसूतिमादाय।ॐकारेणाभिमंत्र्यपित्वापिवेत्॥ततोनिमज्यमानस्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वा जपेत्। तस्मात्पूतो भवति। ब्राह्मणः सुवर्णहरणं कृत्वा हिरण्यं शालायां प्रक्षिप्याप्सु निमज्य मानस्तोकं जपेत् तदेतस्मात्पापात्पूतो भवति। तत्र मानस्तोके इत्यस्य कुत्स ऋषिः रुद्रो देवता जगती छन्दः शतरुद्रीयहोमे विनियोगः। मंत्रो यथा। ॐ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान्रुद्र भामिनो वधीर्हविष्मंतः सदमित्त्वा हवामहे। तत्र मानस्तोके इत्यस्याः कंडिकायाः रुद्रदेवतात्वाद्रुद्र एव संबोध्यते॥ हे रुद्र मानस्तोके तनये रीरिषः नोऽस्माकं तोके अपत्ये तनये पौत्रादौ मा रीरिषः मा हिंसां कुरु तथास्माकं आयुषि मा रीरिषः अस्माकं गोषु मा रीरिषः अस्माकमश्वेषु मा रीरिषः मा हिंसां कुर्वित्यर्थः॥ तथा नोऽस्माकमस्मत्संबंधिनो वीरान्दर्प्याहंकारिणः पुरुषान् तथास्माकं रुद्र भामिनः उग्रबोधयुक्तान् पुरुषान्मावधीर्मा घातय॥ यस्माद्धविष्मंतो वयं सदमित्सदैव त्वां हवामहे यस्माद्धविर्गृहीत्वा यज्ञकरणार्थं त्वां प्रार्थयामह इत्यर्थः॥ इति मानस्तोकमंत्रव्याख्या॥ द्वितिस्नानं समाप्य जलादुत्तीर्य धौते वाससी परिधाय प्रक्षालितपाणिपादः पवित्रपाणिराचम्य प्रातःसंध्योक्तविधिनैव मध्यान्हसंध्यामपि कुर्यात्॥ अयं तु विशेषः। प्राणायामानंतरमाचमनमापः पुनंत्वित्यनेन मंत्रेण कुर्यात् तत्र वसिष्ठ ऋषिरापो देवतानुष्टुप्छंद उपस्पर्शने विनियोगः॥ मंत्रो यथा॥ ॐ आपः पुनंतु पृथिवीं पृथ्वी पूता पुनातु मां। पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम॥ सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा॥ अस्यार्थः॥ आपः पृथिवीं पुनंतु पवित्रीकुर्वंतु पृथ्वी पूता अद्भिः पूता सती मां क्षेत्रज्ञं पुनातु न केवलमापः पृथिवीं पुनंतु ब्रह्मणस्पतिं ज्ञानस्य पतिं आश्रयं परमात्मानमपि पुनंतु तद्ब्रह्मपूता मां पुनातु अत्र पृथिवीपदेन पार्थिवदेहो लक्ष्यते तत्र च आपः पृथिवीं पुनंतु इति मदीयं पार्थिवं देहं पुनंत्वित्यर्थः॥ इत्थं चेह पावनद्वारा मामापः पुनंतु कुत्र मम यदुच्छिष्टमपावनं अभोज्यं गर्हितभोज्यं च यद्वा यदपि दुश्चरितं मम सदाचरणं॥ असतां मम प्रतिग्राह्याणां प्रतिग्रहं च तत्सर्वं तत्र सर्वत्र मामापः पुनंत्वित्यर्थः॥ इत्थमाशासया आपः आचम्यं तेनाः स्वाहा सुहुता भवंतु॥ अपामत्र

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रिराचमनेनमदीयदेहपावनपूर्वंशुद्धिंकृत्वाद्विरूपेपापेमांपावयन्त्वित्याशंसावाक्यार्थः॥अत्रपतिरितिसुपांसुपोभवन्तीति चद्वितीयायांप्रथमाब्रह्म
पूतादित्तिपूतमितिप्राप्तेलिंगव्यत्ययेनस्त्रीलिंगिता।सर्वमितिसप्तमीस्थानेद्वितीयाइत्यापःपुनन्तुमंत्रव्याख्या।इत्याचमनं कृत्वाप्रातःसंध्योक्तक्र
मेणगायत्रीजपान्तंकर्मसमाप्यपूर्वोक्तमंत्रेणप्रदक्षिणमावृत्यादित्यंनमस्कृत्यब्रह्मयज्ञंकुर्यात्।तत्रब्रह्मयज्ञमाहात्म्येछंदोगपरिशिष्टेकात्यायनः
नब्रह्मयज्ञादधिकोस्तियज्ञोनतत्प्रदानात्परमस्तिदानम्।सर्वेन्तवंतःक्रतवःसदानानानोदृष्टःकैश्चिदस्यद्विजस्यद्विजस्येतिब्रह्मयज्ञप्रदानयोः।याज्ञव
ल्क्यः।यज्ञानांतपसांचैवशुभानांचैवकर्मणाम्।वेदएवद्विजातीनांनिःश्रेयसकरःपरः।मधुनापयसाचैवसदेवांस्तर्पयेद्द्विजः।पितॄन्मधुघृताभ्यांच
ऋचोधीतेतुयोन्वहम्॥यजूंषिशक्तितोधीतेयोन्वहंसघृतामृतैः।प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा।सतुसोमघृतैर्देवांस्तर्पयेद्योन्वहंपठेत्।सा
मानितृप्तिंकुर्यात्तुपितॄणांमधुसर्पिषा।सेदसात्तर्पयेद्देवानथर्वांगिरसःपठन्पितॄंश्चमधुसर्पिस्थामन्वहंशक्तितोद्विजः।वाकोवाक्यंपुराणंचनाराशं
सीश्चगाथिकाः॥इतिहासांस्तथाविद्यायोधीतेशक्तितोन्वहम्।मांसक्षीरौदनमधुतर्पणंसदिवौकसाम्॥करोतितृप्तिंचतथापितॄणांमधुसर्पिषा
॥तेतृप्तास्तर्पयन्त्येनंसर्वकामफलैःशुभैः।यंयंक्रतुमधीयीततस्यतस्याप्नुयात्फलम्।त्रिवित्तपूर्णपृथिवीदानस्यफलमश्नुते॥तपसश्चपरस्येह
नित्यंस्वाध्यायवान्द्विजः।तथाब्रह्मयज्ञानुष्ठानप्रतिपादनेयोगियाज्ञवल्क्यः।प्रदक्षिणंसमावर्त्यनमस्कृत्योपविश्यच॥दर्भेषुदर्भपाणिःसन्प्राङ्मु
खस्तुकृतांजलिः॥स्वाध्यायंतुयथाशक्तिब्रह्मयज्ञार्थमाचरेत्।ऋचांचयजुषांसाम्नांगाथांगुह्यांयथाविधि।आद्यावारभ्यवेदंतुस्नात्वोपर्युपरिक्रमात्
॥यदधीतेन्वहंशक्त्यासस्वाध्यायइतिस्मृतः॥स्नात्वामध्यान्हस्नानंकृत्वायोधीतेवेदंसप्रथमकंडिकामारभ्यकृत्स्नवेदसमाप्तिपर्यंतंयावद्भि
र्दिवसैःशक्नोतितावद्दिवसैःक्रमेणकृत्स्नंवेदंपठेत्॥अनधीतकृत्स्नवेदस्तुयावदधीतवेदपुराणस्तवादिकंयथाशक्तिपठेदित्यर्थः॥आके

CC-0. In Public Domain. Digitization by eGangotri

शाखाग्रान्तस्वाध्यायाच्च परमंत्रमध्येतव्यः। यस्त्वृगपि द्विजो धीते स्वाध्यायं शक्तितोऽन्वहम्। स ब्रह्मयज्ञपरमस्मे तिवायुभूतः स्वमूर्तिमान्। ब्रह्मयज्ञानुष्ठानस्येतिकर्तव्य
तायांतु हारिगपुराणम्। एवमास्तीर्य चाचम्य दर्भपिञ्जुलमात्मनः। कृत्वा पाणितले धीमानात्मनो दक्षिणोत्तरम्। हेमाङ्गुलीयसंयुक्तो ब्रह्मबंधयुतोऽपि वा। विधि
वद्ब्रह्मयज्ञं तु कुर्यान्मंत्री समाहितः। तथा शौनकः। प्राग्वो दग्वा ग्रामान्निष्क्रम्याप आप्लुत्य यज्ञोपवीत्यक्लिन्नवासा दर्भाणां तु पस्तीर्य प्रागग्रेषु कुशेषु प्राङ्मु
ख उपविश्य दक्षिणोत्तरौ पाणी संधाय पवित्रवंतौ द्यावापृथिव्योः संधिमीक्षमाणः संमील्योन्मील्य वाच स्कन्धीयं यथायुक्तमात्मानमन्येतत यथायुक्तो धीयीत स्वा।
ध्यायमिति। यस्तु नस्तापि दर्भः पवित्रमिति स्मृतिदर्शनात् पवित्रपदं दर्भमात्रवरं तौ नि केचित्। तच्छिष्टाचारविरुद्धा यतः सर्वे एवानुष्ठातारः प्रादेशमात्रत्वादिलक्ष
णमुक्तमेव पवित्रं गृहीत्वैव ब्रह्मयज्ञं कुर्वंति। पवित्रपदं तादृशमेव युक्तं। तथा दक्षिणोत्तरौ पाणी संधायेति। पाणीइति द्विवचनेनैव दक्षिणवामहस्तयोरुपादानेसि
द्धे दक्षिणोत्तरमित्यभिधानाद्दक्षिणोहस्त उत्तरः परिभावीय योर्हस्तयोः सौदक्षिणोत्तराविति वोद्धव्यम्। एवं सति प्राङ्मुखः प्रागग्रेषु कुशेषूपविश्य वामहस्ततले कुशप।
वित्रे कृत्वा तदुपरि दक्षिणहस्तमधोमुखं कृत्वोंकारपूर्विकां गायत्रीं पठित्वा ऋग्वेदादींश्चतुरो मंत्रान्पठेत्। तत्र ऋग्वेदादिमंत्रस्य मधुच्छंद ऋषिर्गायत्री छंदोऽग्निर्दे
वता स्वाध्याये विनियोगः। मंत्रो यथा। ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं। होतारं रत्नधातमम्। अस्यार्थः। अग्निं देवं ईळे स्तौमि किंभूतं पुरोहितं पुरः प्रथमतो
हितं आहितं अर्पितमिति यावत्। पुनः किंभूतं यज्ञस्य ऋत्विजं यजमानानुरोधेन यागकारी ऋत्विक् अग्निश्च यजमानाभ्युदयाय यागकारी ऋत्विगुच्यते। अपि।
किंभूतं होतारं होमस्य प्रधानसाधने कर्तृभूतं। पुनः किंभूतं रत्नधातमं रत्नं सुवर्णादि तद्दधातीति रत्नधा अतिशयेन रत्नधाः रत्नधातमस्तं तदर्थं वा कपार्थः। प्रथमतोऽर्पि
तं धनं दाता सन्निस्तोमि तं तो अयमग्निर्महत्धनं ददात्विति। इत्यग्निमीळे मंत्रव्याख्या। यजुर्वेदादिमंत्रस्य परमेष्ठी प्रजापतिऋषिर्यजुः षांछन्दो नास्ति शाखावत्सगावो देव
ता शाखाच्छेदनेसमुन्नयवत्सापाकापाकरणे शाखायागोपस्पर्शने च विनियोगः। मंत्रो यथा। ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰स॰ आप्यायध्वमघ्न्याइन्द्रायभागंप्रजावतीअनमीवाअयक्ष्मामावस्तेनईशतमाघशंसोध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि॥ इषेत्वेतिद्विपद
३१ स्यास्यरोमंत्रोदैव्यऽअनुष्टुप्।अस्यार्थः।हेशाखेत्वात्वांइषेवृष्ट्यैछिनद्मीति।ऊर्जेत्वाइतिद्विपदस्यास्यरोमंत्रः दैव्यनुष्टुप्।अस्यार्थः।हेशाखेत्वात्वांऊर्जे
रसायसंनयामिअत्रमंत्रद्वयेछिनद्मिसंनयामीतियथाक्रमंक्रियापदमध्याहरणीयम्।वायवस्थइतिद्विपदस्यास्यरोमंत्रः।अस्यार्थः।हेवत्साःवायवस्थयथा
वायुर्वृष्ट्यादिद्वारेणजगतामाप्यायकःतथायूयंधेनुप्रस्तुतिद्वारेणयज्ञनिष्पत्तिकारिणःयज्ञाद्धविरितिपरंपरयाजगतामाप्यायकाःस्थभवथ।देवोवःस
वितेत्याद्यवशिष्टाक्षरोपरोमंत्रः।अस्यार्थः।देवःदानादिगुणयुक्तःवोयुष्मान्कर्मणेयज्ञायप्रार्पयतुकिंभूतोदेवःसविताजगतांप्रसविताकिंभूतायकर्मणेश्रे
ष्ठतमायअतिश्रेष्ठाय।अत्रइषेइतिइषुइच्छायामित्यस्मात्संपदादित्वात्क्विप्प्रत्ययस्तेनइषशब्दस्यहलंतस्यव्युत्पत्तिः।अनेनचसर्वेषामिष्यमाणत्वाद्वृ
ष्टिरुच्यते।यथाश्रुतिर्वृष्ट्यैतदाहयदाहेषेत्वेति।वृष्टिःसर्वैरिष्यते।इषेइतितादर्थ्येचतुर्थीत्वाइतिद्वितीयैकवचनेयुष्मच्छब्दस्यानेत्वामौद्वितीयायाइति
त्वादेशः।वृष्ट्यर्थंत्वाशाखांछिनद्मीत्यर्थः।ऊर्जेइति।ऊर्जबलप्राणधारणयोः।अस्मात्क्विप्प्रत्ययेनऊर्जेइति।हलंतपदव्युत्पत्तिःतादर्थ्येचतुर्थीअनेन
जगतांबलहेतुत्वाद्रसोभिधीयते।ऊर्जेरसायत्वांसंनयामीत्यर्थः।श्रेष्ठतमायकर्मणइतियज्ञोभिधीयते।अत्रश्रुतिःप्रमाणम्॥यज्ञोवैश्रेष्ठतमंकर्मइतिद्वि
तीयावहुवचनान्तयुष्मच्छब्दस्यस्थानेवहुवचनस्यवस्नसावितिवसादेशः।अग्निहोत्रकर्तव्यदर्शेष्टेःसान्नाय्यस्यउत्पादनेसमिश्चतुर्भिर्मंत्रैःशाखाछेदनेशाखान
यनेशाखायावत्सोपस्पर्शनेशाखावत्सधेनवःप्रार्थ्यंतइतिपूर्वार्द्धऋग्वाक्यार्थः।अथोत्तरार्द्धव्याख्या।आप्यायध्वमित्यत्रओप्यायीवृद्धौणिचोलोपःअ
प्यायध्वंहेअघ्न्यागावःकंइंद्रायभागंतादर्थ्येचतुर्थीइंद्रार्थोयोभागस्तंइतिसंबंधः।इंद्रोहविर्भोक्ताकथंभूताःसंत्यःप्रजावतीःवाछंदसीतिदीर्घत्वंप्रजावत्यः राम॰
जीवद्वत्साःअनमीवाःअमरोगेअमीवाव्याधिरभिधेयःनविद्यतेअमीवायासांतास्तथोक्ताः।अयक्ष्माःव्याधीनांराजायक्ष्मासयासांविद्यतेघासभक्षणार्थेनाः ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अघशंसः अनिवारितो गोप्रचर इत्यर्थः॥ किंच मा वः युष्माकं स्तेनश्चोर ईशत। मा ङि लुङ। मा युष्माकं चोरः ईषत् काषीदित्यर्थः। मा घः अघशंसः अयं पापं पः शंसतीति भक्षणार्थं कुत्साकृत्को वा चांडालो वा स च मा ईशत किंच ध्रुवाः स्थिरा अस्मिन् गोपतौ यजमाने स्यात भवेत् बह्वीर्बह्व्यः शश्वत्सु पशू इति यजमानस्य पशून् पाहि यजमानस्य संवर्धिनः पशून् पाहि गोवत्सं अभिप्रेत देहांगभूतं पाहि गोपय इति इषे त्वा मंत्रव्याख्या। अग्न आ याहि इति मंत्रस्य गोतम ऋषिर्गायत्री छंदोऽग्निर्देवता स्वाध्याये विनियोगः। मंत्रो यथा। ॐ अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि। अस्यार्थः। हे अग्ने आयाहि आगच्छ अत्र मम कर्मणि सन्निहितो भवेत्यर्थः। किमर्थं वीतये खादनाय अस्मद्दत्तहव्यस्यान्नस्य स्वादनायेत्यर्थः। किंभूतस्त्वं गृणानः स्तूयमानः किमर्थं हव्यमन्नं तस्य दातये दानाय न केवलं आयाहि अपि तु बर्हिषि आस्तृतकुशे सत्सि सीद स्थितो भवेत्यर्थः। किंभूतस्त्वं नि होता निरवशेष होता सांगहोम सप्रधानसाधनतया कर्तृभूत इत्यर्थः। हे अग्ने यज्ञकर्मणि देयसहविषोऽदनाय आगत्य बर्हिषि निषीदेत्ययं प्रार्थनावाक्यार्थः। अत्र वी इति वी प्रजनगतिकान्त्यशनखादनेषु इति धातोः क्ति प्रत्यये रूपम्। इति अग्न आ याहि मंत्रव्याख्या अथर्ववेदादिमंत्रस्य दध्यङ्ङाथर्वण ऋषिर्गायत्री छंदः आपो देवता शांतिकर्मणि विनियोगः। मंत्रो यथा। ॐ शन्नो देवीरभिष्टय आपो भवंतु पीतये। शंयोरभिस्रवंतु नः। अस्यार्थः। आपः नोऽस्माकं शं कल्याण्यो भवंतु किंभूताः देवीर्देव्यः स्तुत्यादिविषया इत्यर्थः। किमर्थं अभिष्टये उपचयार्थं पीतये पानार्थं। किंच नोऽस्माकं शंयोः कल्याणयोगाय अभिस्रवंतु अभिमुखं आगच्छंतु अयं वाक्यार्थः। आपो अस्माकमुपचयाय पानार्थं कल्याणयोगाय भवंत्वित्याशंसा। एतद्धि इत्यादिमंत्रचतुष्टयं पठित्वेच्छातोपरमपि वेदवेदांगपुराणेतिहासस्मृत्यादिकं यथाशक्ति पठेत्। इति शन्नो देवीरिति मंत्रव्याख्या। इति ब्रह्मयज्ञं कृत्वा तर्पणं कुर्यात्। अत्र तर्पणविधौ शातातपः। तर्पणं तु शुचिः कुर्यात्प्रत्यहं स्नातको द्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्। मनुशातातपयोगियाज्ञवल्क्याः। यद्देवान्तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः। तेनैव सर्वमाप्नोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा॰स॰ पितृयज्ञक्रियाफलम्। योगियाज्ञवल्क्यः। नास्तिक्यादथवालस्यान्न तर्पयति वै सुतः। पिबंति देहनिःस्रावं पितरोस्य जलार्थिनः। तर्पणमित्यनुवृत्तौ छंदोगप
३२ रिशिष्टे कात्यायनः। तस्मात्स्वदैवकर्त्तव्यमकुर्वन्महदेनसा। युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्धि भर्त्ति हि। विष्णुः। स्नानश्चार्द्रवासा देवपितृतर्पणमंभस्थ एव कुर्या
त्। तर्पणविधौ शातातपः। तर्पणं तु परिवर्ज्जितवासा स्थलेतीरादुत्तीर्य। योगियाज्ञवल्क्यः यत्राशुचिस्थलं वा स्यादुदके देवतापितॄन्। तर्पयेत्तु यथाकामम
प्सु सर्वं प्रतिष्ठितम्। सुमंतः। जलार्द्रवासाः स्थलगोयः प्रदद्याज्जलाञ्जलिम्। वस्त्रनिष्पीडनं प्रेता अपवार्य पिबंति हि। शंखः। नोदकेषु न पात्रेषु न क्रुद्धो नैकपा
णिना। नोपतिष्ठति तत्तोयं यद्भूमौ प्रदीयते। शंखलिखितौ। नैशूकचिते पितॄंस्तर्पयेत्। वापीकूपतडागोदपानेषु सप्त पंच त्रीन्वा पिंडानुद्धृत्य स्नायात्। अ
यमभिप्रायः। स्नानार्थिना स्नानपूर्वकाले एतावत्पिंडाः समुद्धरणीयाः। स्नानाशक्तेन तर्पणमात्रार्थिना पित्तान्न पिंडानुद्धृत्य तर्पणीयम्। मार्कंडेयपुराणे। य
न्न सर्वा यचोत्सृष्टं यच्चाभोज्यनिपानजम्। तद्वर्ज्यं सलिलं तात सदैव पितृकर्मणि। सुमंतुः। आकाशे च क्षिपेद्वारि जलस्थो दक्षिणामुखः। पितॄणां स्थानमाका
शं दक्षिणा दिक्तथैव च। यमः। त्रींस्त्रीञ्जलांजलीन्दद्यादुच्चैरुच्चतरं ततः। गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्। शंखः। विना रूप्यसुवर्णेन विना ताम्र
तिलैस्तथा। विना दर्भैश्च मंत्रैश्च पितॄणां नोपतिष्ठते। सौवर्णराजताभ्यां च खड्गेनोदुंबरेण च। दत्तमक्षय्यतां याति पितॄणां तु तिलोदकम्। मरीचिः। तिला
नामप्यभावे तु सुवर्णरजतान्वितम्। तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वा पुनः। राजतेन मनसा याति सुवर्णे हस्तनिर्गतम्। तिलेषु तत्क्षणाद्धच्छेत्ताम्रेषु द्विमुहु
र्त्तकम्। दर्भैः सप्तमुहूर्तेन मंत्रयुक्तं तदक्षयम्। शंखः। हेमेन सह यद्दत्तं क्षीरेण मधुना सह। तदप्यक्षय्यतां याति पितॄणां तु तिलोदकम्। तथा। सौवर्णेन तु पा
त्रेण राजतोदुंबरेण च। खड्गपात्रेण वा शंकुनावापि उदकं पितृतीर्थस्पर्शनं दद्यात्। अत्र शंकुनेति खड्गपात्रघटनाशक्तौ अविकृतिना खड्गगुणकेनेत्यर्थः। राम॰
योगियाज्ञवल्क्यः। यदुद्धृतं प्रसिंचेत्तु तिलान्संमिश्रयेज्जले। अतोन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः। दक्षिणे पितृतीर्थेन जलं संसिंचेद्यथाविधिर ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिणेनैव तु गृह्णीयात्पितृतीर्थसमीपतः। अत्र दक्षिणेन तु गृह्णीयादिति जलं गृह्णीयादित्यर्थः। तथा। शुक्लैस्तु तर्पयेद्देवान्मनुष्यान्सलिलैस्तिलैः। पितॄं
स्तु तर्पयेत्कृष्णैस्तर्पयन्सर्वदा द्विजः। तथा देवतर्पणविधौ। ब्रह्माद्यानुपवीती तु देवतीर्थेन तर्पयेत्। निवीती कायतीर्थेन मनुष्यान्सनकादिकान्। अत्र काय
तीर्थं प्राजापत्यम्। मनुः। उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः। सव्ये प्राचीनावीतीति निवीतं कंठसज्जने। देवादितीर्थान्याह। याज्ञवल्क्यः। कनिष्ठदेशिन्यंगु
ष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्। दैवादिकर्मसु कुशव्यवस्थायां पिंडपितृयज्ञब्राह्मणम्। अग्रमेव देवानां मध्यमेव मनुष्या
णां मूलमेषां पितॄणामिति तैत्तिरीयप्रमाणं वाजसनेयं तु अग्रमिव देवानां मध्यमिव मनुष्याणां मूलमिव पितॄणामिति वाजसनेयब्राह्मणमपि प्रमाणम्। छं
दोगपरिशिष्टम्। यवाद्भिस्तर्पयेद्देवान्सतिलाद्भिः पितॄनपि। तत्र तिलसंख्यामाह। देवलः। तर्पणे पितृयज्ञादौ तिलो माषोपमो भवेत्। दशभिश्च तिलैस्तेन पि
तॄंस्तं तर्पयेत्सदा। तिलैः सप्ताष्टभिर्वापि पितॄणां तृप्तिरुत्तमा। अग्निस्तम्भभयाद्देवनचेच्छन्ति विस्तरम्। विशेषात्कुशसंसर्गान्न्यायसाधिकं भवेत्। त
तः संतर्पयेदित्यधिकारे योगियाज्ञवल्क्यः। अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु। तृप्यतामिति सेक्तव्यं नाम्ना तु प्रणवादिना। आवाह्य पूर्ववन्मंत्रैरासी
र्य च कुशान्शुभान्। प्रागग्रेषु सुरान्सम्यग्दक्षिणाग्रेषु वै पितॄन्। ब्रह्मपुराणम्। खड्गास्थिपात्रे कर्तव्यं पितृदेवानुतर्पणम्। योगियाज्ञवल्क्यः। सव्यं
जानुं ततो नाम्य पाणिभ्यां दक्षिणामुखः। तल्लिंगैस्तर्पयेन्मंत्रैः सर्वान्पितृगणांस्तथा। मातामहांश्च सततं श्रद्धया तर्पयेद्बुधः। प्राचीनावीत्युदकं प्रसिंचेद्दे
तिलान्वितम्। अत्रावाह्य पूर्ववन्मंत्रैरिति। याज्ञवल्क्यः। संहितायांश्चाद्यप्रकरणोक्तैर्विश्वेदेवास आगतेति विश्वेदेवाः शृणुतेममिति देवानुशंतस्त्वेत्या
यंतु न इति मंत्राभ्यां पितॄनावाह्येत्यर्थः। तथा तल्लिंगैरिति। ऊर्जं वहंतीत्यादिभिः पितृतृप्तिप्रकाशकैरित्यर्थः। देवतर्पणानंतरं। पद्मपुराणे। कृतोपवीती दे
वेभ्यो निवीती च भवेत्ततः। मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा। सनकश्च सनंदश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋजून्२

ना॰स॰ इत्याद्यभिधायदेवानृषीन्सर्वांस्तर्पयेदसतोदकैः प्राच्यापापनः।वसून्रुद्रांस्तथादित्यानृषींश्चैवयथाक्रमम्।सुपूर्वाभिमुखः स्थित्वाजलमध्येतुतर्पयेत्
३३ ।वायुपुराणेसव्येनवैकृत्वादैवैदर्भान्विचक्षणः।दद्यात्तुद्विगुणंपित्र्ये अपसव्येनपार्थिव।लघुविष्णुःनिवीतीहन्तकारेणमनुष्यांस्तर्पयेदथ।कुशास्यमध्यदे
शेनतुतीर्थेनानुदङ्मुखः।गोभिलधृतसंहितायाम्।एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः।अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियश्चैकैकमंजलिम्।हारीतः।देवाश्छ
दांसिवेदानृषीन्पुराणान्पुराणाचार्यान्गंधर्वानितराचार्यान्मनुष्यान्कलाःकाष्ठानिमेषान्मुहूर्तानहोरात्रानर्द्धमासान्मासानृतून्संवत्सरान्सावयवानूम
नुष्यानाह।योगियाज्ञवल्क्यः।सनकश्चसनन्दश्चतृतीयश्चसनातन।कपिलश्चासुरिश्चैववोढुःपंचशिखस्तथा।एतेत्वद्यसुताःसप्तमनुष्याःप्रकीर्तिताः
।कव्यवाडनलसोमंयमश्चर्यमणंतथा।येभ्योवापिपिनादद्यात्तेभ्योवापिप्रदापयेत्।हारीतः।नारशर्यःपराशर्यःशुकःशाकल्योयाज्ञवल्क्योजातूकर्ण्यः
कात्यायनआपस्तंबोबौधायनोवाचिकुटीवैजवापीकुहूर्लोकाक्षीमैत्रायणीरित्येतानृषीन्।कात्यायनः।यमायधर्मराजायमृत्यवेचान्तकायच।वै
वस्वतायकालायसर्वभूतक्षयायच।औदुंबरायदध्नायनीलायपरमेष्ठिने।वृकोदरायचित्रायचित्रगुप्तायतेनमः।एकैकस्यतिलैर्मिश्रानस्त्रींस्त्रीन्दद्याज्ज
लांजलीन्।यावज्जीवकृतंपापंतत्क्षणादेवनश्यति।योगियाज्ञवल्क्यः।एतांश्चवक्ष्यमाणांश्चप्रमीतपितृकोद्विजः।तथाचार्यान्स्वांश्चपितृप्रभृति
नामतः।मंत्रैश्चदेयमुदकंपितॄणांप्रीतिवर्द्धनम्।उदीरतामंगिरसमायांत्विमूर्जेमित्यपि।पितृभ्यइतियेचेहमधुवाताइतित्र्यृचा।पितृभ्यायन्मसिंचेत
जपन्मंत्रान्यथाक्रमम्।तृप्यध्वमितिचेसुवैस्तःप्रांजलिरानतः।नमोवइतिजप्त्वावैततोमातामहांस्तथा।तर्पयेद्वानृशंस्यार्थंधर्मपरममास्थितः।मा
तामातृस्वसाचैवदुहितावस्वसातथा।शिष्यर्त्विग्बांधवाश्चैवज्ञातयोगुरवस्तथा।नामगोत्रस्वधाकारैस्तर्प्याःस्युरनुपूर्वशः।जातूकर्ण्यः।प्रमीतपि ३३
तृकस्तुउशंतस्त्वेत्यावाह्यनामगोत्रमुच्चार्ययावतांपितृकार्यमसावेतत्तेउदकमिति।।पितृन्पितामहान्प्रपितामहानेकैकस्मैत्रींस्त्रींजलांजलिंदद्यात् राम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।तथा। हारीतः। नामगोत्रयोरूर्जं वहंतीरिति प्रत्याससन्यास्तानवस्त्रमापीड्य स्वांश्च पितॄंस्तर्पयेदिति॥ अथतर्पणानुष्ठानम्। तत्र प्राङ्मुखउपवीती उपवि
श्य प्रागग्रान्कुशानास्तीर्य दक्षिण हस्तेन यवान्गृहीत्वा देवानावाहयेत्। गृत्समदऋषिर्विश्वेदेवा देवता गायत्रीछंदः अग्निष्टोमे विश्वेदेवग्रहणे विनि
योगः। मंत्रो यथा। ॐ विश्वेदेवास आगत शृणुता मइमं हवं। एदं बर्हिर्निषीदत। अस्यार्थः। हे विश्वेदेवासः यूयं मे मम इदं हवं आह्वानं शृणु
त श्रुत्वा चागत आगच्छत आगम्य च इदं बर्हिः कुशं आनिषीदत आसनार्थमुपकल्पिते बर्हिषि उपविष्टा भवतेत्यर्थः। अत्र विश्वेदेवास इति संबोधने प्रथमाब
हुवचने आज्जसेरसुगिति असुगागमेन रूपम्। शृणुता इति। शृणुत इत्यत्र तस्यनादिति तकारस्य तनादेशः॥ आगतेति॥ आगच्छत इत्यत्र वर्णागमो वर्णविपर्य
श्चेति छकारलोपः। आनिषीदतेति छंदसि परेऽपि व्यवहिताश्चेति पाणिनिस्मरणात् व्यवहितेनाप्याङा निषीदतेत्यस्य संबंधः। एदं बर्हिरित्यत्र आङ् कर्म
प्रवचनीययुक्ते द्वितीयेति सप्तम्यर्थे द्वितीया। इति विश्वेदेवास मंत्रव्याख्या। एतं मंत्रं पठित्वा यवान्विकीर्य बद्धांजलिः पठेत्। ॐ विश्वेदेवाः शृणुतेमं हवं मे
ये अंतरिक्षे य उप द्यवि ष्ठ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम्। अस्याः सुहोत्रऋषिर्विश्वेदेवा देवता त्रिष्टुप्छंदः सर्वमेधे वैश्वदेव
ग्रहणे विनियोगः। अस्यार्थः। हे विश्वेदेवाः यूयं मे मम इमं हवं आह्वानं शृणुत किंभूता यूयं ये अंतरिक्षे आकाशे तिष्ठथ ये उप समीपे पृथिव्यां द्यवि स्वर्गे।
द्वयोरपि तिष्ठथ इत्यनेनैव संबंधः एतदुक्तं भवति। भूमौ आकाशे स्वर्गे च स्थिता अपि विश्वेदेवाः केते अग्निजिह्वाः अग्निरेव जिह्वा हविर्भोजनसाधनं येषां उत वा
अपि वा ये यजत्राः यजंते श्राद्धकारिणं त्रायंते इति यजत्राः। पुरूरवोमाद्रव प्रभृतयः ये यूयं अस्मिन्मदत्ते बर्हिषि कुशे आसाद्य उपविश्य मादयध्वं मदो हर्षे ल
ड्युक्ता भवत मादयध्वमिति स्वार्थे णिच् श्राद्धे च देवा रक्षका इत्यत्र तेषामारक्षभूतं तु देवं पूर्वं नियोजयेदिति स्मृतिप्रमाणमिति विश्वेदेवाः शृणुतेमं मंत्र
व्याख्या। एवं मंत्रं पठित्वा प्रागग्रान्कुशा नास्तीर्य तदुपरि वामहस्तान्वारब्धदक्षिणहस्तेन ऋजुकुशाग्रेण देवतीर्थेन यवोदकेन देवाः छंदांसि वेदा ऋ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा·सू· षयः पुराणाः पुराणाचार्या गंधर्वा इतराचार्या मनुष्याः कलाः काष्ठाः निमेषा मुहूर्ता अहोरात्रा अर्द्धमासा [मासा] ऋतवः संवत्सराः सावयवा इति प्रत्येकं तृप्यन्ता
३४ मिति क्रियापदं दत्वा। ॐ देवास्तृप्यन्तां छंदांसि तृप्यन्तामित्यादि वाक्येन हारीतोक्तमष्टादश देवतानां तर्पणं कुर्यात्। ततो निवीती उदङ्मुखः कुशमध्येन म
नुष्यतीर्थेन केवलेन यवोदकेन वा उत्तराग्रकुशोपरि सनकः सनंदनः सनातनः कपिलः आसुरिर्वोढुः पंचशिख इत्यत्र प्रत्येकं तृप्यन्तामिति क्रियापदं दत्वा
। ॐ सर्वे स्तृप्यन्तामिति वाक्येन। योगियाज्ञवल्क्योक्त सप्त मनुष्यतर्पणं कुर्यात्। ततः प्राचीनावीती दक्षिणाभिमुखो भग्नकुशेन पितृतीर्थेन तिलोदकेन द
क्षिणाग्रकुशोपरि खड्गपात्रोपरि ॐ काव्यवाल स्तृप्यन्तां नलः सोमः यमः अर्यमा अग्निष्वात्ता स्तृप्यन्तां सोम्याः बर्हिषदः। योगियाज्ञवल्क्योक्त सप्त पि
तृतर्पणं कुर्यात्॥ ततोनेन विधानेन नाराशर्य्यः पाराशर्य्यः शुकः शाकल्यः याज्ञवल्क्यः जातूकर्ण्यः कात्यायनः आपस्तंबः बौधायनः वाचिकुटीः वैज
वापीकुहूः लोकाक्षीः मैत्रायणिः ऐंद्रायणिः इत्यत्र तृप्यन्तामिति प्रत्येकं क्रियापदं प्रदाय ॐ नाराशर्य्यस्तृप्यन्तामित्यादि वाक्येन हारीतोक्त पंचदश ऋषि
तर्पणं कुर्यात्। ततोनेनैव क्रमेण। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृ
कोदराय चित्राय चित्रगुप्ताय वै नमः। इत्यत्र प्रत्येकं नम इति दत्वा यमाय नम इत्यादि वाक्येन कात्यायनोक्त चतुर्दश यमानां प्रत्येकं त्रींस्त्रीञ्जलांजलीन्दद्यात्॥
ततस्तिलान्गृहीत्वा। मंत्रो यथा। ॐ उशंतस्त्वा निधीमह्युशंतः समिधीमहि। उशन्नुशत आवह पितॄन्हविषे अत्तवे। अग्निर्देवतोयं मंत्रः। उशंतस्त्वेत्य
स्य शंख ऋषिस्त्रिष्टुप्छंदः पितरो देवता सौत्रामण्यामग्न्युपस्थाने विनियोगः। अस्यार्थः। हे अग्ने त्वा त्वां निधीमहि आदधीमहि आधानं कुर्म इति यावत्
वयमित्यध्याहार्य्यं किंभूता वयं उशंतः इच्छंतः। किंच उशंत एव वयं त्वा त्वां समिधीमहि ज्वालयामः त्वं चास्माभिराहितो ज्वालितश्च पितॄन् अग्निष्वात्तादीनाव राम·
ह आनयेत्यर्थः किंभूतस्त्वं उशन् इच्छन् किंभूतान्पितॄन् उशतः इच्छतः किमर्थमावाहनमित्यत आह हविषे अत्तवे अस्मद्दत्तहविषः अत्तवे अदना ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यहे अग्ने अस्माभिराधानज्वालनाभ्यामाराधितस्त्वमस्माकं पितॄन्श्राद्धदेयस्य हविषो भक्षणाय आनयेत्यग्नेः प्रार्थना वाक्यार्थः। अत्र निधीमहीति। डुधाञ्
धारणपोषणयोरित्यस्माद्धातोरुत्तमपुरुषस्य बहुवचन आत्मनेपदे रूपं। बहुलं छंदसीति बहुलवचनान्न द्विवचनं न भवति। समिधीमही ति। ञि इंधी दीप्ताववि
त्यस्य धातो रूपम्। हविषे इति षष्ठ्यर्थे चतुर्थी। अत्तवे इति। अद भक्षणे इत्यस्मात्तुमर्थे सेसेनेत्यादिसूत्रेण तवेङ् प्रत्ययेनाव्ययपदमिति। इति उशंतस्त्वा मंत्रव्याख्या
नं मंत्रं पठित्वा तिलान्विकीर्य बद्धांजलिर्भूत्वा। अस्य मंत्रस्य शंख ऋषिस्त्रिष्टुप्छंदः पितरो देवता सोत्रामण्यां मन्युपस्थाने विनियोगः। मंत्रो यथा। ॐ आयंतु नः
पितरः सोम्यासो ग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदंतो धिब्रुवंतु ते वंत्वस्मान्। अस्यार्थः। नोस्माकं पितरः आयंतु आगच्छंतु के ते पितरः
सोम्यासः सोमपाः न केवलं सोम्याः सोमपाः अग्निष्वात्ताश्च श्रौतस्मार्ताग्निभिः ष्वात्ता भक्षिता येषां श्रौतस्मार्ताग्निभिः संस्कारः कृत इत्यर्थः। केन आगच्छंतु प
थिभिर्वर्त्मभिः। किंभूतैर्देवयानैः देवानां यानं गमनं यैरित्यर्थः। आगत्य च ते पितरः अस्मिन्तर्पणरूपे पितृयज्ञे स्वधया पितॄणामन्नेन मदंतस्तृप्यंतः संतः
अस्मानधिब्रुवंत्वधिकाः वदंतु श्लाघयंत्वित्यर्थः। अवंतु रक्षंतु॥ अयं वा वाक्यार्थः। अस्मिन्तर्पणेऽस्माकं सोमपा अग्निष्वात्ताश्च पितरः आगच्छंतु आग
त्य च तर्पणजलेन तृप्यंतोस्मान्श्लाघयंतो रक्षयंतु चास्मत्पितामहादीन्प्रीणयंत्विति। अत्र च सोम्यास इति सोममर्हतीति य इति यप्रत्यये कृते सोम्य शब्दात्प्रथ
मा बहुवचने आज्जसेरित्यसुगागमेन रूपम्। इति आयंतु न इति मंत्रव्याख्या। अनेन मंत्रेण पितॄनावाह्य। अस्य मंत्रस्य प्रजापतिरृषिरापो देवता विराट्छंदः
पिंडपितृयज्ञे विनियोगः। मंत्रो यथा। ॐ ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्। अस्यार्थः। हे आपः यूयं स्वधास्थ पितॄणा
मन्नं भवत। तथा च श्रुतिः। स्वधा वै पितॄणामन्नमिति। ततो मे मम पितॄंस्तर्पयत तृप्तान्कुरुत। किंभूता यूयं ऊर्जं वहंतीः अन्नं वहंत्यः प्रापयंत्यः किंभूतमू
र्जं अमृतं इत्यादि परिस्रुतमित्यंतमूर्जं विशेषणानि। अमृतं देवानामन्नं घृतं प्रसिद्धं पयो दुग्धं कीलालं मंडः कीलं बंधनं अलयो ग्यमस्येति कीलालं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंडः। परिस्रुतं स्वधा। एतच्चामृतादि सर्वमेवोर्जशब्दाभिधेयमन्नवाचकं। यथा श्रुतिः। तस्माद्यावन्मात्रं ईरान्नस्य रसः सर्वमेवान्नं भवति। अयं वाक्यार्थः। यूतोपूयं नानाविधमन्नं वहंत्यः स्वधा भवथ तस्मान्मम पितॄंस्तर्पयतेत्यर्थः। वहन्तीरिति सुपां सुपो भवंतीति प्रथमा बहुवचनस्थाने द्वितीया बहुवचनं। अथवा दीर्घाज्जसि चेति नित्ये पूर्वसवर्णादेशेऽप्राप्ते वा छंदसीति सूत्रेण पूर्वसवर्णादेशप्रतिषेधस्य विकल्पितत्वात् यदा प्रतिषेधो नास्ति तदा पूर्वसवर्णादेशे कृते रूपम्॥ इति ऊर्जं वहंतीमंत्रव्याख्या। एतन्मंत्रपाठपूर्वकं अमुकगोत्रमत्पितरमुकदेवशर्मन्नेतत्ते तिलोदकं स्वधेति जलांजलित्रयं दद्यात्। एवं पितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहानां प्रत्येकं तन्मंत्रैर्जलांजलित्रयं दद्यात्। ततोऽमुकगोत्रेऽस्मन्मातरमुकीदेवि एतत्ते तिलोदकं स्वधा इति मातॄन्तर्पणं कुर्यात्। एवं पितामह्यादिमातामह्यादीनामेकैकांजलिं प्रत्येकं दद्यात्। ततो ज्येष्ठतातपितृव्यपुत्रपौत्रदौहित्रभ्रातृपुत्रजामातृमातुलभागिनेयपितृस्वस्रीयमातृभगिनीमातुलानीपत्नीभगिनीभ्रातृपत्नीभागिनेयीदुहिताश्वश्रूश्वशुरबंधुबांधवादीनां मध्ये पुरुषाणां जलांजलित्रयं स्त्रीणामेकैकांजलिं दद्यात्। ततो विष्णुपुराणोक्तकाम्यमंजलित्रयं दद्यात्। तथा इदं चापि जपेदंबु ददात्मेच्छया नृप। उपकाराय भूतानां कृतदेवादितर्पणः। तत्रायं मंत्रः। देवासुरास्तथा यक्षा नागा गंधर्वकिन्नराः। पिशाचा गुह्यकाः सिद्धाः कूष्मांडा भैरवाः खगाः। जलेचरा भूनिलया वाय्वाधाराश्च जंतवः। प्रीतिमेते प्रयांत्वाशु मद्दत्तेनांबुनाखिलाः। इति मंत्ररूपश्लोकद्वयेन देवासुरयक्षनागगंधर्वादीनां तर्पणीयत्वाद्दक्षिणोपवीती प्राङ्मुखो देवतर्पणवदेकैकांजलिं दद्यात्। ततः। नरकेषु समस्तेषु यातनासु च ये स्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया। इत्यनेन मंत्रश्लोकेन नरकस्थानां तर्पणीयत्वाद्वामोपवीती दक्षिणाभिमुखः पितृतर्पणवत्परमेकमंजलिं दद्यात्। ततः ये बांधवा बांधवा वा येऽन्यजन्मनि बांधवाः॥ ते तृप्तिम राम खिला यांतु येऽस्मत्तोयाभिकांक्षिणः। इत्य परेण मंत्रश्लोकेन जलांजलिं दद्यात्। तथास्यैव काम्योदकप्रदानस्य फलम्। काम्योदकप्रदानं तेन मयैतत्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं नृप। यद्दत्वा प्रीणयत्येतांस्त्वनुष्यः सकलं जगत्। जगदाप्यायनोद्भूतं यत्पुण्यमाप्नोति चानघ। दत्वा काष्ठोदकं सम्यगेतेभ्यः श्रद्धयान्वितः। इति तर्पणं समाप्य। ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः। ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकं इति पठित्वा स्नानशाटीं निष्पीडयेत्। ततो दक्षिणोपवीती आचम्योत्थायादित्यमवलोकयेत्। तथा च। योगियाज्ञवल्क्यः। ततोऽवलोकयेदर्कं हंसः शुचिषदित्यृचा। सयातित्रह्मणः सद्मस्त्राखेत्तानयानुयः। ततः नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये पवित्रे कर्मदायिने इति पौराणीयमंत्रेण सूर्यायसलिलाञ्जलिं दत्वा॥ योगियाज्ञवल्क्योक्तं सूर्योपस्थानादिकं कुर्यात्। तद्यथा। स्वयंभूरित्युपस्थाय सूर्यस्येति प्रदक्षिणम्। समावृत्य नमस्कुर्याद्दिशो दिग्देवता अपि। ब्रह्मणे च पृथिव्यै च ह्योषधिभ्यस्तथाग्नये। वाचे च वाचस्पतये विष्णवे महते तथा। एताभ्यो देवताभ्यश्च नमस्कारादिनाजलम्। दत्वा नमस्येत्क्रमशश्च ते वै सर्वकर्मणाम्। नमोऽद्भ्योऽपांपतये वरुणाय नमो नमः॥ अत्र स्वयंभूरित्युपस्थायेत्यादि। ॐ स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि। इति मंत्रेण सूर्यमुपस्थाय। ॐ सूर्यस्यावृतमन्वावर्ते इति प्रदक्षिणमावृत्य नमो दिग्भ्य इत्यादिनां यथोक्तदिगादीनामंजलिदानपूर्वकं नमस्कारं कुर्यादित्यर्थः॥ अस्य च मंत्रद्वयस्य व्याख्यादिकं प्रातःसंध्यायां सूर्योपस्थाने लिखितत्वात्तत्रैवानुसंधेयम्। इत्यावसथिकमहाधर्माधिकृत श्रीहलायुधविरचित ब्राह्मणसर्वस्वे स्नानमंत्रव्याख्याप्रकरणम्। अथ सूर्यार्घ्यदानं तत्रार्घ्यं दद्यादित्यनंतरं पद्मपुराणे। आचम्य विधिवत्सम्यगालिखेत्पद्ममग्रतः। साक्षताभिः सपुष्पाभिः सतिलारुणचंदनैः। अर्घ्यं पात्रे प्रयत्नेन सूर्यनामानुकीर्तनैः। नरसिंहपुराणे। ततोऽर्घ्यं भानवे दद्यात्तिलपुष्पाक्षतान्वितम्। अस्थाप्य मूर्ध्निपर्यन्तं हंसः शुचिषदित्यृचा। हंसः शुचिषदिति मंत्रस्य माहात्म्ये हारीतः। हंसः शुचिषदित्येतद्विमलं पवित्रं येन सर्वपापेभ्यो मुच्यते अप्सु जपेत्। घृतं तिलान् समिधो वा जुहुयात् आदित्यमुप तिष्ठेत्पूतो भवति तथा वै धायनः॥ हंसः शुचिषदित्येतामृचं त्रिरंतर्जले पठेत्। सर्वपापात्प्रमुच्यते। अत्र शु र्किं ताम्रपात्रस्थतिलपुष्पयवजलरक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनैरर्घ्यमुपकल्प्य शिरसि निधायानेन मंत्रेणार्घ्यं दद्यात्। तद्यथा। वामदेव ऋषिरतिजगती छन्दः सूर्यो देवता राजसूये यजमानस्य रथावतारणे विनि-
योगः। मंत्रो यथा। ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। अस्या-
र्थः। हंसः अध्वानं हंति गच्छतीति हंसः सूर्यः शुचिषत् शुचावग्निमंडले सीदतीति निषृतीति शुचिषद्वसुस्तेजोरूपः अंतरिक्षे आकाशे सीदतीत्यंतरिक्षसत् हो-
ता यज्ञे होता मंत्रेण देवाह्वानकर्ता वेदिषत् यज्ञवेद्यामध्वर्युरूपेण सीदतीति वेदिषत् अतिथिरनित्यस्थितिः क्वचिदपि न स्थायी नित्यभ्रमणशीलः दुरोण-
सत् दुरोणे गृहे सीदति गृहस्थरूपोऽप्ययमित्यर्थः। नृषत् नृषु मनुष्येषु सीदति जीवस्वरूपतया स्थितः वरसत् वरेषूत्कृष्टस्थानेषु स्वर्गादिषु सीदती-
ति वरसत् ऋतसत् ऋते सत्ये सीदति परमात्मेत्यर्थः। व्योमसत् व्योम अंतरिक्षं तत्र सीदतीति ज्योतिःस्वरूपेण। अब्जाः अप्सु जलेषु जायते अग्निस्वरूपे-
ण॥ गोजाः गवि पृथिव्यां जायते जरायुजांडजःस्वेदजोद्भिजरूपेण। ऋतजाः ऋते सत्ये जायते त्रयीरूपेण। अद्रिजाः अद्रौ पाषाणात्मके पर्वते जायते
स्फुलिंगस्वरूपेणेत्यर्थः। ऋतं सूक्ष्मं बृहत् सर्वव्यापितयानवच्छिन्नप्रमाण इत्यर्थः। अत्र ऋतमिति। ऋगतावित्यस्य धातोः क्तेन रूपम्॥ अनया कंडिक-
याऽयमेव ब्रह्मस्वरूपः सर्वत्र स्थितः सर्वत्र जातः सर्वत्र गतः सर्वव्यापक इत्यादित्यः स्तूयते। इति हंसः शुचिषन्मंत्रव्याख्या। अनेन मंत्रेणादित्यायार्घ्यं द-
त्वा अदृश्रमस्येति मंत्रेणादित्यमुपतिष्ठेत्। तस्य प्रजापतिऋषिर्गायत्री छंदः सूर्यो देवता द्वादशग्राह्यग्रहणे विनियोगः। मंत्रो यथा। ॐ अदृश्रम-
स्य केतवो विरश्मयो जनाँ अनु। भ्राजंतो अग्नयो यथा। अस्यार्थः। अस्य सूर्यस्य विरश्मयो विविधा रश्मयः अदृश्रं दृश्यंत इत्यर्थः। किंभूताः केतवः ज्ञान-
हेतवः अंधकारनाशकतया जनानां धलोकाननुगताः भ्राजंतः देदीप्यमानाः कथं दृश्यंते॥ अग्नयो यथा अग्नयो गार्हपत्याहवनीयदक्षिणाग्नयः
पुरस्कृताः संतो देदीप्यमाना दृश्यंते। तथा च आदित्यस्य रश्मयोऽपीत्यादित्यस्तुतिरेव वाक्यार्थः। अदृश्रमिति। दृशिर प्रेक्षणे इत्यस्य धातोः कर्मणि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमपुरुषस्यबहुवचनेछांदसंरूपम्।इत्यहस्यमंत्रव्याख्या।ततोदेवपूजामारभेत्।तत्रपद्मपुराणम्।एवंसूर्यंनमस्कृत्यत्रिःकृत्वाचप्रदक्षिणाम्।द्विजंगांकांचनंस्पृष्ट्वाततोविष्णुगृहंव्रजेत्।तथाविष्णुपुराणम्।ततोगृहार्चनंकुर्यादभीष्टसुरपूजनम्।जलाभिषेकपुष्पाणांधूपानांचनिवेदनैः।अत्रयद्यपिसूर्यादिदेवतापूजासुपौराणिकादिमंत्रावहवएवसंविहिताःसंतितथाप्यस्माभिर्वैदिकमंत्रव्याख्यानस्योपात्तत्वात्तत्प्रसंगेनैवानुष्ठानाभिधानंतात्पर्यंतुवैदिकमंत्रव्याख्यायामेव।अतोवैदिकाएवमंत्रालिख्यंते।एवंसतिनवग्रहपूजाप्रकरणेयाज्ञवल्क्येनआकृष्णेनेत्यादिविहितात्एतावतादृत्यादित्यपूजातेनैवमंत्रेणकरणीया।आकृष्णेनिमंत्रस्यहिरण्यस्तूपऋषिरांगिरसोवात्रिष्टुपछंदःसूर्योदेवतासर्वमेधेसौर्यग्रहणेविनियोगः।मंत्रोयथा।ॐआकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंचहिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्।अस्यार्थः।सविताआदित्यःआयातिआगच्छतिकिंभूतोदेवःस्तुत्यादियुक्तःकेनरथेनकिंभूतेनहिरण्ययेनसुवर्णमयेनकिंकुर्वन्भुवनानिपश्यन्भुवनवर्तिनोमनुष्यान्कर्मभूमिस्थान्प्रकाशंपापकत्वंशिक्षमाणःनिरीक्ष्यमाणइत्यर्थः।नकेवलमपरंचनिवेशयन्स्वेषुस्वेषुव्यापारेषुसमावेशयन्किंअमृतंदेवंमर्त्यंमनुष्यंचमनुष्याहिसूर्योदयेस्वकर्मसुवर्तमानादेवाश्चोणयंतिप्रीताश्चदेवनाहृष्टाःदिनामनुष्यानाप्यायंतीतिदेवमनुष्ययोःपरस्परव्यापारसमावेशः।पुनःकिंभूतःसविताआवर्तमानःपुनःपुनरनुदिवसंतमेवदेशमागच्छन्केनसहरजसारात्रिकालेनसहकिंभूतेनकृष्णेनमलिनेनप्रायेणरात्रिकालेपुण्यकर्मणामनुत्पादात्रिकालस्यकृष्णत्वमुक्तम्।अयंवाक्यार्थः।यःसवितादेवमनुष्यव्यापारस्यव्यवस्थापकोयश्चकर्मभूमिवर्तिनांपुण्यानामपिसाक्षिभूतःप्रत्यहसमायातितस्मादर्हणंकुर्मइति।तत्राकृष्णेनेतिव्यवहितोप्याङ्न्यतेव्यवहिताश्चेतिपाणिनिस्मरणाद्वर्तमानपदेनसहसंबध्यतेतेनआवर्तमानइतिव्याख्यानम्।यथारथेनइत्यत्रस्थितस्यआङ्संबंधाकारस्ययातीतिक्रियापदेनसंबंधःकृत्यवास्त्यसाध्वीहिरण्ययानिछंदसीतिपाणिनिस्मरणाद्धिरण्यार्थेहिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्रा.स. राय शब्दो निपातितः इत्याकृतस्य मंत्रस्य व्याख्या। यस्य पुनर्नवग्रहानेव पूजितुमिच्छा भवति तेन गणपतिपूजापूर्वकं याज्ञवल्क्योक्तैर्मंत्रैर्नवग्रहपूजा कार्या
३७ तथा ग्रह यज्ञे आदित्यादीनां मंत्रविधौ याज्ञवल्क्यः आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत्॥ उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः॥ बृहस्पते अति
यदर्यस्तथैवान्नात्परिस्रुतः। शन्नो देवीस्तथा कांडात्केतुं कृण्वन्निमाः क्रमात्॥ गणपतिमंत्रस्य प्रजापतिरृषिर्यजुषां छन्दो नास्ति गणपतिप्रियपतिनिधिप
तिअश्वा देवता अश्वमेधे अश्वप्रदक्षिणकरणे विनियोगः। मंत्रो यथा। ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधि
पतिं हवामहे वसो मम हे मम वसो सर्वस्वभूत त्वां त्वां हवामहे आह्वयामः किंभूतं गणानां मध्ये गणपतिं गणा रुद्रपरिषदास्तेषां पतिं स्वामिनं पुनरपि त्वां
हवामहे किंभूतं प्रियाणां मध्ये प्रियपतिं प्रियाण्यभिलषितानि भार्यादीनि तेषां पतिं पुनरपि त्वां हवामहे किंभूतं निधीनां मध्ये निधिपतिं निधयः पद्माद
यस्तेषां पतिं। अत्र भौतिकविघ्नोपशमनाय भार्यादिप्रियलाभाय धनलाभाय च त्वां गणपतिं प्रियपतिं निधिपतिं च आह्वयाम इति वाक्यार्थः। हवामह इति
तिङं तिङो भवन्तीति उत्तमपुरुषएकवचनस्थाने बहुवचनम्। इति गणानां त्वा मंत्रव्याख्या। आदित्यमंत्रो व्याख्यात एव। सोममंत्रस्य वरुण ऋषिर
ग्निर्देवता यजुषां छन्दो नास्ति राजसूये यजमानदक्षिणबाहुग्रहणपूर्वकजपे विनियोगः। मंत्रो यथा। ॐ इमं देवा असपत्नं सुवध्वं महते क्षत्राय मह
ते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशे। अस्यार्थः। अत्र प्रकृतत्वादिदंशब्देन सोमः परामृष्यते। हे देवाः इमं सोमं सु
वध्वं जनयत किंभूतं असपत्नं सपत्नः शत्रुस्तेन रहितं सोम्यत्वेन सर्वप्रियत्वात्। एतज्जननस्य किं प्रयोजनमित्याह महते क्षत्राय क्षत्रत्वाय राजभावाय लोकपा
लत्वायेति यावत्। ज्येष्ठाय ज्येष्ठभावाय सर्वोत्तमत्वाय किंभूताय महते सातिशयाय पुनः कीदृशमिमं प्रत्यक्षदृश्यममुं नित्यपरोक्षं परोक्षं परं ब्रह्मस्वरूपं अमु एम
ष्य सूर्यस्य पुत्रं जातं सुषुम्णाभिधानसूर्यरश्मेः सोमत्वात्। अमुष्या दिशः पुत्रं अत्रिमहर्षेश्चक्षुर्निःसृतं तेजो दिशा धृतं सोमो जायत इति पुराणेषु श्रूयते ३७

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदभिप्रायेणैतत्। किमर्थमयं दिशा धृतमि   त्यत आह। अस्यै विशे अस्यै प्रजायै तादर्थ्ये चतुर्थी आप्यायनप्रकाशादिभिः प्रजानामनुग्रहायेत्यर्थः। लोकपा
लायश्चेष्टत्वाय आप्यायनप्रकाशादिभिर्लोकानुग्रहाय चायमेव सोमो देवैर्जन्यते इति सोमस्तुतिर्वाक्यार्थः। इति इमं देवा मंत्रव्याख्या। मंगलमंत्रस्य विरू
पाक्षिरस ऋषिस्त्रिष्टुप् छंदोऽग्निर्देवता अग्न्युपस्थाने विनियोगः। मंत्रो यथा॥ ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं। अपां रेतांसि जिन्वति। याज्ञवल्क्यम
तस्य पुराणादावस्य मंत्रस्य भूजायासुपयोगाद्भौमप्रकाशत्वं श्रुतिषु श्रूयते। अतोऽयमिति पदेन भौमोऽभिधीयते। तथा च सत्ययं मंत्रार्थः। अयं भौमः अग्निर्मूर्द्धा
अत्यंततेजोरूपतया नितांतलोहितत्वात् अग्निमूर्द्धत्वमेव संलक्ष्यते दिवः ककुत् दिव आकाशस्य ककुच्चिन्हं भूषणमित्यर्थः वृष्टिकर्तृत्वादपां जलानां प
तिः अतः पृथिव्या रेतांसि बीजानि अन्नोत्पत्त्या जिन्वति प्रीणाति सफलीकरोतीत्यर्थः। अत्राग्निरिति विभक्तिपरिणामात् षष्ठ्यर्थे प्रथमेत्यर्थः। इति भौममंत्र
व्याख्या॥ बुधमंत्रस्य परमेष्ठी ऋषिस्त्रिष्टुप् छंदोऽग्निर्देवता पुनरग्न्युपस्थाने विनियोगः॥ मंत्रो यथा। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते संसृजे
थामयं च। अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत। अस्यार्थः। अत्र याज्ञवल्क्यस्वरसात् त्वमिति पदेन बुधोऽभिधीयते तथा सत्ययं
मंत्रार्थः। हे अग्ने उद्बुध्यस्व उद्बुद्धो भव हे बुध त्वं च प्रतिजागृहि अस्मिन्क्रियमाणे अवहितो भव युवां बुधाग्नी इष्टापूर्ते इष्टं यज्ञादि पूर्तं खातादि ते इष्टापूर्ते
संसृजेथाः यजमानं संसर्गं कुरुत इति ग्रहयज्ञे ऋत्विक्प्रार्थना। किंच ऋत्विजा यजमानस्य विश्वेदेवैः सह सामानाधिकरण्यमनेन मंत्रेणाचोच्यते। स
धस्थ इति ष्ठा गतिनिवृत्तावित्यस्य सहोपपदस्य सधमादस्थयोश्छंदसीति सूत्रेण सहस्य स्थाने सधादेशः। इति बुधमंत्रव्याख्या। यथा बृहस्पतिमंत्रस्य गृत्समद ऋ
षिस्त्रिष्टुप् छंदो ब्रह्मा देवता बार्हस्पत्यग्रहणे विनियोगः। मंत्रो यथा॥ ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋत
प्रजात तदस्मासु द्रविणं धेहि चित्रं। हे बृहस्पते अति यदर्य इति। हे बृहस्पते किंभूत ऋतप्रजात ऋतात् सत्यात् अविनाशिनः प्रजात द्रविणं धनमस्मासु
त्वास्मिन् सधस्थे पूजास्थाने। किंभूते। अध्युत्तरस्मिन् सर्वोत्कृष्टे अयं यजमानो विश्वेदेवाश्च सीदतीति। बु॰ पं॰ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· घेहिस्यापय किंभूतं अति अतिशयितं कतरत्ततनु यद्वतं अर्य्यः ईश्वरः आर्हाैपूजयेत्॥ अस्तुनावन्निईनरई श्वरोपितत्पूजयतीत्यर्थः। किंचयद्धनंलोकेषुवि
३८ भातिशोभते किंभूतं द्युमद्दीप्तिमत्। धनवानेवदीप्तिशालीभवतीत्यभिप्रायः। पुनः किंभूतं क्रतुमत् यज्ञवत् यज्ञोपिधनवद्भिरेवक्रियतइत्यर्थः। यच्छवसा
वलेनदीदयत् रक्ष्यतेपुनः किंभूतं चित्रं नानाविधं गोवस्त्रहिरण्यादिरूपमित्यर्थः। अत्रमंत्रे ऋत प्रजातइतिहे हस्पतिस्तुलाधनमस्मासुधेहीतिवाक्यार्थः
इतिहहस्पतिमंत्रव्याख्या। शुक्रमंत्रस्यप्रजापतिऋषिरतिजगतीछंदोग्निसरस्वतींद्रादेवताः सौत्रामण्यांपयोग्रहोपस्थानेविनियोगः। मंत्रोयथा। ॐअ
न्नात्परिस्रुतोरसंब्रह्मणाव्यपिवत्क्षत्रंपयः। सोमंप्रजापतिः ऋतेनसत्यमिंद्रियंविपानंशुक्रमंधसइंद्रस्येंद्रियमिदंपयोमृतंमधु। अस्यार्थः। प्रजापतिर्ब्रह्म
अन्नाद्धविषःपरिस्रुतः परिस्रवतोभावेनस्तुतंगलितंरसंसारंव्यपिवत् पीतवान् कीदृशंक्षत्रं ओजस्वि किंचपयः क्षीरंसोमंसोमरसंप्रजापतिर्व्यपिवत् इति
तेनैवसंवंधः। केनसाधनव्यपिवत् ब्रह्मणावेदेनकिंभूतेनऋतेनप्रपंचास्पृष्टेनमंत्रस्वरूपेणेत्यर्थः। इदमन्नरसंपयः सोमस्वरूपमंधसः अन्नात्संभूतं
व्यपानंप्रजापतेर्विसृष्टंपानंशुक्रंवीजमभवदित्यध्याहार्यं किंभूतंसत्यं अविनाशि इंद्रियंसकलंसंसारकारणंव्यपानंविशिष्टंपानंपुनः किंभूतंइन्द्रस्यदे
वराजस्येंद्रियंवीर्यंपयः क्षीरममृतममरत्वकारणंमधुपितॄणांतृप्तिकारणंअत्रपरिस्रुतइतिद्वितीयायांप्रथमामंत्रेदत्तहविषाप्रजापतिभुक्तानांपरिणा
मभूतशुक्रंसकलसंसारोत्पत्तिस्थितिकारणमितिशुक्रस्तुतिर्वाक्यार्थः। इतिशुक्रमंत्रव्याख्या। शनिमंत्रस्यदध्यङ्ङाथर्वणऋषिर्गायत्रीछंदः आपो
देवतामहावीरशांतिकरणेविनियोगः। मंत्रोयथा॥ ॐशन्नोदेवीरभिष्टयआपोभवंतुपीतयेशंयोरभिस्रवंतुनः॥ अस्यार्थः॥ अस्यमंत्रस्यमत्स्य
पुराणेयाज्ञवल्क्यादिभिः शनैश्चरपूजादौविनियोगनियमात्सुरव्यतयाशनैश्चरनामाश्रवणेपिआदित्यप्रभवत्वेनापांशनैश्चरस्याभेदोपचारात्। एम·
आपइतिपदेनशनैश्चरएवाभिमतः तेनायंमंत्रार्थः। आपोदेवीःशनैश्चरोदेवःनोऽस्माकंशंकल्याणंभवंतुकिमर्थमभिष्टयेउपचयायपीतयेहृष्टिहा ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारेण तृप्तिहेतवे पानाय भवंतु। किंच शंयोः शं कल्याणं तस्य योगाय चाभिस्रवंतु अभिमुखं गच्छंत्विति भावः। अतस्कस्मिन्नपि शनैश्चरे वाच्ये अपशब्दस्य
नित्यबहुवचनांतत्वाद्बहुवचनेन तद्गुणतया च भवंतु किमर्थं अभिष्टये उपचंदं बहुवचनं। इति शनिमंत्रव्याख्या। राहुमंत्रस्याग्निऋषिरनुष्टुप्छंदो दूर्वेष्ट
कादेवता दूर्वेष्टको पधाने विनियोगः। मंत्रो यथा। ॐ काण्डात्काण्डात्प्ररोहंती परुषः परुषः परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च। अस्यार्थः। हे दूर्वे कां
डात्कांडात्पर्वणः पर्वणः प्रतिपर्वेत्यर्थः परुषः परुषो ग्रंथितो ग्रंथितः परिग्रंथि परि सर्वतो भावेन प्ररोहंती जायमाना त्वं यथा तथैव नोऽस्मान् प्रतनु
विस्तारय कथं सहस्रेण शतेन च यथा त्वं प्रतिपर्व प्रतिग्रंथि प्रजायसे तथास्मानपि सहस्रशतसंख्यपुत्रपौत्रादिभिर्विस्तारयेति वाक्यार्थः। अनेन मंत्रे
ण ग्रहहोमे राहवे ह्रूयमाना दूर्वा प्रकाश्य स्वीयपुत्रादिं विस्तारयेति याच पाराहोः पूजादिकमपि क्रियते। इति राहुमंत्रव्याख्या। केतुमंत्रस्य मधुच्छंद — ऋ।
षिरग्निर्देवता गायत्री छंदः केत्वभिमंत्रणे विनियोगः। मंत्रो यथा। ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः। अस्यार्थः। हे केतो ध्व
जरूप त्वं समजायथाः संजातो भव केर्जन्यमानः उषद्भिर्वसद्भिर्गृहस्थैरित्यर्थः। किं कुर्वन् मर्याः मर्त्येभ्यो मनुष्येभ्यः केतुं ज्ञानं कृण्वन् कुर्वन् केवलं स।
ज्ञानं कुर्वन् अपि पेशः सुवर्णं कुर्वन् पेशः शब्देन सुवर्णसौंदर्यं वाऽभिधीयते इति निघंटः। तथा च शरीरं ब्राह्मणं पेशस्कारी पेशसो मात्रामुपादायेत्या
दिके किंभूतेभ्यो मनुष्येभ्यः अकेतवे अज्ञानेभ्यः पुनः किंभूतेभ्यः अपेशसे असुवर्णेभ्यः निर्धनेभ्यः कुरूपेभ्यो वा केतुमिति निचितिसंज्ञानमित्यस्य धा
तोरूपं अकेतवे अपेशसे इति बहुवचने एकवचनं मयादिति चतुर्थ्याः प्रथमा। अथवा वाक्यार्थः। हे केतो यद्यपि त्वोत्पत्ति लोकानामनुत्पातार्थमेव भवति तथा
पि अज्ञेभ्यो ज्ञानं कुरूपेभ्यो रूपं कुर्वन् लोकानां शुभार्थं संजातो भवेति केतो याचा। इति सूर्यादिनवग्रहमंत्रव्याख्या। हलायुधेन गौडेन्द्र धर्मकोषस्य।
कारिणः॥ एतत्पुरुषसूक्तस्य व्याख्यानं प्रतिपद्यते। अथ पुरुषसूक्तपूजा। एषा यद्यपि वैश्वदेव धर्मे सर्वस्वरावतद्विशेषेण प्रतिपादिता तथापि पुरुष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्व्याप्रकार

ग्रा·स· ३९

सूक्तमंत्रव्याकप्रसंगादेतदीयमाहात्म्यं पुनरपि किंचिदभिधीयते।वाराहपुराणे।विष्णुरुवाच।पौरुषं सूक्तमास्थाय ये यजंति द्विजास्तु मां।संहितां वाप्य
थास्थाय तेमामाप्नुवंति ब्राह्मणाः।योगियाज्ञवल्क्यनृसिंहपुराणयोः।दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव च।अर्चितं स्याज्जगदिदं तेन सर्वं चरा
चरम्।तथा नृसिंहपुराणे।एतत्पठेत्केवलमेव सूक्तं दिने दिने नेमानि च शुद्धवृत्तिः।स सर्वदुःखं परिहाय वैष्णवं पदं प्रयात्यच्युतभक्तियुक्तो नरः।विष्णु
धर्मोत्तरीये द्वितीयकांडे।राम उवाच।एवं मंत्रं समाचक्ष्व सर्वकर्मकरं परम्।ऐहिकं सर्वधर्मज्ञ पारलौकिकमेव च।पुष्कर उवाच।प्रतिवेदं महाभाग य
त्सूक्तं पौरुषं स्मृतम्।सर्वकर्मकरं पुण्यं पवित्रं पापसूदनम्।एकैकयार्चा राम स्नातो दत्त्वा जलांजलीन्।पौरुषेण च सूक्तेन मुच्यते सर्वकिल्बिषात्।अं
तर्जलगतो जप्त्वा तथा सूक्तं तु पौरुषम्।सर्वकल्मषनिर्मुक्तो यथेष्टां लभते गतिम्।एकैकयार्चा स्नातः पुष्पं धूपं निवेदयेत्।पुरुषाय जलं राम सर्वपा
पैः प्रमुच्यते।एकैकयार्चा स्नातो दत्त्वा राम फलं जलं।सर्वकाममवाप्नोति राम यन्मनसेप्सितम्।पौरुषेण तु सूक्तेन प्राणायामो महाफलः।जपहोमौ
तथा राम सर्वकल्मषनाशनौ।सुरापो ब्रह्महा स्तेयं तथैव गुरुतल्पगः।पापेभ्यो विप्रमुच्यंते जप्त्वा सूक्तं तु पौरुषम्।कृच्छ्रे विशोधितः पूर्वं नद्यादेः सलि
ले पिबा।।स्नातस्तु पौरुषं सूक्तं जपन्नित्यमतंद्रितः।संवत्सरेण देवेशं वासुदेवं स पश्यति स्वयमेवं महाभाग शाकमूलफलाशनः।सर्वान्कामानवा
प्नोति यद्यन्मनसेच्छति।श्रियमग्र्यां तथा रूपं जीवितं दीर्घमेव च।अणिमा लघिमा प्राप्तिर्महिमा च भृगूत्तम।ईशित्वं च वशित्वं च प्राकाम्यं भृगुनंद
नम्।यत्तु कामावसायित्वं तत्स्नात्वा प्राप्नोति मानवः।पुनरप्यथान्यद्धि यत्किंचिन्मनसेच्छति।अकामः पौरुषं सूक्तं जप्त्वा नित्यमतंद्रितः।।तत्र यातिम
हाभाग यद्विष्णोः परमं पदम्।मंगल्यमेतत्परमं पवित्रं संसारदुःखौघविनाशकारि।सुखप्रदं धर्मविदां नराणां मनोरथावाप्तिकरं प्रदिष्टम्।कूर्म
पुराणे।प्रदद्याद्वाथ पुष्पाणि सूक्तेन पुरुषेण तु।आपो वा देवताः सर्वास्तेन सम्यक्समर्चिताः।तथा च रहस्ये।।मनुः।जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरु राम ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तल्पगः। पूतो भवतीत्यधिकारे। वृद्धहारीतः। त्रिरात्रोपोषितः पौरुषं सूक्तं जपन् होमाभ्यां गुरुतल्पगः। तथा गुरुतल्पगाधिकारे वृद्धमनुः। पौरुषं सूक्तमावर्त्य नरस्त्वेव विशुध्यति। कूर्मपुराणम्। तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम्। तद्विष्णोरिति मंत्रेण सूक्तेन पौरुषेण तु। नैताभ्यां सदृशो मंत्रो वेदेषूक्तश्चतुर्ष्वपि। वृद्धहारीतः। पुरुषसूक्तेन प्रत्यृचं पुरुषाय पुष्पांजलिं दद्यात् जलांजलींश्च तथा स्नातः पवित्रपाणिर्यथाशक्ति जपेत् विशेषतः सावित्रीं पुरुषसूक्तं वा नैताभ्यामधिकमस्तीति। त्रिरात्रोपोषित इत्यधिकारे योगियाज्ञवल्क्यः। सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पगः। गौर्देया कर्मणोऽस्यान्ते पृथगेव पयस्विनी। इति पुरुषसूक्तस्य माहात्म्यम्। अथ विष्णुपूजायां पुरुषसूक्तमंत्रव्याख्या॥ तत्र सहस्रशीर्षा पुरुष इत्यादिसप्तस्यास-त्रिंशत्तानामेवानुष्टुप्छंदः। पंचदश त्रिष्टुप्छंदो यज्ञेन यज्ञमित्यादि त्रिषु कंडिकासु मेतज्जपकंडिकानां षोडशकंडिकानां यद्यपि पुरुषमेधयज्ञे प्रोक्षणीयपुरुषस्यानुयोमि स्रियेतयज्ञपुरुषस्तुतौ च तत्सम्प्रभृति भिर्यजुर्वेदभाष्यकारैर्विनियोगो व्याख्यातस्तथापि आद्येमावाहयेद्देवमित्यादिषोडशोपचारेण कुर्यादित्यतत्पथेन षोडशानामेकं कंडिकानां पूजायां नरसिंहपुराणे विनियोगप्रतिपादनादस्माभिरभिधीयते। विश्वव्यापकस्य विश्वान्तर्यामिणो विज्ञानमयस्यानन्दस्वरूपिणो भगवतः पुरुषस्य पूजायामुपयोगो वर्णितः। अथ षोडशर्चस्य नारायण ऋषिरनुष्टुप्छंदो जगद्बीजपुरुषो देवता। यथा नरसिंहपुराणे अनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता। पुरुषो हि जगद्बीजमृषिर्नारायणः परः इति विनियोगश्च। पुरुषमेधयज्ञे प्रोक्षणीयपुरुषमेधस्तुतौ कल्पसूत्रकृता कात्यायनेनोक्तः। तत्र ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशांगुलम्॥ १ अस्यार्थः। यः पुरुषः नाभेरूर्द्ध्वं दशांगुलमिति अतिक्रम्यार्थवशादित्ये चैवविज्ञानरूपः अतिष्ठत् किंभूतः सहस्रशीर्षा सहस्रशब्दोऽसंख्यातवचनः नेतासंख्यातवचनः तेनासंख्यातशिराः पुनः किंभूतः सहस्राक्षः अक्षशब्दो ज्ञानेन्द्रियोपलक्षकः तानि च षट् पुनः किंभूतः सहस्रपात् पादशब्दोपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रा·स· कर्मेंद्रियोपलक्षकः तानिचपंच एतेनत्रैलोक्यवर्तिनांप्राणिनांयानिशिरांसिबुद्धींद्रियाणिकर्मेन्द्रियाणिचतानिसर्वाणिअस्यैवपुरुषस्येत्यर्थः॥ एतेना
४० सौसहस्राक्षः सहस्रशिराः सहस्रपात् सर्वपुरुषएव। एतेनवर्तमानभूतभविष्यत्कालगोचरोभगवानधिकृतः किंकृत्वाऽतिष्ठत् भूमिंसर्वतस्पृत्वाव्या
प्यभूमिशब्दोभूम्याधारप्राणिदेहवचनः तेनसर्वभावेनत्रैलोक्यवर्तिनांपार्थिवदेहान्व्याप्येत्यर्थः। अनेनसहस्रशीर्षत्वादिनापद्यापकत्वमुपक्रां
तंतद्देवस्फुटीकृतम्। सर्वदेहिनांहृदयस्थंविज्ञानरूपंपुरुषंसहस्रशीर्षेत्यादिरूपोत्कीर्तनेनाभिसमुखीकृत्यसोस्यांमक्रियमाणपूजायांसान्निध्य
मुपकल्पयत्विति वाक्यार्थः अत्रनाभेरूर्द्ध्वंदशांगुलमतिक्रम्यहृदयंभवतीतिसकललोकानुभवसिद्धमेवात्रपुरुषस्तिष्ठतीति। यमोवैवस्वतोदेवोय
स्तवैषहृदिस्थितइतिमनुवचनंप्रमाणम्॥ तत्रचसंख्यासुपूर्वस्येत्यनेनसहस्रशब्दपूर्वस्यपादशब्दस्याकारलोपः तेनसहस्रपादितिभवतिस्पृ
त्वेतिस्पृङ्व्यायामइत्यस्माद्धातोः क्त्वाप्रत्ययेनरूपंसर्वतस्पृत्वेतिकस्कादित्वाद्विसर्जनीयस्यसः॥ ॐ पुरुषएवेदं सर्वंयद्भूतंयच्चभाव्यम्। उतामृ
तत्वस्येशानोयदन्नेनातिरोहति॥२॥ अस्यार्थः। इदंयत्किंचिद्वर्तमानकालीनंतत्सर्वंपुरुषएवसएवेत्यर्थः। नकेवलंवर्तमानकालीनंपुरुषः
यद्भूतंयदतीतकालीनंयच्चभाव्यंयदपिभविष्यत्कालीनंतदपिसर्वंपुरुषएव एतेनवर्तमानभूतभविष्यत्कालस्वरूपोभगवानविकृतस्वरूपइतिदर्शि
तम् नकेवलमेवंउतएवंचयदन्नेनादनीयेनभक्तादिनातिरोहतिअतिशयेनजन्मलभतेतत्सर्वंचपुरुषएवयेमनुष्यादयोजंगमाभक्ताद्याहारेणजन्मलभ
न्तेयेचस्थावराः वृक्षशैलादयोजलसंतर्पणरूपेणाहारेणजन्मलभंतेतेसर्वएवतत्पुरुषस्वरूपइत्यर्थः पुनः किंभूतोसौपुरुषः अमृतत्वस्यमोक्षस्यई
शानः प्रभुः मोक्षदाताचसर्वएवपुरुषइत्यर्थः अत्राप्यनेनमंत्रेणाभिमुखीकृत्यभगवानेतस्मिन्कुसुमादिमयेआसनेऽस्माभिर्दत्तेउपवेशनंकरोत्वित्याश राम·
सोवाक्यार्थः॥ ॐ एतावानस्यमहिमातोज्यायांश्चपूरुषः। पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि॥ अस्यार्थः। अस्यपुरुषस्यएतावान्महिमा । ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्पूर्वं कंडिकाद्वयोक्तसर्वदेशकालव्यापित्वं संसारापवर्गप्रभुत्वरूपं नाम अतोस्मात्कारणात्पुरुषः ज्यायान्महत्तरः यतो यं ज्यायान् श्रेष्ठः अतः पाद
श्चास्य विश्वा भूतानीति चराचरव्यापकानि पंचमहाभूतानि अस्य पुरुषस्यापरस्त्व त्रिपात्स्याद्त्रयं ऋग्यजुःसामात्मकं सूर्यस्वरूपममृतं मोक्षद्वारकं
स्मादिवि सूर्यमंडलभेदद्वारेण गच्छतां मुमुक्षूणां परमात्मनिलयात्मको सद्वारमिति भावः एतेनास्य भगवतो विश्वपाद इति पादस्तुत्वात्संपाद्य
दीयते॥ ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने अभि। अस्यार्थः। अस्य चतुष्पाल्लक्षणस्य पु
रुषस्य योसौ त्रिपात्पुरुष ऋग्यजुःसामात्मलक्षणो भगवानादित्यः सोभ्युदैत् अभ्युदितवान् किंभूतः ऊर्द्ध्वः कर्मबंधनिबंधानां स्थावरजंगमानामु
परिभूत इत्यर्थः। किंचास्य चतुष्पाल्लक्षणस्य पुरुषस्य पादश्चतुर्थांशः हिरण्यगर्भतया इह जगत्यभवत् प्रथमतः सत्तामात्रेणात्मानमकरोत्। इह
किंभूते जगति साशनानशने भोक्तरि चाभोक्तरि च येषां सुकृतदुष्कृते अधिकारस्ते भोक्तारो ब्राह्मणादयः येषामनधिकारस्ते अभोक्तारः कृमिवृक्षप्रभृ
तयः तदेवं कर्माधिकारिणि जगति अपरः पादो व्यापकतया अभवत्। प्रथमं सत्तामात्रेणातिष्ठत् ततः पुनस्तदनंतरं विष्वङ् व्यक्रामत् विश्वं
ससर्वेशः व्यक्रामद्व्याप्तवान् कर्माधिकारीणामनधिकारिणां च शरीराणि व्याप्यावस्थानमकरोदिति यावत्। अत्र विषुशब्दपूर्वादंचुगतिपूजनयो
रित्यस्माद्धातोः क्विन्प्रत्यये ति ष्वङ् इति रूपं अभ्युदैदित्यत्र साशनानशने अभीत्यत्र च व्यवधानस्थितो प्यभिरुपसर्गः क्रियया सह संबध्यते व्यवहिता
श्चेति पाणिनिवचनात्। अत्र च यो भगवांस्त्रिपाल्लक्षणो हरहर अभ्युदैनीति नित्यातिथिरूपः स्तूयते तस्मै अर्घ्यमनेन दीयते। ॐ ततो विराडजायत विरा
जो अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः। अस्यार्थः। ततः पुरुषाद्धिरण्यगर्भाद्विराडजायत ब्रह्मा अभवदित्यर्थः। ततोऽनंतरं तस्माद्विराजो
ब्रह्मणः पुरुषो मनुरध्यजायत स मनुः पुरोग्रे पश्चादपि जातः सन् भूमिमत्यरिच्यत अतिरिक्तो भूत् अधिको भूदिति यावत् ॥ अत्र भूमिपदं देशोपलक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा॰ स॰ णार्थी पुरः पश्चादिति कालोपलक्षकं एतेन सृष्टौ क्वचिदपि देशे काले च तत्समनोः पुत्रपौत्रसमृद्धिभिः प्रतिमन्त्रोऽन्त्रोग्रश्चादपि माभूदित्यभिप्रायः।

४१ अनेन मंत्रेण चाभिमुखीकृत्यासदनमाचमनोयं भगवान्गृह्णातित्याशंसावाक्यार्थः॥ ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं। पशूंस्ताश्चक्रे वायव्या

नारण्या ग्राम्याश्चये। अस्यार्थः। तस्मादितियेन पदेन सकलचराचरात्मकविश्वमेतद्व्याप्तमिति पादोस्येहाभवत्पुनरित्युपरितनकंडिकयाप्रतिपादितं तेन

स्मात्पुरुषस्य चतुर्थपादात् किं भूतात् सर्वहुतः सर्वहुतसंज्ञयज्ञस्वरूपात् पृषदाज्यं हविः संभृतं उत्पन्नं तत्पृषदाज्यं कर्तृभूतं पशूंश्चक्रे कृतवान् का

न्पशून् से आरण्या ग्राम्याश्च तान् किं भूतान् वायव्यान् वायुदेवत्यान् अत्रापि अनेन मंत्रेण पुरुषमभिमुखीकृत्यास्मद्दत्तं स्नानं गृह्णातीति वाक्या

र्थः। ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। अस्यार्थः। तस्मात्सर्वहुतयज्ञसंज्ञपुरुषाद् ऋचः ऋग्वे

दः सामानि सामवेदश्च जज्ञिरे जाता इत्यर्थः। तस्माद्देवच्छंदांसि गायत्री त्रिष्टुबादीनि जज्ञिरे जातानि तस्माद्देव यजुः यजुर्वेदो अजायत जात इत्यर्थः।

एतेन ब्राह्मणादि वर्णचतुष्टयस्वरूपात्त्रयी सकलमंत्राणामाच्छादनभूतं छंदो भगवत एव समुत्पन्नमित्युक्तं भवति। त्रयी प्रावरणमिति विष्णुपुराणे। स

र्वेषामेव वर्णानां त्रयी प्रावरणं स्मृतम्। तमुत्सृजति यो मोहात्तेवै नग्नाः प्रकीर्तिताः। छंदः सामाच्छादने येयोगिया त्वक्वल्कः। छादनाच्छंद उद्दिष्टं वाससी इव चा

कृतेः। तदयमभिप्रायः त्वत्त एव भगवद्रूपमन्त्रमाच्छादनं तुभ्यं ददामीति मंत्रार्थः। ॐ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्मा

ज्जाता अजावयः। अस्यार्थः। तस्मात्सर्वहुतयज्ञस्वरूपात्पुरुषात् अश्वा ये के चोभयादतः उभयतो दंताः पशवस्तेप्यजायन्त जाताः तस्माद्देव गावश्च ज

ज्ञिरे जाताः तस्मादेवाजावयश्च जाताः अश्वा गामेषाश्चोत्पन्ना इत्यर्थः उभयादत इत्यन्येषामपि दृश्यते इति दीर्घः गावो हेति ह प्रकारार्थो व्ययसमुच्चये च। अ राम

त्र कंडिकात्रमेयत्किंचिद्विरस्माकं यत्साधने विद्यार्थवादमंत्रात्मकाश्च त्रयो वेदाश्च तत्सर्वं पुरुषोत्तमदेवपुरुषमेव यागस्वरूपाज्ञानमिति वाक्या ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थः। तद्‌दृष्ट्वापि भगवंतमभिमुखीकृत्यानेन मंत्रेण भगवान्स्माभिर्दीयमानं यज्ञोपवीतं गृह्णात्विति मंत्रार्थः॥ ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजंत साध्या ऋषयश्च ये॥ अस्यार्थः। तं पुरुषं यज्ञसाधनं भूतं बर्हिषि कुशेषु संस्थाप्य देवा ब्रह्मादयः साध्याश्च साध्यनामानो गणदेवता भ
ऋषयश्च मरीच्यादयः प्रौक्षन्प्रोक्षितवंतः न केवलं प्रौक्षन्नपितु तेन पुरुषेण यज्ञसाधनभूतेनायजंत यागं कृतवंतः। अत्र यज्ञशब्देन कार्यकारणोपचारा
द्यज्ञसाधनमभिधीयते। प्रोक्षणग्रहणं सकलसंस्कारोपलक्षणार्थं एतेनैतदुक्तं भवति। तत्पुरुषपृषदाज्यादिरूपेण यज्ञसाधनभूतं प्रोक्षणादिसं
स्कारैरित्यर्थः। संस्कृतेन पृषदाज्यादिरूपेण पुरुषेण देवादयो यागं कृतवंतः अत्राप्यभिमुखीकृत्यास्मद्दत्तं गंधं भगवान्गृह्णात्विति मंत्रार्थः ९ ॐ यत्पु
रुषं व्यदधुः कतिधा व्यकल्पयन्॥ मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते १० अस्यार्थः। अत्र कंडिकायां कर्तृपदं न श्रूयते अतस्तद्वकस्य
नीयं तत्कल्पनेन च पूर्वकंडिकोपात्ता देवादयस्तत्रानुषंजनीयाः। इयं कंडिकायोजना देवादयो यत्प्रोक्षितं पुरुषं व्यदधुः विहितवंतः कृतवंतः कति
धा कतिप्रकारं व्यकल्पयन् विकल्पितवंतः तस्य कतिधाभेदं कृतवंत इत्यर्थः। अस्य पुरुषस्य मुखं किमासीत्किं बभूव बाहू किमुच्येते किमूरू उच्येते किं पा
दौ उच्येते पादा उच्येते इत्यत्र पादावित्यस्यावादेशे कृते लोपः शाकल्यस्येति वकारलोपः वक्ष्यमाणकंडिकादिभिः पुरुषाकृतावाकाङ्क्षाजनकतयाऽयम
पि कंडिका स्तुतिरेव तदनया स्तुत्याभिमुखीकृत्यास्मद्दत्तं दीयमानं वा पुष्पं गृह्णात्विति मंत्रार्थः १० ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू त
दस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११ अस्यार्थः। अस्य पुरुषस्य मुखं ब्राह्मणः आसीत् बभूव अस्य बाहू राजन्यः क्षत्रियः कृतः अस्य यदूरू तद्वैश्यः कृ
त इति। पूर्वेण संबंधः। अस्य पद्भ्यां पादतः शूद्रो आजायत जातवान् अयमेव पुरुषो ब्राह्मणादिवर्णचतुष्टयमय इति॥ अनेन पुरुषमभिमुखीकृत्यास्मद्द
त्तं धूपं गृह्णात्विति वाक्यार्थः ११ ॐ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत। १२। अस्यार्थः॥ अस्य ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स· पूर्वकं द्विकास्य मन्त्रापियोऽयमर्थः तेनास्य पुरुषस्य मनसः सकाशाच्चन्द्रमा अजायत च क्षोश्चक्षुषः सकाशात्सूर्यो अजायत श्च मुखतश्च श्रोत्रश्चक्षुषः सकाशा
४२ त्सूर्यो अजायत श्रोत्रात्कर्णाद्वायुश्च प्राणश्चाजायतेत्यनेनैव संबंधः मुखादग्निरजायतेति व्यक्तमेव चंद्रसूर्यवायुभ्यो मनश्चक्षुः श्रोत्रप्राणानामुत्पत्तिरि
तिसामान्येन सृष्टिक्रमः। तत्रत्वविंत्यमहिम्नि पुरुषे विपरीतमेतच्चंद्रसूर्यवायुप्राणानां तस्य पुरुषस्य मनश्चक्षुः श्रोत्रेभ्य उत्पत्तिस्थितिरिति पुरुषस्तु
तिरेव वाक्यार्थः यस्य यत्र पुरुषस्य मुखादग्निः श्रोत्राद्वायुश्च प्राणश्चक्षुषः सूर्यो मनसश्चन्द्रमा अभवदिति सर्वतेजसां योभगवानाकार पांतु सर्वतेजः
जकारणाय तेजोरूपः प्रदीपो अनेन मंत्रेणादीयते १२ ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोका अकल्पय
न् १३ अस्यार्थः। नाभ्या नाभितः आसीद्बभूव किं बभूव अंतरिक्षं आकाशम् शीर्ष्णः मस्तकाद् द्यौः स्वर्गः समवर्त्तत समभवत् पद्भ्यां पादतो भूमिः समभव
त् दिशः श्रोत्रात्कर्णात्समभवत् तथा स एव पुरुषः लोकानप्यकल्पयन्नकल्पयत एवमनुष्यादि निखिलस्थावरजंगमात्मकं लोकमेव सृष्टवानित्यर्थः
अकल्पयन्निति कृन्तन व्यत्ययेन एकवचने बहुवचनम्। अनयाऽऽर्चा अभिमुखीकृत्य नैवेद्यं दीयते। १३ ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्या
सीदाज्यं ग्रीष्म इध्मः शरद्धविः १४ अस्यार्थः पुरुषेण हविषा देवा इत्युपलक्षणं। साध्या ऋषयश्च यज्ञमतन्वत कृतवन्तः अस्य यज्ञस्य वसन्तऋतुर्विशेष
आज्यं घृतमासीद्ग्रीष्म ऋतुरिध्मः समिद्विशेषः आसीत् शरद्धविरासीदिति संबंधः प्रथममत्र आज्यस्योक्तत्वात् हविरिष्याज्याति रिक्तं पुरोडाशादिः अस्य मंत्र
स्य स्तावकत्वादंजलिकरणमेव युक्तं १४ ॐ सप्तास्यासन्परिधय … स्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् १५ अस्यार्थः यत्तस्य सप्त
समुद्राः परिधयः यत्र भूमिवेष्टनान्यासन्भूताः त्रिः सप्त छन्दांसि समिधः कृताः सप्तछन्दांसि सप्तव्याहृतयश्चेत्यनेक विंशतिरुक्ता सिसमिधः कृ राम·
ताइत्यर्थः किंभूतस्यास्य यज्ञस्य यत्र यज्ञं तन्वानाः कुर्वाणाः देवाः अबध्नन्पुरुषं पशुं पशुभूतं अत्र सप्तेति संख्यामात्रं सूच्यते नतु संख्येयं किंचनत्र संख्या ये ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्यमाने यज्ञभूमिवेष्टकं तत्कल्पनीयं यत्र भूमिश्च मार्जनवर्षेन इष्टकाश्चत्वरणो रप्रभृतयः सप्तसमुद्राद्यास्तेव कल्पिताः त्रिःसप्त इत्यत्रापि संख्येयकल्प
नायां छंदांसि जगत्यादीनि तस्मादिंधनं यज्ञसाधनस्य षट्वैकविंशतिछंदसां सूक्तस्थानेषामेव ग्रहणम् इत्यभिप्रायः। अस्य यज्ञमयस्य विष्णोः सप्तसमुद्राः।
प्रदक्षिणेन वेष्टनद्रव्याणि तं प्रदक्षिणं यतोऽस्माकं सप्तसमुद्रवेष्टितपृथिवीप्रदक्षिणफलं भवत्विम्याशंसा मंत्रार्थः।१५। ॐ यज्ञेन यज्ञमयजंत देवा।
स्तानि धर्माणि प्रथमान्यासन्। तेह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः।१६। अस्यार्थः। हे देवा इन्द्रादयः यज्ञेन यज्ञसाधनभूतेन पुरु
षेण यज्ञेन यज्ञं यज्ञपुरुषं पुरुषोत्तमम् अयजंत पूजितवंतः केनेत द्रष्टुं हिंसात्मकेन कर्मणा पुरुषं पशुं कृत्वा यज्ञः क्रियते इह तानि चेद्धर्माणि प्रथमा
न्यासन् अत एव ते देवा एवं रूपेणैव यज्ञेन नाकं सचंत संगताः यत्र नाके स्वर्गे पूर्वे साध्यादयो देवा महिमानो महात्मानः संति। अत्र तेह नाकमित्यत्र
हकारश्छांदसः स्तोत्रार्थः। सचंत इति सच समवाय इत्यस्माल्लङ् प्रथमपुरुषबहुवचनं बहुलं छंदस्यमाङ्योगेऽपीत्यडागमनिषेधः अनपाकं दिक
यादेवानां स्वर्गो निवासस्थानमिति तासु देवस्मरणात् स भगवानस्माभिः पूजितः स्वस्थानं स्वर्गं पुनर्यातु इति मंत्राभिप्रायः।१६। इति पुरुषसूक्तमंत्रव्या
ख्या समाप्ता॥ अथोत्तरनारायणम्। अस्य चोत्तरनारायणस्य षड्ऋचस्योत्तरनारायण ऋषिराद्यास्तिस्रस्त्रिष्टुभो द्वावनुष्टुभौ अंते त्रिष्टुप् पुरुषो देवता सूर्य
मेधे आदित्योपस्थाने विनियोगः। मंत्रो यथा। ॐ अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्व
माजानमग्रे।१७। अस्यार्थः। त्वष्टा आदित्यः अद्भ्यो जलात् पृथिव्यै पृथिवीतोऽपि अग्रे प्रथमं संभृतः उत्पन्नः अत्राप्पृथिवीच पंचभूतोपलक्षणार्था
तेन पंचभूतेभ्योऽपि पूर्वकाल एव त्वष्टा संभृत इत्यर्थः। न केवलं पंचभूतेभ्य एव पूर्वं संभृतः अपि तु विश्वकर्मणो रसादिच्छातोऽपि प्रथमं समवर्तत यद्देव
विश्वकर्मणो जगन्निर्माणेच्छा न भवति तदैव संभृत इत्यर्थः। तस्मादादित्यस्य तद्रूपं मंडलाकारं मर्त्यस्य आजानं मनुष्याणां सृष्टितोऽप्यग्रे पूर्वं देवत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा॰स॰ विद्धत्पारयन्तरेतिसमागच्छतीति।१७।ॐवेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमसःपरस्तात्।तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽनाय
४३ १८अस्यार्थः।अहमेतंपुरुषंपुरुषोत्तमंवेदजानामिअस्मदादीनांसर्वेषामेवानुभवसिद्धोयमित्यर्थः।एतंकिंभूतंमहान्तंसर्वव्यापकादित्यवर्णमादि
त्यरूपंज्योतिर्मयमित्यर्थः।यथाआदित्यःस्वप्रकाशःपरान्प्रकाशयतितथायमपिस्वप्रकाशब्रह्मस्वरूपोजगदपिप्रकाशयति।तमसःअविद्यात्म
कसंसारस्यपरस्तात्परस्तीर्णमित्यर्थः।तमेवपुरुषमेवविदित्वाज्ञात्वामृत्युंमरणमप्यतिक्रम्यसतिगच्छतिअपुनरावृत्तयेऽनायअयनायगमनाय
अन्यःपंथानविद्यतेनतिइतिअनायेत्यत्रवर्णागमेवर्णविपर्ययेयश्चेतियकारलोपः।अयमेवपुरुषोध्यानगम्योज्ञातोमोक्षंददातीतिवाक्यार्थः
१८।ॐप्रजापतिश्चरतिगर्भेअंतरजायमानोवहुधाविजायतेतस्ययोनिंपरिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा।१९अस्यार्थः।प्रजापतिः
प्रजानांपतिःसूर्यःअंतश्चरतिप्राणिनांदेहमध्येजीवात्मरूपेणावसतीत्यर्थःकिंभूतःगर्भेअजायमानःनित्यत्वादनुत्पत्तिधर्म्मापिसन्वहुधाजायतेव
हुप्रकारस्थावरजङ्गमदेहेषुजन्मलभतइत्यर्थः।तस्यप्रजापतेर्योनिमुत्पत्तिस्थानंधीराब्रह्मविदःपश्यन्तिध्यानेनोपलक्षन्तिइत्यर्थः।तस्मिन्प्रजापतौ
भुवनानिस्वर्गमर्त्यपातालानिविश्वानिसर्वाणितस्थुःस्थितानिहकारस्तेजार्थः।विश्वाइतिछांदसोनिलोपः१९ॐयोदेवेभ्यआतपतियोदेवानांपुरो।
हितः।पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये।२०।अस्यार्थः।यःसूर्यःआतपतिआसमंतात्कारेणतपतिकिमर्थंदेवेभ्योदेवानांप्रयोजनेनोदितेह्या
दित्येदेवकर्मण्यधिकारोभवतियोदेवानांपुरोहितःपुरोअग्रेहितआहितःदेवानांहविर्दानायप्रथममग्निरूपेणाधीयतेइत्यभिप्रायःयोदेवेभ्यःसका
शात्पूर्वोजातउत्पन्नःअदितेर्द्वादशात्माआदित्यःसप्रथममुत्पन्नइत्यर्थः।तस्मानत्रयेयच्छद्दर्शनात्तस्मैनमइतियोज्यम्।किंभूतायरुचायरोचमाना राम॰
यपुनःकिंभूतायब्राह्मयेब्रह्मणोऽपत्यंब्राह्मिःतस्मैपरब्रह्मभूतायेत्यर्थः२०।ॐरुचंब्राह्मंजनयंतोदेवाअग्रेतदब्रुवन्।यस्त्वैवंब्राह्मणोविद्यात्तस्यदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

असन्वशे २१। अस्यार्थः। देवाब्राह्मणादयः जनयन्तः स्वयमुत्पाद्यमाना सं ब्राह्मं ब्रह्मणो जातं रुचं स्वप्रकाशस्वरूपमादित्यमग्रे प्रथममनुवदन्तः उक्तव
न्तः इदमेवास्माकं प्रथममुखमित्युक्तवन्तः हे पुरुषोत्तम त्वामेव मनेनाध्यायेनोक्तस्वरूपं यो ब्राह्मणो विद्याज्जानाति तस्य ब्राह्मणस्य देवा वशे इच्छाय
मासन् भवन्ति सहस्रशीर्षाध्यायं ग्रंथतोर्थतश्चाधीत्य यो ब्राह्मणः पुरुषोत्तमं जानाति तस्य ब्राह्मणस्य देवा ब्रह्मादय अभिलषितानि संपादयंतीइ
तिवाक्यार्थः २१ ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णन्निषाणामुंम इषाण सर्वलोकम्म इषाण २२
।अस्यार्थः। हे पुरुषोत्तम ते तव श्रीश्च लक्ष्मीश्च श्रीर्ह्रीन्यय हशान्पुरुषोनुजीवति अनुजीविनो चाश्रयणी यो भवति लक्ष्मीर्धनं न हृशान्पुरुषः स
र्वलोकस्य लक्ष्यो दर्शनीयो भवति ते श्रीलक्ष्म्यौ पत्न्यौ सहचारिण्यौ त्वां न त्यजत इत्यर्थः एकेनैव चकारेण समुच्चये प्राप्ते चकारद्वयग्रहणेन तुल्यप्र
धानता प्रतिपादिता। अहोरात्रे पार्श्वे अहश्च रात्रिश्च पार्श्वद्वयम् अहःशब्दः परमब्रह्मपरः तस्य विश्वात्मकत्वेन प्रकाशरूपत्वात् रात्रिशब्दः संसार
परः तस्याविद्यात्मकत्वेनाप्रकाशकत्वात् तेन धर्मार्थकामात्मकः संसारो मोक्षश्च श्रीपुरुषोत्तमपार्श्वे द्वयमित्युक्तं भवति नक्षत्राणि रूपं ता
रागणो मूर्तिरित्यर्थः। अश्विनौ द्यावापृथिव्यौ एतद्व्यात्तं व्यात्तम् विवृतमुखमित्यर्थः तथाच श्रुतिः इमे हीमं सर्वं व्याश्नुवना एवं भूतं पुरुषोत्तमं त्वां
यावे इष्णन्निषाण इच्छंतं सकामं इषाण इच्छामनकेवलं मे मम अमुमिह लोकमिषाण मे मम सर्वलोकं भूरादिसत्यान्तं लोकसप्तकमिषाण। अथवा वाक्यार्थः पः
कश्चिद्यात्किंचित्स्वर्गपुत्रादिकाममन्ततेन सहस्रशीर्षाध्यायेन त्वां स्तौति पूजयति उपतिष्ठते तेन मिच्छन्नममापि पुत्रधनपश्वादियुक्तमिह लोकमिच्छं
ति परलोकं स्वर्गमोक्षादिकमिच्छति तत्वेच्छामात्रेणैव सर्वं संपद्यते सत्येच्छत्वादित्यभिप्रायः अत्र पत्न्या अहोरात्रे इति स्थिते आचादेशे कृते लोपः शाक
ल्यस्येति वकारलोपः इष्णन्निति इषु इच्छायामित्यस्य धातोः ~ स्मप्रत्यये कृते शत्रारूपं द्रष्टुं तरनारायणो इत्यावसथिकमहाधर्माधिकृतनरह: ॐ।

मा.स. लायुधकृतौ ब्राह्मणसर्वस्वे सहस्रशीर्षाध्यायव्याख्या ॥ अथ त्र्यंबकमंत्रेण शिवपूजा ॥ त्र्यंबकमन्त्रमाहात्म्यं लिंगपुराणे परिभाषे ॥ त्र्यम्बकेन मंत्रेण
४४ देवदेवं त्रियम्बकम् । पूजयेद्बाणलिंगे वा स्वयंभूतेऽपि वा पुनः । आर्षे पि दैवते वापि यथावदनुपूर्वशः । अष्टोत्तरसहस्रेण पुंडरीकेण शंकरम् ॥ कमलेन स
हस्रेण तथा नीलोत्पले   न च । संपूज्य पापसंदत्ता घृतं स्नैवोदनं पुनः । मुद्गान्नं मधुना युक्तं भस्माणि सुरभीणि च । देवं संपूज्य विधिवज्जपेन्मंत्रं त्रियम्ब
कम् । मुच्यते सर्वपापेभ्यः सप्तजन्मकृतैरपि । संग्रामे विजयं लब्ध्वा सौभाग्यमतुलं लभेत् । लक्षहोमेन राज्यार्थी राज्यं प्राप्य सुखी भवेत् ॥ पुत्रार्थी पुत्रमाप्नोति
नियुते न न संशयः । धर्मार्थी प्रयुतेनैव जपेनैव न संशयः । धनधान्यादिभिः सर्वैः संपूर्णः सर्वमंगलैः । क्रीडयेत्पुत्रपौत्रैश्च मृतः स्वर्गे च जायते ॥ नानेन
सदृशो मंत्रो लोके वेदे च सुव्रतः । तस्मात्त्रियम्बकं देवं नरो नित्यं प्रपूजयेत् ॥ अग्निष्टोमस्य यज्ञस्य फलमष्टगुणं लभेत् ॥ त्रयाणामपि लोकानां गुणानाम
धियः प्रभुः ॥ वेदानामपि देवानां ब्रह्मक्षत्रविशामपि ॥ अकारोकारमकाराणां मंत्राणामपि वाचकः । कर्ता सोमस्य सूर्यस्य वन्हेरप्यत्रयस्य च ॥ अर्धा
उमा महादेवो ह्य मूलसूत्रियम्बकः । सुपुष्पितस्य वृक्षस्य यथा गंधोस्ति शोभनः ॥ अतिदूरात्तथा तस्य गंधः शम्भोर्महात्मनः । तस्मात्सुगंधो भगवा
नुराघ्न्यारयति शङ्करः । गंधारश्च महादेवो देवनाम पिलीलया । सुगन्धस्तस्य लोके स्मिन्वायुर्वाति नभस्तले । तस्मात्सुगंधिनं देवं सुगंधिं पुष्टिव
र्द्धनम् । यस्य रेतः पुरा शम्भोर्हरेर्योनौ प्रतिष्ठितम् ॥ तस्य वीर्यमभूदण्डं हिरण्यत्वं जलोद्भवम् । चन्द्रादित्यौ सनक्षत्रौ भूर्भुवः स्वर्जनस्तपः । सत्य
लोकमतिक्रम्य पृथिवी व्याप्य वैतथा । पंचभूतान्यहंकारो बुद्धिः प्रकृतिरेव च । पृथिव्यां स्य तस्यैव तस्माद्वै पुष्टिवर्द्धनः ॥ तं पुष्टिवर्द्धनं देवं घृतेन
पयसा पि वा । मधुना यवगोधूममुद्गविल्वफलेन च । कुमुदार्कशमीपत्रगौरसर्षपशालिभिः ॥ कृत्वा लिंगे यथान्यायं भक्त्या देवं यजामहे । कृतेनानेन श्म
मां प्राणाहं धनात्कर्मयोगतः । मृत्योश्च बंधनाच्चैव मुक्षीय तव तेजसा । उर्वारुकाणां पक्वानां यथा कालादभूत्सुनः । तथैव कालसंप्राप्तौ मंत्रेणानेन य ४४

CC-0. In Public Domain. Digitization by eGangotri

त्तितः। एवं मन्त्रविधिं ज्ञात्वा शिवलिङ्गं समर्चयेत्। तस्य पापक्षयस्तावद्भोगिनो मृत्युनिग्रहः त्रियम्बकसमो नास्ति देवोन्यो घृणयान्वितः॥ प्रसादशील:
प्रीतश्च तथा मन्त्रोपि सुव्रताः। तस्मात्सर्वं परित्यज्य त्रियम्बकमुमापतिम्॥ त्रियम्बकेन मन्त्रेण पूजयेत्सुसमाहितः। सर्वावस्थाङ्गतो वापि युक्तो वा सर्व
पातकैः शिवध्यानात्न सन्देहो यथा रुद्रस्तथा स्वयम्॥ हत्वा भित्वा च भूतानि भुक्त्वा चान्यायतोपि वा। शिवमेकं सकृत्स्मृत्वा सर्वपापैः प्रमुच्यते॥ य
था विष्णुधर्मोत्तरे। द्वितीयं काण्डं ऋग्वेदानाम्॥ त्रिरात्रं नियतो पोष्य श्रपयेत्पायसं चरुम्॥ तेनाहुतिशतं पूर्णं जुहुयात्र्यंबकेन च॥ समुद्दिश्य महा
देवजी वेदवर्षशतं सुखी। तत्र त्र्यम्बकमन्त्रस्य वशिष्ठऋषिरनुष्टुप्छन्दस्त्र्यम्बको देवता आनुर्म्मास्त्र्यम्बके हृयामग्निपरिक्रमणे विनियोगः॥ म
न्त्रो यथा। ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। अस्यार्थः त्रियम्बक। त्र्यम्बकं महेश्वरं वयं य
जामहे पूजयामहे। किम्भूतं सुगन्धिं शोभनो गन्धो यस्य सुगन्धिं पुष्टिवर्द्धनं पुष्टिरूपचयस्तस्य वर्द्धयितारम्॥ यजामहइति दर्शनात्वयमिति कर्तृपदम
ध्याह्रियते। उत्तरार्द्धे कर्तृपदं कर्म्मपदञ्च न श्रूयते। अतस्तदुभयकल्पने पूर्वार्द्धप्राप्तमेवद्वयं विपरिणम्य योज्यम्॥ तथा च त्र्यम्बकः। अस्मान्मुक्षीय मु
क्तान्करोतु कुतः मृत्योर्मरणात्। मृत्युना चात्र मृत्युजन्मलक्षणः संसार उपलक्षितः। संसारान्मुक्तान्करोत्वित्यर्थः। कमिव कुतः। उर्वारुकमिव बन्धनाद्
उर्वारुकं कर्कटीफलं यथा बन्धनाद्विमुक्तं पुनर्न संयुज्यते। तथा वयमपि संसारान्मोचिताः पुनः संसारं न प्रविशामहइत्यभिप्रायः॥ मामृतान्मोक्षो
स्य पुरुषान्मा मुक्षीय न मोचय अत्र मुक्षीयेति मुचेः आशिषि लिङ्॥ आत्मनेपदोत्तमपुरुषैकवचनस्येटो दित्यदादेशे कृते सीयुडागमे रूपम्॥ लिङा
लिङि तिप्रथमपुरुषस्थाने उत्तमपुरुष॥ तथा कुमारीणां विशिष्टपतिलाभकामनया स्त्रीणाञ्च सौभाग्यकामनया द्वितीयत्र्यम्बकमन्त्रेण पूजायाम्।
कात्यायनः॥ कुमार्य्योत्तरेण पतिकामा सौभाग्यकामा चेति। ऋष्यादिकं पूर्ववत्॥ विनियोगस्तु कुमार्य्या अग्निपरिक्रमणे॥ तत्रोत्तरं त्र्यंव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रास· कमन्त्रो यथा। ॐ त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः। अस्यार्थः। पतिवेदनमिति। पतिरीश्वरस्तस्य वेदनं
४५ प्रापणं येन तत्पतिवेदनम्। त्र्यंबकस्यैव जन्मान्तरादिषु पूजाभिराराधितस्य प्रसादेन त्र्यम्बक ईश्वरः प्राप्यते इत्यभिप्रायः। इतो मुक्षीय मामुत इति। इतः सं
साराम्मुक्षीय मामुतः मोक्षात्। अपरं च समानम्॥ इति शिवपूजा। अथ चण्डिकापूजा॥ अथ अम्ब अम्बिके इति मन्त्रव्याख्या। मन्त्रो यथा॥ ॐ अम्बे अ
म्बिके बालिके न मानयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्। अस्य मन्त्रस्याश्वमेधे पत्नीवाचने विनियोगश्चापि मन्त्रलिङ्गाच्चण्डि
कापूजायां विनियोग उच्यते। प्रजापतिर्ऋषिरश्वो देवतानुष्टुप्छन्दो अश्वमेधे पत्नीवाचने विनियोगः॥ अम्बा अम्बिका अम्बालिका इति दुर्गानामानि
॥ हे अम्बे हे अम्बिके हे अम्बालिके मां कश्चन कश्चिदपि न नयति न प्रापयति स्वामिने प्रतिवोढव्यम्॥ तथापि सति अश्वकः ससस्ति अश्वशब्दः
स्वामिवचनः ककारः कुत्सायाम्। स्वामीत्यर्थः। ससस्ति शेते किं कृत्वा सुभद्रिकां सुभद्रां परिगृह्येत्यध्याहार्यम्। शोभना चासौ भद्रा च सुभद्रा कुत्सिता
भद्रा सुभद्रिका॥ उभयोः कुत्सायां ककार ईष्यते। किंभूतां काम्पीलवासिनीं काम्पीलो नगरस्तत्र वसति यस्याः सा तां काम्पीलवासिनीम्॥ काम्पीले सुरूपाः
सुभगा विनीताश्च स्त्रियो भवन्ति॥ अत्र ससस्तीसस उपपदे षषस्वप्ने इत्यस्य धातो रूपम्। अयं वाक्यार्थः॥ अनेन मंत्रेण सौभाग्यकामनया स्त्रिया देवी प्र
ज्यते हे अम्बेत्यादि दुर्गां संबोध्य कश्चिदपि मां स्वामिसमीपं न नयति। मया विना मदीय स्वामी अन्यां गृहीत्वा शेते। अतो मया पूजिता भगवती मां
स्वामियुक्तां करोत्वित्यभिप्रायः। इति चण्डिकामंत्रव्याख्या। अथ निरग्नेर्वैश्वदेवः। तत्र छन्दोगपरिशिष्टम्। पञ्चानामथ मन्त्राणां महतामुच्यते विधिः। यै
रिष्ट्वा सततं विप्रः प्राप्नुयाद्ब्रह्म शाश्वतम्। याज्ञवल्क्यः। वेदाभ्यासरतं दान्तं महायज्ञक्रियापरम्। न स्पृशन्तीह पापानि महापातकजान्यपि। देवभूत राम·
पितृब्रह्ममनुष्याणामनुक्रमात्। महासत्राणि जानीयात्त एवेह महामखाः। अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहुत्यापि पितृयज्ञः स्यात्पित्र्यो बलिमथापि वा। मनुः। पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्। तासां क्रमे
ण सर्वासां निष्कृत्यर्थं महर्षिभिः। पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्। मनुविष्णुयमदेवलाः। पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः। स
गृहेपि वसन्नित्यं सूनादोषैर्न लिप्यते। देवतातिथिभृत्यानां पितॄणामात्मनश्च यः। न निर्वपति यो चाग्निमुच्छ्वसन्न स जीवति। यमः। देवताभ्यः पितृभ्यश्च
बलिं भूतेभ्य एव च। वैश्वदेवबलिर्वायं सायंप्रातर्विधीयते। अत्र वैश्वदेवसममभिव्याहारात्प्रातः शब्दो मध्याह्नवचनः। सर्वमेतद्यथाशक्ति निर्वपेद्विधिपूर्वक
म्। एवं युक्तो जयेत्स्वर्गं गृहस्थो नात्र संशयः। छन्दोगपरिशिष्टे कात्यायनः। सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च। अनश्नतापि सततमन्यथा किल्बिषी
भवेत्। व्यासः। आपद्यपि च कष्टायां पञ्च यज्ञान्न हापयेत्। स्वर्गापवर्गयोः प्राप्तिर्महायज्ञैः प्रचक्षते। कूर्मपुराणम्। अकृत्वा तु हि यः पञ्च महायज्ञान् द्विजो
त्तमः। भुञ्जीत चेत्स मूढात्मा तिर्यग्योनिं स गच्छति। वाराहपुराणे मतङ्गं प्रति धर्मव्याधवाक्यम्। दैवो भौतस्तथा पैत्र्यो मानुषो ब्राह्म एव च॥ एते पञ्च म
हायज्ञा ब्रह्मणा निर्मिताः पुरा॥ ब्राह्मणानां हितार्थाय इतरेषां तु जन्मुखात्। क्षत्रादीनां तु वर्णानां ब्राह्मणैः कारिताः शुभाः। एवं कृत्वा जङ्गमार्थं स्याव
रार्थञ्च सुखानि। अन्यथा न्नीह यो भुङ्क्ते एकैको मृगपक्षिणः। सतं ददाह भोक्तॄणां तथा मांसं तु तत्स्मृतम्। तत्र वैश्वदेवाख्यदाने छन्दोगपरिशिष्टम्॥ अ
ग्न्यादिर्गणितमेनोक्तो होमः शाकल एव च। अनाहिताग्नेरेवैष युज्यते बलिभिः सह। तथा गोतमः। अग्नावग्निर्धन्वन्तरिर्विश्वेदेवाः प्रजापतिः॥ स्वि
ष्टकृदिति होमश्च। योगियाज्ञवल्क्यः। अन्नं व्याहृतिभिर्हुत्वा तथा मन्त्रैश्च केवलैः। भूतेभ्यश्च बलिं दत्त्वा ततो भोज्याद्नतिमान्। कात्यायनः। कृत्वा द
मग्नि मन्त्रेण संस्कृताग्नावनग्निमान्॥ वैश्वदेवं ततः कृत्वा जुहुयाच्छकलेन च। एतद्देववचनद्वयं न्यूपदेश्यं निरग्निभिर्वा जसनेयिभिस्तु स्ना
नानुपरं परयाक्रियमाणस्य वैश्वदेवस्य मन्त्रा व्याख्यायन्ते। तत्र पञ्चभूसंस्कारान्कृत्वा आत्मनो दक्षिणेग्निमुपस्थाप्य ज्वलत्कुशेन क्रव्यादांशं त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रा·सू· ४६ जेदनेनमन्त्रेण। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताग्निसंस्कारे विनियोगः। ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। इहैवायमि-
तरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्। अस्यार्थः। अग्निं प्रहिणोमि प्रस्थापयामि किंभूतं दूरं लोकान्तरप्रापकम्। पुनः किंभूतं क्रव्यादं मांसादम्॥
असौ मानुषमांसान्यत्ति भिलषतीति। अमंगलत्वात् यमराज्यं गच्छतु यमस्याधिकारं यातु किंभूतः रिप्रवाहः रिप्रं पापं वहति प्रापयतीति रिप्रवा-
हः यद्वतरः क्रव्यादादन्यो जातवेदाः जातज्ञानो ऽग्निः। इह एषा गृहे एव हव्यं वहतु प्रापयतु हविः केभ्यो देवेभ्यः किंभूतः प्रजानन् स्वीयमधिकारं प्र-
काशयन् जानन्नित्यर्थः। अत्र क्रव्यादममङ्गलमग्निं दूरं प्रेषयामि यमराज्यं गच्छत्विति अग्नेः प्रस्थापनं पूर्वार्द्धस्य वाक्यार्थः। अयमितरोमङ्गल्यः
इह मदीयगृह एव वैश्वदेवे स्वीयमधिकारं जानन् देवेभ्यो हविः प्रापयत्विति आशंसोत्तरार्द्धवाक्यार्थः। अनेन मन्त्रेण क्रव्यादांशं परित्यज्य स-
स्कृतस्थानेऽनुष्ठानुपरंपरानुष्ठानप्रामाण्यादग्न्यारोपणं परिस्तरणं कुशदानं च कर्णीयम्। तत्राग्न्यारोपणमन्त्रो यथा॥ ॐ अयन्ते योनिर्ऋत्वि यो
यतो जातो अरोचथाः। तञ्जानन्नग्न आरोहाथानो वर्द्धया रयिम्॥ प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता ऋषयोपि अग्न्युपस्थाने विनियोगः
। अस्यार्थः॥ अरणिरित्यध्याहार्यम्। हे अग्ने यतो यस्मादरणेः सकाशाज्जातः सन् रोचथाः दीप्तोसि अयन्ते तव ऋत्विजः पुरोहितः योनिरुत्पत्तिस्था-
नन्तं आरोह॥ आरूढो भव किं कुर्वन् जानन् अथानन्तरं नोस्माकं रयिन्धनं वर्द्धय वृद्धियुक्तं कुर्वित्याशंसा मन्त्रार्थः॥ अनेनैव मन्त्रेण गार्हपत्या-
हवनीयाग्न्योररणौ समारोपणं क्रियते आरोहथा वर्द्धया इत्युभयत्रापि आकारश्छान्दसः॥ अनेनाग्निमारोप्याग्निपूर्वं उदगग्रंपरिस्तरणं कु-
शं दद्यात्। अत्र परिस्तरणमन्त्रो यथा॥ ॐ अग्निमीळे इति॥ अस्य व्याख्या कृता॥ ततो दक्षिणे प्रागग्रं कुशपत्रं दद्यादनेनमन्त्रेण॥ ॐ इषे त्वोर्जे राम· ४६
त्वेति अयमपि व्याख्यातः॥ ततः पश्चिमे उदगग्रमेवापरं कुशपत्रं दद्यात् अनेनमन्त्रेण ॐ अग्न आयाहीति॥ अयमपि व्याख्यातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततउत्तरे प्रागग्रमेवापरं कुशत्रयं दद्यात् अनेन मन्त्रेण ॐ शन्नो देवीरिति। अयमपि व्याख्यातः इति परिस्तरणं कृत्वाग्निं प्रज्वाल्य पर्युक्ष्य घृताक्तम
न्नं हस्तेन जुहुयात्॥ तत्र व्याहृत्याहुतित्रयं हुत्वा गोनमोक्तास्पादिपञ्चाहुतीश्च हुत्वा शाकलमन्त्रैः षडाहुतयः। तत्र शाकलमन्त्रो यथा। ॐ देव।
कृतस्यैनसोवयजनमसि स्वाहा॥ अग्निरत्र देवता। यथानुक्रमणिका। देवकृतस्यैवसदस्यागैर्यानि षड्यजूंषि तैर्नहे अग्ने एनसः पापस्यावयजनं।
नाशनमसि भवति अवपूर्वो यजतिर्नाशने वर्तते। किंभूतस्यैनसः देवकृतस्य देवविषये कृतस्य दैवकर्मण्यसाङ्गतादिकृतस्येत्यर्थः। अतस्तुभ्यं स्वाहा
ॐ मनुष्यकृतस्यैनसोवयजनमसि स्वाहा। अस्यार्थः॥ मनुष्यकृतस्य मनुष्यविषये तिथिविषये असाङ्गतादिकृतस्य यद्वा मनुष्यहिंसादिना कृतस्यापरं स
मानम्। ॐ पितृकृतस्यैनसोवयजनमसि स्वाहा॥ अस्यार्थः। पितृकृतस्य पितृकर्मण्यसाङ्गतादिकृतस्यापरं समानम्। ॐ आत्मकृतस्यैनसोवयज
नमसि स्वाहा। अस्यार्थः। आत्मकृतस्यात्मनिन्दादिकृतस्यापरं समानम्। ॐ एनस एनसोवयजनमसि स्वाहा। अस्यार्थः॥ एनसः पापस्य महानेन संव
न्धेन संवर्गेण पुनः पुनः करणेन यदेनः संभूतं तस्यापरं समानम्। ॐ यच्चाहमेनो विद्वांश्चकार यच्चाविद्वांस्तस्य सर्वस्यैनसोवयजनमसि स्वाहा॥ अस्यार्थः॥
अहं यच्च यदप्येनः पापञ्चकार कृतवानस्मि किंभूतो विद्वान् जानन् यच्च यदप्यविद्वान् जानन् चकार तस्यैनसोवयजनं नाशनमसि किंभूतस्य सर्वस्य सा
वशेषस्य। इति होमं समाप्य अग्निं पूजयेदनेन मन्त्रेण। ॐ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति
सप्त योनीरापृणस्व घृतेन स्वाहा। त्रिष्टुप्। अस्यार्थः। हे अग्ने ते तव सप्तसंख्याः समिधः समिन्धनहेतवः। ते तव सप्त जिह्वाः प्रवहोद्वह संवह विवहेति
वह परिवहानुवह नामानः सप्त वायवा सव जिह्वा इत्यर्थः। ते तव सप्त ऋषयः सप्त होत्राः सप्त होतारः केते सप्तर्षयः होता मैत्रावरुणो ब्राह्मणाच्छंस्यच्छा
वाकपोता नेष्टाग्नीध्राः। एते तव सप्त धामानि स्थानानि सप्त छन्दांसि किंभूतानि प्रियाणि हृद्यानि त्वां तां पजन्ति कथं सप्तधा ज्योतिष्टोमादि सप्त संस्थ सो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयागेनसप्तयोनीः चितिस्वरूपाः सप्तचितिकोग्निरितिश्रुतेः आपृणस्वसुप्रीतोभववकेन घृतेनस्वाहासुहुतंभवतु। अत्रधामइतिबहुवचनस्थानेएकव-
चनम्। अग्निस्तुतिपूर्वकंसुहुतत्वाशंसनेनाग्नेरुपस्थानमनेनमंत्रेणक्रियते। इतिवैश्वदेवमन्त्रव्याख्या। ततोयथोक्तान्वलीन्दत्वाऋचंवाचमित्यध्या-
येनशान्तिंकुर्यात्। तत्रवेदमन्त्रव्याख्यापरत्वाद्गृह्यवलीनान्त्ववैदिकमन्त्रशून्यत्वाद्बलयोनोक्ताः। अत्रयद्यपिशान्त्यध्यायसंवधिनीनांसर्वासामेवकण्डिका-
नामृषिछन्दोदेवताविनियोगाविद्यन्तएवतथाप्यमीभिर्मन्त्रैःकर्मान्तरेक्रियमाणेएतेस्मर्तव्याः। शांतिकर्मणितुस्वाध्यायपाठस्यश्रुतत्वादेतेषांस्मरणंक-
र्तव्यमेव। ॐ ऋचंवाचंप्रपद्येमनोयजुःप्रपद्येसामप्राणंप्रपद्येचक्षुःश्रोत्रंप्रपद्येवागोजःसहौजोमयिप्राणापानौ। एतेषांदध्यङ्ङाथर्वणऋषिर्विश्वेदेवा
देवतामहावीराद्यन्तयोःशांतिकरणेविनियोगः। अस्यार्थः। अहंऋचंऋग्वेदंवाचंवाणींत्वंप्रपद्येशरणंयामितथामनइन्द्रियंयजुःयजुर्वेदंत्वंप्रपद्येतथासाम
वेदम्। प्राणंप्राणवायुंत्वंप्रपद्येतथाचक्षुःश्रोत्रश्चेन्द्रियद्वयंप्रपद्ये। किमर्थमेतेषुशरणागमनम्। वागवचनंओजोवलंप्राणापानौवायूएतानिसहएकीभूयमयिव
र्तन्तामित्यध्याहार्यम्। द्वितीयमोजग्रहणमादरार्थम्॥ महावीरकर्मणोभीषणत्वेनरागादिविरोधसंभावनायांसामविरोधायशान्तिकर्मेत्याशयः। वाङ्म-
नःप्राणापानाभ्यांस्थित्यर्थं। ऋगादिवेदत्रयंवाङ्मनःप्राणाश्चक्षुश्श्रोत्राणिशरणंयामीतिवाक्यार्थः। ॐ यन्मेछिद्रंचक्षुषोहृदयस्यमनसोवातितृण्णंबृहस्प-
तिर्मेतद्दधातुशन्नोभवतुभुवनस्ययस्पतिः२ दध्यङ्ङाथर्वणऋषिर्बृहस्पतिर्देवतापङ्क्तिश्छन्दोमहावीराद्यन्तयोःशान्तिकरणेविनियोगः। अस्यार्थः मेमम
चक्षुषः अच्छिद्रमन्यूनंतथाहृदयस्यबुद्धेरछिद्रमितिपूर्वेणैवसंवन्धः तथामनसःवाऽस्तुत्वयेमनसश्चयदतितृणमतिहिंसितम्परहिंसाचिन्ताद्येनामन्यू-
नमित्यर्थः। तत्सर्वंमेममबृहस्पतिर्देवाचार्योदधातुसंपूर्णंकरोत्वित्यर्थः॥ तथासतिभुवनस्यत्रैलोक्यस्ययःपतिःप्रभुर्ब्रह्मासनोस्माकंशंभवतुसुखकारीभव
तुममचक्षुर्बुद्धिमनसांयन्न्यूनंतद्बृहस्पतिःसंपूर्णंकरोतुयस्मिंश्चसंपूर्णेब्रह्मअस्माकंसुखकारीभवतीत्याशंसावाक्यार्थः२ ॐ भूर्भुवःस्वः तत्सवितुर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ३ तिसृणांमहाव्याहृतीनांप्रजापतिऋषिरग्निवायुसूर्योदेवतायजुष्याच्छन्दोनास्तिगायत्र्याविश्वामित्रऋ
षिर्गायत्रीछन्दःसवितादेवतामहावीराद्यंतयोःशांतिकरणेविनियोगः।अस्यार्थः भूः पृथिवीभुवःआकाशस्वःस्वर्गमेतान्लोकानितिविभक्तिविपरिण
मप्यधीमहिइतिक्रियापदंयोज्यंतथातस्यसवितुरादित्यस्यभर्गः वीर्यंतेजोवाधीमहिध्यायेमचिन्तयामइत्यावत् किंभूतंवरेण्यंसर्वभूतवरेण्यम्।
सर्वभूतेभ्यःश्रेष्ठम्।किंभूतस्यदेवस्यदेवतादिगुणयुक्तस्यपुनःकिंभूतःयःसवितानोस्माकंधियःबुद्धीःप्रचोदयात्प्रेरयतुसकलपुरुषार्थेषुप्रवर्त्त
यत्वित्यर्थः ३ ॐकयानश्चित्रआभुवदूतीसदावृधःसखा।कयाशचिष्ठयावृता ४ वामदेवऋषिर्गायत्रीछन्दः इन्द्रोदेवतापूर्वोक्तेविनियोगःअस्या
र्थःचित्रेचयनकर्मणिप्रयोजकइन्द्रःकयानामऊतीऊत्याकेनतर्पणेननोस्माकंसदावृधःसर्वदावृद्धिकारीभुवत्भूयात् आभुवादित्यत्रपठितआ
कारोवृताइत्यनेनसंबन्ध्यते।कयानामआवृताआवृत्तक्रियान्वितःसःसखामित्रंभुवतुभूयात् किंभूतयाआवृताशचिष्ठयाशचिइतिकर्मणोनामइतिनिघ
ण्टुः तत्रेष्टन्सातिशयकर्मवतइत्यर्थः।केनतर्पणेनकयावाकर्मक्रियया इन्द्रोस्माकंवृद्धिकारी सखाचभूयादितिप्रश्नोवाक्यार्थः।त्वयाकथितं
वयंतद्बुतिष्ठामयासुइतभवति।ऊती इतिअवरक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणसामर्थ्य याचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादा
नभागवृद्धिषु।।अस्माद्धातोरूतियूतिसातिहेतिकीर्तयश्चेतिनिपातनात्क्तिन्प्रत्ययेज्वरत्वरस्रिव्यविमवामुपधायाश्चेतिउपधायासहवकार
स्यऊकारःऊइतिऊतिशब्दस्यछान्दसत्वात्तृतीयैकवचनेछन्दसिइयाजियाजीकरणामुपसंख्यानंकर्तव्यमितियकारस्येकारः।४। ॐकस्त्वासत्योम
दानांमंहिष्ठोमत्सदन्धसः।दृढाचिदारुजेवसु।५।वामदेवऋषिर्गायत्रीछन्दइन्द्रोदेवतापूर्ववद्विनियोगः॥अस्यार्थः॥हेइन्द्रकःकोरसःत्वात्वाम
त्सत्मत्तंकरोतिकस्यरसःअन्धसःसोमस्यसोमलतायाइत्यर्थः॥ किंभूतःसत्यःसोमयागेक्रियमाणेअवश्यंभावीपुनःकिंभूतःमदानांमध्येमंहिष्ठो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिशयेनमदजनकः येनमदेनमत्तस्त्वंवसुवसूनिधनान्यारुजे आरुजसिभञ्जयसिकिंभूतानिदृढानिचिरस्थाण्यर्थः। दृढान्यपिसुवर्णादीनिधनानियागकर्तृ
भ्यो दातुंभंजयसीत्यर्थः। हेइन्द्रकेनमदेनमत्तस्त्वंसुवर्णादीनिदादासीतिप्रश्नोवाक्यार्थः॥त्वयाकथितेवयन्नस्तुतिष्वामइत्याशयः।तत्रमंहिष्ठइति
महिष्ठःहोतृत्विनुमितिकृतेमंहितेरमत्रातिशायविवक्षायानुश्छन्दसीतिइष्ठ नतुरिष्ठेमेपस्विनितिटेचोलोपःमत्सदितिसदधातोर्लिङि तिपइत्तलश्च
लोपःपरस्मैपदेष्वितिइकारलोपःसिव्बहुलंलेटीतिसिप्प्रत्ययःलेटोडाटावित्यडागमः।आगमशास्त्रस्यानित्यत्वाद्वृद्धिर्नभवति।दृढानीत्यत्रवर्णागः।
मोवर्णविपर्ययश्चेतिणिलोपः।आरुजेतिमध्यमपुरुषेउत्तमपुरुषः५।ॐअभीषुणःसखीनामविताजरितॄणाम्।शतंभवास्यूतिभिः ईवामदे
वऋषिर्गायत्रीछन्दइन्द्रोदेवतापूर्ववद्विनियोगः।अस्यार्थः।हेइन्द्रनोस्माकंतथासखीनांमित्राणांतथाजरितॄणांस्तोतॄणामविताषालयिताभवा
सिभवकेनप्रकारेणाभिअभिमुख्येनतथासुःसुष्ठुयथाभवतिकिंभूतःसन्शतंधावहुधाभूतेत्यर्थः।कैरूतिभिरवऊतिभिर्बहुभिःप्रकारैःरक्षणैः हेइन्द्रत्वं
त्वंबहुमूर्तिर्भूत्वाअस्माकमस्मत्सखीनांस्तोतॄणांचवहुप्रकारंपालयिताभवेत्याशंसावाक्यार्थः।अभीषुणइतिअभीसुनःपदत्रयेस्थितेइकःसुञीतिदी
र्घत्वंसुञःमूर्द्धन्यादेशः नश्चधातुस्थोरुषुभ्यइतिणत्वम्।जरितॄणामितिधातूनामनेकार्थत्वात्स्तोतॄणामितिवोद्धव्यम्॥भवासिइतिलेटमध्यमपुरुषेकर्त्त
चनम् ६ॐकयात्वंनऊत्याभिप्रमन्दसेवृषन्।कयास्तोतृभ्यआभर।इत्युङ्नायर्वणऋषिर्गायत्रीछन्दःइन्द्रोदेवतापूर्ववद्विनियोगः।अस्यार्थः।हेवृष
नइन्द्रकयानामऊत्यानोअस्मानभिप्रमन्दसेअभिसर्वतोभावेनप्रमोदयसितथाकयानामऊत्याआभरआहरसिअर्जयसिअर्थाद्धनपुत्रादिकमितिकि
मर्थंमस्तोतृभ्यःस्तवकारिणांप्रयोजनेनेत्यर्थः हेइन्द्रकथमस्मान्प्रमोदयसिकथंत्वंस्तवकारिणामस्मेनधनपुत्रादिकमर्जयसीतिप्रश्नोसौवाक्यार्थः
त्वयाकथितेवयंतथानुतिष्ठानइत्याशयः।अत्राभिप्रमन्दसइतिमदिस्तुतिमोदमदस्वप्नकांतिगतिष्वित्यस्माद्धातोरूपम्।आभरेतिआहरेतिप्राप्तेहस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होर्भः श्छन्दसीति हकारस्य भकारः लङर्थे लोट्। ॐ इन्द्रो विश्वस्य राजति शं नो अस्तु द्विपदे शं चतुष्पदे ७ दध्यङ्ङाथर्वण ऋषिर्द्विपदा विराट् छन्दः
इन्द्रो देवता पूर्ववद्विनियोगः। अयमर्थः। इन्द्रो विश्वस्य सर्वस्य जगतः राजते दीप्यते तस्य प्रसादेन नोऽस्माकं द्विपदां मनुष्यस्य भार्यापुत्रादिकस्य सु
खमस्तु तथा चतुष्पदे गवादिकस्य शमस्त्विति पूर्वेणैव संबंधः। विश्वप्रभोरिन्द्रस्य प्रसादेनास्माकं भार्यापुत्रगवादीनां सुखं भवत्वि— त्याशंसावा
क्यार्थः। द्विपदे चतुष्पदे इति षष्ठीसप्तम्यौ ७ ॐ शन्नो मित्रः शं वरुणः शं नो भवत्वर्य्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ८ दध्यङ्ङाथर्व
ण ऋषिरनुष्टुप्छन्दः इन्द्रो देवता पूर्ववद्विनियोगः। अयमर्थः। अनेन शान्तिकर्म्मणा नोऽस्माकं मित्रः सूर्यः शं भवतु सुखाय भवतु तथा वरुणः शं भवतु अर्य्य-
मा सूर्यश्च नः शं भवतु तथा इन्द्रो बृहस्पतिश्च नः शं भवतु तथा विष्णुः नः शं भवतु किं भूतो विष्णुः उरुक्रमः उरुर्बहुः क्रमो यस्य स उरुक्रमः त्रिविक्रम इत्य
र्थः भवत्विति क्रियापदमेकत्र पठितं सर्वत्रैव संबध्यते। मित्रवरुणार्यमेन्द्रबृहस्पतिविष्णवोऽस्माकं सुखाय भवन्त्वित्याशंसावाक्यार्थः ८ शन्नो वातः
पवतां शं नस्तपतु सूर्यः। शं नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु। दध्यङ्ङाथर्वण ऋषिरनुष्टुप्छन्दो वायुसूर्य्यपर्जन्यो देवता पूर्ववद्विनियोगः। अयम-
र्थः। वातो नः शं सुखाय पवतां वहतु सूर्यो नः शं सुखाय तपतु अहरहः कौ भूल्लोके इत्यर्थः पर्जन्यो देवो मेघः नः शं सुखायाभिवर्षतु किं भूतः कनिक्रदत् आक्रन्द-
मानः गर्जन्नपि सुखाय भवत्वित्यर्थः। वातसूर्य्यपर्जन्याः। अस्माकं सुखाय भवन्त्विति याशंसावाक्यार्थः ९ अहानि शं भवन्तु नः शं रात्रीः प्रतिधीयताम्॥ शं
न इन्द्राग्नी भवतामह्नोभिः। शं न इन्द्रावरुणौ रातहव्या शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः। १०। दध्यङ्ङाथर्वण ऋषिरहानि शानि
शन्द्विपदा गायत्री शं न इन्द्राग्नी त्रिष्टुप्छन्दः इन्द्रो देवता पूर्ववद्विनियोगः। अयमर्थः। अहानि दिवसा नोऽस्माकं शं सुखाय भवन्तु तथा रात्रिः शं सुखाय प्र-
तिधीयताम् प्रतिदधातु भवत्विति यावत् तथा इन्द्राग्नी नः सुखाय भवताम् कैः अह्नोभिः पालनैः तथा इन्द्रावरुणौ शं सुखाय भवेताम्॥ किं भूतौ रात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्यौ। तथा इन्द्रापूषणौ नः शंसुखाय भवताम्। किमर्थं सुविताय साधुगमनाय उत्तमगतिप्राप्तये न केवलं शंय्योश्च कल्याणयोगाय च १० ॐ शंनोदे·
वीरभिष्टय आपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः दध्यङ्ङाथर्वण ऋषिर्गायत्री छन्द आपो देवता पूर्ववद्विनियोगः ११ अस्य व्याख्यानं मध्यान्हस्ना
ने लिखितम्। ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः १२ मेधातिथिर्ऋषिर्गायत्री छन्दः। पृथिवी देवता पूर्ववद्विनियोगः
। अयमर्थः। हे पृथिवि नोस्माकं स्योना सुखदा भव अनृक्षरा भव नृक्षरा कण्टकः सा अस्यां नास्तीत्यनृक्षरा निष्कण्टका इत्यर्थः तथा निवेशनी भ
व निशेऽवस्थानं तद्योग्या एवंविधा च भूत्वा नोस्माकं शर्म सुखं यच्छ देहि किंभूता सती सप्रथाः सविस्तरा अतिविस्तरेत्यर्थः। हे पृथिवी अस्माकं सुख
रूपा अकण्टका अवस्थानार्हा च भूत्वा सुखं देहीति मंत्रवाक्यार्थः सप्रथा इति। प्रथ प्रख्याने इत्यसुन् प्रत्ययान्तस्य प्रथमैकवचनम् १२ ॐ आपो
हि ष्ठेति। यो वः शिवेत्यादि। तस्मा अरङ्ग इत्यादि। त्रयाणां सिन्धुद्वीप ऋषिर्गायत्री छन्द आपो देवता पूर्ववद्विनियोगः एतन्मन्त्रत्रयस्य व्याख्यानं प्रा
तःस्नानेनुसंधेयम् १५ ॐ द्यौः शान्तिरन्तरिक्षं शांतिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शांतिर्ब्रह्मशा
न्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि १६ दध्यङ्ङाथर्वण ऋषिरिन्द्रो देवता यजुषां छन्दो नास्ति पूर्ववद्विनियोगः। अयमर्थः॥ द्यौः स्वर्गः शा
न्तिः सर्वविघ्नोपशमोस्तु अस्माकमित्यध्याहार्यम्। तथान्तरिक्षं पृथिवी च शांतिरस्तु आपः शान्तिः शान्तय ओषधयो व्रीह्यादयः शान्तिः शान्तयः सं·
तु वनस्पतयो वृक्षाः शान्तयः सन्तु एवं या शान्तिः कृता सैव शान्तिरस्तु अत्र सर्वत्रैव द्यौः प्रभृति शान्तिरित्यन्तैः पदैः तत्स्वर्गाधिष्ठात्र्यो देवता अस्माकं
विघ्नोपशमपूर्वकमभीष्टसम्पादनाय भवन्त्वित्याशंसा वाक्यार्थः। आपः शांतिरित्यादिषु सुपां सुपो भवंतीति बहुवचने एकवचनम् १६ ॐ दृते दृंहमा
मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्तां॥ मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे १७। दध्यङ्ङाथर्वण ऋषिरिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रो देवता यजुषां छन्दो नास्ति पूर्ववद्विनियोगः। अयमर्थः। हे इन्द्र अनेन शान्तिकर्मणा मम धृते दृंह दृढीकुरु अत्र धृते मम यद्यद्धृतं परिगृहीतं शरीरभार्यापु
त्रादि धनं परिगृहीतम् तत्तत्त्वमा दृंह मखण्डितम् कुर्वित्यर्थः। किंच मा मां सर्वाणि भूतानि सर्वे प्राणिनः समीक्षन्ताम् पश्यन्तु किं न मित्रस्य चक्षुषा हिंस
कं भवति मित्रस्य चक्षुर्यादृगहिंसकं तादृशेन चक्षुषा सर्वे प्राणिनो मां शुभदृष्ट्या पश्यन्त्वित्यर्थः। एवं सति सर्वप्राणिनो ह त्वं मित्रस्य चक्षुषा अन्योन्यं स
मीक्षामहे हे इन्द्र मां शरीरभार्यापुत्रादिभिः संपूर्णं कुरु सर्वप्राणिनो मां मित्रवत्पश्यन्तु अहमपि तान् मित्रवत्पश्यामीति यास्त्वा वाक्यार्थः। १७॥ ॐ धृ
ते दृंह मा ज्योक्ते संदृशि जीव्यासम् १८ दध्यङ्ङाथर्वण ऋषिरिन्द्रो देवता यजुष्टां छन्दो नास्ति पूर्ववद्विनियोगः। हे इन्द्र धृते दृंह मा इति पूर्वकण्डिका
यामेव व्याख्यातं पुनर्वचनमादरार्थं किंच तेन तव संदृशि सन्दर्शने सति ज्योक चिरं त्वं जीव्यासम् अहं त्वं जीवेयम्। अत्रापि पुनर्वचनमादरार्थम्। त्वया दृष्टो
हं चिरं जीवेयमित्याशंसा वाक्यार्थः १८ ॐ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे अन्यांस्ते अस्मत्तपन्तु हेतयः। पावको अस्मभ्यं शिवो भव १९ ऋषिपु
त्रौ लोपामुद्रा ऋषिरग्निर्देवता बृहती छन्दः पूर्ववद्विनियोगः। अयमर्थः। हे अग्ने ते तुभ्यं नमोस्त्वित्यस्य तत्रावस्थितम् अत्रापि योज्यम्॥ किंभूताय तुभ्यम्
हरसे हृतस्य हर्त्रे किंभूताय शोचिषे दीप्तिकारिणे तथा अर्चिषे अर्चिःस्वरूपाय ते तुभ्यं नमोस्तु किमर्थं तेन तव हेतयो ज्वाला अस्मदन्यान् विरुद्धान् तपन्तु
दहन्तु न केवलमेवं त्वं पावकः सन् अस्मभ्यं शिवः कल्याणो भव एतदर्थं त्वं नमस्कृतोग्निरस्माकं विरुद्धान् दह त्वस्माकं कल्याणो भवत्वित्याशंसावा।
क्यार्थः। अत्र हरसे इति हृञ् हरणे इत्यस्य सर्वधातुभ्यो सुन्नित्यसुन्प्रत्ययः १९ नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समी
हसे २० दध्यङ्ङाथर्वण ऋषिरनुष्टुप् छन्द इन्द्रो देवता पूर्ववद्विनियोगः। हे इंद्र ते तुभ्यं नमोस्तु किंभूताय विद्युते विद्युद्रूपाय तथा स्तनयित्नवे मेघरूपा।
य ते तुभ्यं नमः तथा हे भगवन् सकलैश्वर्यशालिन् ते तुभ्यं नमोस्तु केन कारणेन त्वं नमस्क्रियसे यतः कारणात् स्वः स्वर्गं दातुं समीहसे चेष्टसे दातुमि

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा॰स॰
५०

त्यध्याहार्यम्। हे इन्द्र त्वं यत्स्वर्गार्थिनां स्वर्गं ददासि अतस्तुभ्यं विद्युद्रूपाय मेघरूपाय नमोऽस्त्वित्याशंसावाक्यार्थः॥ २०॥ ॐ यतोयतः समीहसे ततो नो अभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः २१ दध्यङ्ङाथर्वणऋषिरनुष्टुप्छन्दः इन्द्रो देवता पूर्ववद्विनियोगः अयमर्थः। हे इन्द्र त्वं यतो यतः यस्माद्यस्माद्दस्युत्स्कराद्दुरुपचाराद्दस्माकं भयं कर्तुं समीहसे चेष्टसे ततस्तस्मान्नोऽस्माकमभयं कुरु। किं च नोऽस्माकं प्रजाभ्यः पुत्रादिभ्यः शं सुखं कुरु तथा नः पशुभ्यो गवादिभ्योऽभयं कुरु इति पूर्वेण संबन्धः। अस्माकं त्वं दुरुपचारं प्राप्यास्माकं भयाय चेष्टसे तस्माद्दस्माकमस्मत्पुत्रादीनामभयं सुखञ्च कुर्विति याच्ञावाक्यार्थः २१ ॐ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः २ दध्यङ्ङाथर्वणऋषिरापो देवता यजुषा छन्दो नास्ति पूर्ववद्विनियोगः। अयमर्थः। आपः ओषधयः व्रीह्यादयः नोऽस्माकं सुमित्रियाः सन्तु साधुमित्रत्वेनावस्थिता भवन्तु या दुर्मित्रियाः दुष्टमित्रत्वेनावस्थितास्तास्तस्मै सन्तु तस्मै कस्मै योऽस्मान्द्वेष्टि अस्माकं द्वेषं करोतीति यञ्च वयं द्विष्मः यस्मिन्वयं द्वेषं कुर्मः। आपो व्रीह्यादयश्चास्माकं साधुमित्रवद्भोषकारिण्यो भवन्तु अस्मच्छत्रूणाञ्च दुष्टमित्रवद्विरोधिन्यो भवन्त्वित्याशंसावाक्यार्थः २२ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् २३ दध्यङ्ङाथर्वणऋषिः सूर्यो देवता पुरउष्णिक्छन्दः पूर्ववद्विनियोगः। अस्यार्थः। तत्पश्येम किं तत् चक्षु रिव त्रैलोक्यप्रकाशकत्वादादित्यमण्डलमित्यर्थः। तत्किंभूतं देवहितं देवानां हितं पुनः किंभूतम् पुरस्तादुच्चरत् प्राच्यामुद्यत् पुनः किंभूतम् शुक्रं शुक्लं निर्मलमिति यावत्। अस्यादित्यस्य दर्शनाद्वयं शरदः शतं पश्येम जीवेम शरदः शतं शृणुयाम शरदः शतं योऽयं सर्ववेदमयश्चादित्यः प्रत्यहं प्राच्यामुदेति तस्य प्रसादेन वयमविकलेन्द्रियाः शतं वर्षाणि जीवेमेत्याशंसावाक्यार्थः॥ २४॥ इति शान्त्यध्यायः॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वे देवास इह मादयन्तामो३ प्रतिष्ठ। अस्यार्थः

राम॰
५०

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आङ्गिरसो बृहस्पतिर्ऋषिर्विश्वेदेवा देवता यजुष्टुप् छन्दो नास्तिसमिदनुमन्त्रणे विनियोगः। अस्यार्थः। मदीयं मनः आज्यस्य मया चाहूयमानस्य हवनीय द्रव्यस्य फलं जुषतां सेवतां प्राप्नोत्विति यावत्। किंभूतं मनः ज्योतिरिव प्रकाशकमित्यर्थः। बृहस्पतिरिमं प्रकृतं यज्ञं तन्नोतु विस्तीर्णं करोतु। किंच बृहस्पतिरिमं यज्ञं सं दधातु संपूर्णं करोतु किंभूतमरिष्टमिष्टहीनम् तथा विश्वेदेवासः सर्वे देवाः इह प्रकृते कर्मणि मादयन्तां हृष्टा भवन्तु। एवं सति हे यज्ञ त्वं ॐ प्रतिष्ठ ॐकारो रक्षणार्थः रक्षितः सन् प्रतिष्ठितो भवेत्यर्थः। यत्किंचिद्विश्वेदेवादिकं कृतं तस्य फलं मदीयं मनः प्राप्नोतु तस्मिंश्च कर्मणि बृहस्पतिना विस्तारिते पूरिते च सर्वे देवा हृष्टा भवन्तु तच्च कर्म प्रतिष्ठितं भूत्वा मदीयाभ्युदयाय संपद्यतामित्याशंसावाक्यार्थः ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु १ शिवसंकल्पऋषिः कर्मणो देवता त्रिष्टुप्छन्दः आदित्योपस्थाने विनियोगः। अस्यमर्थः। यन्मनः जाग्रतो निद्राहीनस्य दूरमुदैति गच्छति किंभूतं दैवं देवस्य ब्रह्मणो विज्ञानस्वरूपस्य प्रकाशकमपि च तन्मनः सुप्तस्य निद्राणस्य तथैव दूरमेव एति। आगच्छति आगमनेन दूरत्वाभिधानं सर्वत्रोपसंहर्तृत्वस्थापनार्थम्। किंभूतं मनः ज्योतिषां प्रकाशकानां चक्षुरादीन्द्रियाणां मध्ये दूरङ्गमं ज्योति। दूरगामीन्द्रियं अन्यानि च चक्षुरादीनि सन्निहितप्रकाशकानि मनस्तु व्यवहितप्रकाशकमित्यर्थः। पुनः किंभूतं एकं मुख्यं चक्षुरादीनि स्थानप्रकाशकानि मनस्तु सन्निहितसूक्ष्मप्रकाशकम्। अतश्चक्षुरादीनामुत्तमत्वेन तन्मम मनः शिवसंकल्पमस्तु कल्याणाभिलाषि भवतु। मदीयं मनो निष्ठाभिलाष पूर्णकल्याणाभिलाषि भवत्वित्याशंसावाक्यार्थः १ ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वेदेवा यज्ञं प्रावन्तु नः शुभे १। मधुच्छन्द ऋषिरनुष्टुप्छन्दो विश्वेदेवा देवता विन्युपस्थाने विनियोगः अयमर्थः।। अग्निरिन्द्रो ब्रह्मा बृहस्पतिरेते यज्ञं प्रकृतं कर्मणि शुभे अस्माकं मधुरपार्थं प्रावन्तु आयान्तु किंभूतो गन्धादिगणः धामच्छत् धाम आश्रयं छादयति पूरयतीति धामच्छत् न्यूनपूर्णातिरिक्ताच्छादनेन च यथावत्करोतीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्रा॰स॰ पुनः किंभूतः देवः दानादिगुणयुक्तः एतच्च विशेषणद्वयमग्न्यादिभिश्चतुर्भिः सहसंबध्यते। किंच विश्वेदेवा नोस्माकं शुभेशुभनिमित्तं प्रावन्तु आयान्तु किं
५१ भूताः सचेतसः समानचेतसः एकमनसइति यावत् ये अग्न्यादयो देवाः आश्रयभूतं कर्मयथावत्कुर्वन्ति। ते प्रक्रान्तकर्मणः प्रक्रान्तं कर्म यथावत्करणेना
स्माकं शुभे निर्वाहाय प्राप्नुवन्त्वित्याशंसा वाक्यार्थः २ ॐ त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः रक्षा तोकमुत त्मना। २। उशना काव्य ऋषिरग्निर्देव
ता गायत्री छन्दः अग्न्युपस्थाने विनियोगः। अयमर्थः। हे यविष्ठ युवतम अग्ने त्वं नॄ न्मनुष्यान्भार्यादिपरिजनानिति यावत्। पाहि रक्ष कस्माद्दाशुषः
दत्तवतः हवींषि दत्तवतो ममेत्यर्थः। किंच गिरः स्तुतिवचनानि शृणुधि शृणु श्रुत्वा च मम तोकमपत्यं रक्ष उत अपि च त्मना आत्मानञ्चाहं पत्यादि त्वेनाव
स्थितं रक्षेति संबन्धः हे अग्ने त्वं मद्दत्तानि हवींषि गृहीत्वा स्तुतिवाक्यानि च श्रुत्वा मम भार्यादिपरिज नान्पुत्रान्गार्हपत्याद्यग्नींश्च रक्षेत्यस्य प्रार्थनावा
क्यार्थः। अत्र दाशुष इति दाशृ दाने इत्यस्माल्लिट्कसुश्च दाश्वान्साह्वान्मीढ्वांश्चेति अर्हि वचनमनिट्त्वञ्च निपात्यते दाश्वस शब्दस्य षष्ठ्येक
वचने संप्रसारणे रूपम्। त्मना इति मन्त्रेष्वाङ्ग्यादेरात्मनइत्याकारलोपः द्वितीयार्थे तृतीया। २। ॐ एतत्ते रुद्रावसं तेन परो मूजवतोतीहि। अवतत
धन्वा पिनाकावसः कृत्तिवासा३ हिंसन्नः शिवोतीहि। १। प्रजापतिर्ऋषिर्विष्टारपङ्क्तिश्छन्दो रुद्रो देवता त्र्यम्बकपुरोडाशाभ्यञ्जने विनियोगः। अस्या
र्थः। हे रुद्र अतीहि पाहि केनेतेन अवसेतेन अवसं वर्त्मशंबलं एतेनोपस्थितेन पुरोडाशरूपेण शंबलेन किंभूतः मूजवतः परः मूजवन्नामस्तु मेरुशृ
ङ्गं भगवतो रुद्रस्य निवासः तस्य परः परस्ताद्गामी पुनः किंभूतः अवततधन्वा आरोपितधनुः हिंसादीनामलं घ्य इत्यर्थः। पुनः किंभूतः पिनाकावसः पि
नाको रुद्रांकुशस्तत्रकृतमवसं शम्बलं येन स पिनाकावसः तथा च कृत्तिवासाः कृत्तिश्चर्मवासः परिधानं यस्य एवं भूतस्त्वं नोस्मान हिंसन्नः शिवः पर राम॰
मेश्वरः शान्तः सौम्यः अतीहि पाहीति पुनर्वचनं पूजार्थम्। हे रुद्र मतः एवं पुरोडाशं शम्बलं रुद्रांकुशे कृत्वा धनुरारोप्यास्मानहिंसन्सौम्यो भूत्वाम् ५१

शान्तो २५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जवन्तं स्वस्थानं पाहीति प्रेरणं वाक्यार्थः॥ ॐ नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नमः ॐ ओषधीभ्यो नमो वाचे नमो वाचस्पतये नमो विष्णवे महते
करोमि इत्यापस्तम्बीयो मन्त्रः। अस्यार्थः। ॐकारो रक्षणार्थः मङ्गलार्थो वा इदं शान्तिकर्म रक्षितं भवत्वित्यर्थः। ब्रह्मणे नमोऽस्त्वग्नये नमोऽस्तु पृथिव्यै नमो
ऽस्त्वोषधीभ्यो व्रीह्यादिभ्यो नमोऽस्तु वाचस्पतये नमोऽस्तु विष्णवे नमस्करोमि महते महतत्त्वाय नमस्करोमि अनेन शान्तिकर्म्मणा समाभ्युदयसिद्ध्यै ब्रह्मादी
न्नमस्करोमीति वाक्यार्थः ९ ॐ यद्देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ। अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम्॥
मरुच्छेद ऋषिस्त्रिष्टुप्छन्दो विश्वेदेवा देवता आश्रयग्रहणे विनियोगः। अस्यार्थः। हे देवासः देवाः ये यूयं दिवि स्वर्गे एकादशस्थ एकादशकोटिसंख्याः स्थ पृथन्
था पृथिव्यामधि पृथिव्युपरि एकादशस्थ तथा अप्सुक्षितः अप्सु इत्येवं रूपः शब्द आकाशवाची क्षितः स्थिताः आकाशस्था इत्यर्थः। एकादशकोटिसं
ख्याः स्थ केन स्थिताः महिना महिम्ना माहात्म्येनेत्यर्थः। हे देवासः इमं यज्ञं शान्तिकरणरूपं यूयं जुषध्वं सेवध्वम्। स्वर्गाकाशपृथिवीस्थास्त्रयस्त्रि
शत्कोटिसंख्या देवा इदं शान्तिकर्म्माधिष्ठाय अस्माकमभ्युदयं कुर्वन्त्वित्यभ्यर्थना वाक्यार्थः। इत्यावसथिक महाधर्म्माधिकृत श्रीहलायुधविरचिते ब्रा
ह्मणसर्वस्वे वैश्वदेवशान्त्यध्यायव्याख्या॥ अथातिथिपूजा॥ तत्र मनुः वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्। तस्याप्यन्नं यथाशक्ति प्रदद्यान्न व
लिं हरेत्। शातातपपाराशरौ। प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव च। वैश्वदेवे तु संप्राप्तः सोऽतिथिः स्वर्गसङ्क्रमः। वलिदानानन्तरं विष्णुपुराणे
।ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहाङ्गणे। अतिथिग्रहणार्थाय तदूर्ध्वं वा यथेच्छया। अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना। तथासनप्रदानेन पादप्रक्षा
लनेन च। श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च। गच्छतश्चानुयानेन प्रीतिमुत्पादयेद्गृही। अज्ञातकुलनामानमन्यतः समुपागतम्। पूजयेदतिथिं स
म्यगेकग्रामनिवासिनम्। वलिदानानन्तरं शंखलिखितौ। आगोदोहनमात्रं कालमाकाङ्क्षेत्। अतिथिं श्रोत्रियो रेवत्र नीयति धर्म्मनैष्ठिकः। समान च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा॰स॰ ५२ तिर्योन्यो ध्यापक आगच्छेत्तस्मिन्काले तमर्चयित्वाश्नीयात्तु हृष्यति निरपित्रा ब्राह्मणो ह्यनश्नन्सुकृतमादत्ते। पर्यश्नन्तः पूजां कुर्वन्ति। वाग्दुरितेनैना
न्नयः शाम्यन्ति। तस्मादाहिताग्निर्नानृतवादी न पूर्वाशी नाश्नस्कृतवाक्याभिधायी भवेत्। एवमाह। अपि शाकं पचानस्य शिलोञ्छेनापि जीवतः। जुह्वान
स्याग्निहोत्रन्तु नातिथिर्विमना भवेत्। अग्नयो तिथिमिच्छन्ति सो तिथिः स्वर्गमिच्छति। स्वयमिच्छन्ति दातारं सम्यक् सुकृतकारिणम्। प्रार्थयन्ते य
था सर्वे निपानं मृगपक्षिणः। एवं गृहस्थं सम्पन्नं प्रार्थयन्ती ह साधवः। आतिथ्याधिकारे हारीतः। नस्यैष यदाह स्वागतमिति गृहदेवता स्तेन प्रीणा
ति। यस्माद् सेचनं कुरुते पितॄंस्तेन प्रीणाति यदकेनातिथिं पूजयति प्रजापतिं तेन प्रीणाति यदेनं यथान्नमनुयाति श्रेयसो ब्रह्मा वचेयन्ते न सर्वान्कामा
नवाप्नोति। मनुः। एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः। अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते। याज्ञवल्क्यः। अध्वनीनो तिथिर्ज्ञेयः श्रोत्रियो वेदपा
रगः। मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः। पाराशरः। अविज्ञातमनाहूतं देशकाल उपस्थितं। अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः। त
था ह्यु भार्तं स्तृषितः श्रान्तो दैवादध्वानमागतः। तं पूजयेत्प्रयत्नेन सो तिथिः स्वर्गसंक्रमः। मनुः। नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा। उपस्थितं गृ
हे विद्याद्भार्या यत्राग्नयो पि वा। शंखः। न यज्ञैर्दक्षिणावद्भिर्वह्निशुश्रूषया तथा। गृही स्वर्गमवाप्नोति यथा त्वतिथिपूजनात्। यमः। नाग्निहोत्रेण दानेन नोपवा
सफलेन च। देवताः परितुष्यन्ति यथा त्वतिथिपूजनात्। पुनर्यमः। विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत्पुष्करपात्रेण पिबन्ति पितरो जलम्
। यस्माध्वखिन्नाः पथिका गृहमायान्ति कर्षिताः पूज्यन्ते तृणभूम्याद्यैः वितरन्ते न पुत्रिणः। बौधायनः। यदा बहूनां न शक्नुयादेकस्मै गुणवते दद्यात् यो वा प्रथ
ममागतः स्यात्। पैठीनसिः। सविशेषतो न्नमतिथये दद्यात्। पुत्रं जातमुद्दीक्षन्ते श्रोत्रियं भोजयिष्यतीति। वदन्ति पितरः पितामहाः प्रपितामहाश्च स्वागते राम॰
नाग्निरासनेनेन्द्रः पितरः पाद्येनान्नाद्येन प्रजापतिः। स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः। पितरः पादशौचेन भोज्जनेन प्रजापतिः। मनुः। अप्रणोद्योऽति- ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थिः सायंसूर्योढो गृहमेधिनाम्। काले प्राप्ते त्वकाले वा नास्यानश्नन् गृहे वसेत्॥ तथा शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः। सर्वं सुकृतमादत्ते।
ब्राह्मणोऽनर्चितो वसन्। तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन। विष्णुपुराणे। दिवातिथौ तु विमुखे ग
ते यत्पातकं नृणाम्॥ तदेवाष्टगुणं पुंसां सूर्योढे विमुखे गते। इत्यतिथिपूजाप्रकरणम्। लक्ष्मणक्षोणिपालस्य धर्माध्यक्षो हलायुधः॥ निखिलश्राद्ध
मन्त्राणां व्याख्यां व्याख्यापितवानिमाम्॥ अथ श्राद्धमन्त्रव्याख्या। तत्र यद्यपि नित्याह्निकप्रसङ्गवशात् प्रथमतो नित्यश्राद्धं व्याख्येयं कर्तुं युज्यते तथा
पि सर्वेषामेवान्येषां सपिण्डीकरणनित्यश्राद्धैकोद्दिष्टश्राद्धादीनां प्रकृतिभूतं सर्वप्रधानं पार्वणश्राद्धं विध्यन्तर्भावित्वेन पार्वणश्राद्धमन्त्रव्या
ख्यानादेव सकलनित्यनैमित्तिककाम्यश्राद्धमन्त्रव्याख्यानस्य सिद्धिरतः पार्वणश्राद्धमन्त्रव्याख्यानमेव प्रथमतः क्रियते। ये तु सपिण्डीकर
णवृद्धिश्राद्धयोर्मन्त्रा अत्र न प्राप्यन्ते तेऽप्यस्यैव शेषे व्याख्यायन्ते। अथ पार्वणश्राद्धम्। तत्र कुशासनदानानन्तरं विश्वेदेवानामावाहनम्। आसनेषूद
र्भानास्तीर्य विश्वान्देवानहमावाहयिष्य इति पृच्छति आवाहयेत्यनुज्ञातो विश्वेदेवास इति यवानवकीर्य्याथ भाजने सपवित्रके इति। याज्ञवल्क्यः
आवाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनया ऋचावाहयेदिति। कात्यायनः। तत्र गृत्समद ऋषिर्गायत्री छन्दो विश्वेदेवो देवता त्रिश्राद्धे वैश्वदेवग्रह
नि णे विनियोगः। मन्त्रो यथा। ॐ विश्वेदेवास आगत शृणुता म इमं हवम्। एदं बर्हिर्निषीदत॥ १॥ अस्यार्थः। हे विश्वेदेवासः यूयं मेममइदं हवमाह्वानं
शृणुत श्रुत्वा चागत आगच्छत आगम्य इदं बर्हिः कुशे आ निषीदत आसनार्थमुपकल्पिते बर्हिषि निविष्टा भवतेत्यर्थः॥ अत्र विश्वेदेवास इति सम्बोध
ने प्रथमाबहुवचने आज्जसेरसुगित्यसुगागमेन रूपम्॥ शृणुत इत्यत्र तस्य तात् इति तकारस्य स्थाने तादेशः॥ आगतेति आगच्छत इत्यत्र वर्णाग
मो वर्णविपर्य्ययश्चेति छकारस्य लोपः। आ निषीदतेति छन्दसि परेऽपि व्यवहिताश्चेति पाणिनिस्मरणाद्व्यवहितेनाङा निषीदतेत्यस्य सम्बन्धः॥ इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्हिरितिआङ्कर्म्मप्रवचनीयइत्यनेनसप्तम्यर्थेद्वितीया।यवविकरणानन्तरंजपः।तथाचकात्यायनः।अवकीर्य्यविश्वेदेवाःशृणुतेममिति
जपेदिति।अत्रसुहोत्रऋषिस्त्रिष्टुप्छन्दोविश्वेदेवादेवतासर्वमेधेवैश्वदेवग्रहणेविनियोगः।मन्त्रोयथा।ॐविश्वेदेवाःशृणुतेमं हवंमेयेअन्त
रिक्षेयउपद्यविष्ठयेअग्निजिह्वाउतवा यजत्राआसद्यास्मिन्बर्हिषिमादयध्वम्॥२॥अस्यार्थः।हेविश्वेदेवायूयंमेममइदंहवमाह्वानंशृणुतकिं
भूतायूयंयेअन्तरिक्षेआकाशेस्थितिकृतवन्तःथायेउपसमीपेपृथिव्यांद्यविस्वर्गेद्वयोःस्थइत्यनेनैवसंबन्धः।एतदुक्तंभवति॥भूमावाकाशेस्वर्गेचये
स्थिताविश्वेदेवाःकेतेयेअग्निजिह्वाःअग्निजिह्वाहविर्भोजनसाधनंयेषांउतवाअपिवायेयजत्राःयजनंश्राद्धकारिणंत्रायन्तइतियजत्राः।उ
तेरवोमाईवप्रभृतयः।तेयूयमस्मिन्सदनेबर्हिषिकुशेआसद्यउपविश्यमादयध्वम्महर्षहर्षस्तद्युक्ताभवत।मादयध्वमितिस्वार्थेणिच्।श्राद्धे
चदेवारक्षितारइत्यत्रतेषामुरक्षभूतत्तुदेवपूर्वंयोजयेदितिमनुप्रमाणम्।एतज्जपानन्तरंपितृणामावाहनम्।यथाकात्यायनः।उशन्तस्त्वेत्यन
यावाहेति।तत्रशंखऋषिरनुष्टुप्छन्दःपितरोदेवतासोत्रामण्याममृपस्थानेविनियोगः।मन्त्रोयथा।ॐउशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि।उ
शन्नुशतआवहपितॄन्हविषेअत्तवे।अग्निर्देवतोमन्त्रः।तेनायमर्थः।हेअग्नेत्वात्वांनिधीमहिआदधीमहिआधानंकुर्म्मइतियावत्वयमित्यध्या
हार्य्यम्।किंभूतावयम्।उशन्तस्त्वामिच्छन्तः।किंचउशन्तएववयन्त्वासमिधीमहिज्वालयामः।लब्धासाभिराहितोज्वालितश्चपितॄनग्निष्वात्तादीन
वहआवाहयआनयेत्यर्थः।किंभूतस्त्वंउशन्पितॄनिच्छन्।किंभूतान्पितॄनुशतइच्छन्तः।किमर्थमावाहनमित्यतआह।हविषेआसमन्तत्हवि
षःअत्तवेअदनार्थम्।हेअग्नेअस्माभिराधानज्वालनाभ्यामाराधितस्त्वमस्माकंपितॄन्श्राद्धदेयस्यहविषोभक्षणायानयेत्यग्नेःप्रार्थनावाक्यार्थः। सम·
पदसाधनञ्चतर्पणप्रस्तावएवकृतम्।आवाहनानन्तरञ्जपः।कात्यायनः।अवकीर्य्यायन्तुनइतिजपेत्।तत्रशंखऋषिस्त्रिष्टुप्छन्दःपितरोदे ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्तासौत्रामण्युपस्थाने विनियोगः। मन्त्रो यथा। ॐ आयन्तु नः पितरः सोम्यासो ऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तो ऽधिब्रुवन्तु
ते ऽवन्त्वस्मान्। अस्यार्थः। नो अस्माकं पितरः आयन्तु आगच्छन्तु के ते पितरः सोम्यासः सोम्याः सोमपाः इत्यर्थः। न केवलं सोम्याः अग्निष्वात्ताः श्रौत
स्मार्ताग्निभिः ष्वात्ताः भक्षिताः तेषां श्रौतस्मार्ताग्निभिः संस्कारः कृतः इत्यर्थः। कैः आगच्छन्तु पथिभिर्वर्त्मभिः किंभूतैः देवयानैः देवानां यानं गम
नं यैर्वर्त्मभिस्तैः आगत्य ते पितरो ऽस्मिन्श्राद्धरूपे यज्ञे अस्मान्पितरः अधिब्रुवन्तु अधिकान्ब्रुवन्तु श्लाघयन्त्वित्यर्थः। किंभूताः मदन्तः तृप्यन्तः कया
स्वधया पितॄणामन्नेन न केवलमधिब्रुवन्तु अवन्तु च रक्षन्तु च। अस्मिन् श्राद्धे अस्माकं पितरः सोमपाः अग्निष्वात्ताः आगच्छन्तु आगत्य च स्वश्रा
द्धदत्तान्नेन तृप्यन्तो ऽस्मान् श्लाघयन्तु रक्षन्तु चेत्याशंसा वाक्यार्थः। पदसाधनन्तु तर्पणप्रस्तावे कृतम्। ततः पात्रेषु जलदाने कात्यायनः। यज्ञियवृक्ष
चमसेषु पवित्रान्तर्हितेषु एकैकस्मिन्नप आसिञ्चति शन्नो देवीरिति। तत्र दध्यङ्ङाथर्वण ऋषिरापो देवता गायत्री छन्दो महावीरोद्यन्तयोः शान्तिकरणे
विनियोगः। मन्त्रो यथा। ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः। अस्यार्थः। हे आपः नो ऽस्माकं पितॄणामिति शेषः। शङ्कल्याण्यो भ
वन्तु किंभूताः देवीः दिव्यस्तुत्यादिविषयाः किमर्थम् अभिष्टये उपचयार्थं पीतये पानाय च। किञ्च नो ऽस्माकं शंय्योः कल्याणयोगाय अभिस्रवन्तु अभिमुखस्र
वन्तु। अथवा वाक्यार्थः। आपो ऽस्माकमुपचयाय पानाय कल्याणयोगाय च भवन्त्वित्याशंसा। पदव्याकारश्च स्नानप्रस्तावे कृतः। ततो देवपात्रे यवदान
म्। तत्र प्रजापतिर्ऋषिर्यवो देवता यजुश्छन्दो नास्ति अग्निष्टोमे स्रुचि यवप्रक्षेपणे विनियोगः। मन्त्रो यथा। ॐ यवो ऽसि यवयास्मद्द्वेषो यवयारातीः।
अस्यार्थः। यवः असि पृथक्कारी भवसि अस्मद्द्वेषः अस्मदुपचारजातशत्रून् यवय पृथक्कुरु परभिन्नान् सहररहितान् कुर्वित्यर्थः। न केवलम् अरातीः स
हजशत्रूंश्च यवय असंहतान् कुरु यतस्त्वं पृथक्कारी अतो ऽस्माकं शत्रून् भिन्नान् कुर्विति वाक्यार्थः। द्वेष इति कृत्रिमशत्रुवाची अरातिः सहजशत्रुः। अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यु मिश्रणइत्यस्य धातोः पचाद्यच्प्रत्यये कृते यवइति कर्तरि रूपम्। यवयइति तस्यैव धातोर्ऋदोरबिति अप्प्रत्ययेन यवः तत्करोति तदाचष्टइति णिच्प्र
त्यये लोट्मध्यमपुरुषैकवचने रूपम्। द्वेषइति द्विषइति प्राप्ते छान्दसत्वादिकारस्याने एकारः। अरातिशब्दः स्त्रीलिङ्गोपि वेदे दृश्यते। यथा उभस्या·
अरात्याइति प्रदेशान्तरे पठ्यते। ततः पितृपात्रेषु तिलप्रक्षेपे कात्यायनः। एकैकस्मिन्नेव तिलानावपति तिलोसीति। मन्त्रो यथा। ॐ तिलोसि सो
मदेवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄन्लोकान्प्रीणाहि नः स्वाहा। अस्यार्थः। तिलस्त्वमसि भवसि किंभूतः सोमदेवत्यः सोमो दे
वता अस्येति सोमदेवत्यः पुनः किंभूतः गोसवः गां स्वर्गं सूतइति गोसवः तिलो हि दत्तः सन् दातुः पापक्षयं कुर्वाणः स्वर्गं जनयति अपि किंभूतः देवनिर्मि
तः देवेन विष्णुना निर्मित उत्पादितः अपि किंभूतः अद्भिः पृक्तः जलेन मिश्रितः यतस्त्वमेवंभूतः तस्मादस्माकं पितॄन्लोकान् पितृपितामहप्रभृतीन्प्र
त्नं चिरकालं स्वधया स्वधाकारेण प्रीणाहि प्रीतान्कुरु स्वाहाकारस्तिलप्रक्षेपार्थः। तिलोसीत्यादि स्वधयाइत्यन्तेन तिलं क्षिप्त्वा अस्माकं पितॄन्प्रीता
न्कुर्विति याञ्चावाक्यार्थः। अत्र प्रीणाहीति प्रीङ्धातोर्लोट् सिपूर्वाच्छन्दसीति विकल्पेन पित्वे सति ङित्वाभावात्तन्निबन्धनइकारो न भवति। यद्यपि स्वाहादे
वहविर्दानइति दर्शनादत्र पित्र्ये कर्मणि स्वाहाकारोऽयुक्तस्तथापि कात्यायनेन महर्षिणा स्वाहान्तस्यैव मन्त्रस्य पाठाद्दत्तुपपत्तिर्नोशंकनीया। एकैक
स्यैकेकेन पितृस्रुतिया दिव्याइति कात्यायनः। मन्त्रो यथा। ॐ या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्तान आ
पः शिवाः शं स्योनाः सुहवा भवन्तु। अस्यार्थः। आपः पानीयानि पयसा क्षीरेण संबभूवुः माधुर्यशीतत्वादिना एकीभूताइत्यर्थः कास्ता आपः या
दिव्याः दिवि स्वर्गे भूताः उत अपि या अन्तरिक्षाः आकाशभूताः उत अपि याः पार्थिवीः पृथिव्यां भूताः उतशब्द उभाभ्यां संबध्यते किंभू ताः हिरण्यव
र्णाः हिरण्यं रजतं तत्समानवर्णाः शुभ्रवर्णाः पुनः किंभूताः यज्ञियाः यज्ञार्हाः ताः आपः नो अस्माकं शिवाः क्षेमा भवन्तु न केवलं शिवा अपि च शं कल्याण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाभवन्तु स्योनाः सुखदाश्च भवन्तु सुहवा ब्राह्मणा हव्ये हुताः भवन्त्वित्यनेनैव संबन्धः। अत्र पार्थिवीरिति प्रथमाबहुवचनस्थाने विभक्तिव्यत्ययेन द्वितीया बहुवचनम्। स्योना इति सुखस्य नाम निरुक्ते पठ्यते। वाक्यार्थस्तु या दिव्या इत्यादि यज्ञिया इत्यन्तेनाप्सु स्नाताः अस्माकं क्षेमकल्याण्याः सुखाः स्वर्गदाश्च भवन्त्वित्याशंसा। प्रथमपात्रे संस्रवान् समवनीय पात्रं न्युब्जीकरोतीति कात्यायनः। मन्त्रो यथा। पितृभ्यः स्थानमसि॥ अस्यार्थः॥——
हे पात्र पितृभ्यः पितॄणां स्थानमसि भवसीत्यर्थः। अत्र पितृभ्य इति षष्ठ्यर्थे चतुर्थी यतः त्वं पितॄणां स्थानं भवसि अतस्त्वं पितॄणामवस्थानाय न्युब्जीकृतमित्यभिप्रायः। अत्र च पितरस्तिष्ठन्तीति स्मृतिः। आवृत्तास्तत्र तिष्ठन्ति पितरः श्राद्धदेवताः। उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौकरिष्य इति कात्यायनः। तत्राग्नौकरणहोममन्त्रद्वयस्य प्रजापतिऋषिर्द्वे वोद्देवता यजुषी छन्दो नास्त्यग्नौकरणहोमे विनियोगः। मन्त्रो यथा ॐ अग्नये कव्यवाहनाय स्वाहा। अस्यार्थः। अग्नये स्वाहा किंभूताय कव्यवाहनाय कव्यं पितॄणामन्नं तत् पितृभ्यो वहति प्रापयतीति कव्यवाहनस्तस्मै। ॐ सोमाय पितृमते स्वाहा। अस्यार्थः सोमाय स्वाहा किंभूताय पितृमते पितरो अस्य सन्तीति पितृमान् तस्मै। हुतशेषं दत्वा पात्रमालभ्य जपति। पृथिवी ते पात्रमिति कात्यायनः। मन्त्रो यथा। ॐ पृथिवी ते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। अस्यार्थः। हे अग्नौकरणशेष ते तव पात्रमाधारः पृथिवी विश्वस्याधारभूता पिधानं आवरणं द्यौः आकाशं त्वाममृतं हुतशेषं ब्राह्मणस्य मुखे जुहोमि। किंभूते अमृते अनष्टे अभक्ष्यभक्षणादिभिरदूषिते इत्यर्थः। अत्र ते इति युष्मत्तच्छब्ददर्शनात् प्रकृतत्वाच्च हे अग्नौकरणशेष इति संबोधनमध्याहृतम्॥ अमृतमिति विशेषणपदस्मरणेन त्वाममिति विशेष्यं कर्मपदं कल्पितम्। पृथिवी ते पात्रमित्यनेन भोजनपात्रं स्तुतं द्यौः पिधानमित्यनेन चाच्छन्नं हविर्येन केनापि द्रष्टव्यत इति शङ्का निराकृता। ब्राह्मणस्य मुखे अग्निसदृशे त्वाममृतं जुहोमीति यावद्वाक्यार्थः। जुहोमीति होमप्रतिपादनात् स्वाहापदसमावेशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रास ब्राह्मणस्याग्निसदृशत्वेश्राद्धाधिकारे।आपस्तंबः।पितरोदेवताब्राह्मणास्त्वाहवनीयार्थेइति।वेत्तव्यञ्चयिजुषावाजपतिअङ्गुष्ठमन्नेवगाह्यइति
५५ ।कात्यायनः।तत्रमेधातिथिऋषिर्विष्णुर्देवतागायत्रीछन्दोऽन्नस्पर्शेविनियोगः।मन्त्रोयथा।ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदं।समूढमस्य
पांसुरे।अस्यार्थः।विष्णुर्भगवानिदंअन्नंविचक्रमेविक्रान्तवान्आक्रान्तवानित्यर्थः।विष्णुरेवपदंनिदधेनिहितवान्अर्पितवान्कथंत्रेधा
त्रिःप्रकारंपृथिव्यामाकाशेस्वर्गेच अस्यविष्णोःपदंपांसुरेधूलिकायांसमूढंपृथिव्यांसमूढंसम्यग्निविष्टम्।अथमन्त्रवाक्यार्थः।योविष्णुःपृथि
व्यामाकाशेस्वर्गेचपदमर्पितवान्तस्यचपदंपृथिव्यांविशेषतःसम्यङ्निविष्टंसविष्णुरिदमन्नमाक्रान्तवान्अतोराक्षसाअपसरन्त्वित्यस्या
र्थः।अपहताइतितिलानविकीर्येतिकात्यायनः।तत्रप्रजापतिऋषिःसुरादेवतायजुष्टाच्छन्दोनास्तिपिण्डपितृयज्ञेरक्षाकरणेविनियोगः
मन्त्रोयथा।ॐअपहताअसुरारक्षांसिवेदिषदः।अस्यार्थः।असुराःअपहताःअपसारिताःकिंभूताःवेदिषदःवेदिःश्राद्धार्थेसंस्कृता।
भूमिःतत्रसीदन्तितिष्ठन्तीतिवेदिषदःनकेवलमसुरारक्षांसिराक्षसाश्चापसारिताइत्यर्थः।अनेनविकीर्णतिलेनश्राद्धभूमिस्थिताःअसु
राराक्षसाश्चनिराकृताइतिवाक्यार्थः।अन्नंमधुमयंकृत्वामधुवातेतिमंत्रितमितिकात्यायनः।तत्रगोतमऋषिर्विश्वेदेवादेवतागायत्रीछन्दःश्राव
नेकर्मस्थदधिमधुघृताभ्यंजनेविनियोगः।मन्त्रोयथा।ॐमधुवाताऋतायतेमधुक्षरन्तिसिन्धवः।माध्वीर्नःसन्त्वोषधीः।मधुनक्तमुतोषसोमधुम
त्पार्थिवंरजः।मधुद्यौरस्तुनःपिता।मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः।माध्वीर्गावोभवन्तुनः।अस्यार्थः।वाताःमधुऋतायतेवायोमधुव
हन्त्वित्यर्थः।सिन्धवोमधुक्षरन्तुनद्योमधुस्रवन्तुओषधीर्माध्वीःसन्तुओषधयोधान्यादयोमधुयुक्ताभवन्त्वित्यर्थः।नोऽस्माकमितिस्थानत्रयेपि राम
योज्यं।नक्तंमधुअस्तुरात्रिर्मधुमतीभवतुनकेवलमहः।रात्रिश्चउषसोपिमधुश्रवाःसन्तुइतिपूर्वेणेवसंबन्धः।उषःप्रभातंपार्थिवंरजःम ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धुमदस्तु पृथिवी मधुमती भवत्वित्यर्थः। द्यौः स्वर्गः मध्वस्तु मधुमती भवतु किंभूता द्यौः पिता पितेव सर्वस्यानुकूला अत्रापि नइति सर्वत्रैव योज्य
म्। वनस्पतिर्नः मधुमानस्तु वनस्पतिः सोमः सूर्यश्च मधुमानस्तु गावो नः माध्वीर्भवन्तु। अत्र ऋतायत इति निघण्टौ प्रापणार्थः। ऋतधातोर्लोट्प्रत्यये
कृते तिङां तिङो भवन्तीति बहुवचनस्थाने एकवचनेन ऋतायत इति रूपम्। तथा क्षरन्तीति आशंसायां लेट्। माध्वीरोषधीरिति च सुपां सुपो भवन्ती
ति प्रथमाबहुवचनस्थाने द्वितीयाबहुवचनम्। अस्य कण्डिकात्रयस्य वाय्वादि सर्वमेतदस्मत्पितॄणां मधुमयं भवत्वित्याशंसा वाक्यार्थः। अपहता
इति व्याख्यातमेव। पिण्डदानानन्तरमत्र पितर इत्युक्त्वा उदङ्ङास्ते इति कात्यायनः। अत्र प्रजापतिऋषिः पितरो देवता बृहती छन्दः पिण्डपितृयज्ञे जपे
विनियोगः। मन्त्रो यथा। ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्। अस्यार्थः। हे पितरः अत्र मादयध्वं अत्र पिण्डे मुदयुक्ता भवत। किं च यथाभाग
मावृषायध्वं स्वं स्वं भागं प्राप्य वृषा इव बलिनो भवत। अत्र आङ्पूर्वाद् वृषशब्दात्कर्तुः क्यङ् सलोपश्चेति क्यङ्प्रत्ययः। स्वेच्छया पितॄणां पिण्डोपभोगा
र्थमभ्यर्थना चाक्यार्थः। आक्रम्यामीमदन्तेति जपतीति कात्यायनः। अत्र प्रजापतिऋषिः पितरो देवता यजुषां छन्दो नास्ति पिण्डपितृयज्ञे विनियोगः। म
न्त्रो यथा। ॐ अमीमदन्त पितरो यथाभागमावृषायिषत। अस्यार्थः। पितरः अमीमदन्त मदं प्राप्नुवन्त मदनेन पिण्डेन हर्षयुक्ता भवतेत्यर्थः। किं च य
थाभागं आवृषायिषत स्वं स्वं भागं प्राप्य वृषा इव बलिनो भूताः। अमीमदन्तेति मदी हर्षग्लपनयोरित्यस्माद्धातोः स्वार्थिकणिजन्ताच्चङि रूपम्। पू
र्वमन्त्रकृतेऽभ्यर्थने सम्पन्ने मोद्युक्तत्वाक्यार्थः। नीवीं विस्रस्य नमो व इत्यञ्जलीन् करोतीति कात्यायनः। तत्र षण्णां मन्त्राणां प्रजापतिऋषिर्यथासंख्यं
ग्रीष्मशिशिरवर्षावसन्तहेमन्तशरदः षड् ऋतवो देवता यजुषां छन्दो नास्ति पिण्डपितृयज्ञे षडञ्जलिकरणे विनियोगः। मन्त्रो यथा। ॐ नमो वः पितरः शु
ष्माय नमो वः पितरस्तपसे नमो वः पितरो जीवनस्मै नमो वः पितरो रसाय नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः स्वधायै व पितरो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रा·स· मः। एषां मन्त्राणामर्थः। हे पितरः वो युष्मभ्यं नमः शुष्माय च नमः शोषणकारिणे ग्रीष्मायेत्यर्थः। हे पितरः वो युष्मभ्यं नमः तपसे च तप इति माघमा
५६ सस्य नाम तेन माघफाल्गुनात्मक शिशिरऋतुरेकादेशात उद्भवेन तस्मै च नमस्कारः कृतः। हे पितरः वो युष्मभ्यं नमः यज्जीवं जलं तस्मै नमः अनेन वर्षा न
मस्कारः कृतः। हे पितरः वो युष्मभ्यं नमः रसाय च नमः रसः पुष्परसः तदुद्भवेन तत्कारणीभूतस्य वसन्तस्य नमस्कारः कृतः। हे पितरः वो युष्मभ्यं नमः
घोराय मन्यवे च नमः हेमन्तायेत्यर्थः॥ हेमन्तस्य शीतप्रचुरत्वात्प्राणिनां भयहेतुत्वेन घोरः मन्यवे क्रुद्धाय यथा क्रुद्धः कश्चिद् दुःखं जनयति तथायम
पि शीतं दुःखं जनयतीत्यर्थः। हे पितरः वो युष्मभ्यं नमः स्वधायै शरदे। यथा श्रुतिः स्वधैव शरत्स्वधायै पितृणामन्नमिति। एभिः षड्भिर्नमस्कारैः पित
रस्तृप्ता भवन्ति ऋतवश्चेति तात्पर्यम्। षड्वा ऋतवः पितरश्चेति प्रतिपादितेन ऋतुभिस्सह पितृणामभेदेनोभयनमस्कारः कृत इति वाक्यार्थः। एतद्
इत्युपासीतेति सूत्राणि प्रतिपिण्डमिति कात्यायनः। तत्र प्रजापतिऋषिः पितरो देवता यजुष्ट्वाच्छन्दो नास्ति पिण्डपितृयज्ञसूत्रदाने विनियोगः। मन्त्रो य
था। ॐ एतद्वः पितरो वासः। अस्यार्थः। पितरः वो युष्मभ्यं एतद्वासः आच्छादनम्। ऊर्ज्जमित्यपो निषिञ्चतीति कात्यायनः। तत्र प्रजापतिऋषिरापो
नि देवता विराट् छन्दः पिण्डपितृयज्ञे विनियोगः मन्त्रो यथा। ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधास्थ तर्पयत मे पितॄन्। अस्यार्थः
। हे आपः यूयं स्वधास्थ पितृणामन्नं भवथ यस्मात्प्रीयधानं पोषणमनेनेति स्वधा। तथा च श्रुतिः स्वधा वै पितृणामन्नमिति। ततश्च मे मम पितॄन् तर्पयत इ
ति तृप्तान्कुरुत किंभूता यूयम् ऊर्ज्जं वहन्तीः अन्नं वहन्त्यः प्रापयन्त्यः किंभूतमूर्ज्जं अमृतं घृतमित्यादि परिस्रुतमित्यन्तमूर्ज्जो विशेषणानि। अमृतं देवा
नामन्नमिति घृतं प्रसिद्धं पयो दुग्धं कीलालं पशुकीलं वन्धनमलं योग्यमन्नमस्येति कीलालः पशुः परिस्रुतं स्वधा। एतत्सामृतादिपञ्चकमूर्ज्जशब्दाभिधे राम
यम्। ऊर्ज्जं चान्नमेव। यथा च श्रुतिः यस्माद्यावन्मात्रं वान्नस्याऽऽहः सर्वमेवान्नं भवतीति। यतो यूयं नानाविधमन्नं वहन्त्यः स्वधा भवथ तस्मात्मम ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितॄंस्तर्पयतेति वाक्यार्थः। वहन्तीति सुपां सुपो भवन्तीति प्रथमाबहुवचनस्थाने द्वितीयाबहुवचनम्। आधत्तेति मध्यमं पिण्डं प्राश्नाति पुत्रकामेति
कात्यायनः। अत्र प्रजापतिऋषिः पितरो देवता गायत्री छन्दः पिण्डपितृयज्ञे पत्न्या मध्यमपिण्डप्राशने विनियोगः। मन्त्रो यथा। ॐ आधत्त पितरो गर्भं कु
मारं पुष्करस्रजं यथेह पुरुषोसत्। अस्यार्थः। हे पितरः गर्भमाधत्त किंभूतं कुमारं पुत्रत्वमपि किंभूतं पुष्करस्रजं पुष्करस्य पद्मस्य स्रक् माला अन
योरिति पुष्करस्रजावश्विनीकुमारौ ताविव पुष्करस्रजं दीर्घायुषं निरुजं सुरूपञ्चेत्यर्थः। यथा इह पुरुषोऽसत् येन प्रकारेण इहैव क्रतौ पुरुषो देवपि
तृमनुष्याणामभीष्टपूरयिता भूयात्। तथा गर्भमाधत्त इत्यभिप्रायः। असदिति अस भुवीत्यस्माद्धातोर्लिङि प्रथमपुरुषैकवचनं रूपं तस्य बहुलं छन्दसीति लु ति
ग्भवति। आगमानुशासनस्यानित्यत्वाद्याडागमो न भवति। वाजे वाज इति विसृज्येति कात्यायनः। तत्र वसिष्ठऋषिस्त्रिष्टुप् छन्दः अश्वा देवता वा
जपेये बार्हस्पत्ययज्ञे विनियोगः। मन्त्रो यथा। ॐ वाजे वाजेऽवत वाजिनो धनेषु विप्रा अमृता ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देव
यानैः। अस्यार्थः। हे वाजिनः पितरः वाजोऽन्नमस्यास्तीति वाजी तच्च श्राद्धे दत्तं पितॄणामस्तीति पितर एव वाजिनो वत रक्षत नकुत नोऽस्माकं वाजे वाजे अन्ने
अन्ने यद्यद्देवास्माकं कृतमकृतन्त्वात्त्वं श्राद्धार्थमुपस्थापितं तत्र सर्वत्र न केवलं तत्र धनेषु च अन्नानि रिक्थ श्राद्धीयद्रव्येषु च किंभूता यूयं विप्राः विप्रमृ
तेयो विप्रदेहस्था इति यावत् अपि किंभूताः अमृताः अमरणधर्माणः पुनः किंभूताः ऋतज्ञाः सत्यज्ञानशालिनः रक्षित्वा च अस्य मध्वः पिबतः एत
द्रत्नसंबन्धिनो मध्वः रसस्य पिबत पीत्वा च मादयध्वं तृप्यध्वं तृप्ताः सन्तः पथिभिर्यात वर्त्मभिर्गच्छत किंभूतैर्देवयानैः येर्वर्त्मभिर्देवा यान्ति तैरि
त्यर्थः। अयं वाक्यार्थः। हे पितरो विप्रदेहा अस्माकं श्राद्धे दत्तमन्नं रक्षत रक्षित्वा च तस्य रसं पीत्वा तृप्ताः सन्तो देवसेवितैर्वर्त्मभिः स्वर्गं गच्छतेति ॥
मध्व इति मधुशब्दस्य षष्ठ्येकवचने रूपं आगमानुशासनानित्यत्वान्नुम्न भवति संज्ञापूर्वकविधेरनित्यत्वाद्गुणश्च न भवतीति ॥ आ मा वाजस्येत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुव्रज्य प्रदक्षिणीकृत्य प्रविशेदिति कात्यायनः। तत्र बृहस्पतीन्द्रावृषी त्रिष्टुप्छन्दः प्रजापतिर्देवता वाजपेये यजमानस्य तेनैव पथागमने विनियोगः
मन्त्रो यथा। ॐ आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे। आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वाय गम्यात्। अस्यार्थः। वाज
स्यान्नस्य प्रसवः फलं मां मां जगम्यात् पुनः पुनरागच्छतु अस्मिन् श्राद्धे कृतस्यान्नदानस्य फलं मां प्रत्यागच्छत्वित्यर्थः। किं च इमे द्यावापृथिवी मामाग
गम्यातां पुनरागच्छतां किं भूते द्यावापृथिवी विश्वरूपे विश्वं सर्वं रूपं ययोस्ते विश्वरूपे एतेन पृथिवीसंबन्धि कल्याणं स्वर्गसंबन्धि च मामागच्छ
त्विति आशंसावाक्यार्थः। किं च हे पितरा मातरा युव युवां मामा मामागन्ता आगच्छन्तु यदा यदा हं श्राद्धं करोमि तदा तदा मम माता पितरौ आगच्छता
मित्यर्थः। किं च सोमः पितृणां राजा मा मां मामागम्यात् आगच्छतु किमर्थम् अमृतत्वाय मोक्षाय श्राद्धं कृत्वा विसर्जितेषु पितृष्वनुव्रजने त्रिपमाणश्रा
द्धस्य फलं मम भवतु पार्थिवं सुखं मम भवतु स्वर्गं मम भवतु श्राद्धसमये मम मातापितरौ आगच्छतां मोक्षश्च मम भवत्विति आशंसावाक्यार्थः॥ आजगम्या
दिति गम्लृ गतौ विश्यस्माद्धातोर्मन्त्रे घसह्वरेति च्लेर्लुगित्यादिविहितेन आङ्यनेनोपसृष्टस्य यङ्लुकि आशिषि लिङि कृते रूपम्। एतदेव वचनपरिणामेन द्विवचना
न्तं जगम्यादित्यस्य पूर्वपठितेन आङ्यनेन संबन्धः द्यावापृथिवी इत्यत्रापि संबध्यते। आगन्ता मित्यत्र व्यवहितेन आङ्यनेन संबन्धः बहुलं छन्दसी
ति शपो लुक्। पितरा मातरा इति माता पितरौ इति प्राप्ते पितरा मातरा च छन्दसीति निपातः। युवमिति प्रथमायाश्च द्विवचने भाषायामिति भाषा
विषये आकारस्य विधानात्। अत्र छान्दसपदे आकारो न भवति शेषे लोप इति भवत्येव। आ मा सोमो अमृतत्वाय गम्यादित्यव्यवहितेन आङ्यनेन गम्या
दित्यस्य संबंधः। इति पार्वणश्राद्धम्॥ प्रेतपात्रं पितृपात्रेष्वासिंचति ये समाना इति द्वाभ्यामिति सपिण्डने कात्यायनः। तत्र प्रजापतिऋषिः पितरो देवता

ऽनुष्टुप्छन्दः सौत्रामण्यां ग्रहहोमे विनियोगः। मन्त्रो यथा॥ ॐ ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यार्थः पितरः पितामहप्रपितामहवृद्धप्रपितामहाः समानाः सपिण्डीकरणेन समानं लोकं पितृलोकं गताः अत एव समनसः समानहृदयाः यम।
राज्ये यमस्याधिकारे स्थिताः तेषां यो लोकः स्थानं स एव तस्मै प्रेताय पित्रे स्वधा भवतु किं च नमः नमस्कारः कृतो यज्ञः देवश्राद्धमिति यावत् तेषु देवेषु पुरु
रवोमाद्रवः प्रभृतिषु कल्पतां क्लृप्तो भवतु अनेन सपिण्डन कर्मणा प्रेतस्य पितृलोकप्राप्तिः स दैवश्राद्धाधिकारश्च भवत्विन्याशंसा वाक्यार्थः। प्रजापति
तिऋषिर्यजमानो देवतानुष्टुप्छन्दः सौमएयाग्रहहोमे विनियोगः। मन्त्रो यथा। ॐ ये समानाः समनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्प
ताम् अस्मिं लोके शतं समाः। अस्यार्थः। जीवेषु सूक्ष्मशरीराधिष्ठानेन कर्मणां भोक्तृषु मध्ये ये मामकाः मत्सम्बन्धिनो जीवाः सूक्ष्मशरीराधिष्ठानेन कर्म्म
भोक्तारः किंभूताः समानाः समनसः एतद्द्वयं व्याख्यातमेव तेषां प्रसादेन त्यध्याहार्यं मयि श्रीर्लक्ष्मीः कल्पतां भवतु कुत्र अस्मिंल्लोके इह एव जन्मनि कियं
तकालं शतं समाः शतवर्षाणि। अनेन सपिण्डनकर्मणा पितृलोकप्राप्तानां पितॄणां प्रसादेन वर्षशतं मम लक्ष्मीर्भवत्विन्याशंसा वाक्यार्थः। अपरं चैव
सर्वे पार्वणतुल्यम् इति सपिण्डीकरणश्राद्धमन्त्रव्याख्या। अथ वृद्धश्राद्धम्। तत्र चार्घपात्रेषु यवदानमन्त्रः। ॐ यवोसि सोमदेवत्यो गोसवो देवनिर्मितः
प्रत्नमद्भिः पृक्तः पुष्ट्या नांदीमुखान् पितॄंल्लोकान् प्रीणाहि नः स्वाहा। अस्यार्थः। अत्र च मन्त्रे पर्वे स्तिलार्थ इति कात्यायनवचनात्तिलस्थाने यवस्य पाठ।
स्तत्रेपि यवोसीति यवसेवानुमन्त्रणी यत्व माश्वलायनेन लिखितं न स्वधां प्रयुञ्जीतेति स्वधास्त्वधेत्यस्य स्थाने पुष्ट्या इत्याश्वलायनेन पठितं तेन नोस्माकं
नांदीमुखान् पितृंल्लोकान्पुष्ट्या प्रीणयेति संबन्धः। अपरं च सर्वं तिलोसीतिमन्त्रेण समानं। अत्रान्ये मन्त्राः पार्वणवद्बोद्धव्याः। इति वृद्धिश्राद्ध मूर्त्स्ता
वसथिक महाधर्माधिकृत हलायुध कृतो ब्राह्मणसर्वस्वे पार्वणश्राद्धमन्त्रव्याख्या॥ अथ भोजनविधिः। तत्र विष्णुपुराणम्। स्नातो यथावत्कृत्वा च दे
वर्षिपितृतर्पणम्। प्रशस्तरत्नपाणिस्तु भुञ्जीत प्रयतो गृही॥ कृतजप्योहुतश्चाग्नौ शुद्धवस्त्रधरो नृप। देवलः। स्नात्वा प्रक्षाल्य पादौ च स्वगन्धालङ्कृतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुचिः। पञ्चयज्ञावशिष्टञ्च यो भुङ्क्ते सोऽमृताशनः। जाबालिः। अस्नात्वाशी मलं भुंक्ते अजपी पूयशोणितम्। अहुत्वा च कृमिं भुंक्ते अदत्वा विषभोजनम्।
भविष्यपुराणे। अहुत्वा वैश्वदेवं च ये भुञ्जन्त्यबुधा जनाः। तथा विना तु शास्त्रेण मृगा योनिं व्रजन्ति ते। तथा विना तु शास्त्रेणेति भोजनविधिविधायकशास्त्रा
तिक्रमणेनेत्यर्थः। मनुः। सायं प्रातर्द्विजातीनामशनं देवनिर्मितम्। नान्तरा भोजनं कार्यमग्निहोत्रसमो विधिः। छन्दोगपरिशिष्टे कात्यायनः। मुनिभिर्द्विरश
नं प्रोक्तं विप्राणां मर्त्यवासिनाम्। नित्यमन्हि तमस्विन्यां सार्द्धप्रहरयामतः। आपस्तंबः। यथैव तूलमैषीकमग्नौ प्रोतं प्रदीप्यते। तद्वत्सर्वाणि पापानि दह्य
न्ते चान्नभोजिनः। तथा। गृहस्थो ब्रह्मचारी च यो नश्नंस्तु तपश्चरेत्। प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः॥ अन्यत्र प्रायश्चित्तं न देवविधीयते। ब्रह्म
पुराणम्॥ विशोद्धो जनभूमिं च सुप्रक्षालितपाणिपात्। आसनस्थस्तु यो दद्यात्पङ्क्तिमध्ये उपस्पृशेत्। स सर्वेषां चैव यन्यापन्न दृष्ट्वा तिनराधमः। तस्मा
द्बहिरुपस्पृश्य आचान्तः प्रविशेद्गृहम्। उपलिप्ते समे स्थाने शुचौ शुद्धासनान्विते। चतुरस्रं त्रिकोणं च वर्तुलं चार्द्धचन्द्रकम्। कर्त्तव्यमानुपूर्व्येण ब्रा
ह्मणाद्येषु मण्डलम्। ब्रह्मरुद्रे द्र चन्द्राकौं वसवो मण्डलान्तरात्। निवेदितं नरैरन्नं यस्मात्कुर्वन्ति संस्थिताः। अकृत्वा मण्डलं ये तु भुञ्जन्तेऽधमयोन
यः। तेषां तु यक्षरक्षांसि हरन्त्यन्नस्य यद्बलम्। शङ्खः। चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु। मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्। देवलः
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः। प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमवस्थितः। ब्रह्मपुराणम्। अन्नं स्पृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः
। अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वन्दयेत्। अन्नं विष्णुः स्वयं प्राह नित्यमेव जनार्दनः। यो मां ददाति प्राणाय भुञ्जानः शास्त्रवद्द्विजः। प्राणार्थं मां सदा
ध्यायेत्स मां संपूजयेत्सदा। वामेन पाणिना पात्रं गृहीत्वा भुवि संस्थितः। तेजोऽसीति जपंस्त्वन्नं प्रणमेदमृतं त्वयन्। मनु.॥ पूजयेदशनं नित्यमद्याच्चैत राम
दकुत्सयन्। दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः। पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति। अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम्॥ बोधायनः॥ प्र ५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षालितपाणिपादः अप आचम्य संवृते देशे अन्नमुपसंगृह्य कामक्रोधलोभमोहान्परित्यज्य सर्वाभिरंगुलिभिः शब्दमकुर्वन्प्राश्नीयात्॥ आपस्तं-
बः। सोत्तराच्छादनश्चैव यज्ञोपवीती भुञ्जीत कृत्स्नं ग्रासं ग्रसेत्। साङ्गुष्ठं न खण्डं न कुर्यात्। बौधायनः। सर्वावश्यकावसाने संमृष्टोपलिप्ते देशे
प्राङ्मुख उपविश्यादत्तमामन्त्र्य क्रियमाणं भूर्भुवः स्वरोमित्युपस्थाय वाचं यच्छेत्। न्यस्तं महाव्याहृतिभिः प्रदक्षिणमन्नमुदकं परिषिंचन् सव्येन
पाणिना अविमुंचन् अमृतोपस्तरणमसीति पुरस्तादपः पीत्वा पञ्चान्नेन प्राणाहुतीर्जुहोति। हारीतः। तेजोसीत्यन्नाद्यमाह्रियमाणमभिमन्त्रयेत्
। द्यौस्त्वा ददात्विति दीयमानं भूस्त्वा प्रतिगृह्णात्विति प्रतिगृह्य अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्। अर्कस्त्रिधा भूरज-
सोभियमाणोऽजस्रो घर्म्मो हविरस्मि सामः यमः। प्राङ्मुखोन्नानि भुञ्जीत पञ्चार्द्रो वाग्यतः शुचिः। आर्द्रपादस्तु भुञ्जीतः शतं वर्षाणि जीवति। आयु-
ष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुङ्क्ते ह्युदङ्मुखः। पुष्टिकामाधिकारे आपस्तंबः। दक्षिणाभिमुखो भुञ्जीत अना-
पुष्यन्नेवं मुखस्य भोजनं मातुरुपदिशति। विष्णुपुराणे। विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः। अन्नं प्रशस्तं प्राश्नीयात्प्रोक्षितं प्रोक्षणोदकैः। म-
त्स्यपुराणम्। अप्येकपङ्क्त्यां नाश्नीयात्संयुक्तः स्वजनैरपि। को हि जानाति किं कस्य प्रच्छन्नं पातकं महत्। भस्मस्तंभजलद्वारमार्गैः पङ्क्तिं च भेदयेत्॥ ब्र-
ह्मपुराणे। पात्रेष्वन्नानुरूपेषु पुत्रभृत्यानुजैः सह। भूमौ पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भक्षयेत्। पवित्रपाणिः पुष्पञ्चलभेनत्राघमर्षणम्॥ पराशरः।
यदिच्छेत्सर्वपापानि हन्तुं निरवशेषतः। मौनेनान्नं समश्नीयाद्रागस्य शिरसास्तवयेत्। मनुः। न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते। पैठीनसिः। ताम्र-
रजतसुवर्णशङ्खशुक्त्यश्मस्फाटिके। नाभिन्नमभिन्नेमित्ति न दोषः। विष्णुपुराणम्। न चासंनिहिते पात्रे नादेशे च नरेश्वर। नाकाशेनातिसंङ्कीर्णे दत्त्वा गंधं च
नरो ग्रसेत्। नाशेषः पुरुषोऽश्नीयादन्यत्र जगतीपतेः। मध्वंबुदधिसर्पिभ्यः सक्तुभ्यश्च विवेकवान्। दत्त्वाग्रमिति। पितृदेवप्रभृतिभ्योऽग्रभक्तं दत्त्वा भुञ्जीतेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रा॰स॰ ५९

स्पर्शैः। व्यासः। भूम्यां पात्रं प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः। भोजने भोजने चैव त्रिरात्रफलमश्नुते। देवलः। न भुञ्जीत तायसं नित्यं गृहस्थो भोजनं स्वयम्।
पवित्रमुष्णात्हृद्यञ्च सर्पिराहुरघापहम्। वसिष्ठः। हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च। दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते च किल्बिषम्। तस्मादन्तरि-
तं देयं पात्रेणैव तृणेन वा। प्रदद्यान्नतु हस्तेन नायसेन कदाचन। ब्रह्मपुराणम्। एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेत्। घृतं तैलञ्च लवणं पानीयं पायसं त-
था। भविष्यपुराणे। आयसेन तु पात्रेण यदन्नमुपदीयते। भोक्ता विष्ठासमं भुङ्क्ते दाता च नरकं व्रजेत्। ब्रह्मपुराणम्। आपोशानञ्च गृह्णीयात्सर्वतीर्थमयञ्च
तत्। अमृतोपस्तरणमसि विष्णोरन्नमयस्य च। हस्तेन लङ्घयेन्नान्नं सोदकेन कदाचन। हस्ताद्यो लङ्घयेद्भक्तं तेनान्नं हि हतं भवेत्। हतञ्चान्नमभक्ष्यं तन्न
स्पर्शयातिदुरात्मनः। पञ्चग्रासांस्तु भुक्त्वादौ किंचिद्दृश्य निसङ्कटे। पात्रेऽन्नं घृतशेषन्तु भक्षयेच्छाङ्कराज्ञयात्। पित्र्येकर्मणि भुञ्जानो भूमौ पात्रं न चालयेत्।
तथा। प्राणेभ्यस्त्वथ पञ्चभ्यः स्वाहा प्रणवसंयुताः। पञ्चाहुतीस्तु जुहुयात्प्राणावाग्निनिभेषु च। विष्णुपुराणम्। पञ्चग्रासान्महामौनं प्राणाद्याप्यायनानप
नृ। आपस्तम्बः। अष्टौ ग्रासा मुनेर्भक्तं वानप्रस्थस्य षोडश॥ द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणाम्। विष्णुपुराणम्। अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं र-
सम्। लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः। प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनम्। अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति। ब्रह्मपुराणे। य-
स्तु पाणितले भुङ्क्ते यस्तु फूत्कारसंयुतम्। प्रसृताङ्गुलिभिर्यश्च तस्य गोमांसवच्च तत्। नाजीर्णे भोजनं कुर्यान्न स्याच्च नातिबुभुक्षितः। हस्त्यश्वरथयानोष्ट्र-
प्रासादस्थो न भक्षयेत्। श्मशानाभ्यन्तरस्थो वा देवालयगतोऽपि वा। शयनस्थो न भुञ्जीत न पाणिस्थं न चासने। न सन्ध्यायां न मध्याह्ने नार्द्धरात्रे कथंचन। नार्द्रवा-
सा नार्द्रशिरा न च यज्ञोपवीतवान्। नोन्मत्तो नोद्व्रजन्खट्वासंस्थितो न कदाचन। न यन्त्रारूढगात्रस्तु न च सार्द्धं तु भार्यया। न प्रसारितपादस्तु पादारोपित- राम॰
पाणिमान्। नावसक्थिकसंस्थस्तु न च पर्यङ्कमास्थितः। न वेष्टितशिराश्चापि नोत्सङ्गे कृतभाजनः। नैकवस्त्रो दुष्टमध्यो सोपानत्कः सपादुकः। न चर्मोपरिसं- ५९

CC-0. In Public Domain. Digitization by eGangotri

स्थश्च चर्म्मवेष्टितपार्श्ववान्। अन्नस्य जन्मकालुष्यं दृष्ट्वाङ्गिः स्वनं भोजयेत्॥ ग्रासशेषन्तु नाश्नीयात् पीतशेषं पिवेन्नतु। शाकमूलकलेसुणि दन्तच्छेदेन
भक्षयेत्। सत्त्वयेल्लात्तुमम्लेतु निक्षिप्तं पात्रसंस्थितम्॥ वहूनां भुञ्जतां मध्ये नाश्नीयाद्वलान्वितः। वृथा न विकिरेदन्नं नोच्छिष्टः कुत्रचिद्व्रजेत्। न स्पृ
शेत् स्वशिरो विप्रः सोच्छिष्टेनैव पाणिना। तिलकल्कं जलं क्षीरं दधिक्षौद्रघृतानि च। न त्यजेदर्द्धजग्धानि सक्तूंश्चापि कदाचन। हस्तस्थितः। न स्पृशेद्वामहस्ते
न भुञ्जानोथ कदाचन। न पादौ न शिरो वस्तिं न पदा भाजनं स्पृशेत्। ब्रह्मपुराणम्। सर्व्वाङ्गुलिभिरश्नीयान्न वधूनेत् करं क्वचित्। कुर्य्यान्न क्षीराननमाहा
रं न च पश्चात् पिवेद्दधि। जठरं पूरयेदर्द्धमन्नैर्भागं जलेन च। वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत्। वौधायनः॥ भुञ्जानेष्वपि विप्रेषु यस्तु पात्रं परित्यजेत्
भोजने विघ्नकर्त्तासौ ब्रह्महेति तथोच्यते। उद्धृत्य वामहस्तेन यस्तोयं पिवति द्विजः। सुरापानेन तुल्यं मनुराह प्रजापतिः। अग्निपुराणम्। उपलिप्ते समे स्था
ने शुचिः शुद्धासनान्वितः पात्रेष्वथानुकल्पेषु पुत्रदारादिभिर्वृतः। सुसंस्कृतं हितं मिष्टं भुञ्जीत पङ्क्तितः श्यन् यवगोधूमशाल्यन्नं मांसशाकादिभिर्युत
म्। तीक्ष्णोष्णालवणैः काष्ठैर्व्यञ्जनैश्च सुगन्धिभिः। भक्ष्यप्रकारान् विविधान् कन्दमूलफलानि च पात्रभूमौ प्रतिष्ठाप्य यो भुङ्क्ते वाग्यतः शुचिः। भोजने
भोजने चैव त्रिरात्रफलमश्नुते। यतेत धारयेद्विप्रः पवित्रं दक्षिणे करे। भुञ्जानस्तु विशेषेण अन्नदोषैर्न लिप्यते। शातातपः। हस्तं प्रक्षाल्य गण्डूषं
यः पिवेदविचक्षणः। स दैवं चापि पित्र्यं च आत्मानं चैव घातयेत्। विष्णुपुराणम्। मुक्त्वामृतपिधानार्थं पिवेत्तोयं सकृत् सकृत्। येनान्नेन भवेद्वृष्टिर्जी
वभूतं जगत्त्रयं सर्वं भुञ्जन् सदा विप्रो जातिप्राधान्यमाप्नुयात्॥ अथ भोजनस्य मन्त्रव्याख्या। तत्रानीयमानमन्नमभिमन्त्रयेदनेन ॐ तेजोऽसि महोऽसि
वलमसि भ्राजोऽसि देवानां धाम नामासि॥ विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः। अस्यार्थः। हे अन्न त्वं तेजः वीर्य्यं असि भवसि महः उत्तमाहः
असि वलं सामर्थ्यं असि तथा भ्राजः दीप्तिरसि तथा देवानां इन्द्रादीनां धाम नामतेजः शब्दवाच्यम्॥ असि किं त्वं विविच्य उच्यते॥ विश्वं चराचरं अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्ति तथा विश्वायुः विश्वस्य जीवनमसि सर्वमसि सर्वोऽयुरसीति पुनरभिधानमादरातिशयदर्शनार्थः। तथा अतिभूः सर्वेषामदनीयानां अतिभूः श्रेष्ठ
तया त्वमसि भावकं भवसीत्यर्थः। अन्नस्तुतिवाक्यार्थः। इति तेजोसीति मन्त्रव्याख्या। ॐ भूर्भुवः स्वरोमित्यनेन वाह्रियमाणान्नाभिमन्त्रणं करणीयम्।
ततो दीयमानमन्नमभिमन्त्रयेदनेन। ॐ द्यौस्त्वा ददातु हअन्न द्यौः आकाशं त्वां ददातु आकाशमेव सर्वेषां भूतानामादिभूतं इति दातृत्वेन उप
न्यासः इति द्यौस्त्वा मन्त्रव्याख्या॥ ततस्तदन्नं पात्रे कृत्वा अभिमन्त्रयेदनेन ॐ अन्नपात्र अनसीरस्य धेह्यन पात्रं प्र शुष्मिणः प्रप्रदातारं तारिष
ऊर्जं नो धेहि द्विपदे शं चतुष्पदे अस्यार्थः॥ हे अन्नपात्र अन्नस्य भागं नोऽस्मभ्यं धेहि देहि किंभूतस्य अनसीरस्य असीरो व्याधिः सोऽस्मिन्ना
स्तीति। अनसीरः। अनसीरस्य अव्याधिकारिणः इत्यर्थः। पुनः किंभूतस्य शुष्मिणः शुष्मबलं तदस्मिन्नस्ति बलयुक्तस्येत्यर्थः तथा हे अन्नपात्र
प्रप्रदातारं तारिष अन्नस्य प्रकर्षेण दातारं तारय वर्जय प्रप्र इति द्वितीयः प्रशब्दो दानस्यातिशयख्यापनार्थः तथा हे अन्नपात्र नोऽस्माकं द्विप
दे भार्यापुत्रादिपरिजनाय चतुःष्पदे गवादिपशवे च ऊर्जं अन्नं धेहि आत्मीयभार्यापुत्रादिपरिजनाय गवादिपशवे च आरोग्यकारि बलकारि च
अन्नं देहि अन्नं दातारस्त्वव र्द्धयति याच्चा वा वाक्यार्थः। तत्र किं देहि इति कर्मपदस्याश्रवणात्। अन्नस्येति षष्ठीमात्रश्रवणाच्च भागमिति कर्मप
दमध्याहार्यम्। इति अन्नपात्रमन्त्रव्याख्या। ततः पश्चिमादिपात्रासर्वादिक्षु जलदानपूर्वकं बलित्रयं दद्यादनेन मन्त्रेण ॐ भूपतये नमः ॐ भुव
नपतये नमः ॐ भूतानां पतये नमः अस्यार्थः। भूः पतये भुवः पृथिव्याः पतिः भूःपतिरग्निस्तस्मै नमः तथा भुवनपतये भुवनस्य चराचरस्य ज
गतः पतये अग्नये नमः तथा भूतानां पृथिव्यादीनां पतये अग्नये नमः एतदनु इति सर्वत्र बोद्धव्यम्। भूपतये इत्यादिमन्त्रव्याख्या। एतद्बलित्रयं प्र
त्यवनिषु भोजनपात्रस्थमन्नं जलेन दक्षिणावर्तेन पर्युक्षयेदनेन मन्त्रेण। ॐ भूर्भुवः स्वः भूः पृथिवी भुवराकाशं स्वः स्वर्गः एतत्त्रयमन्त्रात्मकमेवे अस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यभिप्रायः ततोगण्डूषम् गृह्णीयादनेन ॐ अमृतोपस्तरणमसिस्वाहा। अस्यार्थः। हे जल अमृतोपस्तरणमसि अमृतस्यपत्त्वमहायज्ञावशिष्टस्यान्नस्य उप
स्तरणम्। आस्तरणमसिभवसि इत्यमृतोपस्तरणमसिमन्त्रव्याख्या। ततः पञ्चग्रासान्कुर्यात्। तत्रमन्त्रो यथा। ॐ प्राणायस्वाहा १ ॐ अपानाय स्वाहा २ ॐ स
मानायस्वाहा ३ ॐ उदानायस्वाहा ४ ॐ व्यानायस्वाहा ५ ततोभोजनान्ते अप्रक्षालितपाणिनागण्डूषंगृह्णीयादनेन। ॐ। ॐ अमृतापिधानमसिस्वाहा। अस्यार्थः॥
हे जल अमृतापिधानमसि अमृतस्यपत्त्वमहायज्ञावशिष्टस्यभुक्तान्नस्यपिधानं आच्छादनं असिभवसि। ब्रह्मपुराणम्। विप्रस्त्वयउपस्पृश्यपादाङ्गुष्ठेदक्षिणे
हस्ताभ्यांमन्त्रवद्द्याद्विधिवत्त्वावनेजलं। तथासमाजर्यवाकुर्याद्गोप्रदानफलंलभेत्। ततआचम्यदक्षिणपादाङ्गुष्ठे पाणिद्वयं निःसारयेदनेनमंत्रेण। ॐ अङ्गु
ष्ठमात्रः पुरुषोअंगुष्ठंचसमाश्रितः। ईशः सर्वस्यजगतः प्रभुः प्रीणातु विश्वभुक्। अस्यार्थः॥ पुरुषः प्रीणातु पुरि देहे शेते इति पुरुषः परमात्मा उच्यते प्रीणातु प्री
तो भवतु किंभूतः अङ्गुष्ठमात्रः अङ्गुष्ठपरिमाणसूक्ष्मत्वाभिप्रायमेतत्। पुनः किंभूतः अङ्गुष्ठंसमाश्रितः चकारोप्यर्थः शिरः प्रभृतीनवयवान्सम। श्रित्याङ्गुष्ठमपिस
माश्रितइत्यनेनसकलदेहव्यापकत्वदर्शितं पुनः किंभूतः प्रभुः देहस्यात्माधिष्ठितएवदेहः सर्वकार्येषुप्रवर्त्तते यतः पुनः किंभूतः सर्वस्यजगतः ईशः ईश्वरः सर्वस्ये
वजगतः आत्मा अधिकारित्वात् पुनः किंभूतः विश्वभुक् विश्वस्यभोक्ताभोक्तृत्वञ्चपालकत्वंसंहारकत्वंवा अयमेवस्वरूपः परुषोदेहमभिव्याप्यस्थितः अनेन
हस्तनिःश्रावणजलेनप्रीणातित्याशंसावाक्यार्थः। विष्णुपुराणम्। अद्भिः प्राणान्समालभ्यनाभिंपाणितलेनवा॥ भुक्त्वासम्यग्यथाचम्यप्राङ्मुखोदङ्मुखोपिवा
आचान्तः पुनराचामेत्पाणिंप्रक्षाल्यमूलतः। स्वस्थः प्रसन्नचित्तस्तु कृत्वासनपरिग्रहः। अभीष्टदेवतानान्तु कुर्वीतस्मरणंततः॥ अग्निराप्याययतांतः वरुणो
पार्थिवांयतिः दत्ता वकाशेनभसोजनयत्वस्तुमेसुखम्॥ अन्नंबलायमेभूमेरपोमध्येनिलस्यच। भवत्वेतत्परिणतोममास्त्वव्याहतंसुखम्॥ प्राणापानस
मानानामुदानव्यानयोस्तथा। अन्नं पुष्टिकरंचास्तुममास्त्वव्याहतंसुखम्॥ अगस्तिरग्निर्वडवानलश्चभुक्तंमयान्नंजरयत्वशेषम्। सुखंममैतत्परिणा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स म संभवं च यच्छलरोगं मम चास्तु देहे। विष्णुः समस्तेन्द्रियदेहदेहिप्रधानभूतो भगवान् यथैकः। सत्येन तेनात्तमशेषमेतद् आरोग्यदं मे परिणाममस्तु। विष्णुर्वा नो
६१ यथैवान्नपरिणामस्य वैपथ्या। सत्येनानेन नैवेभुक्तं जीर्यत्वन्नमिदं तथा इत्युच्चार्य स्वहस्तेन परिमृज्यत यथोदरम्। अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः। र
स्र:। भुक्त्वा च सुखमास्थाय तदन्नं परिणामयेत्। इतिहासपुराणाद्येः षष्टः सप्तमको नयेत्। इति ब्राह्मणसर्वस्वे भोजनमन्त्रव्याख्या॥ अथ सायंसन्ध्या। तत्र दे
वलः। सायंप्रातः सदा सन्ध्यामुपासीनस्तु चिर्वहिः। योगी सायं प्रातस्तु यः सन्ध्यां सर्वदा पर्युपासते। कूले च पावनीं देवीं सावित्रीं वेदमातरम्। सनयापाविनो दे
व्याब्राह्मणोगतकल्मषः। नसीदेत्प्रतिगृह्णानः पृथिवीं च ससागराम्। यमः। अनागतान्तु ये पूर्वामनीतां येतु पश्चिमाम्। विप्राः सन्ध्यां नतिष्ठन्ति हृषलास्तु उदाहे
ताः। अत्रिः। कर्मणा मनसा वाचा यदन्हा कुरुते त्वघम्। आसीनः पश्चिमां संध्यां प्राणायामैस्तु शुध्यति ।तदेवं सति सायंसन्ध्यामन्त्रव्याख्याने कर्तव्ये प्रातः सा
यंसन्ध्ययोर्मन्त्राणान्तु ल्यत्वा द्याख्यानम् प्रातःसन्ध्यायामनुसन्धेयम्॥ आचमनमन्त्रेनु विशेषः। अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो
रक्षन्तां यदन्हा पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किं च दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहो
मि स्वाहा। अस्यार्थः। मा मां रक्षन्तां के अग्निश्च मन्युश्च मन्युपतयश्च मन्युर्यत्तस्य पत्तयः इन्द्रादयः कुतो रक्षन्तां पापेभ्यः किं भूतेभ्यः मन्युकृतेभ्यः। क्रोधजनि
तेभ्यः किं च अहः यत् पापं कृतं अन्हा दिवसेन अकार्षं कृतवान् अस्मिकेन मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्नाशिश्नेन तत्पापं अहः अवलुम्पतु नाश
यतु तथा मदाश्रितं यत्। किं विद्दुरितं यावदेव पापं तत् इदमापः जलरूपं पापं अहं ज्योतिषि अग्निस्वरूपे परमात्मनि जुहोमि। किंभूते ज्योतिषि सत्ये तत् स्वाहा।
हृतं भवतु इत्यर्थः। पदसाधनादिकं च प्रातःसन्ध्यायां सूर्यश्च मामन्युश्चेति मन्त्रव्याख्यायामेव कृतं तत्रैवानुसन्धेयम्। तत्र गायत्रीजपे विशेषमाह। याज्ञवल्क्यः। ज राम
पन्नासीनः सावित्रीं प्रत्यगातारकोदयात्। प्रागुत्तानो करौ कृत्वा सायन्त्वाधोमुखौ तु तौ॥ मध्या ऊर्ध्वकराभ्यान्तु जपएवमुदाहृतः। इति ब्राह्मणसर्वस्वे सायंसं ६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यामंत्रव्याख्या॥सायंवैश्वदेवः।।तत्र छन्दोगपरिशिष्टे॥सायंप्रातर्वैश्वदेवःकर्तव्योबलिकर्मच॥अनश्नतापिसततमन्यथाकिल्बिषीभवेत्।विष्णुपुराणे
म्॥पुनःपाकमुपादायसायमप्यवनीपते।वैश्वदेवनिमित्तंवैपत्न्यासहबलिंहरेत्।वैश्वदेवंहिनामैतत्सायंप्रातर्विधीयते॥मध्याह्नबलिदानानन्तरंगो।
भिलस्त्रीचसायंप्रातःपुमानितिसायंवैश्वदेवः।अथसायंभोजनम्।तत्रमनुः।सायंप्रातर्द्विजातीनामशनंदेवनिर्मितम्।नान्तराभोजनंकार्यमग्निहोत्रसमोवि
धिः॥ छन्दोगपरिशिष्टम्॥ऋषिभिर्द्विरशनंप्रोक्तंविप्राणांमर्त्यवासिनाम्॥नित्यमन्हि तमस्विन्यासार्द्धप्रहरयामतः।भोजनाधिकारेआपस्तम्बः।एव
मेवाहरहःसायंप्रातर्जुहुयात्।अद्भिर्वासायंतथाआपाणिग्रहणाद्धिगृह्यमेधिनोव्रतञ्चकालयोर्भोजनंअहरश्नंश्चान्नसेति॥सायंभोजनविधिः।अ
थशयनविधिः॥तत्रविष्णुधर्मोत्तरीयद्वितीयकाण्डे।शून्यालयेश्मशानेचनैवहृक्षेचतुष्पथे।महादेवगृहेवापिमातृवेश्मनिनस्वपेत्।नयक्षदेवायतनेस्क
न्दस्यायतनेतथा।कूलच्छायासुचतथाशर्करालोष्ठपांसुषु।प्रस्वपन्नतथार्द्रभैविनाहीसांकथञ्चन।धान्यगोदेवविप्राणांगुरूणाञ्चतथोपरि।शङ्खलि।
खितौनवल्मीकमहावृक्षच्छायासुपर्वतेशिरसि।तत्रसानौवापर्वण्युपरागसमयेवानष्टफलमध्येनाविमध्ये।विष्णुपुराणम्।कृतपादादिशौचस्तुभुक्त्वासायंततो
गृही।गच्छेच्छय्यामस्फुटितामेकदारुमयींनृप।नाविशालांनवाभग्नांनासमांमलिनांनच।नचजन्तुमयींशय्यामधितिष्ठेदनास्तृताम्।विष्णुः॥ नपलाशेशयने
नपञ्चदारुकृतेनगजविद्युद्दग्निकृते।भिन्नेनाग्निप्लुष्टेनघटसिक्तद्रुमजेन।शङ्खलिखितौ।नचशीर्णखट्वायांनान्यवर्णोपनायितामनस्पृष्ट्या।हारीतः।
नशयनेअन्यपूर्वेनाश्मनिनोपधानेनथानाशनेनप्राग्।विष्णुः।नार्द्रपादःस्वप्यान्नोत्तर कृतशिराः।शङ्खलिखितौ।नसन्ध्यायांशयीतनाशुचिर्नेन
ग्नः।मार्कण्डेयपुराणम्।नोदक्शिराःस्वपेज्जातुनचप्रत्यक्शिरानच॥शिरस्त्वागस्त्यामाधायशयीताथपुरन्दरीम्॥विष्णुपुराणम्।प्राच्यांदिशिशिरःकृत्वाया
म्यायामथवानृप।सदैवस्वपतःपुंसोविपरीतन्तुरोगदम्॥पराशरः।यदीच्छेत्सर्वपापानिहन्तुनिरवशेषतः।मौनेनान्नंसमश्नीयादगस्त्यशिरमास्वयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्रा॰स॰ तथानैकाकीस्वपेत्।एवंसुप्तावस्थमाणश्लोकान्पठेत्।स्कन्दपुराणम्।नमोनन्दीश्वरायेत्तियःप्रोक्तास्वपतेनरः।तस्यकूष्मांडराजभ्योनभविष्यन्तिवैभ
९२ यम्।महाभारते॥योजरत्कारुणाजातोजरत्कारौमहायशाः आस्तिकःसर्पमात्रेचपन्नगान्योऽभ्यरक्षयत्।तंस्मरन्तंमहाभागानमांहिंसितुमर्हथ।अ
सितञ्चार्तिमन्तञ्चहृद्यनिशंवापियःस्मरेत्।दिवावायदिवारात्रौनास्यसर्पभयंक्वचित्।तथा।सर्पापसर्पभद्रन्तेगच्छसर्पवनान्तरम्।जन्मेजयस्ययज्ञान्तेआ
स्तीकवचनंशृणु।आस्तीकवचनंश्रुत्वायःसर्पोननिवर्त्तते।शतधाभिद्यतेमूर्द्धाशिरीषस्यफलंयथा।ततोवैदिकमन्त्रेणरक्षांकुर्यात्।विवस्वान्ऋषिः।पर
मात्मादेवता।जगतीछन्दः।शयनेरक्षाकरणेविनियोगः।मन्त्रोयथा।सप्तर्षयःप्रतिहिताशरीरेसप्तरक्षन्तिसदाऽप्रमादम्।सप्तापःस्वपतोलोकमीयुस्तत्र
जागृतोस्वप्नजौसत्रसदौचदेवौ॥अस्यार्थः।सप्तऋषयः।प्राणिनांशरीरेदेहेप्रतिहिताअवस्थिताइत्यर्थः।केतेसप्तऋषयः।स्वपतःपुरुषस्यलोकंइद्रपस्था
नंईयुःगच्छन्तिरक्षन्ति।अथवशाच्छरीरमेवनकेवलंसप्तऋषयस्वेतिरक्षन्ति अपितुआपश्चसप्तरक्षन्ति।केतेसप्तआपः।शुक्रशोणितरसामज्जाश्ले
ष्माश्रुमूत्राणि।किंचतस्यस्वपतःपुरुषस्यतस्यामवस्थायांदेवौप्राणापानौजाग्रतःजागरंकुरुतः।स्वपतःपुरुषस्यपुरुषार्थरक्षार्थमितिभावः।किंभूतौदेवौसत्र
सदौ।सत्रंदोहःस्थापितौपुनः।किंभूतौअस्वप्नजौस्वप्नजंतयोर्नविद्यतेइत्यर्थः।इतिशयनमन्त्रव्याख्या।ततआपस्तंवः।सदानिशायांदारानभ्यासिङ्नचरिते
विष्णुपुराणम्।स्नातःसुगन्धिधूपेनधूपितोसुधितोपिवा।सकलःसानुरागश्चव्यवायंपुरुषोव्रजेत्।नास्नातान्तुस्त्रियंगच्छेन्नातुरांनरजस्वलाम्।नारिष्टानप्रकु
पितानाप्रशस्तांनगुर्विणीं।नादक्षिणांनान्यकामांनान्यस्त्रापिहियोषितम्॥सुतस्नामामतिभुक्तांवास्वयञ्चैभिर्गुणैर्युतः।स्त्रियमुपेयादित्यधिकारेविष्णुःनक्षा
ङ्क्षत्वानोपभुङ्क्त्वापमन्त्रितः।श्राद्धीव्रतीनदीक्षितःनचैदेवायतनसंस्कारश्मशान्यातपेषुनवृक्षमूलेनदिवानसन्ध्ययोः।नमलिनान्नाभ्यक्तानाभ्यक्तोनरोगा राम॰
र्त्तहीनाङ्गीनाधिकार्यतथैवच।वयोधिकांवानोपेयाद्रूपिणीनारींदीर्घमायुर्जिजीविषुः।तथाअभिगमइत्यधिकारेमुविरोगाभावः।स्कन्दपुराणम्॥तथा। ९२

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा। पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च॥ स्त्रीतैलमांससंभोगी पर्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्रयाति नर
कं मृतः॥ मनुः॥ नोपगच्छेत्प्रमत्तोपि स्त्रियमार्तवदर्शने। समानशयने चैव न शयीत तया सह॥ वसिष्ठः॥ यस्तु पाणिगृहीताया आस्ये कुर्वीत मैथुनं भव
न्ति ---- पितरस्तस्य तन्मासं रेतसो भुजः॥ कठशाखायाम्। नोऽस्माकं यासजातीयस्ताः श्वो विजनिष्यमाणाः पतिभिः सह शयीरन्निति स्त्रीभिः प्रार्थिते
तथास्त्विति इन्द्रेण स्त्रीणां वरो दत्तः एतेन स्त्रीणां कामलालसत्वं प्रतिपादितम्। तद्य   द्वि अनृतौ स्त्री नोपगम्यते तदा तासां निरंतरं लालसतया व्य
भिचारोपि संभाव्यते। तस्मात्स्त्रीणां रक्षणार्थमनृतावप्युपगमं कुर्यादि   त्यभिप्रायः॥ तथा च विष्णुपुराणम्। इति मत्वा स्वदारेषु ऋतेतेन पुरुषो व्र
जेत्। यथोक्तदोषहीनेषु समयेष्वनृतावपि॥ इति ब्राह्मणसर्वस्वे शयनमन्त्रव्याख्या॥ अथ गर्भाधानादिदशविधसंस्कारमन्त्राणां धर्माध्यक्षहला
युधविरचितां व्याख्यां शृणु। तत्र कानि तानि दशकर्म्माणि इत्यपेक्षायां याज्ञवल्क्यः॥ गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा॥ षष्ठेऽष्टमे वा सीम
न्तो मास्येते जातकर्म्म च॥ अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः॥ षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्॥ गर्भाष्टमेऽष्टमे वाब्दे ब्राह्म
णस्योपनायनम्॥ राज्ञामेकादशे सैके विशामेके यथाकुलम्। अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। एवं संस्कारानभिधाय तेषां मन्त्र
पूर्वत्वमाह। ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः। निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः॥ तथा मनुः॥ वैदिकैः कर्म्म
भिः पुण्यैर्निषेकादिर्द्विजन्मनाम्॥ कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥ तथा गर्भाधानादीनां फलमाह॥ याज्ञवल्क्यः॥ एवमेनः शमं याति
वीजगर्भसमुद्भवम्॥ तथा मनुः॥ गर्भैर्होमैर्जातकर्म्मतथा मौञ्जीनिबन्धनैः॥ गार्भिकं वैजिकञ्चैनो द्विजानामपमृज्यते। स्वाध्यायेन व्रतैर्होमैस्त्रै
विद्येनेज्यया सुतैः॥ महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥ इत्थं सामान्येन संस्काराणां फलवत्त्वेऽवधारिते॥ गर्भाधाने बौधायनः॥ प्रजासु त्वा द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रा॰स॰ येद्रौषधमन्त्रसंयोगेन॥ तथा गर्भाधानस्य विशेषफले हारीतः। गर्भाधानयुतो ब्रह्मगर्भं सन्दधाति॥ अस्यार्थः॥ स्वगृह्योक्तगर्भाधानयुक्तः सन् स्त्रि-
६३ यमुपगतो ब्रह्ममयं गर्भमादधाति। तथा गर्भाधानादिचूडाकरणान्तानां संस्काराणां प्रत्येकं फलमभिधाय हारीतः॥ एतैरष्टभिः संस्कारैर्गर्भोपघा-
तात् मुक्तो भवति॥ तथा ऋतुकालविवेके मनुः॥ ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः॥ चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः॥ तासा-
माद्याश्चतस्रस्तु निन्दितैकादशी च या॥ त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः॥ तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम्॥ पुमान् पुंसोऽधिके
शुक्रे स्त्री भवत्यधिके स्त्रियाः। समे पुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः॥ याज्ञवल्क्यः। युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु॥ षोडशर्तु-
निशाः स्त्रीणां तासु युग्मासु संविशेत्॥ ब्रह्मचर्येण पर्वण्याद्याश्चतस्रश्च वर्जयेत्। एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत्॥ सुस्थ इन्दौ सकृ-
त्पुत्रं लक्षण्यं जनयेत् पुमान्॥ तथा विष्णुपुराणम्॥ ऋतावुपगमः शस्तः स्वपत्न्यामवनीपते। पुंनामर्क्षे शुभे काले तासु युग्मासु रात्रिषु॥ तथा गर्भा-
धानकर्मणि। पारस्करः दक्षिणांसमधि हृदयमालभेत्॥ यत्ते सुसीमे इत्यादि। तदेवं स्थिते ऋतुनिशायां निषेकपूर्वसमये पत्न्या दक्षिणस्कन्धोप-
नीतेन हस्तेन हृदयं स्पृष्ट्वा इमं मन्त्रं जपति॥ ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि स्थितं वेदाहं तन्मां विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतम्। अस्यार्थः। हे सुसीमे शोभनासीमा तावयवसन्धिर्यस्याः सुसीमा हे शोभनावयवसन्धे ते तव हृदयं वेद जानामि किंभूतं हृ-
दयं दिवि आकाशे च चन्द्रमसि स्थितम्। प्रथमतो हि स्त्रीणां चन्द्रः स्वामीति नियमः। पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिरिति॥ अतस्तदा-
हसन्ते चित्तमित्यभिप्रायः॥ इदानीं तद्धृदयं मां विद्यात् पतित्वेन जानातु किञ्च पश्येम शरदः शतं आवां शतं वर्षाणि पश्यावः। एवं जीवेम शरदः राम॰
शतं शृणुयाम शरदः शतम्॥ इयन्तं समयं चन्द्रस्तव पतिरासीत् देवता तव तस्मिन्नाश्रितम्॥ इदानीमहं तव पतिरिति तत्तव हृदयं जानातु आ ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वामविकलेन्द्रियोऽशतं वर्षाणि जीवावइत्याशंसावाक्यार्थः पश्येम जीवेम शृणुयाम इति लिङ्गं लिङो भवन्तीति उत्तमपुरुषद्विवचने बहुवचनम् ॥ पुनः पार
स्करः ॥ सा यदि गर्भं न दधाति तदा सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थ्यां स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामा
सिञ्चति इयमोषधीत्यादि। यदि निषेके सत्यपि गर्भो न भवति तदा पुनर्वसुनक्षत्रे दिवसे उपवासं कृत्वा पुष्यनक्षत्रदिवसे श्वेतपुष्पकण्टकारिकामू
लमुत्थाप्य स्थापयेद्गृत्तेनक्तु स्नातायां निशायां तन्मूलं जलेन पिष्ट्वा तेन पत्न्या नस्यं दद्यात् इति पतिः पठितेन मन्त्रेण ॥ ॐ इयमोषधी त्रायमाणा सहमा
ना सरस्वती। अस्या वृहत्या पुत्रः पितुरिव नाम जग्रभत्। अस्यार्थः। इयं बृहती ओषधी व्याधिनाशकरी किंभूता त्रायमाणा रक्षाकरी पुनः किंभूता सह
माना उत्पन्नं दोषमाकर्षणकरी पुनः किंभूता सरस्वती वाक्प्रसादहेतुः अस्या वृहत्याः कण्टकारिकायाः पुत्रः नाम जग्रभत् प्रकाशत्वं गृह्णातु। किंभू
तं नाम पितुरिव पितृसदृशमित्यर्थः। अत्र पूर्वार्द्धेन बृहतीस्तुतिः उत्तरार्द्धेन अस्याः पुत्रः प्रकाशत्वं लभतामित्याशंसावाक्यार्थः। जग्रभदिति ग्रह उपाद
ने इत्यस्माल्लङ्तोर्हग्रहोर्भश्छन्दसीति हकारस्य भकारः ॥ इति गर्भाधानम् ॥ अथ पुंसवनम्। तत्र हारीतः। पुंसवनात् पुंसा करोति इति फलम् ॥ तथा गर्भा
धानाद्यष्टौ संस्कारान् अभिधाय पुनः स एवाह। एतैरष्टभिर्गर्भसंस्कारैर्गर्भोपघातात् पूतो भवति ॥ तत्र पुंसवने पारस्करः ॥ अथ पुंसवनं पुरा स्पन्द
इति नाम मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चन्द्रमा युज्यते तेन दह रूपत्वाद् स्नात्वा व्याहते वाससी परिधाय न्यग्रोधावरोहं शुङ्गाश्च निशाया
मुदपेषं पिष्ट्वा पूर्ववद् आसेचनम्। ॐ हिरण्यगर्भोऽद्भ्य इत्येताभ्यां कुशकण्टकं सोमांशुं चौक तदेवेसनियथोक्तसमये वटावरोहशुङ्गं कुशकण्ड
कञ्च शिशिरजलेन पिष्ट्वा नववस्त्रद्वयपरिधानायाः पत्न्या नस्यं दद्यात् पतिरेताभ्यां मन्त्राभ्याम् ॥ हिरण्यगर्भ ऋषिः प्रजापतिर्देवता त्रिष्टुप् छ
न्दः श्वयने हिरण्यपुरुषाधाने विनियोगः ॥ मन्त्रो यथा। ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामु ॥ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· तेमांकस्मैदेवायहविषाविधेम॥अस्यार्थः।हिरण्यगर्भःहिरण्यगर्भाख्यःपुरुषःसमवर्त्ततसमभवत्अग्रेप्रथमंयोहिरण्यगर्भोजातोजातमात्रोभू
६४ तस्यप्राणिजातस्यएकोऽद्वितीयःपतिरासीत्स्वामीवभूवेत्यर्थःएवंभूतःसपृथिवींद्याधारधृतवान्नकेवलंपृथिवींउतइमांद्यांअन्तरीक्षंएवंभूताय
कस्मैकायप्रजापतयेदेवायहविषाहविर्विधेमदद्मः।अत्रसद्याधारइतिदधारइतिप्राप्तेआकारश्छान्दसः।कायइतिप्राप्तेस्मायादेशश्छान्दसःहविषे
तिद्वितीयास्थानेतृतीयाअयंवाक्यार्थः॥योहिरण्यगर्भएकएवप्राणिजातस्यप्रभुःपृथिवीमन्तरीक्षञ्चधारयतितस्मैप्रजापतिमूर्त्तयेहविरपिदीय
तेइतिप्रजापतेःस्तुतिः।नारायणऋषिर्जगद्बीजपुरुषोदेवताअनुष्टुप्छन्दःपुरुषमेधेआदित्योपस्थानेविनियोगः।मन्त्रोयथा॥ॐअद्भ्यःसंभृतः
पृथिव्यैरसाच्चविश्वकर्मणःसमवर्त्तताग्रे॥तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे।अस्यार्थः।योविष्णुःअग्रेप्रथमंअद्भ्यःजला
त्पृथिव्यैचपृथिव्याअपिचकारोभिन्नक्रमः।संभृतःसमवर्त्ततउत्पन्नोऽभवत्जलपृथिव्योरुपादानेपञ्चभूतोपलक्षणार्थंकुतोनिमित्तकारणात्
रसात्कामात्सिसृक्षारूपात्वि कर्म्मणःविश्वंसर्वकर्म्मयस्यविष्णोरूपंमूर्त्तिंविदधत्धारयन्त्वष्टाआदित्यःअग्रेपुरतःसर्वेषामपरोस्यंइत्यर्थः
।यएतिआगच्छतितद्रूपंमर्त्यस्यमनुष्यस्यदेवत्वेनैवभवतिकिंभूतंअजानंयावज्जीवम्।विष्णुःसृष्ट्यादौपञ्चमहाभूतेभ्यउपादानकारणेभ्यःसिसृ
क्षायोनिमित्तकारणात्प्राप्यउत्पद्यततस्तुआदित्यःतस्यविष्णोर्यद्रूपंधारयन्गच्छतीतिसर्वेषांप्रत्यक्षंतद्रूपंमनुष्यस्यदेवत्वेनभवतीतिवाक्यार्थः॥
।तत्रपृथिव्यैइतिपञ्चम्यर्थेचतुर्थीदेवत्वमितितृतीयायांद्वितीयाइत्थंभूतप्रजापतिरस्मिन्गर्भेसन्निधानंकरोत्वित्यभिप्रेत्याभ्यांमन्त्राभ्यांपुंसव
नेनसंदीयते॥पुनःपारस्करः॥कूर्म्मपृष्ठरोमहेद्दत्त्वासपत्नीकामयेद्वीर्यवान्स्यादितिविकृतमभिमन्त्रयेत्॥सुपर्णोसीत्यादिपञ्चपुरस्थसन्नि राम
धौपानीयमुपस्थाप्यअभिमन्त्रयेद्देन।प्रजापतिर्ऋषिर्गरुडोदेवताआकृतिश्छन्दःश्वयनस्यानाभिमन्त्रणेविनियोगः।मन्त्रोयथा॥ ॐसु ६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णोसिगरुत्मांस्त्रिवृत्तेशिरो।गायत्रंचक्षुर्बृहद्रथन्तरेपक्षौस्तोमआत्माछन्दांस्यङ्गानियजूंषिनामसामतेतनुर्वामदेव्यंयज्ञायज्ञियंपुच्छंधिष्ण्याः
शफाः॥सुपर्णोसिगरुत्मान्दिवंगच्छस्वःपत॥अस्यार्थःसुपर्णः॥शोभनपर्णःशोभनपक्षःगरुत्मान्दूरगत्वादिगुणयोगेनप्रशस्तपक्षवान्त्रि-
वृत् ॐकारस्तेतवशिरोमस्तकंगायत्रंसामतेचक्षुःबृहद्रथन्तरेसामनीतेपक्षौस्तोमःस्तोमाख्यःपञ्चविंशतिसामतितेआत्मास्वरूपंछन्दांसिअ-
नुष्टुबादीनितेअङ्गानियजूंषियजुर्वेदःतेनामसंज्ञासामतेतनुःशरीरंकनमंवामदेव्यंयज्ञायज्ञियंसामतेपुच्छंलाङ्गूलंधिष्ण्याअग्नयःतेश-
फाःनखाः।यतस्त्वंसुपर्णोसिगरुत्मांश्चअतःदिवंआकाशंगच्छयामिस्वःस्वर्गलोकंपतयाहिअथवाअस्यार्थःसुवर्णत्वादिगरुडधर्म्ममारोप्यवेदमाप
स्त्वमितिअग्निःस्तूयतेपुंसवनेअग्निजलयोःकार्यकारणभेदाश्रयणेनाग्निस्तुत्याजलमेवस्तुतंगर्भेवीर्यवत्त्वंकरोति॥इतिपुंसवनम्।अथसीमन्तो-
न्नयनम्।तत्रहारीतः।उन्नयनात्मातापितृजंपापंव्यपोहति।तथागर्भाधानाद्यष्टसंस्काराणांप्रत्येकंफलमभिधायहारीतएवपुनराह॥एतैरष्टभि-
र्गर्भसंस्कारैर्गर्भोपघातात्पूतोभवति।पुंसवनवत्प्रथमगर्भेमासेषष्ठेऽष्टमेवा।अत्रपुंसवनवदितिपुनस्तत्रयोगेनपत्नीस्नाताआहतवस्त्रद्वयपरि-
धानाःदिष्टाप्रथमगर्भेइतिचद्वितीयादिगर्भेषुसीमन्तोन्नयनसंस्कारनिषेधार्थः।यथाहारीतः।सकृच्चकृतसंस्काराःसीमन्तेनद्विजस्त्रियः॥येयङ्ग-
र्भंप्रथयन्तेसगर्भःसंस्कृतोभवेत्॥पुनःपारस्करः।तिलमुद्गमिश्रंस्थालीपाकंश्रपयित्वाप्रजापतेर्हुत्वापश्चादग्नेर्भद्रपीठउपविष्टायायुग्मेनशला-
टुग्लप्सेनोदुम्बरेणत्रिभिश्चदर्भपिञ्जूलैस्त्र्येण्याशलल्यावीरतरशङ्कुनापूर्णचान्द्रेणसीमन्तमूर्ध्वंविनयतिभूर्भुवःस्वरितिप्रतिमहाव्याहृतिभिर्वा।अत्र
मन्त्रपाठोमङ्गलपाठः।युग्मेनेत्यादियुग्मसंख्यापक्षौदुम्बरफलस्तवकेनसाग्रप्रादेशमात्रगर्भशून्यकुशपत्रद्वयंपिञ्जूलम्॥यथाछन्दोपरिशिष्टं-
अनन्तर्गर्भिणंसाग्रंकौशंद्विदलमेवचत्यभिधायएतदेवहिपिञ्जूललक्षणंसमुदाहृतमिति॥त्र्येण्याशलल्याइतित्रिश्वेतशल्लकीकण्टकेनवीरतर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशङ्कुनाकाण्डेन पूर्णचान्द्रेण सूत्रपूरितदाकुझ्या॥ पुनः पारस्करः। त्रिवृत्तमावध्नात्ययमूर्ज्जावन्त इत्यादि॥ अत्र त्रिवृतं वेणी॥ पुनः पारस्करः तथा
व्रा॰स ६५ हमिरणगाथिनौ राजानः सङ्गायेतो यो वाप्यन्यो वीरतर इति नियुक्तामप्येके गाथामुपोदाहरन्ति॥ सोम एवेत्यादि॥ यान्नदीमुपवसिताको भवन्तितन
स्या नाम॥ अत्र नियुक्तामिति पूर्वाचार्य्यैर्विहिताङ्गाथामपि पठेदित्यर्थः॥ पुनः पारस्करः तनो ब्राह्मणभोजनम्॥ एवं सति यथोक्ते समये प्राङ्गणे
पत्नीसमेतः पतिरग्निस्थापनपूर्वकं चरुश्रपणादिकं कृत्वा आज्येन वाज्यभागौ हुत्वा चरुहोमं स्विष्टकृद्धोमञ्च कृत्वा पञ्चवारान् जुहुयादेभिर्म
न्त्रैः॥ अग्निसरस्वतीन्द्राऋषयोऽग्नीवरुणौ देवते त्रिष्टुप्छन्दः सौत्रामण्या अवभृतेष्टौ विनियोगः। मन्त्रो यथा। ॐ त्वन्नो ऽग्ने वरुणस्य विद्वान् दे
वस्य हेलो अवयासिसीष्ठाः यजिष्ठो॰ वन्हितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्॥ अस्यार्थः॥ हे अग्ने त्वं वरुणदेवस्य हेलः क्रोधं अस्मि
न्कर्म्मणि वैगुण्यजनितं अवयासिषीष्ठाः अपनय किंभूतं त्वं नोऽस्मान् विद्वान् त्वमेवास्माकं कर्म्मसाक्षित्वेन अस्मान् जानासीत्यर्थः॥ न केवलं वरु
णस्य क्रोधमपनय अस्मान्ः अस्मत्तः द्वेषांसि दौर्भाग्याणि च प्रमुमुग्धि प्रमोचय किंभूतानि विश्वा विश्वानि सर्वाणि किंभूतः यजिष्ठः यागे सातिश
य उत्तमः पुनः किंभूः वन्हितमः हविषां वहने प्रापणे सातिशयः पुनः किंभूतः शोशुचानः उत्तरोत्तरं दीप्यमानः हे अग्ने त्वं अस्मान् जानासि
अतोऽस्माकमस्मिन् कर्म्मणि प्रमादादिवैगुण्यकृतं वरुणक्रोधमपनय नोऽस्माकं दौर्भाग्यानि प्रमोचय इति प्रार्थनावाक्यार्थः। हे त्व इति हलअनादर
इत्यस्य प्रयोगे द्वितीयैकवचने प्रथमैकवचनम्॥ शोशुचान इति लिटः कानज्चिति कानचारूपम्॥ अग्निसरस्वतीन्द्राऋषयोऽग्नीवरुणौ देवते त्रिष्टु
प्छन्दः सौत्रामण्यामवभृतेष्टौ विनियोगः। ॐ स त्वन्नोऽग्नेवमो भवती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृ. डीकं सुहवो राम॰
न एधि अस्यार्थः॥ हे अग्ने त्वं अस्माकं अवमो भव अविकृततया पालयितृतमो भव सकः यस्त्वं उती नेदिष्ठः नित्यं पालकत्वेन सन्निहित इत्यर्थः॥ क ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिन् समये अवमो भव अस्या उषसः। अस्यैव प्रभातस्य व्युष्टौ समाप्तौ अस्मिन्नेव समयेइत्यर्थः। न केवलं नोस्मान् प्रति एधि आगच्छ किंभूतः स्वरः स।
स्वास्कानः आगत्य च वरुणं अवयस्व पूजय किं कुर्वन् नोस्माकं मृडीकं रराणः अस्मत्सुखकरं हविर्ददानः पुनर्व्रीहीएतद्देव भक्षय हे अग्ने यस्त्वं लोक
पालनेन नित्यं सन्निहितः स त्वमद्यास्माकं पालको भव अस्मान् प्रति आगत्य च अस्मदीयं हविर्ददानः वरुणं पूजय स्वयमपि भक्षयेति प्रार्थनावाक्या
र्थः। अवम अवरक्षणेइत्यस्य अवतमनमस्य तकारलोपश्छान्दसः ऊतीति अवरक्षणेइत्यस्य ऊती यूतीति सिद्धं अत्र तृतीयैकवचने सुपां सुलुगादिवा
क्येन पूर्वसवर्णादेशे कृते ऊतीतिरूपम्॥ रराण इति रा ला दानेइत्यस्य यङ्-लुकि शपि रूपम्। मृडीकं मृड सुखनेइत्यस्यौणादिक ईकन प्रत्ययः॥ अया
श्चाग्नेइत्यादिमन्त्रस्य प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाअ।
सि॥ अयानो यज्ञं वहास्ययानो धेहि भेषजम्॥ अस्यार्थः॥ हे अग्ने त्वं अयाश्च असि प्राणिनां शुभावहो विधिरप्यसि अपरं अनभिशस्तिपाश्च अ।
सि अविद्यमाना अभिशस्तिर्याचना यस्य पुरुषस्य सोऽनभिशस्तिः तमपि पासि रक्षसि इति अनभिशस्तिपाश्च त्वं अयमर्थः॥ यस्त्वां रक्षणार्थेन
याचते तस्यापि त्वं माहात्म्यात् रक्षको भवसीति तदित्थंभूतस्त्वं अयाः आगच्छ आगत्य नोऽस्माकं यज्ञं वह यद्वा हविः तद्दूतं तद्देवान् प्रापय किञ्च।
त्वं सत्यमित् सत्यमेव अया असि ज्ञाता असि जगत्संसारात् निस्तारोपायं जानासीत्यर्थः॥ अतः कारणादपि त्वं अयाः आगच्छ आगत्य च नोऽस्माकं
भेषजं धेहि अस्माकं निस्तारोपायं सौषधं परिकल्पय॥ यद्यपि शुभावहवाची अयशब्दोऽकारान्तस्तथापि छान्दसः सकारान्तः। सत्यमिदि
तिइत शब्दोऽयमव्ययमवधारणार्थः। अयानो यज्ञं वहास्ययानो धेहि भेषजमित्यत्र अया अया इति क्रियापदद्वयमत्यन्तार्थिकत्वद्योतनार्थी।
अयाइति इण् गतावित्यस्माल्लिङ् मध्यमपुरुषैकवचने सिप् इति श्वलोपः परस्मैपदेष्विति इकारलोपः धातोर्गुणः लेटोऽडाटावित्याडागमः। आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· ङ्पूर्वः तस्याकारेण एकारादेशे सति वर्णव्यत्ययाद्ह्रस्वत्वं अयादि सर्वे गत्यर्था ज्ञानार्था इति कृत्वा एतिजानातीति असुन्प्रत्ययेन रूपम्॥ ॐ
६६ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः॥ अस्यार्थः॥ हे वरुण ते तव ये शतं पाशाः
वितता विस्तीर्णा अपि च ये सहस्रं शतसहस्रयोरुपादानं अतिबहुत्वोपलक्षणार्थम्। किंभूता यज्ञिया यज्ञेषु तथाभूताऽनुष्ठानजनिताः अपि च।
किंभूता महान्तः सर्वलोकव्यापकभूताः तैः पाशैः नोऽस्मान् अद्य इदानीं सविता न केवलं सविता उत विष्णुः विश्वेदेवा मरुतः वायवः स्वर्काः सुष्ठु
अर्काः आदित्याः मुञ्चन्तु मुक्तान् कुर्वन्तु अयं वाक्यार्थः। अस्मिन् यज्ञकर्मणि यानि कानि चित्प्रमादादि कृतानि तथानु ष्ठानजनितानि पापानि दुः
खहेतुरूपा योगी पाशशब्दाभिधेयानि तैः पाशैः सवित्रादयो देवता अनया आहुत्या तोषिता अस्मान् मुक्तान् कुर्वन्तु तेभिरिति तृतीयाबहुवचने बहुलं
छन्दसीति ऐसादेशनिषेधे बहुवचने झल्येदित्येत्वम्॥ शुनःशेफऋषिर्वरुणो देवता त्रिष्टुप्छन्दः यत्रशिखरुक्तपाशरुङ्मोचने विनियोगः॥ म
न्त्रोयथा॥ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय॥ अथा वयमादित्य व्रते तवानागसो ऽदितये स्याम॥ अस्यार्थः॥ हे वरुण पाशं उदुत्तमं
अस्मत् अस्मत्तः उच्छ्रथाय हर्द्दै शलथं कृत्वा नय अधमं पाशं अवश्रथय अर्वाचीनं श्रथयेति पूर्ववत् तद्देव मध्यमं उत्तमाधमयोऽन्तः। विश्रथय
स्वस्थान एव विश्लेषय श्रथय अथ कृते सति हे आदित्य अदितिपुत्र वरुण तव व्रते कर्मणि वर्तमाना वयं अनागसः अनपराधाः सन्तः अदितये अ
दीनता ये स्याम न दीना भवाम इत्यर्थः। हे वरुण उत्तमाधममध्यमपाशत्रयशलथीकरणमभ्यर्थये वा कृणव्रताचरणेन वयमदीना भवाम इत्याशंसावा
क्यार्थः॥ अत्र श्रथायेति वलयोरेकत्वस्मरणात् नकारस्य रेफः अथाय अथा वयं इत्यत्रयेऽपि आकारसंहितायांच्छान्दसः अदितये इति दोऽव राम
खण्डने इत्यस्माद्धातोः क्तिन्प्रत्यये कृते दितिरिति रूपं न दितिरदितिस्तादर्थ्ये चतुर्थ्यां अदितये इत्यर्थः होमं समाप्य पत्न्यासीमन्तः श्लक्ष्णीकरण ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एठकादिभिरुदुम्बरैः करोत्यनेनमन्त्रेण। ओंभूर्विनयाभूर्लोकंविनयामिपृथक्करोमि। ओंभुवोविनयामिभुवोलोकंअन्तरिक्षंविनयामिपृथक्करोमिओं स्वर्विनयामिस्वर्लोकंपृथक्करोमि। पुंसवनेहिरण्यगर्भादिरूपमन्त्रेणनस्यंदत्वात्रैलोक्यपतिः त्रैलोक्याधारः पुरुषोत्तमोगर्भेआहितः एतावताग र्भिणीयेत्रैलोक्यमपिवर्तते। तथासतिभूरादिलोकत्रयमसंकीर्णंःभवत्वेभिः त्रिभिः मन्त्रैः। केशानांपृथक्करणंक्रीयतेसीमन्तोन्नयनेपृथक्कृत तैः केशैर्वेणींबध्नात्यनेनमन्त्रेण॥ ओंआयमूर्जावतोवृक्षऊर्जीवफनिनीभव। अस्यार्थः हेगर्भिणिअयंवृक्षः ऊर्जावतः ऊर्जाबलंतद्वानेत योगात् ऊर्जीवतहावडड्डुबीवयथा। कनिनीफलयुक्तातथात्वमपिकनिनीपुत्रिणीभवअत्रप्रथमपदेनउरुवस्तुतिः द्वितीयपदेनगर्भिण्याः पुत्रिणीत्वम्। शास्त्रेऊर्जीवतइतिसुपांसुपोभवन्तीतिविभक्तिव्यत्ययेनप्रथमवचनस्थानेद्वितीयाबहुवचनम्। वीणाकाराभ्यांवाजनिगी यमानेयजमानः अयमेनाङ्गा यति। ओंसोमएवनोराजेवमानुषीः प्रजाः। अविमुक्तचक्राआसीरंस्तीरेतुभ्यमसौअमुकनदितुभ्यंतवतीरेप्र जाः आसीरन्तिष्ठन्तिकिंभूताः प्रजाः मानुषीः मानुष्यः पुनः किंभूताः अविमुक्तचक्राः अविमुक्तंअविस्यक्तंचक्रंमण्डलंयाभिः अविमुक्तचक्राः इमांप्रजानांराजाइवराजायथारक्षकः पोष्टाचएवंनोस्माकंसोमश्चन्द्रोरक्षकः पोष्टाचभवत्वित्याशंसावाक्यार्थः। राजेवमानुषीरितिसुपांसुरि तिप्रथमबहुवचनेद्वितीयावचनंतुभ्यमितिषष्ठ्यर्थेचतुर्थीअसावितिसंबोधनान्तस्थितनदीनामोपलक्षणम्॥ इतिसीमन्तोन्नयनम्॥ अथ सोष्यन्तीकर्म। तत्रपारस्करः। सोष्यन्तीमद्भिरभ्युक्षत्येजतुदशमास्यइतिअत्रप्राप्तशूलवेदनांगर्भिणीसुखप्रसवार्थम् जलेनाभ्युक्षेत्यनेनम न्त्रेण। ओंएजतुदशमास्योगर्भोजरायुणासहयथायंवायुरेजतियथासमुद्रएजत्यंवायंदशमास्योअस्रज्जरायुणासहअस्यार्थः। दशमास्यः दशमा सकालावच्छिन्नः संपूर्णप्रसवकालीनइतियावत्गर्भः प्रसिद्धार्थः॥ एजतुकम्पतांनकेवलंगर्भः जरायुणासहजरायुर्गर्भवेष्टनंआवरणंइतिग्रस्यप्रसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· ६७ ङ्गिः यथा वायुरेजति कम्पते। यथा समुद्र एजति कम्पते एवं यथायं गर्भः दशमास्यः संपूर्णकालीनः जरायुणा सह अस्रत् अधःपाती भवतु अत्र अस्र॥
दित्यस्मिन् अधः पतने अस्माद्धातोराशंसायां लिङ् प्रथमपुरुषैकवचने छन्दस्यपि दृश्यत इत्यडागमः आगमशास्त्रस्यानित्यत्वाद्वा या सुडागमो न भव
ति किं त्वाशिषीति लिङ् किं त्वा इति दिनामिति सूत्रेण आनुनासिकलोपः स्कोः संयोगाद्योरन्ते चेति सकारलोपः इति सोष्यन्तीकर्म॥ पारस्करः। अथ
वा पतने अवैतु पृश्निरित्यादि। अपन्नप्रसवे भूते अथवा पतनार्थे इमं मन्त्रं जपति॥ अवैतु पृश्निः शेवलं शुने जरायु चत्तवे नेनव मांसेन पीवरे कस्मिंश्च
नायतनमजवयुपद्यतां अस्यार्थः जरायु अवैतु किमिव पृश्निः शेवलमेनयोक्तपादानं दृष्टान्तार्थम् एतेनैतदुक्तं भवति यथा पृश्निः पङ्कः शेवलं प्रसिद्धा
मेवमनेनकश्चिदपि असंलग्नं जलोपरि स्थितं समुद्रभावादिप्रेरणेनाप्ययं गच्छति। यथा जरायुः सुखेनापगच्छतु कथंकारं शुने अजवे सुनोदना
यथा न भवतीत्यर्थः। किंभूतं जरायु मांसेन पीवरी पुष्टं किंच जवायुकस्मिंश्चापद्यतां कृत्वाप्यरवावयवे अपत्त्वं विलग्नं न भवतु किंभूतं आमतं महत् उद
रे असंलग्नं जरायु सुखेन पतत्विति वाक्यार्थः। अत्र शुने इति षष्ठ्यर्थे चतुर्थी चत्तवे इति अदभक्षणे इत्यत्र तुमर्थे शेसे सेनित्यादिना सूत्रेण तवेङ् प्रत्यये
कृते रूपम् पीवरीति लिङ्गव्यत्यये स्त्रीत्वम्। इत्यपवाततनम्। अथ जातकर्म· तत्र हारीतः वीतावक्तु गर्भोपघातः पञ्चगुणः जातकर्मणा प्रथममप
हन्ति तथा गर्भाधानाद्यष्टसंस्काराणां प्रत्येकं कमलमभिधाय हारीत एव पुनः सह एतैरष्टभिर्गर्भसंस्कारैर्गर्भोपघातात्पूतो भवति तथा जातकर्मणि पा
रस्करः जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननार्थमास्ये करोति तथानामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूवस्त्वयि दधामी
त्यादि तत्र कुमारस्य मेधाजननार्थं मधुघृतं प्राशयतीति चतुर्भिर्मन्त्रैः ॐ भूयस्त्वयि दधामि भूर्लोकं त्वयि दधामि ॐ भुवस्त्वयि दधामि भुवर्लोकम पा·स·
न्तरिक्षं त्वयि दधामि अर्चयामि ॐ स्वस्त्वयि दधामि स्वर्लोकं त्वे दधामि ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि एतन्नो कत्रेयोपलक्षितं ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेन दाश्रितं सर्वं प्रमेयजातं न्त्वयि दधामि दधामीति सर्वत्रैव समानम् त्रैलोक्यगतप्रमेयजातधारणत्वमेधावित्विनिवाक्यार्थः। पुनः पारस्करः दक्षि
णकर्णजपति आयुष्मानित्यादि आयुषमिति कुमारस्य दीर्घायुष्ट्वार्थमेतन्मंत्र द्वयम् ॐ अग्निरायुष्मान् वनस्पतीभिरायुष्मान्स्तेन त्वा आयुषा आयु
ष्मन्तं करोमि सोम आयुष्मान् सो षधीभिरायुष्मान्तेन त्वा आयुषा आयुष्मन्तं करोमि ब्रह्म आयुष्मन्त द्ब्राह्मणैरायुष्मन्तेन त्वायुषा आयुष्मन्तं करोमि दे
वा आयुष्मन्तस्तमृतैरायुष्मन्तेन त्वा आयुषा आयुष्मन्तं करोमि ओषधय आयुष्मन्तस्ते व्रतैरायुष्मन्त स्तेन त्वा आयुषा आयुष्मन्तं करोमि पितर आ
युष्मन्तस्ते स्वधाभिरायुष्मन्तेन त्वा आयुषा आयुष्मन्तं करोमि यज्ञमायुष्मान् स दक्षिणाभिरायुष्मान्स्तेन त्वा आयुषा आयुष्मन्तं करोमि यज्ञमा
युष्मान् स दक्षिणाभिरायुष्मान्स्तेन त्वा आयुषा आयुष्मन्तं करोमि समुद्र आयुष्मान् स स्रवन्तीभिरायुष्मान् तेन त्वा आयुषा आयुष्मन्तं करोमि अस्या
र्थः योऽयमग्निरायुष्मान् चिरस्थायी स वनस्पतीनिति दृष्टस्य दारुजयाऽऽग्नेराश्रयत्वमुपगतैवायुष्मान्तेनाग्निसंबन्धिना आयुषा त्वां आयुष्मन्तं करो
मि सोमश्चन्द्रः ओषधीति ब्रह्मादिभि अमावास्यायाः क्षीणश्चन्द्रमा ओषधीषु प्रविष्टो भवति ततः शुक्लपक्षे ताभिराप्याप्यमानक्रमेण वृद्धिमासादयन्
आयुष्मान् भवति ब्रह्मदेवः ब्राह्मणैः प्रसिद्धैः ब्राह्मणैर्हि शिष्योपाध्यायक्रमेण धार्य्यमाणो वेद आयुष्मान् भवति देवा अमृतैरिति च प्रसिद्धार्थं देवा
नां हि अमृतप्राप्यामरत्वं ऋषयो मरीच्यादयः व्रतैश्चान्द्रायणप्रभृतिभिः ऋषीणां हि तापसैव दीर्घायुष्ट्वं पितरः अग्निदग्धोदयः स्वधाभिः पितॄणाम
न्नैः यज्ञैः स दक्षिणाभिरिति च प्रसिद्धार्थं समुद्रः प्रसिद्धः स्रवन्तीभिर्नदीभिः अपरश्च सर्वं समानमेव वनस्पतीति अन्येषामपि दृश्यते इति दीर्घत्वम्
॥ कश्यपस्य त्र्यायुषमिति अस्यार्थः। त्रीणि अनूषि समाहृतानि आयुषं आयुः शब्दश्चावस्थावचनः बाल्ययौवनवार्द्धकात्मकमवस्थात्रयमित्यर्थः
कश्यप ऋषेस्त्र्यायुषं जमदग्नेयन्त्र्यायुषं देवानां ब्रह्मादीनां यत् आयुषं मे समास्तु भवतु। अत्र यद्यपि कण्ठगोचरा आशंसा पठ्यते तथापि कुमारगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वरैरेव वक्तव्या पयाश्रुतिः यां वेकं चित् यत्तत्कल्विज आशिषमाशासते यजमानस्यैव सेति। पुनः। पारस्करः स पदिकामयेत्सर्वमायुरियात्॥ वासो प्राणन
मभिमृशेद्दिवस्परीत्येतस्यानुवाकास्योत्तममृचं परिशिनष्टिनत्रकुमारस्य संपूर्णायुः प्राप्तिकामनया कुमारस्य हृदयस्पर्शात्पूर्वं एतानेकादशमन्त्रा
न्जपति एतेषां वत्सप्रियऋषिरग्निर्देवता त्रिष्टुपछन्दः चयनेऽनुपस्थाने विनियोगः मन्त्रो यथा ॐ दिवस्परिप्रथमं जज्ञे अग्निरस्माद्द्वितीयं परि
जातवेदाः तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः अस्यार्थः। अग्निर्दिवस्परि आकाशमधिकृत्य जज्ञे जातवान् जातवेदा अग्निरेव अ
स्मत्परि अस्मत्सकाशात्पुरुषरूपविष्णुमधिकृत्य द्वितीयं जज्ञे अप्सु जलेषु तृतीयं जज्ञे नृमनाः नृषु मनुष्येषु मनो यस्येति नृमनाः प्रजापतिः एवं अग्निं इंधानं दीप
यन् अजस्रं पुनः पुनः जरान् जरयति किंभूतः प्रजापतिः स्वाधीः सुशोभनं आहिता धीर्बुद्धिर्यस्य स स्वाधीः प्रजापतिः ॐ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते
धाम विभृता पुरुत्रा विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ॥ अस्यार्थः। हे अग्ने ते तव त्रेधा त्रिःप्रकारं त्रयाणि अग्निर्वायुः सूर्यः रूपाणि
विद्मः जानीमः। किंच ते धामस्थानानि आहवनीयगार्हपत्यदक्षिणाग्निरूपाणि विद्मः किंभूतानि विभृतानि विशेषेण भृतानि आधारभूतानि
अपि किंभूतानि पुरुत्रा पुरुतानि पुरुवत्र यत्ते इति पुत्रन्तानि पुरुवाणि जगद्रक्षाकारकाणि इत्यर्थः इति चेत्ते नाम विद्मः किंभूतं पर मं न केवल
मुत्तमम पि यद्गुहायां स्ववस्थितं गुह्यमिति॥ अपि च अतः सकाशात् आजगन्थ आगतोसि तं एतं संश्रयकजनं विद्मः अत्र विद्मान इति आकारपदं
धाम इति बहुवचने एकवचनं विभृतानि पुरुत्राणि इत्यत्र निलोपः छन्दसः गुहा इति सप्तम्याः प्रथमा आजगन्थ इति गमॢगता वित्यस्माद्धातोः लिङ्म
ध्यमपुरुषैकवचने लड्पदेशात् तथा इति इट्निषेधः हे अग्ने तव रूपस्थाननामरूपं प्रकारकाएव यं जानीमः इति वाक्यार्थः। ॐ समुद्रे त्वा नृमणा अप्स्व
न्तर्नृचक्षा ईधे दिवो अग्निरीधन् तृतीये उरजस्यासि समयान्त स्थिवा हि धा अवर्धयन्। अस्यार्थः। हे अग्ने त्वां नृमना प्रजापतिः ईधे दीपयामास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारः किंभूतं त्वां समुद्रे अप्सु जलेषु अन्तर्मध्ये वाडवाग्नित्वेनावस्थितं नृमनाः किंभूतः नृचक्षाः नृषु मनुष्येषु चक्षुर्यस्येति नृचक्षाः किंभूतं त्वा दिवः स्व
र्गस्य जघने उघसि आपीनस्थानीये स्थाये स्थाने आदित्यतया स्थितं आदित्यो हि पृथिवीगतं रसं रश्मिभिराहृत्य पुनर्वर्षासु त्यजति एतावता अत्र स्व
र्गप्रदेशे आदित्यत्वेन तिष्ठतीति तत्स्थानं स्वर्गः स्व ऊधः वृ ऊधः शब्देनाभिहितं एवं तृतीये रजसि भूमिराकाशः स्वर्ग इति गणनाक्रमेण तृतीयः स्वर्गो भ
वति तृतीयलोके अपां एउ यस्थ जलानां उपस्थे उत्सङ्गे च तस्थिवांसं स्थितं त्वां महिषाः प्राणवायवः अवर्धयन् वर्धयां चक्रुः अत्र ऊधन इति उधःश
ब्दात् सप्तम्येकवचने तस्य सुपां सुलुगिति लुग्व्यत्ययो बहुलमितीकारस्य नकारः महिषाः प्राणवै महिषा इति श्रुतिप्रमाणं समुद्रे वाडवाग्नितया स्वर्गे
आदित्यतया स्थितं त्वामग्निं वायवो वर्धयन्त्विति अग्निस्तुतिर्वाक्यार्थः ॥ ओं अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् सद्योज
ज्ञानोः विहि अद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ अस्यार्थः ॥ अग्निः अक्रन्दत् शब्दं करोति किंच क्षामा क्षमां पृथिवीं च विहन् लेढि आस्वादयती
त्यर्थः ॥ रलयोरेकत्वस्मरणम् लकारस्य स्थाने रेफः पठ्यते। किं कुर्वन् वीरुधः ओषधीः समंजन् आप्नुवन् अपि च ईहुः सद्यः स्मितः सन् व्यख्य
त विख्यापयति किंभूतः सद्योजज्ञानः तात्कालिकजातः जायमानः हि शब्दः ह शब्दो पादपूर्णार्थो। किंच रोदसी द्यावापृथिव्यो अन्तर्मध्ये द्या
वापृथिव्योर्मध्ये इत्यर्थः ॥ भानुना रश्मिना आभाति क इव द्यौरिव अत्र मंत्र्वाः क्रोशन्तीति वन् द्योशब्देन मेघ उच्यते एवमुक्तं भवति यथा मे
घः स्तनयन् शब्दं कुर्वन् पृथिवीं वृन्दके न लिहति ओषधीर्व्याप्नोति भानुना विद्युद्रूपेण प्रकाशयति। ओं श्रीणामुदारो धरुणो रयीणां मनीषाणां
प्रार्पणः सोमगोपाः वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः अस्यार्थः। वसुरग्निर्विभाति प्रकाशते उषसां उषसि प्रत्यूषसमये
अग्नेः प्रथमं ईधानः दीप्यमानः प्रत्यूषसमये हि अग्नीनां प्राकृत्स्यरणं क्रियते पुनः किंभूतः अग्निः श्रीणां लक्ष्मीणामुदारः आधाता रयीणां।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रा·स·
६९

वनानांम्ध्यरूणधारयित्तामनीपाणांमनोभिलषितानांप्रार्पणः प्रापयिता धनमिच्छेतुताशनादित्यभिप्रायमेतत् सोम गोपाः सोमंचन्द्रंगोपायतिरक्ष
तिगुपरक्षणे इत्यस्मात् सोमोपपदात् सर्वधातुभ्योऽसुन् इत्यसुन् इलहुन् प्रत्ययः सहसः वनस्यसूनुः पुत्रः बलवतामथ्यमानत्वेदुत्पद्यते अप्सु
तलेषु राजावरुणः सर्वमेवश्रीणासुदारः इत्यादिवसुरित्यस्यविशेषणम्॥ ॐ विश्वस्यकेतुर्भुवनस्यगर्भ आरोदसी अपृणाज्जायमानः वीडुंचिदद्रि
मभि . त्परायन् जनायदग्निमयजन्तपञ्च॥ अस्यार्थः॥ यत्पञ्च अग्निपञ्च चत्वारोब्राह्मणादयः निषादाख्यसङ्कीर्णजातिश्चेतिपञ्चजनामनु
ष्याः अयजन्त पूजितवन्तः सोग्निर्विश्वस्यसर्वप्राणिजातस्यकेतुः ज्ञाता सर्वज्ञ इत्यर्थः॥ भुवनस्यभुवनवर्त्तिनोभूतजातस्यगर्भ अन्तर्वर्त्ती प्राणादि
वायुवत्तया आ इति उपसर्गोऽपृणादित्यनेनसंबध्यते किंभूतो अग्निरोदसी आपृणात् द्यावापृथिव्यौपूरितवानित्यर्थः॥ आदित्यत्तया जायमान
सोत्पद्यमानः किंच अद्रिं पर्वतं अभिनत् विदारितवान् किंच भूतं वी ˉ डुचित् शब्दोऽप्यर्थे चित्तमपीत्यर्थः॥ कुर्वन् परायन् परागच्छन् तत्र पर्व
ते अपतन्तितियावत् एतेनेऽग्निर्वद्भुद्भइत्युक्तम्भवति॰ केतुरिति कित ज्ञाने इत्यस्माद्धातोरौणादिकस्तु प्रत्ययः॥ ॐ उशिक् पावकोअरतिः सुमेधा
मर्त्येष्वग्निरमृतोनिधायि इयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्षन्॥ अस्यार्थः॥ अग्निर्मर्त्येषुमनुष्येषुनिधायिनिहितः किंभूतः
उशिक्कान्तः मनोहरः पावकः पवित्रताकारीः अरतिः अलंमतिः पर्य्याप्तेरित्यर्थः॥ सुमेधाः साधुप्रज्ञः अमृतः अमरणधर्म्मोपेतएवंभूतोऽग्निः
सधूममरुषं इयर्त्ति उर्द्ध्वंगमयति उदिति व्यवहितमत्रसम्बन्धः किंभूतः धूमम् अरुषं अरोचनंरूपवदित्यर्थः किंकुर्वन् अग्निः भरिभ्रत् जगद्धारयन् अ
पिचशोचिषारश्मिना द्याम् आकाशं ईनक्षन् व्याप्नुवन् किंभूतेन शोचिषाशुक्रेणशुक्लवर्णेन अत्र उशिक इति वशकान्तावित्यस्माद्धातोरौणादिकेउप्र- राम·
त्ययः अरतिअलंमतिरित्यस्यव्यत्ययोबहुलमितिवचनात् अत्रज्वलमकारयोर्लोपः बलयोरैक्यस्मरणात् भरिभ्रदिति डुभृञ् धारणे इत्यस्य ६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्यादिसूत्रेण निपातनाद्रूपम्॥ ॐ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः॥ श्रिये रुचानोऽग्निरमृतोऽभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः॥ अ
स्यार्थः। अग्निर्व्यद्यौद्विद्योतते केन उर्व्या महत्या दीप्त्या इत्यर्थः। किंभूतः दृशानः प्रत्यक्षतो दृश्यमानः रुक्मो रोचनः सूपवानित्यर्थः नकेवलं विद्योतते॥
किंच यस्य अग्नेः आयुः जीवनं दुर्मर्षं दुःखेन मृष्यते खण्डयितुं शक्यते इति यावत् सोऽग्निरमृतोऽमरणधर्मा भवत् भूतः किं कुर्वन् रुचानः हर्षयन् कि
मर्थं श्रिये लक्ष्म्यै लक्ष्मीं दातुमिच्छन्नित्यर्थः। किंच यदेनं अपरो स्तनि देशे आदित्यं द्यौः प्रकाशं अजनयत् जनितवती किंभूता सुरेताः शोभ
नं रेतो यस्याः शोभनत्वं च रेतसः एतत् देवयत्वेन विश्वस्य द्योतकारी आदित्यो जनितः कैः अजनयत् वयोभिः अन्नैः पशुपुरोडाशप्रभृतिभिः पश्चाद
यो हि अग्नौ हुता आदित्यो दयमानं भजन्त इत्यभिप्रायः ईशान इति दृशि धातोः कर्मणि लिट् शानच् छन्दस्युभयथेति शानच आर्धधातुकत्वान्मुकन भ
वति व्यद्यौदिति द्युत धातोर्विपूर्वात् वि द्युतती ति क्विप् छन्दस्यपि दृश्यते इत्यडागमः व्यद्यिवशब्दात् प्रथमैकवचने अवत्वादिति वकारस्यौकारः॥ ॐ
यस्तेऽद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने। प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ॥ अस्यार्थः। हे भद्रशोचे कल्याणरश्मि दे वं देव
नादियुक्त अग्ने यो यो यजमानः ते तव अद्य इदानीं अपूपं पुरोडाशं कृणवत् करोति। किंभूतं घृतवन्तं घृतेनोपस्तीर्णमभिघारितं तं यजमानं वस्यः वलोचितं स्था
नं प्रणय प्रणायस्व सिलोपः छान्दसः किंभूतं रसं प्रतरं प्रकर्षेण तीर्यगम्यते प्रतरं वप्रकर्षार्थश्च अग्निप्रसादेन प्राप्यते अपि किंस्मत् अच्छ अच्छं निर्म
लं स्वच्छं निर्मलं निष्पापमित्यर्थः। किंच हे यविष्ठ युवतम यजमानं सुम्नं सुखं नय स्वाभिमुखं प्रापयेत्यर्थः। किंभूतं सुखं देवभुक्तं देवैः पूजितम्। हे अग्ने
यजमानः तव पुरोडाशं करोति तं यजमानं देवोपभोग्यं सुखाभिमुखं कृत्वा दीपप्रसादप्राप्यं सुखं स्वर्गं प्रापयेति प्रार्थनावाक्यार्थः॥ अक्ष्णवदिति कृवि हिं
साकरणयोरित्यस्य धातोरिकारलोपः तुलिन्गुण्वट् क्तिप इश्च लोपः परस्मैपदे ष्विती कारलोपधिन्विकृण्वोरच्चेति मध्ये उकारप्रत्ययः धातोर्वकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स· स्य चारः सेदोडाटाविस्यडागमः उकारस्य गुणः अवादेशः वस्य इति वस धातोरभावस्य इत्यस्यामितिम्य वस्थित विभाषपाके वलस्यापि धातोवस्यत
७० रूपं विभक्तिव्यत्ययेन द्वितीयैकवचने प्रथमैकवचनं अनुस्वारलोपः छान्दसः॥ ॐ आतन्मजसौश्रवसे षुगेउकथउक्थआभजसस्यमाने। प्रियः सू
र्य्ये प्रियोऽग्नाउभवात्यजानेनाभिनद्दुनेजनिलैः अस्यार्थः। हे अग्ने तयजमानं आभज तस्य सन्निहितो भवत्वयि सन्निहिते किं सादित्यपेक्षायामाह य
स्य यजमानस्य उक्थउक्थस्तोत्रे स्तोत्रे शस्यमाने सौश्रीसुषुस्साधूश्रवणीये भूयाभजसि आसेवने सहिहितोभवसीत्यर्थः॥ असौ यजमानः सूर्य्ये सूर्य्यै
स्याप्रियः उद्भवाति उत्पद्यते अग्नाः आग्नेः प्रिय उद्भवातिन केवलं अपि सुजानेन पुत्रेण जनित्वैः जनिष्यमाणैः पुत्रपौत्रादिभिः उद भिवदत्त उ
द्भिनत्ति धर्मार्थकामान्यस्य पुत्रादयोपि धर्मार्थकामयुक्ता भवन्तीत्यभिप्रायः अत्र सूर्य्ये इति सुपोसुपो भवन्तीति षष्ठ्येकवचने सप्तम्येकवचनं अग्नाइ
तिषष्ठ्येकवचने सुलुगादिवाकोन विभक्तिलोपः वर्णव्यत्ययेन इकारस्याकारः उद्भिनदिति भिदिर विदारणे लेट इतश्च लोपः लेटोऽडाटावित्याडागमः
जनित्वैरिति जनी प्रादुर्भावे इत्यस्मात् कृत्यार्थे तवैनकेन्कइति त्वेन् प्रत्ययः इति तृतीयाबहुवचनम्॥ ॐ त्वामग्ने यजमाना अनुद्युविश्वावसुदधिरे
वर्य्याणि त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो नवव्रुः॥ अस्यार्थः॥ हे अग्ने त्वां यजमानाः विश्वाविश्वानि सर्वाणि गोभु हिरण्यवस्त्रादीनि
सुवनिधनानि दधिदुग्धादीनि किम्भूतानी वार्य्याणि वरणीयाणि प्रार्थनीयानि कथं यजमानाः आनुद्युन अन्वादिवसान प्रत्यहमित्यर्थ यावत् किंच त्व
या सहियुक्ताः समग्रं द्रविणं यज्ञफलं मोक्षरूपं इच्छमानाः कामयमानाः व्रजं वर्त्मव्रज्यते अनेनेतिव्रजं॥ किम्भुतं गोमन्तं रश्मिमन्तं आदित्यमित्यर्थः॥
किम्भूता यजमानाः उशिजः मेधाविनः ज्ञानिनः तेनैतदुक्तम्भवति त्वां यजमानाः यदाधानादिकमिच्छन्ति तदा ज्ञानिनो भूत्वा ज्ञानकर्मसमुच्चयेनादि राम·
त्यवाद्द्वमोक्षं प्राप्नुवन्तीति॥ पुनः पारस्करः प्रतिदिनं पञ्चब्राह्मणान् अवस्याप्यब्रूयादिममनुप्राशितमिति तेनतः कुमारस्या अनुप्राशनार्थपूर्वा। ७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवन्नुर्दिक्षु मध्ये च पञ्चब्राह्मणान् स्थापयित्वा तेषां प्रेषणं क्रियते अनेन मन्त्रेण इममनुप्राणितेत्यत्राह विप्रा इत्यध्याहार्यं इमं कुमारं अनुप्रा
णितमित्यर्थः॥ पुनः। पारस्करः पूर्वो ब्रूयात् ब्राह्मणः प्राणेत्याने ति दक्षिणे अपानेति उत्तरो उदानेति उपविष्टात् देये होमा ब्रूयात् समानेति ततश्च
ते पञ्चब्राह्मणाः कुमारस्यानुप्राशनं कुर्वन्ति एभिः पञ्चभिर्मन्त्रैः प्राण व्यान अपान उदान समान एतानि पञ्चसम्बोधनानि पदानि —→
अनेन सम्बोधनेन प्राणापञ्चवायवः आस्यमुक्ताः अस्मिन सम्बोधने स्थिरतरो भवेदित्यभिप्रायः॥ पुनः पारस्करः समये स्मिन् देशे यत्नात्तु
—नाभिन्नयत्नेदेवने इत्यादि॥ अमावस्य जन्म स्थानमभिमन्त्रयते अनेन। ॐ वेद ते हृदयं दिवि चन्द्रमसि श्रितम् वेदाहं तन्मा विद्यात् पश्ये
म शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्॥ अस्यार्थः॥ हे भूमि ते तव हृदयं वेद जानामि किम्भूतं चन्द्रमसि श्रितं॥ सम्बन्धं कुत्र
दिवि आकाशे हृदयं अहं वेद तन्मा विद्यात् मामपि तत्ज्ञानादित्यर्थः॥ पश्येम शरदः शतमिति व्यक्तार्थं व्याख्यातं च गर्भाधाने॥ पुनः पारस्क
रः॥ अथैनमभिमृशति अश्मा भवेत्यादि कुमारमभिमुख्य इमं मन्त्रं जपति ॐ अश्मा भव परशुर्भव हिरण्यमश्रुतं भव आत्मा वै पुत्र नामासि
स जीव शरदः शतम्॥ अस्यार्थः। हे कुमार इति सम्बोधनमध्याहार्यं त्वं अश्मा भव प्रस्तरमिव दृढाङ्गो भव परशुः कुठार इव विरोधिनां छेदको
भव किञ्च हिरण्यं अश्रुतं यथा सुवर्णं असुवर्णं अश्रुतं अक्षरं तथा त्वमभिभव किञ्च त्वं मम आत्मासि किम्भूतं पुत्र नामा मदीयात्मना सह तव पुत्र
नाम त्वमिति विशेषः॥ अपरञ्च सर्वे मया सह तव तुल्यमेवेत्यभिप्रायः॥ किञ्च शरदः शतं वर्षानि जीव वाक्यार्थः स्फुट एव॥ ततः पारस्करः
॥ अथास्य दक्षिणं स्तनं प्रक्षाल्य प्रयच्छति इमं स्तनमित्यादि॥ ततः कुमारं मातुर्दक्षिणस्तनं पाययेत् अनेन मन्त्रेण॥ तत्र परमेष्ठी ऋषिर् विराड्देव
ता त्रिष्टुप् छन्दः यजने यजमानवाचने विनियोगः॥ ॐ इमं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने शरीरस्य मध्ये तं संजूष स्व मधु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्तनर्च्चा समुद्रियंम् सदनमाविश ॥ अस्यार्थः। हे अग्ने त्वं इमं अपरोक्षामुं तं स्तनं धय पिब किम्भूतं मूर्जस्वन्तं प्राणहेतुभूतं अपां अप् शब्देन दुग्धमुच्यते तस्मात् स्वदृश्यात् प्रपीनं प्रपुरितं कुत इत्याकाङ्क्षायां शरीरस्य मध्ये। तस स्तवन्तं ईमं जुं षस्व किम्भूतमधुमन्तम् हे अर्च्चा भागउन सर्वदेहगतं समुद्रियं समुद्रसम्बोधनं सदनं आविशस्त्व प्रविश त्वं एतेनैतदुक्तं भवति। यथा समुद्रस्यो वाडवाग्निः सर्वमवस्जरयति तथा भवानपि यथा प्राप्नमहोर्थं जरयति ॥ पुनः पारस्करः ॥ यस्तनमित्युत्तरमेतव्याभ्यां ततो वालं कुमाराय प्रदद्यादनेन तत्र ईमं स्तनमित्यादि व्याख्यातं दीर्घतमा ऋषिर्गौतमाद्यः त्रिष्टुप्छन्दः ॥ पुनः पारस्करः ॥ उदपात्रं शिवस्तो निदधात्यापो देवेष्वित्यादि ॥ ततः सूतिकाशय्याशिरःस्थाने सूतिकारक्षार्थं जलकुम्भं स्थापयेदनेन ॥ ॐ आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ एवमस्यां सूतिकायां सपुत्रिकायां जागृथ ॥ अस्यार्थः ॥ हे आपः यूयं देवेषु जागृथ देवानां रक्षायां निद्रां मुञ्चथ यथा यूयं देवेषु जागृथ एवं तथा अस्यां सूतिकायां जागृथ किम्भूतायां सपुत्रिकायां पुत्रसहितायाम् ॥ हे आपः यूयं देवेषु जाग्रथेति। अपा स्वस्वप सूतू क्तन्य अस्याः सपुत्राया रक्षार्थं जागृथेति प्रार्थनावाक्यार्थः ॥ अथ सूतिकागारे होमः ॥ अत्र पारस्करः ॥ द्वारदेशे सूतिकामुपसमाधायोत्थानात्सं धिवेलयोः फलीकरणमिश्रान् सर्षपान् याआवपति। षण्डामर्का इत्यादि कुमाररक्षार्थं तण्डुलकरणमिश्रसर्षपाहुतिद्वयं जुहोत्यनेन मन्त्रद्वयेन ॥ ॐ षण्डामर्का उपवीरः शौण्डिकेय उलूखलः मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा ॥ अस्यार्थः ॥ षण्डो षण्डाभिधानो बालग्रहः इत आहतेर्नश्यतात् नष्टो भवतु एवं मर्कादयश्च्यवनान्ताः सप्त बालग्रहा नश्यन्तु षण्डादिक्रियापदम् अष्टभिः सह प्रत्येकं संबध्यते ॥ अनया आहुत्या षण्डादयोऽष्टौ बालग्रहा नश्यन्त्विति वाक्यार्थः। ॐ आलिखन्ननिमिषन् किंवदन्त उपश्रुतिः हर्य्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणो नश्यतादितः स्वाहा ॥ अस्यार्थः ॥ तःसत्यम् ॥ यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः पूर्वच्छेच्छुद्रसजनापस्ते असुसीररोलपे आलिखन्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादिर्येद्दशबालग्रहाः अत्रापि नक्षत्रादिनिक्रियापदं प्रत्येकं दशभिरेव संबध्यते तेन दश एव॥ इति सूतिकागारहोमव्याख्या॥ कुमारस्य बालग्रहशा
न्तिरिदानीमभिलिख्यते। तत्र पारस्करः॥ यदि कुमार उपद्रवेत् जालेनोत्तरीयेण वा आच्छाद्य पिता आङ्क आधाय जपति। कूर्कुर इति। दश दिना
भ्यन्तरे कुमारस्य बालग्रहोपद्रवं दृष्ट्वा कुमारं जालेन उत्तरीयेण वा आच्छाद्य क्रोडे कृत्वा इमं मन्त्रं जपति ॐ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः श्चेच्च
च्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर ॥ अस्यार्थः कूर्कुरादीनि त्रीणि नामानि बालं कुमारं बध्नाति। बालबन्धनः कुमारग्रहः बालबन्धन इति त्रि
भिरेव कूर्कुरादिभिः सह प्रत्येकं सम्बध्यन्ते चेत्तु चेदिति वीप्सादर्शनात् तेन कुर्कुरश्चेद्बालबंधनः एतेषां मध्ये यदि कश्चिद्बालबन्धोसि तदा हे शुनक
तेनयत्नमोस्तु त्वं सृज कुमारं त्यजेत्यर्थः। हे शुनक इति कुर्कुरादीनां त्रयाणामेव साधारणमेकं सम्बोधनपदं किंच सीसरः तेषां पिता लपेदिति। किं
वदन्ति अपह्वरः। अपगतकौटिल्यो भव॥ कुर्कुरादिनामैकबालग्रहमध्ये यदि त्वदुर्गोसि तदार्यमदीपन नमस्कारेण पूजितः पितुः सीसरस्य वचसा एनं कु
मारं त्यजत्विति प्रार्थनावाक्यार्थः॥ तत्सपंपयतेदेवा इत्यादेरयमर्थः हे शुनक यत्ते देवा ब्राह्मणादयो वरप्रार्थितं अददन् तत्वन्तः संपूर्योक्तरूपः त्वं कुमा
रं बालमेव वरं वृणीथाः। हत्वान सितत् तच्छ्रेदिति वीप्सायां अत्रापि यत्ते सरमा नाम सीसरः पिता श्यामशबलौ भ्रातरौ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो
लपेतापह्वरेत्यभिमृशति॥ इत्यपि देवैर्वरदानं त्वयाच वरत्वेन कुमारस्य वरप्रार्थनं इत्युभयेन सदृशत्वं इत्यस्य सम्बन्धो विवक्षितः यद्यपि तदुभयं सत्यं।
तथापि तेन नमोस्तु त्यजसीति यद्यपि त्वया देवेभ्यः कुमारत्वेन प्रार्थितः तेश्च दत्तस्तथापि मम नमस्कारेण तुष्टः पितृवाक्येनेनं त्यजेति प्रार्थनावाक्यार्थः त
–त्सत्यं यत्ते समेत्यादि। अयमर्थः हे शुनक यत्ते तथ सरमा शुनीमाता सीसरः पिता श्यामशबलौ भ्रातरौ तत्तच्छ्रेत्सत्यं अत्रापि वीप्सायां प्रयोजनं तद्देव
तथापि नमोस्तु। सीसरो लपेतापह्वरेति पूर्ववत् देवत व माता सरमा सीसरः पिता भ्रातरौ श्यामशबलौ एतत्सत्यमेव तथापि मम नमस्कारेण त मेनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रा-स कुमारन्त्यजेत्तिवाक्यार्थः॥ रुदृ अपनयने इत्यस्य धातोरप पूर्वस्य लोटि रूपम्॥ ॐ न नामयति निरुदति न हृष्यति यत्र वयं वदामो यत्र चाभिमृषामसि॥ य
७२ त्रकुमारे वयं वदामः किं वदामः वक्ष्यामीत्याकाङ्क्षस्त्वा त्रवोढव्यम्॥ यत्र चाभिमृषामसि अभि सर्वतोभावेन यस्य स्पर्शनं कुर्मः कुमारः न नामयति
अङ्गानामलङ्कुरोति कुकुरादिर्न भवतीत्यर्थः॥ न रुदति रोदनपीडायुक्तो न भवति न हृष्यति कर्षपीडायुक्तो न भवति॥ इति बालग्रहोपद्रवशान्तिः
नामकर्मणि वैदिकमन्त्रैरनुष्ठानं पारस्करेगणेना प्रदर्शितं अतोस्माभिरपि तदीयव्याख्यानं कृतमिति समाप्तं जातकर्म। अथ निष्क्रमणं। तत्र निष्क्र
मणे विशेषफलस्याश्रवणात् याज्ञवल्क्योक्तबीजगर्भसमुत्पन्नपापक्षय एव केवलं बोद्धव्यम्॥ अथ गर्भाधानादिसंस्कारानभिधाय याज्ञवल्क्यः एव
मेनः स्वयं याति बीजगर्भसमुद्भवम्। तत्र कुमारं सूर्यं दर्शयत्यनेन। ॐ तच्चक्षुर्देवहितमिति। अस्यार्थः। इतो हगङ्गु-द्वादश्यादिकण्डिकायाः प्रश्नत
त्वानदित्यनेनादित्यबिम्बपरामृष्यते। तत् आदित्यबिम्बं चक्षुः त्रैलोक्यस्य चक्षुर्भूतं यथा चक्षुषा विना चाक्षुषं किंचित्र प्रकाशते तथा अनेनापि विना न प्रका
शते यतः किंभूतं देवहितं अनुदिने अस्मिन् दैवं कर्म तन्त्रियते। यतः किंभूतं पुरस्तादुच्चरत् प्राच्यां दिशि ऊर्ध्वं गच्छत् अपि किंभूतं शुक्रं निष्पापं
एवमादित्यं स्तुत्वा वयं पश्येम शरदः शतं जीवेम शरदः —— शतं शृणुयाम शरदः शतं इति व्यक्तार्थमेव। आदित्यं स्तुत्वा वयमविकलेन्द्रियाः शतं वर्षा
णि जीवेम इत्याशंसावाक्यार्थः। ततः सूर्यार्घ्यं दद्यादनेन ॐ आकृष्णेनेति। अस्या व्याख्यादिकमादित्यपूजायामेव लिखितं अतस्तत्रैवानुसन्धेयमि
ति॥ समाप्तं निष्क्रमणम्॥ अस्यापि मनुयाज्ञवल्क्योक्तबीजगर्भोद्भवपापक्षय एव फलम्॥ अथ रेतोरक्तगर्भोपघातपञ्चगुणः जातकर्मणा प्रथममपोहतीति इ
त्यनुवृत्तौ हारीतः प्राशनेन तृतीयं तथा गर्भाधानाद्यष्टसंस्काराणां प्रत्येकं फलमभिधाय हारीत एवं पुनराह। एतैरष्टभिर्गर्भसंस्कारैर्गर्भोपघातः पूतो भ राम
वति। तत्रान्नप्राशने पारस्करः स्थालीपाकं श्रपयित्वा आ ग्रावाज्यभागौ हुत्वा आज्याहुतीर्जुहोति॥ देवीं वाचमित्यादि ऋजानो अभ्यैति च हितीयामिस ७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तस्य। मन्त्रो यथा। ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा॥ अस्यार्थः देवाः स्वादयः वाचं वाणीं अजनयन्त इत्यादि तवन्तः किं भूतां देवीं कान्तिगुणयुक्तां तां वाचं पशवो वदन्ति के ते पशवः विश्वरूपाः विश्वं मानुषादिरूपं येषां सा वाक् धेनुर्भूत्वा अस्मानुपैतु उपगच्छतु उप इत्यव्ययं हि ते एति इत्यनेन संबध्यते॥ सा कथं धेनुर्भवती त्याकांक्ष यों हेतुगर्भविशेषणमाह नोस्माकं ऊर्जं सामर्थ्यं दुहाना पूरयन्ती यन्तः किं भूतं मन्द्रेषु मन्द्रः गंभीरः अव्यक्त इति यावत् तत्तस्य इषु गमकं ज्ञापकमित्यर्थः। अव्यक्तः। परोक्षोप्यर्थो येनावगम्यते तं सामर्थ्यं असमाकं पूरयन्ती या वाणीत्यर्थः। किं पुनः किं भूता सुष्टुता सुष्टु स्तुता या वाक् प्रथमतो देवैर्जनिता ततो मानुषादिभिः सर्वैरेवोच्यते इति वाचं स्तुत्वा अस्माकं सामर्थ्यं जनयन्ती अस्मानुपगच्छत्विति आशंसा वाक्यार्थः। द्वितीयाहुति मन्त्रो यथा। ॐ राजानो द्यामसुरान्ति दानराजो देवानृतुभिः कल्पयति। राजो हि मा सर्ववीरं त्वं जूतान विश्वात्मा सा राजपति जयेयम् स्वाहा॥ असार्थः राजो नुनो स्माकं अद्यानुप्राशनसमये दानं होमरूपं प्रसुराति अभ्यनुजानातु प्रपूर्वः सुरतिरभ्यनुज्ञानेन वर्तते इति किं च राजः देवानिन्द्रादीनृतुभिः समयविशेषं कल्पयति योजयतु अस्मिन् कर्मणि तेनान्नेन देवाञ्चिरकालं वर्तनं इत्यर्थः। राजाः हि यतः कारणात् मा सां सर्ववीरं सर्वत्र कार्यवीरं क्रमजनान् चकार कृतवान् अतः कारणात् राजपतिः अन्नस्येश्वरो अहं सर्वा आशाः प्रत्याशा जयेयं अः वान्नमस्माकमन्नप्राशनहोममभ्यनुजानातु अस्मिन् कर्मणि तेनान्नेन देवाञ्चिरकालं वर्तेत्ताम्। अन्नेन सर्वत्रस्य तः कृतोहं अन्नेश्वरो भूत्वा सर्वाः प्रत्याशाः जयेयमित्याशंसा वाक्यार्थः। प्रसुरातिकल्पयातीति लेट्प्रत्ययेन रूपेः। ततः स्थालीपाकेनाहुतिचतुष्टयं। जुहोति। यथा पारस्करः। स्थालीपाकेन जुहोति प्राणेनान्नमशीय स्वाहेत्यादिः तत्र मन्त्रो यथा। ॐ प्राणेनान्नमशीय स्वाहा ॐ अपानेन गन्धानशीय स्वाहा। ॐ चक्षुषा रूपाण्यशीय स्वाहा॥ ॐ श्रोत्रेण यशोशीय स्वाहा॥ अस्यार्थः। प्राणेन प्राणवायुना अन्नं अदनीयं अशीय भुञ्जे॥ अपानेनापान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रा·स· त्वायुनागस्नानप्रीय॥ चक्षुषा चक्षुरिन्द्रियेण रूपाणि शुक्लादीनि अशीय श्रोत्रेण कर्णेन्द्रियेण यशः कीर्तिं अशीय। गन्धरूपयशमामशनमुपभोगे अत्र
९३ भवामीति यावत् अनेनाहुति चतुष्टयेन चक्षुरादीन्द्रियोपभोग्यान् विषयान् अनुभवामीत्याशंसा वाक्यार्थः। अत्र चाशीय इत्युत्तमपुरुषप्रयोगात् कर्त्रे
गोचरा आशंसा यद्यपि इष्यते तथापि कुमारगोचरैव बोद्धव्या। यथा श्रुतिः जीवेकाचनयद्यस्य द्विज आशिषमाशासते यजमानस्यैव सेति॥ इत्यन्नप्रा
शनम्॥ अथ चूडाकरणम्॥ अस्यापि मनुयाज्ञवल्क्योक्तबीजगर्भोद्भवपापक्षय एव फलम्॥ तथा रेतो रक्तगर्भोपघातः पञ्चगुणा जातकर्मणा प्रथम
मपोहतीत्यनुवृत्तौ हारीतः चूडाकरणे चतुर्थः। तथा गर्भाधानाद्यष्टसंस्काराणां प्रत्येकं फलमभिधाय हारीत एव पुनराह। एतैरष्टभिर्गर्भोपघातात्॥
पूतो भवति॥ अत्र चूडाकरणे परिसमूहनादिब्रह्मदक्षिणादानान्तहोमकर्मसमाप्य शीतलजले उष्णजले प्रक्षिपेत्। यथा पारस्करः॥ शीतास्तु उष्णा
मासिञ्चति उष्णेन वाय इत्यादि॥ ॐ उष्णेन वाय उदकेनेह्यदितेकेशान् वप॥ अस्यार्थः हे वायो वायुसंबोधनमात्रे कार्यकारणलोपचारात जलसंबोधि
तम्॥ किंभूतं अदितीखण्डशीतलत्वं उष्णेन उदकेन एहि सङ्गतो भव सङ्गस्य च केशान् वपच्छिन्धि यं धनार्थे उत्तजलशीतलजलयोः सङ्गतिरितिवा
क्यार्थः॥ अदिते इति दोऽवखण्डने इति धातोः क्तिन् प्रत्ययेन दितीरूपम्। न विद्यते दितिर्यस्येति अदितिः तेनोष्णजलमिश्रिते जलेन दक्षिणं शिरःपा
र्श्वमनेन मन्त्रेणार्द्रयति। यथा पारस्करः अथास्य दक्षिणगोदानमुनत्ति सवित्रेत्यादि। मन्त्रो यथा॥ ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनुं दीर्घायुत्वा
यवलाय वर्चसे इति॥ अस्यार्थः॥ आपस्ते तव कुमारस्य तनुं देहावयवं उन्दन्तु किंभूताः सवित्रा आदित्येन प्रसूता जनिताः पुनः किंभूताः देव्याः दिवि आका राम
शे भवन्त्याः किमर्थं उन्दन्तु दीर्घायुत्वाय वलाय वर्चसे तेजसे॥ ततः केशेषु कुशान् मन्त्रेण योजयति। यथा पारस्करः। कुशं तरुणमन्तर्दधात्योषधे इति ९३
ॐ ओषधे त्रायस्व॥ हे ओषधे त्रायस्व रक्षस्व अत्र एनमिति मन्त्रस्य द्वितीयपदे श्रूयते तदेव कर्मतया बोद्धव्यम्। साकांक्षता योग्यता च॥ ॐ स्व.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धितेमैनं हिंसीः। हे स्वधिते वह्नुएनं कुमारं मा हिंसीः॥ अस्य कुमारस्य हिंसां मा कुरु इत्यर्थः॥ मिलितस्य मन्त्रस्य त्वयस्ये कुशैः कृन्तरस्य मेनं कुमारं वह्नो मा हिन
स्त्वितिवाक्यार्थः ततस्तां स्त्रा क्षुरग्रहणे पारस्करः॥ शिवो नामेति नाम्ना क्षुरमादाय इति। तत्र मन्त्रो यथा॥ ॐ शिवो नामासि स्वधितिस्ते पिता नमस्तेस्तु मा मा
हिंसीः॥ कर्म्मार्थमुकल्पितं क्षुरमन्त्रसम्बोध्यत्वेन वोढव्यम्। हे क्षुर शिवो नामासि। शिवं कल्याणमित्यभिधानमसि। शिव इति तव नामेत्यर्थः॥ किञ्च ते
तव स्वधितिव पिता वज्रानुरोत पतिरित्यर्थः। एवंभूताय तुभ्यं नमो स्तु मा मा हिंसिः न व्यथय स्वेकल्याणनामावह्न उत पसु इति क्षुरं स्तुत्वा नमस्ते स्त्वि
तिनमस्त्वमामांशुध्ययेति याचनावाक्यार्थः। अत्र यद्यपि मा मा हिंसीरिति कर्तृविषयणी याञ्चा प्रतीयते तथापि कुमारविषयिणी॥ यंचकास्त्वनयन्नथे
द्विज आशिषमाधत्ते। यजमानस्यैव सेति ततस्तान्त्रा क्षुरस्य केशेषु संलग्ने। पारस्करः निवर्तयामीति। निपूर्वो वर्ततिः संलग्नने वर्तते इति कर्कभाष्याले।
रिवतत्वात् एतच्च क्रियापदं कर्तृसाकाङ्क्षं कर्म्मसाकाङ्क्षञ्च ततस्त्वाह मितिकर्ता क्षुर मिति कर्म्म च वोढव्यम्। किमर्थं क्षुरसंलागनमित्याकाङ्क्षायामाह आ
युषजीवनाय अन्नाद्याय अन्नाञ्च तत् आद्यं भक्ष्यं चेति अन्नाद्यं तदर्थम्। तथा प्रजननाय प्रजननं प्रसवशक्तिः तदर्थं तथा रायस्पोषाय वा यो धनस्य
पोषाय पुष्ट्यर्थं तथा सुप्रजास्त्वाय शोभनसन्ततिमत्त्वार्थं तथा सुवीर्याय उत्कृष्टवीर्यवत्त्वार्थम् अनेन क्षुरसंलगनकर्म्मणा अस्य कुमारस्यान्नादीनि भ
वन्त्वित्याशंसावाक्यार्थः॥ सुप्रजास्त्वायेति वर्णागमो वर्णविपर्ययश्चेति न्यायेन सकारस्थान्तस्थः ततस्तूष्णीं लोहक्षुरमादाय सकुशान् केशान् छिन्द्यात्
।यथा पारस्करः। प्रवपति येनावपत्सवितेति। मन्त्रो यथा॥ ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् तेन नते ब्रह्मणो वपति इदमस्या
युष्मं जरदष्टिर्यथासत्॥ अस्यार्थः। हे कुमार सविता आदित्यः येन क्षुरेण सोमस्य अवपत मुण्डितवान् अर्थात् केशानिति॥ किंभूतस्य सोमस्य राज्ञः
सोमस्य वरुणस्य च किंभूतः आदित्यः विद्वान् वेदवित् तेन क्षुरेण तेन वब्रह्मणः ब्रह्मा वपति मुण्डयति यथा इदं चूडाकर्म्म अस्य तव आयुष्यं अस्

मंत्रो यथा· निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय अस्यार्थः निवर्त्तयामि संलग्नयामि· तु· पं· ८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कर:२

ग्रा·स· तभूयात् किंभूतमायुष्यं जरदष्टिः जरत्तवार्धकं अश्नुतेव्याप्नोतिजरदष्टि दीर्घकपर्य्यन्तमस्यायुर्यथास्यादित्यर्थः॥ यच्चूडाकर्म्मे आदित्येनवेदं वि
७४ द्वासोमवरुणयोः कृतंतत्तवब्रह्माकरोतीतिचूडाकर्म्मसुलात् तवआयुष्यभूयादितिवाक्यार्थः।ब्रह्मण इतिप्रथमैकवचनस्थानेषष्ठ्येकवचनम्।जर
दष्टिरित्यजन्तल्लिङ्गमेव।ततःपार्श्वकेशान् छिन्द्यात्॥यथापारस्कर।अथपश्चात्त्र्यायुषमिति।तत्रमन्त्रोयथा॥ॐ कश्यपस्यत्र्यायुषंजमदग्नेस्त्र्या
युषंयद्देवानांत्र्यायुषंतन्मेऽस्तुत्र्यायुषम्।अस्यार्थः।त्र्यायुषंबाल्ययौवनवार्धकात्मकमवस्थात्रयमित्यर्थः।कश्यपस्यऋषेस्त्र्यायुषंजमदग्नेस्त्र्यायुषंदेवा
नांब्रह्मादीनांयत्त्र्यायुषंतत्त्र्यायुषंमेमास्तु।ततोवामपार्श्वकेशान्नेपारस्करः अथोत्तरतोयेनभूरिश्चरेति।तत्रमन्त्रोयथा।ॐ येनभूरिश्चरादिवंज्योक्च
पश्चाद्धिसूर्य्यं तेनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लोक्यायस्वस्तये।अस्यार्थः॥येनक्षुरेणसाधनभूतेनभूरिश्चन्द्रमाः किंभूतः श्चरः भ्र
मणशीलः दिवंज्योक्स्वर्गस्वङ्गतः समभवत् पश्चाद्धिसूर्य्यं सूर्य्योज्योक्चसएवचन्द्रमाःसूर्यसङ्गतोभूत् तेनक्षुरेणतेतववपामिस्नाइ सौ
रयामिकस्मैफलायेत्याकांक्षायामाह।ब्रह्मणाब्रह्मणेवेदलाभार्थमितियावत् नकेवलंवेदलाभार्थंजीवातवेजीवनौषधलाभार्थञ्चजीवनोपा।
पात्।जीवनायचिरंकालप्राप्त्यर्थञ्चेत्यर्थः।जीवनार्थंचसुश्लोक्यायशोभनश्लोकायप्रशस्तकीर्त्तिलाभार्थञ्चस्वस्तयेकल्याणार्थञ्चवरायइतिचरणान्यर्थे
इत्यस्मात्।अस्तु नःस्वस्त यइतिसर्वेविषयश्छन्दसिविकल्प्यन्तइतिविभक्तेरलुक्।ततोदक्षिणवर्तेनलोहक्षुरंशिरसिवारत्रयभ्रामयेत् यथापारस्करः।त्रिक्षु
रेणशिरःप्रदक्षिणंपरिहरतिसुरवंकेशान्तेनवक्षुरेणमयतेति।मन्त्रोयथा।ॐ यत्क्षुरेणमर्चयतासुपेशसावप्तावावपतिकेशांश्छिन्धिशिरोमास्यायुःप्रमो
षीः॥अस्यार्थः।अस्यकुमारस्ययत् क्षुरेणवप्तावावपति   सएतस्यकुमारस्यचक्षौरंसमाप्यपुनर्वारत्रयंक्षुरंभ्रामयतिततस्तेनपुनःक्षुरेणप्यस्यके राम
शान्छिन्धिच्छेदयमाशिरःअस्यशिरश्छेदनंमाकुरुअस्यआयुषःमाप्रमोषीःआयुःखण्डनमस्यमाकुरुकिंभूतेनक्षुरेणमर्चयताशोधयताशि ७४

ज्ञ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरो निःकलुषं कुर्वंतेतियावत् पुनः किंभूतेन सुपेशसा शोभनावयवेनवपति इति मध्यमपुरुषैकवचनस्थाने तिङां तिङो भवन्तीति प्रथमपुरुषैक-
वचनं प्रमोषीरिति मुषस्तेयेलुङ्मध्यमपुरुषैकवचनम्॥ मजपते ति हुमसंज्ञो मुद्धोश्यवन्तात्तृतीयैकवचनं वस्त्रावेतिवाशब्दोऽत्र समुच्चयार्थः। इति
चूडाकरणमन्त्रव्याख्या॥ अथोपनयनं॥ तत्राचार्योग्निस्थापनादिकं कृत्वा माणवकं स्नातं अन्यतमं वस्त्रं परिधापयेत् तथाच पारस्करः॥ अथैनं वासः प
रिधापयति येनेन्द्रायेति॥ तत्र मन्त्रो यथा। ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यधादमृतन्तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे॥ अ
स्यार्थः। बृहस्पतिर्देवानामाचार्यः येन विधिना अवधानेन इन्द्राय इन्द्रं वासः वस्त्रं पर्यधात् परिधापितवान्। किंभूतं वासः अमृतं आहतेनावधाने
नत्वां परिदधामि परिधापयामि वासः इति पूर्वोक्तमेव योज्यं किमर्थम् आयुषे जीवनाय दीर्घायुत्वाय चिरजीवित्वाय बलाय सामर्थ्याय वर्चसे तेजसे
चवाक्यार्थः स्फुट एव। इन्द्रायेति द्वितीयार्थे चतुर्थी पर्यदधात् परिदधामीति हृयं णिजन्तत्वदनुमौंज्यादन्यतमां मेखलां बध्नीयात्। तथाच पारस्करः॥
मेखलां बध्नीते इयं दुरुक्तं परिवाधमानेति॥ तत्र मन्त्रो यथा॥ इयंदुरुक्तमित्यादिमेखलेयमित्यन्तः॥ ॐ इयं दुरुक्तं परिवाधमाना वर्णं पवित्रं पुनतीम
आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं॥ अस्यार्थः। इयं मेखला आगात् आगतवती किं कुर्वाणा मे मम दुरुक्तमनुपनीतं
दूति दुर्वचनदोषपरिवाधमाना सर्वतो भावेन खण्डयन्ती अत एव देवी स्तुत्या दिविषया किंच पवित्रमुक्तं पूर्वं वर्णं द्विजातीं पुनती पावयन्ती इह
शीयमेखला स्वसा अस्तु भगिनीवन्नित्यमभ्युदयिनी भवतु अस्मिन्नध्याहार्यं किंभूता प्राणापानाभ्यां बलं सामर्थ्यमादधाना प्राणापानयोर्बलमे।
ध्यपन्ती पुनः किंभूता सुभगा अकर्कशा सुखस्पर्शेतियावत् ततो यज्ञोपवीतं त्रिकामेकां परिधापयेत् तत्र पारस्करीस्तिसदाचार एव प्रमाणं तत्र
मन्त्रो यथा ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः। अस्यार्थः हे माणवक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रा·स· यज्ञोपवीतं प्रतिमुञ्च धारय प्रतिपूर्वो मुञ्चतिर्धारणे वर्तते किंभूतं यज्ञोपवीतं आयुष्यमायुर्वृद्धिहेतुं अग्र्यं श्रेष्ठं शुभ्रं निर्मलं परमं पवित्रं पुनः किंभूतं
७५ पुरस्तात्पूर्वं बृहस्पतेः सहजं पूर्वं बृहस्पतिना सहैकसमये जातमित्यर्थः किमर्थमस्य धारणमित्याकाङ्क्षायामाह॥ बलं सामर्थ्यमस्तु तेजोऽस्तु
हे माणवक आयुर्बलतेजसां लाभाय यज्ञोपवीतं धारयेति वाक्यार्थः। यज्ञोपवीतदानानन्तरं स्मृतिशास्त्रविहिततया अमन्त्रकमेव कृष्णाजिन।
न्दद्यात् ततो माणवकः। पालाशं चान्यतमदण्डं गृह्णीयात् तथा च पारस्करः। दण्डं प्रयच्छति तं प्रतिगृह्णाति यो मे दण्डः परापतेति तत्र मन्त्रो यथा
यो मे दण्ड इत्यादि ॐ यो मे दण्डः परापतद्वैहायसोऽधि भूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसायेति अस्यार्थः यो मम दण्डः अधिभूम्यां भूमेरु
परि परापतत् पतितः पुनः किंभूतः वैहायसः विहाय आकाशं तत्र भूतः अतो दण्डं पुनरादद्दे प्रतिगृह्णामि प्राक्तनजन्मन्यहं द्विज आसम् एतावता।
तस्मिन्नपि जन्मनि दण्डं गृह्णामीत्यभिप्रायः किमर्थं गृह्णामीत्याकाङ्क्षायामाह। आयुषे जीवनार्थं ब्रह्मणे वेदार्थं ब्रह्मवर्चसा — — ब्रह्मतेजः प्राप्त्यर्थं चेत्यर्थः
। तत्राचार्यः स्वयं जलाञ्जलिमादाय माणवकस्याञ्जलिं पूरयेत्। तथा च पारस्करः। अथास्याञ्जलिं जलेनापूरयेत् आपो हि ष्ठेति तिसृभिरिति मन्त्रो यथा आ
पो हि ष्ठेत्यादि त्रयं तस्यार्थं अस्य मन्त्रस्य व्याख्यादिकं प्रातःस्नाने एव कृतमतस्तत्रैवानुसन्धेयम् ततो माणवकस्तं जलाञ्जलिं दत्वा आदित्यमुपतिष्ठेत त
था च पारस्करः अथैनं सूर्यमुदीक्षयति तच्चक्षुरिति॥ मन्त्रो यथा। तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुया
म शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् अस्यार्थः तेरक्षहमादित्यादिषु कोडिकं प्रस्तुतत्वात् दित्यनेनादित्यवि
म्बं परामृश्यते तदादित्यविम्बं चक्षुः त्रैलोक्यचक्षुर्भूतं यथा चक्षुषा विना चाक्षुषं किंचिन्न प्रकाशते तथा अनेनापि विना न प्रकाशते यतः किंभूतं देवानां हि राम·
तं अस्मिन्नुदिते दैवं कर्म क्रियते यतः पुनः किंभूतं पुरस्तात् प्राच्यां दिशि उच्चरत् ऊर्द्ध्वं गच्छत् अपि च किंभूतं शुक्रं शुक्लं निष्पापं एवमादित्यं स्तुत्वा चयंप ७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्येम शरदः शतमित्यादिव्यक्तार्थमेव आदित्यंस्तुत्वा त्वत्प्रसादेन वयमविकलेन्द्रियाः शतं वर्षाणि । जीवाम इत्याशंसा वा कार्या ॥ ततश्चाचार्यो माणवकस्य द-
क्षिणस्कन्धे हस्तं दत्वा हृदयमालभेत् तथा च पारस्करः । अथास्य दक्षिणांसमधि हृदयं आलभेत मम व्रते ते हृदयं दधामीति । तत्र मन्त्रो यथा । ॐ मम
व्रते ते हृदयं दधामि मम चित्तमनुचित्तन्ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् । अस्यार्थः । हे माणवक तेन वहृदयं मम व्रते द-
धामि तव हृदयं मदेकव्रतं स्थापयामि किं तन्मदेकव्रतं त्वमित्याकांक्षायामाह । तव चित्तं मम चित्तमनुकूलमस्तु मदीयचित्तानुकूलं तव चित्तं भवत्वि-
त्यर्थः । त्वमेकमना एकचित्तः सन्मम वाचं जुषस्व सेवस्व बृहस्पतिर्देवानामाचार्यास्त्वा त्वां मह्यं नियुनक्तु नियोजयतु अस्मिन्मदेकव्रतत्वे बृहस्पतिस्त-
व नियोजको भवत्वित्यर्थः ॥ तत आचार्यो माणवकस्य ब्रह्मचार्यसीत्युक्तो माणवकेन भवत इत्युत्तरे दीयमाने मन्त्रं पठेत् । तथा च पारस्करः भवत इत्युच्यमा-
न इन्द्रस्य ब्रह्मचार्यसीति । तत्र मन्त्रो यथा । इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यः । अस्यार्थः हे माणवक इन्द्रस्य त्रैलोक्यनाथस्य ब्रह्मचार्य-
सि भवसि तवाग्निराचार्यः सर्वेषामेव द्विजातीनां सामान्येनाग्नेर्गुरुत्वात् । यथा गुरुरग्निर्द्विजातीनामिति स्मृतिः इदानीं तु एतदुपनयकर्मकर्तृत्वेना-
हन्तवाचार्यः । तत आचार्यो माणवकं भूतेभ्यो दद्यात् । तथा च पारस्करः । अथैनं भूतेभ्यः परिददाति प्रजापतये इत्यादि मन्त्रो यथा । अरिष्टा-
वित्यादिना ॐ प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवे-
भ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै । अस्यार्थः । हे माणवक त्वां त्वां प्रजापतये परिददामि समर्पयामि किं च सवित्रे सूर्याय परिददा-
मि किंभूताय देवाय दानादिगुणयुक्ताय तथाद्भ्यः जलेभ्यः ओषधीभ्यः व्रीह्यादिभ्यः तथा द्यावापृथिवीभ्यामाकाशभूम्यां तथा विश्वेभ्यो देवेभ्यः सर्वे-
भ्यः इन्द्रप्रभृतिभ्यो देवेभ्यः तथा सर्वेभ्यो भूतेभ्यो राससादिभ्यः परिददामीति सर्वत्र तुल्यार्थे किमर्थं समर्पणमित्याकांक्षायामाह अरिष्टै रिष्टिरापत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततु पश्यमनाय हे माणवक सर्वोपच्छान्त्यर्थं प्रजापतिप्रभृतिभ्यस्त्वा समर्पयामीति वाक्यार्थः। रिष हिंसायामित्यस्माद्धातोः क्तिन्प्रत्यये कृते रिष्टिः न रिष्टि
रिष्टिः ततः शिष्यमनुशास्यन् तस्मै सावित्रीं दद्यात् तत्र पारस्करः। अथास्मै सावित्रीमन्वाहोत्तरतो ऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय पस
प्रोक्षिताय दक्षिणतस्तिष्ठत आसीनाय चैके पच्छो ऽर्द्धर्चशः सर्वां च तृतीये ऽहनि अस्या अनुगायत्र्या व्याख्यानादिकं तथा पाठो ऽर्द्धर्चशः इत्यादिविवरणं चोपरि गा
यत्रीव्याख्याकरप्रकरणे एव लिखितत्वादत्र न लिखितमिति ज्ञेयम्। अनुसंध्येयं ततस्तु माणवकसमिधाधानार्थमग्निं प्रज्वालयेत् तथा च पारस्करः। अत्र स
मिधादानं पाणिनाग्निं परिसमूहति अग्ने सुश्रव इति मन्त्रो यथा अग्ने सुश्रव इत्यादि ॐ अग्ने सुश्रव सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा असि
एवं माः श्रवः सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्॥ अस्यार्थः हे अग्ने किंभूतः सुश्रवः
शोभनः श्रवो नाम यस्यासौ सुश्रवः मां सुश्रवसं कुरु सुष्ठु श्रवः कर्णेन्द्रियेण सुश्रवाः सुश्रवसं वेदाध्ययने सामर्थ्यविकलकर्णेन्द्रियं कुर्वित्यर्थः हे अ
ग्ने त्वं यथा सुश्रवः सुश्रवः सुश्रवा असि सुश्रवस्त्वादसौ सुश्रवाः शोभनकर्णो भवसि एवं यथा हे अग्ने मां सुश्रवः सौश्रवसं कुरु सुश्रवे यशसि एवं शो
भनश्रवणाज्जनितज्ञानशालिनं कुरु हे अग्ने त्वं यथा देवानां यज्ञस्य निधिपो देवानपीन्द्रादीनां यज्ञस्य यज्ञसंबन्धेन निधिपो निधिरक्षको भाण्डारिको भव
सि एवमहं मनुष्याणां वेदस्य निधिपो भाण्डागारिको भवानीत्यर्थः ततो माणवको ऽग्नौ समिधं दद्यात्। तथा च पारस्करः प्रदक्षिणमग्निं पर्युक्ष्योत्थाय स
मिधमादधात्यग्नेः समिधमाहार्षमिति। मन्त्रो यथा॥ अग्नये समिधमित्यादि अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस
एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्म
वर्चस्यन्नादो भूयासमग्नये स्वाहा॥ अस्यार्थः॥ हे अग्ने समिधमाहार्षमाहृतवानस्मि कस्मै जातवेदसे अग्नये तुभ्यमेवेत्यर्थः किंभूताय बृहते जा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वलयमानाय हे अग्ने त्वं यथा समिध्यसे मया त्वआहितया ऽनया समिधा ज्वलितासि एवमहं समिन्धसुप्रकाशो भवामि केन आयुषा जीवनेन मेधया बुध्या वर्च्च
सा तेजसा प्रजया सन्तानेन पशुभिर्गवादिभिः ब्रह्मवर्चसेन ब्रह्मतेजसा किंच ममाचार्यः जीवपुत्रो मेधाव्यस्तु जीवपुत्रो मेधावी च ममाचार्यो भवत्वि।
त्यर्थः। अहमनिराकरिष्णुरसानि अग्निनाधायया गस्य करणं निराकरणं तत्कारी निराकरिष्णुः मनिराकरिष्णुर्नित्यं यागकारी भवामीत्यर्थः॥ अपि
पिवाह्नमा युष्मान्यशस्वी तेजस्वी ब्रह्मवर्च्चस्वी वेदाध्ययनकृन्निशानन्तादो भूयासं अन्नमत्तीत्यन्नादः कदाचिदपि मम अन्नविच्छेदो मा भवत्वित्यर्थः
अनया का मनया अग्नये स्वाहा स्वर्गं तं भवतु ततो माणवकोग्नौ हस्तौ प्रतप्य मुखं मार्जयेत् तथा च पारस्करः पाणी प्रतप्य मुखं विमृशेत् तनूपा अग्ने
सीति वाक्यान्ते मेधां म इति मन्त्रो यथा तनूपा इत्यादि ॐ तनूपा अग्नेसि तन्वं मे पाह्यायुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेसि वर्च्चो मे देहि अग्ने यन्मे तन्वा
ऊनं तन्म आपृण। अस्यार्थः हे अग्ने तनूपा असि तनूः शरीरं तस्य पालको भवति अतो मे मम तनूः शरीरं पाहि रक्ष हे अग्ने आयुर्दा असि आयुषो दाता
भवसि अत आयुर्मे देहि हे अग्ने वर्चोदा असि तेजो तेजसो दाता भवसि अतो वर्चो मे देहि हे अग्ने मे मम तन्वाः शरीरस्य यत् ऊनं तत्संपूर्णं तन्मे आपृण आपू
रय अत्र च तनुमिति तनूशब्दस्य द्वितीयैकवचने इयङ् प्रकरणे तत्वादीनां छन्दस्युपसङ्ख्यानमिति यणादेशः हे अग्ने अनेन समिधादानकर्मणा
आराधितस्त्वं कुर्वित्यस्य प्रार्थना वाक्यार्थः मेधामेत्यादि ॐ मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु मेधामश्विनौ देवा ममदेहादि
रश्वकं वाधत्तां पुष्करस्रजौ अस्यार्थः मम मेधां सविता देवः आदधातु तथा मे मम मेधां देवी सरस्वती आदधातु तथा देवाव श्विनीकुमारौ आधत्तां किं भूतौ पु
ष्करस्रजौ पुष्करं पद्मं तन्मयी स्रक् माला ययोः पुष्करस्रजौ स पवित्रादेयो देवा मेधां मम जनयन्त्वित्यग्रामेव प्रार्थना वाक्यार्थः ततः प्राणसंस्प
र्शने पारस्करः अङ्गानि च आप्यायन्तामिति तत्र मन्त्रो यथा अङ्गानीत्यादि ॐ अङ्गानि च म आप्यायन्तां पशो वलं ज्वम आप्यायतां अस्यार्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रा·स· येममाङ्गानि शरीरावयवाः आप्यायन्तां स्फीतानि भवन्तु न केवलं मे धाम मम भवतु एतदपि भवत्विति वाक्यार्थः। ॐ वाक् च म आप्यायतां २ ॐ प्राण
७७ श्च म आप्यायतां ३ ॐ चक्षुश्च म आप्यायतां ४ ॐ श्रोत्रश्च म आप्यायतां ॐ यशश्च म आप्यायतां ५ ॐ बलञ्च म आप्यायतां १ एषामर्थः वाग्वचनका
रणमिन्द्रियं मुखमित्यर्थः। प्राणः प्राणवायुः श्वासात्माच चक्षुः श्रोत्रे प्रसिद्धे यशो बलमिति च द्वयमपि प्रसिद्धमेव च मे आप्यायतामिति सर्वत्रानुत्वार्थः। अ
काद्योपि व्यक्त एव ततो माणवको भस्मनाऽऽयुषं कुर्यात् तथा च पारस्करः आयुषाणि कुरुते भस्मना ललाटे ग्रीवायां दक्षिणांसे हृदि त्र्यायुषमि
ति प्रतिमन्त्रमिति तत्र मन्त्रो यथा ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषं अस्यार्थः। त्रीण्यायूंषि समाहृतानि त्र्यायु
षं आयुः शब्दो अत्रावस्थावचनः आयुषं बाल्ययौवनवार्द्धक्यात्मकावस्थात्रयमित्यर्थः। यथा कश्यपस्य ऋषेः येन आयुषं जमदग्नेर्यत् आयुषं देवा
नां ब्रह्मादीनां यत् आयुषं तत् आयुषं मे मम मास्तु। इत्यावसथिकमहाधर्म्माधिकृत हलायुधकृतौ ब्राह्मणसर्वस्वे उपनयनमन्त्रव्याख्या। अथ समावर्त्त
नां तत्र ब्रह्मचर्यानन्तरं समावर्त्तनकालविधौ मनुः। षट्त्रिंशदाब्दिकं ब्रह्मचर्यं गुरौ त्रैवेदिकं व्रतं तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव वा अत्र ग्रहणान्ति
कमेव वेत्ति यो त्रितीयस्मिन् बुद्धित्वात् अल्पसमयेनैव वेदत्रयमभ्यस्यति तेन तदभ्यासानन्तरमेव समावर्त्तनं कर्त्तव्यमित्यर्थः। एतस्यैव स्फुटीकरणे पारस्करः अष्ट
चत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं द्वादशद्वादश वा प्रतिवेदं यावद्ग्रहणं वेति तत्र सर्वथा समग्रवेदाध्ययनासमर्थेन त्वाह्निकस्वरूपगर्भाधानादिद
शसंस्कारोचितस्मार्त्तास्रिकर्मानुगुणवेदभागमयमधीत्य समावर्त्तनमाचरणीयं तत्र समावर्त्तस्नानार्थमनुष्ठानान्युदकुम्भानां जालग्रहणे पारस्करः कु
शे प्रागग्रेषु पुरस्तात् स्थित्वा अष्टानामुदकुम्भानां ये अप्स्वन्तरग्नय इति जलग्रहणमन्त्रो यथा ये प्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो म राम
नोहस्खलो विरुजस्तनूदूषुरिन्द्रियहातान् विजहामि यो रोचनस्तमिह गृह्णामि अस्यार्थः। अप्सु जलेषु अन्तः मध्ये ये अग्नयः प्रविष्टास्तान् विजहामि के ते गो ७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वः उपगोह्यः मयूषः मनोहा स्खलः विरुजः तनूदूषिः इन्द्रियहाः इत्यष्टावग्निनामानि एते चाग्नयः सर्व एव स्वस्वनामतो दोषावहत्वेन प्रतीयन्ते एतानेवदे
तान्विहायेह जलेयोग्निः रोचननामा कल्याणनामा तं गृह्णामि स्नानार्थं जले गृह्यमाणे जलेऽग्नयस्तिष्ठन्ति तेषु मध्ये गोह्यादयो दोषावहास्तान्विहाय क
ल्याणनामा तेन मामभिषिञ्चामि प्रकाशाग्निसहितं जलं गृह्णामीति वाक्यार्थः प्रकाशकाग्निसहितं जलं गृह्णाति तत एकस्मात्कुम्भाज्जलमादायाभिषेकं
कुर्यात् तथा पारस्करः। एकस्मादपो गृहीत्वा तेनाभिषिञ्चति तेन मामभिषिञ्चामीति तेन मामभिषिञ्चामीत्यादितदश्विनायश इत्यन्तः तत्र मन्त्रो य
था ॐ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय येन श्रियमकृण्वतां येनावमृशतां सुरां येनाक्षावभ्यषिञ्चतां यद्वां तदश्विनौ यशः अ
स्यार्थः श्रियै लक्ष्मीलाभाय यशसे लाभाय ब्रह्मणे ब्रह्मज्ञानाय ब्रह्मवर्चसे ब्रह्मतेजोलाभाय अहं मामात्मानं तेन जलेनाभिषिञ्चामि तेन केन
येन जलेन हे अश्विनौ भवन्तौ लक्ष्मीमकृण्वतां कृतवन्तौ यथा येन सुरां सुराजनितं दोषमवमृशतां मार्जितवन्तौ यथा येनाक्षौ अक्षिणी अभ्यषिञ्च
तां अभिषिक्तवन्तौ तथा वां युवयोर्यज्जलं यशोहेतुर्मामस्तु इत्यध्याहार्यं येन जलेनाश्विनीकुमारयोर्लक्ष्मीर्जनिता सुरादोषो मार्जितः अक्षिणी अभिषि
च्यदिव्यं कृतं तपोरित्यमभ्युदयकारणं यज्जलं तेनाभिषेकान्मम लक्ष्मीयशोब्रह्मणोब्रह्मज्ञानब्रह्मतेजांसि भवन्त्वित्याशंसावाक्यार्थः। ततः पूर्व
वद्येश्वन्तरि प्रत्येकं जलकुम्भत्रयाज्जलमादायापो हि ष्ठेति तिसृभिः प्रत्येकं स्नायात् तथा च पारस्करः। आपो हि ष्ठेति तिसृभिरिति मन्त्रो यथा ॐ आ
पो हि १ यो वः २ तस्मा अरं ३ अस्य मन्त्रत्रयस्य व्याख्यादिकं प्रातःस्नानप्रकरणे कृतत्वादत्र न कृतं तत्रैवानुसन्धेयं ततो येश्वन्तरितिमन्त्रेणैव प्रतिक
लशं जलमादाय तूष्णीमेव जलकुम्भचतुष्टयेनाभिषेकं कुर्यात्। तथा च पारस्करः। तूष्णीमितरैरिति ततो मेखलोन्मोचनं शिरोमार्गेण कुर्यात्। पारस्क
रः। उदुत्तममेखलामुन्मुच्य विधायेति॥ तत्र मन्त्रो यथा ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा·स· तयेस्याम। अस्यार्थः। हे वरुण उदुत्तमं पाशमस्मदुच्छ्रथाअस्मादूर्ध्वं श्लथं कुरु किंचाधमं पाशमवश्रथाय अर्वाचीनं श्रथयेति पूर्ववत्तद्वन्मध्यमं
७८ उत्तमाधमयोरन्तर्वर्तिनं विश्रथाय स्वस्थान एव विशेषेण श्लथय अथैवं कृते आदित्यादितेः पुत्र वरुण व्रते ब्रह्मचर्ये वयं तवानागसः अनपराधाः सन्तः अ
दितये अदीनत्वाये स्याम अदीना भवामेत्यर्थः ततो वासोन्यत्परिधायादित्यमेवेक्षणं कुर्यात्। तथा पारस्करः। वासोन्यत्परिधायादित्यमुपतिष्ठेत उद्य
न्भ्राजभृष्णुरिति। मन्त्रो यथा। उद्यन्निरयादिगमयेसन्तः ॐ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिमा कुर्वा विदन्मा ग
मयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवायाभिरस्थाच्छतसनिरसि शतसनिमा कुर्वा विदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायंया
वभिरस्थात्सहस्रसनिरसि सहस्रसनिमा कुर्वा विदन्मा गमयेति। अस्यार्थः। इन्द्र आदित्यः उद्यन्नुदयं कुर्वन्नस्थात्स्थितो बभूव किंभूतः भ्राज
भृष्णुः भ्राजं रश्मिं बिभर्तीति भ्राजभृष्णुः प्रातः प्रत्यूषे मरुद्भिर्देवैः सहास्थात् किंभूतैः यावभिः यावद्भिः यावन्तो देवास्तैः सर्वैः स्थितो बभूवेत्यर्थः त
तः हे विदन् हे विद्वन् सर्वं जानन्नादित्य त्वं दशसनिरसि बहुधनो भवसि अतो मामां दशसनिं कुरु बहुधनं कुरु किंच मां ब्रह्मचर्योद्गतीर्णमागा
मय ज्ञानी हि द्वितीयतृतीयपाठयोश्च दिवायावभिः सायंयावभिः यावद्भिः सह स्वशतसनिरसि इत्येतावन्मात्रेषु विशेषः तत्र दिवा सायमिति प्रसि
द्धार्थं शतसहस्रशब्दौ बहुत्ववाचिनावेवापरं सर्वं समानं आदित्यः प्रातर्दिवासायंकालेषु रश्मीन्धारयन्सर्वैर्देवैः सह स्थितो बभूवेत्यादित्यमुक्त्वे
त्यहे सर्वज्ञादित्य बहुधसि मां बहुधनं कुरु ब्रह्मचर्यादुत्तीर्णं मां ज्ञानी हि चेति याचना वाक्यार्थः। तत्र यावभिरित्यत्र वर्णागमो वर्णविपर्ययश्चेति द
कारलोपः आगमयेति कुर्वाविदन्नित्यत्र स्थिते नाङ्गस्तु लब्धः। ततः औदुम्बरेण काष्ठेन दन्तधावनं कुर्यात्। तथा पारस्करः औदुम्बरेण दन्तान्धाव राम
येत् अन्नाद्यायेति। मन्त्रो यथा ॐ अन्नाद्याय व्यूहध्वं सोमो राजायमागमत्स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च अस्यार्थः। हे वनस्पते व्यूह ७८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वं व्यूह्य स्वप्रबुद्धो भव कस्मिन् विषये वनस्पतिं सोमश्चन्द्रमा आगमत आगतवान् किंभूतः राजा वनस्पतीनां प्रभुः स वनस्पतिः मे मम मुखं प्रमार्ष्टि
ते शोधयिष्यति केन केन यशसा भगेन सौभाग्येन च किमर्थं मन्नाद्याय अन्नस्य तदाद्यं चेत्यन्नाद्यं तादर्थ्ये य वनस्पतिं चन्द्रमा आगतः स चन्द्रसहितो व
नस्पतिरन्नप्राप्तये मम मुखं यशः सौभाग्याभ्यां शोधयिष्यतीत्यत्र वनस्पते सावधानो भवेति याज्ञ्यावाक्यार्थः। अत्र व्यूहध्वमिति ऊह वितर्के इत्यस्य
तिङ्‌ तिङो भवन्तीत्येव वचनस्यानेवहुवचनं प्रमार्स्यते इति मृजूष् शुद्धावित्यस्य लृडं तस्य रूपमृतनः सुगन्धिद्रव्येण हस्तावनुलिप्य मुखसमीपे
निधाय मन्त्रं जपेत् तथा पारस्करः हस्तावनुलिप्यानामिकयोर्मुखस्य चोपगृह्णीयात् प्राणापानौ मे तर्पयेति। मन्त्रो यथा। ॐ प्राणापानौ मे तर्पय च
क्षुर्मे तर्पय श्रोत्रं मे तर्पय। अस्यार्थः। हे अनुलेपन मे मम प्राणापानाः शरीरवायून् तर्पय। तथा मे चक्षुस्तर्पय। तथा मे श्रोत्रं तर्पय। व्यक्तार्थमेव ततो ह
स्तौ प्रक्षाल्य दक्षिणस्यां दिशि जलं त्यजेत् तथा पारस्करः। पितरः शुन्धध्वमिति पाणी योरवनेजनं दक्षिणा निषिञ्चेदिति मन्त्रो यथा पितरः शुन्धध्वमि
ति अस्यार्थः॥ हे पितरः शुन्धध्वं शोधयत मामिति कर्मपद माहृत्य वो धध्वं मां शोधयध्वमिति याज्यावाक्यार्थः। ततः सुगन्धेन स्वदेहं लिप्त्वा मन्त्रं
जपेत् तथा च पारस्करः अनुलिप्य जपत्सुचक्षा अहमक्षिभ्यामिति तत्र मन्त्रो यथा। सुचक्षा इत्यादि पुरुषः अहमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रु
त्‌ कर्णाभ्यां भूयासं। अस्यार्थः अहमक्षिभ्यां सुचक्षा भूयासं सुचक्षा शोभन दृष्टिः तथा मुखेन सुवर्चा भूयासं शोभनदीप्यमानस्तथा कर्णाभ्यां सुश्रुद्भूयासं
सुश्रुत शोभनश्रावी अहमक्षीभ्यां शोभनं पश्यामि मुखेन दीप्तिमान भवामि कर्णाभ्यां शोभनं शृणोमीति आशंसात्र यं वाक्यार्थः। ततो नूतनं धौतं वा वस्त्रं
परिदध्यात् तथा च पारस्करः। अहतं वासो धौतं वा सोमत्रेणाच्छादयीत परिधास्ये यशो धास्येति तत्र मन्त्रो यथा ॐ परिधास्ये यशो धास्ये दीर्घायुत्वाय जरद
ष्टिरस्मि शतं च जीवामि शरदः सुवर्चा रायस्पोषमभि संव्ययिष्ये अस्यार्थः॥ परिधास्ये परिधानं करिष्यामि परिधाय यशोधास्ये कीर्तिं धारयिष्यामि प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिधानेनकीर्तिर्मेभविष्यतीत्यर्थः। अपितु दीर्घायुत्वाय दीर्घायुष्ट्वार्थं किं जरदष्टिः रश्मिजरद्वार्ध्दकमश्नुते व्याप्नोतीति जरदष्टिः वृद्धो भवामीत्यर्थः॥
किंच शतं शरदः शतं वर्षाणि जीवामि किंभूतः सुवर्चाः शोभनदीप्तिशाली रायस्पोषं रायस्पोषाय धनवृध्यर्थमेतावद्भिः प्रयोजनैः। अभिसंव्ययि
ष्ये अभिसर्वतोभावेन सम्यग्व्ययिष्ये आवरणं करिष्यामीत्युपसंहारः पुनः पुनरुद्देशोऽऽदरातिशयार्थः। यशश्चिरायुत्वायतेजोधनानां प्राप्त्यर्थमहं
परिधानं करोमीति वाक्यार्थः। रायस्पोषमिति सुपां सुपो भवन्तीति चतुर्थ्यर्थे द्वितीया॥ संव्ययिष्य इति व्येञ् संवरणे इत्यस्य रूपम्। ततो द्वितीयव
स्त्रेणोत्तरीयं कुर्यात्। तथाच पारस्करः। अथोत्तरीयं यशसा मा द्यावापृथिवी इति॥ तत्र मन्त्रः। ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशोभग
श्च माविदद्यशो मा प्रतिपद्यताम्॥ अस्यार्थः॥ द्यावापृथिवी अकाशपृथिव्यौ मा मां छादयेतामिति क्रियापदमत्राध्याहर्तव्यम्॥ केन यशसा।
किंच इन्द्राबृहस्पती यशसा मां माच्छादयेताम्॥ किंच यशः मा मां माविदत् प्राप्नोतु नकेवलं यशो भगश्च सौभाग्यं च मा मां माविदत्॥ किंच यशो मा
मां प्रतिपद्यतां प्रतिगच्छतु पुनः पुनरभिधानमादरातिशयार्थं॥ अनेनोत्तरीयवस्त्राच्छादनेनाकाशं पृथिवीइन्द्रो बृहस्पतिश्च मां यशसा आच्छादय
तु॥ उत्तरोत्तरयशः सौभाग्यं च मम भवत्विति आशंसा वाक्यार्थः। ततः पुष्पमालां गृह्णीयात्। तथाच पारस्करः। सुमनसः प्रतिगृह्णाति या आहरज्जमदग्नि
रिति। मन्त्रो यथा॥ ॐ या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च॥ अस्यार्थः॥ याः पुष्पस्रजः जमदग्निर्महर्षिराह
रत्। आहृतवान् किमर्थं श्रद्धायै॥ एवमेवेति प्रत्ययः श्रद्धा॥ तदर्थं कामयाभिलषितसिध्यर्थम्॥ इन्द्रियाय चक्षुरादीन्द्रियप्राप्त्यर्थं च ताः पुष्पस्रजः अ
हं प्रतिगृह्णामि किमर्थं यशसा चयशसे च भगेन च भगाय सौभाग्याय च जमदग्निर्महर्षिणा॥ याः पुष्पस्रजः श्रद्धादिप्राप्तये गृहीताः ता एवाहम्॥ य
शः सौभाग्यप्राप्तये गृह्णामीति वाक्यार्थः॥ यशसा च भगेन चेति चतुर्थ्यर्थे तृतीया॥ ततस्तन्मालां शिरसि बध्नीयात्। तथाच पारस्करः तथा बध्नीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् यद्यशोऽप्सरसामिति॥ मन्त्रो यथा॥ ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आबध्नामि यशो मयि अस्यार्थः इन्द्रः अप्सरसा
मुर्वशीप्रभृतीनां यद्यशः उर्वशीप्रभृतयो रूपवत्यः इत्येवं रूपं यशो विपुलं विस्तीर्णं चकार कृतवान् किंभूतं यशः पृथु बहुतरम् तेन यशसा संग्र
थिताः सम्यग्ग्रथिताः सुमनसः पुष्पाणि मयि आबध्नामि किमर्थम् यशः यशसे ममाप्यप्सरसामिव रूपवत्तया यशो भवत्वित्यभिप्रायः इन्द्रेणा
प्सरसां रूपवत्तया यद्यशः कृतं तेन यशसा सूत्रस्थानियेन ग्रथितानि पुष्पाणि ममापि रूपवत्तया यशो भवत्वित्येतदर्थमाल्यम्॥ अहमात्मन्या
बध्नामीति वाक्यार्थः॥ यशोमयीति चतुर्थ्यर्थे प्रथमा ततो अहतेन वाससा उष्णीषं कुर्य्यात् तथा च पारस्करः उष्णीषेण शिरो वेष्टयेत् युवा सुवा
सा इति॥ मन्त्रो यथा॥ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः अस्याथ
मर्थः। यो युवा परिवीतः वस्त्रैर्वेष्टितः सन्। आगात्। आगतवान् श्रे यान्। श्रेष्ठो भवति उत्कृष्टः स्तोभार्थः किंभूतः। सुवसाः शोभनवस्त्र
धारी पुनः किंभूतः। जायमानः न केवलं श्रेष्ठो भवति तं युवानं धीरासः पण्डिता उन्नयन्ति उत्कर्षयन्ति। किंभूताः कवयः कीर्त्तिविकारः पुनः किंभू
ताः स्वाध्यः सुष्ठु आहिता धीर्येषां ते स्वाध्यः। पुनः किंभूताः मनसा हृदयेन देवयन्तः स्तुवन्तः ततः कर्णकुण्डलादिकमलंकारं परिदध्यात् तथा च पा
रस्करः अलंकरणमसि भूयोऽलंकरणं भूयादिति कर्णवेष्टकाविति तत्र मन्त्रो यथा ॐ अलंकरणमसि भूयोऽलंकरणं भूयात्। अस्यार्थः हे कर्णकु
ण्डल अलंकरणमसि। भूषायाः साधनं भवसीति तव स्वरूपं अतो भूय उत्तरोत्तरम्। अलंकरणं भूयात् मम भूषणं भवः ततः कज्जलेन चक्षुरं
जनं कुर्य्यात् तथा च पारस्करः वृत्रस्येत्यक्ष्णे अक्षिण इति तत्र मन्त्रो यथा॥ वृत्रस्यासि कनीनिकश्चक्षुर्दा असि चक्षुर्मे देहि अस्यार्थः॥ हे अञ्जन वृ
त्रस्य वृत्रनाम्नः। सातिशयशक्तिशालिनोऽसुरस्य कनी निका अक्षितारका असि भवसि अतः कारणात्। चक्षुर्दा असि त्वमन्येषामपि चक्षुर्दा असि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।अतो मे महत्वं चक्षुर्देहि। यतः कारणात् वृत्रस्यासुरस्यासि तारकोत्पन्नमज्जनम्॥ अतस्त्वदीयांजनेनान्येषामपि चक्षुः प्रकाशं भवति मह्यमपि चक्षुर्दे
हीति याज्ञवाक्यार्थः॥ ततो दर्पणेनात्मानमवलोकयेत् तथा च पारस्करः आत्मानमादर्शे प्रेक्षते रोचिष्णुरसीति मन्त्रो यथा॥ रोचिष्णुरसि
।अस्यार्थः। हे दर्पण रोचिष्णुः प्रकाशनशीलोसि अतो मां सर्वत्र प्रकाशस्वरूपं कुर्वित्यभिप्रायः। ततः छत्रं गृह्णीयात् तथा च पारस्करः छत्रं
प्रतिगृह्णाति। बृहस्पतेश्छदिरसीति। तत्र मन्त्रो यथा। बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो मामन्तर्द्धेहि। अस्यार्थः॥ हे छत्र त्वं
बृहस्पतेर्देवाचार्यस्य छदिरपवारणमसि भवसि। अतो मां पाप्मनः पापादन्तर्द्धेहि। आच्छन्नं कुरु। यथा मे पापसम्बन्धो न भवति तथा कुर्वित्यर्थः॥ न के
वलं पापात्॥ अपितु तेजसः आदित्यतापादिरूपान्मामन्तर्द्धेहि किमर्थम् यशसः। यशसे। यशोर्थमिति यावत् हे छत्र पतत्त्वम्॥ बृहस्पतेरपि पा।
पसन्तापादिवारणमतो मामपि तेभ्यः पिधापय यशस्विनं कुर्विति वाक्यार्थः। यशस इति चतुर्थ्यर्थे षष्ठी ततः उपानहौ परिदध्यात् तथा च पारस्करः उपान
हौ प्रतिमुञ्चते प्रतिष्ठेस्थ इति तत्र मन्त्रो यथा प्रतिष्ठेस्थो विश्वतो मा पातम् अस्यार्थः हे उपानहौ युवां प्रतिष्ठेस्थः। उपक्रान्तगतिक्रियया आत्मा गः प्रतिष्ठा
तन्निमित्तत्वात् युवामेव प्रतिष्ठेस्थः भवथः अतश्च मां मां पातं रक्षतम्। कुतः। विश्वतः सर्वस्माद्गति विरोधिनः कण्टकादेः यतो युवां प्रतिष्ठानिमित्ते अ
तो मां सर्वतो गतिविरोधिनः कण्टकादेः रक्षतमिति वाक्यार्थः॥ ततो वैणवदण्डं गृह्णीत तथा च पारस्करः वैणवं दण्डमादत्ते॥ विश्वाभ्यो मा नाष्ट्राभ्य इ
ति। मन्त्रो यथा॥ विश्वाभ्यो मा नाष्ट्राभ्यः परिपाहि सर्वतः अस्यार्थः। हे वैणवदण्ड मां परिपाहि सर्वतो भावेन रक्ष॥ कुतः नाष्ट्राभ्यः नाशकारिणीभ्यः।
किंभूताभ्यः। विश्वाभ्यः। सर्वाभ्यः। राक्षससर्पशङ्कादिभ्यः सर्वासु दिक्षु इत्यर्थः। इत्यावसथिकमहाधर्म्माधिकृतश्रीहलायुधकृतौ ब्राह्मणसर्वस्वे स एम
मावर्त्तनमन्त्रव्याख्या समाप्ता॥ अथ विवाहमन्त्राः तत्र वरस्य विष्टरासनोपवेशने पारस्करः विष्टरं प्रतिगृह्णाति वर्ष्मोस्मीति॥ मन्त्रो यथा ॐ व ८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्योऽस्मि समानानामुद्यतामिव सूर्यः इमन्तमभितिष्ठामि यो मा कश्चाभिदासति अस्यार्थः॥ अहं समानानां समानजातीयानां मध्ये वर्ष्मः आच्छादको ऽस्मि भवामि केषां क इव उद्यतां उदयशालिनां चन्द्रतारकादीनां सूर्य इव॥ किंच यः कश्चन माम् माम् अभिदासति। अभिपूर्वो दासतिर्हिंसार्थे वर्त्तते इति कर्कभाष्ये व्याख्यानमतः इमं विष्टररूपतापन्नम्। अभितिष्ठामि। अभिभूय अधःकृत्वा तिष्ठामि ततो वरस्य पादप्रक्षालने पारस्करः पादौ प्रक्षालयति विराजो दोहोसीति मन्त्रो यथा ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः अस्यार्थः॥ हे जल त्वं विराजः विशिष्टाया दीप्तेर्दोहः प्रपूरणमसि भवसि विराजो विशिष्टदीप्तेर्दोहं प्रपूरकं त्वामशीय गृह्णामि विराजो विशिष्टदीप्तेर्दोह प्रपूरकत्वमपि मम पाद्यायै पाद्या प्रभव। विराजो दोहोसीति जलमभिमन्त्र्य त्वामहं गृह्णामि त्वं मम पादस्य विशिष्टां दीप्तिं कुर्विति वाक्यार्थः॥ अत्र अशीयेति अशगतिदीप्त्यादानेष्वि त्यस्माद्धातोः आशिषि लिङि उत्तमपुरुषैकवचने रूपम् मयीति षष्ठ्यां सप्तमी पाद्यायै इति लिङ्गव्यत्ययेन स्त्रीलिङ्गं ततनोर्घग्रहणे पारस्करः अर्घं प्रतिगृह्णात्यापः स्थ युष्माभिरिति। तत्र मन्त्रो यथा॥ आपः स्थ युष्माभिः सर्वान् कामानवाप्नुवानि अस्यार्थः। हे आपः यतः कारणात् यूयं आपः प्राप्नुवन्ति आपः स्थ भवथ अतो हं युष्माभिर्गृहीताभिः सर्वान् कामान् वाप्नुवानि प्राप्नुयामिति वाक्यार्थः। आप इति आप्लृ व्याप्तौ इत्यत्र धातो राप्नुवन्तीत्यस्मिन्नर्थे आप्नोते र्ह्रस्वश्चेति क्विप् ह्रस्वे च कृते अपशब्दे सिद्धे प्रथमा बहुवचने रूपम् ततोर्घजलपरित्यागे पारस्करः अनेन यन्त्र भिमन्त्रयते समुद्रं व इति मन्त्रो यथा समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टास्माकं वीरा मा परासेचि मत्पयः अस्यार्थः। हे अपः वायुष्मान् समुद्रं प्रहिणोमि प्रस्थापयामि मया प्रहिता यूयं स्वां योनिं स्वीयमुत्पत्तिस्थानं समुद्रं अभिगच्छत किंभूता यूयम्। अस्माकम्। अरिष्टाः अहिंसकाः पुनः किंभूताः वीराः। उत्कृष्टाः। किंच मत्पयः मदीयपानयोग्यं पयः तत् पयो जलं मा परासेचि। न प्रस्थापितं। न दिहे वतिष्ठ त्वित्यभिप्रायः॥ हे आ

आ० त पः। यन्मयः मदीयपानयोग्यं तन्मया न प्रहितमन्त्रैव तिष्ठतु॥ ततो न्या या आपः ता समुद्रं प्रहिता अस्माकमहिंसका भूत्वा समुद्रं गच्छन्त्विति वाक्या

८१ र्थः। तत्र आचमने पारस्करः। आचामत्यामागन्यशसेति। तत्र मन्त्रो यथा। आमागन्यशसा सं सृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरि

ष्टिं तनूनाम् अस्यार्थः। हे जल मामा य यशसा आगच्छत् आगमय्य यशस्विनं मा कुर्विमर्थः। तथा त्वं मा वर्चसा तेजसा संसृष्टं तेजस्विनं कुर्वित्यर्थः। तथा

मां प्रजानां पशूनां गवादीनामधिपतिमीश्वरं कुरु तनूनां देहा-- वयवानाम्। अरिष्टमापद्रहितं कुर्वित्यनेनैव सम्बन्धः। हे जल अनेनाचमनेन

मम यशस्वित्वं तेजस्वित्वं लोकप्रियत्वं गवादिमत्त्वापद्रहितत्वानि कुर्वित्याशंसा वाक्यार्थः। अत्रागन्निति गमधातो रन्तर्भावितण्यन्ताद् लङ् पूर्वं ह्य

ने लोड् मध्यमपुरुषैकवचनम्। वहुलं छन्दसीति वहुलवचनात् शपो लुक् वा छन्दसीति विकल्पेन विधानात् सेह्यदेशो न भवति। इतश्चेति स्का

रलोपः हलादिलक्षणेन सकार लोपः मो नो धातोरिति मकारस्य नकारः मधुपर्कावेक्षणे पारस्करः मित्रस्य त्वेति मधुपर्कं प्रतीक्षते तत्र मन्त्रो यथा

ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे। अस्यार्थः। हे मधुपर्क त्वा त्वां मित्रस्य आदित्यस्य चक्षुषा प्रतीक्षे पश्यामि अहमादित्येन चक्षुर्दानेनानुगृहीतस्त्वां

मधुपर्कं पश्यामीति वाक्यार्थः। ततो मधुपर्कग्रहणे पारस्करः देवस्य त्वेति प्रतिगृह्णाति तत्र मन्त्रो यथा ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां

पूष्णो हस्ताभ्यामाददे १ अस्यार्थः हे मधुपर्क त्वा त्वां आददे प्रतिगृह्णामि। कस्मिन् सति देवस्य सवितुः आदित्यस्य प्रसवे अभ्यनुज्ञाने सम्मता वि-

तिया वर्तम प्रवृत्तेः सुवतिरभ्यनुज्ञाने वर्तत इति॥ गत्या विशिष्टस्य ग्रहणम् काभ्यां अश्विनीकुमारयोर्बाहुभ्याम्। तथा पूष्णः॥ आदित्यस्य हस्ताभ्याम्॥ स

वितुः संमतो अश्विनीकुमाराभ्यां वाहुदानेनानुगृहीतः पूष्णा च हस्तदानेनानुगृहीतस्त्वां मधुपर्कं गृह्णामीति वाक्यार्थः ततो मधुपर्कमिश्रणे पार- राम

स्करः त्रिः प्रयौतिनमः श्यावास्येति तत्र मन्त्रो यथा। नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि अस्यार्थः अत्र नमस्शब्देन मधुपर्को ८१

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षितः तेनायमर्थः। हे नमस्य नमस्कारार्ह। अवाख्यायामि त्वामित्यध्याहार्यम्। त्वां मिश्रयामीत्यर्थः। किंच नेतव अशने भोजने यत् आवि द्धम्। उपहितं न्यस्तं तव निष्कृन्तामि अपसारयामि। नमस्ते इति स्तुतिपूर्वकं मधुपर्कं संबोध्य त्वां मिश्रयामि तवोपहितं च स्फोटयामीति वाक्यार्थः। अत्र अमावाख्यायानीति श्येङ् गतावित्यस्य धातोः ख्याङ्स स्वलेनात्मनेपदं न भवति अव पूर्व आङ् पूर्वश्च कृतेः सोपसर्गत्वात् मिश्रयार्थत्वम्। लोट् उत्तमपुरुषैकवचने रूपम्। ततो मधुपर्कप्राशने पारस्करः तस्य त्रिः प्राश्नाति यन्मधुनो मधव्यमिति। तत्र मन्त्रो यथा। यन्मधुनो मधव्यं परमं रूपमन्नाद्यन्तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि। अस्यार्थः। मधुनो यद्रूपं किं भूतं मधव्यं मधुरं पुनः किं भूतं परमम्। उत्कृष्टम्। अपि किं भूतम्। अन्नाद्यमिव अन्नाद्यं यथा। अन्नाद्यमुपभुक्तं सत् बलादिकमादधाति तथेतदपीत्यर्थः। तेन मधव्येन परमेण रूपेणान्नाद्येन अत्र सर्वत्रैव द्वितीयायां तृतीया तथा च सति। एवं योज्यम्। तन्मधुनो मधव्यं परमम् अन्नाद्यं रूपमहम्। अश्नामि भक्षयामि मधव्यमित्यादि पुनः। पदद्विशेषणं तदादरातिशयप्रतिपादनार्थम्। किंभूतोऽहम्। परम उत्तमः। मधव्यः। मधुरशीलः। अन्नादः। अन्नमत्तीति अन्नादः मधुरस्वरूपमुत्कृष्टं मधुरं बलाधायकमित्युक्तीत्यर्थेन देवं भूतमहं उत्कर्षाय मधुरशीलाय च भक्षयामीत्याशंसा वाक्यार्थः। ततो मुखादिप्राणस्पर्शने पारस्करः प्राणान् संमृशति वाङ्म आस्ये इति मन्त्रो यथा ॐ वाङ्म आस्ये अस्तु नसोर्मे प्राणोऽस्तु अक्ष्णोर्मे चक्षुरस्तु कर्णयोर्मे श्रोत्रमस्तु बाह्वोर्मे बलमस्तु ऊर्वोर्मे ओजः अस्तु अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु अस्यार्थः॥ मे मम आस्ये मुखे वाग्वचनमस्तु। मे मम नसोर्नासिकयोः प्राणः श्वासवायुरस्तु॥ मे मम अक्ष्णोश्चक्षुर्गोलकयोश्चक्षुरिन्द्रियमस्तु मे मम कर्णयोः कर्णशष्कुल्योः श्रोत्रमिन्द्रियमस्तु मे मम बाह्वोर्बलं सामर्थ्यमस्तु मे मम उर्वोरोजः पटुत्वमस्तु। मे मम अङ्गानि शिरःप्रभृतीनि अरिष्टानि आपद्रहितानि सन्तु मे मम तनूः देहावयवा हस्तादयः। अरिष्टाः सन्त्वित्यर्थः। कपासह॥ तन्वा सह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा·स ।देहावयविनासहेत्यर्थः। अनेनाचमनानन्तरकृतेनेन्द्रियस्पर्शेनेनममसुखाद्यवयवेषुवचनादिशक्तिः सातिशयानिरपद्रस्त्वममभवत्वित्याशंसावा
८२ क्यार्थः॥ ततोगोदर्शनेपारस्करः प्रत्याह॥ मातारुद्राणामितित्रमन्त्रो यथा॥ मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः प्रनुवोचंचि
कितुषेजनायमागामनागामदितिंवधिष्टममचामुष्यचपाप्मानंहन ॐ उत्सृजततृणान्यत्तु अस्यार्थः। प्रथमंउत्तरार्द्धं एव योज्यतेयतोऽहंएणकारः प्र
नुवोचं प्रकर्षेणानुवोचंआगमस्यानित्यत्वाद्डागमोनस्यात् पुनरुक्तवानस्मीत्यर्थः। कस्मैजनायअविशिष्टजनोपादानेनयस्मैकस्मैचित् प्राणिमा
त्रायेत्यर्थः। यस्यस्वर्गोच्छानास्तितस्यउपदेशाभिधानमयुक्तमित्याशङ्क्यजनायेत्यस्यविशेषणमाह। चिकितुषे। जिज्ञासवेशुश्रूषवेइतियावत्॥ किंत
दसीत्याकांक्षायामाह॥ गामावधिष्ट॥ मामारयत किंभूतामनागामानपराधाम् पुनः किंभूतामदितिम्। दितिखण्डनंहिंसाअस्यानास्तीतिअदितिः तांपु
नः किंभूतांयारुद्राणांमातावसूनांदुहिता। आदित्यानांस्वसाअमृतस्यदेवानामाहाररूपस्यघृतस्यनाभिरुत्पत्तिस्थानम्। किंचममचार्हणीयस्य॥
॥अमुष्यच॥ अर्हणाकर्तुश्चपाप्मापापंहन॥ नाशयओमितिमदीयवचनमनुउत्सृजतमुञ्चगामितिपूर्वेणसम्बन्धः॥ तृणानिअत्तुखादयतुगो
र्मुक्तासतीतिसन्निहितत्वाद्योज्यम् मातारुद्राणामित्यादिस्तुत्यामावधिष्टेतिनिषिद्धअर्हणीयस्यअर्हणाकर्तुश्चपापक्षयायगामुत्सृजत॥ गोश्चअ
न्विनितृणानिखादयत्वित्याशंसावाक्यार्थः ततोवरेणकन्यायावस्त्रपरिधानेपारस्करः अथैनांवासःपरिधापयतिजराङ्गच्छपरिधत्स्ववासइ
ति। मन्त्रोयथा॥ जराङ्गच्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावाशतंञ्चजीवशरदःसुवर्चारयिञ्चपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्व
वासः। अस्यार्थः। हेआयुष्मतिकन्यकेजराङ्गच्छचिरञ्जीविनीभवेत्यर्थः॥ किंचवासः परिधत्स्वव स्वधारयवस्त्रवियुक्तामाकदाचिदपिभवेत्यर्थः॥ किं राम
चआकृष्टीनांभवआकृष्टीनामितिप्रथमायाषष्ठीतेनआकृष्टा॥ मनोहराभवेत्यर्थः॥ अभिशस्तिपावाभवअभिशस्तिः शपथंतत्रपावापवित्रा ८२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पवित्रा मनोहरा सती शयनं पवित्रा भवेत्यर्थः। किंच शतं शरदो वर्षाणि जीव किंभूता सुवर्च्चा॥ शोभनदीप्तियुता शतं वर्षाणि जीवेत्यर्थः॥ किंच रयि
स्पनम्॥ अनुसंव्ययस्व॥ संवृणु। न केवलं धनं पुत्रांश्च अनुसंव्ययस्व। संवृणु॥ यदेनं देवाशासिनेनन्त्राह्नये इदं वासः परिधत्स्व॥ चिरजीवित्वार्थं शोभा
यास्मनोहरत्वार्थम्॥ पवित्रत्वार्थं धनार्थं पुत्रार्थञ्च। इदं वस्त्रं परिधत्स्वेति वाक्यार्थः अनुसंव्ययस्वेत्यत्र संवरण इत्यस्य धातोरनुसंपूर्व्वयोः छ
नयो ह्योटि सिपि रूपम्॥ ततः कन्याया उत्तरीयकरणे पारस्करः। अथोत्तरीयं या अकृन्तन्नित्यत्र मन्त्रो यथा या अकृन्तन्नवयन्या अतन्वत याश्च
देवीस्तन्तूनभितो ततनन्यता स्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः अस्यार्थः। हे आयुष्मति या देवी दिव्यस्तन्तून् अकृन्तन् कर्तितवत्यः
तथा यास्तन्तून् अवयन् वायितवत्यः॥ तथा आस्तन्तून् अतन्वत॥ विस्तारितवत्यस्ता देवीस्त्वा त्वां संव्ययस्व संव्ययन्तु परिधापयन्तु तथा सन्निलयतः॥
तन्तूंस्तनन्थ विस्तारय॥ कथंकारम्॥ अभितः उभयतः प्रस्तारण दैर्घ्येण च विस्तार्य्य परिधत्स्व। किमर्थं जरसे दृढत्वार्थं चिरजीवित्वार्थमिति यावत्
।याभिर्देवीभिः सूत्रनिष्पादनादिना इदं वस्त्रं निष्पादितं ताभिः परिधापितं सत्॥ इदमुत्तरीयं वस्त्रं त्वं विस्तार्य्य परिधत्स्वेति वाक्यार्थः अवयन्नि
त्यत्र तनु सन्तान इत्येतस्य रूपम् देवीरिति वा छन्दसीति प्रथमा बहुवचने पि पूर्वसवर्णत्वम् अतन्स्तन्वेति॥ ननु विस्तार इत्यस्य लिङ्मध्यमपु
रुष प्रथमैकवचने बहुलं छन्दसि नमाङ्योगेपि इत्यडागमः सव्ययस्वेति तिङां तिङो भवन्तीति प्रथमपुरुषबहुवचने मध्यमपुरुषैकवचनम्॥ त
तः कन्यावरयोरेकीकरणे पारस्करः अथैनौ समञ्जन्ति समञ्जन्तु विश्वेदेवा इति मन्त्रो यथा ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ सं मातरिश्वा स
न्धाता समु देष्ट्री दधातु नौ अस्यार्थः॥ विश्वेदेवा नौ॥ आवयोः हृदयानि हृदयं समञ्जन्तु॥ अपि तु॥ आपः पानीयानि समञ्जन्तु नौ हृदयमित्यनेन सं
बंधः पानीयेनोत्सर्गपूर्वकं दम्पत्योस्तव हृदयेन सङ्गतं भवत्वित्यभिप्रायः तथा मातरिश्वा आवयोः प्राणयोः वायुः॥ नौ आवां सन्दधातु संयोजयतु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ॰स॰ तथाधाताप्रजापतिः। तौ आवां संदधातु तथा उदेष्ठीइच्छाकर्त्रीं देवताकामदेवः तौ आवां सन्दधातु देवा आपश्च आवयोर्हृदयं सङ्गमयन्तु आत्र
८३ योऽस्त्वप्राणवायुः॥ प्रजापतिः कामदेवः आवां संयोजयत्वित्याशंसा वाक्यार्थः॥ अत्रव्यवहिताश्चेति सूत्रेण व्यवहितैः संशब्दैर्दधातुक्रियायाः संब
न्धः हृदयानीति द्विवचने बहुवचनम्। उदेष्टीति॥ इषुइच्छायामित्यस्मात्सूर्द्धे सतृच् विकृते च्छन्दसि आगमानुशासनानामनित्यत्वादिड्न भवतिदे
वतार्थत्वेन स्त्रीत्वविवक्षया ङीप्॥ ततः कन्यां प्रतिगृह्य कामस्तुतिपाठे कात्यायनः कोदादित्यन्यदिति॥ मन्त्रो यथा। कोदात्कस्मा अदात्कामोदा
त्कामायादात् कामोदाता कामः प्रतिग्रहीता कामैतत्ते तव काम तामुन जामहे। अस्यार्थः कः अदात्। दत्तवान्। कस्मै अदात्॥ प्रश्नद्वयमेतत्॥ तत्रो
त्तरम्। कामोदात्॥ कामाय अदात् यतः कारणात् कामोदाता। कामः प्रतिगृहीता अतस्ते काम एतद्यद्दत्तप्रतिगृहीतं च्चतदेतत्तेतव तथा वसति
हे काम तव सतः त्वत्संबन्धिभूतं यदेतत् कन्यादिकं भुनजामहे उपभुञ्जामः सर्व्वं त्वैवात्रकामशब्देन इच्छाभिधीयते। यदिच्छायां सत्यां मवरीयते गृ
ह्यते च अतइच्छैव दातिगृह्णाति च यत्तस्यैव दात्री प्रतिग्रहीत्री च। अतस्तस्यात्रैवैतदिकामस्तुतिपूर्व्वकं कामस्यैवैतद् इष्टव्यम्। वयमुपभुञ्ज्महे इत्याशं
सावाक्यार्थः ततः कन्याप्रतिग्रहान्तरपाठे पारस्करः। यद्न्यत्प्रतिद्यौस्त्वेति मन्त्रो यथा। द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु अस्यार्थः॥ हे कन्यके त्वा
त्वां द्यौराकाशं ददातु पृथिवी जगतां धात्री त्वा त्वां प्रतिगृह्णातु व्यक्तार्थमेव। तवायं पिता आकाशमिव अहं तथा पृथिवी विश्वेषामाश्रयः तथा तवाश्र
यभूतस्त्वां प्रतिगृह्णामीति वाक्यार्थः॥ ततः कन्यावरयोर्बहिर्निष्क्रमणे पारस्करः। गृहीत्वा निःक्रामतीति यदैषि मनसेति तत्र मन्त्रो यथा॥ यदैषि मनसा
दूरं दिशोनुपवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वसौ। अस्यार्थः॥ असौ हे कन्यके त्वं मन्मनसा हृदयेन दूरं ऐषि गच्छसि पितृकुलतो राम
हं वहिर्भूत्वा केन कुत्र नीयेइति हृदये दूरं यासि। सोत्कण्ठा भवसीति यावत्॥ तत्र दिशः प्राच्यादिदश दिशः अनुतदनन्तरं पवमानः समुच्चयार्थः। वायु ८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चेत्यर्थः हिरण्यपर्णः। हिरण्यं पर्णो रथो यस्येति हिरण्यपर्ण आदित्यः वैकर्णः। विकर्णे कोणे तिष्ठतीति वैकर्णो अग्निः स नेतुक्तो दिग्वायुसूर्याग्नयः त्वां
मन्मनसां मह्यं नहृदयाङ्करोमि कुर्वन्त्विति। हे कन्यके पितृकुलतो वहिर्भूता केन कुत्र नीयेऽ इति यतः त्वं सोत्कण्ठा भवसि तत्र दिग्वायुसूर्याग्नयस्त्वां सङ्गत
हृदयां कुर्वन्त्विति आशंसा वा कार्यः। अत्र सङ्गति प्रथमा वहुवचने सुपां सुपो भवन्तीत्येकवचनम्। करोमीति कुर्वन्त्विति प्राप्ते तिङां व्यत्ययेनोत्तमपु
रुषैकवचनम्। ततः कन्यावरयोरन्योन्यदर्शने पारस्करः — अथैनां समीक्षयत्यघोरचक्षुरिति मन्त्रो यथा ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सु
मनाः सुवर्चाः वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः सोमो
ऽददद्गन्धर्वाय गन्धर्वोऽददग्नये रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् सा नः पूषा शिवतमामैरय सा न ऊरू उशती विहरय यस्यामुशन्तः प्रहराम
शेफं यस्यामु कामा बहवो निविष्ट्यै। अस्यार्थः। हे कन्ये। अपतिघ्नी एधि भवेत्यर्थः। किंभूता अघोरचक्षुः॥ अघोरम्॥ अभीषणं सौम्यं चक्षुः॥ स्वपतिविष
ये यस्याः सा तथा। किंच पशुभ्यः शिवा। गवादिभ्यः कल्याणकारिणी सुमनाः शोभनं अनुकूलं मनो यस्याः। सुवर्चाः शोभनदीप्तिः वीरसूः॥ वीर्यवन्तं पु
त्रं सूते इति वीरसूः। देवनं क्रीडनं कामयते या सा देवकामा। स्योना सुखिनी नः अस्माकं द्विपदे मनुष्यपरिजने शं कल्याणकारिणी भव॥ इति क्रियाप
दं शिवा पशुभ्य इत्यादिसप्तभिरेव संबध्यते तथा चतुष्पदे अश्वादौ शं भवः इत्थमाश्वास्य कन्यास्तुतिमाह हे त्वां सोमश्चन्द्रः प्रथमो जन्मसमय एव
विविदे लब्धवान् गन्धर्व उत्तरः द्वितीयस्ते विविदे लब्धवान् तेनत्वत्तृतीयः पतिः अग्निः पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववन्हिभिः सोमः शौ
चन्दद्दौ तासां गन्धर्वः शुभाङ्गिरिपावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यत इत्यभिप्रायः एतत्तथा तेन तव तुरीयः पतिः॥ मनुष्यजाः॥ मनुष्यजातो ह
मित्यर्थः। किमिदानीं चतुर्णामेवेत्याशङ्क्याह सोम इमां गन्धर्वाय अददत् गंधर्वोऽग्नये अथानन्तरमग्निर्मह्यमिमाम्॥ अदात्। दत्तवान्। न केवलमिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा·स· मां रयिञ्च धनमपि। पुत्रांश्च पुत्रानपि अग्निर्मह्यम्॥ अदादिति सम्बन्धः साऽइयं नो अस्मान् मा एरयन् न्यञ्जत्। किंभूता पूषा वृद्धिकारिणी॥ पुनः किंभूता।
८४ ताशिवतमा अतिकल्याणा। किंच यस्यां त्वयि उशन्तः इच्छन्तो वयं शेफमिन्द्रियं प्रहराम। प्रक्षिपामः सा त्वमूरू विहरय॥ किंभूता नो स्मान् उशती इच्छन्ती
किंच यस्यां त्वयि बहवः कामा अभिलषिताः निविष्टा निवेशिताः ततो राष्ट्रभृद्धोमे पारस्करः विवाहे राष्ट्रभृद्भिरिति तत्र मन्त्रो यथा ॐ ऋताषाड्
ऋतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् अस्यार्थः॥ यो ग्निर्गन्धर्वः। गन्धर्वरूपः। तस्मै अग्नये स्वाहा वाट् सुष्ठु वहन्त्विन्त्यर्थः॥ किंभू
तो ग्निः ऋताषाट्। सत्यसहः कृत इत्यर्थः॥ पुनः किंभूतः ऋतधामा। ऋतं सत्यं धाम स्थानमस्येति ऋतधामा किमर्थं तस्मै स्वाहा॥ स नो स्माकं इदं ब्रह्म
ज्ञानं क्षत्रं वीर्यं च पातु रक्षतु गन्धर्वरूपायाग्नये सत्यसहिताय सत्यस्थानायास्माभिरिदमाज्यं दत्तं नो स्माकं ज्ञानं वीर्यं च रक्षत्वित्याशंसा वाक्या
र्थः॥ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयो ऽप्सरसो मुदो नाम ताभ्यः स्वाहा अस्यार्थः॥ यो यम्॥ ऋताषाडृतधामाग्निर्गन्धर्व इत्युक्तार्थस्तस्या
ग्नेर्गन्धर्वस्य अप्सरस ओषधयः व्रीह्यादयः किंभूताः मुदो नन्द्या इत्यर्थः॥ ताभिः सर्वे मादयन्त इति मुदस्ताभ्य ओषधीभ्यः स्वाहा स्वर्गतं भव
तु॥ अग्निगन्धर्वाप्सरोभ्यो मुदो नामभ्यः ओषधीभ्यः॥ अस्माभिरिदमाज्यं दत्तम्। ता अस्माकं ज्ञानं वीर्यं च रक्षन्त्वित्याशंसा वाक्यार्थः॥ सं
हितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् अस्यार्थः। यः सूर्यः। गन्धर्वः किंभूतः संहितः। दिवसं रात्रिञ्च संद
नीति संहितः। पुनः किंभूतः विश्वसामा॥ सर्वसामवेदमयः। अन्यत्समानं संहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयो अप्सरस आयुवो नाम
ताभ्यः स्वाहा अस्यार्थः। तस्य सूर्यस्य गन्धर्वस्य अप्सरसो मरीचयो रश्मयः॥ आयुवो नाम आयुवन्ति योजयन्तीत्यायुवः आयुर्वैस्याम इत्यर्थः। अ राम
न्यत्समानम्॥ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य॥ इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् अस्यार्थः॥ यश्चन्द्रमा गन्धर्वः किंभूतः॥ ॥ ८४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्य्यरश्मिः। सूर्य्यस्य रश्मिः कतमो रश्मिः। सुषुम्नः सुषुम्ननामा अन्यत्सर्वं समानं सुषुम्नः सूर्य्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो।
नाम ताभ्यः स्वाहा। अस्यार्थः। तस्य चन्द्रमसो अप्सरसः नक्षत्राणि। किंभूतानि। भेकुरयो नाम। अन्यत्समानम् इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्र।
ह्म क्षत्रं पातु तस्मै स्वाहा वाट् अस्यार्थः। यो वातो गन्धर्वः। किंभूतः। इषिरः गमनस्वभावः। पुनः किंभूतो विश्वव्यचाः सर्वगतः अन्यत्समानं इषिरो विश्वव्यचा
वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा। अस्यार्थः। तस्य वातस्य गन्धर्वस्य अप्सरस आपो जलानि किंभूताः ऊर्जो नामयाः सा अन्यत्समानम्॥
भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। अस्यार्थः। यो यज्ञो गन्धर्वः किंभूतो भुज्युः सर्वाणि भूतानि भुनक्ति। पालयतीति भुज्युः। पु
नः किंभूतः सुपर्णः। शोभनपर्णगतिविनियावत्। अन्यत्समानम्। भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा अस्यार्थः
तस्य यज्ञस्य गन्धर्वस्य अप्सरसः दक्षिणा। किंभूताः स्तावा नाम दक्षिणायां दत्तायां यज्ञस्तव्यो भवतीति स्तावा अपरं समानम् प्रजापतिर्विश्वकर्म्मा मनो।
गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। अस्यार्थः। यन्मन इन्द्रियं गन्धर्वः। किंभूतः प्रजापतिः। प्रजानां पतिरीश्वरः किंभूतः। विश्वकर्म्मा। विश्वं क
र्म्म यस्य स तथा व्यापारेण विश्वस्य निर्म्माणात् अन्यत्समानम् प्रजापतिर्विश्वकर्म्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा। अस्य
मनसो गन्धर्वस्याप्सरसः ऋक्सामानि। ऋचः सामानि चेति। किंभूतानि एष्टयो नाम। आइष्टिः इष्टिरिच्छा पुत्रादीच्छया रागादिमत् प्रयुक्तो पुत्रादिः संप
द्यत इत्यभिप्रायः। अन्यत्समानम् ततो जयाहोमे पारस्करः। रजयाख्यातानाञ्च चित्तञ्च चित्तिश्चेत्यादि त्रयोदशमन्त्राः पथा। अत्र शेषपठितप्रजापतिर्जया
निन्द्रायेत्यादिमन्त्रे महे प्रजापतिर्जयं ददात्वित्याशंसा भविष्यति सा चात्रापि मन्त्रे चकारेण समुच्चितम् चित्तञ्च ज्ञानञ्च मह्यं ददात्वित्याशंसा वाक्यार्थः।
चित्तिः परिच्छेदः। आकूतञ्च आभिमुख्यम् आकूतिश्च आत्मनो धर्मविशेषो येन प्रेरणं क्रियते विज्ञानञ्च शिल्पादिज्ञानम्। विज्ञातिश्च विज्ञातार्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ।मनस्त्वप्रसिद्धम्।शक्करीत्वप्रसिद्धः।बृहच्च सामविशेषः।वाक्यार्थश्च प्रथममन्त्रे सर्वेषामुक्त एव प्रजापतिर्ज्ञेया निन्द्रायह्ह्येप्रायच्छदुग्रः एतनाज
 येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स इद्धव्यो बभूव स्वाहा। अस्यार्थः। प्रजापतिरिन्द्राय जयान् प्रायच्छत् दत्तवान् कस्मै इन्द्राय यद्द्येषनाम्नेकिं
भूतः। प्रजापतिः। एतनाजयेषु। उग्रः विपक्षो सेनाजयेषु। विपक्षतेजोभिभावी इन्द्रो वराजः। तस्मै प्रजापतिर्जयं दत्तवानिति कथमेतत् हि यतः कार
णात्। तस्मै प्रजापतये। सर्वा विशः प्रजाः समनमन्त सम्यक् प्रणामं कृतवत्यः यश्च प्रजापतिः उग्रो बभूव हव्यो ह्वातो बभूव प्रजापतिः स्वयं विपक्षविजयी लो
कस्य नमस्करणीयः सर्वतेजोभिभावी हव्य ह्वातव्यार्ह इन्द्राय जयान् प्रदत्तवानिति प्रजापतिस्तुतिर्वाक्यार्थः। इदं स्तुत्वा हुतिदानेन तुष्टो मह्यं जयं दद्या
दित्यभिप्रायः। ततो भ्यातानहोमे पारस्करः जयाख्यानाना चाज्जानन्तिति तत्राष्टादशमन्त्रा यथा। अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रे
ऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्यां स्वाहा। अस्यार्थः। योऽग्निर्भूतानामधिपतिः प्रभुः स मामाम्। अवतु। पालयतु। कुत्र कुत्र॥ अस्मि
न् ब्रह्मण्ये। अस्मिन् क्षत्रे। वीर्ये। अस्यामाशिषि आशिष्यर्थे। अस्यां पुरोधायाम्। पुरस्थितायां कन्यायाम्। अस्मिन् कर्मणि विवाहे। अस्यां देवहूत्यां
देवानां हूतिराह्वानं देवहूतिः तस्यां प्राणिनामधिपतिरग्निर्मां ब्राह्मण्यादिषु पालयत्विल्याशंसा वाक्यार्थः। इन्द्रो ज्येष्ठानामधिपतिरित्यादि। य इन्द्रो ज्ये
ष्ठानामधिपतिः श्रेष्ठानामधिपतिरित्यादि व्याख्यातम्। यमः पृथिव्या अधिपतिरित्यादि। यो यमः पृथिव्या अधिपतिरिति च तच्छेषवायुरन्तरिक्षस्याधिपति
रिति यो वायुरन्तरिक्षस्याधिपतिरन्यत्समानम्। सूर्यो दिवोऽधिपतिरिति यः सूर्यो दिवः स्वर्गस्याधिपतिरन्यत्समानम्। चन्द्रमा नक्षत्राणामधिपतिरित्यादि यश्च
न्द्रमा नक्षत्राणामधिपतिरन्यत्समानम्। बृहस्पतिर्ब्रह्मणोऽधिपतिरित्यादि यो बृहस्पतिर्ब्रह्मणो देवस्याधिपतिरित्यादि मित्रः सत्यानामधिपतिरित्यादि यो
मित्रः सत्यानां विनाशिनामधिपतिरन्यत्समानं वरुणोऽपामधिपतिरित्यादि यो वरुणः अपाम्। पानीयानामधिपतिरन्यत्समानं अन्नं साम्राज्यानाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिपतित्वमावत्विन्यादि पतु। अन्नंसाम्राज्यानामैश्वर्य्याणामधिपति। शेषंसमानं। सोमओषधीनामधिपतिरित्यादि०। यःसोमओषधीनांव्रीह्यादीनाम्॥
अधिपतिस्यसमानं। सविता प्रसवानामधिपतिरित्यादि। यःसविताप्रसवानांप्रसूतिधर्म्मिणामधिपतिरन्यत्समानम्। रुद्रः पशूनामधिपतिरित्यादि। योरुद्रः
पशूनांदेवानामधिपतिरन्यत्समानम्। त्वष्टारूपाणामधिपतिरित्यादि। यस्त्वष्टारूपाणामधिपतिरन्यत्समानम्। विष्णुःपर्व्वतानामधिपति⁻रित्यादि। योवि
ष्णुःपर्व्वतानामधिपतिरन्यत्समानम्। मरुतोगणानामधिपतयस्तेमावन्त्वित्यादि। येमरुतोवायवोगणानांसमूहानामधिपतयस्तेमामवन्त्वन्यत्समानम्।
पितरःपितामहाःपरेवरेततास्ततामहास्हमावन्त्वित्यादि। येपितरःपितामहाःपरेअवरेततःप्रपितामहान्तपूर्व्वेषुततः तस्मादपिपूर्व्वेततामहाःतस्मादपि
पूर्व्वेएवंषट्पुरुषाउदाहृताः पित्रादिषुप्रत्येकंवचनंगौरवार्थमिहास्मिन्श्लोकेमामवन्त्वित्यादिरन्यत्समानम्। ततःपुनरप्यहोमेपारस्करःमन्त्रोयथा
अग्निरेतुप्रथमोदेवानांसोऽस्यैप्रजांमुञ्चतुमृत्युपाशात् तदयंराजावरुणोऽनुमन्यतांतथयंस्त्रीपौत्रमघन्नरोदात्स्वाहा। अस्यार्थः। अग्निरेतुआगच्छतु
किंभूतोदेवानांप्रथमः। इन्द्रादीनांमुख्यःआगत्याचसोग्निःअस्यैअस्याःकन्यायाःप्रजापुत्रादिकंमुञ्चतुमोचयतु। कुतःमृत्युपाशात् मृत्योर्मरणात् पा
शाद्बन्धनात् तन्मृत्युपाशअयंवरुणोराजाअनुमन्यतांतत्रायमनुमतोभवत्वित्यर्थः। किमर्थमेतत् यथाइयंस्त्रीपौत्रमघंपुत्रभवंदुःखनरोदात् नरोदितु॥ अग्नि
रत्रागत्यवरुणस्यानुमतोअस्याःकन्यायाःपुत्रादिकंमृत्योःपाशाच्चमोचयतु। यथेयंकन्यापुत्रादिदुःखेननारोदीदित्याशंसावाक्यार्थः। अत्रअस्यैइतिषष्ठ्य
र्थेचतुर्थीरोदादितिरुदिरश्रुविमोचनइत्यस्यलोङ्प्रत्ययेनरूपम्। इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुःअशून्योपस्थाजीवतामस्तुमा
तापौत्रमनन्दमभिविबुध्यतामियंस्वाहा। अस्यार्थः गार्हपत्योग्निः। इमांकन्यांत्रायतांरक्षतु यथाअस्यैकन्यायैप्रजांपुत्रादिन्नयतुप्रापयतु तथादीर्घमा
युश्चनयतु तथासतिइयंअशून्योपस्थाअस्तुनित्यंभर्तृसङ्गताभवतुतथाजीवतांमाताअस्तुतथापौत्रम्॥ आनन्दंअभिबुद्ध्यतांपुत्रभवंसुखंसर्वतोभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· वेनानुभवतु अग्निर्नेयं दीर्घायुः सुभगा जीववत्साभवत्वित्याशंसावाक्यार्थः॥ स्वस्तिनो अग्ने दिवा पृथिव्या विश्वानि धेह्ययथायजत्र॰ यदसांमहि दिवि
८६ जातं प्रशस्तं तदस्मासु द्रविणन्धेहि चित्रम्। अस्यार्थः। हे अग्ने किं भूत। यजत्र। यजनं त्रायत इति यजत्र नोऽस्माकं स्वस्ति कल्याणं निधेहि। धारय। कथम्॥
अयथाक्रमव्यतिरेकेण एकदैवेत्यर्थः॥ किं भूतानि विश्वानि॰ सकलानि कुत्र कुत्र। दिवि आकाशे। पृथिव्यां भूम्यां च। किंच यद्द्रविणं धनं प्रशस्तं श्लाघ्यं तद्।
अस्मासु धेहि॰ किं भूतं॰ असांमहि पृथिव्याम्। दिवि स्वर्गे जातमुत्पन्नम् पुनः किं भूतम्। चित्रं नानारूपम्। गोहिरण्यादि। हे अग्ने सकल कल्याणनिधना
निधास्मासु धेहीत्याशंसावाक्यार्थः। अत्र च दिवा पृथिव्या इति च सप्तम्यां तृतीया ॐ सुगं न पन्था प्रदिशन एहि ज्योतिष्मध्येह्यजरन्नआयुः। अपैतु मृत्युरमृ
तंमआगात् वैवस्वतो नो अभयं कृणोतु नः स्वाहा। अस्यार्थः। नभो ज्योतिष्मज्ज्योतिषां मध्ये सारभूत अग्न इति यावत् नोऽस्माकं पन्थां पन्थानं प्रदिशन्न उपदिश
न् एहि आगच्छ किं भूतं पन्थानं सुगम्। सुष्ठु गम्यत इति सुगम्। तथा॰ नोऽस्माकमायुर्जीवनं। अजरन्। अहापयन्। एहि त्वय्यागते नोऽस्माकं मृत्युरपैतु। अ
पगच्छतु। अत्र मन्त्रान्तस्थनः पदं मृत्युरिति पदेन योज्यं तथा मे मम अमृतं मोक्ष आगात् आगच्छतु तथा वैवस्वतो यमः। नोऽस्माकम्। अभयं कृणोतु। करोतु॥
अग्ने अस्माकं उत्कृष्टवर्त्मोपदिशन् आयुश्च अहापयन्। आगच्छ। त्वय्यागते अस्माकं मृत्युरपगच्छतु मोक्षो भवतु यमाच्च भयमपगच्छत्वित्याशंसावाक्या
र्थः। ॐ परं मृत्यो अनुपरेहि पन्थां यस्ते अन्य इतरो देवयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा त्रिष्टुप्। मृत्युर्देवता हे मृत्यो परं पन्था
उत्कृष्टपन्थानम्। अहिंसकात्मकं। अनु इति अनुगच्छते। तव यो अन्यः पन्था अहिंसातो यो न्यो लोकहिंसात्मक इत्यर्थः। तं पन्थानं परा इति परावृत्य गच्छ किं भूतो
ऽसौ पंथाः देवयानात् इतरः। अन्येषां देवयानाद्धर्म्मणोऽन्यः केनाप्यनेन देवेनानुगतो सो पन्था इत्यर्थः। अथवा एतेदेवतु तव प्रब्रवीमि किं भूतस्यते। चक्षुष्मते शृ राम
ण्वते सकललोकव्यवहारं दृष्टवतः। शृण्वतः किं प्रब्रवीमि नोऽस्माकं प्रजां रीरिषः। अस्मत्संबंधिनीं प्रजां मा हिंसय। उत। अपि च वीरान् पुत्रान्मा रीरिषः सनान ८६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तया आक्रम्यानुपृष्ठस्त्वम्। हिंसापराहत्यमम प्रजापुत्रांश्च मा हिंसयेतिया च्चावाक्यार्थः। अत्रानुइह इत्येतयोर्व्यवहितत्वाच्छेनिवचनाद्व्यवहितयोरपि संवन्धः। रीरिष
इति रिष हिंसायामित्यस्य धातोर्ण्यन्तस्य लुङ् मध्यमपुरुषैकवचने चङि कृते माङ्योगे लाडागमो न भवति। वीरशब्देन पुत्रोऽभिधीयते इत्यत्र पुत्रो वै वीरः पुत्रं
विंदेयमिति श्रुतिः प्रमाणम्। ततो लाजहोमे पारस्करः कुमार्य्या भ्राता शमीपलाशमिश्रान् लाजानंजलिनांजलावावपति तान्जुहोति संहतेन तिष्ठन्त्यर्य्यमण
मिति तत्रार्य्यमणमिति मन्त्रो यथा ॐ अर्य्यमणं देवं कन्या अग्निमयक्षत स नो अर्य्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा। अस्यार्थः इयं कन्या अर्य्यमणं सूर्य्यमयक्षत
पूजयते किंभूतम्। अग्निम् अग्निस्वरूपं किमर्थम्। अर्य्यमा देवः इतः पतेः सकाशात् मा मां नो अमुञ्चतु न प्रमोचयतु इत्येतदर्थः इयं कन्या पत्या सहाऽवियोगसिद्ध्यर्थे।
अर्य्यमणम्। यजा तइ इति वाक्यार्थः। अत्र यजत इति वर्त्तमानार्थे लुङ् तिङां तिङो भवन्तीति एकवचनस्थाने बहुवचनं। ॐ इयं नार्य्युपब्रूते लाजानावपन्तिका आयुष्मा
नस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा। अस्यार्थः इयं नारी उपब्रूते वदति किं कुर्व्वती लाजान् आवपन्तीका आवपन्त अग्नौ प्रक्षिपन्ती किं ब्रूते। मम पतिः आयुष्मानस्तु
भवतु तथा मम ज्ञातयः। एधन्तु वृद्धियुक्ता भवन्तु इत्युदीर्य्यायुस्त्वं ज्ञातीनां च वृद्धिं प्रार्थयन्ती लाजान् जुहोति। इति वाक्यार्थः। आवपन्तिके ति स्वार्थे कः एधन्तामि
त्यस्य छान्दसं ह्रस्वत्वम्॥ इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं च संवदनं तदग्निरनुमन्यतामियं स्वाहा। अस्यार्थः॥ इयं नार्य्युपब्रूते इत्यधिकारे अयं
मन्त्रः। इयम्। अहम्। इमान् लाजान् अग्नावावपामि प्रक्षिपामि किंभूतान् तव पत्युः समृद्धिकरणान् भवसमृद्ध्यर्थमित्यर्थः। अपि च यदेतन्मम तुभ्यं तव संवदनमभि
सुखीकरणं तदग्निः अनुमन्यतां इत्येतदर्थः। तुभ्यमिति षष्ठ्यर्थे चतुर्थी सुपां सुलुगादिना विभक्तिलोपः त्वसक्रियासंवदनं ततः कन्याहस्तग्रहणं पारस्करः अ
थास्येदक्षिणं हस्तं गृह्णाति गृह्णामि ते इति॥ तत्र मन्त्रो यथा॥ गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्य्यथासः भगोर्य्यमा देवः सविता पुरंध्रिर्मह्यं त्वा
दुर्गार्हपत्याय देवाः अमोहमस्मि सा त्वं सा त्वमस्यमो अहं सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वं तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजननावहै पुत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· न्विद्यावहै वहून्पुत्रांस्ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं शृणुयाम शरदः शतं। अस्यार्थः। तेन वहस्तं गृह्णामि किमर्थं सौभगत्वा
८७ य सौभाग्याय यथा मया पत्या जरदष्टिः आसः। वृद्धा भवसीत्यर्थः स्वयमेव किं गृह्णामीत्याकाङ्क्षायामाह त्वा त्वां मह्यं देवाः अदुः दत्तवन्तः के ते देवाः॥ भगः अ
र्यमा सविता च देवा इति सर्वैरेव संबध्यते॥ किंभूतां त्वां पुरन्धीम्। गार्हस्थ्याधिकारिणीं किमर्थम्। अदुः गार्हपत्याय गृहपतित्वाय। किंभूतोऽहम्। त्वाञ्च किं
भूता अहं। अमः। अस्मि। मा लक्ष्मीः तस्या न त्वां मः सा त्वं लक्ष्मीः। त्वया विना लक्ष्म्या शून्योऽहम् त्वं मम लक्ष्मीरिति भावः। सा त्वमस्यमोऽहमस्मीति पुनरभिधानमा
दरातिशयार्थं तथा अहं साम अस्मि। सामवेदोऽस्मि। ऋक् त्वम्। त्वं ऋग्वेदः। अहं द्यौः स्वर्गः। त्वं पृथिवी। तत्र ध्वम एहि अभिमुखी भव तौ आवां विवहावहै
विवाहं करवाव तत्र प्रजास्तिरेतः। शुक्रं सहदधावहै। धारयाव। प्रजां सन्ततिं प्रजनयावहै उत्पादयाव वहून् पुत्रान् विद्यावहै प्राप्नुवन्ते पुत्रा जरदष्टयः सन्तु दी
र्घायुषो भवन्तु। किञ्च। आवां शरदः शतं पश्येम पश्याव। किंभूतौ। संप्रियौ अन्योन्यानुरक्तौ। रोचिष्णू दीप्तियुक्तौ सुमनस्यमानौ सौमनस्यं कुर्वाणौ जीवेम शरदः
शतम्। शृणुयाम शरदः शतमिति व्यक्तार्थं सवित्रादिभिर्देवैर्दत्ता या लक्ष्मीभूता यास्तां वहस्तां वहस्तं सौभाग्याय दीर्घायुष्ट्वाय पुत्रप्राप्तये अविकलेन्द्रियत्वाय च
गृह्णामीति वाक्यार्थः। अत्र गृभ्णामीत्यत्र ग्रहधातोर्हग्रहोर्भश्छन्दसि हस्येति भकारः। पुरन्धिरिति द्वितीयायां प्रथमा पश्येम जीवेम शृणुयामेति द्विवच
ने वहुवचनानि। ततः कन्यायाः अश्मारोहणं पारस्करः अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेन आरोहेममश्मानमिति। तत्र मन्त्रो यथा आरोहेम
मश्मानमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायतः। अस्यार्थः। हे कन्ये त्वम्। इममश्मानमारोह आक्रम। किमर्थम्। अनेनाश्मारोहणेन।
त्वं स्थिरा भव। कइव। अश्माइव। किंच पृतन्यतः। त्वत्प्रतिपक्षतया आत्मनः पृतनां सेनामिच्छतः पुरुषान् अभितिष्ठ। अभिभूय तिष्ठ। किंच पृतन्यतः। त्वत्प्रतिपक्षत राम
या आत्मनः पृतनां सेनामिच्छतः पुरुषाम् अभितिष्ठ। अभिभूय तिष्ठ। किंच पृतनायतः ईदृशानेव अववाधस्व खण्डय। त्वं स्थैर्यार्थं प्रतिपक्षाभिभवार्थं प्रतिपक्ष ८७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सबाधनार्थं चइमं प्रस्तरमारोहेतिवाक्यार्थः एतन्यतनइतिकढ्ढबरएतनतस्यनूकिलोपइत्याकारलोपः। एततनायतनइति लोहितादिगणेपठितः। ततो गाथागा
नेपारस्करः। अथगाथाङ्गायति। सरस्वतिप्रेदमवसुभगेइति। तत्रैमन्त्रो यथा। सरस्वतिप्रेदमवसुभगेवाजिनीवतीयान्त्वाविश्वस्यभूतस्यप्रजायामस्याग्रतः य
स्यांभूतं समभवद्यस्यां विश्वमिदं जगत् तामद्यगाथाङ्गास्यामियास्त्रीणामुत्तमंयशः अस्यार्थः। हेसरस्वतियान्त्वात्वां प्रगायामि उत्कीर्त्तयामीत्यर्थः। सात्वं इदंवि
वाहकर्म्मप्रअव प्रकर्षेणपालय: किंभूतेसुभगेमनोहरेपुनः किंभूते। वाजिनीवति वाजिनीघोटिकासापस्यास्तिसा यथाश्रीसंयाति। तथा त्वमपिकीर्त्तिरूपोशी
भंयासीत्यर्थः। कुत्रयासीत्याकाङ्क्षायामाह। अस्यभूतस्यप्राणिजातस्याग्रतः। किंभूतस्य। विश्वस्यसर्वस्य। कीदृशं तदानं यस्यां सरस्व—त्यांभूतम्। पृथिव्यप्ते
जोवाय्वाकाशात्मकः समभवत्तत्सम्यग्बभूव। तथा यस्यामिदं विश्वम्। जगत्समभवत् तामङ्गगाथाङ्गायामि काम्॥ अद्य इदानीं गास्यामि॥ गायामिस्त्रीणां की।
र्त्तिभूता। इत्येवंरूपयागाथयासरस्वतीं स्तुत्वा सामदेवम् विवाहकर्म्मजनप्रसादकृता शुद्धमन्त्रपाठतः पालयत्विति वाक्यार्थः। प्रगायामीति। गैशब्दे॥ आत्मनेप.
सर्गेइत्यङ्प्रगानं। तत्करोतीति णिच लेट् उत्तमपुरुषैकवचनम्। गास्यामीतिवर्त्तमानेलट्। ततो वरवध्वोरग्निपरिक्रमणेपारस्करः अथपरिक्रमेत। तुभ्यमग्नेप।
र्य्यवहदिति। मन्त्रो यथा ॐ तुभ्यमग्नेपर्य्यवहन्सूर्य्यांवहतुनासह पुनः पतिभ्योजायान्दाअग्नेप्रजनयासह अस्यार्थः। हेअग्ने अग्ने प्रथमं सूर्य्यांसूर्य्यवत् कान्ति
शालिनीमेतांकन्यां तुभ्यं पर्य्यवहन् त्वं विवाहितवानित्यर्थः। एतांत्वयासह पुनर्नोमनुष्यो वहतु विवाहयतु ततश्चपतिभ्यः। मनुष्यपतये एतांजायांहेदेहि प्रजयासह सन्त
त्यासहेत्यर्थः अथवा वाक्यार्थः। हे अग्ने त्वया प्रथमं विवाहितत्वात्त्वैव जाया असौ तदिदानीं सन्तत्यासह मनुष्याय एतां जायां देहीति दाइति लोट् सिपि। ततश्चतुर्थीहोमे
पारस्करः पूर्वेकुत्वयासर्वांल्लाजानावपति। भगाय स्वाहेति तत्र मन्त्रो यथा। भगायस्वाहा कामाय सुहुतं भवतु इत्यर्थः। ततः प्रजापतयेस्वाहेति आज्यहोमः। ततः सप्त
पदाक्रमणे पारस्करः अथैनामुदीचींसप्तपदानिप्रक्रामयत्येकमिषइत्यादिसप्तभिर्मन्त्रैः। तत्र मन्त्रो यथा एकमिषे विष्णुस्त्वानयतु एतेषु सप्तस्वपि मन्त्रेषु सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिवक्ष्यमाणंसंवोधनपदंसंवध्यते। हे सखे त्वां एकपदं विष्णुर्नयतु किमर्थम् इषे। इषिंतं जगत्प्रभुर्विष्णुस्त्वामेकं पदं अभीष्टलाभार्थं नयत्वित्याशंसा वाक्यार्थः॥ द्वे
ऊर्जे विष्णुस्त्वा नयतु हे सखे त्वां द्विपदे विष्णुर्नयतु किमर्थं ऊर्जे वलाय त्रीणि रायस्पोषाय धनवृद्धये चत्वारि मायोभवाय विष्णुस्त्वा नयतु हे सखे चत्वारि पदानि त्वां
विष्णुर्नयतु किमर्थं मायोभवाय। मायः सौख्यं तस्य भवउत्पत्तिस्तदर्थम्। पञ्च पशुभ्यो विष्णुस्त्वा नयतु। हे सखे पञ्च पदानि त्वां विष्णुर्नयतु किमर्थम् पशुभ्यो गवादिभ्यः
षड्। ऋतुभ्यो विष्णुस्त्वा नयतु हे सखे त्वां षट् पदानि विष्णुर्नयतु किमर्थं ऋतुभ्यः ऋतुसमयप्राप्तये। सखे सप्तपदा भव सा मामनुव्रता भव। मम व्रतमनुपालयन्ती भव भू
राद्दिसप्तलोकप्राप्तये पतिव्रतात्वाय च सप्तमं पदं विष्णुर्नयत्वित्याशंसा वाक्यार्थः। ततो विंत्रकलशस्थजलेन वधूवरयोरभिषेचने पारस्करः ततएनो मूर्द्ध्न्यभिषिंचति
आपः शिवाः शिवतमा इति। तत्र मन्त्रो यथा आपः शिवाः शिवतमाः शान्ताः शान्ततमाः तास्ते कृण्वन्तु भेषजम्। अस्यार्थः। या आपः शिवाः कल्याणरूपः शिवतमाः अति
शयेन कल्याणरूपाः। शान्ताः अनुपद्रवकारिण्यः शान्ततमाः। अतिशयेन शान्ताः। ता आपः तेतव भेषजम् रोगनाशनं कृण्वन्तु सकलदोषविमुक्ता आपस्तव रोगनाशनं
कुर्वन्त्विति वाक्यार्थः॥ कृण्वन्त्विति कृवि हिंसाकरणयोश्चेत्यत्र धातोः॥ ततः पुनस्तेनैवोदकेन पारस्करः आपो हि ष्ठेति च तिसृभिरिति तत्र मन्त्रो यथा आपो हि
ष्ठा मयो भुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ॥ आपो जनय
था च नः अस्य ऋक्त्रयस्य व्याख्यादिकं प्रातःस्नाने ऽनुसन्धेयमिति। तस्य सूर्यावेक्षणे पारस्करः अथैनां सूर्यमुदीक्षयति तच्चक्षुरिति तत्र मन्त्रो यथा। तच्चक्षुर्देव
हितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम् अस्य व्याख्यादिकमुपनेऽनुसन्धेयमिति। ततो वरेण कन्याया हृदयालंभने
पारस्करः अथास्यै दक्षिणांसमधि हृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजा
पतिस्त्वा नियुनक्तु मह्यम् अस्यार्थः। हे कन्ये ते तव हृदयं मम व्रते निश्चयेन दधामि तत्पोयामित द्वतं कारयामीत्यर्थः। तथा सति ते तव चित्तं अनु अस्तु मम चित्तानु

नय२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कूलं भवतु तथा मम वाचं वाक्यं त्वं एकचित्ता सती जुषस्व सेवस्व मदीयवचनकरा भवेत्यर्थः। तथा प्रजापतिस्त्वा मह्यं नियुनक्तु नियोजयतु त्वं प्रजापतिना मह्यं नियु
नक्ता मयापि पतिव्रता त्वेस्या पित हृदया मम चित्तानुकूलचित्ता मदेकचित्ता च मम वाचं सेवस्वेत्यनुशासनं वा कार्यः। ततो वरस्य कन्याभिमन्त्रणे पारस्करः।
अथैनामभिमन्त्रयते सुमङ्गलीरियं वधूरिति। मन्त्रो यथा। सुमङ्गलीरियं वधूरिमां समेत पश्यत सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतन अस्यार्थः। हे सभ्याः इयं वधूः
सुमंगलीः शोभनमङ्गलयुक्ता। इमां इत्थम् भूतां समेत सङ्गच्छत तथा इमां पश्यत आलोकयत अस्यै सौभाग्यं दत्त्वा यदत्त्वा॥ अथ अनन्तरम्॥ अस्तं विपरेतन ग-
च्छत॥ इमां मङ्गल्यां सङ्गम्य आहृष्ट्वा अस्यै सौभाग्यं च दत्त्वा स्वस्थानं गच्छतेति वा कार्यः॥ अत्र दत्त्वायेति क्त्वाय विपरेतनेति इण गतौ विपूर्वः परापूर्वः तप्
प्तन प्तनयथानाश्चेति लोड् मध्यमपुरुषबहुवचनस्य तनप् ततो वरः कन्यामुत्तोल्य लोहिते चर्मणि उपवेशयत् तथा च पारस्करः अनडुहे चर्मण्युपवेशय
तीह गावो निषीदन्त्विति मन्त्रो यथा॥ इह गावो निषीदन्तु इहाश्वा इह पुरुषा इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदन्तु अस्यार्थः॥ इह वृषचर्म्मणि त्वया
उपविशन्त्या सह॥ गावः निषीदन्तु उपविशन्तु तथा इह अश्वाः निषीदन्तु। इह पुरुषाः परिजनमनुष्या निषीदन्तु तत्रस्थानद्वये आदिपदस्थितं क्रि-
यापदमनुषंजनीयं इह रुह्यत्यर्थः॥ यज्ञोपि निषीदतु किंभूतः सहस्रदक्षिणः अत्र मन्त्रान्तस्थितं निषिदत्विति क्रियापदमनुषंजनीयं तथा॥ इह पूषापु
ष्टिकारी आदित्यः निषीदतु गोअश्वपरिजनयज्ञादिभिः॥ सह त्वमिह वलीवर्द्दचर्म्मणि उपविशेति वा कार्यः। ततो वरेण कन्याया ध्रुवावेक्षणे पारस्करः अ
स्तमिते ध्रुवं दर्शयति ध्रुवमसीति॥ मन्त्रो यथा ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्यामपि मह्यं त्वादात् बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतं
॥ अस्यार्थः॥ हे वधू ध्रुवमसि अविनाशिनी निश्चलासि त्वा त्वां ध्रुवनक्षत्ररूपं पश्यामि दर्शयामि० किमर्थम् त्वमपि ध्रुवा शाश्वती पोष्या एधि पोषणीया भव॥
इत्येतदर्थम्॥ किंच बृहस्पतिः त्वा त्वां मह्यम्॥ अदात् दत्तवान्॥ तथा सति त्वं प्रजावती पुत्रादिसहिता मया पत्या सह शरदः शतम्। शतं वर्षाणि जीव त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रा·म· यमि शाश्वतीभवेदित्येतदर्थम् मयादर्शितध्रुवा बृहस्पतिना मह्यं दत्ता शतवर्षाणि जीवस्य शंसा वाक्यार्थः॥ अत्र ध्रुवमिति स्त्रीलिङ्गत्वे प्राप्ते पुंसकलिङ्ग
८९ त्वपश्यामीत्यन्तर्भावितण्यर्थः॥ इति विवाहः॥ अथ चतुर्थीकर्ममन्त्रव्याख्या तत्र पञ्चाज्याहुतिहोमे पारस्करः आज्यभागाविष्वाज्याहुतिर्जुहोति॥ ॐ
अग्ने प्रायश्चित्ते इत्यादि तत्र मन्त्रो यथा। अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय।
स्वाहा। हे अग्ने किंभूत प्रायश्चित्ते सकलदोषापकरणस्वरूप त्वं देवानामिन्द्रादीनां प्रायश्चित्तिर्दोषापकर्त्ता असि भवसि अतः कारणाद्ब्राह्मणो हन्त्वा त्वा
म्। उपधावामि। उपसर्प्पयामि किंभूतः। नाथकामः याञ्चाकामः याञ्चार्थमुपसर्प्पयामीत्यर्थः। काया ज्या अस्यै। अस्याः कन्यायाः या याततनूः पतिघ्नी पतिहिंस
कम् यदंगमस्यै तत्तदर्थे नाशय अपकुरु। हे अग्ने प्रायश्चित्तस्वरूप देवानामपि दोषापकर्त्ता त्वमेवेति स्तुतिपूर्वकं ब्राह्मणोहं त्वामुपसर्प्पयामीत्युपसर्प्प
अस्याः पतिविरोधकाङ्गलक्षणं नाशयेति याच्ञा वाक्यार्थः। अस्यैरिति षष्ठ्यर्थे चतुर्थी ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ
काम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा अस्यार्थः हे वायो अस्याः या प्रजाघ्नी सन्तानविरोधिनी अपरं समानं सूर्य्य प्रायश्चित्ते त्वं देवानां।
प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा अस्यार्थः हे सूर्य्य अस्या या पशुघ्नी गवादिविरोधिनी अपरं
समानम् चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा। अस्यार्थः हे चन्द्र अस्या
या गृहघ्नी गार्हपत्यविरोधिनी अपरं समानम् गंधर्व्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्ता
मस्यै नाशय स्वाहा अस्यार्थः हे गंधर्व्व यशसः प्रकाशकारकया अस्या यशोघ्नी यशोविरोधिनी अपरं समानम्॥ सूर्य्य प्रायश्चित्ते त्वं देवानां प्रायश्चि राम
त्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा। अस्यार्थः हे सूर्य्य अस्या या पशुघ्नी गवामधि विरोधिनी अपरं समा ८९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेम् अतःआहुतिशेषसहितपूर्व्वस्थापितजलेनकन्याभिषेके पारस्करः।ततएनांमूर्द्धन्यभिषिंचतियाते पतिघ्नीरिति।तत्रमंत्रोयथा याते पतिघ्नीप्रजा
घ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदितायातनूर्जारघ्नीततएनांकरोमिसाजीर्य्यत्वंमयासहासौ। अस्यार्थः हे असौअमुकेतवयातनूर्न्निन्दिता दोषावहा तांएनां
तनूंजारघ्नींजारउपपतिः तद्घातिनीं करोमिकासानिन्दितापतिघ्नीपशुघ्नीगृहघ्नीयशोघ्नीएतत्स्वव्याहृतमेव अनेनाभिषेककर्म्मणासात्वंमयासहजीर्य्य
त्वंजरांप्राप्नुहिदीर्घायुर्भवेत्यर्थः अनेनाभिषेककर्म्मणात्वंमयाहृतशरीरदोषासहदीर्घायुर्भुवेतिवाक्यार्थः।ततः कन्यायाः स्थालीपाकप्राशने पारस्करः
अथैनांस्थालीपाकंप्राशयति प्राणैस्तेप्राणान्संदधाम्यस्थिभिरस्थीनिमांसैर्म्मांसानित्वचात्वचमिति हेकन्येतेतवप्राणान्प्राणैः संनिहितत्वायोग्यंम
दीयेरितिवोढव्यम् संदधामियोजयामितथाते अस्थीनिअस्थिभिः संदधामितथाचमांसैर्म्मांसानितथातेत्वचंसंदधामि अनेनस्थालीपाकप्राशनेनक
र्म्मणामयासहतेवएकप्राणत्वैकास्थित्वैकमांसत्वैककर्मत्वानिकरोमीतिवाक्यार्थः। इत्यावसथ्यिकमहाधर्माधिकृतश्रीहलायुधकृतौब्राह्मणसर्व्वस्वेदश
कर्मंमंत्रव्याख्या। मैथिलपुस्तकम्।। विश्वंश्रयत्याश्रयमाश्रयासौवर्त्मामलंशंसतिकृष्णवर्त्मा तापत्रयंयोदहनश्छिनत्तिसचित्रभानुर्भवतःपुनातु ॥
योगोडवसुधाधीशधर्म्माध्यक्षोहलायुधः स्मार्त्ताग्निपद्धतेरेषनिबंधस्तेननिर्म्मितः॥ आधानाद्यन्तकालेष्टिपर्यन्तोग्निमतांविधिः तात्पर्यंस्यापिमंत्राणा
मर्थोप्यत्रप्रकाशितः अथावसथ्याधाननिबंधः तत्राग्निपरिचर्य्याफलम् ॥ पद्मपुराणे॥ त्रीनग्नीनथवैकंवायोहन्यहनिसेवते सर्वभूतदयापन्नो
नप्रेतोजायतेनरः॥ वायुपुराणे॥ दर्शश्चपौर्णमासश्चयेयजन्तिद्विजातयः नतेषांपुनरावृत्तिर्ब्रह्मलोकात्कथंचन॥ यमः॥ नाग्निहोत्रात्परोधर्म्मोनाग्निहो
त्रात्परंतपः नाग्निहोत्रात्परोदमः॥ तथा।जुहुतान्यग्निहोत्राणिनयंतिपरमांगतिम् अत्रस्वर्गश्चमोक्षश्चयोयथागन्तुमिच्छति॥ जावालिः॥ सन्तोषा—मृ
तमासाद्यतन्मनाधर्म्मविन्नरः। अकामेनाग्निहोत्रस्यहोतास्वर्ग्यैतिराप्नुयात् देवलः अग्निहोत्रंसमादायजीविकार्थमपित्यजेत्॥ सर्वेदेवास्तहर्योहि
नाग्निहोत्रात्परंदाने २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धर्मशास्त्र

CC-0. In Public Domain. Digitization by eGangotri

ग: सापिण्ड्यनिवृत्तौ वा विवाहो निर्णयसिन्धुसंमत: — ४

(८) किं प्रवर लक्षणं निष्कृष्य प्रवरस मानतावीदृशी, सा सर्व गोत्रसाधारणी एकरूपा नवा, सप्रमाणं भेकतरपक्ष: समर्थनीय — ६

१८३५

धर्मशास्त्राचार्यपरीक्षायाम्

२ वर्षे २ पत्रम्

मीमांसान्यायप्रकाशे प्रश्नाः

(१) इह खलु परमकारुणिकेन भगवता जैमिनिमुनिना अथातो धर्मजिज्ञासा इत्यादिना द्वादशाध्यायेषु धर्मो विचारितः तदुपक्रमे किं धर्मलक्षणं कृतवान् मीमांसान्यायप्रकाशकृत, वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। वेदाध्ययनसामान्यादधुनाध्ययनं यथा कारिकेयं कस्मान्निमित्त संदर्भो प्रक्षिप्ता, तदत्र पूर्वापर सन्दर्भ प्रदर्शनपूर्वकं विवृणुत. (१०)

(२) औत्पत्तिकश्चार्थ मात्रावे शब्दानामतिगौरवान्हिको भाष्यवार्तिकानां तु नार्थ दोषो विरुध्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमुपक्रम्य कारिकेयमिह प्रदर्शिता, तदुपवर्ण्य पूर्वोत्तरपक्षौ निरूप्येताम्, किमत्र सोमेन यजेत नैमित्तिकत्वादिना यदुपवर्णितं तदपि सम्यक् प्रतिपादनीयम् — — — 15

(3) सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ॥
नहि संबन्धवाचित्वं संभवत्यतिगौरवात् ॥
याचकं तु यजिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
याचकयुक्तः पुनः कर्ता वाच्यो नैव कस्यचित् ॥ अस्मिन् संदर्भे पद्यद्वयमिदमुद्धृतम् । श्लोकस्य सङ्गतिं च प्रदर्श्य पद्यद्वयं व्याख्यायताम् — — — 15

(4) चित्रया यजेत पशुकामः इत्यत्र चित्रेति कर्मनामधेयमिति सिद्धान्तः कथमुपपादितः — — — 15

(5) अत्र यादृशो लोके ब्रह्महत्याश्वमेधयोः दृश्यते तादृगेवैवं विधानप्रतिषेधयोः । फलतश्च प्रमेयाधिकारो बोधकभेदतः पर्युदासाख्यमन्यत्वात् भेदो विधिनिषेधयोः ॥ सन्दर्भं प्रदर्श्य पूर्वकं कारिकाद्वयं व्याख्यायताम् । — — 5

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८ १६ श्रीः ... स्त्राचार्य परीक्षायाम्

२ वर्ष ... पत्रम्

(१) गायत्र्या अक्षराणां तत्प्रभृतीनां प्रत्येकं देवतोल्लेखः क्रियताम्॥ कुत्र कर्माणि तासां देवतानामुपयोगः, मन्त्रार्थे तासामसंबन्धात् जपोपयोगित्वासंभवात्॥ — — ८

(२) गायत्र्यर्थप्रतिपादकं योगियाज्ञवल्क्यवचनमुद्धृत्य तदर्थो वर्ण्यताम् — — — ६

(३) आपो हि ष्ठेत्यादिना तृचत्रयेण कस्य कस्यां दशायां कतिधा च मार्जनम्, अत्र प्रमाणत्वेन गृहीतानां वचनानामैकमत्यं वर्तते न वा। एकतरपक्षः प्रमाणेन स्थाप्यताम् — — — ६

(४) सूर्यश्चेत्यावमन मन्त्रे रात्रिस्तदवलुम्पतु इति अहस्तदवलुम्पतु इति वा पाठो हलायुधसंमतः सप्रमाणमुपपाद्यताम् — — — ५.

(५) तर्पणानां कति विधम् कश्च तस्य मुख्यकालः कतमस्मात् कर्मणः पश्चात् तत् करणीयमदं ...

(६) निर्णयसिन्धुकृतः कास्मिन् सापिण्ड्यलक्षणे संमतिः द्वयोर्विभिन्नयोः सायोः किं स्वरूपम्, ततश्च फलभेदो भवति न वा, सोदाहरणं विशदीकृत्य स्वपक्षः स्थाप्यताम्

(७) वरकन्ययोरुभयतः सापिण्ड्य निवृत्तौ एक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्रा·स· लोके ब्राह्मणजन्म च ॥ अथाग्न्याधानाकरणदोषाः । तत्र कूर्मपुराणम् ॥ त्रयाणामिह वर्णानां गृहस्थाश्रमवासिनाम् ॥ नास्तिक्यादथवालस्याद्योऽग्निं नाधा
९० तुमिच्छति ॥ यजेत वा न यज्ञेन स याति नरकान्बहून् तामिस्रमंधतामिस्रं महारौरवरौरवौ कुम्भीपाकं वैतरणीमसिपत्रवनं तथा ॥ अन्यांश्च नरकान्घो
रान्प्राप्नोति स्वधर्मभिः । अन्त्यजानां कुले विप्रः शूद्रयोनौ प्रजायते ॥ तस्मात्सर्वप्रयत्नेन ब्राह्मणो वै विशेषतः ॥ आधायाग्निं विशुद्धात्मा यजेत परमेश्वरम्
॥ भविष्यपुराणम् । वेदैरुक्तं यथा वीरं सुरज्येष्ठमुपेत्य वै ॥ अस्मान्ये ब्राह्मणा भूमौ अभ्यस्यन्ति त्वनग्निकाः क्लिश्यन्ति ते सदा सर्वे मूढा वै फलकांक्षया ॥ अनु
ष्ठानविहीनानामस्मान्न्यसतां भुवि ॥ क्लेशो हि केवलो देव नास्मदभ्यसने फलम् ॥ अनुष्ठाने परं देव अस्मदभ्यसनात्सदा ॥ इत्येवं राजशार्दूल वेदा ऊचु
र्विवेधसम् ॥ व्यासशातातपौ ॥ योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते ॥ अन्नं तस्य न भोक्तव्यं वृथापाको हि स भवेत् ॥ अथानाहिताग्निप्रायश्चित्तम् ॥ गो
वधो याज्यसंयाज्यपारदारात्मविक्रयम् ॥ अनाहिताग्निता स्तेनमृणानां चानपक्रिया ॥ असच्छास्त्राभिगमनं कौसीन्यस्य च क्रिया ॥ धान्यकुप्यपशुस्ते
यं मद्यपस्त्रीशूद्रविट्क्षत्रवधा नास्तिक्यं चोपपातकम् गोवधप्रायश्चित्तानन्तरं मनुः एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः ॥ अवकीर्णिवर्ज्यं शुद्ध्यर्थं चा
न्द्रायणमथापि वा ॥ ततश्चाग्निग्रहणाधिकारिणा ब्राह्मणेन चिरंकालमकृताग्न्याधानेन गोवधोक्तोपपातकप्रायश्चित्तं ॥ अल्पकालमकृताग्न्या
धानेन तु चान्द्रायणं कृत्वा आवसथ्याधानं करणीयमिति ॥ एतत्तु प्रायश्चित्तं सहोदरस्य ज्येष्ठस्याग्निमत्त्वे सति वोढव्यम् ॥ ज्येष्ठस्याग्निमत्त्वे सति
वोढव्यम् ॥ ज्येष्ठस्यानग्निमत्त्वे अग्निग्रहणे दोष एव श्रूयते ॥ तथा च यज्ञपार्श्वः ॥ ज्येष्ठे तु सति निर्दोषे कनीयान्योऽग्निमान्भवेत् ॥ परिवेत्ता भवेत्तस्य
ब्रह्महत्या न संशयः ॥ मनुः ॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ परिवित्तिः परिवेत्ता यया च प राम
रिविद्यते ॥ सर्वे ते नरकं यान्ति दातृयाजकपंचमाः ॥ अथाग्न्याधानकालः ॥ तत्र च कृतगृह्यपरिशिष्टे ॥ जातकर्माणि चेत्तगृहीतोऽप्यसमाव ९०

CC-0. In Public Domain. Digitization by eGangotri

र्त्तेनाद्ग्निं परिगृह्णीयात्॥ यत्रान्यांस्समिधमादधातितं परिगृह्णाति स आवसथ्यः तस्मिन् गृह्यकर्माणि कुर्य्युः॥ तत्रापि न गृहीतः स्यात् वैराजमग्निमन्वा
तवैराजोपि न परिगृहीतः अथामावास्यां वैश्यकुलादग्निमाहृत्य शुचौ देशे स्थापयेत्॥ गौतमः॥ भार्य्यादिरग्निर्दायादिर्वा॥ पैठीनसिः॥ वैवाहिकमग्निम
न्वीत सायंप्रातर्यथाकालं समिधोभ्यादध्यात्। व्यासः॥ अग्निर्वैवाहिको येन न गृहीतः प्रमादिना। पितर्य्युपरते तेन गृहीतव्यः प्रयत्नतः॥ छन्दोगपरि
शिष्टे कात्यायनः॥ यस्य वा दारभवे हर्त्ता कन्यासाय दिकेन चित्॥ सोन्यांस समिध माधास्यन्नादधीतैव नान्यथा। अनूढैव तु या कन्या पंचत्वमुपगच्छति।
तथा त्वव्रतलोपः स्यात्तेनैवान्यांस मुद्वहेत्॥ अथ चेन्न लभेतान्यां याचमानोपि कन्यकाम्॥ तमग्निमात्मसात्कृत्वा क्षिप्रं स्यादुत्तराश्रमी॥ वसिष्ठः॥ अ
त्रमग्न्याधेयायत्तनोहिताग्निः स्यात्॥ अवश्यं ब्राह्मणोऽग्नीनादध्यात्॥ अग्न्याधेयकर्म्मार्थं ब्राह्मणो अलं समर्थ इत्यर्थः॥ तस्माद् ह्याहिताग्निना भवित
व्य॥ पारस्करः॥ आवसथ्याधानं दारकाले दायाद्यकालएके॥ गोभिलगृह्यम्॥ उदगयने पूर्वपक्षे प्रागावर्त्तमानादन्हः कालं विद्यात्॥ प्रागावर्त्तमाना
दन्हः पूर्वाह्ण इत्यर्थः॥ तथा ब्रह्मचारी वेदमनधीत्यान्यांस समिधमभ्यादास्यन् जायाः पाणिं जिगृक्षन्॥ अग्निसमाधानं कुर्वन्निति संबध्यते॥ तथा प्रेतेवा
गृहपतौ परमेष्ठिकरणं परमेष्ठिकरणं० परमेष्ठी अग्निः तथा तिथिनक्षत्रसमवाये दर्शे वा पौर्णमासे वाग्निसमाधानं कुर्वीत॥ छन्दोगपरिशिष्टे कात्या
यनः वैवाहिकेग्नौ जुहुयात् सायंप्रातस्त्वतन्द्रितः॥ चतुर्थीहोमकृत्स्यैव एतत् शाट्यायनेर्म्मतम् [illegible] यमः एकं द्वौ त्रीन्वा वेदानधिगम्य गुरुं परितोष्य
तु स्नातो संजादपनयं कृत्वा सवर्णापरिणीय ब्राह्मणादिना विवाहेन कृतुकालगामी पुत्रमुत्पाद्यावसथ्याधानं कृत्वा अतिथीन् पूजयेत् श्रुद्रदीपिका
यां वह्निदीपिकायां वह्निग्रहणं कुजगुरुशु अनुमासे माघादिषट्सु च। मृदुध्रुववह्निभेषु कुंभाज्ञाशकरि लग्नमशुद्धकाल लग्नस्थशीतगु सितौ च विहा
य कुर्यात्॥ तत्र मृदुनक्षत्राणि अनुराधाचित्रारेवती मृगशिरः ध्रुवनक्षत्राणि उत्तरफल्गुनी० उत्तराषाढः उत्तरभाद्रपद रोहिणी० वह्निभानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्री ए कृत्तिकाः कुंभजांघका मीनकर्कटमकरांशाः अश्वारण्यादिनिर्णयम् तत्र च्छंदोगपरिशिष्टं कात्यायनः ॥ अश्वत्थो यः शमीगर्भः प्रशस्तोर्वी समुद्भवः ॥
९७ तस्य च प्राङ्मुखी शाखा या चोदीची चोर्ध्वगापि वा ॥ अरणीस्तन्मयी प्रोक्ता तन्मयी चोत्तरारणिः सारवद्दारवं चार्द्रमोजिनी च प्रशस्यते संसक्तमूलो यस्य।
स्यात्स शमीगर्भ उच्यते ॥ अलाभे तु शमीगर्भादाहरेदविलंबितः चतुर्विंशतिरंगुष्ठान्दैर्घ्यं षडपि पार्थिव ॥ चत्वार उच्छ्रयो मानमरण्याः परिकीर्त्ति
तम् ॥ षडंगुलः प्रमंथः स्यात् चात्रं स्याद्द्वादशांगुलम् ० अविलो द्वादशैव स्यात् एवं तन्मंडलयंत्रकम् अंगुष्ठांगुलिमानं च यत्रोपदिश्यते तत्र तत्र च
हन्यद्वैग्रंथिभिर्मानुषात्सदा गोवालैः शणसंमिश्रैः त्रिवृद्वृत्तमनंतकं व्यामप्रमाणं नेत्रं स्यात्तु मध्यस्तेन पावकः मूर्द्धाक्षिकर्णवक्त्राणि कंध
राणि च पंचमी अंगुष्ठमात्राण्येतानि द्व्यंगुष्ठं वक्ष उच्यते अंगुष्ठमात्रं हृदयं त्र्यंगुष्ठमुदरं स्मृतं एकांगुष्ठा कटिर्ज्ञेया द्वौ वस्ती द्वौ च गुल्फकौ ऊरू जंघे च
पादौ च चतुस्त्र्येकं यथाक्रमम् अरण्यवयवा ह्येते याज्ञिकैः परिकीर्त्तिताः यत्तु गुह्यमिति प्रोक्तं देवयोनिः स उच्यते तस्यां यो जायते वह्निः स कल्याण।
कृदुच्यते अन्यत्र मथ्यते यत्तु तद्रोगभयमाप्नुयात् प्रथमे मंथने ह्येव नियमो नेतरेषु च उत्तरारणिनिःप्रमंथः सर्वदा भवेत् योनिसंकरदोषे
ण युज्यन्ते ह्यन्यमंथकृत् आर्द्रा सपुष्पिरा चैव घूर्णाङ्गा स्फुटिता तथा निहिता यजमानानामरणिश्चोत्तरारणिः तथा ० खादिरो वाथ पालाशो वा द्वि
वितस्तिः स्रुवः स्मृतः स्रुग्बाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः आज्यस्थाली च कर्त्तव्या तैजसद्रव्यसंभवा माहेन्द्री वापि कर्त्तव्या नित्यं सर्वाग्निकर्मसु
आज्यस्थाल्याः प्रमाणं तु यथावा कारयेद्बुधः निर्यग्ग्रहसमिन्मात्रा दृढा नातिबृहन्मुखी मृन्मयोदुंबरी वापि चरुस्थाली प्रकीर्त्तिता तथा इध्माजाती
यमिध्मार्द्धि प्रमाणं मेक्षणं भवेत् वृत्तं चाग्रे च पृथ्वग्रमवदानक्रियाक्षमे एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे दर्वी द्व्यंगुष्ठपृथ्वाग्रा तुरीयोनं च मेक्ष राम
णम् मुसलोलूखले वार्क्षे आयते स्वदृढे तथा इच्छाप्रमाणे भवतः सूर्यं स्वं पांकद्भ्यते वेणुमयसूर्य्यकरणे सम्यक्श्रुतिः ॥ अथ सूर्यमादतो ९१

CC-0. In Public Domain. Digitization by eGangotri

वर्षे द्वद्वउस्थैवैते यदिलनानांयद्विवे पूनां यदीकीकाण। मिति कात्यायनसूत्रम् वैकंकतानि पात्राणि॰स्रादिरः स्रुवः चतुर्विंशतिरूपश्च पालासी जुहूः
अश्वत्थप्रभृतिवक्तणान्यहोमसंयुक्तानि॥ अथकुंडनिर्म्माणम् तत्रयज्ञपार्श्वेमु चतुर्विंशतिपाःर्श्वस्यात्कुंस्योनर्थ्यनिषत्तथा चतुर्दशांगुलैरन्यद्व
धिकेरित्तियाज्ञिकाः अरणिश्चतुरस्रंतु पूर्वस्यांगतस्ततोभवेत् रथचक्राकृतिःपार्श्वोच्चकार्द्धइवदक्षिणः आद्यावस्थामार्गस्तु आर्येतोहप्रकीर्त्तितम
॥ त्रिहोकपरिमाणंस्यात्तुरव्याशास्त्रयथाक्रमम् तुर्य्योशस्यनतीयेषुतथैवाढकरस्यच पंचाशच्छुर्द्धराःपश्चात् पूर्वेद्वाभिसप्तभिःदक्षिणेतु क
रस्यानेदशपंचचसप्तच आधानेकीर्त्तिताएवमूरवास्तूल्करशर्कराः वितस्तिमात्रमुत्सर्गोमेखलात्रयसंयुतः अग्नौबाहुरथः कार्य्यो विस्तारे
णाचद्यंगुलः व्याममात्रेणाणछिन्नेनवलीयसा त्रिभिरावेष्टवेर्वे कृषेश्चांद्रमस्तेस्तुमण्डलं अष्टांगुलःप्रमत्तःस्याच्चा न्देतु द्वादशांगुलमु उ
विनीद्वादशांगुलाएषयन्त्रविधिःस्मृतः शंस्याहद्विर्वायस्यहरेत्तृतीयं शंस्यआहवनीयः मर्य्योगाहेयत्यःअथनयोर्हदक्षिणाग्निः छंदोगपरि
शिष्टेकात्यायनः मानक्रियायामुक्तायामुक्तिमानकर्त्तरिमानकृद्यजमानःस्याद्विशत्तास्वेवनिश्चयः तथाअंगुष्ठांगुलिमानंतुयत्रयत्रप्रकीर्त्तितम्
॥तत्रतत्रबृहत्पर्वग्रंथिभिर्म्मिनुयात्सदा अथसमिल्लक्षणम् तत्रवायुपुराणम्॥ पलाशफल्गुन्यग्रोधाःप्लक्षाश्वत्थविकंकताः उदुम्बरस्तथाविल्व
श्चंदनायज्ञियाश्चये शरलोदेवदारुश्चशालश्चखदिरस्तथा समिदर्थेप्रशस्ताःस्युरेतेवृक्षाविशेषतः ग्राह्याःकंटकिनश्चैवयज्ञियायेचकेचन॥
पूजिताःसमिदर्थेषु पितृणांवचनंयथा समिदनुष्टौब्रह्मपुराणम् पालाशाश्वत्थन्यग्रोधप्लक्षवैकंकतो द्भवाः अश्वत्थोदुंबरोविल्वःचंद
नःशरलस्तथा शालश्चदेवदारुश्चखदिरश्चेतियज्ञियाः छंदोगपरिशिष्टेकात्यायनःनांगुष्ठादधिकाग्राह्यासमित् स्थूलतमाक्वचित् ननिर्मु
क्तात्वचाचैवनसकीटानपाटिताःप्रादेशान्नाधिकानोनानतथाशाखाविशाखिनाम् नसवर्णानर्निर्वीर्य्याहोमेषुतुविजानता मित्रायपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रा॰सं शिष्टं अथेध्मार्थे॰ पर्णाश्वत्थखदिररोहितकोदुम्बराणां तदलाभे सर्ववनस्पतीनां तिंदुकधवलप्रनिम्बराजवृक्षशाल्मल्यरत्नकपित्थकोवि
९२ दारविभीतकश्लेष्मातकसर्वकंटकविवर्जितम् वायुपुराणम् निवासा ये च कीटनाम यज्ञिया अगर्हिता: आवेष्टिता ये च कीटै: वल्ली भिश्च स
मावृता: शकुनीनां निवासश्च वर्ज्जयेत्तान्महीरुहान् अन्यांश्चैवं विधान् सर्व्वान् यज्ञियांश्च विवर्ज्जयेत् वायुपुराणम् ॥ प्रागग्राः समिधोदस्था
स्ताश्त्वयान्येषु पातिता: शान्त्यर्थेषु प्रशस्तास्ता विपरीता जिघांसत: विशीर्णा विदला ह्रस्वा वक्राश्च शुषिरा: कृशा: दीर्घा: स्थूला घुणैर्द्दष्टा: कर्म
सिद्धिविनाशका: छन्दोगपरिशिष्टे कात्यायन: आधानयोमयोश्चैव वैश्वदेवे तथैव च बलिकर्म्मणि दर्शे च पौर्णमासे तथैव च नवयज्ञे च य
त्तावदन्येवमनीषिण: ॥ एकमेव भवेत्साई मेतेषु न पृथक् पृथक् तथा गणेश: क्रियमाणेषु मातृभ्य: पूजनं क्वचित् सकृदेव भवेच्छ्राद्धमे
तेषु पृथगादिषु अथाग्न्याधानविधि: तत्र छन्दोगपरिशिष्टे कात्यायन: परिधायाहतं वास: प्रावृत्य च यथाविधि विभृयात्प्राङ्मुखो यत्नमाहितं
वक्ष्यमाणया चन्द्रे वेधे प्रसक्ता ग्रपादौ कृत्वा विचक्षणा: कृतोदगग्रामरणिन्तूर्द्ध मरणिं न्यसेत् पार्श्वाद्ध कीलकाग्रन्तानो विनीयाङ्गुष्ठ गाम् ॥
विशाख धारयेद्यं तन्निस्यंदं प्रयत: शुचि: ॥ त्रिरुद्वृत्याध्यनेत्रेण चाई पत्न्याहतो शुका ॥ पूर्व्वं मंथेदरंय्यन्ते प्राच्यग्ने: स्याद्यथा शुचि: नैकयापि वि
नाकार्य्यमाधानं भार्य्यया द्विजै: अकृतं तद्धि जानीयात्सर्व्वमन्वारभंतिपत् वर्णज्येष्ठेन व स्त्रीभि: सवर्णाभिश्च यत्नत: कार्य्यमग्निरितरा
भि: सर्व्वाभिर्म्मण्डलं पृथक् नात्र शूद्रां नियुंजीत नद्रोहद्वेषकारिणीम् ॥ नानासनस्था नान्ये न पुंसां च सुसंगताम् तत: शक्तेनरा पश्चाद्दास
मान्यतरैर्वा उपेतानामन्यतमामंथेदग्निं निकामत: जातस्य लक्षणं कृत्वा सर्व्वं तंत्रसमन्वितम् गोदद्याद्यज्ञवास्त्वन्ते ब्रह्मणो वाससी तथा ॥ राम॰
अथ कुण्डनिर्म्माणसंस्कारादिकर्म्म तत्र पारस्कर: परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य ९२

CC-0. In Public Domain. Digitization by eGangotri

र्य्यं प्रणीय परिस्तीर्य्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत् प्रोक्ष्य निरुप्याधिश्रित्य पर्य्यग्निं कुर्य्यात् स्रुवं प्रताप्य संमृज्याभ्युक्ष्य पु
नः प्रताप्य निदध्यादाज्यमुद्वास्योत्पूताववेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनकुशानादाय समिधोऽभ्याधाय पर्य्युक्ष्य जुहुयादेव एवं विधिर्य्यत्र क्व
चिद्धोमः पर्य्यग्निकरणं वा कर्त्तव्यम् प्रकृतेवाख्यस्यानुक्तत्वात् पारस्करः वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चतुः पार्श्वे प्रचरन्त्स्वे मरणि
प्रदानमेके पंचमहायज्ञा इति श्रुतेः एतस्याधेयदेवताभ्यः स्थालीपाकं श्रपयित्वाज्यभागौ विष्ट्वा आज्याहुतीर्जुहुयात् त्वंनो अग्ने इमं मे वरु
ण तत्त्वायामि येतेशत। मयाश्चाग्न उदुत्तमं भवतन्नः इत्यष्टौ पुरस्तादेवमुपरिष्टात् स्थालीपाकस्याग्न्याधेयदेवताहुत्वा जुहोति स्विष्टकृते च॥
यास्चाग्नये वषट्कृते यत्कर्म्मणोत्यरीरिचं देवा गातुविद इति वर्हिर्हुत्वा प्राश्नाति ततो ब्राह्मणभोजनं चतुः प्राश्यप्रवचनं श्रौतप्रसिद्धं कर्म्म
कर्त्तव्यम् ॥ एतेन तु वैश्यकुलादग्न्यानयनपक्षे वोढव्यम् स्थालीपाकं श्रपणानन्तरं आज्यभागौ वा घारभागौ हुत्वा त्वन्नो अग्न इत्यादिभिर्म
न्त्रैः प्रथममाज्याहुतयो होतव्याः ततोऽग्नये पवमानायेत्यादिभिः स्थालीपाकान्नेनाहुतिचतुष्टयं होतव्यम् तदनु पुनरपि त्वन्नो अग्न इत्यादि
भिर्म्मन्त्रैराज्येनाष्टाहुतीर्हुत्वा स्विष्टकृदादि होमं समाप्य तूष्णीं समग्नौ वर्हिर्हुत्वा आहुतिशेषं प्राश्य विंशतिब्राह्मणान् भोजयेदिति अग्न्याधा
नदेवता आह कात्यायनः अग्नये पवमानाय प्रथमाग्नये पावकायाग्नये शुचये द्वितीया आदित्येग्नयेस्तृतीया पद्मपार्श्वः गर्भाधानादिसर्वेषु
ब्राह्मणान् भोजयेद्दश आवसथ्ये चतुर्विंशगम्याधेये शतान्त्यरं आग्रायणे प्रायश्चित्ते ब्राह्मणान् दश पंच वा सहस्रं भोजयेत्सोमे ब्राह्मणानां
शतं पशौ चातुर्म्मास्येषु चत्वारिंशच्छतानि च सुरामखे अयुतं वाजपेये च अश्वमेधे चतुर्गुणं छन्दोगपरिशिष्टे कात्यायनः ब्राह्मणो दक्षिणादे
यायापत्रपरिकीर्त्तिता ॥ कर्म्मान्ते तु च्यमानानां पूर्णपात्रादिका भवेत् यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन जायते ॥ नापराध्यमतः कुर्य्यात्पूर्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सं.र. पात्रमिति स्थितिः गोभिलः वैश्यकुलाद्वाऽम्बरीषाद्वा अग्निमाहृत्याभ्यादध्यात् अपि वा बहुयाजिन एवागारात्॥ ब्राह्मणस्य राजन्यस्य वैश्यस्य वा अपि
९३ वा अरणिं मथित्वा अभ्यादध्यात् पुण्यस्त्वेवानुद्धृतो भवतीति यद्यस्तामयेत्तथा कुर्वीत सायं प्रातरेवाऽन्वासमिधं दधाति जायायाः पाणिं जिघ्रेत् जुहो
ति तमभिसंयच्छेत् स एवास्य गृह्योऽग्निर्भवति तेन वैश्या प्रातरहनि हुतो भवतीति छन्दोगपरिशिष्टे कात्यायनः पुण्यमेवादधीताग्निं स हि स
र्वैः प्रशस्यते अनुद्धृतं कृत्वं यत्नस्य कामेऽग्नौ यते समं॥ अथ मणिकाधानम् तत्र पारस्करः अथातो मणिकाधानं उत्तरपूर्वस्यां दिशि पूर्ववद्द्
वटं खात्वा कुशानास्तीर्य्याक्षतान्सरितुकाश्चान्यानि चाभिमङ्गलानि कृद्धि वृद्धि युक्तानि तस्मिन्निनोति मणिकम् समुद्रोऽसीत्यप आसि
ञ्चत्यापो रेवतीः पथ्याहि वस्तुः क्रतुं च भद्रं विदुषामतराय स्वस्वस्य पद्यस्य पत्नीः सरस्वती तद्गृणते वयो धादित्यापो हि ष्ठेति तिसृभिस्ततो ब्राह्म
णभोजनम्॥ अथ वैश्वदेवविधिः तत्र पारस्करः अथातः पञ्चमहायज्ञाः वैश्वदेवास्तथा पर्युक्ष्य स्वाहाकारैर्जुहुयात् ब्रह्मणे प्रजापतये गृह्या
भ्यः कश्यपायानुमतय इति भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै धात्रे विधात्रे द्वार्य्योः प्रतिदिशं वायवे दिशां च मध्ये त्रीन् ब्रह्मणेऽन्त
रिक्षाय सूर्य्याय विश्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्यस्तेषामुत्तरतः उषसे भूतानां च पतये परं पितृभ्यः स्वधा नम इति दक्षिणतः पात्रं निर्णिज्योत्तरस्यां
दिशि निनयेद्यक्ष्मैतत्त इति उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त इति यथार्हं भिक्षुकानतिथींश्च संविभजेत् बालज्येष्ठा गृहस्याः यथार्हमश्नीयुः प
श्चाद्गृहपतिः पत्नी च पूर्वो वा गृहपतिस्तस्मात् स्वादिष्टं गृहपतिः पूर्वमतिथिभ्योऽश्नीयादिति श्रुतेरहरहः स्वाहाकुर्यादन्नाभावे केनचिदाकाष्ठा
द्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात्। अङ्गिराः शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते छन्दोग राम.
परिशिष्टे कात्यायनः। अमुष्मै नम इत्येव बलिदानं विधीयते बलिदानप्रदानार्थं नमस्कारः कृतो यतः स्वाहाकारवषट्कारौ नमस्कारो दिवौकसाम् स्वधा ९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारः पितृणान्तु हन्तकारेनृणांयतः स्वधाकारेणनिर्वपेत्स्विन्नं बलिमतः सदानत्राप्येकेनमस्कारंकुर्वन्तेनेतिगोतमः तथानस्यानांकाम्यसामा-
न्येज्ञ होनिवलिकर्म्मणा पूर्वमिन्यविशेषोक्तेर्जुहोतिवलिकर्म्मणोः काममन्ते भवेयातांनन्तुमध्येकदाचन नैकस्मिन्कर्म्मणितत्तो कर्म्माण्यारभ-
तेततः तथाच पराङ्मुखलयोभवेतिमहामार्ज्जारश्रवणप्रमाणात् एकत्रचेदपकृष्टाभवन्तिइतरेतरमसंसक्ताश्चतथा- सर्वेषाशुभयमद्भिःपरिषेकः
पिण्डवच्चपश्चिमाप्रतिपत्तिः।काम्यवलिदानानन्तरन्यासः।।एतनेनविधानेनवलिंपश्चादुपस्थरोन् अयुक्तस्यानानिवलिकर्म्मादीनांकुत्रकरणी-
यानीत्याकांक्षायांकात्यायनपरिभाषासूत्रे उत्तरउपचारोयज्ञः श्रुतिश्चउत्तरतउपचारोवैयज्ञइति अस्यार्थः अनुक्तस्यानंयत्कर्मतदग्नेरुत्तर
तः करणीयं क्रियमाणत्तत्पश्चिमाद्वारभ्यपूर्वान्तं दक्षिणाद्वारभ्य उत्तरान्तं तथाच कात्यायनपरिभाषासूत्रं प्रागग्राउदगग्रादद्यात् श्रुतिरपी-
दंच कर्म्माणिसंतिष्ठेरन्निति अथसायंप्रातर्होमादिषुछन्दोगपरिशिष्टेकात्यायनः ऊर्द्धं पूर्णाहुतेः प्रातर्हुत्वाचसायमाहुतिंप्रातर्होमान्तः कुर्य्या-
देषएवउत्तरोविधिः ऊर्द्धं पूर्णाहुतेर्दर्शपूर्णमासोपिवाश्रयः यथाचाभिसहोतव्यः सएवाग्निमुप्तिः।गोभिलः सायमाहुत्युपक्रमएवात्र ऊर्द्धं गृह्ये
ग्नौहोमोविधीयते अग्न्याधानानन्तरंगोभिलः एवमतऊर्द्धं गृह्येग्नौजुहुयात् हावयेद्वा आजीवविभृयात् छन्दोगपरिशिष्टेकात्यायनः स्तकेचो-
पवासेच अशक्तौश्राद्धभोजने एवमादिनिमित्तेषुनहावयेदितिपोजयेत्तागोभिलः परास्तमयादग्निं प्रादुष्कृत्यास्तमितेसायमाहुतीर्जुहुयात् पुरो-
दयात्प्रातः प्रादुष्कृत्योदितेअनुदितेवाप्रातराहुतिंजुहुयात्।छन्दोगपरिशिष्टेकात्यायनः। सूर्य्येस्तशैलमप्राप्ते षड्विंशङ्गुलागुलैः प्रादुः-
करणमग्नीनांप्रातर्भाषणादर्शने हस्तादूर्द्धं रविर्य्यावद्गत्वा नगच्छति तावद्धोमविधिः पुण्योनान्योभ्युदितहोमिनाम् यावत्सम्यङ्न भाव्यन्ते
नभस्यृक्षाणिसर्वतः।नचलोहितमापैतितावत्सायंतुहूयतेमरीचिः स्वरश्मिवत्यांसंध्यायां सूर्य्येनक्षत्ररश्मिभिः।होमकालःसनिर्दिष्टोह्यग्निगः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रा·स·
९४

भीनदामही। छन्दोगपरिशिष्टे कात्यायनः रजोनीहारधूमाग्रदृष्टस्यान्तरितेरवौ संध्यामुद्दिश्य जुहुयाद्धुतमस्य न लुप्यते इत्यत्र संध्याकर्मावसाने
तु स्वयं होमो विधीयते स्वयं होमे फलं यत्तु तदन्येन न लभ्यते गोभिलः अथाप्युदाहरन्ति कामं गृह्येऽग्नौ पत्नी जुहुयात् सायं प्रातर्होमौ गृह्याः पत्नी गृ
ह्य एषोऽग्निर्भवतीति आश्वलायनगृह्ये पाणिग्रहणादि गृह्यं सर्वं परिचरेत् स्वयं पत्न्यपि प्रातः कुमार्यन्तेवासी वा नित्यानुगृहीतः स्यात् दक्षः ऋ
त्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः एभिरेव हुतं यत्तु तद्धुतं स्वयमेव च छन्दोगपरिशिष्टे कात्यायन. असमक्षं च दम्पत्योर्होतव्यं नर्त्विगादिभिः
द्वयोरप्यसमक्षं हि भवेद्धुतमनर्थकम् आपस्तम्बः नमोक्षितमन्यावारध्यात् छन्दोगपरिशिष्टे कात्यायनः हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृ
ताः। माषकोद्रवगौरादीन् सर्वालाभेऽपि वर्जयेत् पाणाहुतिर्द्वादशपर्वपूरिका रसादिना चेत् स्रुवमात्रपूरिका देवेन तीर्थेन च हूयते हविः स्वंगा
रिणि स्वर्चिषि तच्च पावके तस्मिन् समिद्धे होतव्यं नासमिद्धे कदाचन आरोग्यमिच्छतायुश्च श्रियमत्यन्तिकां तथा जुह्वन्सव्यहुते चैव पाणि स्त्र्यं त
दाहुतिः न कुर्यादग्निधमनं न कुर्याद्व्यजनादिना मुखेनैव धमेदग्निं मुखाद्ध्येषोऽध्यजायत नाग्निं मुखेनेति तु यल्लौकिके योजयन्ति तत् ब्रह्मपुराणे
सुत्विट्क्रोधनरायुक्तो हीनमंत्रो जुहोति यः। अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि। अल्पे रूक्षे सस्फुलिंगे वामावर्त्ते भयानके आर्द्रकाष्ठे।
च संपूर्ण फुत्कारे परि पावके कृष्णार्चिषि सुदुर्गन्धे तथा निहितमेदिनीम् आहुतीर्जुहुयाद्यस्तु तस्य नाशो भवेद्ध्रुवम् छन्दोगपरिशिष्टे कात्या
यनः आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते मन्त्रस्य देवता याश्च प्रजापतिरिति स्थितिः मैत्रायणीय परिशिष्टे दर्भास्तरणार्थे काशः प्रतिनिधिः
तदलाभे पर्ववतीभिः काण्डवतीभिरोषधीभिस्तरणं निकुर्वन्ति कदाशीरवल्वजान्पूपवर्जम् तथा व्रीहियवैः पुरोडाशस्यार्थे तदलाभे यववतीभि राम
स्तंडुलवतीभिः पुरोडाशान् कुर्वन्ति अथ माषमसूरकुरुवककोद्रवकोरसदृशावर्जम् छन्दोगपरिशिष्टे कात्यायनः होमपात्रमनादेशे द्र ९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेङ्गवद्गव्ये स्रुवः स्मृतः पाणिनैवेति तस्मिंस्तु स्रुवा चात्र न हूयते वायुपुराणे दानं प्रतिग्रहो होमो भोजनं बलिरेव च सांगुष्ठेन तदा कार्यमसुरेभ्योन्य
था भवेत् एतान्येव तु कर्म्माणि दानादीनि विशेषतः अन्तर्जानु विशेषेण तद्वदाचमनं भवेत् छन्दोगपरिशिष्टे कात्यायनः नोत्कुर्य्याद्धोममन्त्रा
णां पृथगादिषु क्वचित् अन्येषां च विकृष्टानां कालेनाचमनादिना स्वयं होमासमर्थस्य समीपमुपसर्प्पणम् तत्राप्यशक्तस्य सतः शय
नाच्चोपवेशनम् ॥ पारस्करः उपयमनप्रभृत्यापांशुलस्य परिचलमस्तमितानुदितयोर्दध्नातण्डुलैः यवैर्व्रीहिभिरग्नये स्वाहा प्रजापतये स्वाहे।
ति सायम् सूर्य्याय स्वाहा प्रजापतये स्वाहेति प्रातः पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ पुमानिन्द्रश्च सोमश्च पुमान् संवर्त्ततामपि पुनः
स्वाहेति मनसा पठित्वा होतव्या यथा निगमस्तस्माद्यत्किंचित् प्राजापत्यं यज्ञे क्रियत उपांश्वेव तत् क्रियत इति एतच्च सर्वा एव प्राजापत्या हुतिर्वो
ढव्यम् अनुदितहोमकालात्ययेऽनुदितहोमिना आज्यं हव्यमनादेशे इति छन्दोगपरिशिष्टवचनादाज्येन व्यस्तसमस्तमहाव्याहृतिहो।
मः त्वन्नो अग्ने इत्यादि पंचाहुतिकं सर्वप्रायश्चित्तहोमश्च विधेयः तथा उपयमनकालातिक्रमकाले पारस्करः कालातिक्रमणे नियमवत् अ
स्यार्थः पारस्करभाष्यकृता व्याख्यातः कालव्यतिक्रान्ते सति पात्नीयनेषु श्रौतेषु निमित्तेऽपि निपाते विहितं स्मार्त्तेषु तदेव भवति तच्च प्रतिम।
हाव्याहृतिभिः सर्वाभिश्चतुर्थं सर्वप्रायश्चित्तमिति कात्यायनसूत्रात् कालव्यतिक्रमादन्यत्राप्यश्रूयमाणप्रायश्चित्ते दोष उत्पन्ने तदेव भव
ति नैमित्तिकान्तराभावात् गोभिलः अहविष्यान्नस्याग्नौ जुहुयात् हुतस्य वा अहुतं चेत्प्रस्थाल्यां जुहुयात् सोदकं कृत्वा अथ यदि पयो द
धि वराल्नं वा कस्यो न वा चरुस्थाल्या स्रुवेणैव अग्नये स्वाहेति पूर्वां तूष्णीमुत्तरां मध्ये चापराजितायां दिशीति सायं अथ प्रातः सूर्य्याय
स्वाहेति पूर्वां तूष्णीमेवोत्तरां मध्ये चैवापराजितायां दिशि तूष्णीमिति प्रजापतये स्वाहेति वोढव्यम् अथवा ज्वलदग्निभागे होतव्यम् ॥ तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चस्तुतिः यत्रैव समिद्धतमं मन्येत तत्राहुतीर्जुहुयात् समिद्धो मे न होव· समिद्धा आहुत यइ ति छन्दोगपरिशिष्टं कात्यायनः कृतमोदनशक्त्वादितं
डुलादिकृताकृतम् व्रीह्यादि वाकृत प्रोक्तमिति हव्यं त्रिधाबुधैः गोभिलः अथ यदि गृह्याग्नौ सायं प्रातर्होमयोर्दर्शपौर्णमासयोर्वा हव्यं वा होता
रं वा नाधिगच्छेत् कथं कुर्यादिति आसायमाहुतेः प्रातराहुतिर्नात्येत्या प्रातराहुतेः सायमाहुतिरमावास्यायाः पौर्णमासं नात्येत्या पौर्णमास्या वा
अमावास्यां· एतेनैवावकाशेन हव्यं वा होतारं वा लिप्सेत अथवा यज्ञियानामेवौषधिवनस्पतीनां फलानि पलाशानि श्रपयित्वा जुहुया
त् अप्यप एवान्ततो जुहुयादिति असमन्वाक एते हुतं स्यैव अहुतस्य प्रायश्चित्तं भवतीति छन्दोगपरिशिष्टं कात्यायनः पौर्णमास्यमये ह
व्ये होता वा यदि हर्भवेत् ॥ तदहर्जुहुयादेवममावस्यायां येपि च आहूयमानेन स्वं स्वेन यस्कालसमाहितः सम्पन्ने तु यथातत्र हूयतेन दि
हेय्यते आहूतं परिसंख्याय पात्रे कृत्वा हुतीः सकृत् मंत्रेण विधिवद्धूत्वा एवमेवापरा अपि अथ पिण्डपितृयज्ञः तत्र कात्यायनः अपरा
ह्णे पिण्डपितृयज्ञश्चन्द्रादर्शे अमावास्यायां दक्षिणाग्नौ अयनं त्रोपरिस्तीर्य पूर्ववत्पात्रासादनं केशोऽपरेणागार्हपत्यं चरुं सपर्णस्रुवं वा तु
ह्णी गृहीत्वान्तरेण दक्षिणाग्निं नाचान्तेनतिष्ठन् अकृत फली करोति· सा रतंडुलपूर्णं श्रपयित्वा अभिघार्योद्वास्य मेक्षणेन जुहोत्यग्नयइ
ति· सोमाय तेति च प्राक्स्वप्राग्येति मेक्षणं कृत्वेति शेषः तद्दक्षिणेनोपलिखत्यपहता इत्यपरे चोल्मुकं पुरस्कुर्यात् करोति ये रूपाणीत्युदपात्रे
णावनेज्य जपत्यपसव्यं सव्येन चोद्धरणासामर्थ्यादसावनिष्विति यजमानपितृप्रभृति त्रिनुपमूलसकृदाच्छिन्नानि लेखायां कृत्वा यथावलिकं
पिण्डान्दत्वात्यमीनमत्त इति ये च त्वामन्विति चैके अत्र पितर इत्युक्त्वा उदङ्मुखो ऽत्वचमादयध्वम मीमदन्तेति जपत्यवनेज्य पूर्ववन्नीवीं विस्रस्य राम
नमो व इत्यंजलिं करोति तद्दइत्युपास्यति सूत्राणि प्रतिपिंडं ऊर्णादशा वा वयसुत्तरे यजमानलोमानि चोर्जमित्यपोनिषिंचत्युपधाया वजिघ्रति ९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजमानस्तु स्वसूक्तद्वाच्छिन्नावनावाधत्तइति मध्यमं पिंडं पत्नी प्राश्नाति· पुत्रकामः पत्नीभ्यो ददाति जीवत्पितृकोपि जीवति पितर्येपि जीवत्पितृ
कस्य होमान्तमनारंभो वाऽलत्पवेत्तिवेति । जातु कर्णेन जीवन्तमभिदधातीति श्रुतेः पूर्वेषां प्राप्तत्वात्· पितृपिण्डपितृयज्ञप्रकरणकालानि लिंगान्तं
गृह्यवचनाहिताग्निश्रुतिभ्योगमकम् एवासमभिव्याहारादनाहिताग्नेरप्येषः । छन्दोगपरिशिष्टे कात्यायनः । स्वशाखोक्तश्चरुश्चिन्नो ह्यदग्धो
ऽकठिनः शुभः ॥ नचातिशिथिलः पाच्योनचवीतरसो भवेत् अथयज्ञादिकाला· तत्र छन्दोगपरिशिष्टे कात्यायनः । पक्षादावेव कुर्वीत सदा
पक्षादिपंचकम् । पूर्वाह्ण एव कुर्वीत विद्धेप्यन्ते मनीषिणः लघुहारीतः पर्वणोऽन्ते तुरीये तु कार्य्याद्दृष्टिर्द्विजातिभिः द्वितीयासहितं यस्मा
द्वेच पत्याश्वलायनः ॥ अथपक्षादिकर्म्म तत्र पारस्करः पक्षादिषु स्थालीपाकं श्रपयित्वा दर्शपौर्णमासदेवताभ्यो हुत्वा जुहोतिब्रह्मणे प्रजाप
तये विश्वेभ्योदेवेभ्यो द्यावापृथिवीभ्यामिति विश्वेभ्योबलिहरणम् भूतगृह्येभ्य आकाशाय च वैश्वदेवस्याग्नौ जुहोति· अग्नये स्वाहा· प्र
जापतये स्वाहा विश्वेभ्योदेवेभ्यः स्वाहा अग्नये स्विष्टकृते स्वाहेतिवाह्यतः स्त्रीबलिहरति नमः स्त्रियै· नमः पुंसे· वयसे नमः शुक्लाय कृष्ण
दन्ताय पापपतये येन मोऽथे मे प्रजामुपलोभयन्ति ग्राममेवसन्ति वारण्यान्ते भ्यो नमोऽस्तु बलिमेभ्यो हरामि· स्वस्त्यस्तु· प्रजामे ददातीति विशेषमद्भिः
प्राप्लाव्याः ततो ब्राह्मणभोजनं अथ दर्शानन्तरं प्रतिपदि देवताभ्यः स्थालीपाककृतान्ब्राह्मणानां स्थालीपाको विधेयः तत्र दर्शे देवताः ।
अग्निर्विष्णुरिन्द्राग्नी च· पौर्णमासदेवताः अग्निरग्नीषोमौ च छन्दोगपरिशिष्टे कात्यायनः यावताहोमनिर्वृत्तिर्भवेद्योयत्रकीर्त्तिता शे
षं चैवं भवेत्किंचित्तावन्तं निर्वपेच्चरुम् अथस्रुवादिपात्रनिर्म्माणानन्तरं सामान्यधर्मे छन्दोगपरिशिष्टे कात्यायनः । तेषां प्राक्कुशैः कार्य्यः
संप्रमार्गो जुहूर्ध्वीप्रदीपनं बलिप्रोन प्रक्षाल्योऽनेन वारिणा ॥ पत्रासादने कात्यायनः अप्रणस्य पश्चादुत्तरतोवेति· अत्रच· प्राग्निउद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्निचरुकर्म्माणीति सामान्यपरिभाषाबलात् प्रागग्न्यन्येव यजुर्वेदिनापात्राण्यासादनीयानि याज्ञवल्क्यः कर्षूर्णां सेचनं चैव तत्रैवोल्लेखनं क्रि-
या प्रदक्षिणं वदायुवन्तीति दक्षिणावर्त्तेन स्थालीगतमन्नं विनोभयान्तिन्यर्थः शृतमभिघार्य्योद्वास्य प्रत्यभिघारयेत् इति पश्चादिकर्म्म अत्र
च आधानानन्तरं प्रथमाब्दे श्रावणपौर्णमासीमारभ्य कार्त्तिकपौर्णमास्यन्तयोः षोडशमासपर्यन्तं पारस्करगृह्योक्ताः पाकयज्ञाः पारस्करोक्त-
नन्ततिथिषु कर्त्तव्याः यद्वा एतेषां पाकयज्ञानामाधानानन्तरं प्रथमाब्दे कर्त्तव्यत्वं ज्ञापयति शाण्डायनः यथा संस्कारश्रवणाकर्म्म प्रभृतिर्यो निग-
द्यते आधानानन्तरं कार्य्यं संप्रत्यब्दमिति स्थितिः अकरणे च शाण्डायन एव पापोत्पत्तिं व्यापयति यथा आधानानन्तरं चैते सकृदेव यथाविधि
कृताः संस्कारमाददधुरकृताः पापहेतवः अत्र वचनद्वये एकत्र प्रत्यब्दकर्त्तव्यता अपरत्र सकृत्कर्त्तव्यता कयज्ञानामुक्ता तत्रेयं व्यवस्था। आ-
धानानन्तरं प्रथमाब्दे ऽवश्यमेषां कर्त्तव्यत्वं अकरणे पापोत्पत्तिः प्रत्यब्दकरणे तु संस्कारातिशयजनकत्वात् एषामकरणे अदृष्टातिशयो भवती-
ति एवं सत्याधानानन्तरं प्रथमाब्दे श्रावण्यादिवृषोत्सर्गान्तानामकरणे प्रायश्चित्तपूर्वकं पुनराधानं कृत्वा एते करणीयाः पुनराधानकरणे तु पौष्णमाधी-
होमे सन्न्यस्य कर्म्मणां संपत्तिर्दृश्यते अत्र कर्म्मसु तत्रैतत्पुनराधानं कारयेद् विचारतः प्रायश्चित्तं तु गृह्योक्तावश्यकर्त्तव्यतेयदि कर्म्मणामकरणेतु-
क्तमेव अत्र प्रतिपदुक्तप्रायश्चित्तप्रतिपादकवचनाश्रवणात् सामान्यपरिप्राप्तउशनसोक्तमेव प्रायश्चित्तं कर्त्तुं युज्यते यथाह उशनाः यत्रोक्तं यत्र
वानोक्तमिह पातकनाशनं प्राजापत्येन कृच्छ्रेण शुद्ध्यते नात्र संशयः एवं व्यवस्थिते श्रावण्यादिवृषोत्सर्गान्ताः पाकयज्ञाः पाकयज्ञपद्धत्युक्त-
क्रमेण आधानानन्तरमवश्यमेकवारं करणीयाः पाकयज्ञपद्धतिश्च सनिबंधाः स्मृत्यर्थसारस्थिकपशुपतिकृताः स्येवं सैव लोके प्रसिद्धा तेना- राम
स्माभिरस्मिन्विषये न कृतेति अथ पुनराधाननिमित्तानि तत्र छन्दोगपरिशिष्टं कात्यायनः विहाय अग्निं सभार्य्यश्चेत् सीमामुल्लंघ्य गच्छति होम- ९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालात्ययेत्तस्य पुनराधानमिष्यते अरण्योः क्षयनाशेऽग्निदाहे अग्निं समाहितः पालयेद्दुपशान्तेऽस्मिन् पुनराधानमिष्यते मरीचिः दूरस्थोऽपि पत्नी
कस्माद्धोमलोपः प्रजापते कर्त्तव्यं पुनराधानं प्रायश्चित्तं न विद्यते। बौधायनः अमेध्याद्याधानेऽसमारोप्य निर्मन्थिता पवमाने ष्टिं छन्दोगप॥
तिशिष्टं कान्याघनः ज्येष्ठाधर्मस्य मार्गेण व्यभिचारेण गच्छति पुनराधानमात्रैकइच्छंति न तु गौतमः यत्र पार्श्वे दृष्टोऽग्निर्यत्र न स्यात्तु मथ्यमाने हुताश
ने यत्नं तु न चलेद्यत्र पुनस्तत्रैव निर्मन्थेत् ग्रामान्तसीमांतरं गच्छेत्स्वयं सोहव्यवाहनः आहुतो वत्सरं गच्छेद्वाहकेन समं गतः चतुर्भिः कारणैरे
भिन्नं पृषतो पुनरावहेत् मंडले क्रियमाणे सति दृष्ट्वैष्विज्वलयितुं नापारिः यंत्रे च न चालितम् तदास्मिन्नेव स्थाने पुनर्मन्थित्वा ज्वलयितव्यः
यदा तु यंत्रे चालितं तदा तस्मिन्नेव समये अग्निं प्रज्वाल्य अन्याधेयदेवता होमादि पुनराधानं कर्त्तव्यम् तदा प्रत्यस्मोद्यरूपपामनारोपितः श्रोतो
ग्निः सोमान्तरं यदि नीयते तदापि पुनराधानं तथा पत्न्या अनवस्थितत्वे ऋत्विजा होमे क्रियमाणे पि वत्सरमेकं यजमानेन होमाकरणे पुनराधा
नं तथा कुत्रापि नीयमानेऽग्नौ यद्येकोऽग्निपुहस्तास्तद्वदा तद्दिना जलमपि पतति तथापि पुनराधानम् तदैवं चतुर्भिः कारणैः पुनराधानमिति सा हे
श्लोकद्वयार्थः पितृमेव च दीक्षायां जाया वधुप्रभृतिषु एतैरेव वहेदग्निं प्रत्तक्षमनसादिनाः अतो विना समारूढः शस्या प्रशमान्यरस्तु यो दि
लौकिकेन समो ज्ञेयो नदी मात्रा निदर्शनात् दीप्तिस्तु धूमांगारपावकः प्रशमेत्यादि उच्छन्नाग्निः स विज्ञेयः पुनराधानमर्हति पर्वणा चैव होमानां
विच्छित्तिरुभयोर्यदि प्राप्नयोः पर्वकाले तु पुनराराधानमर्हति यजमानश्च पत्नी च उभौ प्रवसतां यदि आहोमा आदिना गच्छेत् पुनराधानम
र्हति अचोदितेन पाकेन हुतेनो हुरणेन वा लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति अरण्योर्दग्धयोर्वापि नष्टयोः क्षीणयोस्तथा आहत्या
नि समारोप्य पुनस्तत्रैव निर्मथेत् दाहो नाशः क्षयो वापि द्वयोरपि यदा भवेत् समारोपहते चाग्ने पुनराधानमर्हति मथ्यमानेत योरग्नौ यदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा·स· पूर्व्वन्तु दृश्यते मथ्यमानं समारोप्य पूर्व्वहोमो विधीयते यत्तु पार्श्वः दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीः पतिः आहरेद्विधिवद्दारमग्निं चैवाविलम्ब
९७ यन् मनुः भार्य्यायै पूर्व्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि पुनर्दारक्रियां कुर्य्यात्पुनराधानमेव च छन्दोगपरिशिष्टं कात्यायनः दाहयित्वाग्निना
भार्य्यां सदृशीं पूर्व्वसंस्थितां पात्रैश्चाथाग्निमादध्यात्कृतदारो विलम्बितः वृद्धहारीतपार्श्वः भार्य्यालाभे विपत्नीकत्वे पुनराधानमिष्यते छन्दोगपरि
शिष्टं कात्यायनः चैतरि पुनराधानं यस्याग्नीनां विधीयते अकुर्व्वंस्ताव दाश्नोति प्रायश्चित्तं कृतात्मिनो एवं सति भार्गवास्त्वादिकालाशौचे पित्र्यकौ
त्याशौचे पि स्वव्यपगमानन्तरमेवावलम्बितपुनराधानं कुर्यात् तथा दक्षः नैमित्तिकानि दानानि निपतन्ति यथा यथा तथा तथैव कार्याणि न कालं
तु विधीयते तथा अरण्येकल्पमप्यंशं यावत्तिष्ठति पूर्व्वयोः तत्रावश्यपुनराधानमग्न्यारम्भो विधीयते छन्दोगपरिशिष्टं कात्यायनः पूर्व्वैव योनिः
पूर्व्वावृत्पुनराधानकर्म्मणि विशेषोऽत्राग्न्युपस्थानमाज्याहुत्यष्टकं तथा अथ प्रोषितधर्म्मः तत्र छन्दोगपरिशिष्टं कात्यायनः निःक्षिप्याग्निं स्वदारे
षु परिकल्प्य हि जं तथा प्रवसेत्कार्य्यवान्विप्रो वृथैव न चिरात्क्वचित् मनसा नैत्यकं कर्म्म प्रवसंनप्यतंद्रितः उपविश्य शुचिः सर्व्वं यथाकालमुपाचरेत्
हारीतः नाग्निवेलायां प्रवसेत् सर्व्वासु च आपस्तम्बः प्रोषितोग्निवेलायां वाग्यतः प्रतिदिशमनसा ध्यात्वा उपस्थाय मंत्रोक्तौ हुत्वा अग्ने: प्रतपनं इत्युपस्था
यामभिभाषते पैठीनसिः प्रवसितस्य प्रोषितमनसा वेव जुहुयात् निर्व्विष्टया सोरसोपालानस्य अपासनस्येति आवसथ्याग्ने: मैत्रायणीयपरिशिष्टं।
। ऋषयोस्य प्रयासुकाः आश्वनात् तथोर्द्ध्वं रात्राय परवात्रायपत्न्या स्वरात्राय द्वैमासा यास्मिहोत्रमजुहुयुः तस्मात् प्रायास्यव्याधानो वार्द्धमासाग्नि
होत्रे जुहुयात् पश्चाद्दीपर्व्वणान्ते च सायं च प्रातरेव च चतुर्द्दश चतुर्गृहीतानि सकृद्धवयते मे कासमिन् । सकृद्धोमे सकृन्याणि तिर्म्मार्जेत सिमेवंप्र राम·
तः मरीचिः पक्षस्तोमानयोगत्वात्कस्मात्सिवर्त्तितव्यः होमं पुनः प्रकुर्व्वीत तत्र चैतेन सहोपभाक् अथ सामान्यपरिभाषा छन्दोगपरिशिष्टं कात्या ९७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसृष्टमुपशामयेत् असंसृष्टं यागस्तेद्दि विशर्मैवमुक्तवान् अस्यार्थः वैश्वदेवान्नादिपाकनिमित्तं उद्धृतेऽग्नौ हि सेसति· यद्यन्यत् । त्रु·पं· ९ ॥
यतः नस्वेग्नावन्यहोमास्तान्मुख्ये कांसमिदाहुतिम् स्वगर्भसंस्कृता यांच यावन्तो सौ प्रजापते अग्निश्च नामधेयादौ होमो वैसार्वे लौकिकः नहिपि
त्रास्माग्नौनः पुत्रस्य भवति कश्चित् । अस्याग्नावन्यहोमः स्यान्स्वैश्वानरदैवत्य मन्त्रकं निर्वर्त्यं जुहुयात्तस्यैव तस्य प्रायश्चित्तिस्स्यादारोपि पुनर्होतानकु
तश्चित्कारणान्तरात् यदिच्छेदग्निमानं कर्तुः क्व होमोस्य विधीयते स्वेग्नावेव भवेद्धोमो लौकिके न कदाचन न ह्याहिताग्निः स्वं कर्म लौकिकेग्नौ
विधीयते अथाग्निपरिचर्या पत्न्या वियोगिन्या शुश्रूष्योग्निर्विनीतया सौभाग्यधृत्यवैधव्यकाम्यया भर्तृभक्तया अग्नेरिष्टा सशुश्रूषा वह्नभार्यैः स
वर्णया ॥ कारयेत्तद्धुतं चैव ज्येष्ठया मर्हितानचेत् यावत्स्याद्दूरस्त्रमाज्ञासंपादिनी प्रियादक्षा प्रियंवदा शुद्धा ता मत्र विनियोजयेत् दिनक्रमेण वा
कर्मैव यथाज्येष्ठमशक्तौ तु विभज्य सह वा कुर्युः यथाज्ञानं यथा शास्त्रवत् स्त्रीणां सौभाग्यतो ज्येष्ठा विद्ययैव हि जन्मनाम् न हि स्वस्येन पुण्येन भर्त्ता
तुष्यति योषिताम् भर्तुरादेशवर्तिन्याय या होमाहतिकृतो भर्त्ता च तोषितो यत्र सा स्त्री सौभाग्यमर्हति छन्दोगपरिशिष्टे कात्यायनः विनष्टेस्तु कृत्स्नु
ज्वप्रत्यक्स्थानमुदक्चित्विपिप्रस्मज्जुखं च मुसलं प्रहरेज्ज्ञानवेदसि यज्ञपार्श्वः अवसथ्यान्तु कर्म्मार्थं योग्निरुद्धूयते क्वचित् कर्मणः कर्म्मणः कालेतन्त
माहुरुपासकम् छंदोगपरिशिष्टे कात्यायनः द्विर्भूतो यदि संसृज्येतेतौ ग्निर्हौकिकाग्न्यादिभिः संसृष्टो भवति तत्स्थानमग्निं परित्यज्यासंसृष्टमग्निं जाग
रयेनर क्षेत्त एतेनो द्धृतस्याविशिष्टस्य चाग्नेरदृष्टत्वाल्लौकिकत्वं प्रतिपादयति तथापरात्क्वापिराडपि नु यत्स्यादिस्य ध्यायेकर्म्मकरिडकायां कात्याय
नसूत्रविषये लौकिकमयुक्तत्वात् अस्यार्थः कर्क्कणाव्याख्यातः विषयेसन्देहं विषये किमाहिताग्निर्गृह्यतां लौकिकाग्निं गृह्णीयात् कुतः अ
युक्तत्वात् विधिनागार्हपत्यादेरयुक्तत्वात् अप्रयुक्तत्वात् प्रतिपादितत्वादिति यावत् तथा ज्योतिष्टोमे च सतां कवीनामेकशोकारुणानामिसरानु
जनग्रहणप्रस्तावे उन्दिषी विरण्यम्बोषर्युपरिधारयन्तीति तत्र गार्हपत्यादेरग्निविशेषस्याप्रतिपादितत्वात् लौकिकाग्निज्वालिते स्त्रुङ्क्षाउपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रा·स· ९८ धारिणीयास्वयमन्यच्चापि विषये यत्राग्नेर्विशेषो न श्रुतः तत्र लौकिकमेवाग्निं गृह्णीयादिति कर्क्कव्याख्यापि एडपितृयज्ञकर्क्कभाष्ये शाखान्तरश्रु
तिः पूर्वं वै देवानामहः पूर्णमनुष्याणाम् · उपर्य्यवं पितॄणां · उपर्य्येवमपूर्वं पानो चित्तमित्यर्थः जनने मरणे नित्यमाशुच्यमनुधावति सपिण्डान्मातृवं
धूश्च यत्र क्वचन गच्छति यो नित्तानि हि जोच्छिष्टमशुच्यं सहवासिषु मूर्त्तेर्गुरोरशौचं स्यान्मृत्युप्रसवकारणम् कारणाद्गच्छति प्रेष्यं तदाशुच्यं
न तान्व्रजेत् दक्षः सद्यः शौचं तथैकाहस्त्र्यह श्चतुरहस्तथा षड्विंशद्द्वादशाहश्च पक्षो मासस्तथैव च मरणान्ते तथा चान्यद्दशपक्षस्तु सूतके म
नुः शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः । वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यति पराशरः एकाहाद्ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः
त्र्यहात्केवलवेदज्ञो निर्गुणो दशभिर्दिनैः दक्षः एकाहाद्ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा अत्र ही
ने श्रोताग्निरहिते वेदाध्यापनस्मार्त्ताग्नियुक्ते त्र्यहः हीनतरे श्रोताग्निवेदाध्यापनरहिते केवलस्मार्त्ताग्नियुक्ते चतुरहः ॥ अथाशौचे विधि
निषेधौ जाबालः संध्यां पंचमहायज्ञान्नैत्यकं स्मृतिकर्म्म च । तन्मध्ये हापयत्तेषां दशाहान्तेषु वै नृणाम् · उपर्य्येवं पितॄणाम् · उपर्य्येवमपूर्वं पा
नो चित्तमित्यर्थः जनने मरणे नित्यमाशुच्यमनुधावति सपिण्डान्मातृवं धूश्च यत्र क्वचन गच्छति यो नित्तानि हि जोच्छिष्टमाशुच्यं सहवासिषु ।
मूर्त्तेर्गुरोरशौचं स्यान्मृत्युप्रसवकारणम् कारणाद्गच्छति प्रेष्यं तदाशुच्यं न तान्व्रजेत् दक्षः सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्त
था षड्विंशद्द्वादशाहश्च पक्षो मासस्तथैव च मरणान्ते तथा चान्यद्दशपक्षस्तु सूतके मनुः शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः वैश्यः पंच
दशाहेन शूद्रो मासेन शुद्ध्यति पराशरः एकाहाद्ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः त्र्यहात्केवलवेदज्ञो निर्गुणो दशभिर्दिनैः दक्षः एकाहाद्ब्राह्म राम·
णः शुद्ध्येद्योऽग्निवेदसमन्वितः हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा अत्र हीने श्रोताग्निरहिते वेदाध्यापनस्मार्त्ताग्नियुक्ते त्र्यहः हीनतरे श्रो ९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताग्निवेदाध्यापनरहिते केवलस्मार्त्ताग्नियुक्तेचनुराह अथाशौचेविधिनिषेधौजाबालः संध्यांपंचमहायज्ञान्नैत्यकंस्मृतिकर्मचतन्मध्येहापयेत्तेषां
दशाहान्तेपुनःक्रियाः छंदोगपरिशिष्टंकात्यायनः सूतकेकर्म्मणांत्यागः संध्यादीनांविधीयतेहोमः श्रौतेचकर्त्तव्यः शुष्कान्नेनाथवाफलैः अकृतेहारये
त् स्मार्त्तेतदभावेकृताकृतं हारयेदिति किंतस्यानारंभविधानतः कृतमोदनसक्तु दिंडुलादिकृताकृतम् व्रीह्यादि चाकृतंप्रोक्तमिति हव्यंत्रिधाबुधैः सू
तकेचप्रवासेच अशक्तौश्राद्धभोजने एवमादिनिमित्तेषु हापयेदितियोजयेत् जाबालः जन्महानौवितानस्यकर्म्मत्यागोविधीयते शालाग्नौकेव।
लोहोमः कार्य्यएवान्यगोत्रजैः मनुः उभयत्रदशाहानिकुलस्यान्नंनभुज्यते दानंप्रतिग्रहोहोमः स्वाध्यायश्चनिवर्त्तते यमः सूतकेचकुलस्यान्नमभोज्यं
मनुरब्रवीत् एकादशेऽह्निकुर्य्यात्तु दानमध्ययनंतपः। अथान्त्येष्टिः तत्रकात्यायनः सायमाहुत्यांहुतायां चेद्दुर्बलः स्यात्तथैवप्रातराहुतिस्तत्संस्था।
श्रुतेः अग्निहोत्रस्ययावज्जीवमतः कालेन कृतत्वात् पौर्णमासान्तत्वगाचास्याग्निहोत्रवद्विधेयत्वं चेदाह्रियमाणेमरणंदक्षिणाग्नेरेवाधानसन्देहे नवायु
क्तत्वात्तगार्हपत्येग्रहणादिप्रमाणाद्गार्हपत्यादाहवनीयेमरणान्तं भवति संस्थाप्यवाप्रकृतत्वात् हविष्यवद्धोम्यंसंदीपवत्तो प्रत्यग्निविश्रयंस्तुथासंवापजा
नर्त्नीनांदायसवीचीवादक्षिणाग्रान्न्यस्याविजनंसाधयित्वास्तमवहुलतृणैरन्तराग्निचितिन्चित्योद्धृत्यशीर्षाणिः पुरुषाकृतिर्विशास्वशराश्मगं धपृषि
पर्णमुण्डोऽश्मश्रुणोनयनं निकृन्तनानिकृत्वारिपुरीषंचेच्छुल्केशादिनिशयथायसर्प्पिषान्तराह्लाद्विनायनमादधाति कृष्णाजिनमास्तीर्य्यप्राक्शिर
संस्तप्तसुप्राणायतनेषुसप्तहिरण्यशकलान्प्राश्यतिमुखेप्रथमंदक्षिणहस्तेजुहूमादायति· हृतपूर्णांस्थाचापभृतंसव्यभसिग्नवांसुचेग्निहोत्रहर।
णीन्नासिकयोः सुवौः कर्णयोः प्राशित्रहरणोंशिरसिचसमंप्रणीतप्रणयनं कपालनिचैकेपार्श्वेयोर्गोदोदरेपात्रींसमधत्तः धानीपूषादाद्यवंतौशिश्नेशम्यापा
मरणीवृषणयोरन्तरोरुयदपाणिन्यान्यस्त्रुवहरणंमृन्मनाश्ममयानामयस्मयानिवाब्राह्मणायदद्यादरणीतन्यप्श्वाल्कर्णमाहसहस्तयोर्द्वेकांवंशेत्वगानी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिजानू कृत्वैनेवास्थितं देहाद्द्ययामुखमवलिह्याग्निमिमं दीपयन्याहुतिं जुहोतिपुत्रेप्रेतेऽन्योवाब्राह्मणः अस्मात्त्वमधिजातोसित्वय्ययं जायतांपुनः असौ
स्वर्गाय लोकायस्वाहेतियजुषीरयन् अस्मात्त्वमधिजातोसीतिमंत्रोयथा हेअग्नेअस्माद्यजमानादाधानकाले त्वंअधिजातोसित्समुत्पन्नोसिअहानोहेत्र
वीमिअयंयजमानः पुनरपित्वत्सकाशाज्जायतामुत्पद्यताम् किमर्थम् स्वर्गायलोकायस्वर्गलोकप्राप्त्यर्थम् असावितिविशेषनामविशेषणार्थम् स्वाहेतिसं
प्रदानमंत्रः तथाच्छंदोगपरिशिष्टंकात्यायनः हत्वा यासायमाहुतीर्दुर्बलस्त्वंगृहीभवेत् प्रातर्होमस्तदेवस्याज्जीवेत्यादिपुनर्नवादुर्बलंस्वपयित्वातुशु
द्धचैलाभिसंवृतम् दक्षिणाशिरसंभूमौचर्हिष्मत्यांनिवेशयेत् घृतेनाभ्यक्तमाप्लाव्यसवस्त्रमुपवीतिनम् चंदनोक्षितसर्वांगंसुमनोभिर्विभूषितम् हिरण्य
शकलान्यस्यक्षिप्त्वाछिद्रेषुसप्तसुमुखेष्वथोपिधायैनंनिर्हरेयुः सुताद्यः आमपात्रेऽन्नमादायप्रेतमग्निपुरःसरम् एकोनुगच्छेत्तस्यार्द्धमध्यमप्युत्सृजेद्भु
वि अर्द्धमोदनंप्राप्तमासीनोदक्षिणामुखः सव्यंजान्वाच्यसनकैः सतिलंपिण्डदानवत् अथपुत्रादिराप्लुत्यकुर्याद्दारुचयंमहत् भूप्रदेशेशुचौदेशेप
श्चाच्चित्यादिलक्षणम् तत्रोत्तानंनिपात्यैनंदक्षिणाशिरसंमुखे आज्यपूर्णांस्रुवंदद्याद्दक्षिणाग्रमसिस्रुवं पादयोरधरांप्राचीमरणीशिरसीतरान् पा
र्श्वयोः सूर्प्यंचमसौसव्यदक्षिणयोःक्रमात् मुशलेनसहत्वुखमन्तःसर्व्वौरुत्त्वलम् चांद्रोविनीकमत्रैवअनसुत्नपनोविभीः अपसव्येनकृत्वैनद्वाग्द्यतः
पितृदिङ्मुखः अथाग्निंसव्यजानूक्तोदद्याद्दक्षिणतः शनैःसव्यजानुकृत्वातिपातितवामजानुः अस्मात्त्वाधिजातोसित्वदयंजायतांपुनः असौस्वर्गायलोकायस्वाह।
तियजुरीरयन् एवंगृहपतिर्दीप्तः सर्वंतरतिदुःष्कृतम् य पैनंदाहयेत्सोपिगतिंप्राप्नोत्यनिन्दिताम् यथास्त्रंपुधभृत्यान्तेभयस्थानेपिनिर्भयः अतिक्रम्यपरं
ब्रह्मैवविंदति अथानवेक्ष्मेत्यापः सर्वएवशवस्पृशः स्नात्वासचैलमाचम्यदद्युरस्योदकंजले गोत्रनामपदान्तेनतर्पयामीत्यहंवचः दक्षिणाग्रान्कुशा
न्कृत्वासतिलांस्तुपृथक्पृथक् एवंकृतोदकान्सम्यक्सर्वान्शाड्वलसंस्थितान् आप्लुत्यपुनराचान्तान्वदेयुस्तेनुयायिनः माशोकंकुरुतामर्त्येसर्वे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिन्प्रणिधर्म्मेणि धर्म्मं कुरुत यत्नेन यो वः सह गमिष्यति मानुष्ये कदलीस्तंभनिस्सारे सारमार्गनम् करोति यः स संमूढो जलबुद्बुदसन्निभे गंत्रीव सुस
तीनाशमुदधि दैवतानिच फेनप्रख्यं कथं नाशं मर्त्यलोके न यास्यति पंचधा संभृतः कायो यदि पंचत्वमागतः कर्म्मभिः स्वशरीरोत्थैस्तत्र का परिवेदना सर्वे क्ष
यान्ता निचयाः पतनान्ताः समुच्छ्रयाः संयोगाश्च वियोगान्ता मरणान्तं हि जीवितं श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतो मलः अतो न रोदितव्यं हि क्रिया कार्या
प्रयत्नतः एवमुक्त्वा व्रजेयुस्ते गृहं बालपुरःसराः स्नानाग्निस्पर्शनाद्यास्मैः स्पर्शं पुरितरे कृतैः अनयैवावृता नारी दग्धव्यानुव्यवस्थिता अग्निप्रदानमंत्रा
स्यां न प्रयोज्य इति स्थितिः अग्निनैव दहेद्भार्य्यां सुतंत्रापतिता न चेत् उदुंवरेण पात्रेण दाहयेत्स्वयगन्निके सुतंत्रेति आधानसमये अनुपस्थिता अ
थास्थिसंचयनम् अपरेद्युस्तृतीये च अस्थिसंचयनं भवेत् यो ह्यत्र विधिरुद्दिष्टः ऋषिभिः सोधुनोच्यते स्नानान्तं पूर्ववत्कृत्वा सव्येन पयसा तथा सिंचेदस्थी
नि सर्वाणि प्राचीनावीत्यभाष्यन् शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मनः आज्येनाभ्युक्ष्य गव्येन सेचयेद्गंधवारिणा मृत्पात्रसंपुटे कृत्वा सूत्रेण परिवे।
ष्टय च अन्वे शिन्या शुचौ भूमौ निखनेद्दक्षिणामुखः पूरयित्वावटुं पकपिण्डैर्वा संयुतम् तत्रोपरिसमं शेषं कृत्वा पूर्व्वाह्ण कर्मणि एष एव गृहीताग्नेः प्रेतस्य विधि
रिष्यते तावदग्नेः प्रदानस्याद्यथातोऽनुक्त उच्यते तथा विदेशमरणे स्थीन्याहृत्याभ्युक्ष्य सर्पिषा दाहयेन्न्यूर्णामाछाद्यापालाशादिषु पूर्ववत् अस्थ्नाम।
भावे पर्णानि सकलान्युक्त आहृता दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकम् एवमेवाहिताग्नेस्तु पात्रस्याशादिकं भवेत् कृष्णाजिनादिकं चास्य विशेषो ध्व
र्युनोदितः पारस्करः दाह्य येन भूमिपोषणादि समानयथाविहिताग्नेरुदकान्तस्पर्शनात् शालाग्निना दाहयन्ते नमाहिताग्नेन्न्यूर्छी ग्रामाग्निनेत्तरं संयु
क्तमैथुनं नोदकं करिष्यामह इति कुरध्वं सा चैवं पुनरिह गवर्षे प्रत कुरुध्वमेवेतरस्मिन् सर्वेज्ञानयो ह्युपयन्त्यान् सप्तमात्पुरुषाद्दशमाद्वा समानग्रामवयो
बंधुस्वकुलमनुसरेयुरेकवस्त्राः प्राचीनिवीतिनः संव्यस्या नामिकाया अप आलोड्यपनः शोशुचदघमिति दक्षिणामुखा निमज्जंति प्रेताय उदकं सकृत् प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·सू सिंचमंजलिनासावेत्तत्त इत्युदीर्णान्शुचौ देशे शाड्वलवत्सुपविष्टास्तत्रैचानप्रवदेयुरअनपेक्षमाणाग्राममायांति उपवीतिनितिरोभूताः कनिष्ठपू
१०० र्वाः छंदोगपरिशिष्टं कात्यायनः महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि पुत्रादिः पालयेदग्नीन्युक्त आदोषसंक्षयात् प्रायश्चित्तं न कुर्याद्यः कुर्वे
न्वा म्रियेतयदि गृह्यं निर्वापयेच्छ्रौतं ग्रसुदस्येशपविच्छेदम् सादयेदुभयं वाप्सु अज्झो मिरभवद्यतः पात्राणिदद्याद्विप्राय दहेदप्स्वेववाक्षिपेत् इत्यावसथिक
महाधर्म्माधिकृतश्रीहलायुधकृतो ब्राह्मणसर्वस्वे आवसथ्याधानादि अन्त्येष्टिकर्म्म पान्तं व्याख्यातं आवसथ्याधाने अग्निस्थापनाद्याज्यहोमानन्तरंप
रस्कारः आज्यभागाविष्टा आज्याहुती जुहोति त्वं नो अग्नेः सत्वन्नो अग्न इमं मे वरुण तत्वायामि येते शत मयाश्चाग्न उदुत्तमं भवतन्त्व इत्यष्टौ पुनस्ता
देवमुपरिष्टादिति तत्राज्याहुति मंत्रार्थो यथा त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांसि प्रमुमु
ग्ध्यस्मत्स्वाहा अस्यार्थः हे अग्ने त्वं वरुणस्य देवस्य हेडः क्रोधं अस्मिन् कर्म्मणि वैगुण्यप्रजनितं अवयासिसीष्ठाः अपनय किंभूतस्त्वं नोः अस्मान् वि
द्वान् त्वमेव अस्माकं कर्म्मसाक्षित्वेनास्मान्जानासीत्यर्थः न केवलं वरुणस्य क्रोधमपनयः अस्मत् अस्मद्द्वेषांसि दौर्भाग्यानि प्रमुमुग्धि प्रमोचय किंभू
तानि विश्वा सर्वाणि त्वं किंभूतः यजिष्ठः यागातिशययुक्तमः पुनः किंभूतः वाह्नितमः हविषां वहने प्रापणे सातिशयः किंभूतः शोशुचानः उत्तरोत्तरं
दीप्यमानः अग्ने त्वमस्मान्जानासि अतोस्माकमस्मिन्कर्म्मणि प्रमादादिजनितं वैगुण्यकृतं वारुणं क्रोधमपनय अस्माकं दौर्भाग्यानि मोचये
तिप्रार्थनावाक्यार्थः हेड इति हेड्ड अनादर इत्यस्य प्रयोगः द्वितीयैकवचने प्रथमैकवचनम् सत्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अव
यक्ष्वनो वरुणं रराणो वीहि मृडीकं सुहवो न एधि अस्यार्थः हे अग्ने स त्वं नोस्माकं अवमो भव अविदूतमः पाल्यपितृतमो भव सच कः यस्त्वं उती राम·
सन्नो नेदिष्ठः यत् पालकत्वेन सन्निहित इत्यर्थः कस्मिन्समये अवमो भव अस्या उषसः अस्या एव प्रभातस्य व्युष्टौ समाप्तौ अस्मिन्नेव दिवसे इत्यर्थः॥ १००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलमेवंनोस्मान्प्रतिरधिआगच्छ किंभूतः सुहवः सुखाह्वानः आगत्यचवरुणंअवयस्वपूजय· किंकुर्वन्नोस्माकंमृडीकंरराणः अस्मान्त्स्वंवेधिसुख
करं हविर्ददस्त्वन्सुखंचवीहितन्देवभक्षय· हेअग्नेयतस्त्वंलोकस्यपालनेननित्यसन्निहितः सर्वदासत्त्वमेवास्माकंपालकोभव· अस्मान्प्र
त्यागच्छ· आगत्यचअस्मदीयहविर्दानेनवरुणंपूजय· अत्वमपिभक्षयेतिप्रार्थनावाक्यार्थः अवसइति अवरक्षणइत्यस्य अवनमसस्यतकार
लोपः छांदसः अवरक्षणइत्यस्यऊतियूतिनिपातनात् ऊतीतिरूपंतत्रतृतीयैकवचने सुपांसुलुगादिवाक्येनपूर्वसवर्णादेशेनऊतीतिरूपम्
रराणइतिरादानइत्यस्ययङ्लुकिशानचारूपम् इमंमेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके अस्यार्थः हेवरुणममइमंहवं·आह्वानं
श्रुधिशृणु·श्रुत्वाअस्मिन्दिवसेमृडयच·सुखीभवत्वां·आचके·स्वयंकामये किंभूतोहंअवस्युः अवनपालनमिच्छन् अहमात्मनःपालकमिच्छ
न्त्वांपालकंकामयेइत्यर्थः ममाह्वानंश्रुत्वागत्यचवरुणोममाहुत्यासुखीभूत्वामांपालयत्वितियाञ्चावाक्यार्थः। मृडयेतिमृडसुखनइत्यस्यधा
तोरूपम्· आचकइतिचकनृप्रौइत्यस्यआङ्पूर्वस्यरूपम् तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेह
बोध्युरुशंसमानआयुःप्रमोषीः अस्यार्थः हेवरुण तच्छब्दोयच्छब्दार्थः तदाशास्तइतिपुनस्तच्छब्ददर्शनात्तत्वाइतिसंबंधः। यस्त्वा
यामियाचामिकिंभूतः वंदमानः केनब्रह्मणात्रयीलक्षणेनवेदेनतदित्थंयजमानः यागकारीआशास्तेप्रार्थयति कैःहविर्भिः होतव्यैः एतैःतद
हंनित्यंयाचामितदानींहविर्दानपूर्वंमाशास्महेइत्यर्थः हेवरुणउरुशंस· बहुविस्तरइहकर्म्मणिअहेडमानअक्रुध्यमानःत्वंबोधिजानीहि।
तात्वाचनोस्माकमायुर्जीवितंमाप्रमोषीः माखण्डय हेवरुणयत् आयुषोअखण्डनंममप्रार्थनीयंतदहंहविर्दानेनत्वामाराध्यप्रार्थयामितत्त्वं·
नीहितात्वाचममआयुर्माखण्डयेतियाञ्चावाक्यार्थः अत्रयामीत्यस्यवर्णागमोवर्णविपर्ययश्चेतिचकारलोपः। येनेशतंवरुणयेसहस्रंयय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मिंयज्ञकर्मणियानिकानिचित्प्रमादादिकृतानितथाभूतावस्थानष्टानजनितानिपापानिदुर्हेतुत्वयोगात् पाशशब्दाभिधेयानितैःपाशैःऋ·पं·४
प्रा·स· त्तिपाः पाशाविततामहान्तः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्काः अस्यार्थः हेवरुणतेतवशतपा शा॥ किंभूताः विततावितीर्णाः
१०१ अपिचयेसहस्रंशतंसहस्रयोरुपादानंअतिबहुलोपलक्षणार्थं किंभूताः यज्ञियाः यज्ञकृततथाभूतानुष्ठानजनिताअपिकिंभूतामहान्तः
सर्वलोकव्यापकाः तेःपाशैः नोस्माकं अद्यइदानींसवितामकेवलंउतविष्णुः विश्वेदेवामरुतोवायवः स्वर्काःसुष्ठअर्काःआदित्यामुंचंतु
अयंवाक्यार्थःऋ·सवित्रादयोदेवाअनयाआहुत्यातोषिताअस्मान्कुर्वन्तुतेभिरितितनृच्छंदस्यनृतीयावहुवचनेवहुलंछन्दसीतिऐसादे
शनिषेधेवहुवचनेझल्येदितिएत्वम् अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि। अयानोयज्ञंवहास्ययानोधेहिभेषजंअस्यार्थः हे
अग्नेत्वंअयाश्चअसिप्राणिनांशुभावहविधिरप्यसि अदरंअनभिशस्तिपाश्चनास्ति आरभ्यमाणाअभिशस्तिर्याचनायेस्यपुरुषस्यसोन
भिशस्तिः नमपिपासिरक्षसि इत्यनभिशस्तिपाशत्वंअयमर्थः यश्चत्वारक्षणार्थंनयाचतेतस्यापित्वरक्षकोभवसीतितत्ददित्थंभूतस्त्वअ
याआगच्छआगत्यनोस्माकंयज्ञंवहयतोहविस्ततनहुतंतदेवान्प्रापयकिंतत्वंसत्यमित्त्वसत्यमेवअयाअसि ज्ञानअसिजगतःसंस्मरणि
स्तारोपायंजानासीत्यर्थःअतःकारणादपित्वम् अया आगच्छआगत्यनोऽस्माकंभेषजंधेहिअस्मिन्विस्तारोपायमौषधंपरिकल्पयअ
त्रयद्यपिलोकेशुभावहवाचीअयःशब्दोअकारान्तस्तथाप्यसुनन्तइतिछन्दसिसकारान्तःसत्यमितिशब्दोऽव्ययमवधारणार्थः अयानो
यज्ञंवहअयानोधेहिवहअयानोभिषजमित्यत्रअयाइतिक्रियापदद्वयम् अत्यन्तार्थित्वद्योतनार्थम् अत्रअयाइतिइणगतावित्यस्मा
ल्लेटमध्यमपुरुषवचनंसिप् इतश्चलोपःपरस्मैपदेष्वितिइकारलोपःधातोर्गुणःलेटोडटावित्याडागमःआडःपूर्वस्यगुणस्याकारेणएका राम
देशेसतिवर्णव्यत्ययाद्दस्वत्वं अयाइति सर्वेगत्यर्थाज्ञानार्थाइति कृत्वाएतिजानातीतिअसुन्प्रत्ययेरूपम् उदुत्तमंवरुणपाशमस्मद १०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्राधमं विमध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ अस्यार्थः हे वरुण उत्तमं पाशं अस्मत् उत् छ्रथय यथा उत ऊर्द्ध्वं स्त
थं कृत्वा नय अधमं पाशं अवश्रथ अवाचीनं श्रथाय इति पूर्व्ववत् हे देव मध्यमं उत्तमाधमयोरन्तर्गतं विश्रथाय स्वस्थानादेव श्रथय अथ
अत एवं कृते सति आदित्य अदितेः पुत्र वरुण उत्तमाधममध्यमपाशत्रयश्लथीकरणमन्यथ्यै वारुणव्रताचरणेन वयं तव अनागसः अनप
राधाः सन्तः अदितये अदीनतायै स्याम दीना भवेम इत्याशंसा अत्र श्रथय इति रलयोरेकत्वस्मरणात् लकारस्य स्थाने रेफः श्रथय अथा वय अ
थावयमित्यत्र द्वयोरपि अकारः पदे अपठ्यमानत्वात् संहितायां छान्दसः अदितये इति दो अवखण्डने इत्यस्माद्धातोः क्तिच् प्रत्यये कृते अदि
तिः न दितिः अदितिः तादर्थ्ये चतुर्थी अदितये अदीनतायै इत्यर्थः॥ भवतं नः समनसौ सचेतसावरेपसौ मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ
शिवौ भवतमद्य नः अस्यार्थः हे जातवेदसौ अग्नी अत्राहितौ मूर्त एको ग्निः संबोध्यः अपरस्या मूर्तौ मंत्रप्रकाश्यः अस्माकं अरेपसौ रपः
पापं तद्रहितौ नौ स्तोतिः अरेपः नो अरेपसौ भवतं किंभूतौ युवां समनसौ समानमनस्कौ एकहृदयाविति यावत् पुनः किंभूतौ सचेतसौ समा
नज्ञानौ किंच यज्ञं दर्शपौर्णमासादि मा हिंसिष्टं मा विनाशयतं तथा यज्ञपतिं मां मा हिंसिष्टमित्यनेनैव संबंधः तथा अद्य अस्मिन्नेव दिवसे
नो स्माकं शिवौ शान्तौ भवतम् हे अग्नी युवामेकचित्तौ अपापौ च भूत्वा अस्माकं यज्ञस्य शरीरस्य वा हिंसकौ शान्तौ च भवतमिति याज्ञावाक्यार्थः अ
त्र शिवतराविति परे पठन्ते संहितायां तु सचेतसाविति पाठः॥ अग्न्याधेयदेवताभ्यः स्थालीपाकहोमानन्तरं पारस्करः स्थालीपाकस्याग्न्याधेय
देवताभ्यो हुत्वा जुहोति स्विष्टकृते श्चायाश्चाग्नेस्यइति तत्र मंत्रो यथा अयाश्चाग्ने वषट्कृतं यत्कर्म्मणात्यरीरिचं देवा शान्तुविदः स्वाह अस्यार्थः हे
हे अग्ने अयाः आगच्छ चकार उत्तरत्र संबंधनीयः त्वय्यागते यच्च वषट्कृतं यज्ञकर्म्मणा होमादिना अत्यरीरिचं अतिरिक्तं कृतवानस्मि तद्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रस्तादयः शमयंतुः इत्यध्याहार्य्यं किं भूताः गातुविदः गातुं यज्ञं विदंति जानंतीति गातुविदः अन्यरीरिचमित्युपलक्षणार्थं न्यनेचयत्कृतवानस्मि
त्पपिवाशमयत्विति वाक्यार्थः गातुर्यज्ञ इति निघंटु समारोपकपूर्वकं पुनराधाने अरणिप्रतपने अयं ते योनिऋत्विज इति मंत्रव्याख्यानि रग्ने वै
श्वदेवप्रकरणे अनुसंधेया इत्याधानमंत्रव्याख्या मणिकाधाने पारस्करः उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वेत्यतिदेशत्वात् देवस्यत्वेत्यभ्या
दानं· इदमहमिति· अवटपरिलेखनमिति अभिग्रहणे आभ्यां भूमिपरिलेखने च मंत्रो यथा देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्याम्· आददे नार्य्यसि· प्रसवे अभ्यनुज्ञाने सम्मता वितियावत् केन गृह्णामि अश्विनीकुमारयो र्बाहुभ्यां तथा पूष्णः आदित्यस्य
हस्ताभ्यां त्वं नारी असि· मनुष्यस्त्री भवसीत्यनुवादः नारी असीति अभिमृत्त्वेत्स्सवितुरनुमतो अश्विनीकुमाराभ्यां बाहुदानेन पूष्णो हस्तदा
नेनानुगृह्णामीति क्रियावाक्यार्थः इदमहं रक्षसां ग्रीवा अपिकृन्तामि अस्यार्थः अहः इदं यन्मणिकाधानार्थं गर्त्तखननमित्र त्रकुंभः रक्षसां
यज्ञविरोधिनां ग्रीवा अपिकृन्तामि छिनद्मि निर्छिघ्रयत्न सपन्तये अहं यज्ञविरोधिनां शिरांसि छिनद्मीति वाक्यार्थः अवटे मणिकारोपणे पारस्करः त
स्मिन्मणिकं मिनोति तत्र मन्त्रो यथा समुद्रोसि नभस्वानार्द्रदानुः शंभूः अस्यार्थः हे मणिकं त्वं समुद्रोसि जलाधाररूपोसि· किंच नभस्वा
न्वायुरूपः असीति पूर्वसंबंधनीयम् समुद्रवायोः सारूप्यप्रतिपादकं विशेषणमाह आर्द्रदानुः आर्द्रजलं शीतलादिकं ददाति आर्द्र
दानुः एवंभूतस्त्वं शंभूः कल्याणो भवः यतस्त्वं समुद्रवायो स्समानः नोस्माकं कल्याणो भवेति याञ्चा वाक्यार्थः आर्द्रदानु इति आर्द्रदानोः।
स्मिन्नर्थे दुदाञ्दानेइत्यस्य दधात्याद्वितुण्णादिसूत्रेणानुप्रत्ययः मणिक उदकात्मके पारस्करः अप असिं चत्या पोरेवतीरिति आपोहिष्ठेति चेति
तत्र मंत्रो यथा आपोरेवतीः क्षयथाहि वस्वः क्रतुं च भद्रं विभृतं च रायश्च स्थ अपत्यस्वपत्नीः सरस्वती न द्गृणते वयो धात् अस्यार्थः हे आपः किं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतारेवतीस्वयर्थाः यूयंप्रक्रतुंच अमृतंचविभृयधारय किंभूतं भद्रं कल्याणकरं नकेवलंरायस्पोषस्याधनानिचभरथः पुनःकिंभूतायूयम् अपा
मपत्यस्यवन्हेः हे वस्वस्यःपत्नीः पालयित्र्यः हियस्मात् यूयंवस्वः मधूराम धुरं हिसर्व्वस्यप्रियं भवति अस्मान्स्वयथः अस्मिन्मणिकेनिव
सथारिविह्रवन्तः वयोधान वय आयुर्दधानीति वयोधान् सकलप्राणिनामायुर्दोत्र्यः एवंभूतायूयं सरस्वतीनदीनद्रुणेते नद्यतीत्यर्थःरे
तोरिति रेतृशब्दस्यस्मात् शतरिप्रत्ययेआगमानुशासनस्यानित्यत्वाद्नुमनभवति वसुस्सात्मध्वरेन्यवन्धेत्यभिधानम् आपोहिष्ठामंत्रव्याख्या
नसंध्याप्रकरणेनुसंधेयम् इतिमणिकाधानमंत्रव्याख्या अथवैणवदण्डग्रहणम् तत्रपारस्करः वैणवदण्डेमादत्ते विश्वाभ्योमानाष्ट्राभ्यःपरि
पाहिसर्वतः अस्यार्थः हेदण्ड सर्वाभ्यः नाशकारिणीभ्यः मामांसर्व्वतःपरिपाहि सर्व्वप्रकारेणरक्षस्वैतिवाक्यार्थः वैश्वदेवसायंप्रातर्होमयोश्च
सप्तत इत्यग्निपूजानिरग्निवैश्वदेवप्रकरणेनुसंधेया पश्चादिकर्म्मणिप्रायश्चित्तहोमेपंचवारुणमंत्रार्थोआधानप्रकरणेऽनुसंधेया पिंडपि
तृयज्ञमंत्राश्चश्राद्धप्रकरणेऽनुसंधेयाः व्रीहियवान्नप्राशने आज्यहोमानन्तरंपारस्करः आज्यभागाविष्ट्वा आज्याहुतीर्जुहोति शतायुधा इति त
त्रमंत्रोयथा शतायुधायसहस्रवीर्यायशतोतये अभिमातिषा हेशतंवयोनः शरदो जिहीयाइन्द्रोनएषद्दत्त्वितानि विश्वा अस्यार्थः यइन्द्रोनो
स्माकं शरदः शतंजिहीयाः वर्षशतंसुसुखेनाभियापयतीत्यर्थः यइन्द्रोनोस्माकं दुरितानिव्यसनानिविश्वानिएषत नयति अपगमयतीत्यर्थःत
स्मैइन्द्राय अदः एतद्धविः स्वाहा किंभूताय शतायुधाय अनेकप्रकारवज्राय शतवीर्याय शतसंख्यबलाय शतोभये शतधारक्षणकाराय अ
भिमातिषा हे अभिमानयः प्रतिपक्षास्तान्सहते अभिभवतीति अभिमातिषाट् तस्मै अभिमातिषाहे। शतोभय इतिभूतिस्मरणम् अवरक्षणा
इतिधातोः प्रयोगः अभिमातिसाहइतिछंदसिसहइति विच्प्रत्ययः नएषदिति मीञ्प्रापणइत्यस्यधातोः लोट् तिप् इतश्चलोपः परस्मैप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रा·स· देष्विति इकारलोपः सिब्बहुलं ले टीतिसिप्लोटो अडाविन्यडागमः धातोर्गुणः एकारस्यविशेषेण पाठात् एकारनकारयोः संहिताकार्य्यं नभवति
१०३ ॥अदइत्यत्र छान्दसत्वात्सकारलोपः येचत्वारपथयोदेवयाना अन्तरा द्यावापृथिवी वियंति तेषां योत्त्यो निमजिनावहास्तस्मै नो देवाः परिदत्तेसर्वे
अस्यार्थः हे सर्व्वे देवाः नो अस्मानिह प्रकृते कर्म्मणि परिदत्त समर्प्पयत कस्मैः तस्मै इति कस्मै येपथा स्तेषां पथामध्य आवहाः प्रापयति किं अ
ह्यानिःअहानि· नविद्यते हानिर्यस्मिन्देशे तं प्रदेशम् अजीतं जनाभिभवम् नविद्यते अभिभवो यस्मिन्देशे तं प्रापयतीत्यर्थः तेषामिति केषां येच
त्वारः पथयः पंथानः किंभूताः अन्तरा पृथिवी वियंति द्यावापृथिव्योर्म्मध्ये विविधिवस्मकारेण गच्छन्ति पुनः किंभूता देवयाना देवानां यानं गमनं यैः
पथिभिरित्यर्थः स्थालीपाकेनाग्रपणे देवता होमानन्तरं पारस्करः स्थालीपाकस्याग्रपणे देवताभ्यो हुत्वाजुहोति· स्विष्टमग्ने अभितः प्रीणीहि
तत्रमंत्रो यथा स्विष्टमग्ने अभितः प्रीणीहि विश्वाश्चदेवः पृतना आविष्यत् सगंनुपंथा प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः अस्यार्थः नुहे अ
ग्नेज्योतिर्मध्येज्योतिषामन्तरामनस्सारभूतं इति यावत् नोस्माकं पंथानं प्रविशन् प्रकाशयन् एहि आगच्छः किंभूतं पंथानं सुगं सुखगम्यम् किंचनोस्मा
कं अजरं जराशून्यं नित्यं यो यथासि आयुरिति प्रणोहि चिन्तयदेहि त्यर्थः नकेवलमेवं नो ऽस्माकं तं स्विष्टं शोभनमीप्सितं नवान्न प्राशजनितमारोग्यं
हविश्चदेवेभ्यो ऽस्मद्दत्तेन चान्नरूप हविषाविश्वाविश्वदेवसेन्यसुखंचदेवसेन्यमभिप्रीणीहि· अभिसर्व्वतः प्रीणाहि तर्प्पयेत्यर्थः संस्रव प्राशने
पारस्करः अथप्राश्नात्यग्निः प्रथमः प्राश्नात्विति मंत्रो यथा अग्निः प्रथमः प्राश्नातु सहिविदयथा हविः शिवा अस्मभ्यमोषधीभ्यः कृणोतिविश्वकर्म्मा
णियाचरो अग्निर्देवता अनुष्टुप् छन्दः।श्यामाकचरुप्राशने विनियोगः अस्यार्थः अग्निर्यो चरो वन्हिः प्राश्नातु प्रकर्षेण भुक्ता हि यस्मात् सप्रथमो राम·
अग्नेविदज्जानास्ति यथा हविः यथा हव्यं हविस्तज्जानातीतिसंबंधः किंच शिवाः सुखकारीः अस्मभ्यं अस्मदर्थम् ओषधीः ग्राम्याः आरण्याश्च कृः १०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णोनुकरोतु किंभूतोयाचरोगिनः विश्वस्यजगतोद्वेष्टेत्यर्थः मह्यान्नः श्रेयः समनैष्टदेवात्वयावसेनसमशीमहित्वासनोमयोभूः पितोआविशश्वश।
तोकायतनन्वेस्योनत्रिष्टुप्छन्दोहविः शिवाअस्मभ्यमोषधीः कृणोतु विश्वकर्म्माणि हेव्रीहेत्वात्वावयंसमशीमहि· सम्यग्विधिदृष्टेनकर्म्मणासंस्कृ
त्यभुंजीमहि किंभूतेनत्वया· अवसेन· संवनेन· त्वयेवपाथेयभूतेन· त्वमिनवंवर्षशतंयावदद्यमशीयेत्यर्थः सत्वमस्माभिः प्राशितः सन्नोस्मान्वि
शस्वप्रविश किंभूतः मयोभूः सुखस्वरूपकद्वः पितेव· यथापिता पुत्रंसुखस्वरूपेणप्रविशत्याविशत्वामप्यस्मानित्यर्थः किंच हेदेवाइन्द्राद्योयेनोऽस्मान्
श्रेयइदंनवान्नप्राशनप्रभवमारोग्यंसमनैष्ट सम्यक्प्रापयन किंभूतानूनोभद्रान्· नवान्नप्राशनार्हान् शंतोकाय· तोकायअपत्यायशंकल्याणंत
न्वेशरीरायश्योनंसुखंसमनैष्टइति॥ नात्रप्रापणइत्यस्मान्नन्त्वछ सिसत्वान्परस्मैपदे चिह्नहिः तोकायतन्वेइतिचतुर्थीचाशिष्यइतिचतु
र्थीसमशीमः प्रतिप्रापयेनेति अशभोजनइत्यस्माल्लिङ् आत्मनेपदोत्तमपुरुषवहुवचनम् छन्दस्यमाङ्योगेपिवहुवचनादडागमः अन्नपतेत्यनेन
मंत्रेणप्राशनेपारस्करः अन्नपतीययावेति तत्रमंत्रोयथा अन्नपतेअन्नस्यनोधेह्यनमीवस्यशुष्मिणः प्रप्रदातारंतारिषऊर्जेन्नोधेहिद्विपदेचतुःपदे
अस्यार्थः अन्नपतेअन्नेअन्नभागंनोस्माकंधेहिदेहि किंभूतस्य· अन्नमीवस्य अमीवास्यव्याधिः सोरनेन्नोस्तीतिअनमीवः अव्याधिकारीत्यर्थः पुनःकिं
भूतस्यशुष्मिणःशुष्मावलनदस्मिन्नस्ति· तस्यवलयुक्तस्येत्यर्थः तथाअन्नपतेप्रप्रदातारंतारीषत्वान्नस्यप्रकर्षेणदातारंतारयवर्द्धयप्रप्रइतिद्वितीय
प्रशब्दोपादानस्यातिशयस्यख्यापनार्थः तथाहेअन्नपतेअस्माकंभार्यापुत्रादिपरिगणनाचतुःष्पदेगवादिपक्षेचऊर्जेअन्नंचधेहि· अस्मभ्यंअ।
स्मदीयभार्य्यादिपरिजनायआरोग्यकारिधनकारिचअन्नायेहि अन्नदातासंवर्द्धयेत्यस्तोयाम्नावाक्यार्थः अत्रकिंदेहीतिकर्म्मपदस्याश्रवणात् अ
न्नस्येति षष्ठीमात्रश्रवणाच्चेतिभागमितिकर्म्मपदमध्याहार्यं॥ यवप्राशनेपारस्करः अथयवानामेतत्तुत्यमिति तत्रमंत्रोयथा एतत्तुत्यंमधुनासे—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रा॰स॰ सुतं यदं सरस्वत्यमधिवना अवचक्रधि इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः। अस्यार्थः शतक्रतुर्देवराजः सीरपतिरा
१०४ सीत् कर्षणस्य कारयिता भवत् कीनाशा आसन् मरुतः वायवः कर्षका अभवन् किंभूता अदानवाः शोभनस्य भोगस्य दातारः कस्मिन्देशे सरस्वत्याः
अधिवना सरस्वत्या न द्याउ परिवनेषु यवोत्पादनेषु अस्माद्धव मभूत् तस्मात् हे इन्द्र एनं उ ग्रं यं यवं मधुना मधुरेण रसेन समिश्रं अवचक्रधि अन्य
र्थे पुनः कुरु गर्दनेन यवप्रशंसा कथिता अत्र अधिवनाइति अधिवनमित्यस्मिन्नर्थे सुपां सुलुगिति सप्तम्येकवचने आकारः अवचक्रधातोर्यङ्लुगन्ता
ल्लोटसिप् इति नवान्नप्राशनमंत्रव्याख्या प्रोष्यगृहोपस्थाने पारस्करः प्रोष्येति गृहानुपतिष्ठते गृहा माविभीतेति तत्र मंत्रो यथा गृहा मा विभीत मा
वेपध्वमूर्जं बिभ्रत एमसि ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः अस्यायमर्थः हे गृहाः मा बिभीत न भयं कुरुत मा वेपध्वं मा कंपं कुरु
त गृहाधिकारिणो मम अभावात् यद्‌हे ग आसीत् तं मा कुरुतेत्यर्थः यतः कारणाद्गृहपतिर्वो युष्मान्गृहान् एमि आगच्छामि किंभूतान् अस्मा
न्॰ गृहान् ऊर्जं बिभ्रतः ऊर्जमन्नं बिभ्रतः धारयतः अन्नादिसंयुक्तान् अस्मान् गृहानहं गच्छामीत्यर्थः किंभूतोहं ऊर्जं बिभ्रत् अन्नं धारयन्॰ न
केवलमन्नं मन्नमात्रं धारयन्नहं मागच्छामि अपि तु सुमनाः अनुद्विग्नमनाः सुमेधाः शोभनबुद्धिः मनसा —— मोदमानः प्रमोदयुक्तः गृहमेमि आग
च्छामि अथवा वार्थः हे गृहा धनधान्यादियुक्तानामस्माकं मदीयाधिष्ठानात् यद्भय आसीत् तन्न ज्यत अथ महमधिक धनधान्यादिकं लब्ध्वा अतिस्फी
त हृदयः पुनरपि समागत्य मिलितास्मि अनेन धनधान्येन च यूयं संपूर्णाः कर्तव्या इत्यभिप्रायः येषां मध्ये प्रवसन् येषु सोमनसो बहुर्गृहानुपह्वा
यामहे जानतः येषां गृहाणां प्रवासी मध्येति स्मरति यान् गृहान् सुखहेतुन् प्रवासी स्मारति ये षु च गृहेषु असौमनसो बहुप्रकारं मनो बहुनि सम॰
वृत्तं भवति तान्गृहानुपह्वयामहे वयमाह्वयामः ते च गृहा आहूताः सन्तः नोऽस्मान् जानंतु प्रवासात्समागतान् जानन्त्वित्यर्थः ॥ किंभू १०४

CC-0. In Public Domain. Digitization by eGangotri

तान् अस्मान् जानन्तः अस्मिन् गृहविषये प्रत्यभिज्ञाविषयानस्मानित्यर्थः उपहूता इह गावः उपहूता अजावयः अथो अन्नस्य कीलाल उपहूतो गृ
हेषु नः अस्यार्थः इह नोऽस्माकं गृहेषु गावः उपहूताः तथा अजावयः छागा मेषाश्च हूताः आहूताः प्रवासं कृत्वा समागतैरस्माभिरशोवस्त्रा अजा
प्रभृतयो कुशलप्रतिसंधार्थं आहूता इत्यर्थः अथो अनन्तरम् अन्नस्य कीलालो रस उपहूतः आहूतः गोवत्सअजादीनामाह्वानानन्तरं गृहावस्थित
मिष्टान्नपानादिकमुपभोगायास्माभिराहूतमितिशेषः गृहप्रवेशने पारस्करः क्षेमायेति प्रविशति क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः
।अस्यार्थः हे गृहा वो युष्मान् क्षेमाय भाविद्याशापि प्रपद्ये प्रविशामि न केवलं क्षेमाय अपि च शान्त्यै सर्वोपद्रवशान्त्यर्थं च तथा शंयोः सुखका
म्येनः शंशिवं शग्मं प्रपद्य स्वेति पुत्रदर्शने पारस्करः पुत्रं दृष्ट्वा जपति अंगादंगादिति मन्त्रो यथा अंगादंगात्संभवसि हृदयादधिजायसे आ
वे पुत्र नामासि स जीव शरदः शतम् अस्यार्थः हे पुत्र यस्त्वं अंगादंगात् शिरोग्रीवादिसंभवसि समुत्पन्नो भवसि हृदयादधिजायसे हृदयाख्य
र्थगात्रेभ्यः श्रेष्ठादधिजायसे उत्पन्नो भवसि यस्त्वमात्मैव पुत्र नामासि स त्वमेवंभूतः शरदः शतं वर्षशतं जीव पुत्रमूर्द्धभिघ्राणे पारस्करः अस्य
मूर्द्धानमवजिघ्रति प्रजापतिस्त्वा हिंकारेण वत्साघ्राहिंकारेणेति मन्त्रो यथा प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रायुषासौ जीव शरदः शतं
त्वा त्वा प्रजापतिर्ब्रह्मणो हिंकारेण मंगलाभिधायकहिंकारेणावजिघ्रामि चुम्बयामि स त्वं मया चुम्बितः सन् सहस्रायुषानेकसंख्याश
रदः शतं जीवेत्याशंसा वाक्यार्थः गवां त्वा हिंकारेणावजिघ्रामि सहस्रायुषा असौ शरदः शतं अस्यार्थः असौ हे अमुकनामकपुत्रक त्वा त्वां अभि
जिघ्रामि मूर्द्ध्नि चुम्बामि अहं पितेत्यर्थात् तेन गवां हिंकारेण यथा गावो वत्सानागताः स्वपुत्रकानाभिमुख्येनाभिजिघ्रन्त्येवमहमपि पिता त्वामभि
जिघ्रामि किंच सहस्रायुषा विस्तारेणायुषा शरदः शतं जीवेति पुत्रं दक्षिणकर्णे जपे पारस्करः दक्षिणेऽस्य कर्णे जपति अस्मे प्रयन्धीति मन्त्रो य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ·स· था अस्मे प्रयन्धि मघवन् ऋजीषन्निंद्र राया विश्ववारस्य भूरेः अस्मे शतं शरदो जीवसे धा अस्मे वीरां शश्वत इन्द्र शिप्रिन् अस्यार्थः हे मघवन्
१०५ हे इन्द्र किंभूत ऋजीषन् यत्सोमकानामशेषभागिन् अस्मै पुत्राय राय द्रव्यं तया भूरेः भूरि — सुवर्णं प्रयन्धि प्रयच्छ किंभूतस्य भूरेः विश्ववा
रस्य विश्वैरेतां कांक्षितस्य अस्मै पुत्राय शरदः शतं प्रयन्धि· शतवर्षाण्यायुः प्रयच्छ तथा विश्वदेवाः सर्व्वदेवाः यावद्देवं वेदज्ञानं परिकल्पये त्यर्थः त
था हे इन्द्र किंभूत तोशिप्रिन् जलयुक्त अस्मै पुत्राय वीरान् वीर्य्ययुक्तसन्तानित प्रयच्छ किंभूतान् शश्वतः शाश्वतान् विभूतभूतान् दीर्घायुष इत्यावत्
हे मघवन् हे इन्द्रेति संबोधनद्वयमादराति पादनार्थम्· अस्मे इति अस्मै इति छन्दसत्वात् प्रयन्धीति यमु उपरमे लोट् सिप्· बहुलं छन्दसीति
सिपो लुक् ऋजीषन्निति ऋजीषं सोमशोषकल्यम् समुहेतनइति ऋजीषं गर्भं स्रावयती ति कात्यायनवचनात् प्रायमिति प्राप्ने राय इति षष्ठी द्विती
यैकवचनेन विस्वे प्रिपत इति विस्वराणः छान्दसो परे भूरेरिति द्वितीयार्थे षष्ठी वेदानिति प्राप्ने वेदा इतिसुपां सुपो भवन्तीति वचनात् निरोघसलिले
पि प्रशिप्राश्याच्छुरिदं नुरं इत्यभिधानम् पुत्रस्य वामकर्णे जपे पारस्करः सव्ये कर्णे जपति इन्द्र श्रेष्ठानीति मंत्रो यथा इन्द्र श्रेष्ठानि द्रविणानि धेहि।
चित्तं दक्षस्य सुभगत्वमस्मे· पोषं रयीणामरिष्टिं तनूनां स्वात्मानं वाचः सुदिनत्वमह्नाम् अस्यार्थः हे इन्द्र श्रेष्ठानि द्रविणानि उत्तमानि धनानि चित्तं चैतं
चैतन्यं दक्षस्य सुभगत्वं सकलजनप्रियत्वं· एतत्सकलं जनस्यास्मै पुत्राय धेहि धारय· किं च पोषं रयीणां धनानां पुष्टिः अरिष्टिं तनूनां· अंगानामारोग्यं स्वा
त्मानं वाचः वचनस्य स्वादियानं माधुर्य्यम् सुदिनत्वमह्नो दिवसानां शुभत्वम् अस्मै पुत्राय धेहीति पूर्व्वं क्रियासंवंधः दक्षस्येति कर्म्मणि षष्ठी विनाभा राम·
व प्रत्ययेन दक्षशब्देन दक्षत्वमभिधीयते इत्यावसथ्यिकमहाधर्म्माधिकृतश्रीहलायुधकृतौ ब्राह्मणसर्वस्वे अग्न्याधानादि समाप्तम्॥ शुभमस्तु॥ ॥ १०५

श्रीसम्वत् १९४३॥ कार्तिककृष्ण १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥

॥ इति श्री ब्राह्मणसर्वस्वं समाप्तम् ॥ ❁ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३५८ ८ ९०९

अथदानचंद्रिकाया अनुक्रमणिकाप्रारंभोयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः अथदानचंद्रिकायाअनुक्रमणिकाप्रारंभोयं श्रीसांबसदाशिवायनमः श्रीगुरुभ्योनमः श्रीसरस्वत्यैनम श्रीरामप्रसंन्न

१	तत्र्रदानंत्रिविधोक्तं	२	अथद्रव्यमानं	५	वेद्यादितुलाकृत्यलक्षण	१०	सतृषद्दशगोदानं	१३	अथगजदानं
१	अथपात्रं	२	धान्यमानभविष्ये	५	घृतादिडुलाफलं	११	अथदशमहादानानि	१३	अथदासीदानं
१	अब्राह्मणलक्षणमाह	२	अथदानेदक्षिणाप्र	६	नानारोगनिरासार्थद्रव्य	११	कनकदानं	१३	अथरथदानं
१	ब्राह्मणब्रुवलक्षणमाह		माणं		विशेषेणतुलादानं	११	अश्वदानं	१४	अथगंत्रीरथदानं
१	अथद्रव्यविभागः	३	अथद्रव्यदेवना	६	पूजार्थतत्तद्रव्याधिदेवना	११	शिबायाश्वदानं	१४	शिबिकादानं
१	अथअग्राह्यदानानि	३	प्रतिग्रहस्थानानि	७	अथकालविशेषः	१२	अथतिलदानं	१४	अथमहीदानं
१	अथदानकालः	३	अथादोस्रुवर्णादितु	७	तुलापुरुषदानविधिः	१२	तिलपात्रदानं	१४	भूमिहरणंगृहदानं
१	अथपुण्यदेशः		लापुरुषदानं	७	तास्रघृतादितुलापुरुष	१२	महातिलपात्रदानं	१५	वास्तुशांतिः
१	तीर्थप्रतिग्रहनिषेधः	४	अथकुंडमंडपादि		दानप्रयोगः	१२	तिलपूर्णकांस्यपात्रदा	१८	सूत्रोक्तवास्तुशांतिः
२	अथदानकृत्यं	४	अथतुलावेदिप्रमाणं	९	गोसहस्रमहादानप्रयोगः		नं	१९	गृहदानप्रयोगः
२	अथप्रतिगृहीतृकृत्यं	४	स्तंभद्वयनिक्षेपःहेमाद्रौ	१०	शतगोदानप्रयोगः	१३	तिलपूर्णकरकदानं	१९	मठदानंस्कांदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९ धर्मशालादानं
२० कन्यादानं
२१ कन्यागृहेभोजननिषधः
२१ कपिलादानं
२१ महाकपिलादानं
२१ दशधेनुदानानि
२१ गुडधेन्वादिदानं
२२ तिलधेनुदानं
२२ घृतधेनुदानं
२२ जलधेनुदानं
२२ क्षीरधेनुदानं
२२ मधुधेनुदानं
२३ शर्कराधेनुदानं
२३ दधिधेनुदानं
२४ अथरसधेनुदानं
२४ स्वरूपतोगोदानं
२४ श्वेतवर्णादिगोदानं
२४ समानवर्णगोवत्सदानं
२५ कृष्णाधेनुदानं
२५ हेमशृंगीदानं
२५ कार्पासधेनुदानं
२५ लवणधेनुदानं
२५ सुवर्णधेनुदानं
२६ वंध्यात्वहरसुवर्णधेनुदा॰
२६ उभयतोमुखीदानं
२८ उभयतोमुखीप्रतिग्रह
प्रायश्चित्तं
२८ अथदशदानानिमृतस्य
तत्रादौ गोदानं
२८ भूमिदानं
२८ तिलदानं
२८ हिरण्यदानं
२९ आज्यदानं
२९ वस्त्रदानं
२९ धान्यदानं
२९ गुडदानं
२९ रजतदानं
२९ लवणदानं
२९ पंचधेनुदानानि
२९ तत्रादौपापधेनुदानं
२९ ऋणापनोदधेनुदानं
२९ प्रायश्चित्तधेनुदानं
२९ वैतरणीदानं
३० उत्क्रांतिधेनुदानं
३० मोक्षधेनुदानं
३० महिषीदानं
३१ मेषीदानं
३१ अजादानं
३१ वृषदानमंत्रः
३१ मंदाग्निहरमेषदानं
३२ दशाचलदानानि
३२ धान्यशैलदानं
३४ लवणाचलदानं
३४ गुडाचलदानं
३४ सुवर्णाचलदानं
३४ तिलाचलदानं
३५ अर्धोदयेतिलपर्वतदानं
३६ कार्पासशैलदानं
३६ घृताचलदानं
३६ रत्नाचलदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३७	रौप्याचलदानं	३९	जगदंबिकामूर्तिदानं	४०	कालपुरुषस्वरूपं	४३	पट्टकूलदानं	४३	स्थालीदानं
३७	शर्कराचलदानं	३९	सरस्वतीमूर्तिदानं	४०	सर्वसंपत्करदानं	४३	सूत्रकर्पटदानं	४४	वेदपुस्तकदानानि
३७	शिखरदानानि	३९	शालग्रामदानं	४१	कृष्णाजिनदानं	४३	ऊर्णावस्त्रदानं	४४	रत्नदानानि
३७	शिखरप्रमाणं	३९	शिवनाभदानं	४१	शय्यादानं	४३	कंबलदानं	४४	प्रवालदानं
३७	शिखरदानप्रयोगः	३९	लिंगदानं	४२	शयनदानं	४३	चित्रकंबलदानं	४४	कर्णभूषणदानं
३८	त्रिशूलदानं	३९	मारकतलिंगदानं	४२	कशिपुदानं	४३	ताम्रपात्रदानं	४४	मांगल्यमणिदानं
३८	कुबेरमूर्तिदानं	३९	काश्मीरलिंगदानं	४२	वस्त्रदानानि	४३	ताम्रदानं	४५	कुंकुमदानं
३८	उमामहेश्वरमूर्तिदानं	३९	घंटादानं	४२	पीतवस्त्रदानं	४३	कांस्यपात्रदानं	४५	सिंदूरदानं
३९	लक्ष्मीनारायणमूर्तिदानं	३९	शंखदानं	४२	रक्तवस्त्रदानं	४३	कांस्यदानं	४५	कस्तूरीदानं
३९	हरिहरमूर्तिदानं	४०	कालचक्रदानं	४२	नीलवस्त्रदानं	४३	लोहपात्रदानं	४५	कर्पूरदानं
३९	सूर्यमूर्तिदानं	४०	यममूर्तिदानं	४२	चित्रवस्त्रदानं	४३	रौप्यपात्रदानं	४५	नानासुगंधद्रव्यदानं
३९	गणपतिमूर्तिदानं	४०	कालपुरुषदानं	४२	कृष्णवस्त्रदानं	४३	सुवर्णपात्रदानं	४५	देवेगलंतिकादानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४५ प्रपादानं
४५ हैमंतिकेऽग्निदानं
४५ दीपदानं
४५ संवर्तपांथपरिचर्या
४६ गोपरिचर्या
४६ धर्मघटदानं
४६ कलशदानं
४६ यज्ञोपवीतदानं
४६ मासपक्षदानानि
४६ अधिमासेदानं
४७ घृतपात्रछायादानं
४७ संक्रांतिदानानि
४७ नानाधान्यदानानि
४७ तंडुलदानं
४८ व्रीहिदानमंत्रः
४८ गोधूमदानमंत्रः
४८ मुद्गदानमंत्रः
४८ माषदानमंत्रः
४८ चणकदानमंत्रः
४८ कुलित्थदानमंत्रः
४८ तिलदानमंत्रः
४८ स्वर्णतिलदानं
४८ सर्वधान्यदानं
४८ सस्वर्णतिलपात्रदानं
४८ निष्पावदानं
४८ प्रियंगुदानं
४८ श्यामाकदानं
४८ कोद्रवदानं
४८ लंकदानं
४८ यावनालदानं
४८ मसूरिकादानं
४८ अन्नदानमंत्रः
४८ पायसदानमंत्रः
४८ कमंडलुदानं
४८ ओदनदा० दध्यन्नदानं
४८ कृसरान्नदानं
४८ नानाभक्ष्यदानं
४८ सर्वान्नदानं
४८ सक्तुदानं
४८ शर्करादानं
४९ गुडदानं
४९ इक्षुदंडदानं
४९ मधुदानं
४९ घृतदानं
४९ तैलदानं
४९ नवनीतदानं
४९ क्षीरदानं
४९ दधिदानं
४९ तक्रदानं
४९ पुष्पदानं
४९ फलदानं
४९ तांबूलदानं
४९ पादुकादानं
४९ उपानहदानं
४९ छत्रदानं
४९ चामरदानं
४९ पत्रिकादानं
४९ व्यजनदानं
४९ दर्पणदानं
४९ कूष्मांडदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४९	सौभाग्यद्रव्यदानं	५०	पायसपूरितकांस्यपा	५०	अश्वत्थाभिमंत्रणं	५३	सर्वस्वदानं	नानि
५०	वर्धितफलदानं	५०	भद्रा० कदलीदानं	५०	सूर्यादीनांवेनभ्येदानं	५३	सुगमाधान्यधर्माः	
५०	सतिलगुडपिष्टयास०	५०	सौभाग्यशूर्पदानं	५१	ग्रहाणांदानानि	५३	दानमावश्यकंकेषां	इतिभविष्योत्तरेस्मृ
	दानं	५०	शूर्पपंचकदानं	५१	दानकालः	५४	दातुर्लक्षणमपि	त्यर्थसारादयः ६७
५०	भांडदानमंत्रः	५०	षोडशफलदानं	५१	प्रार्थनामंत्रस्तु	५४	प्रतिगृहीतृलक्षणं	अनुक्रमणिकास०
५०	गोधूमपिष्टदानं	५०	व्यतीपातेस्वर्णदानं	५१	नारदोक्तदानानि	५४	विद्वत्प्रार्थना	
५०	शूर्पस्थाईतंडुलदानं	५०	अश्वत्थसेचनसेचनमंत्र	५२	सहस्रभोजनविधि	५४	सदसत्प्रतिग्रहदा	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथदिवाकरभट्टकृतदानचंद्रिकाप्रारंभः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः श्रीरमाव्यंकटेशाभ्यांनमः प्रणम्यमातरंगंगां भैरवंवनशंकरीं महादेवाख्यपितरंश्रौतस्मार्तविशारदं १ दि-
वाकरेण सुधिया सारमुद्धृत्यशास्त्रतः शिष्टानांतन्यते तुष्ट्यै दानसंक्षेपचंद्रिका २ तत्रपरस्वत्वोत्पत्त्यंतोद्रव्यत्यागोदानं देवलः
अर्थानामुदितेपात्रेश्रद्धयाप्रतिपादनम् दानमित्यभिनिर्दिष्टंव्याख्यानंतस्यकथ्यते ३ तच्चदानंत्रिधोक्तंगीतासु दातव्यमिति
यद्दानंदीयतेनुपकारिणे देशेकालेचपात्रेच तद्दानंसात्विकंस्मृतं १ यत्तुप्रत्युपकारार्थं फलमुद्दिश्यवापुनः दीयतेचपरिक्लिष्टंत-
द्राजसमुदाहृतं २ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते असत्कृतमवज्ञातंतत्तामसमुदाहृतं ३ गारुडे अर्हतेयत्सुवर्णा-
दिदानंतत्कायिकंस्मृतं तुलादानादि आर्तानामभयंदद्यीत्येतद्विवाचिकंस्मृतं विद्यामादाययज्जप्येतद्दानंमानसंद्विजा इति

अथपात्रंयाज्ञवल्क्यः नविद्ययाकेवलयातपसावापिपात्रता यत्रदानमिमेचोभेतद्धिपात्रंप्रचक्षतइति भविष्ये किंचिद्वेद-
मयंपात्रंकिंचित्पात्रंतपोमयं पात्राणामुत्तमंपात्रंशूद्रान्नंयस्यनोदरइति व्यासः प्रथमंतुगुरोर्दानंदत्वाश्रेष्ठमनुक्रमात् ततो-
न्येषांचविप्राणांदद्यात्पात्रानुसारतइति भविष्यपुराणे सन्निधानस्थितान्विप्रान्दौहित्रंविट्पतिंतथा भागिनेयं-
विशेषेणतथाबंधून्गृहागतान् नातिक्रमेन्नरस्त्वेतान्सुमूर्खानपिगोपते अतिक्रम्यमहारौद्रंरौरवंनरकंव्रजेत् दक्षः
सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे सहस्रगुणमाचार्येत्वनंतंवेदपारगे अब्राह्मणलक्षणमाहव्यासः ब्रह्मबीजसमु-
त्पन्नोमंत्रसंस्कारवर्जितः जातिमात्रोपजीवीचभवेदब्राह्मणःसतु ब्राह्मणब्रुवलक्षणमाहतत्रैव गर्भाधानादिभिर्युक्तस्तथोप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰चं॰ नयनेनच नकर्मविन्नचाधीतः सभवेद्ब्राह्मणब्रुवः अथद्रव्यविभागः शिवधर्मे तस्मात्त्रिभागंवित्तस्यजीवनायप्रकल्पयेत् भाग
१ द्वयंतुधर्मार्थमनित्यंजीवितंयतः वित्तस्यभागपंचकंकृत्वाभागद्वयंजीवनार्थंभागत्रयंदानार्थमितिहेमाद्रिः अथअग्राह्यदा-
नानितुस्कान्दे अजिनंमृतशय्यांचमेषींचोभयतोमुखीं कुरुक्षेत्रेचगृण्हानोनभूयःपुरुषोभवेत् मनुः हिरण्यंभूमिम
श्वंगामन्नंवासस्तिलान्घृतं अविद्वान्प्रतिगृण्हानोभस्मीभवतिकाष्ठवत्. अविद्वान्नामविद्यातपोभ्यांहीनः तेननग्रा
ह्यमिति अथदानकालः वाराहे दर्शेशतगुणंदानं तद्दशघ्नंदिनक्षये शतघ्नंतच्चसंक्रान्तौ शतघ्नंविषुवे ततः युगादौतच्छ
तगुणमयनेतच्छताहतं सोमग्रहेतच्छतघ्नं तच्छतघ्नंरवेर्ग्रहे तच्छतघ्नंव्यतीपातेदानंवेदविदोविदुः विष्णुधर्मोत्तरे वैशा
खीकार्तिकीमाघीपौर्णिमास्तुमहाफला पौर्णमासीषुसर्वासुमासर्क्षसहितासुच स्नानानामिहदानानांफलंशतगुणंभवेदि
ति पुण्यदेशः यत्तुमनुः दृषद्वतीसरस्वत्योर्देवनद्योर्यदन्तरं तंदेवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते नारदः पुण्यदेशेषुसर्वेषु
गृहेदेवालयादिषु यत्रसाधनसंपत्तिस्तत्रदानंसमाचरेत् भविष्यपुराणे वाराणसीकुरुक्षेत्रंप्रयागंपुष्करंतथा गोकर्णंनै
मिषारण्यंसेतुश्रीपर्वतंतथा महाकालंतथागंगामेतान्पुण्यतमान्विदुः पाद्मे लिंगंवाप्रतिमांवापिदृश्यतेयत्रकुत्रचित् त
त्सर्वंपुण्यतायानिदानेषुचमहाफलमिति एषुदानप्रतिग्रहशस्तमितिहेमाद्रिः अथतीर्थेप्रतिग्रहनिषेधः पाद्मे नतीर्थे १
प्रतिगृण्हीयात्प्राणैःकंठगतैरपीति तीर्थेतीरेक्षेत्रेच गंगाकृष्णागोदावर्यास्तीरमाहविष्णुः गंगागोदावरीकृष्णातीर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माहुर्महर्षयः उत्तरेनवगव्यूतिर्दक्षिणेयोजनत्रयमिति भविष्ये तीराद्गव्यूतिमात्रंतु परितः क्षेत्रमुच्यतइति गंगायांतुतीरेपि
नग्राह्यमित्यर्थः ब्राह्मे प्रवाहमवधिंकृत्वायावद्धस्तचतुष्टयं तत्रनप्रतिगृण्हीयात्प्राणेःकंठगतेरपीति प्रवाहोगर्भःदान
धर्मे भाद्रकृष्णचतुर्दश्यांयावदाक्रमतेजलं तावद्गर्भंविजानीयात्तदूर्ध्वंतीरमुच्यतेइति गर्भेप्रतिग्रहनिषेधःप्रसिद्धनदीषु
गंडक्यादिषुतुतीरेनिषेधः तदुक्तंदानधर्मे गंडक्यादिषुतीरेपिनग्राह्यंभूतिमिच्छतेतिवचनात् अत्यंतापदितीर्थेपिग्राह्यं अ
थचेत्प्रतिगृण्हीयाद्ब्राह्मणोवृत्तिकर्शितः दशांशमर्जितंदद्यादेवंधर्मोनहीयतइतिपाद्मात् अथदानकृत्यंवाराहे स्नातः सम्य-
गाचांतःकृतसंध्यादिकक्रियः कामक्रोधविहीनश्चपाखंडस्पर्शवर्जितः दद्यादितिशेषः कात्यायनः कुशोपरिनिविष्टेनतथाय-
ज्ञोपवीतिना देयंप्रतिगृहीतव्यमन्यथाविफलंभवेदिति गौतमः अंतर्जानुकरंकृत्वासकुशंसतिलोदकं फलान्यपिचसंधायप्रद
द्याच्छ्रद्धयान्वितः नामगोत्रेसमुच्चार्यप्राङ्मुखोदेयकीर्तनात् उदङ्मुखायविप्रायदत्वांतस्वस्तिकीर्तयेत् सदेवताकदेयकीर्तनानंतरं
दत्वेत्यर्थः अथप्रतिग्रहीतृकृत्यंतत्रैव ॐकारमुच्चरन्प्राज्ञोद्रविणंसकुशोदकं गृण्हीयाद्दक्षिणेहस्तेतदंतेस्वस्तिकीर्तये
त् प्रतिग्रहीतासावित्रंसर्वत्रैवानुकीर्तयेत् सावित्रंदेवस्यत्वेति ततस्तुकीर्तयेत्सार्द्धंद्रव्यंचद्रव्यदेवतां समापयेत्ततःपश्चात्कामस्तु
त्याप्रतिग्रहं यथाशाखं कइदंकस्माअदादितिमंत्रंपठित्वेत्यर्थः आदित्यपुराणे प्रतिग्रहंपठेदुच्चैःप्रतिगृह्यद्विजोत्तमान् मंद्रं
पठेत्तुराजन्यादुपांशुश्चतथाविशि मनसाचतथाशूद्रेस्वस्तिवाचनमेवच ॐकारंब्राह्मणेकुर्यान्निरोंकारंमहीपतौ उपांशुश्चत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थावेश्येमनसाशूद्रजेत्तथेतिकोऽर्भव् पुनस्तत्रैवप्रतिग्रहस्यधर्मंचनजानातिद्विजोविधिं द्रव्यस्तैन्यसमायुक्तो नरकंप्रतिपद्यतइति
तथा विधितुधर्मंविज्ञायब्राह्मणस्तुप्रतिग्रहे दात्रासहतरेत्येवमहादुर्गाण्यसौध्रुवमिति याज्ञवल्क्योक्तेश्च अथद्रव्य-
मानं याज्ञवल्क्यः जालसूर्यमरीचिस्थंत्रसरेणुरजःस्मृतं तेऽष्टौलिक्षातुतास्तिस्रोराजसर्षपउच्यते गौरस्तुतेत्रयःष
ट्तेयवोमध्यमस्तेत्रयः कृष्णलःपंचतेमाषास्तेसुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारःपंचवापरिकीर्तितं द्वेकृष्णलेरूप्य
माषोधरणंषोडशैवते शतमानंतुदशभिर्धरणैःपलमेवतत् निष्कःसुवर्णाश्चत्वार इतिहेमाद्रिः अथधान्यमानंभ-
विष्ये पलद्वयंतुप्रसृतिःकुडवोद्विगुणंमतं चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः आढकैस्तैश्चतुर्भिश्चद्रोणस्तु
कथितोबुधैः द्रोणैःषोडशभिःखारीविंशत्याकुंभउच्यते कुंभैस्तैर्दशभिर्वाहोधान्यमानंप्रकीर्तितमिति अथदाने
दक्षिणापरिमाणमाहव्यासः सुवर्णंपरमंदानंसुवर्णंदक्षिणापरा सर्वेषामेवदानानांसुवर्णंदक्षिणेष्यते अदक्षि
णंतुयद्दानंतत्सर्वंनिष्फलंभवेदिति परेतूक्तेः पुरुषाहारोपयिकतंदुलादिकमपिदक्षिणेतिहेमाद्रिः तथा देयद्रव्य
तृतीयांशंदक्षिणांपरिकल्पयेत् अनुक्तदक्षिणेदानेदशांशंवापिशक्तितः भविष्ये ज्ञेयंनिष्कशतंपार्थदानेषुविधिरुत्तमः-
मध्यमस्तुतदर्धंनतदर्धेनाधमःस्मृतः मेध्यांचकालपुरुषेतथान्येषुमहत्सुच एवंवृक्षेरथेऽजेचधेनोःकृष्णाजिनस्यच - २
अशक्तस्यापिकृष्णोयंपंचसौवर्णिकोविधिरिति जपाभिषेकमुदाहृत्यलिंगपुराणे अष्टषष्ठिपलोन्मानांदद्याद्वैदक्षिणांगुरोः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होतॄणांचैवसर्वेषां त्रिंशत्पलसुदाहृतं तदर्धं जापकानांच द्वारपालास्तदर्धतः एतेन सर्वत्र गुरोरर्धं मृत्विजानां तदर्धं जापकानां-
तदर्धं द्वारपालानामिति हेमाद्रौ दक्षिणाविभागोऽवगंतव्यः अथद्रव्यदेवता विष्णुधर्मोत्तरे अभयं सर्वदैवत्यं भूमेर्वै विष्णुदेवता
कन्यादासस्तथादासी प्राजापत्याः प्रकीर्तिताः प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः तथा चैकशफं सर्वं कथितं यमदेवतं
महिषश्च तथा याम्य उष्ट्रो वै नैरृतो भवेत् रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेयमादिशेत् मेषं तु वारुणं विद्याद्वाराहं वैष्णवं तथा आरण्याः
पशवः सर्वे कथिता वायुदेवताः जलाशयानि सर्वाणि वारिधीनां कमंडलुं कुंभं च करकं चैव वारुणानि निबोधत समुद्रजानि रत्नानि
वारुणानि द्विजोत्तमाः आग्नेयं कनकं प्रोक्तं सर्वलोहानि चाप्यथ प्राजापत्यानि सस्यानि पक्वान्नमपि च द्विज संज्ञेयाः सर्व-
गंधाश्च गांधर्वा वै विचक्षणैः विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च सारस्वतानि ज्ञेयानि पुस्तकादीनि पंडितैः
सर्वेषां शिल्पभांडानां विश्वकर्मा तु देवता द्रुमाणामथ पुष्पाणां शाकैर्हरितकैस्तथा फलानामथ सर्वेषां तथा ज्ञे-
यो वनस्पतिः मत्स्यमांसे विनिर्दिष्टे प्राजापत्येन तथैव च छत्रं कृष्णाजिनं शय्यां रथमासनमेव च उपानहौ तथा
पात्रं यच्चान्यत्प्राणवर्जितं सर्वं चांगिरसत्वेन प्रतिगृह्णीत मानवः शूरोपयोगि यत्सर्वं शस्त्रचर्मध्वजादिकं नृ-
योपकरणं सर्वं विज्ञेयं सर्वदैवतं गृहं तु शक्रदैवत्यं यदनुक्तं द्विजोत्तमाः विज्ञेयं विष्णुदैवत्यं सर्वदा द्विजसत्त-
मा इति प्रतिग्रहस्थानानि तु गृह्यपरिशिष्टे प्रतिगृह्णीत गां पुच्छे कर्णे वा हस्तिनं करे मूर्ध्नि दासीमजं चैव पृष्ठे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वतरगर्दभौ अश्वं कर्णे सदा यां वा अन्नमुद्दिश्य धारयेत् शय्यासनगृहं क्षेत्रं संस्पृश्यादाय कांचनं उष्ट्रं च ककुदि स्पृ
ष्ट्वा मृगाश्वमहिषादिकान् गोघ्रामश्ववविधानेन पक्षे संस्पृश्य पक्षिणः छत्रं दंडे तरून्मूले फलं संगृह्य गौरवात् प्रगृह्यापा
नहौ मन्त्रवासयेत्प्रतिमुच्यते अमत्रपात्रं वासस्तथा समादाय कन्याशीर्षे थवा करे कन्याया दक्षिणां समभिस्पृशेदित्यर्थः
रति भार्यौ परपूर्वां प्रतिगृह्णीत चाक्षतां पुत्रमुत्संगमारोप्य प्रतिगृह्णीत दत्तकं रथं रथमुरं वस्पृष्ट्वा प्रतिगृह्णीत कूबरे कूब
रो युगाधारकाष्ठं तथा हेमाद्रौ दानखंडे भूमेः प्रतिग्रहं कुर्यात् भूमिं कृत्वा प्रदक्षिणं करे गृहीत्वा कन्यां तु दासं दा-
स्यौ द्विजोत्तमाः आरुह्य च गजं स्यात्कः कर्णे चाश्वस्य कीर्तितः तथा चैकशफानां तु सर्वेषां च विशेषतः प्रतिगृह्णीत राजाश्रृं
गे पुच्छे कृष्णाजिनं तथा ये चैकशफाः श्रृंगिणस्तान्विशेषतः श्रृंगे प्रतिगृह्णीयादित्यर्थः कर्णे च पशवः सर्वे ग्राह्याः
पुच्छे विचक्षणैः गृह्णीयान्महिषं श्रृंगे खरं वै पृष्ठदेशतः प्रतिग्रहमथाष्टस्य यानानां चाधिरोहणात् बीजानां मुष्टिमादाय
रत्नान्यादाय सर्वतः वस्त्रं दशातादादद्यात्परिधायापि वा पुनः आरुह्योपानहौ मंच मारुह्यैव च पादुके धर्मध्वजौ तु संस्पृश्य गृ-
ह्णीयात् अवतीर्य च सर्वाणि जलस्थानानि वै द्विजाः आयुधानि समादाय तथा मुच्य विभूषणं आमुच्य बध्वेत्यर्थः इति प्रतिग्रह
स्थानानि अथादौ तुलापुरुषदानं हेमाद्रौ मात्स्ये अनेन विधिना यस्तु तुलापुरुषमाचरेत् प्रतिलोकाधिपस्थाने प्रतिमन्वंतरं
वसेत् विमानेनार्कवर्णेन किंकिणीजालमालिना पूज्यमानोप्सरोभिश्च ततो विष्णुपुरं व्रजेत् कल्पकोटिशतं यावत्तस्मिन्लोके महीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते कर्मक्षयादिहपुनर्भुविराजराजो भूपालमौलिमणिरंजितपादपीठः श्रद्धान्वितोभवतियजसहस्रयाजीदीप्तप्रतापजितसर्वमही
पलोकः योदीयमानमपिपश्यतिभूतियुक्तः कालांतरेस्मरतिवाचयतीहलोके योवाशृणोतिपठतींद्रसमानरूपः प्राप्नोतिधामसपुरं
दरदेवजुष्टमिति तत्रैववह्निपुराणे एवंदत्वासुवर्णंतुब्रह्महत्यादिकंचयत् पापंनिहत्यपुरुषःस्वर्गलोकंसगच्छति तत्रस्थि-
त्वाचिरंराजन्यदायातिमहीतले राजराजेश्वरःश्रीमान्वीतशोकोनिरामयः रूपसौभाग्यसंपन्नोनित्यंविष्णुपरायणः पुनर्वि
ष्णुपदंयातितत्रगत्वानशोचति इतिसुवर्णादितुलापुरुषदानफलं अथकुंडमंडपादि तच्चसुवर्णतुलायामेवावश्यकमितिहेमा
द्र्यादयः रत्नरजततुलायांतुकृताकृतमित्युक्तंतत्रैव होमाद्यशक्तौतुमंडपादिरहितमेवकुर्यात् नतत्रमंत्रोहोमोवा एवमेवप्रदीय
तइतिमात्स्योक्तेः ग्रहमंत्राद्वारजापमंत्राश्चनेत्यर्थः अथतुलावेदीपरिमाणंचाहतत्रैव तत्रादौशुभेह्निशोभायकुंडमंडपसानंवा
कृत्वासप्तहस्तांवापंचहस्तांवातृतीयांशेनचतुर्थांशेनवोच्चांवेदींकृत्वातदुपरिपूर्वपश्चिमयोःस्तंभद्वयंनिखेयं हेमाद्रौमात्स्ये शा
केंगुदीचंदनदेवदारुश्रीपर्णिबिल्वप्रियकांचनोत्थं स्तंभद्वयंहस्तयुगावखातंकृत्वादृढंपंचकरोच्छ्रितंतत् तदंतरंहस्तचतुष्टयंस्या
दथोत्तरांगंचतुरस्रमेवेति शाकोवृक्षविशेषोमहासारइतिप्रसिद्धः श्रीपर्णीभद्रतरुः प्रियकोजीवकः सारमतेकदंबः
अंजनः कांचनतुल्यपर्णोवृक्षविशेषः स्तंभद्वयंचचतुरस्रींकृत्यवेदिमध्येपूर्वपश्चिमभागयोर्निखेयं उत्तरांगंस्तंभयोरुपरि
तिर्यक्काष्ठं तच्चपंचकरयोःस्तंभयोर्हस्तचतुष्टयोपरिनिधेयंचतुरस्रं अथोत्तरांगंचतदंगमेवेतिपाठेतदीयमितिस्तंभसजातीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठमित्यर्थः समानजातिस्त्वतुलावलंब्याहैमेन मध्ये पुरुषेणयुक्ता दैर्घ्येणसाहस्तच तुष्टयंस्यात्पृथुत्वमस्याश्च दशांगुलानि-
स्कवर्णपट्टाभरणाच्चकार्यासलोहपाशद्वयश्शृंखलाभिः युतास्कवर्णेनचरत्नमालाविभूषिता माल्यविभूषणाढ्या समानजातिस्तो
रणस्समानजातिः तुलोत्तरांगमध्ये द्वादशभिरंगुलैरधस्तादुदगग्रा अवलंब्या पुरुषेणविष्णुनाशृंखलाविलंबितयास्कवर्ण
निर्मितया तत्प्रतिमालक्षद्वयन्यस्तयोर्बहिःस्थितमंगुलषट्कविहायविज्ञेयं समतुलायाः अष्टोत्तरशतांगुलमितत्वात् पृथुत्वंचा
स्यादशांगुलपरिमितेन वलयाकृतिसूत्रेण संमितंविधेयमित्यर्थः सलोहपाशद्वयश्शृंखलाभियुक्ताकार्येत्यर्थः तत्रैववह्निपुरा-
णेआश्वत्थीरवादिरीचापिपालाशीवास्कप्लक्षजा चतुर्हस्तप्रमाणेनस्कश्लक्ष्णास्कदृढानवा स्कवत्तुलासमानद्वास्निग्धाछिद्रवर्ज्या
न्विताम्भोजशिक्यद्वयोपेतावद्धास्तंभेषुयाज्ञियइत्याहनारदः चतुरस्रातुलाकार्यापादौचापितथाविधौ चतुर्धपिवपार्श्वेषुमानं
स्याच्चतुरंगुलं मुल्काताववत्तुकूरकावंतयोर्विन्यसेद्बुधः चतुर्हस्ताधटतुलामध्यश्शृंखलयान्विता शिक्यहस्तत्रयंकुर्यात्कुटकंचतुरंगुल-
मिति यदाहतत्रैवविश्वकर्मा विशेषदानंकथितंतुलादितस्मात्तुलालक्षणमुच्यतेप्राक् तुलाप्रमाणंस्मृतमंगुलानिदैर्घ्यंगुलैःषण्ण
वतिप्रमाणैः प्रतिद्वयेप्यंगुलषट्कषट्कशतांगुलाष्टोत्तरमंगुलानां स्युर्विंशतिःपंचचधातुबधाबधेषाधिष्ठानस्कशनिवेश्याः ई
शःशशीमारुतरुद्रसूर्याः स्याद्विश्वकर्मागुरुरंगिराग्नी प्रजापतिर्विश्वजगद्विधातापर्जन्यशंभूपितृदेवताच सौम्यश्चधर्मामरराज
मश्विनौजलेशमित्रावरुणौमरुद्गणाः धनेशगंधर्वजलशविष्णुर्दंडेचतुर्विंशतिरेवदेवताः अत्रसोम्योबुधः स्यात्पंचविंशःपुरुषः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सएकोयस्तोल्यमानस्तुलयामहात्मा एताविधेयास्तपनीयमय्योरत्नार्चितादेवतमूर्तयस्ताः षडंगुलःस्याच्चतुरस्रपिंडःप्रांतद्वये-
विष्णुरनंतनामा पार्श्वद्वयंतच्चतुरंगुलंस्यादेवंमयातेकथितंप्रमाणं मध्यकुटेसंकुलिकांगुलानिपंचाधिकाविंशतिरेवदैर्घ्ये एका-
गुलःस्याद्भवतीहपिंडःस्तत्राधिदेवःकिलवासुकीस्यात् एकैकरज्जुर्लभतेंगुलानित्रिःसप्ततिःपिंडगतांगुलाच तच्चैलकद्वंद्वमथां-
गुलानित्रिंशत्तथापंचदशाधिकास्यात् तद्धातुबद्धंशफभकाष्ठपीठंपिंडेतथाद्वंद्वमथोविधेयं अधोधटोभूम्यधिदेवतास्यांतुलांत-
रेभूमिपतिर्निवेश्यइतिहेमाद्रौमात्स्योक्तेः वेद्यादितुलाकृत्यलक्षणंच अथवेद्यांषोडशारवंचक्रलिखनप्रकारउक्तोमदनरत्ने तत्रा-
चार्योवेद्यांमध्येत्रिहस्तव्यासंचतुरस्रंप्रसाध्यप्रागपरदक्षिणोत्तरनवरेखाभिस्तच्चतुःषष्टिकोष्ठकंकुर्यात् तत्रकोष्ठानिप्रत्येकंनवनवां-
गुलानिसंपद्यंते ततोबहिरंत्यपंक्तिषुचतुर्दिक्षुमध्यकोष्ठानिचत्वारिचत्वारिमार्जयित्वातदुपर्युपांत्यपंक्तिषुपार्श्वयोस्तत्रत्रयंत्रयं-
त्यक्त्वाप्रतिदिशंप्रतिमध्यकोष्ठद्वयंद्वयंमार्जयेत् तच्चतुर्दिक्षुषट्षट्कोष्ठानिचत्वारिद्वाराणिसिध्यंति ततोमध्यस्थितषोडशको-
ष्ठानिमार्जयेत् ततोबाह्येएकैककोणकोष्ठंविहायकोणकोष्ठद्वारपीठांतरालवर्तिन्यवशिष्टानिपंचपंचकोष्ठानिमार्जयेत् . तथाचमध्य
चतुरस्रपीठपादाःसिध्यंति ततोमध्याच्चत्वारिवृत्तानिकुर्यात् तत्राद्येचत्वार्यंगुलानिव्यासः द्वितीयेष्टौ तृतीयेचतुर्विंशतिः चतु-
र्थेंषड्विंशतिरिति,तच्चतुरंगुलंवृत्तंकर्णिकारूपंपीतेनरजसापूरयित्वाकर्णिकावधिरेखांसितेनरजसानिर्मायतद्बहिरष्टांगुलात्मकेवृ-
त्तेपीतरक्तसितरजोभिःसंपादितमूलमध्याग्राणिषोडशकेसराणिसंपाद्यतत्केसरावधिरेखांसितेनैवरजसांगुलोन्नतांसंपाद्यच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुर्विंशांगुलात्मके तद्बहिर्वृत्ते नारजसा षट्दिक्ष्वष्टौ पत्राणि रक्ताग्राणि कुर्यात् ततो दलांतररेखां सितेन रजसा विधाय दलांतराणि कृष्णेन
रजसा पूरयित्वा तद्बहिरेकांगुलांतरां बहिर्वृत्तरेखां सितेनैव रजसा संपाद्य वृत्तद्वयांतरं परितोष्टदलाग्र तन्मध्यचिन्हैः षोडशधा विभज्य प्र
तिभागं यवाकारान् षोडशारान् श्यामपीतारुणश्वेतरजोभिः कल्पयित्वा तदंतरेण यथायोगं रजोभिः पूरयित्वा तद्बहिः सितपीतारुणश्या
महरिताः पंचरेखा लिखेत् तद्बहिः पीठक्षेत्रं चतुरस्रं यथाशोभं रजोभिः रक्तं कृत्य पीठावधि रेखां सितेन रजसा चतुरस्रां रचयेत् द्वारक्षे
त्राणि पूर्वादितः पीतश्यामसितहरितरजोभिः पूरयेत् आग्नेयादिकोणकोष्ठचतुष्टयं लोहितहरितश्यामधवलैः पूरयेत् आग्नेयादिपीठ
पादचतुष्टयं पंचकोष्ठात्मकं तु क्रमात् सितरक्तपीतकृष्णरजोभिः पूरयेत् ततः सितेन रजसांगुलोन्नतेन बहिश्चतुरस्ररेखां कुर्यादिति मदन
रत्नादयः ठक्कुरमते तु चतुरस्रं चतुर्हस्तं तत्र प्रत्येकं द्वादशांगुलानि नवकोष्ठानि वृत्तानि तु पंच तत्राद्यावृत्ते चत्वार्यंगुलानि व्यासः द्वि
तीयेष्टौ तृतीये विंशतिः चतुर्थे चतुर्विंशतिः पंचमे तच्चतुरस्रबहिस्ततोष्टत्रिंशदिति पंचकोष्ठात्मकं पीठपादचतुष्टयं आग्ने
यादिक्रमेण रक्तहरितश्यामसितैः पूरणीयं कोणगकोष्ठचतुष्टयं प्रत्येकं त्रिभिस्त्रिभिर्वर्णैरिति विशेषः इदमेव वारुणं मंडलं जलाश
योत्सर्गादौ ज्ञेयं पुनस्तत्रैव वज्रमागुत्तमे भागे आग्नेय्यां शक्तिमुज्ज्वलां आलिखेद्दक्षिणे दंडं नैर्ऋत्यां खड्गमालिखेत् पाशं तु
वारुणे लेख्यं ध्वजं वै वायुगोचरे कौबेर्यां तु गदां लिख्य ईशान्यां शूलमालिखेत् शूलस्य वामदेशे तु चक्रं पद्मं च दक्षिणे ततो महा
वेद्युपरि पंचवर्णफलपुष्पोपशोभितं वितानं कुंडमंडपे बध्नीयादिति इति वेद्युपरि षोडशारचक्रं अथ घृतादितुलाफलमुक्तं ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेमाद्रौविष्णुधर्मोत्तरे प्रथमातुघृतस्योक्तातेजोवृद्धिकरीशुभा माक्षिकेणतुसौभाग्यंतैलेनबहुला प्रजाः वस्त्रेणदिव्यवस्त्राणिप्राप्नोति
तुलयाध्रुवं लवणेनतुलावण्यमरोगित्वंगुडेनच असपत्नः शर्करयात्सुरूपंचंदनेनतु अवियोगोभवेद्भर्त्रातुलयाकुंकुमस्यच नसंतापोत्द्भवेदिभ
वेत्क्षीरस्यतुलयातथा सर्वकामप्रदाःसर्वाः सर्वपापक्षयंकराः यःकरोतितुलाःसर्वाः सगोर्यालयमाप्नुयात् मंत्रेणदद्यादभिमंत्रितांतुसकृत्तु
लामेकतमांद्विजेभ्यः सयातिगौर्याःसदनंसुपुण्यंनशोकदौर्भाग्ययुपाप्नुतेपुमान् त्वंतुलेसर्वभूतानांप्रमाणमिहकीर्तिता मांतोलयंतीसंसा
राद्दुद्धरस्वनमोस्तुते इत्यारुह्य गोदोहकालंतत्रैवचिंतयित्वाहरिप्रियां अवरुह्यततोदद्यादर्घंपाद्यमथापिवा गुरुंसंपूज्यविधिवद्व-
स्त्रालंकारभूषणैः विसर्जयेन्नमस्कृत्यभोजयेद्द्विजपुंगवान् शेषंद्विजेभ्योदातव्यंस्त्रीभ्योन्येभ्यस्तथैवच कदलीदलसंस्थाश्चप
चपिंडाहिमाद्विजा कर्पूरस्यतुतांपूज्यकुंकुमेनालभेत्तुतां विधिनानेनयोदद्यात्तुलादानंविमत्सरः सलोकमेतिपार्वत्याःसेव्य
मानोप्सरोगणैः तत्रापिकालंरुचिरमिहलोकेनृपोभवेत् आत्मतुल्यंसुवर्णंवा रजतंरत्नमेववा योददातिद्विजाग्र्येभ्यस्त-
स्याप्येतत्फलंलभेत् एतद्भूमिदानजन्यं ब्रह्महत्यादिपापाद्येर्मुक्तःशिवपुरंव्रजेत् सचतत्पापनिर्मुक्तः मोक्षविष्णुपुरंव्र-
जेत् तुलापुरुषभूमींच दीयमानेतुयेनराः पश्यंतितेपिवायांतियेवास्युरनुमोदकाः गुडंवायदिवाखंडलवणंवापितोलि
तं योदद्यादात्मनातुल्यंनारीवापुरुषोपिवा पुमान्प्राप्नुवत्स्यात्तुनारीस्यात्पार्वतीसमा सुभगोरूपसंपन्नोभुंजीतांतेत्रि-
विष्टपं हिरण्यदक्षिणायुक्तंसवस्त्रभूषणान्वितं अलंकृत्वाद्विजाग्र्यंतपरिधाप्यचवाससी खंडादिनातोलितपश्चाद्गुर वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपादयेत् सर्वकामसमृद्धात्मानंतं कालंवसेद्दिवीति इतिधृतादितुलादानफलं अथनानारोगनिरासार्थं द्रव्यविशेषतुलादा
नान्युक्तानिगारुडे तुलापुरुषदानंतुशृणुमृत्युंजयोद्भवं अथलोहप्रदानव्यंसर्वरोगोपशांतये कांस्यंचयक्ष्मणेदेयंत्रपुचार्शोवि
कारके अपस्मारेतुसीसंस्यात्ताम्रंकुष्ठेचदारुणे पित्तलरक्तपित्तेचरौप्यंप्रदरमेहयोः स्वर्णंसर्वरोगेषुप्रदद्यान्मृत्युनाशनं फलोद्भवं
तथादेयंग्राहिण्यादीर्घवाहिने गोडभस्मकरोगेच्पोगंस्याद्दड़मालके पोगंपूगीफलं काष्ठंचाग्निमांद्यस्याद्रोगोत्पत्तौतुपैष्टकं मधू-
द्भवंतथादेयंकासश्वासजलोदरे घृतोद्भवंतथादेयंछर्दिरोगोपशांतये क्षीरंपित्तविनाशायदधिस्याद्भगदारणे लवणंवेपनाशायपैष्टंदद्रुवि
नाशने धान्यंचसर्वरोगस्यनाशनेमुनिभिःस्मृतमिति अत्रायंसंक्षेपोक्तानोद्योतेपि रूप्यतुलायांस्वर्णतुलाफलमेव पितृतृप्तिःप्रदरमे
हनाशश्च रत्नतुलायांस्वर्णतुलाफलमेव ताम्रेणकुष्ठनाशः घृतेनतेजोवृद्धिःछर्दिनाशश्च गुडेनारोगित्वंसौभाग्यवृद्धिश्च लवणेनला
वण्यंसौभाग्यंच मधुनासौभाग्यंकासश्वासजलोदरनाशश्च तैलेनप्रजावान्भवति क्षीरेणपित्तनाशःसंतापनिवृत्तिश्च दध्नाभगदर
नाशः शर्करयासपत्नबाधानिवृत्तिः अन्नेनारोगित्वं पिष्टेनदद्रुनाशः फलैःसंग्रहणीनाशः क्रमुकेर्गंडमालानाशः मुखदुर्गंधिना
शनंदद्रुनाशश्च क्रमुकंपूगीफलं चंदनेनसौंदर्यवान् गंधेनसौभाग्यं वस्त्रेणदिव्यवस्त्रावाप्तिः काष्ठैरग्निमांद्यनाशः वि
ष्णुप्रीतिर्वासर्वद्रव्यैरपीति इतिनानारोगनिरासद्रव्यविशेषतुलाः अथपूजार्थंतत्तद्व्याधिदेवतामाह गारुडे अधिदैवंतु-
लोहेवैमहाभैरवउच्यते कांस्येत्रपावश्विनौचवायुश्चसीसकेस्मृतः ताम्रेसूर्यस्तथाप्रोक्तःपैत्तलेचकुहूस्तथा रौप्येचपितरोज्ञेयाः ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौवर्णे सर्वदेवताः फलेसोमोगुडेचापस्तांबूलेचविनायकः गंधर्वाःकुसुमेचैवजांगलेग्निस्तथास्मृतः जांगलेकाष्ठे मधौयक्षंमय
यत्नेनघृतेमृत्युंजयंतथा क्षीरेतारागणाःसर्वेदध्निसर्पाःप्रकीर्तिताः लवणेपार्वतीदेवीसमुद्दिष्टाधिदेवता पिष्टेप्रजापतिर्देवोऽन्न
न्नेसर्वाश्चदेवताः आर्तिर्यदास्यात्पात्राणांप्राप्नुयात्पुण्यदेशतः नित्यमृत्युंजयप्राप्तिर्विधिनायत्प्रदीयते तदेवसर्वशांत्यर्थंभवती-
तिनसंशयः तुलापुरुषदानेनमृत्युंजयतिमानवः आगमोक्तमृत्युंजयमंत्रेणपूजयित्वेत्यर्थः नाममंत्रेणवायथाधिकारंयोज्यं
इतिद्रव्याधिदेवताः अथकालविशेषः दानोद्योतेविश्वामित्रः आदित्येराहुणाग्रस्तेस्वर्णेस्तोलयेत्ततु सोमग्रहेतुरौप्येणयद्वादानं
तथाशृणु प्रवगस्यसुखेजातउत्पन्नःपितृदेहतः सर्वपापहरंवेतद्दामिश्रीयतांविधुः इत्युच्चार्यजलंत्वप्सुनिक्षिपेद्द्विजसत्तमे
ति अथतुलापुरुषदानविधिः हेमाद्रौविष्णुधर्मोत्तरे तुलादानंप्रवक्ष्यामिसर्वपापप्रणाशनं यद्धोर्याचरितंपूर्वंलक्ष्मीनाराय-
णेनतु पुण्यंदिनमथासाद्यतृतीयायांविशेषतः गोमयेनाञ्जलिस्तायांभूमौकृत्वाघटंशुभं दारवंशुभवृक्षस्यचतुर्हस्तप्रमाणतः
स्ववर्णतत्रबध्नीयात्स्वशक्त्याघटितंघटे सौवर्णंस्थापयेत्तत्रवासुदेवंचतुर्भुजं शिक्यद्वयंचबध्नीयात्स्थापयेत्पीठकेततः तत्रारोहेत्स्व
वस्त्राढ्यःसर्वालंकारभूषितः अभीष्टदेवतांगृह्यस्नापयित्वाघृतादिभिः तुलापुरुषदानस्यविधिरेषःप्रकीर्तितः अत्रविधिरेषःप्रकीर्ति-
तइतिएतावत्येवकर्तव्यतेत्युक्तं भवतीतिदामोदरःनान्यदिति तुलादानमधिकृत्यलिंगपुराणे दक्षि[illegible]चशतंसार्द्धंनदर्धंवापिदापये
त् गुरोरिति शेषः ऋत्विजांचैवसर्वेषांदशनिष्कान्प्रदापयेदिति तथायजमानः अयनग्रहणसंक्रमादिपुण्यकालमासाद्यपूर्वेद्युरेकभक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरितप्रायश्चित्तः कृतनित्यक्रियोदर्भेषासीनोदङ्मुखोधारयमाणः शुक्लचिराचम्यदेशकालौसंकीर्त्यममामुककामनासिद्धिद्वाराश्रीपरमेश्वर

प्रीत्यर्थंअमुकद्रव्यतुलापुरुषदानंकरिष्येइतिसंकल्प्यतथारोगनिरासार्थेतुममामुकरोगनिरासेनममास्यशिशोर्वामुकरोगनिरासेनक्षिप्रमारोग्य
सिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थमितितथायदातुशिष्टाचारवशात्ताम्रादितुलासुअष्टमांशंचतुर्थांशवासुवर्णरजतादिप्रक्षिप्यतेचेत्तदासुवर्णादितुलया
चतुर्थांशाष्टमांशादितुलाविशेषफलप्राप्तिद्वाराइत्युल्लेखःकार्यः तदंगतयागणपतिपूजनंपुण्याहवाचनमाचार्यवरणमंगदेवतापूजनमहंकरिष्येइतिसंक
ल्प्य गणपतिंसंपूज्यपुण्याहंस्वस्तिऋद्धिःश्रीःकल्याणमितिशब्दपंचात्मकंबोधायनोक्तंब्राह्मणास्त्रिस्त्रिर्वाचयित्वाचार्यंवृत्वाचार्यतुलायांगौरीवि-
ष्ण्वादितुलांगदेवताश्चपूजयित्वारोगनिरासार्थेतुमहामृत्युंजयमंत्रेणप्रतिमायांमृत्युंजयंताम्रादिनोत्तलनीयद्रव्यादिदेवताश्चपूजयेदिति इतितु
लापुरुषदानविधिर्विशेषतः अथतुलादानप्रयोगः यजमानःशुक्लचराचम्यप्राणानायम्यदेशकालौसंकीर्त्यएकैकमन्वंतरकालावच्छिन्न प्रतिलो
· कपालस्थाननिवासपूर्वकार्कवर्णकिंकिणीजालमालिविमानकरणकाप्सरःपूजासहितशिवपुरगमनपूर्वककल्पकोटिशतावच्छिन्नविष्णुपु
राधिकरणकनिवासकामःसुवर्णरत्नरौप्यतुलापुरुषमहादानमहंकरिष्ये यद्वाब्रह्महत्यादिसकलपापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंसुवर्णर
त्नरौप्यतुलापुरुषमहादानंकरिष्ये तत्रादौगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धाचार्यवरणादिकुर्यात् ताम्रादितुलायां-
तुसंकल्पोत्तरंगणपतिपूजनंपूर्वोक्तपुण्याहवाचनमात्रंकृत्वाचार्यंवृत्वायथाविभवंवस्त्रालंकारादिभिःपूजयेत् ततआचार्योगोमयोपलिप्तवे
द्यादौसर्षपविकिरणपंचगव्यप्रोक्षणेकृत्वावेद्यांवारुणमंडलंविलिख्यउपरिकुंडमंडपेपंचवर्णवितानंफलपुष्पापशोभितध्वजंबध्वावेद्यादौ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धरमावध्यनन्तरदक्षिणाद कुशिक्यां तुलां बध्नीयात् गौरीप्रीत्यर्थं तुलायां कर्पूररक्तपंचपिंडिकारूपां गौरीं कुंकुमेनानुपूजयेत् ततो धर्मराजसूर्यविष्णु-
प्रतिमाः निष्कमाषमात्रसुवर्णनिर्मिता अग्न्युत्तारणादिपूर्वकं संपूज्य इष्टदेवतांश्च पंचामृतेनाभिषिच्याभ्यर्च्य विष्णुप्रतिमां तुलामध्ये बध्वा ततः-
पूर्वोक्तं तोलनीयद्रव्यादिदेवतां संपूज्य तुलायै नम इति तुलां च तुलाग्रान्तकूटयोर्विष्णुमनंतं मध्यकूटे वासुकिं फलकद्वये भूमिं च संपूज्य रक्तवस्त्रेण
तुलां संवेष्ट्य ततः शक्तौ सत्यां तुलादंडसुवर्णनिर्मितासु चतुर्विंशतिप्रतिमासु उदकुंसंस्था देवतामावाहयेत् पूजयेच्च तद्यथा ॐ ईशानाय नमः
ईशानं आवाहयामि १ एवं सर्वत्र ॐ शशिने नमः शशिनं आवाहयामि २ ॐ मारुताय नमः ०३ ॐ रुद्राय० ४ ॐ सूर्याय०५ ॐ विश्वकर्मणे न० ६
ॐ गुरवे न० ७ ॐ अंगिरोग्निभ्यां न० ८ ॐ प्रजापतये० ९ ॐ विश्वेभ्यो देवेभ्यो न० १० ॐ धात्रे न० ११ ॐ पर्जन्यशंभुभ्यां ०१२ ॐ पितृभ्यो न०-
१३ ॐ सौम्याय० १४ ॐ धर्माय० १५ ॐ अमरराजाय० १६ ॐ अश्विभ्यां नमः १७ ॐ जलेशयाय० १८ ॐ मित्रावरुणाभ्यां न० १९ ॐ मरु-
द्गणेभ्यो० २० ॐ धनेशाय० २१ ॐ गंधर्वाय० २२ ॐ जलेशाय० २३ ॐ विष्णवे० २४ इत्यावाह्य संपूज्य ततो यजमानो वस्त्राभरणगंध-
माल्याद्यलंकृतः कुसुमांजलिं गृहीत्वा तुलां त्रिः प्रदक्षिणीकृत्य प्राङ्मुखस्तूपविश्य प्रार्थयेत् ॐ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता
साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना एकतः सर्वसत्यानि तथानृतशतानि च धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता मां तोलयंती संसाराद्धुद्धरस्व नमोस्तु ते योसौ तत्वाधिपो देवः पुरुषः पंचविंशकः स एषो
धिष्ठितो देवि त्वयि तस्मान्नमो नमः नमो नमस्ते गोविंद तुलापुरुषसंज्ञक त्वं हरे तारयस्वास्मानस्मात्संसारसागरादिति इतिप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठित्वा तुलां परिपुष्पांजलिं क्षिपेत् पुनस्तुलां त्रिः प्रदक्षिणीकृत्य वामहस्ते धर्मराजं दक्षिणे सूर्यमंके स्वाभीष्टं देवतां पंचामृताभि-
षिक्तार्चितां चादाय प्राङ्मुखस्तुलायाः पूर्वफलकमारुहेत् दक्षिणेन स्वर्णं स्यादुत्तरेण नराधिप इति मात्स्यवचनात् नराधिप इ-
त्युपलक्षणं ततः आचार्यो दक्षिणफलके तोलनीयद्रव्यमारोपयेत् सवर्णाद्यावत्समाधिकं स्यात् पुष्टिकामेन भूयिष्ठमधिकं कार्यं
ततो यजमानस्तुलामध्यदंडस्थितदृष्टिर्हरेर्मुखं पश्यन्मंत्रौ पठेत् ॐ नमस्ते सर्वभूतानां साक्षिभूते सनातनी पितामहेन देवि त्वं निर्मि-
ता परमेष्ठिना त्वया धृतं जगत्सर्वं सह स्थावरजंगमं सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणी इति गोदोहकालं तत्र स्थित्वा ततस्तुला-
मवतीर्य तोलितद्रव्यं तुलसीपत्रं निधाय देशकालौ संकीर्त्यामुककाम इदममुकद्रव्यमात्मसमतोलितमाचार्यादिभ्यो ब्राह्मणेभ्यः स-
मस्ताश्रितबंधुवर्गेभ्यो दीनानाथेभ्यश्च दातुमहमुत्सृजे न मम इत्युत्सृज्य ततः कृतस्यामुकतुलापुरुषदानकर्मणः सांगतासिद्ध्यर्थमाचा-
र्याय इदं स्वर्णं अग्निदैवतं दक्षिणात्वेन तुभ्यमहं संप्रददे न ममेति दद्यात् पुनः कृतस्यामुकतुलापुरुषदानकर्मणः इत्यादि सांगतासि-
द्ध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृजे तथा कृतस्यामुकतुलापुरुषदानकर्मणः सांगतासि-
द्ध्यर्थं यथाशक्ति ब्राह्मणान् यथाकालं यथोत्पन्नेनान्नेन भोजयिष्ये इति संकल्प्य तत आचार्यस्त्वावाहितदेवताः सर्वाः अर्चनपूर्व-
कं विसृज्याचार्याय तुलार्थं पादप्रतिमा वस्त्राभरणादि सर्वं तुभ्यमहं संप्रददे न मम इति दत्वा सदस्यायाद्यावेतदर्धं दत्वा तुलाशेषं च सभ्येभ्य
यथोद्देशं दत्वा प्रमादात्कुर्वतां कर्म॰ यस्य स्मृत्येति जपित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीतेति केचित्तु अत्र तुलापूजोत्तरमग्निं संस्थाप्य ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशानादितुलास्थदेवताभ्यो ष्टाष्टाज्याहुतयश्चेच्छंतीति तुलाप्रतिग्रहप्रायश्चित्तं त्वाचार्यश्चांद्रायणमेकं कुर्यात् प्रतिग्रहानुसारेणेत्युक्तं
दानोद्योते रहस्येषु हेमाद्रौ मात्स्ये न चिरं धारयेद्गेहे स्वर्णं गोलितं बुधः तिष्ठेद्भयावहं यस्माच्छोकव्याधिकरं नृणां शीघ्रं परस्वीकरणा
च्छ्रेयः प्राप्नोति पुष्कलमिति स्वर्णादिसर्वद्रव्यतुलास्ववं केसुतिकन्यायात् अत्रत्यः स्वर्णशब्दो रजतादिसर्वद्रव्यतुलोपलक्षको बोध्यः मी
मांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्येमृतसागरः सुजनतावल्लीरसालद्रुमः यद्विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वे
श्वरं तेनाकारि घृतादितोलनविधौ सत्प्रीतये पद्धतिः इति दानोद्योतदानरत्नमयूखाद्यनुसारेण च कालोपनामकभट्टदिवाकरकृतदानसंक्षेपचं
द्रिकायां नाम घृतादितुलापुरुषदानप्रयोगः अथ गोसहस्रमहादानप्रयोगः हेमाद्रौ मात्स्ये गोसहस्रदानं चिकीर्षुरधिवासनदिनात्प्राक्त्रिरा
त्रमेकरात्रं वा शक्तितः पयोव्रतोधिवासनदिने शक्लांबरधरो यजमानो देशकालौ संकीर्त्य मम समस्तपापक्षयोत्तरसिद्धचारणसेवितार्कवर्णकिंकिणी-
जालमालिविमानारोहणोत्तरानेकमन्वंतरावच्छिन्नेन्द्रादिसकललोकपाललोकाधिकरणकपुत्रपौत्रसमन्विताशिवालयगमनेकोत्तरसं
ख्यासंख्येयपितृमातामहकुलतारणाकल्पशतावच्छिन्नशिवपुरनिवासानंतरराजराजीभवनाश्वमेधशतकर्तृत्वशिवध्यानपरत्वावि-
ष्णुसादृश्यापन्नयोगस्थानकसंसारमोचनकामः श्वोगोसहस्रमहादानं प्रतिपादयिष्ये इति संकल्पयेत् तत उपवासगुर्वादिनियोगांतं तुला
पुरुषमहादानवत्कुर्यात् अथाचार्य एकं लक्षण्यं नंदिकेश्वरं वृषं सवत्सं दशोत्तरगोसहस्रात् सवत्सं धेनुदशकं च स्वर्णघंटास्वर्णपट्टकौशेयवस्त्रमा
ल्यहेमरत्नयुतशृंगरौप्यखुरचामरोपशोभितं सताम्रदोहनं पादुकोपानच्छत्राद्यनेकोपस्करयुतं वेदीपरितः स्थापयेत् मंडपाद्बहिस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा·चं· यथावकाशंगोसहस्रंवस्त्रमाल्यस्वर्णशृंगरौप्यखुराद्यैरलंकृत्याधिवासयेत् अथास्मादिन सगोवृषदशक मध्येचक्रोपरि स्थापितलव-
९ णद्रोणोपरि पूर्वोक्तलक्षणंकौशेयसंवीतंनानाभरणभूषितंमाल्येक्षफलसंयुक्तंनंदिकेश्वरंस्थापयेत् वेद्युपरि फलपुष्पादिशोभि
तंपंचवर्णवितानकूटे बध्नीयात् ततः आचार्यादयः स्वस्वकुंडसन्निधौ सर्वौषध्यादियुतकलशचतुष्टयस्थापनादियजमानाभिषे
कांतंतुलामहादानवत्कुर्युः ततःशुक्लमाल्यांबरधरःसकुसुमांजलिर्नासहृषगोदशकमामन्त्रयेत् तत्रमंत्रः नमोवोविश्वमूर्तिभ्यो
विश्वमातृभ्यएवच लोकाधिवासिनीभ्यश्चरोहिणीभ्योनमोनमः गवामंगेषुतिष्ठंति भुवनान्येकविंशतिः ब्रह्मादयस्तथादेवारोहि
ण्यःपांतुमातरः गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः गावोमेहृदयेसंतुगवांमध्येवसाम्यहं यस्मात्त्वंवृषरूपेणधर्मएवसनात
नः अष्टमूर्त्तेरधिष्ठानमतःपाहिसदामर्मोन् पुष्पांजलिनासपूज्य वेदीपश्चिमेप्राङ्मुखउपविश्य पूर्ववद्देशकालौस्मृत्वाममसम
स्तपापक्षयादिसंसारमोचनकामइत्यंते इमंवृषइमाःसवत्सधेनुदशकसहिताःसहस्रगाःसांगोपांगाः अमुकामुकगोत्रामुकामुकवे
दाध्यापकामुकामुकशर्मभ्यो गुर्वृत्विगादिभ्यश्च संप्रददे नममेति गुर्वादिहस्तेषुजलंदद्यात् तेचदेवस्यत्वेतियजुषारुद्रायगामि
त्यृचाप्रच्छेषुप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिकइदंकस्माअदादितिपठेयुः ततोयजमानःकृतस्यगोसहस्रमहादानक
र्मणःसांगतासिध्यर्थंग्रामंभूमिंवादत्वारूवर्णंदक्षिणात्वेनतुभ्यमहंसंप्रददे नममेतिप्रत्येकंतेभ्योदक्षिणांदद्यात् ततःकृतस्यगोसहस्रमहादा
नइत्यादि॰सांगतासिध्यर्थंनानानामगोत्रेभ्योब्राह्मणेभ्योयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजेनममेति तथापुनःकृतस्यइ॰सांगता ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिध्यर्थं यथाशक्ति ब्राह्मणान्यथाकालं यथोपपन्नेनान्नेन भोजयिष्ये इतिसंकल्पयेत् ततः आचार्यः पुण्याहवाचनाद्यावाहितदेवताः संपूज्य
उत्तिष्ठब्रह्मणस्पत इतिदेवान्विसृज्य तद्दिने पयोव्रतमशक्तोयजमानोनक्ताशी ब्रह्मचारी भवेत् ततः प्रमादात्कुर्वतांकर्म० यस्यस्मृत्या० क
र्मेश्वरार्पणं कुर्यादिति इतिदानसंक्षेपचन्द्रिकायां गोसहस्रमहादानप्रयोगः भविष्यपुराणे शतंगावः सवृषभाधेनूपस्करसंयुताः दत्वा तु-
ब्राह्मणेभ्यस्तु विप्रेन्द्र नांनरात्मना शिवादिसर्वलोकेषु यथेष्टं मोदतेतु सः पुण्यकाले शुभचिरात्रस्य देशकालौ संकीर्त्य ममसमस्तपापक्षयपू
र्वकसिद्धचारणसेवितार्कवर्णकिंकिणीजालमालिविमानारोहणोत्तरानेकमन्वंतरावच्छिन्नेंद्रादिसकललोकपालाधिकरणकपुत्रपौत्रस
मन्वितशिवपुरादिसर्वलोकनिवासानंतरमंते विष्णुसायुज्यावाप्तिकामो वृषाधिकसालंकृतगोशतदानं करिष्ये इतिसंकल्प्य गणपतिपूज
नं संक्षिप्तपुण्याहवाचनमात्रं कृत्वा गोभ्योनमइतिसवृषभागाः संपूज्य ब्राह्मणेभ्योनमइति ब्राह्मणांश्च यथाशक्तिवस्त्रालंकारादिभिः सं
पूज्य प्रार्थयेत् तत्रमंत्राः गावः सुरभयोनित्यं गावोगुग्गुलुगंधिकाः गावः प्रतिष्ठाभूतानां गावः स्वस्त्ययनंमहत् अन्नमेवपरंगावो देवानांहविरु
त्तमं पावनंसर्वभूतानां रक्षंतिचवहंतिच हविषामंत्रपूतेन तर्पयंत्यमरानपि महर्षीणांचहोतॄणां गावोहोमेप्रतिष्ठिताः सर्वेषामेवभूतानां गावः-
शरणमुत्तमं गावः पवित्रंपरमं गावोमंगलमुत्तमं गावः सर्वस्यलोकस्य गावोधन्याःसवाहनाः नमोगोभ्यः श्रीमतीभ्यः सौरभेयीभ्यएवच नमोब्रह्मसु
ताभ्यश्च पवित्राभ्योनमोनमः घृतक्षीरप्रदागावो घृतयोन्यो घृतोद्भवाः घृतनद्यो घृतावर्तास्तामेसंतुसदागृहे इतिगाः संप्रार्थ्य वृषभंप्रार्थयेत् ध
र्मस्त्वं वृषरूपेण जगदानंदकारक अष्टमूर्तेरधिष्ठानमतः पाहिसनातनेतिवृषभंप्रार्थयेत् ततःसलिलतिल कुशानादाय अद्येत्यादिममसमस्तपापक्षये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादिविष्णुसायुज्यावासिकामोवृषाधिकशतंगाःधेनूपस्कराःसाहिरण्यदक्षिणायुताः रुद्रदेवतास्तन्मूल्योपकल्पितनिष्क्रयरजतमुद्रावानानानाम
गोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजेनममेतितेनभगवान्परमात्माश्रीपरमेश्वरःप्रीयतां तत्सद्ब्रह्मार्पणमस्तु कृतस्यसवृषगोशतदानकर्मणःसां
गतासिध्यर्थंब्राह्मणभोजनंभूयसींदक्षिणांचदद्यात् अथवाअद्येत्यादि॰सवृषरुद्रदेवतसहिरण्यदक्षिणायथाशक्त्यलंकृतगोशतमूल्योपकल्पि
तनिष्क्रयरजतमुद्राःनानानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजेनममेति ततोब्राह्मणभोजनंसंकल्प्यभूयसींचदद्यात् इतिसवृषगोशतदानप्र
योगः अथसवृषगोदानप्रयोगः भविष्ये दशगावःसवृषभावृषभैकादशाःस्मृताः दत्वातुब्राह्मणेभ्यश्चसयातिपरमांगतिं शिवादिसर्वलोकेषुयथे
ष्टंरमतेनरइतिपुण्यकालेकृतचिराचमप्राणानायम्यदेशकालौसंकीर्त्यममसमस्तपापक्षयपूर्वकशिवादिसर्वलोकनिवासांतेविष्णुसान्निध्यकामो
वृषाधिकदशगोदानंकरिष्यइतिसंकल्प्य गणपतिपूजनंपुण्याहवाचनमातृकृत्वा गोभ्योनमइतिसवृषागाःसंपूज्यब्राह्मणेभ्योनमइतिब्राह्मणा
श्चयथाशक्तिवस्त्रालंकारादिभिःसंपूज्यगाःप्रार्थयेदेतैर्मंत्रैः गावोमामुपतिष्ठंतु हेमशृंग्यःपयोमुचः सुरभ्यःसौरभेय्यश्चसरितःसागरास्तथा
गावःपश्याम्यहंनित्यंगावःपश्यंतुमांसदा गावोस्माकंवयंतासांयतोगावस्ततोवयं गावोममाग्रतोनित्यंगावःपृष्ठतएवच गावोमेसर्वतश्चैवगवांमध्ये
वसाम्यहं इतिगाःसंप्रार्थ्यवृषभंप्रार्थयेत् धर्मस्त्वंवृषरूपेणजगदानंदकारक अष्टमूर्तेरधिष्ठानमतःपाहिसनातनेति वृषभंचप्रार्थयेत् ततःसकु
शतिलजलमादाय अद्येत्यादिममसमस्तपापक्षयपूर्वकशिवविष्णुसान्निध्यावासिकामोवृषाधिकदशगाधेनूपस्कराःसहिरण्यदक्षिणायुतारुद्र
देवतास्तन्मूल्योपकल्पितनिष्क्रयरजतमुद्रावानानानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजेनममेतिसंकल्पंकुर्यात् ततोब्राह्मणभोजनसं १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पः भूयसीं च दद्यात् अथवा तृषाधिकधेनूपस्करसहिरण्यदक्षिणायुतदशगारुद्रदेवतास्तन्मूल्योपकल्पितरजतमुद्राः नानानामगोत्रेभ्यो
ब्राह्मणेभ्यो दातुमहमुत्सृजे नममेत्यकद्वादद्यात् ब्राह्मणभोजनसंकल्पं कृत्वा भूयसीं च दद्यादिति संक्षेपः इति सद्वषदशगोदानप्रयोगः
अथ दश महादानानि कौर्मे कनकाश्वतिलानागादासीरथमहीगृहाः कन्या च कपिला धेनुर्महादानानि वै दश तत्र प्रथमं तावत्सुवर्णदानं
मूले दत्त्वा सुवर्णस्य शतं विप्रेभ्यः श्रद्धयान्वितः ब्रह्मलोकमनुप्राप्य ब्रह्मणा सह मोदते गव्येन भूमिं शकृता जलेन आलिप्य मध्ये सिततंदु
लैश्च सरोरुहं केसरभूषणाढ्यं सकर्णिकं चाष्टदलं विलिख्य मध्ये तस्मिन्हिरण्यं शतमानमात्रं निधाय तस्योपरि तं विचिंत्येति तत्र ब्राह्मणं कम
लासनस्थं संपूज्य विप्रं हत्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य दद्यात् हेमाद्रौ दानकांडे देयं तद्योजयेत्पूर्वं ततो विप्रं च पूजयेत् तत्तन्मंत्रैः प्रदद्या
द्धे सर्वदाने ध्ययं विधिरिति अद्येत्यादि मम समस्तपापक्षयपूर्वकमेरुदानसमफलावाप्तये देयद्रव्यतृतीयांशदक्षिणासहितं इदं सुवर्णं अग्निदैवतं अमुक
गोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति दद्यात् हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे इति कन
कदानं अथाश्वदानं महाभारते सर्वोपकरणोपेतं सुवानदोषवर्जितं योऽश्वं ददाति विप्राय स्वर्गलोके महीयते तथा यावंति रोमाणि हये भवंति हि नरेश्वर
तावंतो वाजिदा लोकान्प्राप्नुवंतीह पुष्कलानिति वाजिदानं सूर्यलोकान् कौर्मे शतैः पंचपलैरौप्यैः सुवर्णालंकृतं क्रमात् सदक्षिणं सवस्त्रं च ब्राह्मणाय
निवेदयेत् ब्राह्मणं हत्वा वस्त्रालंकरणगंधपुष्पादिभिरभ्यर्च्य दद्यात् अद्येत्यादि० मम समस्तपापक्षयपूर्वकाश्वरोमसमसंख्याकाब्दसूर्यलोकनि
वासावाप्तिकाम इमममश्वं सर्वोपस्कर हिरण्यदक्षिणायुतं यमदेवतं गोत्राय शर्मणे तुभ्यमहं संप्रददे न ममेति अश्वकर्णं धृत्वा दद्यात् दानमंत्रस्तु उच्चैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रवास्त्वमश्वानांराज्ञांविजयकारक सूर्यवाहनमस्तुभ्यममशांतिंप्रयच्छमे अथश्वेताश्वदानं गारुडे अश्वमेधमखंयस्तुकलौकर्तुंमुनीश्वर अ
श्वदानंतुतेनेहकर्तव्यंविधिपूर्वकं विधिंतस्यप्रवक्ष्यामिब्राह्मणानिर्मितंपुरा श्वेतमश्वंशुभंतातहेमपल्याणभूषितं रूप्यैस्तुकटकैःशुभ्रैःकरिंद
तोपशोभितं वज्रनेत्रंखुरैस्ताम्रैःक्षौमपुच्छंसुवाससं शुभ्रेणपदकेनैवसंयुतंस्वायुधान्वितं धान्यरत्नोपरिस्थंतुबद्धपक्षसुपट्टकं एवंसुतेजसं-
चाश्वंब्राह्मणायनिवेदयेत् मन्वादियुगाद्ययनविषुवोपरागादिपुण्यकालेदानंकार्यं ब्राह्मणंवृत्वावस्त्रालंकारादिभिःसंपूज्याश्वंचसंपूज्यवदेत्
मार्तंडायसुवेगायकाश्यपायत्रिमूर्तये जगद्दीपायसूर्यायत्रिवेदायनमोस्तुते एवंतमुच्चरन्मंत्रंकर्णेदद्यात्तिलोदकं दानवाक्यंतु अद्येत्यादिगोत्राय
शर्मणेब्राह्मणायेमंश्वेताश्वंसुवर्णतिलकालंकारयुतंललाटग्रैवेयकपूर्वोक्तालंकारैर्युक्तंगंधपुष्पाद्यर्चितंसूर्यप्रदैवतंसकलब्रह्महत्यादिपापनाशका
मोहयरोमसमसंख्याकाब्दसूर्यलोकनिवासकामश्वसालंकृतायतुभ्यमहंसंप्रददेनममेति ततोश्वप्रार्थना महार्णवसमुत्पन्नउच्चैःश्रवसपुत्रक मयात्वंवि
प्रमुख्यायदत्तोहयसुखीभवेति ततोविप्रप्रार्थना इमंविप्रनमस्तुभ्यमश्वंतेप्रतिपादितं प्रतिगृण्हीष्वविप्रेंद्रमयादत्तंसुशोभनमिति इतिदानमंत्रमुच्चा
र्यकर्णेसमर्पणंकृत्वाविप्रहस्तेजलंक्षिपेत् ततःसुवर्णंदक्षिणांदद्यात् विप्रोदेवस्यत्वेतिगृहीत्वायथाशाखंकामस्तुतिंपठित्वास्वस्तीत्युक्त्वाश्वमारु
ह्यगच्छेत् दानाचाश्वपुरोगच्छेत्पदानांसप्तसप्तति भास्करंसंनिधिध्यात्वा आलोक्यस्वगृहंव्रजेत् श्वेतमश्वंयुतोदद्यात्फलंदशगुणंभवेत् एवंकृतेन
रव्याप्रसूर्यलोकंव्रजेन्नरइति इतिश्वेताश्वदानं अथशिवायाश्वदानं गारुडे शिवायाश्वमलंकृत्ययःपर्वणिनिवेदयेत् सोश्वमेधस्ययज्ञस्यफल-
मष्टगुणंलभेदिति शिवधर्मेपिशिवायाश्वदानं अथतिलदानं आदित्यपुराणे वैशाख्यांपौर्णमास्यांवातिलान्क्षौद्रेणसंयुतान् यःप्रयच्छेद्द्विजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिभ्यः सर्वपापैः प्रमुच्यते तथा ज्येष्ठेमासि तिलान्दद्यात्पौर्णमास्यां विशेषतः अश्वमेधस्य यज्ञस्य फलमाप्नोति मानवः तथा माघेमासि तिलान्य
स्तु ब्राह्मणेभ्यः प्रयच्छति सर्वसत्वसमाकीर्णं नरकं न स पश्यति विष्णुधर्मोत्तरे तिलागावो हिरण्यंच अलंकन्यावसुंधरा दत्तान्येतानि विधिव-
त्तारयंति महाभयात् तथा तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी तिलभुक् तिलदाता च षट् तिलाः पापनाशनाः इदं तु माघमासपरं अन्य-
त्र तुलादानमेव कौर्मे कृष्णाजिने तिलान्कृत्वा स्वर्णं मधुसर्पिषी द्रोणेकं वाससा छन्नं त्रिधा तद्वत्सदक्षिणं ब्राह्मणायच तं दत्वा सर्वं तरति दुष्कृत
मिति अद्येत्यादि अमुकगोत्रायामुकशर्मणे ब्राह्मणाय स्वपूजिताय कृष्णाजिनस्थं स्वर्णमधुसर्पिर्युतं वस्त्राच्छन्नं तिलद्रोणं सोमदैवतं सर्वपाप
क्षयकामस्तुभ्यमहं संप्रददे न मम इति दद्यात् कृतैतत्तिलद्रोणस्य सांगतासिद्ध्यर्थं इदं स्वर्णमग्निदैवतं दक्षिणात्वेन तुभ्यमहं संप्रददे न मम इति दद्या
त् प्रतिग्रहीता तु देवस्यत्वेति तां गृह्य यथाशाखं कामस्तुतिं पठित्वा समापयेत् इति तिलद्रोणदानविधिः अथ तिलपात्रदानं ब्राह्मे ताम्रपात्रं ति
लैः पूर्णं प्रस्थमात्रं द्विजायच सहिरण्यंच यो दद्यात् प्रत्यहं श्रद्धयान्वितः सर्वपापविशुद्धात्मा लभते परमां गतिमिति अद्येत्यादि० इदं तिलपूरितता
म्रपात्रं सोमदैवतं सस्वर्णममुकगोत्रायामुकशर्मणे ब्राह्मणायाशेषपापक्षयकामस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु तिलाः स्वर्णयुता-
स्तुभ्यं मदत्ताह्यघनाशनाः विष्णुप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे प्रतिग्रहः प्राग्वत् इति माघे नित्यं तिलपात्रदानं अथ महातिलपात्रं कौर्मे
ताम्रवानं तिलान्कृत्वा पलषोडशकल्पिते सस्वर्णेन शक्त्यावा विप्राय प्रतिपादयेत् नाशयेत्त्रिविधं पापं वाङ्मनःकायसंभवं तिलपूर्णं ता
म्रपात्रं सहिरण्यं द्विजाय वै प्रातर्दत्वा तु विधिवद्दुःस्वप्नं विनिहंति सः तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं ताम्रपात्रं दशपलं जघन्यं परि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्त्तितं द्विगुणमध्यमं प्रोक्तं त्रिगुणंचोत्तमंस्मृतं स्वर्णमेकंजघन्यंतु द्विगुणं मध्यमं मतं त्रिगुणंचोत्तमंतद्वत्स्कवर्णपरिकीर्त्तितं पलसंख्यानिष्कद्व
यमिता सपादनिष्कद्वयमित्यन्ये अत्रदेशाचारतोव्यवस्था दानवाक्यंतुनित्यतिलपात्रदानवत् मंत्रस्कृ यानिकानिचपापानिब्रह्महत्यासमानिच
तिलपात्रप्रदानेनतानिनश्यंतुमेसदेति इतिमहातिलपात्रदानंकौर्मे अथमाहुरानृण्यकृत्तिलपूर्णकांस्यपात्रदानं आदित्यपुराणे यज्ञंसौत्रामणिं
कर्तुंयदिशक्तिर्नविद्यते महासरस्तथावापिकूपंकर्तुंचदीर्घिकं एवंकृतेमातृऋणान्मुक्तोभवतिमानवः सदक्षिणंकांस्यपात्रंदत्वाचैवप्रमुच्यते शक्त
कांस्यपात्रस्यप्रमाणंपंचविंशति पलानि तिलानामत्रनिर्दिष्टंप्रस्थानांसप्तकंतथा स्कवर्णमाषाश्चत्वारःपात्रस्योपरिधारयेत् वस्त्रेणवेष्टयेत्पात्रंवि
धायचस्कभक्तितः स्नानंकृत्वानिम्नगायांपितृदेवांश्चतर्पयेत् ततोभिःपूजयेद्देवंशंकरंहरिमेववा गोमयेनाथसंलिप्य गृहमध्यंतुसर्वतः लिखे
त्पद्मंद्वादशारंकुंकुमेनाथशोभनं तात्रोवन्हिंस्कसंस्थाप्यहोमंकुर्याद्धवैस्तिलैः पद्मेपात्रंप्रतिष्ठाप्यपूजयेद्भक्तिभावतः ततोब्राह्मणमाहूयब
हुपुत्रंस्कसंभृतं पादौप्रक्षाल्यविधिवन्मातुःश्राद्धंसमाचरेत् अथकृत्यंयथाशक्तिमाघ्यांवामृतवासरे ग्रहणेरविसोमाभ्यांसंक्रांतिषुयुगादिषु
तथान्यस्मिपियद्दत्तंमाघ्यामुद्दिश्यमातरं तदक्षय्यंफलंसर्वंपुराप्राहमहेश्वरः जीवंतिंभूषयेद्वस्त्रैर्माल्यैरपिविभूषणैः दत्वाविप्रस्यतत्पात्रंहोमंकुर्या
त्प्रयत्नतः सोपस्करंसतांबूलंक्षमाप्यचविसृज्यच अन्येषामपिविप्राणांभोजनानिप्रदापयेत् अथास्यप्रयोगः माघ्यांपूर्वोक्तपुण्यकालेवा
यजमानःकृतनित्यक्रियःपूर्वोक्तद्वादशारपद्मेकांस्यपात्रंप्रस्थसप्ततिलैःपूरितंस्थापयित्वाहरंहरिंवासंपूज्यतत्पुरतोग्नौविष्णुंविष्णुमंत्रेणशिवंशिवमंत्रे १२
णवाष्टोत्तरशतंघृताक्ततिलैर्यवैश्चहुत्वाब्राह्मणमाहूयोदङ्मुखउपवेश्याद्यौपादप्रक्षालनादिमातृश्राद्धंसमाप्याचम्यप्राणानायम्य अद्येत्यादिअमुकगोत्राया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुकेशर्मणे ब्राह्मणायउक्तोपस्करसंयुतंममसातुः गर्भधारणपोषणमलमूत्रादिनानादुःखोद्भवाद्यानृण्यत्वकामः इदंपंचविंशतिपलात्मककांस्यपात्रंप्र-
स्थसमप्रमिततिलैः परिपूरितंमाषचतुष्टयसुवर्णयुतंवस्त्रसंवेष्टितंसर्वोपस्करयुतंतुभ्यमहंसंप्रददेनममेतिदद्यात् मंत्रास्तु कांस्यपात्रंमयादत्तंमातु
रानृण्यकाम्यया भगवन्वचनात्तुभ्यंयथाशक्तिस्तथावद् दशमासांश्चउदरेजनन्याः संस्थितस्यमे कुक्षिताबालभावेनस्तनपानाद्विजोत्तम मलमू
त्रादिमलेपलिप्तायात्वत्कृतामया भवतोवचनाद्यममसुक्तिर्भवेदृणात् तिलसंख्याकृतंदुःखंजनन्याममसेवितं कांस्यपात्रप्रदानेनकृतकृत्योभ-
वाम्यहं ततः शक्त्याहिरण्यंदक्षिणांदद्यात् पात्रदानेनजननीसंभवादृणात्त्वंमुक्तोभव पुनःव्याहृतिभिराज्यहोमंकृत्वाविसृज्य यथाशक्तिब्राह्मणा
न्भोजयित्वा सुहृद्युतोभुंजीतेति इतिमातुरानृण्यकातिलपूर्णकांस्यपात्रदानप्रयोगः अथतिलपूर्णकरकदानं वायवीये करकंतिलसंपूर्णमंडले
वन्हिदैवते शिवंवन्हिवदाराध्यपूजयेत्करवीरकैः पूजान्तुरक्तचंदनेन निर्यासस्सर्जरसधूपेनधूपयेत् वन्हिमंडलंत्रिकोणमंडलं शिवंवह्निवदितिव-
ह्निस्वरूपंशिवं ।ब्रह्मांडपुराणे आदर्शंचततोदद्याद्दीपानांचचतुष्टयं वह्निरूपीयतः शम्भुर्वह्निरूपास्मि लम्भिये तेजोरूपंकृतंपापंचाक्षुषंचव्य
पोहतु इतिदत्तेस्यतपश्यंतिपापान्यग्रेकृतानिच परदारपरद्रव्यप्रत्रदर्शनजानिच शवादिदर्शनोत्थानितेत्रदोषकृतानिच यएवंकुरुतेदानंशिव
भक्त्यायतव्रतः शिवलोकेवसेद्भूयः कल्पत्रयमशंकितः इतितिलपूर्णकरकदानं अथ गजदानंकौर्मे दद्याद्गजंपुराणोक्तंमूल्यंपंचशतानिवावि
त्तानुसारात्तत्रापिकनिष्ठोत्तममध्यमं तत्रापिस्वरूपतोगजदानमुत्तमं तन्मूल्यंहेममाषशतपंचकदानंमध्यमं शतत्रयहेममाषदानंकनिष्ठमि
तिरूप्यस्थूणालंकरणंस्वर्णताराविभूषणं सदक्षिणंवित्तशक्त्यादत्वाशिवपुरंव्रजेत् स्थूणारज्जुः ताराग्रौक्तिकजालीगजालंकारः कौर्मे यथाल।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 भोपपन्नं वायः प्रयच्छति दंतिनं ब्राह्मणायदरिद्रायस्वर्गलोकेमहीयतइति ततोगजदानांगंशिवंद्विजंचसंपूज्यदद्यात् दानवाक्यंतु अद्येत्यादि
 ममसर्वपापक्षयोत्तरसिद्धचारणसेवितार्ककिंकिणीजालमालिविमानारोहणोत्तरानेकमन्वंतरावच्छिन्नाक्षय्यदेवराजत्वानंतविष्णुपुरावाप्तिकाम-
स्तत्वीतिकामश्वसालंकृतायामुकगोत्रायामुकशर्मणेब्राह्मणायेमंगजंकक्षारज्जुस्थिरासनसहितंकांचनमालादिकीर्णचामरगंधपुष्पाद्यलंकृतंप्रजा
पतिदैवतंतुभ्यमहंसंप्रददेनममेतिकरंधृत्वादद्यात् करःशुंडादंडः कृतैतद्गजदानकर्मणःसांगतासिद्ध्यर्थंइदंसुवर्णंअग्निदैवतंदक्षिणात्वेनतुभ्यमहंसंप्र
ददेनममेतिदद्यात् ततोद्विजोगजमारुह्य देवस्यत्वेतियथाशाखंकामस्तुतिंपठित्वाप्रतिगृह्णामीति स्वस्तीतिवदेत् यजमानोगजंप्रार्थयेदेतैर्मंत्रैः ऐरावत
श्चतुर्दंतोगजानांनायकस्तथा दिग्दंतिनांपूज्यतमःपापंक्षयतुनःप्रभुः सुप्रतीकगजेंद्रत्वंसरस्वत्याभिषेचक इंद्रस्यवाहनश्रेष्ठसर्वदेवैस्सुपूजित गजें
द्रमत्तमातंगदैत्यसैन्यविनाशक तवदानेनमेशांतिःसर्वदास्तुमहत्सुखमिति ब्राह्मणेस्तथास्तुइत्युक्तोभूयसींदद्यादिति इतिगजदानप्रयोगः अथ-
दासीदानं वन्हिपुराणे स्थिरनक्षत्रसंयुक्तेसौम्येसौम्यग्रहान्विते दानकालंप्रशंसंतिसंततःपर्वणिवापुनः अलंकृत्ययथाशक्त्यावासोभिर्भूषणै
स्तथा ब्राह्मणायप्रदातव्यायजमानेनशक्तितः पंचवर्षाधिकासातुचत्वारिंशत्समावधि दासीद्विजायदातव्यादासीदानेत्वयंविधिरिति दानवा
क्यंतु अद्येत्यादिगोत्रायशर्मणेसालंकृतायसुवर्णालंकारवतींगंधपुष्पाद्यर्चितांप्रजापतिदैवत्यांअक्षय्यसुखवाप्तिकामस्तुभ्यमहंसंप्रदद
नममेति शिरसिधृत्वादद्यात् द्विजप्रार्थनामंत्रस्तु वन्हिपुराणे इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता सर्वकामकरीभोग्यायथेष्टंभद्रमस्तुमे
ततःसुवर्णदक्षिणांदत्वानमस्कुर्यात् अनुगत्वातुसीमायांद्विजंचैवविसर्जयेदिति इतिदासीदानं अथरथदानं कौर्मे रथंचतुर्बलीवर्दैरूढ्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यावृतंनतथा वित्तानुसारात्सर्वैश्चरथोपकरणैर्युतं सदक्षिणंचविप्रायदत्वाशिवपुरंव्रजेत् धान्यावृतं अष्टादशधान्यावृतं रथोपकरणानियुगयोक्त्रे-
तोत्रवरत्रादीनि दक्षिणाचत्रिंशन्माषमितस्वर्णमुत्तमा द्वेशतेमध्यमा अधमाशतैकमितित्रैविध्यमाह हेमाद्रिः दानवाक्यंतु अद्येत्यादि
गोत्रायशर्मणेसालंकृतायचतुर्बलीवर्दैर्युक्तंसोपस्करंधान्याष्टादशभिर्युतंविश्वकर्मदैवतंअक्षय्यस्वर्गादिसुखावाप्तिकामस्तुभ्यमहंसंप्र-
ददेनममेति मंत्रस्तु रथायरथनाथायनमस्तेविश्वकर्मणे विश्वरूपायदेवायअरुणायनमोस्तुते सुवर्णंदक्षिणांदद्यात् इतिरथदानं अथ
गंत्रीरथदानं गारुडे गंत्रींतुरंगसंयुक्तांयोददातिद्विजायते सर्वकामसमृद्धात्मासराजाजायतेभुवीति गंत्रीरथविशेषः साचतुर्भिर्गजे
रश्वैर्वृषैर्वोपेताद्वाभ्यांवोपेता दानवाक्यंतुपूर्ववत् मंत्रस्तु गंत्रीमिमांप्रयच्छामिविश्वकर्माधिदैवतां दानेनानेनभगवान्प्रीयतांमेपरःपुमा-
निति ततःसुवर्णदक्षिणांदद्यात् इतिगंत्रीसहितरथदानं अथप्रसंगाच्छिबिकादानं हेमाद्रौमात्स्ये मार्गशुक्लैकादश्यांमाघफाल्गुनयोर्वै
शाखेवाहिरण्मयंहरिमभ्यर्च्यरात्रौजागरणंकृत्वा प्रातःकृतनित्यक्रियः अद्येत्यादिगोत्रायशर्मणेसुपूजितायइमांशिबिकांयुक्तोपस्करा
अंगिरोदैवतांइष्टलोकावाप्तयेतुभ्यमहंसंप्रददेनममेति ततःसुवर्णदक्षिणांदद्यात् तत्रैववह्निपुराणे देवलोकेविपुलभोगानंतरमंतेविष्णुसायुज्या
वाप्तिकामोविप्रस्यवर्षाशतंशिबिकावाहका नांचवर्षपर्याप्तमन्नंदद्यादितिहेमाद्रिः द्विजप्रार्थनामंत्रस्तु शिबिकेयंमयादत्तायथाशक्त्याविभूषिता
द्विजत्वंप्रतिगृह्णीष्ववांछितंतेनमेभवेदिति इतिशिबिकादानं अथमहीदानं कौर्मे गोचर्ममात्रभूखंडमधिकंवास्वशक्तितः विधीन्सदक्षिणांकृत्वाद-
त्त्वा शिवपुरंव्रजेदितिनिष्कैकसुवर्णदक्षिणेत्यर्थः अपिगोचर्ममात्रेणसम्यक्दत्तेनमानवः धौतपापोविशुद्धात्मास्वर्गलोकेमहीयतइति तथादशहस्तेनदंडे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशद्दंडानिवर्तनं त्रिभागहीनंगोचर्ममानमाह प्रजापतिः तथा गवांशतं वृषश्चैकोयत्र तिष्ठेदयंत्रितः तद्धिगोचर्ममात्रंतु प्राहुर्वेदविदोजनाः तथा षष्टि
वर्षसहस्राणि स्वर्गेवसतिभूमिदः आच्छेत्ताचानुमंताच तानिवनरकेवसेत् भूमिंयः प्रतिगृण्हातिभूमिंयश्चप्रयच्छति तावुभौपुरुषौलोकेसूर्यमंडलभे-
दिनौ तथा भूमिप्रदानपुण्यस्यकलांनार्हंतिषोडशी दानान्यन्यानि मंशांतिर्भूमिदानाद्भवलिहेति दानवाक्यंतु अद्येत्यादिगोत्रायशर्मणे सालंकृता
यषष्टिवर्षसहस्रमितस्वर्गेशिवपुरनिवासकामः सर्वपापक्षयकामोवाइमांभूमिंसस्याढ्यांसवृक्षफलपुष्पाद्युपेतांविष्णुदेवतांतुभ्यमहंसंप्रददेनस-
मेति साक्षतकुशतिलोदकंद्विजहस्तेदद्यात् ब्राह्मणस्तुभूमिंप्रदक्षिणांकुर्वन्प्रतिगृण्हीयात् देवस्यत्वेतियथाशाखं कामस्तुतिपवित्रास्वस्तीतिवदेत्-
मांडव्यवचनादत्रस्वर्णदक्षिणामता मंत्रस्तु सर्वेषामाश्रया भूमिर्वराहेणसमुद्धृता अनंतसस्यफलदाअतःशांतिंप्रयच्छमे यस्योरोहंतिबीजानि
वर्षाकाले महीतले भूमेः प्रदानात्सकलाममसंतुमनोरथाइति शिवधर्मेविश्वामित्रः ग्रामंवानगरंवापिविप्रेभ्योयः प्रयच्छति क्षेत्रंवासस्यसंप-
न्नंसर्वपापैः प्रमुच्यतइति भूमिहरणेतुविश्वामित्रः स्वदत्तांपरदत्तांवायोहरेच्चवसुंधरां षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिरिति सविष्ठायां
कृमिर्भूत्वापितृभिः सहमज्जतीतिवा इतिशिवधर्मोक्तं भूदानं अथगृहदानं कार्मं शक्तिःतः सर्वविनेनपूर्णंगृहमपित्रिधा सदक्षिणंद्विजेदत्वा
ब्रह्मलोकंव्रजेन्नरइति गारुडे ऐष्टिकंदारुकंवापिमृन्मयंवापिशक्तितः सर्वोपकरणोपेतंयोदद्याद्विपुलंगृहं ब्राह्मणायदरिद्रायविदुषेचकुटुंबि-
ने सर्वकामसमायुक्तो ब्रह्मसायुज्यमाप्नुयादिति ब्रह्मवैवर्ते नगार्हस्थ्यात्परोधर्मोनैवदानंपरंगृहात् नानृतादधिकंपापंनपूज्योब्राह्मणात्प
रइति गृहनिर्माणप्रकारमाहनारदः स्नानागारंदिशिप्राच्यामाग्नेय्यांपचनालयं याम्यांशयनगेहंचनैर्ऋत्यांशस्त्रमंदिरं प्रतीच्यांभोजनागारं वाय १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्यादिति विशेषः तत्र कूपे दिक्विशेषफलं देवीपुराणे पूर्वामाश्रित्य कर्तव्यः कूपः
व्यांपशुमंदिरं भांडागारं तूनरस्यामैशान्यां देवमंदिरमिति कुर्यादिति विशेषः तत्र कूपे दिक्विशेषफलं देवीपुराणे पूर्वामाश्रित्य कर्तव्यः कूपः
स्याद्नैर्ऋत्यां वा नपूर्वव्यत्ययं कुर्यान्मध्ये देवालयाद्गृहादिति कृतं भयप्रदं लोके तथाचास्याग्निजं भयं वायव्यां चापि देवस्य भयदं जायते कू
तमिति वराहमिहिरः पुष्टिर्भूतिपुत्रहानिपुरध्रीनाशमृत्युसंपदशस्त्रबाधा किंचित्सौख्यं दिक्षु पूर्वादिकुर्यात्कूपो मध्ये गेहसर्थ क्षयं चेत्या
दि मत्स्यपुराणे देवतापंचकं तत्रचत्वारिंशत्समावृतं पूजयित्वा यथान्यायं ततो दद्याद्गृहं गृही पूजयित्वा स्वयं वास्तुशांतिं कृत्वा दद्यादित्यर्थः
अथ प्रसंगात्संक्षेपेण वास्तुशांतिप्रयोगः कर्ता शुभदिने आचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्य वास्तोः शुभतासिध्यर्थं वास्तुशांतिक
रिष्ये इति संकल्प्य तदंगतया गणेशपूजास्वस्तिवाचनमातृकापूजाभ्युदयिकश्राद्धाचार्यब्रह्मर्त्विग्वरणानि कृत्वा यथाविभवं वस्त्रालंकारादिभिः पू
जयेत् ततः आचार्यो यदत्रसंस्थितंभू० अपक्रामंतु० भूतप्रेतपिशाचाद्या अपक्रामंतु राक्षसाः स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमि भुवं त्विमा
मिति अनेन सर्षपान्विकीर्य पंचगव्येन शुचीवोहव्या इत्यृचेन पुनं तु मां देवजना इत्यृचेन गृहमाविश्य न एनोन्विंद्रमित्यृचेन गृहं संप्रोक्ष्य गृह
मध्ये प्राच्यामैशान्यां वा चतुरस्रं चतुरंगुलोच्चं हस्तमितं स्थंडिलं कृत्वा तस्य ईशानादिकोणचतुष्टये चतुरो लोहकीलानारोपयेत् विशंतु भूतले
नागा लोकपालाश्च सर्वशः अस्मिन्गृहे वतिष्ठंतु आयुर्बलकराः सदेति मंत्रेण निखनेत् प्रतिकीलं मंत्रावृत्तिः ततः ईशानकोणादि
क्रमेण चतुर्षु कोणेषु अग्निभ्योप्यथ सर्पेभ्यो येचान्येतत्समाश्रिताः तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति मंत्रेण मंत्रा
वृत्या माषभक्तबलीन्दत्वा स्थंडिलोपरि कुंकुमादिना हेमरूप्यशलाकया वा प्राक्पश्चायताः प्रागग्रा उदक्संस्था द्व्यंगुलांतराः प्रणवादिनमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नै र्देशभिर्नामभिर्दशरेखाः कुर्यात् ॐ ईशानायै नमः ॐ यशोवत्यै नमः ॐ कांतायै नमः ॐ विशालायै० ॐ प्राणवाहिन्यै० ॐ सत्यै० ॐ सुमत्यै० ॐ
नंदायै० ॐ सुभद्रायै० ॐ सुरथायै० १० इतिदशरेखाः कृत्वा तथा ॐ हिरण्यायै० ॐ सुव्रतायै० ॐ लक्ष्म्यै० ॐ विभूत्यै० ॐ विमलायै० ॐ प्रियायै० ॐ
विजयायै० ॐ बालायै० ॐ विशोकायै० ॐ इडायै० १० इतिदक्षिणोत्तरायताः उदगताः प्राक्संस्था दशरेखाः कुर्यात् एवमेकाशीति पदं मंडलं संपद्यते तेन
त्र मध्यस्थनवकोष्ठानि रेखां मार्जनेनैकीकुर्यात् एतं नवपदं ब्रह्मस्थानं तस्य चतुर्दिक्षु चत्वारि पदानि विदिक्षु भ्रंखलाकाराणि द्वादशकोणचतु
ष्टयोभयतश्चाष्टाविंशति विंशत्येकपदानि अवशिष्टानि प्रतिदिशं पंचपंचेति विंशति द्विपदानि तेषु प्रणवाद्येश्चतुर्थ्यंतैर्नमोन्तैर्वक्ष्यमाण नामभिर्दे
वता आवाह्य स्थापयेत् तत्रेशानकोणपदे वास्तोः शिरसि ॐ शिखिने नमः शिखिनं आवा० तद्दक्षिणैकपदे दक्षिणनेत्रे ॐ पर्जन्याय० आवा
हयामीति सर्वत्र तद्दक्षिणेततोपि पश्चिमत इति पदद्वये दक्षिणश्रोत्रे ॐ जयंताय० तद्दक्षिणपदद्वये दक्षिणांसे ॐ कुलिशायुधाय० ४ तद्दक्षिणप
दद्वये दक्षिणबाहौ ॐ सूर्याय० ५ तद्दक्षिणपदद्वये दक्षिण बाहौ ॐ सत्याय० ६ तद्दक्षिणपदद्वये दक्षिणकूर्परे ॐ भृशाय० ७ तद्दक्षिणे अंसपंक्तिग
तैकपदे दक्षिणप्रबाहौ ॐ आकाशाय न० ८ आग्नेयकोणपदे दक्षिणबाहौ ॐ वायवे न० ९ तत्पश्चिमैकपदे दक्षिणमणिबंधे ॐ पूष्णे न० १० तत्पश्चि
मे ततोप्युत्तरइति पदद्वये दक्षिणपार्श्वे ॐ वितथाय० ११ तत्पश्चिमपदद्वये दक्षिणपार्श्वे एव गृहक्षताय० १२ तत्पश्चिमपदद्वये दक्षिणांगे ॐ यमाय०
१३ तत्पश्चिमपदद्वये दक्षिणजानौ ॐ गंधर्वाय० १४ तत्पश्चिमपदद्वये दक्षिणजंघायां ॐ भृंगराजाय० १५ तत्पश्चिमे बाह्यपंक्तिगतैकपदे दक्षिणस्फिचि
ॐ मृगाय० १६ नैर्ऋत्यकोणपदे कपदे पादयोः ॐ पितृभ्यो० १७ तदुत्तरे कपदे वामस्फिचि ॐ दौवारिकाय० १८ तदुत्तरे ततोपि प्रागिति पदद्वये वाम जंघायां ॐ सु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रीवाय० १९ ॐ तदुत्तरे पदद्वये वामजानौ ॐ पुष्पदंताय० २० तदुत्तरे पदद्वये वामोरौ ॐ जलाधिपाय० २१ तदुत्तरे पदद्वये वामपार्श्वे ॐ असुराय०
२२ तदुत्तरे पदद्वये वामपार्श्वे एव ॐ शेषाय० २३ तदुत्तरे बाह्यपंक्तिगतैकपदे वाममणिबंधे ॐ पापाय० २४ वायव्यकोणपदे वामबाहौ ॐ रोगाय०
२५ तत्प्रागेकपदे वामप्रबाहौ ॐ अहिर्बुध्न्याय० २६ तत्प्राक्तनो पि दक्षिणेचेति पदद्वये वामकूर्परे ॐ मुख्याय २७ तत्प्राक्पदद्वये वामबाहौ ॐ भल्लाटाय० २८
तत्प्राक्पदद्वये वामबाहौ ॐ सोमाय० २९ तत्प्राक्पदद्वये वामांसे ॐ सर्पेभ्यो० ३० तत्प्राक्पदद्वये वामश्रोत्रे ॐ दितये न० ३१ तत्प्राक् बाह्यपंक्तिगतैकप
देवामनेत्रे ॐ अदितये न० ३२ तत आग्नेयकोणपदादधःकोणपदे वामहस्ते ॐ आपाय न० ३३ नैर्ऋत्यपदाधःकोणपदेकपदे ॐ सावित्राय० ३४ वायव्यकोणा
धःकोणपदे वामहस्ते ॐ जयाय० ३५ ईशानकोणपदाधःकोणपदे मेढ्रे ॐ रुद्राय० ३६ मध्यगतनवकोष्टक ब्रह्मपदसंलग्नप्रागादिपदत्रये दक्षिणस्तने ॐ अ
र्यम्णे० ३७ तद्दक्षिणेकपदे दक्षिणहस्ते ॐ सवित्रे न० ३८ तत्पश्चिमे ब्रह्मसंलग्नपदत्रये जठरदक्षिणभागे ॐ विवस्वते न० ३९ तत्पश्चिमेकपदे वृषणयोः
ॐ विबुधाधिपाय० ४० तदुत्तर ब्रह्मसंलग्न पदत्रये वामजठरभागे ॐ मित्राय० ४१ तदुत्तरेकपदे वामहस्ते ॐ राजयक्ष्मणे० ४२ तत्प्राक्पदत्रये वामस्तने ॐ पृथ्वीध
राय० ४३ तत्प्रागेकपदे उरसि ॐ आपवत्साय० ४४ ततो मध्यनवपदे हृन्नाभ्योः ॐ ब्रह्मणे० ४५ तदुत्तरे वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् वृषवास्तुप्र तिष्ठा
पने विनियोगः ॐ वास्तोष्पते प्रति० इति रूक्वर्णादि प्रतिमास्युच्चारणपूर्वकं संस्थाप्य मंडलाद्बहिरीशानादिकोणचतुष्टयेषु ॐ चरक्यै० ४६ ॐ विदार्यै० ॐ पूतनायै
न० ४८ ॐ पापराक्षस्यै० ४९ ततः पूर्वादि चतुर्दिक्षु ॐ स्कंदाय न० ५० ॐ अर्यम्णे० ५१ ॐ जृंभकाय० ५२ पिलिपिच्छाय न० ५३ ततः पूर्वाद्यष्टदिक्षु ॐ इं
द्राय न० ॐ अग्नये न० २ ॐ यमाय न० ३ ॐ निर्ऋतये न० ४ ॐ वरुणाय न० ५ ॐ वायवे न० ६ ॐ कुबेराय० ॐ ईशानाय नमः ६१ इति आवाह्य वास्तुपीठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दान्नं देवताभ्योनमइतिसंपूज्यमंडलादीशान्यांकलशंसंस्थाप्य तत्रवरुणाय०इतिवरुणंसंपूज्यप्रार्थयेत यथामेरुगिरेःशृंगंदेवानामालयःसदा तथाब्रह्मा
१६ दिदेवानांगृहेममस्थिरोभवइतिसंप्रार्थ्य ततःस्वतंत्रस्थंडिलेग्निस्थापनादिचक्षुष्यंतेउदुंबरादिसमित्तिलाज्यैर्वास्तुमंडलदेवताभ्योनाममंत्रैर्वास्तुमं
त्रेणचहुत्वास्विष्टकृदादिपूर्णाहुत्यंतंकुर्यात् ततोमंडलदेवताभ्यःशिखिनेएषपायसबलिर्नममइत्यादिबलीन्दत्वाक्षं युघपाजइतिसूक्तादिनामंडल
मिसूत्र्यावेष्टयित्वाकलशोदकेनयजमानमभिषिच्यपुनःसंपूज्ययथाशक्तिदक्षिणांदत्वाब्राह्मणान्भोजयेदितिकेचित् शारदातिलकेतुहोमोनोक्तः
तिलादिद्रव्याणांविकल्पइतिमयूखकारः इदानींतुनवग्रहसंकलितमेवप्रयोगंकुर्वंति सांप्रदायिकाः तद्यथा यथामेरुगिरेःशृंगमितिप्रार्थ्य
नोत्तरंवास्तुमंडलान्नैर्ऋत्यांपश्चिमायांवाकुंडेस्थंडिलेवावरदनामानमग्निंप्रतिष्ठाप्याग्नेरीशान्यांग्रहान्ग्रहकलशंचसंस्थाप्यतत्रवरुणंसंपूज्य
देवदानवसंवादइत्याद्यैःसंप्रार्थ्यान्वादध्यात् अस्मिन्वास्तुशांतिकर्मण्यन्वाधानंकरिष्ये अस्मिन्नन्वाहितेत्यादिचक्षुष्यंतमुक्त्वात्रप्रधान
आदित्यं सोमं भौमं बुधं बृहस्पतिं शुक्रं शनिं राहुं केतुं एताःप्रधानदेवताः प्रत्येकंअष्टोत्तरशताष्टाविंशतिरष्टाष्ट
संख्याकाभिर्वाअर्कादिसमिच्चर्वाज्याहुतिभिः तथा ईश्वरं उमां स्कंदं विष्णुं ब्रह्माणं इंद्रं यमं कालं चित्रगुप्तं अग्निं
अपः भूमिं विष्णुं इंद्रं इंद्राणीं प्रजापतिं सर्पान् ब्रह्माणं विनायकं दुर्गां वायुं आकाशं अश्विनौ वास्तोष्पतिं क्षेत्रपालं
इंद्रं अग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरं ईशानं एताःप्रधानदशांशेनतत्तत्समिच्चर्वाज्याहुतिभिः तथा शिखिनं पर्जन्यं १६
जयंतं कुलिशायुधं सूर्यं सत्यं भृशं आकाशं वायुं पूषणं वितथं ग्रहक्षतं यमं गंधर्वं भृंगराजं मृगं पितॄन् दौवारिकं सुग्री

हेंग्रहमंडलअ
नुक्रमणिकेचे
शेवटीं पहावें.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वं पुष्पदंतं जलाधिपं असुरं शेषं पापं रोगं अहिर्बुध्न्यं मुख्यं भल्लाटं सोमं सर्पं दितिं अदितिं आपं सावित्रं जयं रुद्रं अर्यमणं सवितारं विवस्वंतं विबु
धाधिपं मित्रं राजयक्ष्माणं पृथ्वीधरं आपवत्सं ब्रह्माणं चरकीं विदारीं पूतनां पापराक्षसीं स्कंदं अर्यमणं जृंभकं पिलिपिच्छं एताः प्रधानदेवताः प्र
तिद्रव्यं अष्टोत्तरशतसंख्यया समित्तिलपायसाज्याहुतिभिश्चतसृभिर्ऋग्भिः अष्टोत्तर॰ समित्तिलचतुर्वारं दूर्वावास्तोष्पतिं पंचवारं पंचभिर्बिल्वफ
लैस्तद्बीजैर्वा यक्ष्ये शेषेण स्विष्टकृतमित्याद्याज्यभागांते यजमान इदं उपकल्पितं हवनीयद्रव्यं अन्वाधानोक्तदेवताभ्यः मया त्यक्तं न ममेत्युक्त्वोत्-
सृजेत् ततआचार्यादयः ग्रहेभ्यो होमं कृत्वा तिलसमिदाज्यपायसैः शिख्यादिपिलिपिच्छांताभ्यः त्रिपंचाशद्देवताभ्यो नाममंत्रैः प्रत्येकमष्टावि
शत्यष्टाष्टसंख्याकाभिराहुतिभिर्वा हुत्वा वास्तोष्पतिमेतैरेव द्रव्यैर्विवक्षितसंख्यया हुत्वाश्वलायनो वास्तोष्पते इति चतसृभिः प्रत्यृचमृगंते-
स्वाहाकारं पठन् जुहुयात् तत्र स्वाहाकारांते होमः यवादि होमे तु वास्तोष्पते इति चत्वारो मंत्राः एकैकेन च मंत्रेण सप्तविंशतिराहुतयः इत्यष्टो
त्तरशतं ततएतैश्चतुर्भिर्वास्तोष्पते ध्रुवा स्थूणामित्येकया च एवं पंचभिः पंचबिल्वफलानि तद्बीजानि वा जुहुयात् ततआचार्यः स्विष्टकृता
दिप्रायश्चित्तहोमांते यजमानो लोकपालेभ्यो ग्रहपीठदेवताभ्यश्च बलिं दत्वा पूर्णाहुतिं हुत्वा शिख्यादिपंचचत्वारिंशद्देवताभ्यः शिखिने ए
ष पायसबलिर्न ममेति इत्याद्युक्तिपूर्वकं सर्वेभ्योऽपि बलिं दत्वा शिख्यादिभ्यो नैर्ऋत्ये कांचनं द्विजेभ्यो ब्रह्मणे नैऋत्ये धेनुं च दद्यात् ततो ग्रहकलश
वास्तुकलशोदकेन ऋत्विग्भिरभिषिक्तो यजमानः ऋत्विग्भ्यो दक्षिणां दत्वा वाद्यादितुर्यघोषपूर्वकं आचार्य ऋत्विग्भिः सकुटुंबो यजमानः
राक्षोघ्नपावमानमंत्रैर्गृहं त्रिसूत्र्या वेष्टयित्वा समंताद्व्रीहियवमतीभिरद्भिर्हिरण्यमवधाय शंनातीयेन शंन इंद्राग्नी इति पंचदशऋग्भिरितिनारायण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰चं॰ ऋग्भिः शंतातीयेन ईळे द्यावापृथिवी इति पंचविंशतिऋग्भिः समुच्चय इति वेत्यन्ये. तेनन वा शंकानचोत्तरैस्त्रिः प्रदक्षिणं परिव्रजन् प्रोक्षत्यविच्छिन्न
१७ यावोदकधारया पो हि ष्ठा मयो भुव इति तृचेन ततो विच्छिन्नक्षीरधारां च परितो दत्वा वास्तुपीठमध्ये नवपदे स्फरूपां पृथ्वीं ध्यात्वा पृथिव्यै नमः इति संपूज्य
सर्वदेवमयं वास्तुं सर्वदेवमयं परं इति पठित्वा ततो गृहस्याग्नेयकोणे आकाशपदे यजमानपदे न जानुमात्रं गर्तं खात्वा तन्मध्ये गोमयेनोपलिप्य शुभ्रचंद
दनपुष्पाक्षतैरलंकृत्य सर्वधान्यबीजानि दध्योदनं च क्षिप्त्वा नवजलपूर्णकलशं शोनेकपुष्पयुतं गंधाद्यर्चितमादाय जानुभ्यामवनिं गत्वा तज्जलं
गर्ते ॐ नमो वरुणायेति मंत्रेण क्षिपेत् जले प्रदक्षिणावर्ते पुष्पे चोर्ध्वमुखे शुभं ततोऽपक्वमृत्पेटिकायां शाल्यादिसप्तधान्यबीजानि दध्योदनं शो
वालफलपुष्पाणि च क्षिप्त्वा तूर्यघोषेण पूर्वस्थापितहैमवास्तुप्रतिमामानीय पेटिकायां संस्थाप्य पेटिकां पिधाय पठेत् पूजितोसि मया वास्तो होमा
द्यैरर्चनैः शुभैः प्रसीद पाहि विश्वेश देहि मे गृहजं सुखं वास्तुमूर्ते नमस्तेस्तु भूशय्याभिरत प्रभो मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदेति ततो मृत्पे
टिकां गर्ते स्थाप्य सशैलसागरां पृथ्वीं यथा वहसि मूर्धनि तथा मां वह कल्याणसंपत्संततिभिः सहेति इति संप्रार्थ्य तत्रैव मृदा गर्तं पूरयेत् मृद
आधिक्येऽधिकं फलं साम्ये समं न्यूनत्वे न्यूनं गर्तोपरि गोमयेनोपलिप्य गंधपुष्पाक्षतादि निक्षिपेत् तत आचार्यब्रह्मऋत्विजश्च संपूज्य तेभ्यो दक्षि
णां दत्वा ग्रहपीठदेवता वास्तुपीठदेवताश्च संपूज्य उत्तिष्ठ ब्रह्मणस्पते देव॰ अभ्यारमिदद्रयो॰ यांतु देवगणा इति विसृज्य ग्रहपीठवास्तुपीठाद्याचार्याय
दद्यात् ततः आचार्यः प्रणीताविमोकादि शेषं कर्म समाप्याग्निं विसर्जयेत् ततो यजमानो ब्रह्मशिरव्याद्युद्देशेन शतं शक्त्या वा ब्राह्मणान् भोजयिष्ये इति १७
संकल्प्य विप्रान् संपूज्य भूयसीं दत्वा प्रमादात्कुर्वतां कर्म॰ यस्य स्मृत्येत्युक्त्वा कर्मेश्वरार्पणं कृत्वा ब्राह्मणान् भोजयित्वा तेभ्यः शिवं वास्त्विति निरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्काशिवंवास्तु इति विप्रास्त्रिर्ब्रूयुः ततोयथासुखंसुखंवसतुतोऽस्तुजीवेति एवंविधिनाप्रतिसंवत्सरं वास्तुपूजनंकार्यं तेनगृहसंबंधिदुःखंनास्यादित्यु
क्तं दानविवेके महादेवतनूजेनश्रीदिवाकरसूरिणा रचितावास्तुशांतेस्तुपद्धतिर्बुधतोषदा इतिपौराणवास्तुशांतिप्रयोगः इदानींसूत्रोक्ता शांतिरभि
धीयते साचद्विजातीनां पूर्वोक्तयासमुच्चीयते पूर्वोक्तायां त्वशक्तौस्वगृह्योक्तैव कर्तव्या तथापिसिद्धेः बह्वल्पंवास्वगृह्योक्तं यस्यकर्मप्रकीर्ति
तम् तस्यतावतिशास्त्रार्थे कृतेसर्वः कृतोभवेदिति वचनात् येषांगृह्यंनास्तितेषांशूद्राणांचपूर्वोक्तैव तस्याःसर्वसाधारण्येन विधानात् अ
तश्चतच्छूद्रमात्रविषयत्वम् तस्मात्गृह्योक्तापूर्वयासमुच्चीयते सांप्रदायिकैः अथाश्वलायनगृह्योक्तवास्तुशांतिप्रयोगः तद्यथा काष्ठादिनि
र्मितंसंपन्नंधान्यादिसर्वोपस्करयुतं शोभनेमुहूर्ते ब्राह्मणैःसहतूर्यघोषेणगृहंप्रविश्यागारमध्ये प्राङ्मुखउपविश्य दर्भेषुदर्भान्धारयमाणः
पत्न्यासह आचम्यप्राणानायम्यदेशकालौसंकीर्त्य ममास्यवास्तोः शुभतासिध्यर्थंवास्तुशांतिंकरिष्ये इतिसंकल्प्य तदंगत्वेन गणपतिपू
जनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंच कृत्वा पूर्वोक्तवास्तुपीठदेवतास्थापनार्चनहोमबलिदानत्रिसूत्र्यागृहवेष्टनाभिषेचनब्राह्म
णभोजनसंकल्पांतं कृत्वा आश्वलायनगृह्योक्तांवास्तुशांतिंकुर्यात् शुचिदेशेचतस्रःशिलाःसंस्थाप्य तासुदूर्वानिधायतत्रमणिकसंज्ञंमृद्भां
डंसंस्थाप्यएतैर्मंत्रैः पृथिव्यामधिसंभवेति अंगरोवावदीति त्रेधाबद्धोवरत्रया इरासुहमशंसति अनिराममपिबाधतामितिवा ततोमणिकेज
लमासिंचेदनेनमंत्रेण ऐतुराजावरुणोरेवतीभिरस्मिन्स्थानेतिष्ठतुमोदमानः इरांवहंतोघृतमुक्षमाणामित्रेणसाकंसहसंविशंत्विति ततस्त
ज्जलंपात्रांतरेआदाय तस्मिन्दूर्वाशमीशाखाउदुंबरशाखाव्रीहियवान्फलंहिरण्यंच क्षिप्त्वा दूर्वाभिःशाखाभ्यांतत्सर्वंगृहमागादितःप्रदक्षिणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिश्रजन्मो क्षेदनेनसूक्तेन शंनइंद्राग्नीनिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप् गृहप्रोक्षणेवि० सकृत्सूक्तपाठः इतिनारायणवृत्यनुरो-
धात् वस्तुतस्तु शंनातीयेनेति ईळेद्यावेतिवर्गपंचकेरित्यन्ये· एवंसतिसमुच्चयेनकोपिविरोधः तद्यथा ईळेद्यावेतिपंचविंशर्चस्यसूक्तस्यात्मसु
तआश्वीनमाद्यो पादोलिंगोक्तदेवता जगत्योंत्येत्रिष्टुभौ गृहप्रोक्षणेविनि० ईळेद्यावापृथिवी वर्ग ५ अत्रापिसकृदेवसूक्तपाठः ततः प्रागा-
दितस्मिरविच्छिन्नासुदकधारांदद्यादनेनापोहिष्ठेतितृचस्यांबरीषः सिंधुद्वीपआपोगायत्री गृहस्यसमंताद्धारायांविनि० ॐआपोहिष्ठा
मयोभु० ३ अत्रापिसकृदेवमंत्रपाठः ततोवास्तुपीठान्नैर्ऋत्यांपश्चिमायांवाकुंडेस्थंडिलेवागृह्याग्निं वरदनामकंसंस्थाप्य चत्वारिशृंगेतिध्यात्वा
ऽस्मिन्वास्तोष्पतिस्थालीपाकेअन्वाधानंकरिष्ये अस्मिन्नन्वाहितेग्नावित्यादि-चक्षुषीआज्येनेत्यंतमुक्त्वात्रप्रधानं वास्तोष्पतिंचतुर्वारंचरु-
णा शेषेणस्विष्टकृतमित्यादिसद्योयक्ष्येइत्यंतमुक्त्वान्वाधायइध्माबर्हिषीसन्नह्यपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वावास्तोष्पतयेच
तुःकृत्वातूष्णींनिरूप्यतत्संख्ययातथैवप्रोक्ष्यावद्यातादाज्यभागांतंकृत्वावदानधर्मेणचरुमवदाय वास्तोष्पतइतिचतसृणांवसिष्ठोवास्तोष्पति
स्त्रिष्टुप् अंत्यागायत्री वास्तोष्पतिप्रधानचरुहोमेवि० ॐ वास्तोष्पतेप्रतिजा० ष्पदेस्वा० अत्रऋगंतेस्वाहाकारंपठन् जुहुयात् नस्वाहाकारांतेहोमः
गृह्येतुप्रत्यृचंहुत्वेत्युक्तेः एवंसर्वत्रवास्तोष्पतयइदंनमम पुनः चरुमवदाय ॐ वास्तोष्पतेप्र० वास्तोष्पतयइदं० ॐ वास्तोष्पतेशग्मया० वास्तो-
ष्पतयइ० ३ ॐ अमीवहावास्तोष्पते० वास्तोष्पतयइ० ४ सर्वत्रत्यागः ततास्विष्टकृदादिहोमशेषंसमाप्यशिष्टेनचरुणान्येनस्वादुव्यंजनपायसा
दियुतेनशतंतदर्धंवाशक्त्यावाब्राह्मणान्भोजयेत् होमात्पूर्वमन्यःपाकोनकार्यः ततःशिवंवास्तुशिवंवास्तुशिवंवास्त्वितित्रिःप्रयुक्तःयजमानःसुहृद्भु १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तो भुंजीतेति विशीर्णगृहसज्जीकरणेपीष्यते वास्तोष्पतिस्थालीपाकः साधारणशांतिवत् इत्याश्वलायनगृह्योक्तवास्तुशांतिः अथ गृहदानप्रयोगः
यजमानः कृतनित्यक्रियः पुण्यकाले गृहमध्ये दक्षिणभागे चंदनेनाष्टदलं पद्मं विलिख्य तदुपरि प्रस्थमात्रांतिलान्निक्षिप्य तदुपरि शय्यां सोपस्करां स्थाप-
यित्वा शय्योपरि सौवर्णमयीं लक्ष्मीनारायणप्रतिमां अभ्युत्तारणपूर्वकं पंचामृतादिना अभिषिच्य संपूज्य प्रतिग्रहीतारं च सपत्नीकं वृत्वा तं करे गृहीत्वा मं-
गलतूर्यघोषेण मंत्रैर्गृहं प्रवेशयेत् तत्र मंत्राः एह्येहि नारायण दिव्यरूप सर्वामरैर्वंदितपादपद्म शुभाशुभानंदशक्त्यामधीश लक्ष्मीयुतस्त्वं च गृहं गृहाण नमः
कौस्तुभनाथाय हिरण्यकवचाय च क्षीरोदार्णवस्थाय जगद्धाम्ने नमोस्तु ते नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः चराचरस्य जगतो गृहभूताय वै नमः भू-
र्लोकप्रमुखा लोकास्तव देहे व्यवस्थिताः नंदंति यावत्कल्पांतं तथास्मिन्भवने गृही त्वत्प्रसादेन देवेश पुत्रपौत्रान्वितो गृहे पंचयज्ञक्रियायुक्तो वसेदा-
चंद्रतारकमिति ततस्तत्पूर्वस्थापितशय्यायामुदङ्मुखमुपवेश्य सपत्नीकं यथाविभवं वस्त्रालंकारादिभिः संपूज्य स्वयमासने प्राङ्मुखो दर्भेष्वासीनो दर्भा-
न्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ संकीर्त्य मम समस्तपापक्षयपूर्वककल्पकोटिशतावधि ब्रह्मलोकमहीयमानकामः शिलाकाष्ठपक्वेष्टि-
कादिनिर्मितयथोपपत्तिसंपादितनानाविधभाजनसर्वधान्यलवणघृततैलगुडशर्करागोमहिषीबलीवर्ददासदासीमंचकतूलिकाद्वयवितानादर्शतांबूला-
यतनेलालवंगादिवर्षपर्याप्तसर्वोपकरणान्वितं सदीपिकाप्रद्योतितं विश्वकर्मदैवतं शक्रदैवतं वेदं गृहं गोत्रायशर्मणे अमुकशाखाध्यायिने सपत्नी-
काय सालंकृताय स्वपूजिताय लक्ष्मीनारायणप्रतिमासहितं तुभ्यमहं संप्रददे न मम इति दत्वा पठेत् मंत्रोस्तु इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं त-
व विप्रप्रसादेन मम संतु मनोरथाः गृहं मम विभूत्यर्थं गृहाण त्वं द्विजोत्तम प्रीयतां मे जगद्योनिर्वास्तुरूपी जनार्दनः ततः प्रतिग्रहीता गृहमध्यस्तंभं स्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिर्द्वारदेहलीं वा संस्पृश्य देवस्यत्वेतियजुषा प्रतिगृह्य स्वस्तीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् ततः सुवर्णसहस्रमारभ्य एकसुवर्णपर्यंतं यथाशक्त्या वित्त
शाठ्यविवर्जितां दक्षिणां दद्यात् ततः पादुकोपानच्छत्रचामरादिकं दत्वा संपन्नं गृहोपस्करादीत्युक्त्वा सर्वस्य संपन्नं संपूर्णमेवास्त्विति प्रतिवचनं दद्यात्
ततो ब्राह्मणान्संपूज्य भूयसीं दक्षिणां दत्वाशिषो गृह्णीयात् प्रमादात्कुर्वतां॰ यस्य स्मृत्येति कर्मेश्वरार्पणं कुर्यात् गृहदानफलमुक्तं मात्स्ये यएवं
सर्वसंपन्नं पक्वेष्टं विनिवेदयेत् कल्पकोटिशतं यावद्ब्रह्मलोके महीयते शैलजं दारुजं वापि योदद्याद्विधिपूर्वकं वसेत्क्षीरार्णवे रम्ये नारायण
समीपतः मृन्मयं वापियोदद्याद्गृहं सोपस्करान्वितं पुरेषु लोकपालानां प्रतिमन्वंतरं वसेदिति अत्र प्र विश्य संस्पृश्य वा प्रतिगृह्णीयादित्युक्तेः
प्रविश्य गृहद्वारदेहलीं देहल्यां प्रतिग्रहः कर्तव्यः तथैव संस्पृश्य स्थूणां द्वारदेहलीं वा संस्पृश्य प्रतिगृह्णीयादिति सांप्रदायिकाः इति गृहदानप्रयोगः
अथ मठदानं स्कांदे कृत्वा मठं प्रयत्नेन शयनासनसंयुतं तृणैराच्छादितं चैव वेदिकाभिः सुशोभितं पुण्यकाले द्विजेभ्यो यतिभ्यो वा निवेदयेत्
सर्वान्कामानवाप्नोति निष्कामो मोक्षमाप्नुयादिति इति मठदानं अथ धर्मशालादानं मार्कंडेयपुराणे कुर्यात्प्रतिश्रयगृहं पथिकानां हिताय हम्
निजगेहैकदेशं वा साधूनां यो निवेदयेत् प्रतिश्रयो धर्मशाला तथा अक्षय्यं पुण्यमुद्दिष्टं तस्य स्वर्गापवर्गदं सर्वकामसमृद्धोसौ देववद्दिवि मोदते
भविष्ये प्रतिश्रये सुविस्तीर्णे कारिते सजले धने दीनानाथजलार्थाय वदकिन्नकृतं भवेदिति इति धर्मशालादानं अथ कन्यादानं हेमाद्रौ स
हस्रमेव धेनूनां शतं वानडुहां समं दशानडुत्समं यानं दशयानसमो हयः दशवाजिसमा कन्या भूमिदानं च तत्समम् तस्मात्सर्वेषु दानेषु क १९
न्यादानं विशिष्यत इति अग्निपुराणे श्रुत्वा कन्याप्रदानं च पितरश्च पितामहाः विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजंति त इति देवलः -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्रः कन्यायथान्यायंपालयित्वानिवेदयेत्‌ नपिनानरकंयातिनारीवास्त्रीप्रसूयिनीति वसिष्ठः हाटकक्षितिगोरीणांसप्तजन्मानुगंफलं धर्मेजवि
धिनादातुमसगोत्रेणयुज्यतइति ऋष्यशृंगः वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकं नामसंकीर्तयेद्विद्वान्‌कन्यायाश्चैवमेवहि निष्ठेदुदङ्मुखोदाता-
तिष्ठेत्पूर्वमुखोवरः मधुपर्कार्चितायैनांतस्मैदद्यात्सदक्षिणां उदपात्रंतदादाय मंत्रेणानेनदापयेदिति निष्ठेदिति अनुपविष्टइत्यर्थः गौरींकन्या-
मिमामित्यादिपुत्रपौत्रप्रवर्धिनीमित्यंतंप्रयोगेवक्ष्यामः भूमिंधेनूश्च दासींचवासांसिचस्वशक्तितः महिषीर्वाजिनश्चैवदद्यात्स्वर्णमणीनपी
ति ततःस्वगृह्यविधिनाहोमाद्यंकर्मकारयेत्‌ यथाचारंविधेयानिमांगल्यकुतुकानिचेति अथकन्यादानप्रयोगः तत्रादौयथाशास्त्रंमधु-
पर्केणसंपूज्यवरंप्राङ्मुखंवधूंप्रत्यङ्मुखींसमुपवेश्यपित्रादिकोवधूवरदक्षिणतःस्वदक्षिणास्थपत्नीसहितउदङ्मुखोदर्भेष्वासीनोदर्भान्धारय
माणोदेशकालौसंकीर्त्य ममसमस्तपितॄणानिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तयेअनेनवरेणास्यांकन्यायामु
त्पादयिष्यमाणसंतत्याद्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुंआत्मनश्चलक्ष्मीनारायणप्रीतयेब्राह्मविवाहविधिनाकन्यादानमहं
करिष्येइतिसकुशाक्षतजलेनसंकल्प्यसपत्नीकउत्थायोदङ्मुखएवकन्यांसंप्रगृह्यपठेत्‌ कन्यांकनकसंपन्नांकनकाभरणैर्युतां दास्यामिवि-
ष्णवेतुभ्यंब्रह्मलोकजिगीषया विश्वंभरःसर्वभूताःसाक्षिण्यःसर्वदेवताः इमांकन्यांप्रदास्यामिपितॄणांतारणायच इतिमंत्रोपठित्वा
स्वदक्षिणस्थभार्यादत्तपूर्वकल्पितजलधारामविच्छिन्नांनवकांस्यपात्रोपरिधृतकन्यांजल्युपरिस्थवरांजलिदक्षिणहस्तेक्षिपन्वदेत्‌
कन्यातारयतु पुण्यंवर्धतां शिवाआपःसंतु सौमनस्यमस्तु अक्षतंचारिष्टंचास्तु दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु यच्छ्रेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तदस्तु यत्पापंतत्प्रतिहतमस्तु पुण्याहं भवंतो ब्रुवंतु स्वस्तिं भवंतो ब्रुवंतु ऋद्धिं भवंतो ब्रु॰ श्रीरस्त्विति भवंतो ब्रुवंतु अस्तु श्रीरिति प्रतिव
चनं सर्वं प्रज्ञेयं अमुकामुकप्रवरोपेतामुकगोत्रोत्पन्नो मुकशर्माहं ममसमस्तपितृणामित्यादि लक्ष्मीनारायणप्रीतये इत्यंतं पूर्वोक्तमुक्त्वा अमु
कप्रवरोपेतायामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकशर्मणे वराय श्रीधररूपिणे कन्यार्थिने अमुकामुकप्रवरोपेताममुक
गोत्राममुकप्रपौत्रीममुकपौत्रीममुकस्य मम पुत्रीममुकदेवीनाम्नीं कन्यां श्रीरूपिणीं वरार्थिनीं यथाशक्त्यलंकृतां प्रजापतिदैवत्यां धर्मप्रजा
सहत्वकर्मभ्यस्तुभ्यमहं संप्रददे कन्यां प्रतिगृह्णातु भवानिति वरहस्ते सकुशाक्षतजलं क्षिपेत् प्रजापतिः प्रीयतामिति मनसा स्मरेत् न मम इति न
वदेदिति केचित् ततो दाता गौरीं कन्यामिमां विप्र यथाशक्ति विभूषितां गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय कन्ये ममाग्रतो भूयाः कन्ये मे
देवि पार्श्वयोः कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयां मम वंशकुले जाता पालिता वत्सराष्टकं तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी धर्मे च
अर्थे च कामे च नातिचरितव्या त्वयेयं नातिचरामीति वरः एवं समस्तेत्यादि नातिचरामीत्यंतं कन्यादानप्रिवारं कार्यमिति शौनकः ततो वरः
देवस्य त्वा॰ भ्यां प्रतिगृह्णामि ॐ स्वस्तीत्युक्त्वा कन्याया दक्षिणांसमभिमृश्य क इदं कस्मा अदादिति यथाशाखं कामस्तुतिं पठित्वा पृथ्वीं प्र
तिगृह्णात्विति जपित्वा गृहस्थाश्रमान्तर्गतश्रौतस्मार्तकर्मानुष्ठानसिद्धये धर्मप्रजासहत्वकर्मसिध्यर्थं च कन्यां प्रतिगृह्णामीति वदेत् ततो दा
ता देशकालौ संकीर्त्य कृतस्य कन्यादानकर्मणः सांगतासिध्यर्थं इदं सुवर्णं अग्निदैवतं दक्षिणात्वेन तुभ्यमहं संप्रददे न मम इति वरहस्ते दद्यात्
ॐ स्वस्तीति वरः ततो दाता एवमेव जलपात्रभोजनभाजनानि गोमहिष्यश्वगजदासीदासभूवाहनालंकारादि यथाविभवं संकल्प्य दद्यात् ततो

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणभोजनंसंकल्प्यभूयसींचदद्यात् कर्मेश्वरार्पणंकुर्यादन्यदपियथा चारंकार्यं विस्तरस्तुप्रयोगरत्नादौज्ञेयः कन्यागृहेभोजननिषेधो मदनरत्नेवन्हिपुराणे अप्रजायांतुकन्यायांनभुंजीतकदाचन दौहित्रस्यमुखंदृष्ट्वा किमर्थमनुशोचतीतिकन्यादानप्रयोगः अथकपिलादानं साचदशधोक्तावाराहे स्वर्णकपिलापूर्वाद्वितीयागौरपिंगला तृतीयाचैवरक्ताक्षीचतुर्थीगुडपिंगला पंचमीबहुवर्णास्यात्षष्ठीचश्वेतपिंगला सप्तमीश्वेतपिंगाक्षीअष्टमीकृष्णपिंगला नवमीपाटलाप्रोक्तादशमीपुच्छपिंगला एतादशविधाःख्याताः कपिलास्तेमहामुने सर्वास्ते तामहाभागास्तारयंतिनसंशयइति आदित्यपुराणे सहस्रंयोगवांदद्यात्कपिलांत्वेकदेवहि सममेवपुराप्राहब्रह्माब्रह्मविदांवरइति तथा स्वर्णशृंग्योरौप्यखुराःसवत्सायाभवंतिहि सुरभीलोकमासाद्यरमतेतावतीःसमाइति महाभारते समानवत्सांकपिलांधेनुंदद्यात्पयस्विनीं सुश्वेतवस्त्रसंवीतांब्रह्मलोकेमहीयतइति अथकपिलादानप्रयोगः पुण्यकालेकृतनित्यक्रियोदेशेत्यादि०ममगोसहस्रदानफलावाप्तिसवत्सकपिलायाःरोमपरिमितवत्सरपर्यंतकामधेनुलोकनिवासकामइमांकपिलांस्वर्णशृंगींरौप्यखुरांताम्रपृष्ठींकांस्योपदोहांघंटाभरणांश्वेतवस्त्रयुगच्छन्नांचंदनस्रग्विभूषितांसोपस्करांरुद्रदैवत्यांगोत्रायशर्मणेसंपूजितायब्राह्मणायतुभ्यमहंसंप्रददेनममेतिदद्यात् मंत्रस्तु मात्स्ये कपिलेसर्वदेवानांपूजनीयासिरोहिणी तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे इतिमंत्रांतेप्रदक्षिणंकुर्यात् ततःस्वर्णंदक्षिणां दद्यात् उक्तोपस्करकपिलादानफलंमात्स्ये वस्त्रंचतुर्गुणंदत्वादक्षिणांचचतुर्गुणां एतैरलंकृतांधेनुंघंटाभरणभूषितां कपिलांविप्रमुख्याय दत्वामोक्षमवाप्नुयादिति तथा द्विगुणोपस्करोपेतामहतीकपिलास्मृता उपस्कराःस्वर्णशृंगवस्त्रदोहनपात्राद्याः सामान्यगोदाने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यमाणाः दत्तासाविप्रमुख्यायस्वर्गमोक्षफलप्रदा सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः यान्यानर्थयतेकामांस्तांस्तान्प्राप्नोतिमानव
इति महाकपिलादानप्रयोगस्त्क अद्येत्यादिममसमस्तजन्मकृतपापनाशपूर्वकंपुत्रपौत्रादिसहितायशर्मणेसालंकृतांइमांमहाकपि
लांद्विगुणोपस्करोपेतांरुद्रदेवत्यांतुभ्यमहंसंप्रददेनममेतिदद्यात् ततःस्वर्णदक्षिणांदत्वासमापयेत् मंत्रस्त्वपूर्वमेवोक्तः इतिमहा
कपिलादानप्रयोगः इतिमहादशदानानि अथदशधेनुदानानि यास्तुपापविनाशिन्यःकथितादशधेनवः तासांस्वरूपंवक्ष्यामि
नामानिचनराधिप प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा तिलधेनुस्तृतीयातुचतुर्थीजलधेनुका क्षीरधेनुस्तुविख्यातामधुधेनुस्त-
थापरा सप्तमीशर्कराधेनुर्दधिधेनुस्तथाष्टमी रसधेनुस्तुनवमीदशमीस्यात्स्वरूपतः कुंभान्घृतादिधान्नामितरासांतुराशयः
स्वर्णधेनुमप्यत्रकेचिदिच्छंतिमानवाः नवमीतिलतैलेनतथान्येपिमहर्षयः रसधेनुस्थानेस्वर्णधेनुंजलधेनुवत्पूजयेत् एतद्धि
धान्नमपिमात्स्ये अजिनंतुचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि गोमयेनोपलिप्तायांदर्भानास्तीर्यसर्वतः तन्त्रैणवाजिनंतद्वद्वत्सस्यपरिकल्प
येत् लघुकृष्णाजिनं प्राङ्मुखींकल्पयेद्धेनुमुदक्पादांसवत्सकां प्राङ्मुखीं प्राक्शिरसं सवत्सांउत्तरभागस्थितवत्ससहितां उत्तमागुड
धेनुःस्यात्सदाभारचतुष्टया वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता अर्धभारेणवत्सःस्यात्कनिष्ठाभारकेणतु चतुर्थांशेनवत्सःस्याद्गृह
वित्तानुसारतः तुलांपलशतंप्राहुर्भारःस्याद्विंशतिस्तुलेति भारःपलसहस्रात्मकोभवतीत्युक्तंपरिभाषायां धेनुवत्सौघृतस्यैतौसितसूक्ष्म
क्ष्मांबरावृतौ शुक्तिवर्णाविक्षुपादौशुचिमुक्ताफलेक्षणौ सितसूत्रशिरालौतौसितकंबलकंबलौ ताम्रगडुकपृष्ठौतौसितचामररोमकौ क २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत्प्रदेशांगडुकः विद्रुमखुरौ सुगोपेतौ नवनीतस्तनान्वितौ क्षौमपुच्छौ कांस्यदोहाविंद्रनीलकतालुकौ सुवर्णशृंगाभरणौ राजतक्षरसंयुतौ नानाफलम
येदंतौ घ्राणगंधकरंडकौ गंधकरंडकः कर्पूरादिपात्रविशेषः एवंरचित्वा धूपदीपादिभिरभ्यर्चयेद्रत्न मुक्तादीनि भारतो मानाधिक्ये फलाधिक्यं
अथास्य प्रयोगः यजमानः कृतनित्यक्रियः पुण्यकाले शुचिरद्येत्यादि मम समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं गुडधेन्वादिदानं करिष्ये इति
संकल्प्य विप्रं वस्त्राभरणादिभिः संपूज्य प्रदक्षिणीकृत्य सर्वपापक्षयकाम इमाममुकधेनुं गोत्राय शर्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं संप्रददे
नममेति तद्धस्ते स कुशतिलजलं गोपुच्छं दद्यात् विप्रस्तु देवस्यत्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् ततः सुवर्णदक्षिणां दद्या
त् प्रार्थनामंत्रस्तु यालक्ष्मीः सर्वभूतानां याच देवेष्ववस्थिता धेनुरूपेण सा देवी वांछितं मे प्रयच्छतु देहस्था याच रुद्राणी शंकरस्य सदा प्रिया
धेनुरूपेण सा देवी मम पापं व्यपोहतु विष्णोर्वक्षसि या लक्ष्मीः स्वाहा याच विभावसोः चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये चतुर्मुख
स्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां तथा सर्वपापहरा धेनुस्त-
स्माच्छांतिं प्रयच्छ मे इति एवमामंत्र्य ब्राह्मणाय तां धेनुं निवेदयेत् एतदेव विधानं सर्वधेनूनां प्रत्यक्षधेनुव्यतिरिक्तानामित्यर्थः उक्तश्च ना-
या स्तत्रानुपयोगात् ततो भूयसीं दक्षिणां दत्वा ब्राह्मणान्भोजयेदिति एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः अयने विषुवे पुण्ये व्य
तीपाते नयापुनः गुडधेन्वादयः सर्वा उपरागादिपर्वसु यथाशक्ति प्रदातव्या भुक्तिमुक्तिफलप्रदा इति अन्नद्रोणपरिमाणा तिलधेनुरु-
क्ता कल्पतरौ तत्प्रकारस्तु विष्णुधर्मोत्तरे अनुलिप्ते महीपृष्ठे वस्त्राजिनकुशावृते धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृतां धेनुं द्रोणेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुर्वीतश्रोटकेनतुवत्सकंस्वर्णशृंगींरौप्यखुरांगंधघ्राणवतींतथा कुर्याच्चशर्कराजिह्वांगुडास्यामाविकंबलां इक्षुपादांताम्रपृष्ठींशुक्तिमुक्ताफ
लेक्षणां प्रशस्तपात्रश्रवणांफलदंतमयींशुभां स्रग्दामपुच्छांकुर्वीतनवनीतस्तनान्वितां सितवस्त्रयुगच्छन्नांघंटाभरणभूषितां दर्भसंस्था
नसंपन्नांकृत्वाश्रद्धासमन्वितः कांस्योपदोहनांदद्यात्केशवःप्रीयतामिति इतिकर्तव्यता मंत्रागुडधेनूक्ताएव प्रार्थनामंत्रास्तुवह्निपुराणे ति
लाश्चपितृदैवत्यानिर्मितास्त्वेहगोसवे ब्रह्मणातन्मयीधेनुर्दत्ताप्रीणातुकेशवः इतिमंत्रांतरमुक्तं प्रतिमातिलधेन्वादीनांविक्रयायुक्तंहेमाद्रौब्र
ह्मवैवर्त्ते दानकालेतुदेवत्वप्रतिमानांप्रकीर्तितं धेनूनामपिधेनुत्वंशुल्कंदानयोगतः दातुर्वैदानकालेतुधेनवःपरिकीर्तिताः विप्रस्यव्यय
कालेतुद्रव्यंतदितिनिश्चयः दानसंबंधिविप्रेणद्रव्यमागच्छतागृहं तत्सर्वंविदुषातेनविक्रेयंस्वेच्छयाविभो कुटुंबभरणंकार्यंधर्मकार्यंच
सर्वशः अन्यथानरकंयातीत्येवमाहपितामहइति इतितिलधेनुदानं अथघृतधेनुदानंविष्णुधर्मोत्तरे तिलाभावेतथाद्द्यात्घृतधेनुंप्र
यत्नतः वासुदेवंजगन्नाथंघृतक्षीराभिषार्चितं संपूज्यपूर्ववत्पुष्पैर्धूपदीपादिभिर्नरैः तत्रैवविधानमाह गव्यस्यसर्पिषःकुंभंपुष्पमा
ल्यादिभूषितं कांस्यापिधानसंयुक्तंसितवस्त्रयुगेनच हिरण्यसहितंतद्वन्मणिविद्रुममौक्तिकैः अत्रपलसहस्रपरिमाणंकुंभः द्वादश
फलाधिकपंचशतफलधिकोवा इक्षुयष्टिमयान्पादान्खुरान्रौप्यमयांस्तथा सौवर्णेनाक्षिणीकुर्याच्छृंगेचागुरुकाष्ठजे सप्तधान्यमयेपा
र्श्वेपत्रोर्णेनवकंबले पत्रोर्णंधौतकौशेयं कर्पूरघ्राणं फलमयास्तनान् शर्करायाजिव्हा गुडक्षीरमयंमुखं क्षौमंपुच्छं रोमाणिसित २२
सर्षपैः ताम्रपृष्ठीं एतादृशींकृत्वाविधिनासंपूज्य तथाब्राह्मणंयथाविभववस्त्रालंकारादिभिःसंपूज्यदद्यात् विधिस्तुभागवत् मंत्र-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुस्कांदे घृतंगावः प्रसूयंते घृतंभूम्यांप्रतिष्ठितं घृतमग्निश्चदेवाश्च घृतंमेसंप्रदीयतामिति दानफलमपितत्रैव घृतक्षीरवहानद्योयत्र
पायसकर्दमाः तेषुलोकेषुसर्वेषुस्वपुण्येषुप्रजायते सकामानामिदंव्युष्टिः कथितानृपसत्तम व्युष्टिःफलं विष्णुलोकंनरायांतिनिष्का-
माधेनुदानतइति दक्षिणातुहिरण्यमेवहेमाद्रिः सुवर्णप्रभृतिशक्त्यावेत्युक्तंमदनरत्ने इतिघृतधेनुदानं अथजलधेनुदानंस्कांदे जल
कुंभंनरव्याघ्रसुवर्णरजतान्वितं सुवर्णशृंगरजतखुरान्वितमितिस्मृतं रत्नगर्भमशेषैस्तुग्राम्यैर्धान्यैःसमन्वितं सितवस्त्रयुगच्छन्नां
दूर्वापल्लवशोभितां कुष्ठमांसीमुरोशीरवालकामलकैर्युतां प्रियंगुपत्रसहितंसितवस्त्रोपवीतिनं सछत्रंसदुपानत्कंदर्भविष्टरसंज्ञितं च
तुर्भिःसंभृतंभूयतिलपात्रैश्चतुर्दिशं स्थगितंदधिपात्रेण घृतक्षीरवनामुखे तिलपात्राणितान्यमयानि दधिपात्रंकांस्यमयं उपोषितोवासुदेवंज
लेशयं अभ्यर्च्यसंकल्प्यजलधेनुंविप्रंचवस्त्रादिभिःसंपूज्य सवत्साजलधेनुंगुडधेनुंचदद्यात् ततोयालक्ष्मीरित्यादिपूर्वोक्तमंत्रैःप्रार्थयेत् इतिज
लधेनुदानं अथक्षीरधेनुदानं स्कांदे क्षीरधेनुंप्रवक्ष्यामितांनिबोधनराधिप अनुलिप्तेमहीपृष्ठेगोमयेननराधिप गोचर्ममानमात्रेणकुशा
नास्तीर्यसर्वतः तस्योपरिमहाराजन्यसेत्कृष्णाजिनंततः तत्रगोमयेनकुंडलिकांकृत्वाक्षीरकुंभंतत्रस्थाप्यचतुर्थांशेनवत्सकं शृंगाणिचंदनागरु
काणि प्रशस्तपत्रश्रवणांतिलपात्रोपरिन्यस्तां मुखंगुडमयंहेमवत् जिह्वाशर्करयाफलैर्दंताः मुक्ताफलेक्षणा इक्षुपादादर्भरोमासितकंबलकं
बला एतादृशींसवत्सामभ्यर्च्यद्विजंचवस्त्रालंकारादिभिःसंपूज्य अद्येत्यादिगोत्रायशर्मणेसालंकृतायइमांक्षीरधेनुंपूर्वोक्तसोपस्करयुतांस-
मस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेतिवदेत् देवस्यत्वासवस्तीत्युक्त्वायथाशाखंकामस्तुतिंपठेत् ततोयालक्ष्मीरित्यादिमंत्रैःप्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थयेत् इतिक्षीरधेनुदानं अथमधुधेनुदानंस्कांदे मधुधेनुंप्रवक्ष्यामिसर्वपापप्रणाशिनीं अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे कल्पयेत्
धेनुंद्विजंचपूर्ववदभ्यर्च्य अद्येत्यादिगोत्रायशर्मणेसालंकृतायसौवर्णमुखीं अगरुचंदनशृंगीं ताम्रपृष्ठीं सूत्रपुच्छां इक्षुपादां सितकंबलकंब-
लांगुडमुखींशर्कराजिह्वांमौक्तिकनेत्रांफलदंतांदर्भरोमां प्रशस्तपत्रश्रवणांनवनीतस्तनींससधान्योपेतांततश्चत्वारिपात्राणिचतुर्दिक्षुविन्यसे
त् वस्त्रयुग्मेनाच्छाद्यघंटाभरणभूषितांकांस्यदोहांस्रक्पूजितांपुच्छदेशोपविष्टायमधुवातानृतायतइतिमंत्रमुक्त्वा इमांमधुधेनुंसर्वपापक्ष
यकामस्तुभ्यमहंसंप्रददेनममेति ततःसुवर्णदक्षिणांदत्वा यालक्ष्मीरित्यादिपूर्वोक्तमंत्रैःप्रार्थयेत् इतिमधुधेनुदान अथशर्कराधे-
नुदानं स्कांदे तद्वच्छर्कराधेनुंशृणुराजन्यथार्थतः अनुलिप्तेमहीपृष्ठे कृष्णाजिनकुशोत्तरे भारचतुष्टयपरिमितातच्चतुर्थांशोवत्सः
भारद्वयेअष्टमांशइति स्वशक्त्यावाकार्या सर्वधान्यानिचतुर्दिक्षुसंस्थाप्य अद्येत्यादि॰ गोत्रायशर्मणेसालंकृतायइमांशर्कराधेनुंसुव-
र्णशृंगींमौक्तिकनयनांगुडमुखींपिष्टमयाजिह्वांकंबलपट्टसूत्रेणवेष्टितांकंठाभरणभूषितांइक्षुपादांरौप्यखुरांनवनीतस्तनींप्रशस्तपर्णश्र
वणांसितचामरभूषितांपंचरत्नसमायुक्तांदर्भरोमांकांस्यदोहनांगंधपुष्पाद्यर्चितांसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेतिसुवर्णद
क्षिणांदद्यात् ततोयालक्ष्मीरित्यादिमंत्रैःसंप्रार्थ्यभूयसींदद्यात् विप्रमुखंनेक्षेदिति पंचरत्नानितत्परार्के कनकंहिरकंनीलं पद्मरागंचमौ-
क्तिकं पंचरत्नमिदंप्रोक्तमृषिभिःपूर्वदर्शिभिरिति इतिशर्कराधेनुदान स्कांदे तत्रभूलेपनेकुशकृष्णाजिनेआस्तीर्णेसप्तधान्योपरिदधिकुं २३
भंसंस्थाप्य चतुर्थांशेनवत्संकृत्वा गोत्रायशर्मणेसालंकृतायसुवर्णमुखींप्रशस्तपत्रश्रवणांमुक्ताफलेक्षणांचंदनागरुशृंगींमुखेविशेषगंधद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्येर्युक्तां शर्करया कृतजिह्वां श्रीखंडेनकृतघ्राणां फलमयदंतां सितकंबलच्छन्नां दर्भरोमां सूत्रमयपुच्छां रौप्यखुरीं वा नवनीतस्तनीमिक्षुपादां
सर्वाभरणभूषितां वस्त्रयुग्मेनाच्छादितां गंधपुष्पाद्यर्चितां इमां दधिधेनुं सर्वपापक्षयकामो दधिक्राव्णइतिमंत्रं पठित्वा तुभ्यमहं संप्रददेनममे
ति गुडधेनूक्तमंत्रेणवा दद्यात् ततः सुवर्णदक्षिणां दत्वा यालक्ष्मीरित्यादिमंत्रैः प्रार्थयेत् इति दधिधेनुदानं अथ रसधेनुदानं स्कांदे
रसधेनुं महाराज कथयामि समासतः अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे इक्षुरसस्य घटं पूरयित्वा तच्चतुर्थांशेन वत्सं संपाद्य अद्ये
त्यादिगोत्राय शर्मणे सालंकृताय इमां रसधेनुं सुवर्णशृंगाभरणयुतां रौप्यखुरां वस्त्रपुच्छां इक्षुपादां पुष्पकंबलां ताम्रपृष्ठीं पुष्परोमां व्री
हियुतां चतुर्दिक्षु दीपसमायुक्तां सर्वगंधविभूषितां पूर्वादिदिक्षु तिलपात्रचतुष्टयावृतां सुपूजितां सर्वपापक्षयपूर्वकैकविंशतिकुलो-
द्धरणकामस्तुभ्यमहं संप्रददे नममेति सुवर्णदक्षिणां दद्यात् मंत्रास्तु गुडधेनूक्ता एव शेषोपस्कराश्च एवमुच्चारयित्वा तु दीयते योहि
जन्मने दशपूर्वान्परांश्चैव आत्मानं चैकविंशतिरिति इति रसधेनुदानं अथ स्वरूपतो गोदानं अंगिराः गौरेकस्यैक दातव्या श्रोत्रियाय
कुटुंबिने सा हि तारयते पूर्वान्सप्त सप्त च सप्त चेति देवलः सुशीलां लक्षणवतीं युवतीं वत्ससंयुतां बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणे अ
थ गोदानप्रयोगः कर्ता कृतनित्यक्रियः पुण्यकाले अद्येत्यादि यथाशक्ति यथाज्ञानं गोदानमहं करिष्ये इति संकल्प्य सवत्सां धेनुं द्विजं च यथाविभवं
वस्त्रालंकारादिभिः संपूज्य गोशृंगमूलादिस्तनांतस्थानादिषु देवताः पूजयेत् तद्यथा शृंगमूले ब्रह्मविष्णुभ्यां नमः ब्रह्मविष्णूपूजया० शृंगाग्रे सर्व
तीर्थेभ्यो नमः सर्वतीर्थानि पूजया० एवं सर्वत्र शिरोमध्ये शिवाय० ललाटे देव्यै नमः० नासिकायां षण्मुखाय० नासापुटयोः कंबलाश्वतरनागाभ्यां० कर्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योरश्विभ्यां॰ चक्षुषोः शशिभास्कराभ्यां॰ दंतेषु वायवे॰ जिह्वायां वरुणाय॰ हुंकारे सरस्वत्यै॰ गंडयोः पक्षमासाभ्यां॰ ओष्ठयोः संध्याद्वया॰ ग्रीवायां इंद्राय॰
कुक्षिदेशे रक्षोभ्यो॰ उरसि साध्येभ्यो॰ पादेषु धर्माय॰ जंघासु अधर्माय॰ खुरमध्ये गंधर्वेभ्यो॰ खुराग्रे पन्नगेभ्यो॰ खुरपश्चिमाग्रे अप्सरोभ्यो॰ पृष्ठे ए
कादशरुद्रेभ्यो॰ सर्वसंधिषु वसुभ्यो॰ श्रोणितटे पितृभ्यो॰ लांगूले सोमाय॰ पुच्छे आदित्यरश्मिभ्यो॰ गोमूत्रे गंगायै॰ गोमये यमुनायै॰ क्षीरे सर
स्वत्यै॰ दध्नि नर्मदायै॰ घृते अग्नये॰ रोमसु त्रयस्त्रिंशतिदेवकोटिभ्यो॰ उदरे पृथिव्यै॰ पयोधरेषु चतुःसमुद्रेभ्यो॰ चतुरः समुद्रान्पूज॰ एता देवता अ
गेषु संपूज्य अद्येत्यादि गोत्राय शर्मणे रूपूजिताय पृथ्वीदानसमफलकामः सर्वपापक्षयकामो विष्णुप्रीतिकामो वा इमां प्रत्यक्षधेनुं रूवर्णशृं
गीं रौप्यखुरां ताम्रपृष्ठीं घंटाग्रैवेयां मुक्तालांगूलां कांस्योपदोहनीं सितवस्त्रद्वयोपेतां सर्वाभरणभूषितां सोपस्करां रुद्रदैवत्यां तुभ्यमहं संप्रददे न मम
ति तिलपात्रे घृताक्तं गोपुच्छं कृत्वा विप्रहस्ते सतिलकुशोदकं दद्यात् मंत्रस्तु यज्ञसाधनभूता या विश्वस्याघौघनाशिनी विश्वरूपधरो देवः प्री
यतामनया गवा ततो दाता दानप्रतिष्ठासिध्यर्थं रूवर्णदक्षिणां दत्वा प्रार्थयेत् नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च नमो ब्रह्मरुता
भ्यश्च पवित्राभ्यो नमो नमः पूजिता वसिष्ठेन विश्वामित्रेण धीमता रूरभे हर मे पापं यन्मया दुष्कृतं कृतमिति गावो ममाग्रतः संतु गावो
मे संतु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहमिति पठित्वा धेनुं द्विजं च प्रदक्षिणीकृत्य किंचिदनुव्रजेदिति इति गोदानप्रयोगः अथ श्वे
वर्णादि गोदानफलमुक्तं पाद्मे श्वेता रूतप्रदा प्रोक्ता चंद्रलोकप्रदायिनी कृष्णा स्वर्गप्रदा ज्ञेया गौरी स्यात्कुलवर्धिनी कपिला सर्वपापघ्ना नाना २४
वर्णा च मोक्षदेति अथ समानवर्णगोवत्सदानफलं महाभारते रोहिणीं तुल्यवर्णां तु सवत्सां च पयस्विनीं प्रदत्वा वस्त्रसंवीतां सूर्यलोके महीयते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानवत्सांकृष्णांतुधेनुंसर्वाघनाशिनीं स्रग्वतावस्त्रसंवीतामस्मिंल्लोकेमहीयते वातरेणुसवर्णांतुसवत्सांकांस्यदोहनीं प्रदायवस्त्रसंवीतांवा
रुणंलोकमश्नुते हिरण्यवर्णांपिंगाक्षींसवत्सांदक्षिणायुतां प्रदद्याद्वस्त्रसंवीतांकौबेरंलोकमाप्नुयात् पलालधूम्रवर्णांतुपितृलोकेमहीयते स
वत्सांपीवरांदत्वाशितिकंठमलंकृतां विश्वेदेवमसंबाधंस्थानंश्रेष्ठंप्रपद्यते समानवत्सांगौरींतुधेनुंसर्वौघनाशिनीं सवत्सांकांस्यदोहांतुवसूनां
लोकमाप्नुयात् वत्सोपपन्नांनीलांगींसर्वरत्नसमन्वितां गंधर्वाप्सरसांलोकान्दत्वाप्राप्नोतिमानवइति संकल्पेतुतत्फलंसंकीर्त्यदद्यात् इतिस
मानवर्णगोवत्सदानफलं अथकृष्णायेनुदानं मात्स्ये अद्येत्यादिसंकल्पादिपूर्ववत् मंत्रस्तु कृष्णाधेनोनमस्तुभ्यंब्रह्मविष्णुशिवात्मके त्रि
जन्मार्जितपापानिध्रुवंदानात्प्रणाशयेति अथहेमशृंगीदानं मात्स्ये दशसौवर्णिकैःशृंगेरवुराःपंचपलान्विताः पंचाशत्पलकंकांस्यंताम्रंचा
पितथैवच वस्त्रंचत्रिगुणंधेन्वादक्षिणाचचतुर्गुणेति एवंविधिवद्दद्यात्तुःफलमुक्तंनंदिपुराणे विधिनातुयदादत्तापात्रेधेनुःसदक्षिणा दाता
तारयतेजंतून्कुलानामयुतंशतमिति महाभारतेपि प्रासादायत्रसौवर्णाः शय्यारत्नोज्ज्वलास्तथा वराश्चाप्सरसोयत्रतत्रगच्छंतिगोप्रदाः
तथा यावंतिरोमाणिभवंतिधेन्वा तावंतिवर्षाणिमहीयतेसः स्वर्गाच्च्युतश्चापिततोत्रलोकेकुलेससुत्पत्स्यतिगोमतांतथा सालंकृतांसवत्सां
चधेनुंसंपूज्यभक्तितः सरत्नपूर्णापृथिवीतेनदत्तानसंशयइति इतिस्वरूपतोगोदानं अथकार्पासधेनुदानं मात्स्ये अतःपरंप्र
वक्ष्यामिधेनुंकार्पासिकींभुवि सर्वविश्वस्यगुप्त्यर्थंब्रह्मणाचांशकंकृतं साचकार्पासभारेणश्रेष्ठाधेनुःप्रकीर्तिता मध्यमाचतदर्धे
नतदर्धेनकनीयसी पूर्ववत्स्रग्वधान्यंचहिरण्यंचतथैवच वत्सकंतुचतुर्थांशान्मानमत्राभिधीयते कुर्वीतपूर्ववद्वस्त्रवस्त्रधान्याद्युपस्कृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰चं॰ तमिति ततोवाराहोक्ततिलधेनुदानवत् क्रियाकल्पादिसंकल्पादारभ्यदानंकृत्वाप्रार्थयेत् मंत्रास्तु हेमकुंदेंदुसदृशे क्षीरार्णवसमुद्भवे सोमप्रिये
२५ सुधन्वाख्ये सौरभेयि नमोस्तुते दत्तेयमिंदुनाथाय शशांकायामृतायच अत्रिनेत्रप्रजाताय सोमराजायवैनमः यस्त्वेवंपरयाभक्त्याब्राह्म
णायप्रयच्छति सयातिचंद्रलोकंतुसोमेनसहमोदतइति इतिकार्पासधेनुदानं अथलवणधेनुदानं भविष्ये तत्रयुधिष्ठिरंप्रतिकृष्णः
शृणुराजन्प्रवक्ष्यामिलवणस्येहकल्पितां गोमयेनानुलिप्तेतुदर्भसंस्तरसंस्थितं आविकंचर्मविन्यस्यपूर्वाशाभिमुखस्थितं वस्त्रेणा
च्छादितांकृत्वाधेनुंकुर्वीतबुद्धिमान् आढकेनैवकुर्वीतबहुवित्तोपकल्पितां गांविप्रंचयथाविभवंवस्त्रालंकारादिभिःसंपूज्य अद्येत्या
दिगोत्रायशर्मणे सुपूजितायइमांलवणधेनुं फलस्तनीं सिंधुशुक्तिवर्णांसक्तुपिंडकपोलांयवास्यांकंबलपट्टसूत्रग्रैवेयकांताम्रपृष्ठीं
गुडपानांकंबललांगूलांमधुयोनिकांसर्वाभरणभूषितांसर्वपापक्षयकामोविष्णुप्रीतिकामोवातुभ्यमहंसंप्रददे नममेतिपुत्रभार्यादि
युतःप्रदक्षिणीकृत्यदद्यात् शेषंमधुधेनुवत् मंत्रस्तु लवणेवैरसाःसर्वेसर्वास्तिष्ठंतिदेवताः सर्वदेवमयेदेविलवणाख्येनमोस्तुतेइ
ति पुराणांतरेषुषोडशप्रस्थमितां चतुर्थांशेनवत्सइत्युक्तं इतिलवणधेनुदानं अथसुवर्णधेनुदानं वह्निपुराणे सुवर्णधेनुश्चा-
प्यत्रसुवर्णाश्चचतुर्दश सुनिर्गिक्तिसुवर्णैश्च सप्तभिर्मध्यमामता चतुर्भिश्चकनिष्ठास्याच्चतुर्थांशेनवत्सकः गुडधेनुविधानेन
दत्तासर्वफलप्रदा अन्नविशेषोगौप्येणवत्सइतिकेचित् तथा अद्येत्यादिप्रवालशृंगीं घृतपात्रस्तनवतीं पद्मरोमां कर्पूरागरुनासि २५
कामिष्टान्नरसवासितांशंखशृंगांतराशुक्तिललाटस्थांनारीकेलश्रवणांगुडजानुकांपंचगव्यापानवतींकांस्यपृष्ठांपट्टसूत्रलांगूलांसप्तधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...नमहापातकानिदहतइति॥२ निग्रहोराज्ञांनान्येषांब्राह्मणादृते ब्राह्मणश्चवराजाचद्वावप्येतौधृतव्रतौ नैतयोरंतर-
न्यसक्तश्चसोभिरक्षणे शक्तीनामशक्तीनांचसन्वितांस्कवर्णधेनुंस्मनांयानितद्द्राज्ञांधनागमः यथाग्नौसंस्थितंचैवशुद्धिमायातिकांचनं एवंधनाग
मेसर्वःशुद्धिमायातिराजनीति राजप्रतिग्रहेप्रायश्चित्तं मंत्रस्कं स्कवनःप्रतिग्रहंकृत्वामाससप्तकसदावसेत् षष्ठेकालेपयोभक्षःपूर्णेमासेप्रमुच्यते त
र्पयित्वाद्विजान्कामैःसततंनियतव्रतइति तदसत्मनेवतुमंत्रेणधेन्नदे॥अथरहस्यप्रायश्चित्तानि याज्ञवल्क्यः अनभिख्यातदोषस्तुरहस्यव्रतमाचरे
दिति कर्तृव्यतिरिक्तैर्यदीयोदोषोनज्ञायतइत्यर्थः अतःध्यात्वहरंस्कव्यमितरेणाज्ञातंस्यरहस्यतास्त्येव तस्यप्रायश्चित्तमपिरहस्यमेवकर्तव्यं तथाचहारीतः
रहस्येरहस्यंप्रकाशेप्रकाशमिति तत्ररहस्यानांसाधारणंवध्याकृ वेदाभ्यासोन्वहंशक्त्यामहायज्ञक्रियाक्षमा नाशयंत्याशुपापानिमहापातकजान्यपि
यथैधस्तेजसावह्निःप्राप्तंनिर्दहतिक्षणात् तथाज्ञानाग्निनापापंसर्वंदहतिवेदवित् सव्याहृतिकप्रणवाःप्राणायामास्तुषोडश अपिभ्रूणहनंमासंपुनंत्यहरहःकृ
ताइति वसिष्ठः यद्यकार्यंशतंसाग्रंकृतंवेदश्चधारयेत् तस्यवेदाग्निर्दहत्यग्निरिवेंधनं यमः सहस्रपरमांदेवीशतमध्यांदशावरां गायत्रींसजपेन्नि
त्यंमहापातकनाशिनीमिति मूलेशौनकः ऋग्वेदयजुर्वायजुःसामाथर्वापिवा सूक्तानिसरहस्यानिअथर्वांगिरसस्तथा ब्राह्मणानिचकल्पांश्चषडं
गानितथैवच इतिहासपुराणानिदेवतास्तवनानि॥पापैःप्रमुच्येतधर्मस्थानेस्तथापरैरिति कौर्मेजपस्तपस्तीर्थसेवादेवब्राह्मणपूजनंग्रहणादिषुका
लेषुमहापातकशोधनं पुण्यक्षेत्राभिगमनंसर्वपापप्रदेवताभ्यर्चनंनृणांसर्वपापप्रणाशनं अमावास्यातिथिंप्राप्ययःसमाराधयेद्ध्रुवं ब्राह्मणान्भोजयित्वा...नःसप्त
पैःप्रमुच्यते कृष्णाष्टम्यांमहादेवंतथाकृष्णाचतुर्दशीं ब्राह्मणमुखेसर्वपापैःप्रमुच्यते त्रयोदश्यांतथारात्रौसोपहारंत्रिलोचनं दृष्ट्वेशंप्रथमेयामेमुच्यतेसर्व... सव्ययाहुत्वा
...नुसंवत्सा-
...लदुरितनिरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त

दुष्प्रतिग्रहे पावमानं चसूक्तं वै सर्वपातकनाशनं अन्वायममभिसंधिः आयुष्यमितिसू ामप्रिये

शलक्षैश्च प्राणायामसहस्रकैः नश्यंति पापसंघाश्च काक शनात् तेषामपिप्रामाण्यबलात् पावमानीजपस्याखिलेषु विधानात्तत्फलापेक्षायां गोघ्रान्मा ग्राह्य

णिकं वै प्रतिमुच्यते त्यादिसूक्तेषु अखिलानामपि विनियो ल्पात तत्तत्पापेषु पावमानीजपस्य प्रायश्चित्तत्व पापानुरोधेन च जपसंख्या कल्पनीयेति दिक् अथ

पितृवधादित्यादिमंत्रवर्णे नतत्तत्पातकनाशस्य फ मये नेत्यः नराज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः प्रतिग्रहे शूनी चक्री ध्वजी वेश्या नराधिपाः

राजप्रतिग्रहप्रायश्चित्तं अनापदि राजप्रतिग्रहं निंदा केनैव कुवीयो रोमध्या स्वादो विषोपमः पुत्रमांसं वरं भोक्तुं न तु राजप्रतिग्रह इति स्कांदे मरुदेशे निरुद

अष्टादशगुणं पूर्वं पूर्वादेतेय थोत्तरमिति संवत्तः नु फलस्त ण्यं यः परित्यज्य द्रव्यलोभेन मोहितः विषयामिषलुब्धस्तु कुर्याद्राजप्रतिग्रहं नर

के ब्रह्मरक्षस्त्वमागतः राजप्रतिग्रहाल्लुष्टः पुनर्ज रणाभूषितासवमे राजप्रतिग्रहाद्दुग्धान प्ररोहंति केनचिदिति विष्णुधर्मोत्तरे दशसूनासमश्व-

केरौरवे घोरे नस्येवपतन ध्रुवं वृक्षादावाग्निना दग्ध त् मंत्रस्कं लवणसहस्राणि यो ग्राह्यनिसैनिकः तेन तुल्यस्मृतो राजा तस्माद्घोरः प्रतिग्रह इति इत्य

कीदशचक्रीसमो ध्वजी दशध्वजिसमा वेश्या दशवेश शो नवत्स इत्युक्तं इतिहरेः यत्र ये भूभुजां तेषामेनत्सूनोदितफलं येषां पाषंडिसंकीर्णराष्ट्रं नब्रा

धार्मिकराजविषयेनिंदा तथा च तत्रैव लिखितं ये र्णैश्च सप्तभिर्मध्य रणंपुरुषोत्तमः नतु पापसमाचाराः सूनापापौघभागिन इति अदुष्टात्तु राज्ञः

त्कटं एते सूनासहस्राणां दशानां भागिनो त्स इति केचित् तथुनीत्तु राजप्रतिग्रहे प्रवर्त्तन इति अश्वपतिनाम्नकेन राज्ञा दोषाभावउपन्यस्तः

काभि ड़ः अत एवोक्तं छंदोगशाखायां किल लाटस्था नारी वैरिणी कृत इति याज्ञवल्क्यवचनेपि राजप्रतिग्रहनिंदायां लुब्धस्योच्छास्त्रवर्तिन इति

र्गो च महापः नान्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यसमायुक्तां फलपुष्पोपेतां छत्रोपानत्समन्वितां सुवर्णधेनुं रुद्रदैवत्यां सहस्राश्वमेधफलावाप्तिकामः कुलसहस्रस्य स्वर्गे निवासकामश्च गोत्राय शर्मणे सुपूजिताय तुभ्यमहं संप्रददे न मम इति मंत्रस्तु सुवर्णधेनुं विप्राय प्रतिपद्येद्दशीं नरः हिरण्यरेताः पुरुषः पुराणः कृष्णपिंगलः तप्तहेमछविः स्रष्टा विश्वात्मा प्रीयतां मम इति अनेनैव तु मन्त्रेण धेनुदानं प्रकीर्तितं अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयं कुलानां च सहस्रस्य स्वर्गे नयति गोप्रद इति इति सुवर्णधेनुदानं अथ वंध्यात्वहरं सुवर्णधेनुदानं वायुपुराणे चतुर्विधा च या वंध्या भवेद्वत्सवियोजनात् वक्ष्ये तस्याः प्रतीकारं तत्स्वरूपं निबोध मे वंध्या चतुर्विधा प्रोक्ता वंध्या काकवंध्या स्त्रीप्रसूः मृतप्रजा इति काकवंध्या तु काकवदेकापत्या शेषाः स्पष्टा एव धेनुरूपविशेषमाह हेमाद्रौ कर्मविपाके हिरण्येन यथाशक्त्या सवत्सां कारयेद्दृढां धेनुं पलेन वत्सं च पादेन गुरुरब्रवीत् यथाशक्त्येति पलेन वा तदर्धेन तदर्धार्धेन वा पुनरिति कर्मविपाकोक्तपरिभाषाप्रकारेण धेनुं रौप्यखुरां रत्नपुच्छे नियोज्य घंटां सुभयोरपि गले बध्वा रत्नमयतिलकं ललाटे बध्नीयात् एतादृशीं समभ्यर्च्य पायसेन नैवेद्यं दत्वा मोदकान् पूपान् गुडलवणजीरकं सुवर्णदक्षिणां कंचुकं च नववेणुमयशूर्पे निधाय एकं वायनकं धेनवे अन्याभ्यः पतिपुत्रवतीभ्यो ब्राह्मणीभ्यः षडष्टौ वा दद्यात् ततो वेदपारगमलोलुपं ब्राह्मणं ऋणग्रस्तं दरिद्रं कुटुंबिनमाहूय दत्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य ततो धेनुं सोमो धेनुमिति मंत्रेण सवत्सां च संपूज्य अग्निमुपसमाधाय समिदाज्यचरुद्रव्यैः सोमो धेनुमिति मंत्रेण प्रत्येकमष्टोत्तरशतसंख्यया हुत्वा स्वयमुदङ्मुखः प्राङ्मुखायोपविष्टाय गोपुच्छं तद्धस्ते निधाय दद्यात् अद्येत्यादि ० गोत्राय शर्मणे सुपूजिताय इमां सालंकृतां सुवर्णधेनुं सवत्सां रौप्यखुरां रत्नपुच्छां घंटायुतकंठां रत्नतिलकां वायनोपेतां वस्त्रयुगच्छन्नां मुक्तालांगूलां मम जीवत्पुत्रसंतानप्रतिबंधकीभूतसकलदुरितनिरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनपूर्वकंआयुष्मत्सुपुत्रावाप्तिकामोवंध्यात्वहरामिमांसुवर्णधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति सकुशतिलोदकंदद्यात्
मंत्रस्तुवायवीये धेनुरंगिरसःसन्नेवासिष्ठेसुरभिस्तथा दुहिताचसुताभानोरग्नेश्चवरुणस्यच याश्चगावःप्रवर्ततेवनेषूपवनेषुच प्रीणंतु
ताममसदापुत्रपौत्रप्रवर्धनाः प्रयच्छंतुदिवारात्रमविच्छेदंचसंततेः ततोदेवस्यत्वास्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंपठेत् ततःसुवर्णद
क्षिणांदत्वाप्रार्थयेत् मंत्रस्तु वंध्यात्वंकाकवंध्यात्वंकन्याप्रसवएवच तथैवमृतवंध्यात्वंदोषंममचतुर्विधं दानेनानेनहरंतुयासाकामदुधाम
मेति इतिगांप्रार्थयित्वाप्रदक्षिणीकृत्य विसृज्यभूयसींदक्षिणांदत्वा यथाशक्तिब्राह्मणान्भोजयित्वाजीवत्संतानावाप्तिरस्त्वितितान्संप्रा
र्थ्यजीवत्पुसंतानावाप्तिरस्त्वितितेब्रूयुः ततःसुहृद्युतोभुंजीतेति इतिवंध्यात्वहरंसुवर्णधेनुदानं अथोभयतोमुखीदानं मात्स्ये रुक्म
शृंगींरौप्यखुरां मुक्तालांगूलभूषितां कांस्योपदोहनांराजन्सवत्सांद्विजपुंगवे प्रसूयमानांयोदद्याद्धेनुंद्रविणसंयुतां यावद्वत्सोयोनिगतोयाव
द्गर्भंनमुंचति तावद्गौःपृथिवीज्ञेयासशैलवनकानना देवलः अलंकृत्योक्तविधिनासुवर्णत्रिपलान्विता देयाचद्विपलामध्यापलैकादक्षिणा
धमा वाराहेतु सुवर्णसाहस्रंतदर्धार्धंमुख्यमुक्तं सुवर्णस्यसहस्रेणतदर्धेनापिवापुनः तस्याप्यर्धंशतंवापिपंचाशद्वततोर्धकं यथा
शक्त्यापिदातव्याविन्तशाठ्यविवर्जितेनेति हेमाद्रौ उभयतोमुखींस्वर्णनिष्केणदत्वासद्यःशुध्यत्येतपातकेभ्यश्चमर्त्यइति सुवर्णनि
ष्कदक्षिणायुतेनापि अत्रनिष्कचत्वारिंशन्माषकएवग्राह्यः अत्यशक्तौविंशतिमाषकंवादद्यादित्यर्थः दरिद्रेण अथ २६
दानप्रयोगः शुचिरद्येत्यादि॰ उभयतोमुखीदानंकर्तुंगोब्राह्मणपूजांचकरिष्ये इतिसंकल्प्य द्विजंकुटुंबिनंदरिद्रंवेदपारगं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृशीलं कृत्वा यथाविभवं वस्त्रालंकारादिभिः तथागामपि संपूज्य ॐ त्वं महीमवनिं विश्वधेनां० रिंद्रसिंधून् इतिगामनुमंत्र्य प्रदक्षिणीकृत्य अद्येत्यादि गोत्राय शर्मणे अमुकशाखाध्यायिने इमां धेनूं सोपस्करां उभयतोमुखीं ससमुद्रशैलवनोपेत पृथ्वीदानसमफलावाप्तये धेनुवत्सरोमसंख्ययुगदेवलोकमहिमत्वपितृपितामहप्रपितामहकुलशत नरकोत्तारणपूर्वक घृतक्षीरवह बहुकुल्याक दधिपायस कर्दमदेशाधिकरणकोत्तारके प्सितकामो ब्रह्मलोकावाप्तिकामो रुद्रदैवत्यां इमां तुभ्यमहं संप्रद दे न मम इति स घृततिलपूर्णकांस्यपात्रयुत गोपुच्छं तद्धस्ते सकुशजलं दत्त्वा प्रार्थयेत् मंत्रस्तु इमां गृहाणोभयमुखीं भवान्त्राता मम अस्तु वै मम वंशविशुद्ध्यै स सदा स्वस्तिकरो भवेति विप्रो देवस्य त्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा यथाशाखं कामस्तुतिं पठेत् ततः कृष्णवर्णसहस्रमारभ्य पंचविंशतिचतुर्द्विकृष्णवर्णमितां दक्षिणां दद्यात् ततो नन्यूनामिति ततो विप्रस्तु ॐ इरावती धेनुमती हि भूतं सूयव०स्या व्यस्तभ्नारोदसी विष्णवेते दाधर्थ० खे: १ ॐ स्योना पृथिवि भवा० नी यच्छानः शर्म० थः २ इति मंत्रद्वयं पठित्वा वदेत् प्रतिगृह्णामि मां धेनुं कुटुंबार्थे विशेषतः स्वस्तिर्भवति मे नित्यं रुद्रमातर्नमोऽस्तु ते इति नत्वा गृहीतायाः दक्षिणेन पाणिना वत्समाकृष्य पठेत् ॐ गर्भे नु सन्नन्वेषामवेदमहं देवा०विश्वा शतं मा पुर आयसीररक्षं०निरदीयमिति मंत्रेण वत्समाकृष्येत् निष्कासिते सूतिं कृत्यांतरमाह ततो यजमानः प्राणानायम्य अद्येत्यादि० कृतस्योभयतोमुखीदानकर्मणः सांगतासिद्ध्यर्थं देवादिमंत्रैस्तर्पणं होमं च करिष्ये इति संकल्प्य स्थंडिलेऽग्निं प्रतिष्ठाप्यान्वादध्यात् अस्मिन्नन्वाहिते ऽग्नावित्यादिचक्षुषी आज्येनेत्यंतमुक्त्वाऽत्र प्रधानं पृथिवीं त्रिः गोरीस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृदाज्येन प्रजापतिं चतुरशीत्याआज्येन शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये इत्यं तमुत्क्का समिद्‌ द्वयमग्नावाधाय इध्माबर्हिषी परिसन्नत्य परिः
समूहनादि चक्रमध्यं तं कृत्वा कुशास्तृतन्मूमो अग्नेः पश्चाद्देवसास्ताभिरद्भिर्वक्ष्यमाणमंत्रैर्देवादींस्तर्पयेत् तेच मंत्राः ॐ ये देवासो दिव्येकादशस्थ
पृथिव्यामध्येकादशस्थ अप्सुक्षितोमहिनैकादशस्थ॰ जुषध्वं देवांस्तर्पयामि ॐ उशंतस्त्वानिधीमह्युशंतः समिधीमहि उशन्नुशतआ
वहपितॄ॰ अत्तवे पि तॄंस्तर्पयामि ॐ इमंमेगंगेयमुनेसरस्वति॰ असिक्न्यामरुद्वृधे॰ मया सरितस्तर्पयामि ॐ अद्भिभिः स्रुतोमतिभि
श्चनोहितः॰ रोमाण्यव्यासमयावि॰ दिवेदिवे पर्वतांस्तर्पयामि ॐ वनस्पते शतवल्शोविरोह सहस्रवल्शाविवयंरुहेम यंत्वामयंस्व
धितिस्तेजमानः प्रणिनाय महते सौभगाय वनस्पतींस्तर्पयामि ॐ समुद्रज्येष्ठाः सलिलस्यमध्यात्पुनानायंत्यनिविशमानाः इंद्रो
यावज्री वृषभोरराद ताआपो॰ वंतु समुद्रांस्तर्पयामि ॐ अहिरिव भोगैः पर्येतिबाहुं॰ मानः हस्तघ्नो विश्वावयुनानि विद्वान्पुमान्
पुमांसं॰ विश्वतः नागांस्तर्पयामि ॐ मधुवाताऋतायते मधुक्षरंतिसिंधवः माध्वीर्नः संत्वोषधीः ओषधीस्तर्पयामि इत्यष्टाभिस्त
र्पयित्वा चतस्रआज्याहुतीर्जुहुयात् ॐ इळे द्यावापृथिवी पूर्वचित्तयग्निं घर्मं स्रुरुचं यासन्निष्टये याभिर्भरे कारमंशाय
जिन्वथस्ताभिरूषुऊतिभिरश्विनागतं स्वाहा पृथिव्याइदं न मम १ ॐ मही द्यौः पृथिवी चन इमं यज्ञं मिमिक्षतां
पिपृतांनो भरीमभिः स्वाहा पृथिव्यइदं न मम २ ॐ उर्वी पृथ्वी बहुले दूरे अंते उपब्रुवे मूनसा यज्ञे अस्मिन् द-
धाते ये स्रुभगे स्रुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात्स्वाहा पृथिव्याइदं न मम ३ ॐ गौरीर्मिमाय सलिलानि तक्षत्येक २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदीद्विपदीसाचतुष्पदी अष्टापदीनवपदी बभूवुषीसहस्राक्षरापरमेव्योमन्त्स्वाहा गौर्या इदंन० ४ इतिचतस्रआज्याहुतीर्हुत्वा ततः
समस्तव्याहृतिभिश्चतुरशीत्याज्याहुतीर्हुत्वा प्रजापतयइदंनममेतित्यजेत् ततःस्विष्टकृदादिहोमशेषंसमाप्य भूयसींदक्षिणांद-
त्वागामनुव्रज्यगोमतींजपेत् महाभारते गावोमामुपतिष्ठंतु हेमशृंग्यःपयोमुचः सुरभ्यःसौरभेयाश्चसरितःसागरंयथा गावःपश्या
म्यहंनित्यंगावःपश्यंतुमांसदा गावोस्माकंवयंतासांयतोगावस्ततोवयं घृतक्षीरप्रदागावोघृतयोन्योघृतावहाः घृतनद्योघृतावर्ता-
स्तामेसंतुसदागृहे घृतंमेहृदयेनित्यं घृतंनाभ्यांप्रतिष्ठितं घृतंमेसर्वतश्चैवघृतमध्येवसाम्यहं गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः
गावोमेहृदयेसंतुगवांमध्येवसाम्यहं गावःसुरभयोनित्यंगावोगुग्गुलसन्निभाः गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत् अन्नमेव
परंगावोदेवानांहविरुत्तमं पावनंसर्वभूतानांरक्षंतिचवहंतिच हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि ऋषीणामपिहोतॄणांगावोहोमेप्रति
ष्ठिताः सर्वेषामेवभूतानांगावःशरणमुत्तमं गावःपवित्रंपरमंगावोमंगलमुत्तमं गावःसर्वस्यलोकस्यगावोधन्याःसनातनाः नमोगोभ्यःश्री
मतीभ्यःसौरभेयीभ्यएवच नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः पुनःप्रदक्षिणांकृत्वाधेनुंद्विजवरंचतामितिजपित्वानमस्कृत्यविसृज्यपा
यसादिनासम्यक्द्वादशब्राह्मणान्भोजयित्वातेभ्योदक्षिणांदत्वास्वस्त्ययनंवाचयित्वासुहृद्युतोभुंजीतेति इत्युभयतोमुखीदानप्रयोगः अथ
प्रसंगादुभयतोमुखीप्रतिग्रहप्रायश्चित्तं ममोभयतोमुखीप्रतिग्रहदोषपरिहारार्थंकृच्छ्रत्रयप्रायश्चित्तंयथाप्रत्याम्नायेनकरिष्येइतिसंकल्प्यकृ
च्छ्रत्रयप्रायश्चित्तंकुर्यादित्युक्तंदानोद्योतेरुणस्मृतौरहस्यप्रायश्चित्तप्रशस्तस्य इत्युभयतोमुखीप्रतिग्रहप्रायश्चित्तं इत्युभयतोमुखीगोदान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरूपणं अथदशदानानिमदनरत्ने जानूकर्ण्यः उल्कांत्यादीनिदानानिदशदद्यान्मृतस्यतु गोभूतिलहिरण्याज्यवासोधान्यगुडानिच रौप्यंलवणमित्याम
हुर्दशदानान्यनुक्रमादिति एतानिदशदानानि नराणांमृत्युजन्मनोः कुर्यादभ्युदयार्थंच प्रेतेपिहिपरत्रचेति हेमाद्रिः तत्रादौगोदानंदानविधिस्तु
पूर्वोक्तएवममसर्वपापक्षयार्थंइमांगांधेनूपस्कारांरुद्रदैवत्यांस्वर्णादिदक्षिणायुतांगोत्रायशर्मणेरूपूजितायतुभ्यमहंसंप्रददेनममेति मंत्रस्तु
यज्ञसाधनभूतायाविश्वस्यान्नप्रदायिनी विश्वरूपधरोदेवः प्रीयतामनयागवा गवामंगेषितिप्रार्थयेदपि इतिगोदानं अथभूमिदानं
मात्स्ये निवर्तनमिताभूमिर्देया दशहस्तेनदंडेनत्रिंशद्दंडानिवर्तनमिति स्मरणात् दानान्यन्यानिसर्वाणिकनकादीनियानिच तानिभू
मिप्रदानस्यकलांनार्हंतिषोडशीमिति अद्येत्यादि॰ गोत्रायशर्मणेरूपूजितायषष्टिवर्षसहस्रपरिमितस्वर्गेशिवपुरनिवासकामःसर्व
पापक्षयकामइमांभूमिंबहुसस्यप्रदांविष्णुदैवत्यांतुभ्यमहंसंप्रददेनममेतिदद्यात् मंत्रस्तु सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता अनं
तसस्यफलदाअतःशांतिंप्रयच्छमे यस्यांरोहंतिबीजानिकालेचैवमहीतले त्वत्प्रसादाच्चसकलाममसंतुमनोरथाइति इतिभूमिदानं
अथतिलदानं तिलास्तुद्रोणत्रयमितादेयाः पंचमणपरिमिताभवंति अद्येत्यादिगोत्रायशर्मणेइमेतिलाःसोमदेवताविष्णुदैवता
वासर्वपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति मंत्रस्तु महर्षेर्गोत्रसंभूताःकश्यपस्यतिलाःस्मृताः तस्मादेषांप्रदानेनममपापंव्य
पोहतु इतितिलदानं अथहिरण्यदानं तच्चनिष्कत्रयमितंकनिष्ठं द्वादशमाषकोनिष्कः अद्येत्यादिगोत्रायशर्मणेइदंहिरण्यंअग्निदै
वतंममसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति मंत्रस्तु हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशां २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिंप्रयच्छमे इतिहिरण्यदानं अथाज्यदानं घृतंतुप्रस्थमितंदद्यात् विंशतिशेरकमितंभवति अद्येत्यादि० गोत्रायशर्मणे इदमाज्यंवि
ष्णुदेवतंसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेति मंत्रस्तु कामधेनोःसमुद्भूतंसर्वक्रतुषुसंस्थितं देवानामाज्यमाहार अतःशांतिं
प्रयच्छमे इत्याज्यदानं अथवस्त्रदानं सूक्ष्मवस्त्रद्वयंबहुमूल्यमष्टहस्तमितंदद्यात् अद्येत्यादि० गोत्रायशर्मणेसमस्तपापक्षयकाम
इमेबार्हस्पत्येवाससीतुभ्यमहंसंप्रददेनममेति मंत्रस्तु शीतवातोष्णसंत्राणंलज्जायारक्षणंपरं देहालंकारणंवस्त्रमतःशांतिंप्रयच्छ
मे इतिवस्त्रदानं अथधान्यदानं सार्द्धखारीद्वयंव्रीहयोदेयाः तच्चसार्द्धशतद्वयमणपरिमितंमणषट्कंचेति गोत्रायशर्मणे इदममु
कसंख्यप्रजापतिदेवत्यंसमस्तपापक्षयपूर्वकैहिकामुष्मिकशिवफलावाप्तिकामस्तुभ्यमहंसंप्रददेनममेति मंत्रस्तु सर्वदेवमयंधान्यं
सर्वोत्पत्तिकरंमहत् प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमे इतिधान्यदानं अथगुडदानं गुडपलषष्टिमितंदद्यात् अद्येत्यादि०
ममसमस्तपापक्षयपूर्वकंगृहेलक्ष्म्याःस्थैर्यसिद्धिकामोगोत्रायशर्मणेरूपूजितायेमं गुडंरसब्रह्मंसोमदेवतंसदक्षिणंतुभ्यमहंसंप्रददेन
ममेति मंत्रस्तु गुडमिक्षुरसोद्भूतंमंत्राणांप्रणवोयथा दानेनानेनमेतस्यपरालक्ष्मीःस्थिरागृहे इतिगुडदानं अथरजतदानं पलत्रय
मितंरौप्यंदद्यात् अद्येत्यादि० ममसमस्तपापक्षयपूर्वकशिवविष्णुपितृप्रीतिकामोगोत्रायशर्मणेरूपूजितायइदंरजतंविष्णुदेवतंस
दक्षिणंतुभ्यमहंसंप्रददेनममेति मंत्रस्तु प्रीतिर्यतःपितृणांचविष्णुशंकरयोःसदा शिवनेत्रोद्भवंरूप्यमतःशांतिंप्रयच्छमे इतिरजत
दानं अथलवणदानं लवणंसार्द्धखारिकंदद्यात् अद्येत्यादि० ममसमस्तपापक्षयपूर्वकशिवप्रीतिकामोगोत्रायशर्मणेरूपूजितायइदंल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दा॰चं॰ वणंसर्वरसोत्कृष्टंसोमदैवत्यंसदक्षिणंतुभ्यमहंसंप्रददे नममेति मंत्रस्तु यस्मादन्नरसाः सर्वेनोत्कृष्टालवणंविना शंभोःप्रीतिकरंयस्मा
२९ त्ततःशांतिंप्रयच्छमे इतिलवणदानं इतिदशदानानि अथपंचधेनुदानानि तत्रादौ पापापनोदधेनुदानं ब्राह्मे दानोपस्करास्तुगोदानोक्ता
एव अद्येत्यादि॰ममात्मनोमनोवाक्कायकर्मभिराजन्मोपार्जितपापापनोदकामोगोत्रायशर्मणेस्तुपूजिताय इमांकृष्णांपापापनोदधेनुंय-
थाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति मंत्रस्तु आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः तत्सर्वंनाशमायातुपापधेनुप्रदा
नतः ततःसुवर्णदक्षिणांदद्यात् इतिपापापनोदधेनुदानं अथऋणापनोदधेनुदानं ब्राह्मे अद्येत्यादि॰ममआजन्मोपार्जितैहिकामुष्मिक
समस्तऋणपातकच्छेदकामोगोत्रायशर्मणेस्तुपूजिताय इमांसमस्तऋणापनोदधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनम-
मेतिदद्यात् ततःसुवर्णदक्षिणांदद्यात् इतिऋणापनोदधेनुदानं अथप्रायश्चित्तधेनुदानं ब्राम्हे अद्येत्या॰मयाजन्मप्रभृतिअद्ययावदा
चरितसमस्तपातकस्याकृतप्रायश्चित्तस्यामरणांतंपापापनोदकामोगोत्रायशर्मणेस्तुपूजितायप्रायश्चित्तत्वेनइमांकपिलांधेनुंयथाश
क्तिसोपस्करांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति मंत्रस्तु प्रायश्चित्तेसमुत्पन्नेनिष्कृतिर्नकृताक्वचित् तस्यपापस्यशुध्यर्थंधेनुमेतांददा-
मिते ततःसुवर्णदक्षिणांदद्यात् इतिप्रायश्चित्तधेनुदानं अथवैतरणीधेनुदानं ब्रह्मवैवर्ते यासौवैतरणीनामयमद्वारेमहान
दी शतयोजनविस्तीर्णापृथुत्वेसामहासरित् अगाधानंतरूपाचदृष्टमात्राभयप्रदा पतितंतत्रवैमर्त्याः क्रंदमानाःसुदारुणं
उष्णेवर्षास्पर्शीतेन्चमारुतेचातितीक्ष्णके दातारंतारयेद्यस्मात्तस्माद्वैतरणीस्मृतेति दानकालोपितत्रैवमदनरत्ने अयनेविषुवेपुण्ये २९

CC-0. In Public Domain. Digitization by eGangotri

व्यतीपातेदिनक्षये अन्येषुपुण्यकालेषुदीयतेदानमादरात् पाटलामथवाकृष्णांदद्याद्वैतरणींतुगां स्वर्णशृंगींरौप्यखुरांकांस्यपात्रोपदोहनां
कृष्णवस्त्रयुगच्छन्नांसप्तधान्यसमन्वितां कार्पासद्रोणशिखरेआसीनांहेमीयमप्रतिमांलोहदंडयुतांमहिषारूढांपाशहस्तांकृत्वाइक्षुदं
डमयमुडुपपट्टसूत्रेणबध्वाउडुपेधेनुंकृत्वाछत्रोपानत्समायुक्तांवैतरणींगांमृत्युकालेवादद्यात् तद्यथा ममयमद्वारस्थितवैतरण्याख्यनद्यु
त्तरणार्थंगोत्रायशर्मणेसुपूजितायइमांकृष्णांगांसवत्सांयमप्रतिमायुक्तांकृष्णवस्त्रयुगच्छन्नांसप्तधान्ययुतांरक्तमाल्याद्यलंकृतांस्वर्ण
शृंगाद्युपस्करोपेतांकार्पासद्रोणशिखरांसच्छत्रोपानत्कांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेति इतितिलजलघृतयुतंगोपुच्छंद्विजहस्तेदद्यात्
मंत्रस्तु यमद्वारपथेघोरेघोरावैतरणीनदी तांततुंकामोयच्छामिकृष्णांवैतरणींतुगामिति ततःसुवर्णदक्षिणांदत्वाप्रार्थयेच्च विष्णुरूपद्विज
श्रेष्ठभूदेवगतिपावन तर्तुंवैतरणीमेनांकृष्णांगांप्रददाम्यहं ततःपुच्छंस्वकरेधृत्वानुव्रजेत्सप्तपदानि धेनुप्रार्थनामंत्रस्तु धेनुकेत्वंप्रतीक्ष
स्वयमद्वारेमहापथे उत्तितीर्षुरहंदेविवैतरण्यैनमोस्तुते इतिप्रणम्यभूयसींदक्षिणांदद्यात् कृष्णायाअभावेअन्यवर्णापिदेया गोरभावेद्र
व्यंदेयं पित्रादेरशक्तौपुत्रादिर्दद्यात् तत्रांत्यमंत्रेउत्तितीर्षुरयमितिपठेत् मध्यमेतर्तुंवैतरणीमस्यैति प्रथमेतांततुंमस्यैति इतिवैतर
णीदानं अथउत्क्रांतिधेनुब्राह्मे उत्क्रांतिवैतरण्यौचदशदानानिचैवहि प्रेतेपिकृत्वानंतरं शवधर्मेणदाहयेदिति यथा योमुमूर्षुः
पुरुषः स्वयंचेतनवेलायांश्रोत्रियवेदपारगंब्राह्मणमाहूय अद्येत्यादि॰ममसुखेनप्राणोत्क्रमणप्रतिबंधकोक्तनिष्कृत्यनुक्तनिष्कृतिजनि
तसकलपापक्षयद्वारासुखेनप्राणोत्क्रमणसिद्ध्यर्थमिमामुत्क्रांतिसंज्ञिकांधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांगोत्रायशर्मणेसुपूजिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰ नं॰ यतुभ्यमहंसंप्रददे नममेति मंत्रस्तु अस्त्युत्क्रांतौप्रश्नस्य करवोल्क्रमणसिद्धये तुभ्यमेनांसंप्रददे धेनुमुत्क्रांतिसंज्ञिकामिति ततः स्वर्णंद
२० क्षिणांदद्यात् गोरभावेतुतत्स्वरूपघृतगोमूल्यंवादद्यात् पित्रादेरशक्तौतु पुत्रादिर्दद्यात् तत्रममेति पदस्थानेपित्रादेरिति विद्वेत् इत्युत्
क्रांतिधेनुदानं इयमेव मोक्षधेनुरिति केचित् तद्यथा मोक्षदो वास्त्रदेवस्तु वेदशास्त्रेषु गीयते तत्प्रीतये द्विजाग्र्याय मोक्षधेनुं ददाम्यह
इत्युक्त्वा अद्येत्यादिमम समस्तपापक्षयपूर्वकसंसारमोक्षावाप्तिकामः श्रीपापापहमहाविष्णुप्रीतिकामश्च इमां मोक्षधेनुं यथाशक्तिसो
पस्करां रुद्रदैवत्यां गोत्रायशर्मणे स्त्रपूजिताय तुभ्यमहं संप्रददे नममेति मंत्रस्तु मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन मोक्षधेनुप्रदा
नेन मम मोक्षोस्तु वेगत इति ततः स्वर्णंदक्षिणांदद्यात् गोरभावेतु पूर्वोक्तं मनुसंधेयं इति मोक्षधेनुदानं अथ महिषीदानं हेमाद्रौ भविष्ये
महिषीदानमाहात्म्यं कथयामि युधिष्ठिर पुण्यं पवित्रमायुष्यं सर्वकामप्रदं तथा दानकालोपि तत्रैव चंद्रसूर्यग्रहे कार्तिक्यामयने सितचतुर्द
श्यां संक्रांतौ सर्वारिष्टनाशाय चित्तप्राशस्त्याय देया प्रथमप्रसूतां दोषवर्जितां दद्यात् तत्रादौ यमस्वरूपायै महिष्यै नम इति नत्वा प्रार्थयेत्
महिषी ब्रह्मपुत्री च लक्ष्मीरूपेण संस्थिता प्रार्थितासि मया देवी यममार्गं निवारयेति तथा महिषी यमरूपा त्वं विश्वामित्रविनिर्मिते पूजि
ता हर मे पापं सर्वदानफलप्रदे यथा शक्रस्याप्सरसो रूपेण महिषी तथा सर्वभाग्यप्रदे देवि दीर्घशृंगि नमोस्तु त इति अद्येत्यादि॰ मम दीर्घायु-
ष्यैहिकामुष्मिक यज्ञयाजित्वपितृतारणात्यंतशुभविंशतिधेनुदानसमफलावाप्ति सर्वदोत्तमफलपुत्रपौत्रबहुत्वसूर्यलोकनिवासमहारा-
ज्यावाप्तिकामश्च मम सर्वारिष्टनिवारणार्थं शनैश्चरजनितपीडाशांत्यर्थं गोत्रायशर्मणे स्त्रपूजिताय इमां महिषीं सालंकृतां रक्तमाल्यवस्त्रा २०

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृतांस्वर्णशृंगींरौप्यखुरांताम्रदोहांहेमतिलकांसप्तधान्ययुतां घंटाभरणांधेनूपस्करां यमदैवत्यांतुभ्यमहंसंप्रददेनममेतिसकुशतिलजलंतद्धु-
स्तेदद्यात् विप्रोदेवस्यत्वेतिपठन् पृष्ठदेशंस्पृष्ट्वा स्वस्तीतिप्रतिगृह्य यथाशाखंकामस्तुतिंपठेत् दातातु इंद्रादिलोकपालानां याराज्यमहिषी-
शुभा महिषीदानमाहात्म्यात्सास्तुमेसर्वकामदा धर्मराजस्यसाहाय्येयस्याःपुत्रःप्रतिष्ठितः महिषासुरस्यजननीयासास्तुवरदाममेति द
त्वाप्रदक्षिणीकृत्य ब्राह्मणेतांपयस्विनीमिति दक्षिणातुदशपंचत्रयःसुवर्णाः एकोवासुवर्णः अतिनिकृष्टोज्ञेयः ततोभूयसींदक्षिणांदत्वा
कर्मेश्वरार्पणंकुर्यात् हेमाद्रौभविष्यपुराणे अनेनविधिनादत्वामहिषींद्विजपुंगवे सर्वान्कामानवाप्नोतिइहलोकेपरत्रचेति ब्राम्हणःसर्वका
मस्तुक्षत्रियोजयकाम्यया धनकामस्तुवैश्योवैशूद्रोभिलषितानियात् महिषदानमप्येवमेवज्ञेयं इतिमहिषीदानं अथमेषीदानं भ
विष्ये शृणुपार्थपरंदानंसर्वकल्मषनाशनं यद्दत्वाविविधंपापंसद्योविलयमृच्छति अयनेविषुवेग्रहणद्वयेदुःस्वप्नदर्शने चित्तवित्ता
नुसारेकालेतीर्थेगृहेवाकार्यं शंकरंब्राम्हणंविष्णुंगौरींगायत्रींश्रीसहितांयथाशक्तिसुवर्णप्रतिमांकृत्वा शच्यासहेंद्रंग्रहांल्लो
कपालांश्चकृत्वासंपूज्यनत्पश्चिमतःस्वगृह्येणाग्निंप्रतिष्ठाप्यस्थापितदेवतामंत्रैस्तिलाज्यैरष्टोत्तरशतांविंशतिरष्टाष्टसंख्याकाहुतीर्हुत्वा
ततोमेषींद्विजंचवस्त्रालंकारादिभिर्यथाविभवंसंपूज्य अद्येत्यादिसर्वपापक्षयदुःस्वप्नसूचितारिष्टविनाशपुत्रपौत्रधनकीर्तियशःका
मइमांमेषींसुवर्णतिलकांघंटिकिनींकौशेयपरिधानांसप्तधान्यसमायुक्तांपुष्पोपहारांसन्मुखस्थापितलवणांब्रह्मविष्णुशिवादि
प्रतिमायुक्तांसुक्तोपस्करांगोत्रायशर्मणेसुपूजितायइमांतुभ्यमहंसंप्रददेनममेतिदत्वा सुवर्णदक्षिणांदद्यात् मंत्रस्तु वाङ्मनःका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजनिनंयत्किंचिन्ममदुष्कृतं तत्सर्वंविलयंयातुत्वद्दानेनोपसंचितमिति प्रतिमास्थापनंतिलकुंभे मेषींप्रत्यक्षांस्वर्णनिर्मितांवा विप्रोदेवस्य
त्वेतिश्रृंगेप्रतिगृह्ययथाशक्त्यंकामस्तुतिंपठेत् प्रतिग्रहीतृविप्रसंभाषणसुखावलोकनंचवर्जयेत् भविष्ये धनेनकारयेत्तांतुस्वव-
र्णस्यप्रयत्नतः यथाशक्त्याथवाकुर्याद्वित्तशाठ्यंनकारयेत् इतिमेषीदानं अथअजादानं स्कंदः अजापालोमहीपालोत्थ्यजादानं
र्दिवंगतः अयनेविषुवेचैवयुगादौग्रहणेषुच अमावास्यासजादानंपौर्णमास्यांचशस्यते विधिंतस्यप्रवक्ष्यामिविश्वामित्रेणनिर्मि
तं अजांविप्रंचयथाविभवंवस्त्रालंकारादिभिःसंपूज्य अद्येत्यादि० गोत्रायशर्मणेइमांअजां सप्तधान्योपरिस्थितां वस्त्रमाल्योप
शोभितांवज्रनेत्रांहेमश्रृंगींताम्रपृष्ठींरौप्यपादांसदोहनपात्रांसपुत्रांत्वाष्ट्रदेवतांतुभ्यमहंसंप्रददेनममेति कुशोदकंदत्वाद
द्यात् मंत्रस्तु मंत्रवासे अजेश्लक्ष्णे यज्ञसंपत्करे शुभे सदात्वंदहमेपापंजन्मांतरशतैःकृतमिति तथा त्वंपूर्वंब्रह्मणासृ
ष्टापवित्राकामदापरा त्वत्प्रसूतौस्थितायज्ञास्तस्माच्छांतिंप्रयच्छमे देवस्यत्वेतिश्रृंगेप्रतिग्रहः ततःस्वर्णदक्षिणांदद्यात् इ
त्यजादानं अथवृषदानं अयनेविषुवेचैवयुगादौग्रहणेषुच अमायांचप्रदातव्यंवृषदानंजगुर्बुधाः अद्येत्यादिपूर्ववत् दानमंत्रस्तु
धर्मस्त्वंवृषरूपेणजगदानंदकारक अष्टमूर्तेरधिष्ठानमतःशांतिंप्रयच्छमे इतिवृषदानं अथमंदाग्निहरमेषदानं बोधायनः अ
ग्नेर्मांद्यंभवेद्यस्ययस्मैतान्नैर्विनाशकः वक्ष्यामितत्प्रतीकारंयथोक्तंब्रह्मणापुरा पलार्धेनतदर्धेनतदर्धार्धेनवापुनः राजतंकारये
त्सौम्यंअग्नेर्वाहनमुत्तमं सौवर्णाश्चखुराःकार्याःश्वेतवस्त्रेणवेष्टयेत् तत्रश्वेतपुष्पंश्वेतगंधंमधूकंदधूपंदद्यात् द्रोणद्वयंतंदुलराशौस्थि ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्येमेरुषोडशांशेन गोधूममयं गंधमादनं तदुपरि सौवर्णजंबूवृक्षं तन्मूले सौवर्णसुदंष्ट्रं रवं धनदं मानससरः स्थाने सघृतं रौप्यपात्रं रौप्यगंधर्वा-
रव्यवनं नाना पल्लवस्त्रमाल्यानि च स्थापयेत् पश्चिमे मेरुषोडशांशातिलमयं विपुलाख्य पर्वतं तदुपरि सौवर्णपिप्पलं तन्मूले माङ्गुरवीं सौवर्णहंस
ग्रं निमां सितोदसरः स्थाने दधिपूर्णं रौप्यपात्रं रौप्यं वैभ्राजं वनं वस्त्रफलमाल्यानि च स्थापयेत् उत्तरे मेरुषोडशांशामितमाषैः सुपार्श्वपर्वतं
तदुपरि सौवर्णवटं तन्मूले दक्षिणाभिमुखीं सवत्सां सुवर्णधेनुं भद्रसरः स्थाने मधुपूर्णं रौप्यपात्रं रौप्यं सावित्रं वनं वस्त्रफलमाल्यानि च स्थाप-
येत् एवं वक्ष्यमाणपर्वतेष्वपि मेरुद्रव्यचतुर्थांशेन लवणादिद्रव्येण भागादिषु विष्कंभपर्वता ज्ञेयाः तत्राचार्यस्त्वेकः ऋत्विजश्चत्वारः
प्राच्यामेकमेव कुंडमिति तत्रैव जुहुयुः अथ यजमानः कृतनित्यक्रियः पुण्यकालेऽद्येत्यादि० अप्सरोगंधर्वयुत विमानकरणक स्वर्ग-
लोकगमनसाग्रमन्वंतरकालदेवलोकनिवासोत्तरभूलोकराजराजत्वकामईश्वरप्रीतिकामो वा श्वोधान्यपर्वतदानं करिष्ये इति संकल्प्य
तदंगत्वेन गणेशपूजनं नांदीश्राद्धानि च कृत्वा आचार्यमृत्विजश्च वृत्वा मधुपर्कादिना संपूज्य मंडपपूजनाद्याचार्यनियोगात् कुर्यात्
तत आचार्यो नवग्रहस्थापनादि कुंडसमीपस्थितकलशस्थापनांतं कुर्यात् अथर्त्विजः प्राक्कुंडे ग्रहादिद्वात्रिंशद्देवताभ्यस्तन्मं-
त्रैर्घृताक्ततिलैः पृथक्यवघृताभ्यां कुशैश्चेति त्रिभिः साधनैः प्रत्येकमष्टवारं हुत्वा दशलोकपालेभ्योऽष्टवसुभ्य एकादशरुद्रेभ्यो द्वादशा-
दित्येभ्यश्च प्रत्येकमष्टाष्टसंख्यया समिच्चर्वाज्याहुतिभिर्जुहुयुः ततः पुरुषसूक्तेन ब्रह्मविष्णुरुद्रेभ्यः समित्तिलैर्वा सूर्यकामदेवधनदहंसका-
मधेनुभ्यस्तिलैर्घृतेन वा अष्टोत्तरशतं जुहुयुः ततश्चतुःपंचाशद्देवताभ्यस्तिलैर्घृतेन च ततो यजमानो मेरुमवरुह्य पूजयेत् तत्र मंत्रः त्वं सर्वदेवग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 गणधामनिधिर्विरूढमस्मद्गृहेषु मरपर्वतनाशयाशु क्षेमंविधत्स्वकुरुशांतिमनुत्तमां नः संपूजितः परमपाहि सनातनस्त्वं त्वमेवभगवानीशो ब्रह्मा
 विष्णुर्दिवाकरः मूर्तामूर्तपरंबीजमतः शांतिंकुरुप्रभो यस्मात्त्वंलोकपालानांविश्वमूर्तेश्चमंदिरं रुद्रादित्यवसूनांचततः शांतिंप्रयच्छमे यस्मादमृत्यम
मरैर्नारीभिश्चशिरस्तव तस्मान्मामुद्धराशेषदुःखसंसारसागरात् मंदरस्यतु यस्माच्चैत्ररथेनत्वंभद्राश्वप्रमुखेनच शोभसेमंदराक्षिप्रमलंपुष्टिकरो
भव गंधमादनस्यतु यस्माच्चूडामणिर्जंबुद्वीपेत्वंगंधमादन गंधर्ववनशोभावानतःकीर्तिर्दृढास्तुमे विपुलस्यतु यस्मात्त्वंकेतुमालेनवैभ्राजेनवनेनच
हिरण्मयाश्वत्थशिरास्तथापुष्टिर्दृढास्तुमे सुपार्श्वस्यतु उत्तरैःकुरुभिर्यस्मात्सावित्रेणवनेनच सुपार्श्वशोभसेनित्यमतःश्रीरक्षयास्तुमे ततःसर्वै
र्जागरणेकृतेप्रातःस्नात्वाकृतनित्यक्रियःकुंडसमीपस्थकलशजलेनसपरिवारंयजमानमभिषिंचेयुः ततोयजमानोगृहीतकुसुमोमेरुंप्रदक्षिणी
कृत्योपतिष्ठेत् अन्नंब्रह्मरसःप्रोक्तमन्नेप्राणाःप्रतिष्ठिताः अन्नाद्भवंतिभूतानिजगदन्नेनवर्द्धते अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः धान्यपर्व
तरूपेणपाहितस्मान्नमोनमइत्युपस्थायपुष्पांजलिंप्रक्षिप्यनमस्कृत्यप्राङ्मुखउपविश्योदङ्मुखेभ्योगुर्वादिभ्यःक्रमेणगिरीन्दद्यात् अद्येत्या
दि॰गोत्रायशर्मणेसालंकृतायगुरवे अप्सरोगंधर्वयुतविमानकरणकस्वर्गलोकगमनानंतरसाग्रमन्वंतरशतावधिसमयदेवलोकनिवासोत्तर
भूलोकराज्यराजत्वप्राप्तिकामइमंधान्यमयमेरुंसौवर्णमंदरादिवृक्षपंचकसौवर्णब्रह्मविष्णुरुद्रार्कादिप्रतिमायुक्तमुक्ताहीरकादिभूषितं रौ
प्यमयशृंगचतुष्कोपशोभितंरूप्यमयेंद्रादिदशलोकपालप्रतिमायुतंरौप्यमयनितंबान्वितंइक्षुवंशमितकंदरादिकचतुष्टयस्थापितरौप्यपात्र
स्थितंघृतोदकप्रस्रवणादिकचतुष्टयस्थापितकर्पूररक्तवस्त्राबुदधरं नानाफलमाल्यवितानाद्युपकरणसहितंतुभ्यमहंसंप्रददेनममेतिदद्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंपूजयेत् मेषादाग्नेय्यां दिशिसमिदाज्यतिलैर्होमः कार्यः अथास्य प्रयोगः पुण्यकालेअद्येत्यादि० ममपूर्वकर्मविपाकोत्पन्नेताग्निनाशजनि
ताग्निमांद्यनिरासक्षिप्रजाठराग्निप्रबलत्वसिद्ध्यायुरारोग्यतासिद्ध्यर्थंमेषदानंकरिष्यइतिसंकल्प्यमेषप्रतिमांमेषंवाप्रत्यक्षंसंस्थाप्य आ
ग्नेय्यांस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यान्वाधायत्रिरग्निक्रमेणसमिदाज्यतिलैरष्टोत्तरशतमष्टाविंशत्यष्टाष्टसंख्ययावाजुहुयात् एतैर्मंत्रैः समि
दाज्यघृताक्ततिलाहुतिभिः ॐ अग्निर्मूर्धादि०तिस्वाहा अग्नयइ० ॐ अग्नेनयसुपथाराः०स्वाहा अग्नयइ०२ॐअग्निनाग्निः०स्यः स्वाहा
अग्नयइ०३ इतित्रिभिर्मंत्रैर्विवक्षितसंख्ययासमिदाज्यतिलैर्हुत्वास्विष्टकृदादिप्रणीताविमोकांतंकृत्वाकुंभोदकैर्यजमानोभिषिंचेदेतैर्मंत्रैः
बौधायनः आपोहिष्ठेत्यपितृचाहिरण्येतितृचेनच पवमानानुवाकेनमार्जयेद्रोगिणंततः शन्नोवातानुवाकेनशांतिंचापिप्रकल्पयेत्
तस्मैहुतवतेरोगीप्राङ्मुखायउदङ्मुखः सदक्षिणपूजितायदत्वावाहनमुत्तममिति गोत्रायशर्मणेइमंसोपस्करमेषंप्रत्यक्षंराजतंवावरु
णदैवतंसंकल्पोक्तफलकामस्तुभ्यमहंसंप्रददेनममेतिदत्वाप्रार्थयेत् बौधायनः देवानांयोमुखंहव्यवाहनःसर्वपूजितः तस्यत्वंवाहनं
पूज्यंदेवेशेंद्रैर्महर्षिभिः अग्निमांद्यंपूर्वकर्मविपाकोत्थंतुयन्मम तत्सर्वंनाशयक्षिप्रंजाठराग्निंप्रवर्द्धयेति विप्रस्तु शृंगेदेवस्यत्वेतिप्रति
गृह्ययथाशाखंकामस्तुतिंपठेत् ततःसुवर्णदक्षिणांदत्वायथाशक्तिभूयसीदक्षिणांदत्वाब्राह्मणांश्चभोजयित्वासुहृद्युक्तोभुंजी
तेति इतिमंदाग्निहरंमेषदानं अथदशाचलदानानि मात्स्ये प्रथमोधान्यशैलःस्याद्द्वितीयोलवणाचलः गुडाचलस्तृतीयःस्या
च्चतुर्थोहेमपर्वतः तिलशैलःपंचमःस्यात्षष्ठःकार्पासपर्वतः सप्तमोघृतशैलःस्यादष्टमोरत्नपर्वतः नवमोराजतःशैलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰चं॰ दशमः शर्कराचलइति कालमाहमात्स्ये अयनेविषुवेचैव व्यतीपातेदिनक्षये शुक्लपक्षेतृतीयायामुपरागेशशिक्षये विवाहोत्सवयज्ञे
३२ षुद्वादश्यामथवापुनः शुक्लायां पंचदश्यांवापुण्यर्क्षेवाविधानतः धान्यशैलादयोदेयायथाशास्त्रंविधानतः तीर्थेवायतनेवापि गोष्ठेवा
थगवांगणे तत्रचतुरस्रंद्वादशहस्तं मंडपमुदक्प्लवं प्राक्प्लवंवा प्राच्यामुदीच्यांवाएकमेवद्वारंनचत्वारि तोरणमध्येकमेव मंडलंगोमये-
नोपलिप्य कुशानास्तीर्य तन्मध्येपर्वतंकुर्यात्विष्कंभैःपर्वतैर्युतं धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः मध्यमः पंचशतिकः कनि-
ष्ठः स्यात्त्रिभिःशतैः मेरुर्व्रीहिमयोमहान्मध्ये तदुपरिमंदारपारिजातककल्पवृक्षादयो हेममयास्त्रयः मध्येकल्पतरुर्मंदारपारिजा
तोदक्षिणोत्तरयोः पूर्वपश्चिमयोर्हरिचंदनसंतानो मुक्ताफलवज्रगोमेदकपुष्परागगारुत्मतनीलरत्नवैडूर्यसरोजरागरत्नानि द्वंद्वशः पूर्वा
दिदिगवस्थितरजनशृंगेषुचतुर्षुनिवेश्यानि मंदारः श्रीखंडखंडैरभितः प्रवाललतान्वितः शुक्तिशिलातलःस्यात् शर्कराचलेतुहरिचंद
नसंतानौआवश्यकौ तत्रपूर्वादिदिक्षु ब्रह्मविष्णुरुद्रसूर्यप्रतिमाः पक्षिसंघान्मुनिसंघांश्चहैमान्प्रागादिदिक्चतुष्टयेक्रमेणपूर्वोक्तमु-
क्ताफलहीरकेगोमेदपुष्परागेमरकतनीलेवैडूर्यपद्मरागेः समसंख्याकैर्भूषितंरौप्यशृंगचतुष्कंतद्बहिर्दिगष्टकेरौप्यमिंद्रादिलोकपालप्र-
तिमाष्टकंसमंताच्छ्रीखंडैर्लतानांस्थानेप्रवालेःशिलानांशुक्तीः प्रागादिषुमेघानांश्वेतपीतकर्बुररक्तवस्त्राणि वंशानामिक्षून् जलस्यघृतंगं
धपुष्पनानाफलानिचपरितःसंस्थाप्य पंचवर्णवितानकंचोपरिबध्नीयात् ततोयवैर्मेरोःषोडशांशेनप्राच्यांमंदारंतदुपरिनररूपगणत्रयं
कदंबंचसौवर्णकदंबमूलेहेमःकामदेवःअरुणोदसरःस्थानेदुग्धपूर्णरौप्यपात्रंरौप्यंचैत्ररथाख्यंवनंगंधपुष्पफलवस्त्राणिचस्थापयेत्या ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशतिधेनुपक्षे म्राशुक्लपक्षस्यसर्वपापैःप्रमुच्यते उपोषितश्चतुर्दश्यांकृष्णपक्षेसमाहितः यमायधर्मराजायमृत्यवेचांतकायचवैव एकामेवकपिलांकृत्विग्भ्यः
स्रुवर्णदक्षिणांदद्यात्॥ यपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैकमात् चतुर्दशैतेमंत्राःस्युश्चतुर्थ्यंतानमोन्विताः प्रत्येकंतिलसंमिश्रानुद इसंप्रददेनममेतिदद्यात्
एवमेवदक्षिणस्थगो तकेरितितथातत्रैवाध्यायांतरे अस्मिन्कलियुगेघोरे लोकाःपापानुवर्तिनः भविष्यंतिमहाबाहोवर्णाश्रमविवर्जिताः नं रथ्यपर्वतंकृत्विग्भ्यो
दद्यात् लवणाचला शमनंप्रायश्चित्तंकलौयुगइति इतिरहस्यसुसाधारणप्रायश्चित्तानि अथप्रतिपदोक्तप्रायश्चित्तानि याज्ञवल्क्यः त्रिरात्रोपोषितो मानोदेवताःसंपूज्या
वाहितदेवतास्वसंपूज्य पयस्विनीमिति मनुः हविष्यांतीयमभ्यस्यनतमंइतीतिच जप्त्वाचपौरुषसूक्तंप्रच्यतेगुरुतल्पगइति हविष्पांतमजरंस्वर्विदीत वंगुरवेप्रतिपाद्यप्र
यसीदक्षिणांदत्वा त्रयोदशर्चंसहस्रशीर्षेतिषोडशर्चंएतेषांचतुर्णांसूक्तानांअन्यतमंप्रत्यहंषोडशकृत्वोमासंजपित्वाअकामतोगुरुतल्पगःशुध्यतीति यस्कृत्दद्युतोभुंजीत
ति इतिधान्यमेरुकमथआपूर्षिवानृचा अघमर्षचवाजप्त्वामुच्यतेब्रह्महत्ययेति इतिश्रीमत्कालोपनामक दुरामेश्वरात्मजभट्टमहादेवद्विज मःस्यात्तदर्धेन च-
तुर्भिरधमःस्मृतः कायासदसत्प्रतिग्रहप्रायश्चित्तानिकार्याणिनिरूपितानि इतिस्मृत्यर्थसारोक्तरहस्यप्रायश्चित्तानिनिरूपितानि अथ सर्वविघ्नंप्रपर्वते
पुण्येयइतिमदनः शिरिक्तेनराज्ञातदोषेरहस्यंप्रायश्चित्तंचरेत् अविद्वांस्तुगुरवांतरेणरहस्यप्रायश्चित्तंज्ञात्वारहस्यंचरेत् स्त्रीशूद्राश्चैवंज ग्यरससंभूतो
यतोयंलवणोरसः तयः कालविशेषानुक्तौवत्सराद्यामासांताः देशविशेषानुक्तौ शिलोञ्छयादयोगोतमोक्ताः जपेत्तुऋषिदैवतछंदोवि तस्माच्छांतिप्र
यच्छमे विद्युद्दे हःत्रिरात्रमंतर्जलेनिमज्ज्यऋतंचसत्यंचेत्यघमर्षणसूक्तमावर्त्यत्रिरात्रांतेपयस्विनींगांदत्वाप्रमुच्यते तदानाशक्तोशव्याहृतिका कप्राप्यतेनरं
परमगतिप्राप्ति काममृत्युंजयेत्रिशताद्यंनप्रतस्थःप्राणायामैस्त्वाचघमर्षणंजपेत् महापापैःप्रमुच्यते तत्याचेमाम्यानिप्राप्यस्तायादिति इतिसंक्षेपःदानचंद्र णाचलदान

। आपले छापखान्यांत छापिलें मितीवैशाख शुद्ध द्वादशी शके १७९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दशमः शर्कराचलइति कालस्य
क्षुद्राद्दश्यामथवा पुनः
थगवांगणे तत्रचतुरस्रं
नोपलिप्य कुशानास्तीर्य
ष्ठः स्यात्त्रिभिः शनैः
नोदक्षिणोत्तरयोः पूर्वप
दिदिगवस्थितरजतशृं
नसंतानौ आवश्यकौ
क्ताफलहीरकेगोमेदपुष्प
तिमाष्टकंसमंताच्छ्रीखं
धपुष्पनानाफलानिचप
कदंबंचसौवर्णकदंबमूले

इतिदिवाकरभट्टकृतदानचंद्रिकासमाप्ता

होत्सवयज्ञे
पिगोष्ठेवा
डलंगोमये-
निकः कनि-
दारपारिजा
निद्वद्वशः पूर्वा
चलेतुहरिचंद
मेणपूर्वोक्तमु-
दिलोकपालप्र-
न् जलस्यघृतगं
रिनररूपगणत्रयं
णिचस्थापयेत्या

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशतिधेनुपक्षे गावोष्टौगुरवे चतस्रश्चतुर्भ्यऋत्विग्भ्यः दशपक्षेतुगुरवे षड्ऋत्विग्भ्यः एकैकाएकधेनुपक्षेगुरवे एकामेवकपिलांऋत्विग्भ्यः
स्ववर्णदक्षिणांदद्यादितिमदनरत्नादयः एवंपूर्वस्थितमंदराख्यंविष्कंभसमर्पितमंसोपस्करंगोत्रायशर्मणेऋत्विजेतुभ्यमहंसंप्रददेनममेतिदद्यात्
एवमेवदक्षिणस्थंगोधूममयंगंधमादनपर्वतं तथापश्चिमस्थंतिलमयंविपुलाख्यंपर्वतं ततउत्तरदिक्स्थंमाषमयंसुपार्श्वाख्यंपर्वतंऋत्विग्भ्यो
दद्यात् लवणाचलादिदानप्रयोगेषुधान्यपदस्थानेलवणादिपदंप्रक्षेप्यं तत्तत्फलानितुतत्रतत्रवक्ष्यामः ततोग्रहवेद्यांयजमानोदेवताःसंपूज्या
वाहितदेवतास्वसंपूज्यनमस्कुर्यात् गुरुस्तासांदेवतानांविसर्जनंकुर्यात् ततोयजमानोमंडपग्रहपीठप्रतिमोपस्करादिसर्वंगुरवेप्रतिपाद्यभू
यसींदक्षिणांदत्वा प्रमादा॰ यस्यस्मृत्येतिचविष्णुंस्मृत्वाकर्मेश्वरार्पणंकृत्वाब्राम्हणान्भोजयित्वाशिषोगृहीत्वास्वयंसुहृद्युतोभुंजीते
ति इतिधान्यमेरुपर्वतसाधारणदानप्रयोगः अथलवणाचलदानं पाद्मे उत्तमःषोडशद्रोणः कर्तव्योलवणाचलः मध्यमःस्यात्तदर्धेनच-
तुर्भिरधमःस्मृतः वित्तहीनोयथाशक्त्याद्रोणादूर्ध्वंतुकारयेत् चतुर्थांशेनविष्कंभपर्वतान्कारयेत्पृथक् अयंन्यायःसर्वविष्कंभपर्वते
ष्वज्ञेयइतिमदनः विधानंतुपूर्ववत् हेमतरूंल्लोकपालान्कामदेवादीन्पूर्ववत् तथैवसंपूज्यप्रार्थयेत् मंत्रास्तु सौभाग्यरससंभूतो
यतोयंलवणोरसः तदात्मकत्वेनचमांपाहिपापान्नमोनमः यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना प्रियंचशिवयोर्नित्यंतस्माच्छांतिंप्र
यच्छमे विष्णुदेहसमुद्भूतंयस्मादारोग्यवर्धनं तस्मात्पर्वतरूपेणपाहिसंसारसागरात् अद्येत्यादि॰ कल्पपर्यंतंउमालोकप्राप्त्यनंतरं
परमगतिप्राप्तिकामईश्वरप्राप्तिकामोवालवणाचलदानंकरिष्ये इतिसंकल्पः अयमेवविशेषोन्यत्सर्वंपूर्ववत् इतिलवणाचलदान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथगुडाचलदानं पाद्मे अथातःसंप्रवक्ष्यामिगुडपर्वतमुत्तमं यस्यदानात्ततःस्वर्गंप्राप्नोति सुरपूजितं उत्तमोदशभिर्भारैर्मध्यमःपंचभि
र्मतः त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्पवित्तवान् तुलाःस्त्रियांपलशतंभारःस्याद्विंशतिस्तुलाइत्यमरः विधिस्तुपूर्ववत् प्रार्थनामंत्रा
स्तु यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः सामवेदस्तुवेदानांमहादेवस्तुयोगिनां प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा तथारसानां
प्रवरःसदैवेक्षुरसोमतः ममतस्मात्परांलक्ष्मींददस्वगुडसर्वदा यस्मात्सौभाग्यदायिन्याभ्रातात्वंगुडपर्वत निवासश्चापिपार्वत्यास्तस्मा
न्मांपाहिसर्वदा दानवाक्यंतु अद्येत्यादि॰ सकलपापक्षयोत्तरगंधर्वपूज्यमानत्वपूर्वकल्पशतावधिगौरीलोकप्राप्त्यनंतरंसपत्नापराजिता
युरारोग्यपूर्वकसप्तद्वीपाधिपतित्वकामईश्वरप्रीतिकामोवेतिसंकल्प्येदानेचविशेषोन्यत्सर्वंपूर्ववदिति इतिगुडाचलदानं अथस्वर्णाच
लदानं पाद्मे उत्तमःपलसाहस्रोमध्यमःपंचभिःशतैः तदर्धेनाधमस्तद्वदल्पवित्तोपिशक्तितः अल्पवित्तःपलादूर्ध्वंकुर्यादिति धान्यप
र्वतवद्विधानं पर्वतंसंपूज्यप्रार्थयेत् मंत्रास्तु नमस्तेब्रह्मगर्भायब्रह्मबीजायवैनमः यस्मादनंतफलदस्तस्मात्पाहिशिलोच्चय यस्माद
ग्नेरपत्यंत्वंयस्मात्तेजोजगत्पतेः हेमपर्वतरूपेणतस्मात्पाहिसदाममेति दानवाक्यं अद्येत्यादि॰ सकलपापक्षयकल्पोत्तरशतकल्पावधि
आनंदकारकब्रह्मलोकभोगानंतरपरमपदप्राप्तिकामइतिसंकल्प्येदानवाक्येचविशेषः अत्रसर्वंगुर्वादिभ्यएवदेयं तदल्पद्रव्यविषयं ब
हुद्रव्येषुतुलापुरुषदानवदर्धंचतुर्थांशंवागुरवेदत्वाऽन्यद्विप्रेभ्योदेयमितिहेमाद्रिः इतिस्वर्णाचलदानं अथतिलाचलदानं
पाद्मे उत्तमोदशभिर्द्रोणैःपंचभिर्मध्यमोमतः त्रिभिःकनिष्ठोराजेंद्रतिलशैलःप्रकीर्तितइति वृक्षविष्कंभादितुसर्वंपूर्ववत् २५

CC-0. In Public Domain. Digitization by eGangotri

मंत्रास्तु यस्मान्मधुवने विष्णोर्देहस्वेदसमुद्भवाः तिलाः कुशाश्च माषाश्च तस्माच्छन्नो भवत्विह हव्यकव्येषु यस्माच्च तिलैरेवाभिरक्षणं भवा
दुद्धरशैलेंद्र तिलाचलनमोस्तु ते दानवाक्यं तु अद्येत्यादि० सकलपापक्षयदीर्घायुष्यपुत्रपौत्रसमन्वितभोगानंतरपितृदेवगंधर्वलोकपूज्य
मानत्वपूर्वकद्युलोकगमनानंतरमक्षय्यवैष्णवपदप्राप्तिकामइतिसंकल्पेदानवाक्यचविशेषोन्यत्सर्वंपूर्ववत् इतितिलाचलदानं अथा
र्द्धोदयव्रते तिलपर्वतदानं स्कांदे पूर्वाह्णेसंगमेस्नात्वाशुचिर्भूत्वासमाहितः सर्वपापविशुद्ध्यर्थं नियमस्थोभवेन्नरः नि-
यममंत्रस्तु त्रिदैवत्यंव्रतंदेवाः करिष्येभुक्तिमुक्तिदं भवंतुसन्निधौमेद्यत्रयोदेवास्त्रयोग्नयइति तथा ब्रह्मविष्णुमहेशानांसौ
वर्णीः पलसंख्यया प्रतिमास्तुप्रकर्तव्यास्तदर्धेनद्विजोत्तम साग्रंशतत्रयंशंभोर्द्रोणानांतिलपर्वतः कर्तव्यः पर्वतोविष्णोर्ब्र
ह्मणः पूर्वसंख्यया शय्यात्रयंततः कुर्यादुपस्करसमन्वितं संपूज्यविप्रवर्येभ्योदत्वेप्सितमवाप्नुयादिति अथास्यदानप्रयोगः
यजमानः कृतनित्यक्रियः पुण्यकालेतीर्थादौस्नात्वाचम्य अद्येत्यादि० ममेप्सितफलावाप्तये मेरुदानसमफलावाप्तयेवार्द्धोदये
तिलपर्वतदानंकरिष्येइतिसंकल्प्य वेदपारगान्ब्राह्मणान्वृत्वा यथाविभवंवस्त्रालंकारादिभिः संपूज्य ततस्तिलपर्वते ब्रह्मादीनां प्रति
मास्वर्णमयाः संस्थाप्य षोडशोपचारैः संपूज्य ब्रह्मादीनामंगपूजांकुर्यात् तद्यथा नमोविश्वसृजेतुभ्यंसत्यायपरमात्मने देवाय
देवपतये यज्ञानांपतयेनमः ॐ ब्रह्मणेनमः पादौपूजयामिइत्यक्षतगंधपुष्पाणिचप्रक्षिपेत् ॐ हिरण्यगर्भाय० ऊरू० ॐ परमात्म
ने० जानुनी० ॐ वेधसेन० जंघेपू० ॐ पद्मोद्भवाय० गुह्यंपूज० ॐ हंसवाहनाय० कटी० ॐ शतानंदाय० वक्षःपू० ॐ सावित्रीपतये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम॰ बाहूपू॰ ॐऋग्वेदाय॰ पूर्ववक्त्रंपू॰ ॐयजुर्वेदाय॰ दक्षिणवक्त्रंपू॰ ॐसामवेदाय॰ पश्चिमवक्त्रंपू॰ ॐअथर्वणवेदाय॰ उत्तरव-
क्त्रंपू॰ ॐचतुर्वक्त्राय॰ वक्त्राणिपू॰ ॐहंसाय॰ नेत्राणिपू॰ ॐकमलासनाय॰ शिरांसिपूज॰ ॐलोकेशाय॰ सर्वांगंपूज॰ ततो
लोकपालान्परितस्तन्नम्मंत्रैःपूजयेत् ततोविष्ण्वंगपूजा हिरण्यरूपपुरुषप्रधानाव्यक्तरूपधृक् प्रसीदसुमुखानंत पूजांस्वीकुरु
मत्कृतांइतिप्रार्थ्यपूजयेत् ॐअनंताय॰ पादौपू॰ ॐविश्वरूपवते॰ ऊरूपू॰ ॐमुकुंदाय॰ जानुनीपू॰ ॐगोविंदाय॰ जंघे-
पू॰ ॐप्रद्युम्नाय॰ गुह्यंपू॰ ॐपद्मनाभाय॰ नाभिंपूज॰ ॐलंबोदराय॰ उदरंपूज॰ ॐकौस्तुभवक्षसेन॰ वक्षःपू॰ ॐचतु
र्भुजाय॰ बाहूपू॰ ॐविश्वमुखाय॰ मुखंपू॰ ॐसहस्रशिरसेन॰ शिरांसिपू॰ ॐसर्वेश्वराय॰ सर्वांगंपू॰ ततःशिवांगपूजा
आदित्यचंद्रनयनदिग्वासोदैत्यसूदन पूजांदत्तांमयाभक्त्यागृहाणकरुणाकरेति तथा महेश्वरमहेशाननमस्तेत्रिपुरांतक
जीमूतकेशायनमोनमस्तेवृषभध्वजेति आद्यमंत्रेणसंप्रार्थ्य द्वितीयेननत्वापूजयेत् ॐईशानाय॰ पादौपू॰ ॐशंकराय॰ ऊ
रूपू॰ ॐउमाकांताय॰ गुह्यंपू॰ ॐनीललोहिताय॰ नाभिंपू॰ ॐकृत्तिवाससेन॰ उदरंपू॰ ॐनागयज्ञोपवीतिनेन॰ बाहूपू॰ॐ
पंचवक्त्राय॰ वक्त्राणिपू॰ ॐत्रिलोचनाय॰ नेत्राणिपू॰ ॐरुद्राय॰ शिरःपू॰ ॐविश्वेश्वराय॰ सर्वांगंपू॰ इत्यंगपूजा ततःपंचा
मृताद्युपचाराःपीठत्रयंकमंडलुश्वेतवस्त्रयुगंब्रह्मणेपीतांबरद्वयंविष्णवेलोहितवस्त्रयुगंशंकराय कमलैस्तुलसीपत्रैर्बिल्वपत्रैश्च
क्रमेणसंपूज्य ततोब्रह्मविष्णुशिवानांनाममंत्रेणक्रमेणाष्टोत्तरशततिलैर्घृताक्तैर्हुत्वागामेकांदद्यात् ततस्तिलपर्वतंप्रतिमात्रयंशय्यात्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चदद्यात् संकल्प्योक्तफलंसंकीर्त्यगोत्रायशर्मणेसुपूजितायतुभ्यमहंसंप्रददे नममेति मंत्रोक्तु यस्मान्मधुवनेविष्णोर्देहस्वेदसमुद्भवाःतिलाःकु
शाश्चमाषाश्चतस्माच्छन्नोभवत्विह हव्यकव्येषुयस्माच्चतिलैरेवाभिरक्षणं भवादुद्धरशैलेंद्रतिलाचलनमोस्तुते अन्यत्सर्वंतिलाचलदानवत्कुर्यात्
यत्किंचिद्दीयतेदानंमेरुतुल्यंतुतद्भवेदिति तथाचान्नदानविशेषोनिर्णयामृतेस्कांदे चतुःषष्टिपलंमुख्यममत्रंतत्रकारयेत् तत्रअर्धोदये चत्वारिं-
शत्पलंवापिपंचविंशतिमेववा तत्तुकांस्यमयमुक्तंतत्रैव एवंसुघटितंकार्यंकांस्यभाजनमुत्तममिति स्कांदे निधायपायसंतत्रपद्ममष्टदलंलिखे
त् पद्मस्यकर्णिकायांतुकर्षमात्रंसुवर्णकं तदभावेतदर्धंवातदर्धंवापिकारयेत् कृत्वातुतंदुलैःशुक्लैःपद्ममष्टदलंभुवि अमत्रंस्थापयेत्तत्रब्रह्म-
विष्णुशिवात्मकं तेषांपूजाततःकार्याश्वेतमाल्यैस्तुशोभनैः वस्त्रादिभिरलंकृत्यब्राह्मणायनिवेदयेदिति अद्येत्यादि० ससमुद्रसभग्रसम्य
क्पृथ्वीदानसमफलावाप्तिकामोगोत्रायशर्मणेसालंकृतायइदंपायसपूरितकांस्यपात्रंअष्टदलपद्मस्थितंससुवर्णंवस्त्रादिभिरलंकृतंब्रह्मवि
ष्णुशिवात्मकंविष्णुदैवत्यंतुभ्यमहंसंप्रददेनममेति मंत्रस्तु सुवर्णपायसामत्रंयस्मादेतत्त्रयीमयं आवयोस्तारकंयस्मात्तद्गृहाणद्विजोत्तमे
ति कांस्यपात्रदानफलमुक्तं स्कांदे ससमुद्रमेखलांपृथ्वींसम्यक्दात्तुश्चयत्फलं तत्फलंलभतेमर्त्यःकृत्वादानममत्रकमिति अमंत्रपात्रं इ-
त्यर्धोदयेतिलाचलदानंकांस्यपात्रदानंच अथकार्पासाचलदानं कार्पासपर्वतस्तद्वद्विंशद्भारैरिहोदितः दशभिर्मध्यमःप्रोक्तःकनिष्ठः
पंचभिस्मृतः अल्पधनोभारेकेनवाकुर्यात् विधिस्तुधान्यपर्वतवत् दानंतुप्रभातायांशर्वर्याअरुणोदयेसूर्योदयात्प्राक् नाडिकाच
तुष्टयमध्ये इत्यर्थः अद्येत्यादि० सकलपापक्षयोत्तराकल्परुद्रलोकनिवासानंतरंभूलोकराज्यकामइतिसंकल्प्यदानवाक्येचवदेत् मंत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰ चं॰ रू॰ त्वमेवावरणंयस्माल्लोकानामिहसर्वदा कार्पासाचलतस्मात्त्वमघौघध्वंसनोभवेति इतिकार्पासाचलदानं अथघृताचलदानं पा
३८ द्मे विंशत्याघृतकुंभानामुत्तमस्याद्घृताचलः मध्यमस्तदर्धेनतदर्धेनाधमःस्मृतइति अल्पवित्त रू॰ द्वाभ्यांवापिकुर्वीततेनिविष्कंभा-
दिपर्वताश्चतुर्थांशेनकार्याः कुंभः पलसहस्रात्मकइत्युक्तं दानविवेके घृतकुंभःपात्रएव शालितंदुलपूर्णपात्राणि कुंभानामुपरिनिवेश
येत् अहतशक्लुवस्त्रैरावेष्टयेत इक्षुदंडफलान्वितः अन्यत्सर्वधान्यपर्वतवद्बोध्यं उदयात्प्राक्घटिकाचतुष्टयमध्येदद्यात् अ
द्येत्यादि॰ सकलपापक्षयपूर्वकहंससारसयुक्तकिंकिणीजालमाल्यर्कवर्णविमानकरणकशंकरलोकगमनपूर्वकसिद्धचारणविद्याधरार्चि
तत्वविशिष्टपितृसहिताभूतसंप्लवविचरणकामइतिसंकल्पेदानवाक्येचवक्तव्यं मंत्रोतु संयोगाद्घृतमुत्पन्नंयस्मादमृततेजसः तस्माद्घृता
र्चिविश्वात्माप्रीयतांममशंकरः यस्मात्तेजोमयंब्रह्मघृतेनित्यंप्रतिष्ठितं घृतपर्वतरूपेणतस्मान्नःपाहिभूधरेति इतिघृताचलदानं अथर-
त्नाचलदानं पाद्मे अथातःसंप्रवक्ष्यामिरत्नाचलमनुत्तमं मुक्ताफलसहस्रेणपर्वतस्यादिहोत्तमः मध्यमःपंचशतिकस्त्रिशताचाधमः-
स्मृतः चतुर्थांशेनविष्कंभादयःवज्रगोमेदैः पूर्वेमंदरः इंद्रनीलैः पद्मरागयुतैर्दक्षिणेगंधमादनः वैदूर्यविद्रुमैःपश्चाद्विपुलाचलः स
सौवर्णैः पद्मरागैःस्रूपार्श्वउत्तरेइति दानवाक्यंतु अद्येत्यादि॰ अनेकजन्मकृतब्रह्महत्यादिपापक्षयोत्तरामरेश्वरपूजितत्वपूर्वक
साग्रकल्पशतावधिविष्णुलोकनिवासानंतरंआयुरारोग्यरूपगुणोपेतसप्तद्वीपाधिपत्यकामइतिसंकल्पेदानवाक्येच वक्तव्यं
मंत्रोतु यथादेवगणाःसर्वेरत्नेष्ववस्थिताः त्वंचरत्नमयोनित्यमतःपाहिसदाचल यस्माद्रत्नप्रसादेनतुष्टिंप्रकुरुतेहरिः ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नाचलप्रसादेन तस्मान्नः पाहि पर्वत इति अन्यत्सर्वं धान्यपर्वतवत् इति रत्नाचलदानं अथ रौप्याचलदानं पाद्मे दशभिः पलसाहस्रैरुत्त-
मो रजताचलः पंचभिर्मध्यमः प्रोक्तस्तदर्धेनाधमः स्मृतः अशक्तो विंशतिपलादूर्ध्वं कुर्यात् विष्कंभादयस्तु तुरीयांशेनेति अन्य
त्सर्वं धान्यपर्वतवत् दानवाक्यं तु अद्येत्यादि॰ सकलपापक्षयपूर्वकदशसहस्रगोदानसमफलावाप्तिपूर्वकगंधर्वाप्सरोगणपूज्यमा
नत्वविशिष्टवैभवेन यावदाभूतसंप्लवसोमलोकनिवासकाम इति संकल्प्य दानवाक्येन वक्तव्यं मंत्रस्तु पितॄणां वल्लभ यस्माद्धर्मेंद्रोः
शंकरस्य तु रजत पातु तस्मान्नः शोकसंसारसागरादिति इति रौप्याचलदानं अथ शर्कराचलदानं पाद्मे अष्टभिः शर्कराभा
रैरुत्तमः स्यान्महाचलः चतुर्भिर्मध्यमः प्रोक्तस्तदर्धेनाधमः स्मृतः भारेणाल्पवित्तोपि भारार्द्धेनापि वा पुनः चतुर्थांशेन विष्कं
भादयः मंदारपारिजातकल्पवृक्षादयो हैमा एव पूर्ववत् पूर्वपश्चिमे हरिचंदनसंतानौ प्रत्यङ्मुखः कामदेवो मंदरे धनद उदङ्मुखो
गंधमादने प्राङ्मुखा वेदमूर्तिर्विपुलाचले हैमी रूपार्श्वे दक्षिणामुखी सुरभी अन्यत्सर्वं धान्यपर्वतवत् अद्येत्यादि॰ सकलपापक्षया
नंतरं कल्पशतावधि विष्णुलोकनिवासानंतरं सप्तद्वीपाधिपत्योत्तरं जन्मायुतं यावदविच्छिन्नायुरारोग्यकाम इति संकल्प्य दानवाक्येन च व-
क्तव्यं मंत्रस्तु आरोग्यामृतसारोयं परमः शर्कराचलः तन्ममानंदकारी त्वं भव शैलेंद्र सर्वदा अमृतं पिबतां ये तु निपेतुर्भुवि सीकराः देवा
नां तत्समुत्थोयं पाहि नः शर्कराचल मनोभवधनुर्मध्यादुद्भूता शर्करा यतः तन्मयोसि महाशैल पाहि संसारसागरादिति सर्वत्र ब्राह्मणभोज
नं शक्त्या कार्यमेव तदा पूर्वेद्युः कृतोपवासः परेद्युर्दानानंतरमक्षारलवणं भुंजीत एवं प्रसन्नचित्तो दानं दद्यादिति इति शर्कराचलदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰चं॰ इतिदशाचलदानानि अथशिखरदानानि विष्णुधर्मे गुडेक्षुवस्त्रलवणधान्यकाजाजिशर्करा खर्जूरतंडुलाद्राक्षाक्षौद्रमलयजेनच
३७ फलैर्मनोहरैश्चैवशिखराणिप्रदापयेत् माघेमार्गशीर्षेवैशाखेरोहिणीयुतायांतृतीयायांप्रोष्ठपदशुक्लतृतीयायांचदद्यात् शिखरप्रमा
णंतुआत्मसमप्रमाणंप्रादेशाभ्यधिकंशरीरार्धप्रमाणंसप्रादेशंशरीरप्रमाणंवा अथास्यदानप्रयोगः उक्तकालेयजमानः कृतनित्य
क्रियःपूर्वाह्णे अद्येत्यादि॰ दुःखदौर्भाग्याभावपूर्वककल्पकोटिशतत्रयावच्छिन्नगौरीभवननिवासानंतरपृथ्वीपतित्वकामः श्वो
गुडशिखरदानमहंकरिष्यइतिसंकल्प्य गणेशपूजनादिनांदीश्राद्धांतंकृत्वा आचार्यवरणादियथाविभवंवस्त्रालंकारादिभिर्मधु
पर्कपूजांतंकृत्वा गोमयेनोपलिप्तायांभुविइक्षुपत्राण्यास्तीर्य मूलेद्विहस्तविस्तारंउपरिहस्तमात्रविस्तारंइक्षुदलमयंकुसूलंकृत्वातद
भ्यंतरेरक्तवस्त्रेणावेष्ट्य गुडादिदेयद्रव्येणापूर्वउपरिइक्षुपत्रकटकमास्तीर्यतत्रक्षौमादिवस्त्रोपरिशरदिंदुवर्णाभांचंद्रमौलिंपद्मासना
क्षसूत्रकमंडलुवरदाऽभयकरांहैमींगौरींसशिखरांसूत्रेणावेष्ट्यकुंकुमादिनापूजयेत् अथांगपूजा ॐभवान्यैन॰ पादौपूज॰ ॐकामि-
न्यैन॰ जानुनीपूज॰ ॐकामदेव्यैन॰ ऊरूपू॰ ॐजगच्छ्रियै॰ नाभिंपू॰ ॐआनंदायै॰ हृदयंपू॰ ॐनंदायै॰ स्तनौपू॰ ॐशस्त्रा-
स्त्रधारिण्यै॰ बाहूपू॰ ॐशितिकंठायै॰ कंठंपू॰ ॐसुमुखायै॰ मुखंपू॰ ॐत्रिलोचनायै॰ नेत्राणिपू॰ ॐचंद्रशेखरायैन॰
भालंपू॰ ॐललितायै॰ शिरःपू॰ ॐसर्वात्मिकायै॰ सर्वांगंपू॰ इत्यंगपूजा ततोंजलिनापुष्पाण्यादाय प्रदक्षिणीकृत्यपठे- ३७
त् यस्मान्निवासःपार्वत्याःशिखरस्त्वंसुरैर्वृतं तस्मान्मांपाहिभगवद्गौरीतिष्ठतिसर्वदेति पुष्पांजलिंसमर्प्यनमस्कृत्यगीतवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वनिर्घोषैर्जागरणंकुर्यात् ततःप्रभातेस्नानादिकृतनित्यक्रियः शिखरपश्चिमभागेप्राङ्मुखउपविश्य अद्येत्यादि० संकल्पोक्त
फलसंकीर्त्यगोत्रायशर्मणेइदंगुडशिखरंगौरीप्रतिमासहितंसोपस्करंतुभ्यमहंसंप्रददेनममेतिदद्यात् ततःसुवर्णदक्षिणांदद्या
त् भूयसींचदत्वाब्राह्मणान्संभोज्यतद्दिनेक्षीरंघृतंवावाग्यतोमुक्तकेशस्तूष्णींप्राश्नीयात् इक्षुवस्त्रादिशिखरपदस्थानेसंकल्पादौ
तत्तत्पदंतत्रतत्रवक्तव्यमितिविशेषः अन्यत्सर्वंपूर्ववदिति इतिगुडशिखरदानं इतिनानाशिखरदानानि अथसमस्तपापक्षयक
रंत्रिशूलदानं कर्मविपाकसारे श्रुताध्ययनसंपन्नं पावितारमकिंचनं ब्राम्हणंदानमाहूयदानार्थंनददातियः मनुष्याणांहिंसकश्चज
वरेशूलवान्भवेत् वायुपुराणे कृष्णपक्षेचतुर्दश्यामष्टम्यांवासितेतरे कुर्याद्द्वादशनिष्केणत्रिशूलंलक्षणान्वितं सुवर्णमानंतुनिष्कच
तुष्कः सौवर्णिकः षट्पंचाशदधिकशतद्वयपलमूल्योवानाभौनिधायसंपूर्णनिष्कानांताम्रनिर्मितं पात्रमाढकमानंस्यात्तत्रशूलंन्यसे
त्पुनः ततःशैवपंचाक्षरेणरुद्रप्रकाशकवैदिकमंत्रेणत्रिशूलायनमइतिनाममंत्रेणवात्रिशूलंसंपूज्य हेमविरूपाक्षंकमलोपरिसंपूज्यअ
घोरेभ्योइ० मंत्रेणपूजांतेप्रणिपत्य ततोविप्रंवृत्वायथाविभववस्त्रालंकारादिभिःसंपूज्य अद्येत्यादि० ममबुद्ध्याबुद्धिपूर्वककायवाङ्म
नःकृतकर्माद्याजन्मार्जितान्यजन्मोपार्जितमनुष्यहिंसनदानार्थाहूतब्राह्मणनिराकरणजन्योदरशूलजनितपीडापनोदकामइदंस्वर्णम
यत्रिशूलंविरूपाक्षप्रतिमायुतंसोपस्करंगोत्रायशर्मणेसुपूजितायतुभ्यमहंसंप्रददेनममेति मंत्रस्तु भगवन्भगनेत्रघ्नदक्षयज्ञप्रमर्दन
तवायुधप्रदानेनपापंनश्यतुशंकर युगांतेयेनलोकानांत्वमंतकविनाशनम् विदग्धं यत्त्वपापेनपापौघंचव्ययोथययेनदग्धंक्षणार्धेनत्रिपुरंस्मरदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्जयं तेनपातकपतेनाशक्तममस्थूलंविनाशय यदाबुद्धिकृतंपापंमनोवाक्कायचाक्षुषं तत्सर्वंक्षयमेवाशु स्थूलदानप्रभावतइति ततःसुवर्णपासनां
तांदक्षिणांदत्वाद्विजभोजनसंकल्पंविधायभूयसींदत्वाकर्मेश्वरार्पणंकुर्यात् इतिस्थूलदानं अथदारिद्र्यहरंकुबेरमूर्तिदानं वायवीये दरिद्रोजा
यतेमर्त्योदानविघ्नंकरोतियः ऐश्वर्यंजायतेयेनकर्मणातच्छृणुष्वमे पलार्द्धेनतदर्धेनचतुर्थांशेनवापुनः अत्रसार्द्धमाषद्वयादारभ्यपंचा
शन्माषावधिवावित्तशाठ्यराहित्येनपुष्पकविमानस्थांकुबेरमूर्तिं पार्श्वयोः पद्मशंखाकारयुतांकृत्वाशुभेह्नि अद्येत्यादि०ममेहजन्मनि
पूर्वजन्मनिवादानविघ्नजनितदारिद्र्यविनाशपूर्वकयथेप्सितधनप्राप्त्यर्थंकुबेरमूर्तिदानंकरिष्येइतिसंकल्प्यगोमयोपलिप्तेद्विचतुरंकद्रो
णतंदुलराशौकुबेरप्रतिमांराजाधिराजेतिसंपूज्यतत आग्नेय्यांस्वगृह्यविधिनाग्निंप्रतिष्ठाप्यसमिदाज्यचरुभिःप्रत्येकमष्टोत्तरशतं
राजाधिराजायेतिमंत्रेणहुत्वा तत्संख्ययाघृताक्ततिलैर्व्याहृतिभिश्चहुत्वाकुबेरमूर्तिंदद्यात् अद्येत्यादि०ममेहजन्मनिजन्मांतरेवाकृ
तदानविघ्नजनिततीव्रदारिद्र्यविनाशपूर्वकंयथेप्सितधनप्राप्त्यर्थंचइमांकुबेरमूर्तिं पुष्पकविमानस्थांपार्श्वयोः पद्मशंखाकारयुतां
सोपस्करांगोत्रायशर्मणेसंपूजितायतुभ्यमहंसंप्रददेनममेति मंत्रस्तु उत्तराशापतेदेवकुबेरनरवाहन पद्मशंखनिधीनांत्वंपतिःश्री
कंठवल्लभः दानविघ्नान्मयाप्राप्तंदारिद्र्यंममदुःखदं तत्सर्वंतवदानेनपापमाशुविनाशयेति देयद्रव्यतृतीयांशंचतुर्थांशंवासुवर्णं
दक्षिणांदद्यादितिविशेषः ततोब्राह्मणभोजनंसंकल्प्यभूयसींदक्षिणांदद्यात् इतिदारिद्र्यहरंकुबेरमूर्तिदानं अथउमामहेश्वरमूर्तिदानं २८
भविष्ये अद्य० सशैलवनकाननसप्तसागर पृथ्वीदानसमफलावाप्तयेइमामुमामहेश्वरमूर्तिंसालंकृतांसोपस्करांसोपकरणांगोत्रायश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्पणेतुभ्यमहंसंप्रददेनममेति मंत्रस्तु शिवशक्त्यात्मकंयस्मा ज्जगदेतच्चराचरं तद्दानेनमेवश्यापृथिवीस्यात्सुनिश्चला सुवर्णदक्षिणां
दद्यात् इतिउमामहेश्वरमूर्तिदानं अथलक्ष्मीनारायणमूर्तिदानं स्कांदे संकल्पादिपूर्ववत् मंत्रस्तु लक्ष्मीनिवासदेवेशशंखचक्रगदाधर, त
द्दानात्स्थिरालक्ष्मीर्मद्गृहेस्यात्सदाध्रुवं सुवर्णदक्षिणांदद्यात् इतिलक्ष्मीनारायणमूर्तिदानं अथहरिहरमूर्तिदानं संकल्पादिपूर्ववत् मंत्रस्तु
शिवोनामशिवःसाक्षात्तथानारायणोपिच अस्यदानाद्धरिहरौप्रसन्नौस्तांसदामम इतिहरिहरमूर्तिदानं अथसूर्यमूर्तिदानं सूर्यारुण
संवादे संकल्पादिपूर्ववत् मंत्रस्तु ग्रहाणामधिपःसूर्यःपद्महस्तःप्रभाकरः अस्यदानेनसविता आयुःश्री शांतिदोस्तुमे सुवर्णा
दिदक्षिणांदद्यात् इतिसूर्यमूर्तिदानं अथगणपतिमूर्तिदानं स्कांदे यमाभर्नानिईशाद्याविश्वनाथमुमासुतं विघ्नेशरक्षप्रत्युरंतुभ्यं
दास्याम्यभीष्टदं इतिसंप्रार्थ्य संकल्पादिकृत्वादद्यात् मंत्रस्तु गणनाथोविघ्नहरोगौरीसूनुरभीष्टदः अस्यदानेनमेशांतिःप्रसन्नो
स्तुविनायकइति इतिगणेशमूर्तिदानं अथजगदंबिकामूर्तिदानं देवीपुराणे संकल्पादिपूर्ववत् मंत्रस्तु आदिमायामहाशक्ति
र्विश्वमाताजगन्मयी दानेनास्याःप्रसन्नास्तुसर्वदाममशाम्भवीति इतिजगदंबिकादानं अथसरस्वतीमूर्तिदानं वायवीये
संकल्पादिपूर्ववत् मंत्रस्तु वीणापुस्तकसंयुक्तावाङ्मूर्तिःममलंकृता गृहाणत्वंद्विजश्रेष्ठवाक्सिद्धिरस्तुकुलेममेति इतिसरस्व
तीमूर्तिदानं अथशालग्रामदानं हेमाद्रौपाद्मे शालिग्रामशिलाचक्रयोर्दद्याद्दानमुत्तमं भूचक्रेणनदत्तंस्यात्सशैलवनकाननं
इति अद्येत्यादि॰ सशैलवनकाननभूचक्रदानसमफलकामइमंशालिग्रामं घंटाशंखादिसोपकरणंतुलसीपत्राद्यर्चितंसवस्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंनाम्राद्रिपात्रेस्थितंयथाशक्तिसोपस्करंसालंकृतंगोत्रायशर्मणेसालंकृताय तुभ्यमहंसंप्रददेनममेति मंत्रस्तु महाकोशनिवासे
नचक्राद्यैरुपशोभितः शालग्रामप्रदानेन मम सन्तु मनोरथाइति स्ववर्णदक्षिणासर्वत्रनराजतं एवंसंकल्पादिसर्वदेवमूर्तिशिलादा
नेष्वपियोजनीयं मणिःशालग्रामइतिहेमाद्रिणाव्याख्यातं घोरप्रतिग्रहेषुचग णितमिति इतिशालग्रामदानं अथशिवनाभि
दानं लैंगे संकल्पादिपूर्ववत् मंत्रस्तु शालग्रामशिलापुण्या भुक्तिमुक्तिप्रदायिनी शिवनाभेःप्रदानेन पूर्णाःसंतु मनोरथा इ
ति तथा महाकोशनिवासत्वंशालग्राममहेश्वर प्रीयतांतवदानेन ब्रह्मविष्णुमहेश्वराः इतिशिवनाभिदानं अथलिंगदानं लैं
गे संकल्पादिपूर्ववत् मंत्रस्तु सालकारमहालिंगनिवासत्वं वृषध्वज प्रीयतांतवदानेनशिवोगौर्यायुतस्सइति तथा कैलासवा-
सोगौरीशो भगवान्भगनेत्रभित् चराचरात्मकोलिंगरूपीदिशतुवांछितमिति रुद्राक्षमालासहितंलिंगंदद्यात् कोटिगुणंपुण्यंभवति
अथमारकतलिंगदानं मंत्रस्तु इदंमारकतंलिंगंरौप्यपीठसमन्वितं धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितं संप्रदद्याद्विधानेनपृथ्वीदानफलं
लभेत्इति रुद्राक्षमालायुक्तंसंकल्पाद्युक्तमेव काश्मीरलिंगदानेतुमारकतपदस्थानेकाश्मीरपदंवदेत् मंत्रस्तु मृत्युंजयेशगौरीशस्तु-
भ्यंवृषवाहन संप्रदानेनमेशंभोममसंतुमनोरथाइति इतिलिंगदानं अथघंटादानंपाद्मे अद्येत्यादि॰ममाकल्पघंटानादश्रवणलोक-
निवासावाप्तिकामोगोत्रायशर्मणेसुपूजितायइमांघंटांविष्णुदैवत्यांतुभ्यमहंसंप्रददेनममेति मंत्रस्तु घंटादेवप्रियानित्यंदैत्यत्रासकरीसदा
संप्रदानेनचैतस्याविजयोस्तुसदाममेति स्ववर्णदक्षिणांदद्यात् इतिघंटादानं अथशंखदानंपाद्मे अद्येत्या॰गोत्रायशर्मणेइमंशंखंसुपूजिताय ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुदैवतं तुभ्यमहं संप्रददे न मम इति मंत्रस्तु शंखः शुभकरो नित्यं सर्वमंगलदायकः तस्मादस्य प्रदानेन शांतिरस्तु सदा मम इति स्वर्णदक्षि
णा इति शंखदानं अथ कालचक्रदानं मृत्युंजयकल्पे महामृत्युनिवारणार्थं कालचक्रदानमुक्तं संकल्पस्तु अद्येत्यादि० शक्तितो रौप्य
कृतं चंद्राकारमनेकमुक्तामालात्मकरश्मियुक्तं कालचक्रं विप्राय गंधालंकारादिभिः संपूजिताय महामृत्युनिवारणकामः तुभ्यमहं संप्रददे
न मम इति मंत्रस्तु इदं मे राजतं चक्रं मिंदुरश्मिसमाकुलं अपमृत्युविनाशाय दत्तमायुर्विवृद्धये इति ततः स्वर्णदक्षिणां दत्वा अग्निं प्रतिष्ठाप्य
ॐ कालचक्राय नमः स्वाहेत्यनेन मंत्रेणाष्टोत्तरशतवारं घृताक्तान्तिलैर्हुत्वा पायसादिना द्वादश ब्राह्मणान् भोजयित्वा स्वयमक्षारलवणं सक्तून्भुं
जीतेति इति कालचक्रदानं अथापरं अपमृत्युहरं यममूर्तिदानं मृत्युंजयकल्पे लोहपात्रे स्थितं कांस्यं तत्र पद्मं तु राजतं तस्मिन्कालेश्वरः स्व
र्णैः पुरुषाकारतां गतः तद्रूपं तु ईषत्पीतो दंडहस्तो रक्तदृक् पाशहस्तकः कृष्णवस्त्रालंकृतः स्याद्रोगिणामभयप्रदः अलंकृतः स्वर्णाल
कारैः त्रिलोहाकारैर्दूतैर्वृतः त्रिलोहं कांस्यताम्रपित्तलाख्यं पुरुषाकारौ दूतौ दंडहस्तौ कृत्वा यमं महिषपृष्ठे अष्टम्यां चतुर्दश्यां वा दद्यात्
दक्षिणां तु घृतपूर्णो घटः स्वर्णं वा एवं कृत्वा दानेन नाशान्मुच्यते नाशोपमृत्युः इत्यपमृत्युहरं यममूर्तिदानं अथ कालपुरुषदानं भ
विष्ये ज्ञेयानि निष्कशतं पार्थ दाने यविधिरुत्तमः मध्यमस्तु तदर्धेन तदर्धेनाधमः स्मृत इति अत्यशक्तो पंचसौवर्णिको वा ततोल्पेन तु प्र
तिग्रहात् दुःखशोकावहः स्यात् चतुर्थ्यां चतुर्दश्यां भद्रायां करणे वा कुर्यात् कालपुरुषस्वरूपमाह रौप्यदशनं सौवर्णनेत्रं खड्गोद्यतक
रं मांसपिंडयुतवामकरं जपाकुसुमकुंडलं रक्तवस्त्रस्रग्विणं शंखमालाधरं छुरिकायुतकटिदेशं अतिदीर्घं कृष्णाजिनयुतं निर्माय अद्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यादि० अपमृत्यु व्याधि सर्वबाधा निवारणाव्याहतैश्वर्यप्राप्तिधर्मश्रीपुत्रपौत्रादिकर्तृकराज्यान्ते परमपदावाप्तिकामः कालपुरुषदानमहं करिष्य इ
ति कालपुरुषसंपूज्य विप्रं पूज्य द्विजं वृत्वा यथाविभववस्त्रालंकारादिभिः संपूज्य पुष्पांजलिं गृहीत्वा पठेत् सर्वं कलयसे यस्मात्कालस्त्वं तेन-
चोच्यसे ब्रह्मविष्णुशिवादीनां त्वमसाध्योसि सुव्रत पूजितस्त्वं यथाभक्त्या प्रार्थितश्च यथा सुरवं यद्बुध्यते नवविभो तत्कुरुष्व नमोस्तु ते
इति संप्रार्थ्य अद्येत्यादि० अपमृत्यु व्याधी इत्यादि राज्यपरमपदावाप्तिकामः संकल्पोक्तवत्फलं संकीर्त्य गोत्राय शर्मणे सुपूजिताय
इमं कालपुरुषं सालंकृतं उक्तोपस्करं विष्णुदैवतं तुभ्यमहं संप्रददे न मम इति दत्वा पंच सुवर्णादूर्ध्वमानिष्कशतं दक्षिणां दत्वा तं विसृज्य तन्मु
खं नेक्षेन्न स्पृशेच्च ततः शांता पृथिवी शिवमंतरिक्षं इति जपित्वा हस्तौ पादौ प्रक्षाल्य आचम्य भूयसीं दक्षिणां दत्वा विप्रान् संभोज्य सुहृद्युतो
भुंजीतेति अनेन विधिना यस्तु दानमेतत्प्रयच्छति नापमृत्युभयं तस्य न च व्याधिकृतं भयं भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः इति
हेमाद्रौ कालपुरुषदानं अथ सर्वसंपत्करदानं ब्रह्माण्डपुराणे सूर्योपरागादि पुण्यकाले देवालयादि पुण्यदेशे गृहे वा कार्यं प्रातस्तिलकुशमि
श्रोदकेन स्नात्वा कृतनित्यक्रियः आचम्य प्राणानायम्याद्येत्यादि सर्वसंपदायुरारोग्यसमस्तपापनाशपुत्रपौत्रादिकुलवृद्धिस्वर्गनिवास
मोक्षेष्टसिद्धिकामो मित्रादिप्रतिमादानमहं करिष्ये गुरुं वृत्वा यथाविभवं वस्त्रालंकारादिभिः पूजयेत् ततो विंशद्धस्तां चतुरस्रां भुवं गोमयेनो
पलिप्य तत्र प्रागायताश्च तस्र उदगायताश्च तस्रो लेखा लिखित्वा तेषु नवकोष्ठेषु द्रोणमिततंदुलान्निक्षिप्य तेषु नवकुंभान् संस्थाप्य वस्त्रे-
रावेष्ट्य तेषु सुवर्णत्रयादूर्ध्वं पलावधि सुवर्णनिर्मिता नवप्रतिमाः संस्थाप्य पूजयेत् तत्र पश्चिमपंक्तौ उदक्संस्थं मित्रं वरुणं सोमं मध्यप ५०

CC-0. In Public Domain. Digitization by eGangotri

क्तो ब्रह्माणं चतुर्भुजं विष्णुं उमापतिं चोत्यपंक्तौ दिवाकरं वृत्रहणं वह्निं च ततो ष्टौ विप्रान्संपूज्य एकैकस्मै अद्येत्यादि० संपदादिकामां तं संकल्पोक्त फलमुद्दिश्य गोत्राय शर्मणे सुपूजिताय इमां मित्रप्रतिमां सुपूजितां तुभ्यमहं संप्रददे न मम इति दत्वा ततो वरुणप्रतिमां गुरवे दत्वा देयद्रव्यसमं सुवर्णं दक्षिणां वस्त्रयुगं च दद्यात् ततः सोमब्रह्मविष्णुशिवदिवाकरवृत्रहवह्निप्रतिमाश्च ब्राह्मणेभ्यो दत्वा सुवर्णं दक्षिणां च तेभ्यो दत्वा ब्राह्मणांश्च भोजयित्वा भूयसीं च दत्वा सुहृद्युतो भुंजीतेति इति सर्वसंपत्करदानं अथ कृष्णाजिनदानं सौरपुराणे कृष्णाजिनं च महिषीं मेषीं च दशधेनवः ब्रह्मलोकप्रदायी स्यात्तुलापुरुष एव चेति मात्स्ये वैशाखी पौर्णमासी च ग्रहणे शशिसूर्ययोः पौर्णमासी तु या माघे आषाढी कार्तिकी तथा उत्तरायणद्वादशी वा तस्यां दत्तं महाफलमिति अथास्य दानप्रयोगः पूर्वोक्तकाले गोमयेनोपलिप्तदेशे आविकं कंबलं तदुपरि सशृंगं सखुरं प्राग्ग्रीवं कृष्णाजिनमास्तीर्य सुवर्णखुरं रौप्यदंतं मौक्तिकपुच्छं सुवर्णनाभं कृत्वा तदुपर्यरत्निप्रमाणान्तिलान्संस्थाप्य वाससाच्छाद्य सगंधरत्नानि चत्वारि पात्राणि कांस्यघृतदुग्धदधिमधुयुतानि चत्वारो मृदश्च प्रागादिदिक्षु दानदेशाद्बहिश्च पंकशाखामयं कुंभं च संस्थाप्य देशकालौ संकीर्त्य मम स सजन्मोपात्तपापनाशकामात्मपितृपुत्रापमृत्युपरिहारभार्याधनदेशाद्यवियोगकामः सकलेष्टफलावाप्ति ब्रह्मलोकावाप्तिकामश्च कृष्णाजिनप्रदानमहं करिष्ये इति संकल्प्य जीर्णपीतवाससास्वांगानि संमृज्य यानि कानि च पापानि मया लोभात्कृतानि च लोहपात्रप्रदानेन प्रणश्यंतु ममाशु वै इति मंत्रेण सतिल

वह्निं ९	वृत्रहणं ८	दिवाकरं ७
उमापतिं ६	विष्णुं चतुर्भुजं ५	ब्रह्माणं ४
सोमं ३	वरुणं २	मित्रं १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दा॰चं॰ लोहपात्रंकृष्णाजिनस्यवामपादेनिवेशयेत् यानिकानिचपापानिकर्णोत्थानिकृतानिच कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा इतिमंत्रेण
४१ मधुमयंकांस्यपात्रंकृष्णाजिनस्यदक्षिणपादेनिवेश्य परापवादपैशून्यादभक्ष्यस्यचभक्षणात् यदुत्थितंतुमेपापंताम्रपात्रात्प्रणश्यतु इ
तिमंत्रेणसतिलंताम्रपात्रंवामहस्तेनिवेश्य कन्यानृतंगवांचैवपरदारप्रमर्शनं रौप्यपात्रप्रदानेनक्षिप्रंनाशंप्रयातुमे इतिमंत्रेणमधुम
यंरौप्यपात्रंदक्षिणहस्तेनिवेश्य मयाजन्मसहस्रेषुकृतंपापंप्रबुद्धिना सुवर्णपात्रदानात्तन्नाशयाशुजनार्दन इतिमंत्रेणसाक्षतंहैमपा
त्रंमध्येतथाहेममुक्ताविद्रुमदाडिममातुलिंगानिनिधायप्रशस्तपात्रेकर्णयोःसंस्थाप्यद्विजंवृत्वायथाविभवंवस्त्रालंकारादिभिःसंपूज्यपु
नर्देशकालौसंकीर्त्यामुकगोत्रोमुकशर्मा अहंममसमस्तजन्मोपात्तादिब्रह्मलोकावाप्त्यंतममुकगोत्रायशर्मणेसुपूजितायतुभ्यमिदंकृ
ष्णाजिनंयथाशक्तिसोपस्करंवृषभध्वजप्रीतयेतुभ्यमहंसंप्रददेनममेति एतद्दक्षिणापरिमाणंगारुडे सुवर्णनिष्कशतंतदर्धंवा ततो
न्यूनत्वेनाधिकफलं अस्पृश्यःसद्विजोराजन्चितिरूपसमोहिसः दानेचश्राद्धकृत्येचदूरतःपरिवर्जयेत् इतिगारुडेउक्तं स्वगृहान्नि
ष्क्रांतंविप्रंमंगलस्नानमात्रैर्दिनितद्वस्त्रकुंभसहितंनीत्वाक्षेप्यंचतुष्पथइति ततोभूयसींदक्षिणांदत्वाशिषोगृह्णीयात् दानेनानेनसक
लारिष्टपापनाशोभूमिदानफलंचेतिहेमाद्रिः होमादिविशेषस्तुग्रंथांतरादवगंतव्यः इतिकृष्णाजिनदान अथशय्यादानंमहाभारते यज
मानःपुण्यकालेअष्टदलेतिलप्रस्थंनिक्षिप्यतस्मिन्शय्यामास्तीर्यतस्याःसमंतादीशानादिकोणचतुष्टयेशिरोभागेचपंचकुंभान्क्रमात् ४१
घृतकुंकुमगोधूमजलपूर्णकुंभमुच्छीर्षेघृतपूर्णकलशंसप्तधान्यानिचसंस्थाप्य अद्येत्यादि॰ममसमस्तपापक्षयपूर्वकाप्सरोगण

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेवायुतविमानकरणकेंद्रपुरगमनोत्तरषाष्टिसहस्रवर्षाधिकरणकक्रीडनस्त्रीसंघसमाहृतसर्वलोकमहिमत्वतदुत्तरषष्टियोजनमंडलराज्य-
भोगानंतरशिवसायुज्यावाप्तिकामः शय्यादानमहं करिष्ये इति संकल्प्य द्विजं सपत्नीकं हृत्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य शय्यायां
लक्ष्मीनारायणप्रतिमां स्वर्णमयीं संस्थाप्य संपूज्य सपत्नीकविप्रेण सह शय्यां प्रदक्षिणीकृत्य नमः प्रमाण्यै देव्यै इति चतुर्दिक्षु क्रमेण प्रणम्य
तिथ्यादि संकीर्त्य मम सर्वपापक्षयेत्यादि शिवसायुज्यावाप्तिकामो गोत्राय शर्मणे सपूजिताय इमां शय्यां ईशानादिकोणचतुष्टयस्थापनक्रमे
णाघृतकुंकुमगोधूमजलघृतपूर्णकुंभसमेतां हंसतूलीप्रच्छन्नां श्लक्ष्णगंडोपधानिकां प्रच्छादनपटास्तृतां सप्तधान्ययुतां तांबूलायतना
दर्शलालवंगकर्पूरयुतां स्रग्गंधपरिमलभोग्यवस्त्रचंदनागरुदीपिकोपानच्छत्रचामरासनयुतां भोजनभाजनजलपात्रपंचवर्णवितानां केशप्र
साधिन्यंजनशलाकापुष्पमालादियुतां लक्ष्मीनारायणप्रतिमासहितां युक्तोपस्करां मंगिरो देवतां गोत्राय शर्मणे सपूजिताय सालंकृताय सप
त्नीकाय तुभ्यमहं संप्रददे न मम इति शय्योपवेशितविप्रहस्ते साक्षतकुशोदकं क्षिपेत् मंत्रस्तु यथा न कृष्णशयनं शून्यं सागरजातया तथा
शय्या ममाप्यशून्यास्तु जन्मजन्मनि इति ततः स्वर्णमेव दक्षिणां दद्यात् ततो भूयसीं दत्वा ब्राह्मणांश्च भोजयेदिति इति शय्यादानं
अथ शयनदानं भविष्ये अद्येत्यादि० गोत्राय शर्मणे इदं शयनं सुखस्पर्शं श्रीविष्णुप्रीतिकामस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु शयनं
सुखदं कांतं केशवस्य प्रियं सदा दानेनानेन सौभाग्यं सर्वदास्तु गृहे मम इति ततः स्वर्णदक्षिणां दद्यात् इति शयनदानं अथ कशिपुदानं
भविष्ये अद्येत्यादि० गोत्राय शर्मणे कशिपुं यावज्जीवं शीतवातोष्णनिवारणकामस्तुभ्यमहं संप्रददे न मम इति मंत्रस्तु मृदुत्वबीजकार्पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सपूरितंसुखदंनृणां तस्मादस्यप्रदानेन सुखंस्यात्सर्वदाममेति इतिकशिपुदानं अथवस्त्रदानानि नंदिपुराणं वस्त्रंययार्थिनेदद्याच्छुभं
वापियदृच्छया सभवेद्धनवान्श्रीमान् बृहस्पतिपुरेवसेदिति विष्णुधर्मोत्तरे वासोहिसर्वदैवत्यंसर्वप्रायाज्यमुच्यते वस्त्रदानात्सुवेषः
स्याद्रूपद्रविणसंयुतः युक्तोलावण्यसौभाग्यैर्विरोगीचतथाद्विजः दत्वाकार्पासिकंवस्त्रंस्वर्गलोकेमहीयते दत्वोर्णजंचतत्रापिफलंदश
गुणंभवेदिति अद्येत्या॰गोत्रायशर्मणेइदंश्वेनवस्त्रंसूक्ष्मंशिवप्रियंदेहालंकरणंबृहस्पतिदैवतंतुभ्यमहंसंप्रददेनममेति मंत्रस्तु सि
तंसूक्ष्मंसुखस्पर्शमीशानादेःप्रियंसदा देहालंकरणंयस्मादतःशांतिंप्रयच्छमेइति इतिश्वेतवस्त्रदानं अथपीतस्य संकल्पादिस
मस्तपापक्षयकामः मंत्रस्तु पीतवासःसुमंगल्यंदेवानांप्रीतिवर्धनं दानेनानेनमेपापंहरत्वाशुजनार्दनः इतिपीतवस्त्रदानं अथरक्त
वस्त्रदानं भविष्ये संकल्पादि॰आदित्यप्रीतिकामः मंत्रस्तु रक्तवस्त्रंसदारम्यमादित्यस्यप्रियंसदा श्रीकररूपदंनित्यमतःशांतिंप्रय
च्छमे इतिरक्तवस्त्रदानं अथनीलवस्त्रदानं भविष्ये संकल्पादि॰बलायुःश्रीवृद्धिकामः मंत्रस्तु मनोहरंनीलवस्त्रंबलरामप्रियंस
दा आयुर्विवर्धनंश्रीदमतःशांतिंप्रयच्छमे इतिनीलवस्त्रदानं अथचित्रवस्त्रदानंभविष्ये संकल्पादि॰षण्मुखप्रीतिकामः मंत्रस्तु
षण्मुखस्यप्रियंरम्यंचित्रवस्त्रंमनोरमं तस्मादस्यप्रदानेनशांतिरस्तुसदाममेति इतिचित्रवस्त्रदानं अथकृष्णवस्त्रदानं भविष्ये
संकल्पादि॰सर्वारिष्टभयपीडापमृत्युपरिहारायमृत्योःप्रीतिकामश्च मंत्रस्तु कृष्णवासःप्रियंमृत्योःसर्वारिष्टविनाशनं भयपीडापमृ
तिहरमतःशांतिंप्रयच्छमे इतिकृष्णवस्त्रदानं अथपट्टकूलदानं भविष्ये संकल्पादि॰ कीर्तिकांतिसर्वदेवप्रीतिकामश्च मंत्रस्तु ४२

CC-0. In Public Domain. Digitization by eGangotri

पट्टकूलंसदारम्यंपवित्रंकामदंनृणां विष्ण्वादीनांप्रीतिकरमतः-शांतिंप्रयच्छमे इतिपट्टकूलदानं अथमृतकर्पटदानं भविष्ये संक
ल्पादि ० पितृतृप्तिकामः मंत्रस्तु कीटजंटस्तुरंपुण्यंमृतकर्पटसंज्ञकं पितृणांप्रीतिदंयस्मादतःशांतिंप्रयच्छमे इतिमृतकर्पटदानं
अथऊर्णावस्त्रदानं भविष्ये संकल्पादि ० सर्वदेवप्रीतिकामः मंत्रस्तु ऊर्णावस्त्रंचारुचित्रंदेवानांप्रीतिवर्धनं स्तुखस्पर्शकरंय-
स्मादतःशांतिंप्रयच्छमे सकलतिथीनाममादीनामप्ययमेवमंत्रः इत्यूर्णावस्त्रदानं अथकंबलदानं स्कांदे कंबलःपट्टगर्भश्चे-
न्महाशीतविनाशकः सएवविपरीतश्चेन्महावृष्टिविनाशकः संकल्पादि ० श्रीविष्णुप्रीतिकामः मंत्रस्तु शीतवर्षाहरःपुण्योवृष्टी
बलविवर्धनः कंबलस्यप्रदानेनशांतिरस्तुसदाममेति इतिकंबलदानं अथचित्रकंबलदानं भविष्ये संकल्पादि ० लक्ष्मीना-
रायणप्रीतिकामः मंत्रस्तु उर्णापट्टश्चाविकादिःसर्वदेवप्रियःशुचिः चित्रकंबलदानेनममसंतुमनोरथाः इतिचित्रकंबलदानं
अथताम्रपात्रदानं वाराहपुराणे अथातःसंप्रवक्ष्यामिपात्रदानमनुत्तमं कृत्वाताम्रमयंपात्रंयथाविभवविस्तरं तत्पात्रेहे
मीलक्ष्मीनारायणप्रतिमांउमामहेश्वरप्रतिमांचसंपूज्यद्विजमपिप्रपूजयित्वा परापवादपैशून्याभक्ष्यभक्षणादिशरीरोत्थसकल
पापनाशकामोगोत्रायशर्मणेस्तुपूजितायइदंताम्रपात्रंउमामहेश्वरलक्ष्मीनारायणप्रतिमासहितंच तुभ्यमहंसंप्रददेनममेति
मंत्रस्तु परापवादपैशून्यादभक्षस्यचभक्षणात् पापंगात्रोत्थितंताम्रपात्रदानात्प्रणश्यत्विति एवंसंकल्पवाक्यंप्रतिमादिसर्व-
पात्रदानेषुबोध्यं इतिताम्रपात्रदानं अथप्रसंगात्ताम्रदानमपिभविष्ये संकल्पादि ० आरोग्यबलवृद्धिसूर्यप्रीतिकामः मंत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्तुसूर्यप्रीतिकरंताम्रमारोग्यबलवर्धनं तस्माद्स्यप्रदानेनशांतिरस्तुसदाममेति इतिताम्रदानं अथकांस्यपात्रदानं वाराहे संकल्पादि॰
 कामकृतपापनाशकामः मंत्रस्तु यानिपापान्यनेकानिकामाकामकृतानिच कांस्यपात्रप्रदानेन तानिनश्यंतुमेसदेति इतिकांस्य
पात्रदाने अथप्रसंगात्कांस्यदानमपि भविष्ये संकल्पादि॰ ब्रह्मविष्णुशिवप्रीतिकामः मंत्रस्तु कांस्येब्रह्मशिवौसाक्षा-
त्कांस्यमेतद्विभावसुः कांस्यंविष्णुमयंयस्मादतःशांतिंप्रयच्छमे इतिकांस्यदान अथलोहपात्रदानं भविष्ये संक
ल्पादि॰ लोभाज्ज्ञानाज्ञानकृतपापक्षयकामः मंत्रस्तु ज्ञानाज्ज्ञानकृतंपापंमयालोभात्कृतंचिरात् लोहपात्रप्रदानेनममशीघ्रं
व्यपोहतु इतिलोहपात्रदानं अथरौप्यपात्रदानंविष्णुधर्मे संकल्पादि॰ कन्यादूषणपरदाराभिमर्शनादिपापक्षयकामः मंत्र-
स्तु कन्यादूषणतःपापंपरदाराभिमर्शनात् रौप्यपात्रप्रदानेनतानिनश्यंतुमेसदेति इतिरौप्यपात्रदानं अथसुवर्णपा-
त्रदानं वाराहे संकल्पादि॰ जन्मांतरसहस्रोत्थदुष्कृतनाशकामः मंत्रस्तु जन्मांतरसहस्रेषुयत्कृतंदुष्कृतंमया तत्स
र्वंनाशमायातुस्वर्णपात्रप्रदानतइति इतिसुवर्णपात्रदानं अथस्थालीदानं भविष्ये कृत्वाताम्रमयींस्थालींपलानांपं
चभिःशतैः अशक्तस्तुतदर्धेनतदर्धार्धेनवापुनः अत्यशक्तोमृन्मयींपायसेनपूर्णांघृतशर्कराशाकजलपात्रयुतांच-
सवस्त्रांमंडलेसंस्थाप्य गंधमाल्यादिनालंकृत्य आदित्येहनिसंक्रांतौचतुर्दश्यष्टमीषुच एकादश्यांतृतीयायांविप्रायप्र ४२
तिपादयेत् अद्येत्यादि॰ यावज्जीवंसकुटुंबस्ययथेष्टमन्नमक्षय्यभोज्यादिलाभकामः इमांस्थालींपायसपूर्णांघृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शर्कराशाकजलपात्रवस्त्रावृतांमंडलस्थांसालंकृतांगोत्रायशर्मणे तुभ्यमहंसंप्रददे नममेति मंत्रस्क इमांपायसपूर्णांयःस्था
लीघृतजलादिभिः दद्यात्संपत्तिपात्रंस्याद्वतःपाहिमहेश्वरेति स्रुवर्णदक्षिणांदद्यात् इतिस्थालीदानं अथवेदपुस्तकादिदाना-
नि वायवीये अष्टादशपुराणानिसहिरण्यानिपर्वणि लिखित्वायःप्रयच्छेत्तुसविद्यापारगाभवेत् रामायणंभारतंचदत्वास्वर्गेम
हीयते धर्मशास्त्रनरोदत्वास्वर्गलोकेमहीयतइतिभविष्ये धेनुदानसहस्रेणसम्यक्दत्तेनयत्फलं तत्फलंसमवाप्नोतिपुस्तकैकमदानत
इति अथप्रसंगाच्चतुर्दशविद्याउक्तामदनरत्नेनंदिपुराणे विद्याश्चतुर्दशप्रोक्ताःक्रमेणचयथास्थिताः षडंगाश्चतुरोवेदाधर्मशास्त्रंपुरात
नं मीमांसातर्कशास्त्रंच एताविद्याश्चतुर्दश आसामवांतरोत्पन्नाःपराविद्याःसहस्रशइति पुरातनंपुराणं तत्रैवकालमाह चंद्रसूर्योप
रागेवासंक्रांत्ययनवासरे शुभेह्निशुभनक्षत्रेकृत्वामंडलमुत्तमं चतुरस्रवितानंचबध्वापुष्पोपशोभितं तत्रन्यस्यासनंदिव्यंदिव्यगं
धाधिवासितं तत्रसंस्थापयेद्धन्नंनागदंतमयंशुभं संस्थाप्यपुस्तकंतत्रनैगमंभारतादिकं नैगमंवेदपुस्तकं पुण्यंपवित्रंसंपूज्यवस्त्राल
कारभूषणैः पूजयेच्चदिशापालान्लोकपालान्यथाक्रमं कन्याश्रियश्चसंपूज्यामातरःकल्पयेच्चताः शास्त्रतत्त्वविदुषिदद्यात्पुस्तक
मुत्तममिति अथास्यदानप्रयोगः यजमानःकृतनित्यक्रियःशुचिःपुण्यकालेदेशकालौसंकीर्त्य गोसहस्रदानसमफलावाप्तिस्वर्गलोक
महिमत्वचतुर्दशविद्यावेदवेदांगपारगत्वसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं अमुकपुस्तकदानमहंकरिष्ये इतिसंकल्प्यपूर्वोक्तमंडपादिय-
थाशक्त्याकल्पयित्वानागमयंयंत्रेवस्त्रद्वयबद्धंऊर्णापट्टसूत्रवेष्टितंपुस्तकंसंस्थाप्यहेमीसरस्वतिप्रतिमांरौप्यमयसिंहविष्णुचतत्रावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा॰चं॰ ह्यपरितोलोकपालांश्चावाह्य तत्रस्थवासिनीः कुमारीश्चावाह्य यागुंगूर्यासिनीवालीयाराकायासरस्वती इंद्राणीमह्वऊतये वरुणानींस्वस्त
४४ ये इतिमंत्रेणयद्वा देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंति सानोमंद्रेषमूर्जंदुहाना धेनुर्वागस्मानुपसुष्टुतेतु इतिमंत्रेणावाहि
तदेवताःषोडशोपचारैरभ्यर्च्यद्विज हूत्वाथयाविभवंवस्त्रालंकारादिभिःपूजयेत् अद्येत्यादि॰ गोत्रायशर्मणेस्र पूजितायसंकल्पोक्तफ
लसंकाल्यर्थ इदंपुस्तकंप्रतिमायुतंसासिंहंऊर्णापट्टबद्धदृढसूत्रवेष्टितनागमयपंत्रेस्थितं यथाशक्तिसोपस्करंसरस्वतीदेवतंतुभ्यमहंसंप्र
ददेनममेति मंत्रोतु सर्वविद्याश्रयायज्ञाःकरणंलिखिताक्षरं पुस्तकस्यप्रदानेनप्रीणातुममभारती सरस्वतीजगन्मातः शब्दब्रह्मा
धिदैवते अस्याःप्रदानाद्वागीशाप्रसन्नाजन्मजन्मनि ततःस्वर्णदक्षिणांदद्यात् इतिपुस्तकदानं अथरत्नदानं भविष्ये माणि
क्यंपद्मरागंचवैडूर्यंपद्ममेवच मारकतंचगोमेदंपुष्परागंचमौक्तिकं हरितंचनवैतानिरत्नान्युक्तानिसूरिभिरिति रत्नदानाद्धरिर्लक्ष्मीः
स्वपदंचप्रयच्छतोति अद्येत्यादि॰ लक्ष्मीनारायणपदावाप्तिकामः मंत्रस्तु यस्माद्रत्नेषुसर्वेषुसर्वेदेवाव्यवस्थिताः तस्माद्रत्नप्रदाने
नवांछितंफलमश्नुते इतिनवरत्नदानानि मौक्तिकमंत्रस्तु मौक्तिकंभूषणंविष्णोःश्रियोगौर्याशिवस्यच दानेनास्यस्फुरंत्वास्तु ऐहि-
कामुष्मिकंममेति अथप्रवालदानमंत्रस्तु प्रवालंपुष्टिदंश्रीदंकांतिदंशुभदंतथा दानेनास्यमहत्सौख्यंशांतिरस्तुसदाममेति अथ
कर्णभूषणदानमंत्रस्तु भूषणंकर्णयोःस्त्रीणांस्वर्णरत्नादिसंयुतं ताटंकस्यप्रदानेनसौभाग्यवर्धतांममेति अथमांगल्यमणिदानमं-
त्रस्तु मांगल्यमणयोलक्ष्म्यागौर्याःप्रीतिकराःसदा तस्मादेषांप्रदानेनशांतिरस्तुसदाममेति हरिद्रामंत्रस्तु गौर्याःप्रीतिकरानित्यंहरि ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रासर्वकामदा तस्मादस्याःप्रदानेनसौभाग्यंजन्मजन्मनीति कुंकुमदानमंत्रस्तु कुंकुमंशोभनंरम्यंसर्वदामंगलप्रदं दानेनास्यमह-
त्सौख्यंसौभाग्यंस्यात्सदाममेति सिंदूरदानमंत्रस्तु सिंदूरंशोभनंरम्यंगणेशस्यप्रियंपरं दानेनास्यपरालक्ष्मीःस्थिरामेचा
स्तुसंततिरिति कस्तूरीदानमंत्रस्तु कस्तूरीभाग्यदाप्रव्यादेवमर्त्यजनप्रिया दानेनास्याःसुखंभोगःशांतिरस्तुसदा-
ममेति कर्पूरदानमंत्रस्तु कर्पूरंशीतलंचारुदेवर्षिगुरुसेवितं तस्मादस्यप्रदानेनलक्ष्मीस्तिष्ठतुमद्गृहे तथा कर्पूरंरुचि-
रंविप्रगृहाणेमंस्तुपूजितं पुण्यगंधस्थितासामेकमलाप्रीयतामिति नानासुगंधद्रव्यदानमंत्रस्तु गंधोमनोहरोदिव्यःशां-
तिदःसुखदस्तथा तस्मादस्यप्रदानेनसुगंधःस्यात्सदाममेति इतिभविष्यपुराणोक्तनानाद्रव्यदानमंत्राः अथदेवगलंतिकादा
नंभविष्यपुराणे वसंतसमयंज्ञात्वागत्वादेवालयंशुभं शिवस्यविष्णोरर्कस्यइष्टदेवस्यवापुनः स्रवंतंकारयेत्कुंभंसच्छिद्रंदे
वमस्तके दिवारात्रौस्रवेद्देवंजलंमासचतुष्टयं स्रवत्तद्बिंदुसंख्याकान्स्वर्गलोकेमहीयते अत्रप्रयोगस्तु वसंतेशुभदिनेस्थीरल-
ग्नादौकृतनित्यक्रियः आचम्यप्राणानायम्य अद्येत्यादि० देवशिरसिस्रवज्जलबिंदुसमसंख्याकाब्दशिवपुरादिनिवासकामो
मासचतुष्टयंदिवारात्रौतदेवगलंतिकादानंकरिष्ये इतिसंकल्प्य प्रासादंसम्यक्प्रक्षाल्यदेवंपंचामृताद्युपचारैरभ्यर्च्यदेवगलंतिकांब
ध्नीयात् मंत्रस्तुस्कांदे ॐनमःशंकरःशंभुर्भवोधातासिवोहरः प्रीयतांमेमहारुद्रोजलसेकप्रदानतइति एवंमासचतुष्टयंदेवगलं
तिकादानंकृत्वाअंतेप्येवंपंचामृतादिपूजांकृत्वायथाशक्तिब्राह्मणान्भोजयित्वातेभ्योदक्षिणांदद्यादिति त्रयाणामपिजीवाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुदकंजीवनंस्मृतं पवित्रममृतंयस्मात्तद्देयंपुण्यमिच्छतेति इतिस्कांदोक्तं देवेगलंतिकादानं अथप्रपादानं भविष्ये अतीतेफा
ल्गुनेमासिप्राप्तेचैत्रेमहोत्सवे पुण्येह्निविप्रकथितेमंडपंकारयेत्ततइति पुरमध्येचतुष्पथेजलरहितमार्गेवृक्षमूलेप्रपामंडपंका
रयित्वातन्मध्येसुगंधकान्जलकुंभान्संस्थाप्यप्रपापालकंबुद्धिपुत्रंसंस्थाप्यप्रार्थयेत् प्रपेयंसर्वसामान्याभूतेभ्यःप्रतिपादि-
ता अस्याःप्रदानात्सकलाममसंतुमनोरथाइति ततोनिवारितंदेयंतोयंमासचतुष्टयं त्रिपक्षंवामहाराजजीवानांजीवनंपरं
प्रत्यहंकारयेत्तस्याभोजयेच्छक्तितोद्विजान् अनेननविधिनायस्तुग्रीष्मेतापप्रणाशनं पानीयमुत्तमंदद्यात्तस्यपुण्यफलंशृणु क
पिलाशतदानस्यसम्यग्दत्तस्ययत्फलं तत्फलंसमवाप्नोतिसर्वदेवैःसुपूजितइति इतिप्रपादानं अथहेमंतिकेग्निदानं भविष्ये
अग्निहेमंतशिशिरऋतौतीर्थेसुरालये मठेदेवालयेचैवअग्निप्रज्वालयेत्तुयः षष्टिवर्षसहस्राणिस्वर्गलोकेमहीयतइति
तथाप्रज्वालयेद्वह्निंसेवनार्थंद्विजन्मनां दातव्योदीपकोखंडोदेवमुद्दिश्यमाधवमिति माधवोक्तेश्च इतिहेमंतशिशिरऋ
तावग्निदानं अथदीपदानं संवर्तः देवागारेद्विजागारेदीपंदत्वाचतुष्पथे मेधावीज्ञानसंपन्नश्चक्षुष्मांश्चसदाभवेदिति त
थोत्तरायणेदीपदानमितिप्रशस्तं मंत्रस्तु दीपोदानप्रदोनित्यंदेवतानांप्रियःसदा दानेनास्यभवेत्सौख्यंशांतिर्मेवांछितंफलं स
ज्योतिस्तैलपात्रंचदीपंबाहुसमुन्नतं सुखंस्यादस्यदानेनशांतिरस्तुसदाममेति इतिदीपदानं अथपांथपरिचर्या भविष्ये
पांथपरिचरेद्यस्तुशयनासनभोजनैः सस्वल्पेनप्रयासेनजयतिक्रतुयाजिनमिति तथा अप्रणोद्योतिथिःसायमपिवा ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा भूतृणोदकैरिति याज्ञवल्क्यः प्रचेता अपि यतः प्रान्तैर्वैश्वदेवांते सायं वा गृहमागतः देववत्पूजनीयोसौ सूर्योढः सोतिथिः स्मृ
तइति तथा दिवातिथौ तु विमुखे गते यत्पातकं नृणां तदेवाष्टगुणं पुंसां सूर्योढे विमुखे गते तस्मात्स्वशक्त्या राजेंद्र सूर्योढमतिथिं
नरः पूजयेत्पूजिते तस्मिन्पूजिताः सर्वदेवता इति इति पांथपरिचर्या अथ गोपरिचर्या विष्णुः गवां कंडूयनं चैव सर्वकल्मष
नाशनं गवां ग्रासप्रदानेन स्वर्गलोके महीयत इति ग्रासप्रदानमंत्रस्तु पराशरे सुरभिस्त्वं जगन्मातर्नित्यं विष्णुपदे स्थिता सर्वदे
वमये ग्रासं मया दत्तमिमं ग्रस प्रार्थनामंत्रस्तु ततः सर्वदेवमये देवि सर्वदेवैरलंकृते मातर्ममाभिलषितं सफलं कुरु नंदिनीति प्रा
र्थयेत् इति गोपरिचर्या अथ धर्मघटदानं विष्णुः शीतलेन सुगंधेन वारिणा पूरितं घटं शुक्लचंदनलिप्तांगं पुष्पदामोप
शोभितं दध्योदनभृतं कुर्याच्छरावं तस्य चोपरि उपानच्छत्रसंयुक्तं धर्माख्यं कल्पयेत् घटं पुष्पाक्षतान्गृहीत्वा तु इमं मंत्रमुदीर
येत् नमोस्तु विष्णुरूपाय नमः सागरसंभव अपां पूर्णोद्धरास्मात्त्वं दुःखसंसारसागरादिति प्रार्थनामंत्रस्तु उदकुंभो मया दत्तो
ग्रीष्मकाले दिने दिने शीतोदकप्रदानेन प्रीयतां मधुसूदन इति भविष्ये प्रत्यहं धर्मघटको वस्त्रसंवेष्टितो नवः ब्राह्मणस्य गृहे
देयः शीतामलजलः शुचिः वसंतग्रीष्मयोर्मध्ये पानीयं यः प्रयच्छति पलेपले सुवर्णस्य फलमाप्नोति मानवः मार्गशीर्षात्समार
भ्य उदकुंभं तु यः क्षिपेत् दिने दिने सहस्रस्य गवां दानफलं लभेत् इति उद्यापनं तु मासि मासि कार्यं भविष्ये मंडकावेष्टिकाभिश्च प-
क्वान्नैः सार्वकामिकैः उद्दिश्य शंकरं विष्णुं ब्रह्माणमथवा पितॄन् ततः सतिलं प्रोक्ष्यानेन मंत्रेण दद्यात् एष धर्मघटो दत्तो ब्रह्माविष्णुशिवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः अस्यप्रदानात्सकलाममसंतुमनोरथाइति अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति वसंतग्रीष्मसमयेगोप्रदानफलंलभेदिति इति-
धर्मघटदानं कलशदानमंत्रस्तु कलशशुभदोभव्योजलेनपरिपूरितः दानेनास्यमहत्सौख्यंशांतिरस्तुसदाममेति जलपात्रदानमंत्रोपि
वारिणापूरितंपात्रंतापत्रयहरंशुभं देवर्षिपितृतृप्त्यर्थंगृहाणसुरसत्तमेति अथयज्ञोपवीतदानं बोधायनः यज्ञोपवीतदानेनजायतेब्र
ह्मवर्चसी तस्मात्तानिप्रदेयानिब्राह्मणेभ्योविपश्चितेति इत्युपवीतदानं हेमाद्रौ माघेतिलदानात्पापनाशः सम्यलोकजयकामश्च फा
ल्गुनेप्रियंगुदानाल्लक्ष्मीवान्भवति चैत्रेचित्रवस्त्रदानात्सौभाग्यवान् वैशाखेअपूपदानात्स्वर्गलोकावाप्ति ज्येष्ठेछत्रदानात्सर्वान्कामा-
नवाप्नोति आषाढेचंदनकर्पूरदानात्फलातिशयः श्रावणेवस्त्रदानान्महाफलं भाद्रेफाणितदानात्फलातिशयः फाणितंलोकेकाकवीति
प्रसिद्धा आश्विनेघृतदानेनरूपवान् कार्तिकेदीपान्नदानाच्चानर्घंफलं मार्गशीर्षेलवणदानाद्रूपवान् पौषेस्वर्णदानात्तुष्टिमान् सर्वमास
शुक्लपक्षेषुपुष्पदानान्महालक्ष्मीमवाप्नुयात् कृष्णपक्षेषुफलदानात्फलातिशयः इतिमासपक्षदानानि अथाधिमासेदानं हेमा
द्रौपाद्मे अधिमासेतुसंप्राप्तेगुडसर्पिर्युतानिच चंद्रवद्वर्तुलान्यग्नौहिपिष्टकुलानिच साज्यानिदधिमिश्राणिअधिमासेनृपोत्तम य
त्रस्त्रिंशदपूपानिदातव्यानिदिनेदिने व्यतीपातदिनेयद्वाद्वादश्यामथवानृप पौर्णमास्याममायांवानवम्यांवानृपोत्तम अष्टम्याम
थपंचम्यांकुर्याद्व्रतमनुत्तमं अधिमासेतुसंप्राप्ते त्रयस्त्रिंशत्तुदेवताः उद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत् देवतानाम-
मानितुभविष्ये विष्णुं १ जिष्णुं २ महाविष्णुं ३ हरिं ४ कृष्णं ५ मधोक्षजं ६ केशवं ७ माधवं ८ रामं ९ मच्युतं १० पुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोत्तमं ११ गोविंदं १२ वामनं १३ श्रीशं १४ श्रीकंठं १५ विश्वसाक्षिणं १६ नारायणं १७ मधुरिपुं १८ मनिरुद्धं १९ त्रिविक्रमं २० वासुदेवं २१ जगद्योनिं २२ मनंतं २३ शेषशायिनं २४ संकर्षणंच २५ प्रद्युम्नं २६ दैत्यारिं २७ विश्वतोमुखं २८ जनार्दनं २९ धरावासं ३० दामोदरं ३१ मघार्दनं ३२ श्रीपतिं ३३ चत्रयस्त्रिंशदुद्दिश्यप्रतिनामभिः त्रयस्त्रिंशदपूपानि कांस्य पात्रे निधाय च सघृतंसहिरण्यंच ब्राह्मणाय निवेदयेत् अद्येत्यादि० ममफलावाप्ति विष्ण्वादि श्रीपत्यंता: त्रयस्त्रिंशद्देवताउद्दिश्य श्रीपुरुषोत्तमभास्करप्रीतिकामश्च गोत्राय शर्मणे स्वपूजिताय इदंवायनकं त्रयस्त्रिंशदपूपोपेतं कांस्य पात्रं सुवर्णघृतताम्बूलदक्षिणादिसोपस्करं श्रीविष्णुरूपाय ब्राह्मणाय तुभ्य महं संप्रददे नममेति दद्यात् दानमंत्रस्तु विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः अपूपान्नप्रदानेन ममपापं व्यपोहतु नारायणजगद्वीजभास्करप्रतिरूपक दानेनानेन पुत्रांश्च संपदंचाभिवर्धय यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनः शंखः करतले यस्य समे विष्णुः प्रसीदतु कलाकाष्ठादिरूपेण निमेषघटिकादिना योवंचयति भूतानि तस्मै कालात्मने नमः कुरुक्षेत्रमयं देशः सूर्यपर्वा द्विजो हरिः पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम मलानां च विशुद्ध्यर्थं पापप्रशमनाय च पुत्रपौत्राभिवृद्ध्यर्थं प्रदत्तं तव भास्कर मंत्रैरेतैश्च योदद्यात्त्रयस्त्रिंशदपूपकान् प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादि संपदमित्युक्तं महाभारते एतन्मलमासव्रतं तुदानरूपं सर्वेषां नित्यं मलमासं यदा प्राप्य संध्योपासन तर्पणं श्राद्धादिनियमं जाप्यं निष्फलं तद्व्रतं विनेति भविष्ये ऽकरणे प्रत्यवायोक्तेश्च इत्यधिमासे दानरूपव्रतं अथ प्रातर्नित्यघृतपात्रछायादानं भविष्ये कांस्यपात्रे स्थिताज्यंच आत्मरूपंनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीक्ष्यतु सस्रुवर्णंतुयोदद्यात्सर्वविघ्नोपशांतये अद्येत्यादि॰ममैतच्छरीरावच्छिन्नसमस्तपापक्षयसर्वग्रहपीडाशांतिशरीरोत्थार्तिनाशकामः
प्रसादवांछायुरारोग्यादिसर्वसौभाग्यकामः सौख्यकामोऽमुकगोत्रायशर्मणे इदंस्वदेहछायावीक्षिताज्यपूरितकांस्यपात्रंससुवर्णंविष्णु
दैवतंतुभ्यमहंसंप्रददेनममेति मंत्रोऽतु याऽलक्ष्मीर्यच्चमेदौस्थ्यंसर्वांगसमुपस्थितं तत्सर्वंनाशयाज्यत्वंश्रियमायुश्चवर्धय
आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंपरं आज्यंसुराणामाहारःसर्वमाज्येप्रतिष्ठितं आज्यपात्रप्रदानेनशांतिरस्तुसदाममेति
इतिनित्यछायादानं अथसंक्रांतिदानं विश्वामित्रः मेषसंक्रमणेभानोर्मेषदानंमहाफलं वृषसंक्रमणेदानंगवांप्रोक्तंतथैवच वस्त्रा
न्नदानपानानि मिथुनेविहितानितु घृतधेनुप्रदानंतुकर्कटेचविशिष्यते सिंहेचविहितंपात्रंदद्याद्धेमसस्रुवर्णकं कन्याप्रवेशेव
स्त्राणांसुरभीणांतथैवच तुलाप्रवेशेधान्यानांबहुबीजफलान्यपि कीटप्रवेशेवस्त्राणांवेश्मनांदानमेवच कीटोवृश्चिकः ध
नुःप्रवेशेवस्त्राणांयानानांदानमुच्यते झषप्रवेशेदारूणांदानमग्नेस्तथैवच झषोमकरः कुंभप्रवेशेदानंतुगवामंबुतृणस्य
च मीनप्रवेशेऽप्यम्लानमालानामपिचोत्तमं दानान्यथैतानिमयाद्विजेंद्रप्रोक्तानिकालेतुनरश्चदत्वा प्राप्नोतिकामंमनसिस्व
भीष्टंतस्मात्प्रशंसंतिहिकालदानमिति अन्नकालःसमयः इतिसंक्रांतिदानानि अथनानाधान्यदानमंत्राः हेमा॰
द्रौदानकांडे देयंतद्योजयेत्पूर्वंततोवप्रंप्रपूजयेत् तत्तन्मंत्रैः प्रदद्याद्वैसर्वदानेष्वयंविधिरिति तत्रादौतंडुलदानमं
त्रः पावनाःसर्वयज्ञेषुप्रशस्ताहोमकर्मणि तंडुलानांप्रदानेनप्रीयतामग्निदेवता तथा व्रीहिजातंडुलाःशुद्धाःपि ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृदेवद्विजप्रियाः तस्मादेषांप्रदानेन सर्वकामाश्चमेसदा व्रीहिदानमंत्रस्तु ब्रह्मणानिर्मिताःपूर्वंव्रीहयोयज्ञसाधनाः अ-
नेनव्रीहिदानेनममसंतुमनोरथाइति यवदानमंत्रस्तु धान्यराजाश्चमांगल्येद्विजप्रीतिकरायवाः तस्मादेषांप्रदानेन ममा
नस्त्वभिमतंफलं तथा पूर्वमेवहियज्ञार्थंनिर्मिताब्रह्मणायवाः अनेनयवदानेनशांतिरस्तुसदाममेति गोधूमदानमं
त्रस्तु धान्यंचूडामणेर्जंबूद्वीपगोधूमसंभवः गंधर्वसोरव्यतृप्तिःस्यादतःशांतिंप्रयच्छमे मुद्गदानमंत्रस्तु मुद्गधान्यंप्रियंचै
वमनुष्याणांचनित्यशः तस्मादेषांप्रदानेनशांतिःस्वस्त्ययनंममेति माषदानमंत्रस्तु यस्मान्मधुवधेकालेविष्णुदेहसमुद्भवाः
पितृणांतृप्तिदामाषाअतःशांतिंप्रयच्छमे चणकदानमंत्रस्तु पुरागोवर्धनोद्धारसमयेकृष्णभक्षिताः चणकाःसर्वपापघ्नाअतःशांति-
प्रयच्छमे कुलित्थदानमंत्रस्तु अग्निगर्भोद्भवाःसौम्याः बलारोग्ययशप्रदाः कुलित्थानांप्रदानेनशांतिरस्तुसदाममेति तिलदानमंत्रस्तु तिलाः
पापहरानित्यंविष्णुदेहसमुद्भवाः तस्मादेषांप्रदानेनपापनाशनमुच्यतेइति स्वर्णतिलदानमंत्रस्तु तिलाःस्वर्णसयादेवदुरितक्षयकार
काःविष्णुप्रीतिकरानित्यमतःशांतिंप्रयच्छमे अथसामान्यतःसर्वधान्यमंत्रस्तु धान्यंकरोतिदातारमिहलोकेपरत्रच तस्मादस्यप्रदाने
नममसंतुमनोरथाइति सस्वर्णतिलपात्रदानमंत्रस्तु तिलाःपुण्याःपवित्राश्चसर्वपापहराःशुभाः शुक्लाश्चैवतथाकृष्णाविष्णुगात्रसमुद्भ
वाः यानिकानिचपापानिब्रह्महत्यासमानिच तिलपात्रप्रदानेनतानिनश्यंतुमेसदेति निष्पावदानमंत्रस्तु निष्पावानिर्मिताःपूर्वंलोकानांहि
तकाम्यया तस्मादेषांप्रदानेनममपापंव्यपोहत्विति प्रियंगुदानमंत्रस्तु प्रियंगवःप्रियायस्मादग्नेश्च हव्यसाधनाः तस्मादेषांप्रदानेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रीणातिपुरुषोत्तमइति श्यामाकदानमंत्रस्तु श्यामाकास्तुसदापुण्याः पवित्रायज्ञसाधनाः अतस्तेषांप्रदानेनपावकोवरदःसदेति कोद्र
वदानमंत्रस्तु कोद्रवानिर्मितादेवैः प्राणिनांजीवनायवै तस्मादेषांप्रदानेनप्रीणातुपुरुषोत्तमेति लकदानमंत्रस्तु वातप्रवर्धकालकाबल
दाःपुष्टिकारकाः प्राणिप्रीतिकरानित्यमतःशांतिंप्रयच्छमे यावनालदानमंत्रस्तु यावनालाःप्रीतिकराःकांतिपुष्टिबलप्रदाः तस्मादेषांप्र-
दानेनतस्यपूर्णंगृहंममेति अथमसूरिकादानमं॰ सवल्कलामसूरास्तुदुरितक्षयकारकाः तस्मादेषांप्रदानेनविष्णुःप्रीतिकारोममेति
सामान्यधान्यमंत्रस्त्वत्रबोध्यः इतिहेमाद्रौनानाधान्यमंत्राः अथान्नदानमंत्राअपितत्रैव आदौपायसदानमंत्रस्तु पायसंशर्क-
रायुक्तंसघृतंकांस्यभाजने प्रदानान्मेफलंचास्तुऐहिकामुष्मिकंचयदिति कमंडलदानमंत्रस्तु सूर्यमंडलसंभूतागव्यदुग्धयुताः
प्रियाः जनार्दनादिदेवानामतःपाहिसनातनेति ओदनमंत्रस्तु अन्नंब्रह्ममयंसाक्षात्नराणांजीवरक्षणं ओदनस्यप्रदानेनमम
संतुमनोरथाइति दध्यन्नदानमंत्रस्तु चंद्रमंडलमध्यस्थंचंद्रांबुदसमप्रभं दध्यन्नंचास्यदानेनप्रीयतांवामनोममेति कृसरान्नदा
नं कृसरान्नंस्वादुवर्यंदेवानांप्रीतिवर्धनं घृतव्यंजनसंयुक्तंदत्वारोगैर्विमुच्यतइति नानाभक्ष्यदानमंत्रस्तु केशवस्यप्रिया-
भक्ष्याःशंभुब्रह्मादितुष्टिदाः पृथग्विधापूपकाद्यायच्छंतुबलमोरसमिति सर्वान्नदानमंत्रस्तु अन्नमेवयतोलक्ष्मीरन्नमे
वजनार्दनः अन्नब्रह्माखिलप्राणमूस्तुमेसर्वजन्मनीति इतिहेमाद्र्युक्तान्नदानमंत्राः अन्येपिकेचनमंत्रास्तत्रत्याएव सक्तुदान
मंत्रस्तु प्राजापत्यायनःप्रोक्ताःसक्तवोयज्ञकर्मणि तस्मादेषांप्रदानेनप्रीयतांमेप्रजापतिरिति शर्करादानमंत्रस्तु अमृतस्यकु ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोत्पन्नाइक्षवोप्यथशर्करा सूर्यप्रीतिकरानित्यमतःशांतिंप्रयच्छमे तथा शर्करेक्षुरसोद्भूतासदास्वादुकराप्रिया दानेनास्यास्तुमेनित्यं
तुष्टास्युर्द्विजदेवताइति गुडदानमंत्रस्तु प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा तथारसानांप्रवरःसदेवेक्षुरसोमतः ममतस्मात्परांशां
तिंददस्वगुडसर्वदेति इक्षुदंडदानमंत्रस्तु इक्षुदंडगुरुतररसालंसर्वकामद दानेनानेनतस्याशुप्रीयतांपरमेश्वरइति मधुदानमंत्रस्तु
यस्मात्पितृणांश्राद्धेषुपीतंमध्वमृतोद्भवं सदातस्यप्रदानेनमोक्षःस्याद्दुःखसागरात् घृतदानमंत्रः कामधेनोःसमुद्भूतंदेवानामुत्तमं
हविः आयुर्विवर्धनंदातु राज्यंपातुसदेवमामिति तैलदानमंत्रः तैलंपुष्टिकरंनित्यमायुर्वृद्ध्यघनाशनं अमांगल्यहरंश्रीमदतःशां
तिंप्रयच्छमेइति नवनीतदानमंत्रस्तु कामधेनोःसमुद्भूतंविष्णोःप्रीतिकरंपरं नवनीतप्रदानेनबलंपुष्टिंचमेच्युतेति तथा क्षी
रार्णवसमुद्भूतंविष्णोस्तुष्टिकरंसदा नवनीतप्रदानेनवांछितंचास्तुमेसदेति क्षीरदानमंत्रः अलक्ष्मीहरणंनित्यंसौभाग्यबलवर्धनं क्षी
रंमंगलमायुष्यमतःशांतिंप्रयच्छमे तथा शिशूनांजीवनंक्षीरंपितृदेवप्रियंसदा कांतिदंपुष्टिदंनित्यमतःशांतिंप्रयच्छमेइति दधिदानमंत्रः
क्षीरेणाम्लसमुद्भूतंदेवर्षिपितृतृप्तिदं दधिस्यान्मेमृतंनित्यमतःशांतिंप्रयच्छमेइति तक्रदानमंत्रः तक्रंदधिसमुद्भूतंप्राणिनांतृप्तिदंप
र अतस्तस्यप्रदानेनशांतिरस्तुसदाममेति पुष्पदानमंत्रः मनोहराणिपुष्पाणिसदादेवप्रियाणिच अतस्तेषांप्रदानेनममसंतुसुराः
प्रियाइति फलदानमंत्रः मनोहराणिरम्याणिनित्यंस्वादुकराणिच फलानांसंप्रदानेनसंततिस्त्वमलाममेति तथा फलानिमधुराणीहसु
निदेवप्रियाणिच तस्मात्तेषांप्रदानेनसफलामेमनोरथाइति तांबूलदानमंत्रः सोपस्करंचतांबूलंसर्वदामंगलप्रियं प्रियंचैवतुदेवानांसौगंध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदनेस्तु मे इति पादुकादानमंत्रः कंटकोच्छिष्टपाषाणवृश्चिकादिनिवारणे पादुके संप्रदत्ते मे द्विजप्रीत्या प्रगृह्य तामिति उपानद्दानमंत्रः उपानहौ
प्रदत्ते मे कंटकादिनिवारणे सर्वमार्गेषु सुखदे अतः शांतिं प्रयच्छ मे छत्रदानमंत्रः इहामुत्रातपत्राणं कुरु मे केशव प्रभो छत्रं त्वत्प्रीतये दत्तं ममास्तु च
सदा शुभमिति चामरदानमंत्रः शशांककरसंकाश हिमडिंडिरपांडुर प्रोत्सारयाशु दुरितं चामरामरवल्लभेति पत्रिकादानमंत्रः पत्रिका सर्वजंतू-
नां शैत्यानंदकरी शुभा देवेंद्रप्रीतये दत्ता अतः शांतिं प्रयच्छ मे इति व्यजनदानमंत्रः व्यजनं वायुदैवत्यं ग्रीष्मकाले सुखप्रदं अस्य प्रदाना-
त्सकला मम संतु मनोरथा इति दर्पणदानमंत्रः दर्शनेन त्वमादर्श नृणां मंगलदायकः सर्वसौभाग्यसत्कीर्तिं निर्मलं ज्ञानमस्तु मे अथ कूष्मां
डदानं भविष्ये ब्रह्महत्यादिपापघ्नं कूष्मांडं सुखसौख्यदं कार्तिके रथसप्तम्यां दद्यात्पुण्यदिनेष्वपीति अद्येत्यादि मम ब्रह्महननादिस-
मस्तपापक्षयपूर्वकबहुपुत्रपौत्रसौभाग्यादिसकलमनोरथावाप्तिकूष्मांडबीजसमसहस्रसंख्याकाब्दब्रह्मलोकनिवासकामो गोत्राय
शर्मणे सुपूजिताय इदं कूष्मांडफलं बहुबीजाढ्यं घृतप्लुतं तिललिप्तं मुक्ताप्रवालरत्नहेमफलतांबूलवस्त्रादियुतं गोधूमराशिस्थितं व-
नस्पतिदैवतं सवर्णदक्षिणायुतं तुभ्यमहं संप्रददे न मम इति द्विजहस्ते फलं दद्यात् दानमंत्रस्तत्रैव ब्रह्महत्यादिपापघ्नं ब्रह्मणा नि
र्मितं पुरा कूष्मांडं बहुबीजाढ्यं पुत्रपौत्रादिवृद्धिदं मुक्ताप्रवालहेमादियुक्तं दत्तं तव द्विज अनंतपुण्यफलद मतः शांतिं प्रयच्छ मे
इति कूष्मांडदानं अथ देशविशेषेण मकरसंक्रांतौ सौभाग्यवतीनां दानविशेष उक्तो हेमाद्रौ व्यासेन सौभाग्यद्रव्यदानं च स्त्री- ४९
भिः कार्यं प्रयत्नतः सभर्तृकाभिः संक्रांतौ फलादीनां मृगे रवौ दानं षोडशसंख्याकमेकैकस्य फलस्य च हेमराजतकांस्यानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाजनानियथाभवेत् वर्धितफलदानमंत्रः सतिलंगुडसंयुक्तं रसप्रीतिकरंनृणां वर्धितंसंगृहाणेदमतःशांतिंप्रयच्छमेति सतिलगुड
पिष्टग्रासदानमंत्रः मकरेर्केतुसंप्राप्तेग्रासस्तिलगुडोद्विजे दानेनपुत्रसौभाग्यंधनधान्यंसदास्तुमे भांडदानमंत्रः हिरण्यादी
नि भांडानिपात्राणिमृन्मयानिच गृहाणेमानिवैयस्माद्भास्करःप्रीयतांमम· गोधूमपिष्टदानमंत्रः गोधूमजनितंपिष्टंशर्करा घृतसंयु
तं द्विजवर्यगृहाणत्वमतःशांतिंप्रयच्छमे शूर्पस्थाईतंदुलदानमंत्राः तंदुलाःशालिजाःशुक्लाःसार्द्राःशूर्पव्यवस्थिताः संप्रदानेन-
वैतेषांशांतिरस्तुसदामम पायसपूरितकांस्यपात्रदानमंत्रः सौभाग्यभाजनकांस्यंपायसान्नेनपूरितं दानेनानेनसौभाग्यंशां-
तिरस्तुसदाममेति फलपुष्पसहितकदलीस्तंभदानमंत्रः कदलीसर्वदोषघ्नी हेमवर्णावरावृता दानेनास्याःपुत्रपौत्रसौभाग्यंचा
स्तुमेसदेति सौभाग्यद्रव्ययुतशूर्पदानमंत्रः सकंचुकंवस्त्रयुग्मैस्तथाकर्णावतंसकैः कंठसूत्रादिशूर्पस्यदानात्पातुशिवामम जान-
कीप्रीतयेशूर्पपंचकदानमंत्रः रामपत्निमहाभागेसौभाग्यद्रव्यसंस्थिते गृहाणेमानिशूर्पाणिसोपस्कराणिजानकि सौभाग्यंभाग्य
मारोग्यंसुतसौख्यंसदास्तुमेइति अथषोडशविप्रेभ्यःसांगषोडशषोडशफलदानानि भविष्यपुराणे दानंषोडशसंख्याकमेकैक
स्यफलस्यतु एवंषोडशविप्रेभ्योदत्वांसिनमवाप्नुयादिति अद्येत्यादि॰ममसमस्तपापक्षयपूर्वकसकलसौभाग्यस्त्रीपुत्रपौत्रादाप्सित्ता
ऽनंतफलावाप्तयेदीयमानफलसमसंख्यवर्षसहस्रावच्छिन्नदेवांगनाभिःसह[illegible]त्तराानेकसुखावाप्तिकामश्च नानानामगोत्रेभ्यो
षोडशसंख्याकेभ्यःसुपूजितेभ्यःइमानिषोडशसंख्याकान्यमुकफलान्येकैकस्मैसगोधूमतांबूलफलदक्षिणायुतानिवनस्पतिदैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानिदातुमहस्तुत्सृजेनममेतिदत्वाप्रणमेदिति दानमंत्रः फलैःषोडशसंयुक्तंस्वर्णधान्यादिसंयुतं द्विजवर्यगृहाणत्वंममसंतुमनोरथाइति
इतिषोडशिकाफलदानं अथव्यतीपातेस्वर्णदानमाह हेमाद्रौ शंकुकर्णप्रलंबोष्ठलंबभ्रूदीर्घनासिक अष्टनेत्रचतुर्वक्त्रविस्तीर्ण
शतयोजन व्यतीपातनमस्तेस्तुसोमसूर्यस्तनप्रभो यत्किंचिद्दीयतेस्वर्णमेरुतुल्यंतु तद्भवेदिति अद्येत्यादि॰ ममसमस्तपापक्षय
पूर्वकहेममयहिमाचलदानसमफलावाप्त्यक्षय्यस्वर्गश्रीसूर्यजनार्दनप्रीतिकाममश्व गोत्रायशर्मणेसूपूजितायेदंस्वर्णअग्निदै-
वतंसदक्षिणंतुभ्यमहंसंप्रददेनममेति दानमंत्रः गुंजामात्रमिदंस्वल्पंहेमविप्रकरेर्पितं हिमाचलमितंभूत्वाप्रीयतांमेजनार्दन-
इति हिरण्यगर्भगर्भस्थमितिवा इतिव्यतीपातेस्वर्णदानमंत्रः अथाश्वत्थसेवनंभविष्यपुराणे उदकुंभप्रदानेतुअशक्तोयः
पुमान्भवेत् तेनाश्वत्थतरोर्मूलंसेव्यंनित्यंजितात्मना सर्वपापप्रशमनंसर्वदुःखविनाशनं सर्वरोगापहंनित्यंध्रुवंसंततिवर्धनं सेच
नमंत्रः सिंचामितेश्वत्थमूलंममसंततिवृद्धये अश्वत्थरूपीभगवान्प्रीयतांमेजनार्दनः अनेनमंत्रवर्येणसिंचेदश्वत्थमूलकं नमस्कुर्या
ततःसम्यक्प्रार्थयेच्चपुनःपुनरिति सेचनफलमपितत्रैव यःकरोतितरोर्मूलेसेकंमासचतुष्टये मनोरथास्तस्यसिध्यंति श्रुतिरेषासनातनी
मासचतुष्टयेचैवादौ वैशाख धर्मेपि अश्वत्थमूलमासिंचेत्तोयेनबहुनासदा कुलानामयुतंतेनतारितंस्यान्नसंशयइति इत्यश्वत्थसेचनं
अथाथर्वणीयेअश्वत्थाभिमंत्रणं आरात्तेइत्यस्याग्निकांडोतोयोनिस्त्वनग्निऋषिः वनस्पतिर्देवता अनुष्टुप्छंदः अश्वत्थाभिमंत्रणेविनियोगः -
ॐ आरात्तेअग्निरस्त्वाशत्परशरस्तते निर्वातेलाभिवर्षंतुस्वस्तितेस्तुवनस्पतेइति तेकारस्थानेमेकारःस्वयंवक्तव्यःपौराणमंत्रस्तु अक्षिस्पंदंभुज- ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पंदंदुःस्वप्नंदुर्विचिंतितं शत्रुनश्चसमुत्पन्नमश्वत्थशमयस्व मे पुराणांतरेमंत्रांतरमुक्तं मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे अग्रतःशि
वरूपायअश्वत्थायनमोनमः इति अश्वत्थस्पर्शंतुमंदवासरएवकुर्यात् अन्यवासरेषुअर्चनंसेचनंसेवनंचदूरतएवकुर्यादित्युक्तंपाद्मे इ
त्यश्वत्थसेचनविधिः अथसूर्यादीनांवैषम्येदानान्युक्तानिज्योतिःसारे कौसुंभवस्त्रंगुडहेमताम्रंमाणिक्यगोधूमसुवर्णपद्मं सवत्सगोदान
मितिप्रणीतंदुष्टायसूर्यायमसूरिकाश्चेति १ घृतकलशंसितवस्त्रंदधिशंखमौक्तिकंसुवर्णंच रजतंचप्रदद्याच्चंद्रारिष्टोपशांतयेत्वरितं इतिचंद्रे २ प्र
वालगोधूममसूरिकाश्चवृषसताम्रंकरवीरपुष्प आरक्तवस्त्रंगुडहेमताम्रंदुष्टायभौमायचरक्तचंदनं इतिभौमे ३ नीलवस्त्रंमुद्गंहेमंबुधायरत्नं
पाचीदासिकांहेमसर्पिः कांस्यंदंतंकुंजरस्याथमेषोरौप्यंसस्यंपुष्पजात्यादिकंच इतिबुधे ४ अश्वःसुवर्णंमधुपीतवस्त्रंसपीतधान्यंलवणंसपु
ष्पं सशर्करंतद्रजनीप्रयुक्तंदुष्टायशांत्यैगुरवेप्रणीतं इतिगुरौ ५ चित्रवस्त्रमपिदानवार्चितेदुष्टगेमुनिवरैःप्रणोदितं तंडुं घृतसुवर्णरौप्यकं
वज्रकर्पूरमलोधवलागौः इतिशुक्रे ६ नीलकंमहिषंवस्त्रंकृष्णलोहंसदक्षिणं विश्वामित्र्यायुतंदद्याच्छनिदोषप्र[illegible]लये इतिशनौ ७
राहोर्दानंकृष्णमेषोगोमेदोलोहकंबलो सुवर्णनागरूपंचसतिलंताम्रभाजनं इतिराहौ ८ केतोर्वैदूर्यममलंतैलंमृगमदस्तथा ऊर्णा-
तिलैरुक्तसंयुक्तंदद्यात्केशापनुत्तये इतिकेतौ ९ इतिनवग्रहाणांदानेद्रव्याण्युक्तानि अथग्रहाणांदानानि ब्राह्मे ग्रहदानक्रमंवक्ष्ये
सर्वसिद्धिकरंपरं सर्वशांतिकरंनृणांसर्वपापप्रणाशनमिति दानकालमपितत्रैव अयनेविषुवेचंद्रसूर्योपरागेजन्मर्क्षेभानुवास
रे पंचदश्यांप्रातिकूल्येपुण्यकालेपुण्यदेशेविवाहादौनदानंकार्यं तत्रायंप्रकारः हस्तमात्रांद्विहस्तांवावेदींकृत्वागोमयेनोपलिप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र सर्वतोभद्रं पंचरंगैर्विलिख्य वस्त्रं तत्र प्रसार्य तंदुलैस्तु नवकोष्ठात्मकं पद्मं कृत्वा कोष्ठेषु तंदुलैः पद्मानि कृत्वा तेषु निक्षिप्य येणयथाशक्त्या वा
स्वर्णप्रतिमा आदित्यादिनवग्रहाणां कृत्वा ऽ दौ आदित्यं मध्यमेकोष्ठे आग्नेयेचंद्रं दक्षिणे भौमं मीशान्यां बुधमुत्तरे गुरुं पूर्वे शुक्रं पश्चिमेशनै
श्चरं नैर्ऋत्ये राहुं वायव्ये केतुं तत्तन्मंत्रैस्तत्तत्पुष्पैस्तत्तद्गंधधूपदीपनैवेद्यादिभिः संपूज्य प्रार्थयेत् प्रार्थनामंत्राः पद्मासनः पद्मकरो द्वि
बाहुः पद्मद्युतिः सप्ततुरंगवाहः दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः १ श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंड-
करो द्विबाहुः चंद्रो ऽमृतात्मा वरदः किरीटी श्रेयांसि मह्यं विदधातु देवः २ रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगतो गदाभृत् धा-
रासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ३ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी चर्मासिधृक्सोम
सुतः सदा मे सिंहाधिरूढो वरदो बुधश्च ४ पीतांबरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः दधाति दंडं च कमंडलुं च तथाक्षसूत्रं
वरदो ऽस्तु मह्यं ५ श्वेतांबरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः तथाक्षसूत्रं च कमंडलुं च दंडं च बिभ्रद्वरदो ऽस्तु मह्यं ६
नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्यं वरमंदगामी ७ नीलांबरो
नीलवपुः किरीटी करालवक्त्रः करवालशूली चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदो ऽस्तु मह्यं ८ धूम्रो द्विबाहुर्वरदो गदाभृत्
गृध्रासनस्थो विकृताननश्च किरीटकेयूरविभूषितांबरः सदास्तु मे केतुगणः प्रशांतः इति संप्रार्थ्य दद्यात् ९ इति प्रार्थनामंत्रा दा ५१
नमंत्राश्च अथ वासरदोषापनोदानानि संहिताप्रदीपे भानुस्ताबूलदानादपहरति नृणां वैकृतं वासरोत्थं सोमः श्रीखंडदानाद्वनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कनभवंरक्तपुष्पप्रदानात् सौम्यः शक्रस्यमंत्री हरिहरनमना द्भार्गवः शुभ्रवस्त्रात्तैलस्नानालभाते दिनकरतनयो ब्रह्मनत्या परेचेति
१ इतिवारदोषापनोदनानि अथसहस्रभोजनविधिः भविष्यपुराणे सहस्रभोजनस्येह विधिंनारायणोमुनिः सर्वेषांचैवपुण्यानाम
ब्रवीत्पुण्यमुत्तमं यदाचित्तंचवित्तंचवित्तंचभक्तिरात्मनिजायते तदानीमेवकर्तव्यंप्रीतयेपरमात्मनः आषाढंचैवपौषंचमलमासंतथै
वच गुरुभार्गवयोरस्तंहित्वान्यस्मिन् शुभेदिने कृत्वादौमंगलस्नानंशुद्धः सन् भार्ययासह कृत्वादौद्रव्यशुध्यर्थंप्रायश्चित्तंयथावि
धि दशांशद्रव्यमादायविप्रेभ्योविनिवेदयेत् द्रव्यंसंप्रोक्षयेत्पश्चात्संपादिततदाज्ञया गणेशंपूजयेत्पूर्वंमातृणांपूजनंततः कृत्वाभ्युदयि
कंश्राद्धंस्वस्तिवाचनपूर्वकं आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः ऋत्विजोवरयेदष्टौवस्त्रगंधैश्चपूजयेत् पुष्पमंडपिकांकृत्वाचतुर
स्त्रांसुशोभनां कृत्वेशस्यसुवर्णेनप्रतिमांकर्षसंमितां सशक्तिकस्यदेवस्यभवानीशंकरस्यच तस्याधिदेवताविष्णुर्ब्रह्माप्रत्यधिदे
वता कृत्वातुप्रतिमाशुद्धिमग्न्युत्तारणपूर्वकं षोडशैरुपचारैश्चतत्तन्मंत्रैः प्रपूजयेत् ऋग्भिश्चपावमानीभिरभिषिच्ययथाविधि पुष्पमं
डपिकामध्येस्थापनंतंडुलोपरि प्रतिमांतत्रसंस्थाप्यकलशेचांबरावृते समंताद्देवदेवस्यक्रमेणैवतुपूर्वतः तत्तन्मंत्रेणनाम्नावापूजयेदंगदेव
ताः कर्णिकायांभवानीशोह्यधिप्रत्यधिसंयुतः तद्बहिश्चैवचत्वारस्तद्बहिः षोडशक्रमात् एकत्रिंशद्बहिश्चाष्टचत्वारिंशत्तथाक्रमात् पद्म
स्यदलवच्छस्ताः कर्णिकाशतसंग्रहाः दिग्देवा१० ऋषयः सप्त७ सागरा४ भुवनत्रयं३ नद्यः सप्त७ गुणा३ श्चैववेदा४ श्चात्मेत्यनुक्रमात् अ
त्रपीठयंत्रदेवतास्थापनप्रयोगंचाह आदौपद्मकर्णिकायांमध्येअधिदेवताविष्णुब्रह्मप्रत्यधिदेवतासहितं भवानीशंकरंस्थापयेत् तद्बहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा·चं·
५२

श्चतुर्दलपद्मेप्रादक्षिण्येनगणेश१दुर्गा२ क्षेत्रपाला३ भयंकरा:४ स्थाप्याः तद्बहिस्तृतीयेषोडशमातरः गौरी१ पद्मा२ शची३ मेधा ४ सावित्री५ विज
या६ जया७ देवसेना८ स्वधा ९ स्वाहा१० मातरो११ लोकमातरः १२ धृतिः १३ पुष्टि १४ स्तथातुष्टि १५ रात्मनः कुलदेवता १६ तद्बहिरेकत्रिंशद्दले वसुरु-
द्रादित्याः अष्टोवसवस्तु ध्रुवो१ ध्वरश्च२ सोमश्च३ आपश्चैव४ वाऽनिलो५ नलः६ प्रत्यूषश्च७ प्रभासश्च८ वसवोऽष्टौप्रकीर्तिताइति एकादशरु
द्रास्तु वीरभद्रश्च१ शंभुश्च२ योगीशो३ जैकपात्तथा४ अहिर्बुध्न्यः।५ पिनाकीच६ भुवनाधीश्वरस्तथा७ कपाली८ विट्पतिः ९ स्थाणु१० भर्गाख्यो-
११ रुद्रसंज्ञकाइति द्वादशादित्यास्तु धाता१ र्यमाच२ मित्रश्च३ वरुणो४ शो५ भगस्तथा६ इंद्रो७ विवस्वान्८ पूषाच ९ पर्जन्यो१० दशमस्तथा त्व
ष्टा११ विष्णु १२ रितिप्रोक्ता आदित्याद्वादशक्रमात् पंचमे षट्चत्वारिंशद्दल आदौक्रमेणनवग्रहाः सूर्यः १ सोमो२ महीपुत्रः ३ सोमपुत्रो ४
बृहस्पतिः ५ शुक्रः ६ शनैश्चरो७ राहुः८ केतवश्च ९ नवग्रहाइति दशलोकपालास्तु इंद्रो१ ग्नि२ र्यमो३ निर्ऋति ४ र्वरुणो५ वायु६ रेवच कुबे७
रेशो तथाब्रह्मा९ अनंतो१० दशदिक्पतिरिति सप्तर्षयस्तु कश्यपो१ त्रि२ र्भरद्वाजो३ विश्वामित्रो४ थगौतमः ५ जमदग्नि६ र्वसिष्ठश्च७ सप्तै
तेऋषयःक्रमात् सप्तद्वास्तु पूर्व१ दक्षिण२ पश्चिमो३ त्तरा४ श्चत्वारःसमुद्राइति भुवनत्रयं भूर्लोक१ भुवर्लोक२ स्वर्लोका३ इति सप्तसरित-
श्च गंगाच१ यमुना२ चैव गोदावरी३ सरस्वती४ तापी५ पयोष्णी६ रेवाच७ सप्तनद्योयथाक्रममिति त्रिगुणास्तु सत्वं१ रज२ स्तमो३ गु
णाइति चत्वारोवेदास्तु ऋग्वेदो१ थयजुर्वेदः२ सामवेदो३ ह्यथर्वणः४ इति आत्माच इत्येतास्तत्रावाह्यपूजयेदिति इतिपीठयंत्रदेवता-
स्थापनक्रमः गंधपुष्पादिभिश्चैवसमभ्यर्च्ययथाविधि यथाशक्तिकृतंसर्वमर्चनंविनिवेदयेत् देवदेवजगन्नाथविश्वसाक्षिन्नमोस्तुते गृहा ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेमांकृतांपूजांप्रसीदभगवन्गुरो ग्रहयज्ञविधानेनग्रहपूजांसमाप्यच ऋत्विग्भिः सहवैहोमंततःकुर्याद्यथाविधि कुंडेवास्थंडिलेवापिस्वगृह्यविधि
नाद्विजः कृत्वाज्यभागपर्यंतसुपलेपादिकंततः ततःसमिदाज्येनचरुणायवैस्तिलसमन्वितैः सहस्रंचाहुतीस्तत्रव्याहृतीभिस्ततःक्रमात् जुहु
याहत्विगेकैकश्चतुर्विंशोत्तरंशतम् प्रणवेनाहुतिंचैकांमंत्रेणैवपृथक्पृथक् देवतानांचसर्वेषानामभिर्जुहुयाद्धुतं देवतानांअंगदेवतानां ततःस्विष्टकृ
तंहुत्वाहोमशेषंसमापयेत् आचार्यादीन्समभ्यर्च्यगंधपुष्पासनादिभिः दद्याद्वित्तानुसारेणदक्षिणांचयथोचितां लेह्यंपेयंतथाचोष्यंखाद्यंचे
वचषड्रसान् देवायादौनिवेद्यतुद्विजवर्यान्समर्चयेत् भक्ष्यभोज्यादिकंदद्यात्तृप्तिर्यस्ययथाभवेत् दक्षिणांचयथाशक्त्यासर्वेषांचसमाशतः
ततश्चभोजयेद्विप्रान्सहस्रंसम्यगेवहि एकस्मिन्नेवकालेवाभवेद्वापिदिनेदिने भवेद्यावत्सहस्रंतुतावदेवहिभोजयेत् तेभ्योपिदक्षिणांदद्यान्द्वि-
जानेभ्यःस्वशक्तितः दीनांधकृपणादींश्चभोजयित्वास्वयंततः समाहितमनाःकर्ताभुंजीयात्सहबंधुभिः एवंयःकुरुतेसम्यक्सहस्रद्विजभो
जनं समाप्तेतुपुनर्होमःकर्तव्योसुनिरब्रवीत् ब्रह्महाचसुरापीचपरद्रव्यापहारकः मातृगामीचगोघ्नश्चपरदाररतःसदा ज्ञानतोज्ञानतोवापिपा
पकारीयथेच्छया सदाचारविहीनस्तुदमदानविवर्जितः ईदृशोपिद्विजोयःस्यात्सहस्रद्विजभोजनं कुरुतेसद्यएवेहसपुनातिनसंशयः ब्रह्मानं
दपदंगच्छेत्तेनपुण्येनचैवहि सहस्रभोजनाच्चैवनानाविधमनोरथान् भुंक्तेसकामान्सकलान्भोगानपिचपुष्कलानिति तत्रसंकल्पमाह मम
पंचमहापातकनिवृत्तिगोवधपरदारपरद्रव्यापहारकायिकवाचिकमानसिकैतज्जन्मशरीरावच्छिन्नसमस्तपापक्षयपूर्वकनानाविधमनोरथसिद्ध्यर्थं
षष्टिसहस्रवर्षविष्णुलोकनिवासांतेब्रह्मानंदावाप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसहस्रब्राह्मणान्यथाशक्त्यायथोपपन्नेनान्नेनयथाकालयथादेशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदक्षिणंभोजयिष्येइतिसंकल्प्य तदादौगणेशपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंआचार्यर्त्विग्वरणहोमादिचकरिष्येइतिसंकल्प्य गणेशपूजनादिय-
थोक्तक्रमेणकुर्यादिति अथसर्वदानसंकल्पवाक्यंमात्स्ये अद्येत्यादि० ममैतच्छरीरावच्छिन्नसमस्तपापक्षयपूर्वकसकलमनोरथसिद्धियज्ञयाजित्वसर्वद्रव्य
दानजन्यसर्वतीर्थस्नानजन्यसर्वदेवपूजाजन्यसमफलयमलोकादर्शनदारिद्र्यानुत्पत्तिसर्वकालस्त्रीपुत्रपौत्रधनधान्यसौख्याद्यावज्जीवमवियोगैहिकामु-
ष्मिकाद्यैश्वर्यलवहुगंधर्वोपगीयमानदिव्याप्सरोगणसेवितदिव्यांगनासमाकीर्णहंससारसविहंगादिपरिवृतहेमकिंकिणीजालमालिकामंडिततरुणा-
दित्यसंकाशविमानारोहणशक्रादिस्फुरगणब्रह्मविष्णुरुद्रलोकेंद्रलोकादिस्वेच्छयाविचरणयावदाभूतसंप्लवाक्षय्यस्वर्गलोकावाप्त्यंतेविष्णुसायुज्यकामे
इदंसकलंममाश्रमीयसकलवस्तुसर्वस्वंसर्वविष्णुदैवतंतन्नैवकल्पितस्रुवर्णबहुदक्षिणं ॐ सर्वस्वायनमइतिनाममंत्रेणसंपूजितायतुभ्यमहंसंप्रदेनमम
त्येकस्मैदद्यात् यद्वा नानानामगोत्रेभ्योब्राह्मणेभ्यःसुपूजितेभ्यःसदक्षिणंदातुमहमुत्सृजेन ममेतितेनश्रीपरमेश्वरःप्री० तत्सद्ब्रह्मार्पणमस्तु प्रार्थनामंत्रा
स्तु हरिश्चंद्रोयथाराजासर्वंदत्वादिवंगतः तथाहमाश्रमंदत्वायास्यामित्रिदशालयं दिविभुव्यंतरिक्षेचहस्त्यश्वरथसंकुला हरिश्चंद्रस्यनृपतेःशोभतेनगरी-
यथा तथाममाश्रमंसर्वंदिविसर्वत्रगच्छतु सर्वस्वंसुनयेदत्वायांगतिंनृपतिर्गतः सर्वस्वदानेनानेनतांगतिंप्राप्नुयामहं सर्वस्वंतवदानेनहरिश्चंद्रोयथा
भवत् दुःखहीनःसुखमयस्तथामांकुरुसर्वदा सर्वस्वदानात्सकलासमस्तंतुमनोरथाः इतिसर्वस्वदानप्रयोगः अथयुगप्राधान्येनव्यासोक्ताधर्माउ
च्यंते तपःपरंकृतयुगेत्रेतायांज्ञानमुत्तमं द्वापारेयज्ञमित्याहुर्दानमेव कलौस्मृतमितिस्कांदे श्रांतस्ययानंतृषितस्यपानमन्नंक्षुधार्तस्यनरोनरेंद्रः दद्या
द्विमानेनसुरांगनाभिःसंस्तूयमानस्त्रिदिवंप्रयाति यतीनामाहयमः यतीनांपरमोधर्मस्त्वनाहारोवनौकसां दानमेवगृहस्थानांशुश्रूषाब्रह्मचारिणामिति ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानमावश्यकंकेषामित्याहव्यासः मातापित्रोश्चयद्दत्तंभ्रातृस्वसृकृतासुच सोदर्येपिचयद्दत्तंसोतिथिःस्वर्गसंक्रमः पितुःशतगुणंदानंसहस्रंमातुरुच्यते अ
नंतंदुहितुर्दानंसोदर्येदत्तमक्षयं भविष्योत्तरेपि नकेवलंब्राह्मणानांदानंसर्वत्रशस्यते भगिनीभागिनेयानांमातुलानांपितृष्वसुः दरिद्राणांचबंधूनांदानंको
टिगुणंभवेत् मातुर्गोत्रेशतगुणंस्वगोत्रे द नमक्षयं दातुर्लक्षणमपितत्रैव अपापारोगिधर्मात्मादित्सुरव्यसनः शुचिः अनिंद्याजीवकर्माचषड्भिर्दाता
प्रशस्यते प्रतिग्रहीतृलक्षणमपितत्रैव निःशङ्कः क्षीणवृत्तिश्च घृणालुः सकलेंद्रियः विमुक्तोयोनिदोषेभ्योब्राह्मणःपात्रमुच्यते तथासौमुख्यमभि
संप्रीतिरर्थिनांदर्शनेसदा सत्कृतिश्चानसूयाचतदाश्रद्धेतिकीर्त्यते देवलः यद्ददातियदश्नातितदेवधनिनांधनं अन्येमृतस्यक्रीडंतिदारैरपिधनैरपि
व्यासः आयासशतलब्धस्यप्राणेभ्योपिगरीयसः गतिरेकैववित्तस्यदानमन्याविपत्तयः ग्रासादर्धमपिग्रासमर्थिभ्यःकिन्नदीयते इच्छानुरूपोविभ
वः कदाकस्यभविष्यति मात्स्ये न्यायेनार्जनमर्थस्यवर्धनंचाभिरक्षणं सत्पात्रेप्रतिपत्तिश्चसर्वशास्त्रेषुगीयते पुनस्तत्रैव अदातायत्नयत्नेतितयनत्र
सदुःखितः दानात्सुखमवाप्नोतिपरत्रापिचननिर्वृतइति याज्ञवल्क्यः अक्षरद्वयमभ्यस्तंनास्तिनास्तीतियत्पुरा तदिदंदेहिदेहीतिविपरीतमुपस्थितमि
ति तथा द्वारंद्वारमटंतीहभिक्षुकाःपात्रपाणयः दर्शयंत्येवलोकानामदातुःफलमीदृशं बृहस्पतिः द्वेवाऽप्सुप्रवेष्टव्यौगलेबध्वादृढांशिलां धनवंतम
दातारंदरिद्रंचातपस्विनमिति दरिद्रस्यैवदद्यादित्याह बृहस्पतिः वृष्टिर्यथासमुद्राणांतृप्तानामशनंयथा तथादानंसमृद्धानांदत्तंभवतिनिष्फलमि
ति अतःपरंषोडशमहादानादीनांबहुत्वादुपरम्यतइति कालोपनामरामेशभट्टसूनोःसुधीमतः महादेवद्विजार्यस्यसूनुनाप्रभविष्णुना दिवाकरेण
रचितादानसंक्षेपचंद्रिका १ गिरिजाजानितुष्ट्यर्थंमुदवितनुयात्सतामिति २ विद्वत्प्रार्थना अदृष्टदोषान्मतिविभ्रमाद्वायदर्थहीनंलिखितंमयात्र तत्सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्यैः परिशोधनीयं कोपं न कुर्यात्खलु तर्णकस्य ३ किंच शास्त्रकर्ता भवे द्व्यासो लेखको गणनायकः तयोर्वैचलिता बुद्धिर्मनुष्याणां तु का कथा ४ लिखनप
रिश्रमवेत्ता भुवने विद्वज्जनो नान्यः सागरलंघनखेदं हनुमानेकः परं वेत्ति इति काश्यां श्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूनुना
बालंभट्टानुजदिवाकरेण विरचिता दानचंद्रिका समाप्ता दानानि सर्वाण्यभिधाय तेषां प्रतिग्रहे शुद्धिमतोभिधास्ये यथाधियाभाविनयाप्रवृत्तिः प्रतिग्रहे साधुज
नस्य नस्यात् तत्रमेषीदानप्रकरणे दुष्टप्रतिग्रहहर्तो विप्रो भवति पातकी आभिभाषेत्तनोद त्वा तन्मुखं नावलोकयेदित्यादि भविष्योत्तरे दुष्प्रतिग्रहदग्धस्य वि
प्रस्य किल भारत नपश्येद्वदनं पश्चान्नचैनमभिभाषयेदिति महाभारते च पूजको गणको व्यासो घोरग्राही तथैव च परास्थिवाहको वै द्वौ ग्रामयाजी त
थैव च एतेचांत्यसमालोकेन स्प्रष्टव्याः कदाचन कदाचिन्मोहतः स्पृष्टः सवासा आप्लुतः शुचिरिति पराशरस्मृतौ च मंत्रेणानेन दत्वा तं प्रणिपत्य क्षमाप्य
च आसीमांतमनुव्रज्य तन्मुखं नावलोकयेदिति महार्णवे च दुष्टप्रतिग्रहस्पष्टः प्रतिग्रहदुष्टत्वं चतुर्धा दातृकालदेशप्रतिग्राह्यदोषभेदात् चांडा
लत्वपतित्वादयो दातृदोषाः कुरुक्षेत्रत्वादयो देशदोषाः चंद्रसूर्योपरागादयः कालदोषाः उभयतोमुखीत्वमेषीत्वादयो देयदोषाः तिलधेनु
र्गजो वाजी माहिषाजिनमूर्तयः स्फुरभिः सूयमानाच घोराः सप्तप्रतिग्रहा इति निषेधात् प्रेतान्नमजिनं मणिरिति पाठे प्रेतान्नमेकादशाहिक
श्राद्धान्नभोजनं मणिः शालग्राम इति हेमाद्रिः तत्रैव तन्निषेधोऽरुणस्मृतौ परमापद्गतेनापि अंत्यजातिप्रतिग्रहः न कार्यो ब्राह्मणेनेह आत्मनः श्रे
यइच्छता प्रतिग्रहाच्चांत्यजातेः पतितत्वं प्रजायते इति अंत्यजानाह मनुः रजकश्चर्मकश्चैव नटो बुरुड एव च कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः
स्मृताः चांडालानाह व्यासः ब्राह्मण्याः शूद्रजातश्च चांडालस्त्रिविधः स्मृत इति तथा कुरुक्षेत्रे प्रतिग्राही न भूयः पुरुषो भवेत् गायत्रीमनुजा ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्येनसप्तलक्षंभवेच्छुचिरिति कालदोषभिन्नोसत्प्रतिग्रहनिषेधः तत्प्रतिग्रहप्रायश्चित्तकथनेनस्पष्टः सर्वसत्प्रतिग्रहेप्रायश्चित्तंषट्त्रिंशन्मते
द्व्यालक्षजपेनैवशुध्यतेसत्प्रतिग्रहादिति जपसंख्यातु जपित्वात्रीणिसावित्र्याःसहस्राणिसमाहितइति मनूक्तंतुद्विविधप्रकारेणप्रतिग्रहस्या
सत्वविषयं तेनपतितादिभ्योदुष्टदेशकालयोरदुष्टद्रव्यप्रतिग्रहेषट्त्रिंशन्मतोक्तंदशप्राजापत्यरूपंपतितादिभ्योमहिष्यादिप्रतिग्रहेयाज्ञवल्क्योक्तमिति
विज्ञानेश्वरःस्मृत्यर्थसारे सर्वत्रानुक्तोदानदेयकालद्रव्येषदुष्टेपिद्वादशनिष्कप्रमाणंद्रव्यप्रतिग्रहेकार्यं एवंसर्वत्रद्रव्यानुसारेणप्रायश्चित्तवृद्धिर्ह्रा
सोकल्प्यो दातृदेशकालद्रव्येष्वन्यतरदोषेएकैकगुणवृद्धिः मणिवासोगवादीनामन्यतरप्रतिग्रहेगायत्र्यष्टसहस्रजपः भिक्षादिप्रतिग्रहेपुण्यमं
त्रोच्चारणं ननुप्रतिग्रहस्यानिषिद्धत्वात्कथंप्रायश्चित्तविधिरितिवाच्यं प्रतिग्रहेणविप्राणांब्राह्म्यंतेजःप्रणश्यति इत्यरुणस्मृत्याप्रायश्चित्ताम्ना
येनच तत्कथनात् प्रतिग्रहसमर्थोपिप्रसंगंतत्रवर्जयेदितिस्पष्टमेवनिषेधसत्वाच्च प्रायश्चित्तंचप्रतिगृहीतसर्वद्रव्यंत्यक्त्वैवकार्यंसतिद्रव्येप्रायश्चित्ताधिकारा
भावादितिस्मृत्यर्थसारादयः अरुणस्मृतौतु षष्ठांशद्वादशांशपरित्यागोवैकल्पिकावुक्तो तथा प्रतिग्रहाच्चषष्ठांशंवाणिज्याच्चतृतीयकं कृषेर्विंशतिमंभा-
गंत्यजतांनास्तिपातकं प्रतिग्रहःकुत्सितानांत्रिभिःकृच्छ्रैर्विशुध्यति रथोवाजीचमहिषीतिलाधेनुर्गजोजिनं सूयमानाचसूकरीतिघोराःसप्तप्रतिग्रहाइति
एतेषांप्रतिग्रहेआहिताग्नेःप्राजापत्येष्टिःस्मार्ताग्निमतश्चरुस्तद्देवताकः अनग्नेः अन्येषांचकृच्छ्रत्रयं अरुणस्मृतौ गुडधेन्वादिधेनूनांप्रायश्चित्तं तथोच्य
ते प्रतिग्रहेचरेद्विप्रःप्राजापत्यमतन्द्रितः जपेच्चपौरुषंसूक्तमप्सुचैवाघमर्षणं अहोरात्रस्थितस्त्वेवमुच्यतेतेनकिल्बिषात् अथतंजपसंख्यागृहदानंमहादा
नंनास्तिदानंगृहात्परं येनदत्तेनवैतेनसर्वंदत्तंभवेन्नृणां गृहोपकरणंसर्वंगोमहिष्यादिभूषणं कंडणीपेषणीचुल्लीह्युदकुंभस्तुमार्जनी शय्याविभाजितंछत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वितानंरथगोवृषं तनकृछ्रंचरेद्विप्रोमहासांतपनंतथा शतंवाभोजयेद्विप्रान्गायत्रीलक्षमेवच प्रायश्चित्ते कृतेविप्रोमुच्यतेतत्प्रतिग्रहात् प्रायश्चित्तस्याकरणेयुवेव-
 मियतेतुसः अश्वप्रतिग्रहंकृत्वाचरेच्चांद्रायणत्रयं अश्वस्यविक्रयंकृत्वाप्येतदेवव्रतंचरेत् कपिलाविक्रयंकृत्वाचरेच्चांद्रायणत्रयं गोशतंगोसहस्रंच कृष्णावैतर
 णीतथा चतस्रश्चैवगावश्चवर्जनीयाःप्रयत्नतः चतस्रउत्क्रांतिऋणपापमोक्षमोक्षधेनवः गृहीत्वावैतरणींलोहंयमदंडभयावहं प्राजापत्यत्रयंकुर्यात्भोज-
येच्चशतंद्विजान् जपेद्वावामदेव्यंचशिवसंकल्पमेवच रथंतरंवामदेव्यंजपेन्मुच्येतकिल्बिषात् यज्ञकर्मणियाधेनुर्व्रतधेनुस्तथैवच मधुपर्केचयाधेनुर्याधेनुःक
र्मसिद्धये एतत्प्रतिग्रहेविप्रप्रायश्चित्तंनविद्यते पर्वताद्येदशप्रोक्तास्तथैवद्विमुखीचगौः उष्ट्रप्रतिग्रहेविप्रःक्षपेन्मासचतुष्टयं प्राजापत्येनकृछ्रेणषष्ठांशंतुपरित्य
जेत् विप्रेभ्योदद्यात् जपद्वादशलक्षंवागायत्र्यानिश्चयभोजनः शतेनमुच्यतेपापाद्विप्राणांभोजनेनच प्राणायामशतंकुर्यात्ब्रह्मकूर्चसमन्वितं रथप्रतिग्रहेल
क्षगायत्रीजपमाचरेत् अयुतंवाथगायत्र्याःसंगमेस्नानमाचरेत् षष्ठांशंतुपरित्यज्यब्राह्मणान्भोजयेच्छुचिः प्रतिगृह्यान्नदानानिप्रायश्चित्तंयथोदितं जपेन्निर
तरंदेवींवैष्णवंव्रतमाचरेत् जपसंख्याअयुतादि विद्यादानंगृहीत्वापियत्किंचित्पुस्तकादिकं ब्राह्मणान्भोजयेद्भक्त्याकृछ्रमेकंसमाचरेत् पृथिवींप्रतिगृह्या
थसशैलवनकाननां अपिधात्तुमथागृह्यतप्तकृछ्रत्रयंतथा भूत्वात्रिषवणस्नायीक्षपेन्मासचतुष्टयं एवंशुद्धिमवाप्नोतिद्विजःषष्ठांशमुत्सृजेत् इदंचसदक्षि
णप्रतिग्रहे तद्रहितप्रतिग्रहेतुनदोषः भूमिंयःप्रतिगृण्हातियस्तुभूमिंप्रयच्छति तावुभौपुण्यकर्माणौनियतंस्वर्गगामिनावित्यक्तेः अथषोडशमहादानेषु
तत्रचारुणस्मृतौ तुलापुरुषभागंचगृहीत्वाचांद्रकंचरेत् हिरण्यगर्भंचतथाब्रह्मांडेकल्पपादपे जलेत्रिषवणस्नायीचरेत्सांतपनद्वयं गोसहस्रप्रतिग्राही
यदाविप्रोह्यकामतः गोमूत्रयावकाहारोमासेनैकेनशुध्यति हिरण्यकामधेन्वादिदानप्रत्ययथोदितं महाभूतघटांतेषुप्रायश्चित्तमथोच्यते गायत्र्याद

CC-0. In Public Domain. Digitization by eGangotri

३५८६

५९

श्राद्धविवेक:

॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्राद्धविवेकस्थविषयानुक्रमणिका प्रारभ्यते ।

विषयाः — पत्रांकाः

अथ प्रथमपरिच्छेदः १.

मंगलाचरणम् । श्राद्धस्वरूपभेदाः १
नित्यादिश्राद्धानां लक्षणम् । श्राद्धारंभे संकल्पोहकरणम् ”
श्राद्धप्रयोगे मतमतांतरेण कर्तव्यविवेकः... ... ... २
एकोद्दिष्टश्राद्धसंकल्पः तत्र कर्तव्यादिनिर्णयः ३
तीर्थश्राद्धे विशेषः, आमश्राद्धे पिण्डादिनिर्णयः ... ६
दंपतिपूजनविवेचनम् । वृषोत्सर्गकपिलादाननिर्णयः ”
पुत्रसंस्कारकर्मण्याभ्युदयिकश्राद्धनिर्णयः ९
प्रेतत्वविमुक्तिहेतुकाद्यश्राद्धादिविवेकः १०
तत्र सपिण्डनविषये विवेकः ... ... ”
अथावश्यकश्राद्धकालाः ११
श्राद्धे प्रशस्तब्राह्मणाः निषिद्धब्राह्मणाः १५
प्रशस्तकुशाः । निषिद्धकुशाः । तिलाः । जलम् ... १६
अर्घ्यपात्राणि । गन्धादिपञ्चकम् । विहितपुष्पाणि ... ”
निषिद्धपुष्पाणि । धूपद्रव्याणि । निषिद्धधूपाः । वस्त्रम् ”
तांबूलोपकरणानि । श्राद्धदेशे संनिधापनीयानि वस्तूनि ”
श्राद्धदेशादपसारणीयानि वस्तूनि १६
श्राद्धे विहितानि हविर्द्रव्याणि ... ... ”
मांसानि । मत्स्याः । शाकाः । फलानि । कन्दाः ... १७
व्यञ्जनसंस्कारकद्रव्याणि । लवणानि । तैलम् ... ”
श्राद्धे विहितद्रव्याणि । श्राद्धे निषिद्धद्रव्याणि... ... १८

अथ द्वितीयपरिच्छेदः २.

अधिकारिनिरूपणम् । औरसादयः पुत्राः ... ... ”
पुत्राभावे पौत्रादयोऽधिकारिणः ... ... ”
श्राद्धेऽनधिकारिणः । उदकदानाद्यनर्हाः १९
मरणात्पूर्वं कर्तव्यम् । प्रथमप्रक्रिया २०
मरणादनंतरं कर्तव्यम् ... ... ”
पतितापविद्धादीनामुदकक्रियानिषेधः २१
मृतस्य प्रथमदिनविधिः ... ... ”
द्वितीयादिदिनविधिः । अस्थिसंचयविधिः २२
आशौचान्तदिनकृत्यम् २५

अथ तृतीयपरिच्छेदः ३.

एकादशाहविधिः २५
वृषोत्सर्गप्रयोगः २६
कपिलादानम्... ... ... २९
एकादशाहश्राद्धप्रयोगः ३०
अन्नोदककुंभदानम् ३४
मासिकश्राद्धप्रयोगः... ... ... ३५
सपिंडनश्राद्धप्रयोगः ३६
अवीरायाः सपिण्डकर्तृकषोडशश्राद्धविधिः ४४

अथ चतुर्थपरिच्छेदः ४.

अथ अपात्रकैकोद्दिष्टश्राद्धप्रयोगः... ... ... ४७
मातृश्राद्धप्रयोगः :... ... ... ४९
स्त्रीकर्तृकश्राद्धप्रयोगः ५१
अपात्रकपार्वणश्राद्धप्रयोगः... ... ... ५३
अथाभ्युदायकश्राद्धम् ५७
नित्यश्राद्धप्रयोगः ६१
ग्रंथसमाप्तिः ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ प्रसीदतुसनोहरिस्त्रिदशवैरिसीमन्तिनीनवीनविधवाजनव्रतविधानदीक्षागुरुः ॥ यदीयपदपङ्कजस्मरणवीतस
वैंनसःपुनर्भगवतागतंजहतिवीतमोहाबुधाः ॥ १ ॥ चिरन्तनानेकनिवन्धसिद्धःसुसंप्रदायानुगतःस्फुटार्थः ॥ नत्वाहरिंरुद्रधरेणसम्य
ग्वितन्यतेश्राद्धविवेकएषः ॥ २ ॥ श्राद्धंनामवेदबोधितपात्रालम्भनपूर्वकप्रमीतपित्रादिदेवतोद्देश्यकोद्रव्यत्यागविशेषः । तच्छ्राद्धमिहस्व
रूपभेदेतिकर्त्तव्यतामन्त्रनिर्णयविहितानिषिद्धदेशकालद्रव्यब्राह्मणादिकथनेनाविविच्यते । तत्रादौसंक्षेपतःस्वरूपभेदः कथ्यते । तत्र
बृहस्पतिः ॥ नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंतथैवच ॥ पार्वणंचेतिमनुनाश्राद्धंपञ्चविधंस्मृतम् ॥ एतद्विवृतंभविष्यपुराणे ॥ अहन्यहनियच्छ्राद्धं
तन्नित्यमितिकीर्त्तितम् ॥ वैश्वदेवविहीनंतदशक्तावुदकेनतु ॥ एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते ॥ तदप्यदैवंकर्तव्यमयुग्मान्भोजयेद्द्विजान् ॥
कामायविहितंकाम्यमभिप्रेतार्थसिद्धये ॥ पार्वणेनविधानेनतदप्युक्तंखगाधिप ॥ वृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते ॥ सर्वंप्रदक्षिणं
कार्य्यंपूर्वाह्णेतूपवीतिना ॥ अमावास्यांयत्क्रियतेतत्पार्वणमुदाहृतम् ॥ क्रियतेवापर्वणियत्तत्पार्वणमितिस्थितिः ॥ अत्रनैमित्तिकपदेनषोडशप्रेत
श्राद्धान्यपिसंगृह्यन्ते । एकोद्दिष्टरूपत्वात्तेषाम् ॥ पार्वणपदेनगोष्ठीश्राद्धाद्यपिस्मृत्यन्तरेणोक्तंसंगृह्यते । तेषांसर्वेषांपार्वणविधिनाविधानात् ।
अत्रयद्यपिपर्वणिभवंपार्वणमितिव्युत्पत्तिः । तथापिव्युत्पत्तिमात्रमिदम् । वस्तुतोदेवश्राद्धपूर्वकषट्पुरुषश्राद्धंपार्वणम् । अतएव क्षयाहेपार्वणं
कुर्वन्नधोऽधोयातिमानवः । इतिश्राद्धंनिषिद्ध्य अहन्येकादशेप्राप्तेपार्वणंतुविधीयते इत्यादिस्मृतिषु देवश्राद्धपूर्वकषट्पुरुषश्राद्धविषयतयैवविधि
रुपपद्यते । अन्यथापर्वव्यतिरिक्तकालेपार्वणस्यासम्भवाद्विधिनिषेधानुपपत्तिः । स्मृतिसारमहार्णवहलायुधकल्पतरुपितृभक्तिषुस्मृतिनिवन्धेष्व
पिऔरसक्षेत्रजाभ्यांसाग्निकाभ्यांमृताहेपार्वणंकर्तव्यमितियल्लिखितंतदपिसंगच्छते । अन्यथातद्वचनमसंभवादयुक्तमेवस्यात् । लोकेऽपिचप्राया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिकास्त्वपरपक्षीयप्रतिपदादिश्राद्धेष्वपिपार्वणपदंप्रयुंजते। श्राद्धारम्भेप्रथमंश्राद्धीयद्रव्यसेकः। नाप्रोक्षितंस्पृशेत्किंचिच्छ्राद्धेदैवेचकर्मणीत्यत्र नस्पृशेन्नदद्यादित्यर्थः॥ अनेनवाक्येनप्रोक्षणप्राप्तौ तत्पुण्डरीकाक्षोच्चारणेनेतिकेचिन्निबन्धेलिखितम्। पुण्डरीकाक्षस्मरणेनेतिकेचित्। तत्र शंखचक्रधरंविष्णुंद्विभुजंपीतवाससम्। प्रारम्भेकर्मणांविप्रपुण्डरीकंस्मरेद्धरिमितिमूलवाक्यम्। यद्यप्यत्रस्मरणमेवविहितमस्ति। तथाप्युच्चारणस्यस्मरणपूर्वकतयोच्चारणेस्मरणमायात्येवेत्यविरोधएवेत्याचारानुगृहीतमुच्चारणंक्रियते। तत्राविरुद्धफलकीर्तनमपिक्रियतेऽस्मत्संप्रदाये। तेनपुण्डरीकाक्षः पुनात्वित्युच्चार्य्यद्रव्यसेकः। ततःसंकल्पः। तत्राद्यपार्वणश्राद्धमहंकरिष्ये इतिपितृभक्तौसंकल्पः। अस्मत्संप्रदायेतु तिथ्युल्लेखपूर्वकःपित्रादीनांप्रत्येकंगोत्रसंबन्धिपदानामनुकीर्तनपूर्वकःसंकल्पःक्रियते। तत्रनामगोत्राद्युच्चारणपूर्वकःसंकल्पइतियुक्तःपक्षः। तथाहि। नान्दीमुखेविवाहेचप्रपितामहपूर्वकम्॥ वाक्यमुच्चारयेत्प्राज्ञोह्यन्यत्रपितृपूर्वकम् इत्यनेनानुपूर्वीविशेषस्यकथनात् सामान्यतः पित्राद्यानुपूर्वीप्राप्यते। सानियम्यते। अतआनुपूर्व्याउच्चारणंप्राप्तम्। गरुडपुराणादौश्राद्धप्रयोगलेखनेपित्राद्युच्चारणवाक्यंस्फुटमेव। तत्तात्तिथिविशेषादेः श्राद्धेप्रयोजकतयादेशकालोत्कीर्तनमपियुज्यते। तथाचअद्यामुकमासीयामावास्यायाममुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणाममुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांपार्वणश्राद्धमहंकरिष्ये इत्येवंसंकल्पः कर्तव्यः। अतएवपितृभक्तावेकोद्दिष्टश्राद्धेनित्यश्राद्धेचास्मल्लिखितक्रमेणैवसंकल्पवाक्यंलिखितम्। ततोगायत्रीजपः। तत्र उपविश्यजपेद्धीमान् गायत्रींतदनुज्ञया। यद्यपिवारसंख्यानश्रूयते। तथापि स्थानान्तरीयगायत्रीजपादौप्रायशोवारत्रयाभिधानेनात्रापिवारसंख्याकांक्षायांसैवोपतिष्ठतइतिप्रमाणिकाचारोपष्टम्भेनवारत्रयजपः। जपेचविशेषः। केचित्प्रणवव्याहृतिरहितां शुद्धामेवगायत्रींजपन्ति॥ केचित्प्रण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वव्याहृतिपूर्वांजपन्ति । तत्रद्वितीयःपक्षोयुक्तः । तथाहि । प्रणवःपूर्वमुच्चार्य्योंभूर्भुवःस्वस्ततःपरम् । गायत्रीप्रणवश्चान्तेजपोह्येवमुदा हृतः ॥ इतियोगियाज्ञवल्क्यवाक्येनगायत्रीजपविधाने सर्वत्रप्रणवव्याहृतिपूर्वकतया व्यवस्थापितत्वात् । नचान्नोत्सर्गानन्तरं सप्रणवां सव्याहृतिकांगायत्रींजपेदितिकात्यायनसूत्रेणप्रणवव्याहृतिसाहित्याभिधानादन्यत्रतयोरसाहित्यंपर्यवस्यतीतिवाच्यम् । वाक्ययोर्भिन्नवक्तृ कत्वात् । तथाहि । प्रथमंगायत्रीजपविधायकंब्रह्मपुराणवाक्यम् । द्वितीयंजपविधायकंकात्यायनसूत्रम् । एककर्तृकेचविधाने विशेषविधिः शेषनिषेधाभ्यनुज्ञाफलकोभवति । पुराणेसर्वशाखाप्रत्ययमेकंकर्मेतिन्यायात् । योगियाज्ञवल्क्यविहितप्रणवव्याहृतिसाहित्यस्यावश्यकोप स्थितेश्च । नचतत्साहित्यस्यावश्यकोपस्थितौकात्यायनसूत्रेतत्साहित्याभिधानमनर्थकमापद्येतेतिवाच्यम् । कात्यायनसूत्रंकल्पः ॥ कल्पे चन्यायलभ्यस्यप्रमाणान्तरसिद्धस्यचार्थस्यैकीकृत्याभिधानम् । तेनतत्साहित्येसूत्रस्यानुवादकता परिभाषावाक्येनैवसाहित्यप्राप्तेःसिद्ध त्वात् । तस्मात्प्रणवव्याहृतिसहितायाएवगायत्र्याःप्रथममपित्रिर्जपः । सुगतिसोपानेत्रिरिति स्फुटमेवोक्तम् । तत्रदेवताभ्यइतित्रिर्जपः । तत्रापिसंप्रदायभेदः । देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वधायैस्वाहायै नित्यमेवनमोनमः इतिवाजसनेयिभिःपठ्यते । नमःस्व धायैस्वाहायैनित्यमेवभवंत्वितितुसामगैःपठ्यते इति ॥ केषांचिदविभागः । केषांचिद्विपरीत्येनविभागः ॥ तत्रास्माकंप्रथमःपक्षः । तत्रोपदेशए वशरणम् । ततआसनोत्सर्गःसनिर्विवादः । ततआवाहनम् । तत्रापात्रकेऽपिश्राद्धेविश्वान्देवानहमावाहयिष्येपितॄनहमावाहयिष्यइतिप्रश्नः क्रिय तइतिसम्प्रदायः । ततोऽर्घे (र्घ्य) करणम् ॥ तत्रशन्नोदेवीरितिजलप्रक्षेपः । तिलोऽसीतितिलप्रक्षेपः । तत्रस्वाहान्तोयंमन्त्रोवाजसनेयिभिः पठ नीयः कात्यायनेश्च । वाजसनेयिकल्पेकात्यायनसूत्रेस्वाहान्तस्यैवोपदेशात् । नचलिपिमात्रमत्रशरणम् । परंपरासिद्धत्वादुपदेशस्य । गुणिसर्वस्वना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्निमन्त्रव्याख्यानग्रन्थेपित्र्युद्देश्यकतयास्वधान्तोयंमन्त्रइतिभ्रमो हेयः। कात्यायनसूत्रेस्वाहान्तस्यैवोपदेशादित्यभिधानेनोपदेशस्यपरंपरासिद्ध
तयास्थैर्यात्। अत्रपवित्रोपरिजलान्तरंवाजसनेयिनः केचिद्ददति । सामगानामुदकांतरदानमेतदितिकृत्वानेतिकेचिद्ददति । तत्रदत्तदर्भौदके
हस्तेविप्रेभ्यश्चपृथक्पृथगितिवायुपुराणवाक्यंप्रमाणम् । नियामकाभावादितिसर्वेषांयजुर्विदामपिजलान्तरदानमुचितम् । ततो यादिव्याइति
पाठः। तत्र आपःशिवाःस ॐस्योनासुहवाइत्यत्रकेचित्प्रथमंतालव्यशकारंपठन्ति । केचित् ॐकारशून्यंदन्त्यमेवसकारंपठन्ति । तत्रयजु
र्विदाओंकारसहितोदंत्यसकारः पठनीयः। यजुर्वेदीयत्वादस्यमंत्रस्य दंत्यसकारोपदेशस्थैर्यादिति । ततोऽर्घोत्सर्गः। तत्रोत्सर्गवाक्येप्रथमं
युष्मत्पदोच्चारणम्। ततोदेयद्रव्योच्चारणम्। असावेषतेऽर्घइतिकात्यायनेनानुपूर्वीविशेषोपादानात्। तथाचएषवोहस्तार्घएषतेहस्तार्घ इतिवा
वाक्यम्। ततः पित्राद्यर्घपात्राणांन्युब्जीकरणम्। तत्रप्रपितामहार्घपात्रस्थमवशिष्टजलादिपितामहार्घपात्रेकृत्वातदपिपित्रर्घपात्रेकृत्वा ॐ पितृ
भ्यः स्थानमसीतिएकदैवपात्रत्रयस्याधोमुखस्यवामप्रदेशेऽवस्थापनम् । केचित्प्रथमंपितृपात्रंन्युब्जीकृत्यतदुपरिपितामहपात्रंतदुपरिप्रपि
तामहपात्रंन्युब्जीकुर्वंति । एतत्तुनमनोरमम् । पितृभ्यःस्थानमसीति न्युब्जंपात्रंनिदधातीति कात्यायनेनत्रयाणामेकदैवस्थापनविधाना
त्। ततोगंधादिदानम्। पात्रपक्षेप्रत्येकंतत्प्रतिपादनम्। ततोजलादिनाचतुष्कोणमंडलकरणम्। अत्रमंडलेदिगुपक्रमनियमःप्रमाणाभावान्ना
स्ति । ततोजलेआहुतिद्वयहोमः । तत्रान्नेव्यंजनयोगोनकर्तव्यः । उद्धृत्यघृताक्तमन्नंपृच्छत्यग्नौकरिष्यइति अत्रघृताक्तान्नमात्रस्यविधा
नात् जुहुयाद्व्यंजनक्षारवर्जमन्नंततोजले इतिविष्णुपुराणीयवाक्यान्तरेनिषेधाच्च। ततोभूस्वाम्यन्नदानम्। ततोहुतशेषप्रक्षेपः। पात्रेषुततः प्रत्ये ॥२॥
कंपरिवेषणम् । ततोमधुवाताइत्यादितृक्त्रयपाठः। मधुमधुमध्वितिचपाठः। अत्रबहूनांमधुमधुमध्वितिमन्त्रपाठस्यानाचरणम् । तत्रास्मन्मते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नंमधुमयंकृत्वामधुवाताभिमन्त्रितमितियमवाक्ये मधुवाताइतिपदस्यमधुप्रकाशकमन्त्रोपलक्षणपरत्वान्मधुनक्तं मधुमान्नइतिऋग्द्वयोपस्था
पकत्ववन्मधुमधुमध्वित्यस्याप्युपस्थापकत्वम्। मधुप्रकाशकत्वस्यतुल्यत्वात्। अतएवसुगतिसोपानेसर्वश्राद्धप्रयोगेऽन्नावसरेमधुमधुमध्वितिच
सर्वत्रलिखितम्। अत्रान्नोत्सर्गानन्तरंगायत्रीमधुवाताइत्यादिजपस्ततोऽन्नहीनपाठइतिसुगतिसोपानादौभवशर्मप्रतिहस्तकग्रन्थेक्रमः। अन्नोत्स
र्गानन्तरमन्नहीनपाठस्ततोगायत्रीमधुवाताइत्यादिपाठइतिपितृभक्त्यादौक्रमः। तदनयोःक्रमयोर्विकल्पएव। सव्याहृतिकांगायत्रींमधुवाताइति
ऋचंजप्त्वायथासुखंजुषध्वमितिवाच्यम्। भुंजीरंस्तेऽपिवाग्यताइतियाज्ञवल्क्यवाक्यानुसारेणसुगतिसोपानादिलेखनम्। कात्यायनसूत्रमन्त्रानुसा
रेणपितृभक्त्यादिलेखनम्। तथाचकात्यायनसूत्रम्। वैष्णव्यर्चा। यजुषाचान्नेंगुष्ठमवगाह्योष्णंस्विष्टमन्नंदद्याच्छक्त्यावाश्नत्सुजपेद्व्याहृतिपूर्वां
सप्रणवांगायत्रींमधुवाताइतित्र्यृचमिति। अस्मत्संप्रदायेतुप्रेतश्राद्धेषुप्रतिहस्तकभवशर्मग्रंथेनव्यवहारस्तदितरश्राद्धेषुपितृभक्तिलेखनानुसारेण
व्यवहारः। अत्रइदमन्नमिमाआपइदमाज्यमित्यन्नजलघृतेष्वंगुष्ठनियोजनमितिबहुषुनवीनग्रंथेषुलिखितम्। इदमन्नमिमाआपइदमाज्यमित्यन्न
जलघृतेष्वंगुष्ठनियोजनानंतरमिदंहविरितिपुनरन्येष्वप्यंगुष्ठनियोजनमितिप्राचीनसंप्रदायः। तदनयोःपक्षयोःप्राचीनसम्प्रदायःप्रामाणिकः।
तथाहि। कल्पतरौश्राद्धकाण्डेपैठीनसिः इदंहविरित्येवंसांगुष्ठमन्नविधंब्राह्मणेभ्योदद्यात्। अस्यार्थः। अन्नविधमन्नप्रकारःपायसादिः
सब्राह्मणांगुष्ठनिवेशनपूर्वकमिदंहविरित्यभिधायसंकल्पनीयइतिलिखितम्। अत्रान्नोत्सर्गवाक्येएतत्तेअन्नंसोपस्करणंस्वधेतिक्रमः। एवमर्घपिंडसूत्र
दानेष्वपिप्रथमंतेपदोच्चारणंततोदेयद्रव्यनामोच्चारणंकर्तव्यम्। कात्यायनादौतथैववाक्यश्रवणात्। प्रेतश्राद्धेषुब्रह्मपुराणाद्यनुसारेणवाक्यम्।
तत्रनायंनियमः। ततः पवित्रजपानंतरमन्नविकिरणम्। तत्रमन्त्रद्वयम्। अनग्निदग्धायेजीवायेप्रदग्धाःकुलेमम॥ भूमौदत्तेनतृप्यन्तुतृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्तायान्तुपरांगतिमित्येकः । अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतृप्यन्तुतृप्तायान्तुपरांगतिमित्यपरः । तत्रयजुर्वे
दिनांनियमतःप्रथममंत्रेणैवान्नविकिरणम् कात्यायनेनतस्यैवगृहीतत्वात् ॥ वेदशून्यानांद्वितीयमन्त्रःपौराणिकत्वात्प्रयोज्यइति । तत
आचमनं ततोहरिस्मरणं ततोगायत्रीमधुवाताजपः । सचसव्येनापसव्येनवा प्रमाणाभावाच्छ्राद्धोपक्रमगायत्रीजपवत् । नचपूर्वं
वद्गायत्रींजपित्वेतिकात्यायनसूत्रेपूर्ववदित्यातिदेशादपसव्यप्राप्तिरितिवाच्यम् । पूर्वमपसव्योपदेशाभावात् । तथाचतत्रपूर्ववदित्यनेन
पूर्वोपदिष्टप्रणवव्याहृतिसाहित्यस्यातिदेशः । भवशर्मप्रतिहस्तकमतेऽत्रगायत्रीमधुवाताजपोनास्ति । ततःपिंडस्थानेऽपसव्येनरे
खाकरणमुल्मुकभ्रामणंछिन्नमूलकुशास्तरणं सव्येनदेवताभ्यः पितृभ्यश्चेतिजपः । ततोऽपसव्येनपिण्डस्थानेऽवनेजनं ततःपिं
डोत्सर्गस्तत्रापितेपदस्यप्रथमंततःपिंडःस्वधेतिवाक्यस्योच्चारणं ततःकरप्रोक्षणं ततआचमनम् । तत्रत्रिराचम्येत्यभिधानाच्चुलुकत्रयात्म
कस्याचमनपदार्थस्यात्रिरित्यनेनान्वयात् चुलुकनवकतयाचमनत्रयंमन्यंते । वस्तुतस्त्वाचमनस्वरूपस्यचुलुकत्रयात्मकस्यैवस्वरूपे
णोपादानमनुवादरूपत्वादितिभाति । ततोऽत्रपितरइत्याद्यनुष्ठानं ततःप्रत्यवनेजनं ततोनीवीविस्रंसनं ततआचमनं ततःसव्यह
स्तेनसूत्रमादायदक्षिणहस्तेन वामान्वारब्धेनपिंडोपरिसूत्रधारणं नमोव०इतिपठित्वा ॐएतद्वःपितरोवासइतिप्रत्येकमविकृतेनमंत्रेण ।
ततस्तदुत्सर्गःततस्तूष्णींगन्धादिदानं ततोऽक्षय्योदकदानादि । अत्रापात्रकेश्राद्धेऽक्षय्योदकदानादीनिकेचिन्निवर्तयंति प्रतिवचनाभावादिति । ॥ ३ ॥
तन्नयुक्तम् । एवंसतिप्रथमगायत्रीजपादेरपिनिवृत्तिरापद्येत । ब्राह्मणानुज्ञाभावात् । तस्माद्ब्राह्मणभावेब्राह्मणकर्तृकाभ्यनुज्ञाप्रतिवचनादीनि
निवर्तंतांभोजनवत् । नतुयजमानकर्तृकजपादीनिनिवर्तंते अन्नोत्सर्गादिवदिति । ततआशीःप्रार्थनं तत्रदातारोनोऽभिवर्धंतांवेदाःसंततिरेवचे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यत्रवेदशब्दस्यप्रथमैकवचनांतस्यास्मत्संप्रदायेपाठः । कात्यायनसूत्रेप्रथमैकवचनांतस्यैवपरंपरोपदेशात् अग्निपुराणादौतथादर्शनाच्च । तत
स्तूष्णींपिंडोपरिसपवित्रकुशत्रयदानमूर्ज्जंव्वहन्तीरितिजलधारादानं पिंडोत्थापनमुल्मुकस्यछिन्नमूलानांचाग्नौप्रक्षेपः अर्घपात्रोत्तानीकरणं
दक्षिणादानं देवताभ्यइतिजपःदीपनिर्वापणं हस्तपादप्रक्षालनम् आचमनं विष्णुस्मरणं श्राद्धीयद्रव्यस्यब्राह्मणेप्रतिपादनम् । एकोद्दि
ष्टेतु एकस्योद्देश्यतयाएकवचनान्तप्रयोगेणवाक्यम् । ॐ अद्यामुकमासीयामुकतिथावमुकगोत्रस्यापितुरमुकशर्मणःसांवत्सरिकैकोद्दिष्ट
श्राद्धमहंकरिष्ये इतिसंकल्पवाक्यम् । आश्विनकृष्णचतुर्दश्यांशस्त्रहतादीनामेकोद्दिष्टम् । शस्त्रादिहेतुकमरणयोगिनामाश्विनकृष्णचतु
र्दशीश्राद्धाधिकरणंविधीयते । तथाचनिमित्तानांतदधिकरणोपस्थितिमात्रेणचरितार्थत्वात्संकल्पवाक्येनिमित्तोल्लेखोविफलइति । ॐ अद्या
श्विनकृष्णचतुर्दश्याममुकगोत्रस्यपितुरमुकशर्मणएकोद्दिष्टश्राद्धमहंकरिष्ये इत्येवमेवसंकल्पोयुक्तः । एवमशौचादिनाक्षयाहेसांवत्सरिकैको
द्दिष्टश्राद्धाकरणेऽऽशौचांतेयातिथिःप्राप्यतेतस्यामेकोद्दिष्टश्राद्धंकर्तव्यम् । शुचिभूतेनदातव्यंयातिथिःप्रतिपद्यते ॥ सातिथिस्तत्रकर्तव्यानत्व
न्यावैकदाचनेतिवाक्येनाऽऽशौचावस्थायांप्राप्ताप्रथमातिथिःश्राद्धाधिकरणत्वेनबाध्यते । तत्रापि निमित्तोल्लेखोऽप्रयोजकः । प्राप्ततिथेरेवोल्लेखः
प्रयोजकः । तथाचाद्यामुकमासीयामुकपक्षीयामुकतिथावमुकगोत्रस्यपितुरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्ये इत्येवंसंकल्पो
न्याय्यः । प्रेतश्राद्धरूपैकोद्दिष्टेविशेषः । तत्रप्रेतत्वविमुक्तिहेतुकषोडशश्राद्धान्तर्गतैकादशाहश्राद्धमहंकरिष्येइत्येवंसुगतिसोपानेवाक्यम् ।
तन्नयुक्तम् । त्र्यहाशौचमासिकाशौचांतद्वितीयदिनेएकादशाहपदस्यानन्वयात् । नचाशौचान्तद्वितीयदिनश्राद्धस्यनामैवेदं पारिभाषिकम् ।
तथाऽविधानात् । नचैकादशाहपदस्याशौचान्तद्वितीयदिनोपलक्षकतयाशौचान्तद्वितीयदिनोपस्थापकमेवैकादशाहपदम् । मुख्यशब्दसंभवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पौरुषेयवाक्येउपलक्षकशब्दप्रयोगस्यान्याय्यत्वात् । स्वायत्तेपदप्रयोगेकिमित्यवाचकंपदंप्रयोक्ष्यामहेइत्यभिधानात् ॥ नचागमएवैकादशाहप
देनाशौचान्ताद्वितीयदिनश्राद्धमुपलक्षितमितितत्पदप्रयोगेऽस्यस्वायत्तत्वाभावइतिवाच्यम् । तेनप्रकारेणस्मृतिष्वश्रवणात् । तस्मात्प्रेतत्वविमु
क्तिहेतुकषोडशश्राद्धान्तर्गताद्यश्राद्धमहंकरिष्यइतिसंकल्पोयुक्तः । तथाहि । द्वादशप्रतिमास्यानिआद्यंषाण्मासिकंतथा ॥ सपिण्डीकरणंचेतिप्रे
तश्राद्धानिषोडशेतिवाक्येषोडशश्राद्धानामाद्यादिनामकथनम् । ततश्च तेषुमध्येकिंकुत्रविधातव्यमित्यपेक्षायामाद्यमेकादशेऽहनीत्यशौचान्त
द्वितीयदिनमाद्यश्राद्धाधिकरणत्वेनविदधाति । तथाचाद्यपदेनैवसंकल्पःकर्तव्यः । सर्वाशौचान्तद्वितीयदिनेमुख्यशब्दोपस्थितत्वेनाद्यपदस्ययो
ग्यत्वात् षोडशश्राद्धगणनायामाद्यशब्देनकीर्तनान्मूलवाक्योल्लिखितप्रकारेणैवकीर्तनंलौकिकवाक्येऽपियुज्यते । अन्यथाऽपरिच्छेदकतत्तदर्थो
पस्थापकशब्दपरिग्रहे सर्वत्रागमप्रतिपादितार्थोपस्थितावनियमप्रसंगः । नन्वेवमूनषाण्मासिकोनवार्षिकपदेनसंकल्पवाक्येषाण्मासिकद्वयकी
र्तनंनसंगच्छते।मूलवाक्येषाण्मासिकपदेनोत्कीर्त्तनात्तत्पदोत्कीर्तनस्यैवयुक्तत्वादितिचेन्न । षाण्मासिकेतथेतिसंक्षेपेणतयोरेवाभिधानाद्दृष्टशब्दे
नधर्माभिधानवत् । तथाचमुख्यशब्दत्वादूनषाण्मासिकोनवार्षिकपदेनोत्कीर्तनंसंगतम् । अनेनैवाशयेनैतयोरेवोनषाण्मासिकोनवार्षिकत्वेनप्रसि
द्धिरितिविवरणंकृतंपितृभक्तौश्रीदत्तोपाध्यायैः । अतएवद्वादशप्रतिमास्यानीतिमूलवाक्येनप्रथममासिकादीनामेवाभिधानात्प्रथममासिकादिप
देनैवसंकल्पःसर्वेषांनिर्विवादः । प्रथममासिकादिप्रयोगवाक्यंनिर्विवादम् । सपिण्डीकरणेऽपिवाक्येविवादाभावः । अर्घ (र्घ्य) जलसंयोजनेपिण्ड ॥४॥
संयोजनेचविवादः । तत्रकेचिद्विभागेसंयोजनेचमन्त्रान्वयंकुर्वन्ति । केचित्संयोजनमात्रे। तत्रोभयत्रमन्त्रान्वयःक्रियतइतियुक्तः पक्षः । तथाहि ।
प्रेतपात्रंपितृपात्रेष्वासिञ्चतियेसमानाइतिद्वाभ्याम् ॥ एतेनैवपिण्डोव्याख्यातइतिकात्यायनसूत्रेणसंयोजनेमन्त्रान्वयोबोध्यते । निरूप्यचतुरःपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्डाम्छ्राद्धदःप्रतिनामतः । येसमानाइतिद्वाभ्यामाद्यंतुविभजेत्रिधा ॥ एषएवविधिःपूर्वमर्घपात्रचतुष्टये । इतिवाक्येनविभागेमन्त्रान्वयोबोध्यते । अतउभयत्रमन्त्रान्वयःप्रामाणिकः । नचकात्यायनसूत्रश्रुतसंयोजनमात्रान्वयबलेनविभजेदित्यस्यमुख्यार्थत्यागोयुक्तः । निरपेक्षश्रुतवाक्ययोस्तुल्यबलतयाबाध्यबाधकभावाभावेनभिन्नविषयतायां विरोधाभावेनैकस्यापरवाक्यस्थपदस्यमुख्यार्थत्याजनेऽसामर्थ्यात् । अन्यथानिरूप्येतिवाक्यश्रुतविभागान्वयबलेनकात्यायनसूत्रश्रुतासेचनपदस्यैवार्थान्तरकल्पनाकिंनस्यात् । विनिगमनाविरहात् । प्रत्युतएकस्यद्रव्यस्यद्रव्यत्रयेणक्रमेणसमंसंयोजनेविभागस्यावश्यकत्वाद्विभागप्राप्तौतत्रापिमंत्रापेक्षायामुपस्थितमन्त्रान्वयस्ययोग्यत्वाद्विभागेमंत्रान्वयोयुक्तः । तत्रचैकविनियोगेयुक्तत्वान्मन्त्रयोरादावेवप्रणवोच्चारणंनमध्येऽपीति । अत्राक्षय्योदकदानवाक्ये श्राद्धविशेषणत्वेनोपात्तानांषष्ठ्यन्तानांपदानांदानोद्देश्यभूताभिधायिनांचषष्ठ्यन्तानांपदानांप्रयोगेपौर्वापर्येऽनियमोदृश्यते । तत्रोभयत्राप्यन्वयप्रतीतिरेव कल्प्यः । फलतोऽविशेषात् । एवंदक्षिणादानवाक्येआभ्युदयिकश्राद्धसंकल्पवाक्येपिनविवादः । नांदीमुखेविवाहेचप्रपितामहपूर्वकम् । वाक्यमुच्चारयेत्प्राज्ञोप्यन्यत्रपितृपूर्वकमिति यद्यप्यस्तिप्रपितामहानुपूर्वींवाक्यकरणेप्रमाणम् । तथाप्युपदेशानुरोधात्पितृपूर्वकमेववाक्यंप्रयुज्यते । तत्रोपदेशएवबहुप्रामाणिकानुमतःशरणम् । वस्तुतःप्रपितामहपूर्वकंवाक्यंयुक्तम् । अत्रपित्राद्यर्घपात्रेषुयवप्रक्षेपेविवादः । तत्रतिलप्रक्षेपमन्त्रातिदेशेनयवादिपदप्रक्षेपेणपाठइत्यभिमानोबीजम् । वस्तुतोऽतिदेशे न प्रमाणम् । हलायुधनिबंधेमुख्यत एवमेवास्यमंत्रस्योपदेशादिति । तत्रयवोऽसिसोमदैवत्योगोसवेदेवनिर्मितः । प्रत्नमाद्भिःपृक्तःपुष्ट्यानांदीमुखाँल्लोकान्प्रीणीहिनःस्वाहेत्यस्मत्संप्रदायेपाठः । सचहलायुधनिबन्धे तथैवमन्त्रस्यलेखनादुपदेशस्यपरंपराप्राप्तत्वेनस्थैर्याच्चतथैवयुक्तः प्राचीनपितृभक्तिश्राद्धकल्पादिग्रन्थेषुतथैवलेखनाच्च । केषुचिद्ग्रंथेष्वग्रेयोजयित्वानांदीमुखान्पितॄँल्लोकान्प्रीणीहिनःस्वाहेतिपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तॄनितिपदमाधिकंदत्तमस्ति।तदधिकमेवेति।अत्रभूस्वाम्यन्नदानेपिदैववीधिंकुर्वंति।तन्नयुक्तम्। तस्याभ्युदयिकश्राद्धवहिर्भूतत्वेनदैवविधौप्रमाणाभा
वात् । तथाचपित्र्यविधिनैवयुक्तमिति। अत्रनांदीमुखाःपितरः प्रीयंतामित्यक्षय्यस्थाने इतिकात्यायनसूत्रम्।तत्रान्यत्रकथितषष्ठ्यंतपदवारणा
र्थमक्षय्यपदवारणार्थंचप्रथमांतपदेननिर्देशः पितरःप्रीयंतामितिचोक्तम्। एतदेववाक्यमत्रप्रयोक्तव्यमितिकेचित्। अस्मत्संप्रदायेतुश्राद्धान्तरव
त्प्रत्येकोद्देश्यतायांवाधकाभावात् वाक्यस्यषष्ठ्यन्तपदाक्षय्यपदप्रयोगनिवारणार्थत्वेनचरितार्थत्वात् अमुकगोत्रामातामुकदेवीनांदीमुखीदत्तै
तदन्नपानादिभिः आभ्युदयिकश्राद्धेऽभिप्रीयतामितिवाक्यंप्रयुज्यते। अत्रवैदिकमंत्रेष्वपिनांदीमुखपदंयोजयित्वापठन्ति। अत्रनांदीमुखाःपितरो
मादयध्वं नमोवोनांदीमुखाःपितरोरसायेत्यादिक्रमेण। तन्नयुक्तम्। मंत्रेपितद्योजनस्याप्रामाणिकत्वात्। लौकिकवाक्येष्वेवनांदीमुखान्पितॄनह
मावाहयिष्ये इत्यादिनाप्रकारेणप्रतिपदंसूत्रेनांदीमुखपदयोजनात्। नित्यश्राद्धेऽपिगोत्रसंवन्धिपदानामुच्चारणपूर्वकमेववाक्यम्। पितृभक्तावपि
तथैवलिखितम्॥ अत्रकेचिद्दक्षिणादानंनकुर्वंति। तन्नयुक्तम्। हतंयज्ञमदक्षिणमितिवाक्येनदक्षिणायाआवश्यकत्वेनबोधनात्। यज्ञपदेनतत्रश्रा
द्धस्याभिधानात्। नचनित्यश्राद्धमदैवंस्याद्दक्षिणापिंडवर्जितमितिवाक्येनविशेषतोदक्षिणानिषेधः। अकरणेऽनिष्टश्रवणस्यान्यथाव्यवस्थाप
यितुमशक्यत्वात्। दक्षिणापिंडवर्जितामितिवाक्येऽन्वयस्यान्यथाप्युपपत्तेः। सामान्यतः प्राप्तदक्षिणाविधेरबाधकत्वात्। तथाहि। श्राद्धपल्लवे
व्याख्यातम्। नित्यश्राद्धमदैवंस्यादर्घ्यपिंडविवर्जितं च दक्षिणादेयेत्याक्षिप्यते।तेनतत्रनित्यश्राद्धेदक्षिणादेयेत्यर्थः इत्येवंस्कन्दपुराणादिवाक्येऽ ॥ ६ ॥
पीदृशमन्यथायोजनंसुकरम्। दक्षिणाबोधकवाक्यमनन्यथासिद्धमिति। अतएवपितृभक्तावपात्रकनित्यश्राद्धप्रयोगलेखनेऽपिततोयथाशक्तिद
क्षिणांदद्यादितिसिद्धवद्दक्षिणादानंलिखितम्। नित्यश्राद्धमदैवंस्यादर्घ्यपिंडविवर्जितमिति वाक्यंलिखितम्। तेनदक्षिणानिषेधशंकापिनावतारिता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यश्राद्धाभिधायकंवाक्यमवतीर्यतत्रचार्घपिंडावाहनविश्वेदेवश्राद्धानिनिषिद्धानि ॥ पूर्वदिननियमश्राद्धदिननियमाग्नौकरणश्राद्धोत्तरकर्मज्ञाति
भोजनान्याचारान्निवर्तन्ते इतिचानिषिद्धपरिगणनेदक्षिणानगणिता । पितृभक्तौस्मृतिसारादावपिदक्षिणादानंकर्तव्यमितिलिखितम् । अतोमीमांस
कानामप्यपात्रकेऽपिनित्यश्राद्धेदक्षिणादानस्यप्रतिपत्त्यानिर्विकल्पंदक्षिणादानम् । तीर्थश्राद्धेतुविशेषः-आमान्नेनैवकर्तव्यमर्घावाहनवर्जितमिति ।
तथाचदेवीपुराणे । तीर्थेषुब्राह्मणान्नैवपरीक्षेतकदाचन ॥ अन्नार्थिनमनुप्राप्तंभोज्यंतंमनुरब्रवीत् ॥ सक्तुभिः पिंडदानञ्चसंयावैः पायसेनवा ॥
कर्तव्यमृषिभिर्दिष्टंपिण्याकेनगुडेनवा ॥ देयंतुतिलपिण्याकंशक्तिमद्भिर्नरैः सदा ॥ श्राद्धंतुतत्रकर्तव्यमर्घावाहनवर्जितम् । श्वध्वांक्षगृध्रकाकानां
नैवदृष्टिहतंचयत् ॥ श्राद्धंतत्तीर्थिकंज्ञेयंपितॄणांतृप्तिकारकम् ॥ अकालेऽप्यथवाकालेतीर्थेश्राद्धंतथानरैः ॥ प्राप्तैरेवसदाकार्यंकर्तव्यंपितृतर्पणम् ॥
पिण्डदानंततःशस्तंपितॄणांचातिवल्लभम् ॥ विलम्बोनातिकर्तव्योनचविघ्नंसमाचरेत् ॥ संयावो घृतगोक्षीरगोधूमादिसाधितोभोज्यविशेषः ।
पिण्याकः तिलखलिः । पुनस्तिलपिण्याकपदंतिलमात्रविधायकमितिपितृभक्तिः । अकाले विहितामावास्यादिव्यतिरिक्तेऽपि नतुनिषिद्धेऽपि ।
निषेधविधानविरोधात् । नचनिषेधएतदतिरिक्तविषयः । सामान्येबाधकाभावात् । नचैतदेववाक्यंबाधकम् । एतस्यान्यार्थोपपादनादित्येवमे
वपितृभक्तिः । पिण्डदानमुखेनप्रधानश्राद्धविधानमेव । तत्रतत्तद्द्रव्यकंज्ञेयम् । श्राद्धंतुतत्रकर्तव्यमितिस्वयमेवाभिधानात् । पिण्डदानंततःशस्त
मितितीर्थेकेवलपिण्डदानमपिकर्तव्यमितिबोधितम् । प्राप्तैरेवसदाकार्यमित्यनेनाविलम्बोनातिकर्तव्यइत्यनेनचतीर्थंप्राप्तौतथाकर्तव्यम् । यथाती
र्थप्राप्त्यनन्तरंरात्र्यादिनिषिद्धकालांतरसंयोगोनभवति । किंच तीर्थप्राप्त्यनन्तरंतीर्थश्राद्धक्रियानुगुणस्नानसन्ध्यातर्पणदेवपूजाऽनन्तरमेवश्राद्ध
क्रियाक्रियते इतिबोध्यते । तदनुगुणातिरिक्तस्वाध्यायाचरणेनविलम्बसम्भवात् । अतोदिनान्तरेतीर्थप्रवेशंरात्र्यादौकृत्वादिनान्तरेश्राद्धंक्रियत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्तम् । तदिदंतीर्थेश्राद्धमामान्नेनैवकर्तव्यम् । आपद्यनग्नौतीर्थेचचन्द्रसूर्यग्रहेतथा । आमश्राद्धंद्विजैःकार्यंशूद्रेणतुसदैवहीतिवाक्येनद्विजाना मपितीर्थेआमान्नैः श्राद्धविधानात् । अत्रआपदीत्यनेनआत्मनोदेशकालादीनांचोपप्लुवावस्थाकथिता । तेनस्वाशक्तौदेशकालोपप्लुवेपाकक्रियया श्राद्धासम्भावनायामामश्राद्धंकर्तव्यमित्यर्थः । अनग्नाविति । पाकयोग्याग्निरहितइत्यर्थः । नत्वनग्नौ श्रौतस्मार्तरहितइत्यर्थः । अनग्निमतामपि ब्राह्मणानांसांवत्सरिकादौसिद्धान्नश्राद्धाचरणस्यसर्वप्रामाणिकसम्मतत्वात् । आमश्राद्धेपिण्डादिकमप्यामान्नेनैवकर्तव्यम् । यदाहजावालिः— आमश्राद्धप्रदोऽनग्निःसर्वत्रैवमनीषिणः ॥ येनाग्नौकरणंकुर्यात्पिण्डांस्तेनैवनिर्वपेदिति । अत्राप्यनग्निःपाकयोग्याग्निरहितइत्यर्थः । काम्यं श्राद्धमामान्नेननकर्तव्यम् । तथाहलघुहारीतः—श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितम् । अमावास्यादिनियतंमाससंवत्सराहृते इति । अत्रनि यतमावश्यकमित्यर्थः । तेनावश्यकेऽमावास्यादिश्राद्धेऽग्न्याद्यभावेआमान्नविधिर्नकाम्ये । आवश्यकेऽपिमासिकसांवत्सरिकादावेकोद्दिष्टे नामान्नविधिः । माससंवत्सराहृतेइतिवचनात् । एकोद्दिष्टंतुकर्तव्यंपाकेनैवसदास्वयमितिसिद्धान्नस्यैववाक्यान्तरेणापिनियमतोविधानात् । पाकासम्पत्तौचसएवाह— अभावेपाकपात्राणांतदहःसमुपोषणमिति । शूद्रेणसर्वंश्राद्धमामान्नेनैवचकर्तव्यम् । शूद्रेणतुसदैवहीतिवाक्यात् । आमश्राद्धेमांसादिव्यंजनान्यामान्येवदेयानीतिश्राद्धपल्लवः । भुजबलभीमे अपत्नीकः प्रवासीचयस्यभार्यारजस्वला ॥ आमश्राद्धंद्विजैः कार्यंशूद्रेणतुसदैवहीति ॥ अथदम्पतिपूजनविवेचनम् ॥ तत्र— संपूज्य द्विजदाम्पत्यंनानाभरणभूषणैः ॥ वृषोत्सर्गंचकुर्वीतदेयाचकपिला शुभेतिवाक्यम् । अत्रनानाभरणभूषणैरितिभूषणपदंक्रियापरंनपुनरुक्तिः । अत्रसंपूज्येतिक्त्वाश्रवणाद्वृषोत्सर्गांगंदम्पतिपूजनमित्याहुः । तन्न । विनिगमनाविरहेणोभयस्यापिप्रधानत्वात् । समानकर्तृकताबोधनमात्रेणक्त्वाश्रुतेरुपपत्तेरितिदम्पतिपूजनस्यप्रधानत्वाद्वृषोत्सर्गाकरणेऽपिदंप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपूजनंयुक्तम् । अथवृषोत्सर्गविवेचनम् ॥ तत्रवृषस्तरुणोवत्सतर्य्यश्चात्रिहायण्यः । चरणानिमुखंपुच्छंयस्यश्वेतानिगोपतेः ॥ लाक्षारससवर्ण श्चतंनीलइतिनिर्दिशेत् ॥ एवंविधवृषाभावेऽन्योवृषभः । यो यस्योपादेयस्तमाह । वर्णतस्ताम्रकपिलोब्राह्मणस्यप्रशस्यते ॥ स्निग्धरक्तेनवर्णेन क्षत्रियस्यप्रशस्यते ॥ कांचनाभेनवैश्यस्यकृष्णेनाप्यन्त्यजन्मनः ॥ अत्रवृषोत्सर्गस्यवैदिकवहुमन्त्रसाध्यतयावेदोच्चारणानधिकृतस्यशूद्रस्य वृषोत्सर्गानधिकारप्राप्तौ कृष्णेनाप्यन्त्यजन्मनइतिशूद्रंप्रतिवृषविशेषोपदेशेनवेदोच्चारणेऽधिकारवोधनाद्वृषोत्सर्गाधिकारोवोध्यते । वेदोच्चार णेनविनातत्करणकवृषोत्सर्गानाधिकारेवृषविशेषकथनानर्थक्यापत्तेः । तस्माद्वृषविशेषोपदेशान्यथानुपपत्त्याशूद्रस्यापिवृषोत्सर्गेऽधिकारः कथ्यते । तत्रापिएतयैवोत्सृजेरन्निति वृषोत्सर्गेवैदिकवाक्यकरणकत्वनियमविधानात्तेनविनोत्सर्गस्यानुपपत्तेरन्यथानुपपत्त्यापिशूद्रस्यवृषोत्सर्ग वाक्यएववेदपाठोनान्यत्रेतिसर्वप्रामाणिकसिद्धम् । शूद्रतुल्यन्यायतयामन्त्ररहितायाःस्त्रियाअपिवृषोत्सर्गेऽधिकारइतिकश्चित् । तन्न । शूद्रव त्स्त्रियाअप्यधिकारवोधनेप्रमाणाभावात् । नहितस्याअधिकारवोधनंविनाकस्यचिद्वाक्यस्यानुपपत्तिः । सामान्यविधेर्विशेषवचनेनैववाधः । वाधकस्यचानुपपत्तिमूलकत्वात् यावत्यवाधितेऽनुपपत्तिप्रशमोनभवतितावदेववाध्यते । नचात्रसामान्यविधिप्रवृत्तौकाचिदनुपपत्तिरि तिनतस्याअधिकारः । एवमनुपनीतस्यत्रैवर्णिकस्यवेदशून्यतयावृषोत्सर्गेनाधिकारः । वृषोत्सर्गकालश्चाऽऽशौचान्तद्वितीयदिनंकार्ति कीचैत्रीरेवतीयुताश्विनपूर्णिमाच । तत्रकार्तिक्यांवृषोत्सर्गात्पूर्वमपूपदानमाधिकम् । आशौचान्तद्वितीयदिनेवृषोत्सर्गेआभ्युदयिकश्राद्धाभावः । सपिण्डनानन्तरमाभ्युदयिकेऽधिकारात् । अत्राशनायस्वाहेत्यकारान्ताशनशब्दप्रकृतिकस्यचतुर्थ्यन्तस्यसुगतिसोपानेलेखनम् । अशा नयेस्वाहेतीकारान्ताशनिशब्दप्रकृतिकस्यचतुर्थ्यन्तस्यपाठःप्रमाणसिद्धः । तथाहि । अयंवृषोत्सर्गोगोयज्ञेनव्याख्यातइतिपारस्करसूत्रेपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोंपदिष्टस्यगोयज्ञधर्मस्यातिदेशात्– अग्निरुद्रशर्वपशुपत्युग्राशनिभवमहादेवेशानांदेवतानांपायसाहुतावुपस्थितिः । तत्राशनिशब्दइ कारान्तएवोपदिष्टः । तत्रापियजुर्वेदीयमाध्यन्दिनीयशाखाप्रमाणमत्राह ऊनचत्वारिंशेऽध्याये अग्निंँ हृदयेनाशनिँ हृदयाग्रेणपशुपतिंकृ त्स्नहृदयेनभवंयक्ना । शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तः पर्शव्येनोग्रन्देवंवनिष्ठुनावासिष्ठहनुः शिङ्गीनिकोश्याभ्याम् इति कण्डि कायामस्यादिदेवतानां कथितानां गोयज्ञेउपदेशः । तस्यां कण्डिकायामशनिशब्दस्येकारान्तस्योपादानम् ॥ एतत्कण्डिकापाठःशतपथे तस्मादशनिरसीति नामनिरुक्तिश्च । पारस्करगृह्यसूत्रपद्धतिषु अशनयेस्वाहेतिप्रयोगश्चप्रमाणम् । नात्रअशनशब्दस्यकुत्राप्युपदे शसंभावनापि । एवमशनिशब्दस्यप्रामाणिकत्वे वृषोत्सर्गाहुतिष्वशनेरेवदेवतात्वंनाशनशब्दस्येतिस्थितम् । पिष्टकाहुतिमन्त्रेऽपिपाठ द्वैतम् । तद्विवेचनार्थमर्थःपदानिचविविच्यन्ते । तत्र पूषागाअन्वेतुनःइत्यादिकोमन्त्रः । तत्रप्रथममादित्यविशेषवाचकःपूषशब्दःप्रथमैक वचनान्तउपात्तः । ततोगोशब्दःपशुवाचकोद्वितीयावहुवचनान्तउपात्तः । ततइण्धातुरनुपूर्वोलोट्प्रथमपुरुषैकवचनान्तः । ततःषष्ठीवहुवच नान्तस्याऽस्मच्छब्दस्यनसादेशेरूपंनइति ॥ पुनःपूषन्शब्दस्यतादृशस्यैवोपादानम् । ततोरक्षपालनेइत्यस्यलोट्प्रथमपुरुषैकवचनान्तस्य प्रयोगः । ततोऽर्वन्छब्दस्याश्ववाचकस्यअर्वणस्त्रसावनञइति सूत्रेणत्रादेशेकृतेअर्वतइतिद्वितीयावहुवचनान्तः । ततःपूषशब्दस्यतादृशस्यै वोपादानम् । ततोवकारादेर्वाजशब्दस्यान्नवाचिनोद्वितीयैकवचनान्तस्यरूपम् । तस्यचमोऽनुस्वारेकृतेयजुष्वात्सकारेपरेऽनुस्वारोच्चारणम् । ततःषणुदानइत्यस्यानुबन्धलोपेसत्वनत्वयोःतनादित्वादुप्रत्ययेगुणेचलोट्प्रथमेपुरुषैकवचनान्तस्यरूपं सनोत्विति । ततोऽस्मच्छब्दस्यचतुर्थी वहुवचनान्तस्यरूपंनइति ॥ तदयमर्थः ॥ पूषादेवता नोऽस्माकंगाःपशून् अन्वेतुअनुगच्छतु । प्रतिपालयत्वितियावत् । पूषाअर्वतोऽश्वान्रक्षतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूषा वाजमन्नंनोऽस्मभ्यं सनोतुददातु । एवं पूषागाआन्वेतुनः पूषारक्षत्वर्वतः पूषावाजं सनोतुनःस्वाहा इतिव्यवस्थितोमन्त्रः । तत्रवृषभांक नेऽपिविवादः । सचसुगतिसोपानेनैवनिर्णीतः । दक्षिणपार्श्वेचक्रेणतत्सजातीयवामपार्श्वेशूलेनचेतिलेखनाद्दक्षिणपार्श्वस्यसजातीयंदक्षिणपार्श्व मेवपश्चाद्भागरूपम् । तस्यवामपार्श्वइतिपश्चाद्भागीयवामपादोपरिभागएवायाति । पुरोभागवामपार्श्वविवक्षायांतद्वामपार्श्वे इत्येवंब्रूयात्नत त्सजातीयेतिपदमुपादेयादिति । हिरण्यवर्णाइत्यादिष्वपिवर्णविवेचनायार्थःप्रदर्श्यते । हिरण्यवर्णाइतिशुद्धोपलक्षणम् । हिरण्यवर्णाः शुद्धवर्णाः शुचयः पवित्राः पावकाः पावयित्र्यः । पूञ्पवनेइत्येतस्यण्वुलिअकादेशेटापि पावकादीनांछन्दस्युपसंख्यानमित्यकारस्येत्वप्रतिषेधेरूपम् । यासुअप्सुजातउत्पन्नःकश्यपऋषिः यासुअप्सु इन्द्रोमघवा याआपः अग्नि वैश्वानरम् गर्भंभ्रूणं दधिरेधृतवत्यः । डुधाञ्इत्यस्यलिट्यात्मने पदेप्रथमपुरुषबहुवचनेरूपम् । सुवर्णाः शोभनवर्णास्ताआपःनोऽस्माकं शं स्योनाःकल्याणप्रदाःभवन्तु । यासामपांराजाईश्वरः वरुणःप्रचेताः यातिगच्छति मध्येऽन्तरा सत्यानृते तथ्यातथ्ये अवपश्यन् अवलोकयन्जनानांलोकानाम् । द्वितीयार्द्धंपूर्ववत् । यासामपां देवास्त्रिदशाःदिवि स्वर्गेकृण्वन्ति कुर्वन्ति । कृविहिंसाकरणयोश्चेत्यस्यरूपम् । भक्षमदनीयम् । याआपः अन्तरिक्षेआकाशे बहुधाबहुभिःप्रकारैर्भवंतिसंपद्यन्ते । द्वितीयार्द्धंपूर्ववत् । शिवेनकल्याणेन मा मां चक्षुषानेत्रेण पश्यतअवलोकयत । आपइतिसम्बोधनम् । शिवयाकल्याण्या तनुवा मूर्त्या उपस्पृ शत आमृशत । उपस्पृशतेतिस्पृशस्पर्शने इत्यस्योपपूर्वस्य लोण्मध्यमपुरुषबहुवचनेरूपम् । त्वचंसहजंशरीरावरणं मे मम घृतश्चुतः सर्पि श्चुतःघृतंश्चोतन्तीति श्च्युतिर्क्षरणे श्चुतिर् इत्येके । अग्निमधातोर्यकारशून्यस्याक्विपिप्रथमाबहुवचनेरूपम् । शुचयो या आपः पावकाः पावयित्र्यः । ता न इत्यादिपूर्ववत् । शन्नोदेवीरितिमन्त्रोनिर्विवादः । वृषभाभिमन्त्रणमन्त्रोव्याख्यायते । पितावत्सानामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्यादिः । पिताजनकः वत्सानांतर्णकानां पतिः स्वामी अघ्न्यानांगवाम् । अर्जुन्यघ्न्यारोहिणीत्यमरः । अथोइत्योकारान्तोनिपातः
 समुच्चये । पिताजनकः महतावृहतांगर्गराणांतरुणपशूनाम् । गर्गराणामिति । गृनिगरणेइत्यस्यपचाद्याचि उणादयोबहुलमितिबहुलवचनाद्विर्व
चनमभ्यासेरुगागमः । गर्गरेत्यस्यषष्ठीबहुवचनेरूपम् । वत्सस्तर्णकःप्रथमान्तः । सांहितिकउकारः । जरायुर्गर्भवेष्टनश्चर्मपुटस्तस्मान्नपुंस
कप्रथमैकवचनम् । प्रतिधुक् दुहप्रपूरणे प्रतिपूर्वस्तस्मात्क्विपिप्रथमैकवचनेतल्लोपेघत्वेभष्भावेचत्वेंचरूपम् । पीयूषइति । पेयूषोऽभिनवंपयः ।
तस्यच्छान्दसत्वादेकारस्येत्वंपीयूषः । यद्वा पीयूषमिवामृतमिवपीयूषस्तस्मात्प्रथमैकवचनेसोर्यत्वयलोपौ । आमिक्षाक्षीरसारः । कृपूसंयोगेऽ
यंटावन्तः । घृतंसर्पिः । तदितितच्छब्दान्नपुंसकप्रथमैकवचनम् । तदनन्तरमुशब्दोनिपातःसमुच्चयवाची । ततइदंशब्दस्यषष्ठ्यांरूपम् । तस्मि
न्परतउशब्दस्ययणादेशः—तद्वस्य । रेतइति । सकारन्तस्यरेतश्शब्दस्यवीर्यवाचकस्यनपुंसकेप्रथमैकवचनेरूपम् । वत्सादीनियस्यरेतस्तेजः ।
परंपरयातत्कारणत्वादित्यर्थः । तथाचमन्त्रः । पितावत्सानांपतिरघ्न्यानामथोपितामहतागर्गराणांवत्सोजरायुप्रतिधुक्पीयूषआमिक्षाघृतंतद्वस्य
रेतः ॥ वृषोत्सर्जनमन्त्रोव्याख्यायते एनंयुवानमित्यादिना । एतच्छब्देनद्वितीयैकवचनान्तेनोपस्थितंवृषंनिर्दिशति । एनमुपस्थितंवृषपतिंस्वा
मिनं वोयुष्माकंकृते उपस्थितावत्सतरीर्लक्षीकृत्यानिर्दिशतिवइति । ददानित्यजानि । तथाचायमर्थः । हेवत्सतर्योवोयुष्माकंकृतेएनंवृषंददानि
त्यजानि । ददानीतिडुदाभृदानेइत्यस्यलोडुत्तमपुरुषैकवचनेरूपम् । एतावतायुष्माकमर्थेऽयंवृषोमयोत्सृष्टःस्वस्वत्वध्वंसविषयःकृतइत्युक्तंभ
वति । तदुद्देश्यकत्वेनत्यागेतासांप्रयोजनमाह । तेनवृषेणप्रियेणपत्यासह क्रीडन्तीःखेलन्त्यःचरथभ्रमथ । तेनप्रियेणेतिसहशब्दयोगेतृतीया ।
क्रीडन्तीरिति । छान्दसोजसिपूर्वसवर्णः । वत्सतरीत्यागमप्याह । मानइतिपूर्वार्द्धस्थितमिहान्वीयते । तस्यविभक्तिविपरिणामेनप्रथमान्तस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रान्वयः । तेनायमर्थः । हेवत्सतर्यौयूयमिति । नोऽस्माकं, माशब्दोनिषेधार्थः, नास्मत्स्वत्वविषयः । युष्मास्वपिस्वत्वंमयानकृतमितियावत् । एतावतावत्सतरीणामप्युत्सर्गःप्रतिपादितः । उत्स्रष्टुःफलमाह । सास्यजनुषासुभगारायस्पोषेणसमिषामदेमेति । अर्थाद्वयंरायोधनस्य पोषेणपुष्ट्यासमृद्ध्या सम्मदेमहृष्टाभवेम । व्यवहितस्यापिसंशब्दस्य व्यवहिताश्चेति छन्दस्युपसर्गसंज्ञा । मदेमेति । व्यत्ययेनश्यनोऽभावेशपि रूपम् । मदीहर्षेइत्यस्यलिङुत्तमेबहुवचनम् । इषासंमदेमअन्नेनचसम्मदेमेत्यर्थः । इष्यतीतीट् इषुइच्छायामित्यस्यात्क्विपितृतीयैकवचने रूपमिषेति । धनसमृद्ध्याअन्नेनचसम्मदेमेत्यर्थः । किंभूतेनरायस्पोषेणेषाच । सास्यजनुषः । सत्तैवसास्याः । सत्तशब्दस्यनकारान्तस्य स्वार्थिकेऽणिटिलोपेसास्यमिति । अकारस्ययकारादेशश्छान्दसः । जनुइशब्दोजन्मवाचीषकारान्तः । सत्तजनूंषिजन्मानि भावीत्यर्थे तमधीष्टोभृतोभूतोभावीति आर्हीयष्ठक् । तस्यापि अध्यर्द्धपूर्वाद्विगोर्लुगसंज्ञायाम् इतिलुक् । ततस्तृतीयैकवचनम् । सास्यजनुषासत्तजन्मभाविनेत्यर्थः । अतएवबृहस्पतिः—हाटकक्षितिगौरीणांसत्तजन्मानुगंफलमिति । गौरीशब्देनात्रगौरभिधीयते । प्रकरणात् । सुभगालोकस्यप्रियाःसम्मदेमेत्यन्वयः । रायस्पोषेणेति । रैशब्दस्यषष्ठ्यन्तस्यछान्दसोविसर्जनीयस्यसकारः । अन्येचवृषोत्सर्गस्यमन्त्राः संप्रत्यधीयमानमाध्यन्दिनीयशाखीयाः तत्रनात्यन्तिकः संशयः इतिनविवेचिताः ॥ पितृहीनस्यबालस्यनामादिकर्त्ता पितृहीनबालकनिरूपितमात्रादिपित्रादिमातामहादीनामाभ्युदयिकश्राद्धंकुर्य्यात् । तथाहि । स्वपितृभ्यःपितादद्यात्पुत्रसंस्कारकर्मणि ॥ पिण्डानोद्वाहनात्तेषांतस्याभावेतुतत्क्रमात् इतिवाक्यंप्रमाणम् । तस्यार्थः । पुत्रसंस्कारकर्मणिनामकरणात्पितृभ्यःस्वकीयपित्रादिभ्यःपिण्डान्दद्यात् श्राद्धंकुर्यात् । पिण्डपदेनश्राद्धोपलक्षणात् । आ उद्वाहनात् उद्वाहनंविवाहमभिव्याप्य । तेन विवाहपर्यन्तंसुतसं

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कारकर्म इति पर्यवस्यति। तस्याभावेतस्यापितुरभावे । तत्क्रमात्पितुरुपक्रमेणपिण्डान्दद्यादित्यर्थः। तथाच योनामादिकर्तापितृहीन स्यभवतिस पितृहीनपित्राद्युपक्रमेणश्राद्धंकुर्यादित्यर्थःसंपद्यते । ततश्चपितृहीननिरूपितपित्रादिबोधनात्तन्निरूपितमात्रादिमातामहादयोऽपि लभ्यन्ते । तस्येतिपदेनपित्रुस्थानात्। तस्यसंबन्धिशब्दत्वेनपुत्रस्योपस्थितातेनैवकर्तव्यसंस्कारेणपित्रादिनिरूपणंनतुमाणवकपित्रादिना। अतएकत्रतेननिरूपणान्मात्रादिपदकेमातामहादिपदकेचपितृहीनेनपुत्रेणैव निरूपणम्। तस्योपस्थितत्वात्। निरूपकान्तराकाङ्क्षानिवृत्तेःउप स्थापकाभावाच्चेति। तथाच तत्रमाणवकमातृपितामहीप्रपितामहीनांनान्दीमुखीनांमाणवकपितृपितामहप्रपितामहानांनान्दीमुखानां माणवक मातामहप्रमातामहवृद्धप्रमातामहानां नान्दीमुखानांमाणवकनामकरणनिमित्तकमाभ्युदयिकश्राद्धमहंकरिष्ये इतिनामगोत्राद्युच्चारणपूर्वकंवाक्यं भवति। एषचार्थः श्रीदत्तोपाध्यायसंमतः। तथाहि । पितृभक्तिश्राद्धकल्पग्रन्थेतैर्लिखितम्-अपुत्रस्यसपिण्डनानन्तरंकुत्रश्राद्धप्राप्तिरित्युक्त्वा तदीयकन्याविवाहेआभ्युदयिकश्राद्धे तत्प्राप्नोतीति। तथाचकन्यायाएवतत्रपित्रादिनिरूपणं नतु कन्यापितुः पित्रादिनिरूपणमितिस्फुटम्। यत्रतुपितुरभावोनास्ति क्षतादिनातस्याकर्तृत्वे तत्प्रतिनिधित्वेनतत्पुत्रेनामादिकर्तायोभवति स माणवकपितुर्मात्रादिपित्रादिमातामहादीनां श्राद्धंकुर्यात्। तस्यभावेतुतत्क्रमादितिवाक्यस्यतत्रानुपस्थितेः। तथाचमाणवकपितुर्मातृपितामहीप्रपितामहीनां नान्दीमुखीनांमाणवकपितुः पितृपितामहप्रपितामहानां नान्दीमुखानांमाणवकपितुर्मातामहप्रमातामहवृद्धप्रमातामहानांनान्दीमुखानां माणवकनामकरणनिमित्तकमाभ्युद यिकश्राद्धमहं करिष्ये इति नामगोत्राद्युच्चारणपूर्वकं वाक्यम्। एवं च पितुरभावे सर्वत्र माणवकेनैव निरूपणम्। माणवकपितरि जीवति माणवकपितृनिरूपिताएवमात्रादिपित्रादिमातामहादय इति निस्तरङ्गम्। आशौचान्तद्वितीयदिने प्रथमं प्रेतत्वविमुक्तिकाम आद्यादीनि यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालं षोडशश्राद्धान्यहंकरिष्ये इति प्रथमः संकल्पः।ततः प्रेतत्वविमुक्तिहेतुकषोडशश्राद्धान्तर्गताद्यश्राद्धमहं करिष्ये इति द्वितीयः संकल्पः। यत्र तु एकादशमासाभ्यन्तरेऽधिमासपातस्तत्रप्रेतत्वविमुक्तिकाम आद्यादीनि यथाकालं सप्तदशश्राद्धान्यहं करिष्ये इति प्रथमः संकल्पः। अत्र च संवत्सराभ्यन्तरे यद्यधिमासपातो भवति तदा मासिकार्थं दिनमेकं वर्द्धयेदिति विष्णुवाक्यं प्रमाणं सप्तदशकरणे॥ तथाहि। मासिकश्राद्धाधिकरणत्वेनाधिकं दिनमेकं तद्वाक्यं बोधयति। तेनाधिकतयासप्तदशश्राद्धं बोधयति। तेनैकादशाहानन्तरं यत्र द्वादशभिर्दिनैर्द्वादश मासिकानि कृत्वा त्रयोदशेऽह्निसपिण्डनं कुर्यादिति विधिः तत्रैवाधिमाससंभवे एकदिनश्राद्धवृद्ध्या त्रयोदशभिर्दिनैस्त्रयोदशमासिकानि कृत्वा चतुर्दशेऽह्निसपिण्डनं कुर्यादिति पर्यवसितोऽर्थो भवति। एवंच एकादशमासाभ्यन्तरेऽधिमासपाते सप्तदश श्राद्धानि कर्तव्यानीत्यायाति। तथाच मुख्यपक्षे वर्षसपिण्डने मासक्रमेणैव त्रयोदशसु मासेषु त्रयोदश मासिकानि मरणतिथिसजातीयतिथौ कर्त्तव्यानीति एकाहोनषाण्मासिके ऊनषाण्मासिकम् एकाहोनवर्षे ऊनवार्षिकं श्राद्धं कर्तव्यम्। द्वादशदिने सपिण्डने प्रथममासिकद्वितीयमासिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषष्ठमासिकसप्तममासिकाष्टममासिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकोनवार्षिकत्रयोदशमासिकानि अनुक्रमेणैकस्मिन्दिने कर्तव्यानि। त्रिपक्षे सपिण्डने मासे प्रथममासिकंकृत्वात्रिपक्षपूरणात्पूर्वदिने द्वितीयमासिकादित्रयोदशमासिकपर्यन्तानिद्वादशमासिकानिकर्तव्यानि। त्रिपक्षपूरकमरणतिथिसजातीयतिथौवासपिण्डनादिने एवं सर्वाणिकर्तव्यानि। षष्ठमासे सपिण्डनपक्षेपञ्चसु मासेषु पञ्चमासिकानि मरणतिथिसजातीयतिथौ कृत्वा षाण्मासिकपूरणपूर्वदिने ऊनषाण्मासिकादीनि दशमासिकानि कर्तव्यानि। षष्ठमासपूरकमरण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिथिसजातीयतिथौ सपिण्डनदिने एव वा ऊनषाण्मासिकादीनि कर्तव्यानि । नवममासे सपिण्डने अष्टसुमासेष्वष्टमासिकानि कर्तव्यानि । एकाहोनषाण्मासिके ऊनषाण्मासिकं कर्तव्यम् । नवममासपूरणपूर्वदिने नवममासिकादीनि राज्याद्युपद्रवे षाण्मासिकादीनि कर्तव्यानि । नवममासपूरणमरणतिथिसजातीयतिथौ सपिण्डनदिने एव वा कर्तव्यानि । एकादशाहानन्तरंदिनेदिनेएकैकमासिकश्राद्धकरणे त्रयोदशसु दिनेषु त्रयोदशमासिकानि कर्तव्यानि । षष्ठेदिने मासिकद्वयमूनषाण्मासिकं षष्ठमासिकं चकर्तव्यम् । त्रयोदशे दिने मासिकद्वयमूनवार्षिकं त्रयोदशमासिकं च कर्तव्यम् । चतुर्दशे दिने सपिण्डनम् ॥ शूद्रेण तु त्रयोदशदिने एव सपिण्डनं कर्तव्यमिति विशेषः ॥ अथ च त्रिपक्षादौ सपिण्डनपक्षे प्रथममासादौ यदित्वाशौचमापतति तदाऽऽशौचापगमे मासिकं कृत्वाग्रिममासादौ प्रकृतक्रमेण मासिकं कर्तव्यम् । क्षतंयद्यापतति तदाक्षतान्ते मासिकंकृत्वाऽग्रेप्रकृतक्रमेणकर्तव्यम् । यदिराष्ट्राद्युपद्रवरूपविघ्नेन दिनविस्मरणादिना वा क्षयाहेश्राद्धं न कृतं तदा एकादश्यां पतितमासिकानि कृत्वाग्रे प्रकृतक्रमेण मासिकंकर्तव्यम् । मासिकस्यैकोदिष्टरूपत्वात् । एकोदिष्टस्यचकर्तव्यतायां श्राद्धविघ्नेसमुत्पन्नेक्षयाहेऽविदितेतथा ॥ एकदश्यांप्रकुर्वीतकृष्णपक्षेविशेषतः इति वाक्यं प्रमाणम् । क्षताशौचयोरपि तदनन्तरकालकर्तव्यत्वं बोधितमेकोद्दिष्टस्येति । अग्रिममासिके पतितं मासिकं क्रियते इति जघन्यः पक्षः । प्रमाणाभावात् । केचित्तु प्रथममासिकश्राद्धाकरणे अपर्याप्तावृतुंप्राप्ति इतिवाक्येन मासद्वयान्तेमासिकद्वयं कर्तव्यम् । एवं प्रत्यृतु मासिकद्वयं कर्तव्यम् इत्ययमेवक्रमः । तत्र च वाक्यबलेन तृतीयऋतौपूर्वदिनेऊनषाण्मासिकम् ऋतुपूर्तौ पञ्चममासिकषष्ठमासिकेकर्तव्ये । एवंच षष्ठऋतुपूर्वदिनेऊनवार्षिकं षष्ठऋतुपूर्तिदिने एकादशमासिकद्वादशमासिकेकर्तव्ये । यत्र तु द्वादशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव दिने सपिण्डनकर्तव्यतायां प्रथममासिकादौकृते अशौचादिनासपिण्डनबाधः। तत्र कृतमासिकादेरकिंचित्करत्वम्। तद्दिनसपिण्डनक्रियो
पाधिकर्तव्यतया सपिण्डनासंभवे कृतमासिकानामयथाकालकृतत्वेनाकृतकल्पत्वात्।एकाहादिकर्तव्यसपिण्डनक्रियाकल्पे तु प्रथमगृहीतकल्प
स्यानिर्वाहे कल्पान्तरं नाश्रीयते इतिमतमनादेयम्।प्रेतत्वविमुक्तिहेतुत्वेन सपिण्डनक्रियायाअवश्यकर्त्तव्यत्वेन बाधकन्यायान्तरानवकाशादि
ति॥ अथावश्यकश्राद्धकालाः। तत्र विष्णुः—अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकामाघीप्रोष्ठपद्यूर्ध्वंकृष्णत्रयोदशीव्रीहियवपाकौचेति।
एतांस्तुश्राद्धकालान्वै नित्यानाहप्रजापतिः। श्राद्धमेतेष्वकुर्वाणोनरकम्प्रतिपद्यते॥ आमावास्याइत्यनेनकेवलाया आमावास्याया विधाना
दमावास्यामात्रं निरग्नीनामावश्यकःश्राद्धकालइति प्रतिपादितम्। तेनाग्निमतामिन्दुक्षयो निमित्तान्तरं तत्र। तेषामिन्दुक्षयापेक्षयातद्व्यवस्था
पकानिबहूनिवाक्यानितत्रोपयुक्तानि। अमावास्यायांतुयस्मिन्दिनेऽपराह्णेऽमावास्यालाभस्तस्मिन्नेवदिनेश्राद्धम्। उभयदिनेत्वपराह्णेऽमावास्या
लाभेप्रथमदिनेश्राद्धम्।प्रथमप्राप्तत्यागस्यान्याय्यत्वात्।उभयदिनेत्वपराह्णेऽमावास्यायाअलाभेउत्तरादिनेमध्याह्नेऽपिश्राद्धंकर्तव्यम्। मुख्यका
लाभात्। अविशेषान्मलमासामावास्यायामप्यावश्यकंश्राद्धंकर्तव्यम्॥ तिस्रोऽष्टकाइति।पौषमाघफाल्गुनकृष्णाष्टम्यः।तासुचापूपमांसशा
कानिश्राद्धद्रव्याणि।तत्रापूपस्यान्नरूपतयातस्यैवतृप्तिक्षणतयामुख्यत्वम्।मांसशाकयोस्तूपकरणत्वेनान्वयः यथासंख्यम्। अष्टकाद्वयेमुख्यद्र
व्यमोदनादिकमेव। अत्रपारस्करगृह्यम्—ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाऐन्द्रीवैश्वदेवीप्राजापत्यापित्र्याप्यपूपमांसशाकैर्यथासंख्यम्।अत्रतिसृणु
यथा संख्यम्। पित्र्यापीत्यनेन चतुर्थी अष्टकाविधीयते।तत्रापि शाकमुपकरणम्। वर्षासुमध्येशाकैश्चचतुर्थ्यामेवसर्वदा॥वर्षासुमध्येअपरपक्षस्य
भाद्रपदकृष्णपक्षत्वात्तदष्टम्यावर्षामध्यत्वम्। शाकैरितितस्यांब्रह्मपुराणे शाकोपकरणविधानात्। एवंचस्वातन्त्र्येणाप्याश्विनकृष्णाष्टम्यामष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कात्वेन श्राद्धविधानात्तस्मिन्पक्षे दिनान्तरे श्राद्धासंभवेऽप्यष्टम्याःस्वातंत्र्येणनिमित्तत्वमितिप्रतिपादितम् । एतयैवचतसृष्वप्यपूपमांसशाकासंपत्तौद्रव्यान्तरेणापिश्राद्धकरणंयुक्तम्।श्राद्धस्यानित्यत्वादितिप्रतिभाति ॥ अन्वष्टकास्तुसाग्नीनामावश्यकाः श्राद्धकालाः। अन्वष्टकाश्राद्धविधाने साग्निकर्तृकत्वलिङ्गदर्शनादिति। माघी मघायुक्तामाघपूर्णिमा तत्रैवमाघीशब्दस्यव्युत्पत्तिसिद्धत्वात् । अत्रान्वष्टकास्तिस्रः साग्नीनामावश्यकाः श्राद्धकालाः। अपरः साग्निनिरग्निसाधारणआवश्यकः श्राद्धकालः प्रौष्ठपद्यूर्ध्वकृष्णत्रयोदशी अपरपक्षीया। एतावताश्विनकृष्णपक्षस्यैवनित्यकालत्वेन तत्र दिनान्तरेआशौचादिना श्राद्धबाधेऽपित्रयोदश्यामावश्यकंश्राद्धकरणमित्युक्तंभवति । व्रीहियवपाकौचेति। शरदि वसन्तेच व्रीहियवाभ्यामावश्यकंश्राद्धम्। तत्रचनवव्रीहियवयोरसम्पत्तौपुराणाभ्यांव्रीहियवाभ्यां तत्र श्राद्धं कर्तव्यम्। तदभावेद्रव्यान्तरेणापि श्राद्धंकर्तव्यमिति। तथाच नवप्राशनकर्म्मप्रस्तावेगोभिलगृह्यभाष्येगृहमेधी व्रीहियवाभ्यांशरद्वसन्तयोर्यजेत श्यामाकैर्वनीवर्षासु आपत्कालेऽन्येन पुराणैर्वेतिवचनात्। अत्रवनीवानप्रस्थइत्यर्थः । यद्यप्यस्ययागेविधानम् । तथापिश्राद्धेऽपिद्रव्याकाङ्क्षायास्तुल्यतयातदसम्पत्तौपुराणव्रीहियवविधिरन्यद्रव्यविधिश्चोपतिष्ठतएव। वसिष्ठःश्रावण्याग्रहायण्योरष्टकासुचपितृभ्योदद्यात्। श्रावण्याग्रहायण्यौ। श्रावणपूर्णिमेश्रवणामृगशिरोयुक्ते । एतयोर्निरग्नीनामप्यावश्यकंश्राद्धकरणम्। विशेषाश्रवणात्। एतच्चश्राद्धकल्पेश्राद्धपंक्त्यांचसुव्यक्तम्। अष्टकाःकथिताएव। ब्रह्मपुराणे मनुः–आश्वयुक्कृष्णपक्षेतुश्राद्धंदेयंदिनेदिने ॥ त्रिभागहीनंपक्षंवात्रिभागंत्वर्द्धमेववा॥दिनेदिनेप्रतिदिनमित्यर्थः। एवंचापरपक्षीयदिनत्वेनविधानात्तस्मिन्पक्षेदिनपुरस्कारेण श्राद्धस्यप्रतिदिनकर्त्तव्यत्वंबोधितम्।तथाचापरपक्षेसर्वेषुदिनेष्वपराह्णकालेश्राद्धंकर्त्तव्यम्। तत्रनतिथिशेषजिज्ञासेतितिथिविशेषेकथितंफलंतत्रापिभवत्येव। श्राद्धस्य वस्तुतस्तत्तत्तिथ्यवच्छिन्नकालिकत्वात्। दिनपुरस्कारेणैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्राद्धकरणे—कन्यागतेसवितरियान्यहानितुषोडश क्रतुभिस्तानितुल्यानितेषुदत्तमथाक्षयमितिवाक्येअह्नांषोडशत्वंसंगच्छते । तिथिवृद्धयापर पक्षस्यषोडशदिनात्मकत्वसंभवात् । एवंच त्रयोदश्याममावास्यायांचाग्रिमदिनेऽपराह्णकालालाभेऽपि निषिद्धप्रातर्मुहूर्त्तद्वयातिरिक्तकाले कृतं श्राद्धं तदुभयतिथ्यवच्छिन्नकालश्राद्धेनापिकर्त्रा कर्तव्यम् । दिनत्वेनश्राद्धकरणपुरस्कारात्सर्वस्मिन् दिने तत्पक्षनिमित्तकमेवश्राद्धमा याति । दिनेदिने इत्यस्य तिथौतिथौ इतिव्याख्याने प्रथमं दिनशब्दस्य मुख्यार्थत्यागः, एकस्मिन्दिने श्राद्धयोग्यतिथिद्वयप्राप्तौ पार्वणद्व यप्रसङ्गः, एकस्मिन्दिने यस्यां तिथौ श्राद्धं कृतं तस्यां तिथौ दिनान्तरे श्राद्धकालप्राप्तौ श्राद्धानाचरणम् । तत्तिथ्यवच्छेदेन श्राद्धस्य कृतत्वात् । एवमुभयथ्च न सर्वप्रामाणिकव्यवहारासिद्धमितिदिनेदिने इति मुख्यशब्दार्थपरिग्रह एव युक्तः । त्रिभागहीनंपक्षमिति तृतीयभागहीनस्य पक्षस्यविधानात् । तत्र पञ्चमीषष्ठीप्रभृतिषुश्राद्धविधानम् । त्रिभागमिति तृतीयभागमारभ्य दशमीप्रभृतीत्यर्थः । अर्द्धमेवेतिपक्षार्द्धविधानम्। अष्टमीप्रभृतीत्यर्थः । अत्र च पक्षे कल्पचतुष्टयेऽपि चतुर्दशीत्यागः पार्वणे । श्राद्धेकृष्णदशम्यादौ वर्जयित्वाचतुर्द शीम् ॥ श्राद्धप्रशस्ताःतिथयो यथैतानतथेतराः इति मनुना चतुर्दशीपार्वणश्राद्धस्य निषेधात् । त्रयोदशीश्राद्धेऽपियद्यपिनिन्दाश्रूयते । तथापि निन्दायाः काम्यश्राद्धविषयत्वात आश्वयुक्कृष्णपक्षीयादिनप्राप्तस्यावश्यकत्वं तस्य नित्यत्वादिति त्रयोदशीश्राद्धं कर्तव्य मिति वहुप्रामाणिकव्यवस्था । नच्छेत्त्रयोदशीश्राद्धं पुत्रवान्यः सुतायुषे इत्यादिनिषेधवाक्यमलौकिकमितिरत्नाकरः । चतुर्दश्यां शस्त्रादिह तंस्यैकोद्दिष्टविधिनाश्राद्धम् । अत्र प्रायोऽनशनशस्त्राग्निविषोद्बन्धनिनांतथा ॥ चतुर्दश्यां तु कर्तव्यंतृप्त्यर्थमितिनिश्चयःइत्यादिब्रह्मपुराणादि वाक्येषुरोगेतरनिमित्तेन मृतानां चतुर्दश्यां श्राद्धं कर्तव्यमिति तात्पर्यम्।आचारानुरोधात्। तेन स्त्रियाअपि प्रसवेन मृतायाश्चतुर्दश्यामेकोद्दिष्टम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायुपुराणे—युवानस्तु गृहे यस्य मृतास्तेषां तु दापयेत् ॥ शस्त्रेण च हता ये वै तेषां दद्याच्चतुर्दशीम् ॥ गृहे इत्युपलक्षणम् । तेन युवदशायां
यत्रकुत्रापि मृतानां पित्रादीनां श्राद्धंचतुर्दश्यां कर्तव्यम्।शस्त्रहतानांच श्राद्धंकर्तव्यमित्यर्थः। युवमरणे तु युवदशामृतत्वमेव प्रयोजकं नतु रोगे
तरनिमित्तमृतत्वम्।हेतुविशेषानभिधानात्।युवेतराणां रोगेतरनिमित्तत्वं प्रयोजकम्।अतएवयुवेतरस्यानुपसर्गहेतुकमरणेचतुर्दश्यांनश्राद्धम्।रोग
निमित्तेनमृतत्वात् । एतच्चश्राद्धमेकोद्दिष्टविधिना।आचारात् ।चतुर्दश्यांतु यच्छ्राद्धंसपिण्डीकरणेकृते ॥ तदेकोद्दिष्टविधिनाकर्तव्यंशस्त्रघातिना
मिति गौडवाक्यदर्शनाच्च । शस्त्रघातएषामस्तीतिशस्त्रघातिनः शस्त्रादिहतास्तेषामित्यर्थः। स्त्रीणामप्येतदेकोद्दिष्टम् पुंस्त्वस्याविवक्षितत्वात्।
अत्र च शस्त्रादिनिमित्तमृतानां यौवनेमृतानाञ्च चतुर्दशीश्राद्धसमयो बोधित इति ।शस्त्रघातादिना मृतस्यैतद्दिनश्राद्धभागित्वबोधनेतात्पर्यात्ए
कोद्दिष्टश्राद्धसंकल्पवाक्ये तन्निमित्तकमरणोल्लेखो न प्रयोजकः ।वस्तुतः सतामेवनिमित्तानामेतच्चतुर्दशीश्राद्धानिमित्तत्वात् । तथाप्याश्विन
कृष्णचतुर्दश्याममुकगोत्रस्यपितुरमुकशर्मण एकोद्दिष्टश्राद्धमहं करिष्ये इत्येवं संकल्पः कर्तव्यः । युवानस्त्वत्रषोडशवर्षवयआरभ्य त्रि
शद्वार्षिकवयःपर्यन्ताविवक्षिता इतिरत्नाकरप्रभृतिनिबन्धः। अत्रपक्षे प्रतिपदादितिथिषु फलानिच नानाविधानि नानास्मृतिषुकथितानि । तेषु
पुरुषमात्रकामनाविषयकफलानि निष्कृष्यलिख्यन्ते।तद्यथा प्रतिपदिधनलाभोलब्धाविनाशः फलम् । द्वितीयायांद्विपदाधिपत्यम् । तृतीयायां
सर्वकामप्राप्तिः । चतुर्थ्यामापदामप्राप्तिः । पञ्चम्यांमहालक्ष्मीः । षष्ठ्यांद्विजकर्तृकपूजनम् । सप्तम्यांगणाधिपत्यम् । अष्टम्यांसंपूर्णर्द्धिसिद्धिः।
नवम्यांस्त्रीविषयकैश्वर्यम् । दशम्यांबहुगोजातीयलाभः । एकादश्यांबहुब्रह्मवर्चस्विपुत्राः । द्वादश्यांसुवर्णरजतम् । त्रयोदश्यांजातिश्रैष्ठ्यम् ।
चतुर्दश्यांभूतिः । अमावास्यायां प्रतिपदादितिथ्युक्तसर्वफलानि । अत्रचनित्यत्वपुरस्कारेणापि सर्वदिनक्रियमाणश्राद्धेषुतत्तत्तिथिप्राप्तौ तत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्फलप्राप्तिरपिभवतीतिप्रतिभाति । सन्ध्यावन्दनस्येवसंन्ध्यावटादिदेशकरणेकथितफलयोगात्गङ्गातीरादिकृतावश्यकश्राद्धवच्चेति । आश्विन कृष्णपक्षे केवलायास्त्रयोदश्याः पार्वणश्राद्धंप्रतिनिमित्तत्वमुक्तंविष्णुना—प्रौष्ठपद्यूर्ध्वंकृष्णत्रयोदशीत्यनेन।केवलायां मघाया निमित्तत्वमुक्तं देवीपुराणे तत्रापिमहतीपूजाकर्तव्यापितृदैवते॥ऋक्षेपिण्डप्रदानंतुज्येष्ठपुत्री विवर्जयेदित्यनेन ।पितृदैवते ऋक्षे मघायामित्यर्थः। मघात्रयोदश्योर्मिलितयोरपिनिमित्तत्वमुक्तंबहुभिः। तत्रशंखः-प्रौष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीम्॥प्राप्यश्राद्धंहिकर्तव्यंमधुनापायसेनच ॥ श्रीमहाभारते—अपि नःसकुलेज्यायान्योनोदद्यात्त्रयोदशीम्॥मघायां सर्पिषायुक्तम्पायसंदक्षिणायने॥मनुः—यत्किंचिन्मधुनामिश्रंप्रदद्यात्तुत्रयोदशीम् ॥ तदप्यक्षयमेव स्याद्वर्षासुचमघासुच ॥ वसिष्ठः—पितापितामहश्चैवतथैवप्रपितामहः॥उपासतेसुतंजातंशकुन्ताइवपिप्पलम्॥मधुमांसैश्चशाकैश्चपयसापायसेनच॥ एषनोदास्यतिश्राद्धंवर्षासुचमघासुच ॥ ब्रह्मपुराणे—आश्वयुज्यांतुकृष्णायांत्रयोदश्यांमघासुच ॥ प्रावृट्तौयमःप्रेतान्पितॄंश्चापियमालयात् ॥ विसर्ज्जयतिमानुष्येकृत्वाशून्यंस्वकंपुरम् ॥ क्षुधार्ताः कीर्तयन्तश्चदुष्कृतंतुस्वयंकृतम् ॥ पायसंपुत्रपौत्रेभ्यः कांक्षन्तोमधुसंयुतम् ॥ तस्मात्तांस्तत्रविधिनातर्पयेत्पायसेनच ॥ मध्वाज्यतिलमिश्रेणतत्रशीतेनचाम्भसा ॥ ग्रासमात्रंपरगृहाद्दद्यत्तंयःप्राप्नुयान्नरः । भिक्षामात्रेणयः प्राणान्संधारयतिवास्वयम् ॥ योवासंवर्धयेद्देहंप्रत्यहंस्वात्मविक्रयात् ॥ श्राद्धंतेनापिकर्तव्यंतैस्तैर्द्रव्यैःसुसंचितैः ॥ त्रयोदश्यां प्रयत्नेनवर्षासु चमघासुच ॥ नस्यात्परतरःकालःश्राद्धेष्वन्यत्रविद्यते ॥ यत्रसाक्षाद्धिपितरोगृह्णन्त्यमृतमक्षयम् ॥ आश्वयुज्यामिति । त्रयोदश्यामित्यस्यविशेषणम् ॥ तेनाश्विनकृष्णत्रयोदश्यामित्यर्थः । प्रावृट्तौवर्षर्तावित्यर्थः । शुक्लादिमासरीत्याऽपरपक्षस्य भाद्रपदान्तर्गतत्वाद्वर्षर्तुत्वम् ॥ अत्र तत्तद्द्रव्यविधानं श्राद्धस्यावश्यकर्तव्यत्वविधानं फलप्रकर्षविधानं च । मघात्रयोदश्योर्मिलितयोरमिलितयोः मघात्रयोदश्योःसूर्यस्यहस्तनक्ष

१ संध्यावटोयंछिन्नोनाम्नैवावशेषितः । यःप्रयागक्षेत्रेधूमशकटस्यांनिर्गमस्थानेआसीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रावस्थितौतृतीयंनिमित्तम् । तस्यगजच्छायेतिनाम । तथाच ब्रह्मपुराणे योगोमघात्रयोदश्योःकुञ्जरच्छायसंज्ञकः ॥ भवेन्मघायांसंस्थेचश
शिन्यर्कैकरेस्थिते ॥ तत्रच श्राद्धमावश्यकम् । तत्रयाज्ञवल्क्यः—व्यतीपातोगजच्छायाग्रहणंचन्द्रसूर्ययोः॥ श्राद्धम्प्रति रुचिश्चैवश्राद्धकालाः
प्रकीर्तिताः ॥ व्यतीपातो ज्योतिश्शास्त्रप्रसिद्धः सूर्याचन्द्रमसोः क्रान्तिसाम्यसमयः पुण्यकालविशेषः ॥ अत्रच गजच्छायायाश्चन्द्रसूर्यग्रहण
स्यचाऽऽवश्यकश्राद्धकालत्वम् । अत्र केवलायां त्रयोदश्यांमिलितयोर्मघात्रयोदश्योर्गजच्छायायां च सपुत्रापुत्रयोरप्यधिकारः । पिण्डवत्येव
श्राद्धे पुत्रिणआवश्यकश्राद्धानिषेधात् । नेच्छेत्त्रयोदशीश्राद्धंपुत्रवान्यःसुतायुषे इत्यादिनिषेधवाक्यममौलिकमितिरत्नाकरलेखनात् पुत्रवतो
ऽपित्रयोदशीश्राद्धाधिकारः । केवलायां मघायांपुत्रवताश्राद्धंपिण्डरहितं कर्तव्यमितिशेषः । गजच्छायया योगो यावत्कालमवतिष्ठते ताव
त्कालपर्यन्तं ब्राह्मणेन भोजनंनकर्तव्यम् । तथा ब्रह्मपुराणे—सूतकेमृतकेचापिग्रस्तयोश्चन्द्रसूर्ययोः। छायायांकुञ्जरस्याथभुक्त्वातुनरकंव्रजेत् ।
भुक्त्वाप्रमादाद्विप्रस्तुसम्यक्चान्द्रायणं चरेत् ॥ प्राक्छायेकुञ्जरस्यचेतियाज्ञवल्क्यवाक्ये श्राद्धंप्रतिनिमित्तान्तरमेवोक्तम् । पारस्करः श्रद्धा
न्वितःश्राद्धंकुर्याच्छाकेनापिनापरपक्षमतिक्रामेत् ॥ एतत्पक्षीयश्राद्धस्याक्षयफलत्वमपि । तस्मिन्पक्षेकल्पचतुष्टयेप्रथमपक्षाद्युपक्रमेण श्रा
द्धारम्भे कृते तत्रविघ्नेवृत्तेऽग्रिमकल्पो नानुसरणीयइतिमतमनादेयम् । नित्यत्वेकल्पान्तरेबाधकन्यायानवतारादिति।एतस्मिन्पक्षेश्राद्धकरणाभा
वे कार्तिकामावास्यायामितोऽप्यावश्यकंश्राद्धम् येयंदीपान्विताराजन्ख्यातापञ्चदशीभुवि ॥ तस्यांदेयंनचेद्दत्तंपितॄणांतुमहालये इतिवाक्यात् ।
महालये पितॄणामुत्सवाश्रयेऽपरपक्षेइत्यर्थः ॥ शातातपः—सर्वस्वेनापिकर्त्तव्यंश्राद्धंवैराहुदर्शने ॥ अकुर्वाणस्तुतच्छ्राद्धं पङ्केगौरिवसीदति ॥
राहुदर्शनदत्तंहिश्राद्धमाचन्द्रतारकमिति । नवोदकेनवान्नेचगृहप्रच्छादनेतथा । पितरःस्पृहयन्त्यन्नमष्टकासुमघासुच ॥ तस्माद्दद्यात्सदायुक्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्वत्सुब्राह्मणेषुच ॥ नवोदकेइति । वर्षोपक्रमेजलसंभवेइत्यर्थः । सदाचारादार्द्रानक्षत्रावस्थितसूर्यावच्छिन्नसमयइत्यर्थः । नवान्नेइति । शरदिवसन्तेचइतिप्राञ्चः । गृहप्रच्छादनेइति । गृहोपरितृणेनाच्छादनम् । एतत्पार्वणश्राद्धनिमित्तम् । गृहप्रवेशस्त्वाभ्युदयिकश्राद्धनिमित्तं प्रवेशेनववेश्मनइतिवाक्येनविहितम् । तीर्थनिमित्तकं पूर्वं कथितम् । अत्र नवान्नभक्षणनिमित्तं च पार्वणश्राद्धं ज्योतिषेप्रतिपादितम् । तत्रचपितृदेवेभ्योऽदत्त्वानवान्नभक्षणंनिषिद्धमितिनवान्नभक्षणपूर्वकालेआवश्यकं श्राद्धम् ॥ यद्यपिनवानिनानाविधान्यन्नानिभवन्ति । तथापि गृहे नवान्नप्राशननिमित्तकनवान्नप्राशनकर्मकथने गृह्यभाष्येच गृहमेधी व्रीहियवाभ्यां शरद्वसन्तयोर्यजेत श्यामाकैर्वनी वर्षासुइतिलिखितेनवाक्येन षष्ठिकयवश्यामाकरूपान्नसंभवकालएवानियमितः । तत्रश्यामाकोत्पत्तिर्वानप्रस्थानांश्राद्धकालः । गृहस्थानांयवव्रीहिप्राशनपरश्श्राद्धकालः । यद्यपि नवान्नप्राशनकर्मणिइष्टेर्विधानम् । तथाप्याकाङ्क्षातुल्यतया श्राद्धेऽपि तदुभयमेवानिमित्तामिति । तत्र षष्ठिकव्रीहिभक्षणनिमित्तकंशरदि यवान्नभक्षणनिमित्तकंवसन्ते हेमन्तेहेमन्तिकनवान्नभक्षणनिमित्तकम् । ज्योतिषानुसारात् । तथाहि । ज्योतिषेभोजराजः । वृश्चिकेपूर्वभागेतुनवान्नंशस्यतेबुधैः । उत्तरेक्रियमाणंतुधनुष्येवकृतं भवेत् ॥ धनुर्मासिकृतंश्राद्धंपितॄन्नैवोपतिष्ठते ॥ पूर्वभागोऽत्रवृश्चिकत्रयोदशांशकरूपः । आचारात् । धनुर्मासिकृतंश्राद्धंहैमन्तीषुनिशासुच ॥ पितरस्तन्नगृह्णन्तिनवान्नामिषकाङ्क्षिणः ॥ शुक्लेपक्षेनवंधान्यंपक्वंज्ञात्वासुशोभनम् ॥ सुतिथौसुमुहूर्तेचनवान्नफलभक्षणम् ॥ त्रिजन्मसुत्रयोदश्यांनन्दायांपितृभेपिवा ॥ श्राद्धंशुक्रदिनेनैवकार्यंसंततिमिच्छता ॥ चैत्रपौषेकृष्णपक्षेनवान्नंवर्जयेत्सदा ॥ भवेज्जन्मान्तरेरोगीपितॄणांनोपतिष्ठते॥अत्रचैत्रपौषयोर्निषेधात् वृश्चिकेनवान्नभक्षणासंभवे माघादौश्राद्धपूर्वकंनवान्नभक्षणंयुज्यतएवेति । चैत्रेनवान्नभक्षणनिषेधादर्थाद्यवेनापिनवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नभक्षणनिमित्तं यवपाकात्पृथक्श्राद्धमायाति । वायुपुराणे-शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षणः ॥ कृष्णपक्षापराह्णेतुरौहिणंतुनलङ्घयेत् ॥
अत्ररौहिणंनलङ्घयेदिति कृष्णपक्षशुक्लपक्षयोः श्राद्धेरौहिणंपूर्वापरसीमा । तेनशुक्लपक्षश्राद्धेत्ववसानसीमारौहिणं, तदनंतरंनकर्तव्यमित्यर्थः ।
कृष्णपक्षेश्राद्धारम्भसीमारौहिणं, तावन्नारम्भणीयमित्यर्थः । ब्रह्मपुराणे-पूर्वाह्णेमातृकंश्राद्धमपराह्णेतुपैतृकम्॥ एकोद्दिष्टन्तुमध्याह्नेप्रातर्वृद्धिनि
मित्तकम् ॥ मातृकंश्राद्धमन्वष्टकाश्राद्धं पूर्वाह्णे अपराह्णेपैतृकं कृष्णपक्षापराह्णे शुक्लपक्षेपूर्वाह्णेविधानात् वृद्धिनिमित्तकमाभ्युदयिकमित्यर्थः ।
मत्स्यपुराणे-प्रातःकालोमुहूर्तांस्त्रीन्सङ्गवस्तावदेवतु ॥ मध्याह्नस्त्रिमुहूर्तःस्यादपराह्णस्ततः परम्॥सायाह्नस्त्रिमुहूर्तःस्याच्छ्राद्धंतत्रनकारयेत् ॥
राक्षसीनामसावेलागर्हितासर्वकर्मसु ॥ अह्नोमुहूर्ताविख्यातादशपञ्चचसर्वदा ॥ तत्राष्टमोमुहूर्तोयःसकालःकुतुपःस्मृतः ॥ मध्याह्नेसर्वदायस्मा
न्मन्दीभवतिभास्करः ॥ तस्मादनन्तफलदस्तत्रारम्भोविशिष्यते ॥ ऊर्ध्वंमुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् । मुहूर्तपञ्चकंचैवस्वधाभवनामि
ष्यते । अत्र सर्वैकवाक्यतयाऽयमर्थः । पञ्चधाविभक्तस्यपञ्चदशमुहूर्तात्मकस्यदिवसस्यप्रातःकालादयःपञ्चभागास्तेष्वाभ्युदयिकादिश्राद्धंच
तुष्टयंचतुर्षुभागेषुप्रशस्ततमम् । सतिसंभवेतत्रैवकर्तव्यम्।यदातुप्रशस्तमध्याह्नादिकाललाभएकोद्दिष्टादौनभवति तदाऽनिषिद्धसङ्गवादिकालेषु
एकोद्दिष्टादिकंकर्तव्यमिति । अतएवपार्वणेऽपिअपरपक्षादावपराह्णालाभेसङ्गवादिष्वपिकर्तव्यता । निषिद्धेकालेसर्वेषामनाचरणम् । तदर्थंविवेच
यति ऊर्ध्वंमुहूर्तादिति । कुतपादूर्ध्वंमुहूर्तचतुष्टयं मुहूर्तपञ्चकंचकुतपात्पूर्वमर्थादेकंमुहूर्तंकुतपएव । एतन्मुहूर्तदशकंस्वधावाचनमिष्यते ॥
स्वधावाच्यतेऽत्रेतिस्वधावाचनंश्राद्धयोग्यइत्यर्थः । प्रातर्मुहूर्तद्वयंसायाह्नेमुहूर्तत्रयमिति मुहूर्तपञ्चकंसर्वश्राद्धेषुनिषिद्धम् । मनुः-
रात्रौश्राद्धंनकुर्वीतराक्षसीकीर्तिताहिसा ॥ सयसोरुभयोश्चैवसूर्येचैवाचिरोदिते ॥ अचिरोदितेइति । दिवोपक्रमेमुहूर्तद्वयमित्यर्थः । विष्णुः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्ध्यारात्र्योर्नकर्तव्यंश्राद्धंखलुविचक्षणैः ॥ तयोरपिचकर्तव्यंयदिस्याद्राहुदर्शनम् ॥ स्नानंदानंतथाश्राद्धमनन्तंराहुदर्शने ॥ आसुरी रात्रिरन्यत्रतस्मात्तांपरिवर्जयेत् । एतेनान्यत्रापितात्कालिकश्राद्धनिमित्तेपुत्रजन्मादौरात्रिसर्वदैवश्राद्धंकर्तव्यमित्युक्तंभवति । एवंचानघे रावश्यकश्राद्धनिमित्तानि अमावास्याःसर्वाः चतस्रोऽष्टका माघीश्रावण्याग्रहायण्यःपूर्णिमास्तिस्रः आश्विनकृष्णपक्षस्तत्पक्षीयत्रयोदशी गजच्छायाचन्द्रसूर्यग्रहणंव्रीहियवपाकौतीर्थप्राप्तिः आर्द्रानक्षत्रावस्थितिःसूर्यस्य नवान्नभक्षणमाभ्युदयिकश्राद्धनिमित्तानिच ॥ एषुश्राद्ध मावश्यकम्।अकरणेऽनिष्टोपदेशादिति । श्राद्धेप्रशस्तोदेशो गङ्गातीरादिः । निषिद्धस्तुदेशः महानद्युत्तरंमगधदक्षिणद्वादशयोजनावच्छिन्न स्त्रिशङ्कुदेशःकलिङ्गदेशःम्लेच्छदेशःशर्करादिसंकीर्णदेशः ॥ अथ श्राद्धेप्रशस्तब्राह्मणाः—त्रिदण्डीयतिःआत्मवित्वेदाङ्गवित्वानप्रस्थःब्रह्म चारी असगोत्रः साधुगृहस्थः याज्ञिकः पुराणवक्ता श्राद्धकर्मवित् विष्णुशिवसूर्यान्यतमभक्तः असमानप्रवरः पितृभक्तः श्वशुरः दौहित्रः गुरुः आचार्यः जामाता ऋत्विक् मातृष्वस्रीयः पितृष्वस्रीयः मातामहः मातुलः भागिनेयः अष्टवर्षपरिणीतासुतः पङ्क्तिपावनः गायत्रीमा त्रसारोपिसदाचारः ॥ अथश्राद्धेनिषिद्धब्राह्मणाः—नामन्त्रयेदित्यनुवृत्तौकात्यायनः—द्विर्नग्नशुक्लविक्लिधिश्यावदन्तविद्धप्रजननव्याधितव्य ङ्गिश्वित्रिकुष्ठिकुनखिवर्जमिति । द्विर्नग्नोदुश्चर्मा । शुक्लोत्रातिगौरः । विक्लिधिर्विचर्चिकायुतः । शुक्लविक्लिधिः शुक्लाण्डइतिस्मृतिरत्नविवेकः । श्यावदन्तोजन्मनैवकृष्णदन्तः । विद्धप्रजननश्छिन्नमेढ्रचर्मा । एवंमित्रंशत्रुः मूर्खः ग्रामयाजकः देवलकः चिकित्सकः क्रयविक्रयोपजीवीग्रामप्रे ष्यः राजप्रेष्यः गुरुविरोधी नक्षत्रग्रहसूचकः त्यक्ताग्निः वार्धुषिकः यक्ष्मी पशुपालकः परिवेत्तापरिवित्तिःनिराकृतिःनर्तनशीलः अवकीर्णीवृष लीपतिः । कन्यातुवृषलीज्ञेयावृषलीयामृतप्रजा । अपरावृषलीज्ञेयाकुमारीयारजस्वला ॥ पौनर्भवः काणः गृहावस्थितव्यभिचारिणीस्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्राद्ध- पतिः शूद्रशिष्यः अभिशस्तः कुण्डः गोलकः पतितसंसर्गी अव्रती क्लीबः योनिदोषवान् दिधिषूपतिः पुत्रपाठितः शूद्रापतिः स्त्रीजितः द्व्य वि०
॥१६॥ ङ्गुलातीतकर्णः शिल्पजीवी स्त्रीयाजकः पतितश्चक्री दुराचारः ऐन्द्रजालिकः पारदारिकः अजपी मातृत्यागी पितृत्यागी दारत्यागी चटकपो
षकः अकृतविवाहः नास्तिकः कृपणः असत्यवादी ऋणहर्ता सर्वथाकेशशून्यशिरस्कः स्त्रीतुल्यवाक्चेष्टः स्वाश्रमविच्युतः पर्याहित
पयोधाता ॥ सोदर्यैतिष्ठतिज्येष्ठेह्यग्न्याधानंकरोतिहि । तयोःपर्याहितोज्येष्ठः पर्याधाताकनिष्ठकः ॥ अग्न्युत्सादकः अरण्यदाही आव
सथदाही क्षेत्रस्यदाही अगारदाही सदाव्यसनशीलः रक्तकेशः । नपुंसकभेदाः—षण्डकोवातजःषण्डः क्लीबोप्यथनपुंसकः । कीलकश्चेति
षड्धाऽयंक्लीबभेदोविभावितः । शूद्रयाजकः वान्ताशी राजकारितपापचिह्नाङ्कितः वेश्यापतिः युद्धाचार्य्यः स्रोतोभेदकः वृक्षारोपणशीलः
कन्यादूषकः हिंस्रवृषलवृत्तिःसदायाजकः श्लीपदी कूटसाक्षी गणयाजकः सूत्रधारादिःधर्मकृत्येभग्नोत्साहःहीनातिरिक्ताङ्गः साहसिकःचौ
रिकः कपटतुलाव्यवहारी आत्मम्भरिः पुंस्त्वोपघाती कृत्याभिचारशीलःदत्तापलापी समयभेदकः पक्षिघाती मीनघाती सर्पघाती क
च्छपघाती नानाजन्तुवधासक्तश्च वधबन्धोपजीवी शूद्रप्रेष्यः मांसविक्रयी गरदःकुण्डाशी श्येनक्रीडी समुद्रयायी चारणवृत्त्युपजीवी मद्यपः
रसविक्रयी केकरःधनुष्कर्ताशरकर्तामित्रध्रुक् द्यूतवृत्तिःभृतकाध्यापितः पित्राविवदमानःदूतः नित्यंयाचकःकाण्डपृष्ठः । स्वकुलंपृष्ठतः
कृत्वायोवैपरकुलंव्रजेत् ॥ तेनदुश्चरितेनासौकाण्डपृष्ठइतिस्मृतः ॥ उन्मत्तःगण्डमाली वेदनिन्दकः उष्ट्रदमकः गोदमकःदन्तिदमकः श्मश्रु ॥१६॥
कालेप्यजातश्मश्रुः गलरोगी छिन्नागः धर्मविक्रयी अश्वविक्रयी गजविक्रयी गोविक्रयी लवणविक्रयी सोमविक्रयी लाक्षाविक्रयी चामरवि
क्रयी पूर्वदिनेकृतस्त्रीसङ्गमः पुत्रिकापतिः रजस्वलास्त्रीकःएककूपोदकेग्रामेसंवत्सरवासी अन्धः बधिरः पाण्डुरोगी दण्डाधिकृतः अशुचिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजद्विष्टः पुरोहितः अनूढापुत्रः अनूढापतिः अनुपासितसन्ध्यःअष्टौपापरोगिणः—उन्मादस्त्वग्दोषोराजयक्ष्माश्वासोमधुमेहोभगन्दरोमहो दरस्त्वश्मरीत्यष्टौपापरोगाः ॥ अथश्राद्धेप्रशस्तकुशाः—दक्षिणदिगवस्थितदक्षिणावनतगोकर्णदीर्घाः समूलाग्रा हरिताः श्राद्धदिवसेस्वयं प्रातरुत्पाठिताःपिण्डभूस्तरणेउपमूलंसकृल्लूनाःश्राद्धकर्तृबद्धमुष्टिहस्तमिताःयोग्यदेशस्थाः । कुशाभावेमुञ्जश्यामाकदूर्वाकाशवल्वजाः तीक्ष्णरोमाणश्च ॥ अथनिषिद्धकुशाः—चिताजाताःवर्त्मजाताः यज्ञविनियुक्तस्तरणविनियुक्तासनविनियुक्तापिण्डविनियुक्तपितृतर्पणविनि युक्तामेध्यलिप्तनीलीक्षेत्रजातकार्पासक्षेत्रजाताः ॥ अथश्राद्धेतिलाः । श्यामाः प्रशस्ताः । श्वेता निषिद्धाः ॥ श्राद्धेनिषिद्धजलम् ॥ दुर्गंधिजलं स्वल्पजलाशयजलं पर्युषितजलम् अशुच्युच्छिष्टस्पृष्टोद्धृतजलम् अन्त्यजलाशयजलम् अनुत्सृष्टपरखानितजलाशयजलम् अभोज्य निपानजलं पतितादिकारितखातजलं तर्पणेदर्भपत्रतिलहेमरजतान्यतमरहितंजलं निषिद्धम् ॥ अथश्राद्धेऽर्घपात्राणि ॥ सौवर्णराजतताम्रमय खड्गपात्रमणिमयपात्राणि त्रैवर्णिकनिर्मितानिपलाशादियज्ञियवृक्षपात्राणि पत्रपुटकानिच । एतान्येवपरिवेषणेभोजनार्थेचपात्राणिप्रशस्तानि ॥ अथभोजनेपरिवेषणेचनिषिद्धानिपात्राणि । सीसकमयायोमयपाषाणमयभग्नपात्रक्षुद्रपात्राणि । दैवेराजतानि । भोजनेमृन्मयपात्रम् ॥ अथ श्राद्धेगन्धादिपञ्चकम् ॥तत्रगन्धाः॥ श्वेतचन्दनाऽगुरुकृष्णागुरुगुग्गुलुत्वक् कुङ्कुमकर्पूरपद्मकाष्ठोशीरकुटजजटामांस्यः । गेढिशरणंसुगन्धिद्रव्यमे तत् नतुतुलस्यनुकारीउग्रगन्धोवृक्षः । सिन्दुवारः । निषिद्धगन्धाः कस्तूरीसिल्हकादीनि ॥ अथपुष्पाणिविहितानि । पद्मनीलोत्पलकुमुदचम्प कतिलतगरयूथिकामाधवीकुन्दकुब्जकानवमालिकासेवन्तीकल्हारतुलसीपत्राणि । निषिद्धेतरश्वेतपुष्पाणि । अर्कभाण्डीपीताम्लानकृमिकेशा दिदुष्टानि उग्रगन्धीनि रक्तवर्णौण्ड्रपुष्परक्तकरवीरश्वेतसुगन्धिकुसुमेतरकण्टकिवृक्षपुष्पचैत्यवृक्षोद्भवपुष्पाणि निषिद्धानि ॥ अथश्राद्धेधूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्याणि । सघृतगुग्गुलसमधुगुग्गुलचन्दनाऽगरूशीरपद्मकाष्ठकर्पूरश्रीखण्डाः । तदभावेदेवदारुसरलाद्यपि ॥ अथनिषिद्धधूपाः । केवलघृतंकेवलगुग्गुलः तृणगुग्गुलः उग्रगन्धिअगन्धिअशुचिसंबद्धानि प्राणिजंच कस्तूरिकादि ॥ दीपेघृतंतिलतैलंचविहितम् । तदभावेसर्षपादिस्नेहः । प्राणिजस्नेहोदीपेनिषिद्धः ॥ श्राद्धेवस्त्रम् । नवमङ्गल्यमंशुभ्रंसदशंदेयम् । संपत्तौसत्यांवासोयुगं त्रिपटंवा । धौतकौशेयकम्बलादिदानमधिकफलम् । उपवीतमधिकफलार्थंनत्वावश्यकम् । ताम्बूलादीनिश्रेष्ठतमवस्तूनिगन्धदानाद्यवसरेदातव्यानि । ताम्बूलोपकरणानि । पर्णपूगचूर्णखादिरसारकर्पूरश्रीखण्डकस्तूर्यैलाकङ्कोललवङ्गद्रव्याणि । अत्रकर्पूरादीनिपृथगपिदेयानि ॥ अथश्राद्धदेशेसन्निधापनीयानि ॥ गण्डकशृङ्गपात्रश्वेतरक्तनेपालकम्बलकृष्णाजिनगौरसर्षपगौरकृष्णारण्यत्रिविधतिलदण्डियतिरजताक्षतकृष्णच्छागाः । एतानिश्राद्धंपुनन्ति ॥ अथश्राद्धदेशादपसारणीयानि ॥ काककुक्कुटविड्वराहबिडालवृषलवृषलीपतिखञ्जषण्डा रजस्वला त्रुटितकर्णी पतितः कुष्ठी व्रणी नास्तिकः भयानकः अशुचिः नग्नः धूर्तः नीलकषायवस्त्रः छिन्नकर्णः लोहः सीसम् मलिनाम्बरः दीर्घरोगी अभिशस्तः ऊनाङ्गः अधिकाङ्गः काणः दातृप्रेष्यः मद्यपः भोगिनीपतिः भग्नकुलः असती चण्डालः पाषण्डः पर्युषितान्नम् इति । एतेषांकाकादीनामन्यतमदृष्टस्पृष्टहतश्राद्धहविषांत्यागः ॥ हविरन्तरासंभवेतेष्वेवहविष्ष्वेवंमृद्युक्ताभिरद्भिःप्रोक्षणम् तिलगौरसर्षपविकिरणंच कृत्वातैरेवहविर्भिः श्राद्धंकर्तव्यम् ॥ मातृपितृवंशाअसद्वंशास्त्री पाकादिश्राद्धकर्मानुकूलव्यापारे निषिद्धा ॥ अथश्राद्धेविहितानिहविर्द्रव्याणि ॥ तत्रदुग्धदधिघृतानि गव्यानि गव्यंपायसम् तिलतण्डुलमुद्गसाधितं कृसरान्नम् अपूपादिःशर्कराक्षीरसंयुक्ताः पृथुकाः मध्वक्तलाजाः तिलव्रीहियवाश्चेति शालिसमुत्पन्नधान्यंप्रसातिका । प्रसातिकानीवारविशेषइतिहलायुधः । प्रसातिका मध्यदेशेशाटीलाइतिप्रसिद्धंधान्यम् । चतुर्वर्णानामेवश्वेतापीतारक्ताकृष्णाचेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्राद्धपल्लवः । मगधदेशेप्रसिद्धेयंषाष्टिका । अत्रआशुधान्यंशुक्लंश्राद्धेप्रयुज्यते ग्राम्याभिरोषधीभिर्मासंप्रीयन्तइतिसामान्यतोविधानात् विशेषानिषेधात् । किंचच्छन्दोगपरिशिष्टटीकायांशारदंधान्यषष्टिकादीत्यादिपदेनास्यैवसंग्रहः । कृष्णमाषा मुद्गगोधूमश्यमाकनीवारकलापकङ्गुवंशबीजानि ॥ अथमांसानि । गण्डकमांसंविषाणसमयानुत्थितशृङ्गच्छागमांसम् । सर्वलोहितच्छागमांसंगोधामांसहरिणविचित्रहरिणकृष्णहरिणशम्बरमृगमेषशशककूर्मारण्यवराहमांसानि । तित्तिरिलावकवर्त्तकाशल्लकीक्रकराः । एषांपक्षिणांमांसानि ॥ क्रकरःकरातइतिप्रसिद्धः ॥ वार्ध्रीणसमांसम् ॥ त्रिपिबंत्विन्द्रियक्षीणंश्वेतंवृद्धप्रजापतिम् ॥ वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाः पितृकर्माणि ॥ कृष्णग्रीवोरक्तशिराः श्वेतपक्षोविहङ्गमः ॥ सवैवार्ध्रीणसःप्रोक्तइत्येषानैगमीश्रुतिः ॥ छागपक्षिणौवार्ध्रीणसौतयोर्मांसं मन्त्रसंस्कृतमांसम् ॥ यदा छागादिकंपशुमालभ्यमांसमुपादीयतेतदाप्रथमंमन्त्रेणपशुप्रोक्षणंकर्त्तव्यम् । मन्त्रश्च ॐ पितृभ्यस्त्वाजुष्टंप्रोक्षामि । एकोद्दिष्टेतु पित्रेत्वाजुष्टं प्रोक्षामीत्यादिरूपः । अनालम्भपक्षे सिंहादिहतमांसादिषुनमन्त्रसंस्कारापेक्षेतिसिंहव्याघ्रहतहरिणमांसं लब्धक्रीतच्छागादिमांसं प्रस्तराद्यभिघातच्छागादिमांसम् ॥ अथमत्स्याः । महाशल्करोहितराजीवपाठीनश्वेतशल्काः अन्येपि ॥ अथशाकाः । कालशाकंचवास्तूकंमूलकंकृष्णनाडिका ॥ वेत्रांकुरंकलापंचपटोलंसार्षपंतथा ॥ सूर्यावर्तंसुनिष्पन्नंशाकान्याहुर्मनीषिणः ॥ कृष्णनाडिका कृष्णनाडीचइतिश्राद्धपल्लवपङ्क्तौ । सूर्यावर्त्तं हुरहुरइतिप्रसिद्धम् सुनिष्पन्नं सुसिद्धं । अम्लोनिकषायपत्रसदृशपत्रं चौपत्रीतिप्रसिद्धम् । जलप्रभवशाकंपटुनाडीशाकञ्च, वाक्यान्तरात् ॥ अथफलानि । आम्रपनसकदलीनालिकेरामलकीप्राचीनामलकीपद्मबीजखर्जूरतिन्दुककण्टकारिकाद्राक्षाकर्मकनारङ्गकपलीदाडिमदाडिमीबिल्वाम्रातकलकुचबदरीद्वयपूगफलबीजपूरकक्षीरिकात्रापुषपरूषकशृंगाटकमधूकगम्भारीफलपिप्पलीमरिचकोविदारजम्बू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि। यानिफलानिपक्वानिभक्ष्याणि तान्ययत्नपक्वानि देयानि। मधूकपुष्पंकोशकलीरभेदाः। तद्विकाराश्चगुडशर्करादयः। अन्यान्यपिनिषिद्धे
तरस्वादुमधुररसानिकर्कटीप्रभृतीनि श्राद्धेदेयानि। फलान्ययत्नपक्वानिदेयानि॥ अथकन्दाः॥ सूरणः दीर्घमूलकंकसेरुविशंद्विप्रकारं सर्वेशा
लूकभेदाः आर्द्रकं विदारीकन्दइतिप्रसिद्धम्। तालमूलीशतावरीकन्देषु यथा यदभ्यवहरणीयंभवति तथाकृत्वा दातव्यं तदिति॥ अथव्यञ्जनसं
स्कारकद्रव्याणि। हिंगुजीरकधान्यकहरिद्राशुण्ठीमरिचार्द्रकदाडिमीवीजघृततैलानि॥ अथलवणानि। सामुद्रिकसाम्भरिसैन्धवानि॥ तैलं
तिलभवंसार्षपंच। अत्रच मांसादीनिव्यञ्जनान्युपकरणानिचामान्नश्राद्धेआमान्येवदातव्यानि सिद्धान्नश्राद्धेसिद्धान्येवदातव्यानीति श्राद्धपल्लवः।
सक्तुलाजा न चिपिटकाः दुग्धविकारदधिदुग्धघृतगुडलड्डुकादिपक्वान्नानि चाऽग्निसाधितान्यप्यामश्राद्धे देयानीति श्राद्धपल्लवश्राद्धप्रदीपौ। अत्रच
कालशाकंमहाशल्काः खड्गलोहामिषंमधु॥ आनन्त्यायैवकल्पंतेमुन्यन्नानिचसर्वशः। कालशाकंप्रसिद्धम्। महाशल्कारोहितप्रभृतयोमत्स्याः।
खड्गोगण्डकः। लोहः सर्वलोहितच्छागः तयोर्मांसम्। मधुक्षौद्रम्। मुन्यन्नानि नीवारः। एतैः श्राद्धमनन्तपितृतृप्तिजनकम्। शर्कराक्षीरसंयुक्ताः
पृथुकानित्यमक्षयाः। एतैःश्राद्धमक्षयपितृतृप्तिजनकम्। लाजांश्चमधुसंयुक्तान्सक्तून्शर्करयासहश्राद्धेदद्यात्। अत्रविहितद्रव्याणांश्राद्धदानेत
त्फलेच्छायांसमुच्चयोनतुविकल्पः। भक्ष्यंभोज्यंचविविधंमूलानिचफलानिच॥ हृद्यानिचैवमांसानिपानानिसुरभीणिच॥ उपनेयंसर्वमेतादितिमनुवच
नात्, ततोन्नंवहुसंस्कारंनैकव्यञ्जनपानवत्॥ चोष्यपेयसमृद्धंचयथावदुपपादयेदितिदेवलवाक्याच्च, समुच्चयविधानात् नैकव्यञ्जनपानवदित्यपि ॥१७॥
अनेकव्यञ्जनविधानं नत्वेकव्यञ्जननिषेधः। वाक्यभेदप्रसङ्गात्। तस्मादनेकव्यञ्जनस्यप्राशस्त्यम् एकव्यञ्जनस्यानिषेधात्। अनेकव्यञ्जनस्याला
भेऽनिषिद्धत्वादेकमपिव्यञ्जनमुपादेयमितिविहितद्रव्येषुएकद्रव्यदानेनापिश्राद्धस्वरूपनिर्वाहः॥ अथश्राद्धेविहिताऽनिषिद्धद्रव्याणि। पद्मबिल्वहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गुपिप्पलीशृंगाटकदधिसक्तुश्वेतासिविकेमुङ्कमधुकमरिचानि । अत्रहिंगुपिप्पलीमरिचानिद्रव्यान्तरसंस्कारार्थं देयानि केवलानि नदेयानि । परिशिष्टानिविहितालाभे देयानि ॥ अथश्राद्धेनिषिद्धद्रव्याणि । केवलजलेवारद्वयसाधितमुद्गाद्यन्नरूपंद्भिः स्विन्नमुपभुक्ताग्रभागरूपा ग्रावलेहितं शुष्कं पर्युषितं परिदग्धं सशर्करं कीटपाषाणकेशोपहतं वाग्दुष्टं भावदुष्टं दुष्टोपहतं श्वासोपहतं वासोवधूतम् । एतानि विहितद्रव्याण्यपि निषिद्धानि । विषहतमांसं छद्महतमांसं व्याधिहतमांसं सिंहव्याघ्रेतरतिर्यग्घतंमांसं मंत्राप्रोक्षितालब्धपशुमांसं महिषीक्षीरहरिणीक्षीरमेषीक्षीरोष्ट्रीक्षीरच्छागीक्षीरचमरीक्षीरैकशफीक्षीराणि । प्रशस्तमपिश्राद्धार्थंमेप्रयच्छस्वेतियाचितदुग्धमुद्धृतसारंचदुग्धंनिषिद्धम् । निषिद्धदुग्धविकाराश्च दध्यादयोपि निषिद्धाः । दुर्गन्धिजलं स्वल्पजलाशयजलं पर्युषितजलम् । अशुचिस्पृष्टजलम् अन्त्यजजलाशयजलम् अप्रतिष्ठितजलाशयजलं याचितजलं दर्भमंत्रतिलहेमरजतान्यतमरहितजलम् अभोज्यान्ननिखातजलं पतितादिकारितजलाशयजलं शूद्राहृतजलं रात्र्याहृतजलम् ऊषरलवणंकृतलवणं सौवर्चललवणम् अलवणव्यञ्जनं पाकानन्तरप्रक्षिप्तलवणव्यञ्जनं हस्तदत्तव्यञ्जनं हस्तमथितद्रव्यंच शूद्रस्पृष्टद्रव्यमशुदुष्टद्रव्यं छिक्कादुष्टद्रव्यं रसहीनद्रव्यं गन्धहीनद्रव्यं पालङ्कीशाकं श्वेतनाडिकाशाकं शोभाञ्जनशाकं तण्डुलीयशाकम् । तण्डुलीयकम् उरिस्तयाइति श्राद्धपल्लवः । खचिरीशाकं पिप्पलीशाकं रायीशाकं शेढीशाकं कुसुम्भशाकं तुलसीशाकं शोणशाकं मरिचशाकं पोयीशाकं नाडिकाशाकम् । नाडिकाफुलुयींयूष्मा इति श्राद्धपल्लवे व्याख्याता । फुलुयीयुष्मा मगधादिदेशेष्वनयोः इरतुल्यताली रूढादौलगति । कूष्माण्डम् अलाबुंसिम्बिसोन्धिधिसा वृन्ताकमङ्गिरिणं पिण्डमूलकं वंशकरीरं कोद्रवं वनकोद्रवं चणकंवोडाअकुठापुलाकधान्यम् अतसी गौरमाषः मसूरः लशुनः लोहितवृक्षनिर्यासं पलाण्डुकठच्छतिकापित्थं कालजङ्घाकेवलशुण्ठी केवलमरिचं केवलहिङ्गु भवनेठीफरहदः धुत्तूरः कवकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासकःस्थूलकेमुकं स्थूलजम्बूफलम् कुम्भी । चाण्डालाग्निसूतकास्यमेध्याग्निचिताग्नयःश्राद्धेनिषिद्धाः । अभ्यन्तराभावेऽपवित्रानेतानग्नीन् क्रमेणसप्तसुस्थानेषुपरंपरयाप्रज्वाल्यसप्तमस्थानप्रज्वलितोग्निरुपादेयः ॥ अत्रचश्राद्धेचतुर्विधानिवस्तूनिभवन्ति–विहितानि विहितानिषिद्धानि अविहिताऽनिषिद्धानि निषिद्धानि चेति ॥ विहितलाभेतेषामेवोपादानम् । तदलाभेविहितानिषिद्धानामुपादानम् । तदलाभेऽविहितानिषिद्धाना मुपादानम् । निषिद्धस्यसर्वथात्यागः ॥ इतिश्राद्धविवेकेप्रथमःपरिच्छेदः ॥१॥ ॥ अथाधिकारिनिरूपणम् ॥ तत्रमूलवाक्यानिशुद्धिविवेकेलिखितानिसप्रपञ्चम् । इहविस्तरभयादधिकारिमात्रंसिद्धवल्लिख्यते । मृतस्यत्रिविधाक्रियाभवति–प्रथमामध्यमोत्तमाचेति । तत्र दाहमारभ्याऽऽशौचान्तदिनपर्यन्ताक्रिया पूर्वा ॥ १ ॥ एकादशाहादिसपिण्डनान्तामध्यमा क्रिया ॥ २ ॥ सपिण्डनानन्तरंसांवत्सरिकपार्वणाभ्युदयिकनित्यश्राद्धादिरूपोत्तरा क्रिया ॥ ३ ॥ तत्रत्रिविधास्वपिक्रियासुत्रयोदशविधानामपिपुत्राणामधिकारः । तेचत्रयोदशपुत्राः–औरसः १ पुत्रिकापुत्रः २ क्षेत्रजः ३ कानीनः ४ सहोढजः ५ गूढोत्पन्नः ६ पौनर्भवः ७ अपविद्धः ८ दत्तकः ९ क्रीतः १० कृत्रिमः ११ स्वयमुपगतः १२ पारशवः ॥ १३ ॥ तेषुमुख्य औरसः । तदभावे पुत्रिकापुत्रः । ततःपूर्वपूर्वाभावे उत्तरोत्तरो अधिकारी । तेष्वपि पूर्वक्रियायांमध्यमक्रियायाञ्चविभक्तानामविभक्तानांवामध्ये योग्यस्यज्येष्ठस्यैवाधिकारः । तदुक्तंस्मृतिसारे– अकृतेपिकृतेवापिकानिष्ठादिभिरौरसैः ॥ यत्रकुत्रापिज्येष्ठस्याधिकारःप्रेतकर्मणीति । तस्यक्षतादिनाप्रतिबन्धे कनिष्ठस्यापिनियतकालकर्तव्यदशाहादिप्रेतपिण्डादिसपिण्डनान्तक्रियास्वप्यधिकारः । सपिण्डनोत्तरंसर्वेषांपुत्राणामविशेषेणपृथगधिकार उत्तरक्रियासु । एषांत्रयोदशविधानांपुत्राणांलक्षणंशुद्धिविवेकेप्रपञ्चितम् । पुत्राभावे पौत्रः । पौत्राभावे प्रपौत्रः । तदभावे भार्या । तदभावे भ्राताकनीयान् । तदभावे ज्येष्ठः । तदभावे पिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदभावे भ्रातृपुत्रः । तदभावे पूर्वक्रियायांमध्यमक्रियायाञ्चसपिण्डाअधिकारिणः । तदभावे दुहिताऽधिकारिणी । तदभावे सकुल्याः । तदभावे मातृसपिण्डाः । तदभावे मातृसकुल्याः । कुलद्वयाभावे मातरः ॥ तदभावे यथाकथंचित् परिगृहीता ःस्त्रियः । तदभावे राजाऽऽदेशेन धनग्राहकोऽधिकारी । पितृहीनौपौत्रप्रपौत्रौसपुत्रयोरपिपितामहप्रपितामहयोः पार्वणश्राद्धेधिकारिणौ । मृतस्यकन्यायाविवाहेकन्याप्रदाताप्यधिकारी । असमाप्तषड्वर्षस्यमृतस्यपूर्वक्रियामात्रम् । तत्रमातृपित्रादयोधिकारिणः । असमाप्ताद्विवर्षस्यपूर्वक्रियापिनास्ति किंतुभूमिनिखननमात्रम् । स्त्रियाअपिद्विवर्षाभ्यन्तरेभूमिनिखननमात्रम् । ततऊर्ध्वविवाहात्पूर्वपूर्वक्रियामात्रम् । तत्रापिता अधिकारी । तदभावे भ्रात्रादिः । ऊढायास्तु त्रिविधाक्रिया । तत्र पुत्रोधिकारी तदभावे पतिः । तदभावे सपत्नीपुत्रः । तदभावे पौत्रः । तदभावे प्रपौत्रः । तदभावे सपिण्डाः । तदभावे सकुल्याः । तदभावे पितृसपिण्डाः । सप्तपुरुषावधयः सपिण्डाः । दशपुरुषावधयः सकुल्याः । शूद्रस्यापरिणीतस्यद्विवर्षादूर्ध्वपूर्वक्रियामात्राम् । तत्रभ्रात्रादिरधिकारी ॥ परिणीतस्यत्रिविधापिक्रिया । तत्रपुत्रादिरधिकारीपूर्ववत् । केचित्त्वसमाप्तषड्वर्षस्यत्रैवर्णिकस्यस्त्रीशूद्रयोश्चापरिणीतयोस्त्रिविधापिक्रियाऽनुग्रहादिना नत्वावश्यकीत्याहुरितिश्राद्धकल्पस्मृतिसारौ । गुरुकुलस्थितशिष्यस्यभ्रातृपित्रभावे गुरुरधिकारी । गुरोरपिपुत्रपत्नीभ्रातृपितृहीनस्याशिष्यः । यजमानस्यान्याभावे ऋत्विगिति । सन्यासिनः संन्यासिपुत्रा अधिकारिणः । संन्यासिपुत्रैः पितुः सांवत्सरिकैकोद्दिष्टपार्वणाभ्युदयिकतीर्थश्राद्धादीनि कर्तव्यानि । सामान्यविहितानामेषामेकोद्दिष्टादीनांसंन्यासिपुत्रंप्रतिकर्तव्यतानिषेधकप्रमाणाभावात् । यत्तु एकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा ॥ अहन्येकादशेप्राप्तेपार्वणंतुविधीयते इतिवाक्यं तत्तु नसांवत्सरिकैकोद्दिष्टश्राद्धनिषेधकम् ॥ एतद्वाक्यस्यपारिजातनिबन्धादिषुसपिण्डीकरणपर्यन्तैकोद्दिष्टप्रकरणेलेखनेनप्रेतोद्देश्यकषोडशश्राद्धनिषेधकत्वव्यवस्थितेः । त्रिदण्डग्रहणादेवप्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्वंनैवजायतेइत्युपसंहाराच्च । एकोद्दिष्टंयतेर्नास्तित्रिदण्डग्रहणादिह ॥ सपिण्डीकरणाभावात्पार्वणंश्राद्धमिष्यते इतिशातातपवाक्ये त्रिदण्डग्रहणहेतुकसापिण्डीकरणाभावस्यैकोद्दिष्टनिषेधहेतुत्वेनाभिधानाच्च । किञ्च एकोद्दिष्टंजलंपिण्डमाशौचंप्रेतसत्क्रियाम् ॥ नकुर्याद्वार्षिकादन्यद्ब्रह्मीभूतायभिक्षवे इतिदत्तात्रेयवाक्ये वार्षिकैकोद्दिष्टनिषेधानवगमात् कतिपयानांसांवत्सरिकैकोद्दिष्टाचरणाच्च । कतिपयानामनाचरणस्यप्रकरणानवरुद्धैकोद्दिष्टनिषेधानवगममात्रेणान्यथोपपत्तेर्नसामान्यैकोद्दिष्टनिषेधोवगम्यतइति । तच्चैकोद्दिष्टंसामान्योक्तैकोद्दिष्टविधिनैवकर्तव्यम् विध्यन्तरानुपदेशात् । सर्वैश्चसन्यासिपुत्रैः कर्तव्यम् तत्रापिविशेषाश्रवणादिति । अतएवपार्वणाभ्युदयिकतीर्थश्राद्धादिकंयतिपुत्रैः कर्तव्यमेवेतिश्राद्धपल्लवेनलिखितम् । यत्तु सपिण्डीकरणान्ताक्रियासर्वैरेवनिषिद्धेतिश्रीदत्तोपाध्यायलेखनं स्मृतिसारलेखनञ्च तस्य एकोद्दिष्टकर्तव्यतानिषेधवाक्यस्यप्रेतोद्देश्यकैकोद्दिष्टकर्तव्यतानिषेधपरत्वंसर्वत्रस्मृतिसारादावप्यवगम्यते संदर्भाददिति । यत्तु ब्राह्मणादिहतेतातेपतितेसंगवर्जिते । व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददात्यसावितिवाक्यम् ॥ तदपिन ॥ त्रिदण्डिसंन्यासिपार्वणश्राद्धनिषेधात् । एतद्वाक्यस्यैकदण्डिसंन्यासिपार्वणश्राद्धनिषेधकत्वात् । उशनोवाक्येन त्रिदण्डिनांपार्वणविधानादितिगौडीयश्राद्धविवेकः । शातातपवाक्येनापिपार्वणविधानात् । वस्तुतोब्रह्मणादिहतत्वादीनिपितामहप्रक्रमश्राद्धविधायकानि । तेनपतितेसंगवर्जितेचजीवत्येवपितरिपार्वणविधायकम् । संगवर्जितः संन्यासी ॥ अथानधिकारिणः । महापातकिनः पाषण्डवृत्तयः स्तेनाः व्रात्याः आलस्यादश्रद्धयावास्वकर्मत्यागिनः निन्दितकर्मकर्तारः गर्भभर्तृद्रुहः स्त्रियः मद्यपास्त्रैवर्णिकास्त्रियः ब्रह्मचारिणः ॥ मातापित्रोराचार्यगुरूपाध्यायानामन्याभावेवहनदहनादौब्रह्मचारिणोदोषोनभवति ॥ अथोदकदानाद्यनर्हाः ॥ अयथाविधिसंकरजाता वेदाविहितप्रव्रज्याकर्तारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शास्त्राविहितमार्गेणदेहत्यागकारिणः पाषण्डाश्रिताः स्त्रियोगर्भभर्तृद्रुहः मद्यपास्त्रैवर्णिकास्त्रियः । वृथासंकरजातादीनासुदकदानादिन कर्तव्यम्॥
प्रतश्राद्धादावपिशर्मादिपदंप्रयोजयन्तिकेचित् । केचिन्नप्रयोजयन्ति । तेतु सपिण्डीकरणंयावत् प्रेतः प्रेतइतिस्मृतः ॥ सपिण्डीकरणादूर्ध्वं
शर्मवर्मादिशब्दभागिति वाक्यंप्रमाणयन्ति । तत्रास्माकमुत्तरःपक्षः ॥ अथप्रथमक्रिया ॥ अत्रगंगादितीर्थेषु अपक्रमिष्यज्जीवितस्य त्रैवर्णिक
स्यनवयज्ञोपवीतवस्त्रमाल्यादिभिः शूद्रस्यस्त्रियाश्चयज्ञोपवीतेतरैर्विभूषणं कुशास्तरणावस्थानं शुचित्वापादकम् । गंगाजलप्रोक्षणं गंगामृत्तिका
नुलेपनं शालग्रामशिलासंनिधापनं तुलसीसन्निधापनं शिरसितुलसीपत्रदानञ्चकर्तव्यम् । तत्रफलार्थितया यथाशक्ति गोभूहिरण्यादिदानञ्च
तद्द्वारा कारयितव्यम् । आशुतरपापनिवारणार्थंदीपदानं कारयितव्यम् । जलतुषारयोरन्यतरेणशरीरार्द्रीकरणम् । तदसंभवेजलतुषारयोः
कथापि कार्या । ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन्नित्युक्तेर्ब्रह्मविष्णुस्मरणयोरन्यतरस्मिन्परमगतिप्राप्तिःफलम् । अतस्तदर्थिनातत्क
रणं पुरुषसूक्तादिश्रवणम् । अपगतप्राणस्य मुखनिःक्षिप्तमणिप्रवालहिरण्यशकलस्य नासिकाद्वयकर्णद्वयचक्षुर्द्वयनिःक्षिप्तसुवर्णशकलमात्रस्य
घृततैलसमायुक्तस्य देहशोधनंविधायस्नापितस्य बर्हिष्मत्यांभूमौ दक्षिणशिरसास्वापितस्यघृततैलाभ्युक्षितस्य चन्दनोक्षितसर्वाङ्गस्य वस्त्रा
पिहितमुखस्य पुष्पैर्विभूषितस्य शुद्धवस्त्रोपवीतिनोगुरूननुज्ञाप्यपुत्रादिर्निर्हरणंकुर्यात् । मृतद्विजंसजातीयेषुतिष्ठत्सुनशूद्रानयेयुः । नमृतंशूद्रं
द्विजाः । अनाथब्राह्मणनिर्हरणंकर्तुःस्वर्लोकभागित्वंफलम् द्विजकर्तृकाऽनाथब्राह्मणकर्मकनिर्हरणेनिर्हरणक्रियासम्बन्धिकर्तृपदसमसंख्ययज्ञफल
समंफलम् । धनंजयवाय्वपगमपर्यन्तंमृतस्यशनैर्धारणम् । द्विजसंस्कारोपयुक्तानामग्नितृणकाष्ठहविषांशूद्रकर्तृकानयनं निषिद्धम् । द्विजशवंशू
द्रोनस्पृशेत् । ततःस्नातःपुत्रादिर्दक्षिणशिरसंशवंकृत्वा गयादीनिचतीर्थानियेचपुण्याःशिलोच्चयाः ॥ कुरुक्षेत्रंचगङ्गांचयमुनांचसरिद्वराम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कौशिकींचन्द्रभागांचसर्वपापप्रणाशिनीम् भद्रावकाशांसरयूंगण्डकीं तमसांतथा ॥ वैष्णवश्चवराहंचतीर्थंपिण्डारकंतथा ॥ पृथिव्यांयानितीर्थानिचतुरःसागरांस्तथा ॥ एतानिमनसाध्यायञ्जलेसर्वतीर्थान्यावाह्य तेनजलेनशवंसंस्नाप्य शुचिदेशेयथामिलितदासवर्गोपचितदारुचयरचितायामास्तीर्णंकुशायामुत्तरशिरसोऽधोमुखस्यसवस्त्रस्यपुरुषस्य स्त्रियाश्चोत्तानदेहायाउत्तरशिरसः स्थापनंकुर्यात् । ततोगयादीनिचतीर्थानियेचपुण्याःशिलोच्चयाइत्यादिपूर्वोक्तंपठित्वा एतानितीर्थानिदेवाश्चाग्निमुखाःसर्वैंकृतस्नापनमेनंगतायुषंदहन्त्वितिमनसाध्यात्वाऽपसव्येनदक्षिणामुखोहुताशंगृहीत्वाकृत्वासुदुष्करंकर्मजानतावाप्यजानता । मृत्युकालवशंप्राप्तंनरंपञ्चत्वमागतम् ॥ धर्माधर्मसमायुक्तंलोभमोहसमावृतम् ॥ दहेयंसर्वगात्राणिदिव्याँल्लोकान्सगच्छतु । इतिमन्त्रमुदीर्यप्रदक्षिणं विधायप्रज्वलदुल्मुकस्यशिरोदेशेदानम् । मन्त्रश्चायमदृष्टार्थत्वात्स्त्रीदाहेप्यविकृतएवपठनीयः । पुंस्त्वस्याविवक्षणात् । क्षत्त्रियकर्तृकेवैश्यकर्तृकेचानाथब्राह्मणदाहेवैश्यकर्तृकनष्टसर्वस्वानाथराजदाहेपितृमेधयज्ञफलसमंफलम् । ततस्तृणकाष्ठादिषुघृतंपरिक्षिप्यदग्ध्वाकिंचिच्छेषयेत् । ततःप्रादेशमात्रसप्तकाष्ठिकाभिः सहप्रदक्षिणसप्तकंविधाय कुठारेणोल्मुकोपरिप्रहारसप्तकंकृत्वाक्रव्यादायनमस्तुभ्यमित्युक्त्वाएकैकांकाष्ठिकामग्नौक्षिपेत् । अनतीताद्विवर्षप्रेतंगन्धमाल्यादिभिरलंकृत्य अहरहर्नयमानोगामश्वंपुरुषंपशून् ॥ वैवस्वतोनतृप्यतिसुरापइवदुर्मतिरितियमगाथांगायन्तोबान्धवा ग्रामाद्बहिः शुचिदेशेनिखनेयुः । तत्रनोदकदानादि ॥ अथोदकदानादि । तत्रप्रेतदाहानन्तरंसर्वेशवस्पृशः शवानुगमनकर्तारश्च चितांवामावर्तेनपरावृत्त्य व्यावर्त्यप्रेतमनवलोकमानाः अहरहर्नयमानोगामश्वंपुरुषंपशून् ॥ वैवस्वतोनतृप्यतिसुरापइवदुर्मतिरिति यमगाथांगायन्तो नदीप्रवाहाञ्जलाशयान्तरंवा बालानग्रेकृत्यगच्छेयुः । ततःस्यालकमन्यंवायाचेरन्नुदकंकरिष्यामइति । सब्रूयात् कुरुध्वंमाचैवंपुनरित्यशतवर्षप्रेते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुरुध्वमेवेतरस्मिन्निति । ततःकृतापसव्या दक्षिणाभिमुखाः प्रकीर्णकेशाःप्रक्षालितैकवस्त्रधराः ॐ अपनःशोशुचदघमितिवामहस्तानामिकया ऽपो दक्षिणतोनीत्वासकृन्निमज्जेयुः । ततोवामहस्तानामिकयाकनिष्ठयापापमित्यपोविलिखेयुः अङ्गंचनविघर्षेयुः । ततोद्विवाससआचम्यजलेवा पाषाणपृष्ठेवा शुचितीरदेशेवादक्षिणाग्रकुशत्रयोपरि वामहस्तान्यारब्ध दक्षिणहस्ताङ्गुष्ठतर्जनीमध्यमात्मकपितृतीर्थेन द्विगुणभुग्नकुशत्रयेण प्रेतगोत्रनामनीउच्चार्य मृतंमनसाध्यायन्तः कुशहस्ताः प्रेतायसतिलजलाञ्जलिं दद्युः–ॐ अद्यामुकगोत्रापितरमुकप्रेत एषतिलतोयाञ्जलिस्तेम यादीयतेतवोपतिष्ठतामितिवाक्येन । ततःकङ्कतिरूपेणवाममुष्टिनाचलितंपापमितिसव्याङ्गमेवालिखेयुः । कुलान्तरस्त्रियाउदकदानेस्त्रीलिङ्गेन निर्देशः कर्तव्यइतिविशेषः । इयंचजलदानक्रिया दशमपुरुषपर्यन्तंकर्तव्या । समानग्रामवासेयावद्वासं संबन्धमनुस्मरेयुस्तावत्तर्पयेयुः । श्वशुर मातामहमातुलाचार्यशिष्यसहाध्यायिमित्रदुहितृभागिनेयराजर्त्विजां तद्धितैषिभिः काम्यमुदकदानंकर्तव्यम् । पतितापविद्धासर्वगामिनीवृथासं करजातप्रव्रजितात्मत्यागिपाषण्डिगर्भभर्तृहंतृसुरापिद्विजस्त्रीणामुदकक्रियांनकुर्यात् । पतितस्यतृप्तिमिच्छन्सर्वत्रगामिनींदत्तवेतनांदासीमाहूय शुद्धघटहस्तांब्रूयात्–हेदासिगच्छमूल्येनतिलानानयसत्वरम् ॥ तोयपूर्णघटंत्वंचसतिलंदक्षिणामुखी ॥ उपविष्टातुवामेनचरणेनततःक्षिपेः ॥ कीर्तयेत्पातकिसंज्ञांत्वंपिबेतिवदन्मुहुः इत्युक्ताचैवसादासीमृताहानिपातकिसंज्ञांकीर्तयित्वा अमुकप्रेतत्वंपिबेतिपुनःपुनरभिधाय वाम पादेन तोयपूर्णंसतिलंघटमपवर्ज्जयेत् । ततउदकदानानन्तरमुदकोत्तीर्णान् कृतवस्त्रान्तरपरिधानानाचान्तान् पुत्रादीन् शुचिशाद्वलेदेशे उपविष्टान्–नायमत्यन्तसंवासःकस्यचित्केनचित्सह ॥ अपिस्वेनशरीरेणकिमुतान्यैः पृथग्जनैरित्यादिमहाभारतादिवाक्यानिश्रावयित्वाऽपनी तशोकान्बन्धुजनाःकुर्युः । ततःपुत्रादिर्लगुडमादाय मृन्मयेननूतनभाण्डेनजलमानीय ग्रामाद्बहिर्देवतायतने गृहद्वारिवाशुचितीरेवा पिण्डदाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यैशान्यांदिशिअग्निंप्रज्वाल्यतण्डुलप्रसृतिद्वयंप्रक्षाल्य सुश्रृतंस्वयंपचेत्। ततोदक्षिणाप्रवणेभूभागेगोमयोपलिप्ते गौरमृत्तिकयापिण्डार्थंदक्षिणा प्रवणस्थानंनिर्माया ऽऽचान्तः कृतापसव्योदक्षिणामुखः पातितवामजानुः पिण्डस्थानोपरिदक्षिणाग्रंकुशत्रयमास्तीर्यपुटकादौजलतिलगन्धपु ष्पाणिप्रक्षिप्य तत्पात्रंवामहस्तेकृत्वामोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेताशिरःपूरकप्रथमपिण्डस्थानेऽत्रावनेनिक्ष्व तेमया दीयतेतवोपतिष्ठतामितिकुशत्रयोपरिअवनेजनंदद्यात्। ततः तिलघृतमधुयुक्तंदुग्धसिक्तंतमेवपिण्डमादायमोटकतिलजलानिचाऽऽदाय ॐ अ द्याऽमुकगोत्रपितरमुकप्रेत एषशिरःपूरकः प्रथमः पिण्डस्तेमयादीयतेतवोपतिष्ठतामितिकुशोपरिअवनेजनस्थानेपिण्डंदद्यात्। विहितकालेप्य कृतचूडाकरणस्यविहितकालेप्यकृतोपनयनस्य जन्मभूमावपिपिण्डंदद्यात्। ततःप्रत्यवनेजनदानम्। ॐ अद्यामुकगोत्रपितरमुकप्रेतशिरःपूरक प्रथमपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिपिण्डोपरिपूर्ववद्दद्यात्। ततः प्रेतमुद्दिश्यतूष्णीमेवगन्धपुष्पधूपदीपोर्णातन्तुमयशुद्ध वहुवस्त्रताम्बूलानिपिण्डेदद्यात्। ततोयावद्वाष्पंनिस्सरतितावत्पिण्डाभिमुखस्तिष्ठेत्। ततोपसव्यादिनैव ॐ अद्यामुकगोत्रपितरमुकप्रेत एष साति लतोयाञ्जलिस्तेमयादीयते तवोपतिष्ठतामित्येकंतिलतोयाञ्जलिंपिण्डोपरिदद्यात्। एवंपिण्डसमीपेएव ॐ अद्यामुकगोत्रपितरमुकप्रेत इदंतिलतो यपूर्णपात्रंतेमयादीयतेतवोपतिष्ठतामित्येकंतिलतोयपात्रंदद्यात्। पश्चाज्जलेसर्वंक्षिपेत्। ततउपलितायांभूमौमाल्यंपानीयंदीपंचनिधाय ॐ अद्यामु कगोत्रपितरमुकप्रेतइदंमाल्यंतेमयादीयतेतवोपतिष्ठताम् ॐ अद्यामुकगोत्रपितरमुकप्रेत इदंपानीयंतेमयादीयतेतवोपतिष्ठताम् ॐ अद्यामुकगो त्रपितरमुकप्रेत एषदीपस्तेमयादीयतेतवोपतिष्ठतामितिदद्यात्। सायंकालेगृहद्वारिप्रेतमुद्दिश्यदशरात्रंत्रिरात्रंवादीपंदद्यात्। रात्रौगोमयोपलि प्तायांभूमौ त्रिकाष्ठिकासमारोपितमृन्मयपात्रद्वयेजलंक्षीरंचानिधायतत्समीपेमाल्यंदीपंचधृत्वा ॐ अद्यास्यांरात्रौअमुकगोत्रपितरमुकप्रेताऽत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नाहि इदंपिबइदंपरिधेहि अनेनपश्येतितिनिवेदयेत् । आकाशाधिकरणकदशरात्रावच्छिन्नप्रेतोद्देश्यकघृतजलदानंसर्वपापशान्त्यध्वश्रमविनाशफलकम् । रात्रौमृतकेसूर्योदयेदिवामृतकेनक्षत्रोदयेवाहिर्भागादौब्राह्मणानुमत्याऽर्वाग पिबालपुरस्सरावृद्धपश्चिमाः क्रमेणगृहद्वारमागत्यतत्रैवनिम्बपत्राणिदन्तैश्छित्वाचम्यदक्षिणेनपाणिना ॐ शमीपत्रंशमयतइतिशमीम् ॐ अश्मेवस्थिरोभूयासमित्यश्मानम् ॐ अग्निर्नः शर्मयच्छत्वित्यग्निस्पृशेयुः । वृषभच्छागयोर्मध्येस्थित्वा ज्योगितिमन्त्रेण दक्षिणेनपाणिनाद्वावपिस्पृशेयुः । ततोऽश्मनिपदन्यासंकृत्वाचम्योदकगोमयगौरसर्षपाग्निदूर्वाप्रवालवृषभान्संस्पृश्यगृहंप्रविशेयुः । एतच्चकुलान्तरजातानामपिशवस्पर्शेकर्तव्यम् । ज्ञातयोनैवतस्यांरात्रावप्यन्नंपचेयुः । यावदाशौचंमृन्मयपात्रेपत्रपुटेपाणौवाऽक्रीतलब्धमनामिषंदिवाभुञ्जीरन्नेककालम् । त्रिरात्रमक्षारलवणाशिनः द्वादशरात्रंमहागुरुषु । मातापिताऽऽचार्य्यश्चेतिमहागुरवः । सर्वेब्रह्मचारिणोदीना मलिनवाससोभोगवर्जिताः अशस्त्रपाणयोऽधउपवेशिनः पृथक्क्षितौशयीरन् । उपवेशनेशयनेचतृणप्रसारणमुपासीरन् । प्रेतक्रियावर्जमनावश्यकंनकिंचित्कर्मकुर्युः । पञ्चमसप्तमनवमदिवसेषुसर्वेषामेवसपिण्डानांबहिः स्नानंतिलोदकदानंवस्त्रप्रक्षालनं सहभोजनंचतुष्पथश्मशानगृहेषुदीपदानमंगसंवाहनंचतैलाभ्यंगंजागरादिकंप्रेताप्यायनकरम् । प्रथमपिण्डवत्द्वितीयादिषुदिवसेषुद्वितीयादिपिण्डदानम् । तत्रविशेषः । द्वितीयदिने पिण्डदानवाक्ये कर्णाक्षिनासिकापूरकोद्वितीयः पिण्डःद्वौतिलतोयाञ्जली द्वेतिलतोयपात्रे । तृतीयदिने गलांसभुजवक्षःपूरकस्तृतीयःपिण्डःत्रयस्तिलतोयाञ्जलयः त्रीणितिलतोयपात्राणि । चतुर्थेदिने नाभिलिंगगुदपूरकश्चतुर्थः पिण्डः चत्वारस्तिलतोयाञ्जलयः चत्वारितिलतोयपात्राणि । पञ्चमदिने जानुजङ्घापादपूरकः पञ्चमः पिण्डः पञ्चतिलतोयाञ्जलयः पञ्चतिलतोयपात्राणि । षष्ठदिने सर्वमर्मपूरकः षष्ठः पिण्डः षट्तिलतोयाञ्जलयः षट्तिलतोयपात्राणि । सप्तमदिने सर्वनाडीपूरकः सप्तमः पिण्डः सप्ततिलतोयाञ्जलयः सप्ततिलतोयपात्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमदिने दन्तलोमादिपूरकोऽष्टमःपिण्डः अष्टौतिलतोयाञ्जलयः अष्टौतिलतोयपात्राणि । नवमदिने वीर्यपूरकोनवमः पिण्डः नवतिलतोयाञ्जलयः नवतिलतोयपात्राणि । दशमदिने पूर्णत्वतृप्ततात्क्षुद्विपर्ययपूरकोदशमः पिण्डोदेयः । दशतिलतोयाञ्जलयः दशतिलतोयपात्राणि । अन्यत्सर्वंसमानम् । तथाहि । शिरआद्येनपिण्डेनप्रेतस्यक्रियतेसदा ॥ द्वितीयेनतुकर्णाक्षिनासिकास्तुसमासतः । गलांसभुजवक्षांसि तृतीयेनयथाक्रमात् । चतुर्थेनतुपिण्डेननाभिर्लिंगगुदानिच ॥ जानुजङ्घेतथापादौपञ्चमेनतुसर्वदा ॥ सर्वंमर्माणिषष्ठेनसप्तमेनतुनाडयः ॥ दन्तलोमाद्यष्टमेनवीर्यंतुनवमेनतु ॥ दशमेनतुपूर्णत्वं तृप्तताक्षुद्विपर्ययः । क्षत्रियवैश्यशूद्राणांसम्पूर्णाशौचे नवसुदिनेषुनवपिण्डान्दत्त्वाऽऽशौचान्तदिनेदशमपिण्डदानम् । त्र्यहाशौचे ब्राह्मणादिभिः सर्वैः प्रथमदिवसेत्रयःपिण्डा दातव्याः । द्वितीयदिनेचत्वारः । तृतीयदिनेत्रयः पिण्डादेयाः । अथवाप्रथमदिवसेएकः पिण्डः द्वितीयदिवसेचत्वारः तृतीयदिवसेपञ्च । एवंदशपिण्डादातव्याः । सद्यः शौचेत्वेकाहेनैवदशपिण्डादातव्याः । अथसंपूर्णाशौचान्तरे एकैकस्मिन्दिनेएकैकंदत्त्वाऽन्तिमदिनेऽवशिष्टाःपिण्डा देयाः । पाकासंपत्तौफलमूलशाकगुडदुग्धशालिसक्तूनामन्यतमेनपिण्डोदेयः येनद्रव्येणप्रथमपिण्डोदत्तस्तत्सजातीयेनैवापिण्डान्तरमापिदद्यात् । पुत्राद्यधिकारिणिविदेशस्थेऽन्येनदाहकर्त्रापिण्डदानेकृतेपि पुत्रादिरपिपिण्डंदद्यात् । येनैवप्रथमः पिण्डोदत्तः सएवपिण्डान्तरमापिदद्यात् ॥ अथास्थिसंचयः ॥ चतुर्थे ब्राह्मणानांतुपञ्चमेहनिभूभुजाम् ॥ नवमेवैश्यजातीनांशूद्राणांदशमात्परे । कर्त्तव्यंतुनरैःश्राद्धंदेशकालाविरोधतः ॥ श्राद्धमत्रास्थिसंचयननिमित्तकम् । एतच्चसंपूर्णाशौचेषुदिनकथनम् । एवमाशौचिनामङ्गस्पर्शोपि । चतुर्थेहानिविप्रस्यषष्ठेवैक्षत्रियस्यतु ॥ अष्टमेदशमेचैवस्पर्शःस्याद्वैश्यशूद्रयोः ॥ यत्तु प्रथमेह्नितृतीयेवासप्तमेनवमेपिवा ॥ अस्थिसंचयनंकार्य्यंनिजैस्तद्गोत्रजैःसहेतिस्मृतिवाक्यं तद्ब्राह्मणादीनांचतुर्थादिदिनेष्वस्थिसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चयासंभावनायांप्रथमादिदिवसेष्वस्थिसंचयनविधायकम् । त्र्यहाशौचेतुद्वितीयेह्नि । सद्यःशौचेतद्दिनएवास्थिसंचयः कर्तव्यः। असंपूर्णाशौचान्त रेषुतृतयिभागोत्तरमस्थिसंचयोऽङ्गस्पर्शश्चकर्तव्यइति ॥ अथप्रयोगः ॥ चतुर्थदिनेस्नात्वा चतुर्थपिण्डंदत्त्वा श्राद्धदेशस्यगोमयोपलेपनंपञ्चग व्योपलेपनंज्वलदंगारभ्रमणगौरमृत्तिकाच्छादनानिकारयित्वा गौरसर्षपैस्तिलैश्चविकिरणं स्वयंचश्राद्धकर्तापाकमारभेत । ततः सिद्धेऽन्ने रक्षादीपंसंस्थाप्य श्राद्धेदेयानिवस्तून्यासाद्यआचम्य पूर्वाभिमुखउपविश्य ॐ अपवित्रः पवित्रोवाइत्यादिपठित्वा पुण्डरीकाक्षः पुनात्वितिश्रा द्धीयवस्तूनांकुशत्रयजलेनसेचनम् । ततःॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यास्थिसंचयननिमित्तकमेकोद्दिष्टश्राद्धमहंकरिष्ये इतिसंकल्पंकुर्यात् ततस्त्रिर्गायत्रींजपित्वा ॐ देवताभ्यइतित्रिर्जपेत् । ततोऽपसव्यंकृत्वामोटकीतलजलान्यादायदक्षिणाभिमुखःसव्यंजानुंपातयित्वा ॐ अद्यामु कगोत्रपितरमुकप्रेताऽस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धेइदमासनं तेमयादीयते तवोपतिष्ठतामित्यासनंमोटकरूपममुत्सृजेत् । ततः ॐ अपह ताऽसुरारक्षा ँसिवेदिषदः इतिश्राद्धदेशेवामावर्तेनतिलान्विक्षिपेत् । ततः ॐ आयन्तुनइतिमन्त्रंजपेत् । ततः पुटकेकुशपत्रद्वयंप्रादेशमात्रंद क्षिणाग्रंधृत्वा ॐ शन्नोदेवीरभिष्टयइतितत्रजलंदद्यात् । तिलोसीतितिलान्दद्यात् । तूष्णींगन्धपुष्पंचतत्राक्षिपेत् । ततस्तदर्घपात्रंवामहस्तेकृ त्वा कुशपत्रद्वयंपरिवेषणपात्रेउत्तराग्रंधृत्वातदुपरिकिञ्चिदुदकान्तरंदत्त्वा ॐ यादिव्याआपइत्यादिपठित्वा मोटकादीन्यादाय ॐ अद्यामुक गोत्रपितरमुकप्रेताऽस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धेएषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिपवित्रोपरिअर्घजलंददुत्सृजेत् । ततः पवित्रपु ष्पसहितमर्घपात्रमात्रमासनवामपार्श्वेपित्रेस्थानमसीतिअधोमुखंकृत्वास्थापयेत् । ततोमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेताऽस्थि संचयननिमित्तकैकोद्दिष्टश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेमयादीयन्तेतवोपतिष्ठन्तामितिगन्धादीनिदद्यात् । ततोजलेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनभोजनपात्रयोश्चतुर्दिशंमण्डलंकृत्वा श्राद्धीयान्नाग्रभागंसघृतव्यञ्जनतिलजलम् ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमइतिउत्सृजेत् । ततोह स्ताभ्यांताम्रपात्रमन्नपूर्णमादाय मनाक्स्थित्वा पितरंध्यायन् पुरुषतृप्तिक्षममन्नंपरिविष्यात् । व्यञ्जनघृतजलान्युपनीय अन्नोपरिमधुदत्त्वा ॐ मधुवाताइत्यादिऋचं ॐ मधुमधुमध्विवितिचजपेत् । ततोव्यस्ताभ्यांहस्ताभ्यामधोमुखाभ्यां पात्रमालभ्य ॐ पृथिवीतेपात्रमितिजपेत् । ॐ इदंविष्णुरितिजपेत् । कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ॐ इदमन्नम् ॐ इमाआपः ॐ इदंहविरिति अत्रजलघृतान्नेषुदक्षिणह स्तांगुष्ठंनिवेश्य ॐ अपहताइतितिलानन्नोपरिक्षिप्त्वा वामहस्तेनपात्रमत्यजन्दक्षिणहस्तेनमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमु कप्रेतास्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धेइदमन्नसोपकरणंतेमयादीयततेवोपतिष्ठतामित्युत्सृजेत् । ततोगायत्रींमधुवाताइत्यादिऋचं ॐ मधुमधुमध्विति ॐ अन्नहीनंक्रियाहीनमितिचजपेत् । ततःकुशेषूपविश्य गायत्रींमधुवाताइत्यादिकंजपेत् । ततः ॐ कृणुष्वपाजइत्यादिरक्षो घ्नीः ॐ उदीरतामित्यादिपितृमन्त्रान् पुरुषसूक्तम् आशुःशिशानइत्यादिकमप्रतिरथम् अन्यानिचपवित्राणियथाशक्तिजपेत् । ॐ नमस्तुभ्य मितिश्लोकंचजपेत् । तत उच्छिष्टसन्निधानास्तृतकुशत्रयां भूमिंजलेनप्रोक्ष्यतिलघृतसहितमन्नञ्जलेनाप्लाव्य ॐ अग्निदग्धाश्चयेजीवाये त्वदग्धाःकुलेममइत्यादिमन्त्रेणकुशोपरिअन्नंविकिरेत् । ततःसव्यंकृत्वाऽऽचम्यहरिंस्मृत्वा अपसव्यंकृत्वाऽन्नपात्रसमीपेपिण्डदानार्थंमृत्पि ण्डिकायामध्ये प्रादेशमात्रंपरिमाय वामान्वारब्धदक्षिणहस्तेन ॐ अपहताऽसुराइत्यादिनैतद्विलिख्य दर्भपिञ्जूलीमुत्तरस्यांदिशि क्षिप्त्वा रेखोपरि ॐ येरूपाणीतिमन्त्रेणाङ्गारंभ्रामयित्वाऽङ्गारंदक्षिणतःक्षिपेत् । ततोरेखोपरिच्छिन्नमूलान्कुशानास्तीर्य ॐ देवताभ्यइ तिसव्येनत्रिर्जपेत् । ततोऽपसव्येनपुटकेजलतिलगन्धपुष्पाणिक्षिप्त्वा पुटकंवामहस्तेकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कप्रेताऽस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धपिण्डस्थानेऽत्रावनेनिक्ष्वतेमयादीयते तवोपतिष्ठतामितिकुशोपरिअवनेजनजलंकिञ्चिद्दद्यात् । ततोघृतमधुतिलयुक्तेनान्नेनपिण्डंनिर्माय घृतमध्वभिघारितंपिण्डं मोटकादीनिचादाय ॐ अद्यामुकगोत्रपितरमुकप्रेताऽस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धे एषपिण्डस्तेमयादीयते तवोपतिष्ठतामिति कुशोपरिवामान्वारब्धदक्षिणहस्तेनपिण्डंदद्यात् । ततःआस्तृतकुशमुलेतूष्णींकरंप्रोक्ष्य सव्यंकृत्वाऽऽचम्याऽपसव्यंकृत्वा ॐ अत्रपितर्मादयस्वेत्यादिमन्त्रंपठित्वा उत्तराभिमुखीभूय श्वासनिरोधंकुर्यात् । पितरंभास्वरमुर्तिंध्यायन् अमीमदन्तपितायथेत्यादिनाऊहेनजपेत् । ततःपूर्वावशिष्टजलमवनेजनपात्रंवामहस्तेकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेताऽस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेमयादीयते तवोपतिष्ठतामितिप्रत्यवनेजनंदद्यात् । ततोनीवींविस्रस्य सव्यंकृत्वाचम्यहरिंस्मृत्वा अपसव्यंकृत्वा वामहस्तेनसूत्रमादायकराभ्यांतद्गृहीत्वाएतत्तेपितर्वासः इतिसूत्रंपिण्डोपरिधृत्वा ॐ अद्यामुकगोत्रपितरमुकप्रेताऽस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धपिण्डे एतद्वासस्तेमयादीयतेतवोपातिष्ठतामितिमोटकादिनादद्यात् । ततःपिण्डंगन्धपुष्पधूपदीपताम्बूलैरभ्यर्च्यपिण्डशेषान्नंपिण्डसमीपेविकिरेत् । ॐ शिवाआपः सन्तु ॐ सौमनस्यमस्तु ॐ अक्षतंचारिष्टमस्तु इति अन्नपात्रेजलादीनिदत्त्वा मोटकादीन्यादाय ॐ आद्यामुकगोत्रस्य पितुरमुकप्रेतस्याऽस्थिसंचयनानिमित्तकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्युत्सृजेत् । ततःसव्यंकृत्वादक्षिणां दिशं पश्यन् ॐ अघोरःपितात्वितिपिण्डोपरिपूर्वाग्रांजलधारांदद्यात् । ततः पूर्वाभिमुखः ॐ गोत्रंनोवर्द्धतांदातारोनोभिवर्द्धन्तांवेदाःसन्ततिरित्यादिनाआशिषोयाचेत । ततोपसव्यंकृत्वा पिण्डोपरिसपवित्रान्कुशानास्तीर्यपुटकादिजलेन ॐ उर्ज्जंवहन्तीरमृतंघृतंपयइत्यादिपठित्वा कुशोपरि दक्षिणाग्रांजलधारांद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यात् । ततःपिण्डमाघ्रायोत्थापयेत् । छिन्नमूलकुशानङ्गारंचाग्नौदहेत् । अर्घपात्रमुत्तानीकृत्य मोटकादीनिदक्षिणाद्रव्यंचादाय ॐ अद्या
मुकगोत्रस्यपितुरमुकप्रेतस्य कृतैतदस्थिसंचयननिमित्तकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवतं यथानामगोत्रायब्राह्मणायदक्षिणांच
दातुमहमुत्सृजे इतिदक्षिणांदद्यात् । ततःसव्येन त्रिर्दैवताभ्यइतिजापित्वाऽपसव्यंकृत्वादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्य सव्येनाचम्य
ॐ प्रमादादित्यादिपठित्वाविष्णुंस्मरेत् । श्राद्धीयवस्तूनिब्राह्मणायप्रतिपादयेत् जलेवाक्षिपेत् । ततःपुत्रादिर्ज्ञातिबन्धुमिलितःस्नातःसुधौत
वस्त्रो नानाविधफलमूलभक्ष्यपानादिभिः स्वजात्यनुरूपैरष्टौपात्राणिपूरयित्वा गन्धपुष्पधूपदीपादिकंचगृहीत्वा श्मशानसमीपमागत्यतत्र
रान्वितैःकैश्चित्पुष्पैः कैश्चिद्भोजनैःकैश्चिद्धूपैःकैश्चिद्दीपैःकैश्चिन्माल्यैः कैश्चित्पानीयैःकैश्चिदक्षतैःसर्वाणिनिवेदयेत् । कैश्चिन्निरहङ्कार
युक्तैःसमन्ततश्चतुर्षुअन्नादिपूर्णपात्रेषुनिवेदितेषु प्रथमंचितायाउत्तरद्वारसमीपेउपविश्य ॐ नमः क्रव्यादमुख्येभ्योदेवेभ्यइतिसर्वदा ॥ येऽस्मिन्
श्मशानेदेवाःस्युर्भगवन्तः सनातनाः ॥ तेस्मत्सकाशाद्गृह्णन्तुबलिमष्टांगमक्षयम् ॥ प्रेतस्यास्यशुभाँल्लोकान्प्रयच्छन्तुचशाश्वतान् ॥ अस्माकमा
युरारोग्यंसुखंचददतांवरम् इतिपठित्वा ॐ एषोऽष्टांगबलिः शङ्करादिदेवताभ्योनमः इत्येकंबलिंदत्त्वाएवंप्रदक्षिणक्रमेणापरंबलित्रयंत्रिषुद्वारेषु
दत्त्वा तान्बलीन् क्षीरेणाभ्युक्ष्य शंकरादिदेवताः स्वीयस्वीयस्थानंगच्छन्त्वितिदेवताविसृज्याऽवशिष्टक्षीरेण वाग्यतः चितास्थान्यस्थीनिअभ्युक्ष्य
प्रथमंशिरोस्थीनिशमीपलाशशाखाभ्यामुद्धृत्याऽऽज्येनाभ्युक्ष्यगन्धवारिणासिक्त्वाकृतापसव्यो दक्षिणांगुष्ठकनिष्ठाभ्यांगृहीत्वाततोऽन्यान्य ॥२४॥
पिअस्थीनिगृहीत्वापञ्चगव्येनसुगन्धिवारिणासिक्त्वा पलाशपुटेनिक्षिप्य क्षौमवस्त्रेणसंवेष्ट्य मृन्मये नूतनभाण्डेसाच्छादनेनिदध्यात् । तद्भाण्ड
मरण्येवृक्षमूलेवापङ्कशैवालयुतगर्तेवानिभृतंनिवासयेत् । चिताभस्मादितोयेविनिःक्षिपेत् । गोमयाम्बुभिश्चिताभूमिशुद्धिंविधाय पूर्ववच्चतुर्दिशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शङ्करादिदेवताभ्योबलीनर्घादियुक्तान्नमः क्रव्यादमुख्येभ्योदेवेभ्यइतिमन्त्रेणदद्यात् । तान्विसृजेत् । बल्यन्नमन्येभ्योदद्यात्अम्भसिवाक्षिपेत् । ततश्चिताभूमेराच्छादनार्थंवृक्षः पुष्करकः पट्टकोवाकारयितव्यः । पुष्करकः इष्टिकानिर्मितंदेवकुटकाकारंगृहम् । ततः सचैलोबन्धुभिः सह स्नायात् । अथकश्चित्पुत्रपौत्रसहोदरादिर्गङ्गातीरमस्थीनिनीत्वा स्नात्वातान्यस्थीनिपञ्चगव्येनप्रोक्ष्य हिरण्यमध्वाज्यतिलैःसंयोज्य मृत्पिण्डपुटेनिधाय दक्षिणांदिशंपश्यन् ॐ नमोस्तुधर्मायेतिवदन्जलंप्रविश्यप्रेतोगतःस्वर्गेकामोदक्षिणाभिमुखः समेप्रीतइत्युक्त्वा गङ्गाम्भसिनिःक्षिपेत् । ततःस्नात्वाउत्थायसूर्यंपश्येत् । ततः आचम्य ॐ अद्यकृतैतदस्थिप्रक्षेपप्रतिष्ठार्थमिदंहिरण्यमग्निदैवत्यं यथानामगोत्रायब्राह्मणायदक्षिणाञ्च दातुमहमुत्सृजे इतिदक्षिणाञ्चदद्यात् । एवंकृतेप्रेतपुरःस्थितस्यस्वर्गेगतिः स्याच्चमहेन्द्रतुल्या ॥ यावदस्थिमनुष्यस्यगङ्गातोयेषुमज्जति ॥ तावद्वर्षसहस्राणिस्वर्गेलोकेमहीयते । गंगातोयेषुयस्यास्थिप्लवतेशुभकर्मणः ॥ नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कथञ्चन ॥ गौडाः—दशाहाभ्यन्तरेयस्यगंगातोयेस्थिमज्जति ॥ गंगायांमरणेयादृक्तादृक्फलमवाप्नुयात् ॥ ब्रह्मपुराणे—मातुः कुलंपितृकुलंवर्ज्जयित्वानराधमः ॥ अस्थीन्यन्यकुलोत्थानिनीत्वाचान्द्रायणंचरेत् ॥ एवंमातृकुलपितृकुलान्यकुलोत्थस्यास्थिनयनेधर्मबुद्ध्यादोषाभावः ॥ ॥अथाचारान्निरग्नेरप्यस्थिपर्णनरदाहः ॥ दाह्यशरीरालाभे तदस्थिघृतेनाभ्युक्ष्य वस्त्रेणाऽऽच्छाद्यदहेत् ॥ ॥अस्थ्नामप्यलाभे षष्ट्यधिकशतत्रयपलाशपत्रैःपुरुषाकृतिं विन्यस्य ॐ असौस्वर्गायलोकायस्वाहेतिदहेत् । उदकधाराञ्चदद्यात् । तद्विन्यासप्रकारस्तु—शिरस्यशीत्यर्द्धमेवंग्रीवायांतुदशैवतु ॥ बाह्वोश्चैवशतंदद्यादंगुलीषुतथादश ॥ उरसित्रिंशतंदद्याद्विंशतिंजठरेतथा । अष्टार्द्धंशिश्नकेदद्याद्द्वादशार्द्धंतुमुष्कयोः ॥ ऊर्वोश्चैवशतंदद्यात्रिंशतंजानुजङ्घयोः ॥ पादांगुलीषुदशवैद्येतत्पत्रविकल्पनम् ॥ अनाहिताग्नेर्देहस्तुदाह्योगृह्याग्निनाद्विजैः ॥ तदलाभेपलाशोत्थैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्रैः कार्यः पुमानपि ॥ शतैस्त्रिभिस्तथाषष्ट्याशरव्रातैर्विधानतः ॥ वेष्टितव्यस्तथायत्नात्कृष्णसारस्यचर्मणा ॥ ऊर्णासूत्रेणवद्धा थप्रलिप्तव्यस्तथायवैः । सुपिष्टैर्जलसंमिश्रैः प्रदग्धव्यस्तथाग्निना ॥ असौस्वर्गायलोकायस्वाहेत्युक्त्वास्वबान्धवैः ॥ एवंपर्णनरंदग्ध्वा त्रिरात्रमशुचिर्भवेत् ॥ तुल्यन्यायतयाऽस्थिदाहेपित्रिरात्राशौचम् । एवंकृतेमृतभ्रान्त्यायद्यागच्छेत्पुमान्कचित् ॥ कुर्यादथायुषीस्वि ष्टिंपुनराधायपावकम् ॥ साग्नेरियमिष्टिः । निरग्नेस्तुशान्तिस्वस्त्ययनमन्यदिति ॥ अथाशौचान्त्यादिनकृत्यम् ॥ तत्राशौ चान्तपूर्वदिनेसर्वेषांरजकद्वारावस्त्रशुद्धिः कारयितव्या ॥ अशौचान्तदिवसेगृहशुद्धिंकृत्वामृन्मयपाकभाण्डानित्यक्त्वास्नात्वादशमं पिण्डंदत्त्वा बहिरुदकान्तेकेशलोमनखान् यथायोग्यंवापयित्वातिलतैलेनाङ्क्त्वा गौरसर्षपकल्केनाशिरश्चोन्मृज्यस्नात्वा प्रेतस्पृष्टवासांस्यंत्ये भ्यःस्वाश्रितेभ्योदत्त्वाऽऽचम्य वाग्यतो वासोयुग्ममहतंनवंशुद्धंपुरातनंवायुक्तमव्रणंपरिधायाऽश्माविष्टोगांसुवर्णंगोरोचनंदधिदूर्वासितसर्षपंब्राह्म णोऽग्निंक्षत्रियोवाहनायुधे वैश्यःप्रतोदप्रग्रहौ शूद्रोयष्टिंसंस्पृश्य मङ्गलानिसंकीर्त्य ब्राह्मणान् स्वस्तिवाचयित्वा गृहंप्रविशेत् ॥ अत्रदिनेब्रा ह्मणाःपञ्चगव्यपानंकुर्वन्तीतिसतामाचारः ॥ इतिश्राद्धविवेकेप्रथमक्रियापरिच्छेदोद्वितीयः ॥ २ ॥ अथैकादशाहश्राद्धार्थं निमन्त्रणादि । तत्रा दौआशौचान्तदिनेनिरामिषमेकवारंभुक्त्वा रात्रौसर्वभुक्तजनेगृहेविप्रनिवेशनम् ॥ गोमयोपलिप्तदक्षिणप्रवणभूमौ ब्राह्मणमुदङ्मुखमुपवेश्य कृतापसव्योदक्षिणाभिमुखःपातितवामजानुः ॐ गतोसिदिव्यलोकंत्वंकृतान्तविहितात्पथः ॥ मनसावायुभूतेनविप्रेत्वाहंनियोजये ॥ पूजयि ष्यामिभोगेनइतिप्रेतोद्देशेनपठित्वा पुष्पचन्दनताम्बूलानिब्राह्मणायदत्त्वा ब्राह्मणदक्षिणजानुंस्पृष्ट्वा ॐ अस्यांरात्रौ अमुकगोत्रस्यपितुरमुक प्रेतस्याऽऽद्यश्राद्धकरणाय भवन्तंब्राह्मणमहमामन्त्रये इत्यामन्त्रयेत् । ॐ आमन्त्रितोस्मीतिप्रतिवचने ब्राह्मणेनोक्ते ॐ अक्रोधनेनशौचप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणसततंब्रह्मवादिना ॥ भवितव्यंचभवतामयाचश्राद्धकारिणा ॥ सर्वायासविनिर्मुक्तेनकामक्रोधविवर्जितेनभवितव्यंभवताचश्वस्तनेश्राद्धकर्मणि इतिब्राह्मणमुद्दिश्यपठेत् । यद्यविघ्नेनरजनीयास्यतितदा सर्वमेतत्करिष्यामीतितेनोक्ते ॐ इदंतेपाद्यमितिपाद्यंदत्त्वा द्विजंनमस्कृत्य प्रेतमुद्दिश्यतिलतैलेनाजानुविप्रपादौप्रक्षालयेत् । अत्रस्त्रियाअप्युद्देश्यत्वे ॐ गतोसीत्यविकृतमेवपठनीयम् । आत्मत्वेनोद्देश्यत्वात् ॥ अथैकादशाहकृत्यम् ॥ बहिर्नदीतीरादौप्रातःश्वेतवस्त्रयुगलेनस्नात्वा सूर्योदयेब्राह्मणस्यश्मश्रुकर्मनखच्छेदनञ्चकारयित्वा ताम्रपात्रेणतैलोद्वर्तनेनस्नानोपकरणंचदद्यात् । स्वयंस्नात्वा कृतनित्यक्रियो नदीतीरेगृहेवाश्राद्धभूमिंपरिकल्प्य पञ्चगव्येनोपलिप्यज्वलदङ्गारैःसंशोध्यगौरमृत्तिकयाऽऽच्छाद्य तिलैःसर्षपैश्चविकिरेत् ॥ गोमयोपलिप्तावृतपाकस्थानेतिलान्विकीर्यपरितश्छागान्वन्धयित्वा तत्रसपिण्डद्वारास्वयंवानूतनमृन्मयभाण्डेपाकमारभेत् । तत्राचान्तः पूर्वाभिमुखउदङ्मुखोवाशय्यांदद्यात् । तत्र ॐ सोपकरणशय्यायैनमः । ॐ ब्राह्मणायनमः इतिदेयब्राह्मणंत्रिःसम्पूज्यइमां सोपकरणांशय्यांददानीतिद्विजकरेजलदानंवारिणाशय्याभिषेचनञ्चकुर्यात् ।ॐ ददस्वेतिप्रतिवचनम् । तत्रकुशत्रयतिलजलान्यादाय ॐ अद्याशौचान्तद्वितीयेह्निअमुकगोत्रस्यापितुरमुकप्रेतस्यस्वर्गप्राप्तिकामइमांसोपकरणांशय्यांविष्णुदैवत्यां अमुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे इतिदद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । ततःकुशत्रयतिलजलानिदक्षिणाद्रव्यंचादाय ॐ अद्यकृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमाग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणाय दक्षिणांचतुभ्यमहंसंप्रददेइतिदद्यात् । ततःप्रतिगृहीता ॐ स्वस्तीतिप्रतिवचनमुक्त्वा सोपकरणांशय्यांसंस्पृशेत् । तत आचम्य ॐ फलवस्त्रसमन्वितकाञ्चनपुरुषायनमः ॐ ब्राह्मणायनमः इतिदेयब्राह्मणंत्रिःसंपूज्य ॐ इमंफलवस्त्रसमन्वितकाञ्चनपुरुषंददानीतिद्विजकरेजलदानम् । वारिणादेयद्रव्यसेचनम् । कुशत्रयादीन्यादाय ॐ अद्याशौचान्तद्वितीयेह्निअमुकगोत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यपितुरमुकप्रेतस्यस्वर्गप्राप्तिकामइदंफलवस्त्रसमन्वितकाञ्चनपुरुषंविष्णुदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे इतिदद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । ततोहिरण्यदक्षिणाद्रव्यमादाय ॐ अद्यकृतैतत्फलवस्त्रसमन्वितकाञ्चनपुरुषदानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवत्यम् अमुकगोत्रायामुशकर्मणेब्राह्मणाय दक्षिणांचतुभ्यमहंसंप्रददेइतिदद्यात् । ततःप्रतिगृहीता ॐ स्वस्तीत्युक्त्वाकाञ्चनपुरुषंस्पृशेत् । ततआचम्यकुशत्रयतिलजलान्यादाय ॐ अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्यापितुरमुकप्रेतस्यस्वर्गप्राप्तिकामोद्विजदम्पतिपूजनमहंकरिष्ये इतिसंकल्प्य द्विजदम्पतीपूजयेत् । तत्रक्रमः । ॐ द्विजदम्पतिभ्यांनमः एषोऽर्घः । ॐ द्विजदम्पतिभ्यांनमःइदमनुलेपनम् ॐ द्विजदम्पतिभ्यांनमइत्युभयोःपादयोस्त्रिःपूजांकुर्यात् । ततः पुष्पजलाभ्यामेतानिधूपदीपनैवेद्यताम्बूलविभूषणवासांसि द्विजपम्पतिभ्यांनमइतिदद्यात् । तौनमस्कुर्यात् । एतच्चद्विजदम्पतिपूजनम् प्रधानत्वात् वृषोत्सर्गाकरणेऽपिकर्तव्यं शय्यादानवदिति ॥ अथवृषोत्सर्गप्रयोगः ॥ तत्र वृषोत्सर्गसंभृतिंविविक्तवनेगोमध्येप्रागुदकप्रवणंदेशंनयेत् । ततआचान्तः पूर्वाभिमुखउपविश्य कुशत्रयतिलजलान्यादाय ॐ अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्यापितुरमुकप्रेतस्यमोक्षकामःसोपकरणवत्सतरीचतुष्टयसहितवृषोत्सर्गमहंकरिष्ये इति संकल्पंकुर्यात् । नीलवृषप्राप्तौ नीलपदप्रक्षेपः कर्तव्यः । कार्तिकयांवृषोत्सर्गे ॐ अद्यकार्तिक्यांतिथौ अमुकगोत्रस्यापितुरमुकशर्मणोमोक्षकामोऽपूपान्दत्त्वासोपकरणवत्सतरीचतुष्टयसहितवृषोत्सर्गमहंकरिष्ये इतिसंकल्पयेदितिविशेषः । वत्सतर्य्यष्टकपक्षेचतुष्टयपदस्थानेऽष्टकपदप्रक्षेपः । ततउत्तराभिमुखंब्राह्मणमुपवेश्य ॐ अद्यामुकगोत्रस्यापितुरमुकप्रेतस्यकर्तव्यवृषोत्सर्गाङ्गभूतहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिः पुष्पचन्दनताम्बूलवस्त्रयुगहेमालङ्करणैर्ब्रह्मत्वेनत्वामहंवृणे इतिब्रह्माणंवृणुयात् । ॐ वृतोस्मीतिप्रतिवचनम् । ॐ यथाविहितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मकुरु इतियजमानस्तमुद्दिश्यवदेत् । ॐ करवाणीतितत्प्रतिवचनम् । ततः ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यकर्तव्यवृषोत्सर्गाङ्ग भूतहोमकर्मकर्तुममुकशर्माणंब्राह्मणमेभिःपुष्पचन्दनताम्बूलहेमालङ्करणवासोभिर्होतृत्वेनत्वामहंवृणे इत्याचार्यंवृणुयात् । ॐ वृतोस्मीतिप्र तिवचनम् । ॐ यथाविहितंकर्मकुरु इतियजमानस्तमुद्दिश्यवदेत् । ॐ करवाणीतितत्प्रतिवचनम् । ततोहोता आचान्तो गोमयोपलिप्तवे दिकायांप्राङ्मुखउपविश्यपुरतः कुशैर्हस्तमात्रंचतुरस्रस्थण्डिलंपरिसमुह्य कुशानैशान्यांक्षिप्त्वागोमयोदकेनोपलिप्य मध्येप्रादेशमात्रमुत्तरक्रमे णस्रुवमूलेनत्रिरुल्लिख्य उल्लेखनक्रमेणदक्षिणस्याङ्गुष्ठानामिकाभ्यांसंगताग्राभ्यांमृदमुद्धृत्यऐशान्यांतांक्षिप्त्वा तंदेशंजलेनाभ्युक्ष्यतत्रदक्षिणहस्त स्थकांस्येनतूष्णीमग्निंस्थापयेत् । अग्नेर्दक्षिणतःपरिस्तरणभूमिमतिक्रम्यशुद्धमासनमुपकल्प्य तत्रप्रागग्रकुशैःपरिस्तरणंविधाय ब्रह्माणमग्नेर्वा यव्याःप्रदक्षिणमानीयकल्पितासनेबर्हिर्हस्तमुदङ्मुखमुपवेशयेत् । ततोऽग्नेरुत्तरतः परिस्तरणभूमिमतिक्रम्यकुशत्रयमास्तीर्य तत्रसान्तराल मृत्पात्रस्थंबर्हिषाच्छादितंसर्वकार्यार्थमुदकंक्षीरंच ब्रह्ममुखमवलोक्यनिदध्यात् । ततउपमूलबर्हिषामुष्टिचतुर्थभागेनाग्नेयादीशानान्तंप्राच्यां ब्रह्म णोग्निपर्यन्तंदक्षिणस्यां नैर्ऋताद्वायव्यान्तंपश्चिमायामग्नितःप्रणीतापर्यन्तमुत्तरस्यांस्तरणंकुर्यात् । ततआसादनमुपयोक्ष्यमाणानामग्नेरुत्तरतःप्र णीतापश्चिमेप्राक्संस्थंवा । तद्यथापवित्रच्छेदनार्थंकुशत्रयंपवित्रार्थमनन्तर्गर्भितंसाग्रकुशपत्रद्वयंप्रोक्षण्यर्थंमृत्पात्रंआज्यार्थंताम्रस्थालीपायसच र्वर्थंमृत्तिकास्थालीस्रुवसंमार्जनार्थंकुशत्रयमुपयमनार्थंवेणीरूपंकुशत्रयंप्रादेशमितपलाशसमित्त्रयंस्रुवः आज्यंतण्डुलान् दुग्धमिति । एवमासाद्यत तदुत्तरतः पौष्णंसिद्धमेवपिष्टमयचरुंब्रह्मदक्षिणार्थंपूर्णपात्रंहोतृदक्षिणार्थंवस्त्रयुग्मसुवर्णकांस्यान्युपकल्पयेत् । ततो वाग्यत आसादितकुशपत्रद्वय मादायपवित्रच्छेदनकुशैःप्रादेशमात्रंप्रमाप्यच्छिन्द्यात् । तानपास्यपवित्राभ्यांप्रणीतोदकमुत्पूय सपवित्रः करेणप्रणीतोदकंत्रिःप्रोक्षण्यांनिधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदगग्रेपवित्रेन्यस्तहस्तयोरङ्गुष्ठानामिकाग्राभ्यामनयोरादाय तन्मध्येनप्रोक्षण्युदकंभूमौत्रिः क्षिप्त्वापवित्रेप्रोक्षण्यांनिधाय तत्पात्रंदक्षिणहस्तेना
दायवामेनिधाय दक्षिणहस्तानामिकाङ्गुष्ठाभ्यांतज्जलंकिञ्चिदूर्ध्वमुत्क्षिप्यप्रणीताजलेनप्रोक्षेणीरभिषिच्य तज्जलेनयथासादितंद्रव्यंप्रत्येकंसकृत्प्रो
क्ष्यपवित्रशेषजलसहितपात्रंप्रणीताग्न्योरन्तरेनिधाय आज्यस्थाल्यामाज्यंनिरूप्य चरुस्थाल्यांतण्डुलान्निःक्षिप्य प्रणीतोदकेनतांस्त्रिःप्रक्षाल्य
तत्रप्रणीतोदकंदुग्धञ्चप्रक्षिप्य स्वयंचरुं ब्रह्मणाचाज्यंगृहीत्वा प्रदक्षिणीकृत्याऽग्निपूर्वेणनीत्वादक्षिणतआज्यमुत्तरतःपायसंचरुंश्रपणार्थं युगपदग्नौ
निधाय उल्मुकंसहविष्काग्नेःप्रदक्षिणंभ्रामयित्वा तत्रैवक्षिप्त्वा स्रुवस्यप्रागग्रस्यावाङ्मुखस्याग्नौप्रतपनमुत्तानस्यसंमार्जनकुशैरभ्यन्तरतोऽग्रान्मू
लपर्यन्तंमध्यैर्मध्यतएव मूलैर्बाह्यतो मूलादग्रपर्यन्तंसंमार्जनं प्रणीताद्भिरभ्युक्षणंपुनःप्रतपनम्आस्तृतबर्हिषिस्वपुरतः प्रागग्रस्यस्थापनंविधा
यततः पाकेवृत्तेस्वयमाज्यमुद्वास्याग्निपश्चिमेननीत्वा प्रणीतोत्तरतोनिधाय ततःपायसचरुमुद्वास्याज्यपश्चिमेननीत्वा आज्यस्योत्तरतोनिधा
यस्वपुरतःस्रुवोत्तरेआज्यंतदुत्तरतश्चरुंनिधाय प्रोक्षणीतःपवित्रेसमानीय आज्येप्रोक्षणीवदुत्पवनंकृत्वा पवित्रेप्रोक्षण्यांनिधाय आज्यमवेक्ष्यसत्य
पद्रव्येतन्निरस्य प्रोक्षण्युत्पवनंविधाय पायसचरोरुत्तरतःपूर्वसिद्धपिष्टकचरुंनिधायहोमसमाप्तिपर्यन्तमुपग्रहार्थंकुशैर्वामहस्तेउपग्रहंविधाय
प्रजापतिंमनसाचिन्तयन्नुत्तिष्ठन् प्रागग्रघृताक्तसमिद्द्वयंवह्नौप्रक्षिप्योपविश्यप्रोक्षण्यद्भिःसहविष्कमग्निंप्रणीताब्रह्मसहितंपर्युक्ष्यपवित्रेप्रणीतासुनि
धाय प्रोक्षणीपात्रंस्वस्थानेनिदध्यात् । ततोब्रह्मणाकरबर्हिषान्वारब्धोदक्षिणजानुंनामयित्वासंस्रवंविनैवाज्येनजुहुयात् । स्वाहान्तोहोमः इद ॥२७॥
मग्नयेइतित्यागः । ॐ इहरतिःस्वाहा इदमग्नये० १ ॐ इहरमथ २स्वाहाइदमग्नये० २ ॐ इहधृतिःस्वाहाइदमग्नये० ३ ॐ इहस्व
धृतिस्वाहाइदमग्नये० ४ ॐ उपसृजंधरुणंमातरंमात्रधरुणोमातरंधयन्स्वाहा इदमग्नये० ५ ॐ रायस्पोषमस्मासुदीधरतत्स्वाहा इदमग्नये० ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःप्राक्ऋज्वग्नेर्दक्षिणभागेमनसा ॐ प्रजापतयेस्वाहा इदंप्रजापतये० १ अग्नेरुत्तरभागेऋजुप्राक् ॐ इन्द्रायस्वाहा इदमिन्द्राय० २
ततउत्तरपूर्वार्द्धे ॐ अग्नयेस्वाहा इदमग्नये० १ दक्षिणपूर्वार्द्धे ॐ सोमायस्वाहा इदंसोमाय० २ इत्याघारावाज्यभागौचसंस्रवंहुत्वापायसंपैष्ट
कमेकंचादाय समिद्धतमेऽग्नौसंस्रवंविनैवपायसेनजुहुयात। ॐ अग्नयेस्वाहा इदमग्नये० ॐ रुद्रायस्वाहा इदंरुद्राय० २ ॐ शर्वायस्वाहा इदं
शर्वाय० ३ ॐ पशुपतयेस्वाहा इदंपशुपतये० ४ ॐ उग्रायस्वाहा इदमुग्राय० ५ ॐ उशनसेस्वाहा इदमुशनसे० ६ ॐ भवायस्वाहा इदं
भवाय० ७ ॐ महादेवायस्वाहा इदंमहादेवाय० ८ ॐ ईशानायस्वाहा इदमीशानाय० ९ इतिहुत्वा पिष्टकेन ॐ पूषागाऽ अन्वेतुनःपूषारक्ष
त्वर्व्वतः ॥ पूषावाजा ँ सनोतुनःस्वाहा इदंपूष्णे० १ ततःपायसपिष्टकाभ्यामुत्तरार्द्धावदानभूताभ्याम् ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नये
स्विष्टकृते० अग्नेर्मध्यभागे तत आज्येन ॐ भूःस्वाहा इदमग्नये ० १ ॐ भुवःस्वाहाइदंवायवे० २ ॐ स्वःस्वाहा इदंसूर्याय० ३ ॐ त्वन्नोऽ
अग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः॥यजिष्ठोव्वह्नितमः शोशुचानोव्विश्वाद्वेषाँ सिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां०
४ ॐ सत्वन्नोऽअग्नेव्वमोभवोतीनेदिष्ठोअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोव्वरुण ँ रराणोव्वीहिमृडीक ँ सुहवोनऽएधिस्वाहा इदमग्नये० ५
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि ॥ अयानोयज्ञंवहास्ययानोधेहिभेषज ँ स्वाहा इदमग्नये० ६ ॐ येतेशतंव्वरुणयेसहस्रं
यज्ञियाःपाशाव्विततामहान्तः ॥ तेभिर्नोऽअद्यसवितोत्तव्विष्णुर्व्विश्वेमुञ्चन्तुमरुतःस्वर्क्काःस्वाहा इदंवरुणाय सवित्रेविष्णवेविश्वेभ्योदेवेभ्यो
मरुद्भ्यः स्वर्केभ्योनमम ७ ॐ उदुत्तमंव्वरुणपाशमस्स्मदवाधमंविमद्ध्यम ँ श्रथाय ॥ अथावयमादित्यव्व्रतेतवानागसोऽअदि
तयेस्यामस्वाहा इदंवरुणाय० ८ ॐ प्रजापतयेस्वाहा० इदंप्रजापतये० ९ इतिमनसा । एवंहुत्वा संस्रवप्राशनमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चमनंचकृत्वा पवित्राभ्यांशिरःप्रभृतिसंमार्जनम् । ॐ सुमित्रियानआपऽओषधयःसन्त्वितिमन्त्रेण । ततः ॐ दुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वे
ष्टियञ्चव्वयन्द्विष्मइतिमन्त्रेणप्रणीतोदकमैशान्यांनिनयेत् । ततः फलपुष्पान्वितघृतेन ॐ मूर्द्धानंदिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतआजातम
ग्निम् ॥ कवि ᳵ सम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः स्वाहा इदमग्नये० इतियजमानसहितहोतापूर्णाहुतिंकुर्य्यात् । ततः स्तरणक्रमेण
वर्हिरुत्थाप्याज्येनाभिघार्य्य ॐ देवागातुव्विदोगातुंव्वित्वागातुमितमनसस्पतऽइमंदेवयज्ञ ᳵ स्वाहाव्वातधाः स्वाहा इदमग्नये० इतिवर्हिर्होमं
हस्तेनैवकुर्य्यात् । ततो यजमानः कुशत्रयतिलजलान्यादाय ॐ अद्यकर्तव्यवृषोत्सर्गांगभूतकृतैतद्धोमकर्मणिकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थं
मिदम्पूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणे दक्षिणांचतुभ्यमहंसंप्रददे इतिब्रह्मणेदक्षिणांचदद्यात् । ॐ स्वस्तीतिप्रतिव
चनम् । यजमानेनतत्परितोषार्थंकिंचिद्दातव्यम् ॥ ततोवस्त्रयुग्मसुवर्णकांस्यान्युपनीय कुशादीन्यादाय ॐ अद्यकर्तव्यवृषोत्सर्गांगभूतकृतैतद्धो
मप्रतिष्ठार्थमेतानिवस्त्रयुग्मसुवर्णकांस्यानिबृहस्पतिवह्निचन्द्रदैवत्यानिअमुकगोत्रायाऽमुकशर्मणेब्राह्मणायहोत्रेदक्षिणांचतुभ्यमहंसंप्रददे इति हो
त्रेतानिदक्षिणांचदद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । ततोरुद्राध्यायंजपित्वा कर्मकारमाहूयवृषमङ्कयेतिब्रूयात् । सचाग्निमपादपार्श्वेचक्रेणदक्षि
णपश्चिमपादवामपार्श्वेत्रिशूलेन वृषभमंकयेत् । ततोवत्सतरीचतुष्टयसहितंवृषभं कुशजलेनस्नापयेत् । तत्र स्नानकरणमन्त्राः ॐ हिरण्यवर्णाः
शुचयः पावकायासुजातः कश्यपोयास्विन्द्रः ॥ याऽअग्निंगर्भंदधिरेसुवर्णास्तानऽआपः श ᳵ स्योनाभवन्तु ॥ ॐ यासा ᳵ राजावरुणोयातिम
ध्येसत्यानृतेऽअवपश्यञ्जनानाम् ॥ याऽअग्निंगर्भंदधिरेसुवर्णास्तानाऽआपःश ᳵ स्योनाभवन्तु ॥ ॐ यासांदेवादिविकृण्वन्तुभक्षंयाऽअन्तरिक्षेवहु
धाभवन्ति । याऽअग्निंगर्भंदधिरेसुवर्णास्तानऽआपः श ᳵ स्योनाभवन्तु ॥ ॐ शिवेनमाचक्षुषापश्यतापः शिवयातन्वोपस्पृशतत्वचंमे ॥ घृत

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋयुतः शुचयोयाः पावकास्तानऽआपः श ँ स्योनाभवन्तु ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीयते ॥ शंयोरभिस्रवन्तुनः ॥ ततो लोहय
ण्टिकानूपुरकनकपर्दिकादिभिः पश्चाप्यलंकृत्य सावित्रीमघमर्षणंरुद्राध्यायंपुरुषसूक्तं ॐ यद्देवादेवहेडनंदेवासश्चकृमावयम् ॥ अग्निर्मातस्मा
देनसोविश्वान्मुञ्चत्वँहसः ॥ यदिदिवायर्दिनक्तमेना ँ सिचकृमावयम् ॥ वायुर्मातस्मादेनसोव्विश्वान्मुंचत्व ँ हसः ॥ यदिजाग्रद्यदिस्वप्नएना
ँ सिचकृमावयम् ॥ सूर्योमातस्मादेनसोव्विश्वान्मुञ्चत्व ँ हसः इत्यादिऋक्त्रयंकूष्माण्डीश्चजपेत् । ततोवृषभस्यदक्षिणकर्णे ॐ पि
तावत्सानांपतिरघ्न्यानामथोपितामहतागर्गराणाम् । वत्सोजरायुः प्रतिधुक्पीयूषऽआमिक्षाघृतंतद्वस्येरेतः । ॐ वृषोसिभगवान्धर्मश्चतु
ष्पादः प्रकीर्तितः । वृणोमित्वामहंभक्त्यासमांरक्षतुसर्वतः—इतिमन्त्रद्वयंजपित्वाकुशत्रयतिलजलान्यादाय ॐ अद्याशौचान्तद्वितीयेह्नि अमुक
गोत्रस्यपितुरमुकप्रेतस्यमोक्षकामो रुद्रदैवत्यंवृषम्—एनंयुवानंपतिंवोददानितेनक्रीडन्तश्चरथप्रियेण । मानः सास्यजनुषासुभगारायस्पोषेणसमि
षामदेमेत्युत्सृजेत् । लोहितोयस्तुवर्णेनपुच्छाग्रेणतुपाण्डुरः ॥ श्वेतः खुरविषाणाभ्यांसनीलोवृषउच्यते ॥ नीलवृषेनीलपदप्रक्षेपः
कार्तिक्यांवृषोत्सर्गे वृषोत्सर्गनिमित्तकमाभ्युपयिकश्राद्धंकृत्वा ॐ अद्यकार्तिक्यांवृषमुत्सृज्यमानोहमिमानपूपान्विष्णुदैवत्यानमुकगोत्राया
मुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे इति अपूपत्रयंब्राह्मणायदद्यात् । दक्षिणांचदद्यात् । ॐ अद्यकार्तिक्यामपूपान्दत्त्वाऽमुकगोत्रस्य
पितुरमुकप्रेतस्यमोक्षकामोरुद्रदैवत्यंवृषमेनंयुवानंपतिंवोददानितेनक्रीडन्तश्चरथप्रियेण ॥ मानः सास्यजनुषासुभगारायस्पोषेणसमिषाम
देमेतिवाक्यंवावक्तव्यम् । एतयैवोत्सृजेरन्निति पारस्करवचनात् अनयैवऋचोत्सर्गः । ऋगर्थस्तुहेवत्सतर्य्योवोयुष्माकमेनंपतिंस्वामिनं
युवानंतरुणंददानित्यजानि । तेनैतेनवृषेणप्रियेणसह क्रीडन्तीः खेलन्त्यश्चरथभ्रमथ । यूयमपिहेवत्सतर्य्योमातरः नोस्माकं मा नोऽस्मत्स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वविषयाः किंतुमयात्यक्ताः । वयं वृषस्यभवतीनांत्यागेन रायस्पोषेणधनसमृद्ध्या सात्यजनुषा सप्तजन्मव्यापकेन इषाअन्नेनसंमदेमहृष्टा
भवेम । सुभगाः लोकप्रियाः । इतिऐशान्यांदिशिपश्चापिचालयेत् । पश्चापिपूजयेत् । एषोर्घःसोपकरणवत्सतरीचतुष्टयसहितायवृषायनमः
इदमनुलेपनम् । सोपकरणवत्सतरीचतुष्टयसहितवृषायनमःपुष्पैःपूजयेत् । एतानिधूपदीपनैवेद्यताम्बूलानि ॐ सोपकरणवत्सतरीचतुष्टयस
हितवृषायनमः । ततोवत्सतरीचतुष्टयमध्यगतंवृषभमभिमन्त्रयेत् । तत्रमन्त्राः । ॐ समुद्रोसिनभस्वानार्द्रदानुशंभूर्मयोभूरभिमाव्वाहिस्वाहा ॥
मारुतोसिमरुतांगणःशंभूर्मयोभूरभिमाव्वाहिस्वाहा ॥ वस्यूरसिदुवस्वाञ्छंभूर्मयोभूरभिमाव्वाहिस्वाहा ॥ ॐ यास्तेऽअग्नेसूर्येरुचोदिवमातन्व
न्तिरश्मिभिः ॥ ताभिर्न्नोऽअद्यसर्व्वाभीरुचेजनायनस्कृधि ॥ यावोदेवाःसूर्य्येरुचोगोष्वश्वेषुयारुचः । इन्द्राग्नीताभिःसर्वाभीरुचन्नोधत्तबृह
स्पते ॥ रुचन्नोधेहिब्राह्मणेषुरुच ँ राजसुनस्कृधि ॥ रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम् ॥ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्ते
यजमानोहविर्भिः ॥ अहेडमानोवरुणेहवोध्युरुश ँ समानऽआयुःप्रमोषीः ॥ स्वर्णधर्म्मःस्वाहास्वर्णार्क्कःस्वाहास्वर्णशुक्रःस्वाहास्वर्णज्योतिः
स्वाहास्वर्णसूर्य्यःस्वाहा । ततःकृतापसव्योदक्षिणामुखोवामजानुंपातयित्वायवतिलवृषपुच्छमोटकान्यादाय ताम्रपात्रादिनामन्त्रस्थंफलमुद्दि
श्याञ्जलित्रयेणतर्प्पयेदनेनमन्त्रेण– ॐ स्वधापितृभ्योमातृभ्योबन्धुभ्यश्चापितृप्तये ॥ मातृपक्षाश्चयेकेचिद्येचान्येपितृपक्षजाः ॥ गुरुश्वशुरब
न्धूनांयेकुलेषुसमुद्भवाः ॥ येप्रेतभावमापन्नायेचान्येश्राद्धवर्जिताः ॥ वृषोत्सर्गेणतेसर्वेलभन्तांप्रीतिमुत्तमामिति । ततःकर्मकारमाहूयाभिमतवे
तनंतस्मैदद्यात् । उत्सृष्टान्ब्राह्मणान्श्रावयेत् । यत्किंचिद्द्विजनेमयोत्सृष्टंतदन्योननयेत् नवाह्यंनचैतत्क्षीरंपातव्यंकेनचित्किंचित्कचित् ॥ रुद्राग्नि
वहुसर्प्पिष्कंपायसंब्राह्मणान्भोजयेत् ॥ अथकपिलादानम् । ॐ सोपकरणायैसवत्सकपिलागवेनमः ॐ ब्राह्मणायनमः इतिदेयद्रव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणोत्रिःसंपूज्य ॐ इमांसोपकरणांसवत्सांकपिलांगांददानीतिद्विजकरेजलदानम् । जलेनदेयद्रव्याभिषेचनम् । कुशादीन्यादाय ॐ अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्यपितुरमुकप्रेतस्यस्वर्गप्राप्तिकामः इमांकपिलांगांहेमशृङ्गींरौप्यखुरांवस्त्रयुगच्छन्नांकांस्योपदोहांमुक्तालांगूलभूषितांसवत्सांरुद्रदैवत्याममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसम्प्रददे इतिदद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । ततोदक्षिणाद्रव्यादिकमादाय ॐअद्यकृतैतत्सोपकरणसवत्सकपिलागोदानप्रतिष्ठार्थमिदंहिरण्यरूपामग्निदैवत्याममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांचतुभ्यमहंसम्प्रददे इतिदक्षिणांचदद्यात् । ततःप्रतिगृहीता ॐ स्वस्तीत्युक्त्वा गोपुच्छग्रहणं यथाशाखं कामस्तुतिंचकुर्यात् । तत्र कोदात्कस्माअदात्कामोदात्कामायादात् कामोदाताकामःप्रतिगृहीताकामैतत्ते इतियजुर्वेदे । ॐकइदंकस्माऽअदात् कामःकामायादात् कामोदाताकामःप्रतिगृहीताकामस्समुद्रमाविशत् कामेनत्वाप्रतिगृह्णामिकामैतत्तेइतिसामवेदेकामस्तुतिः । यथोक्तकपिलाऽलाभे केवलामपिदद्यात् । तत्रपूजादिपूर्ववत् । ॐ आशौचान्तद्वितीयेह्नि अमुकगोत्रस्यपितुरमुकप्रेतस्यस्वर्गप्राप्तिकामःइमांकपिलांगांरुद्रदैवत्याम् अमुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसम्प्रददे इतिदद्यात् । ॐस्वस्तीतिप्रतिवचनम् ॥ ततोदक्षिणाद्रव्यादिकमादाय ॐ अद्यकृतैतत्कपिलागोदानप्रतिष्ठार्थमिदंहिरण्यमाग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांचतुभ्यमहंसंप्रददे इतिदक्षिणांच दद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । गोपुच्छग्रहणंकामस्तुतिश्चपूर्ववत् । ततोमहानद्यादौसचैलंस्नात्वा तीर्थानिमनसाध्यात्वा तज्जलेनात्मानमभ्युक्ष्योत्तरेत् ॥ अथैकादशाहश्राद्धप्रयोगः ॥ सचसुगतिसोपानानुसारेणलिख्यते । तत्रमध्याह्नेशुचिराचान्तः शुक्लद्विवासाःगोमयोपलिप्तायामपसव्यवतकृतगोमूत्रमण्डलायां मण्डलाद्बहिः ॐ भूम्यैनमःइतित्रिःपुष्पाक्षतपूजितायांभूमौ दर्भेषुतिष्ठन्पात्रब्राह्मणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजमानसवर्णेनाऽऽहूतंस्नातमाचान्तं ॐ स्वागतमितिपृच्छेत् । ॐ स्वागतमितितेनोक्ते उभावप्युपविशतः । ततः श्राद्धकर्ता इदंतेपाद्य मितिपाद्यमुपनीय विनीतः सन् पुनःपुनरभिनन्द्य पात्रब्राह्मणपादौप्रक्षाल्याऽपसव्यादिकृत्वा जलतिलगन्धपुष्पयुतमर्घपात्रमादाय मोट कतिलजलानिचादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेएषपादार्घस्तेमयादीयतेतवोपतिष्ठतामितिपादार्घंदद्यात् । ततःशिर साऽभिवन्द्यजानुनीविश्राव्य ॐ इदंतेआचमनीयमित्याचमनीयोदकंब्राह्मणायदद्यात् । ततःस्वयंपादौप्रक्षाल्याचम्यपात्रब्राह्मणमाचम य्याग्रेकृत्वाश्राद्धदेशमागत्योपविश्यान्नाभिप्रायेणसिद्धमितिपृच्छेत् । पूर्वरात्रेनिमन्त्रणासंभवे तस्मिन्नेवाह्निश्राद्धवेलायां मण्डपाद्बहि श्शुचिराचान्तःशुक्लद्विवासा गोमयोपलिप्तायामपसव्यवत्कृतगोमूत्रमण्डलायां मण्डलाद्बहिः ॐ भूम्यैनमइतित्रिः पुष्पाक्षतपू जितायांभूमौ दर्भेषुतिष्ठन्स्नातमाचान्तंब्राह्मणंयजमानसवर्णेनाहूतं ॐ स्वागतमितिपृच्छेत् । ॐ स्वागतमितितेनोक्ते उभावप्युपवि शतः । ततः श्राद्धकर्ताइदंतेपाद्यमितिपाद्यमुपनीय विनीतः सन् पुनःपुनरभिनन्द्य पात्रब्राह्मणपादौप्रक्षाल्यापसव्यादिकृत्वा पुष्पच न्दनताम्बूलानिब्राह्मणायदत्त्वा ब्राह्मणदक्षिणजानुंस्पृष्ट्वा ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्याद्यश्राद्धकरणाय भवन्तंब्राह्मणमामन्त्रये इत्युक्ते ॐ आमन्त्रितोस्मीतिप्रतिवचनम् । अक्रोधनेनशौचपरेणसततंब्रह्मवादिना–भवितव्यंचभवतामयाचश्राद्धकारिणा–सर्वायासविनिर्मुक्ते नकामक्रोधविवर्जितेनभवितव्यंभवतानोऽद्यतनेश्राद्धकर्मणीतिब्राह्मणंनियमान्श्रावयेत् । भवितव्यमितितेनोक्ते अर्घपरिकल्प्यादाय मोटकादिकंचादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत आद्यश्राद्धेएषपादार्घस्तेमयादीयतेतवोपतिष्ठतामितिपादार्घंदद्यात् । ततःशिरसा भिवन्द्यजानुनीविश्राव्य ॐ इदंतेआचमनीयमित्याचमनीयजलंब्राह्मणायदद्यात् । ततस्तिलतैलेनपात्रब्राह्मणपादावाजानुअभ्यञ्जयेत् । ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयंपादौप्रक्षाल्याचम्य पात्रब्राह्मणमग्रेकृत्वाश्राद्धदेशमागत्योपविश्यान्नाभिप्रायेणसिद्धमितिपृच्छेत् । दक्षिणाग्रैककुशसहितनेपालक
म्बलाद्यादिकं ब्राह्मणोपवेशनायासनमुपकल्प्यासनंस्पृशन् ॐ अत्रासनेदेवराजाभ्यनुज्ञातोविश्रम्यतांद्विजवर्य्यानुग्रहात् ॥ प्रसादयेत्वास
नं गृहाणपूतंज्ञानाग्निपूतेनकरेणविप्रइतिमन्त्रंपठित्वा पात्रब्राह्मणंदक्षिणहस्तेनधृत्वोदङ्मुखमुपवेशयेत् । ततःपात्रब्राह्मणस्यपादयोस्तले
दक्षिणाग्रकुशत्रयंदद्यात् ।आसनसमीपेच तिलतैलेनघृतेनवा श्राद्धसमाप्तिपर्य्यन्तस्थायिनंदीपंकुर्यात् ।तद्रक्षापात्रब्राह्मणेनकर्तव्या ।रक्षो
घ्नान्गौरसर्षपान्तिलांश्चश्राद्धदेशेसन्निधापयेत् काककुक्कुटादीन्श्राद्धहन्तॄनपसारयेत् ।ततः पूर्वाभिमुखःकुशोदकेन ॐ अपवित्रः पवित्रो
वासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरः शुचिरितिपठित्वा ॐ पुण्डरीकाक्षःपुनात्वितिपुण्डरीकाक्षंस्मृत्वाश्राद्धीय
द्रव्याण्यात्मानंचसिञ्चेत् । ततः कुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपि तुरमुकप्रेतत्वविमुक्तिकामः आद्यादीनियथाकालंषो
डशश्राद्धान्यहंकरिष्येइतिसंकल्पयेत् । एकादशमासाभ्यन्तरेऽधिमासपातेषोडशपदस्थानेसप्तदशपदंप्रयोज्यम् । ततः कुशत्रयतिलजला
न्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यप्रेतत्वविमुक्तिहेतुकषोडशश्राद्धान्तर्गताद्यश्राद्धमहंकरिष्येइतिसंकल्पयेत् ।ॐ कुरुष्वेतिब्राह्म
णप्रतिवचनम् ।ॐ गायत्रीजपमहंकरिष्ये इतिपृष्ट्वा कुरुष्वेतिब्राह्मणानुज्ञातः त्रिर्गायत्रींजपेत् । सव्याहृतिकासप्रणवाचजपनीयागायत्री ।
देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वाहायैस्वधायैनित्यमेवनमोनमः इतित्रिर्जपेत् । ततोऽपसव्यंकृत्वा दक्षिणाभिमुखः
पातितवामजानुर्मोटकतिलजलान्यादाय ॐअद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेइदमासनंतेमयादीयतेतवोपतिष्ठतामितिमोटक
रूपमासनंतिलजलप्रोक्षितंदक्षिणाग्रमुत्सृजेत् । ततःसव्यंकृत्वा प्राङ्मुख उपविष्टः ॐ छत्रायनमः ॐ ब्राह्मणायनमःइतिदेयब्राह्मणौत्रिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूज्य इदंछत्रंददानीतिद्विजकरेजलंदत्त्वा छत्रमभिषिच्य कुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यावरणकामइदं छत्रमुत्तानाङ्गिरोदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रदद इतिदद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । ततस्तिलजलकुशान् दक्षिणाद्रव्यंचादाय ॐ अद्यकृतैतच्छत्रदानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांचतुभ्यमहंसंप्रददइतिदक्षिणांचदद्यात् । ततःप्रतिगृहीता ॐ स्वस्तीत्युक्त्वाछत्रदण्डेधारयेत् । ॐ उपानद्भ्यांनमः ॐब्राह्मणायनमः इतिदेयब्राह्मणौत्रिःसंपूज्य ॐइमे उपानहौददानीतिद्विजकरेजलदानमुपानहावभिषिच्य कुशादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यतप्तवालुकासिकण्टकितभूदुर्गसन्तरणकाम इमेउपानहावुत्तानाङ्गिरोदैवत्येअमुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददइति दद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । ततःकुशादीन्दक्षिणाद्रव्यंचादाय ॐ अद्यकृतैतदुपानद्दानप्रतिष्ठार्थमिदंहिरण्यमग्निदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांचतुभ्यमहंसंप्रदद इतिदक्षिणांचदद्यात् । ततःप्रतिगृहीता ॐ स्वस्तीत्युक्त्वा उपानहावारोहेत् । ततोऽपसव्यंकृत्वा दक्षिणाभिमुकः पातितवामजानुः ॐ अपहताऽसुररक्षा ᳲ सिवेदिषद इतिश्राद्धदेशेवामावर्तेनातिलान्विकीर्य्य ॐ आयन्तुनःपितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन्यज्ञेस्वधयामन्दतोऽधिब्रुवन्तुतेवन्त्वस्मानितिजपेत् । ततोर्घपात्रोपरिअच्छिन्नंदक्षिणाग्रंपवित्रंधृत्वा ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनइतिमन्त्रेणार्घपात्रेजलंदत्त्वा ॐ तिलोसिसोमदैवत्योगोसवेदेवनिर्मितः । प्रत्नवद्भिःप्रत्तःस्वधयापितॄंल्लोकान्प्रीणीहिनः स्वाहेतितिलान्प्रक्षिप्य गन्धपुष्पेतूष्णींतत्रप्रक्षिप्य अर्घपात्रंवामहस्तेकृत्वा पवित्रंब्राह्मणहस्तेउत्तराग्रंदत्त्वा तदुपरिकिंचिदुदकान्तरं दत्त्वा ॐ यादिव्याआपःपयसासंबभूवुर्याऽअन्तरिक्षऽउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानऽआपःशिवाः शᳲ स्योनासुहवाभवन्तु इतिप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेएषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिब्राह्मणकरेपवित्रोपरिअर्घजलंद दद्युत्सृजेत्। पात्रंचवामपार्श्वे पित्रेस्थानमसीत्यर्घपात्रंसपवित्रमधोमुखंस्थापयेत्। तच्चदक्षिणादानपर्यन्तंनचालयेत्। ततःश्राद्धदेशेतिलान्वि कीर्यदर्भहस्तोभूतलेप्रेतमाह्वयेत्। तत्रमन्त्रः—इमंलोकंपरित्यज्यगतोसिपरमांगतिमिति। अत्रस्त्रीश्राद्धेऽपिगतोसीत्येवमेवपठनीयमात्मत्वेनोद्दे श्यत्वात्। ततोमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेमयादीयन्तेत वोपतिष्ठन्तामितिगन्धादीनुत्सृजेत्। ततःसर्वसुगन्धिरितिमन्त्रेणगन्धान् ॐ श्रियादेव्याइतिमन्त्रेणपुष्पम् ॐ वनस्पतिरसइतिमन्त्रेणधूपं ब्राह्म णायनिवेदयेत्। ॐ ततएषदीपइतिनिवेदिते ॐ सुदीपःइतिब्राह्मणोवदेत् ॐ एतानिताम्बूलानीतिनिवेदिते ॐ सुताम्बूलानीतिब्राह्मणोवदेत्। ॐइमेयज्ञोपवीतेइतिनिवेदितेॐसुयज्ञोपवीतेइतिब्राह्मणोवदेत्।ॐएतानिवासांसीतिनिवेदिते ॐसुवासांसीतिब्राह्मणोवदेत्। पुष्पाणिशिखायामेव द्विजेनधार्याणि। ततःप्रेतोपभुक्तशय्यासनादिकंगन्धपुष्पैरभ्यर्च्य श्राद्धभोक्त्रेप्रतिपादयेत्।ततोगौरमृत्तिकया नीवारचूर्णेन जलेनवा ब्राह्मणंवेष्टयि त्वा चतुरस्रंमण्डलंकुर्यात्। परकीयभूमौश्राद्धकरणे श्राद्धीयवस्तुषुकिंचिदुद्धृत्यतिलजलघृतयुक्तमन्नम् ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमइति दद्यात्। जीवतांभूस्वामिनांकिंचिद्दानंनिष्क्रयंदद्यात्। तत उष्णमन्नंताम्रपात्रेणकराभ्यामादाय मनाक्कुस्थित्वा पितरंध्यात्वा पुरुषतृप्तिक्षमंपरिवि ष्यात्। तत इदंमधुरमिदमत्युष्णमित्यादिव्यञ्जनगुणानुत्कीर्तयन् मांसादीनिभूयिष्ठपात्रान्तरेषुपरिविष्य घृतंसातिलजलंचोपनीय अन्नंमधुनाभि वारयेत्। ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः। माध्वीर्नःसन्त्वोषधीः॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिव ँ रजः॥ मधुद्यौरस्तु नः पिता॥ ॐ मधुमान्नोव्वनस्पतिर्मधुमा ँ अस्तुसूर्य्यः॥ माध्वीर्गावोभवन्तुनः॥ ॐ मधुमधुमध्विति चपठित्वा व्यस्ताभ्यांपाणिभ्यांपात्रमाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्य ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽमृतेऽऽमृतंजुहोमिस्वाहा इतिजपेत् । ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा
ꣳ सुरे इतिपठन्नमृतरूपतयान्नंविचिन्त्य ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ॐ इदमन्नम् ॐ इमाआपः ॐ इदमाज्यम् ॐ इदंहविरि
तिपात्रब्राह्मणदक्षिणांगुष्ठमन्नजलघृतादिषुनिवेश्य ॐ अपहताऽअसुरारक्षा ꣳ सिवेदिषद इत्यन्नोपरिवहून्तिलान्प्रक्षिप्यमोटकादीन्यादाय
वामेनपाणिनापात्रमत्यजन् ॐ अद्यामुकगोत्रपितरमुकप्रेत आद्यश्राद्धेइदमन्नंसोपकरणंतेमयादीयततेवोपतिष्ठतामित्युत्सृजेत् ॥
ततो भवान्प्राशयत्वितिब्रूयात् । विप्रायापोशनंदत्त्वा सप्रणवांसव्याहृतिकांगायत्रीं ॐ मधुव्वाताइत्यादित्र्यृचं ॐ मधुमधुमध्विति
चजपित्वा ॐ अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्त्वितिपठित्वा ॐ यथासुखंजुषस्वेतिब्राह्मणंब्रूयात् । ब्राह्मणश्चवामेनपा
णिनापात्रमत्यजन् ॐकारपूर्वकंभुञ्जीत । संज्ञयापिभक्ष्यप्रार्थनांनकुर्य्यात् । श्राद्धकर्तादर्भेष्वासीनः सप्रणवव्याहृतिकांगायत्रींमधुव्वाताइत्या
दित्र्यृचंमधुमधुमध्वितिचजपेत् । गायत्रींब्राह्मणंश्रावयित्वा ॐ कृणुष्वपाजइत्यादीन्रक्षोघ्नमन्त्रान्पठित्वा भूमिंतिलैरास्तीर्य्य ब्राह्मणंपितृरूप
तयाध्यायेत् । ततउदीरतामित्यादिपितृमन्त्रान् ॐ सहस्रशीर्षाइत्यादिपुरुषसूक्तम् ॐ आशुःशिशानइत्यादिकमप्रतिरथमन्यान्यपिशतरु
द्रियप्रभृतिपवित्राणिरुचिस्तवप्रभृतीनिचपठेत् । अन्ततः ॐ नमस्तुभ्यंविरूपाक्षनमस्तेऽनेकचक्षुषे । नमः पिनाकहस्तायवज्रहस्तायवैनमइति ॥३२॥
श्लोकमपिपठेत् । वीणादिभिर्ब्राह्मणंहर्षयन्व्यञ्जनादिगुणान्कीर्तयन् । तस्ययत्रयत्रेच्छोपलभ्यतेतत्तदुपनयन्मन्दंमन्दंभोजयेत् । ततस्तंतृप्तं
ज्ञात्वा उच्छिष्टसन्निधावास्तृतदक्षिणाग्रकुशत्रयींभूमिंप्रोक्ष्यसर्वप्रकारकमन्नंतिलघृतसहितंजलेनाप्लाव्य गृहीत्वा ॐ अग्निद
ग्धाश्चायेजीवायेप्यदग्धाः कुलेमम ॥ भूमौदत्तेनतृप्यन्तुतृप्तायान्तुपरांगतिमितिमन्त्रेणमन्त्रस्थफलमुद्दिश्यकुशोपरितदन्नंविकिरेत् । ततः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यंकृत्वाऽऽचम्य हरिंस्मृत्वा अपसव्यंकृत्वा दक्षिणाभिमुखोब्राह्मणायजलगण्डूषमितिदत्त्वा ॐ स्वदितमितिब्राह्मणंपृच्छेत् । ॐ सुस्वदितमितितेनोक्ते ॐ पिण्डमहंकरिष्ये इतिपृच्छेत् । कुरुष्वेतिब्राह्मणानुज्ञातः उच्छिष्टसन्निधौचतुरस्रंहस्तैकप्रमाणंदक्षिणप्रवणंचतुरंगुलोच्छ्रितंस्थानंनिर्माय तन्मध्येवामहस्तेनदर्भपिञ्जूलीमादायतन्मूलेनवामान्वारब्धदक्षिणकरेणप्रादेशमात्रंलिखेत् ॥ ॐ अपहताऽसुरारक्षा*ंसि वेदिषदः इतिमन्त्रेणरेखामुल्लिखेत् । दर्भपिञ्जूलीमुत्तरस्यांदिशिनिःक्षिपेत् । तदुपरि येरूपाणिप्रतिमुञ्चमानाऽअसुराः सन्तः स्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकान्प्रणुदात्वस्मात् इत्युल्मुकंभ्रामयित्वा रेखादक्षिणतः क्षिपेत् । तदुपरिउपमूलसकृल्लूनकुशान्दक्षिणाग्रानास्तीर्य सव्यंकृत्वा ॐ देवताभ्यइतित्रिर्जपेत् । ततोऽपसव्यंकृत्वा पर्णपुटकादिकमेकंतिलजलगन्धपुष्पयुतंवामहस्तेकृत्वा दक्षिणहस्तेमोटकादिकमादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत आद्यश्राद्धेपिण्डस्थानेऽत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिकुशोपरिअवनेजनंदद्यात् । ततः श्राद्धशेषमन्नंसर्वव्यञ्जनतिलमधुघृतयुतमेकीकृत्यएतेनबिल्वपरिमाणपिण्डंनिर्माय घृतमध्वभिघारितंकृत्वा दक्षिणहस्तेनादाय मोटकादींश्चादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेएषपिण्डस्तेमयादीयतेतवोपतिष्ठतामितिकुशोपरि अवनेजनस्थानेसव्योपगृहीतदक्षिणकरेणपिण्डंदद्यात् । आस्तृतदर्भमूलेकरंप्रोक्ष्य सव्यंकृत्वाऽऽचम्यहरिंस्मृत्वा अपसव्यंकृत्वा ॐ अत्रपितर्मादयस्वयथाभागमावृषायस्व इतिपठित्वावामावर्तेनोदङ्मुखोभूत्वा मनाक्श्वासंनियम्य तेनैवयथासुखंपर्यावर्तयन् पितरंभास्वरमूर्तिंध्यायन् अमीमदन्तपितरोयथाभागमावृषायिषु इतिपठेत् । अवनेजनावशिष्टजलयुतपात्रंवामहस्तेकृत्वा दक्षिणहस्तेनमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिपिण्डोपरिप्रत्यवनेजनंदद्यात् । ततोनीवीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसरस्य सव्यंकृत्वाऽऽचम्यहरिंस्मृत्वावामेनपाणिनाघृतंसूत्रंदक्षिणहस्तेनगृहीत्वा ॐ एतत्तेपितर्वासःइतिपिण्डोपरिधृत्वा मोटकादिकमादाय
ॐ अद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धपिण्डेएतद्वासस्तेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत् । ततस्तूष्णींपिण्डेगन्धपुष्पधूपदीपताम्बूला
निदद्यात् । ततःपिण्डशेषान्नंपिण्डसमीपेविकिरेत् । ततआचान्तस्यब्राह्मणस्यकरे ॐ अपांमध्येस्थितादेवाःसर्वमप्सुप्रतिष्ठितम् ॥ ब्राह्मणस्य
करेन्यस्ताःशिवाआपोभवन्तुमेइतिजलंदद्यात् । ॐ भवन्तुतेब्राह्मणस्यैतत्प्रतिवचनम् । लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करे ॥ लक्ष्मीर्वस
तिमोष्ठेषुसौमनस्यंसदास्तुमे इतिपुष्पाणिदद्यात् । ॐ अस्तुसदातवेतिप्रतिवचनम् । अक्षतंचास्तुमेपुण्यंशान्तिःपुष्टिर्धृतिश्चमे ॥ यद्यच्छ्रेय
स्करंलोकेतत्तदस्तुसदामम इतितण्डुलान्दद्यात् । ॐ अस्तुसदातवेतिप्रतिवचनम् । अथवाशिवाआपःसन्त्वितिजलम् सौमनस्यमस्त्विति
पुष्पम् अक्षतंचारिष्टमस्त्विततितण्डुलान्दद्यात् । सन्त्विति ॐ अस्त्वितिप्रतिवचनम् । ततःपुटकादिपात्रेशान्त्युदकंपरिकल्प्य मेदिनींशिर
साभिवन्द्यइमंमन्त्रंपठेत् । ॐ नमोनमोमेदिनिलोकधात्रिउर्व्यैनमःशैलवराग्र्यधारिणि । धरणिकाश्यपिजगत्प्रतिभूतेवसुधेनमोस्तुभुवनैकवि
धात्रि । नमोस्तुतेसर्वरसप्रतिष्ठेनिवापनावीतिनमोस्तुतेधरे ॥ ततोमोटकादिकमादाय ॐ अद्यामुकगोत्रस्यापितुरमुकप्रेतस्य आद्यश्राद्धेदत्तैत
दन्नपानादिकमुपतिष्ठतामितिविप्रकरे अक्षय्योदकंदद्यात् । ॐ उपतिष्ठतामितिप्रतिवचनम् । ततःसव्यंकृत्वा प्राङ्मुखःकृताञ्जलिस्तन्मनाः
सुमनाःदक्षिणांदिशंपश्यन् ॐ अघोरःपितास्त्वितिपठेत् । अत्रपूर्वाभिमुखःपिण्डोपरिजलधारांददातीत्याचारः । ॐ अस्त्वितिप्रतिवचनम् ॥ ॥३३॥
ततःपूर्वाभिमुखःगोत्रंनोवर्धतामितिवदेत् । ॐ वर्द्धतामितिप्रतिवचनम् । दातारोनोभिवर्द्धन्तांवेदाःसन्ततिरेवच । श्रद्धाचनोमाव्यगमद्बहुदे
यंचनोऽस्तु ॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनःसन्तुमाचयाचिष्मकंचन ॥ एताःसत्याआशिषःसन्त्विति आशिषोब्राह्मणंया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चयेत् । सन्त्वितिब्राह्मणप्रतिवचनम् । ततोऽपसव्यंकृत्वा सपवित्रकुशत्रयंपिण्डोपरिदक्षिणाग्रंधृत्वा नमोवाचयिष्यइतिपृच्छेत् ॥ ॐ वाच्यतामित्यनुज्ञातः ॐ पित्रेनमउच्यतामितिवदेत् । ॐ अस्तुनमइतिप्रातिवचनम् । ततःपुटकादिस्थितंजलंगृहीत्वा ॐ ऊर्ज्जंवह न्तीरमृतंघृतंपयःकीलालंपरिस्रुतं स्वधास्थतर्प्पयतमेपितरमितिदक्षिणाग्रांजलधारांसपवित्रकुशोपरिदद्यात् । ततोनम्रीभूयपिण्डमा घ्रायोत्थापयेत् । पिण्डाधारकुशानुल्मुकंचवह्नौक्षिपेत् । ततोर्घपात्रमुत्तानीकृत्य मोटकतिलजलान्यादाय दक्षिणाद्रव्यंचादाय अद्यामुक गोत्रस्यपितुरमुकप्रेतस्यकृतैतदाद्यश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यममुकगोत्रायामुकशर्म्मणेब्राह्मणायदक्षिणांचदातुमहमुत्सृजे इतिदक्षि णादिदानम् । ॐ स्वस्तीतिप्रतिवचनम् ॥ श्राद्धकर्ता पात्रब्राह्मणस्यचरणौसंवाह्य तंनमस्कुर्यात् । ततोदक्षिणपाणिनापात्रब्राह्मणदक्षिण पाणिंगृहीत्वा शय्यासनमञ्जनंकङ्कतिकांचार्पयेत् । ब्राह्मणश्चाञ्जनंकङ्कतिकांचादाय शय्यामाक्रम्य मुहूर्त्तंविश्राम्येत् । ततःसामवेदाध्या यिब्राह्मणास्ताम्रपात्रस्थतिलोदकमुपाहरेयुः । ततःश्राद्धकर्ता तेनजलेनगृहस्थितंद्रव्यमभिषिञ्चेत् । ततःसव्यंविधाय ॐ अग्निमुखादेवा स्तृप्यन्तामितियवयुतजलेनकुशैःकुशोपरितर्पयेत् । अवशिष्टमन्नं ॐ भूतेभ्यएवबलिर्नमइतिजलपुष्पाभ्यांबलिंदद्यात् । ततःसामगान् ब्राह्मणान्भोजनादिभिःसंतोषयेत् । ततोऽपसव्येन ॐ निरोङ्कारंस्वस्तिब्रूहीतिब्राह्मणायवदेत् । स्वस्तीतिब्राह्मणोब्रूयात् । स्वस्त्यस्तुइत्यु क्त्वाब्राह्मणमुत्थाप्य जलपात्रंगृहीत्वा निमन्त्रणस्थानस्थितंब्राह्मणम् ॐ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमा गन्ताम्पितरामातराचामासोमोऽअमृतत्वेनगम्यादितिपठन् प्रदक्षिणीकुर्वन् वारिधारयात्रिर्वेष्टयित्वा प्रणम्याष्टौपदान्यनुव्रज्य प्रदक्षिणी कृत्याभिवादयेत् । सव्यंकृत्वा ॐ देवताभ्यइतित्रिर्जपित्वा गृहंप्रविशेत् । पाणिभ्यामपसव्येनश्राद्धीयदीपनिर्वापणम् । सव्यंकृत्वा हस्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादौप्रक्षाल्याचम्य श्राद्धसंपूर्णकामः ॐ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णस्यादितिश्रुतिरितिपठित्वा विष्णुस्मरणंकुर्यात् । ततश्चाशौचान्तद्वितीयदिनएवयथाशक्तिमहार्हाणिरत्नानिगाःवाहनं यानानिदासीं दासं महान्तिवेश्मानिश्रेष्ठभूष णानि प्रेतहितमुद्दिश्यब्राह्मणायदद्यात् । तद्यथा । अद्याशौचान्तद्वितीयेह्निअमुकगोत्रस्यपितुरमुकप्रेतस्यस्वर्गप्राप्तिकामः इमांगांरुद्रदे वताकां यथानामगोत्रायब्राह्मणायदातुमहमुत्सृजे इतिगांदद्यात् । ॐ अद्यकृतैतद्गोदानप्रतिष्ठासिद्ध्यर्थंहिरण्यमग्निदैवत्यंयथानामगोत्रा यब्राह्मणायदक्षिणांचतुभ्यमहंसंप्रददे इतियथाशक्तिदक्षिणांचदद्यात् । एवंभूमिहिरण्यादिदानमपि । अस्मिन्दिनेदशप्रभृतिश्रोत्रिया न्भोजयेत् । तान्परितोषयेत् । तत्रदिनेविहितमपिपञ्चगव्यपानंशिष्टानाचरन्तिइतिनलिखितम् ॥ अथान्नोदककुम्भदानम् ॥ तत्रएका दशाहश्राद्धंकृत्वाआचम्यप्राङ्मुखउपविश्य कुशतिलजलान्यादाय ॐ पितृगताहरहरन्नोदकुम्भोपस्थितिस्वगताश्वमेधयज्ञजन्यफलप्रा प्तिकामोऽद्यादिपितृमरणदिनावधिकाशौचावच्छिन्नादिनोनवत्सरं यावत्प्रत्यहंपित्रेसान्नोदकुम्भदानमहंकरिष्ये इतिजलपूर्णंकुम्भमुपनीयसंक ल्पंकुर्यात् । ततोऽपसव्यादिकृत्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतइदमासनंतेमयादीयतेतवोपतिष्ठतामित्यासनमुत्सृज्यसघृत व्यञ्जनमन्नमुपनीय ॐ अद्यामुकगोत्रपितरमुकप्रेतायंसान्नोदकुम्भस्तेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत् । तदुभयंपात्रंब्राह्मणायप्रतिपादयेत् । आशौचोपनिपातेप्ययंदातव्यइति । सपिण्डनेकृतेवर्षाभ्यन्तरे ॐ अद्यामुकगोत्रपितरमुकशर्मन्निदमासनंतुभ्यंस्वधा ॐ अद्यामुकगोत्रपितरमुक शर्मन्नयंसान्नोदकुम्भस्तुभ्यंस्वधेतिवदेत् । ततोमोटकादीन्यादाय ॐ अद्यकृतैतत्सान्नोदककुम्भदानप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यंयथानामगोत्रा यब्राह्मणायदक्षिणांचदातुमहमुत्सृजे इतिप्रत्यहंसान्नमुदककुम्भंदत्त्वा दक्षिणांचदद्यात् । अत्रद्वादशाहेश्राद्धंकार्यमितिकेचित् । तदपिएकादशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हवत् ॥ अथमासिकश्राद्धप्रयोगः ॥ तत्रश्राद्धपूर्वदिनेएकभक्तादिकंविधायप्रातःश्वेतवस्त्रयुग्मेनस्नात्वामध्यादिनेपुनःस्नात्वा कृतनित्यक्रियआ
चान्तउपविष्टः पूर्वोपकल्पितंप्रज्वालितप्रदीपं स्थापितरक्षोघ्नगौरसर्षपतिलं श्राद्धदेशमागत्य ॐ सिद्धमितिपृष्ट्वा कुशत्रयजलेन ॐ अपवित्रःप
वित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनात्वित्युच्चार्यश्राद्धदेयद्रव्याण्यात्मानंचासि
ञ्चेत् । ॐ अद्यामुकगोत्रस्यापितुरमुकप्रेतस्यप्रेतत्वविमुक्तिहेतुकषोडशश्राद्धान्तर्गतप्रथममासिकश्राद्धमहंकरिष्येइतिसंकल्पंकुर्य्यात् । एकाद
शमासाभ्यन्तरेऽधिमासपातेषोडशपदस्थानेसप्तदशपदंप्रयोज्यम् । ततस्त्रिर्गायत्रींजपित्वा ॐ देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वा
हायैस्वधायैनित्यमेवनमोनमः इतित्रिर्जपेत् । ततोऽपसव्यादिकृत्वा मोटकादिकमादाय ॐ अद्यामुकगोत्रापितरमुकप्रेतप्रथममासिकश्राद्धेइदमा
सनंतेमयादीयतेतवोपतिष्ठतामित्यासनमुत्सृजेत् । ॐ अपहताऽअसुरारक्षा ᳪसिवेदिषदइतिवामावर्तेनश्राद्धदेशेतिलान्विकिरेत् । ततआयन्तुनः
पितरइतिमन्त्रंपठेत् । ततःपुटकादौपवित्रंदक्षिणाग्रंधृत्वा ॐ शन्नोदेवीरितिमन्त्रेणतत्रजलंक्षिपेत् । ॐतिलोसिसोमदैवत्योगोसवेदेवनिर्मितः॥प्रत
वद्भिःप्रत्तः स्वधयापितॄँल्लोकान्प्रीणीहिनःस्वाहेतितिलान्प्रक्षिप्य तूष्णींगन्धपुष्पंचनिःक्षिपेत् । ततस्तदर्घपात्रंवामहस्तेकृत्वा पवित्रमन्नपात्रोपरि
उत्तराग्रंधृत्वा तदुपरिकिंचिदुदकान्तरंदत्त्वा ॐ यादिव्याऽआपःपयसासंबभूवुर्याअन्तरिक्षऽउतपार्थिवीर्य्याः ॥ हिरण्यवर्णायाज्ञियास्तानऽआपः
शिवाःश ᳪ स्योनासुहवाभवन्तु इतिपठित्वादक्षिणहस्तेनमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धेएषहस्तार्घस्तेम
यादीयतेतवोपतिष्ठतामितिपवित्रोपरिजलंदद्यात् । ततःपवित्रादिसहितमर्घपात्रंआसनवामपार्श्वे ॐ पित्रेस्थानमसीतिन्युब्जींकुर्यात् । पुनर्मोटका
दीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेमयादीयन्तेतवोपतिष्ठन्तामितिग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्धादिकमुत्सृजेत् । तत आसनस्यभोजनपात्रसहितस्यचतुर्दिशंचतुरस्रंमण्डलंकृत्वा श्राद्धीयान्नाग्रभागं घृतव्यञ्जनतिलजलयुतं पुटकादौकृत्वा
ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमइत्युत्सृजेत् ।ततस्ताम्रपात्रादिस्थितमन्नंहस्ताभ्यामादाय मनाक्स्थित्वा पितरंध्यायन् भोजनपात्रेउपनयेत् ।
पुरुषतृप्तिक्षममन्नंपरिविष्यभूमिष्ठपात्रान्तरेषुव्यञ्जनान्युपकल्प्य पुटकस्थितंघृतंजलंचोपनीय अन्नोपरिहस्तद्वयगृहीतपात्रेण मधु दत्त्वा ततः
ॐ मधुव्वाताइत्यादिऋचं ॐ मधुमधुमध्विितिचजपेत् । ततोव्यस्तहस्ताभ्यामन्नपात्रमालभ्य ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृ
तेअमृतंजुहोमिस्वाहा ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपा ँ सुरे ॥ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा वामेनपा
णिनापात्रमत्यजन्दक्षिणहस्ताङ्गुष्ठमन्नजलघृतादिषु ॐ इदमन्नम् ॐ इमाआपः ॐ इदमाज्यम् ॐ इदंकविरितिनिऽक्षिप्य अपहताऽ
सुरारक्षा ँ सि वेदिषदइत्यन्नोपरितिलान्विकीर्य दक्षिणहस्तेनमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धेइदमन्नंसो
पकरणंतेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत् । ततोगायत्रींमधुव्वाताइत्यादिऋचंमधुमधुमध्वितिचजपेत् । अन्नहीनमितिमन्त्रंपठेत् । ततः
कुशेषूपविश्यपुनर्गायत्रींमधुव्वाताइत्यादिऋचंमधुमधुमध्वितिचंजपेत् । रक्षोघ्नमन्त्रान्कृणुष्वपाजइत्यादिकान् जपेत् । भूमौतिलान्क्षिप्त्वापितृ
मन्त्रपुरुषसूक्ताप्रतिरथादीनि पवित्राणि यथाशक्तिजपेत् । ॐ नमस्तुभ्यंविरूपाक्षेतिश्लोकमपिचपठेत् । उच्छिष्टसन्निधावास्तृतकुशत्रयींभू
मिंप्रोक्ष्य व्यञ्जनघृततिलयुतमन्नंवारिणाप्लाव्य ॐ अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतृप्यन्तुतृप्तायान्तुपरांगतिमितितदन्नं
कुशोपरिविकिरेत् । ततःसव्यंकृत्वाऽऽचम्य हरिंस्मृत्वाऽपसव्यंकृत्वा पिण्डस्थानंनिर्मायतन्मध्येवामहस्तोपेतदक्षिणहस्तगृहीतदर्भपिञ्जूली
मूलेनप्रादेशमात्रमपहतेत्यादिनोल्लिख्य दर्भपिञ्जूलीमुत्तरतस्त्यजेत् । ततोरेखोपरि ॐ येरूपाणीतिमन्त्रेणाङ्गारंभ्रामयित्वा अङ्गारंदक्षिणत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्यजेत् । ततोरेखोपरिउपमूलसकृल्लूनकुशत्रयंदक्षिणाग्रमास्तीर्य सव्येनदेवताभ्यइतितिर्जपेत् । ततोऽपसव्यंकृत्वापुटकेतिलजलगन्धपुष्पाणिकृत्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्धपिण्डस्थानेत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामित्यवनेजनं कुशोपरिदद्यात् । ततस्तिलघृतमधुयुतेनान्नेनपिण्डंकृत्वा घृतमधुभ्यामभिवार्य्य दक्षिणहस्तेनमोटकादीनिचादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धेएषपिण्डस्तेमयादीयतेतवोपतिष्ठतामितिवामजान्वारब्धदक्षिणहस्तेनाऽवनेजनस्थानेपिण्डंदद्यात् । ततोदर्भमूलेकरं प्रोक्ष्यापसव्यंकृत्वाचम्य हरिंस्मृत्वा अपसव्यंकृत्वा दक्षिणाभिमुखः ॐ अत्रपितर्मादयस्वयथाभागमावृषायस्वेतिपठेत् । ततउत्तराभिमुखीभूय श्वासंनियम्यपितरंभास्वरमूर्त्तिंध्यायन् मुखंपर्यावर्तयन् अमीमदन्तपितायथाभागमावृषायिष्टेतिपठेत्। ततोऽवनेजनपात्रंदत्तावशिष्टजलयुतंवामहस्तेकृत्वा दक्षिणहस्तेमोटकादीन्यादाय ॐ आद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्धपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रत्यवनेजनंपिण्डोपरिदद्यात् । ततोनीवींविस्रस्य सव्यंकृत्वाचम्य अपसव्यंकृत्वा वामेनपाणिनाधृतंसूत्रं दक्षिणेनादाय उभाभ्यांपिण्डोपरि एतत्तेपितर्वासइतिसूत्रंधृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धपिण्डेएतद्वासस्तेमयादीयतेतवोपतिष्ठतामितिसूत्रंसमुत्सृजेत् । ततस्तूष्णींगन्धपुष्पादिकंदद्यात् । ततःपिण्डशेषान्नंपिण्डसमीपेविकिरेत् । ॐ शिवाआपःसन्त्वितिजलम् ॐ सौमनस्यमस्त्वितिपुष्पम् अक्षतंचारिष्टमस्त्वितितण्डुलान् अन्नपात्रोपरिक्षिपेत् । मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यप्रथममासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दद्यात् । ततः सव्यंकृत्वा ॐ अघोरः पितास्त्वितिदक्षिणांदिशंपश्यन् पिण्डोपरिपूर्वाग्रांजलधारांदद्यात्। ततः पूर्वाभिमुखीभूय ॐ गोत्रंनोवर्द्धतां दातारोनोभिवर्द्धन्तां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वेदाःसंततिरेवचेत्यादिनाऽऽशीः प्रार्थनंकुर्य्यात् । ततोऽपसव्येन पिण्डोपरिसपवित्रान्कुशान्धृत्वा पुटकादिस्थजलेन ॐ ऊर्ज्जंवहन्ती
रमृतंघृतंपयः कीलालंपरिस्रुतं स्वधास्थतर्पयतमेपितरमितिकुशोपरिदक्षिणाग्रांजलधारांदद्यात् । ततः पिण्डमाघ्रायोत्थापयेत् ।
पिण्डाधारकुशानुल्मुकंचवह्नौक्षिपेत् । अर्घपात्रमुत्थाप्य मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य कृतैतत्प्रथममासिक
श्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यंयथानामगोत्रायब्राह्मणायदक्षिणांचदातुमहमुत्सृजे इतिदक्षिणांचदद्यात् । ततः सव्यंकृत्वा ॐ देवता
भ्यइतित्रिर्जपेत् । ततोपसव्यंकृत्वा पाणिनादीपंनिर्वाप्य हस्तौपादौप्रक्षाल्य सव्यमाचमनंचकुर्यात् । ॐ प्रमादादितिपठित्वाविष्णुंस्मरे
त् । श्राद्धीयवस्तूनिब्राह्मणायप्रतिपादयेत् जलेवाक्षिपेत् । प्रायेणाऽपात्रकमेवमासिकश्राद्धंकुर्वन्तीत्यत्रापात्रकप्रयोगोलिखितः । त्रिपक्ष
श्राद्धमापिकर्तव्यम् । तच्चमासिकवत् । एवमेवद्वितीयमासिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकोनषाण्मासिकषाण्मासिकसप्तम
मासिकाष्टममासिकनवममासिकदशममासिकैकादशमासिकोनवार्षिकद्वादशमासिकश्राद्धेषुतत्तत्पदप्रक्षेपेणप्रयोगऊह्यः । अधिमासपा
ते एकादशमासिकानन्तरंद्वादशमासिकंततऊनवार्षिकंततस्त्रयोदशमासिकंश्राद्धमितिक्रमः ॥ सपात्रकमासिकश्राद्धकरणे ब्राह्मणनिम
न्त्रणस्वागतप्रश्नपादार्घदानाऽऽचमनीयदानब्राह्मणोपवेशनप्रश्नप्रतिवचननमोवाचनब्राह्मणविसर्जनादिविशेषआद्यश्राद्धप्रयोगवदूह्य इति ॥ अथ
सपिण्डनश्राद्धप्रयोगः ॥ तत्रचाधुनिकाः प्रेतश्राद्धातिरिक्तश्राद्धचतुष्टयमपात्रकमेवकुर्वन्तीतितथैवलिख्यते । तत्र पूर्वदिनेनिरामिषमेक
वारंभुक्त्वा रात्रौसर्वंभुक्तजनगृहेविप्रनिवेशनंगत्वा दक्षिणाप्रवणगोमयोपलिप्तायांभूमावाचान्तउपविश्यकृतापसव्यः पुष्पचन्दनताम्बूला
निब्राह्मणकरेदत्त्वा दक्षिणकरेणब्राह्मणजानुंस्पृष्ट्वा ॐ अस्यांरात्रावमुकगोत्रस्यापितुरमुकप्रेतस्यश्वः सपिण्डीकरणश्राद्धकरणाय भवन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणमामन्त्रये इत्यामन्त्रणंकुर्यात् । ॐ आमन्त्रितोस्मीतिप्रतिवचनम् । ॐ ततः अक्रोधनेनेत्यादि ॐ सर्वायासविनिर्मुक्तेनकामक्रोधवि
वर्जितेनभवितव्यंभवता नः श्वस्तनेश्राद्धकर्मणीतिब्राह्मणंनियमान्श्रावयेत् । यद्यविघ्नेनरजनीयास्यति तदा सर्वमेतत्करिष्यामीतितत्प्र
तिवचनम् । ततोऽग्रिमदिनेप्रातः श्वेतवस्त्रयुग्मेनस्नात्वा मध्यान्दिनेपुनः स्नात्वाकृतनित्यक्रियः श्राद्धकर्ताश्राद्धनिषिद्धेतरवेलायांभूमौकृ
तपाकस्थानेतिलान्विकीर्य्य परितश्छागान्बन्धयित्वा सपिण्डद्वारा नूतनभाण्डैः स्वयंवापाकमारभेत । श्राद्धभूमिंपञ्चगव्येनोपलिप्य
ज्वलदङ्गारैःसंशोध्य गौरमृत्तिकयाच्छाद्यतिलैः सर्षपैश्चविकिरेत् । द्विजंकारितश्मश्रुनखच्छेदनमभिगम्यदन्तधावनंताम्रपात्रेतैलोद्वर्त
नादीन्युपनीयस्नानार्थंदत्तजलेनस्नातं यजमानसवर्णेनाहूतमाचान्तंतंमध्याह्नेशुचिराचान्तःशुक्लद्विवासाउपविश्य गोमयोपलिप्तांभूमिंवामा
वर्तेनकृतगोमूत्रमण्डलां ॐ भूम्यैनमःइत्यक्षतपुष्पैस्त्रिरर्चयित्वाभूमौकुशत्रयमास्तीर्य तदुपरितिष्ठन् ॐ स्वागतमितिब्राह्मणंपृच्छेत् । ॐ सु
स्वागतमितितेनोक्ते इदंतेपाद्यमित्युपनीयविनीतः सन् पुनःपुनरभिनन्द्य पात्रब्राह्मणपादौप्रक्षालयेत् । ततःपुटकेऽर्घंकृत्वादक्षिणाभिमु
खोऽपसव्यंकृत्वा मोटकादिकमादायार्घपात्रंवामहस्तेकृत्वा ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिण्डीकरणश्राद्धेएषपादार्घस्तेमयादीयतेतवो
पतिष्ठतामितिपादार्घंदद्यात् । ततआचमनीयजलं पात्रस्थमभिनीय शिरसाभिवन्द्य जानुनीविश्राव्य इदंतेआचमनीयमित्या
चमनीयजलंत्रिर्ब्राह्मणायदत्त्वा स्वयंपादौप्रक्षाल्याचम्यतमाचमय्याऽग्रेकृत्वा श्राद्धदेशमागच्छेत् । पूर्वरात्रौनिमन्त्रणासंभवेतस्मिन्नेवाह्नि श्राद्ध
वेलायां पूर्वोक्तविशेषणविशिष्टंयजमानसवर्णेनाहूतंपूर्ववत्कृतगोमूत्रमण्डलायांभूमावुपवेशयेत्स्वयमप्युपविशेत् । ततःश्राद्धकर्ता इदंतेपाद्य
मित्युपनीयविनीतःपुनःपुनरभिनन्द्यपात्रब्राह्मणपादौप्रक्षालयेत् । ततोऽपसव्यंकृत्वा पुष्पचन्दनताम्बूलानिविप्रकरेदत्त्वाब्राह्मणजानुंदक्षिणहस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्पृष्ट्वा ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणश्राद्धकरणाय भवन्तंब्राह्मणमहमामन्त्रये इत्यामन्त्र्य आमन्त्रितोस्मीतिते
नोक्ते अक्रोधनेनेत्यादिना ॐ सर्वायासविनिर्मुक्तेनेत्यादिनाच ब्राह्मणंनियमान्श्रावयेत् । भवितव्यमितितेनोक्ते अर्घंपरिकल्प्यवामह
स्तेकृत्वा मोटकादिकमादाय अद्यामुकगोत्रपितरमुकप्रेतसपिण्डीकरणश्राद्धेएषपादार्घस्तेमयादीयतेतवोपतिष्ठतामितिपादार्घंदद्यात् ।
ततआचमनीयजलंपात्रस्थंशिरसाभिवन्द्यजानुनीविश्राव्य ॐ इदंते आचमनीयमितिब्राह्मणायदत्त्वा सव्येनस्वयंपादौप्रक्षाल्याचम्य तमाचम
य्याग्रेकृत्वाश्राद्धदेशमागच्छेत् । तत्र प्राङ्मुखउपविश्य सिद्धमितिपृष्ट्वा आसनंस्पृष्ट्वाऽत्रानिषीदस्वेतिब्राह्मणमुदङ्मुखमुपवेशयेत् । द्विजपादयो
स्तलेकुशान्दद्यात् । आसनसमीपे तिलतैलेनदीपंप्रज्वाल्यस्थापयेत् । अन्यांश्चप्रत्यासन्नसमीपेतिलतैलेनचतुरोदीपान्स्थापयेत् ॥ ब्राह्मणेनदीपर
क्षाकर्तव्या । रक्षोघ्नान्गौरसर्षपांस्तिलान्श्राद्धदेशेसन्निधापयेत् । काककुक्कुटादीन्श्राद्धहन्तॄनपसारयेत् । ततः ॐ अपवित्रःपवित्रोवेत्यादिप
ठित्वा ॐ पुण्डरीकाक्षःपुनात्विवितिश्राद्धीयद्रव्याणिचात्मानंकुशत्रयेणासिञ्चयेत् । ततःकुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमु
कप्रेतस्यप्रेतत्वविमुक्तिहेतुकषोडशश्राद्धान्तर्गतसपिण्डीकरणश्राद्धमहंकरिष्ये इतिसंकल्पंकुर्यात् । ॐ कुरुष्वेतिब्राह्मणोवदेत् । गायत्रीज
पमहंकरिष्ये इतिब्राह्मणंपृच्छेत् । ॐ कुरुष्वेति तेनानुज्ञातः प्रणवव्याहृतिसहितांगायत्रींत्रिर्जपेत् । ततो देवताभ्यइतित्रिर्जपेत् । ततो देवश्रा
द्धार्थोपकल्पितासनादिदेशमागत्योदङ्मुखउपविश्यकुशत्रययवजलान्यादाय अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकामु
कगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मणांश्राद्धसम्बन्धिनोविश्वेदेवाइदमासनंवोनम इतिपूर्वाग्रंकुशत्रयरूपंसजलयवप्रोक्षितमुत्सृ
जेत् । ॐ विश्वान्देवानहमावाहयिष्येइत्युक्त्वा ॐ विश्वेदेवासऽआगत शृणुतामऽइम २ हवम् ॥ एदंबर्हिर्निषीदतेत्यावाह्य ॐ यवोसियवयास्मद्द्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोयवयारातीरितियवान्विकीर्य ॐ विश्वेदेवाःशृणुतेम ँ हवंमेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमा दयध्वम् । आगच्छन्तुमहाभागाविश्वेदेवामहाबलाः ॥ येअत्रविहिताःश्राद्धेसावधानाभवन्तुते इतिपठेत् । ततःपुटकेपूर्वाग्रंपवित्रंधृत्वा ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः इतिजलंक्षिप्त्वा ॐ यवोसीतियवान्प्रक्षिप्य गन्धपुष्पेतूष्णींतत्रप्रक्षिप्य अर्घपात्रं वामहस्तेकृत्वा पवित्रंभोजनपात्रेपूर्वाग्रंधृत्वा तदुपरिकिञ्चिदुदकान्तरंदत्त्वा यादिव्याऽआपः पयसासम्बभूवुर्याऽअन्तरिक्षऽउत पार्थिवीर्य्याः ॥ हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःशं स्योनासुहवाभवन्त्विपपठित्वा कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मणां श्राद्धसम्बन्धिनोविश्वेदेवाएषवोहस्तार्घो नमः इतिपवित्रोपरिअर्घजलमुत्सृजेत् । ततःपवित्रसहितमर्घपात्रमासनदक्षिणपार्श्वे ॐ विश्वेभ्योदेवेभ्यःस्थानमसीतिविश्वेदेवार्घपात्रमुत्तानं स्थापयेत् । ततःकुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्र पितामहामुकामुकशर्मणां श्राद्धसम्बन्धिनोविश्वेदेवा एतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसिवोनम इतिगन्धादीनुत्सृजेत् । ततो भोजनपात्रासनयोश्चतुर्दिशंजलेन चतुष्कोणमण्डलंकृत्वा अपसव्येन मोटकादिकमादाय तिलघृतव्यञ्जनयुतमन्नम् ॐ इदमन्नमेतद्भूस्वा मिपितृभ्योनम इतिदक्षिणमुखउत्सृजेत् ॥ ततः सव्यंकृत्वा ताम्रपात्रादिकंगृहीत्वा तेनान्नमादायमनाक्स्थित्वा देवान्ध्यायन्पात्रेपरिविष्यात् । व्यञ्जनानिघृतंजलंचतत्रोपनीयान्नोपरिमधुदत्त्वा ॐ मधुव्वाताइतिऋचा ॐ मधुमधुमध्विितिमन्त्रैरन्नमभिमन्त्रयेत् । ततःऋजुहस्ताभ्यामन्न पात्रमालभ्य ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा ँ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरेइतिचपठित्वा ॐ कृष्णकव्यमिदंरक्षमदीयमिति पठित्वा ॐ इदमन्नमित्यन्ने ॐ इमाआपइतिजले ॐ इदमाज्यमितिघृते ॐ इदंहविरि
तिपुनरन्नेदक्षिणकरांगुष्ठमावेश्य ॐ यवोसीत्यन्नोपरियवान्निःक्षिप्यकुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपि
ण्डीकरणनिमित्तकामुकगोत्रापितामहप्रपितामहवृद्धप्रपितामहानाममुकामुकशर्मणां श्राद्धसम्बन्धिनोविश्वेदेवाएतद्वोन्नंसोपकरणं नमइत्य
न्नमुत्सृजेत् । एवंदेवकाण्डंनिर्वर्त्य हस्तौपादौप्रक्षाल्य कुशवदुदकादिकंपुनर्गृहीत्वा प्रेतश्राद्धदेशमागत्योपविश्यअपसव्यादिकृत्वा दक्षि
णाभिमुखोमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिण्डीकरणश्राद्धेइदमासनंतेमयादीयतेतवोपतिष्ठतामितिपित्रे आसनं मोट
करूपं तिलजलप्रोक्षितमुत्सृजेत् । पुनर्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रस्य
पितामहस्यामुकशर्मणेइदमासनं तेस्वधा इतिस्थानत्रयेक्लृप्तासनेषु सर्वपश्चिमस्थानस्थितमासनंपितामहायोत्सृजेत् । पुनर्मोटकादीन्यादाय
ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रस्यप्रपितामहस्यामुकशर्मणइदमासनंतेस्वधा इतिमध्यममा
सनं प्रपितामहायोत्सृजेत् । पुनर्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रस्य
वृद्धप्रपितामहस्यामुकशर्मणे इदमासनंतेस्वधेतिसर्वपूर्वमासनंवृद्धप्रपितामहायोत्सृजेत् । ततः पितामहादीनुद्दिश्य ॐ पितृनहमावा
हयिष्यइत्युक्त्वा ॐ उशन्तस्त्वानिधीमहि उशन्तःसमिधीमहि ॥ उशन्नुशतऽआवहपितृन्हविषेऽअत्तवे इतिपितामहादीनावाह्य ॥३८॥
ॐ अपहताइत्यादिउभयत्रश्राद्धस्थानेतिलान्विकीर्य्य ॐ आयन्तुनःपितरइत्यादिमन्त्रंजपेत् । ततोऽर्घपात्रचतुष्टयेऽनखच्छिन्नं दक्षि
णाग्रंपवित्रंप्रत्येकंधृत्वा ॐ शन्नोदेवीरितिप्रत्येकंजलंक्षिप्त्वा ॐ तिलोसीतिस्वाहान्तेनमन्त्रेण प्रत्येकंतेष्वेवतिलान्प्रक्षिप्य गन्धपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एप्वेतेष्वेवतूष्णींप्रक्षिप्य प्रेतार्घपात्रंवामहस्तेकृत्वा पवित्रपात्रंब्राह्मणकरेउत्तराग्रंधृत्वा तदुपरिकिंचिज्जलान्तरंदत्त्वा ॐ यादिव्याआप इतिपठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिण्डीकरणश्राद्धे एषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिपा त्रब्राह्मणहस्तेपवित्रोपरि अर्घ्यंजलंददद्युत्सृजेत् । अवशिष्टजलसहितार्घ्यपात्रं ब्राह्मणाग्रेनिदध्यात् । पितामहार्घपात्रं वामहस्तेकृ त्वा पवित्रंभोजनपात्रेधृत्वा तदुपरिजलान्तरंदत्त्वा ॐ यादिव्या इत्यादिपठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रे तस्य सपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रपितामहामुकशर्म्मन्नेषतेहस्तार्घ्यः स्वधेतिपूर्ववदर्घ्यंदद्यात् । अवशिष्टजलयुतमर्घ्यपात्रमग्रेधारयेत् । ततःप्रपितामहार्घ्यपात्रंवामहस्तेकृत्वा पवित्रंभोजनपात्रेधृत्वा तदुपरिजलान्तरंदत्त्वा ॐ यादिव्याइत्यादिपठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रप्रपितामहामुकशर्मन्नेषतेहस्तार्घ्यः स्वधेत्यर्घ्यंददत्पूर्ववदुत्सृ जेत् । तदर्घ्यपात्रमवशिष्टजलयुतमग्रेस्थापयेत् । तृतीयार्घ्यपात्रंवामहस्तेकृत्वा पवित्रंभोजनपात्रेधृत्वा तदुपरिजलान्तरंदत्त्वा ॐ यादिव्याइति पठित्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रवृद्धप्रपितामहामुकशर्मन्नेषतेहस्ता र्घ्यः स्वधेतिपूर्ववदर्घ्यमुत्सृजेत् । अवशिष्टजलयुतार्घ्यपात्रमग्रेस्थापयेत् । ततःसव्यंकृत्वाआचम्यअपसव्यंकृत्वा पुटकत्रयमग्रेधृत्वा प्रेतार्घ्यपा त्रंगृहीत्वा ॐ येसमानाःसुमनसःपितरोयमराज्ये ॥ तेषांलोकःस्वधानमोयज्ञोदेवेषुकल्पताम् ॥ येसमानाःसुमनसोजीवाजीवेषुमामकाः ॥ तेषा २ श्रीर्मयिकल्पतामस्मिल्लोकेशतꣳ समाः इतिमन्त्राभ्यांप्रेतार्घपात्रस्थजलतृतीयभागंपुटकान्तरेधृत्वापुनरपिमन्त्रद्वयंपठित्वाऽपरतृती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यभागंपुटकान्तरेधृत्वा प्रेतार्घ्यपात्रस्यतृतीयभागजलंपुटकान्तरेधृत्वातूष्णींप्रथमपुटकस्थविभक्तजलतृतीयभागंप्रेतार्घ्यपात्रेकृत्वापवित्रपुष्प सहितंप्रेतार्घ्यपात्रमादाय येसमानाइतिमन्त्रद्वयेनप्रेतार्घ्यपात्रस्थतृतीयभागजलंपितामहार्घ्यपात्रस्थजलेनमेलयेत् । एवमपरपुटकास्थितार्घ्य तृतीयभागद्वयं क्रमेण प्रत्येकंप्रेतार्घ्यपात्रेकृत्वा प्रत्येकंमन्त्रद्वयंपठित्वा प्रपितामहार्घ्यपात्रस्थजलं वृद्धप्रपितामहार्घ्यपात्रस्थजलेनमेलयेत् । ततःप्रेतार्घपात्रंब्राह्मणवामपार्श्वे पित्रेस्थानमसीतिन्युब्जंकृत्वास्थापयेत् । वृद्धप्रपितामहार्घ्यपात्रस्थजलादिकं प्रपितामहार्घ्यपात्रेकृत्वा तत्सर्वंपितामहार्घ्यपात्रेकृत्वा पितामहार्घ्यपात्रमुत्तानंप्रपितामहार्घ्यपात्रोपरिधृत्वातद्वयमुत्तानंवृद्धप्रपितामहार्घ्यपात्रोपरिधृत्वा पात्रत्रयमेकदैव पितामहासनवामपार्श्वे पितृभ्यःस्थानमसीतिन्युब्जंकृत्वास्थापयेत् । एवंस्थापितमर्घ्यपात्रचतुष्टयंदक्षिणादानपर्यन्तंनचालयेत् । ततो मोटकादिकमादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिण्डीकरणश्राद्धे एतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेमयादीयन्ते तवोपतिष्ठन्तामितिपित्रेगन्धादीनिदद्यात् । पुनः मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तक श्राद्धे अमुकगोत्रपितामहामुकशर्मन्नेतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेस्वधेतिपितामहायगन्धादीन्युत्सृजेत् । एवंप्र पितामहायवृद्धप्रपितामहायचगन्धादीन्युत्सृजेद्यथाक्रमेण । ततः पितृब्राह्मणहस्तेस्वहस्तेन एषगन्ध इतिचन्दनंनिवेदयेत् । ॐ सुगन्धाइतितेनोक्ते ॐ एतानिपुष्पाणीतिनिवेदयेत् । ॐ सुपुष्पाणीतितेनोक्ते ॐ एषधूपइतिनिवेदयेत् । ॐ सुधूपइतितेनोक्ते ॐ एषदीपइतिदीपंनिवेदयेत्। सुदीपइतितेनोक्ते ॐ इमेयज्ञोपवीते इति यज्ञोपवीते निवेदयेत् । ॐ सुयज्ञोपवीतेइतितेनोक्ते ॐ एतानि वासांसीतिनिवेदिते ॐ सुवासांसीतितेनोक्ते ब्राह्मणायप्रतिपादयेत् । पुष्पाणिशिखातिरिक्तदेशेनधारयेत् । ततः पात्रब्राह्मणचतुर्दिशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुष्कोणंमण्डलंजलेनकुर्यात् । अपरंपितामहादित्रिकेचतुष्कोणंमण्डलंकुर्यात् । ततः सव्यंकृत्वा प्राङ्मुखउपविश्य पातितदक्षिणजानुस्ताम्रपात्रादौव्यञ्जनक्षारवर्जितंसघृतमन्नंकृत्वा पुटकादिस्थजलहस्तेन ॐ अग्नयेकव्यवाहनायस्वाहा ॐ सोमायपितृमतेस्वाहा इत्याहुतिद्वयंतदन्नेचजुहुयात् । ततः अपसव्यंकृत्वाऽवशिष्टमन्नंपितामहादिपात्रेकिंचित्किंचिद्दद्यात् । पिण्डार्थंचावशेषयेत् । ततोहस्ताभ्यांताम्रपात्रमादाय तेनान्नंगृहीत्वाप्रेतपात्रेध्यायन्परिविष्यात् । पृथक्पुटकादिस्थितानिघृतजलव्यञ्जनानिचोपनयेत् । ततस्तेनैवचक्रमेणपितामहादिपात्रत्रये प्रत्येकमन्नादिपरिवेषणंकुर्यात् । ततः प्रेतपात्रादिस्थितान्नेषुप्रत्येकंमधुदद्यात् । ततः प्रत्येकमभिमन्त्रयेत् । ॐ मधुव्वाताऋतायतेमधुक्षरन्तिसिन्धवः ॥ माध्वीर्नःसन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳ रजः ॥ मधुद्यौरस्तुनःपिता ॥ मधुमान्नोवनस्पतिर्म्मधुमाꣳ अस्तु सूर्य्यः ॥ माध्वीर्गावोभवन्तुनः ॥ मधुमधुमध्वितिमन्त्रैः । ततः प्रेतान्नपात्रंव्यस्ताभ्यांन्युब्जाभ्यांहस्ताभ्यामालभ्य ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳ सुरे इतिजपित्वा ॐ कृष्णकव्यमिदंरक्षमदीयमित्युक्त्वा पात्रस्थान्नस्यदक्षिणहस्तांगुष्ठंगृहीत्वा ॐ इदमन्नम् ॐइमाआपः ॐइदमाज्यम् ॐइदंहविरितिक्रमेणान्नजलघृतादिषुतन्निवेश्य ॐ अपहताइत्यन्नोपरिप्रचुरतिलान्प्रक्षिप्य मोटकादीन्यादाय ॐ अद्यामुकगोत्रापितरमुकप्रेत सपिण्डीकरणनिमित्तकश्राद्धेइदमन्नंसोपकरणं तेमयादीयतेतवोपतिष्ठतामितिपित्रेऽन्नमुत्सृजेत् । अनेनैवक्रमेणपितामहान्नपात्रमालभ्य ॐ पृथिवीतेपात्रमित्यादिपठित्वा ॐ इदमन्नमित्यादिनास्वदक्षिणहस्तांगुष्ठनिवेशनंकृत्वा ॐ अपहताइत्यादिनातिलानन्नेविकीर्य्य मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य

१ पितृपात्रेषु वर्तुलं मण्डलं कुर्वन्ति । परंतु पितामहादिषुत्रिचतुष्कोणमण्डलकरणेऽत्राऽऽशयं परिपाटीज्ञा विद्वांस एव विदांकुर्वन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रपितामहामुकशर्म्मन्नेतत्तेऽन्नंसोपकरणंस्वधेतिपितामहायान्नमुत्सृजेत् । ततः प्रपितामहान्नपात्रमालभ्यपूर्ववत् । ॐ पृथिवीतेपात्रमित्यादिकंसर्वंकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रप्रपितामहामुकशर्मन्नेतत्तेऽन्नंसोपकरणंस्वधेतिप्रपितामहायान्नमुत्सृजेत् । ततोवृद्धप्रपितामहान्नपात्रमालभ्य पूर्ववत् । ॐ पृथिवीतेपात्रमित्यादिकंसर्वंकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रवृद्धप्रपितामहामुकशर्मन्नेतत्तेन्नंसोपकरणंस्वधेतिवृद्धप्रपितामहायान्नमुत्सृजेत् । ततः ॐ भवान्प्राशयत्वितिपात्रब्राह्मणायजलचुलुकंदत्त्वा सप्रणवव्याहृतिकांगायत्रीं ॐ मधुव्वाताइत्यादिऋचं ॐ मधुमधुमध्वितिचजपित्वा ॐ अन्नहीनमित्यादिचपठित्वा ॐ यथासुखंजुषस्वेतिपात्रब्राह्मणंप्रतिब्रूयात् । सच ॐ कारपूर्वं वामेनपाणिनापात्रमत्यजन्चुलुकंगृहीत्वा भुञ्जीत । हासक्रोधत्वरादिकंनकुर्यात् । व्यञ्जनार्थंहस्तादिनापिसञ्ज्ञांनकुर्यात् । श्राद्धकर्तादर्भेष्वासीनः सप्रणवव्याहृतिकांगायत्रीं ॐमधुव्वाताइत्यादिऋचम् ॐमधुमधुमध्वितिचजपेत् । गायत्रींब्राह्मणमनुश्रावयेत् । कृणुष्वपाजइत्यादीन्रक्षोघ्नान्मन्त्रान्पठित्वाभूमिंतिलैरास्तीर्य्य श्राद्धीयब्राह्मणंपितृरूपतयाध्यात्वा ॐ उदीरतामित्यादिपितृमन्त्रान् ॐ सहस्रशीर्षाइत्यादिपुरुषसूक्तम् ॐआशुः शिशानइत्यादिकमप्रतिरथमन्यानिचाशिवसंकल्पप्रभृतीनिपवित्राणि ऋग्यजुस्सामानिरुचिस्तवप्रभृतीनिचयथाशक्तिजपेत् । ॐ नमस्तुभ्यंविरूपाक्षइतिश्लोकमपिपठेत् । वीणाध्वनिभिर्ब्राह्मणंहर्षयन्व्यञ्जनगुणान् इदमन्नमित्यादिक्रमेणकीर्तयन् यत्रेच्छोपलभ्यते ॥४०॥
तस्यतत्तदुपनयन् मन्दंमन्दंभोजयेत् । ततस्तृप्तंब्राह्मणंज्ञात्वा पितामहपात्रसन्निधावास्तृतदक्षिणाग्रकुशत्रयांभूमिंप्रोक्ष्यसर्वप्रकारकमन्नमादाय सतिलघृतंजलेनाप्लाव्य ॐ अग्निदग्धाश्च येजीवायेप्यदग्धाः कुलेमम ॥ भूमौदत्तेनतृप्यन्तुतृप्तायान्तुपरांगतिमित्यास्तृतकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोपरितदन्नंविकिरेत् । ततः सव्यंकृत्वाचामेत् । हरिंस्मृत्वा अपसव्येनपात्रब्राह्मणाय ॐ इदंतेप्रत्यापोशनमितिजलगण्डूषंदत्त्वा ॐ स्वदितमितिपृष्ट्वा ॐ सुस्वदितमितितेनोक्ते ॐ पिण्डमहंकरिष्ये इतिपृच्छेत् । ॐ कुरुष्वेत्यनुज्ञातः पात्रब्राह्मणायाचमनार्थंपात्रं दापयेत् । ततःप्रेतपिण्डदानार्थमेकामपरांपितामहादित्रिकपिण्डदानार्थमेकहस्तमितां चतुरस्रांचतुरङ्गुलोच्छ्रितांदक्षिणप्लवांपिण्डिकांनिर्माय तन्मध्येवामेनपाणिनादर्भपिञ्जूलींगृहीत्वा दक्षिणहस्तेनकृत्वा तन्मूलेनसव्योपगृहीतदक्षिणपाणिना ॐ अपहताइत्यादिपठित्वाद क्षिणाग्रांरेखां प्रादेशप्रमाणांसकृदुल्लिख्यदर्भपिञ्जूलीमुत्तरस्यांदिशिक्षिपेत् । एवमेवापरपिण्डिकायामप्येकांरेखांकुर्य्यात् । ततः पूर्वंपि ण्डिकारेखोपरि ॐ येरूपाणिप्रतिमुञ्चमानाऽअसुराःसन्तः स्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्ट्वाँल्लोकान्प्रणुदात्यस्मादिति मन्त्रेणाङ्गारंभ्रामयित्वादक्षिणतः क्षिपेत् । एवमेवापररेखायामङ्गारंभ्रामयेत् । ततउभयत्ररेखायामुपमूलसकृल्लूनान्दक्षिणाग्रान्कुशान्स्तृ णुयात् । ततः सव्यंकृत्वा ॐ देवताभ्यइतित्रिर्जपेत् । ततोऽपसव्यंकृत्वा पुटकचतुष्टयेजलतिलगन्धपुष्पाणिक्षिप्त्वाएकंपुटकं वामहस्तेकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिण्डीकरणश्राद्धे पिण्डस्थानेत्रावनेनिक्ष्वतेभ्रयादीयतेतवोपतिष्ठता मितिपूर्वपिंडिकायांछिन्नमूलोपरि अवनेजनंदद्यात् । ततोऽपरंपुटकंवामहस्तेकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमु कप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डस्थानेऽमुकगोत्रपितामहामुकशर्मन्नत्राऽवनेनिक्ष्वतेस्वधेतिद्वितीयपिण्डिकायामास्तृतकुशमूलस न्निधानेपितामहायावनेजनजलंदद्यात् । ततोऽपरपुटकंवामहस्तेकृत्वा दक्षिणहस्तेनमोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमु कप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थानेऽमुकगोत्रप्रपितामहामुकशर्मन्नत्राऽवनेनिक्ष्वतेस्वधेत्यास्तृतकुशमध्येप्रपितामहायावने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनजलंदद्यात् । ततोऽपरंपुटकंवामहस्तेकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धेपिण्ड
स्थानेऽमुकगोत्रवृद्धप्रपितामहामुकशर्मन्नत्राऽवनेनिक्ष्वतेस्वधेत्यास्तृतकुशाग्रेवृद्धप्रपितामहायावनेजनजलंदद्यात् ॥ ततःसर्वव्यञ्जनतिलजलम
ध्वाज्यसहितान्नेनप्रेतपिण्डंसर्वव्यञ्जनतिलजलमध्वाज्यहुतशेषान्नेनपिण्डत्रयंचानिर्माय चतुरःपिण्डान्मधुघृताभ्यामभिघार्यप्रथमंप्रेतपिण्डंदक्षि
णहस्तेनमोटकतिलजलानिचादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत सपिण्डीकरणश्राद्धेएषपिण्डस्तेमयादीयतेतवोपतिष्ठतामिति पूर्वपिण्डि
कायांकुशोपरिपित्रेपिण्डंदद्यात् । ततोऽपरमोटकादीनिचादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धेऽमु
कगोत्रपितामहामुकशर्मन्नेषपिण्डस्तेस्वधेतिद्वितीयपिण्डिकायां प्रथमावनेजनस्थाने पितामहायपिण्डंदद्यात् । पुनर्मोटकादीनिपिण्डं
चादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रप्रपितामहामुकशर्मन्नेषतेपिण्डः स्वधेतिप्रपितामहायाऽ
परावनेजनस्थानेपिण्डंदद्यात् । पुनर्मोटकादीनिपिण्डंचादाय ॐ अद्यामुकगोत्रपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रवृद्ध
प्रपितामहामुकशर्मन्नेषतेपिण्डःस्वधेतिवृद्धप्रपितामहायाऽपरावनेजनस्थानेपिण्डंदद्यात् ॥ ततः पितामहादिपिण्डास्तरणकुशमूले ॐ लेपभाग
भुजस्तृप्यन्त्वितिकरंप्रोक्ष्य सव्यंकृत्वाचम्यहरिंस्मरेत् ॥ ततोऽपसव्यंकृत्वा दक्षिणाभिमुखः पितरमुद्दिश्य ॐ अत्रपितर्मादयस्वयथाभागमावृ
षायस्वेतिपठित्वोत्तराभिमुखोभूत्वाश्वासंनियम्य भास्वरमूर्तिंपितरंध्यायन् मुखंदक्षिणांदिशंप्रत्यावर्तयन् अमीमदन्तपितरोयथाभा ॥४१॥
गमावृषायिषतेतिपठेत् । पितामहादीनुद्दिश्यदक्षिणामुखः । अत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिपठेत् । उत्तराभिमुखोभू
त्वाश्वासंनियम्यतुष्टान्भास्वरमूर्तीन्पितामहादीन्ध्यायन्मुखंदक्षिणांदिशंप्रत्यावर्तयन् ॐ अमीमदन्तपितरोयथाभागमावृषायिषतेतिप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठेत्। ततः प्रत्यवनेजनपात्रंवामहस्तेकृत्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत सपिण्डीकरणश्राद्धेपिण्डेऽत्रप्रत्यवनेनिक्ष्व तेमयादीयतेतवोपतिष्ठतामितिपित्रेप्रत्यवनेजनंदत्त्वापितामहावनेजनपात्रंवामहस्तेकृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रे तस्य सपिण्डीकरणनिमित्तकश्राद्धेपिण्डेऽमुकगोत्रपितामहामुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधेतिपितामहायप्रत्यवनेजनजलंदद्यात्। प्रपिताम हावनेजनपात्रंगृहीत्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धेपिण्डेऽमुकगोत्रप्रपितामहामुक शर्म्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधेतिप्रपितामहायप्रत्यवनेजनंदद्यात्। ततोऽवशिष्टंपुटकमादायमोटकादीनिचादाय ॐ अद्यामुकगोत्रस्यपितुरमुक प्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धपिण्डेऽमुकगोत्रवृद्धप्रपितामहामुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधेतिवृद्धप्रपितामहायप्रत्यवनेजनंदद्यात्। ततोनीवींविस्रस्य सव्यंकृत्वाचम्यहरिंस्मृत्वा अपसव्यंकृत्वा वामेनपाणिनाधृतंसूत्रंदक्षिणेनादाय ॐ एतत्तेपितर्वासइत्युभाभ्यांहस्ताभ्यांपितृ पिण्डोपरिसूत्रंधारयेत्। पूर्ववत्पुनः सूत्रमादाय ॐ नमोवः पितरोरसायनमोवः पितरःशोषायनमोवः पितरोजीवायनमोवः पितरःस्वधायै नमोवःपितरोघोराय नमोवः पितरोमन्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म॥ ॐ एतद्वः पितरो वासइतिमन्त्रं पठित्वा प्रतेकं पिण्डोपरिसूत्रंधारयेत्॥ ततो मोटकादीन्यादाय ॐ अद्यामुकगोत्रामुकपितरमुकप्रेतसपिण्डीकरणनिमित्तकश्राद्धेपिण्डेऽमु कगोत्रापितामहामुकशर्मन्नेतत्तेवासः स्वधेतिसूत्रंपितामहायोत्सृजेत्। मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरण निमित्तकश्राद्धेपिण्डेऽमुकगोत्रवृद्धप्रपितामहामुकशर्म्मन्नेतत्तेवासः स्वधेतिवृद्धप्रपितामहायसूत्रमुत्सृजेत्। ततःप्रत्येकंपितृपिण्डादिषुगन्ध पुष्पधूपदीपताम्बूलानिदद्यात्। ततःपिण्डसमीपेतत्तत्पिण्डशेषान्नंविकिरेत्। ततः पिण्डेषुसूत्रादिकमपनीयहस्तद्वयेनसुवर्णरजतकुशानादाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ येसमानाइत्यादिमन्त्रद्वयंपठित्वा प्रेतपिण्डं त्रिधाविभजेत् । द्विवारंमन्त्रपाठः । ततःप्रथमपिण्डभागमादाय ॐ येसमानाःसुमनसः पितरोयमराज्ये ॥ तेषांलोकःस्वधानमोयज्ञोदेवेषुकल्पताम् ॥ येसमानाः सुमनसोजीवाजीवेषुमामकाः ॥ तेषा ँ श्रीर्मयिकल्पतामस्मिँल्लो केशत ँ समाः इतिमन्त्रद्वयेनपितामहपिण्डेनियोजयेत् । एवंद्वितीयपिण्डभागमादायमन्त्रद्वयेनप्रपितामहपिण्डेनियोजयेत् । एवंतृतीयपिण्ड भागमादाय मन्त्रद्वयेन वृद्धप्रपितामहपिण्डेनियोजयेत् । ततः प्रेतभागेनसह पिण्डत्रयं प्रत्येकमेकीकृत्य समंवर्तुलंकुर्य्यात् । ततः प्रेतपूर्वकंपितामहादीनुद्दिश्य पिण्डत्रयेऽर्घ्यपुष्पधूपदीपनैवेद्यताम्बूलानिदद्यात् । ततः सव्येनदेवान्नपात्रे ॐ शिवाआपःसन्तु इतिजलं दत्त्वा अपसव्येनपितृब्राह्मणहस्तेपूर्वमन्त्रेणजलंदद्यात् । ॐ सन्त्वितिप्रतिवचनम् । ततः पितामहाद्यन्नपात्रेषुप्रत्येकंजलंदद्यात् । अनेनैवक्रमेण ॐ सौमनस्यमस्त्वितिदेवान्नपात्रेपुष्पम् । ततोऽपसव्येनपितृब्राह्मणहस्तेअनेनैवमन्त्रेणपुष्पम् । ततः पितामहाद्यन्नपात्रत्रिकेऽनेनैवमन्त्रेण प्रत्ये कंपुष्पंदद्यात् । ततःसव्येनाक्षतंचारिष्टमस्त्वितिदेवान्नपात्रेतण्डुलप्रक्षेपः । ततोऽपसव्येन प्रेतश्राद्धपात्रब्राह्मणहस्ते ॐ अक्षतंचारिष्टमस्त्विति तण्डुलप्रक्षेपः । ततः ॐ अस्त्वितिब्राह्मणप्रतिवचनम् । पितामहाद्यन्नपात्रत्रिकेपिप्रत्येकम् ॐ अक्षतंचारिष्टमस्त्वितितण्डुलप्रक्षेपः ततोमोटकादीन्यादाय अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्तकंश्राद्धेऽमुकगोत्रस्यपितामहस्यामुकशर्मणोदत्तैतदन्न पानादिकमक्षय्यमस्त्वितिपितामहायाक्षय्योदकंदद्यात् । पुनर्मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपि ण्डीकरणनिमित्तकश्राद्धेऽमुकगोत्रस्यप्रपितामहस्यामुकशर्मणोदत्तैतदन्नपानादिकमक्षय्यमस्त्वितिप्रपितामहायाक्षय्योदकंदद्यात् । एवंवृद्धप्र पितामहायाक्षय्योदकंदद्यात् । ततः सव्यं कृत्वा कृताञ्जलिस्तन्मनाःसुमना दक्षिणांदिशंपश्यन् ॐ अघोराःपितरःसन्त्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपितामहादिपिण्डत्रयोपरिपूर्वाग्रांजलधारांदद्यात् । ॐ सन्त्विवतिब्राह्मणप्रतिवचनम् । अत्रवारिधारादानमाचारात् । अन्यथातुपा
ठमात्रम् । ततःप्राङ्मुखोगोत्रंनोवृर्द्धतामितिपठेत् । ॐ वर्द्धतामितिप्रतिवचनम् । दातारोनोभिवर्द्धन्तांवेदाःसंततिरेवच ॥ श्रद्धाचनो
माव्यगमद्बहुदेयंचनोऽस्तु ॥ अन्नंचनोवहुभवेदातिथींश्चलभेमहि ॥ याचितारश्चनः सन्तुमाचयाचिष्मकंचन । एताःसत्याआशिषःसन्त्वि
तियाचेत् । ॐ सन्त्विवतिप्रतिवचनम् । ततोऽपसव्यंकृत्वापिण्डोपरिसपवित्रंकुशत्रयं दक्षिणाग्रमास्तीर्य ॐ नमोवाचयिष्ये इतिब्राह्मणंब्रू
यात् । ॐ वाच्यतामित्यनुज्ञातः ॐ पित्रेनमउच्यतामितिब्राह्मणंब्रूयात् ॐ अस्तुनमःइतिब्राह्मणोवदेत् । ततोवामहस्तोद्धृतंजलपात्रंदक्षिणेना
दाय ॐ ऊर्ज्जंवहन्तीरमृतंघृतंपयःकीलालंपरिस्रुतं स्वधास्थतर्प्पयतमेपितॄनितिपित्रादीनुद्दिश्य सपवित्रकुशोपरि दक्षिणाग्रांजलधारांदद्यात् ।
ततोनम्रीभूयपिण्डानाघ्रायोत्थापयेत् । पिण्डाधारकुशानुल्मुकंच वह्नौप्रक्षिपेत्ः। सव्येनदेवार्घ्यपात्रंसंचाल्यअपसव्येनापित्राद्यर्घ्यपात्राण्युत्ता
नीकृत्य दक्षिणांदद्यात् । ततः सव्येनकुशत्रययवजलदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य सपिण्डीकरणनिमित्त
कश्राद्धेऽमुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहानाममुकशर्मणां श्राद्धसंवन्धिनांविश्वेषांदेवानां कृतैतच्छ्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदै
वत्यं यथानामगोत्रायब्राह्मणायदक्षिणांचदातुमहमुत्सृजेइतिप्राङ्मुखउत्सृजेत् । ततोऽपसव्यंकृत्वा दक्षिणामुखोमोटकतिलजलान्यादायद
क्षिणांचादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्य कृतैतत्सपिण्डीकरणनिमितकश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यममुकगोत्रायामुकशर्मणे
ब्राह्मणायदक्षिणांचतुभ्यमहंसंप्रददेइतिदक्षिणांचपितृब्राह्मणकरेदद्यात् । ॐ स्वस्तीतिप्रतिवचनम् । पुनस्तथैवदक्षिणाद्रव्यादिकमादाय ॐ अद्या
मुकगोत्रस्यपितुरमुकप्रेतस्यकृतसपिण्डीकरणनिमित्तकश्राद्धे कृतैतदमुकगोत्रपितामहामुकशर्मश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यं यथानामगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रायब्राह्मणाय दक्षिणांचदातुमहमुत्सृजे इतिपितामहश्राद्धदक्षिणांचदद्यात् । पुनर्दक्षिणाद्रव्यादिकमादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रे
तस्यसपिण्डीकरणनिमित्तकश्राद्धेकृतैतदमुकगोत्रप्रपितामहामुकशर्मश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यंयथानामगोत्रायब्राह्मणायदक्षिणांचदा
तुमहमुत्सृजे इतिप्रपितामहश्राद्धदक्षिणांचदद्यात् । पुनर्दक्षिणाद्रव्यादिकमादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिण्डीकरणनिमित्तक
श्राद्धेकृतैतदमुकगोत्रवृद्धप्रपितामहामुकशर्मश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यंयथानामगोत्रायब्राह्मणाय दक्षिणांचदातुमहमुत्सृजे इतिवृद्धप्र
पितामहश्राद्धदक्षिणांचदद्यात् । ततःसव्यंकृत्वा ॐ विश्वेदेवाः प्रीयन्तामितिदेवविसर्जनंकृत्वा अपसव्यंकृत्वा पितृश्राद्धब्राह्मणं ॐ निरोंकारंस्व
स्तिब्रूहीतिवदेत् । स्वस्तीतितेनोक्तेस्वस्त्यस्तुइतिपितृब्राह्मणंविसृज्य गृहीतापितृब्राह्मणाङ्गुष्ठोपगृहीतोदकपात्रोबहिर्निमन्त्रणस्थानमागत्यब्राह्म
णंस्थापयित्वा ॐ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागन्तांपितरामातराचामासोमोअमृतत्वेनगम्यादितिप्रदक्षिणीकु
र्वन् पूर्ववदुदकधारयात्रिर्वेष्टयेत् । ततःप्रणम्याष्टौपादाननुव्रज्य प्रदक्षिणीकृत्याभिवादयेत् । ततःसव्यंकृत्वा ॐ देवताभ्यइतित्रिर्जपेत् । ततो
गृहंप्रविश्य सव्यापसव्याभ्यांदेवपितृश्राद्धदीपान्पाणिभ्यांनिर्वापयेत् । ततःसव्येनपाणिपादप्रक्षालनमाचमनंचकुर्यात् । ततः ॐ प्रमादा
दित्यादिपठित्वा एतत्फलकामोविष्णुंस्मरेत् । अपरश्राद्धचतुष्टयद्रव्यप्रतिपर्त्तिब्राह्मणायकुर्यात् । पिण्डान्जलेप्रतिपादयेत् । उ
च्छिष्टमार्जनंकुर्यात् । वैश्वदेवबल्यनन्तरंदशप्रभृतिश्रोत्रियान्यथाशक्तिभोजयेत् । ज्ञातिभिर्मिलित्वासहभुञ्ज्यात् ॥ इतिश्राद्धविवेकेस ॥४३॥
पिण्डनपद्धतिः ॥ सपिण्डीकरणकालव्यवस्था ॥ वत्सराभ्यन्तरेचैतानिषोडशश्राद्धानिकेनचिद्विस्मरणादिनानकृतानि तेनकृष्णैकाद
श्यांतन्मृताहेवाषोडशश्राद्धानिकर्तव्यनीतिमिताक्षराश्राद्धपल्लवयोर्लिखितम् । युक्तंचैतत् ॥ एकोद्दिष्टरूपश्राद्धस्यकृष्णैकादश्यांविधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात् एषांचैकोद्दिष्टरूपत्वात् । अथचाधिकारिणिकृतषोडश्राद्धसंकल्पे सपिण्डनमकृत्वाविपन्ने कनिष्ठेनावशिष्टश्राद्धानिकार्याणीतिश्राद्ध प्रदीपः । एषुसर्वेषुप्रेतश्राद्धादिषुशेषान्नभोजनंनकर्तव्यम् । यदाहदेवलः । एकोद्दिष्टस्यशेषंतुब्राह्मणायसमुत्सृजेत् । ततःपरंतुभुञ्जीतस्वयंमङ्गलभोजनम् ॥ अस्यार्थः । प्रेतश्राद्धार्थंयत्किंचित्साधितमोदनादितत्सर्वंब्राह्मणायैवप्रतिपादयेत् नोद्धारयेत् । स्वयं मङ्गलभोजनंकुर्य्यात् । पृथक्पाकसाधितान्नभोजनंकुर्य्यात् । पृथक्पाकस्यमङ्गलस्वरूपत्वात् । सपिण्डनेपितामहादिश्राद्धशेषान्नस्यैवपाकसाधितत्वात्प्रेतश्राद्धशेषान्नत्वादेवत्यागः । सापिण्डनानन्तरंवर्षद्वयंयावत् श्राद्धदत्तशेषान्नस्यापिभोजनंनकर्तव्यम् ॥ तथाच श्राद्धान्नभोजननिषेधेशातातपः–नवश्राद्धंग्रामयाजकान्नंसग्रहभोजनम् ॥ नारीणांप्रथमेगर्भेभुक्त्वाचान्द्रायणंचरेत् ॥ चान्द्रायणंनवश्राद्धेपराको मासिकेततः ॥ मासत्रयेतिकृच्छ्रःस्यात्षाण्मासेकृच्छ्रएवहि ॥ आब्दिकेकृच्छ्रपादः स्यादेकाहः पुनराब्दिके ॥ अतऊर्द्ध्वंनदोषः स्याच्छङ्खस्य वचनंयथा ॥ अत्रनवश्राद्धमेकादशाहश्राद्धम् । ग्रामयाजकान्नंप्रसिद्धमेव । सग्रहभोजनं चन्द्रसूर्ययोरुपरागकालेभोजनम् । नारीणांप्रथमगर्भसंस्कारभोजनम् । आब्दिकेप्रथमसांवत्सरिके पुनराब्दिके द्वितीयसांवत्सरिके तदुपकरणवस्त्रादिग्रहणंदर्षद्वयेपिकुर्वन्तीतिसदाचारः । स्त्रीशूद्र कर्तृकेऽस्मिन् श्राद्धेस्वधापदस्थानेनमःपदप्रयोगःकर्तव्यः । स्त्रियाः सपिण्डने जीवतिपत्यौश्वश्र्वादिभिः सपिण्डनंकार्यम् । मृतेपत्यौपतिश्वशुरादिभिः सहमेलनंकार्यम् । पतिपुत्ररहितायाः सपिण्डनमेवनिषिद्धम् । तथाच मार्कण्डेयपुराणं–सपिण्डीकरणंतासांपुत्राभावेनविद्यते । अत्रपुत्राभावइत्युपलक्षणंपतिपुत्राभावेइत्यस्येतिद्रष्टव्यम् । पतिकर्तृकस्यस्त्रीसपिण्डनस्यविधानात् । एवंसपत्नीपुत्रेविद्यमानेस्त्रियाः सपिण्डनंभवति । बह्वीनामेकपत्नीनांयद्येकापुत्रिणीभवेत् ॥ सर्वास्तेनैवपुत्रेणपुत्रिण्योमनुरब्रवीत् इतिसपत्नीपुत्रवत्यः पुत्रिणीत्वातिदेशेनापुत्रत्वाभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवं त्रैवर्णिकजातस्य शूद्रस्यसपिण्डनंनिषिद्धम् । नीयतेतुसपिण्डत्वंयेषांशूद्रकुलोद्भवे ॥ सर्वेशूद्रत्वमायान्तियदिस्वर्गजितोपिते इति
शङ्खलिखितवाक्यात् । यत्रचसपिण्डनंनिषिद्धं तत्रब्रह्मपुराणोक्तषोडशश्राद्धैःप्रेतत्वविमुक्तिः । तथाचब्रह्मपुराणे–नृणांतुत्यक्तदे
हानांश्राद्धं षोडशसंख्यया ॥ चतुर्थेपञ्चमेचैवनवमैकादशेतथा ॥ ततोद्वादशभिर्मासैः श्राद्धंद्वादशसंख्यया ॥ कर्त्तव्यंशुचिभिस्तेषां
ततोविप्रांश्चभोजयेदिति । अत्रच मृतकार्येषुमरणदिनावधिकदिनमासादिगणनाच्चतुर्थदिनादित्वंमरणदिनावधिकमेवज्ञेयम् । तथा
चाशौचाभ्यन्तरेपि चतुर्थदिनादिषुश्राद्धंकर्तव्यम् । अत्रचवर्षंयावत्सपिण्डनकालेषुनिषिद्धनक्षत्रसंभवेनिषिद्धनक्षत्रेसपिण्डननिषेधात्
तत्रापिब्रह्मपुराणीयषोडशश्राद्धानिकर्तव्यानीतिबहुषुनिबन्धेषुलिखितम् । लोकास्तुनिषिद्धनक्षत्रेपिसपिण्डीकरणेपित्रादिगतकुलेदोषा
भावात्स्वमात्रगतानिष्टसंभवान्नक्षत्रानुरोधंनाचरन्ति ॥ अवीरायाः सपिण्डकर्तृकषोडशश्राद्धविधिर्लिख्यते । तत्रसपिण्डेना
शौचाभ्यन्तरएवचतुर्थदिने श्राद्धंकर्तव्यम् ॥ तत्रप्रथमतोस्थिसञ्चयनिमित्तकर्मैकोद्दिष्टंकृत्वाऽस्थिसञ्चयेकृतेपुनः स्नात्वाश्राद्धंकर्त
व्यम् । तत्र मध्याह्नेशुचिराचान्तोयजमानसवर्णेनाहूतंब्राह्मणंस्नातमाचान्तंगोमयोपलिप्तायांमण्डपाद्बहिर्भूमौगोसूत्रेणापसव्यवत्कृतम
ण्डलायां ॐ भूम्यैनमः इतित्रिरक्षतपुष्पपूजितायामास्तृतदक्षिणाग्रकुशत्रयायांतिष्ठन् स्वागतमितिपृच्छेत् । सुस्वागतमितितेनोक्तेउभाव
प्युपविशतः । ततः पुटकेजलंकृत्वा इदंतेपाद्यमित्यपआनीय पात्रब्राह्मणपादयोर्दद्यात् । ततोऽपसव्यंकृत्वा पुष्पचन्दनताम्बूलानिब्राह्मणा
यदत्त्वा ब्राह्मणंदक्षिणकरेणस्पृष्ट्वा ॐ अद्यामुकगोत्रायाः सपिण्डाया अमुकप्रेतायाश्चतुर्थदिनश्राद्धकरणाय भवन्तंब्राह्मणमहमामन्त्रये इत्युक्ते
ॐ आमन्त्रितोस्मीतिप्रतिवचनम् । ॐ अक्रोधनेनेत्यादिना ॐ सर्वायासविनिर्मुक्तेनेत्यादिनाचनियमान् श्रावयेत् । ॐ भवितव्यमितितेनोक्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलतिलगन्धपुष्पाणिपुटकेकृत्वा ॐ अद्यामुकगोत्रेसपिण्डेऽमुकप्रेतेचतुर्थदिनश्राद्धेइदंपादार्घ्यंतेमयादीयतेतवोपतिष्ठतामितिमोटकादिनापा दार्घ्यंदद्यात् । ततअचमनीयजलंनमस्कृत्य जानुनीविस्राव्य इदंतेआचमनीयमित्याचमनीयंसमर्पयेत् । ततःसव्येनस्वयमाचम्यतमाचमय्या ग्रेकृत्वा श्राद्धदेशमागच्छेत् । तत्रप्राङ्मुखउपविशेत । ॐ सिद्धमितिवदेत् । तत्रासनेऽत्रास्स्वेतिब्राह्मणमङ्गुष्ठेनगृहीत्वासकुशेआसनेउत्तरा भिमुखमुपवेशयेत् । पादयोस्तलेदक्षिणाग्रंकुशत्रयंदद्यात् । आसनसमीपेतुतिलतैलेनरक्षादीपंस्थापयेत् । ततः ॐ अपवित्रइत्यादिपठित्वा ॐ पुण्डरीकाक्षः पुनात्वितिकुशत्रयजलेनसर्वाणिश्राद्धीयद्रव्याणिसिञ्चेत् । ततः कुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रायाःसपिण्डा याअमुकप्रेतायाःप्रेतत्वविमुक्तिकामः अद्यादियथाकालंषोडशश्राद्धान्यहंकरिष्ये इतिसंकल्पयेत् । पुनःकुशत्रयतिलजलान्यादाय ॐ अद्या मुकगोत्रायाःसपिण्डायाअमुकगोत्रप्रेतायाः प्रेतत्वविमुक्तिहेतुकषोडशश्राद्धान्तर्गतचतुर्थदिनश्राद्धमहंकरिष्ये इतिवदेत् । ॐ कुरुष्वेतिप्रति वचनम् । ॐ गायत्रीजपमहंकरिष्ये० ॐ कुरुष्वेतितत्प्रतिवचनम् । ततः सप्रणवव्याहृतिगायत्रींत्रिर्जपित्वा ॐ देवताभ्यइतित्रिर्जपेत् । ततोऽपस व्यंकृत्वा मोटकादीन्यादाय अद्याऽमुकगोत्रे सपिण्डे अमुकप्रेते चतुर्थदिनश्राद्धे इदमासनंतेमयादीयतेतवोपतिष्ठतामित्यासनमुत्सृजे त् । ततः ॐ अपहताइत्यादिनाश्राद्धदेशेवामावर्तेनातिलान्विकिरेत् । ततआयन्तुनइतिजपेत् । ततार्घ्यपात्रेपवित्रंकृत्वा ॐ शन्नोदेवी रितिजलं तिलोसीतिस्वाहान्तेनतिलान्क्षिप्त्वातूष्णींगन्धपुष्पेक्षिपेत् । ततोऽर्घपात्रंवामहस्तेकृत्वापवित्रंपात्रब्राह्मणकरेउत्तराग्रंकृत्वातदु परिउदकान्तरंदत्त्वा ॐ यादिव्या इतिपठित्वा मोटकादीन्यादाय अद्यामुकगोत्रेसपिण्डेऽमुकप्रेतेचतुर्थदिनश्राद्धे इदंहस्तार्घ्यंतेमया दीयते तवोपतिष्ठतामितिविप्रकरेअर्घ्यजलंददुत्सृजेत् । ततस्तदर्घ्यपात्रंपवित्रसहितंब्राह्मणवामपार्श्वे सपिण्डायैस्थानमसीतिन्युब्जी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणम् । ततोमोटकादीन्यादाय अद्यामुकगोत्रसपिण्डेऽमुकप्रेतचतुर्थदिनश्राद्धे एतानिगन्धपुष्पधूपदीपताम्बूलसिन्दूरवासांसितेमयादी यन्तेतवोपतिष्ठन्तामितिगन्धादीनुत्सृजेत् । ततःपात्रस्यचतुर्दिशंचतुष्कोणंमण्डलंकुर्यात् । ततः श्राद्धीयान्नव्यञ्जनाग्रभागंगृहीत्वा घृत तिलजलसहितंतदन्नम् इदमन्नमेतद्भूस्वामिपितृभ्योनमइतिमोटकादिनादद्यात् । ततःकराभ्यांताम्रपात्रमादाय तेनान्नंगृहीत्वा मना क्स्थित्वासपिण्डान् ध्यात्वाभोजनपात्रेपुरुषतृप्तिक्षममन्नंपरिविष्यात् । पुटकान्तरेषुव्यञ्जनानिघृतंजलंचोपनीयअन्नोपरिपुटकादिनाहस्ता भ्यांमधुदद्यात् । ॐ मधुव्वाताऋतायते इतिऋचंमधुमधुमध्वितिचजपेत् । ततोव्यस्तावुत्तानपाणिभ्यामन्नपात्रसालभ्य ॐ पृथिवी तेपात्रमित्यादिजपित्वा इदंविष्णुरितिपठन्नमृतरूपतयान्नंविचिन्त्य ॐ कृष्णकव्यमितिपठित्वा ॐ इदमन्नम् ॐ इमाआपः ॐ इदंह विरिति पात्रब्राह्मणदक्षिणहस्ताङ्गुष्ठमन्नजलघृतादिषुनिवेश्य ॐ अपहताइत्यादिनान्नोपरिवहूंस्तिलान्विकीर्य वामेनपाणिनापात्रमत्यजन् ॐ अद्यामुकगोत्रसपिण्डेऽमुकप्रेतचतुर्थदिनश्राद्धेइदमन्नंसोपकरणंतेमयादीयतेतवोपतिष्ठतामित्यन्नमुत्सृजेत् । ॐ भवान्आश्नात्विति ब्राह्मणायजलगण्डूषंदद्यात् । ततोगायत्रींमधुव्वाताइत्यादिऋचम् ॐ मधुमधुमध्वितिचजपित्वा ॐ अन्नहीनमित्यादिपठित्वा ॐ यथा सुखंजुषस्वेतिब्राह्मणंब्रूयात् । ब्राह्मणोवामेनपाणिनापात्रमत्यजन् ॐ कारपूर्वकंभुञ्जीत । त्वराक्रोधादिकंवर्जयेत् । व्यञ्जनाद्यर्थंहस्तादिनासं ज्ञामपिनकुर्यात् । श्राद्धकर्तादर्भेष्वासीनोगायत्रींमधुव्वातादिकंजपेत् । ब्राह्मणंगायत्रीमनुश्रावयेत् । ॐ कृणुष्वपाजइत्यादिरक्षोघ्नमन्त्रा न्पठेत् । भूमौतिलान्विकीर्य्यब्राह्मणंसपिण्डरूपतयाध्यायेत् । ॐ उदीरतामित्यादिमन्त्रान् ॐ सहस्रशीर्षाइत्यादिपुरुषसूक्तम् ॐ आशुःशिशानइत्यादिकमप्रतिरथमन्यानिचशतरुद्रीयरुचिस्तवप्रभृतीनिपवित्राणिजपेत् । ततः ॐ नमस्तुभ्यंविरूपाक्षेत्यादिश्लोकमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठेत् । वीणादिभिःब्राह्मणंहर्षयेत् । व्यञ्जनगुणानुत्कीर्तयन्मन्दंमन्दमपनयन् ब्राह्मणंभोजयेत् । ततस्तंतृप्तंज्ञात्वा उच्छिष्टसन्निधावा स्तृतदक्षिणाग्रकुशत्रयांभूमिंप्रोक्ष्यमधुतिलघृतव्यञ्जनयुतमन्नंजलेनाप्लाव्य ॐ अनाग्निदग्धाइतिमन्त्रेणकुशोपरि अन्नंविकिरेत् । ततः सव्यंकृत्वाचम्यविष्णुंस्मरेत् । अपसव्यंकृत्वा इदंतेप्रत्यापोशनमितिजलगण्डूषंब्राह्मणायदत्त्वा ॐ स्वदितमितिपच्छेत् । ॐ सुस्वादितामि तितेनोक्ते ॐ पिण्डमहंकरिष्ये इतिपृच्छेत् । ॐ कुरुष्वेत्यनुज्ञातोहस्तमात्रपरिमितांपिण्डिकांमृत्तिकामयींनिर्माय तन्मध्येप्रादेशामि तांरेखांवामेनपाणिनादर्भपिञ्जूलीमादाय हस्ताभ्यांगृहीत्वातन्मूलेनदक्षिणाग्ररेखांकुर्यात् । दर्भपिंजूलीमुत्तरस्यांदिशिक्षिपेत् । येरूपा णीति तत्राङ्गारभ्रमणंकृत्वाङ्गारंदक्षिणस्यांदिशिक्षिपेत् । रेखोपरिउपमूलसकृल्लूनान् कुशान् दक्षिणाग्रानास्तीर्य सव्यंकृत्वा ॐ देवताभ्य इतित्रिर्जपेत् । अपसव्यंकृत्वा जलतिलगन्धपुष्पाणिपुटकेकृत्वा वामहस्तेनतमादाय दक्षिणहस्तेनमोटकादीन्यादाय ॐ अद्यामुकगो त्रेसपिण्डेऽमुकप्रेते चतुर्थदिनश्राद्धे पिण्डस्थानेऽत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिकुशमध्येऽवनेजनंदद्यात् । ततोमोटकादी न्यादाय पिण्डंचादाय ॐ अद्यामुकगोत्रेसपिण्डेऽमुकप्रेते चतुर्थदिनश्राद्धे एषपिण्डस्तेमयादीयतेतवोपतिष्ठतामितिकुशमध्येपिण्डं दद्यात् । तत आस्तृतकुशमूलेकरंप्रोक्ष्य सव्यंकृत्वाचम्य हरिंस्मृत्वा ॐ अत्रसपिण्डेमादयस्वयथाभागमावृषायस्वेतिदक्षिणामुखःपठेत् । ततउदङ्मुखीभूय श्वासंनियम्य भास्वरमूर्तिंध्यायन् ॐ अमीमदन्तसपिण्डेयथाभागमावृषायिष्टेतिपठन् मुखंप्रत्यावर्तयेत् । मोटकादी न्यादाय वामहस्तेऽवनेजनपुटकंधृत्वा ॐ अद्यामुकगोत्रेसपिण्डेऽमुकप्रेते चतुर्थदिनश्राद्धेऽत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामिति पिण्डोपरिप्रत्यवनेजनंदद्यात् । ततोनीवींविस्रस्यपरिधाय सव्यंकृत्वाचामेत् । अपसव्यंकृत्वा वामेनपाणिनोद्धृतंसूत्रंदक्षिणेनादाय ॐ एतत्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपिण्डेवासइतिपिण्डोपरिहस्ताभ्यांदद्यात् । मोटकादीन्यादाय ॐ अद्यामुकगोत्रेसपिण्डेऽमुकप्रेतचतुर्थदिनश्राद्धपिण्डेएतद्वासस्ते मयादीयतेतवोपतिष्ठतामित्युत्सृजेत् । ततो गन्धपुष्पधूपदीपताम्बूलैःपिण्डमर्च्चयेत् । पिण्डशेषान्नंपिण्डसमीपेविकिरेत् । ॐ शिवा आपःसन्त्वितिआचन्तब्राह्मणकरेजलदानम् ॐ सौमनस्यमस्त्वितिपुष्पम् ॥ ॐ अस्त्वितिप्रतिवचनम् । ॐ अक्षतंचारिष्टमस्त्वितितण्डु लदानम् । ॐ अस्त्वितिप्रतिवचनम् । मोटकादीन्यादाय ॐ अद्यामुकगोत्रायाः सपिण्डाया अमुकप्रेतायाश्चतुर्थदिनश्राद्धेदत्तैतदन्नपानादि कमुपतिष्ठतामित्यक्षय्योदकदानंब्राह्मणकरेदद्यात् । ॐ उपतिष्ठतामितिप्रतिवचनम् । ततःसव्यंकृत्वा सुमनास्तन्मनादक्षिणांदिशंपश्यन् ॐ अघोरासपिण्डाऽस्त्वितिपूर्वाग्रांजलधारांदद्यात् । अस्त्वितिप्रतिवचनम् । पूर्वाभिमुखोभूत्वा ॐ गोत्रंनोवर्द्धतामित्याशिषंब्राह्मणंया चेत् । ॐ वर्द्धतामितितेनोक्ते ॐ दातारोनोभिवर्द्धन्तामित्यादिनाशीःप्रार्थनम् । ॐ सन्त्वितिप्रतिवचनम् । अपसव्यंकृत्वापिण्डो परिसपवित्रकुशानास्तीर्य दक्षिणाग्रान् ॐ नमोवाचयिष्ये इतिब्राह्मणंब्रूयात् । ॐ वाच्यतामित्युक्ते ॐ सपिण्डायैनमउच्यता मितिवदेत् । ॐ अस्तुनमइत्युक्ते पुटकादिस्थितंजलंहस्ताभ्यामादाय ॐ ऊर्ज्जंवहन्तीरितिमन्त्रेणसपवित्रकुशोपरिदक्षिणाग्रांवारिधारां दद्यात् । ततोनम्रीभूयपिण्डमाघ्रायोत्थापयेत्। पिण्डाधारकुशानुल्मुकंचवह्नौनिःक्षिपेत् । अर्घ्यपात्रमुत्तानीकृत्य मोटकादिकंदक्षिणाद्रव्यंचादाय ॐअद्यामुकगोत्रायाःसपिण्डायाअमुकप्रेतायाःकृतैतच्चतुर्थदिनश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांचतु भ्यमहंसम्प्रदद इतिदद्यात् । ॐ निरोङ्कारंस्वस्तिब्रूहीतिब्राह्मणंवदेत् । स्वस्तीतिब्राह्मणेनोक्ते स्वस्त्यस्तुइत्युक्त्वाब्राह्मणहस्ताङ्गुष्ठंगृ हीत्वोत्थापयेत् । तंगृहीत्वाजलपात्रंचगृहीत्वानिमन्त्रणस्थानेस्थापयेत् । ॐ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्तांपितरामातराचामासोमोऽअमृतत्वेनगम्यादितिमन्त्रेणवारिधारयाब्राह्मणंत्रिर्वेष्टयेत्। प्रणम्याष्टौपादाननुव्रज्य प्रदक्षिणीकृत्य नमस्कुर्यात्।
ततउपविश्य तत्रैवसव्यं देवताभ्यइतित्रिर्जपेत् । ततःश्राद्धदेशमागत्य पाणिभ्यांदीपंनिर्वाप्य सव्यंकृत्वा हस्तौपादौप्रक्षाल्याचम्यततः
ॐ प्रमादादित्यादिपठित्वाश्राद्धपूर्तिंकामोविष्णुंस्मरेत् । पिण्डादिकंजलेक्षिपेत् । उच्छिष्टापनयनंकुर्यात । दशप्रभृतिश्रोत्रियान्भोजयेत्।
बन्धुभिर्मिलित्वास्वयंभुञ्जीत । अनेनैवप्रकारेणपञ्चमदिनेपञ्चमदिनश्राद्धंनवमदिनेनवमदिनश्राद्धंएकादशाहेएकादशदिनश्राद्धंकुर्यात् । चतुर्थ
दिनेविगोत्रोयदिश्राद्धकर्ता : तदातस्याशौचान्तद्वितीयदिनत्वात्तत्रशय्यादानकाञ्चनपुरुषदानदम्पतिपूजनवृषोत्सर्गकपिलादानानिकुर्य्यात् ।
सपिण्डोयदिश्राद्धकर्ता तदातेनैकादशाहेआशौचान्तद्वितीयदिने शय्यादानंदम्पतिपूजनंवृषोत्सर्गादिकंचकर्त्तव्यम् । अनेनैवप्रकारेण प्रथममास
मारभ्य द्वादशमासपर्यन्तंप्रतिमासशेषेसति क्षयाहे प्रथममासिकद्वितीयमासिकतृतीयमासिकचतुर्थमासिकपञ्चममासिकषष्ठमासिकसप्तममासि
काऽष्टममासिकनवममासिकदशममासिकैकादशमासिकद्वादशमासिकानि कर्तव्यानि। अधिकमाससंभवे त्रयोदशमासिकानिकर्तव्यानि । अ
स्मिन्ब्रह्मपुराणीयकल्पे मासिकानामपकृष्यकरणंनभवति ॥ प्रमाणाभावादिति ॥ ॥ इतिश्राद्धविवेकेमध्यमक्रियापरिच्छेदस्तृतीयः ॥ ३ ॥
॥ छ ॥ अथापात्रकैकोदिष्टश्राद्धप्रयोगः ॥ तत्रपूर्वदिनेकृतनियमः श्राद्धदिनेप्रातर्वस्त्रयुग्मेन कृतस्नानःपञ्चगव्योपलेपनज्वलदङ्गारभ्रामण
गौरमृत्तिकाच्छादनैःश्राद्धभूमिसंस्कारंकृत्वावस्त्रादिनावेष्टयित्वा तिलगौरसर्षपैरवकीर्य्य पित्रासनस्थानाद्वामभागे श्राद्धदेयवस्तून्यासाद्य कृत
स्नानादिर्मध्याह्नेशुचिःशुक्लद्विवासाःपादौप्रक्षाल्याचम्य श्राद्धदेशमागच्छेत् । तत्रस्वयंपाकंकुर्यात् । सपिण्डस्त्रीद्वारावापाचयेत् । ततः पाकवृ
त्तेरक्षादीपंनिधाय पुनराचम्य प्राङ्मुखउपविशेत् । अन्यकृतेपाकेसिद्धमितिपृष्ट्वा ॐ अपवित्रःपवित्रोवेत्यादि ॐ पुण्डरीकाक्षःपुनात्वितिपठि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा कुशत्रयजलैः श्राद्धवस्तून्यभिषिञ्चेत् । ततः कुशत्रयतिलजलान्यादाय ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौअमुकगोत्रस्यपितुरमु
कशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्येइतिसंकल्पंकुर्यात् । ततो गायत्रींत्रिर्जपित्वा ॐ देवताभ्यइत्यादित्रिर्जपेत् । ततोऽपसव्यंकृत्वा
दक्षिणामुखः पातितवामजानुः मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धेइदमासनंतेस्वधेतिपूर्वोपक
लिपतंमोटकरूपमासनंतिलजलप्रोक्षितंदक्षिणाग्रंपितृतीर्थेनोत्सृजेत् । ॐ अपहतेत्यादिनाभोजनपात्रेतिलान्विकीर्य्य ॐ आयन्तुनइत्यादि
पठित्वाऽर्घ्यंकरणम् । पुटकादौदक्षिणाग्रंपवित्रंधृत्वा ॐ शन्नोदेवीरितिमन्त्रेणजलंप्रक्षिप्य ॐ तिलोसीतितिलान्प्रक्षिप्यग
न्धपुष्पेतूष्णींक्षिपेत् । ततोऽर्घपात्रंवामहस्तेकृत्वा भोजनपात्रेपवित्रमुत्तराग्रंधृत्त्वा तदुपरिउदकान्तरंदत्त्वा ॐ यादिव्याइ
तिपठित्वा अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेइदंहस्तार्घ्यं स्वधेतिपवित्रोपरिजलंयथापातितमेवमुत्सृजेत् । ततः पवित्र
युतंतदर्घ्यपात्रमवशिष्टजलयुतमेवासनवामभागे ॐ पित्रेस्थानमसीतिन्युब्जीकुर्यात् । दक्षिणादानपर्यन्तंनोद्धरेत् । नचालयेत् । ततोगन्धादिद
द्यात् । ततो मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धे एतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवा
सांसितेस्वधेतिगन्धादीन्दद्यात् । ततो जलेनभोजनपात्रासनयोश्चतुर्दिशंमण्डलंकृत्वासव्यञ्जनंसघृततिलजलमन्नंकिंचिदग्रभागमुद्धृत्यमोटका
दिना ॐ इदमन्नमेतद्भूस्वामिपितृभ्योनमः इतिभूस्वामिनेऽन्नंदद्यात् । ततः सिद्धमुष्णमन्नंरजतादिपात्रस्थंकराभ्यामादाय पितरंध्यायन्मन्दं
मन्दंपरिवेषणंकुर्यात् । ततः पुरुषाहारक्षममन्नंपरिविष्य यथासंभवंव्यञ्जनमन्नंजलंघृतंचपात्रान्तरस्थंतत्रोपनीय अन्नंमधुनाभिघार्य ॐ मधुव्वा
तेत्यादिऋचंमधुमधुमध्विितिचजपित्वा पात्रमालभेत् । ततःसव्येनहस्तेनपात्रंपाश्चिमभागेस्पृशन् तदुपरिगतदक्षिणहस्तेनाधोमुखेनपूर्वभागेपात्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पृशन् ॐ पृथिवीतेपात्रमित्यादि ॐ इदंविष्णुरित्यादि ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा वामेनपाणिनापात्रंस्पृशन्नेवदक्षिणंपाणिमु
द्धृत्य ॐ इदमन्नम् ॐ इमाआपः ॐ इदमाज्यम् ॐ इदंकविरित्यन्नजलेघृतेपुनरन्नेचांगुष्ठंनिःक्षिप्य ॐ अपहताइत्यादिनान्नोपरितिलान्विकी
कीर्य्य मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रायपित्रेऽमुकशर्मणे सांवत्सरिकैकोद्दिष्टश्राद्धे एतत्तेन्नंसोपकरणंस्वधेत्युत्सृजेत् । ततो वाम
हस्तमुद्धृत्य ॐ अन्नहीनमित्यादिपठित्वा ॐ गायत्रींत्रिर्जपेत् । कुशेषूपविश्य ॐ मधुव्वातेत्यादिजपेत्। ततः कृणुष्वपाजइत्याद्यारक्षोघ्नी
र्ऋचोजपित्वाभूमौतिलान्विकीर्य पितरंध्यात्वा ॐ उदीरतामइत्यादिपितृमन्त्रान् ॐ सहस्रशीर्षाइत्यादिपुरुषसूक्तम् ॐ आशुः शिशानइत्या
दिकमप्रतिरथंचजपेत् । यथाशक्त्यान्यान्यपिपवित्राणिजपेत् । रुचिस्तवादीनिचजपेत् । ॐ नमस्तुभ्यंविरूपाक्षनमस्तेनेकचक्षुषे ॥ नमःपिना
कहस्तायवज्रहस्तायवैनमः इतिपठित्वाउच्छिष्टसमीपेदक्षिणाग्रंकुशत्रयमास्तीर्य्यजलेनासिक्त्वाकिंचिदन्नंसघृतातिलजलासिक्तमादाय ॐ अ
ग्निदग्धाश्चेत्यादिमन्त्रस्थफलमुद्दिश्यकुशोपरिअन्नंविकिरेत् । ततः सव्यंकृत्वाचम्य हरिंस्मृत्वा गायत्रींमधुव्वाताइत्यादिकंमधुमधुम
ध्वितिचजपेत् । ततोऽपसव्यंकृत्वाहस्तमात्रचतुरंगुलोच्छ्रितदक्षिणप्लवपिण्डिकायांप्रादेशमात्रंपरिमाय दर्भपिञ्जूल्यादक्षिणांगुष्ठतर्जनी
धृतमूलया वामहस्तांगुष्ठतर्जनीधृतोपरिभागया ॐ अपहताऽसुरारक्षाᳪसिवेदिषदइतिप्रादेशमात्रमुल्लिख्य दर्भपिञ्जूलीमुत्तरस्यां
दिशित्यजेत् । ॐ येरूपाणीत्यादिनाङ्गारंभ्रामयित्वाअङ्गारंदक्षिणस्यांदिशिक्षिपेत् । ततस्तत्राच्छिन्नमूलकुशत्रयमास्तीर्यसव्यंकृत्वा देवता
भ्यइतित्रिर्जपेत् । ततः अपसव्यंकृत्वातिलजलगन्धपुष्पाणिपुटकेकृत्वापुटकंवामहस्तेधृत्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपि
तरमुकशर्म्मन्सांवत्सरिकैकोद्दिष्टश्राद्धपिण्डस्थानेऽत्रावनेनिक्ष्वतेस्वधेतिच्छिन्नमूलकुशोपरिअवनेजनंदद्यात् । किंचिज्जलंपुटकेऽव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शेषयेत् । ततः तिलजलव्यञ्जनघृतमिश्रैरन्नैः पिण्डंबिल्वोपमंनिर्माय मधुघृताभ्यामभिघार्य्यमोटकतिलजलसहितमादाय सव्यो पगृहीतदक्षिणहस्तेन ॐ अद्यामुकगोत्रपितरमुकशर्मन्सांवत्सरिकैकोद्दिष्टश्राद्धे एषतेपिण्डः स्वधेतिच्छिन्नमूलकुशोपरिपिण्डंदद्यात् । ततः कुशमूलेतूष्णींकरंप्रोक्ष्य सव्यंकृत्वाद्विराचामेत् । हरिंस्मृत्वा अपसव्यंकृत्वा दक्षिणामुखः अत्रपितर्मादयस्व यथा भागमावृषायस्वेतिपठित्वा उत्तराभिमुखीभूय श्वासंनियम्य पितरंध्यायन् पुनर्दक्षिणाभिमुखोभवन् ॐ अमीमदन्तपितर्यथाभा गमावृषायिष्टेतिपठेत् । ततः पूर्वदत्तावशिष्टजलयुतप्रत्यवनेजनजलपात्रमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्सांवत्सरिकैको द्दिष्टश्राद्धेपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेस्वधेतिपिंडोपरिप्रत्यवनेजनंदद्यात् । ततो नीवींविस्रस्य सव्येनाचम्यापसव्यंकृत्वा वामेनपाणिनासूत्रमादा यदक्षिणकरेणधृत्वा ॐ नमस्तेपिता रसाय नमस्तेपितःशोषाय नमस्तेपितर्जीवायनमस्तेपितःस्वधायैनमस्तेपितर्घोराय नमस्तेपितर्मन्यवेनम स्तेपितः पितर्नमस्तेगृहान्नः पितर्देहिसतस्तेपितर्देष्मइतिपठित्वा ॐ एतत्तेपितर्वासइतिपिण्डोपरिसूत्रंदद्यात् । ततो मोटकतिलजलान्यादाय ॐ अद्य अमुकगोत्रपितरमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेपिण्डे एतत्तेवासःस्वधेतिसूत्रमुत्सृजेत् । ततःपितरमुद्दिश्यपिण्डेतूष्णींगन्धपुष्प धूपदीपताम्बूलानिदद्यात् । ततःशिवाआपःसन्त्वितिजलम् ॐ सौमनस्यमस्त्विति पुष्पंचदत्त्वा ॐ अक्षतंचारिष्टमस्त्विति तण्डुलान्भोजनपात्रे क्षिपेत् । ततश्चमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणःसांवत्सरिकैकोद्दिष्टश्राद्धेदत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामि त्यक्षय्योदकंदद्यात् । ततःसव्यंकृत्वा दक्षिणामुखः ॐ अघोरःपितास्त्वितिपिण्डोपरिपूर्वाग्रांजलधारांदद्यात् । ततःपूर्वाभिमुखः कृताञ्जलिः सुमनाः ॐ गोत्रंनोवर्द्धतांदातारोनोऽभिवर्द्धन्तांवेदाःसंततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्तु ॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥

CC-0. In Public Domain. Digitization by eGangotri

याचितारश्चनःसन्तुमाचयाचिष्मकंचन ॥ एताःसत्याआशिषः सन्तुइत्याशीःप्रार्थनंकृत्वा अपसव्यंकृत्वासपवित्रकुशत्रयंदक्षिणाग्रंपिण्डोपरि धृत्वा ॐऊर्ज्जंवहन्तीरमृतमितिमन्त्रेणकुशोपरिदक्षिणाग्रांजलधारांदद्यात्। ततोनम्रीभूयपिण्डमाघ्रायोत्थापयेत्। पिण्डाधारकुशानुल्मुकं चव ह्नौक्षिपेत्। अर्घ्यपात्रमुत्तानीकृत्य दक्षिणांदद्यात्। तथामोटकादीन्यादायरजतंच ॐअद्यामुकगोत्रस्यपितुरमुकशर्मणः कृतैतत्सांवत्सरिकैको दिष्टश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यं यथानामगोत्रायब्राह्मणाय दक्षिणांचदातुमहमुत्सृजे इतिदद्यात् । यद्युपस्थितंरजतंनभवति तदाशक्ति कामितंरजतंचन्द्रदैवत्यंमित्येवमादिवाक्यंप्रयोक्तव्यम् । इदंपदंनप्रयोक्तव्यमितिविशेषः । ततः ॐ अभिरम्यतामितिविसर्जनम् । ततः सव्यं कृत्वा देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच । नमः स्वाहायैस्वधायैनित्यमेवनमोनमः इति त्रिःपठेत् । ततोऽपसव्यंकृत्वापाणिभ्यांदीपंनि र्वापयेत्। ततोहस्तौपादौचप्रक्षाल्यसव्यंकृत्वाचम्य ॐ ब्रह्मणेस्वाहा॰ ॐ प्रजापतयेस्वाहा॰ ॐ गृह्याभ्यः स्वाहा॰ (?) ॐ कश्यपायस्वाहा॰ ॐ अनुमतयेस्वाहा॰ । ततोहुतशेषान्नेनबलिदानम्। ॐ पर्ज्जन्यायनमः अद्भ्योनमः पृथिव्यैनमः । उदक्संस्थाय धात्रेनमः विधात्रेनमः द्वारशाखयोःवायवेनमः इति प्रतिदिशम्। ॐ प्राच्यैनम ॐ अवाच्यैनमः ॐ प्रतीच्यैनमः ॐ उदीच्यैनमःइतिप्रतिदि॰ । ॐ ब्रह्मणेनमः ॐ अन्तरिक्षाय॰ ॐ सूर्य्याय॰ इतिमध्ये ॐ विश्वेभ्योदेवेभ्योनमः ॐ विश्वेभ्योभूतेभ्योनमः ॐ उषसेनमः ॐ भूतानांपतयेनमःइत्युत्तरोत्त रम्। ततः प्राचीनावीती दक्षिणाभिमुखःपातितवामजानुः पितृतीर्थेनदक्षिणस्यांदिशि ॐ पितृभ्यःस्वधानमःइतिदद्यात्। ततो बलिशेषान्न लिप्तपात्रंप्रक्षाल्ययक्ष्मैतत्तेनिर्णेजनंनमः इतिवायव्यांदिशिदद्यात् । देवामनुष्याःपशवोवयांसिसिद्धाःसयक्षोरगदैत्यसंघाः ॥ प्रेताःपिशा चास्तरवःसमस्तायेचान्नमिच्छन्तिमयाप्रदत्तम् ॥ पिपीलिकाःकीटपतङ्गकाद्याबुभुक्षिताःकर्म्मनिबन्धबद्धाः ॥ प्रयान्तुतेतृप्तिमिदंमयान्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तेभ्योविसृष्टंसुखिनोभवन्तु ॥ येषांनमातानपितानबन्धुर्नचान्नसिद्धिर्नतथान्नमस्ति ॥ नतृप्तयेन्नंभुविदत्तमेतत्तेषांतुतृप्तिर्मुदिताभवन्तु ॥
शङ्खः—सौरभेय्यइतिगोभ्यस्ततः द्वौश्वानावितिशुनाम् । ऐन्द्रेतिवायसानांचशनैर्निर्वर्तयेद्भुवि ॥ ततोब्राह्मणान्भोजयेत् । इतिनैमित्तिक
श्राद्धबलिदानम् ॥ ॐ प्रमादात्कुर्वतांकर्म्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिरितिपठित्वा श्राद्धसंपूर्णका
मोविष्णुंस्मरेत् । श्राद्धीयवस्तूनिब्राह्मणायप्रतिपादयेत् । अम्भसिवाक्षिपेत् । शेषंज्ञातिभिः सहभुञ्जीत ॥ एवमेवपितृव्यभ्रात्रादिश्रा
द्धप्रयोगः ॥ शस्त्रादिहतनिमित्तकमाश्विनकृष्णचतुर्दश्यामप्येकोद्दिष्टमेवकर्तव्यम् । तत्रसांवत्सरिकपदंपरंनप्रयोक्तव्यमिति ॥ अथमातृ
श्राद्धप्रयोगः ॥ अथशुक्लाम्बरःस्नातोमध्याह्नेसुसमावृतपञ्चगव्योपलेपितंज्वलदङ्गारशोभितंगौरमृत्तिकाच्छादितंयथाप्रदेशासादितश्राद्धी
यद्रव्यंतंदेशमागत्य पादौप्रक्षाल्याचम्य सपिण्डस्त्रीद्वारापाचयेत् । स्वयंवापचेत् । ततः पादौप्रक्षाल्याचम्यशुद्धासनेउपविश्य दीपंप्रज्वाल्या
चम्यप्राङ्मुखःपरकर्तृकेपाकेसिद्धमितिपाचिकांपृष्ट्वा ॐ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्य
न्तरःशुचिः ॥ ॐ पुण्डरीकाक्षः पुनात्वितिकुशत्रयजलैः श्राद्धीयद्रव्याणिसिञ्चेत् । ततः कुशत्रयतिलजलान्यादाय ॐ अद्यामुकमासीया
मुकपक्षीयामुकतिथावमुकगोत्रायामातुरमुकदेव्याः सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्ये इतिसंकल्पंकुर्यात् । ततोगायत्रींत्रिर्जपित्वा
देवताभ्यःपितृभ्यश्चमहेत्यादित्रिर्जपेत् । ततोपसव्यंकृत्वा पातितवामजानुर्दक्षिणामुखोमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्राया
मातुरमुकदेव्याः सांवत्सरिकैकोद्दिष्टश्राद्धेइदमासनंतेस्वधेतिमोटकरूपमासनंदक्षिणाग्रंसातिलमुत्सृजेत् । ततः ॐ अपहताऽसुरा
रक्षाꣳसिवेदिषदः इत्यन्नपात्रेवामावर्तेनतिलान्विकीर्य्य ॐ आयन्तुनः पितरः सौम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धयामदन्तोऽधिब्ब्रुवन्तुतेवन्त्वस्मानितिपठित्वा अर्घ्यपात्रेदक्षिणाग्रंपवित्रंधृत्वा ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभि स्रवन्तुनः इत्यर्घ्यपात्रेजलंक्षिपेत् । तिलोसिसोमदैवत्योगोसवोदेवनिर्मितः ॥ प्रत्नवद्भिःप्रत्तःस्वधयापितॄँल्लोकान्प्रीणीहिनः स्वाहेतितिलान् क्षिप्त्वागन्धपुष्पेतूष्णींक्षिपेत् । ततोऽर्घ्यपात्रंवामहस्तेकृत्वा पवित्रंभोजनपात्रोपरिउत्तराग्रंधृत्वा तदुपरिकिंचिदुदकान्तरंदत्त्वायादिव्याऽ आपःपयसासंबभूवुर्य्याऽअन्तरिक्षऽउतपार्थिवीर्य्याः । ॐ हिरण्यवर्णायज्ञियास्तानऽआपःशिवाःश ँ स्योनासुहवाभवन्तुइतिपठित्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धइदंतेहस्तार्घ्यं स्वधेतिअर्घ्यंददुदुत्सृजेत् । तवोऽवशिष्टज लसहितंपवित्रसहितंचार्घ्यपात्रमासनवामभागे ॐ मात्रेस्थानमसीतिन्युब्जीकुर्य्यात् । तच्चदक्षिणादानपर्यन्तंनोद्धरेत्नचालयेत् । ततोगन्धा दिदानम् । ॐ अद्यामुकगोत्रेमातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलसिन्दूरवासांसितेस्वधेतिदद्यात् । ततोज लेनासनसहितभोजनपात्रस्यचतुर्दिक्षुचतुष्कोणंमण्डलंकृत्वासव्यञ्जनंश्राद्धदेयान्नाग्रभागं तिलजलसहितंकुत्रचित् पुटकादौकृत्वा ॐ इदम न्नमेतद्भूस्वामिपितृभ्योनमःइतिमोटकादिनाभूस्वामिनेऽन्नमुत्सृजेत् । ततःकराभ्यांताम्रपात्रस्थमन्नंमातरंध्यायन्भोजनपात्रेपुरुषाहारक्षमंपरि विष्ययथासंभवंसव्यञ्जनंघृतंपानीयंचपात्रान्तरेषूपनीयमधुनान्नमभिघारयेत् । ततः ॐ मधुव्वाताऽऋतायतेमधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तु नः पिता ॥ मधुमान्नोव्वनस्पतिर्म्मधुमा ँ ऽअस्तुसूर्य्यः ॥ माध्वीर्ग्गावोभवन्तुनः ॥ मधुमधुमध्वितिचजपेत् । ततः पाणिभ्यांन्युब्जाभ्यांपात्रंस्पृशन् ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽमृते अमृतंजुहोमिस्वाहा । ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरे ॥ ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठेत् । ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणहस्तमुत्तानंतदङ्गुष्ठम् ॐ इदमन्नमित्यन्ने ॐ इमाआपइतिजले ॐ इदमाज्यमितिघृते ॐ इदंकाविरितिपुनरन्नेनिवेशयेत् ।
ॐ अपहताऽसुरारक्षा ꣳसिवेदिषदः इत्यन्नेतिलान्निक्षिपेत् । ततोमोटकादीन्यादाय ॐ अद्यामुकगोत्रायैमात्रेऽमुकदेव्यै सांवत्सरि
कैकोद्दिष्टश्राद्धेइदमन्नंसोपकरणंतेस्वधाइत्यन्नमुत्सृजेत् । ततः पात्रंत्यजेत् । ॐ अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् । तत्सर्वमच्छि
द्रमस्त्वितिपठित्वा गायत्रींत्रिर्जपित्वाकुशेषूपविश्य ॐ मधुव्वातेतिजपेत् । ततः कृणुष्वपाजइत्याद्यारक्षोघ्नीर्ऋचोजपेत् । तिलान्भूमौविकी
र्य्य मातरंध्यात्वा ॐ उदीरतामवरइत्यादिपित्र्यमन्त्रान्सहस्रशीर्षेत्यादिपुरुषसूक्तम् ॐ आशुः शिशानइत्यादिकमप्रतिरथम् अन्यांश्चमन्त्रान्
जपेत् । ततउच्छिष्टसमीपेकुशत्रयमास्तीर्य्य जलेनप्रोक्ष्य सव्यञ्जनमन्नंसघृतंसतिलंजलप्रोक्षितमादाय ॐ अग्निदग्धाश्चयेजीवायेप्यदग्धाः कुले
मम ॥ भूमौदत्तेनतृप्यन्तुतृप्तायान्तुपरांगतिमितिकुशोपरि अन्नमुत्सृजेत् । ततः सव्यंकृत्वाचम्य हरिंस्मृत्वागायत्रींमधुव्वातेतिचजपेत् । अपसव्यं
कृत्वावेदिकांकृत्वा पिण्डस्थानेप्रादेशमात्रम् ॐ अपहताऽसुरारक्षा ꣳसिवेदिषदः इतिमन्त्रेणदर्भपिञ्जूल्याउल्लिखेत् । दर्भपिञ्जूलींमैशा
न्यांक्षिपेत् । ततः ॐ येरूपाणिप्रतिमुञ्चमानाऽअसुराः सन्तः स्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकान्प्रणुदात्यस्स्मादितिम
न्त्रेणरेखायामङ्गारंभ्रामयित्वा दक्षिणस्यांदिशित्यजेत् । ततस्तत्राच्छिन्नमूलकुशानास्तीर्य्य सव्यंकृत्वा देवताभ्यइतित्रिर्जपेत् । ततोऽपसव्यं
कृत्वापुटकेजलतिलपुष्पगन्धान्कृत्वामोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रमातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धेपिण्डस्थानेऽत्रावनेनि ॥६०॥
क्ष्वतेस्वधेतिच्छिन्नमूलकुशोपरिअवनेजनंदद्यात् । ततस्तिलघृतसहितान्नेनपिण्डंकृत्वा मधुघृताभ्यामभिघार्य्यमोटकतिलजलपिण्डानादाय
ॐ अद्यामुकगोत्रेमातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धेएषतेपिण्डःस्वधेतिपिण्डमपसव्येनगृहीत्वादक्षिणहस्तेनकुशोपरिदद्यात् । ततःकुशमू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेकरंप्रोक्ष्य सव्यंकृत्वा द्विराचम्यहरिंस्मृत्वा अपसव्यंकृत्वा दक्षिणामुखः ॐ अत्रमातर्मादयस्वयथाभागमावृषायस्वेतिपठेत् । उदङ्मुखीभूय श्वासंनिरुध्यमातरंध्यायन्परावर्तमानः ॐ अमीमदन्तमातायथाभागमावृषायिषेतिपठेत् । ततोऽवनेजनावशिष्टजलसहितंपुटकमादायमोटक तिलजलान्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धपिण्डेप्रत्यवनेनिक्ष्वतेस्वधाइतिप्रत्यवनेजनंदद्यात् । ततो नी वींविस्रस्य सव्यंकृत्वाचम्यऽअपसव्यंकृत्वावामेनपाणिनाधृतंसूत्रंदक्षिणेनचादाय ॐ नमस्तेमातारसायनमस्तेमातः शोषायनमस्तेमा तर्जीवायनमस्तेमातःस्वधायैनमस्तेमातर्घोरायनमस्तेमातर्मन्यवेनमस्तेमातर्मातर्नमस्तेगृहान्नोमातर्देहिसतस्तेमातर्देष्मइतिपठित्वा एतत्तेमा तर्वासइतिमन्त्रेणपिण्डोपरिसूत्रंधृत्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविसांवत्सरिकैकोद्दिष्टश्राद्धपिण्डएतत्तेवासः स्वधेतिसूत्रमुत्सृजेत् । पिण्डेगन्धपुष्पधूपदीपताम्बूलानितूष्णींदत्त्वा ॐ शिवाआपःसन्त्वितिजलम् ॐ सौमनस्यमस्त्वितिपुष्प म् ॐ अक्षतंचारिष्टमस्त्वितितण्डुलान्भोजनपात्रेःनिक्षिपेत् । ततोमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रायामातुरमुकदेव्याः सांवत्सरिकैकोद्दिष्टश्राद्धेदत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकमुत्सृजेत् । ततः सव्यंकृत्वा दक्षिणामुखः ॐ अघोरामा तास्तुइतिपिण्डोपरिपूर्वाग्रांजलधरांदद्यात् । ततः पूर्वाभिमुखः कृताञ्जलिः ॐ गोत्रंनोवर्द्धतां दातारोनोभिवर्द्धन्तांवेदाः संततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्तु ॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनः सन्तुमाचयाचिष्मकंचन ॥ एताः सत्याआशिषः सन्तुइत्याशीःप्रार्थनंकुर्यात् । ततोऽपसव्यंकृत्वा सपवित्रकुशत्रयंपिण्डोपरिआस्तीर्य ॐ ऊर्ज्जंवहन्तीरमृतंघृतंपयः कीला लंपरिस्रुतं स्वधास्थतर्पयतमेमातरमितिकुशोपरिदक्षिणाग्रांजलधारांदद्यात् । ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् । पिण्डाधार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुशानुल्मुकंवह्नौनिःक्षिप्यार्घ्यपात्रमुत्तानीकृत्य दक्षिणांदद्यात् । ततोमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रायामातुरमुकदेव्याःसांव
त्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थंरक्तिकापरिमितंरजतंचन्द्रदैवत्यंयथानामगोत्रायब्राह्मणायदक्षिणांचदातुमहमुत्सृजे इतियथावैभवंदद्यात् ।
ॐ अभिरम्यतामितिविसर्जनम् । ततःसव्यंकृत्वा ॐ देवताभ्यइतित्रिर्जपेत् । ततोऽपसव्यंकृत्वा हस्ताभ्यांदीपंनिर्वाप्य हस्तौपादौप्रक्षाल्य
सव्येनाचम्य ॐ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिरित्युक्त्वाश्राद्धसंपूर्णकामोविष्णुंस्मरेत् ।
ततःश्राद्धीयवस्तूनिब्राह्मणायप्रतिपादयेत् । जलेवा क्षिपेत् । ततइष्टैःसहशेषभोजनम् । एवंपत्न्यादिश्राद्धम् ॥ तत्र पत्न्यादिसंबन्धिनामो
ल्लेखोविशेषः । शस्त्रादिहतनिमित्तकेपिएकोद्दिष्टएषएवप्रयोगः । सांवत्सरिकपदंतत्रनप्रयोक्तव्यम् । तद्यथा—आश्विनकृष्णचतुर्दश्यांतिथाव
मुकगोत्रायामातुरमुकदेव्याएकोद्दिष्टश्राद्धमहंकरिष्यइतिसंकल्पंकुर्य्यात् । ॐ अद्यामुकगोत्रेमातरमुकदेवि एकोद्दिष्टश्राद्धेइदमासनंतेस्वधा
इत्येवमाद्युत्सर्गवाक्यम् ॥ इत्येकोद्दिष्टप्रयोगः ॥ अथस्त्रीकर्तृकश्राद्धप्रयोगः ॥ स्नाताशुक्लवस्त्रयुगधारिणी मध्याह्नेसुसमावृतंपञ्चगव्योप
लेपितं ज्वलदङ्गारशोधितं गौरमृत्तिकाच्छादितं यथाप्रदेशासादितश्राद्धीयद्रव्यंज्वलितदीपंविकीर्णतिलगौरसर्षपंश्राद्धदेशमागत्याऽऽचम्याऽऽ
सनेप्राङ्मुखी उपविशेत् । पाचिकान्तरपक्षे सिद्धमितिपाचिकांपृच्छेत् । अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबा
ह्याभ्यन्तरःशुचिः ॥ पुण्डरीकाक्षःपुनात्वितिकुशत्रयजलेनश्राद्धीयद्रव्याणिसिञ्चेत् । ततःकुशत्रयतिलजलान्यादायअद्यामुकगोत्रस्यपत्युर
मुकशर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धमहंकरिष्यइतिसंकल्पयेत् । ततःदेवताभ्यइतित्रिर्जपेत् । ततोदक्षिणाभिमुखीपातितवामजानुर्मोटकति
लजलान्यादाय अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेइदमासनंतेनमःइतिपितृतीर्थेनमोटकरूपमासनमुत्सृजेत् । ततस्तू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णीभोजनपात्रेतिलान्प्रक्षिप्य अर्घ्यपात्रेपवित्रधारणंजलप्रक्षेपस्तिलगन्धपुष्पप्रक्षेपश्च । ततोऽर्घ्यपात्रंवामहस्तेकृत्वापवित्रमुत्तराग्रंभोजनपात्रेधृत्वा तदुपरिउदकान्तरंदत्त्वा मोटकादीन्यादाय अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेइदंतेहस्तार्घ्यंनमइत्यर्घ्यंपवित्रोपरिददद्रुत्सृजेत् । ततोऽवशिष्टजलपवित्रसहितमर्घ्यपात्रमासनवामभागेपत्येस्थानमसीतिन्युब्जीकुर्यात् । ततोगन्धादिदानम् । मोटकतिलजलान्यादाय अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेनमः । ततोजलेनासनसहितंभोजनपात्रंमण्डलेनवेष्टयेत् । श्राद्धीयान्नाग्रभागंसव्यञ्जनंसतिलजलंपुटकादौकृत्वामोटकादीन्यादाय इदमन्नमेतद्भूस्वामिपितृभ्योनमइतिभूस्वामिनेऽन्नंदद्यात् । ततस्ताम्रपात्रस्थितमन्नंकराभ्यामादायपतिंध्यायन्तीपरिवेषयेत् । जलंघृतंव्यञ्जनपुटकान्तरस्थंतत्रोपनीयअन्नेमधुदत्त्वामधुमधुमध्वितिचजपेत् । ततः उभाभ्यांन्यस्ताभ्यांहस्ताभ्यांभोजनपात्रमालभ्यान्नममृततयाचिन्तयेत् । ॐ कृष्णकाव्यमिदंरक्षमदीयमितिपठित्वा दक्षिणहस्तमुत्तोल्यतदङ्गुष्ठमिदमन्नमिमाआपः इदमाज्यमित्यन्नजलघृतेषुनिःक्षिप्य इदंकविरितिपुनरन्नेङ्गुष्ठंनिःक्षिप्यअन्नोपरितिलान्विकीर्य्य मोटकादीन्यादाय अद्यामुकगोत्रपतेऽमुकशर्म्मन् सांवत्सरिकैकोद्दिष्टश्राद्धेइदमन्नंसोपकरणंतेनमः इत्यन्नमुत्सृजेत् । ततो वामहस्तमप्युत्तोल्याऽन्नहीनमित्यादिपठित्वा भूमौतिलान्विकीर्य दर्भेषूपविश्य नीलकण्ठस्तुतिरुचिस्तवादीनिपठेत् । अशक्तौनमस्तुभ्यंविरुपाक्षेतिश्लोकमपिपठेत् । ततउच्छिष्टसान्निधावास्तृतकुशत्रयांभूमिंप्रोक्ष्यसतिलजलप्रोक्षितंसव्यञ्जनघृतमन्नमादाय अग्निदग्धाश्चइतिपठित्वाकुशोपरिकुशादिनासहविकिरेत् । ततआचम्य हरिं स्मृत्वा दक्षिणामुखीपिण्डस्थानेप्रादेशमात्रं परिमायकरद्वयतर्जन्यङ्गुष्ठधृततन्मूलयादर्भपिञ्जूल्यातदुल्लिख्यदर्भपिञ्जूलीमुत्तरतः क्षिपेत् । ततस्तत्रज्वलदङ्गारंभ्रामयित्वा दक्षिणस्यांदिशिक्षिपेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ततस्तत्राच्छिन्नमूलकुशत्रयमास्तीर्य प्राङ्मुखीदेवताभ्यइत्यादित्रिः पठेत् । ततो दक्षिणामुखी पुटकेतिलजलगन्धपुष्पाणिकृत्वा
पाणिनामोटकादीन्यादाय अद्यामुकगोत्रपतेऽमुकशर्म्मन् सांवत्सरिकैकोद्दिष्टश्राद्धपिण्डस्थानेऽत्रावनेनिक्ष्वतेनमः इतिकुशोपरिअवनेजनं
दद्यात् । ततस्तिलजलव्यञ्जनमधुघृतयुतान्नेनापिण्डंनिर्माय मधुघृताभ्यामभिघार्य्य मोटकादीनिचादाय अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्स
रिकैकोद्दिष्टश्राद्धे एषतेपिण्डः नमः इत्यवनेजनकुशोपरिवामान्वारब्धदक्षिणपाणिनापिण्डंदद्यात् । ततो द्विराचम्यहरिंस्मृत्वा उत्तराभिमुखीभूय
श्वासंनियम्यपतिंध्यायन्तीदक्षिणामुखीभवेत् । ततोदत्तावशिष्टजलयुतमवनेजनपात्रंमोटकादीनिचादाय अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्स
रिकैकोद्दिष्टश्राद्धपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेनमः इतिप्रत्यवनेजनंदद्यात् । ततोनीवींविस्रस्याचम्यदक्षिणामुखीवामेनपाणिनासूत्रमादाय
दक्षिणेनपिण्डोपरिधृत्वा अद्यामुकगोत्रपतेऽमुकशर्मन् सांवत्सरिकैकोद्दिष्टश्राद्धपिण्डेएतत्तेवासोनमः इतिमोटकादिनासूत्रमुत्सृजेत् । ततः
पिण्डेगन्धादिदानम् । ततःशिवाआपःसन्त्वितिजलम् । सौमनस्यमस्त्वितिपुष्पम् । अक्षतंचारिष्टमस्त्वितितण्डुलान्भोजनपात्रेप्रक्षिप्य
मोटकादीन्यादाय अद्यामुकगोत्रस्यपत्युरमुकशर्मणःसांवत्सरिकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमुपतिष्ठतामित्यक्षय्योदकंदद्यात् ।
ततःपिण्डोपरि अघोरः पतिरस्तुइतिपूर्वाग्रांजलधारांदद्यात् । ततःप्राङ्मुखीकृताञ्जलिःगोत्रंनोवर्द्धतामित्यादिपाठित्वा एताःसत्याआशिषः
सन्त्वित्याशिषः प्रार्थयेत् । ततः पिण्डोपरि दक्षिणामुखीसपवित्रकुशत्रयंदक्षिणाग्रमास्तीर्य तदुपरिदक्षिणाग्रांजलधारांदद्यात् ॥ ततोनम्रीभूय
पिण्डमाघ्रायोत्थापयेत् । पिण्डाधारकुशानुल्मुकंचवह्नौनिःक्षिपेत् । ततोऽर्घ्यपात्रमुत्तानींकृत्यदक्षिणादानम् । अद्यामुकगोत्रस्यपत्युरमुकश
र्म्मणः कृतैतत्सांवत्सरिकैकोद्दिष्टश्राद्धप्रतिष्ठार्थं रक्तिकापरिमितंरजतंचन्द्रदैवत्यंयथानामगोत्रायब्राह्मणायदक्षिणांचदातुमहमुत्सृजे इतिदक्षिणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चदद्यात् । ततोऽभिरम्यंतामितिविसर्जनम् । ततःप्राङ्मुखी देवताभ्यइतित्रिः पठेत् । ततोदक्षिणामुखीहस्ताभ्यांदीपंनिर्वाप्य हस्तौपादौप्रक्षा ल्याचम्य प्रमादात्कुर्वतामित्यादिपठित्वा श्राद्धसंपूर्णकामनयाविष्णुंस्मरेत् । ततःश्राद्धीयवस्तुब्राह्मणायार्प्पयेत् अम्भसिवाक्षिपेत् । ततइष्टैःसहभोजनम् । एवमेवशस्त्रहतादिनिमित्तकमाश्विनकृष्णचतुर्दश्यांतिथौश्राद्धंकर्तव्यम् । सांवत्सरिकपदंतत्रनप्रयोक्तव्यम् ॥ तद्यथा— अद्यआश्विनकृष्णचतुर्दश्यांतिथौ अमुकगोत्रस्यपत्युरमुकशर्मणएकोद्दिष्टश्राद्धमहंकरिष्येइतिसंकल्पः । अद्यामुकगोत्रपतेऽमुकशर्म्मन्नेको द्दिष्टश्राद्धेइदमासनंतेनमइत्येवमादिनाऽऽसनादिदानम् ॥ एवमेवशूद्रकर्तृकैकोद्दिष्टश्राद्धप्रयोगः ॥ अथपात्रिकपार्वणश्राद्धप्रयोगः ॥ अपराह्ने स्नातः शुक्लद्विवासाः शुचिराचम्य वस्त्रादिनावेष्टितं श्राद्धदेशमागच्छेत् । ततः प्राङ्मुखउपविश्य सिद्धान्नसंभवेसिद्धमितिपाचिकांपृष्ट्वा ॐ अपवित्रइत्यादिपठित्वा ॐ पुण्डरीकाक्षः पुनात्वितिकुशत्रयानीतजलैः श्राद्धवस्तूनिसिञ्चेत् । रक्षार्थंदीपंनिधायगौरसर्षपैरवकी र्य्य ॐ नमोनमस्तेगोविन्दपुराणपुरुषोत्तम ॥ इदंश्राद्धंहृषीकेशरक्षत्वंसर्वतोदिशः ॥ प्राच्यैनमः अवाच्यैनमः प्रतीच्यैनमः उदीच्यैनमः यवपुष्पैः भूम्यैनमः इतिभूमिंत्रिःसंपूज्य पादयोरधः कुशत्रयंदत्त्वा कुशत्रयतिलजलैः संकल्पंकुर्य्यात् । ॐ अद्यामुकमासीयामुकपक्षीयामु कतिथावमुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणाममुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणामपा त्रिकपार्वणश्राद्धमहंकरिष्ये । ततो गायत्रींत्रिर्जपित्वा ॐ देवताभ्यइत्यादित्रिर्जपेत् । ततउत्तराभिमुखोदक्षिणोत्तरक्रमादासादि तकुशत्रयात्मकासनयोःप्रथमंदक्षिणमासनंसयवमुत्सृजेत् । ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांपार्वणश्रा द्धसंवन्धिनोविश्वेदेवाइदमासनंवोनमः इतिकुशत्रययवजलैरुत्सृजेत् । एवं ॐ अद्यामुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुकामुकशर्मणांपार्वणश्राद्धसंबन्धिनोविश्वेदेवाइदमासनंवोनमइत्यपरमुत्सृजेत् । ततोऽपसव्यंकृत्वा पातितवामजानुर्दक्षिणाभिमुखो द्विगुणभु
ग्नकुशत्रयतिलजलान्यादायपूर्वपश्चिमासादितमोटकरूपाणिषडासनानितिलजलप्रोक्षितानि प्रत्येकं पित्रादिभ्यः पश्चिमतआरभ्यउत्सृजेत् ।
तत्रक्रमः । ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः पार्वणश्राद्धेइदमासनंतेस्वधा । एवंपितामहप्रपितामहयोः । ॐ अद्यामुकगोत्रमातामहा
मुकशर्मणः पार्वणश्राद्धेइदमासनंतेस्वधा । एवमेवप्रमातामहवृद्धप्रमातामहयोर्दद्यात् । ततः सव्यंकृत्वा ॐ विश्वान्देवानहमावाहयिष्येइ
त्युक्त्वा ॐ विश्वेदेवासऽआगतशृणुताम ऽइमꣳ हवम् ॥ एदंबर्हिर्निषीदतेत्यादिनादेवानावाह्य ॐ यवोसियवयास्स्मद्द्वेषोयवया
रातीरितियवान्विकीर्य्य ॐ विश्वेदेवाःशृणुतेत्यादिजपेत् । ॐ आगच्छन्तुमहाभागाविश्वेदेवामहाबलाः ॥ येयत्रयोजिताः श्राद्धेसावधाना
भवन्तुतेइतिश्लोकंचपठेत् । ततोऽपसव्यं कृत्वादक्षिणाभिमुखः ॐ पितॄनहमावाहयिष्येइत्युक्त्वा ॐ उशन्तस्त्वानिधीमह्युशन्तः
समिधीमहि ॥ उशन्नुशत ऽआवहपितॄन्हविषे ऽअत्तवेइत्यादिनापितॄनावाह्य ॐ अपहताऽसुरारक्षाꣳसिवेदिषदः इत्यादिनापात्रेषुति
लान्विकीर्य्य ॐ आयन्तुनः पितरःसोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्यस्मानित्यादि
पठेत् । ततःसव्यंकृत्वा देवार्घ्यपात्रद्वयेपवित्रेधृत्वा अपसव्येनपित्राद्यर्घ्यपात्रेषुप्रत्येकंपवित्रंधृत्वासव्येनदेवार्घ्यपात्रद्वये ॐ शन्नोदेवीरभिष्टयऽ
आपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः इत्यादिनाजलंप्रक्षिप्य अपसव्येनपित्राद्यर्घ्यपात्रषट्केऽनेनैवमन्त्रेणजलं पितृतीर्थेननिःक्षिपेत् । ततः ॥६३॥
सव्यंकृत्वा ॐ यवोसियवयास्मद्द्वेषोयवयारातीरितिदेवार्घ्यपात्रद्वयेप्रत्येकंयवान्प्रक्षिप्य अपसव्येनपित्राद्यर्घ्यपात्रेषुप्रत्येकम् ॐ तिलोसिसो
मदैवत्योगोसवोदेवनिर्मितः ॥ प्रत्नवद्भिः प्रत्तःस्वधयापितॄँल्लोकान्प्रीणीहिनःस्वाहा इतितिलान्प्रक्षिपेत् । ततः सव्येनदेवार्घ्यपात्रद्वये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तूष्णीमेवगन्धपुष्पेप्रक्षिप्य अपसव्येनपित्राद्यर्घ्यपात्रेषुप्राक्षिपेत् । ततःसव्यंकृत्वा एवंदेवार्घ्यपात्रंवामहस्तेकृत्वा तत्रस्थितंपवित्रंदेव भोजनपात्रेपूर्वाग्रंधृत्वा तदुपरिकिंचिदुदकान्तरंदत्त्वा ॐ यादिव्याआपःपयसासंबभूवुर्याऽअन्तरिक्षऽउतपार्थिवीर्याः । हिरण्यवर्णायाज्ञि यास्तानऽआपःशिवाःश ँ स्योना सुहावाभवन्तु इतिपठित्वायवकुशजलान्यादाय ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहाना मसुकासुकशर्मणांपार्वणश्राद्धसंबन्धिनोविश्वेदेवाः इदंवोहस्तार्घ्यंनमःइत्यर्घ्यंददुत्सृजेत् । एवमेवमातामहादिदेवेभ्योपिदद्यात् । ततोऽ पसव्यंकृत्वा पित्रर्घ्यपात्रंवामहस्तेकृत्वा पितृभोजनपात्रेदक्षिणाग्रंपवित्रंधृत्वा तदुपरिकिंचिदुदकान्तरंदत्त्वा ॐ यादिव्याआपःपयसासं बभूवुर्याऽअन्तरिक्षऽउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानआपःशिवाश ँ स्योनासुहवाभवन्तु इतिपठित्वा मोटकातिलजलान्या दाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धेइदंतेहस्तार्घ्यंस्वधेति अर्घ्यंददुत्सृजेत् । एवमेवपितामहादिपञ्चभ्योदद्यात् । ततः सव्यंकृत्वा पवित्रसहितमवशिष्टजलयुतंदेवार्घ्यपात्रद्वयंयथाक्रमंप्रत्येकंदेवासनदक्षिणपार्श्वे ॐ विश्वेभ्योदेवेभ्यः स्थानमसीत्युक्त्वा उत्ता नमेवधारयेत् । अपसव्यंकृत्वा किंचित् प्रपितामहार्घ्यपात्रस्थितपवित्रादीनिपितामहार्घ्यपात्रेकृत्वा तानिसर्वाणिपित्रर्घ्यपात्रेकृत्त्वा पित्रर्घ्ये पात्रंपितामहार्घ्यपात्रोपरितदुभयंप्रपितामहार्घ्यपात्रोपरिधृत्वा पितृवामपार्श्वे ॐ पितृभ्यः स्थानमसीतिमिलितान्येवन्युब्जीकुर्यात् । एवमेवमातामहाद्यर्घ्यपात्राणिमेलयित्वा मातामहप्रमातामहवृद्धप्रमातामहेभ्यःस्थानमसि इत्यर्घ्यपात्राणिन्युब्जीकुर्यात् । तथास्थापिता निचतानिपात्राणिदक्षिणादानपर्यन्तंनोद्धरेत् । नचालयेत् । ततः सव्यंकृत्वा गन्धादिदत्त्वा यवकुशजलैः संकल्पंकुर्यात् । ॐ अद्यामु कगोत्राणांपितृपितामहप्रपितामहानामसुकासुकशर्मणांपार्वणश्राद्धसंबन्धिनोविश्वेदेवाः एतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसिवोन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मइतियथासंभवमुत्सृजेत् । एवमेवमातामहादिदेवेभ्योपिदद्यात् । ततोऽपसव्यंकृत्वा गन्धादिदत्त्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्र पितरमुकशर्मन् पार्वणश्राद्धे एतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेस्वधेतिपित्रेगन्धादिदद्यात् । एवमेवपितामहादिपञ्चभ्योपि दद्यात् । ततोजलेनभोजनपात्रसहितमासनंवेष्टयित्वा मण्डलानिकुर्यात् । ततः श्राद्धदेयान्नाग्रभागमानीयसघृतंततस्सव्येनैवप्राङ्मुखः पुटका स्थितजलेआहुतिद्वयंजुहुयात् ॥ ॐ अग्नयेकव्यवाहनायस्वाहा । ॐ सोमायपितृमतेस्वाहा । ततो जलघृतसहितंतिलव्यञ्जनयुतमन्नमपसव्ये न इदमन्नमेतद्भूस्वामिपितृभ्योनमइतिदद्यात् । ततो हुतशेषमन्नंकिंचित्किंचित्सव्येनदेवपात्रद्वये अपसव्येनपित्रादिपात्रेषुदत्त्वापिण्डार्थंकिंचिद वशेषयेत् । ततउत्कृष्टमन्नंसिद्धमामंवापुरुषाहारक्षमंप्रत्येकंपरिविष्य यथासंभवमुपकरणंजलंघृतंचतत्रोपनीय सव्येनपित्रादिषुमध्वन्नोपरिदत्त्वा प्रत्येकं ॐ मधुव्वाताऽऋतायतेमधुरक्षन्तिसिन्धवः ॥ माध्वीर्नःसन्त्वोषधीः ॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ ॐ मधुमान्नोव्वनस्पतिर्म्मधुमाँऽअस्तुसूर्य्यः ॥ माध्वीर्ग्गावोभवन्तुनः ॥ ॐ मधुमधुमध्विितिचजपेत् । ततःसव्येनउत्तानपाणिभ्यांदेवपात्रंस्पृष्ट्वा ॐ पृथिवीतेपात्रंद्यौरपिधानं ब्राह्मणस्यमुखेऽअमृतेऽअमृतंजुहोमिस्वाहा ॥ ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरे इतिपठित्वा ॐ कृष्णहव्यमिदंरक्षमदीयमितिपठित्वा ॐ इदमन्नमित्यन्ने ॐ इमाआपइतिजले ॐ इदमाज्यमितिघृते ॐ इदंहविरितिपुनरन्ने दक्षिणकराङ्गुष्ठमावेश्य ॐ यवोसियवयास्मद्द्वेषोयवयारातीरितियवानन्नेप्रक्षिप्य ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुक शर्मणांपार्वणश्राद्धसंवन्धिनोविश्वेदेवाएतद्वोन्नंसोपकरणंनमः इतिकुशत्रययवजलैरुत्सृजेत् । एवमेवपितामहादिदेवेभ्योपिदद्यात् । ततोऽ पसव्यंकृत्वा दक्षिणामुखः पातितवामजानुः पितृपात्रंन्युब्जाभ्यांव्यस्ताभ्यांपाणिभ्यांस्पृष्ट्वा ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखेऽअमृतेऽअमृतंजुहोमिस्वाहा । ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा ँ सुरे इतिपठित्वा ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ॐ इदमन्नमित्यन्ने ॐ इमाआपइतिजले ॐ इदमाज्यमितिघृते ॐ इदंकविरितिपुनरन्नेदक्षिणकरांगुष्ठमावेश्य ॐ अपहताऽसुरारक्षा ँ सिवेदिषदइत्यन्नोपरितिलान्विकीर्य्य मोटकतिलजलान्यादाय ॐ आद्यामुकगोत्रायापित्रे अमुकशर्मणेपार्वणश्राद्धेएतत्तेन्नंसोपकरणंस्वधेतिपित्रेन्नमुत्सृजेत् । एवमेवपितामहादिभ्योपिदद्यात् । यद्येकंपात्रंभवतितदापृथिवीतेपात्रमितिमन्त्रःपुनर्नपठनीयः । ततः अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तुइतिजपेत् । ततोगायत्रींत्रिर्जपेत् । ततः कुशेषूपविश्य ॐ मधुव्वाताइतित्र्यृचंजप्त्वा रक्षोघ्नीः ॐ कृणुष्वपाजइत्याद्याऋचः पठित्वा भूमिंतिलैरवकिरेत् । उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः ॥ असुंय्यईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु इत्यादिपितृमन्त्रान् ॐ सहस्रशीर्षेत्यादिपुरुषसूक्तंचपेत् । ॐ आशुः शिशानइत्यादिकमप्रतिरथमन्यानिचपवित्राणिजपेत् । पुराणेतिहासमन्त्रादीनिचजपेत् । ततउच्छिष्टसन्निधावास्तृतकुशत्रयांभूमिंप्रोक्ष्यसर्वप्रकारमन्नमुद्धृत्यसतिलमेकीकृत्य ॐ अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम ॥ भूमौदत्तेनतृप्यन्तुतृप्तायान्तुपरांगतिमितिकुशोपर्यन्नमुत्सृजेत् । ततः सव्यंकृत्वाचम्यहरिंस्मृत्वागायत्रींमधुव्वाताइतित्र्यृचंमधुमधुमध्वितिचजपेत् । ततोपसव्यंकृत्वापिण्डपातनार्थंनिर्मितहस्तमात्रचतुरङ्गुलोच्छ्रितदक्षिणप्लवपिण्डिकाद्वयमध्यस्थानेसव्यहस्तधृतोपरिभागेनदक्षिणहस्तधृतमूलेनपवित्रेण ॐ अपहताऽसुरारक्षा ँ सिवेदिषदःइतिमन्त्रेणप्रादेशमात्रमुल्लिखेत् । पवित्रमैशान्यांदिशिक्षिपेत् । ततःउभयत्र ॐ येरूपाणिप्रतिमुञ्चमानाऽअसुराःसन्तःस्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्यग्निष्टाँल्लोकान्प्रणुदात्यस्मादितिमन्त्रेणज्वलदङ्गारंप्रत्येकंभ्रामयेत् । अङ्गारंदक्षिण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोनिदध्यात् । ततउपमूलसकृदाच्छिन्नदक्षिणाग्रकुशत्रयं रेखायामास्तृणुयात् । ततःसव्यंकृत्वा ॐ देवताभ्यइतितिर्जपेत् । ततोऽप सव्यंकृत्वापुटकषट्केजलतिलगन्धपुष्पाणिकृत्वाएकंपात्रंवामहस्तेकृत्वामोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वण श्राद्धपिण्डस्थानेऽत्रावनेनिक्ष्वतेस्वधाइत्यास्तृतदर्भमूलेऽवनेजनंदद्यात् । एवंपितामहायापरपात्रमादायकुशमध्येतृतीयंपात्रमादायप्रपितामहा यकुशाग्रेदद्यात् । एवमेवपरापिण्डिकायामपियथाक्रमंकुशेष्ववनेजनादिदद्यात् । ततःसव्यञ्जनतिलजलमध्वाज्यहुतशेषान्नेनषट्पिण्डान्नि र्माय मधुघृताभ्यामभिघार्य्यदद्यात् । प्रथमंमोटकतिलजलपिण्डमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धेएषतेपिण्डःस्व धाइतिप्रथमावनेजनस्थानेपिण्डंदद्यात् । एवंपितामहप्रपितामहयोः प्रत्येकंतत्तदवनेजनस्थानेपिण्डंदद्यात् । एवमेवपरापिण्डानपिद्वितीय पिण्डिकायां तत्तदवनेजनस्थाने मातामहादिभ्योदद्यात् । पिण्डदानंचसव्योपगृहीतदक्षिणहस्तेन कार्यम् । ततःप्रपितामहादूर्ध्वंत्रयाणांलेपभा गभुजांतृप्तिमुद्दिश्य ॐ लेपभागभुजस्तृप्यन्तुइतिपठित्वा पित्रादिकपिण्डाधारकुशमूलेकरंप्रोक्ष्यसव्यंकृत्वा त्रिराचामेत् । ततोहरिंस्मृत्वाअ पसव्यंकृत्वा दक्षिणामुखः ॐ अत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिपठित्वा वामावर्तेनोदङ्मुखीभूय प्रीतमनाःश्वासंनियम्य तेनैवयथा परावर्तमानःपितॄन्भास्वरमूर्तीन् ध्यायन् अमीमदन्तयथाभागमावृषायिषत इतिजपेत् । ततःपूर्वदत्तावशिष्टजलयुतमवनेजनपात्रमादाय ॐ अद्यामुकगोत्रापितरमुकशर्मन्पार्वणश्राद्धेपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेस्वधेतिप्रथमपिण्डोपरिप्रत्यवनेजनंदद्यात् । एवमेतत्तदवनेजनपात्रैः पितामहादिभ्यस्तत्तत्पिण्डोपरिप्रत्यवनेजनंदद्यात् । ततोनीवींविस्रस्यसव्येनाचम्य अपसव्यंकृत्वा वामेनपाणिनानीयदक्षिणकरेसूत्रंकृत्वा ॐ नमोवःपितरोरसायनमोवः पितरः शोषायनमोवःपितरोजीवायनमोवःपितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः ॥६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्मइतिपठित्वा एतद्वः पितरोवासइत्युक्त्वाषट्सुपिण्डेषुसूत्राणिधृत्वा मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् पार्वणश्राद्धपिण्डेएतत्तेवासः स्वधेतिसूत्रमुत्सृजेत् । एवमपरापिण्डपञ्चकेषुतत्तन्नाम्नोत्सृजेत् । ततो गन्धपुष्पधूपदीपताम्बूलानिप्रत्येकंपिण्डेषुदद्यात् । ततः ॐ शिवाआपःसन्त्वितिजलम् ॐ सौमनस्यमस्त्वितिपुष्पम् ॐ अक्षतंचारिष्टमस्त्वितितण्डुलानन्नपात्रेषुक्षिपेत् । ततो मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः पार्वणश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्त्वित्युत्सृजेत् । एवमेवपितामहादीनांतत्तच्छर्मणांगोत्राणांप्रत्येकमुत्सृजेत् ॥ ततःसव्यंकृत्वादक्षिणांदिशंपश्यन् सुमनाःपिण्डोपरि ॐ अघोराःपितरःसन्त्वितिपठन्। पूर्वाग्रांजलधारांदद्यात् । ततःकृताञ्जलिःप्राङ्मुख आशिषःप्रार्थयेत् । गोत्रंनोवर्द्धतांदातारोनोभिवर्द्धन्तांवेदाःसंततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्तु ॥ अन्नंचनोबहुभवेदातिथींश्चलभेमहि ॥ याचितारश्चनःसन्तुमाचयाचिष्मकंचन ॥ एताःसत्याआशिषःसन्तु । ततोऽपसव्यंकृत्वापिण्डोपरिसपवित्रकुशानास्तीर्य ॐ ऊर्जंवहन्तीरमृतंघृतंपयःकीलालंपरिस्रुतं स्वधास्थतर्प्पयतमेपितॄनितिमन्त्रेणपवित्रकुशोपरिदक्षिणाग्रांजलधारांदद्यात् । ततः स्वस्थानस्थितानेवपिण्डानन्नश्रीभूयाघ्रायोत्थापयेत् । ततःपिण्डाधारकुशानुल्मुकद्वयंचवह्नौक्षिपेत् । ततः सव्येनदेवार्घ्यपात्रद्वयंसंचाल्य ऽपसव्येनपित्राद्यर्घ्यपात्राण्युत्तानीकृत्य सव्येनकुशत्रययवजलैर्देवदक्षिणांदद्यात् । ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांपार्वणश्राद्धसंबन्धिनांविश्वेषांदेवानां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थंहिरण्यमाग्निदैवत्यं यथानामगोत्रायब्राह्मणाय दक्षिणांचदातुमहमुत्सृजे इतिदद्यात् । एवंमातामहादिश्राद्धसंबन्धिविश्वेदेवब्राह्मणायदक्षिणांचदद्यात् । ततोऽपसव्येनमोटकतिलजलान्यादाय पित्रादिश्राद्धदक्षिणांचद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यात् । ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणः कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदंरजतंचन्द्रदैवत्यं यथानामगोत्रायब्राह्मणाय दक्षिणांदातुमहमु-
त्सृजेइतितद्द्यात । एवंपितामहादिश्राद्धानामपिदक्षिणांदद्यात् । हिरण्यरजतासंपत्तौ यथासंभवमन्यदपिफलमूलादिकंदक्षिणांदद्यात् ।
वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैरितिपित्रादीन्विसर्जयेत् । ॐ विश्वेदे-
वाःप्रीयन्तामितिदेवविसर्जनम् । ततः सव्येनदेवताभ्यःपितृभ्यश्चेतित्रिर्जपेत् । ततोऽपसव्येनरक्षादीपंनिर्वाप्य सव्यंकृत्वा हस्तौपादौप्रक्षाल्या-
चम्य ॐ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोः संपूर्णस्यादितिश्रुतिरितिपठित्वा कर्मपूर्णतार्थंविष्णुंस्मरेत् । श्राद्धीय-
द्रव्याणिब्राह्मणायप्रतिपादयेत् । तदभावेजलेवाक्षिपेत् । ततोवैश्वदेवबलिकर्मणीकुर्यात् । तदुक्तं स्वाहान्तास्ताजलेवाग्नौकुर्यात्पञ्चाहुतीः
क्रमात् ॥ ब्रह्माप्रजापतिर्गृह्याः कश्यपोनुमतिस्तथा ॥ १ ॥ चतुर्थ्यन्तैर्जलंक्षिप्त्वावैश्वदेवबलिंचरेत् ॥ पर्जन्यआपःपृथिवीधातापिचविपूर्वगः
॥ २ ॥ चतुर्वायुः प्राच्यवाचीप्रतीचीचाप्युदीच्यपि ॥ ब्रह्मान्तरिक्षसूर्याश्चविश्वेदेवास्ततःपरम् ॥ ३ ॥ विश्वभूतान्युषश्चापिभूतानांचपति-
स्तथा ॥ अपसव्येनसतिलंपितृभ्यश्चस्वधानमः ॥४॥ सनकादिसप्तमर्त्येभ्योहन्तकण्ठोपवीतवान् ॥ यक्ष्मैतत्तेचसव्येनजलनिर्णेजनंनमः ॥ ५ ॥
दद्यात्काकाश्चचाण्डालाःपतिताःपापसङ्गिनः ॥ ततः कीटपतङ्गाश्चगावःश्वानौततःपरम् ॥ ६ ॥ चतुर्थ्यन्तानुपादायनमोन्तान्क्रमतःपठेत् ॥ ॥९६॥
देवामनुष्याःपशवोवयांसिसिद्धाःसयक्षोरगदैत्यसंघाः ॥ प्रेताःपिशाचास्तरवःसमन्ताद्येचान्नमिच्छन्तिमयाप्रदत्तम् ॥१॥ कीटाःपतङ्गास्तरवश्चवृ-
क्षाजलेस्थलेयेविचरन्तिजीवाः ॥ तेतृप्तिमायान्तुमयाप्रदत्तंतेभ्योविसृष्टंभुविचान्नमेतत् ॥ २ ॥ पिपीलिकाःकीटपतङ्गकाद्याबुभुक्षिताः
कर्मनिबन्धबद्धाः ॥ प्रयान्तुतेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवन्तु ॥ ३ ॥ येषांनमातानपितानबन्धुर्नचान्नसिद्धिर्नतथान्नमस्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तृप्तयेन्नंभुविदत्तमेतत्तेचान्नतृप्तासुदिताभवन्तु ॥ ६ ॥ शंखः—सौरभेय्यइतिगोभ्यस्ततःद्वौश्वानावितिश्वभ्यः ऐन्द्रेतिवायसानाञ्चशनकैर्निःक्षिपे द्भुवि । ततोब्राह्मणान् भोजयेत् ॥ इतिनैमित्तिकश्राद्धवलिदानम् ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयाति सद्योवन्देतमच्युतम् ॥ इतिपार्वणश्राद्धविधिः ॥ एषविधिरुपरागनवान्नभक्षणतीर्थप्राप्तिनिमित्तकादिश्राद्धेषुवोद्धयः । तीर्थप्राप्ति निमित्तकादिश्राद्धेष्वावाहनार्घ्याभावइतिविशेषः ॥ अथाभ्युदयिकश्राद्धम् ॥ तत्रप्रथमंतन्नियतपूर्वकृत्यंमातृपूजाविधिः ॥ प्रातःकाले स्नातःकृतनित्यक्रियः कुड्येफलकेवास्थापितरक्षिकासुतदशतमेगणपतिसहितषोडशमातृः मृत्तिकामयींश्रियंतदभावेतामपिरक्षिकायां पूजयेत् ॥ तत्रमातरश्च—गौरीपद्माशचीमेधासावित्रीविजयाजया ॥ देवसेनास्वधास्वाहामातरोलोकमातरः ॥ हृष्टिःपुष्टिस्तथातुष्टिरा त्मनःकुलदेवताति । तत्रक्रमः । आचम्यप्राङ्मुखउपविश्यप्रथमरक्षिकामारभ्य क्रमेणगणपतिरसिगौर्यसिपद्मासिशच्यसिमेधासिसावि त्र्यसिविजयासिदेवसेनासिस्वधासिस्वाहासिमातरःस्थलोकमातरः स्थहृष्टिरसिपुष्टिरसितुष्टिरसिआत्मकुलदेवतासिश्रीरसीत्युक्त्वाऽक्षतानादा यपुनः प्रथमरक्षिकामारभ्य ॐ भूर्भुवःस्वःगणपतेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वर्गौरिइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वःपद्मेइ हागच्छइहतिष्ठ । ॐ भूर्भुवः स्वः शचिइहागच्छइहतिष्ठ । ॐ भूर्भुवः स्वःमेधेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वःसावित्रिइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वर्विजयेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वर्जयेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वर्देवसेनेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वःस्वधेइहा गच्छइहतिष्ठ । ॐ भूर्भुवःस्वःस्वाहेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वर्मातरइहागच्छतइहतिष्ठत । ॐ भूर्भुवःस्वर्लोकमातरइहागच्छत इहतिष्ठत । ॐ भूर्भुवःस्वःहृष्टेइहागच्छइहतिष्ठ । ॐ भूर्भुवःस्वःपुष्टेइहागच्छइहतिष्ठ । ॐ भूर्भुवः स्वस्तुष्टेइहागच्छइहतिष्ठ । ॐ भूर्भुवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वःआत्मकुलदेवते इहागच्छइहतिष्ठ । ॐ भूर्भुवः स्वःश्रीःइहागच्छइहतिष्ठ । एवंगणपतिसहिताएतामातृः श्रियंचप्रत्येकमोङ्कारव्याहृति पूर्वकमावाह्य स्थापयित्वा ॐ मनोज्योतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञठं०समिमंदधातु विश्वेदेवासइहमादयन्ता मोंप्रतिष्ठ इत्यक्षतान्विकीर्य्यएकदैवप्रतिष्ठांकुर्यात् । ततःपाद्यादिगृहीत्वाप्रथमतआरभ्यएतानिपाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि । ॐ गणपतयेनमइदमनुलेपनम् । ॐ गणपतयेनमःइमानिपुष्पाणि ।ॐ गणपतयेनमःइतित्रिःपूजयेत् । एतानिगन्धधूपदीपताम्बूलनैवेद्यान्यर्पये त् ।ॐ गणपतयेनमः। एवमेव ॐ गौर्यैनमः ॐ पद्मायैनमः ॐ शच्यैनमः ॐ मेधायैनमः ॐ सावित्र्यैनमः ॐ विजयायैनमः ॐ जयायैनमः ॐ देवसेनायैनमः ॐ स्वधायैनमः ॐ स्वाहायैनमः ॐ मातृभ्योनमः ॐ लोकमातृभ्योनमः ॐ हृष्ट्यैनमः ॐ पुष्ट्यैनमः ॐ तुष्ट्यैनमः ॐ आत्मनःकुलदेवतायैनमः ॐ श्रियैनमःइतिपाद्यादिभिःप्रत्येकमर्चयेत् । ततो गणपतिश्रीसहिताः षोडशमातरः क्षमध्वमितिविसर्जनम् । ॐ श्रीर्मयिरमस्वेति । ततो घृतेनभित्तौपञ्चसप्तवारेखाउत्तरोत्तरक्रमेणकुर्यात् । ताश्चपलेनप्रतिच्छेदनेनमन्त्रेण ॐ वसोः पवित्रमसिशतधारं वसोःपवित्रमसिसहस्रधारम् । देवस्त्वासवितापुनातुवसोःपवित्रेणशतधारेणसुप्वाःकामधुक्ष इत्यनेनभित्तौत्रिःपञ्चसप्त वा घृतधारादद्यात् ॥ अथाभ्युदयिकश्राद्धप्रयोगः तत्र दक्षिणोत्तरक्रमेण द्वादशस्थानेषु प्रत्येकमासादितद्रव्यंज्वलितप्रदीपदेशमागत्याचम्य प्राङ्मुखउदङ्मुखोवोप विशेत् । सव्येनसर्वकर्मकर्त्तव्यम् । ऋजवएवकुशाः तिलकार्थेयवाः कर्तव्याः । ततः ॐ अपवित्रः पवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरी काक्षंसवाह्याभ्यन्तरःशुचिः ॥ ॐ पुण्डरीकाक्षः पुनात्विति श्राद्धीयद्रव्याणिसिञ्चेत्कुशोदकेन । ततः कुशयवजलान्यादाय ॐ अद्यामुकगोत्रा णांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनां तथाऽमुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखानां ॥८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाऽमुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां नान्दीमुखानांअमुकगोत्रस्यामुकस्यकर्तव्यामुककर्मनिमित्तकमा
भ्युदयिकश्राद्धमहंकरिष्ये इतिसंकल्पयेत् । ततो गायत्रींत्रिर्जपित्वा ॐ देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच ॥ नमः स्वाहायैस्वधायै
नित्यमेवनमोनमः इतित्रिर्जपेत् । ततः ॐ अद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनामाभ्युदयिक
श्राद्धसंबन्धिनोविश्वेदेवाः इदमासनंवोनमः इतिकुशत्रयरूपंसपवित्रंसयवमासनंदक्षिणतआरभ्योत्सृजेत् ॥ एवंयथोत्तरम् ॐ अद्यामुकगो
त्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखानामाभ्युदयिकश्राद्धसंबन्धिनोविश्वेदेवाःइदमासनंवोनमः । ॐ अद्यामुक
गोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांनान्दीमुखानामाभ्युदयिकश्राद्धसंबन्धिनोविश्वेदेवाइदमासनंवोनमः । ॐ अ
द्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धेइदमासनंतेनमः । एवंपितामहीप्रपितामहीभ्यामासनंदद्यात् । अद्यामुकगोत्र
पितरमुकशर्मन्नान्दीमुखाऽऽभ्युदयिकश्राद्धेइदमासनंतेनमः । एवंपितामहप्रपितामहयोरपि । ॐ आद्यामुकगोत्रमातामहाऽमुकशर्म
न्नान्दीमुखाऽऽभ्युदयिकश्राद्धेइदमासनंतेनमः । एवंप्रमातामहवृद्धप्रमातामहयोरपि । ततआवाहनम् । विश्वान्देवानहमावाहयिष्येइत्युक्त्वा
ॐ विश्वेदेवासऽआगतशृणुतामइमᳬहवम् । एदंबर्हिर्निषीदत इत्यावाह्य ॐ यवोसियवयास्मद्द्वेषोयवयाऽरातीरितिदेवपात्रेयवान्विकीर्य
ॐ विश्वेदेवाः शृणुतेमᳬ हवंमेयेअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ ॐ आगच्छन्तु
महाभागाविश्वेदेवामहाबलाः ॥ येअत्रयोजिताः श्राद्धेसावधानाभवन्तुते इतिपठेत् । ॐ नान्दीमुखान्पितॄनहमावाहयिष्येइत्युक्त्वा
ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि ॥ उशन्नुशतऽआवाहपितॄन्हविषेअत्तवे इतिपितॄनावाह्य ॐ अपहताऽसुरारक्षाᳬसिवेदिषदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिमात्रादिपात्रेयवान्विकीर्य्य ॐ आयन्तुनः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्व
स्स्मानितिपठित्वाऽर्घ्यकरणम् ॥ तत्रेदेवपूर्वकंसर्वेष्वर्घ्यपात्रेषुपवित्राणिकृत्वा ॐ शन्नोदेवीरभिष्टयआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः
इतिजलंक्षिपेत् । ततो देवार्घ्यपात्रेषु ॐ यवोसियवयास्मद्द्वेषोयवयारातीरितियवान्क्षिपेत् । मात्रादिपात्रेषु ॐ यवोसिसोमदेवत्योगोसवे
देवानिर्मितः ॥ प्रत्नवद्भिः प्रपुष्टयानान्दीमुखाँल्लोकान्प्रीणीहिनः स्वाहेतिमन्त्रेणयवान्क्षिपेत् । ततः प्रत्येकंगन्धपुष्पेतूष्णींक्षिपेत् । ततः
प्रथमदेवपात्रंवामहस्तेकृत्वा तत्रस्थंपवित्रंभोजनपात्रेनिधाय तदुपरिकिंचिदुदकान्तरंदत्त्वा ॐ यादिव्याआपः पयसासंबभूवुर्याअन्तरिक्ष
उतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानऽआपः शिवाः श ँ स्योना सुहवाभवन्त्वितिपठित्वा कुशत्रययवजलान्यादाय ॐ अद्या
मुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनाम् । आभ्युदयिकश्राद्धसंबन्धिनोविश्वेदेवाः इदंवोहस्तार्घ्यंनमः ।
एवमेवपित्रादिश्राद्धेदेवेभ्योमातामहादिदेवेभ्यश्चहस्तार्घ्यंदद्यात् । ततोमातुरर्घ्यपात्रमादायपूर्ववत्कृत्वा ॐ यादिव्याइत्यादिपठित्वा कुशादी
न्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धेइदंतेहस्तार्घ्यंनमः । एवंपितामहीप्रपितामह्योरपिदद्यात् । ततः
पित्राद्यर्घ्यपात्रमादाय सर्वंपूर्ववत्कृत्वाकुशादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्म्मन्नान्दीमुखाऽऽभ्युदयिकश्राद्धेइदंतेहस्तार्घ्यंनमः ।
एवमेवपितामहादिपञ्चभ्योहस्तार्घ्यंदद्यात् । ततोऽवशिष्टजलपवित्रयुतंप्रथमंदेवार्घ्यपात्रमादाय ॐ विश्वेभ्योदेवेभ्यः स्थानमसीतिदेवासनद ॥५८॥
क्षिणभागे उत्तानं स्थापयेत् । एवमपरदेवार्घ्यपात्रद्वयंतत्तदासनदक्षिणभागेउत्तानंस्थापयेत् । ततः पितामहीप्रपितामहीपात्रद्वयस्थितं
पवित्रादि मात्रर्घ्यपात्रेनिधाय मात्रर्घ्यपात्रंपितामह्यर्घ्यपात्रोपरितत्पात्रं प्रपितामह्यर्घ्यपात्रोपरिधृत्वा दक्षिणकरेणादाय ॐ मातृभ्यःस्थानम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिइतिमात्रासनवामभागेन्युब्जीकुर्यात् । एवमेवपित्राद्यर्घ्यपात्राणांमेलनंकृत्वा पित्रासनवामभागे ॐ पितृभ्यःस्थानमसि इत्यर्घ्यपात्राणिन्युब्जीकुर्यात् । एवमेवमातामहाद्यर्घ्यपात्राणांमेलनंकृत्वा मातामहासनवामभागे ॐ मातामहप्रमातामहवृद्धप्रमातामहेभ्यःस्थानमसीतिन्युब्जीकुर्यात् । ततोगन्धादिदानम् । तत्रक्रमः । ॐ अद्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनामाभ्युदयिकश्राद्धसम्बन्धिनोविश्वेदेवाः एतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसिवोनमः । एवंपित्रादिदेवेभ्यो मातामहादिदेवेभ्यश्चदद्यात् । ततः ॐ अद्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलसिन्दूरवासांसितेनमः । एवंपितामहीप्रपितामहीभ्यामपिगन्धादिदानम् । ततः ॐ अद्यामुकगोत्रपितरमुकशर्मन् नान्दीमुखाऽऽभ्युदयिकश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलयज्ञोपवीतवासांसितेनमः । एवंपितामहादिपञ्चभ्योपिगन्धादिदानम् । ततोजलेनसर्वासनानिभोजनपात्रसहितानिचतुष्कोणमण्डलेनवेष्टयेत् । ततः सजलेपुटकादौहस्तेनैवसघृतमन्नम् ॐ अग्नयेकव्यवाहनायस्वाहा ॐ सोमायपितृमतेस्वाहा इत्याहुतिद्वयंजुहुयात् । ततोऽपसव्यंकृत्वा दक्षिणामुखः पातितवामजानुर्मोटकतिलजलान्यादाय ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमःइतिभूस्वामिनेकिंचिदन्नंदद्यात् । ततःसव्यंकृत्वा प्राङ्मुखउदङ्मुखोवा हुतशेषमन्नंदेवपूर्वकपात्रेषुकिंचिद्दत्त्वा पिण्डार्थंचकिंचिदवशेषयेत् । ततोन्यदन्नंयथासंभवंसर्वत्रपरिविष्यघृतंजलंचतत्रोपनीयपात्रमालभेत् । तत्रक्रमः । उत्तानपाणिभ्यां प्रथमंदेवपात्रं स्पृष्ट्वा ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽअमृतेअमृतंजुहोमिस्वाहाइतिपठित्वा ॐ इदंविष्णुर्व्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाᳬसुरे ॥ कृष्णहव्यमिदंरक्षमदीयमितिपठित्वा ॐ इदमन्नमित्यन्ने ॐ इमाआपइतिजले ॐ इदमाज्यमितिघृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ इदंहविरिरितिपुनरन्ने इतिदक्षिणाङ्गुष्ठमारोप्य ॐ यवोसियवयास्मद्द्वेषोयवयारातीरितियवान्विकीर्य्य कुशादीन्यादाय ॐ अ
द्यामुकगोत्राणांमातृपितामहीप्रपितामहीनाममुकामुकदेवीनांनान्दीमुखीनामाभ्युदयिकश्राद्धसंबन्धिनोविश्वेदेवाइदमन्नंसोपकरणंवोनमः ।
यदैकमेवपात्रंभवतितदावामेनपाणिनापात्रमत्यजन्नेव ॐ इदंविष्णुरित्यादिपठित्वा यवप्रक्षेपंकृत्वा कुशादीन्यादायपित्राद्युल्लेखेनपित्रादि
देवेभ्योप्यन्नमुत्सृजेत् । एवमेवमातामहादिदेवेभ्यः । भिन्नाभिन्नपात्रपक्षे ॐ पृथिवीतेपात्रमित्यादीनांसर्वेषामावृत्तिः । ततोमातृपात्रमुत्ताना
भ्यामेवकराभ्यांस्पृष्ट्वा पृथिवीतेपात्रमित्यादि ॐ इदंविष्णुरितिपठित्वा ॐ कृष्णकव्यमिदंरक्षमदीयम् ॐ इदमन्नमित्यन्ने ॐ इमाआप
इतिजले ॐ इदमाज्यमितिघृते ॐ इदंहविरिरितिपुनरन्ने दक्षिणकराङ्गुष्ठमारोप्य ॐ अपहताऽसुरारक्षा ᳪसिवेदिषदः इत्यन्नोपरियवान्वि
कीर्य्य ॐ अद्यामुकंगोत्रेमातरमुकदेविनान्दीमुख्याभ्युदयिकश्राद्धेइदमन्नंसोपकरणंते नमः । एवंपात्रालम्भनादिकंकृत्वा प्रत्येकंपितामही
प्रपितामहीभ्यामपिदद्यात् । एवंपितृपात्रमालभ्य ॐ पृथिवीतेपात्रमित्यादिपठित्वा पूर्ववत्सर्वंकृत्वा ॐ अद्यामुकगोत्रपितरमुकशर्म्मन्नान्दी
मुखाभ्युदयिकश्राद्धे इदमन्नंसोपकरणंतेनमः इतिपित्रेन्नमुत्सृजेत् । एवंपितामहादिभ्यः पञ्चभ्योपिप्रत्येकमन्नमुत्सृजेत् । ततःप्राञ्जलिः
ॐ अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्त्वितिजपेत् । दर्भेषूविश्य गायत्रींत्रिर्जपित्वा ॐ मधुमधुमध्वितिजपेत् । मधुव्वा
ताइत्यादित्र्यृचंजपेत् । पितृमन्त्रान् ॐ उदीरतामवरइत्यादींञ्जपेत् । अन्यानितुपुरुषसूक्तादीनिपवित्राणिजपेत् । ततः
प्रागग्रकुशत्रयंभूमावास्तीर्य्य जलेनप्रोक्ष्यजलप्रोक्षितंसयवघृतमन्नंकुशादिना ॐ अग्निदग्धाश्चयेजीवायेप्यदग्धाः कुलेमम ॥ भूमौदत्ते
नतृप्यन्तुतृप्तायान्तुपरांगतिमितिमंत्रेणकुशोपरिअन्नंविकिरेत् । ततआचम्यहरिंस्मृत्वागायत्रींत्रिर्जपेत् । चतुरस्रांपिण्डयोग्यांभूमिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिष्कृत्य उत्तरोत्तरक्रमेणस्थानत्रयेप्रादेशमात्रंपरिमाय प्रागग्रांरेखांदर्भेपिञ्जूलीमूलेन ॐ अपहताऽसुरारक्षा ᳪ सिवेदिषदइति रेखात्रयंकुर्यात् । ततः प्रत्येकंरेखात्रयोपरि ॐ येरूपाणिप्रतिमुञ्चमानाअसुराःसन्तःस्वधयाचरन्ति ॥ परापुरोनिपुरोयेभरन्त्य ग्निष्टाँल्लोकान्प्रणुदात्यस्स्मादितिमन्त्रेणाङ्गारान्भ्रामयेत् । तदुपरिप्रत्येकंकुशत्रयमास्तीर्य ॐ देवताभ्यःपितृभ्यश्चमहायोगि भ्यएवच ॥ नमःस्वाहायैस्वधायैनित्यमेवनमोनमः इतित्रिर्जपित्वा प्रत्येकमवनेजनंदद्यात् । तत्रक्रमः । यवजलगन्धपुष्पैर्नवपा त्राणिपूरयित्वा कुशादीन्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविनांदीमुखिआभ्युदयिकश्राद्धेपिण्डस्थानेत्राऽवनेनिक्ष्वतेनमः इतिसर्व दक्षिणकुशत्रयमूलेमात्रेऽवनेजनंदद्यात् । किंचिज्जलमवशेषयेत् । एवमेवपात्रान्तरमादायतत्कुशमध्येपितामह्यैअवनेजनंदद्यात् । त त्कुशत्रयाग्रेप्रपितामह्यै अवनेजनंदद्यात् । ततश्चापरपात्रमादायकुशादींश्चादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् नान्दीमुखाभ्युदयिक श्राद्धपिण्डस्थानेऽत्राऽवनेनिक्ष्वतेनमः इतिमध्यस्थितकुशत्रयमूलेपित्रेऽवनेजनंदद्यात् । किंचिज्जलमवशेषयेत् । एवंतत्तत्कुशत्रयम ध्याग्रयोः पितामहप्रपितामहयोरवनेजनंदद्यात् । ततः सप्तमपात्रमादायकुशादींश्चादाय ॐ अद्यामुकगोत्रमातामहामुकशर्मन्नान्दीमुखा भ्युदयिकश्राद्धपिण्डस्थानेऽत्रावनेनिक्ष्वतेनमइत्यपरकुशत्रयमूलेमातामहायावनेजनंदद्यात् । एवंप्रमातामहवृद्धप्रमातामहयोरपि । ततोय वदधिबदरीघृतमिश्रान्नेनपिण्डान्निर्माय एकंपिण्डंकुशादींश्चादाय अद्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धेएषपिण्डस्तेनम इतितदवनेजनस्थानेपिण्डंदद्यात् । एवमेवपितामहीप्रपितामहीभ्यांस्वीयस्वीयावनेजनस्थानेपिण्डंदद्यात् । ततश्चतुर्थपिण्डमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् नान्दीमुखाभ्युदयिकश्राद्धेएषतेपिण्डो नमः इतिपित्रवनेजनस्थानेपिण्डंदद्यात् । एवंपितामहप्रपितामहयोः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः सप्तमपिण्डमादाय ॐ अद्यामुकगोत्रमातामहामुकशर्म्मन्नान्दीमुखाभ्युदयिकश्राद्धेएषतेपिण्डो नमः इतिमातामहावनेजनस्थाने
मातामहायपिण्डंदद्यात् । एवमेवप्रमातामहवृद्धमातामहयोः । ततो दर्भमूलेकरंप्रोक्ष्याचम्यहरिंस्मृत्वा ॐ अत्रमातरोमादयध्वंयथाभा
गमावृषायध्वमितिपठित्वाउदङ्मुखीभूयश्वासंनियम्यतेनैवयथासुखंपरावर्तयन् ॐ अमीमदन्तमातरोयथाभागमावृषायिषतेतिजपेत् ।
एवमत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिजप्त्वाउदङ्मुखीभूयश्वासंनियम्यतेनैवयथासुखंपरावर्त्तयन् अमीमदन्तेत्यादिजपेत् ।
एवमेवमातामहादिपक्षेमन्त्रजपः। ततोऽवनेजनावशिष्टजलेनप्रत्यवनेजनंदद्यात्। तत्रक्रमः। ॐ अद्यामुकगोत्रेमातरमुकदेविनान्दीमुख्याभ्युदयि
कश्राद्धपिण्डेप्रत्यवनेनिक्ष्वतेनमःइतितत्पिण्डोपरिदद्यात्। एवंपितामहीप्रपितामहीभ्याम्। तथा ॐ अद्यामुकगोत्रपितरमुशर्मन्नान्दीमुखाभ्युद
यिकश्राद्धेपिण्डेऽत्रप्रत्यवनेनिक्ष्वतेनमःइतिपिण्डोपरिप्रत्यवनेजनंदद्यात्।एवमेवतत्तत्पिण्डोपरिपितामहादिपञ्चभ्योदद्यात्। ततोनीवींविस्रस्या
चम्य हरिंस्मृत्वा सूत्राण्यादाय ॐ नमोवोमातरोरसायनमोवोमातरः शोषायनमोवोमातरोजीवायनमोवोमातरःस्वाधायैनमोवोमातरोघोरायनमो
वोमातरोमन्यवेनमोवोमातरोमातरोनमोवोगृहान्नोमातरोदत्तसतोवोमातरोदेष्मएतद्वोमातरोवासइतिमातॄणांपिण्डत्रयोपरिसूत्रंदद्यात्। ततः ॐन
मोवःपितरोरसायनमोवः पितरः शोषायनमोवः पितरोजीवायनमोवः पितरस्स्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्यवेनमोवः पितरः
पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म एतद्वः पितरोवास इत्यनेनपित्रादिपिण्डषट्कोपरिप्रत्येकंसूत्रंदद्यात् । ततः कुशत्रययवज
लान्यादाय ॐ अद्यामुकगोत्रेमातरमुकदेविनान्दीमुखिआभ्युदयिकश्राद्धे पिण्डेएतत्तेवासोनम इतिसूत्रमुत्सृजेत् । एवमेवपितामहीप्रपिता
महीभ्याम् ॐ अद्यामुकगोत्रापितरमुकशर्मन्नान्दीमुखाभ्युदयिकश्राद्धेपिण्डएतत्तेवासोनमः।एवंपितामहादिपञ्चभ्यः सूत्रंदद्यात्। ततोगन्धपुष्प ॥६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूपदीपताम्बूलादिभिः प्रत्येकंपिण्डानभ्यर्च्य ॐ शिवाआपःसन्त्वितिजलम् ॐ सौमनस्यमस्त्वितिपुष्पम् ॐ अक्षतंचा
रिष्टमस्त्वितितण्डुलान् प्रत्येकंपात्रेषुनिक्षिप्य कुशादीन्यादाय ॐ अद्यासुकगोत्रायामातुरसुकदेव्यानान्दीसुख्याआभ्युदयिकश्राद्धेदत्तै
तदन्नपानादिभिः मातानान्दीसुखीप्रीयतामित्यक्षय्योदकमुत्सृजेत् । एवंपितामह्याःप्रतिमह्याश्चाक्षय्योदकंदद्यात् । तथा अद्यासु
कगोत्रस्यपितुरसुकशर्मणोनान्दीमुखस्याभ्युदयिकश्राद्धेदत्तैतदन्नपानादिभिः पितानान्दीमुखः प्रीयतामितिपित्रे । एवंपितामहादिप
भ्यःयोऽक्षय्योदकंदद्यात् । ततः ॐ अघोरामातरः सन्त्वितिमातृपिण्डत्रयोपरि पूर्वाग्रांजलधारांदद्यात् । ॐ अघोराःपितरः सन्त्वितिपि
त्रादिपिण्डषट्कोपरिजलधारांदद्यात । ततः ॐ गोत्रंनोवर्धतां—दातारोनोऽभिवर्द्धन्तांवेदाःसंततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्तु ॥
अन्नंचनोवहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनः सन्तुमाचयाचिष्मकंचन ॥ एताः सत्याआशिषः सन्तु इत्याशिषःप्रार्थयेत् । ततः
सपवित्रकुशत्रयाणिप्रत्येकंमात्रादिपिण्डत्रयेपित्रादिपिण्डत्रये मातामहादिपिण्डत्रयेचधृत्वा ॐ ऊर्जंव्वहन्तीरमृतंघृतंपयःकीलालंपरि
स्रुतं स्वधास्थतर्प्पयतमेमातृरितिमात्रादिपिण्डोपरिदक्षिणाग्रांजलधारांदद्यात् । ततस्तथैव ॐ ऊर्जंव्वहन्तीरित्यादिपठित्वापित्रादि
पिण्डषट्कोपरिजलधारांदद्यात् । ततःपिण्डानाघ्रायउत्थाप्य पिण्डाधारकुशानुल्मुकंचवह्नौक्षिपेत् । अर्घपात्राण्युत्तानीकृत्य दक्षिणांदद्यात् ।
दक्षिणाद्रव्यंच । फलमूलेफलंमूलंवाप्रत्येकम् । तत्रक्रमः । ॐ अद्यासुकगोत्राणांमातृपितामहीप्रपितामहीनामसुकासुकदेवीनांनान्दीमुखीनामा
भ्युदयिकश्राद्धसंवन्धिनांविश्वेषांदेवानांकृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवत्येयथानामगोत्रायब्राह्मणायदक्षिणांचदातुमह
मुत्सृजेइतितानिदद्यात् । एवंपित्रादिश्राद्धसंवन्धिविश्वेदेवश्राद्धदक्षिणांचमातामहादिश्राद्धसंवन्धिविश्वेदेवश्राद्धदक्षिणांचदद्यात् । ॐ अद्यासुक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोत्रायामातुरमुकदेव्यानान्दीमुख्याः कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवत्येइत्यादि । एवंपितामहीप्रपितामह्योरपि । ॐ अद्यामुकगोत्रस्यपितुरमुकशर्मणोनान्दीमुखस्यकृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवत्ये इत्यादि । एवंपितामहादि श्राद्धदक्षिणांचदद्यात् । ततः ॐ वाजेवाजइत्यादिनामात्रादिविसर्जनम् । ॐ विश्वेदेवाःप्रीयन्तामितिदेवविसर्जनम् । ततो देवताभ्यइतित्रिर्जपः, दीपनिर्वापणमाचनं, प्रमादादित्यादिपाठः, श्राद्धीयवस्तुप्रतिपत्तिः ॥ इत्याभ्युदयिकश्राद्धपद्धतिः ॥ अथनित्यश्राद्धप्रयोगः ॥ आचम्यउदङ्मुखउपविष्टः ॐ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरःशुचिरितिपठित्वा ॐ पुण्डरीकाक्षः पुनात्विति कुशत्रयजलेनश्राद्धीयद्रव्याणिसिञ्चेत् । ततःकुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांनित्यश्राद्धमहंकरिष्ये इतिसंकल्पं कुर्यात् । ततस्त्रिर्गायत्रींजप्त्वा ॐ देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वाहायैस्वधायैनित्यमेवनमोनमः इति त्रिर्जपेत् । ततोऽपसव्यंकृत्वा पातितवामजानुर्मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन् नित्यश्राद्धेइदमासनंतेस्वधेतितिलजलप्रोक्षितंमोटकरूपमासनंदक्षिणाग्रंपित्रेदद्यात् । एवमेवपितामहादिपञ्चभ्यःप्रत्येकमासनानिदद्यात् । ॐ अपहताऽसुरारक्षा ꣳ सिवेदिषदः इतिश्राद्धदेशेतिलान्विकीर्य ॐ आयन्तुनः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधयामदन्तोधिब्रुवन्तुतेवन्त्वस्मानितिजपेत् ॥ ततः ॐ अद्यामुकगोत्रपितरमुकशर्मन् नित्यश्राद्धेएतानिगन्धपुष्पधूपदीपताम्बूलानितेस्वधाइतियथासंभवंपित्रेगन्धादिदद्यात् । एवमेवपितामहादिभ्योपिदद्यात् । ततोजलेनमण्डलंचतुष्कोणमन्नस्यचतुर्दिशंकृत्वाऽन्नपरिवेषणं कुर्यात् । ततोमधुव्वाताऽऋतायते मधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नःसन्त्वोषधीः ॥ मधुनक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनः पिता ॥ मधुमान्नोवनस्पतिर्मधुमा२ अस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ॥
ॐ मधुमधुमध्वित्यभिमन्त्रयेत् ॥ ततोऽन्नपात्रंव्यस्ताभ्यामधोमुखाभ्यांपाणिभ्यांस्पृशन् ॐ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखे
अमृतेअमृतं जुहोमिस्वाहा ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपा२सुरेइतिजप्त्वा वामहस्तेनान्नपात्रमत्यजन्
ॐ कृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ॥ ॐ इदमन्नम् ॐ इमाआपः ॐ इदमाज्यम् ॐ इदंहविरित्यन्नजलघृतेषु पुनरन्नेच
दक्षिणाङ्गुष्ठंनिवेश्य ॐ अपहताऽसुरारक्षा२सिवेदिषदइत्यन्नोपरितिलान्प्रक्षिप्य मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्म
न् नित्यश्राद्धेइदमन्नंसोपकरणंतस्वधा इतिपित्रेन्नमुत्सृजेत् । एवंपितामहादिभ्यः पञ्चभ्योप्यन्नमुत्सृजेत् । अन्नहीनंक्रियाहीनंविधिहीनं
चयद्भवेत् ॥ तत्सर्वमच्छिद्रमस्त्वितिजपेत् । ततोदर्भेष्वासीनः गायत्रींमधुव्वाताइत्यादित्र्यृचम् ॐ मधुमधुमध्वितिचजपेत् । ततः
ॐ कृणुष्वपाजः प्रसितिंनपृथ्वींयाहिराजेवामवाँइभेन ॥ त्रिष्वीमनुप्रसितिंद्रुणानोस्तासिविध्यरक्षसस्तपिष्ठैः ॥ १ ॥ तवभ्रमासऽआ
शुयापतन्त्यनुस्पृशधृषताशोशुचानः ॥ वपू२ष्यग्नेजुह्वापतङ्गानसन्दितोविसृजविष्वगुल्काः ॥ २ ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायु
र्व्विशोअस्याऽअदब्धः ॥ योनोदूरेऽअघशꣳसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ ३ ॥ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्रा२ओषतात्तिग्म
हेते ॥ योनोअरातिꣳसमिधानचक्रेनीचातंधक्ष्यतसन्नशुष्कम् ॥ ४ ॥ उर्ध्वोभवप्रतिविद्धचाद्ध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने ॥ अवस्थिरातनु
हियातुजूनांजामिमजामिन्प्रमृणीहिशत्रून् ॥ अग्नेष्ट्वातेजसासादयामिइतिरक्षोघ्नीर्ऋचः पठेत् । ततास्तिलान्भूमौक्षिप्त्वा ॐ उदीरतामित्यादिपि
तृमन्त्रान् ॐ सहस्रशीर्षेत्यादिपुरुषसूक्तम् ॐ आशुः शिशानइत्यादिकमप्रतिरथमन्यानिपवित्राणियथाशक्तिजपेत् । नमस्तुभ्यंविरूपाक्षन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्तेऽनेकचक्षुषे ॥ नमः पिनाकहस्तायवज्रहस्तायवैनमः इतिपठेत् । ततः ॐ अद्यामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणां तथाऽमुकगोत्राणांमातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणांकृतैतन्नित्यश्राद्धप्रतिष्ठार्थमेककाकिणीमूल्यकंरजतंचन्द्रदैवत्यंयथाना मगोत्रायब्राह्मणायदक्षिणांचदातुमहमुत्सृजे इतिमोटकादिनादक्षिणांचदद्यात् । ततः सव्यंकृत्वा ॐ देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच ॥ नमः स्वाहायैस्वधायैनित्यमेवनमोनमः इतित्रिः पठेत् । ॐ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णस्यादितिश्रुति रितिपठित्वाविष्णुंस्मरेत् । नित्यश्राद्धीयमन्नंब्राह्मणायप्रतिपादयेत् । जलेवाक्षिपेत् ॥ ॥ इति श्राद्धविवेकेचतुर्थःपरिच्छेदः ॥ ॥ श्रीमहा महोपाध्यायश्रीरुद्रधरकृतः श्राद्धविवेकः समाप्तः ॥ शुभंभूयात् ॥

शके १८२५ संवत् १९६० ज्येष्ठकृष्णदशम्यांभृगुवासरे क्षेमराजेन श्रीकृष्णदासात्मजेन
मुम्बय्यां स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्राक्षरलेयमुद्रितोऽयंग्रन्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रय्यपुस्तकोंकी संक्षिप्त सूची-(कर्मकाण्डग्रन्थाः)

नाम.	की. रु. आ.
संस्कारभास्कर (यजुर्वेदी सब संकारोंकी विधि प्रयोग और मन्त्रसहित)	२-१२
कर्मसिद्धान्तदीपिका (कर्मफल)	०-३
रुद्री भाषाटीका	०-८
ग्रहशान्ति	०-८
बृहत्कर्मकाण्डसमुच्चय	०-७
श्राद्धप्रयोगावली	१-०
गयायात्रा-पद्धति (सबविधि वर्णित हैं)	०-४
वास्तुशांति	०-६
विनायकशांति	०-१॥
अष्टशांति	०-२
मूलशांति	०-२
आश्लेषाशांति ज्येष्ठाशांतिश्च	०-१॥
जन्मदिनपूजापद्धति	०-२
गोदानपद्धति.	०-१॥
नवग्रहविधानपद्धति	०-४
पूजापंकजभास्कर	२-०
सकामशिवपूजनविधान भाषाटीका	०-४
स्वस्तिवाचन (पुण्याहवाचन)	०-१॥
दशकर्मपद्धति (दशोसंस्कार)	०-७
वासिष्ठीहवनपद्धति	०-४
लंबोदरीहवनपद्धति	०-४
एकोद्दिष्टश्राद्धप्रयोग	०-२
एकोद्दिष्टश्राद्धपद्धति भाषाटीका	०-३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम.	की. रु. आ.
पार्वणश्राद्धप्रयोग	०–२
शूद्रश्राद्धपद्धति	–०६
पार्वणश्राद्धपद्धति भाषाटीका	०–४
पार्वणश्राद्ध सटीक	०–४
वृद्धिश्राद्ध (नान्दीमुख)	०-४
श्राद्धप्रकाश (जिससे ब्राह्मण, क्षत्रिय, वैश्योंके श्राद्धोंसे लेकर शूद्रश्राद्धों पर्यंत श्राद्धमात्रके निर्णय और पद्धतियां कही हैं	३–०
श्राद्धविवेक (इसमें सबश्राद्धोंकी विधि हैं)	०–१२
उपाकर्मपद्धति (श्रावणीयजुर्वेदकी)	०–८
कर्मविपाकचरणगत रफ १० आना व ग्लेज	०–१२
कर्मविपाक भाषाटीका	१–४
वेदोक्तवास्तुपद्धति	०–६

नाम.	की. रु. आ.
व्रतोद्यापनकौमुदी	०–१०
दानसंग्रह सब प्रकारके दानकी विधि हैं	१–४
सर्वदेवप्रतिष्ठासंग्रह पं० रामलालजी षट् शास्त्रीकृत (प्रतिष्ठा करानेका ऐसा ग्रंथ आजतक अन्यत्र नहीं छपा)	३–०
विवाहपद्धति मूल बड़े अक्षरोंकी	०–६
यज्ञोपवीत मूल २ आना तथा भाषाटीका	०–८
नवरत्नविवाहपद्धति भाषाटीकासह	१–४
वैवाहपद्यावली (नोतनी अर्थात् विनतीमें कहने योग्य दोनों पक्षके श्लोक) भाषाटीका	०–१२
ज्येष्ठाशांति	०–१॥
धनिष्ठा पंचकशांति	०–२
जलोत्सर्गप्रकाश वापी, कूप, तड़ागादिका उत्सर्ग	०–१२

संपूर्ण पुस्तकोंका "बड़ासूचीपत्र" अलग है ॥ आनेका टिकिट भेजकर मुफ्त मँगालीजिये.

☞ पुस्तकोंके मिलनेका ठिकाना–खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" छापाखाना, खेतवाडी–बंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्राद्धविवेकः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२५८६

॥ अथप्रायश्चित्तेंदुशेखरप्रारंभः ॥

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥ ॥श्रीगोपीजनवल्लभायनः॥ ॥अथप्रायश्चित्तेंदुशेखरप्रारंभः॥ ॥बालेंदुशेखरंनत्वाबा
लबोधायलिख्यते ॥बालकृष्णसुदेत्वापिप्रायश्चित्तेंदुशेखरः॥१॥ यद्यथाविध्यननुष्ठानाद्युपचिताशुभनाशकमेवतत्प्रायश्चि
त्तम् ॥तुलापुरुषादावतिव्याप्तिवारणायएवेति॥नतुलांतरजनकमित्यर्थः॥पापनिवर्तनक्षमधर्मविशेषेयोगरूढोयंशब्दइ
तितत्त्वम्॥संकेतविशेषसंबंधेनप्रायश्चित्तशब्दवत्त्वमेवप्रायश्चित्तत्वम्॥अतएवकृत्वंगम्येषप्रायश्चित्तेतद्व्यवहारइत्यन्ये॥पा
पिनःप्रायश्चित्तंनित्यंनैमित्तिकंवेत्यतोविकलांगादपिपापस्यनाशः॥ किंत्वल्पस्यैवनतुसमग्रस्यएवंचकाम्यमप्येतत्॥एवं
चप्रधाननिष्पत्तावपिनप्रधानहानिरितिबोध्यम्॥एकप्रायश्चित्तकनानापापकर्मणांतत्प्रायश्चित्तैकप्रयोगेणैवनाशः॥ एव
मधिकपापनाशार्थमुक्तेनैकवारमनुष्ठितेनन्यूननाशस्यापिपापांतरस्यनाशः॥ एवंयत्रयत्प्रायश्चित्तमुपदिष्टंतदन्यूनक्लेशक-
प्रायश्चित्तांतरमपितत्रयोज्यम्॥ पापिनांतदुपदेशश्चपुण्याय॥ सचार्चितेनपृष्टेनैवविदुषांसंसदिधर्मशास्त्रादिबुध्वैवकार्यः
॥अन्यथोपदेष्टाप्रत्यवैति॥ संसच्चतुर्भिस्त्रिभिर्वाधर्मशास्त्रादितत्त्वज्ञैर्भवतिएकेनापिब्रह्मविदायतिवर्ज्यम्॥सहस्राद्येकप
र्यंतमित्येके॥ पर्षद्दक्षिणाचलक्षगवादिकिंचिद्द्रव्यपर्यंता॥यथायोग्यंकृच्छ्रसंख्ययावा॥ पर्षत्तुष्टिर्वा॥गौर्वृषभश्चेत्यन्ये॥न
वेदितदोषस्यपर्षदनुमत्यैवप्रायश्चित्तानुष्ठानंबोध्यम्॥पापीचसचैलंस्नातोवाग्यतः आर्द्रवासाउपदेष्टारंसाष्टांगंप्रणम्य १
स्पष्टाभिधानंवदेदिदंमेपापंनिष्पन्नंप्रायश्चित्तंमेउपदिशत्विति॥पापंकृतवतोपरैर्ज्ञातदोषस्यचसभोपस्थानंविनाभोजनेभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

षणेच पापवृद्धिः॥ आसंवत्सरं प्रायश्चित्ताकरणे पापद्वैगुण्यम्॥ आर्त्तस्य प्रायश्चित्ताकथने र्वितस्य विपश्चितस्तत्पापभागि
ताअज्ञात्वाकथनेच॥ शूद्रादेस्तु प्रायश्चित्तोपदेशो विप्रमंतरा कृत्वा कार्यः॥ क्षत्रियवैश्ययोरप्येवं॥ गुरुणि पापे लघुलघुनि
च गुरु प्रायश्चित्तं न वाच्यम्॥ पापगौरवंतु कामतः सप्रत्ययं साभ्यासमनुष्ठानादूंडगौरवात्सातिशयाच्च निंदार्थवादाल्लोकग
र्हातिशयाच्च ज्ञातव्यम्॥ लघुताप्येतद्विपर्ययेण ज्ञेया॥ ॥प्रायश्चित्तं यथोक्तमेव वाच्यम्॥ ॥नतु स्नेहलोभादिना
नुग्रहः कार्यः॥ ॥तथासति पापं वक्तरि संक्रमेत्॥ ॥दुर्बलेतु प्रष्टरि प्रथमं यथोक्तमुदाहृत्य तच्छक्त्यनुसारेण ग्रीष्मा
दिकाल हिमालयादि देशानुसारेण चानुग्रहः कार्य एव॥ एवं शिशुवृद्धस्त्रीरोगिणामप्यनुग्रहः॥ सोपि यदूर्णस्य यत्प्रायश्चि
त्तमुक्तं तत्स्मादन्यूनं तदर्द्धं तत्पादं वेति बलदेशकालाद्यनुसारेण न ततो न्यूनं॥ तच्च बालवृद्धातुरस्त्रीणामर्धम्॥ एके हि
त्रिधर्मत्वे पादमेव॥ एवं च यत्र पादमेव प्रायश्चित्तमुपदिष्टं तत्रापि नानुग्रहः॥ ॥षोडशवर्षन्यूनो बालः॥ अशीतिवर्षाधि
कोवृद्धः॥ पूर्णषोडशवर्षस्य पूर्णं प्रायश्चित्तम्॥ ऊनैकादशवर्षस्य पंचवर्षादूर्ध्वं पादप्रायश्चित्तम्॥ द्वादशादाषोडशमर्धम्॥
तदपितत्पित्रादिभिः कार्यम्॥ एवमतिरोग्यतिवृद्धयोरपि पुत्रादिभिः॥ पंचवर्षन्यूनस्य न पापम्॥ शास्त्रोपदिष्टं पूर्णं प्रायश्चि
त्तं विप्रस्यैव॥ क्षत्रियविट्शूद्राणांतु पादपादहानिः॥ क्वचिद्विशेषस्तु वाचनिकः॥ तत्र जपहोमादिरहितमेव शूद्रस्य अम-
त्रकप्राणायामश्च॥ यागाद्यनुष्ठानशीलानां जपादिकम्॥ इतरेषां तप आदि॥ नामधारकमूर्खनिर्धनानां तपः॥ अनधी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तानांच ॥ षोडशवर्षाधिकब्रह्मचारिणोद्विगुणंवानप्रस्थस्यत्रिगुणम् ॥ यतेश्चतुर्गुणं ॥ स्वयमशक्तौप्रतिनिधिद्वाराप्राय
श्चित्तंकार्यं ॥ अज्ञानाकामकृतेयदुक्तंकामकृतेतद्द्विगुणंकामलोभ्यासेचतुर्गुणम् ॥ कामादिकृतेयदुक्तं ॥ अकामादिकृते-
तदर्धंयोज्यम् ॥ कृतप्रायश्चित्तोगवांस्वयंतृणंदद्यात् ॥ तच्चताःनिःशंकंस्वयमेव भक्षयेयुः तदैनमंगीकुर्युः सर्वेदंपापंनपु
नः करिष्यामीतिप्रतिजानीयात् ॥ नोचेत्पुनःप्रायश्चित्तेयोज्यः ॥ तत्रपापानिप्रकीर्णकजातिभ्रंशकरसंकरीकरणापात्रीकर
णंमलिनीकरणोपपातकमहापातकानुपातकरूपाणिविहितकरणेंद्रियानिग्रहेभ्योभवंति ॥ तत्रजातिभ्रंशकरादिगणिता
तिरिक्तंप्रकीर्णकम् ॥ जातिभ्रंशकराणितु ॥ विप्रपीडाकरणंअनाघ्रेयमद्यलशुनादिघ्राणंमित्रकौटिल्यंपुंसिमैथुनमेतानि-
जातिभ्रंशकराणि ॥ संकरीकरणानितु ॥ खराश्वोष्ट्रमृगहस्त्यजाविमीनमहिषाणामन्येषांचग्राम्यारण्यपशूनांवधः संकरी
करणानि ॥ आपात्रीकरणानितु ॥ निंदितेभ्योधनादानंवाणिज्यंशूद्रसेवाकुसीदजीवनंअसत्यभाषणमेतान्यपात्रीकरणा
नि ॥ मलिनीकरणानितु ॥ बहुकृमिकीटकयोर्जलस्थलजयोर्हत्यामद्यानुगतभोजनंबहुफलैधपुष्पस्तेयंअधैर्यमेतानिम
लिनीकरणानि ॥ उपपातकान्याह ॥ गोवधः १ व्रात्यता २ स्तेयं ३ ऋणानपक्रिया ४ अनाहिताग्निता ५ अपण्यविक्रयः ६
परिवेदनम् ७ भृतकाध्ययनाध्यापने ८ पारदार्यम् ९ पारिवित्त्यं १० वार्धुष्यं ११ लवणक्रिया १२ स्त्रीशूद्रविट्क्षत्रवधः १३ २
अशुष्कद्रुमछेदनं १४ निंदितार्थोपजीवनं १५ नास्तिक्यं १६ व्रतलोपः १७ सुतविक्रयः १८ धान्यकुप्यपशुस्तेयं १९ अ

CC-0. In Public Domain. Digitized by ...

याज्ययाजनं २० पितृमातृसुतत्यागः २१ तडागारामविक्रयः २२ कन्यादूषणम् २३ परिवेदकयाजनं २४ तस्यकन्याप्रदानं २५ गुरोरन्यत्रकौटिल्यं २६ आत्मार्थपाकार्थक्रिया २७ मद्यस्त्रीनिषेवणम् २८ व्रतलोपः २९ स्वाध्यायाग्निसुतानांत्यागः ३० बांधवत्यागः ३१ स्त्रियाहिंसयाचौषधेनचजीवनम् ३२ हिंसकप्रवर्त्तनम् ३३ द्यूतादिव्यसनम् ३४ आत्मविक्रयः ३५ शूद्रप्रेष्यता ३६ हीनसख्यम् ३७ हीनयोनिनिषेवणं ३८ अनाश्रमित्वं ३९ परान्नपुष्टता ४० असच्छास्त्राभिगमनं ४१ आकराधिकारः ४२ भार्यादिविक्रयः ४३ असत्प्रतिग्रहः ४४ निंदितान्नादनम् ४५ नटादिकर्मकरणं ४६ भार्यात्यागः ४७॥ ॥एतान्युपपातकानि॥ ॥महापातकानितु॥ ॥ब्रह्महत्यासुरापानंविप्रस्वर्णस्तेयंगुरुतल्पगमनंअब्दमेतच्चतुष्टयान्यतमसंसर्गइतिमहापातकानि॥ शूद्रस्यमद्यपानस्थानेब्राह्मणीगमनं॥ महापातकसदृशान्यनुपातकानितु॥ तत्रयागस्थनृपवैश्यवधः १ शरणागतवधः २ रजस्वलागर्भिण्यत्रिगोत्रस्त्रीणांवधः ३ अविज्ञातगर्भस्यसुहृदश्च ४ गुरुविषयेमिथ्याभिशंसनक्रोधोत्पादनमधिक्षेपोऽसकृन्मत्यालीकनिर्बंधश्च ५ राजगामिपैशून्यम् ६ गुरोर्महाद्वेषः ७ नास्तिक्याद्वेदनिंदा ८ कुशास्त्राध्ययनेनवितंडवादेनचाधीतवेदानांनाशनं ९॥ ॥एतानिब्रह्मवधसमानानि॥ ॥सुरापानसमानितु॥ लशुनविड्वराहच्छत्राकग्रामकुक्कुटपलांडुगृंजनानांमत्यात्यंताभ्यासेनभक्षणम् १ विप्रव्यतिरिक्तमित्रवधः २ गुरुविषयेमिथ्याभिशंसनेनान्यथावादित्वमन्यथाकर्तृत्वंकौटिल्यंवाङ्मनःकर्मणामनार्जवरूपंकौटिल्यंच ३ आत्मोत्कर्षार्थंराजकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाद्वावनृतभाषणम् ४ रजस्वलामुखचुंबनं कूटसाक्ष्यं वेदत्यागवेदनिंदा कर्त्रोरन्नभुक्तिरिति सुरापानसमानानि ॥ स्वर्णस्ते
यसमानितु ॥ विप्रसंबंध्यश्वरत्नमनुष्यस्त्रीधेनुहरणंनिक्षेपहरणम् ॥ चार्वाकसुवर्णमानादितिस्वर्णस्तेयसमम् ॥ गुरुतल्प
समानितु ॥ दुहितृस्नुषाभगिनीषु भागिनेयीषु सगोत्रदुहितृभगिनीषु सकामास्वाचार्यपत्नीतत्तनयाश्वश्रूषु पितृव्यभ्रातृ
मातुलमातामहश्रोत्रियऋत्विगुपाध्यायमित्रशिष्यस्त्रियस्तत्कन्याश्चउदक्यांनिक्षिप्तांप्रव्रजितांव्रतस्थांउत्तमब्राह्मणींस
गोत्रांशरणागतांराजसखींराजपत्नींसापत्नभगिनींस्तनधात्रींसखींचगच्छन् पौत्रींदौहित्रींपतिव्रतांपितृसखीं ॥ मातृभगि-
न्योः सखींपितृमातृष्वसारं कुमारींअंत्यजां म्लेच्छां पुल्कसींचगच्छन् गुरुतल्पगसमः ॥ अनुपातकानितु ॥ तथामातृपितृयो
निसंबद्धासुगामी स्तेननास्तिकनिंदितकर्माभ्यास्यनिंदितकर्मत्यागीपतितात्याज्यपतितत्यागिनः पतिताः पातकसंयोज्य
काश्चेति इत्यनुपातकानि ॥ अतिपातकानितु ॥ मातृगमनंसापत्नमातृगमनंस्वसृस्नुषयोर्गमनमित्यतिपातकानीतिगौडनि
बंधेषु ॥ पापिनःपंचधा ॥ साक्षात्कर्त्रनुग्राहकप्रयोजकानुमंतृनिमित्तकर्तृभेदात् ॥ साक्षात्कर्तुः ॥ पालनादिनोपकारकोनुग्रा
हकः ॥२॥ आज्ञापयिताभ्यर्थयितोपदेष्टाचप्रयोजकः ॥३॥ स्वार्थंपरार्थंवानुमतिकर्तानुमंता ४ अनिमित्तंभर्त्सनताडनध
नहरणादिनाकोपंजनयन् तन्मरणेनिमित्तंभवेत्सनिमित्तकर्ता ५ एषूत्तरोत्तरमल्पदोषत्वंप्रायश्चित्ताल्पत्वंचबोध्यम् पापि ३
नांप्रायश्चित्ताकरणेऽन्यजन्मनिदेहप्राप्तिः ॥ पापिनांप्रायश्चित्तोन्मुखत्वायजन्मांतरभाविनः कर्मविपाकाः कतिचिदुच्यंते अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानतोब्रह्महाश्वसूकरो घ्राणांक्रमेणयोनिमेति ॥ सुरापःखरपुल्कसवेनानां ॥ स्वर्णस्तेयीविड्जातकृमिकीटपतंगत्वंक्रमेण
याति ॥ गुरुतल्पगस्तृणगुल्मलतात्वंक्रमाद्याति ॥ ज्ञानतोब्रह्महाश्वसूकरोष्ट्रखरगोजाविमृगपक्षिचांडालपुल्कसानांयोनि
मेति ॥ सुरापोविट्कृमिकीटपतंगपक्षिहिंस्रत्ववताम् ॥ स्वर्णस्तेयीऊर्णनाभकृकलासतिरश्चांपशुपक्ष्यादीनांचद्योचारिणांच
हिंस्राणांपिशाचानांसहस्रशोयोनिंयातिगुरुतल्पगः तृणगुल्मलतानांक्रव्यादानांक्रूरकर्मणांच ॥ तत्संयोगीचतद्वत् ॥ पर
स्त्रीहारीद्रव्यहारीचनिर्जलारण्येब्रह्मराक्षसः ॥ अनध्यायाध्यायीदुष्प्रतिग्राहीचसृगालः ॥ अन्नरत्नयोः हर्ताअजीर्णव्या
धिरतिदरिद्रोवा ॥ वेदवाकवेदपुस्तकानांचोरोमूकः ॥ पत्रशाकयोर्मयूरः हेमरत्नानांहेमकारीपक्षीअतिदरिद्रोवा ॥ न्यासस्य
अनपत्योधनहीनश्च ॥ सुगंधानांछुच्छुंदरी ॥ धान्यानांमूषकः तिलानांतैलस्यचतैलपायीकीटः ॥ परस्वहृत्नानातिर्यक्
अहुतंहविरश्नन्हरन्वाश्वाअतिदुःखीवा ॥ यानंहरन्उष्ट्रः फलंकपी ॥ जलंजलप्लवःपक्षीमत्स्योवा ॥ क्षीरंकालोबलाकोवा
॥ गृहोपस्करंगृहकारीकीटः ॥ मधुहरंदंशकःकीटः ॥ मांसंगृध्रः ॥ गांगोधासर्पोवा ॥ अग्निंबकः ॥ वस्त्रंकुष्ठीपतंगोवा ॥ रसं-
श्वा ॥ लवणंचीरीउच्चैःस्वरःकीटः तैजसंमंडलीगोब्राह्मणदेवस्वंपांडुरोगी ॥ न्यासंकाणोऽनपत्योवा ॥ शय्यांक्षपणकः
शंखंशुक्तिंवाकपाली ॥ दीपंकौशिकः ॥ स्नेहंक्षयी ॥ पशुंपरप्रेष्यः ॥ यद्धरतितत्तत्प्रकारकःप्राणीतद्विकलोवाभवतिब्राह्म
णीगामीनिर्बीजी ॥ मातरंस्नुषांवागच्छन्वातवृषणः ॥ चांडालींपुल्कसींवाजगरः प्रव्रजितांमरुपिशाचः शूद्रींदीर्घकीटः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सवर्णोदरिद्रः॥ राजस्त्रियंनपुंसकः॥ गांगच्छन्मंडूकः॥ पिशुनोदुर्गंधनासिकः सूचकोदुर्गंधास्यः देवब्राह्मणक्रोशकःखलतिः
॥ गरदाग्निदौउन्मत्तौ॥ गुरुंप्रतिहंतापस्मारीगोघ्नश्चांधः धर्मपत्नींत्यक्त्वाऽन्यत्रप्रवृत्तःशब्दवेधीप्राणी॥ कुंडाशीभगभक्षकः
स्त्रीपण्यजीवीवाषंढः॥ कौमारदारत्यागीदुर्भगःमिष्टैकादशीवानरोवातगुल्मीवाअभक्ष्यभक्षकोगंडमाली॥ क्रूरकर्माराक्ष
समित्रध्रुक्क्षयी॥ मातापित्रोरनृतवाक्स्खलद्गीः॥ कूटसाक्षीउछिन्नजंघाचरणः॥ विवाहविघ्नकर्ताछिन्नोष्ठः॥ विप्रा-
वगोरणेछिन्नहस्तः॥ चतुष्पथेविण्मूत्रोत्सर्गेमूत्रकृच्छ्री॥ कन्यादूषकःषंढः॥ ईर्ष्यालुर्मशकः॥ पित्रादिविवदमानोऽपस्मा
री॥ विद्याविक्रयीपुरुषोमृगः॥ वेदविक्रयीद्वीपी॥ बहुयाजकोजलप्लवः॥ अयाज्ययाजकोवराहः॥ अनिमंत्रितभोजीवाय
सः इतस्ततोभ्रमन्मार्जारः॥ कक्षवनदाहीखद्योतः॥ दारकाचार्योमुखदुर्गंधिः॥ पर्युषिताशीकृमिः॥ अदत्तादायीबलीवर्दः
मत्सरीभ्रमरः॥ अग्न्युत्सादीमंडलकुष्ठी॥ शूद्राचार्यःश्वपाकः॥ वार्धुषिकोंगहीनः॥ अपण्यविक्रयीगृध्रः राजक्रोशकोगर्द-
भः मत्स्यवेधीगर्भवासी॥ आचार्यभार्यागामीभगंदरी॥ भृतकाध्यापकोर्शरोगी॥ तीर्थेमूत्राद्युत्सर्गकरश्श्वेत्यन्यत्रविस्त
रः॥ स्त्रीणामप्येतद्दोषेषुतत्तज्जातीयस्त्रीत्वम् अथकृच्छ्रादिनिर्णयः अथवक्ष्यमाणप्रायश्चित्तव्रतरूपकृच्छ्रादि
निर्णयः॥ दिनंविलंघ्यरात्रौसार्धयामाभ्यंतरेमितभोजनेनक्तव्रतं॥ तदशक्तौगुंजाद्वयपरिमितरूप्यमाषकदानम्॥ तद-
भावेतन्मूल्यम्॥ दिवारात्रमभोजनमुपवासः॥ तदशक्तौरूप्यमाषत्रयदानम् एकविप्रभोजनंवा सहस्रगायत्रीजपोवा॥ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

द्वादशप्राणायामोवा ॥ प्रायश्चित्तेसंकल्पः॥ ॥ अद्येत्यादिअमुकगोत्रोऽमुकशर्माऽमुककर्मजन्यपापक्षयकामोनक्तव्रतंक रिष्ये ॥ तदशक्तौप्रतिनिधिरूपंइमंरौप्यमाषकंचंद्रदैवत्यममुकनामगोत्रायविप्रायाहंसंप्रददइति इदंमूल्यंविष्णुदैवत्यमितिवा संकल्प्यदानंविप्रंचसंपूज्यइद्व्यमालभ्यसंप्रोक्ष्यदद्यात् ॥ प्राजापत्यंतु ॥ त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितम् ॥ त्र्यहंप रंचनाश्नीयात्प्राजापत्यःसउच्यते ॥ सायंद्वाविंशतिर्ग्रासःप्रातःषड्विंशतिस्तथा ॥ अयाचितेचतुर्विंशतिः सायंद्वादशप्रातःपं चदशेतिवा ॥ ग्रासस्तु ॥ कुक्कुटांडप्रमाणोयावान्वासुखंप्रविशेत् अत्रशक्त्याव्यवस्था ॥ उपवासस्तु फलादिहाराद्वाकार्यः ॥ अष्टैतान्यव्रतघ्नानि आपोमूलंफलंपयः ॥ हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधमित्युक्तेः ॥ परंतुपरिमितमेवेतिगौडाः ॥ इ दमपिनेत्यपरे ॥ यद्वाक्रमणैकभक्तनक्तायाचितोपवासाःएवंत्रिरावृत्तिः इदंषडुपवाससमंतं ॥ तदशक्तौपयस्विन्याधेनोर्दानं ॥ तदभावेगोमूल्यं ॥ गोमूल्यंतु ॥ गवामभावेनिष्कंस्यात्तदर्धंपादमेववेति ॥ निष्कंतु ॥ सुवर्णचतुष्टयसमतोलितंरूप्यंनिष्क म् ॥ रूप्यपरिमाणेनिष्कंसुवर्णाश्चत्वारइतियाज्ञवल्क्यात् ॥ धेनुःपंचभिराढ्यानांमध्यानांत्रिपुराणिका ॥ कार्षापणैकमू ल्यापिदरिद्राणांप्रकीर्तितेतिषट्त्रिंशन्मते ॥ पंचभिःपुराणैरितिशेषःपुराणश्च ॥ षोडशमाषपरिछिन्नंरजतम् ॥ कृष्णलस्तु ॥ रक्तिकाख्यगुंजापरिमितःकृष्णलः॥ माषकंतु ॥ नद्वयपरिमितंरूप्यंरूप्यमाषकं ॥ यद्वापणषोडशकंपुराणःपुराणएवकार्षा पणशब्देनकार्षिकशब्देनचोच्यते ॥ पणस्तु ॥ अशीतिरक्तिकापरिमितंताम्रंअशितिर्वराटिकावा ॥ ताम्रपणएवकर्षउच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रौप्यः पुराणो दक्षिणस्थानेपर्णैः पूर्वस्यामिति व्यवस्था ॥ वृषे षट् कार्षापणा देयाः ॥ पंचेति शूलपाणिः ॥ केवलगोमूल्यंतु पुराणत्रयमु
त्तमः पक्षः ॥ द्वात्रिंशत्पणा मध्यमः ॥ एकपुराणोऽधम इति गौडाः ॥ दश कार्षापणा धेनोरश्वे पंच दशैवतु ॥ द्वात्रिंशत्पणिका गावो ह्युष्ट
वानतु हीनता ॥ इतितु प्रायश्चित्तातिरिक्तदक्षिणाप्रसंगे धनवतो बोद्धव्यम् ॥ प्रसंगात्स्वर्णमानव्यवस्थाप्युच्यते ॥ गुंजापरिमित
कृष्णलपंचकं स्वर्णमाषः ॥ षोडशमाषा अक्षरशब्देन सुवर्णशब्देन कर्षशब्देनाबस्तशब्देन चोच्यंते ॥ सुवर्णाश्चत्वारः पलं निष्क
श्च ॥ दशपलानि धरणमिति मनुस्मृतौ ॥ साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥ दीनारेपि च निष्कोस्त्री त्यमरः ॥ राजतः पुरा-
णो धरण इत्युच्यते ॥ दशभिर्धरणैः राजतं शतमानमित्युच्यते ॥ तदेव राजतं पलमप्युच्यत इति ॥ पलशतं तुला ॥ तुलाविंशतिकं
भारः ॥ आचितो दशभारः ॥ स एव शाकट इत्युच्यते ॥ धेनुमूल्यसममूल्यं भूधनधान्यवस्त्रस्वर्णरूप्यादि वा दद्यात् ॥ गायत्र्य
युतजपो वा कृच्छ्रस्थाने प्रत्याम्नायः ॥ गायत्र्या द्वादशाधिकसहस्रसंख्याकः ॥ समिद्घृतहविर्धान्यानामन्यतमस्य होमो वा ॥
तिलहोमस्तु सहस्र एवेति केचित् ॥ घृताहुतिशतद्वयं वा ॥ वेदसंहितापारायणं वा ॥ प्राणायामशतद्वयं वा ॥ द्वादशविप्रभोज
नं वा ॥ एकोपवासपूर्वकं द्वादशतिलपात्रदानं वा ॥ तीर्थोद्देशेन योजनगमनं वा ॥ रुद्रैकादशिनी वा ॥ शिरः शोषणपूर्वकं द्वाद
श सांगस्नानानि वा प्राजापत्यमेव कृच्छ्रः ॥ पादोनकृच्छ्रं तु ॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ॥ त्र्यहमुपवास इति ॥ ५
अत्र चतुः पणाधिककार्षापणद्वयमशक्तौ देयम् ॥ एकभक्तायाचितोपवासपादै रेतदिति स्मृत्यर्थसारे ॥ कृच्छ्रार्धं तु ॥ सायंप्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्तथैवैकं दिनद्वयमयाचितम् ॥ त्र्यहंसुपवासः ॥ अयाचितोपवासपादाभ्यामितिस्मृत्यर्थसारे ॥ इदं सार्द्धकार्षापणसममिति
गौडाः ॥ पादकृच्छ्रंतु ॥ एकैकदिनक्रमेणदिनचतुष्टयं ॥ इदंद्वादशपणसमम् इदमेवशिशुकृच्छ्रंविप्रादिवर्णक्रमेणोपवासत्र
यायाचितत्रयंमक्तत्रयैकभक्तत्रयरूपाः पादकृच्छ्रा इत्यापस्तंबः ॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनैः ॥ अत्रयेषुन-
क्तादिदिनेषु भोजनंतेषु पाणिपूरान्नता ॥ नवाहमेकैकग्रासोंत्यत्रिदिनसुपवासोतिकृच्छ्र इतिमनुः ॥ अत्रप्राजापत्यत्रयमिति
चतुर्विंशतिमते ॥ कृच्छ्रातिकृच्छ्रः पयसादिवसानेकविंशतिः ॥ पयोत्रजलं ॥ तच्चसायंप्रातर्मध्यान्हेषुपेयम् ॥ द्विगुणोतिकृ
च्छ्र एवकृच्छ्रातिकृच्छ्र इतियमः तेनायंषट्प्राजापत्यसमः ॥ तप्तकृच्छ्रंतु ॥ तप्तकृच्छ्रं चरन्विप्रोजलक्षीरघृतानिलान् प्र
तित्र्यहंपिबेदुष्णान् सकृत्स्नायीसमाहितः उष्णोदकान्निर्गतस्यबाष्पस्यपानमुष्णानलपानम् ॥ एतच्चगात्रपूरणमात्रपर्यंतं
॥ उष्णादंगाद्वारा ॥ तत्रषट्पलमंबु ॥ त्रिपलंक्षीरम् ॥ एकपलंघृतम् ॥ एषएवशीतैः शीतकृच्छ्रः अत्रधेनुत्रयमितिषट्त्रिंशन्म
ते ॥ अतिकृच्छ्रतप्तकृच्छ्रयोर्धेनुद्वयमित्यपरार्कभवदेवौ ॥ धेनुचतुष्टयमितिशूलपाणिः तप्तक्षीरघृतांबूनामेकैकंप्रत्यहंपिबे-
त् ॥ एकरात्रोपवासश्चतप्तकृच्छ्रसुदाहृतमिति अपरस्तप्तकृच्छ्रः अत्रैकाधेनुः ॥ पर्णकृच्छ्रंतु ॥ पर्णोदुंबरराजीवबिल्वपत्रकुशो
दकैः ॥ प्रत्येकंप्रत्यहंपीतैः पर्णकृच्छ्र उदाहृतः ॥ एषांपक्वोदकैरित्यर्थः ॥ पर्णः पलाशः राजीवंपद्मम् ॥ अयंपंचाहसाध्यः ॥ सा-
र्द्धोपवासद्वयतुल्यः त्रिरात्रोपवासांते पलाशादिपंचकक्वाथोदकपानेपरः पर्णकृच्छ्रः चतुर्दश्यासुपोष्यपरेद्युः पूर्णिमायांपंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गव्यपानेन ब्रह्मकूर्चः ॥ पंचगव्यप्रमाणंतु ॥ तत्र गोमूत्रं कृष्णवर्णायाः ॥ श्वेतायाश्चैव गोमयं ॥ पयश्च ताम्रवर्णाया रक्तायागृह्य
ते दधि ॥ कपिलाया घृतंग्राह्यं सर्वं कापिलमेववा ॥ मूत्रमेकपलं दद्यादंगुष्ठार्धंतु गोमयम् ॥ क्षीरं सप्तपलं दद्यात् दधित्रिपलमु-
च्यते ॥ घृतमेकपलं दद्यात् पलमेकं कुशोदकम् ॥ एतच्च गायत्र्या गोमूत्रमित्यादिसमंत्रकं कार्यम् ॥ पंचगव्यपानंच भोजनस्था
ने ॥ अत्राधीधेनुः ॥ अत्र होमोप्यस्ति ॥ पंचगव्यहोमश्च सप्तपत्रैरच्छिन्नाग्रैः कुशैरिरावती इदंविष्णुर्मानस्तोकेवंशती इतिऋ
ग्भिः कार्यः ॥ हुतशेषंप्रणवेनालोड्य प्रणवेन गृहीत्वा मध्यमपलाशपत्रेण स्वर्णपात्रेण ताम्रपात्रेण वा ब्रह्मतीर्थेन पिबेत् ॥ ए
षद्विरात्रः सांतपनकृच्छ्र इति स्मृत्यर्थसारे ॥ पराकस्तु द्वादशरात्रोपवासः ॥ अत्र पंचधेनव इति शूलपाणिः हुइत्यपरार्कभवदे
वौ ॥ तिस्र इति षट्त्रिंशन्मतम् ॥ सौम्यकृच्छ्रस्तु ॥ पिण्याकाचामतक्रांबुसक्तूनां प्रतिवासरं ॥ एकरात्रोपवासश्च सौम्य
कृच्छ्रोयमुच्यते ॥ पिण्याकं तिलपिंडः ॥ आचामं ओदनस्रावः ॥ तक्रं जलं सक्तवश्च क्रमेण पंचदिनेषु षष्ठेहन्युपवासः ॥ अत्रैकाधेनुरि
ति केचित् ॥ अर्धोचिता ॥ पिण्याकं सक्तवस्तक्रं चतुर्थेहन्यभोजनम् ॥ वासोवै दक्षिणां दद्यादित्यपरः सौम्यः कृच्छ्रः अत्रोभयत्र प्राण
यात्रामात्रनिर्वाहक्षमं पिण्याकादि ग्राह्यम् ॥ पिण्याकादीनां पंचानां प्रत्येकं त्रिरात्रोपयोगाभ्यासे पंचदशदिनस्तुलापुरुषः ॥ पि
ण्याकादि पंचानां एकैकदिनोपयोगोत्तरं त्रिरात्रमुपवासेऽष्टदिनसाध्यस्तुलापुरुषः ॥ एषां पंचानामेकैकस्य त्र्यहभोजने त्र्यहं हूयंवा
युभक्षणे चैकविंशतिरात्रसाध्यः सः ॥ वारुणकृच्छ्रस्तु ॥ मासं परिमितसक्तूदकपाने वारुणकृच्छ्रः श्रीकृच्छ्रस्तु त्र्यहं पिबेत्तु गोमू ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्र्यहं त्र्यहं वै गोमयं पिबेत् ॥ त्र्यहं यावकमेषः श्रीकृच्छ्रः॥ यावककृच्छ्रः॥ यवानामप्सु साधितानां सप्तरात्रं पक्षं मासं वा प्राशने यावक
कृच्छ्रः॥ जलकृच्छ्रस्तु॥ अनशनो जलस्थो होरात्रं क्षिपेदेष जलकृच्छ्रः॥ उदकसक्तूनां मासाभ्यवहारेण परः॥ बिल्वैर्वा फलकैर्वा
पिपद्माक्षैरथवा शुभैः॥ मासाशनेन श्रीकृच्छ्रः कथ्यते च द्विजोत्तमैः॥ वज्रकृच्छ्रस्तु॥ गोमूत्रयावकपाने एको वज्राख्यः कृच्छ्रः॥
॥ इति कृच्छ्रनिर्णयः॥ ॥ अथ सांतपनानि॥ ॥ पूर्वेद्युः पंचगव्यमात्राशनं परेद्युरुपवास इति द्वैरात्रिकं सांतपनं ॥ एतद्-
शक्तावेकः पुराणः॥ यतिसांतपनं तु। पंचगव्यं त्र्यहाभ्यस्तं यतिसांतपनं स्मृतम् ॥ अत्र चतुर्थ उपवासः॥ अत्रापि होमः॥ पंचगव्यो
पवासाः पंच षष्ठ उपवास इति षडहाः सांतपनं ॥ महासांतपनस्तु॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकानि क्रमेणैकैकमत्य
हं पीत्वा एकरात्रोपवासे सप्ताहसाध्यो महासांतपनः॥ अत्र धेनुद्वयं ॥ इतरेषु प्राशुक्तसांतपनेषु सार्द्धं गौरिति षट्त्रिंशन्मते॥ प्र
थम उपवासस्ततः॥ क्रमेण तेषां षण्णां पानमिति प्राचः॥ गोमूत्रगोमयक्षीरदधिसर्पिषां क्रमेणैकैकस्य त्र्यहं त्र्यहमुपयोगे पंच
दशाह्निकं नत् ॥ षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् ॥ त्र्यहं चोपवसेदंत्यमित्येकविंशतिरात्रसाध्यमेतत् ॥ एतान्येव तु पेया
नि एकैकं तु द्व्यहं द्व्यहं ॥ अतिसांतपनं त्वेनत् ॥ इति द्वादशरात्रसाध्यम् ॥ इति सांतपनानि॥ ॥ अथ चांद्रायणानि॥ ॥
पिपीलिकामध्य चांद्रायणं तु ॥ एकैकं ह्रासयेत् पिंडं कृष्णे शुक्ले च वर्धयेत् ॥ उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं स्मृतम् ॥ कृष्णप्र
तिपद्यस्यारंभः॥ कृष्णप्रतिपदि चतुर्दश ग्रासान् ग्रसित्वा तत एकैकं ह्रसित्वा चतुर्दश्यामेकं ग्रसित्वाऽमायामुपोष्य पुनः शुक्लप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिपदमारभ्यपूर्णिमांतंयावद्वर्धयेत् ॥ ग्रासश्चमयूरांडप्रमाणः॥ आर्द्रामलकप्रमाणोवा॥ ॥इतिपिपीलिकामध्यम्॥ ॥यव
मध्यचांद्रायणंतु एवमेवविधिंकृत्स्नमाचरेद्यवमध्यके॥ कृष्णपक्षादिनियतंचरेच्चांद्रायणव्रतम्॥ अत्रशुक्लप्रतिपदादिग्रासवृद्धिः॥ पू
र्णिमांतंततोह्रासोमांतः॥ अनयोरष्टधेनवः॥ वृषभसहिताचात्र गौर्दक्षिणा॥ सार्द्धसप्तधेनव इतिशूलपाणिः॥ इदमतिधनिनः॥
निर्धनस्यतुप्राजापत्यत्रयमित्येके॥ अत्रैकादश्यादिव्रतलोपोनदोषावहः॥ यतिचांद्रायणंतु॥ अष्टावष्टौसमश्नीयात्पिंडान्मध्यंदि
नेस्थितः॥ नियतात्माहविष्याशीयतिचांद्रायणंस्मृतं॥ मासमितिशेषः एतत्प्राजापत्यचतुष्टयसममितिबृहद्विष्णुः॥ शिशुचांद्रा
यणंतु॥ चतुरःप्रातरश्नीयात्पिंडान्विप्रःसमाहितः॥ चतुरोस्तमितेसूर्येशिशुचांद्रायणंस्मृतम्॥ ऋषिचांद्रायणंतु॥ त्रींस्त्रीन्पिंडा
न्समश्नीयान्नियतात्माद्दढव्रतः॥ हविष्यान्नस्यवैमासमृषिचांद्रायणंस्मृतम्॥ अनुपदोक्ताभ्यांकिंचिदधिकद्विगुणमेतत्॥ अ
नुपदोक्तयोश्चतुष्टयधेनुदानमितिशूलपाणिः॥ यत्तुऋषिचांद्रायणेपितावदेवेत्युक्तम्॥ यच्चान्यैर्धेनुत्रयमित्युक्तंतत्रोपपत्तिश्चिंत्या
॥ ॥सोमायनव्रतंतु॥ ॥ गोक्षीरंसप्तरात्रंतुपिबेत्स्तनचतुष्टयात्॥ स्तनत्रयात्सप्तरात्रंसप्तरात्रंस्तनद्वयात्॥ स्तनात्तथैवष
ड्रात्रंत्रिरात्रंवायुभुक्भवेत्॥ एतत्सोमायनंनामव्रतंकल्मषनाशनम्॥ प्रतिदिनसंख्यानियमानादरेणमासत्रयम्॥ चत्वारिंश
दधिकशतद्वयग्रासानांपंचविंशत्यधिकशतद्वयग्रासानांवाशनेपिचांद्रायणम्॥ आद्यद्वयातिरिक्तचांद्रायणानांदिनांतरेप्यारंभो ७
नप्रतिपद्येवेतिनियमः॥ ॥इतिचांद्रायणानि॥ ॥पंचगव्यपरिमाणंतु गोशकृद्द्विगुणंमूत्रंघृतंविद्याच्चतुर्गुणम्॥ क्षीरमष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणंप्रोक्तंपंचगव्येनथादधीति॥ ॥तथाष्टगुणमितिप्रांचः॥ ॥गोमूत्रमाषकाण्यष्टौगोमयस्यतुषोडश॥ क्षीरस्यद्वाद
शप्रोक्तादध्नःपंचदशेतिच॥ ॥मूत्रवत्घृतस्य॥ ॥कुशोदकसाहित्यंचात्रेत्यन्ये॥ ॥दधिनिदशमाषाः॥ ॥कुशोदकेन
दर्धतेतिस्मृत्यर्थसारे॥ ताम्रवर्णायागोमूत्रं॥ श्वेतायागोमयम्॥ पीतायाःक्षीरम्॥ नीलायाःदधि॥ कृष्णायाःसर्पिरितिच॥ तच्चप्रण
वेनाहृत्यतेनैवालोड्यतेनैवादायतेनैवपिबेदित्युक्तम्॥ वक्ष्यमाणप्रायश्चित्तेषुसामान्यतोव्रतशब्दोगोमूत्रयावकाहारपरः॥ दिन
रात्रिशब्दौतत्तद्वचनावेव॥ उपवासाभिव्याहारेत्वहोरात्रवचनौ॥ अहःशब्दश्चाहोरात्रपरइतिक्वचिदर्थेव्यवस्थोक्ता॥ ॥मासो
पवासेपंचदशप्राजापत्यानि॥ तथाकृच्छ्राब्दत्रिंशद्देनुसमम्॥ गोमूत्रपाचितयावकस्यमासंपानेद्वादशप्राजापत्यानि॥ पाकोत्त
रमीषद्गोमूत्रयुक्तपानेकृच्छ्रद्वयम्॥ त्रिंशन्नक्तैर्दशोपवासास्तत्रकृच्छ्रचतुष्टयम्॥ उपवासस्थानेएकोविप्रोभोज्यः॥ शक्तेनद्वौ
सहस्रगायत्रीजपोवा॥ द्वादशप्राणायामावा॥ द्वादशवार्षिकादिषुद्वादशदिनैरेकैकप्राजापत्यकल्पना॥ अतएवचतुर्विंशतिम
ते॥ कृत्वार्वाक्ब्रह्महत्यायाःषडब्दंकृच्छ्रमाचरेत्॥ प्रत्याम्नायोगवांदेयःसाशीतिर्धेनिनांशतम्॥ तथाष्टादशलक्षाणांगायत्री-
वाजपेडुधइति॥ गायत्र्यास्तुजपेत्कोटिंब्रह्महत्याव्यपोहतीति॥ द्वादशाब्दसमकक्षंनप्रत्याम्नायइतिबोध्यम्॥ त्रैमासिकेसार्द्धस
सप्राजापत्यानि॥ मासिकेव्रतेसार्द्धप्राजापत्यद्वयम्॥ मासंपंचगव्यपानेप्येवं॥ षडुपवासेप्येकंप्राजापत्यम्॥ मासंत्वयाव्रतसार्द्ध
प्राजापत्यद्वयम्॥ वृषभैकादशदशगोदानसहितत्रिरात्रोपवासात्मकगोवधव्रतेसार्द्धैकादशत्रैमासिकगोवधव्रतेसार्द्धसप्तेतिस्मृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यर्थसारे ॥ योगीश्वरोक्तमासिकव्रतेत्रीणि तत्सममेकं चांद्रायणं चेति मिताक्षरा ॥ यत्तु ब्रह्मवधोक्तद्वादशवार्षिकेऽशीत्कनरशतधे
नवस्तावंति प्राजापत्यानि वेति प्रांचस्तत्प्रागुक्तचतुर्विंशतिमतविरुद्धमित्येके ॥ ॥अथ कृच्छ्रस्थाने तीर्थप्रत्याम्नाया उच्यंते ॥
भागीरथ्यां स्नानं षष्टियोजनागतस्य षडब्दकृच्छ्रसमम् ॥ अत्र यात्रायोजनवृद्धौ योजनस्यार्द्धकृच्छ्रः वृद्धिः एकयोजनागतस्य मध्ये
पर्वतादिव्यवधाने कृच्छ्रत्रयम् ॥ तृतीयांशाधिकक्रोशादागतस्य भागीरथ्यां विध्युक्तस्नाने एकः कृच्छ्रः ॥ प्रयागे द्विगुणं गंगाद्वारे गं
गासागरसंगमे चैवं ॥ वाराणस्यामगणितं ॥ वाराणस्यां पातकं न प्रविशति ॥ सर्वत्र यात्रा भाषाभेदवृत्त देशांतरविषये महापर्वत
व्यवधाने महाव्यवधाने च क्रमेण द्वादशाष्ट चतुर्योजनन्यूना षट् चतुर्द्वियोजनन्यूना वा ॥ विंशतियोजनागतस्य यमुनासरस्वत्योः
स्नानमब्दसमम् ॥ अब्दद्वयसममित्यन्ये ॥ मथुराद्वारवत्योर्द्विगुणम् ॥ प्रभासेप्येवम् ॥ दृषद्वतीशतद्रुविपाशावितस्ताशराव
तीमरुद्वृधासिक्नीमधुमतीपयस्विन्यादिषु देवनदीषु स्नानं त्रिंशद्योजनागतस्याब्दसमम् । पंचदशयोजनागतस्येत्यन्ये ॥ चंद्र
भागावेत्रवतीसरयूगोमतीदेविकाकौशिकीमंदाकिनीपुनःपुनापूर्णापुण्याबाहुदावारुणीगंडक्यादिदेवनदीषु द्वादशयोजनाग
तस्य षोडश कृच्छ्राणि एतासां परस्परसंगमे द्विगुणं त्रिगुणमित्यन्ये अन्यासु समुद्रगासु नदीषु द्वादशयोजनागतस्य षट्कृ-
च्छ्रसमं महानदेषु नद्यर्धं शोणनदे गंगार्द्धसमं पुष्करे प्रयागसमं सान्निहत्यां नर्मदायां चतुर्विंशतियोजनागतस्य चतुर्विंशतिकृ
च्छ्रसमं ॥ कुब्जिकासंगमे द्विगुणं ॥ शुक्लतीर्थे चतुर्गुणम् ॥ गोदावर्यां षष्टियोजनागतस्य त्र्यब्दसमं ॥ वंजराप्रणीतयोर्नर्मदा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वत् ॥ पूर्णायांयोजनार्द्धेकृच्छ्रः॥ कृष्णवेणीतुंगभद्रयोः प्रतियोजनं कृच्छ्रं ॥ पंपायांद्विगुणंहरिहरेत्रिगुणं॥ कुल्याःस्नानेनत्रिरात्रो
पवासफलदाः॥ अल्पनद्यः कृच्छ्रफलदाः॥ नद्योद्विकृच्छ्रफलदाः॥ उक्तान्यसर्वतीर्थेषुरामक्षेत्रश्रीरंगादिक्षेत्रेषुयोजनसंख्यया
कृच्छ्रसंख्या ॥ एकयोजनादिषट्योजनगांताः स्रवंतः कुल्याः॥ द्वादशयोजनगा अल्पनद्यः चतुर्विंशतियोजनगानद्यः॥ तदधि
कगामहानद्यः समुद्रगाश्च ॥ उपवाससहितंनदीस्नानंकृच्छ्रसमंयोजनादर्वागपि ॥ शुनीगर्दभीचांडालीशूद्रीकष्टगानद्यः पापन
द्यश्चवर्ज्याः॥ सर्वत्रसमुद्रस्नानंदर्शेकार्यम् ॥ देवतासमीपेसरः सरिन्नदीसंगमेषुचसदाकार्यम्॥ समुद्रस्नानेपंचदशयोजनाग
तस्यपंचदशकृच्छ्राणिइत्यादिस्मृत्यर्थसारेविस्तरः॥ परार्थेगंतातीर्थषोडशांशंलभेत ॥ प्रसंगेनगंतार्द्धफलं॥ अनुषंगेणतीर्थप्रा
प्यस्नानेस्नानफलमेवयात्राफलं॥ पितामहभ्रातृमातामहपितृव्यमातुलश्वशुरपोषकार्थेगुर्वाचार्योपाध्यायार्थेतेषांपत्न्य
र्थेपितृष्वसृमातृष्वस्रर्थेचस्नात्वास्वयमष्टमांशंलभते ॥ पित्रोरर्थेकुर्वन्पुत्रश्चतुर्थांशं ॥ दंपतीचसपत्न्यश्चलभंतेऽर्द्धंमिथः
फलम् ॥ अर्थिनांचनफलह्रासः॥ कर्कादौमासद्वयेनिरंतरंरजस्वलानद्यः॥ तास्वपिगोमतीचंद्रभागासिंधुर्नर्मदाशरयूश्च
त्रिरात्रम् ॥ वापीकूपतडागादिषुस्थितपुराणोदकेषुत्रिरात्रम् ॥ सरस्वतीगंगायमुनादयोनकदापिरजस्वलाः॥ अथव्रतांग
भूताधर्मायमानियमाश्च ॥ ब्रह्मचर्यंदिवाक्षांतिर्दानंसत्यमकौटिल्यमस्तेयमहिंसामाधुर्यंदमश्चेतिदशयमाः॥ स्नानंमौ
नोपवासेज्यास्वाध्यायोपस्थनिग्रहगुरुशुश्रूषाशौचाक्रोधाप्रमादताइतिनियमादश॥ ॥ अथप्रायश्चित्तपूर्वाह्णकृत्य

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ केशनखादिवपनं कृत्वा स्नात्वा घृतं प्राश्य प्रदोषे गृहाद्बहिर्गतकालसंख्योल्लेखपूर्वकं संकल्पः कार्यः वपनं च महापातकगोवधा
तिरिक्ते विद्वद्द्विजनृपयोः सधवस्त्रीणां नास्ति ॥ तत्र सधवानां सर्वान्केशान्समुद्धृत्य द्व्यंगुलछेदनमेव तत् ॥ तीर्थेष्वप्यासामेवमेव
॥ ॥विधवानां सर्ववपनम् ॥ ॥ केशधारणेछायां द्विगुणितं कार्यम् ॥ तत्र दक्षिणापि द्विगुणा ॥ वपनं च दिनत्रयसाध्यव्रतं न-
खरोमछेदनमात्रं ॥ षड्दिनसाध्ये श्मश्रुणोपि ॥ नवदिनसाध्ये शिखावर्ज्यम् ॥ तदूर्ध्वं सशिखं ॥ त्रिषड्दिनयोः स्त्रीणां नैव त
त् ॥ धेनुदानादावप्येवं विशेष ऊह्यः ॥ अस्य नैमित्तिकत्वात्सदा बद्धशिखेनेत्यनेनाविरोधः ॥ ॥ प्रायश्चित्ते तिथयः ॥ ॥ प्रा
यश्चित्तं चाष्टमीचतुर्दश्योर्न कार्यम् ॥ चतुर्दश्यां संकल्प्यामायां कार्यमिति शिष्टाः ॥ तत्र पापं द्विविधम् ॥ रहस्यं प्रकाश्यं च ॥
कर्तृव्यतिरिक्तैरज्ञातदोषं रहस्यं ॥ तत्र रहस्ये प्रायश्चित्तम् ॥ प्रकीर्णकादिषु पंचविंशतिः प्राणायामाः ॥ उपपातके शतं ॥ अ
नुपातके द्विशतम् ॥ अतिपातके त्रिशतम् ॥ महापातके चतुःशतम् ॥ सर्वत्राभ्यासे द्विगुणम् ॥ मत्या त्रिगुणम् ॥ मत्याभ्यासे
चतुर्गुणम् ॥ यद्वा गायत्र्या लक्षजपो महापापे ॥ पादोनलक्षजपो अतिपातके ॥ अर्धलक्षमनुपातके ॥ पादलक्षमुपपातके ॥
तदर्धं प्रकीर्णकादिषु ॥ अत्राप्यभ्यासादौ द्वैगुण्यादि योज्यम् ॥ अन्यान्यपि महापातकादिषु रहस्यप्रायश्चित्तानि विस्तरे
ण निबंधेभ्यो ग्राह्याणि ॥ अविद्वान्मुखं नरेण व्याजात् प्रायश्चित्तं ज्ञात्वा रहसि चरेत् ॥ विद्वांस्तु स्वयमेव ज्ञात्वा चरेत् ॥ दश
लक्षगायत्रीजपः सर्वपापप्रायश्चित्तं ॥ सर्वेषामेव पापानां संकरे समुपस्थिते ॥ शतं सहस्रशोभ्यस्ता गायत्री पावनं महदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरणात् ॥ भस्माछन्नोभस्मशयानोरुद्रजापीसर्वपापान्मुच्यते ॥ सच्चैकादशवारं ॥ सर्वशब्देनमहापातकातिरिक्तंग्राह्यमि
तिकेचित् ॥ महापापान्यपीत्यपरे ॥ पुरुषसूक्तंप्रत्यहंषोडशकृत्वोजपन्मासेनगुरुतल्पादेरपिशुद्ध्येत् ॥ एवंपवमानजपाघम
र्षणसूक्तजपादयोऽन्यतोज्ञेयाः ॥ अत्राहारविशेषाउक्तौपयःप्रभृतयः शिलोच्चयादयोमाघादयश्चदेशकालौ ॥ अतिरिक्तेषु
व्याहृतिभिराचमनं ॥ एवंख्यापनानुतापाध्ययनान्यपिपापनाशकानि ॥ ख्यापनंसभासुपुण्यस्थानेषुचस्वपापकथनपूर्वक
मात्मनिंदनं ॥ अध्ययनंवेदवेदांतादेश्च ॥ उपदिष्टप्रायश्चित्तेष्वेतदंगं ॥ नस्वतंत्रं ॥ अन्यथानहिद्विरफलःस्यात् कृतेपापेऽनुता
पोवैयस्यपुंसःप्रजायते ॥ प्रायश्चित्तंतुतस्यैकंहरिसंस्मरणंपरम् ॥ प्रातर्निशितथासंध्यामध्यान्हादिषुसंस्मरन् ॥ नारायण
मवाप्नोतिसद्यःपापक्षयेनरइतिविष्णुपुराणे ॥ अत्रकेचित् अनेनसर्वविधसर्वपापप्रणाशोभवत्येव ॥ इहव्यवहार्यतातु
अतिप्रसंगनिवारणायमन्वादिप्रायश्चित्तैरेव ॥ रागद्वेषादिकलुषितहृदयतयातत्राविश्वासवतोजनान्प्रतिसंव्यवहार्यता
सिद्धयेवातदुपदेशइतिप्राहुः गंगास्नानंचसर्वविधसर्वपापप्रणाशकम् ॥ चांद्रायणसहस्रंतुयश्चरेत् कायशोधनम् ॥ पिबे
द्यश्चापिगंगांभःसमौस्यातांनवासमौ ॥ भवंतिनिर्विषाःसर्पायथातार्क्ष्यस्यदर्शनात् ॥ गंगायादर्शनात्तद्वत्सर्वपापैःप्रमु-
च्यते ॥ इत्यादिमहाभारतादिवचनेभ्यः नचैतान्यर्थवादाः ॥ स्नानमात्रेणगंगायांपापंब्रह्मवधोद्भवं ॥ दुराधर्षंकथंयाति
चिंतयेद्योवदेदपि ॥ तस्याहंप्रददेपापंब्रह्मकोटिवधोद्भवम् ॥ स्तुतिवादमिमंमत्वाकुंभीपाकेषुजायते ॥ आकल्पंनरकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुक्त्वा ततो जायेत गर्दभ इति ॥ भविष्यकौर्म्यादिभ्यः ॥ पापानां पापहंत्रीत्वं स्वर्गमोक्षैकहेतुता ॥ स्वभाव एव गंगायाः शैत्यं
शीतरुचेर्यथा ॥ न गंगासदृशं तीर्थं न देवः केशवात्परः ॥ ब्राह्मणेभ्यः परं नास्तीत्येवमाह पितामहः ॥ सर्वं कृतयुगे तीर्थं त्रेता
यां पुष्करं स्मृतम् ॥ द्वापरे तु कुरुक्षेत्रं कलौ गंगैव केवलम् ॥ गंगा कलियुगे स्मृतेति पाठांतरे ॥ येनाकार्यशतं कृत्वा कृतं गंगे
वसेवनं ॥ तत्सर्वं तस्य गंगांभो दहत्यग्निरिवेंधनमित्यादिवचनान्यनुसंधेयानि ॥ कलियुगे इत्थं पापनाशसामर्थ्यं गंगाया ए
व ॥ न तु पुष्करादीनां ॥ त्रेतादौ तु पापस्याल्पत्वात्तन्नाशसामर्थ्यं तेषामपीति सर्वं कृतयुग इत्यस्य तात्पर्यम् ॥ ॥ अथ
सर्वप्रायश्चित्तविधिः ॥ ॥ तत्र महापातकादर्वाचीनेषु बहुविधेष्वज्ञानकृतेषु प्रतिनिमित्तं कर्तुं अशक्तौ सर्वप्रायश्चित्तं
षडब्दं अत्यंतगुणवतो विरक्तस्य ॥ अभ्यासे द्विगुणम् ॥ मत्या त्रिगुणम् ॥ मत्याभ्यासे चतुर्गुणम् ॥ अत्यंताभ्यासे निरंत-
राभ्यासे वा पंचगुणं ॥ बहुकालाभ्यासे षड्गुणम् ॥ उपपातकमारभ्यार्वाचीनेषु पापेष्वज्ञानकृतेषु प्रतिनिमित्तं कर्तुमश
क्तौ त्र्यब्दं प्रायश्चित्तं ॥ अभ्यासादौ प्राग्वत् ॥ प्रकीर्णकेषु तादृशेषु तादृशस्य एकाब्दं ॥ अभ्यासादौ प्राग्वत् ॥ क्षुद्रपापेषु
तादृशेषु तादृशस्य कृच्छ्रातिकृच्छ्रचांद्रायणानि ॥ तत्स्थाने द्वादशकायानि वा ॥ अभ्यासादौ प्राग्वत् चतुष्टयमिदं चोत्त
मस्य मध्यमस्य द्विगुणं ॥ अधमस्य त्रिगुणम् ॥ द्वादशाब्दं द्विगुणं ॥ महापातकावधि सकलपापप्रायश्चित्तमिति ॥ सर्व १०
प्रानुक्तनिष्कृतौ कृच्छ्रचांद्रायणानि समस्तव्यस्तरूपेण योग्यतया योज्यानि ॥ क्षुद्रेषु पापेषु उपवासत्रिरात्रप्राजापत्यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योग्यतया ॥ अतिक्षुद्रेषु द्वादशषड्विंशद्वा प्राणायामाः ॥ स्त्रीशूद्राणाममंत्रकास्ते ॥ पुरुषाकारहंतकाराग्नदानानिवा ॥ मौन
लोपेषु विष्णुस्मरणं अथ प्रकाशरूपेषूद्देशक्रमेण प्रकीर्णप्रायश्चित्तान्युच्यंते ॥ खरेणोष्ट्रेणवा युक्तं यानमारुह्याध्वगंतानग्न-
स्नापीनग्नं तयान्नभोक्तादिवास्वदारगामी च सचैलस्नानपूर्वकं प्राणायामेन शुध्येत् ॥ अमत्या स्नानमात्रं ॥ अभ्यासे प्रायाथा
मचतुष्टयं ॥ चतुरधिकाभ्यासे एकउपवासः ॥ अत्यंताभ्यासे त्रिरात्रं ॥ साक्षान्नरवरोष्ट्रारोहिणां द्विगुणं ॥ गुरुं त्वंकृत्य हीनपु
रुषं प्रयोज्य हुंकारपूर्वकं छलवादैर्विप्रं निर्जित्य वस्त्रेणापि वा विप्रस्य कंठबंधने तृणेनापि वा तस्य ताडने गुर्वादिकं शीघ्रं नत्वा
विगतकोपं कृत्वा नक्तं भुंजीत उपवसेदिति स्मृत्यर्थसारे ॥ अभ्यासे त्रिरात्रम् ॥ गुरुदेवर्षिप्राच्यार्यमातापितृनरेंद्राणां प्रतिष्ठी
वने प्रतिवादे आक्रोशने तिक्रमे पैशून्ये च जिव्हां दहेद्धिरण्यं दद्यात् ॥ अभ्यासे सहस्त्रगायत्रीजपः ॥ अमत्या तु प्राजापत्यं कृत्वा
स्नात्वा गुरुप्रसादनात्पूतो भवति शूद्रस्य विप्रातिक्रमादौ सप्तरात्रमभोजनं ॥ क्षत्रियातिक्रमे एकउपवासः ॥ विप्रं हंतुं दंडोद्यम
ने कृच्छ्रः ॥ इदमेवावगुरणं ॥ दंडनिपातनेतिकृच्छ्रः ॥ रक्तस्रवणे कृच्छ्रातिकृच्छ्रः ॥ अभ्यंतररक्तेत्वक्‌भेदे वा कृच्छ्रः ॥ अस्थि
भेदनेतिकृच्छ्रः ॥ अंगकर्त्तने पराकः ॥ केचित्तु दंडोद्यमननिपातनरुधिरस्रावेतु अर्धकृच्छ्रकृच्छ्रातिकृच्छ्राणि ॥ अन्ये पादकृ
च्छ्रार्धकृच्छ्रकृच्छ्राण्याहुस्तेषां कामाकामभेदेन व्यवस्था ॥ अंगछेदने दशगोदानं ॥ कामतो द्विगुणम् ॥ अत्र यद्यपि शोणि-
तनिपातनयोः क्रमेण निपातनावगुरणे आवश्यके तथापि तन्निमित्ते प्रायश्चित्ते पृथक् भवतः ॥ तयोरवश्यंभावित्वेन न दंड्यं

CC-0. In Public Domain. Digitization by eGangotri

तरवर्त्तित्वात् । यत्र पुनर्निर्मिन्नानां नांतर्भावनियमस्तत्र पृथक् भवत्येव ॥ यथा पर्वणि परभार्यां रजस्वलां तैलाभ्यक्तो दिवा गच्छति
जले इति ॥ विप्रस्य पादप्रहारे उपोष्य स्नात्वा प्रणिपत्य प्रसादनं ॥ पादेन स्पर्शे तु प्रसादनमेव ॥ अप्सु वाग्नौ च आर्त्तस्य विण्मूत्रो-
त्सर्गे सचैलस्नानपूर्वकं गोस्पर्शः मत्या तूपोष्य सचैलं स्नायात् कामतोभ्यासे उपवासत्रयं इदमापः प्रवहतेत्यस्य गायत्र्या वाज-
पश्च अतापदि त्रिषवणस्नानं त्रि रघमर्षणं च बोध्यं अनार्त्तस्य अत्यंताभ्यासे वा तप्तकृच्छ्रं ॥ उदकं विना मूत्राद्युत्सर्गेप्येवमेव स-
र्वं इदं सुराप्रसुरोपोन्सर्गोक्तधर्मशास्त्रोपलक्षणं ॥ निर्जलारण्यादौ तु अपो हस्तेपि शौचं सचैलं स्नातं कुर्यात् ॥ मूत्रादिवेगधारणे-
ऽष्टोत्तरशतजपः श्रौत स्मार्तकर्मलोपे तूपवासः इदं चानुक्तप्रायश्चित्तविशेषश्रुतिस्मृत्युदितकर्मलोपे वा तत्ताक्षतिपदोक्तप्रा-
यश्चित्तसमुच्चयेन वा बोध्यम् सूर्योदये स्वस्थो मत्या सुप्तो दिनेतिष्ठन् सावित्रीं जपन्नुपवसेत् ॥ सूर्यास्तमये सुप्तो रात्रौ ति-
ष्ठन् सावित्रीं जपन्नाद्यात् जीर्णमलवद्वस्त्रधारणादिस्नातकव्रतलोपे तूपवासो ष्टशतजपो वा पंचमहायज्ञेष्वन्यतमलोपे-
ना तुरस्योपवासो धनिनः कृच्छ्रार्द्धं आहिताग्नेः पर्वण्युपस्थानलोपे चैवं ॥ स्नानं विना भोजने एकउपवासो दिनं व्याप्य जपश्च
ऋतौ भार्यागमनलोपे कृच्छ्रार्द्धं अकामतः प्राणायामशतं इदं चापर्वणि सन्निहितस्यारोगिण एव ॥ षोडश्यां रात्रौ तु पर्वण्य-
पि गच्छेत् ॥ स्वभार्यां क्रोधादपगम्येति वदतां वर्णानां क्रमेण कृच्छ्रं नवरात्र इति षड्रात्रत्रिरात्राणि सर्वेषां प्राजापत्यमिति गौ-
डाः त्यागानंतरं संग्रहे छायां ऋषिचांद्रायणं कृत्वा स कार्यः एकपंक्तावुपविष्टानां स्नेहादिना विषमदाने दापने च प्राजापत्यम् ॥ ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीसंक्रमकर्तुश्च कन्याविघ्नकरस्यच ॥ समेविषमकर्तुश्चशक्त्यैचांद्रायणंस्मृतम् ॥ संक्रमणउदकावतरणमार्गः ॥ पूजादौमा
र्गदोचसमेविषमकर्तृत्वम् अत्रचांद्रायणंभैक्षान्नेनेतिस्मृत्यर्थसारे ॥ पतितम्लेंच्छादिभाषणेपुण्यकृतांध्यानंविप्रेणसहभा
षणंवाभार्यान्नि धनानांलाभस्यविघ्नकरणेप्रत्येकंसंवत्सरव्रतम् ॥ यज्ञोपवीतंविनाभोजनेंबुपानेचनक्तव्रतम् अंबुपानेत्रिःप्राणा
यामोवा ॥ मत्याभोजनेतूपवासः ॥ उच्छिष्टस्यमत्याभोजनांबुपानयोरप्येवं ॥ यज्ञोपवीतंविनामत्यामूत्रादिकरणेभक्षणेचाष्ट
शतगायत्रीजपः अकामतः एषुक्रमेणत्रिषट्प्राणायामनक्तव्रतानि ॥ यद्युत्तिष्ठत्यनाचांतोभक्तवानासनात्ततः ॥ सद्यःस्ना
नंप्रकुर्वीत ॥ अंबुनिस्वप्रतिबिंबदर्शनेमयितेजइतिमंत्रंजपेत् ॥ अशक्तिद्रव्यस्पर्शेवाक्पाणिपादचापल्यकरणेकामकृते
निःप्रयोजनेनानृतवादनेचगायत्रीजपःअकामकृतेत्वाचमनम् ॥ अत्यल्पेदक्षिणकर्णस्पर्शःजलाभावेवा शय्यारूढ १ पा
दुकोपानदारोपितपादो २ मर्योच्छिष्टं ३ धकारस्था ४ शक्त ५ जपकृत् ६ होमकृत् ७ श्राद्धकार ८ समित्पुष्पकुशाज्यांबुमं
धाक्षतान्नपाणि भैक्ष्याज्यपाणिदेवपूजानिरतानामभिवादनेत्रिरात्रमुपवासः एनैरन्याभिवादनेएषामप्येवम् आन्हि
कविच्छेदेपित्रिरात्रम् ॥ बहुदिवसविच्छेदेद्विगुणं ॥ निमंत्रितस्यान्यत्रभोजनेत्रिरात्रम् ॥ अकामतःसकृत् ॥ निमंत्रित
स्यभोजनाद्यदानेयतिचांद्रायणंम् ॥ इंद्रधनुःपलाशाग्न्योरन्यस्यप्रदर्शनेउपवासोधनुर्दंडश्चक्रमेणदक्षिणा ॥ दंड्यो
त्सर्गेराजेकरात्रमुपवसेत् ॥ त्रिरात्रंपुरोहितः ॥ अदंड्यदंडनेकृच्छ्रंपुरोहितः ॥ त्रिरात्रंराजा ॥ पादप्रतापनंकृत्वाकृत्वावन्हिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयाद्यधः॥ कुशैःप्रमृज्य पादौतु दिनमेकंगृही भवेत्॥ भूमिकन्यानृते मासं गोमूत्रयावकपानम्॥ दुःस्वप्नारिष्टयोर्दर्शनेस घृतहिर
ण्यदानम्॥ विप्रयोर्विप्राग्न्योर्दंपत्योर्गोविप्रयोर्विप्रपीडयोर्गोबलीवर्दयोः विष्णुगरुडयोर्मध्यगमने मलद्विजस्य सांतपनं॥ वेदा
ध्ययनहोमसान्नाय्यांगदोहविवाहकालेष्वेषामंतरागमने चांद्रायणम्॥ कुनखिश्यावदंतौ प्राजापत्यंकृत्वा दंतान्नखांश्चो
द्धरेयातां॥ क्षत्रियस्त्वरणे पृष्ठंदत्वा प्राणपरायणः संवत्सरव्रतंकुर्यात्॥ एतदेव फलप्रदवृक्षछेदेन॥ तीर्थयात्रांविना सिंधु
सौवीरसौराष्ट्रास्तथा प्रत्यंतवासिनः॥ अंगवंगकलिंगेंध्रान् गत्वा संस्कारमर्हति॥ एवंमगधदेशेपि॥ कर्मनाशाजलस्पर्शक
रतोयाविलंघनगंडकीबाहुतरणेष्वप्येवं॥ नीलवस्त्रादिधारणे केशनिर्मितधारणेचोपवासः पंचगव्यपानम्॥ हिरण्योदकपा
नंच परेद्युः॥ नीलीमध्यगमनेत्रयः प्राणायामाः॥ नीलीजदंतधावने वस्त्रधारणव्रतम्॥ रोमकूपेषु नीलीरजःपतने वर्णमात्र-
स्य तप्तकृच्छ्रम्॥ नीलीविक्रीणन्पालयंस्तद्वृत्त्याजीवंश्च पतति॥ विरक्तश्चेत् त्रिभिःकृच्छ्रैःशुद्ध्येत्॥ नीलीं धृत्वा मैथुनेऽस्य
न्योगर्भश्चांडालो भवति॥ नीलीं धृत्वा मृतः षष्टिवर्षाणि विष्टायां कृमिर्भवति॥ विधवया नीलीधारणे तद्भर्तुर्नरकः॥ नीलीं
धारणपूर्वकमन्नदाने दातुर्भोक्तुश्च सांतपनम्॥ नीलीदारुभेदनेन रुधिरदर्शने चांद्रायणम् स्त्रीधृताशयने नीलीब्राह्म-
णस्य न दुष्यति कंबले पट्टसूत्रेच नीलीसंगो न दुष्यति॥ आपांक्तेयपंक्तिभोजने उपवासः परेद्युः पंचगव्यं च॥ प्रत्यर्कादि मेहने
आत्मनः सकृद्दर्शने च सूर्यविप्रंगांवा पश्येत्॥ क्षत्रियवैश्ययोरभिवादने विप्रस्योपवासः॥ शूद्रस्याभिवादने त्रिरात्रमुपवासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शूद्रस्याभिवादनेत्रिरात्रमुपवासः गृहस्थस्यानापदि सिद्धान्नभिक्षाकरणे दशरात्रं वज्रकृच्छ्रं संबंधिद्रव्यपानं ॥ आपदि त्र्यह
म् ॥ देवगुर्वाद्यभिमुखनिष्ठीवनेजीवनविरोधेनजिह्वां दहेद्धिरण्यं दद्यात् ॥ प्रतिमाभेदने देवालयवापीकूपारामभेदने चेदं विष्णु
र्मनस्तोके विष्णोः कर्माणि पादोस्याभिति चतस्रआज्याहुती हुत्वा यां देवतामुच्छेदयति तस्यैव ब्राह्मणान् भोजयेत् ॥ प्रतिमात्र
मृन्मयी पूजितोज्झिता च ॥ प्रायश्चित्तस्याल्पत्वात् ॥ तदन्यप्रतिमातारतम्येन दंडप्रायश्चित्ताधिक्यं योज्यम् दारिद्र्यक्रोध-
मात्सर्यादिभर्त्तुरतिक्रमेति कृच्छ्रः पर्वणि मैथुने सचैलं स्नात्वा वारुणीभिर्मार्जयेत् ॥ श्राद्धदिने मैथुने उपवास एव ॥ स्वपत्न्यां
रजस्वलायां गत्वोपवासत्रयपूर्वकं चतुर्थे घृतप्राशनम् ॥ कामतश्चेत्सप्तरात्रमुपवासः ॥ अकामतोभ्यासे कृच्छ्रः ॥ कामतोत्यंता
नवच्छिन्नाभ्यासेन षण्मासिकव्रतम् ॥ त्रैवार्षिकमिति स्मृत्यर्थसारे ॥ कामतोभ्यासे मात्रे तु प्रथमेन्हि पराकम् ॥ द्वितीये सांत
पनम् ॥ तृतीये प्राजापत्यमिति ॥ अकामतः प्रवृत्तस्य रेतः सेकात् प्राक् निवृत्तस्य सचैलं स्नानं महाव्याहृतिभिर्होमश्च ॥ षण्मासोत्तरं
गर्भिणीगमनेप्येवम् ॥ यदा तु स्त्रीसंभोगमंतरेणाप्यकामतो हृद्व्याज्वरमधातुविसर्गस्तदास्कन्नं रेतो यन्मद्यं रेतः पृथिवी पुनर्मामैतित्याभि
मंत्र्यतेन रेतसास्तनयोर्भ्रुवोर्भ्रूमध्यं अनामिकया स्पृशेत् ॥ कामतः प्राणायामत्रयसहितसहस्रगायत्रीजपः ॥ वानप्रस्थयत्योश्चांद्रा
यणम् ॥ गृहस्थस्य यत्नपूर्वकं धातुविसर्गे वारुणीभिर्मार्जनमित्यपि क्वचित् ॥ स्वप्ने तु त्रिनमस्काराः सूर्यस्य गृहस्थैः कार्याः तयोस्त्व-
घमर्षणत्रयम् ॥ ब्रह्मचारिणस्तु स्वप्ने रेतस्स्खलने स्नात्वार्कं संपूज्य ॥ त्रिः पुनर्मामेत्यृचं जपेत् ॥ कामत उत्सर्गे संवत्सरं व्रतं चरेत् ॥ प्र

CC-0. In Public Domain. Digitization by eGangotri

येनरोगेन स्वप्नेगृहस्थादीनांस्खलनेआदित्यार्चनादिपूर्ववत्॥ नैष्ठिकब्रह्मचारिणोद्विगुणम्॥ वमनेस्नात्वापंचगव्यपानम्॥ पूर्वेदि
नभुक्तस्यवमनेउपवासोपि॥ मांसमाषमसूरवमनेउपवासत्रयंस्नानपूर्वकप्राणायामत्रयंघृतप्राशनंच॥ दिवास्वापनग्नस्त्रीदर्शननग्न-
ग्नस्वापस्मशानाक्रमणहयारोहणपूज्यपूजातिक्रमाजीर्णश्मश्रुकर्मदुर्जनस्पर्शेषुस्नानेकामतोनक्तभोजनम्॥ गर्भाधानादिचूडांतसं
स्कारेष्वेकैकलोपेपादकृच्छ्रं॥ चूडायाअर्धकृच्छ्रं॥ अनापदिद्विगुणम्॥ प्रायश्चित्तोत्तरंतत्संस्कारकरणम्॥ गर्भाधानमात्राकर
णेगोदानपूर्वकंपुंसवनंकार्यम्॥ संवत्सरंनित्यक्रियालोपेतुषष्टिप्राजापत्यानि अक्रोशनानृतवादयोरेकस्त्रयोवाउपवासाः॥ अ-
कामतोभ्यासेतप्तकृच्छ्रम्॥ निषिद्धकाष्ठैर्दंतधावनेगोदर्शनम्॥ गृहीतव्रतस्यप्रमादादिनाभंगेउपवासत्रयम्पुनर्व्रतग्रहणंच॥-
विप्रस्याष्टवर्षपर्यंतंक्षत्रवृत्त्याधनार्जनेचांद्रायणम्॥ वैश्यवृत्तौषण्मासान्॥ शूद्रवृत्तौतुसकृद्देवपुनरुपनयनपूर्वकंकृच्छ्रम्॥ शू
द्रस्यद्विजकर्मकरणेप्येतत्॥ तद्धनत्यागोत्तरमिदंप्रायश्चित्तम्॥ स्त्रीधनोपजीवनेस्त्रियैतद्धनंदत्वाचांद्रायणं॥ भार्यायामुखमैथु
नेकृच्छ्रम्॥ गोयुक्तयानस्थस्यमैथुनेतदर्धम्॥ अकामतोभ्यासेस्नानमात्रम्॥ बस्तिकर्मणिप्रच्छर्दनविरेचनयोरभ्यासेशिशुकृ
च्छ्रः॥ अन्यतःस्नानम्॥ देवागारशिलादिनास्वगृहकरणेकृच्छ्रंयतिसांतपनंच॥ गुरुप्रतिश्रुतवस्त्वकरणेतप्तकृच्छ्रसहितम्चांद्रा-
यणम्॥ भोजनकालेपरिगृहीतमौनत्यागेतदन्नत्यागः॥ अर्धभुक्तान्नपात्रेणजलपानेचोपवासः॥ इष्टापूर्तादिशुभाशुभमहाकर्मस्थ
कृत्विगाचार्यादीनांद्वादशकृच्छ्राःस्तदर्द्धंवासर्वप्रायश्चित्तं॥ श्राद्धोपवासादिनिषिद्धदिनेषुदंतधावनेगायत्र्याःशतसंयुतांबुपानम् १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्यायाविवाहात्पूर्वंरजोदर्शनेनसितान्तदृतून्गणयित्वातत्संख्ययागोदानंकृत्वाअवेशक्तावेकांगांस्वर्णशृंगादिगोदानविधिनाद-
त्वात्राप्यशक्तौसदक्षिणमन्नंविप्रेषुदत्वात्रिदिनमुपोषितांचतुर्थरात्रौगव्यपयोमात्राहारांकन्यांनिवृत्तरजस्कांभूषितांदद्यात्॥तामु
द्वहन्वरस्तच्छुध्यैकूष्मांडमंत्रैर्घृतंजुहुयात्॥विवाहहोमकालेउपस्थितेआरब्धेविवाहेवारजोदर्शनेतुस्नापयित्वातांयुंजानेतितै
त्तिरीयमंत्रेणहुत्वाविवाहंप्रवर्त्तयेत्॥सुरापात्रगंधमाघ्रायसोमपोब्राम्हणोप्सुनिमग्नस्त्रीन्प्राणायामान्स्त्रिरघमर्षणजपंवाकृत्वा
घृतप्राशनंकुर्यात्॥असोमपोनप्सुइतरस्यामंत्रकंप्राणायामाः॥मद्यगंधनतदर्धम्॥साक्षात्सुराघ्राणंसुरापानवत्॥अम-
त्याघ्राणेप्राणायामास्त्रयः॥मद्यविण्मूत्रपूतिगंधानामन्यतमाघ्राणेत्रिःप्राणायामाः॥दर्शनेस्पर्शनेचस्नानंघृतप्राशनंच॥सुरापस्पर्शे-
स्नानंपंचगव्यंच॥तत्घ्राणेप्सुत्रिःप्राणायामाः॥असोमपस्यानप्सुइतरस्यामंत्रकम्॥मद्यविण्मूत्रविप्रुड्भिःसंस्पृष्टेमुखमंडलेमृ
त्तिकागोमयैःप्रक्षाल्यपंचगव्यंपिबेत्॥मदिरांदत्वास्पृष्ट्वाप्रतिगृह्यचस्नात्वाकुशांबुप्र्यहं॥संक्रात्यादिनिमित्तेष्वस्नात्वाभोजनेष्टसह-
स्रंगायत्रीजपः॥शूद्रादिस्पर्शनिमित्तेतूपवासः॥चांडालादिस्पर्शनिमित्तेस्नात्वाभुक्तौत्रिरात्रंकार्यंवा॥मत्याचांद्रंसकृत्॥कामाभ्यासे
द्विगुणम्॥रजकादिस्पर्शनिमित्तेतदर्धम्॥पानेत्वेकउपवासः॥चांडालादिरजकादिस्पृष्टस्पर्शनिमित्तेत्वस्नात्वाभोजनेउपवासः॥नि
त्यस्नानमकृत्वाभुक्तौउपवासस्त्रिरात्रंवा॥नैमित्तिकस्नानेसर्वत्राष्टशतगायत्रीजपः॥कामकृतेसहस्रत्रयं॥अमेध्याद्यस्पृश्यस्प-
र्शनेत्वस्नात्वाभुक्तौगृहस्थादेस्त्रिरात्रम्॥मत्याषड्त्रिरात्रम्॥व्रतिनःकार्यंचांद्रंवा॥श्वपाकादिस्पर्शनिमित्तेष्वस्नात्वाभुक्तौमत्यात्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्रं ॥ हस्तस्थापितकवलादिभोजने ॥ अब्राम्हणसमीपभोजने दुष्टपंक्तौ भोजने बालांस्त्यक्त्वा भोजने शूद्रहस्तेन भोजने पाने चासत्यान
कम् ॥ मत्यानूपवासः पंचगव्यं च ॥ शूद्रपंक्तौ भोजने द्विरुपवासः ॥ आसनारूढपादो वा वस्त्रार्धे प्रावृतो पिवा ॥ मुखेन धमितं वापि भुक्त्वा
सांतपनं चरेत् ॥ अनाचम्य भक्षणेष्टशतजपः ॥ भोजने नूपवासः ॥ आपोशनं विना भोजनेप्येवं ॥ अभ्यासे सहस्त्रगायत्रीजपः ॥ भोक्तु
कामस्यापोशनात् पश्चादभ्यवहारात् पूर्वं मूत्रपुरीषगमने सचैलो बहिराप्लुवः ॥ षट्प्राणायामाश्च ॥ भुंजानस्य मस्तके विष्ठादिपत
नेऽन्नं त्यक्त्वा नद्यां स्नानं त्रिः प्राणायामाः ॥ भार्यया सहोदरैर्वा सह भोजने दिनत्रयमभोजनम् ॥ ज्ञातिभिः सह भोजने त्वहोरात्रम् ॥
ऋतौ भूमौ भोजने होरात्रं यावकाहारः पंचगव्यपानं च ॥ घृतहीनाहुतिपंचकभोजनोत्तरं सघृतभोजनात्यंताभ्यासे चांद्रायणं ॥ चांडा
लश्वपचक्षत्तोग्रसूतवैदेहिकमागधायोगवाश्चांडालाद्याः ॥ विप्रायां शूद्राज्जातश्चांडालः ॥ क्षत्तुरुग्रायां जातः श्वपचः ॥ क्षत्रियायां
शूद्राज्जातः क्षत्ता ॥ राजन्यात् शूद्रायां जात उग्रः ॥ विप्रायां वैश्यात् जातः सूतः ॥ विप्रायां क्षत्रियात् जातो वैदेहिकः ॥ क्षत्रियायां वैश्या
ज्जातो मागधः ॥ वैश्यायां शूद्राज्जातोऽयोगवः शौंडिकादयश्च कापालिकनिर्णेजकधातुकलुब्धकांत्यजाः ॥ अंत्यजाश्च चर्मकार
जकनटबुरुडकैवर्तकमेदभिल्लाः सप्त ॥ सूतिकारजस्वलापतितशववाहकषंढदेवलकविसृष्टाग्न्यारूढपतिताभिशस्ता अंत्यजाश्च
श्वादयश्चांत्यजाद्याः ॥ श्वविट्वराहखरोष्ट्राद्याः श्वादयः एषामेव पंचमा इति संज्ञा ॥ गोमांसभक्षको यस्तु विरुद्धं बहु भाषते ॥ सर्वाचा
रविहीनश्च म्लेंछ इत्यभिधीयते ॥ स एव यवनदेशोद्भवो यावनः ॥ तत्र भुक्तिसमये चांडालांत्यजादिदर्शने आचमनपूर्वकं प्राणायाम १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रयं भोजनत्यागेसति ॥ तदत्यागेतूपवासः पंचगव्यंच ॥ मूत्राद्युत्सर्गानंतर शौचकरणंविना भोजनेत्रिरात्रंयावकपानमुपवासोवा ॥ जल
पानेतूपवासः पंचगव्यंवा ॥ मूत्राद्युत्सर्गवेलायां भोजनेपानेउपवासोव्याहृतिभिः सर्पिषाष्टोत्तरशतहोमः ॥ कांजिकादिना शौचंकृत्वा
भोजनेपुनर्जलेन शुद्धिंकृत्वोपोष्य पंचगव्यंपिबेत् ॥ एकपंक्त्यांतुभुंजानोविप्रोविप्रंयदास्पृशेत् ॥ शिष्टंतदन्नंभुक्त्वैवगायत्र्यष्टशतंज
पेत् ॥ शिष्टंपात्रस्थितंतदुत्तरंभुक्तेर्विरामः ॥ भोजनोत्तरमुच्छिष्टयोः स्पर्शेउभयोरपिसद्यः स्नानंशतजपोवा ॥ तादृशस्य क्षत्रियवैश्यस्प
र्शेक्रमेणनक्तोपवासौ ॥ नक्तंघृतप्राशनमेवस्नानंजपश्चेतिस्मृत्यर्थसारे ॥ भोजनोत्तरमेवतयोः स्पर्शेउपवासउपवासौवा ॥ भुक्तोच्छि
ष्टस्यशूद्रश्वादिस्पर्शेतूपोष्यपरेद्युर्नक्तम् ॥ परेद्युः पंचगव्यपानं ॥ भुक्त्वानाचमेपीदं ॥ इदंकामतः ॥ अकामतस्तुस्नानम् शतगायत्री
जपश्च ॥ भुक्तोच्छिष्टानाचांतस्यामेध्यमूत्रादिस्पर्शेपंचगव्यपानम् ॥ उच्छिष्टस्य चांडालादिस्पर्शेत्रयउपवासाअष्टाधिकशतगाय-
त्रीजपश्च ॥ चतुर्थेपंचगव्यंचमिलित्वापादोनप्राजापत्यम् ॥ ज्ञात्वाबालात्स्पर्शेद्विगुणम् ॥ अन्येतुअनुच्छिष्टस्य चांडालादिस्पर्शे-
स्नानं ॥ उच्छिष्टस्यतत्स्पर्शेपूर्णप्राजापत्यं ॥ ज्ञात्वातुद्विगुणमित्याहुः ॥ उच्छिष्टस्य चांडालान्नस्पर्शेचांद्रम् ॥ अधरोच्छिष्टेत्रिरात्रम्
भुक्तोच्छिष्टस्यानाचांतस्यांत्यजशौंडिकादिभिर्ज्ञानतः स्पर्शेप्राजापत्यं ॥ अर्धोच्छिष्टेपादः सर्वत्र ॥ येनास्येग्रासः क्षिप्तोननिगीर्णः सो
र्धोच्छिष्टः ॥ भुक्तोच्छिष्टस्य रजकादिस्पर्शेत्रिरात्रंघृतप्राशनम् ॥ मूत्राद्युत्सर्गोत्तरअकृतशौचः अधरोच्छिष्टभोजनाद्युत्तरमनाचां
तऊर्ध्वोच्छिष्टः ॥ तत्राधरोच्छिष्टस्यविप्रस्य चांडालादिस्पर्शेत्रिरात्रोपवासपूर्वकंपंचगव्यम् ॥ तस्यरजस्वलारजकादिस्पर्शेएकउ

CC-0. In Public Domain. Digitization by eGangotri

पवासः॥ अनुक्तेषु यत्रानुच्छिष्टस्यस्पर्शे स्नानं विधीयते॥ तत्रोच्छिष्टस्पर्शे त्रिरात्रं कार्यं वा॥ ऊर्ध्वोच्छिष्टार्धमधरोच्छिष्ट इति कल्प्यं॥ भुंजान-
स्य रजस्वलादिस्पर्शे शिशुकृच्छ्रः प्राणायामशतं च॥ अमत्यात्र्यहं॥ भुंजानस्य गुदस्रावे शौचं कृत्वा पोष्य पंचगव्यम्॥ भुंजानस्य शौचमा
त्रे मुखस्थग्रासं त्यक्त्वा स्नानम्॥ तद्ग्रासाशने उपवासः॥ सर्वाशने त्रिरात्रं॥ भुंजानस्यानुच्छिष्टेन सगोत्रेणासगोत्रेण वा स्पर्शे भोजनं
विरम्य शुद्धिः॥ भुंजानस्य भुक्तोच्छिष्टेन सवर्णेन स्पर्शे स्नानं जपो वा॥ भुंजानस्य शूद्रस्पर्शे उपवासः पंचगव्यं च॥ भुंजानस्य चांडाला
दिशब्दश्रवणे भोजनं विरम्य शुद्धिः॥ भोजने स्नात्वाष्टशतजपः उपवासो वा॥ मूत्रादिकाले त्यजादिस्पर्शे तु दिनमेकं चरेन्मूत्रे पुरीषे च दि-
नद्वयम्॥ दिनत्रयं मैथुने च पाने स्यात्तु चतुष्टयं॥ एवं रजस्वलाश्वसूकरशवमद्यभांडादिस्पर्शेपि॥ चांडालादिस्पर्शे सार्धमेतत्॥ द्विगुण
मित्यन्ये॥ उच्छिष्टतैलाभ्यक्तस्य कृतश्मश्रुकर्मणः कृतमैथुनस्य चाचमनं विना मूत्रादिकरणे एकोपवासस्त्रिरात्रं वा॥ ऊर्ध्वोच्छिष्टस्य
श्वकाकादिविष्ठास्पर्शे उपवासः॥ अधोच्छिष्टे स्नानम्॥ उच्छिष्टस्य सूर्यादिदर्शने उपवासः॥ ऊर्ध्वोच्छिष्टस्य पलांडुलशुनादिस्पर्शे त्रिरा
त्रं कुशजलपानं गायत्रीजपश्च॥ अकामत उपवासद्वयम्॥ अधरोच्छिष्टस्य तत्स्पर्शे एक उपवासः॥ अनुच्छिष्टस्य तत्स्पर्शे स्नात्वा नक्तं स
र्वांगावच्छिन्नस्पर्शे एकनक्तमिति केचित्॥ करादयाईषत्स्पर्शेप्येतदेव॥ जान्वधःकरास्पर्शे स्नानं॥ ततः आनाभेरुपवासः॥ तत ऊर्ध्वंस्प
र्शे त्रिरात्रं॥ अशुचिलशुनादिस्पृष्टिस्पर्शने तु॥ अशुचिं संस्पृशेत् यस्तु एक एव स दुष्यति॥ तं स्पृष्ट्वान्यो न दुष्येत सर्वद्रव्येष्वयं विधिरिति॥
एवं भांडेष्वपि स्पृष्टभांडस्पर्शे योज्यम्॥ स्त्रीबालवृद्धमक्षिकागृहमार्जारमूषकादयो नित्यं शुद्धाः उच्छिष्टकाले कर्मानुष्ठाने च मार्जारस्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्शे स्नानमितिमिताक्षरा ॥ पीतावशिष्टसुरवनिर्गततोयपाने मत्याभ्यासे चांद्रं पराकोवा ॥ पीतावशिष्टपात्रांबुपाने वामहस्तेनवापाने तदर्धं
त्र्यहंवा ॥ अज्ञानात्सकृच्छूद्रोच्छिष्टभोजने त्रिरात्रोपवासः ॥ चतुर्थे पंचगव्यपानं सप्ताहं पंचगव्यं कामतः ॥ एतदेव योषोच्छिष्टभोजनेपि
क्षत्रियाद्युच्छिष्टभोजने पादोनम् ॥ अकामतोभ्यासे चांद्रम् ॥ कामतोद्विगुणमभ्यासे भार्यया सह भोजने तदुच्छिष्टभोजने च दोषाभा
वआपद्विषयोविवाहविषयोवा ॥ ज्येष्ठभ्रातृपित्राद्युच्छिष्टभक्षणेदोषोन ॥ विप्रोच्छिष्टाशने एकाहः ॥ कामतोभ्यासे कृच्छ्रं ॥ उच्छि
ष्टमात्रतद्भोजनोत्तरभोजनपात्रेवशिष्टम् ॥ चांडालस्पृष्टकांस्ये चांडालाद्युच्छिष्टकांस्ये च भोजने कृच्छ्रं ॥ जलपाने पादकृच्छ्रम् ॥ र
जकादावर्धनम् ॥ चांडालेन सहैकवृक्षमारुह्य तत्र फलभक्षणे सचैलं स्नानम् ॥ चांडालादिस्पृष्टभोजने त्रिरात्रं मत्याकायम् ॥ चांडा-
लादिहस्तपाचितभोजने कायं चांद्रं च ॥ तद्धस्तेन भोजने द्विगुणम् ॥ चांडालाद्युच्छिष्टभोजने चतुर्गुणम् ॥ अभ्यासे कृच्छ्राब्दम् ॥ अ
त्र सर्वत्र चांडालान्नभोजने पुनः संस्कारः ॥ चांडालादिदृष्टान्ने तूपवासः पंचगव्यं च ॥ चांडालादिस्पृष्टांबुपाने उपवासः ॥ तत्स्पृष्टस्पृ
ष्टिविषये तदर्धम् ॥ चांडालादिसंस्कारे भोक्तुः पक्षं गोमूत्रयावकं कृच्छ्रं वा ॥ चांडालादिर्यस्य गृहे अज्ञातस्तिष्ठति तस्यान्नमत्याभु
क्त्वा प्राजापत्यम् ॥ मत्या पराकः ॥ चांडालादिभांडसंस्पृष्टांबुपाने गोमूत्रयावकं त्रिरात्रं पुनः संस्कारश्च ॥ शूद्रोदकपाने उपोष्य कुशप-
लाशबिल्वोदकपानम् ॥ चांडालादिस्पर्शोत्तरमूत्राद्युत्सर्गे त्रिरात्रमुपवासो जातवेदसजपोवा ॥ रजकादिस्पर्शोत्तरमधरोच्छिष्टे तूपो
ष्य पंचगव्यम् ॥ रजस्वलासूतिकाश्वसूकरादिपतितकुणिकुष्ठिकुनख्यस्पृश्याशौचिनः स्पृष्ट्वा भोजने एतत्स्पृष्टान्नभोजने च मत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यं ॥ अमत्यार्द्धम् ॥ कुणिर्हस्ताविकलः भोजनकालेन्नममेध्यमक्षिकाकेशादिदूषितं चेदनंतरमपः स्पृशेत् ॥ तच्चान्नं भस्मनामृदांबुना
वास्पृशेत् अस्थ्यादिदूषिते स्नानं घृतप्राशनं च ॥ भोजनकाले दंतपाते चैवं ॥ रक्तादिदृष्टौ नूपवासः ॥ सुरवेरक्तदर्शने त्रिरात्रम् तद्भ
क्षणे ब्राम्हीरसपानं ताहृशजलपाने कुशोदकम् ॥ अशक्त एषु निमित्तेषु ब्राम्हीं पिबेत् ॥ अमेध्यकेशकीटकादिभिः सह पाचितान्नस्य
त्यागः भक्षणे तूपवासः पंचगव्यं च ॥ वामहस्तदत्तान्न भोजने एकपंक्तावेकस्मिन्नुत्थिते पश्चाद्भुक्तौ चोपवासो नक्तं पंचगव्यं च ॥ मार्जा
रकाकाखुनकुलगवाद्युच्छिष्टस्याल्पस्य भोजने ब्राम्हीरसः ॥ अधिकभोजने उपवासः ॥ पूर्णाहारे त्रिरात्रम् ॥ कामतः कृच्छ्रपादः ॥ अ
भ्यासे कृच्छ्रः ॥ श्वोच्छिष्ट भोजने मासं यावकव्रतम् ॥ विप्रस्य शूद्रगृह भोजने मनस्तापात् शुद्धिः ॥ कामतश्चेत् कृपादायाः शतजपः
शूद्रभाजनभिन्नभाजनयोर्भोजने उपवासः पंचगव्यं च ॥ मत्यात्रिरात्रम् ॥ भिन्नकांस्ये अमत्यात्रिरात्रम् ॥ मत्या कार्यम् ॥ वटार्का
श्वत्थकुंभीतिंदुककोविदारकर्कदंबवल्लीपलाशब्रम्हवृक्षपत्रेषु भोजने चांद्रम् ॥ पद्मपत्रे वानप्रस्थयत्योश्चांद्रफलम् ॥ अन्येषां चांद्रप्राय-
श्चित्तम् ॥ दुग्धाज्यादिपेयद्रव्यहस्तस्योच्छिष्टेनस्पर्शे तत्द्रव्यसाहित्येनाचमनाच्छुद्धिः ॥ चांडालस्योच्छिष्टे दाने पि द्विरुपवासः शूद्रेणछि
न्नयज्ञोपवीतो ब्राम्हणो मंत्रेणान्यत्तु परिधायोपवसन् गायत्री शतं जपेत् ॥ ज्ञानतो द्विगुणम् ॥ एवमन्यत्राप्यनादेशे शतगायत्रीजपः ॥ वि
प्रेणाच्छिन्नयज्ञोपवीते महासांतपनद्वयम् ॥ चांडालादि पुल्कसम्लेंछभिल्लपारसीकमहापातकिबौद्धशैवपाशुपतलोकायतिकनास्ति
कोन्मत्तांत्यजनापितविकर्मस्थद्विजोदक्यासूतिकापतितशवस्पृष्टिशावसूतकचैत्ययूपमृतहारककापालिकवनमार्जारस्पर्शे सचे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंस्नानम् ॥ कामतस्त्वग्निस्पर्शनघृतप्राशनमधिकम् ॥ अत्र शैवपाशुपतौ वेदविरुद्धतदागमोक्तानुष्ठातारौ ॥ रजकचर्मकव्याधकैवर्त
शाकुनिकनटधीवरजालोपजीवनिर्णेजकसौचिशकैलूषसर्ववर्णगवनिताचक्रध्वजिवध्यघातिश्वगर्दभग्रामसूकरकुक्कुटैःशिरो
व्यतिरिक्तांगस्पर्शे तदंगक्षालनवस्त्रक्षालनपूर्वकमाचमनम् ॥ शिरःस्पर्शे स्नानं कामतःस्पर्शे द्वादशवारं मृज्जलैः शोधनमधिक
म् ॥ इदं सर्वमनातुरस्य ॥ आतुरस्य त्वाचमनमेव ॥ चांडालादिस्पर्शेप्येतत् ॥ शूद्रनिषादस्पर्शे आचमनम् ॥ स्मृत्यर्थसारे तु शूद्र
स्पर्शे स्नानम् ॥ निषादस्पर्शे सचैलस्नानमिति ॥ चिरकालं चांडालादिच्छायारोहणे स्नानं घृतप्राशनं च ॥ तल्लंघनेप्येवं ॥ हीनशूद्र
स्पर्शे स्नानम् ॥ प्रागुक्तचांडालादिभिर्व्यवहितस्पर्शे स्नानमेव ॥ इदं मतिपूर्वत्वे सचैलमन्यत्राचैलम् ॥ काष्ठादिद्वारेण तत्स्पर्शे यदं
गस्पर्शस्तदंगस्य वस्त्रादेश्च क्षालनमाचमनं च ॥ नौसंक्रमादौ न स्पर्शदोषः ॥ सर्वांगावच्छेदेन चांडालादिस्पर्शे त्रिरात्रमुपवासः ॥ चां
डालादिभिरेकशाखारोहणे विप्रस्य सचैलं स्नानम् ॥ कामतोष्टशतजपश्च ॥ अभ्यासे तूपवासपूर्वकं पंचगव्यपानम् ॥ एकपाषाणा
वरोहणे शाखावत् ॥ चांडालादिस्पर्शे रात्रावपि स्नानम् ॥ नद्यादिवोढृतजलेनाग्निसन्निधौ स्वर्णजलं निक्षिप्य कार्यम् ॥ चांडालशव
स्पर्शे कृच्छ्रः ॥ चांडालादिभिर्यानशय्यासनादौ त्रिरात्रोपवासः ॥ विपेण चांडालस्य व्रणबंधनाभ्यंजनरुधिरोत्सादनादौ विप्रस्य प्राजा
पत्यम् ॥ चांडालेन विप्रस्यैषु कृतेष्वप्येवम् ॥ अनभ्यासे त्रिरात्रम् ॥ अभ्यक्तस्य चांडालादिस्पर्शे एकोपवासपूर्वकं पंचगव्यम् ॥ चांडालाय
कामतः ॥ ऋतुमदर्शने तन्नृत्यदर्शने तद्गीतश्रवणे भैषज्यक्रियायां चद्विरुपवासः ॥ चांडालादिदर्शने रविदर्शनपूर्वकं पंचदशप्राणाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अभ्यासे ॥ अन्यथा रविदर्शनमेव ॥ चैलान्यव्यवधानेन स्पर्शे स्नानम् ॥ काष्ठादिव्यवधानेन स्पर्शे तदंगक्षालनमुक्तम् ॥ एकशाखापाषाणयो
रारोहणे तु स्नानम् ॥ वचनात् एतैः संभाषणे द्व्योत्तरशतगायत्रीजपः ॥ अमत्या चेद्विस्संभाषणम् ॥ चांडालाद्युपदेशे प्राजापत्यम् ॥ चांडाल
कूपतीर्थनिषेवणे त्रिरात्रम् ॥ चांडालेनैकपथगमने गायत्रीस्मरणमल्पकालसाध्ये ॥ अन्यथा सचैलस्नानम् ॥ चांडालादेः स्ववेश्मन्यवस्था
ने त्र्यहम् ॥ दधिसर्पिःपयोभिः सह गोमूत्रयावकपानं त्रिसंध्यमवगाहनेन ॥ ततस्त्र्यहं दध्ना ॥ त्र्यहं सर्पिषा ॥ ततः त्र्यहं पयसा ॥ पलत्रयं द
धिपयसोः सार्पिषः पलम् ॥ वस्त्राणां जलेन क्षालनम् ॥ मृन्मयानां त्यागः कार्यः ॥ कुसुंभगुडकार्पासलवणसर्पिर्धान्यानि द्वारे कृत्वा वेश्म
नि पावकं दद्यात् ॥ ततो ब्राह्मणभोजनं ॥ त्रिंशद्गावो वृषभश्चैको दक्षिणा ॥ पुनर्लेपनखननहोमजप्यैः शुद्धिः ॥ अधिकसंसर्गे अधिकं कल्प्य
म् ॥ वृद्धयोगी बालापत्यगर्भिणीनां प्राजापत्यम् ॥ बालानां प्रहरद्वयमभोजनम् ॥ रजकादिष्वेतदर्धम् गृहदाहवर्ज्यम् ॥ चांडालगृह
प्रवेशे चांडालैः सह वृक्षच्छायायां गृहे वावस्थाने मासं कृच्छ्राभ्यासः ॥ द्विमासं शूद्रस्य ॥ क्षत्रियवैश्ययोश्चतुस्त्रसः ॥ अनिष्टगंधस्पर्शशब्द
रूपवाक्यानामाघ्राणस्पर्शनश्रवणदर्शनकथने पुरविदर्शनम् ॥ रुद्रनिर्माल्यस्पर्शे सचैलस्नानम् ॥ शैवसौरनिर्माल्यनैवेद्यभक्षणे चां
द्रम् ॥ अभ्यासे द्विगुणम् ॥ अमत्याभ्यासे सांतपनम् ॥ अनापदि हरेरन्यनैवेद्यभक्षण एवमेव ॥ विष्णोरनिवेदितभोजने अर्धकृच्छ्रं प्राय
श्चित्तम् ॥ हरेर्निर्माल्यनैवेद्यभक्षणे चांद्रायणफलमिति स्मृत्यर्थसारे ॥ धनहर्ता प्रेतक्रियायाअकरणे तद्वर्णवधे यत्प्रायश्चित्तं तदर्धं
कुर्यात् ॥ न देवेति केचित् ॥ गोविप्रचांडालादिहतोद्बंधगरदाग्निदात्मघातिशृंगिदंष्ट्रिविषवह्निजलविद्युत्सरीसृपहतसंकरजातिप्र

CC-0. In Public Domain. Digitization by eGangotri

नितशवस्य वहनदहनोदकदानादिक्रियाकरणे तप्तकृच्छ्रः॥ अमतिपूर्वत्वे गोमूत्रयावकाहारेण कृच्छ्रम्॥ तच्छवस्पर्शमात्रे केवलेऽश्रुपाते चैकोपवासः॥ यं कंचित् प्रेतमुद्दिश्य तद्बांधवैः सहाश्रुपातेऽस्थिसंचयनोत्तरं कृते स्नानम्॥ ततः पूर्वं तु सचैलं तत्॥ शूद्रप्रेतानुगमने द्विजस्य स्नानमष्टोत्तरसहस्रगायत्रीजपश्च॥ द्विजप्रेतानुगमने घृतप्राशनम्॥ शूद्रस्य तु तत्र स्नानमेव॥ अनशनजलाग्निपतनानि संकल्प्य ततोऽप्यसृष्टस्य संन्यस्तस्य पुनर्गार्हस्थ्यपरिग्रहेण गृहस्थतामिच्छतश्च कृच्छ्रत्रयपूर्वकं चांद्रायणत्रयपूर्वकं वा पुनर्जातकर्मादिसंस्कारकरणम्॥ षण्मासकृच्छ्राभ्यासपूर्वकं वा॥ अत्र शक्तिसकृदभ्यासकालाद्यपेक्षया व्यवस्था॥ केचिदत्यसमर्थस्य तप्तकृच्छ्रं॥ चांद्रायणं तु बलात्कारेण परप्रेरणया वा संन्यस्तस्येत्याहुः॥ येत्वात्मघाताद्यशास्त्रीयमरणेन मृतास्तत्पुत्रैश्चांद्रायणतप्तकृच्छ्रद्वयात्मकं प्रायश्चित्तं कृत्वैव तत्क्रियाः कार्याः क्रोधादिनात्मत्यागाध्यवसायमात्रे उपवासत्रयम्॥ अध्यवसायं कतिपयव्यापारं कृत्वा स्वत एव निवृत्तो घृताभ्यक्तो मौनी प्राणायामान् कृत्वा गायत्रीं जपन् त्रिरात्रमुपवसेत्॥ अन्येन निवर्तितस्य द्विगुणम्॥ अध्यवसाय शस्त्रादिक्षतकरणे प्राजापत्यम्॥ दृढक्षते चांद्रम्॥ चितिकाष्ठात्तु या नारी मोहाद्विचलिता तथा॥ प्राजापत्येन शुध्येतेति॥ रजस्वले एकभर्तृके अमत्यामत्या वा परस्परस्पृष्टे सद्यः स्नानेन शुध्यतः॥ असपत्न्योस्तु सवर्णयोर्योनिगोत्रसंबंधयोरमत्या स्पर्शे न देवस्नानमात्रम्॥ मत्या त्वेकउपवासः परेद्युः पंचगव्यपानं च॥ असंबंधयोः संवर्णयोः स्पर्शे तु मत्या आशुद्धेरनशनम्॥ अमत्या तु स्नात्वा तद्दिनोपवासाच्छुद्धिः॥ तन्मध्ये तु भुक्तौ दिनसंख्याकोपवासाः॥ विप्रशूद्रयो रजस्वलयोः स्पर्शे विप्रायाः कृच्छ्रं शूद्रायाः पादः॥ शूद्रायाः निष्कचतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थेंशदानमित्यन्ये॥अकामतस्तु विप्रायायावच्छुद्धेरनशनम्॥शूद्रायाःस्नानमात्रं॥क्षत्रियवैश्ययोरेतत्कालेअभावाच्छुद्धिर्निविचार्य
ते॥यदेवानुछिष्टयोःपरस्परस्पर्शेवातदेवोछिष्टत्वेद्विगुणंबोध्यं॥अधरोच्छिष्टेऊर्ध्वोच्छिष्टार्धम्॥चांडालाद्यंतावसायिपतितशवा-
दीनांमत्यास्पर्शेरजस्वलाआशुद्धेरभुंजानाशुध्यंतेप्रायश्चित्तंकुर्यात्॥तत्रप्रथमेऽह्निस्पर्शेत्रिरात्रम्॥द्वितीयेद्विरात्रम्॥तृतीयेए
काहः॥चतुर्थेनक्तम्॥तत्रप्रथमदिनेयदिसाभुंक्तेतदाशुध्यंतेचांद्रम्॥द्वितीयादिदिनेषुभोजनेपादपादन्यूनंकल्प्यम्॥अमत्याचांडा
लादिस्पर्शेतुआशुद्धेरुपवासमात्रं॥अत्रप्रथमादिदिनभुक्तौप्रागुक्तत्रिरात्रादियोज्यम्॥सूतिकाशौंडिकादीनांश्ववृकसृगालवानरख
रोष्ट्रविड्वराहकाककुक्कुटादीनांउच्छिष्टशूद्रस्यचमत्यास्पर्शेतदादिकाहन्यभुंजानायाःशुध्यंतेप्रायश्चित्तम्॥तत्रप्रथमेऽहनिद्विरात्रमशु
क्तेःद्वितीयेएकाहम्॥तृतीयेनक्तम्॥चतुर्थेएकभक्तम्॥अत्रप्रथमादिदिनेषुभुक्तौप्राजापत्यपादपादन्यूनानि॥अमत्यास्पर्शेतुआ
शुद्धेरभुक्त्यैवशुद्ध्येत्॥भुक्तौप्राजापत्यपादादिन्यूनादिक्रमेण॥ ॥चांडालरजकरजस्वलासूतिकाश्वादिस्पृष्टैःसहमत्यास्पर्शेअ-
मेध्यादिमलोच्छिष्टादिस्पर्शेचतदादिकाहन्यभुंजानायाः शुध्यंतेप्रथमदिनेस्पर्शेउपवासः॥द्वितीयदिनेनक्तम्॥तृतीयेएकभक्त
म्॥परतःपंचगव्यम्॥प्रथमादिदिनेभुक्तौत्रिरात्रैकोपवासनक्तादि॥अमत्यातत्तत्स्पृष्टैःस्पर्शेअभुंजानाशुद्ध्येत्॥भुक्तावनशनम
त्याम्नायाः॥उच्छिष्टायाः चांडालादिस्पृष्टस्पर्शेतदाद्यभुक्तात्रिरात्रादि॥तेषुभुक्तौउपवासप्रत्याम्नायाः॥उच्छिष्टायाः चांडाला १८
दिभिःसाक्षात्स्पर्शेतुप्रथमादिदिनेषुषट्चतुर्द्विरात्रंगोमूत्रयावकंचतुर्थदिनेस्पर्शेउपवासःसपत्नींरजस्वलांस्पृष्ट्वारजोदर्शनेस्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा भुंजीत ॥ सपत्नीं सवर्णां स्पृष्ट्वा रजोदर्शने एकोपवासः ॥ हीनवर्णां तां स्पृष्ट्वा तद्दर्शने आ शुद्धेर भोजनं पंचगव्यं च ॥ चांडालादिसूतिका
शवस्पर्शोत्तरं रजोदर्शने आ शुद्धेर भुक्तिश्चांद्रं च ॥ एवं मृताशौचिभिः स्पर्शे स्नानात् प्राक् रजोदर्शने आ शुद्धेर भोजनमेव ॥ भुक्तौ तु चांद्रम्
एवं बंधुमरणश्रवणे अमेध्यमलोच्छिष्टादिस्पर्शे न स्नानात् प्राक् रजोदर्शनेपि ॥ रजोदर्शनोत्तरं बंधुमरणश्रवणेपि आ शुद्धेर भोजनमेव ॥
उच्छिष्टा रजः पश्यंति चेत् शुद्ध्यंते त्र्यहम् ॥ अधरोच्छिष्टे त्वेकाहमुपवासः ॥ अत्र सर्वत्राशक्तायाः ॥ सद्यः स्नानेन भोजनम् ॥ शुद्ध्यंते नशान
प्रत्याम्नायाः ॥ भोजनकाले रजस्वलायाः श्वांत्यजादिस्पर्शे षड्रात्रं गोमूत्रयावकाहारः ॥ शुद्धिं यावदुपवासश्च ॥ रजस्वलायाः भुक्तोच्छि
ष्टद्विजस्पर्शे त्रिरात्रोपवासः ॥ अधरोच्छिष्टतत्स्पर्शे एकाहः ॥ रजस्वलाया भोजनकाले रजस्वलांतरदर्शने आ शुद्धेर भोजनम् ॥ भुंजाना
याश्चांडालादिदर्शने उपवासत्रयमपि ॥ एकोपवासो वा ॥ कामतस्त्वप्राजापत्यम् ॥ सूतकमृतकयोर्मध्ये रजोदृष्टौ वस्नात्वा भोजनम्
अशुद्ध्यंते उपवासः ॥ आर्तवमध्ये मृताशौच प्राप्तौ आ शुद्धेर भोजनम् ॥ अशक्तायाः स्नात्वा भोजनम् ॥ रजस्वलाया व्रतस्थाया रजस्व
लाभिभाषणे उपवासः ॥ सर्वत्र रजस्वलाया उपवासासामर्थ्ये अकालकृष्टफलाद्याहारांते पंचगव्यपानम् ॥ एवं गर्भिण्या बालापत्याया
श्च ॥ रजस्वलाया उक्तस्पर्शादिनिमित्तेन संक्रांत्यादिनिमित्तेन वा नैमित्तिकस्नानप्राप्तौ पात्रांतरितततो येनतत्कार्यं न तु मज्जनम् ॥ तत्र
गात्रमार्जनं वस्त्रपीडनं च न कार्यम् ॥ अन्यवस्त्रधारणं च नेत्येके ॥ प्रारब्धं दीर्घव्रते रजोदृष्टौ व्रतलोपो नास्ति ॥ हविष्यभोजनादिश
रीरनियमं स्वयं कुर्यात् ॥ पूजामन्येन कारयेत् ॥ चतुर्थदिने त्वस्नात्वा भुक्तौ कार्यम् ॥ मत्या चांद्रम् ॥ तस्याज्वरादौ तु चतुर्थेहनि अन्या स्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरोवादशवारं द्वादशवारं वा स्पृष्ट्वा सचैलं स्नानोयादाचमेच्च॥ अंतेवस्त्रत्यागः॥ ततः शुद्धा सा यथाशक्तिदक्षिणां दत्वा पुण्याहं वाचयेत्॥ अयं चातुरमात्रे स्नानप्रकारः॥ आतुरे पुंसि तु मंत्रैरपि मार्जयेत्॥ तेच समुद्रज्येष्ठा इति चतस्रः॥ आपोहिष्ठेति तिस्रः॥ शुचीवोहव्येति तिस्रः॥ एतोन्विंद्रमिति तिस्र ऋचइति॥ रजस्वला सूतिकयोर्मरणे तयोर्मलं प्रक्षाल्य स्नापयित्वा काष्ठवदमंत्रकं दग्ध्वा चांद्रायणत्रयं प्रायश्चित्तं कृत्वास्थीनि मंत्रवद्दहेत्॥ सूतिकाया आद्यत्र्यहे त्र्यब्दमशीतिकृच्छ्रं वा॥ द्वितीयादित्र्यहेषु न्यूनम्॥ रजस्वला जलावगाहाभ्यंगप्रवासदंतधावननखनिकृंतनतांबूलमधुमांसगंधपुष्पदिवास्वापग्रहनक्षत्रनिरीक्षणानि वर्जयेत्॥ मृन्मये आयसे वा भुंजीतेत्यादि नियमस्यात्र स्यात्॥ ॥इति रजस्वलाविधिः॥ ॥अनूक्तेषु दंडादिनास्कृतिनिंदादिभिश्च प्रायश्चित्तादिकल्प्यम् इति प्रकीर्णप्रायश्चित्तानि अथ मलिनीकरणप्रायश्चित्तानि॥ अथ जातिभ्रंशकरादिषु॥ तत्र जातिभ्रंशकरेषु कामतः कृतेषु सप्ताहसाध्यं महासांतपनम्॥ अकामे प्राजापत्यम्॥ सकृदमत्या कृतयोः संकरीकरणापात्रीकरणयोः शिशुचांद्रायणं अज्ञानतः संकरीकरणानुष्ठाने मासं यावकाशनम्॥ ज्ञानतः कृच्छ्रातिकृच्छ्रः॥ अज्ञानतोभ्यासे चांद्रम्॥ ज्ञानतोभ्यासे चांद्रद्वयम्॥ अज्ञानादपात्रीकरणे तप्तकृच्छ्रं शीतकृच्छ्रं वा॥ ज्ञानतो महासांतपनम्॥ चांद्रं पूर्ववत्॥ अज्ञानतो मलिनीकरणानुष्ठाने त्र्यहं तप्तयावकपानम्॥ ज्ञाने तप्तकृच्छ्रं महासांतपनं वा॥ अज्ञानतोभ्यासे कृच्छ्रातिकृच्छ्रः॥ ज्ञानतोभ्यासे द्विगुणम्॥ एतानि जातिभ्रंशकरादिसामान्यप्रायश्चित्तानि यत्र विशेषो नोक्तस्तत्र केवलानि योज्यानि॥ यत्र तु प्रातिस्विकेषु कानिचिद्दृश्यंते तेषु जातिगुणाद्यपेक्षया एतान्यपि योज्यानि॥ ॥इति जा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिभ्रंशकरसंकरीकरणापात्रीकरणमलिनीकरणप्रायश्चित्तानि॥ ॥अथोपपातकप्रायश्चित्तानि॥ ॥तत्रसामान्यतउपपातकेषु॥उपपातकशुद्धिःस्यादेवंचांद्रायणेनवा॥ पयसावापिमासेनपराकेणाथवा पुनरितियाज्ञवल्क्योक्तंचतुष्टयम्॥ एवमित्यस्यमासंपंचगव्यपानेनमासंप्राजापत्याभ्यासेनवामासमतिकृच्छ्रेणवात्रिरात्रोपवासपूर्वकदशगोसहितवृषभदानेनेत्यर्थः॥एतेषांपापाल्पत्वगुरुत्वेदेशकालवयः शक्त्यादिकंचापेक्ष्यव्यवस्थाबोध्या॥कामकृतात्यंताभ्यासेतुगोवधेवक्ष्यमाणत्रैमासिकम्॥तथाचोपपातकनिवृत्तौगोघ्नवत्॥प्रायश्चित्तानिविकल्पितानीतिक्वचित्सतिपदोक्तान्यन्यान्युच्यंते॥तेषामप्येतैःसहविकल्पोविषमभागोवाबोध्यः तत्रगोवधे तत्रब्राम्हणस्वामिकचतुर्हायिन्यादीनांगवांशस्त्रलोष्ठमुष्टिलगुडपाषाणविषाणादिनासाक्षात् ज्ञानपूर्वकंकामतोवधेमासंगोमूत्रसहितंयावकयवागूपानं॥शृंगलांगूलखुरासृक्स्रावयुतार्द्रहतगोचर्मावृतस्यगोष्ठेवासः॥ततोमासद्वयंचतुर्थकालभोजनंअक्षारलवणंमितं॥ मासत्रयमपिगोमूत्रेणस्नानंगोमतीजपः दिवागाःपालयेत् अनुव्रजेदनुतिष्ठेदनुस्वपेच्च॥तासुगच्छत्सूर्ध्वंतिष्ठन्रजःपिबेत्॥ रात्रौताःसेवित्वानत्वावीरासनीभवेत्॥भित्त्याद्यनाश्रित्योपवेशनंवीरासनं॥ उत्तिष्ठंस्तु दिवातिष्ठेदुपविष्टेस्तथानिशि॥एतद्वीरासनंनामेत्यन्ये॥ चोरव्याघ्रपंकपातादिभयादिभ्यस्ताःसर्वप्राणैर्विमोचयेत्॥तासुशीतोष्णवातवर्षपीडितासुत्रातुमक्षमोनात्मनोरक्षणंकुर्यात् स्वपरगृहक्षेत्रादावन्नादिकंभक्षयंतीर्नकथयेन्ननिवारयेत्पिबंतंवत्संच॥एवंमासत्रयेणतत्पापविमोक्षः॥अत्रस्नानांगभूतमंत्रपाठःकालेसंध्यावंदनंचकार्यम्॥एवंब्रह्मघ्नादीनामपिव्रतांगशौचार्थंतद्वत्स्येव॥स्त्रीणांतुगवानुव्रजनगोष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयनगवाजिनधारणजपादिकंनास्ति॥ स्त्रीबालवृद्धादीनामर्धम्॥ शूद्रस्य स्त्रीसमानधर्मत्वादर्धमेव॥ शूद्राश्च स्त्रीसधर्माणः सर्वेसङ्कं
शजाः स्मृताइतिमनूक्तेः॥ प्रतिलोमजानामप्यर्धं॥ वैश्यतुल्यशूद्रस्यतुपूर्णमेवेतिस्मृत्यर्थसारे॥ अज्ञानकृतेप्ययर्द्धम्॥ अत्र पूर्णव्रतेए
कोवृषभोदशगावस्तन्मूल्यंवादक्षिणा॥ अर्धव्रतेतदर्धएकागौः॥ तावतिअविद्यमानेसर्वस्वंदेयं॥ अत्रमाससमीषज्ञोमूत्रसहितया
वकपानेप्राजापत्यद्वयं॥ स्नानादीतिवर्जव्रतासहितमासोपवासेशतप्राजापत्यानि॥ एकादशोस्मातःत्रिंशन्नकैः पंचचत्वारिंशत्
संकलनयासप्तदशप्राजापत्यानि वासप्तदशधेनवोवातन्मूल्यंवेतिचत्वारः पक्षाः॥ मूल्यंचतावद्द्रव्यलभ्यंकांचनंगौर्वासोम्बोभूमि
स्तिलाघृतमन्नंच॥ यत्रद्रव्यंतन्मात्रोल्लिख्यसंकल्पःकार्यः॥ चतुर्ष्वपिपक्षेषुदक्षिणाप्रागुक्तैव॥ ज्ञानकृतेक्षत्रियस्वामिकेतावृ-
शगोवधेषण्मासंतच्चर्मणावृतोगोग्रासदोगोव्रतीयवाशीगोभिरेवसंचरन्विमुच्यते॥ अत्रषाण्मासिकव्रतेद्वादशप्राजापत्यानिद्वा
दशधेनवस्तन्मूल्यंवेतिचत्वारः पक्षाः॥ दक्षिणायथाशक्तीतिशूलपाणिः॥ अन्येतुवृषभहंतावृषभंस्त्रीगोहंतातांदद्यादित्याहुः॥ वृ
षभरहितादशगावइतिगौडाः॥ अज्ञानकृतेत्वर्धम्॥ बालादीनांचप्राग्वत्॥ अज्ञानकृतेवैश्यसंबंधिगोवधेमासंपंचगव्यपानम्
गोष्ठेवासोगवामनुगमनंगोमतीमंत्रजपांतेगोदानम्॥ अत्रमासव्रतेचत्वारिप्राजापत्यानिचतस्रोधेनवःतन्मूल्यंवा॥ पंचप्राजापत्या
नितिशूलपाणिः॥ दक्षिणात्वेकाधेनुः॥ ज्ञानतोद्विगुणमेतत्॥ अत्रचर्मादिधारणंनास्ति॥ ज्ञानकृतेशूद्रसंबंधिगोवधेप्राजापत्यच
तुष्टयंचतस्रोधेनवस्तन्मूल्यंवा॥ यस्यतैलगुडादिव्यापारांतरंकारणांतरनिरपेक्षःकालांतरेगवांप्राणमोक्षःसोपिसाक्षाद्घ्नः॥ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानकृतत्वंच गांज्ञात्वाएतांहन्मीति कामनयाहननम्॥ एतद्रहितमज्ञानकृतत्वम्॥ तद्राहित्यंच कामनाभावेनतत्पापकप्रमात्मकज्ञाना
भावेनवा॥ एवंसर्वत्रबोध्यम्॥ प्रायश्चित्तानंतरं पार्वणविधिनाश्राद्धं कार्यंनचजीवत्पितृकेणापि॥ किंतुपितुःपित्रादिभ्यएव॥ गोचर्म
धारणाधिकंप्रायश्चित्तंचगोपतयेगोमूल्यंप्रतिरूपगवांतरंदत्वाकार्यम्॥ पत्रदानेत्विदंलेख्यं॥ पूर्वदिनेसशिखंवपनंकृत्वापरदिनेघृतंप्रा
श्योपोष्यतत्परदिनेस्नानादिकंविधायव्रतंतत्प्रतिनिधिंवासंकल्प्यानुष्ठायविप्राययथोक्तांदक्षिणांदत्वाअच्छिद्रावधारणंकुर्यात्॥ ततः
पार्वणविधिनाश्राद्धंभोज्यदानंच कार्यम् यत्स्वामिकगोवधेयत्प्रायश्चित्तमुक्तंतत्स्वामिकगर्भिणीकपिलाबहुक्षीरादिकगुणकहोम-
धेन्वादिवधेतद्द्विगुणम्॥ गर्भिण्यांच सचेतनगर्भयुतायामेवेदम्॥ उत्पन्नमात्रदार्ढ्ययुताचेतनांगप्रत्यंगपूर्णगर्भयुतायास्तुक्रमे
णसपादंसपादद्वयंसपादत्रयंपूर्णद्विगुणंचगोघ्नव्रतम्॥ लगुडादिघातेपिगोजीवनेगर्भमात्रपातेपूर्वोक्तोत्पन्नादिक्रमेणैकपाद
मर्धपादं त्रिपादंपूर्णव्रतंच॥ अतिवृद्धातिकृशातिबालातिरोगिणीनांवधेज्ञानाज्ञानकृतेपूर्वोक्तार्द्धं॥ अतिवृद्धत्वंतृणादिच्छेदना-
सामर्थ्यम्॥ अतिकृशत्वंदोहवहनायोग्यत्वं॥ अतिबालत्वंद्विवर्षीयत्वम्॥ एकवर्षत्रिवर्षयोर्वधेतुपूर्वोक्तक्रमेणपादेपादत्रयंच॥ ए
कप्रयत्ननिष्पन्नानेकगोवधेतुप्रायश्चित्तेद्वैगुण्यम्॥ एवंगृहदाहादिस्थलेपि॥ क्रमकृतेत्वनेकगोवधेप्रयत्नभेदेनपापभेदात्प्रतिगो
वधंयथोक्तप्रायश्चित्तावृत्तिः॥ बहुभिरेकस्याहननेयत्रयावद्भिर्हतंतस्यैवपादंपादंप्रतिपुरुषंकार्यम्॥ केचित्तुअज्ञानतःपादंपादं॥
ज्ञानतस्त्वर्धमर्धमाहुः॥ बहुभिरेकव्यापारेणद्वयोर्बहूनांचहनने प्रतिपुरुषंपादद्वयंपादत्रयंचकार्यम्॥ मिताक्षरातु बहुभिरेकद्विब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वधे कामकृते पूर्णमेव पूर्वोक्तं पादद्विपादादिकमकामकृतवधपरमित्याह ॥ प्रयत्नभेदे तु प्रतिबंधं प्रति पुरुषं प्रायश्चित्तावृत्तिः ॥ द्वाभ्यां एकस्याः द्वयोर्वा एकप्रयत्नेन वधे प्रत्येकं पूर्वमेव ॥ बहूनां वधे तूक्तरीत्या प्रत्येकं द्विगुणम् ॥ अत्यंतव्याधिपीडितमरणावस्थापन्नोन्मत्तांधवर्षन्यूनगोवधे पादमेव ॥ अधमशूद्रकैवर्तादिकस्वामिके कहायनि द्विहायनि त्रिहायणीवधे क्रमेण प्राजापत्यार्धं सार्धप्राजापत्यं प्राजापत्यद्वयं चेति ॥ अज्ञानतोऽर्धमेतत् ॥ गर्भिण्यादौ द्विगुणम् ॥ अतिरोगे तिकृशलादौ तदर्धम् ॥ अत्र यादक्षिणोक्ता सा प्रायश्चित्तद्वैगुण्ये द्विगुणा अर्धे अर्धा पादे पादरूपेत्येवं व्यवस्था बोध्या ॥ अग्निहोत्रिणो वेदपारगस्य होमधेनोः कपिलायाः गर्भिण्याः पुण्यदेशे पुण्यकाले च बुद्धिपूर्वकवधे तु वैश्यवधे वक्ष्यमाणं त्रैवार्षिकव्रतम् ॥ एकशतं गावो वृषश्चैको दक्षिणा ॥ एवमन्यान्यपि सहस्रगोदक्षिणायुतानि गुरुप्रायश्चित्तानि ॥ एवं वधविद्वद्विषये योज्यानि ॥ ॥ अथ पंचविधत्वनिर्णयः ॥ ॥ चेतनांतरव्यापारव्यवधानमंतरेण प्राणवियोगफलकव्यापाररूपवधनिष्पादकः कर्ता ॥ १ ॥ यस्तु प्रवृत्तं पुरुषं वचनादिना प्रवर्त्तयति प्रवृत्तं वा प्रोत्साहयति स प्रयोजकः ॥ २ ॥ वध्यस्य फलायनादिनिरोधकोऽनुग्राहकः ॥ ३ ॥ एतां हन्मीति वक्तुरनुमतिदाना निषेधक्षमोऽपि मौनालंबी चानुमंता ॥ ४ ॥ उपदेश्यस्य हंतुर्हेतुं कोऽमत्या द्युत्साद को निमित्तम् ॥ ५ ॥ प्रयोजकादीनां क्रमेण पादपादहानिरिति शूलपाणिः ॥ अष्टमभागहानिरिति भवदेवः ॥ पैठीनसिः ॥ हंता मंतोपदेष्टा च तथा संप्रतिपादकः ॥ प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः ॥ आश्रयः शस्त्रदाता च भुक्तिदाता विकर्मणाम् ॥ उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः ॥ अकार्यकारिणस्त्वेषां प्रायश्चित्तं प्र २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पयेदिति ॥ एवंसर्वपापेषुयथासंभवंयोज्यम् ॥ ॥ अथरोधादौप्रायश्चित्तम् ॥ ॥ क्षीणायागोरक्षीणत्वभ्रमात् ॥ रोधनेन वधेयत्स्वामिकगोवधेअज्ञानतोयत्प्रायश्चित्तमुक्तंतस्यपादः ॥ तादृश्यास्तथाभ्रमाद्बंधनेनवधेतस्यपादद्वयम् ॥ तथाभ्रमात्ह लशकटादावतिकालयोजनेनमरणेतत्पादत्रयं ॥ अतिदोहेप्येवं ॥ अंगुष्ठस्थूलहस्तत्रयप्रमाणपलाशदंडनिपातनेनतादृश्यास्तथा भ्रमाद्वधेसंपूर्णम् ॥ उक्तदंडाधिकदंडादिनावधेतद्द्विगुणमितिकेचित् ॥ क्षीणत्वज्ञानेनतुज्ञानकृतवधविहितंतस्यपादाधिकम् ॥ रो धश्चात्ररात्रौरक्षार्थंक्रियमाणरोधातिरिक्ताहारप्रचारनिर्गमरोधः ॥ बंधनंच दृढकुशकाशादिकरज्जुव्यतिरिक्तेन अयथाबंधनम काल बंधनंच ॥ योजनंच हलशकटादावतिवाहादिना ॥ भवदेवस्तु वैश्यादिस्वामिकगोःक्षैण्यज्ञानेरोधादिनावधेक्रमेणचांद्राय णपादपादद्वयपादत्रयपूर्णचांद्रायणानि ॥ अज्ञानेतुप्राजापत्यस्यैवपादादिकमित्याह ॥ शूलपाणिस्तु सर्वस्वामिकगोःक्षीणत्वं ज्ञात्वाप्रवृत्तेन पुंसारोधादिनावधेचांद्रायणपादादिकं ॥ क्षीणत्वाज्ञानेतुप्राजापत्यस्यैवपादादिकमित्याह ॥ चांद्रायणेवृषभसहि तागौर्दक्षिणा ॥ ताडनार्थमुद्यतंदृष्ट्वाभीत्याकूपादौनिपत्यमृतेप्राजापत्यम् ॥ ॥ अथास्थिभंगादिप्रायश्चित्तम् ॥ ॥ गवा मस्थिभेदेलांगूलच्छेदेकर्णशृंगोत्पाटनेकटिभंगेचर्मनिर्मोचनेचषण्मासाभ्यंतरेमरणेपूर्णप्रायश्चित्तम् ॥ षण्मासोत्तरंमरणेतद र्धं ॥ जीवनेचमासार्द्धम् ॥ गोमूत्रसहितयावकपानंसर्ववर्णानां ॥ एतच्चैकप्राजापत्यसमम् ॥ हलशकटयोर्विप्रेणवृषभवाहने प्राजापत्यद्वयम् ॥ योषितोद्विगुणंसर्वेषां ॥ सस्पृष्टगोवृषभयोर्येनकेनापिदोहनेवाहनेचचांद्रायणद्वयम् ॥ कपिलादोहनेविप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याप्येतदेव ॥ उत्सृष्टवृषभगोवधे द्विजस्य कपिलागोवधोक्तं प्रायश्चित्तम् ॥ शूद्रस्य तु विशेषः ॥ वृषभादेरुत्सृष्टत्वे स्वत्वाभावेपि भूत
पूर्वस्वत्वमाश्रित्य यत्स्वामिकवृषभादिवधकर्तुः प्रायश्चित्तमुक्तं तत्स्वामिकं तत् द्विगुणं बोध्यं ॥ अंडनाशे लिंगच्छेदने च मृततुल्य
प्रायश्चित्तम् तदनंतरं मरणे च द्विगुणम् ॥ ॥अथ पालननिमित्तवधे॥ ॥तत्राविभक्तानां भ्रातॄणां मध्ये सर्वानुमत्या एके
न प्रायश्चित्ताचरणे सर्वेषां पापक्षयान्न पृथक् प्रायश्चित्ताचरणम् ॥ तत्र शूद्रस्वामिनो रक्षणभावनिमित्तकवधे यत्किंचिद्दक्षणा
दिकं केवलं प्राजापत्यं ॥ द्विजस्वामिनस्तु सशिखं मुंडितस्य त्रिसंध्यावगाहनशीलस्य पूर्वोक्तचर्मावृतस्य गोव्रजवासिनो दिवारा
त्रं तन्मध्ये स्थितस्य प्राजापत्यम् ॥ अन्ते च ब्राह्मणभोजनमनडुत्सहिता गौश्च दक्षिणा ॥ इति कर्तव्यतासहित प्राजापत्याशक्तौ
धेनुद्वयं दक्षिणा प्रागुक्तैव ॥ शूलपाण्यादयस्तु सर्वेषां केवलं प्राजापत्यम् ॥ तदशक्तौ एकधेनुदक्षिणा तु प्रागुक्तेत्याहुः ॥ उत्सृष्टवृष
भादिषु स्वत्वाभावादपालनान्मृतेष्वपि उत्स्रष्टुर्न दोषः ॥ अपालनमृत्युश्च शीतानिलोष्णेंधनशून्यागाराद्यपेक्षा जलादिमज्जन कूपा
दिपतन सर्पविद्युद्धनन श्वभ्रपातव्याघ्रादिभक्षणकृतः ॥ एतच्च पालनासमर्पणे ॥ तत्समर्पणे तु पालकस्यैव दोषः ॥ परंतु यावत्का
लं पालकाधीनता तावदेव ॥ अशक्तपालकसमर्पणे तु स्वामिन एव दोषः ॥ एवमिक्षुतैलयंत्रार्थं नियुज्य सन्निधावीक्षणे देवाद्गृहदा
हगृहभंगाभ्यां गोमरणे घंटाभरणादिदोषेण गवां विपत्तौ चार्धप्राजापत्यम् ॥ यदि गोः शक्तिमनपेक्ष्य दत्तभारादिदोषेण मरणं त
दा प्राजापत्यम् ॥ शक्तपालकस्य सन्निधिसत्त्वे कांतारदुर्गगृहदाहावटेषु लतापाशाद्यावृतस्य गोर्यदि मरणं तदा प्राजापत्यपाद ए

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वेत्याहुः॥ तथा त्रिहायनपर्यंतवत्सस्यारक्षणेपि पाद एव॥ गोमांसभक्षकाय गोविक्रये चांद्रायणं॥ यदि तस्मै पालकेन धेनर्वा वि
क्रियंते तदा तत्तत्स्वामिकगोवधप्रायश्चित्तं प्राजापत्यादिकम्॥ पालकबहुत्वे तु पालकानामविभक्तानां सर्वेषामेकम्॥ विभक्तानां
तु पादं पादम्॥ बहूनां गवां पालननिमित्तवधे पालकस्य द्विगुणम्॥ तत्रापि बहुकर्तृत्वे प्रत्येकं द्विगुणम्॥ पालकस्य द्रव्याभावे
स्वामिना द्रव्यं दत्वा कारणीयं॥ म्लेच्छपालकत्वे तु स्वामिना कर्तव्यम्॥ ॥अथौषधाद्युपचारे॥ ॥दाहच्छेदशिराभेदप्रयो
गैरुपकुर्वतः॥ द्विजानां गोहितार्थं च प्रायश्चित्तं स्मृतो न हि॥ इदं चाज्ञानेन आदरेण यथावदुपचारे एव॥ शास्त्रस्यानादरेणायथाव
दुपचारे च॥ प्राजापत्यव्रतमंते धेनुर्दक्षिणा॥ भिषगपि विरुद्धौषधदानेनाकामतोप्येकगोवधे द्विगुणं गोवधप्रायश्चित्तं चरेदिति
मिताक्षरादौ॥ अतिदाहेऽप्येतदेवेति केचित्॥ एवं यंत्रणे गोचिकित्सार्थं गूढगर्भविमोचने औषधस्नेहाहारदानेऽपि गवादिमृते न
प्रायश्चित्तम्॥ इदमपि स्वेच्छया गृह्यमाणे एव॥ हठाद्धिकं दीयमानमाहारस्नेहादिकं मृतिहेतुश्चेत् पादकृच्छ्रः॥ एवं नगरग्राम
दाहेषु अबद्धानां मृतौ पालकस्य स्वामिनश्च न दोषः॥ बंधने तु पादकृच्छ्रः॥ एवं व्याधियुक्तानां दंडाभिघातादिना मूर्छयाभिपतने
ऽनंतरगमनग्रासतोयपानैस्तदानींतनताडनस्य मरणहेतुत्वाभावनिश्चये पूर्वव्याधिनष्टानां न प्रायश्चित्तम्॥ यदि पूर्वव्याधि
युतापि प्रहारजनितपीडयैव ग्रासादिकं न कृत्वैव म्रियते तदार्धपादं वा प्रायश्चित्तं भवत्येव॥ शालादौ गवां मशकादिनिवृत्त्यर्थं धू
मायाग्निं प्रज्वाल्य पालकादेस्तत्रास्थितौ दैवात्तदग्निना बंधनरहितस्य गवादेर्मरणे दोषाभावः॥ तत्रानवस्थितौ बंधने वा पा

CC-0. In Public Domain. Digitization by eGangotri

दत्कृच्छ्रः त्रिशूलादिस्थिरतरचिन्हकरणेन गोण्यादिवाहनादिभिश्चर्मनिर्मोचने दोषाभावः॥ मत्ता गौर्यदि निवारयंतं पालकमतिक्रम्य
गर्तकूपादौ पतनादिना म्रियते तदापि न दोषः॥ शंकारहिते वनादौ सति सन्निधौ पालकेऽकस्मादागतव्याघ्रादिना मरणेपि न दोषः॥
पालकस्य तत्रासत्वे तु दोष एव॥ एवं राजसैन्यादिभिः शरादिभिर्ग्रामघातराष्ट्रघातवेश्मभंगातिवृष्टिव्याध्युपद्रववृक्षादिपतना
दिभिरुपद्रुतानामबद्धानां पालकसत्वे मरणे दोषो न॥ पालकासत्वे बंधने च दोषाद्धुक्तपादः प्रायश्चित्तम्॥ गोहरणे तु अश्वगोभूमि
कन्याश्च हृत्वा चांद्रायणं चरेत्॥ क्षुद्रान्पशून्समाहृत्य प्राजापत्यं समाचरेत्॥ इति जाबाल्युक्तं प्रायश्चित्तम्॥ गोवधोक्तं सर्वं वृषव
धेपि॥ स्त्रीत्वस्याविवक्षितत्वात्॥ दानं तु स्त्रीगवीनामेव॥ विधेयगतत्वेन स्त्रीत्वस्य विवक्षितत्वात् इति मयूखे॥ अत्र वपने विशे
षः॥ पुंसां गोवधोक्तप्रायश्चित्तपादे कंठादधःस्थितांगलोम्नां वपनम्॥ अर्धप्रायश्चित्ते श्मश्रूणामंगरोम्णां च शिरःकेशवर्जम्॥ त्रिपा
देंगरोमश्मश्रूशिरःकेशानां शिखावर्जम्॥ पूर्णप्रायश्चित्ते सशिखं वपनम्॥ स्त्रीणां तु सधवानां वपनं न क्वापि प्रायश्चित्ते॥ किंतु स
र्वान् केशान् समुद्धृत्य द्व्यंगुलछेदनमात्रं कार्यमिति स्मृत्यर्थसारे॥ ॥ इति गोवधप्रायश्चित्तनिर्णयः॥ ॥ अथ व्रात्ये प्राय-
श्चित्तनिर्णयः॥ ॥ व्रात्यश्च पंचदशैकविंशतिवर्षरूपे षोडशद्वाविंशतिचतुर्विंशतिवर्षरूपे वा ब्राम्हणक्षत्रियवैश्योपनयनका
लेउपनयनाभावात्॥ तत्र यस्योपनयनेन्नाद्यभावेन तत्कालातिक्रमस्तस्य साधारणोक्तचांद्रायणादिचतुष्टयान्यतमं शक्त्य- २३
नुसारेण कृत्वोपनयनं कार्यम्॥ अनापदि यस्य तदतिक्रमस्तस्य मानवं त्रैमासिकम्॥ तदसमर्थस्य सशिखवपनपूर्वकमेवं विंश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिरात्रंप्रसृतिमात्रंयावकपानंपंचविप्रभोजनंच॥यस्यषोडशादिवर्षादूर्ध्वमप्यनापदिबुद्ध्यातदतिक्रमस्तेनम सद्वयंयावकपानं मासंपयोमासार्द्धमामिक्षाष्टरात्रंघृतंषड्रात्रमयाचितंत्रिरात्रमभ्भक्षताअहोरात्रमुपवासइत्युद्दालकव्रतम्कार्यम्॥यस्यपितृपि तामहावनुपनीतौतस्यसंवत्सरंभैक्ष्याशनगुरुशुश्रूषादिरूपब्रह्मचर्यव्रतम्॥ततउपनयनम्॥ततोयावतापुरुषाणांउपनयनंता वत्संख्याकवर्षपर्यंतंप्रायश्चित्तार्थंयदंतियच्चदूरकइत्यादिसप्तपावमानीभिःयेनदेवाःपवित्रेणेतियज्ञपवित्राख्येनकुयानश्चित्र आभुवइतिसामपवित्राख्येनहंसःशुचिषदित्यनेनेत्येतैर्मंत्रैःस्नानंततोध्याप्यता॥यस्यतुप्रपितामहादीनामुपनयनंनानुस्मर्यते ॥तस्यद्वादशवार्षिकंपूर्वोक्तंब्रह्मचर्यम्॥ ॥ततःउपनयनं॥ ॥ततःपुरुषसंख्याकाब्दपर्यंतसुक्तमंत्रैःस्नानम्॥तदनंतरमप्यस्य गार्हस्थ्यमात्रोपदेशोनाध्यापनंनापिव्यवहारः॥तज्जन्येतुस्वकालातिक्रमप्रायश्चित्तमात्रंकृत्वायथाकालमष्टमादिवर्षसंस्कारः ॥अस्याध्ययनादिकंभवति॥ ॥इतिव्रात्यताप्रायश्चित्तं॥ ॥अथस्तेयप्रायश्चित्तम् स्तेयंचौर्यम्॥तच्चविप्रस्वामिकस्वर्णन्यू नत्वसमव्यतिरिक्तमेवोपपातकं॥स्वर्णादिचौर्यस्यमहापापत्वात्॥तत्रविप्रस्यविप्रस्वामिकंदशकुंभपरिमितंधान्यंवातत्परिमितंतंडुलाद्यन्नंवात तुल्यमूल्यंवाताम्ररजतादिकंवाअमत्यापहर्तुस्त्रैमासिकंगोवधव्रतम्॥गोचर्मगोसेवादितद्विशेषरहितंकार्यम्॥मत्याभ्यासे वाकृच्छ्राब्दम्॥क्षत्रियादेर्हर्तुःपादपादह्रासः क्षत्रियस्वस्यतावताकामतोपहारेषाण्मासिकम्॥वैश्यस्वेत्रैमासिकम्॥शूद्रस्वे चांद्रम्॥ ॥कुंभपरिमाणंतु॥ ॥अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौचपुष्कलम्॥पुष्कलानिचचत्वारिआढकःपरिकीर्तितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आढकानि च चत्वारि द्रोण इत्यभिधीयते ॥ दशद्रोणा भवेत्खारी कुंभोपि द्रोणविंशतिरिति ॥ स्मृत्यर्थसारे तु कुंभः पंचसहस्रपल
परिमाण इति ॥ सार्द्धशतद्वयपणमूल्यक्षत्रियस्वामिकगृहक्षेत्रभूमिवापीकूपतडागादिपानीयरसानां तत्स्वामिकस्य निक्षेपस्य
तावन्मूल्यरजतवस्त्ररत्नादेश्च नारीनराश्वानां चापहारे चांद्रम् वैश्यशूद्रस्वे तादृशे तादृशे पूर्वोक्तक्रमेण चांद्रार्धतत्पादौ ॥ विप्रस्वे
तादृशे स्वर्णस्तेयसमम् ॥ तेन षडब्दम् ॥ स्वर्णस्तेयसमवदिति स्मृत्यर्थसारे ॥ अत्र षडब्दं न्यूनं कल्प्यम् ॥ त्रपुसीसलोहादिद्रव्या
णामल्पप्रयोजनानां सार्द्धशतद्वयपणपंचदशांशमितानां हर्तुः सांतपनम् ॥ एकवारभोजनपर्याप्तानां भक्ष्यभोज्यपानादीना
मपहारे तत्सममूल्यकानां यानशय्यासनोपानहपुष्पफलमूलपर्णमृद्भांडमधुमांसौषधस्रग्गंधद्रव्याणामपहारे पंचगव्येनाहो
रात्रं द्विवारभोजनपर्याप्ततदपहारे त्रिरात्रं तत् ॥ त्रिरात्रभोजनपर्याप्ताहारमूल्ये प्येतदेव ॥ तृणकाष्ठद्रुमशुष्कान्नगुडतैलच
र्मणां त्रिभोजनमूल्यानां हरणे प्येतदिति स्मृत्यर्थसारे द्वादशाहारपर्याप्तब्राह्मणस्वामिकमणिमुक्ताप्रवालताम्ररजतशंखशु
क्तिलोहकांस्योपलापहारे द्वादशाहं कणान्नता त्रिभोजनपर्याप्ताहारमूल्यकार्पासकीटजजीर्णद्विशफैकशफपशुरज्जुपक्षि
णां अपहारे एकउपवासः ॥ त्र्यहं पयःपानं वा गजाश्वभूमिकन्याहरणे षडुपवासाः ॥ अभ्यासे चांद्रायणम् ॥ षण्मासं गोमूत्रयाव
काहारो वा ॥ एवं पुस्तकादिचौर्येष्वपि ह्रियमाणाल्पत्वबहुत्वाभ्यां प्रायश्चित्तादि कल्प्यम् ॥ देवद्रव्यापहारे ब्दम् ॥ यस्य वर्ण २४
स्य वृत्तिं यो हरेत्स तद्वर्णवधप्रायश्चित्तं पादोनं कुर्यात् ॥ अत्र सर्वत्र सकृदभ्यासद्रव्याल्पत्वमहत्त्वे देशकालस्वाम्यपहर्तृगुणवैगु-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्याद्यपेक्ष्यप्रायश्चित्तगुरुलघुताज्ञेया ॥ इदंचप्रायश्चित्तमपहृतद्रव्यस्वामिनेतत्द्रव्यंदत्वैवकार्यंसति स्वामिनि ॥ वैदिकाग्निभ्यः
काष्ठंगवेतृणंहर्तुः पांथद्विजस्येक्षुद्वयंमूलकद्वयंचकणकव्रीहिगोधूमयवमुद्गमाषाणांमुष्टिंक्षेत्राद्धरतःस्वाम्यनिषिद्धस्यस्तेय
दोषोनेतिमयूखे ॥ ॥ इतिस्तेयप्रायश्चित्तानि ॥ ॥ अथऋणानपाकरणेप्रायश्चित्तम् ॥ ॥ यज्ञाध्ययनप्रजारूपाणांदे
वर्षिपितृऋणानांअनपाकरणंआत्मपितृपितामहादिभिरुत्तमर्णात्गृहीतानांधनानांअदानंचतत् ॥ तत्रयज्ञब्रह्मचर्याद्यकरणरूप
देवऋष्यादिऋणेउपपातकसामान्योक्तचांद्रादिष्वेकंशक्त्याकार्यम् ॥ सर्वथातदसंभवेवर्षांतेवैश्वानरेष्टिःकार्या ॥ साचस-
त्याधानादिनातदधिकारेतदकरणेप्रतिवर्षंकार्या ॥ उत्तमर्णऋणादानेतुकालविलंबादिप्रयुक्तमेतच्चांद्राद्यन्यतमंप्रायश्चित्त
उत्तमर्णायतद्धनंदत्वाकार्यंसतिधने ॥ ॥ अथानाहिताग्निताप्रायश्चित्तम् ॥ ॥ साचसत्यधिकारेग्न्याधानाभावःतत्रव
र्षपूर्तौप्रतिमासंत्रिरात्रम् ॥ ततःप्रत्यब्दंचांद्रादिष्वेकंशक्त्याकार्यम् ॥ अनापदितुत्रैमासिकम् ॥ पितर्यनग्नावाधातुरयष्टरि
यष्टुम्ब्रक्षतस्यब्रात्यपशुकार्यः ॥ औपासनाग्न्यसंधानेआवर्षंप्रतिमासंउपवासः ॥ अब्देचांद्रादिष्वेकं ॥ यद्वाप्रथमवर्षेकृच्छ्रः
॥ द्वितीयेतिकृच्छ्रः ॥ तृतीयेकृच्छ्रातिकृच्छ्रौ ॥ ततश्चांद्रम् ॥ मयूखेइदंज्येष्ठस्यैवतच्चदायकालदायाद्यकालगृहपतिमरणरूप
कालत्रयातिक्रमे ॥ कनिष्ठस्यतुसतिज्येष्ठेऔपासनाग्निरहितेअनधिकारादेवनप्रायश्चित्तं ॥ एवंपितरिताहशेक्षतस्यापि ॥
॥ अथापण्यविक्रयेप्रायश्चित्तम् ॥ ॥ अपण्यस्यलवणादेर्विक्रयोहिंसः ॥ तत्रक्षराविक्रयेसौम्यकृच्छ्रचतुष्टयम् ॥ गु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डतिलपुष्पफलमूलपक्वान्नविक्रये सौम्यकृच्छ्रः॥ मत्या प्राजापत्यम्॥ लाक्षालवणामधुमांसतैलक्षीरदधितक्रघृतगंधचर्मरक्तव
स्त्रतिलाद्यन्यतमविक्रये चांद्रम्॥ मत्याभ्यासे तत्त्रयम्॥ अमत्या सकृदुपवासः॥ पयःपायसापूपेक्षुरसगुडखंडादीनां स्नेहप-
क्वानांच विक्रये पराकः॥ पूगमंजिष्ठाखर्जूरद्राक्षाणां प्राजापत्यम्॥ पनसस्य त्रिदिनम्॥ कदलीनीरनारीकेलजंबीरबीजपूरकनारंगा
णां पादकृच्छ्रः॥ कर्पूरादेरर्धकृच्छ्रः॥ कस्तूरिकादीनां कृच्छ्रः॥ ऊर्णाकेशकेसरिणां भूधेन्वनडुहाश्मशस्त्राणां च विक्रये चांद्रम्॥ अभक्ष्य
मांसतदस्थिशृंगनखशुक्तिहिंगुगुग्गुलुसर्वरसहरितालमनःशिलांजनलवणक्षारमणिमुक्ताप्रवालवैणववेणुमृन्मयानां तप्तकृच्छ्रः
॥ अमत्या सकृदुपवासः॥ विषशस्त्रगोनीलीकौशेयविक्रये प्राजापत्यम्॥ कृष्णपीतादिवस्त्रकृष्णाजिनकृष्णावस्त्रविक्रये त्र्यहम्
॥ गजविक्रये चांद्रम्॥ खराश्वाश्वतरकरभाणां विक्रये पराकः॥ नारीविक्रये चांद्रम्॥ पुरुषविक्रये तद्द्वयम्॥ कन्यापुत्रविक्रये त
द्द्वयं द्विगुणम्॥ एकाहाहृदविक्रये चांद्रम्॥ अंगानां विक्रये पराकः॥ स्मृतीनां कृच्छ्रम्॥ इतिहासपुराणानां सांतपनम्॥ रहस्यपं
चरात्राणां कृच्छ्रः॥ इतरविद्यामात्रस्य पादकृच्छ्रम्॥ सोमविक्रये उक्तप्राण्यतिरिक्तप्राणिविक्रये च तप्तकृच्छ्रः पुनरुपनयनं च॥
तुषकपालभस्मरोमपिण्याकानां प्राजापत्यम् मधूच्छिष्टत्रपुसीसकृष्णलोहोदुंबरखड्गपात्रगोधूमविक्रये महासांतपनम्॥
आगमतडागोदपानपुष्करिणीस्कृतविक्रये त्रिषवणस्नायी अधःशायी चतुर्थकालाहारो गायत्रीं दशसहस्रं जपन् संवत्सरेण शु २५
ध्येत्॥ हीनमानहीनोन्मानाभ्यां विक्रये ऽन्यमिश्रिता ऽन्यवस्तुविक्रये चैवम्॥ तत्र मानं प्रस्थादि॥ उन्मानं तुलादि॥ विषमतुलादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारणेर्धकृच्छ्रः॥ निगडादिविक्रये प्राजापत्यम्॥ प्रतिश्रयोद्यानसभाप्रपादिविक्रयेतप्तकृच्छ्रः॥ अत्र सर्वत्र दंडशास्त्रपर्यालोचनेन प्रायश्चित्तन्यूनाधिक्यं योज्यम्॥ तिलतैलदधिक्षौद्रलवणद्राक्षामद्यमांसपक्वान्नस्त्रीपुरुषहस्त्यश्वगोवृषभगंधरसक्षौमकृष्णाजिनसोमनीलीविक्रयात्सद्यः पतति विप्रः॥ प्रायश्चित्तं त्वकामकृते॥ एतत्सर्वमापदि वैश्यवृत्त्याजीवतो विप्रस्यैव॥ अनापदि तु वैश्यभिन्नानां सर्वेषामेव॥ शूलपाणिरुक्त॥ आपदि शूद्रस्यैव दोषाभावः॥ क्षत्रियस्यापि भवत्येव प्रायश्चित्तमित्याह॥ शूद्रस्यापद्यपि मधुचर्मलाक्षाशकरमांसानां विक्रये दोष एव॥ तिलगोधूमादीनां तु क्रीतानां विक्रय एव दोषः॥ कृष्युत्पादितानां विक्रये तु नेति बोध्य इदं च प्रायश्चित्तं जातं तत्तद्विक्रयार्जितधनोत्सर्गपूर्वकं कार्यमनापदि॥ ॥इत्यपण्यविक्रये प्रायश्चित्तम्॥

॥अथ परिवेदने प्रायश्चित्तम्॥ ॥अकृतविवाहोग्रजोनुजेन प्रागात्मनो विवाहं कुर्वतातिक्रांतः स परिवित्तिः स च प्राजापत्यमृत्वारि कनीयसा पूर्वं परिणीतां तेन दत्ता मुद्वहेत्॥ तस्यै वहि सा भार्या नानुजस्य॥ अशास्त्रीयत्वात्तद्विवाहस्य॥ अनुजश्च व्युत्क्रमेण विवाहजन्यदोषवान् परिविदानः परिवेत्ता चोच्यते॥ अयमप्यत्या चेत्तदाचांद्रादिष्वेकं कृत्वोदांज्येष्ठाय दत्वा पुनरन्यामुद्वहेत्॥ यद्वा तामेव ब्रह्मचर्याहृतभैक्षवत् गुरुं परिभव परिहारार्थं निवेद्य तेनानुज्ञातां पुनस्तामुद्वहेत्॥ इदमेव युक्तम्॥ मत्या चेत्त्रैमासिकं॥ अकामंतश्चेत्कृच्छ्रातिकृच्छ्रौ कृत्वैवकुर्यात्॥ इदं कन्यापित्रादिदत्तोद्वाहे देशांतरस्थिते ज्येष्ठे कृतविवाहो सावित्तिप्नोति मतः परिवित्तुः॥ कन्यापित्राद्यपरिज्ञाने तत्पित्रादिभिरदत्तां बलात्कारादिना कामतो ज्ञात्वा चोद्वोदुरब्दं प्राजाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादि प्रायश्चित्तपूर्वकं पूर्वोक्तम्॥ परिवेत्तुरब्दविषये परिवित्तस्य ज्येष्ठस्य द्वौ कृच्छ्रौ परिवेदनीयायाः कृच्छ्रः पित्रादेर्दातुः कृच्छ्रातिकृच्छ्रौ॥ परिकर्तात द्याजकस्तस्य चांद्रायणम्॥ इदं निर्गुणे ज्येष्ठे॥ गुणवति ज्येष्ठे बुद्धिपूर्वकपरिवेदने परिवेत्रादयः परिकर्तारः सर्वे पतिताः संवत्सरप्राजापत्यैः शुद्ध्येयुः॥ दत्तकादीनां तु नायं दोषः॥ भिन्नोदरे च पितृव्यतनये तथा॥ दाराग्निहोत्रसंयोगेन दोषः परिवेदन इति गौतमस्मरणात्॥ भिन्नोदर इति सापत्न्यभ्रातृविषयम्॥ दत्ते चेति जनककुले ज्येष्ठभ्रातृसत्त्वेपि न दत्तकस्य विवाहादौ परिवेत्तृत्वं नापि ज्येष्ठस्य परिवित्तित्वमित्यर्थः॥ पितृव्यतनये इति देवरेणां त्यादितस्य भ्रातुः क्षेत्रजपुत्रस्य विवाहादौ देवरपुत्रादेः परिवेत्तृत्वादिकं नेत्यर्थः॥ एवं ज्येष्ठायामनूढायां या कनिष्ठा विवाहिता साग्रेदिधिषुः ज्येष्ठा तु दिधिषुः॥ तत्राग्रेदिधिषुपतिः कृच्छ्रं कृत्वा पुनस्तामेवोद्वहेत्॥ दिधिषुपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा कनीयस्याः पत्ये तां निवेद्य तस्मै न स्नाते नानुज्ञातस्तां पुनरुद्वाहयेत्॥ एवं कन्यायो योज्यम्॥ ज्ञानकामकारबलात्कारादिविषये पूर्वोक्तं संवत्सरादिकं व्यवस्थया योज्यम्॥ ॥ अथानाहिताग्नितायां प्रायश्चित्तं॥ ॥ अनाहिताग्नौ ज्येष्ठे तु कनीयानादधीत चेत्॥ पर्याधाता कनिष्ठः स्यात् ज्येष्ठः पर्याहितः स्मृतः॥ तयोः संवत्सरव्रतम्॥ इदं ज्ञात्वा कामतः करणे॥ अन्यथा प्राग्वद्योज्यम्॥ क्लीबदृष्टपत्नीपतिविरक्तसंन्यस्तातिविरोगिजडमूकगरदबधिरकुब्जवामनपंगुवृद्धतस्करविवाहानिच्छुमूढतुल्यमृतभार्याणां परिवेदने दोषो न॥ एवं धने कृष्यादौ वेश्यायां वासतस्त्यादाराग्निहोत्रानिच्छुपरिवेदनेपि॥ धनधर्मविद्यार्जनार्थं देशांतरस्थे ज्येष्ठे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वादशवर्षप्रतीक्षा ॥ कार्यांतरार्थंदेशांतरस्थेदशवर्षं ॥ ॥इतिपरिवेदनप्रायश्चित्तम् ॥ ॥अथभृतकाध्ययनादौप्रायश्चित्तम् ॥
पणपूर्वकाध्यापकादध्ययनग्रहणंभृतकाध्ययनम् ॥ पणपूर्वकमध्यापनंचभृतकाध्यापनम् ॥ तत्कर्तारोपयसाब्राह्मींसुवर्चलां
त्रीन्पक्षान्नियतंपिबेतां ॥ अनापदिशक्त्याद्यपेक्षयाचांद्रादिष्वेकं ॥ अनुप्रयोगप्रदानेप्येवं ॥ उत्कर्षहेतोरधीयानस्यकिंपठसिना
शितंत्वयेत्येवं ॥ पर्यनुयोगोनुप्रयोगदानं अनुप्रयोगप्रदाताभ्यासेपातित्यमाहुः ॥ इतिभृतकाध्ययनादिप्रायश्चित्तम् ॥ ॥अथ
पारदार्येप्रायश्चित्तम् ॥ ॥पारदार्यंचगुरुतल्पंतदातिदेशिकतल्पमव्यतिरिक्तपरस्त्रीगमनरूपम् ॥ पुरुषांतराव्यभिचा-
रितांजातिमात्रविप्रांऋतौवियोगत्वापूर्वोक्तंवार्षिकब्रह्मचर्यव्रतम् ॥ धर्माधिकर्मशीलत्वादिगुणशालिनींतादृशींगंतुर्विप्र-
स्यद्विवार्षिकंप्रायश्चित्तम् । श्रोत्रियपत्न्यांतादृश्यांत्रिवार्षिकंतत् ॥ ताभिर्यदिद्रव्यंदत्तंभवेत्ताहितत्संत्याज्यंप्रायश्चित्तम् ॥ द्वित्रि
चतुर्वारगमनेक्रमेणद्वित्रिचतुर्गुणं ॥ अग्रेचपातित्यम् ॥ एवंद्वितीयतृतीयादिगमनेपि ॥ शूलपाणिमिताक्षरादयस्तु ॥ एकस्यामे
वद्वित्रिवारगमनेपूर्वोक्तमेवपादहान्येतिप्रोचुः ॥ क्षत्रियादीनांस्वस्ववर्णास्त्रीगमनेपादहानिः ॥ विप्रस्यक्षत्रियादिस्त्रीषुद्विवा-
र्षिकत्रिवार्षिकषाण्मासिकानिगुणवतीषु ॥ शूद्रस्यपरकीयायांगुणवत्यांशूद्रायांगंतुः षाण्मासिकं ॥ अकामतः सर्वत्रैतदर्धम् ॥ स्व
भर्तृव्यतिरिक्तसवर्णैकपुरुषगामिन्यांगंतुः पूर्वोक्तमेवपादहान्याकार्यम् ॥ पुरुषद्वयगामिन्यांद्विपादहानिः ॥ पुरुषत्रयगामिन्यां
त्रिपादहानिः ॥ पुरुषचतुष्टयगामिन्यांस्वैरिणीसंज्ञकायांविप्रायांगंतुस्त्र्यहोपवासपूर्वकंघृतपात्रदानम् ॥ तादृश्यांक्षत्रिया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रा॰शो॰ यांउपवासत्रयपूर्वकमाढकयवदानम्॥ वैश्यायांगंताचतुर्थकालाहारोविप्रान्भोजयेत्॥ शूद्रायांगंतुःसचैलस्नानपूर्वकंउदकुंभ-
२७ दानम्॥ पंचमादिगामिन्यांबंधकीसंज्ञायांअष्टमुष्टियवदानम्॥ तादृश्यांशूद्रायांविप्रस्योदकुंभदानम्॥ क्षत्रियायांधेनुदानम्॥
वैश्यायांवस्त्रदानम्॥ अभ्यासेप्रायश्चित्तावृत्तिः॥ गौडास्तुविप्रादेःक्षत्रियादिगमनस्यैवाधोधोदिहानिमाहुः॥ अनृतौजातिमा-
त्रविप्रांविप्रांगत्वामानवंत्रैमासिकंकुर्यात्॥ ईदृशक्षत्रियादिस्त्रीषुक्रमेणद्वैमासिकचांद्रायणमासिकानि॥ क्षत्रियादीनांस्वस्व
वर्णास्वनृतौगमनेद्वैमासिकान्येव॥ आरूढगर्भोत्सत्तौतुतत्तद्विषयेसर्वत्रोक्तमेवद्विगुणंकार्यम्॥ शूद्रायांगर्भोत्सत्तौतुत्रीणिवर्षा-
णिचतुर्थकालेनक्तंभुंजीत॥ विप्रस्यानिच्छंतीषुविप्रादिस्त्रीषुगंतुरनुक्रमेणगोघ्नत्रैमासिकद्वैमासिकचांद्रमासिकानि॥ गोभिन्न
स्तिर्यग्योनिषुमाहिषीगर्दभादिषुगमनेसचैलस्नानंगोभ्यस्तृणभारदानंच॥ एकउपवासोवा॥ कामतोभ्यासेकृच्छ्रपादम्॥ अ-
त्यंताभ्यासेप्राजापत्यम्॥ शुनीगमनाभ्यासेअतिकृच्छ्रः॥ गविसकृद्गमनेउपवासत्रयपूर्वकंगोदानम्॥ कामतस्तुत्रैमासिकंगोघ्न
व्रतम्॥ कामतोभ्यासेप्राजापत्यंत्रैमासिकंच॥ कामतोत्यंताभ्यासेसंवत्सरव्रतम्॥ आजन्मात्यंताभ्यासेगुरुतल्पसमं॥ रजकच
र्मकारबुरुडकैवर्तमेदभिल्लाःसप्तांतेवसायिनस्तेषांस्त्रीषुव्याधशैलूषनटवेणुजीविकापालकम्लेच्छादिस्त्रीषुचविप्रस्यचका
मतःसकृद्गमनेचांद्रद्वयम्॥ अमत्यापराकश्चांद्रंवा॥ रेतःसेकात्प्राक्निवृत्तौकार्यम्॥ एतदभ्यासेतुकार्यावृत्तिः॥ आस्वेवका २७
मतोभ्यासेकृच्छ्राब्दम्॥ अज्ञानात्तथाभ्यासेचांद्रद्वयं॥ गर्भोत्सत्तौत्रैवार्षिकं॥ अज्ञानतआरूढचतुर्विंशतिवारगमनात्सांतित्यं॥ -

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानतस्तदर्धादितिगौडाः॥ संवत्सरादर्वाक्ज्ञानतोद्वादशधागमनादज्ञानतश्चतुर्विंशतिवारंगमनाभ्यासेचद्वौमासौभैक्ष्यभुक्द्वौ मासौगोमूत्रयावकभुक्द्वौमासौपंचगव्याशी॥ एवंषण्मासाच्छुध्यति॥ अंत्यजवत्शौंडिकादिस्त्रीषुयोज्यम्॥ अमत्यासकृद्वक्ष्य- माणचांडालादिस्त्रीषुगमनेषडब्दं॥ गर्भोत्पत्तौद्वादशवार्षिकं॥ ज्ञानतोभ्यासेवाग्निप्रवेशादिनामरणमेव॥ क्षत्रियादीनांपादहा निः॥ ज्ञानेतुसर्वेषांमरणमेव॥ अनुपनेतृभ्रातृजायायांमत्यासकृद्गमनेचांद्रम्॥ मत्याक्रियासिद्धेः प्राक्निवृत्तौचांद्रम्॥ मत्या- क्रियासिद्धिपर्यंतंसकृद्गमनेअमत्याभ्यासेचसंवत्सरंविप्रकुलेभैक्ष्यं॥ मत्याभ्यासेतुगुरुतल्पसमं॥ एतदेवानुपनेतृपितृव्यमातुलजा ययोः विधवास्वपरस्त्रीषुगमनेकृच्छ्राधिकंतत्तत्पूर्वोक्तप्रायश्चित्तम्॥ आस्वरजस्वलास्वगमनेप्रकीर्णकप्रकरणोक्तरजस्वलाप्राय श्चित्तैःसहतेषांसमुच्चयः॥ तत्राप्यधिकेनन्यूनस्यप्रसंगात्सिद्धिः॥ साम्येतुतंत्रं॥ यत्तुरजस्वलागमनमनुपातकमितितत्तादृश्यां श्रोत्रियपत्न्यांकामतोभ्यासेबोध्यम्॥ ॥अथस्त्रीणांप्रायश्चित्तम्॥ ॥यत्पुंसःपारदार्येषुतच्चैनांचारयेद्व्रतमिति॥स्त्री णामर्धइतितुस्त्रीपुंससाधारणव्रतोपदेशविषयं॥इदंचस्त्रीणांसमानेषुउत्तमेषुवावर्णेषुइच्छापूर्वकव्यभिचारएव॥ अनिच्छं त्यास्तुमलिनायाःअधःशयानायाःपिंडमात्रोपजीविन्यागृहेभर्त्रागुप्तमवरुद्धायाःकृच्छ्रंपराकोवाशक्त्यपेक्षया॥ अभ्यासेचां- द्रम्॥ अकामतोब्राह्मण्यावैश्यक्षत्रियगमनेमासंतदर्धंचक्रमेणगोमूत्रयावकपानं॥ज्ञानतस्तुसकृच्छ्रंचांद्रद्वयम्॥ सकृच्छ्रं चांद्रमेकंचांद्रंचक्रमेण॥ अनिच्छंत्याःस्वपतिभ्रांतिमत्यावाशूद्रगमनेरेतःसेकात्प्राक्निवृत्तौसकृच्छ्रंचांद्रम्॥ रेतःसेकेस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृच्छ्रं चांद्रत्रयं॥ बुद्धिपूर्वकंगर्भपर्यंतंक्षत्रियवैश्यगमनाभ्यासे ऽ निच्छयाक्षत्रियवैश्यगर्भप्रसवे चकृतचिन्हायानिर्वासनम्॥-
शूद्रविषयेतुकामतः संभवेगर्भानुपत्तावपिअनिच्छयोत्पन्नगर्भस्त्रावेपिचतथानिर्वासनम्॥ तादृक्क्षत्रियायावैश्यगमनेसकृ
च्छ्रंचांद्रायणं॥ शूद्रसंगमेसकृच्छ्रंचांद्रद्वयम्॥ वैश्यायास्तादृश्याः शूद्रसंगमेसकृच्छ्रंचांद्रम्॥ शूद्रायाः शूद्रगमनेप्राजापत्यम्॥
अज्ञानतः क्षत्रियायाः विप्रक्षत्रवैश्यगमनेषुक्रमेणार्द्धकायकायातिकृच्छ्राणि॥ वैश्यायाविप्रक्षत्रियवैश्येषुगमनेकृच्छ्रपाद कृ-
च्छ्रार्द्धकायानि॥ शूद्रायाविप्रक्षत्रियवैश्येषुअहोरात्रत्रिरात्रार्द्धकृच्छ्राणि॥ विप्रायागर्भोत्पत्तौतत्प्रसवेचविप्रगर्भेपराकः॥ क्षत्र
गर्भेचांद्रं॥ वैश्यगर्भेसंपराकंचांद्रम्॥ इदमकामतः॥ कामतश्चेद्द्विगुणम्॥ सर्वत्रप्रागुक्तेनसमुच्चयइत्यूर्ध्वः॥ यदाशूद्रगर्भं
प्रसूतेतदात्यागः पतितत्वात्॥ केचिद्विप्रायाः शूद्रगर्भस्त्रावेपातेचचांद्रत्रयम्॥ कामतोद्विगुणमित्याहुः॥ एवंक्षत्रियवैश्यस्त्रि
योर्विप्रादिगर्भेपादपादपादन्यूनम्॥ यदात्वाहितगर्भाएवव्यभिचरंतितदागर्भबाधशंकयादशमासोत्तरप्रसवेसनिप्राय
श्चित्तमाचरेयुः॥ गर्भस्यतुनदोषः॥ तच्चमासंयावकपानं॥ यदात्वौध्धत्यात्स्त्रियः प्रायश्चित्तंनेच्छंतितदातासांनासाकर्णा
दिकर्तनं॥ यदाविप्रस्त्रीप्रागुक्तरजकादीनकामतोगच्छंतितदाचांद्रत्रयम्॥ चांडालाद्यंतेवसायिगमनेतुचांद्रचतुष्टयम्॥-
मत्याद्विगुणम्॥ रेतःसेकात्प्राङ्निवृत्तौचांद्रमेव॥ गर्भोत्पत्त्यनंतरंअंत्यजगमनेतुप्रसवोत्तरमेवप्रायश्चित्तम्॥ तदनुष्ठा २८
नंयावत्पृथगवतिष्ठेत्॥ नतुगृहेप्रचरेत्॥ तच्चसार्द्धकृच्छ्राब्दंहिरण्यंवासोधेनुर्वादक्षिणा॥ इदमकामतः॥ मत्यांत्यजसंग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri

मेतु मरणाच्छुद्धिः॥ रजकादितो गर्भोत्पत्तौ तत्त्यागएव ॥ प्रायश्चित्ताकरणे तु पुल्लिंगेनां कनीयावध्येत्यन्ये॥ अनिच्छंत्याबलादानु
लोम्येन व्यभिचारे कृच्छ्रम् ॥ द्विर्भोगे पराकः ॥ त्रिरैंदवं॥ रेतःसेवात् प्राक् निवृत्तौ उपवासत्रयम् ॥ एवं बंदिग्राहं गृहीत्वा बलाद्भुक्ता
याः सांतपनम् ॥ तथांत्यजाद्युपभोगाभ्यासे त्यागएव॥ मनसा भर्तुरभिचारे त्रिरात्रं ॥ क्षीरोदभोजनमधःशयनं चतुर्थेह्नि अ
प्सु मग्नायाद्वाविंशत्यधिकचतुःशताहृतगायत्रीमंत्रेणाभिषेकः॥ वाचाभिचारे मासं क्षीरोदनमन्यत् प्राग्वत् ॥ रजोदर्शने तु ते
नैव वाचिकमानसिकव्यभिचारशुद्धिः॥ प्रायश्चित्तं तु रजोदर्शनात् प्राक् व्यवहार्यत्वसिद्ध्यै ॥ पतिघ्न्याः गुरुशिष्यादिगर्भायाः
कृतचिन्हायाः गृहान्निर्वासनमेव॥ इदमपि प्रसवे एव न तु स्त्रावादौ॥ अन्यगर्भायास्तु यावत्प्रायश्चित्तं गृहे निरोध एव॥
शूद्रस्य विप्रस्त्रीगमने वीरणकुशवेष्टितस्याग्नौ दहनं विप्रस्त्रियास्तु वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य राजमार्गे
भ्रामयेत् ॥ ततः पूता भवेत् ॥ वैश्यस्य लोहितदर्भैर्वेष्टितस्याग्नौ प्रक्षेपणम् ॥ विप्रायाः प्राग्वत् ॥ क्षत्रियस्य शरपत्रैर्वेष्टितस्य त
त् ॥ विप्रायाः पूर्ववत् एवं वैश्यस्य राजकन्यायां शूद्रस्य राजन्यवैश्यस्त्रीगमनेपि ॥ ज्ञानत इच्छापूर्वकसंगमे इदम् ॥ अकाम
तः स्वभार्याभ्रांत्या शूद्रस्य विप्रस्त्रीगमने द्वादशवार्षिकं॥ वैश्यस्य नवाब्दम् ॥ क्षत्रियस्य षडब्दम् ॥ एवं शूद्रस्य क्षत्रियवै
श्यस्त्रीगमने षड्वार्षिकं वैश्यस्य क्षत्रस्त्रीगमनेपि षडब्दं ॥ एतदपि गर्भानुत्पत्तौ द्विगुणम् ॥ शूद्रस्याकामतोत्यंतव्यभिचा
रिविप्रस्त्रीगमने मासं गोमूत्रयावकहारकता॥ वैश्यक्षत्रिययोः कृच्छ्रं सांतपनम् ॥ ॥ इति पारदार्योपपातकप्रायश्चित्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नि॥ ॥अथ परिवित्तिवार्धुष्यलवणप्रायश्चित्तानि॥ ॥ कनीयसि कृतविवाहे ज्येष्ठस्य विवाहराहित्यं परिवित्तत्वं तदान्य
रिवित्तिस्तत्प्रायश्चित्तं परिवेदनप्रकरण एवोक्तम्॥ वार्धुष्यं निषिद्धवृध्द्युपजीवनं तत्र चान्द्रादिष्वेकं त्रैमासिकं वा जातिशक्ति
गुणाद्यपेक्षया योज्यम्॥ लवणक्रिया लवणोत्पादनं तत्राप्येवं बोध्यम्॥ ॥ इति परिवित्तिवार्धुष्यलवणक्रियाप्रायश्चि
त्तानि॥ ॥ अथ स्त्रीशूद्रवैश्यक्षत्रवधे प्रायश्चित्तानि॥ ॥ तत्रात्रेय्या अगर्भिण्याः स्त्रिया वधः कामतः गुणवत्तरब्रा
ह्मणीवधे विप्रस्य षड्वार्षिकं ब्रह्महत्याव्रतम्॥ क्षत्रियवैश्यशूद्रजातिस्त्रीवधे तदर्धं तदर्धं तदर्धानि॥ अप्रत्या चेत्सर्वत्र तत्त
दर्धं॥ सापत्नमातृभगिनीस्नुषाभार्यादि प्रत्यासन्नगुणवत्तरवधेप्येतदेव॥ निर्गुणवरसापत्नभगिनीपितृष्वसृमातृष्व
सृमातुलानीपितृव्यजायाभ्रातृव्यजायाश्वश्रूणां वधे एतदेव पादोनम्॥ निर्गुणतरायाः सपिंडसगोत्रस्त्रिया वधेऽर्धं॥ अ
सोमपाग्निहोत्रिश्रोत्रियपत्नीत्वादिगुणविशेषे द्विगुणम्॥ गुणानामाधिक्ये प्रायश्चित्ताधिक्यं॥ सकृत्सवर्णव्यभिचारिणी
नां ब्राह्मण्यादीनां वधे वृषभैकादशगोदानदक्षिणासहितसंवत्सरव्रतं गोदानसहितषाण्मासिकव्रतं धेनुसहितसांतपनं धे
नुद्वयदानं चेति क्रमेण॥ इदं कामतः अकामतश्चेत्तदर्धम्॥ अथ सकृत्सवर्णव्यभिचरितासु अप्रसूतास्वर्धम्॥ प्रातिलोम्येन
व्यभिचरित ब्राह्मण्यादिवधे तु गोवधोक्तं यथार्हं योज्यम्॥ प्रातिलोम्येनात्यंतव्यभिचरितानां तत्प्रसूतानां ब्राह्मण्यादीनां २९
वधे क्रमेण चर्मकार्मुकच्छागमेषदानानि॥ चर्मात्र चर्ममयं जलभांडम्॥ अज्ञानत इदं॥ ज्ञानतस्तद्द्विगुणम्॥ स्मृत्यर्थसारे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु ज्ञानतो वधे षट् चतु र्द्वे क मासाः प्रसूतादीनां वधे चैवमित्युक्तम् ॥ अप्रसूतास्तु किंचिदधिकम् ॥ अनुलोमेनात्यंतव्यभि
चरितास्तु ततो पि किंचिदधिकम् ॥ गणिकाकर्मणाजीवंतीनां विप्रादिकांतानां वधे किंचिज्जलदानम् ॥ जलस्पर्शमात्रमि
त्यन्ये पत्यादिहननशूद्रगमनादिभिरतिदुष्टब्राह्मण्यादिवधे तु न किंचित्प्रायश्चित्तम् ॥ किंतु विपरीतं पुण्यमेव इत्याहुः ॥
जातिमात्रक्षत्रियवैश्यशूद्रवधेषु क्रमेण त्रैवार्षिकवार्षिकषाण्मासिकानि ब्रह्महव्रतानि ॥ ॥ त्रैमासिकसार्द्धनवमासिका
नीत्यन्ये ॥ अमत्येदं ॥ मत्या तु द्विगुणम् ॥ क्षत्रियादिकर्तृके एतद्वधे पादपादहानिः ॥ प्रांचस्तु ॥ अमत्या जातिमात्रक्षत्रवधे नवद्ब
च्छ्राणि तादृक्वैश्यवधे चत्वारि ॥ शूद्रवधे द्वयम् ॥ ज्ञानतः सर्वत्र द्विगुणमित्याहुः ॥ नृपतिहृद्वधे द्वादशवार्षिकम् ॥ प्रयोजकादी
नां पादपादहानिः सर्वत्र ॥ अत्र सर्वत्र शवशिरःकपालध्वजता वश्यकी ॥ कामतः सकृत्तु प्रतिलोमसूतवधे चांद्रम् ॥ वैदेहवधे
पादोनम् ॥ चांडालवधे द्विपादम् ॥ मागधवधे पादोनम् ॥ आयोगववधे द्विपादं ॥ ज्ञानतोर्द्धं ॥ चांडालवधे द्विचांद्रमित्यर्थः ॥ द्वि
गुणमंत्यजातिवधे ॥ ततः स्त्रीवधे षड्रात्रमुपवासः तिलदानं चेत्याहुः ॥ चोराणामेतेषां वधे एकोपवासपूर्वकं घृतप्राशनम्
॥ ॥ अथान्यहिंसायां तत्रास्थिमतां कृकलासादीनां अनुक्तप्रायश्चित्तानां सहस्रवधे अनस्थिमतां क्षुद्राणां जलूक
मत्कुणयूकादंशादीनां शकटपूर्णवधे कृमिकीटपतंगपिपीलिकाभ्रमरदंशमक्षिकादीनां सहस्रवधाभ्यासे च षाण्मासिकं
शूद्रहव्रतम् ॥ दशधेनुदानं वा ॥ परिमाणाधिक्ये प्रायश्चित्ताधिक्यं ॥ इतोल्पपरिमाणवधे मलिनीकरणात् त्र्यहं तप्तयावक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पानं ॥ अमत्यात्स्यैत द्वधे घुणादिजंतु व धे च किंचिद्देयम् ॥ अष्टमुष्टिमित धान्यं किंचित् ॥ ततो प्यल्पे क्षुद्रतमे अनस्थिजंतोश्च-
प्राणायामाः ॥ फलपुष्प धान्यांतर संजात प्राणिवधाभ्यासे दिनमेकं घृताहारः ॥ क्षत्रियादीनां पादपादहानिः ॥ स्त्रीणामर्धं ॥ गौ
डास्त्र कृकलासादि सह स्त्र वधे जलूकादि शकट वधे च तप्तकृच्छ्रम् ॥ अभ्यासे प्रागुक्तमित्याह ॥ मार्जार गोधा नकुल मूषक
मंडूक कुक्कुट चाष काकोलूकश्वसर्पादीनां प्रत्येकं वधे पादकृच्छ्रं ॥ त्रिरात्रं क्षीरपानं वा ॥ एकवर्ष वत्स दानं वा ॥ समुद्रगानदीस्ना
नं ॥ योजन गमनं वा यथार्हं योज्यम् ॥ मत्या द्विगुणं ॥ अभ्यासे आवृत्तिः मत्याभ्यासे कायम् ॥ समुदित वधाभ्यासे षाण्मासिक
शूद्रवधव्रतम् ॥ दशधेनुदानं वा ॥ अत्र कपालधारणाधिकं नास्ति ॥ कोकिला कपोत शुक कपिंजल टिट्टिभ खंजरीटानां पुरुष भा
र वधेप्येतदेव ॥ गजवधे पंचनील वृषभदानं ॥ हयवधे तु वर वस्त्र युग्मम् ॥ उष्ट्रे गुंजा भारः स्वर्णं वा गुंजामितं ॥ खरे वृष एक
वर्ष वत्सो वा ॥ अजा मेषयोरप्येवं ॥ अत्राभ्यासे त्रिरात्रं उपवासोपि ॥ अत्यंताभ्यासे सप्तरात्रोपवासश्च ॥ हंस सारस पाराव
त मयूर चक्रवाक बक बलाका विषज कंक प्लवा वित् कारंड वश्येन भास राज पक्षादिषु गौर्देया ॥ गृध्र काकोलूक कपोत कुक्कुट
वृहत्पक्षादिषु त्रिवर्षो वत्सः ॥ शुक चाष खंजरीट लावक सारिकादिषु द्विवर्ष वत्सः ॥ टिट्टिभ तित्तिर कारंड वचटकादिषु क्षुद्र
पक्षिषु एक वर्षो वत्सः ॥ क्रव्याद् व्याघ्र शृगालादि वधे वानर हंस श्येन कंक गृध्रादिषु जलचर बलाकादि पक्षिषु स्थलचरका
कादिषु भासे मयूरे च प्रत्येकं वधे धेनुर्देया ॥ अक्रव्याद हरिणादि मृगेषु खंजरीटादि पक्षिषु च वत्सतरी देया ॥ सर्पादि सरीसृ ३०

CC-0. In Public Domain. Digitization by eGangotri

पेषु लोहदंडस्तीक्ष्णो भयाग्रः॥ यद्वा शूकरेषु द्विवर्षो वत्सः॥ क्रौंचे त्रिवर्षः॥ महिषादिवधे वत्सतरी॥ वराहे घृतकुंभः॥ तित्तिरौ ति
लद्रोणः॥ नपुंसकमृगपक्ष्यादिवधे माषमितं सीसं पलालभारो वा॥ अन्नदानाशक्तौ तु स्मृत्यर्थसारे॥ गजाश्वोष्ट्रखरगौरगवयऋ
क्षमहिषमेषादिष्वमत्या प्रत्येकं वधे सार्द्धकृच्छ्रः॥ समस्तवधे चांद्रम्॥ मत्या प्रत्येकंवधेपि चांद्रम्॥ मत्या समस्तवधे त्वावृत्तिश्चां
द्रस्य॥ हरिणसारंगरुरुवराहसिंहगंडकव्याघ्रमहामत्स्यग्राहशिशुमारादिष्वमत्या प्रत्येकं कृच्छ्रः॥ समस्तवधे कृच्छ्रद्वयं॥ म
त्या प्रत्येकंवधे चैवम्॥ समस्तवधे चांद्रम्॥ श्ववृकवानरजंबूकविड्वराहादिषु अमत्या प्रत्येकं त्रिरात्रं समस्तवधे कृच्छ्रः॥ मत्या
प्रत्येकंवधे चैवम्॥ समस्तवधे द्विगुणम्॥ मार्जारसर्पाजगरडुंडुभनकुलमंडूकमूषककर्कटशलभसेगाधोधाशल्यककूर्मश-
शादिष्वमत्या प्रत्येकंवधे पादकृच्छ्रः॥ समस्तवधेऽर्धकृच्छ्रः मत्या प्रत्येकंवधे चैवं समस्तवधे कृच्छ्रः हंसादिष्वमत्या प्रत्येकंव
धे कृच्छ्रः गृध्रादिषु पादन्यूनः शुकादिष्वर्धकृच्छ्रः मत्या द्विगुणं टिट्टिभादिषु पादः समस्तवधादौ द्विगुणं हरिणादिषु हंसादिषु
चहं तु बहुत्वे प्रत्येकं त्रिरात्रं श्वादिषु गृध्रादिषु चैवं गजादिषु प्रतिपुरुषं कृच्छ्रः मार्जारादिशुकादिषु च प्रत्येकमुपवासः टिट्टिभा
दिषु प्रतिपुरुषं नक्तम्॥ मृतप्रायेषु तु गजादिषु अमत्या प्रत्येकंवधे त्रिरात्रम्॥ हरिणादिषु द्विरात्रम्॥ खरादिषु चतुर्थकालाहा
रः॥ मार्जारादिषूपवासः॥ गृध्रादिषु नक्तम्॥ शुकादिष्वेकभक्तं॥ टिट्टिभादिषु जले प्राणायामः॥ अविज्ञात सर्वमृगपक्षिषु त्रिरा
त्रमिति इदं सर्वं देशकालजातिशक्तिगुणाद्यपेक्षया गुरुलघुविषये योज्यम्॥ ॥ इति स्त्रीशूद्रादिवधेन्यहिंसायां च प्रायश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्तानि ॥ ॥ अथद्रुमादिच्छेदनेप्रायश्चित्तम् ॥ ॥ वृक्षगुल्मलतागुच्छक्षुपप्रतानौषधिवीरुधां फलपुष्पादिभिरुपयोगिनीनां यज्ञादृष्टार्थंविनाच्छेदे शतगायत्रीजपः ॥ तत्र वृक्षाः पिप्पलाशोकाम्रपनसाद्याः ॥ गुल्मा मालत्यादयः ॥ लता द्राक्षादयः ॥ गुच्छाः ॥ कुरंटकादयः ॥ क्षुपाः करवीरादयः ॥ प्रतानाः सारिवादयः ॥ औषध्यः शाल्यादयः ॥ वीरुधो गुडूच्याद्याः ॥ इदमकामतोऽसकृच्छेदे कामतः सकृच्छेदे च ॥ ग्राम्यारण्यौषधिच्छेदनात्यंताभ्यासे तु दिवा गोपरिचर्यां कृत्वा रात्रौ क्षीरं पीत्वा स्वपेत् ॥ कामतोऽभ्यासेऽकामतोत्यंताभ्यासे च वृक्षलतादिविषयेप्यर्धकृच्छ्रः ॥ फलवतां छेदे प्राजापत्यम् ॥ कृष्याद्युपकरणादिदृष्टार्थे यज्ञाद्यदृष्टार्थे च च्छेदे तु न दोषः ॥ महाफलप्रदानां नारिकेलादिवृक्षाणां कामतः च्छेदनात्यंताभ्यासे संवत्सरव्रतम् ॥ सकृच्छेदे तूक्तद्विगुणजपः ॥ एवं चैत्यश्मशानसीमापुण्यस्थानदेवालयस्थे वृक्षेऽन्यस्मिन्नपि चतुष्पथस्थे महाछायावृक्षे प्रस्थाते वा वृक्षे च्छिन्ने द्विगुणजपः प्राजापत्यं च बोध्यम् ॥ शूद्रस्य तु दंडानुसारेण जपस्थाने द्विरात्रोपवासादि कल्प्यम् ॥ इत्थं च्छिन्नवृक्षादेर्ग्रहणविषयं ॥ च्छिन्नपरिग्रहणे तु दंडाधिक्यदर्शनात् प्रायश्चित्तातिरेको बोध्यः ॥ कामतोत्यंताभ्यासे वृक्षादौ सर्वत्र चांद्रादिष्वेकम् ॥ ॥ इति द्रुमच्छेदप्रायश्चित्तानि ॥ ॥ प्रसंगाच्छ्वादिदंशे प्रायश्चित्तम् ॥ ॥ श्ववृकसृगालखरोष्ट्रविड्वराहकाककुक्कुटवानरपुंश्चलीक्रव्यादनराश्वैर्नाभेरधईषद्दष्टो विप्रो जले प्राणायामत्रयं कृत्वा घृतं प्राश्य शुध्यति ॥ अत्र घृतप्राशनं भोजनस्थाने ॥ तेनाहारांतरनिवृत्तिः ॥ अत्र सरुधिरदंशे षोडश प्राणायामाः ॥ आपोहिष्ठेत्यादिभिः स्नानं चाधि ३१

CC-0. In Public Domain. Digitization by eGangotri

कम् ॥ अतिगाढदंशेसमुद्रगायांनद्यांप्राणायामशतमन्यत्पूर्ववत् ॥ अत्रशक्तौसत्यांब्रह्मचारिणस्त्रिरात्रम् सायंदुग्धपान
मेव ॥ गृहस्थस्यद्विरात्रम् ॥ अग्निहोत्रिणएकाहं ॥ नाभेरूर्ध्वंदंशेइदमेवद्विगुणं ॥ मुखेदष्टस्यत्रिगुणम् ॥ मस्तकेदंशेचतुर्
गुणम् ॥ मार्जारमूषकनकुलाजमहिषीहीनजात्यारण्यमृगैश्चदष्टेदशप्राणायामाः ॥ नाभेरधईषद्दष्टस्यपंच ॥ क्षत्रियादीपा
दपादन्यूनं ॥ शूद्रस्यामंत्रकप्राणायामाः ॥ उपवासादेवशूद्रस्यशुद्धिरित्यन्ये ॥ स्त्रीणांतुश्वादिदंशेस्नातोदितस्यनक्षत्रचं
द्रादेर्दर्शनात्शुद्धिः ॥ कृच्छ्रादिव्रतस्थायादंशेतुत्रिरुपवासपूर्वकंचतुर्थेयावकभोजनं ॥ ततोव्रतशेषसमाप्तिः ॥ व्रतस्थस्यपुं
सोप्येतदेव ॥ जपाद्यधिकंप्राणायामादिकंच ॥ रजस्वलायाः श्वादिदंशेतुएकोपवासमुपवासपंचकंवाकृत्वाषष्ठेपंचगव्य
पानं ॥ नाभेरूर्ध्वंतुप्रागुक्तक्रमेणद्वित्रिचतुर्गुणंबोध्यं ॥ अत्यसमर्थस्यदिवादंशेआनक्षत्राद्भोजनम् ॥ रात्रिदंशेआसू
र्याद्भोजनंगायत्रीशतजपोवा ॥ यदातुश्वादिदंशजेवाशस्त्रघातादिजेवाव्रणेकृमयउत्पद्यंते ॥ तदागोमूत्रगोमयाभ्यांत्रि
संध्यंस्नानंत्रिरात्रंपंचगव्यपानंच ॥ नाभेरूर्ध्वंकंठादधःषड्रात्रम् ॥ शिरोव्रणेकृमिषुकार्यं ॥ युगपदनेकव्रणेषुकृमिसंभ
वेसांतपनंवृषभश्चदक्षिणा ॥ इदंचश्वादिदंशनिमित्तप्रायश्चित्तसहितमेव ॥ शस्त्रादिव्रणेकृमिदर्शनेतुकेवलमेवैतत्
क्षत्रियादीनांपादहानिः ॥ अन्यव्रणेषुकृमिदोषेतुउपवासहिरण्यदानकृच्छ्रैःशुद्धिः ॥ ॥ इतिश्वादिदंशकृमिव्रणादि-
प्रायश्चित्तानि शास्त्रोक्तोपायार्जितादर्थात्तरेणोपजीवनंनिंद्यार्थजीवनं ॥ तत्रचांद्रादिष्वेकंत्रैमासिकंवाजातिशक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यपेक्षया॥ नास्तिक्यं वेदनिंदनं तेन जीवनं च परलोको नास्तीत्यभिनिवेशश्च ॥ तस्मिन् सकृत्कृते कृच्छ्रः॥ तेन जीवनेति कृच्छ्रः॥ अज्ञानतो धर्म्म्॥ ज्ञानतोभ्यासे चांद्रादिष्वेकम्॥ अत्यंताभिनिवेशेन बहुकालाभ्यासे ग्रीष्मवर्षाहेमंतर्तुषु क्रमेणातपाभ्रावकाशजलशयनानि॥ पंचवर्षप्रतिग्रहेषु भैक्ष्यं वा॥ ॥अथ व्रतलोपे ब्रह्मचारिणः प्रायश्चित्तम्॥ ॥ स्वब्रह्मचारिणः पुंस्त्रीमैथुनरूपः सर्वसाधारणस्क देवताराधनाद्यर्थं गृहीतव्रतलोपः॥ प्रायश्चित्तार्थं प्रक्रांतकृच्छ्रादिव्रतच्युतिश्च॥ किंचिद्व्रतं संकल्प्य त्यागश्च संकल्पितस्नातकव्रतादेर्मिथ्याकरणं च॥ शिष्टाप्रतिषिद्धस्य भोजनव्यतिरेकेण मया जलं न पातव्यमित्यादिनियमत्यागश्च॥ तत्र कालदेशशक्तिबहुत्वाल्पत्वादिकं पर्यालोच्योपपातकसामान्यप्रायश्चित्तानि योज्यानि॥ ॥अवकीर्णतारूपे ब्रह्मचर्यादिव्रतलोपे तूच्यते॥ ॥ तत्र गुरुतल्पतत्समानेतरास्त्रियं गत्वा नैर्ऋतदैवते नैकाक्षेण गर्दभेण पशुनारण्ये चतुष्पथे रात्रौ लौकिकाग्नौ पाकयज्ञधर्मेणाश्वलायनादिगृह्योक्तपशुकल्पतंत्रेणेष्ट्वा तस्याजिनमूर्ध्ववालं परिधाय त्रिषवणस्नायी लोहितपात्रः स्वकर्माचक्षाणः सप्तगृहे भैक्ष्यं कुर्वन् एकवारभोजी वर्षेण शुद्ध्येत्॥ एवमशक्तौ नैर्ऋतं चरुं निरुप्य पक्का कामाय स्वाहा॥ नैर्ऋत्यै स्वाहा॥ रक्षोभ्यः स्वाहा देवताभ्यः स्वाहेति हुत्वा होमशेषं समाप्योक्तमब्दव्रतं चरित्वा शुद्ध्येत्॥ इदमश्रोत्रियविप्रपत्न्यां श्रोत्रियवैश्यपत्न्यां च ज्ञेयं॥ यदा तु गुणवत्योः श्रोत्रियपत्न्योर्विप्रक्षत्रियस्त्रियोरवकीर्णं तदा त्रिवार्षिकं द्विवार्षिकं च व्रतं होमश्च॥ अमत्यावकीर्णत्वे ईषद्व्यभिचारिण्यां ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चतुर्त्वे वार्षिकव्रतविषये षाण्मासं ब्रह्मह व्रतं चीरवासा श्चरेत् ॥ द्विवार्षिकादिविषये त्वमत्यार्धम् ॥ अत्यंतव्यभिचरितशूद्रायां सचैलस्नानस्योदकुंभदानं ॥ तादृग्वैश्यायां चतुर्थकालाहारो विप्रान् भोजयेत् ॥ तृणभारं च गोभ्यो दद्यात् ॥ तादृक्क्षत्रियायां त्रिरात्रोपोषितेन घृतपात्रं देयम् ॥ तादृक्विप्रायां षडुपवासा गोदानं च कार्यम् ॥ गोष्ववकीर्णस्य पलालभारसीसमाषयोर्दानम् ॥ स्त्रीसंभोगमंतरेण मत्यारेतोविसर्गे ब्रह्मचारिणो नैर्ऋतयागमात्रं ॥ दिने स्वप्ने रेतोविसर्गे चैवम् ॥ कृच्छ्रचांद्रायणादिव्रतेषु अतिदिष्टब्रह्मचर्येषु रेतस्कंदने प्येवम् ॥ रात्रिस्वप्ने रेतस्कंदने ब्रह्मचारी स्नात्वा अर्कमर्चयित्वा पुनर्मामैत्विंद्रियमिति जपेत् गायत्रीं वा त्रिर्जपेत् ॥ अष्टशतगायत्रीजप इत्यन्ये ॥ वानप्रस्थयत्योर्मत्या ब्रह्मचर्यलोपे पराकत्रयमुक्तमवकीर्णिव्रतम् मत्या कृच्छ्रत्रयम् ॥ ॥ अथ प्रसंगादुच्यते ब्रह्मचारिणः प्रायश्चित्तम् ॥ ॥ ब्रह्मचारिण अनातुरस्य गुरुशुश्रूषादिगुरुतरकार्यव्यग्रतया सप्तरात्रं भैक्ष्यस्याग्निकार्यस्य वा लोपे ॥ कामावकीर्णोस्म्यवकीर्णोस्मि कामाय स्वाहा ॥ कामावपन्नोस्म्यवपन्नोस्मि कामकामाय स्वाहा ॥ इत्याभ्यामाज्याहुती हुत्वा ॥ समासिंचंतु मरुतः समिंद्रः सं बृहस्पतिः समायमग्निः सिंचत्वायुषा च बलेन चेत्येते नोपतिष्ठेत् अव्यग्रतया तल्लोपे त्ववकीर्णिव्रतम् ॥ अन्ये सप्तरात्रमविकीर्णिव्रतमित्याहुः मणिवासोगवादीनां प्रतिग्रहो अष्टसहस्रगायत्रीजपः ॥ उपनयनोत्तरं दिनचतुष्टयव्रतमध्ये मेखलायज्ञोपवीतदंडादीनां नाशे वस्त्रं सूत्रांतरं वा धृत्वा मनोज्योतिरित्यादिमनोलिंगाभिस्त्वमग्ने व्रतपा असीत्यादिव्रतलिंगाभिश्च तस्त्र आज्याहुतीर्हुत्वो

CC-0. In Public Domain. Digitization by eGangotri

पनयनोक्तविधिना धारयेत् असङ्गेक्ष्य भोजने स्कन्नोदितेसु सास्तमितेच वांतेदिवास्वापेनग्नस्त्रीदर्शनेनग्नस्वापेस्मशानक्रम-
गजहयाद्यारोहणपूज्यातिक्रमेषु चैतैर्जुहुयात् यज्ञोपवीतंविनातदन्यथावाकृत्वा भोजनेविण्मूत्रोत्सर्गेवागायत्र्यष्टसहस्रजपः
॥पात्रेत्रिः प्राणायामाः॥ फलादिभक्षणेषट्॥ भोजनमेहनयोरप्येवमित्येके॥ सूर्योदयस्वापिनोदिवोपवासोदशाधिकसह
स्रगायत्रीजपः॥ अस्तमयस्वापिनस्तु रात्र्युपवासोत्तरदिने प्रागुक्तजप इत्यन्ये॥ स्थावरजंगमवृक्षवल्मीकपशुसरीसृपा
दिप्राणिवधे कूष्मांडीभिर्होमः॥ यज्ञोपवीतमेखलाजिनदंडानां लोपे व्याहृतिहोमं षट्प्राणायामांश्च कृत्वा पुनर्धारयेत्॥ सं-
ध्याग्निकार्यलोपे स्नात्वाष्टसहस्रगायत्रीजपः॥ भिक्षाटनमकृत्वा स्वस्थस्यैकान्नाशने ष्टशतजपः॥ भिक्षायांतु क्वचिदेकान्ना
शने दोषोन॥ शौचाचमनसंध्याभिक्षाग्निकार्यकौपीनमेखलाजिनलोपे शूद्रादिस्पर्शे छत्रपादुकाभ्यंगोद्वर्तनानुलेपांजनजल
क्रीडाद्यूतनृत्यगीतवाद्याद्यभिरिति पाखंडादिसंभाषणपर्युषितभोजनादिकरणे सकलदोषपरिहारार्थं कृच्छ्रत्रयं महाव्याहृ-
तिहोमश्च॥ बहुकालंबहुतरधर्मलोपे तं वोधियेतिमंत्रस्य शिवालये लक्षजपः॥ गुरुशुश्रूषाद्यल्पलोपे ष्टशतजपः॥ मधुमद्यमां
सलशुनभक्षणे कृच्छ्रं॥ मत्यापराकः॥ अभ्यासे द्विगुणं॥ पुनरुपनयनंच॥ ततआरब्धव्रतस्य समापनम्॥ मद्यग्रहणं क्षत्रि
यादिविषयं॥ तदेकनाश्यरोगाद्यर्थं मध्वादिकं गुरूच्छिष्टं कृत्वा भोक्तव्यम्॥ ततो रोगनिवृत्तौ हंसः शुचिषदित्यादित्यमुपति ३३
ष्ठेत्॥ मध्वादेरकामतो भक्षणे दोषो न॥ गुर्वाज्ञाविघाते गुरोः प्रतिकूलाचरणे चस्नात्वा प्रणिपातादिना गुरुं प्रसाद्य गतकोपङ्कुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रवं कृत्वा शुध्येत् ॥ एतदज्ञानपूर्वकं सकृदपराधे ॥ अन्यत्रात्यंताभ्यासे पितृविषये ब्रह्महत्यावत् ॥ ब्रह्मचारिणो यतिव्रतिनो
श्च मासिकादिप्रेतश्राद्धभोजने त्रिरात्रमुपवासश्च चतुर्थे नक्तं प्राणायामत्रयं च पंचमदिने घृतप्राशनं च ॥ अनापदि तु कार्यं ॥ ए
कोपवासः पंचगव्यं च ॥ अभ्यासे तप्तकृच्छ्रादि ॥ शूद्रान्नभोजने पराकः ॥ क्षत्रियोच्छिष्टभोजने स्नात्वाष्टशतजपो द्वादशदिनमु
पवासश्च ॥ उच्छिष्टमत्र तद्भोजनोत्तरं पाकपात्रे वशिष्टम् ॥ वैश्यशूद्रोच्छिष्टेधिकं कल्प्यं ॥ चोरव्याघ्रादिभयाकुलदेशे महांध
कारे रात्रौ गुरुणा स्वकार्यार्थं प्रेषितः शिष्यो दैवात् मृतश्चेत् गुरोः कृच्छ्रत्रयं ॥ सर्वत्रारोग्यार्थमौषधपथ्यान्नदानेन तदर्थं क्रिय
माणयत्ने वा गोब्राह्मणादिप्राणिमृतौ न कश्चिद्दोष इति प्रासंगिकः सर्वहिंसापवदः ॥ ॥ इति व्रतच्युतिप्रायश्चित्तानि ॥ ॥
अथाभिशंसिप्रायश्चित्तम् ॥ ॥ यस्तु विप्रो विप्रं महापातकादिना मिथ्या अभिशंसेत् ॥ अनेन ब्रह्महत्यादिकं गोहत्यादि वा कृ
तमिति संव्यहर्तृजनान्प्रति मिथ्या ब्रूयात्स मासमंबुभक्षो नियतेंद्रियः शुद्ध्वती मंत्रजपशीलः शुद्ध्येत् ॥ इदमुपपातकाभिशंस
नाभ्यासे महापातकस्य सकृदभिशंसने च क्षत्रियाद्यभिशंसने विप्रस्यार्धार्धहानिः ॥ यदा क्षत्रियादयो विप्रमभिशंसंति तदाते
षां द्वित्रिचतुर्गुणम् ॥ शूद्रस्य जपस्थाने ऽ मंत्रकप्राणायामाः सत्याभिशंसने सर्वत्र तदर्धम् ॥ अतिपातकमिथ्याभिशंसिना मुक्त
मासव्रतं पादोनम् ॥ अनुपातकाभिशंसिनां ततो न्यूनम् ॥ उपपातके सकृदभिशंसने ततो न्यूनम् ॥ उपपातकाभिशंसनाभ्यासे मा
सव्रतमुक्तम् ॥ प्रकीर्णकेषु सकृदभिशंसने ततोपि न्यूनं अतिपातकादिष्वभ्यासे किंचिदधिकमूह्यम् ॥ अथ मिथ्याभिशस्तस्य स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हापातकेषु कृच्छ्रम् ॥ अतिपातकादिषु पादपादह्रासः मिथ्याभिशस्तस्य वर्षपर्यंतं प्रायश्चित्ताकरणे मासमंबुभक्षिता ॥ तत्रसा
र्द्धकृच्छ्रद्वयम् ॥ महापापाभिशस्तस्य वर्षोत्तरं द्विमासम् तत्रपंचकृच्छ्राः ॥ गुरुविषये कामतो मिथ्याभिशंसनाद्वृत्तौ पंचवर्षं विप्रकुले
भैक्ष्याचरणं संवत्सरं वा षण्मासं वा गवानुगमनम् अत्राभ्यासाभिनिवेशादितारतम्येन व्यवस्था ॥ ॥ इतिअभिशंसिमिथ्या
भिशस्तयोः प्रायश्चित्तानि ॥ ॥ अथ स्वकृतविक्रये प्रायश्चित्तम् ॥ ॥ सच धनं गृहीत्वा दास्यार्थं कन्यापुत्रादेर्दानम् ॥ एवं भा
र्याविक्रयेप्यूह्यम् ॥ तत्र कन्याविक्रये देवगृहप्रतिश्रयोद्यानारामपुष्करिणीसभाप्रपापुण्यसेतुविक्रये सुकृतविषयेच चांद्रादि-
ष्वेकम् अथवा त्रैमासिकं ॥ आपदि तप्तकृच्छ्रः ॥ अत्यंतापदि सांतपनम् ॥ पुत्रविक्रयेच सर्वं द्विगुणम् ॥ एकपुत्रस्यानापदिका
मतः स्वकृतविक्रयेच त्रिषवणस्नायी अधःशायी चतुर्थकालाशी वत्सरेण शुद्ध्यति ॥ ईदृशकन्याविक्रये तदर्द्धेन शुद्धिः ॥ कामतो
नापदि अनेकपुत्रस्य स्वकृतविक्रये चांद्रं ॥ आपद्येकपुत्रस्य कामतः स्वकृतविक्रये चांद्रद्वयम् ॥ ॥ इतिपुत्रकन्याविक्रयप्रायश्चि
त्तानि ॥ ॥ स्वकृतविक्रयोत्तरं धान्यपुष्पपशुस्तेयइति उपपातकगणे पठितं तत्प्रायश्चित्तं स्तेयप्रकरण एवोक्तम् ॥ ॥ अ-
थ याज्ययाजने प्रायश्चित्तम् तत्र व्रात्ययाजको व्रात्योपनेता व्रात्याध्यापकः अहीनयाजकः शूद्रांतेष्टिकर्मयाजको वेदविप्लावी
तस्करेतरशरणागतत्यागी तस्कररक्षकः वशीकरणोच्चाटनादिरूपाभिचारकर्ता चामत्या कृच्छ्रसांतपनातिकृच्छ्रेषु त्रिषु य
थायोग्यं क्वचित्समुदितं क्वचिदेकं कुर्यात् ॥ आततायीविषयाभिचारे न दोषः ॥ व्रात्यलक्षणं प्रागुक्तम् ॥ द्विरात्रादिद्वादशाहांतोह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गणो यज्ञोहीनः मत्या व्रात्यस्योपनयनाध्यापनयाजनेषूद्दालकव्रतम् मत्यासर्वेष्वेवंवा ॥ उद्दालकव्रतंच व्रात्यप्रकरणे उक्तम् ॥ विप्राद्यंतेष्टिकर्मस्खलोभात् याजनेक्रमेण कार्यो तिकृच्छ्रस्तप्तकृच्छ्रश्च ॥ अभ्यासेद्विगुणम् ॥ अत्यंताभ्यासेत्रिगुणम् ॥ शूद्राद्ययाज्ययाजने नत्यौरोहित्येतदध्यापने चा मत्या चांद्रादिष्वेकमशक्तौ कृच्छ्रं मत्यात्रैमासिकम् ॥ अभ्यासेद्विगुणानि ॥ कामतोत्यंतशूद्रयाजनाभ्यासे ग्रीष्मवर्षाहेमंतेषु क्रमेण पंचतपोभ्रावकाशजलशयनानि कुर्यात् ॥ गोमूत्रयावकाशनंच ॥ अकामतोभ्यासेतल्लब्धसर्वद्रव्यत्यागेन शतसहस्रप्राणायामाभ्यासेन शुध्यति ॥ परिवेदकादियाजनेप्येवं ॥ सर्वत्रलब्धद्रव्यत्यागपूर्वकमेवैतत्प्रायश्चित्तानुष्ठानम् ॥ एवं पर्वचांडालश्रोत्रावकाशाद्यनध्यायेषु अध्ययनमशुचिनाध्ययनं वानिषिद्धाध्ययनं निषिद्धाध्यापनंच वेदविप्लावनम् तत्राद्ये मत्यात्रिरात्रमुपवासः ॥ अभ्यासे कृच्छ्रं ॥ अत्यंताभ्यासे कृच्छ्रत्रयं ॥ कामतोत्यंतानवच्छिन्नाभ्यासे संवत्सरं यवौदनभोजनम् ॥ एतदेव गर्हिताध्यापकयाजकयोर्दक्षिणात्यागमात्रमधिकम् ॥ स्मृतिधर्मशास्त्रव्याख्याने धीतेच तदर्धं ॥ नित्यानध्यायेष्वध्ययने यावदधीतं तावज्जले घमर्षणवत्स्वाध्यायं जपेत् ॥ अशक्तौ जले स्थित्वा जपमात्रम् ॥ अत्यशक्तः स्थले जपेत् ॥ मत्या मत्यनध्यायमुपवासः ॥ अशुचिनाध्ययने चैवम् ॥ नैमित्तिकानध्यायेष्वध्ययने त्वाप्येवं ॥ दुर्बोधस्य तदर्धं ॥ काककुक्कुटमूषकमंडूकादेरंतरागमनेन त्र्यहम् ॥ तावदध्ययनविरामश्च ॥ गवाश्वमहिषादिपशुस्त्रीशूद्राद्यंतरागमनेनूपवासः ॥ मार्जारसर्पनकुलपंचमजात्यादेरंतरागमने त्रिरात्रमुपवासस्त्रिषवणस्नानंच ॥ जानुभ्यां ग्रामांतरगमनं वा

॥श्वघ्नकसृगालवानररजकादीनामंतरागमनेकायम्॥खरवराहोष्ट्रादिचांडालसूतिकोदक्याशवादेरंतरागमनेकायत्रयं॥गौर
गवयाजादिब्रह्मोक्तनास्तिकादेरंतरागमनेत्रैमासिकं॥शशमेषश्वपाकादिगमनेषाण्मासिकम्॥गजगंडसारव्याघ्रमहापात
कीकृतघ्नादिगमनेकृच्छ्राब्दम्॥तावत्प्रायश्चित्तकालमनध्ययनंच॥अमत्यासर्वत्रार्धम्॥केचिदंतरागमनेसर्वत्रतदानीमेवा
ध्ययनंविरामेप्रायश्चित्तंनेत्याहुः॥ ॥इत्ययाज्ययाजनादिप्रायश्चित्तानि॥ ॥अथपितृमातृसुतत्यागेप्रायश्चित्तम्॥
॥अथपतितानांपितृमातृगुरूणांगृहाग्निप्रकाशनंहिसः॥तत्रमत्यातत्कर्त्तुश्चांद्रादिष्वेकंत्रैमासिकंवा॥जातिशक्तिगु
णाभ्यासादिकापेक्षयायोज्यम्॥मत्याभ्यासेमासंषष्ठान्नकालतामाससंसंहिताजपोवाधिकः॥भार्याकृतत्यागेप्येवम्॥मा
तुस्तुसर्वदोषेप्यत्याज्यत्वैवसर्वथारक्षणीयत्वात्॥ ॥इतिपित्रादित्यागप्रायश्चित्तानि॥ ॥अनंतरंतडागारामविक्रयइ-
त्युपपातकंपठितंतत्प्रायश्चित्तंतुसुकृतविक्रयप्रसंगेउक्तंवेदितव्यम्॥ ॥अथकन्यादूषणेप्रायश्चित्तम्॥तत्राङ्गुल्यादिना
तस्याःक्षतयोनित्वकरणंमिथ्यातद्दोषख्यापनंच॥तत्रसवर्णानांकन्यादूषणेचांद्रंत्रैमासिकंवा॥आनुलोम्येनासवर्णकन्यादू
षणेमासंपयःपानंकार्यंवा॥प्रातिलोम्येतुक्षत्रियवैश्ययोःकृच्छ्राब्दंग्रीष्मेवर्षाहेमंतेषुक्रमेणातपाभ्रावकाशजलाशयपूर्वकं
मासंगोमूत्रयावकपानंवा॥शूद्रस्यतुविप्रादिकन्यादूषणेवधएव॥अत्यंताभ्यासेसवर्णस्यापिकृच्छ्राब्दं॥सोमविक्रयीवृ ३५
षलीपतिःकौमारदारत्यागीशूद्रयाजकोगुरोःप्रतिहंतासुराभिन्नमद्यपोब्राह्मणवृत्तिघ्नःकूटव्यवहारीमित्रध्रुक्शरणाग

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तघातीप्रतिरूपवृत्तिश्चैते० मत्या प्रवृत्तास्त्रैमासिकं व्रतं कुर्युः॥ मत्या षाण्मासिकं॥ अभ्यासे कृच्छ्राब्दम्॥ ॥इति कन्यादूषणादिप्रायश्चित्तानि अथक्रमप्राप्तपरिवेदकयाजनादौ प्रायश्चित्तम्॥ ॥परिवेदकयाजने १ तस्मै कन्यादाने २ गुरौ कौटिल्ये ३ आत्मार्थपाकारंभे च मद्यपायाः स्वस्त्रिया अपि उपभोगरूपे मद्यपस्त्रीनिषेवणे देवताराधनाद्यर्थं गृहीतव्रतलोपे न्यस्मिन्व्रतलोपे चैने षूपपातकेषु चांद्रादिष्वेकं त्रैमासिकं वा॥ इति परिवेदकयाजनादिप्रायश्चित्तानि॥ ॥अथ स्वाध्यायाग्निरक्तत्यागे प्रायश्चित्तम्॥ ॥तत्रात्यंतापदि स्वल्पकालमधीतवेदत्यागे कायम्॥ अधिककाले तिकृच्छ्रं॥ ततोप्यधिके पराकः॥ मासोत्तरवेदत्यागे चांद्रम्॥ यदा तु धनार्जनाद्यासक्ततया असच्छास्त्राभ्यासकुटुंबलालनाद्याकुलतया चिरकालं वेदं त्यजति तदा चांद्रादिष्वेकं त्रैमासिकं वा॥ नास्तिक्याद्व्यसनासक्त्या वा वेदत्यागो ब्रह्महत्यासमः॥ तथा नास्तिक्यादग्नित्यागे मासद्वये जाते कायं कृत्वा पुनः संधानम्॥ मासचतुष्टये तिकृच्छ्रः॥ षण्मासत्यागे पराकः॥ तदूर्ध्वं चांद्रादिष्वेकं॥ संवत्सरादूर्ध्वं त्रैमासिकं वा यदा त्वालस्यादिना त्यजति तदा द्वादशाहातिक्रमे त्रय उपवासाः॥ मासातिक्रमे द्वादश॥ वत्सरातिक्रमे मासोपवासो मासं पयोभक्षणं वा प्रमादादिना तत्यागे तु आत्रिरात्रात् द्वादश प्राणायामाः॥ आषड्रात्रात् चतुर्विंशतिः॥ आद्वादशरात्रात् संचाशत्॥ आविंशतिरात्रात् शतप्राणायामाः॥ आत्रिंशद्रात्रादुपवासः॥ आषष्टिरात्रात् त्रिरात्रम्॥ आसंवत्सरात् कायम्॥ अतः परं प्रत्यब्दं कायम्॥ सर्वत्र यावत्कालमहोमी तावत् द्रव्यं तंदुलादि देयम्॥ प्रमादभिन्नविषये तु संवत्सरादूर्ध्वं अग्नित्यागे चांद्रम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विवर्षत्यागे चांद्रं सोमायनं च चांद्रद्वयं वा ॥ त्रिवर्षोर्ध्वं संवत्सरं कृच्छ्राचरणं गोदानं च कृत्वा पुनराधानम् ॥ संस्काराद्यकरणरूपे वि-
प्रवे सत्यरक्षणरूपे च स्मृतत्यागे चांद्रादिष्वेकम् ॥ ॥ इति स्वाध्यायाग्निस्मृतत्यागे प्रायश्चित्तानि ॥ ॥ पातित्यादित्याग-
कारणाभावेपि पितृव्यमातुलादिरूपबांधवैः सह संभाषणसहभोजनादिवर्जनरूपे शक्तौ सत्यां पालनाद्यकरणरूपे च बां-
धवत्यागे भार्यायाः वेश्यात्वकरणेन जीवनरूपे स्त्रीधनोपजीवनकरणे च स्त्रिया जीवने हि सया जीवने वध्याद्यर्थौषधी-
भिः जीवने जाल बडिशादिविधानरूपे तिलेक्ष्वादिपीडनयंत्रप्रवर्तनरूपे च हिंस्रयंत्रप्रवर्तने मृगया द्यूताद्यष्टादशव्यसने-
षु च चांद्रादिष्वेकं त्रैमासिकं वा ॥ अत्यंताभ्यासे द्यूते मृगयायां च पांचवार्षिकव्रतम् ॥ अनृतवादी तस्करो राजभृत्यो वृक्षारो-
पणवृत्तिर्गरदोग्निदो हयगजरथारोहणजीवी रंगोपजीवी श्वगणिकः शूद्राध्यापको वृषलीपतिर्भांडीकः श्ववृत्तिर्ब्रह्म-
जीवनिः क्षत्रोपजीवी चिकित्सको देवलको राजपुरोहितः कितवो मद्यपः कूटकारकोपत्यनरपशुविक्रेता पारवंडयागभोज्यान्ना-
शी चेत्येते ब्राह्मण्यमिच्छंतो लब्धद्रव्यं त्यक्त्वा त्रैमासिकं कुर्युः ॥ बहुकालाभ्यासे संवत्सरं चतुर्थकालाहारः ॥ तत्र श्वगणिकः
श्वगणजीवी ॥ भांडीकः स्तूर्यादिजीवी वंदी वा ॥ श्ववृत्तिर्नीचसेवकः ब्रह्मजीवी मूल्येन द्विजकर्मकर्ता ॥ द्रव्यग्रहणेन परहास्य-
करणरूपे दासीभवनरूपे वा आत्मविक्रये शूद्रसेवारूपे शूद्रप्रेष्यत्वे हीनजातिषु मैत्रीरूपे हीनसख्ये च चांद्रादिष्वेकं त्रैमासिकं ३६
वा ॥ बहुकालं शूद्रसेवायां चतुर्थकाले मितभोजनं त्रिकालस्नानाभ्यां त्रिवर्षेण शुद्धिः ॥ समुद्रयाने ब्राह्मणन्यासहरणे सर्वप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पर्यैर्व्यवहारे भूम्यनृते च शूद्रसेवावत् उत्तमाजातिसख्यविघटने उपोष्य परदिने पयःपारणम्॥ अकृतसवर्णविवाहस्य हीन
वर्णविवाहो हीनयोनिनिषेवणं साधारणस्त्रीसंज्ञकवेश्यादिसंभोगश्च॥ तत्राद्ये चांद्रादिष्वेकं त्रैमासिकं वा॥ सकृद् मतिपूर्वक
वेश्यादिगमने प्राजापत्यम्॥ द्विरात्राभ्यासे कामतश्च सकृद्गमने सप्तरात्रं सक्तुकुशोदकपानम्॥ मतिपूर्वकाभ्यासे चांद्रम्॥ अत्यं
ताभ्यासे त्रैमासिकम्॥ रेतःसेकात् प्राक्निवृत्तौ सचैलस्नानं गोभ्य ओषधिभारदानं च॥ आजन्माद्यंतानवच्छिन्नाभ्यासे
गुरुतल्पवत्॥ अत्र प्रतिनिमित्तं नैमित्तिकस्य प्रायश्चित्तस्यावृत्तिर्नास्ति॥ किंतु गमनाभ्यासेऽहर्गुणवृद्धिर्मासादर्वाक्॥ तु
तो मासगुणवृद्धिर्यावदब्दं॥ ततोऽहर्गुणा वृद्धिर्यावत्प्रापाचरणम्॥ अमत्यागमनाभ्यासे तु सकृत्कृते यद्योक्तं तत्तु त्रिभिर्दि
नैस्त्रिगुणम्॥ मासात्पंचगुणं॥ षण्मासाद्दशगुणं॥ अब्दात्पंचदशगुणं॥ त्र्यब्दाद्विंशतिगुणम्॥ ततोऽप्येवं प्रकल्प्यम्॥ एव-
मुपपातकाभ्यासेनुक्तप्रकारविशेषे सर्वत्रोह्यम्॥ महापातकाभ्यासे तु सकृत्कृते यद्योक्तं तद्द्वितीये द्विगुणम्॥ तृतीये त्रिगुणम्
चतुर्थे निष्कृतिर्नास्तीत्यादिकम्॥ अगृहीताश्रमित्वमनाश्रमित्वं॥ वर्षपर्यंतमाश्रमं विनावस्थाने प्राजापत्यं कृत्वाश्रमस्वीका
रः॥ द्वितीये तिकृच्छ्रः॥ तृतीये कृच्छ्रातिकृच्छ्रं॥ अत ऊर्ध्वं चांद्रादि इत्यापदि॥ अनापदि तु प्रथमेऽब्दे चांद्रादिष्वेकं त्रैमासिकं वा
॥ ततो वर्षेषु द्वित्रिचतुर्गुणम्॥ परपाकरतिः परान्नपुष्टता॥ चार्वाकादिशास्त्राभ्यासोऽसच्छास्त्राधिगमनं॥ स्वर्णाद्युत्पत्तिस्था
नेषु सजातीयाधिकारित्वमाकराधिकारस्तेषु भार्याविक्रये च चांद्रादिष्वेकं त्रैमासिकं वा॥ ॥ इति परान्नपुष्टतादिन्तुरूप

CC-0. In Public Domain. Digitization by eGangotri

पातकप्रायश्चित्तानि ॥ ॥अथासत्प्रतिग्रहे प्रायश्चित्तानि ॥ ॥ तत्र प्रतिग्रहास्यासत्त्वं चातिदुष्टचांडालादेः कर्मदुष्टपतितादेः
श्च दातृत्वे भवति ॥ गुरुक्षेत्रादिदेशे ग्रहणादिकाले च भवति ॥ स्वरूपतोपि सुरामद्यमेषीकृष्णाजिनकालपुरुषमृतशय्यो भय
तो मुख्यादेरसत्त्वम् ॥ मद्यं वृक्षादिसंभवं धान्यसंभवा सुरा ॥ तत्र निमित्तद्वयसमावेशो यथा पतितादेर्मेष्यादिप्रतिग्रहः ॥ तत्र
निमित्तद्वयसमावेशे ब्रह्मचर्यपूर्वं गोष्ठे वासः प्रत्यहं त्रिसहस्रगायत्रीजपपूर्वकं मासं पयोव्रतम् ॥ अभ्यासे तदा जले वासः
षष्ठे काले पयःपानं मासमेवं कुर्यात् ॥ त्रिचतुर्निमित्तसन्निपाते चैवं ॥ अंते विप्रभोजनमुभयत्र ॥ यद्येकमेव निमित्तं तदा चांद्रं
पवित्रेष्टिर्मृगारेष्टिर्मित्रविंदेष्टिर्गायत्र्या लक्षजपो वा ॥ सर्वत्रानुक्तौ दातृदेशकालद्रव्येष्वदुष्टेषु द्वादशनिष्कप्रमाणद्रव्यप्रति
ग्रहे कार्यं ॥ एवं सर्वत्र द्रव्यानुसारात् प्रायश्चित्तवृद्धिह्रासौ ॥ दातृदेशद्रव्यकालेषु अन्यतरदोषे प्रायश्चित्तस्यैकैकगुणावृद्धिः
॥ अल्पद्रव्याणां मणिवासोगवादीनामेकैकप्रतिग्रहे गायत्र्याष्टसहस्रजपः ॥ ततोल्पत्वे भिक्षामात्रप्रतिग्रहे पुण्यमंत्रानुच्चा
रयेत् ॥ प्रायश्चित्तमिदं सर्वं सति द्रव्ये गृहीतद्रव्यत्यागोत्तरमेव ॥ त्यागश्चाप्सु प्रक्षेपः कस्मैचिद्दानं वा ॥ एकतरनिमित्ते तु
त्यागप्रायश्चित्तयोर्विकल्प इत्याहुः ॥ षोडश महादानान्यप्यसत्प्रतिग्रहः ॥ एकस्य महादानस्यानेकैः प्रतिग्रहे तु न दोषः ॥ श
स्त्रविषब्रह्मदंडहयरत्नगजतिललोहानां मृतशय्यालंकारवस्त्रादीनां तिलधेन्वाश्च प्रतिग्रहोऽसत्प्रतिग्रहः ॥ नवश्राद्धमा-
सिकश्राद्धगजच्छायासु भोजनं तीर्थे प्रतिग्रहश्च तथा ॥ विद्यातपोहीनेन प्रतिग्रहोपि उत्तमद्रव्यप्रतिग्रहोपि चासत्प्रतिग्रहः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तमत्वंच मूल्यतो वचनाच्च देवविप्रराज्ञांद्रव्यमुत्तमद्रव्यंगोभूसरस्वत्यश्च॥ छांदोग्येतुअन्नदधिमधुत्राणगोभूरुक्माश्वगजा उत्तमाइत्युक्तम्॥ देवलोरत्नक्षेत्रवेश्महेमकुप्याभरणानिचेत्याह॥ मृतशय्याप्रतिग्रहे पुनःसंस्कारोप्यधिकारः॥ एवंसमुत्कर्षानृतेगुरोरलीकनिर्बंधेगुरौव्यभिचाराद्यभिशापेज्ञानतःकृतमासंपयसावर्तनम्॥ एतदेवाशुचिद्रव्यस्याग्नावंभसिचत्यागे॥ अमत्याकृच्छ्रं॥ गुरुविषयेतुगुरुंप्रसाद्यकृच्छ्रस्नानाभ्यांशुद्धिः॥ एतानिस्मृत्यंतरोक्तोपपातकानिप्रासंगिकानि॥ ॥इत्यसत्प्रतिग्रहप्रायश्चित्तानि॥ ॥अथनिंदितान्नभक्षणेप्रायश्चित्तम्॥ ॥तत्रान्नमदनीयमात्रं॥ तस्यनिंदितत्वंच स्वभावकालसंपर्कक्रियाभावपरिग्रहैः॥ तत्रस्वभावाल्लशुनादेः॥ कालतःपर्युषितादेःसंपर्कात् श्वस्पृष्टादेः॥ क्रियातोहस्तदानादिनाव्यंजनादेः॥ भावादिक्षुरसादेः॥ भवतिहिकस्यचिदिक्षुरसेभावोमदिरेयमिति॥ परिग्रहासतितान्नादेः॥ तत्रस्वभावदुष्टलशुनगृंजनच्छत्राकविड्वराहग्रामकुक्कुटपलांडूनां प्रत्येकममत्यासकृत् भक्षणेसांतपनम्॥ अभ्यासेयतिचांद्रायणं॥ मत्यासकृच्चेच्चांद्रम्॥ अभ्यासेनदावृत्तिः॥ अत्यंताभ्यासेस्कुरापानसमम् प्रायश्चित्तंतेपुनरुपनयनमेतेषुसर्वत्र॥ पुनरुपनयनेचस्वाध्यायादिकालापेक्षावपनमेखलादंडभैक्ष्यचर्यादीनिच॥ अत्रगृंजनंविषदिग्धबाणहतमृगमांसमितिकश्चित्॥ कालिंजमितितन्नामेतिचप्रांचः॥ गृंजनंलशुनतुल्यःकंदइतिमिताक्षरा॥ गाजरस्वंमूलंयदीयंपत्रंगायकाःकंठशुद्ध्यर्थंभक्षयंतिविटाश्चमदार्थंसपत्रविशेषश्चेतिमाधवः॥ चरकादिवैद्यकोक्तपलांडुवांतरभेदेषुच्छत्राकादिभेदेकवकादौचनरगोमांसादौचैवमेवयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यम्॥ एतेषां सुखप्रवेशमात्रे बलात्कारेण भक्षणे चानुपनीते बालेन सकृद्भक्षणे च गायत्र्या अष्टाधिकसहस्रेण मूर्धनि संतत
बिंदुपातेनोपवासेन च शुद्धिः॥ इतरौषधानाश्यव्याधियुक्तस्यैतद्भक्षणे दोषो न॥ अत्रापि पूर्वोक्तसंततजलाभिषेक उपवास-
श्चेति स्मृत्यर्थसारे॥ सर्वत्र तत्कालच्छर्दिते र्धप्रायश्चित्तम्॥ गंधवर्णरसैर्लशुनादितुल्यस्य भक्षणे सांतपनम्॥ यतिव्रतिब्र
ह्मचारिणां तप्तकृच्छ्रादि॥ लड्डारव्यं पक्षिणं कुसुंभं वार्ताकुकुंभीलकश्लेष्मातकफलानि कवाकं कृष्णसर्षपतंदुलीयकनाली
कानालिकेरी खुरखंडारव्यशाकादिकालिंदं वर्तुलालाबुं च भक्षयित्वा अरण्यकंटकिकुसुंभरक्तशिग्रुभूस्तृणकोविदारेषु क्षु
द्रश्वेतकंटकीवृंताकेषु राजसर्षपारव्यशाकोदुंबरपूतिकारवड्डारव्यशणपुष्पशाल्मलेषु भक्षितेषु अन्येषु च कटुदुर्गंधिक
दमूलफलादिषु भक्ष्याभक्ष्यत्वेन संदिग्धेषु व्रश्चनप्रभवलोहितवृक्षनिर्यासादिषु रेतोविण्मूत्रेषु करनिर्मथितदधिबर्हिवेदि
वा ऋत्विजश्चरुपुरोडाशेषु भक्षितेषु च अमत्या सकृच्चेदुपवासः॥ आवृत्तिरभ्यासे॥ मत्या सकृच्चेत्त्रिरात्रं॥ कामतोऽभ्यासे-
प्राजापत्यम्॥ अत्यंताभ्यासे तप्तकृच्छ्रः पुनरुपनयनं च॥ अन्यथा पतेत्॥ नील्यास्त्वमत्या सकृद्भक्षणे विप्रस्य चांद्रम्॥ अ
भ्यासे मत्या सकृच्चाभ्यासे चावृत्तिः॥ अत्यंताभ्यासे सांतपनम्॥ संधिनीयमसूस्यंदिनीमृतवत्साअनिर्दशामेध्यसेविन्य-
ल्पवत्सानां गवामनिर्दशाजामहिष्योरेकशफानां च महिषीवर्जितारण्यमृगाणां चाजावर्जितसर्वद्विस्तनीनां च क्षीरेषु दधित
त्संभवभिन्नशुक्तेषु चामत्या पीतेषु तेषामत्या पानोत्तरं समनंतरमेव च्छर्दने चैक उपवासः॥ मत्या त्रिरात्रं॥ अमत्याभ्यासे- ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चत्रिरात्रम्॥ ज्ञानतोद्वित्रिरभ्यासेच्छर्दनेचपक्षंगोमूत्रयावकपानम्॥ अत्यंताभ्यासेमासंतत्॥ संधिनीवृषभेणोपजिगमिषुः॥स्यंदि
नीस्रवत्क्षीरा॥ अविरखरोष्ट्रनारीवानरविड्वराहश्वापदक्षीरेषुअमत्यासांतपनम्॥ मत्यातप्तकृच्छ्रः॥ अभ्यासेचांद्रंपुनरुपनयनंच॥अ
त्यंताभ्यासेसांतपनम्॥ स्त्रियःक्षीरंद्विजःपीत्वाकथंचित्काममोहितः॥पुनःसंस्कृत्यचात्मानंप्राजापत्येनशुध्यति॥ ब्रह्मचारियत्योः
कृच्छ्रस्तप्तकृच्छ्रोवा॥ शुक्तेषुदधितद्विकारश्चभोज्यः॥ शूद्रस्यकपिलाक्षीरपानेननवाब्दंब्रह्महव्रतम्॥ विप्रस्यापिहुतशेषातिरि
क्ततत्पानेपशुत्वप्राप्तिः॥ सर्पसरीसृपमूषकमार्जारकृकलासकर्कटनकुलमंडूकशृंगिमयूरवानरकपिश्वगोमायुवृकसिंहव्याघ्रादि
क्रव्याज्जंतुगजाश्वोष्ट्रखरैकशफानामुभयतोदंतानांचकाकबकबलाकाहंसगृध्रजालपादचक्रवाकविविष्करपुंडरीककपिंजलभा
सचाषकुक्कुटप्लवचक्रवाककारंडवगृहचटककपोतपारावतखंजनपांडूकशुकसारिकासारसटिट्टिभोलूकश्येनकंकरक्तपादतित्ति
रिकोकिलाहारितमद्गुकलविंकक्रौंचदार्वाघाटादीनांमनुष्याणांजलचरजलपक्षिणांप्राणिभक्षकाणांनखैर्विदार्यान्नादिभक्षि-
णांमत्स्यादिजंतूनांमत्स्यानांचसूनागतमांसभक्षणेशुष्कमांसभक्षणेचशशकशल्लककच्छपगोधाखड्गव्यतिरिक्तपंचनखमांसभ
क्षणेचैतेषांविण्मूत्ररक्तवसामज्जानांतदुच्छिष्टानांचभक्षणेचामत्याकार्यं॥ अभ्यासेमहासांतपनं॥ मत्यातप्तकृच्छ्रोमत्याभ्यासेचां
द्रम्॥ अत्यंताभ्यासेपतनम्तेषांकर्णादिमलषट्कभक्षणेर्धमितिस्मृत्यर्थसारे॥ अमत्यासकृद्भक्षणेएकोपवासः॥ कामतोद्विगु
णम्॥ तथाभ्यासेत्रिरात्रसप्तरात्रद्वादशरात्रपक्षव्रतमासव्रतचांद्रायणान्यभ्यासाधिक्यतारतम्यमालोच्ययोज्यानि॥ अभ्यासे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्रव्रतांते एकदिनं घृतप्राशनं पुनः संस्कारश्च ॥ समुदितभक्षणाभ्यासे षाण्मासिकं संवत्सरं चेति प्रांचः ॥ एषांज्ञानतो भक्षणे द्वीर-
णेतु सांतपनं ॥ अज्ञानतः प्राजापत्यं ॥ अकामतोभ्यासे चांद्रं ॥ कामतोभ्यासे षण्मासं ॥ अत्यंताभ्यासे सांवत्सरमितिमिताक्षरा ॥ एषा
केशनखप्राशने अजाविमहिषीमृगाणां मांसभक्षणे मृल्लोष्टभक्षणे वा मत्या एक उपवासः ॥ मत्या त्रिरात्रं ॥ एवं कीटपतंगकृमिजलच-
रास्थिरक्तभक्षणे रक्तवमने चापीति स्मृत्यर्थसारे ॥ मांसभांडपक्वस्यान्नस्याशने त्र्यहं कुशपक्वपयःपानं व्रतिनः केशादेर्मुखप्रवेश
मात्रे नम घृतं ब्राह्मीरसं वा पिबेत् ॥ केशादिभक्षणे तु सद्यः कुशहिरण्योदकसहित घृतप्राशनम् ॥ ज्ञानतोभ्यासे त्रिरात्रोपवासो घृत
प्राशनं च ॥ ब्रह्मचर्यादेर्मधुमांसादिभक्षणे धिकं त्रिरात्रं कार्यं कायं वा पुनरुपनयनं च ॥ ततो व्रतसमापनम् ॥ अज्ञानतः सकृद्ब्रह्मोमांस
भक्षणे कार्यं ॥ ज्ञानतो द्विगुणम् ॥ अज्ञानतोभ्यासे चांद्रं ॥ समुद्रगानदीतीरे ऽनडुत्सहित गोश्च दक्षिणा ॥ ज्ञानतोभ्यासे संवत्सरं ॥
अत्यंताभ्यासे पातित्यं ॥ कपिखरविड्वराहादिरेतोविण्मूत्रपुरीषाणामन्यतमभक्षणेन्येषां चामेध्यानामेतद्भक्षणे चांद्रं ॥ अज्ञानतस्त
प्तकृच्छ्रं ॥ अभ्यासादावधिकं कल्प्यं ॥ पुनरुपनयनं सर्वत्र ॥ बलाद्देतो मूत्रादिपाने प्राजापत्यम् ॥ ऊनैकादशवर्षस्याप्येतदेव ॥ गोमू
त्रपुरीषं मेध्यम् ॥ ॥ अथोच्छिष्टाद्यभक्ष्यभक्षणे प्रायश्चित्तम् ॥ तत्र काकादिपक्षिश्वापदाखुबिडालनकुलोच्छिष्टे भूयस्यन्नेर
सेन केशाद्यवपन्ने दवद्रोण्यादो द्रव्यशुद्धिरहितं चान्ने अमत्या भक्षिते एकाहं ब्राह्मीसुवर्चलापानं ॥ मत्या चेत्त्रिरात्रम् ॥ माधवी ३९
धेनुतिलदर्भोदकैः प्रोक्षणमकृत्वा भोजन एतत् ॥ मार्जाराद्युच्छिष्टस्य तथा प्रोक्षणैः शुद्धिस्मरणादिसुक्तं अल्पद्रव्यं च दमत्याभ्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकृच्छ्रं मत्याभ्यासं पक्षं यावकव्रतं ॥ व्रतस्थस्य ब्रह्मक्षत्रियवैश्यशूद्रोच्छिष्टेतु विप्र एकत्रिपंचसप्तरात्राणि क्रमेण पंचगव्यं पिबेत् ॥
अभ्यासे प्येषामावृत्तिः ॥ मत्याभोजनेत्वेतान्येवसोपवासानि कुर्यात् ॥ मत्याभ्यासे कृच्छ्रातिकृच्छ्रतप्तकृच्छ्रचांद्राणि ॥ क्षत्रादौ पाद
पादहानिः ॥ अन्यस्य विप्रोच्छिष्टभोजने सकृदजानतः कृते महाव्याहृतिभिर्मंत्रितपयःपानं ॥ ज्ञानतस्तदभ्यासादौ सांतपनम् ॥ उ
च्छिष्टं चात्रैकपंक्त्युपविष्टविप्रादीनां भोजनमध्ये एकेनापि पात्रत्यागे शेषमन्नं शूद्रादिविषये तद्भोजनोत्तरं पाकपात्रे वशिष्टमप्युच्छि
ष्टं ॥ एवंविधशूद्रोच्छिष्टभोजने त्रिरात्रोपवासो घमर्षणजपः ॥ कामतस्त्वेतद्विषये पंचरात्रं सप्तरात्रं उपवासश्चांद्रं वाभ्यासादितार
तम्येन योज्यम् ॥ गुरुभिन्नविप्रोच्छिष्टभोजने श्वोपहतभोजने कृच्छ्रं भोजनपात्रे भुक्तशेषमत्रोच्छिष्टम् ॥ श्वसूद्रभुक्तशेषभोज
नपात्रे वशिष्टं कामतो भुक्त्वा तप्तकृच्छ्रं कार्यं ॥ अकामतः प्राजापत्यम् ॥ अभ्यासे पराकं चांद्रत्रयं वा ॥ अपत्यभुक्तशेषभक्षणे चां
द्रम् ॥ क्षत्रियवैश्यगर्दभादिभुक्तशेषस्य पात्रावशिष्टस्य भोजने पादोनकृच्छ्रं सार्द्धकृच्छ्रत्रयादि केचित् ॥ भांडस्थेन्ने केशपिपीलि
कामेध्यसेविकीटैरुपहतं तावन्मात्रमुद्धृत्य मृद्भस्मताम्रवैडूर्यहिरण्यरजतादिभिर्गोवालदर्भयुक्तवारिणा शेषं प्रोक्षयेत् ॥ हस्तस्थि
तमेवं भूतं त्यजेत् ॥ मुखस्थं निष्ठीव्य घृतं प्राशयेत् ॥ श्वचांडालरजस्वलासूतिकापतितादिदृष्टान्नमपि मृद्भस्महेमांबुभिः प्रोक्षयेदि
ति मयूखे स्मृतिः ॥ मनुष्यरेतोविण्मूत्रभक्षणे वर्णाः क्रमेण तप्तकृच्छ्रातिकृच्छ्रकायत्रिरात्राणि कुर्युः मत्या चांद्रतप्तकृच्छ्रातिकृच्छ्र
कायानि पुनः संस्कारश्चोभयत्र ॥ अंत्यजानां भुक्तशेषस्य पाकपात्रावशिष्टस्य भक्षणे वर्णक्रमेण चांद्रमहासांतपनषड्रात्रत्रिरात्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णि॥अभ्यासेद्विगुणं॥निरंतरे पतनं भोजन पात्रावशिष्टतदुच्छिष्ट भोजने द्विगुणं॥सह भोजनेत्रिगुणं॥अत्रपुनःसंस्कारोयुक्तः॥स
त्याभ्यासे पतनं॥कानिचिंदुच्छिष्ट भोजन प्रायश्चित्तानि प्रकीर्णक प्रसंगेदर्शितानि॥ ॥अथाशुचिद्रव्यस्पृष्टाभक्ष्यभक्षणेप्रा
यश्चित्तम्॥ ॥तत्र केशकीटनीलीलाक्षास्थिस्नायुचर्मरुधिरविण्मूत्रमांसवसामज्जाशुक्रसुरास्पृष्टस्यमहापातकिदृष्टस्यदु
ष्टपक्ष्यवलीढस्यविड्वराहाद्युच्छिष्टस्य गवाघ्रातस्यशुष्कपर्युषितयोश्चदुष्टया पक्कस्यदैवपित्र्यान्नस्यहोमार्थहविषांचाशनेपा
नेचामत्याचेदुपवासः॥मत्याकृच्छ्रपादोल्पसंसर्गेमहासंसर्गेत्वर्धकृच्छ्रः॥तत्रापिसंस्पृष्टामेध्यादेरसोपलब्धौतप्तकृच्छ्रः॥अ
विज्ञातजात्यस्थ्यादिदूषितेकर्णादिमलषट्कदूषितेचार्धम्॥जलपानसमयेमुखनिसृतंजलंयदिभोजनभाजनेपतेत्॥तदातद्भा
जनान्नभोजनेचांद्रं॥इदंज्ञानतोत्यंताभ्यासे॥अकामतोभ्यासेसकृत् कामकृतेचत्रिरात्रम्॥सुराभिन्नगौडीमाध्वीमद्यवासित-
शुष्कभांडस्योदकस्याज्ञानतःसकृत्पानेच्छर्दनेचत्र्यहंकुशमूलादिपक्कक्षीरपानं॥तदभ्यासेचैतदेवषड्रात्रं॥ज्ञानतस्तुपंचाहं
शंखपुष्पीपक्कपयःपानम्॥तथाभ्यासेसप्तरात्रंगोमूत्रयावकपानम्॥अत्यंताभ्यासेद्वादशाहंब्राम्हीपक्कपयःपानंप्रत्यहमष्ट
सहस्रगायत्रीजपश्च॥अच्छर्दनेनजीर्णत्वेएतदेवतत्रतत्रद्विगुणम्॥एवंभांडस्यार्द्रत्वेपितालादिमद्यभांडस्योदकपानेएतद
र्धम्॥शुष्कसुराभांडस्योदकपानेएकउपवासः॥परेह्निघृतप्राशनमात्रं॥तादृशभांडस्यपर्युषितजलपानेच्छर्दनेचत्र्यहंशं ४०
खपुष्पीपक्कक्षीरपानं॥अकामतोद्विस्त्रिरभ्यासेपंचरात्रंतत्॥कामतःसकृत्पानेसप्तरात्रं॥तथाभ्यासेपक्षम्॥अत्रसर्वत्रजल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पानस्य तपस्त्वाज्जलमल्पपेयमित्याहुः॥जीर्णत्वे आर्द्रभांडस्थजलस्य पीतस्य वमने च प्रागवत्॥आर्द्रभांडस्थोदकपाने जीर्णे चांद्रंका
मतः॥अकामतः॥षडुपवासाः॥अभोज्यान्नभांडस्थितजलदुग्धदधिपाने ब्रह्मकूर्चः॥शूद्रस्यात्र सर्वत्र विषये किंचिद्दानमेव॥अंत
स्थितक्लिन्नमृतपंचनखखरविड्वराहादियुक्तात्यंतोपहतकूपादिजलपाने षडुपवासाः॥अतिकृच्छ्रो वा॥व्रतांते पंचगव्याशनं च॥अ
क्लिन्ने उपवासत्रयं पंचगव्यं चांते॥शूद्राणां नक्तं॥इदं ज्ञानतोऽभ्यासे॥अकामतोऽर्धं॥प्रांचस्तु अकामतः प्रागुक्तं कामतस्तु द्विगुण-
मित्याहुः॥तादृक्मनुष्यपशवयुक्तकूपादिजलपाने तु अज्ञानतः सकृच्च षडुपवासाः॥ कामतोऽभ्यासे च पराकः॥मत्याऽभ्यासे तप्त
कृच्छ्रः॥अधिकतराऽभ्यासे चांद्रं॥तादृशस्थूलतडागादिजलपाने तु न्यूनं कल्प्यं॥विण्मूत्रास्थ्यादिदूषितकूपादिजलपाने त्रयउप
वासाः॥तादृशकुंभस्थजलपाने सांतपनम्॥इदमज्ञानतः॥कामतस्तु द्विगुणम्॥पूर्वोक्तकूपादौ पानव्यतिरेकेण स्नानमात्रे त्वेक
उपवासस्त्रिषवणस्नानं गायत्रीजपश्च॥चांडालादिखाततडागादिषु जानुदघ्नादल्पपरिमाणजलेषु तथाविधजलासक्तचांडाला
दिकसंपर्कयुतह्रदपुष्करिणीषु चाकामतो जलपाने नक्तम्॥कामत एकउपवासः॥अन्यखानितचांडालादिपरिगृहीततादृश
कूपादिजलपाने एतदर्धं॥अभ्यासे कृच्छ्रं॥कामतोऽभ्यासे द्विगुणं॥जानुदघ्नह्रदपुष्करिण्यादिषु महाजलाशये च न दोषः॥तादृ
शकूपे तु विप्रस्य महासांतपनम्॥क्षत्रियादीनां कृच्छ्रकृच्छ्रार्धपादाः अमत्याऽर्धं॥अशक्तः पंचगव्यं पिबेत्॥चांडालादिभांडस्थ
जलपाने कूपवत्॥चांडालादेः कूपभांडादिजलस्य पानोत्तरं वमने विप्रस्य कृच्छ्रं॥रजकाद्यंत्यजखातकूपभांडादिजलतद्भांडस्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयोदध्यादिपानेत्वमत्या द्विजाः क्रमेणब्रह्मकूर्चपानेनत्रिद्व्येकोपवासान्कुर्युः॥ शूद्रस्तूपवासंशक्त्यादानंचकुर्यात्॥ मत्यासर्वत्र
द्विगुणम्॥ अंत्यजखाततवापीतडागादिषु अल्पजलेषु पानादिकरणे एक उपवासो मत्याद्विगुणं॥ अमत्याभ्यासेकार्य॥ मध्यमजज
लेषुपंचगव्यम्॥ महत्सुनदोषः॥ अत्र सर्वत्रपुनःसंस्कारइतिकेचित्॥ शूद्रामेध्यसेविकीटादिस्पृष्टान्नभोजनेत्वहोरात्रमभोज
नम्॥ ॥अथचांडालाद्यन्नभोजनेप्रायश्चित्तं॥ ॥तत्रज्ञानतः सकृच्चांडालाद्यन्नभक्षणेचांद्रम्॥ अज्ञानतस्तत्सकृच्छ्रः॥
एककालेएकभयत्लोपक्रमाणांग्रासानामेकस्मिन्प्रयोगेभोजनंसकृद्भोजनम्॥ एवंपुनर्भोजनेभ्यासः॥ वारत्रयेत्यंताभ्यासः॥
एवंसर्वत्रबोध्यं॥ भवदेवस्तुअज्ञानतः सकृद्भोजनेतप्तकृच्छ्रं॥ अभ्यासेचांद्रायणंज्ञानतोद्वैगुण्यमित्याह॥ सिद्धान्नार्थे॥ स
कृजलादौशुष्कान्ने॥ आमान्नेतुतदर्धमात्रंबोध्यम्॥ बलात्सकृत्शुष्कतदन्नभोजनेउपवासत्रयम्॥ बलात्सिद्धान्नभोज
नेपराकः॥ ज्ञानाभ्यासेचांद्राभ्यासः॥ अज्ञानतोभ्यासेतप्तकृच्छ्राभ्यासः॥ चांडालादिपक्वान्नाशनेसर्वत्रपुनरुपनयनम्॥
कामतश्चतुर्विंशतिवारंभोजनेपातित्यं॥ अज्ञानतस्तत्द्विगुणवारभोजनेतत्रचद्वादशवार्षिकंप्रायश्चित्तम्॥ यवनम्लेच्छ
यावनानांअन्नभोजनेप्येवं॥ अत्रप्रायश्चित्तेनपापनाशेपिवचनान्नव्यवहार्यता॥ द्विजस्यज्ञानात्स्वेच्छयाचांडालयवना-
दीनांदासत्वांगीकारेतुप्राजापत्यद्वयम्॥ पुंश्चल्यभिशस्तम्लेंच्छचांडालादीनांबलादेकमासंदासंतामापन्नोद्विजोबलात्का
रितगोवधोच्छिष्टमार्जनोच्छिष्टभक्षणतत्स्त्रीसंगादिः प्राजापत्येनशुद्ध्यति॥ आहिताग्निश्चांद्रेण॥ संवत्सरोषितस्यप्रा ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जापत्यं पराकश्च ॥ शूद्रस्य संवत्सरावासे पक्षं यावकपानम् ॥ मासं वासे कृच्छ्रपादः ॥ मयूरवेतु प्राजापत्यादिकं मासमात्रे गो
वधादौत प्रातिस्विकं तत्प्रायश्चित्तमकामकृते विहितं कार्यमित्यक्कस् ॥ एवं वर्षपर्यंतं प्रायश्चित्तकल्पना कार्या ॥ चतुर्वर्षपर्यंत
मिति क्वचित् ॥ अग्रे पातित्यात् प्रायश्चित्ताभावः ॥ एतदेव ज्ञानात् शूद्रादिदासत्वांगीकारे ॥ अज्ञानादर्धमित्याहुः ॥ चांडाला
दि स्पृष्टान्न भोजने प्राजापत्यं ॥ ज्ञानतो द्विगुणम् ॥ एतदेव पतितकुणिरजस्वलादि स्पृष्टान्न भोजने ॥ अज्ञानतः सकृच्चां
डालरजस्वला पतिताद्युच्छिष्ट भोजने चांद्रम् ॥ तद्भोजनानंतरं पाकपात्रे वशिष्टमन्नं तदुच्छिष्टम् ॥ ज्ञानतो द्विगुणं ॥ चांडा
लादि भोजन पात्रावशिष्टरूपोच्छिष्टभक्षणे तु प्रकीर्णकप्रसंगोक्तं ज्ञेयम् ॥ क्षत्रियवैश्ययोरापदि बलात्कारेन्नेतर चर्वित
तांबूलाद्युच्छिष्ट भोजने च क्रमेण कार्यं कार्यार्द्धं ॥ विप्रस्य तत्रापि चांद्रमेव ॥ क्षत्रविशोरप्यापदभावेन्नरूपोच्छिष्टभोजने-
च चांद्रमेव ॥ सर्वत्राप्युच्छिष्टादुच्छिष्टे द्वैगुण्यम् ॥ तत्रापि पाकपात्रावशिष्टोच्छिष्टाद्भोजनपात्रावशिष्टोच्छिष्टे द्विगुणमधिकं वा
कल्प्यम् ॥ तथाच तत्स्पृष्टमात्रात्तत् द्विगुणं तद्धस्तदत्तस्य तद्गृहपक्वस्य वा भक्षणे कल्प्यं ॥ सह भोजने त्रिगुणम् ॥ उच्छिष्टे चतुर्गुणमि
त्यादि बोध्यं ॥ चांडादि संसर्गिणोन्नस्य तत्पाकस्य भोजने कृच्छ्रार्धं ॥ शुष्कादौ तदर्धादि चांडालादिस्पृष्टजलक्षीरदध्यादि पानेल
घुसांतपनम् ॥ एतत् पीतशेषांबुपाने षडुपवासपूर्वकं पंचगव्यपानमज्ञानतः ॥ ज्ञानतो द्विगुणम् ॥ अभ्यासे आवृत्तिः ॥ अज्ञानतः
सकृत् शौंडिकाद्यन्नभोजने मासं गोमूत्रयावकपानं ॥ शुष्कान्ने तदर्धम् षडुपवासा वा ॥ आमान्ने तदर्धं ॥ ज्ञानतो द्विगुणं ॥ अभ्यासे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवृत्तिः॥ ज्ञानतोऽष्टधा भोजने कृच्छ्राब्दं॥ अज्ञानतस्तथात्वे चांद्रद्वयं ज्ञानादष्टचत्वारिंशद्वारं भोजने पातित्यम्॥ अज्ञानतः षण्ण
वतिवार भोजने तत्र द्वादशाब्दं॥ ज्ञानतः सकृदेतदुच्छिष्टान्न भोजने विप्रस्य चांद्रम्॥ क्षत्रियवैश्ययोस्तु सकृत्कृच्छ्रः॥ एतदर्धमेत
त्स्पृष्टमात्रान्न भोजने॥ शुष्कान्नस्योच्छिष्ट भोजने प्येवम्॥ अत्राशक्तः कुशोदुंबरबिल्वाद्यैः पनसांबुजपत्रकैः॥ शंखपुष्पीसु
वर्चादिक्काथं पीत्वातु शुध्यति॥ तत्पीतशेषजलपाने उपवासत्रयपूर्वकं पंचगव्यपानमज्ञानतः॥ ज्ञानतो द्विगुणं॥ अभ्यासे आवृ
त्तिः॥ गवोच्छिष्टाशने च्छर्दने एकउपवासः पंचगव्यपानंच॥ अभ्यासे उपवासत्रयं॥ चतुर्थे पंचगव्यम्॥ अच्छर्दने ज्ञानतः सकृ-
द्भोजने प्येतदेव॥ मतिपूर्वकाभ्यासे तिकृच्छ्रः॥ केचित् श्वकाकोच्छिष्टे पुनः कृतपाकपर्युषितान्ने स्त्रीशूद्रोच्छिष्टे च अन्ने भुक्ते
प्येवमेव प्रायश्चित्तमाहुः॥ प्रपाजलपाने सीरवृक्षनिर्यासाधारपात्रस्थजलपाने नौकाजलनिःसारणीपात्रस्थजलपाने कूपा
देश्चर्मपुटकनिःसारितजलपाने च सचैलस्नानपूर्वकमुपवासः॥ अशक्तस्य पंचगव्यपानं॥ आपदि तदेव जलं भूमिष्ठं कृत्वा पात्रां
तरेणोद्धृतं पेयं प्रापापदि दोषोन॥ शूद्रभांडस्थजलपाने उपोष्य बिल्वपत्रपलाशकुशक्काथोदकपानं॥ नवभांडे तु न दोषः॥ एवं पयो
दध्यादावपि अत्र सर्वत्र पुनरुक्तिः॥ प्रासंगिकी वैलक्षण्योक्तिः स्मृत्यंतरानुरोधात्॥ तत्र शक्त्याद्यपेक्षयाव्यवस्था॥ शातातपः॥
घृतं तैलं दधिक्षीरं तथैवेक्षुरसो गुडः शूद्रभांडस्थितं तक्रं तथा मधु न दुष्यति॥ ॥ अथ भावदुष्टादिभक्षणे प्रायश्चित्तं॥ ॥ ४२
तत्र यद्दर्णत आकारतो वाविसदृशतया जुगुप्सित शरीरमलादिभावनां जनयति अरिप्रयुक्तगरादिशंकां वा जनयति तद्भावदुष्टम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधार्तश्चनको भुंक्ते मामकं त्वन्नमेमहि ॥ ब्रूते व्यर्थाशी यस्त्वेवं तद्वाग्दुष्टम् ॥ काक्रियास्मिन्निति विनिंद्य दीयते यत्तच्च ॥ तयोर्भोज-
ने कामतः कृते त्रिरात्रमुपवासः ॥ गोमूत्रयावकपानमित्यन्ये ॥ अज्ञानतोर्द्धं ॥ छर्दने घृतप्राशनं ॥ भक्ष्याभक्षत्वेन शंकितवस्तुभ
क्षणे अक्षारलवणम् ॥ सूक्ष्मां ब्राह्मीं सुवर्चलां पिबेत् ॥ त्रिरात्रं शंखपुष्पीं वा पयसा सह ॥ कुशपद्मोदुंबरपलाशबिल्वपत्रक्काथं वापि
बेत् शंकायाश्चाविज्ञाने द्विगुणम् ॥ अज्ञानतः शंकितभक्षणशुद्ध्यर्थं वर्षांते त्रीन् द्वावेकं वा कृच्छ्रान् कुर्यात् ॥ ॥ अथ कालदुष्टाशने
प्रायश्चित्तम् ॥ ॥ कालदुष्टमस्नेहाक्तपर्युषितादि ॥ मत्या तद्भक्षणे त्रिरात्रं यावकपानम् ॥ अमत्या त्वेकउपवासः ॥ अनिर्दशगोक्षीरा
दिपाने चैवं ॥ यवगोधूमपयोदधिपिष्टविकारे स्नेहपक्वे स्नेहाक्तान्नादौ च न दोषः ॥ शृंगास्थिदंतशुक्तिशंखकपर्दजनितपात्रैः कंदशालू
कजैश्च जलं पीत्वा नवोदकं च वर्षाकाले त्र्यहादर्वाक् अकाले च दशाहादर्वाक् पीत्वा पंचगव्यं पिबेत् मत्योपवासः ॥ ग्रहणकाले नवश्राद्धे
च भोजने ग्रामयाचकान्नभोजने च चांद्रं ॥ ग्रहणनिमित्तनिषिद्धकाले संधिकाले निप्रातरति सायंकाले च भुक्त्वा रात्रौ धानादधिसक्तु
तिलसंबद्धान्नभोजने एवमादिष्वनादिष्टप्रायश्चित्तेषु प्राणायामशतम् ॥ मत्योपवासः अमत्योपवास इत्यन्ये ॥ ॥ अथ गुण-
दुष्टभोजने प्रायश्चित्तं ॥ ॥ शुक्तानि कषायादींश्च अन्यान्यमेध्यानि चामत्या पीत्वा भुक्त्वा चोपवसेत् ॥ मत्या त्रिरात्रं यावकं ॥ आम
लकयुक्तकांजिकायां न दोषोभिघारणे च ॥ शुक्तं कालवशादम्लतां गतम् ॥ उद्धृतसारपिण्याकमथितादिभक्षणे मत्या त्रिरात्रं या
वकं ॥ अमत्यार्द्धं ॥ छर्दित्वा घृतं पिबेत् ॥ वैश्वदेवादिरहितान्नभोजने अतिथिदेवतादिप्रयोजनमनुद्दिश्य स्वप्रयापक्वस्य कृसरसंया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बकपायसापूपशष्कुलीमधुमांसादिभक्षणेष्वमत्योपवासः॥ मत्यात्रिरात्रं यावकं॥ कायमभ्यासे॥ आहिताग्निस्त्वमत्यात्रिरात्रं ॥ मत्याकायंकुर्यात्॥ हस्तदानादिक्रियादुष्टस्यामत्याभोजने नक्तम् मत्यात्तूपवासः पंचगव्यंच॥ तत्रमाक्षिकमिक्षुरसविशेषरूपं फाणितंशाकंगोरसलवणघृतानिहस्तदत्तानिदुष्टानिअमत्याभ्यासेतूपवासः॥ मत्याभ्यासेत्रिरात्रं॥ अत्यंताभ्यासेसांतपनम्॥

॥अथश्राद्धभोजनेप्रायश्चित्तम्॥ ॥तत्रांतर्दशाहेनवश्राद्धानि॥एकादशाहश्राद्धमारभ्योनाब्दांतानिषोडशैकोद्दिष्टानिनवमिश्राणि॥ सपिंडीकरणंमिश्रंततःपराणिपुराणानि॥ तत्र नवश्राद्धभोजने कार्यं॥ अनापद्यत्र चांद्रम्॥ एकादशाहेम हैकोद्दिष्टेप्येवं॥ पादोनंकायमापदि॥ अनापदितुचांद्रकायंचेत्यन्ये॥ द्वादशाहे आद्यमासिकेचोनमासिकेच पादोनंकायमेव॥ अत्रानापदिकायं॥ अन्येपराकमाहुः॥ द्वितीयमासिकेत्रैपक्षिकमासिकेऊनषाण्मासिकेऊनाब्देचार्धकृच्छ्रम्॥ अनापदिपादोनम्॥ त्रिमासाद्यब्दमोक्षांतेषु सपिंडनेचाब्दिकेचोपवासः पादकृच्छ्रो वा॥ अनापदितुत्रिरात्रं कृच्छ्रार्धंवा॥ अन्येत्वनापदित्रैपक्षिकेति कृच्छ्रः॥ षाण्मासिके कृच्छ्रः॥ आब्दिके आपदित्रिरात्रं गोमूत्रयावकपानं॥ अनापदिकायपादमित्याहुः ॥ तदुत्तरं मत्याब्दिके त्रिवर्षपर्यंतंनक्तं॥ अनापदीतूपवासः॥ गुरुविप्राद्यर्थकद्रव्यार्थंनवश्राद्ध भोजनेत्रिरात्रम्॥ महैकोद्दिष्टे द्वादशाहादौचत्रिरात्रम्॥ द्वैमासिकादौउपवासः॥ त्रिमासादौ नक्तंपंचगव्यंच॥ मत्याब्दिकेन्यपुराणेषुच षट्प्राणायामाः॥ दृष्ट्वैत्रयःप्राणायामाः॥ तत्रैवनिस्पृहस्यभोक्तुर्जपशालिनोवानदर्धम्॥ क्षत्रियादिश्राद्धेषुद्वित्रिचतुर्गुणानिक्रमात्कार्याणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्मृत्यर्थसारे ॥ अन्यत्रतुश्रावणश्राद्धेषट्प्राणायामाः ॥ त्रिमासादिवत्सरांतमुपवासः ॥ सपिंडनश्राद्धेचआद्यमासिकेपा
दोनकृच्छ्रः ॥ त्रैपक्षिकेतदर्धम् ॥ द्वैमासिकेपंचगव्यपानंच ॥ प्रत्यब्दंनक्तंइदमापदि ॥ अनापदितुद्विगुणमिति ॥ चांडालोदक
सर्पविप्रपशुदंष्ट्रिविद्युत्पातपतनविषोद्बंधनानाशकैर्मृतानांस्तेनपतिताद्यभोज्यान्नानांचनवश्राद्धेषुचांद्रम् ॥ प्रथममासिके
चांद्रंपराकश्च ॥ द्वादशाहादौपराकएव ॥ द्विमासत्रिपक्षादावतिकृच्छ्रःत्रिमासादौकार्यं ॥ आब्दिकेपादकृच्छ्रः ॥ द्वितीयव
र्षादावुपवासः ॥ सम्यग्विषयेपिद्रव्यार्थभोजनेप्येवमेव ॥ अपांक्तेयानामेकादशाहश्राद्धभोजनेशिशुचांद्रम् ॥ यतिव्रतिब्र
ह्मचारिणांतुप्रथममासिकादिषुनवश्राद्धेसूतकान्नस्यचभोजनेउक्तंकृत्वाधिकत्रिरात्रोपवासंप्राणायामत्रयपूर्वकघृत-
प्राशनंचकृत्वाव्रतशेषसमापनं ॥ अनापदितुकायम्त्रिरात्रोपवासोद्वादशप्राणायामाः पंचगव्याशनंचाधिकम् ॥ कामतो-
भोजनेपुनरुपनयनमित्यन्ये ॥ अभ्यासेतूक्तकृच्छ्रादिद्विगुणं ॥ आमहेमसंकल्पितश्राद्धेषुतत्तदर्धानि ॥ गुरुविषयेतूपवा
सोनक्तंषट्त्रिंशत्प्राणायामाश्च ॥ अतिश्रोत्रियादिपुराणश्राद्धेषुअनुक्तप्रायश्चित्तेषुसर्वश्राद्धेषुचगायत्र्यादशकृत्वापः
पीत्वाशुध्यति ॥ ततःसंध्योपासनहोमादियथोचितंकुर्यात् ॥ वृद्धिश्राद्धेप्राणायामत्रयम् ॥ चौलनामकरणजातकर्मांगश्रा
द्धेषुचूडाहोमांतेचसीमंतेसोमेचाधानांगब्रह्मौदनेचामत्यापदिचभुक्तौसांतपनम् ॥ मत्यापदिचांद्रं ॥ अन्यसंस्कारेषूपवा
सः ॥ अनापदित्रिरात्रं ॥ अन्यदत्ताकन्यान्यस्मैपुनर्दत्तायासापुनर्भूः ॥ असंस्कृतेपूर्वगर्भेप्रसूतेसतिद्वितीयगर्भेसस्कारो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्याः सा पुनरेता ॥ ऋत्वादिषोडशाहास्थ्वाद्वेयागर्भिणीसारेतोधा ॥ भर्तृशासनोल्लंघिनी कामचारिणी ॥ आसां गर्भेषु भु-
क्तौ पूर्ववत्सांतपनं चांद्रं वा ॥ सर्वस्त्रीप्रथमगर्भेषु चैवम् ॥ अनि. दशाहनवश्राद्धे कामतो भुक्तवतो विप्रस्यानापदि संवत्सरपर्यं-
तं भोजनात् प्राक् संहिताध्ययनमिति केचित् ॥ ॥ अथ परिगृह्याशुचिदुष्टभोजने प्रायश्चित्तानि ॥ ॥ तत्र राजपुरोहितराज-
भृत्यवैश्यशूद्राणां क्लीबाजाविकमाहिषिकस्थानिकभूपालानां स्तेनगायकलक्षकवार्धुषिकदीक्षावस्थितानां कदर्यबद्धाभिशस्त-
पुंश्चलीदांभिकवैद्यनटनर्तकगणकानां भरवृत्तिस्त्रीसदृशचेष्टितनिराचारनिषिद्धाचाराणामाचार्याग्निगुरुधर्मशास्त्रगोब्रा-
ह्मणादिद्वेषिणां संवत्सराभ्यस्तोपपातकानां चर्मकारस्वर्णकारशौंडिकव्याधपुनर्भूजातभ्रूणघ्नविषकारशस्त्रकारलोह-
काराणां मत्तोन्मत्तक्रुद्धातुरगणगणिकानां श्वचक्रमद्यस्त्रीमृगजीविनां मश्वरथगजारोहणवृत्तीनामुच्छिष्टभोजीक्रूरोग्रप-
तितपिशुनानां रजकनिर्णेजकवर्तकानां शूद्रयाजकाध्यापकचित्रकारशिल्पिब्रह्मविक्रयिणां वृथाश्रम्यनाश्रम्याश्रमभे-
दिनामपण्यविक्रेतृसोमलतानां विक्रेतृशैलूषतंतुवायतुन्नवायकिरातानां यतिब्रह्मचारिणो व्रात्यतद्याजकादीनां नित्यरो-
गियोनिसंकीर्णसंकरजातिकुंडगोलकनदन्नाशिनां घाटिकविप्रगोदेववृत्तिघ्नानां परिदेवनसंबंधिनां गरदसूपकारवेणवो-
पजीविपाखंडिलिंगानां सूतादिप्रतिलोमजानां कर्मारकृतघ्नोग्रदंडपातिनां पुण्यसोमयागात्मविक्रयिणां अनृतवादिद्वेषिहे-
मकाराणां वृक्षारोपणवृत्तीनां कूटकृत्वृषलीनसतितत्संबंधिनां तूर्यादिस्वनव्यतिरिक्तकरणैर्नृपतिप्रबोधकानां कितवमृग- ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याजीविनिपादतत्कर्मकृतां मूल्येनद्विजकार्यकर्तृणां प्राणिवधजीविलोकायतिकदेवलकस्त्रीजितकुष्ठिकुनखिश्यावदंतानां
पित्रादिविवदमानस्यनद्यादिसंतरणजीविग्रामयाजकतत्पुरोहितवणिजपशुमारकदुर्लोमसेवककांडपृष्ठानां पर्याहितप
रीष्टपुनर्भ्वग्रेदिधिषुपतितज्ज्ञातानांचक्रितौलिकपक्षिरक्षकसमुद्रतारकहीनांगातिरिक्तांगानामपुत्रकानग्निकमुमूर्षूणां
पतिपुत्ररहितस्त्रियाःपंचयज्ञानकृत्वानित्यपरान्नभोजिविरूपपरपाकनिरतस्यपंचमहायज्ञकरणंविनाभोजनरूपपरपा
कनिवृत्तस्यापंचसंज्ञकज्ञानवर्जितग्रहस्थस्याचार्यपितृमातृकृतगुर्वग्नित्यागिनांकृतकन्यास्त्रीसत्यविक्रयिणांगृहस्थि-
तोपपत्तिकज्ञातोपपत्तिकस्त्रीपरिग्रहिणोद्यूतजीविविधिनिषेधातीतसूतकिकुलालानांचतुःषष्टिपलान्नभक्षकरूपकुंडा-
शिनःकांस्यसीसादिकारवाद्योपजीविभांडवस्त्रादिकर्तृपश्वादिविक्रयिमद्यविक्रयिणांताम्रादीनांस्वर्णादिसदृशरूपक-
र्तृणामित्यादिपापिनामेषांमार्गेतिष्ठतांभिक्षान्नप्रतिग्रहेचांद्रायणम्॥एतेषांकृतनिष्कृतीनांसुरव्यतस्तत्तद्वस्तूपजीविनां-
चान्नभोजनेदानेयाजनेप्रतिग्रहेचैवम्॥एतच्चतत्तद्वस्तूपार्जितधनत्यागपूर्वकमेव॥कुनखिकृष्णदंतकुष्ठिप्रभृतीनांचप्रागु
क्तानांविप्रान्नदशूद्रस्यशूद्रान्नदविप्रस्यास्वामिकशूद्रस्याप्रसूतायादुहितुश्चान्नभोजनेशिशुजुगुप्सितान्नस्यमहापापिवी
क्षितस्यश्वादिस्पृष्टस्योदक्यादिदृष्टस्यगवाघ्रातस्यपक्ष्यवलीढस्यासंस्कृतस्यबहुयाचितस्यसरोषसविस्मयदत्तस्यपाद
स्पृष्टस्यावज्ञातस्यानर्चितदत्तस्यातुष्टिकरस्यचान्नस्यभोजनेचामत्यात्रिरात्रं॥अमत्याभ्यासेकृच्छ्रः॥मत्यातिकृच्छ्रः॥मत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्यासे तप्तकृच्छ्रः ॥ ब्रह्मचर्यादेः कायानि कृच्छ्रतप्तकृच्छ्रचांद्राण्यमत्यादिषु क्रमेण पुनः संस्कारश्च ॥ यद्वा त्रिषट्नवद्वादशरात्राणि पयसा भूयोभ्यासे चांद्रम् ॥ अत्यंताभ्यासे चांद्रवृद्धिः ॥ आपदि एकद्वित्रिचतुरुपवासाः ॥ अत्यंतापदि त्रिषट्नवद्वादशप्राणायामाः ॥ आमान्नेषु स्नानम् ॥ एतद्वृत्तिविप्रान्नभोजने एकभक्तम् ॥ अनाचारे दुष्टाचारे नक्तम् ॥ ब्राम्हणब्रुवे स्नानमष्टशतजपश्च ॥ एवं शारवारंडान्नस्य ब्राह्मणादिसंघाताद्युपदेशत्यक्तादिरूपस्यानेकस्वामिकरूपस्य वा गणान्नस्य को भुंक्ते त्यादिस्मयादिनादीयमानदुष्टान्नस्य नगरमधुकराद्यन्नस्यासन्मानं गुणिनां सन्मानं पापकर्मणां कुरुते यस्तदन्नस्य च भोजने प्रागवदेव ॥ आचारेंदुशेखरे भोजनप्रकरणे गणिकाद्यभोज्यान्नभक्षणे चैवमित्युक्तम् ॥ ॥ अथ जातमृताशौचान्नभोजने प्रायश्चित्तम् ॥ ॥ द्विजाशौचे सवर्णानामुपवासस्त्रिरात्रं वा ॥ विप्रक्षत्रियवैश्यशूद्राशौचेषु अमत्या विप्रो भुक्त्वा नक्तैकद्वित्रिरुपवासान् कुर्यात् ॥ अभ्यासे त्वेकत्रिपंचसप्तोपवासाः ॥ यद्वाभ्यासे द्वात्रिंशत् षष्टिशतं प्राणायामाः ॥ उपवासैः प्राणायामानां समुच्चय इत्येके ॥ अन्ये त्वापदि अज्ञानत एवासकृत् भोजने एवैतत् ॥ अभ्यासे त्वधिकमित्याहुः ॥ मत्या चेत्काय सांतपन महासांतपन चांद्राणि ॥ एकद्वित्रिचतुःकायानि वा ॥ मत्याभ्यासे कायातिकृच्छ्रतप्तकृच्छ्रकृच्छ्रचांद्राणि ॥ कामतो भूयोभ्यासे एकद्वित्रिषण्मासेषु क्रमेण यावकव्रतम् ॥ अत्यंतापदि मत्याभ्यासे विप्रात्युक्तप्राणायामा एव ॥ अज्ञानात् भुक्तौ छर्दने चानापद्यपि अष्टविंशति शत पंचाशताष्टसहस्रगायत्रीजपो वा बोध्यः ॥ द्विजाशौचे शूद्रस्य भुक्तौ स्नानम् ॥ शूद्राशौचे शूद्रस्य स्नानं पंच ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गव्यंच ॥ आशौचिविप्रस्पृष्टपानीयपाने पंचगव्यमज्ञानतः ॥ ज्ञानतश्चेदुपवासः ॥ ब्रह्मचर्यादिस्त्तत्ताने पंचगव्यमुपवासश्च
॥ प्रत्यहं सहस्रजपश्च त्रिरात्रम् ॥ जाताशौचा आहिताग्न्याशौचे च लघु सर्वं योज्यं इत्येके ॥ आशौचे भुक्तवंतं न स्पृशेदा पुरीषो
त्सर्गात् ॥ इदं च प्रायश्चित्तं तद्वर्णानामाशौचव्यपगमे कार्यं ॥ तावदाशौचान्न भोजिनो प्याशौचात् ॥ एतच्चाशौचि स्वामिकान्न
भोजन एव ॥ आशौचिस्पृष्टाशौचिस्वामिकान्न भोजने तु न तत् प्रायश्चित्तद्वय समुच्चय इत्यन्यत्र विस्तरः ॥ आशौचि गृहेन्य
दीयान्न भोजनेपि नक्तमुपवासो वा प्रायश्चित्तम् ॥ अथ कापालिकान्न भोजने तज्जलपाने चक्र मात्कायतदर्धं च ॥ अभ्यासे
द्विगुणं ॥ मत्याभ्यासे चतुर्गुणम् ॥ तत्स्त्रीगमने चैवम् ॥ अत्यंताभ्यासे ब्रह्मकृच्छ्रं ॥ अन्नसत्र प्रवृत्तस्याग्नि होत्रिणश्चाशौ
चवत्ते पितदीयामान्नेषु दोषो न तयोः पक्वान्न ग्रहणे तु क्रमेणैकरात्रम् यावकव्रतं द्वादश चतुर्विंशतिः प्राणायामा वा ॥ पक्षे
मासे वा देव पितॄन भोजयतोन्नाशने चांद्रं ॥ पतितगृह वासान्न भोजन प्रति गृहेषु ज्ञानाभ्यासे मासोपवासाः ॥ अज्ञानाभ्या
से चांद्रम् ॥ पूर्वगणितव्यतिरिक्त निषिद्धाचरणः शीलानामन्न भोजने तूपवासः ॥ वत्सराभ्यासे पराकः ॥ उक्तातिरिक्तनिषि
द्ध मूल फल पत्राद्यशने उपवासः ॥ ॥ इति निंदितान्नादन प्रायश्चित्तानि ॥ ॥ अथ नटादि कर्मकरणे ॥ ॥ वशीकर
णोच्चाटनादि रूपे भिचारे शक्तौ सत्यामपालन रूपे विना कारणं गृहाग्नि ष्काशने संभोगादित्याग रूपे च भार्यात्यागेपि उपपा
तक सामान्य प्रायश्चित्तानि शक्त्याद्यपेक्षया योज्यानि ॥ अत्रोपपातक प्रायश्चित्तेषु यथोपदिष्टं विप्रस्यैव ॥ क्षत्रियस्य पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोनं ॥ वैश्यस्यार्धं ॥ शूद्रस्य पादम् ॥ तत् स्त्रीणां तदर्धं ॥ रजस्वलानां तत्र तत्रोक्तमेव कार्यं ॥ ॥ इत्युपपातकप्रायश्चित्तानि समाप्तानि ॥ ॥ अथ महापातकेषु तत्रादौ ब्रह्महत्याप्रायश्चित्तम् ॥ ॥ तत्र ब्राह्मणत्वप्रकारकज्ञानपूर्वकं मारणकामनया ब्राह्मणवधे मरणादेव शुद्धिः ॥ तच्चात्मनोऽग्निप्रवेशनेन भृगुपतनेन वा ॥ अथवा ब्रह्महत्यापापशुध्यर्थं बाणलक्षीभूतोऽयमिति जानतां धनुर्भृतां युद्धभूमौ स्वेच्छया लक्ष्यभवनेन ॥ अत्र तादृशो बहुप्रहारार्त्तो मृतकल्पो भवन् यदि पुनर्जीवेत्तदापि शुध्यति ॥ मरणांतं प्रायश्चित्तं क्षत्रियादेरेव विप्रस्य तु तत्तद्वक्ष्यमाणं प्रायश्चित्तं द्विगुणं कार्यं इति मिताक्षरा ॥ अज्ञानतो निच्छया वा कृतेषु ब्रह्मवधे हतविप्रशवशिरोध्वजहस्तस्तत्कपालालाभे गृहीतान्यदीयकपालो स्वकर्म रव्यापयन् ब्रह्मचारिधर्मवान् त्रैवर्णिकाचार्यादिदर्शने मार्गादपक्रमन् त्रिषवणस्नायी अध्ययनाध्यापनादिषट्कर्माणि वर्जयन् समंत्रकं स्नानसंध्योपासनमात्रं कुर्वन् रात्रौ वीरासनी जटी मुंडो वा वन्यफलमात्राहारी तदभावे त्वसंकल्पितविधूमभुक्तवज्जनसप्तागारेष्वेव भैक्ष्यं मृत्पात्रेण चरन् क्षमी दांताचारः कंबलक्षौमशयानो चीरवल्कलान्यतमवासा बहिर्ग्रामाद्देवालयादिसमीपवासी विप्रगृहाण्यप्रविशन् द्वारादेव तत्तद्गृहान्नमस्कुर्वन्नेककालाशी भिक्षाया अलाभे उपवसन् द्वादश वर्षाणि क्षपयेत् ॥ ध्वजश्च शवनिर्हरणार्थस्वट्वांगस्येव ॥ एतदशक्तौ षष्ठ्युत्तरत्रिशतधनेवस्त्रमूल्यं वा हेमरौप्यान्यतरस्य षष्ठ्युत्तरत्रिशतनिष्कानि ॥ अत्राशक्तौ तावत्संख्यान्यर्धनिष्कानि पादनिष्कानि वा ॥ अत्रांते शतं दश वा गावो दक्षिणा विप्रभोजनादीति केचित्तु ॥ ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृमातृसोदरगुरुश्रोत्रियाहिताग्न्याचार्यादिविप्रवधेतुमरणपर्यंतमेतदेवव्रतम् ॥ भिक्षाशनंचलोहितशरावेणेति ॥ अ
न्यगोसहस्रादिकद्वादशाब्दमित्यन्ये ॥ द्वादशाब्दव्रतमध्येचोरव्याघ्रादिहन्यमानस्यब्राह्मणस्यतादृशगवांद्वादशकस्यवार
क्षणेद्विजानुविज्ञाप्याश्वमेधावभृथस्नानेवासद्यएवशुद्धिः ॥ प्रक्रांतव्रतमध्येमरणेपितावतैवपापक्षयः एवंव्रतमध्येगोवि
प्रार्थेप्राणपरित्यागेतत्सर्यंतंव्यापारंकृत्वाजीवनेपिवासद्यएवशुद्ध्यति ॥ यद्वाव्रतमध्येकुष्टादिदीर्घतीव्रव्याधिग्रस्तंविप्रंगां
वाऔषधैःसंरक्ष्यतदैवशुद्ध्येत् ॥ एवंव्रतमध्येचोराद्यपहृतविप्रधनार्थंतैःसहयुद्ध्वाल्पद्रव्यस्यविप्रायप्रापणेतन्निमित्तमरणे
वाबहुशस्त्रक्षतस्यमृतकल्पस्यतैस्त्यक्तस्यधनानयनंविनापिजीवनेपिवासद्यएवशुद्धिः ॥ नत्वग्रेपुनर्व्रतकरणं ॥ इदंचाम
त्यानिच्छयावानिर्गुणंविप्रंहंतुर्ज्ञेयम् ॥ प्रक्रांतव्रतक्षत्रियस्यजातिमात्रविप्रस्यचकामतःसगुणेनवधेकृतेद्वादशाब्दंकार्यम्
॥ अज्ञानतःषडब्दं ॥ मितहविष्याशिनः शाखांतंत्रिवेदसंहिताब्राह्मणपारायणंवा ॥ पूर्वमेवाहिताग्नेःकृतप्रकृतियज्ञस्यवि
श्वजिदभिजित्त्रिवृदग्निष्टुतामन्यतमयागकरणंवा ॥ विंध्योत्तरवासिनातुनिर्गुणेनसगुणेनवाजातिमात्रनिर्गुणविप्रवधे
विकर्मवर्जितचातुर्वर्ण्यात्पथिभिक्षांकुर्वताछत्रोपानद्वर्जितेनगोकुलगोष्ठग्रामतपोवनतीर्थादिषुस्वकर्मख्यापयन्समुद्र
सेतुदर्शनस्नानेकृत्वाविप्रेभ्योभोजनवस्त्रपवित्रादिदेयंअत्रगोशतंदक्षिणा ॥ जातिमात्रविप्रस्यवेदाभ्यासादिहीनेनधनव
तावधेवेदवित्संप्रदानजीवनपर्याप्तभूम्यादिधनदानम् ॥ द्वादशवर्षोपभोग्यद्रव्यसहितगृहदानंवातावत्सर्वस्वदानंवा ॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तौ उत्तरोत्तरम् ॥ अत्र प्रतिगृहीतु र्वैश्यान्तरे स्थिरनाहिताग्नि र्वैश्वानरश्च रुः प्रायश्चित्तम् ॥ अज्ञानतः सोमयागदीक्षितब्राह्म
णवधे चतुर्विंशति वार्षिकमुक्तव्रतं गोसहस्रद्वयं वा ॥ आचार्यादिवधेप्येवं ॥ गोसहस्रसहितं द्वादशाब्दमित्यन्ये ॥ अतिगुण
वतागुणहीनस्याज्ञानतो वधे पूर्वोक्तं व्रतं वर्षं कृत्वांते रत्नहेमगोधान्यतिलदधिघृतदानं ॥ मत्यादौ द्विगुणादि ॥ ज्ञानतो ब्राह्म-
णज्ञातीय षंढवधे शूद्रवधव्रतम् ॥ अज्ञानतस्तद्वधे गंगायमुनासंगमे त्रिषवणस्नायी त्रिरात्रोपवासेन शुद्ध्यति ॥ पतितब्रा-
ह्मणवधे त्रिवर्षं प्रत्यहं प्राणायामशतपूर्वकं गायत्रीजपपूर्वकं च वने भिक्षाशनमंते षोडशविप्रभोजनं च ॥ अनुपनीतविप्रव
धे निर्गुणविप्रवधोक्तं षडब्दं ॥ अनुपनीतत्वेन तस्य निर्गुणत्वात् ॥ अविज्ञातस्त्रीपुंस्त्वादिकस्य ब्राह्मणगर्भस्य वधे तु द्वा
दशाब्दम् ॥ विज्ञाते तु स्त्रीत्वादौ तत्तत्प्रयुक्तम् अनेकप्रयत्नकृतानेकविप्रवधेप्येकमेव प्रायश्चित्तं तंत्रेण ॥ तंत्रत्वं च समान
देशकालकर्तृत्वेनागृह्यमाणविशेषत्वम् ॥ अनेकप्रयत्नकृते तु नानावधे प्रायश्चित्तावृत्तिस्तृतीयविप्रवधपर्यंतं ॥ चतुर्थे तु
विप्रवधे प्रायश्चित्ताभावः ॥ केचिदामरणमुक्तप्रायश्चित्ताचरणमित्याहुः ॥ बहुभिरेकविप्रस्य वधे यदीयप्रहारेण मरणं सं
प्लाक्षप्रस्रवणादारभ्य पश्चिमोदधेः प्रतिस्रोतः सरस्वतीं गच्छेत् ॥ अन्ये षण्मासान् कृच्छ्रान् चरेयुः ॥ तिरस्कृतनिर्गुणविप्र
स्य क्रोधात् विषशस्त्रादिना निर्गुणोपरि मरणे त्रैवार्षिकं तत् व्रतम् ॥ निमित्तिनो गुणवत्वे लब्दं गृहक्षेत्रादिसंबंधे निर्गुणमर-
णे सगुणस्यापि त्रैवार्षिकमेव ॥ सगुणस्य तथा मरणे तु द्वादशाब्दमेव ॥ यदात्वाक्रोशताडनादिसंबंधमंतरेण भ्रांत्यादिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शात् परमुद्दिश्य विप्रस्यात्महनने तु हंतुरेव दोषो नोद्दिश्यस्य ॥ तथा यत्राक्रुष्टोपि मरणादर्वाक् धनदानादिना तोषितउच्चैः श्रावयति
नाक्रोशकस्याऽपराध इति सोप्यदोषः ॥ अथानुग्राहकादीनां तत्र साक्षादनुग्राहकः ॥ कर्तुर्द्वादशाब्दं चतुर्विंशत्यब्दषडब्दादिय
त् प्राप्नुयात् तत् पादोनं चरेत् ॥ प्रयोजकोऽर्धम् ॥ अनुगंता सार्धपादम् ॥ निमित्तकर्ता पादं चरेत् ॥ अत्र चतिरस्कृतेत्याद्यनुपा
दोक्ताव्यवस्था ॥ निमित्तकर्तुरुक्तैव ॥ अनुग्राहकप्रयोजकादीनामपि ये नु ग्राहकप्रयोजकादयस्तेषामपि प्रायश्चित्तं कल्प्यम्
तथा प्रोत्साहकादीनामपि दंडप्रायश्चित्ते कल्प्यं प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः आश्रयः शस्त्रदाता च भक्तदाता–
विकर्मणाम् ॥ उपेक्षकः शक्तिमांश्चेद्दोषवक्तानुमोदकः ॥ य एवम्रियमाणं तु ब्राह्मणं समुपेक्षते ॥ अकार्यकारिणां त्वेषां प्रायश्चि
त्तं प्रकल्पयेदिति ॥ कस्मिंश्चिद्ब्रह्मवधे प्रयोजकस्यान्यस्मिन् साक्षात्कर्तृत्वे एकस्य गुरुलघुप्रायश्चित्तसन्निपातस्तत्र द्वादश
वार्षिकादि गुर्वंतःपातिनः प्रयोजकादि लघुप्रायश्चित्तस्य प्रसंगादिसिद्धेर्न पृथगनुष्ठानं अग्निद गरद शस्त्रपाणि धनापहा
रिक्षेत्रहरदारहारकः शापोद्यत आथर्वणाद्यभिचारैर्हंता राजगामि पैशुनकर्ता च्चैते वर्त्तमानतत्त्क्षापाप आततायिनः एषामग्नि
विषशस्त्रादिहरणमात्रेण निवारणसंभवे यदि तद्वधः क्रियते तदा तत्तद्वधनिमित्तं प्रायश्चित्तं भवत्येव ॥ अशक्यनिवारणे तु गो
विप्रादीनामप्येषां हननादावुद्यतानां वधे दोषाभावः ॥ क्षत्रियादीनां ब्रह्मचारिवनस्थयतीनां चक्रमेण द्विगुणं त्रिगुणं चतुर्गुणं
च प्रायश्चित्तम् ॥ केचित्तु क्षत्रियवैश्यशूद्राणां कामतः प्रवृत्तावेतद्विषये मरणमेव तच्च सर्वस्वदानपूर्वकं मुंडितसर्वांगस्यक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीषाग्नावेव॥ अकामतस्त्वामरणंमहाव्रताभ्यासइत्याहुः॥ यत्तु यथोक्तंप्रायश्चित्तंविप्रस्यैवक्षत्रियस्यतत्पादोनंवैश्यस्यार्धम्॥ शू
द्रस्यपादमितिस्मृत्यंतरेउक्तं॥ तत्प्रातिलोम्यानुष्ठितमनुष्यवधचौर्यपारदार्यपारुष्येतिचतुर्विधसाहसव्यतिरिक्तपापविषय
म्॥ बालवृद्धस्त्रीणामर्धम्॥ ब्रह्मचारिणोपिषोडशवर्षात् पूर्वंबालत्वादर्धम्॥ षोडशवर्षादूर्ध्वंतस्यद्विगुणम्॥ अनुपनीत
बालानामन्दस्त्रीणांच पादमेव॥ विप्रात् क्षत्रियायांउत्पन्नोमूर्धावसिक्तस्तस्यक्षत्रियन्यूनमध्यर्धद्वादशाब्दम्॥ एवमनु
लोमेषुसर्वत्रन्यूनत्वमूह्यम्॥ प्रतिलोमोत्पन्नानामनयैवदिशाप्रायश्चित्ताधिक्यमप्यूह्यम्॥ साग्निकस्याज्ञानात् महापा
पेतदग्नीन् पुत्रादयअप्रायश्चित्तंपालयेयुः॥ ज्ञानाच्चेदग्नीनप्सुप्रक्षिप्यमरणांतंप्रायश्चित्तम्॥ आत्मघातेतुतत्पुत्रादयोमृ
तजातीयवधप्रायश्चित्तंसमुचितंतप्तकृच्छ्रद्वयंचांद्रंकुर्युः॥ आत्मघातादिपापिनांशवस्पर्शालंकरणवहनदहनस्रुपातास्थि
संचयदशाहक्रियादिकमज्ञानतःकृत्वामनूक्तंतप्तकृच्छ्रंद्वादशाहं॥ ज्ञानतोद्विगुणं॥ तप्तकृच्छ्रसहितंचांद्रंवा॥ एषुस्पर्शाश्रु
पाताभिन्नेष्वेकैककरणेतुज्ञानतःसप्ताहसाध्यंसांतपनतप्तकृच्छ्रंवा॥ अज्ञानतोमासंभिक्षाहारस्त्रिषवणस्नानंच॥ स्पर्शाश्रुपा
तयोस्तुप्रत्येकमेकोपवासः॥ मत्याभ्यासेकृच्छ्रातिकृच्छ्रचांद्रादियोग्यतयायोज्यम्॥ आहिताग्नेश्चैतादृशस्यलौकिकाग्निना
दाहोऽमंत्रकःदाहकर्तुःप्राजापत्यमात्मघातादिप्रायश्चित्तंपुत्रादिःकृत्वास्थीनिविधिवद्दहेत्॥ अथब्रह्महत्यादिव्रतादेशविष
यउच्यते॥ ॥सद्विविधः॥ ताद्रूप्यताप्रतिपादनेनसादृश्यप्रतिपादनेनवा॥ तत्राद्यविषयेब्रह्महव्रतंपादोनम्॥ द्वितीय ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयेत्वधर्मम् ॥ तत्राद्यं यथा ॥ सोमायागस्थक्षत्रियतत्स्थवैश्ययोरात्रेय्याश्चवधः ॥ रजोदर्शनात्प्रभृति षोडशदिनांतर्वं-ध्यातिरिक्तास्त्री आत्रेयी अत्रिगोत्रोत्पन्नानारी चगर्भिणी च ॥ केचित्तु तादृशी वंध्याप्यात्रेयीत्याहुः ॥ आत्रेय्यां विप्रसंबंधिन्येव विप्रतुल्या ॥ अत्रापि सगुणनिर्गुणादिव्यवस्था सर्वा योज्या ॥ एवं यागस्थस्त्रीवधः ॥ आहिताग्निद्विजाग्न्यभार्यावधः ॥ विप्रवधफलकानृतसाक्ष्यं विप्रसंबंधिनिक्षेपहरणं च ॥ अत्र नववार्षिकब्रह्महव्रतम् ॥ कामादिकृते द्वैगुण्यादि ॥ नात्र-प्राणांतिकत्वम् ॥ क्षत्रियाद्यात्रेयीवधे तु क्षत्रियादिवधोक्तं प्रायश्चित्तम् ॥ द्वितीयं यथा ॥ गुरूणां सुख्यानामाक्षेपेनृत पापाभिशंसनं च ॥ वेदानामप्रामाण्याभिधानम् ॥ विप्रातिरिक्तमित्रवधः ॥ अधीतवेदस्य बौद्धादिशास्त्रावष्टंभेन नाशनम् ॥ प्राणिमात्रवधफलकानृतसाक्ष्यं ॥ गुणवत्परस्परं स्पर्धायां गुणवत्परीक्षायां वानृतवचनम् ॥ राजकुले ब्राह्मणपीडाजनकपैशून्यं चे-त्यादि ॥ एतेष्वन्येषु च पूर्वोक्तेषु च ब्रह्महत्यासदृशेषु षडब्दं ब्रह्महव्रतम् ॥ एषु कपालध्वजधारणादिकं नास्ति ॥ ब्राह्मणादिहनने कृतनिश्चये तदर्थं समागत्य सम्यक् शस्त्रादिप्रहारे कृते कथंचित् प्रतिघातादिप्रतिबंधवशादसौ न मृतस्तथापि प्रहर्तुर्य-थावर्णं ब्रह्महत्याप्रायश्चित्तं भवत्येव ॥ तच्च पादोनमिति मिताक्षरादौ ॥ मनसा निश्चितब्रह्मवधस्य स्वत एवोपरतजिघांसस्य द्वादशरात्रमुदकमात्रभक्षतयोपवासाः ॥ चिकित्सादिना उपकारे क्रियमाणे विप्रादिमरणे तु न किमपि पापम् ॥ ॥ इति ब्रह्महत्याप्रायश्चित्तप्रकरणम् ॥

॥ अथ सुरापानप्रायश्चित्तानि ॥

॥ मदजनकोन्नविकारविशेषः सुरा ॥ तस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विप्रैर्ज्ञानपूर्वं कामतः सकृदपि पाने मरणांतमेव तेषां प्रायश्चित्तम् ॥ तत्राग्निवर्णसुरांबुगोघृतगोक्षीरस्त्रीगवीमूत्राणां अन्यतमपा
नेन ॥ पानं च लोहपात्रेण ताम्रपात्रेण वार्द्रवासाः कुर्यात् ॥ तत्पानेनाप्यमरणे तु यावत्प्राणवियोगं तदनंतरमनशनम् ॥ मरणांतिके चा
स्मिन् पर्षदुपदेशो नावश्यकः ॥ किंतु स्वपर्यालोचनेनापि ॥ अकामतो जलबुध्या वा एकवारं सुरापाने गोकेशमेषादिलोमनिर्मि
तवस्त्रावृतस्य जटिलस्य द्वादशवार्षिकं ब्रह्महव्रतम् ॥ अकामतोऽभ्यासे तु मरणमेव ॥ उदकबुध्या पीतायाः सुरायास्तत्काल
मेव वमने तु पूर्वोक्तधर्मवतो वर्षत्रयं रात्रौ सकृत्तिलकल्कतंडुलकणान्यतरमात्रभक्षणं नत्वन्नभक्षणं प्रत्यहं पंचगव्यपानं च ॥ अ
थवोभयत्र भूमिदानपूर्वकं पुनः संस्कारः ॥ अनेनेह व्यवहार्यतैव ॥ द्वादशाब्दासमर्थस्य पापक्षयोऽपीति मिताक्षरा अज्ञानतः सुरा-
यास्तालुमात्रसंयोगे वार्षिकमिदं ॥ ज्ञानतो द्विगुणम् ॥ अकामतः सुरासंस्पृष्टस्य शुष्कतद्रसस्यान्नस्य द्रव्यांतरस्य च वा भक्षणे
तु पुनः संस्कार एव ॥ विप्रस्य सुरागंधाघ्राणे सांतपनकृच्छ्रम् ॥ अकामतः कार्यं ॥ अत्र क्षत्रियवैश्ययोः पादपादहानिरिति मांत्वः
॥ ज्ञानतः कामपूर्वं सुरापाने तु मरणमेव सर्वेषां ॥ गौडी माध्वी च गौणी सुरा ॥ मुख्या तु पैष्ट्येव ॥ तत्र मुख्यायां प्रायश्चित्तमुक्तम्
॥ गौडीमाध्व्योस्तु मत्याभ्यासे अमत्यात्यंताभ्यासे च माधवीये ॥ मत्या मद्यममत्या वा पुनः पीत्वा द्विजोत्तमः ॥ ततोऽग्निवर्णां तां पी
त्वा मृतः शुद्ध्येत्सा किल्बिषात् ॥ अकामतो गौडीमाध्व्योः सकृत्पाने द्विजानां कृच्छ्रातिकृच्छ्रं चांद्रं च कृत्वा पुनः संस्कारो घृतप्राशनं
च ॥ मतिपूर्वकं तयोः सकृत्पाने छर्दने च त्रैवार्षिकं कणभक्षणम् ॥ कामतो द्विस्त्रिरभ्यासे छर्दने च षडब्दम् ॥ उभयत्र छर्दनाभा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेप्येवमेवमिति स्मृत्यर्थसारे ॥ अकामतोद्विस्त्रिर भ्यासेतु अब्दकृच्छ्रं पुनः संस्कारश्च ॥ अमत्यामत्यावाधिकाभ्यासेद्वादशाब्द
मिति स्मृत्यर्थसारे ॥ तेन पूर्वोक्तं माधवीयं मरणांतिकं द्वादशाधिकाभ्यासेनिरंतरं बहुकालाभ्यासेवा योज्यं ॥ ॥अथमद्य-
पाने प्रायश्चित्तम् ॥ ॥पनसादिजन्यं मदकारणं द्रवतु द्रव्यं मद्यमिति माधवः ॥ तच्चैकादशधा ॥ पानसं द्राक्षं माधुकरं खा
र्जूरं तालमैक्षवं मधूत्थं सैर मारिष्टं मैरेयं नारी केलजमिति भेदात् ॥ एतत्पानेक्षत्रियादेर्न दोषः विप्रस्यामत्या सकृत्पाने नसकृ
च्छ्रपूर्वकं पुनः संस्कारः ॥ ज्ञानतः कामतश्च सकृत्पाने कृच्छ्राणि कृच्छ्रं समुद्रगायां नद्यां चाब्दं वा कृत्वा पुनरुपनयनं घृतप्राशनं च
॥ मुखमात्रप्रवेशेतु षड्रात्रं पञ्चोदुंबरबिल्वपलाशकुशोदकपानम् ॥ गौडीमाध्व्योस्तु मुखमात्रप्रवेशोद्विगुणं ॥ कामतस्त्रि
दमेवद्विगुणं ॥ अभ्यासेतु तप्तकृच्छ्रादेश्चांद्रादेश्चावृत्तिः ॥ अत्यंताभ्यासेमरणमेव ॥ अज्ञानतोत्यंताभ्यासे द्वादशवार्षिकं ॥ मां
चस्तु विप्रस्य कामतः सकृदपि तालादिमद्यपाने मरणांतमेवेत्याहुः ॥ अनन्यौषधसाध्यव्याध्युपशमनार्थं सुरापाने त्वज्ञान
कृते त्रैमासिकमब्दपादं चांद्रायणं वा कृत्वा पुनरुपनयनं ॥ मद्यपानेतु तथाकृते तप्तकृच्छ्रसहितः पुनः संस्कारः ॥ ज्ञानकृतेतु त
प्तकृच्छ्रपराकचांद्राणि मद्ये तप्तकृच्छ्रद्वयं ॥ पुनः संस्कार उभयत्र सुरादेः पानविषये प्रायश्चित्तं तत्पित्रादिभिः कार्यं ॥ अस्या
नुपनीतस्य सुरापानेतु त्रैवार्षिकं पित्रादिभिः कार्यं ॥ अनूढाया एतदर्धम् ॥ कामकारेपिनानयोर्मरणांतिकं किंतु द्विगुणम् ते
न षड्वार्षिकं उपनीतस्य षोडशवर्षपर्यंतं षडब्दं ॥ केचित्तु द्वादशवर्षपर्यंतं पादमेव ॥ तदूर्ध्वमर्धमित्याहुः ॥ एवं वृद्धातुरस्त्रीणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मप्यर्धं ॥ एवंरोगनाशार्थे पानेपिबालादीनांयथायोग्यंकल्प्यम् ॥ ॥ अथसुरापानसमानिपापानि ॥ ॥ वेदनिंदाव्यसनासक्त्याधीतवेदविस्मरणंकूटसाक्ष्यंविप्रव्यतिरिक्तमित्रवधः मत्यात्यंताभ्यासेनगर्हितपलांड्वादिभक्षणंरजस्वलामुखचुंबनंवाङ्मनःकायकर्मणामनार्जवरूपंजैह्म्यं ॥ आत्मोत्कर्षार्थंराजकुलादौचतुर्वेदोहमित्याद्यनृतभाषणंएतानिसुरापानसमानानि ॥ अत्रब्रह्मवधसमानानामपिकेषांचिद्ग्रहणंप्रायश्चित्तविकल्पार्थं एतेषुसुरापानसमेषुअर्धंप्रायश्चित्तम् ॥ इतिसुरापानादिप्रायश्चित्तानि ॥ ॥ अथस्वर्णस्तेयप्रायश्चित्तम् ॥ ॥ विप्रस्वामिकाशीतिगुंजापरिमितसुवर्णापहरणंमहापातकम् ॥ इतोन्यूनहरणंनमहापातकम् ॥ अपहरणंचसमक्षंपरोक्षंवाबलाच्चौर्येणक्रयादिस्वत्वहेतुंविनाग्रहणमुच्यते ॥ ज्ञानतस्तत्कर्तालोहमयंमुसलमादायप्रकीर्णकेशःस्वदोषंस्वर्णापहाराख्यंख्यापयन् ॥ अनेनमुसलेनमांप्रहरेदितिवदन्राज्ञेमुसलमर्पयेत् ॥ तेनसकृदेवाभिहतोमृतःशुद्धः ॥ यदिदृढप्रहारार्त्तोपिजीवेत्तदापिशुद्ध्यति ॥ नब्राह्मणंहन्यादित्यादिनिषेधस्तुरागप्राप्तविप्रवधविषयः ॥ अहननेराज्ञःपापश्रवणात् ॥ माधवस्तुएकस्यतस्यमरणेबहूनांतदीयमित्रकलत्रादीनांअनाथतयामरणंसंभाव्ययदिराजादययाधनदंडादिपुरःसरंमुंचतितदापिशुद्धइतिआह ॥ यदिराजादृढंहंतुमसमर्थस्तदाताम्रमयमायुधंतस्मैदद्यात्तेनात्मानंघातयेत् ॥ मरणात्पूतोभवति ॥ यत्नपूर्वकंकामतोहरणेमुंडितकेशोघृताक्तः स्वकर्मख्यापयन्गोमयाग्निनापादप्रभृत्यात्मानंदाहयेत् ॥ एतच्चापहृतसुवर्णादेकादशगुणंस्वर्णंतत्स्वामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेदत्वेवकार्यं ॥ गुरुश्रोत्रिययागस्थविप्रसुवर्णहरणेकारीषाग्निदाह एव ॥ क्षत्रियादीनामपहर्तृत्वे सर्वथाकारीषदाह एव ॥
स्मृत्यर्थसारेतुस्तवर्णस्तेयीविप्रोव्रतमेवाचरेत् ॥ नदंडेनात्मानंघातयेत् नचराजाविप्रंहन्यादित्युक्तं ॥ अकामतोरजकादिबु
द्ध्यापहारेणस्तरापोक्तं द्वादशवार्षिकं ॥ कामतोरजकादिबुद्ध्यापहारेप्येतदेव ॥ शूलपाणिस्तुकामतोरजतादिबुद्ध्याप
हारेएवंद्वादशाब्दं ॥ अकाम तस्तुबुद्ध्यापहारेतुषड्वार्षिकमित्याह ॥ द्वादशवार्षिकविषयेपहर्तुर्महाधनिकत्वे आत्मतु-
लितहेमदानं ॥ निर्गुणस्वामिकहरणेसगुणस्यनववार्षिकं ॥ कश्चित्तुपादोनस्तवर्णहरणेप्येतदेवाह ॥ यदाक्षुत्क्षामकुटुं
बभरणार्थंसगुणोपिविप्रोनिर्गुणस्वामिकमपहरतितदाषडब्दंतीर्थयात्रासहितंषड्वार्षिकमितिमाधवः ॥ कश्चिदर्धसु
वर्णहरणेप्येतदेवाह ॥ ब्राह्मणान्यस्वामिकस्तवर्णहरणंनमहापातकम् ॥ किंतूपपातकमितिमिताक्षरा ॥ यदात्वपहारा
नंतरमेवानुतप्यत्यजतिप्रत्यर्पयतिवातदाचतुर्थकालमिताशिनस्त्रिवर्षमवस्यानं क्षत्रियादिस्तवर्णापहारेप्येतदेवेतिके
चित् ॥ क्षत्रियादिस्वामिकंहरणमुपपातकमित्यपरे ॥ रजतताम्रादिसंसृष्टस्तवर्णापहारेपिद्वादशाब्दमेव ॥ यस्तुताम्रादि
कस्यरसवेधाद्यापादितस्वर्णत्वस्यापहारः सउपपातकमेव ॥ मनसापहारंसंकल्प्यप्रवृत्तस्यस्वतएवउपरतस्यद्वादशरात्रं
वायुभक्षणंमनसिपापध्यानमात्रेणप्रणवव्याहृतिजपपूर्वकंत्रिरात्रंप्राणायामाः ॥ वाचाभिलाषेप्राजापत्यम् ॥ स्त्रीबाला
दिष्वर्धादिव्यवस्थाप्राग्वत् ॥ क्षत्रियादेःअपहर्तृत्वेक्रमेणद्विगुणंत्रिगुणंचतुर्गुणंज्ञानंतस्तुमरणमेवेतिशूलपाणिः ॥ क्षत्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यादेः पादपादह्रानिरेव ॥ द्वैगुण्यादिकंतु प्रकरणात्तु विप्रवधविषयमितिभवदेवः ॥ बालाग्रमात्रसुवर्णापहारे एकः प्राणायामः
लिक्षापहारे तत्त्रयम् ॥ राजसर्षपतुल्येन चतुष्टयं अष्टोत्तरशतगायत्रीजपश्च ॥ गौरसर्षपतुल्ये अष्टसहस्रगायत्रीजपः ॥
यवमितसुवर्णस्तेये दिनद्वयं तज्जपः ॥ कृष्णलस्वर्णस्तेये सांतपनकृच्छ्रम् ॥ माषस्वर्णापहारे मासत्रयं गोमूत्रयावकपानं
॥ पंचगुंजात्मको माषस्ते सुवर्णस्तु षोडश ॥ माषाधिकसुवर्णमानन्यूनहेमापहारे वत्सरं यावकव्रतम् ॥ सुवर्णपरिमाण
तो न्यूनस्यापि बलादपहरणे मरणांतमेव ॥ सुवर्णमानन्यूनरजतस्तेये सांतपनम् ततऊर्ध्वंदशनिष्कपर्यंतं चांद्रम् ॥ तत
आशतनिष्कं चांद्रद्वयं ॥ तत आसहस्रात् द्विगुणम् ॥ सहस्रनिष्काधिकरजतस्तेये स्वर्णस्तेयसमत्वान्नवाब्दं ब्रह्महव्रतम् ॥ ता
म्रकांस्यपित्तलादीनां सहस्रनिष्कमितस्तेये पराकम् ॥ निष्कसहस्ररजतमूल्यानां एषां स्तेये द्वादशाब्दम् ॥ एवं दशनिष्कमूल्यरत्न
हरणं चांद्रम् ॥ आशतं तद्द्वयं ॥ आसहस्रं तत्त्रयं ॥ सहस्रनिष्काधिकमूल्यरत्नहरणे ब्रह्मवधसमत्वान्नवाब्दम् ॥ सहस्राधिक
मूल्यविप्रस्वामिकाश्वमनुष्यभूमिगोव्रजानां सुवर्णभिन्ननिक्षेपस्य च हरणमित्येतानि सुवर्णस्तेयसमानि ॥ एतेषु षडब्दं ॥ स
हस्राधिकमूल्यविप्रस्वामिकवस्तुमात्रहरणं सुवर्णस्तेयसममित्यपरे ॥ युगपदनेकसुवर्णमितहेमापहारेप्येकमेव प्रायश्चित्त
म् ॥ न प्रायश्चित्तावृत्तिर्हरणक्रियाया एकत्वात् ॥ कालभेदे प्रयत्नभेदे च तदावृत्तिः ॥ ॥ इति सुवर्णस्तेयप्रायश्चित्तानि ॥
अथ गुरुतल्पे प्रायश्चित्तम् ॥ ॥ गुरुरत्र पिता तल्पस्तत्पत्नीगमनं चात्र रेतःसेकपर्यंतं चेत् महापातकम् ॥ ततोर्वाक् निवृत्तौ स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुपातकं ॥ तत्राज्ञानादकामतोपिजनन्यासुत्तमवर्णतत्सपत्न्यांच प्रवृत्तस्यसवर्णायांतत्सपत्न्यांतु ज्ञानतः कामतश्च प्रवृत्तस्यमर
णांतमेव ॥ तच्चो भयेच्छया प्रवृत्तो गुर्वंगनागमनं मया कृतमितिस्वकर्मख्यापयतामुंडितसर्वशरीरकेशनखेन घृताक्तेनाग्निवर्ण
कृतेकाष्ठशयने तद्वर्णकृत येवलोह मय्या स्त्रीप्रतिमया सह शयनेनतामालिंग्यकार्यं ॥ स्वेन प्रोत्साहनेतुक्षुरेण वृषणोसलिंगौ
स्वयं छित्वांजलिना गृहीत्वा नैर्ऋत्यां दिशि पृष्ठतो निरीक्षणमकुर्वन् अकुटिलगतिरग्रतस्थितमविचारयन् प्राणांतं गच्छेत् ॥
एवंगच्छन् यत्रैकक्कुट्यादिना प्रतिबुध्यते तत्रैवमरणांतंतिष्ठेत् ॥ तयाप्रोत्साहितस्यतप्तलोहशयनमात्रं ॥ जनन्यासुत्तमवर्णेतत्स
पत्न्यांचाज्ञानाद् कामतः प्रवृत्तावेदन्यतममेवेत्यन्ये कामकृते सर्वत्र प्रागुक्तमरणांतकारीषाग्निदाहोवा ॥ अकामतोभ्यासेप्येवं ॥ इदं
मुख्यपुत्रस्येव ॥ नतु दत्तकादीनां ॥ दत्तकस्यन्यूनं कल्प्यमितिमयूखे ॥ सवर्णायांमातृसपत्न्यामकामाद् ज्ञानतश्चप्रवृत्तोद्वा
दशाब्दं अस्यां कामतः प्रवृत्तस्यरेतः सेकात् प्राक्निवृत्तो द्वादशवार्षिकं ॥ जनन्यासुत्तमवर्णतत्सपत्न्यांच अकामतः प्रवृत्तस्यरे
तः ॥ सेकात् पूर्वं निवृत्तो द्वादशवार्षिकं ॥ एषुत्रिषु अकामतोर्धं ॥ विप्रपुत्रस्यक्षत्रियांपितृभार्यांगच्छतो नववार्षिकम् ॥ वैश्यां
षड्वार्षिकम् ॥ शूद्रायांत्रैवार्षिकम् ॥ अभ्यासेतिसृष्वपि द्वादशाब्दम् ॥ अत्यंताभ्यासे मरणांतमेव ॥ गुरुपत्नीसाम्यात् ॥ मा
तुः सपत्नीं सवर्णां व्यभिचारिणीमज्ञानतो गच्छतो वेदजपसहितचांद्रायणत्रयम् ॥ ज्ञानतः संवत्सरं ब्रह्महव्रतम् ॥ एवं ल
घुप्रायश्चित्तानि व्यभिचार्यनुत्तमवर्णसवर्णविषयेषु व्यवस्थयायोज्यानि ॥ गर्भोत्पत्तौ त्वेनान्येव द्विगुणानि ॥ मरणांतिरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तविषयेगमनावृत्तौ प्रायश्चित्तावृत्तिर्यत्र द्विगुणोक्तिस्तत्र द्वैगुण्यावृत्तिश्च ॥ सर्वत्र रेतःसेकात्प्राङ्निवृत्तौ मरणांतविषये द्वादशा
ब्दं अन्यविषये रेतःसेकाभावे तत्तदर्द्धम् ॥ गुरूपभुक्तास्वपि साधारणस्त्रीषु गमने गुरुतल्पदोषो न ॥ आस्ककन्यादूषणादिदोषो
न ॥ किंतु पूर्वोक्तं तत्प्रायश्चित्तं द्विगुणम् ॥ स्त्रीणामपि पुत्रादिष्वेषु मत्याप्रवृत्तौ मरणांतमेव ॥ अमत्याप्रवृत्तौ द्वादशाब्दिकं पुरुषो
क्तवत्कार्यम् ॥ अन्येषु स्त्रीणामपि कामतःप्रवृत्तौ सर्वत्र पुरुषोक्तार्द्धं कृत्स्या योज्यमित्याहुः ॥ ॥ अथातिदेशिकप्रायश्चि
त्तानि ॥ ॥ पितृष्वसा मातृष्वसा श्वश्रूः पितृव्यभ्रातृमातुलाचार्यमित्रशिष्याणां भार्याः स्नुता श्वसापत्नभगिनी आत्मसखी पि
तृमातृसखी भगिन्याः सखी भगिनी स्नुषादुहिता शरणागता राज्ञी प्रव्रजिता पतिव्रता धात्री चैतासु गमनं गुरुतल्परूपम् ॥
पितृव्यभ्रात्रोरुपनीत्रोरेव भार्ययोरेतासि तृव्यभार्यादयः स्वस्रादयश्च समानवर्णा एव ॥ आसु कामतो द्वित्रिपर्यंताभ्यासे का
मतः सकृद्गमने च नववार्षिकम् ॥ कामतो द्वित्रिवारं गमने नववार्षिकावृत्तिः ॥ अकामतः सकृद्गमने षड्वार्षिकम् कामतस्त्र्यधि
काभ्यासे अकामतश्चैकरात्रादूर्ध्वमत्यंताभ्यासे च मरणमेव ॥ कुमारी भागिनेयी स्वगोत्रा पितृष्वसृमातृष्वस्रोः कन्या मातामहपि
तामहयोर्भार्या श्रोत्रियर्त्विगुपाध्यायभार्या गुणवद्रजस्वला निक्षिप्ता पौत्री दौहित्री अंत्यजाम्लेच्छी पुल्कसी चेत्येवमादिषु गमनं गु
रुतल्पसमानम् ॥ अंत्यजाश्चात्र ॥ चांडालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ॥ मागधायोगवाश्चेति सप्तैव ॥ न तु रजकश्चर्मका ५२
रश्चेत्यादि प्रतिपादिताः ॥ तेषु लघुप्रायश्चित्तस्योक्तत्वात् ॥ आस्क एकरात्रादूर्ध्वं अभ्यासे षड्वार्षिकं ॥ एकरात्राभ्यासे त्रैवार्षिकं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयत्र कामतो द्विगुणम् ॥ कामतोऽत्यंताभ्यासे मरणमेव ॥ आस्वज्ञानतः सकृद्गमने त्रैवार्षिकम् ॥ अंत्यजादिषु तु ज्ञानतः सकृ-
द्गमने वार्षिकं कृच्छ्रं ॥ अज्ञानेऽर्धम् ॥ चांद्रायणद्वयमित्यन्ये ॥ गुरुतल्परूपेषु तत्समेषु चरेतः सेकात्प्राक्निवृत्तौ चांद्रायणम् ॥
अकामतस्त्वत्र न सकृत्कृच्छ्रम् ॥ यदा पुनरेता एवात्यंतव्यभिचारिणीर्गच्छति तदाप्यकामतस्तप्तकृच्छ्रं पराको वा ॥ कामतस्तु चां-
द्रम् ॥ अभ्यासे आवृत्त्यादि ॥ ॥ इति गुरुतल्परूपतत्समप्रायश्चित्तानि ॥ यानि महापातकसमानि तान्येवानुपातकानि ते-
षु च प्रायश्चित्तानि ब्रह्महत्यादिमहापापप्रबंधकेषु चतुर्षूक्तान्येव अथ गौडादिमते मातृगमनं सापत्नमातृगमनं दुहितृस्वसृस्नु-
षागमनं चेति पंचातिपातकानीति यावंत्युक्तानि तत्राद्ययोर्द्वयोर्व्यवस्थया प्रायश्चित्तानि उक्तान्येव ॥ दुहितृगमनादिषु त्रिषु सकृत्गम-
नेन वाब्दद्वादशाब्दादि द्वित्र्याद्यभ्यासेऽग्निप्रवेशादिना मरणमिति ॥ अत्र माधवः मातरि स्वसुता भगिन्योश्च क्रियानिवृत्तौ मरणां-
तम् ॥ तच्च मातरि सकृत्त्वेऽन्ययोरसकृत्त्वे ॥ संकल्पाध्यवसाययोश्चांद्रत्रयम् ॥ शेषं पंचविधापराधविषये प्राजापत्यद्वयमित्यष्टवि-
धमैथुनप्रकारभेदेन व्यवस्थामुक्तवान् ॥ ॥ इति महापातकानुपातकानि पातकप्रायश्चित्तानि ॥ ॥ अथ संसर्गाख्यमहा-
पापे प्रायश्चित्तम् ॥ ॥ संसर्गश्च एकभांडपचनं तदीयान्नभोजनं एकपात्रसहभोजनेषु सोमादिश्रौतयागयाजनाध्ययना-
ध्यापनविवाहैः संभाषणगात्रसंमर्दनमुखवायुसंसर्गैकयानारोहणैकासनस्थित्येकवस्त्रादिशयनैकपंक्तिभोजनैश्च ॥ तत्र
विवाहो नाम तस्मै कन्यादानं तस्माच्च कन्याग्रहणम् ॥ अत्र विवाहांतैरेकैकैरप्यनुष्ठितैः सद्यः पातित्यमिति शंखः एतैः प्रत्येकैर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिसंवत्सराभ्यस्तैरेव पातित्यमिति मनुः॥ तत्रविवाहस्य संवत्सराभ्यासस्तत्संबंधिनिमित्तकभोजनाद्यभ्यासरूपः संभाषणा
दिसप्तभिस्स्तु समुदितैः संवत्सरपर्यंतंनिरंतराभ्यस्तैरेव पातित्यंप्रत्येकंतेषांतथाभ्यासेऽपिनपातित्यम्॥ तथाच चतुर्विधमहापा
तकिष्वन्यतमेनोक्तद्विविधसंसर्गस्य पातित्यहेतोर्ज्ञानतः करणे द्वादशाब्दं॥ अकामतोऽर्धमज्ञानतश्च॥ एवंचपतितेनसमंय-
स्यवर्षंनिरंतरमज्ञानतः संसर्गः सपातकीव्रतार्धंकुर्यात्॥ ज्ञानतस्तु तदीयंसंपूर्णमेव॥ मरणस्थानेस्य द्वादशाब्दमेव॥ प्राञ्च
स्तु अज्ञानतः संसर्गे पादन्यूनंतत्॥ ज्ञानतः संपूर्णं॥ मरणस्थाने चतुर्विंशतिवार्षिकमित्याहुः॥ संभाषणादित्रयरहिते यानादि
चतुष्टये संवत्सराभ्यस्ते ऽपि पंचमभागोनंप्रागुक्तम्॥ तत्सहितेतु पूर्णं द्वादशाब्दादि॥ अथांतरितादिगणनादिना पंचरात्रमज्ञान
तः संसर्गे उपवाससहितपादकृच्छ्रम्॥ दशाहे कायम्॥ द्वादशाहसंसर्गे सांतपनं॥ पक्षे दशोपवासाः॥ मासंचेत्पराकः मासत्र
यंचेच्चांद्रम्॥ षण्मासिके चांद्रद्वयं॥ किंचिन्न्यूनेब्दे षण्मासकृच्छ्रं॥ कामतः संसर्गेतु पंचाहे कृच्छ्रम्॥ दशाहे तप्तकृच्छ्रं॥ पक्षेप-
राकः॥ मासेचांद्रम् मासत्रये कृच्छ्रंचांद्रंच॥ षाण्मासिकेऽर्धाब्दकृच्छ्रम्॥ किंचिन्न्यूनेब्देअब्दंचांद्रायण कामतोत्यंतापदिषण्मा
सपंचमहायज्ञादिस्मार्तयाजनेंगाध्यापने दुहितृभगिनीव्यतिरिक्तेच योनिसंबंधे षडब्दम्॥ अकामतोऽर्धम्॥ एवमतिपातकिसं
सर्गिणांकामतोनववार्षिकम्॥ अकामतोऽर्धम्॥ अनुपातकिसंसर्गिणांषड्वार्षिकं॥ अकामतोऽर्धम्॥ तथोपपातक्यादिसंसर्गि ५३
णांसुरव्यपातकितुल्यंत्रैवार्षिकंत्रैमासिकादिकं॥ अकामतोऽर्धमित्याद्यूहनीयम्॥ मयूखे त्वितरपापिसंसर्गे तत्तत्कृतंपादोनंका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यमित्युक्तं ॥ सर्वत्र संसर्गे बालस्त्रीवृद्धातुराणामर्धम् ॥ अकामतः पादः ॥ अनुपनीत बालस्य कामतोपि पाद एव ॥ अकामतोऽर्द्ध
पादः ॥ माधवस्तु संसर्गिदोषः कलौ पातित्यापादको न किंतु पापमात्रापादकः ॥ संसर्गदोषः पापेष्विति कलिवर्ज्येषु गणनादित्याह
॥ वस्तुतस्तु ॥ त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ॥ द्वापरे कुलमेकं तु कर्तारं तु कलौ युग इति पराशरस्मरणात् कृतयुगादौ दो
षजनकत्वेनोक्तदेशादि संसर्गस्यैव कलिवर्ज्येषु गणनं युक्तम् ॥ अयं चापरः कलौ विशेषः यत्कृते संभाषणमात्रादेव पातित्यं त्रेता
यां स्पर्शमात्राद्द्वापरे तत्स्वामिकान्नमात्रग्रहणात् ॥ तत्कलौ त्स्मेहेन समुदितेनैव संभाषणादि कर्मणा नत्वेकेनेति दिक् ॥ संसर्गिसं
सर्गिणां पाद पादहानिः ॥ तथा च मुख्य महापापिनां संसर्गवतो द्वादशाब्दं ॥ ततु संसर्गिणो मुख्यात्तृतीयस्य नवाब्दम् ॥ तृतीये
न संसर्गवतो मुख्याच्चतुर्थस्य षडब्दं ॥ पंचमस्य त्रैवार्षिकम् ॥ मुख्य संसर्गिणो द्वितीयस्यैव पातित्यात् श्रौत स्मार्त कर्म हानिः ॥
तृतीयादेः प्रायश्चित्त मात्रं न तु वैदिक कर्म हानिरिति मिताक्षरा ॥ प्रांचस्तु पादहानिक्रमेण तृतीयेन संसर्गिव्रता धमात्रं कार्यं ॥ चतु
र्थस्य तु मुख्यात्पंचमस्य न किंचिदित्याहुः ॥ ॥ इति संसर्गिप्रायश्चित्तम् ॥ ॥ पतितोत्पन्नानां तु यस्य पतितस्य यदुक्तं तत्तृ
तीयांशः पुंसां कन्यानां तु नवमोंशः ॥ पतितोत्पन्ना कन्यां तदीयधनरहितां विवस्त्रां कृत पूर्वोक्त पतित नवमांशप्रायश्चित्तामहोरा
त्रोपोषितां स्वकीय शुक्लवाससाच्छादितां नाहमेतेषां नैते ममेति त्रिरुच्चैर्वदंतीं देवालयादौ स्वगृहे वा विवाहयेत् ॥ अथ पतितो महा
पातकिनोऽनुपातकिनस्तत्संसर्गिणश्च ॥ तथा नास्तिकः प्रमादान्नास्तिक्याद्वा चिरं श्रौतस्मार्तकर्मत्यागी पतितपुत्राद्यत्यागी महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापेषु ॥ अनुपातकेषु तत्कर्तॄणां प्रयोजकाः ॥ गोघ्नादयो मांसभक्षकादयश्च ॥ एते चाकृतप्रायश्चित्ता न संव्यवहार्याः मातुस्तु
ताहृश्या अपि न तथा ॥ किंतु सेवा पोषणं कार्यं पृथक् पितुरपि महापातकिन एव त्यागः ॥ प्रकारांतरेण पतितस्य न त्यागः ॥ किंच पि-
तुर्दोषं स्वयं ज्ञात्वापि प्रथमतः परेभ्यो न कथयेत् ॥ तत्काले स्वयं तेन संव्यवहरेत् ॥ यत्यादेः स्त्रीसंगेषु पुनर्गार्हस्थ्यकरणे प्रायश्चि
त्ताभाव एव ॥ आरूढं नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ॥ प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महेति वचनात् ॥ उपपातकत्वात्
प्रायश्चित्तं भवत्येवेत्यन्ये सर्वथा तव्यवहार्यता बहिस्तूभयथा स्मृतेराचाराच्चेति व्याससूत्रात् ॥ नैष्ठिकानां वनस्थानां यतीनां
चावकीर्णिनां ॥ शुद्धानामपि लोकेस्मिन् प्रत्यापत्तिर्न विद्यते इति वचनाच्च ॥ एवं स्त्रीबालशरणागतहंतारः कृतघ्नाश्च कृतप्रा
यश्चित्ता अपि न संव्यवहार्याः अतो व्यभिचारिण्या वधे प्रायश्चित्ताल्पत्वेपि वचनाद्व्यवहार्यत्वाभाव इति मिताक्षरा ॥ स्त्रीणां महा
पापानि पापानुपापानि अभ्यस्तोपपातकानि च पातित्यनिमित्तानि ॥ विशेषतो हीनवर्णगमनं स्वगर्भपातनं भर्तृहिंसनं च शिष्यगु
रुजुंगितोपगमनानि चेत्येतानि ॥ महापापेषु कृतप्रायश्चित्ते ष्वागतेषु सपिंडास्तेन सह पुण्यजले स्नात्वाः पां पूर्णकुंभं पुण्य देशे-
काले पुण्यदिङ्मुखा न येयुः ततः सगोभ्यो यवसं दत्वा गोभिर्भक्षिततृणे शुद्धः संव्यवहार्यश्च ॥ स्त्रीणामपि पतितानामेव परि
ग्रहः इदं घटस्फोटोत्तरं कृतप्रायश्चित्तस्य परिग्रहविषयमित्यन्ये ॥ वाचस्पतिमिश्रास्तु मत्या महापातकिनोतिपातकिनश्च
प्रायश्चित्ते कृतेपि न व्यवहार्याः प्रायश्चित्तं तु तेषां परलोकशुद्ध्यर्थमेवेत्याहुः ॥ यस्तु नरो नारी वो ध्वस्यात् पातित्येपि प्रायश्चित्तं ने ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छतितं सर्वे सपिंडाः बांधवाश्च राजादिसमक्षमाहूय तत्पापं व्यक्तं कृत्वा मुहुरुपदिशेयुः ॥ प्रायश्चित्तं कुर्वाचारं लभस्वेति स यदि एवम
पिनांगीकरोति तदा रिक्तादिनं घ्नतियो सायान्हे ग्रामात् बहिः संभूय कुत्सितजलादिसंपूर्णं प्राचीनावीति नोदक्षिणामुखा गुरुसन्नि
धौ अस्माकं त्वं मृत इति वा सु मन्तुदकं करोमीति वावदंतो दर्भेषुच्छिन्नाग्रेषुन्युब्जं कुर्युः ततः सर्वे निरीक्ष्यमाणा अपउपस्पृश्य ग्रामं
प्रविशेयुः ॥ सपिंडानामेकाहमाशौचं ॥ ततोधिकारी कर्ता दाहवर्ज्यं जीवंतमेवोद्दिश्य पिंडोदकदानादिप्रेतकर्माणि सपिंड्याः
मा कृतनानि कुर्यात् ॥ उदकपिंडादि प्रेतक्रियोत्तरं पात्रनिनयनमिति मिताक्षरायांस्पृष्टम् ॥ ततः सर्वकर्म बहिष्कृतेन तेन संभाषणा
दिकं वर्जयेत् ॥ प्रमादात्संभाषणे सावित्रीं जपन् एकरात्रं तिष्ठेत् ॥ मत्यात्रिरात्रम् ॥ अब्दपर्यंताभ्यासे पातित्यम् ॥ स्त्रीणामपिता
दृशीनां गृहसमीपे पर्णकुट्यादौ वासं दत्त्वा जुगुप्सितमन्नं प्राणधारणमात्रसमर्थं जीर्णमलिनवस्त्रं च दद्यात् ॥ घटस्फोटोत्तरं शिष्य
गा गुरुगा पति घ्नीनां च सर्वथैव त्यागः ॥ घटस्फोट प्रयोजनमन्यत्र द्रष्टव्यं ॥ एकस्मिन्निमित्ते गुरुलघुभूतानेकविरुद्धप्रायश्चि-
त्तादिप्राप्तौ देशकालवय आदिकमवेक्ष्य परिषदा व्यवस्था कल्प्या ॥ यथा जलवासो हिमदेशे शिशिरकाले च नोपदेष्टव्यः ॥ उ
पवासादिकं बालवृद्धयोर्न ॥ एवं शक्तिरवेक्ष्या ॥ अन्यथा युवा पित्तप्रकृतिर्निरंतरोपवासान्ननुतिष्ठन् व्यापद्येतेत्यादिकमूह्यं ॥
अनुक्तप्रायश्चित्तेषु जपतपोहोमोपवासदानानि देशकालशक्तिपापलाघवगुरुत्वादिकमपेक्ष्य कल्प्यानि ॥ तत्र जपो गायत्र्यादेः होमः
तिलानां व्याहृतिभिर्गायत्र्या वा ॥ तपः पयोभक्षता शाकहारता फलाशनं प्रसृति यावकता हिरण्योदकप्राशनं ब्रह्मचर्यं तीर्थोद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्स्नानं आर्द्रवस्त्रता ऽनशनमितितपांसि ॥ दानं हिरण्य गोवस्त्राश्वतिलभूमिघृतानां संवत्सरं षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतु
र्विंशतिरहानि द्वादशाहः षडहस्त्र्यहो द्वो होरात्र इति कालः ॥ पापस्य गुरुलघुत्वे त्वर्थवादेन दंडेन वाज्ञानकृतत्वादिभिर्वा बोध्ये ॥ एवं पा
पिनां प्रायश्चित्ताकरणे तामिस्रलोहशृंखलरौरवमहारौरवसंघातकालसूत्रकप्रतापनासिपत्रवधतामिस्रप्रभृतिनरकेषु नानावि
धेषु प्रथमं वासोनंतरं पुनरस्मिन्संसारे श्वसूकरादिषु योनिजन्मानि ॥ ततः कदाचिन्मानुषयोनौ जातस्यापि कुरोगित्वं ॥ रोगाश्चारंभे
एव दर्शिताः ॥ एवं च नरकोपभोगक्षीणदोषाणामपि तद्रोगानुमितावशेषाणां प्रायश्चित्तं कार्यं ॥ अकृतप्रायश्चित्तानां कुष्ठादिरोगि
णां दाहकस्य यति चांद्रायणम् ॥ गंगास्नानविष्णुस्मरणतन्नामजपादिकं सर्वपापप्रायश्चित्तमिति सर्वेष्टसिद्धिः ॥ श्रीनागोजीभट्ट
कृतं प्रायश्चित्तेंदुशेखरम् ॥ काशीनाथ उपाध्यायव्यशोधयद पूरयत् ॥ १ ॥ ॥ इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभ
ट्टकृतः श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायकृतशोधनोपबृंहणपूरणशाली प्रायश्चित्तेंदुशेखरनामग्रंथः समाप्तिमगमत्
॥ ॥ अथ सर्वप्रायश्चित्तप्रयोगः ॥ ॥ तत्र षडब्दत्र्यब्दसार्द्धाब्दादिव्यवस्था प्राजापत्यप्रत्याम्नायाश्च परिभाषोक्ता एव ॥
तत्र त्रिंशत्कृच्छ्रमब्दम् ॥ पंचचत्वारिंशत्कृच्छ्रं सार्धाब्दम् ॥ नवतिकृच्छ्रं त्र्यब्दं ॥ कृच्छ्रं प्राजापत्यमिति पर्यायौ ॥ कृच्छ्रे गवादय
श्चान्निष्क्रयरजतनिष्कतदर्धतत्पादादयः प्रत्याम्नायाः ॥ तत्र सामग्र्युपकल्पनम् ॥ फलतांबूलगंधपुष्पधूपदीपाः पंचगव्यानि मृ
द्भस्मगोमयदूर्वातिलाः समिद्दर्भाः होमार्थं घृतं पर्षद्दक्षिणानिबंधानुवादकपूजार्थं दक्षिणा पूर्वोक्त रांगगोप्रदानविष्णुश्राद्धद्रव्य- ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति ॥ ॥अथप्रयोगः॥ ॥ स्ववरानेकंवाविप्रं पर्षत्वेनोपवेश्य कृतस्नानः शक्तश्चेदार्द्रवासाः कर्ताविप्रान्प्रदक्षिणीकृत्य सा
ष्टांगप्रणमेत् ॥ विप्रैः किंते कार्यमिथ्या मा वादी सत्यमेव वदेति पृष्टः गोवृषयोर्निष्क्रयीभूतंनिष्कंतदर्धंतत्पादान्यतमप्रमाणंस्वजतद्रव्यं
सभ्येभ्यः संप्रददेनममेति संकल्पपूर्वकं सभ्याग्रेनिधाय असुकनामस्य ममजन्मप्रभृतिअद्ययावत्ज्ञानाज्ञानकामाकामसकृ
दसकृत् कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातक
संकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरणप्रकीर्णकपातकानांमध्येसंभावितपापानांनिरासार्थंप्रायश्चित्तमुप
दिशंतुभवंतइतिवदेत् ॥ पुत्रादिः प्रतिनिधिश्चेन्ममपितुर्जन्मप्रभृतीत्यादिवदेत् ॥ श्रौतस्मार्ताधानांगेतुप्रायश्चित्तेनिरासार्थं
मित्यंते अग्निपरिचरणेऽधिकारार्थंच अग्निविच्छेदप्रायश्चित्तं चोपदिशंतुभवंतइतिवदेत् ॥ तत्तदेकपापेतु किंते कार्यमिति
प्रश्नेमयासुकवधः कृतः असुकभक्षणंवाऽसुकगम्यागमनंकृतमित्यादिप्राकृतमेवपापमुच्चार्यतत्प्रायश्चित्तमुपदिशंतुभवंत
इतिवदेत् ॥ जन्मप्रभृतिअद्ययावदित्यादिकंनवदेत् ॥ ततः सर्वधर्मविवेक्तारोगोप्तारः सकलाद्विजाः ममदेहस्यसंशुद्धिंकुर्वं
तुद्विजसत्तमाः ॥ मयाकृतंमहाघोरंज्ञातमज्ञातकिल्बिषम् ॥ प्रसादः क्रियतांमह्यंशुभानुज्ञांप्रयच्छथ ॥ पूज्यैः कृतपवित्रोहं
भवेयंद्विजसत्तमैः इतिप्रार्थयित्वा ॥ मामनुगृह्णंतुभवंतइतिनमेत् ॥ ततः सभ्यैः शक्त्यादिविचार्यप्रायश्चित्तेनिश्चित्तेक
र्ताचंदनपुष्पादिभिः पुस्तकपूजामनुवादकपूजांचकृत्वानिबंधपूजात्वेनकिंचिद्द्रव्यंनिधायानुवादकायभृतिरूपांदक्षिणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापानुसारेणदद्यात् ॥ ततःसभ्याःपुस्तकवाचनपूर्वकमनुवादकस्याग्रेकथयेयुः ॥ अनुवादकश्चकर्तारंवदेत् ॥ ॥तद्यथा॥
॥ सभ्यैरुपदिष्टोनुवादकः अमुकस्यतेजन्मप्रभृतिअद्ययावत् ज्ञानाज्ञानकामाकामसकृदसकृत् कृतकायिकवाचिकमान
सिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणा
पात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानांमध्येसंभावितपापानांनिरासार्थंपर्षदुपदिष्टंसार्धाब्दप्रायश्चित्तंअमुकप्रत्याम्नाय
द्वाराप्राच्योदीच्यांगसहितंत्वयाआचरितव्यंतेनतवशुद्धिर्भविष्यति संकृतार्थोभविष्यसीतिनिरुपदिशेत् ॥ आधानांगेतुसार्द्धा
ब्दप्रायश्चित्तंअग्निविच्छेदप्रत्यवायनिरासार्थंविच्छेददिनादारभ्यप्रतिवर्षमेकैककृच्छ्रंचेत्यादिपूर्ववत् ॥ कर्ताओमित्यंगीकृत्य
प्रणम्यपर्षदंविसृजेत् ॥ ततोरिक्तायांसायान्हेदेशकालौसंकीर्त्यअमुकशर्मणोममजन्मप्रभृतिअद्ययावत्ज्ञानाज्ञानमध्येसं-
भावितानांपापानांनिरासार्थंपर्षदुपदिष्टंसार्द्धाब्दप्रायश्चित्तंप्राच्योदीच्यांगसहितंअमुकप्रत्याम्नायेनाहमाचरिष्ये ॥ आधाने
तुआधानाग्निपरिचरणादिपुण्यकर्मण्यधिकारसिद्ध्यर्थंचसार्धाब्दप्रायश्चित्तंअग्निविच्छेददिनादारभ्यप्रतिवर्षमेकैक
कृच्छ्रप्रायश्चित्तंचतंत्रेणप्राच्योदीच्यांगसहितंअमुकप्रत्याम्नायेनअहमाचरिष्य इतिसंकल्पः ततःयानिकानिच पापानि
ब्रह्महत्यासमानिच ॥ केशानाश्रित्यतिष्ठंतितस्मात्केशंवपाम्यहम् इतिमंत्रेणक्षौरंकार्यं ॥ क्षौराभावेसार्धाब्दादिव्रतं द्विगु ५६
णंपर्षद्दक्षिणापिद्विगुणा ॥ यत्रतुसभर्तृकस्त्रियाजीवत्पितृकादेश्चक्षौरंनिषिद्धंतत्रनद्विगुणव्रतंक्षौरंचशिखाकक्षोपस्थव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्जनरवकेशरोमणा सुदक्संस्थंवपनमितिसर्वत्र ॥ रोमवर्जनमप्यन्यत्र यत्रगोवधादौविशेषवचनंतत्रप्रायश्चित्ते शिखासहित
मपिवपनम् ॥ प्रमादात्शिखावपनेकुशमयशिखांब्रह्मग्रंथियुतांदक्षिणकर्णेनिदध्यादितिकाठके ॥शिखांछिंदंतियेमो-
हात्द्वेषादज्ञानतोपिवा ॥ पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयइतिसंग्रहेगृह्याग्निसारे ॥ यज्ञोपवीतसहितशिखात्यागेपि
पुनरुपनयनमेव ॥ क्रोधादिनाकेवलयज्ञोपवीतत्यागेतुप्रायश्चित्तंकरिष्येइतिसंकल्प्यआचार्यंवृत्वासवितारंगायत्र्याति-
लैराज्येनअष्टसहस्त्रशतंवाजुहुयात्इतिप्रासंगिकं ॥ क्षौराद्यंगजातंचकृच्छ्राधिकेभवतिनकृच्छ्रन्यूनेइतिमयूखादौप्राजाप
त्यत्रयमित्यधिकेवाप्रायश्चित्तेभवतिनतुततोन्यूनइतिगृह्याग्निसागरमतं ॥ क्षौरांतेगंडूषान्कृत्वायथोक्तदंतकाष्ठेन ॥आ
युर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते ॥ इतिमंत्रेणदंतशुद्धिंकृत्वाकाष्ठांतरेणजिह्वा
मुल्लिख्यस्नात्वाभस्मादिदशस्नानानिकुर्यात् ॥तत्रप्रायश्चित्तांगंभस्मस्नानंकरिष्ये॥ इतिसंकल्प्यभस्मगृहीत्वाईशानायन
मेतिशिरसिलिंपेत् ॥तत्पुरुषायनमेतिमुखे॥ अघोरायनमेतिहृदये॥ वामदेवायनमइतिगुह्ये॥सद्योजातायनमःपादयोः
॥ प्रणवेनसर्वांगेषु ईशानादिपादोपेतैर्मंत्रैर्वाभस्मस्नानं ॥ततःस्नात्वाचामेत् ॥अथगोमयस्नानंकरिष्येइतिसंकल्प्य ॥
गोमयमादायप्रणवेनदिक्षुदक्षिणभागंतीर्थेचोत्तरभागंप्रक्षिप्यशेषंमानस्तोकइत्यभिमंत्र्यगंधद्वारामितिमंत्रेणअग्रम
ग्रेचरंतीनामितिसर्वांगमालिप्य ॥हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः॥ यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रा·शे हः॥ यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं॥ तन्नइंद्रोवरुणोबृहस्पतिः सविताचपुनंतुपुनः पुनः इतिद्वाभ्यामवते हेळ इतिद्वा
५७ भ्यां प्रसम्राजे इतिसूक्तेनचतीर्थप्रार्थ्य॥ याः प्रवतोनिवतउद्वत इतितीर्थमभिमृश्यस्नात्वाद्विराचामेत्॥ हिरण्यशृंगमित्यादि
तीर्थप्रार्थनादिकंसर्वदशविधस्नानांते एवकार्यमितिमयूखे॥ ततोमृत्तिकास्नानंसंकल्प्य अश्वक्रांतेरथक्रांतेविष्णुक्रांते
वसुंधरे॥ शिरसाधारयिष्यामिरक्षस्वमांपदेपदे॥ इतिमृत्तिकामभिमंत्र्य॥ उद्धृतासिवराहेण कृष्णेनशतबाहुना॥ मृत्ति
केहरमेपापंयन्मयादुष्कृतंकृतम्॥ इतिमृदमादाय॥ नमोमित्रस्यवरुणस्येतिसूर्यायप्रदर्श्य॥ गंधद्वारामितिमंत्रेण वा
स्योनापृथिवीतिवाइदंविष्णुरितिवाशिरः प्रभृत्यंगानिविलिप्यस्नात्वाद्विराचामेत्॥ अथवाविस्तरेणमृत्तिकास्नानम्॥
॥तद्यथा॥ ॥बलिस्थापर्वतानामितिभूमिंप्रार्थ्य॥ मावोरिषत्खनितेतिखनित्वा॥ स्योनापृथिवीतिमृदमादाय॥ आ
यनेतेतिदूर्वामादाय॥ गायत्र्याभ्युक्ष्यभूमौ मृदंनिधायमृत्तिकास्नानंकरिष्ये॥ इतिसंकल्प्य॥ मृदंकुशोदकेनप्रोक्ष्यादिक्षुक्षि
पेत्॥ तत्रमंत्राः॥ त्रातारमिंद्रमितिपूर्वस्याम्॥ यमायमधुमत्तमराज्ञेइतिदक्षिणे॥ तत्वायामीतिपश्चिमे॥ वयंसोमइत्युत्तरे॥
तत्सूर्यरोदसीत्युपरि॥ अधःपश्यस्वेत्यधः॥ ततोंऽगेषुलेपः॥ सहस्रशीर्षेतिशिरसि॥ अक्षीभ्यांतेनासिकाइतिमुखे॥ ग्रीवाभ्य
स्तइतिग्रीवायां॥ आंत्रेभ्यइतिहृदये॥ नाभानाभिन्नइतिनाभौ॥ त्वमिंद्रसजोषसमितिबाह्वोः॥ सोमानंस्वर० कक्ष्योः॥ यःकु ५७
क्षिरितिकुक्ष्योः॥ बह्वीनांपितेतिपृष्ठे॥ मेहनाद्वनंकरणादितिजान्वोः॥ एतावानस्येतिपादयोः॥ यस्यविश्वानिहस्त०इतिहस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योः॥ अंगादंगादितिपुरुषसूक्तेनचसर्वांगे॥ अथशुद्धोदकस्नानं॥ ॥आपोअस्मानित्यृक्त्वा सूर्याभिमुखइदंविष्णुरिति
मंत्रेणप्रवाहाभिमुखोमज्जेत्॥आपोहिष्ठेत्यृचेत्यन्ये॥अथपंचगव्यैःकुशोदकेनचेतिषट्स्नानानि॥तत्रादौगोमूत्रस्नानंक
रिष्ये॥तत्सवितुरितिगोमूत्रस्नानं॥स्नात्वाचम्य॥एवमग्रेपि॥गंधद्वारामितिगोमयेन॥आप्यायस्वेतिक्षीरेण॥दधिक्राव्णइति
दधिस्नानम्॥घृतंमिमिक्षइतितेजोसीतिवाघृतस्नानं॥देवस्यत्वासवितुःप्रस०इंद्रियेणाभिषिंचामितिकुशोदकेनस्नानं॥यद्वै
तानिदशापिस्नानानि॥अमंत्रकाण्येवकार्याणि॥इमंमेगंगे० ऋतमित्यान० समुद्रज्येष्ठाइतिचतसृभिः॥एतोन्विंद्रंस्तवेतितिसृ
भिः॥ तरत्समंदीतिसूक्तेन॥पावमानीभिरापोहिष्ठेतितृचेन मार्जनंचकृत्वा इमंमेगंगेइत्युदकमालोड्य॥ऋतंचेतितृचेनत्रिरा
वृत्तेनाघमर्षणंकृत्वात्रिर्द्वादशवारंवामज्जनानिकृत्वास्नानांगतर्पणंकुर्यात्॥अत्रप्राचीनप्रयोगेषुमृत्तिकास्नानोत्तरंमार्जनाघ
मर्षणोक्तिर्दृश्यतेतत्रमूलंमृग्यं॥दशविधस्नानप्रयोगेप्रक्रांतेस्नानत्रयांतेऽघमर्षणम्॥ततःसप्तस्नानानीतिक्रमस्यनिर्युक्तिकत्वात्
॥सर्वदशविधस्नानांतेएवाघमर्षणतर्पणादेर्मयूखादावुक्तत्वात्च॥तर्पणंयथा॥ब्रह्मादयोयेदेवाः॥तांदेवांस्तर्पयामि॥भूर्देवा
स्तर्पयामि० भुवर्देवां०स्वर्देवां० भूर्भुवःस्वर्देवां०निवीती॥ कृष्णद्वैपायनादयोयेऋषयः॥तानृषीन्० भूर्ऋषीन्०भुवर्ऋषी०स्वर्ऋषी
न्०भूर्भुवःस्वर्ऋषी०प्राचीनावीति सोमःपितृमान्यमोंगिरस्वानग्निष्वात्तादयोयेपितरः तान्पितॄं०भूःपितॄं०भुवःपितॄ०स्वःपितॄंस्त०
भूर्भुवःस्वःपितॄं० ततोयक्ष्मतर्पणादिवासःपरिधानांतेतिलकंकृत्वाआचम्यदेशकालादिसंकीर्त्यविष्णुप्रीत्यर्थंप्रायश्चित्तांगवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णुश्राद्धसंपत्तये श्रीविष्णूद्देशेन त्र्यधिकयुग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतं द्रव्यं दातुमहमुत्सृजे ॥ तच्च तुभ्यों ब्राह्मणेभ्यः पूज
नपूर्वकं दद्यात् तेन पापापहा महाविष्णुः प्रीयतां ॥ ततः प्रायश्चित्तं पूर्वांगगोदानं करिष्य इति संकल्प्य ॥ गवामंगेष्विति गोदानं प्रत्य
क्षं द्रव्यद्वारा वा कुर्यात् ॥ देशकालौ संकीर्त्य प्रायश्चित्त पूर्वांग होमं करिष्ये ॥ तदंगतया स्थंडिलोल्लेखनाद्यग्निप्रतिष्ठापनादि करि॰ ।
विटनामानमग्निं प्रतिष्ठापयामीत्यंते ध्यात्वा प्रायश्चित्त पूर्वांग होमे देवतापरिग्रहार्थमन्वाधानं करिष्ये ॥ चक्षुषी आज्येनेत्यंते अ
ग्निं वायुं सूर्यं प्रजापतिं च प्रतिदैवतं सप्तविंशतिसंख्याज्याहुतिभिः पृथिवीं विष्णुं रुद्रं ब्रह्माणं अग्निं सोमं सवितारं प्रजापतिं-
प्रजापतिमग्निं स्विष्टकृतं पंचगव्येन शेषस्विष्टकृतमग्निमिध्यसन्नहनेन रुद्रमित्यादि यद्वा॰ ज्येनेत्यंते पापापहमहाविष्णुं व्याहृतिभि
रष्टोत्तरशतसंख्याज्याहुतिभिः शेषं समानं ॥ आज्यसंस्कारकाले पंचगव्यं कृत्वा आज्येन सह पर्यग्नि कुर्यात् ॥ ताम्रादिपात्रे पला
शादिपत्रपुटे वा ताम्रायां गोमूत्रं त्रिपलं अष्टमाषं वा गायत्र्या दाय श्वेतगोशकृत् षोडशमाषं गंधद्वारामित्या दाय पीतगोक्षीरं कापि
लं वा सप्तपलं द्वादशमाषं वा ॥ आप्यायस्वेत्यादाय नीलायाः सप्तपलं दशमाषं वा दधि दधिक्राव्णेत्यादाय ॥ कृष्णाया घृतमेकपलं
अष्टमाषं वा तेजोसि शुक्रमसीति वा घृतं मिमिक्षे इति वादाय ॥ यथोक्तगोरभावे गोमात्रस्य मूत्रादि ग्राह्यं ॥ देवस्य त्वेति कुशोदक
मेकपलं चतुर्माषं वा प्रक्षिप्य प्रणवेन यज्ञियकाष्ठेनालोड्य प्रणवेनाभिमंत्रयेत् ॥ आज्य पंचगव्यासादनादि आज्यभागांते भूः ५८
स्वाहा अग्नय इदं ॥ भुवः स्वाहा वायव इदं ॥ स्वः स्वाहा सूर्यायेदं ॥ भूर्भुवः स्वः स्वाहा प्रजापतय इदं ॥ इत्याज्यस्य प्रतिदैवतं सप्तविं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांतिरित्येवमष्टोत्तरशताहुतीर्हुत्वा॥ विष्णुपक्षे भूः स्वाहा विष्णव इदं॥ भुवः स्वाहा विष्णव इदं॥ स्वः स्वाहा विष्णव इदं॥ भूर्भुवः स्वाहा वि
ष्णव इदं॥ इति अष्टोत्तरशताहुतीर्हुत्वा पंचगव्यहोमः॥ तत्र साग्रैः सप्तपत्रकुशैः पंचगव्यं गृहीत्वा॥ इरावती धेनुमती० स्वाहा पृथिव्या इ
दं० १ इदं विष्णु० विष्णव इ० २ मानस्तो० रुद्राये० ३ ब्रह्मजज्ञा० ब्रह्मण इ० ४ ब्रह्मस्थाने शन्नो देवीति मंत्रेण अद्भ्य इति केचित्॥ अग्न
ये स्वाहा अग्नय इदं॥ सोमाय स्वाहा सोमायेदं॥ तत्सवितुर्वरेण्यं० सूर्यायेदं० प्रजापतेन० व्याहृतिभिर्वा० ॐ स्वाहा प्रजापतय इ० अ
ग्नये स्विष्टकृते स्वा०॥ अग्नये स्विष्टकृत इदं॥ इति दश पंचगव्याहुतीर्हुत्वा केवलाज्यस्य॥ यदस्येति स्विष्टकृतं हुत्वा प्रायश्चित्त होम
शेषं समाप्य व्रतग्रहणं करिष्ये इति द्विजान् पृष्ट्वा कुरुष्वेत्यनुज्ञातः॥ यत्त्वगस्थित० ॐ इति प्रणवेन गृहीत्वा प्रणवेनैव सर्वं पंचगव्यं
पिबेत् अशक्तौ गोमूत्रादि स्वल्पं ग्राह्यं॥ सर्वस्य पेयत्वात्॥ एतच्च ग्रामाद्बहिर्नद्यादेस्तीरे नक्षत्रदर्शने कार्यम्॥ व्रतानि शास्त्रुरवेग्रा
ह्यं बहिस्तारक दर्शन इति स्मृतेः॥ मुमूर्षोरक्तगृहादावेव अस्मिन्दिने उपवासः॥ अशक्तौ हविष्याशनं॥ अयं च पंचगव्यस्य दशाहुतिहो
मो ब्रह्मकूर्चाख्य पंचगव्यपाने सर्वत्रोह्यः॥ गृहमागत्य प्रातरारभ्य संकल्पित प्रायश्चित्तं संकल्पित प्रत्याम्नायानुसारेणानुष्ठायोत्तरांगा
नि कुर्यात्॥ गोनिष्क्रय रजतादि दान पक्षे पंचगव्य प्राशनांते इदं सार्द्धाब्दे पंचचत्वारिंशत् कृच्छ्र प्रत्याम्नाय गोनिष्क्रयी भूतं प्रति कृच्छ्रं
निष्क तदर्धं तदर्धान्यतम प्रमाणं रजत द्रव्यं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः दातुमहमुत्सृजे॥ इति द्रव्य दान संकल्पं कृत्वा तदेव द्रव्यं विभ
ज्य दत्वा चोत्तरांगानि कुर्यात्॥ आचीर्णस्यामुक प्रायश्चित्तस्य सांगतार्थमुत्तरांगानि करिष्ये॥ तत्र होमं कर्तुं स्थंडिलादि करिष्ये इति संक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्प्यपूर्ववदाज्यहोममात्रंव्याहृतिभिः कृत्वा पूर्ववद्देवविष्णुश्राद्धंगोदानंचकुर्यात्॥नात्रपंचगव्यहोमः अंतेशक्तेनगोभूहेमादिदशदानानिकार्याणि॥अ
शक्तौहिरण्यदानं॥गृह्याग्निसागरेतस्मिन्नेवदिनेउत्तरांगहोमश्चतस्मिन्नेवाग्नौकार्यइत्येतावन्मात्रमुक्तंतत्रतंत्रप्रयोगः॥पृथक्प्रयोगोवेतिविचा
रणीयं॥ममतुपृथगग्निकरणादियुक्तंभातिकौस्तुभेपूर्वोत्तरांगहोमयोरिध्माधानादिस्थालीपाकतंत्रंकृताकृतमित्युक्तं॥तत्पक्षेआधानांते
न्वाधानपरिसमूहनपरिस्तरणपर्युक्षणाज्यपंचगव्यसंस्कारस्रुवसंमार्गार्चनांतहोमः॥होमांतेस्विष्टकृत्सप्तप्रायश्चित्ताहुतयश्चकृता
कृताः॥परिस्तरणविमोकादिः॥ इतिकाशीनाथोपाध्यायविरचितःसार्धाब्दादिसर्वप्रायश्चित्तप्रयोगः॥ ॥अथविप्रस्त्रियाःप्रायश्चित्तप्र
योगः॥ ॥स्त्रीणांहोमःकृताकृतः॥करणपक्षेविधवायाःक्षौरांतेपूर्ववत्कृत्वाअमंत्रकाणिदशस्नानानि॥सधवायास्तुसंकल्पांतेदं
तधावनंकृत्वातूष्णींदशस्नानानि॥वस्त्रपरिधानांतेविष्णुश्राद्धगोदानेकृत्वाप्रायश्चित्तांगहोमार्थमाचार्यंत्वांवृणे इतिविप्रंवृत्वापू
र्ववत्विप्रद्वारासर्वंपूर्वांगंकारयित्वास्वयंपंचगव्यंतूष्णींप्राश्यमुख्यप्रत्याम्नायद्रव्यंविसृज्योत्तरांगानिकारयेत्॥होमाभावपक्षेदशविध
स्नानांतेविष्णुश्राद्धगोदानेकृत्वाविप्रेणपंचगव्यंकारयित्वातूष्णींप्राश्यप्रायश्चित्तद्रव्यंसंकल्प्यदत्वोत्तरांगविष्णुश्राद्धदानदशस्नानानि
कुर्यात्॥अथशूद्रस्यसंकल्पांतमविकृतंप्राग्वत्॥ततःक्षौरांतेअमंत्रकदशस्नानानिवस्त्रतिलकधारणांतेविष्णुश्राद्धगोदानेकृत्वाविप्रद्वारा
पंचगव्यंकारयित्वास्वयंतूष्णींपिबेत्॥शूद्रेणकपिलायाःपंचगव्यानिनपेयानि॥नास्यविप्रद्वारापिहोमःप्रायश्चित्तद्रव्यंसंकल्प्यदत्वाउत्तरां
गविष्णुश्राद्धगोदानानिदशदानानिकुर्यात् इतिस्त्रीशूद्रप्रयोगः अथगोवधाद्येकैकपापेप्रायश्चित्तप्रयोगः॥ पर्षदंप्रदक्षिणीकृत्यसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टांगं प्रणमेत्॥ विप्रैः किंते कार्यमित्यादि पृष्टे गोवृषनिष्क्रयं संकल्प्य निधाय मयाऽमुकगोवधः कृतोऽथवा पलांडुगृंजनादिभक्षणं कृतं यद्वाऽमुकस्त्रीगमनं कृतं तत्प्रायश्चित्तमुपदिशंतु भवंतः॥ इति यथापापं उच्चार्य स्पष्टं वदेत्॥ ततः सर्वे धर्मविवेक्तार इत्यादिकर्त्रा निबंधपूजानुवादकपूजने कृते सभ्या अनुवादकमुखेन प्रायश्चित्तं कथयेयुः त्वयाऽमुकगोवधः कृतस्तत्प्रायश्चित्तं त्रैमासिकव्रतं सप्तदशप्राजापत्यप्रत्याम्नायद्वारा वा सप्तदशगोदानतन्मूल्यदानेन वा पूर्वोत्तरांगसहितं त्वयाचरितव्यं तेन तव शुद्धिर्भविष्यतीत्यादि॥ यद्वा त्वया मत्याभ्यासेन पलांडुगृंजनं कुक्कुटमांसं वा भक्षितं तत्प्रायश्चित्तं यतिचांद्रायणं पुनः संस्कारसहितं प्राच्योदीच्यांगसहितं आचरणीयं तेन तव शुद्धिर्भविष्यतीत्यादि॥ एवमगम्यागमनादावूह्यं॥ ततः कर्ता देशकालौ संकीर्त्य पर्षदुपदिष्टं गोवधप्रायश्चित्तं त्रैमासिकं अमुकप्रत्याम्नायेन प्राच्योदीच्यांगसहितमहमाचरिष्ये॥ ततो वपनं दंतधावनदशविधस्नानपूर्वांगविष्णुश्राद्धगोदानाज्यहोमपंचगव्यप्राशनांते यथासंकल्पितं मुख्यप्रायश्चित्तं कृत्वोत्तरांगानि कुर्यात्॥ इदं सामान्यं॥ ततो विशेषोक्तं स्वाभिमतं गोदानपार्वणश्राद्धादि॥ एवमभक्ष्यभक्षणेपि पलांडुगृंजनकुक्कुटमांसादिभक्षणजनितपातकनिरासार्थं पर्षदुपदिष्टं पुनःसंस्कारसहितं यतिचांद्रायणं अमुकप्रत्याम्नायेन प्राच्योदीच्यांगसहितमाचरिष्ये॥ इति संकल्प्य क्षौरादि पंचगव्यप्राशनादि पूर्ववत्॥ कृत्वा चांद्रायणप्रत्याम्नायं पुनरुपनयनं च कृत्वोदीच्यांगानि कुर्यात्॥ एवमगम्यागमनादौ द्रष्टव्यम्॥ रहस्यप्रायश्चित्ते तु न पर्षदुपस्थानं सभ्यानुवादकपूजनादिकम्॥ किंतु तत् प्रायश्चित्तं स्वयमेव ज्ञात्वाथवा व्याजांतरेण किंचित्पृष्ट्वा रहस्योक्तं प्रायश्चित्तं स्वयमेव रहसि संकल्प्य महच्चेत् क्षौरसहितमन्यथा क्षौररहितमाचरेदिति॥ ॥इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते सर्वप्रायश्चित्तकृततत्प्रतिपादोक्तप्रायश्चित्तादिप्रयोगसारसंग्रहः समाप्तः॥ समाप्तम्॥

हें पुस्तक, मुंबईंत विष्णु बापूदेव गोडबोले याणीं छापिलें. शके १७८९ वैशाखशुक्लपक्ष. ५ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इतिप्रायश्चित्तेंदुशेखरः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



चतुष्कोणाख्यम्



अर्धचन्द्र



वृत्तकुण्डम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



योनिकुण्डम् पश्चिम

त्रिकोणम् पश्चिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



पश्चिम

विषमाष्टास्रम्



पश्चिम

पद्मकुण्डम्

CC-0. In Public Domain. Digitization by eGangotri







Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाईले दुइ तीन थरि भएको बच्चा पाएमा शान्तिलाई दीपकलश गणेश पूजा
गरी कलशस्थालीमाथि सुनको रुद्रको प्रतिमा स्थापना गरी नमस्ते रुद्रमन्यव०
मन्त्रले पूजा गर्नु. सो मन्त्र १०८ जप गराउनु. अग्निस्थापना गरेर सामान्य होम
गरी सो नमस्ते रुद्रमन्यव० मन्त्रले वेल घ्यू चरु वेलको साभिधाले १००८ होम
गर्नु. गायत्री इदंविष्णु० सहस्रशीर्षा० मन्त्र पनि एकेक हजार जप गराउनु.
होम समाप्तिको पछि छायापात्र पूर्णपात्र यज्ञान्त गोदान प्रतिमादानादि गरी ब्राह्मण
लाई दक्षिणा भोजन दिनु. त्यो विकृत बच्चा पाउने गाई पनि नराख्नु. दान गरेर
दिनु भन्ने शास्त्रीले लेखेको छ.
यस्तो विशेष उत्पातको शान्तिलाई मृत्युञ्जयको मन्त्र जे वा गायत्री मन्त्रले
लक्षहोम अथवा अयुत होम गराउनु पनि असल लेखिएको छ. यसबाट सर्व
शान्ति हुन्छ. माथि लेखेको शान्ति गरेर यो लक्षहोम वा अयुतहोम समेत
गराइबक्से हुन्छ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२८८५

॥ अथ कमलाकरभट्टकृतं शांतिरत्नं प्रारभ्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ शांतिरत्नस्यानुक्रमणिका प्रारभ्यते

६१

पृष्ठांकः निरंक	पृष्ठांकः सांक	शांतिनामानि	पृष्ठांकः निरंक	पृष्ठांकः सांक	शांतिनामानि	पृष्ठांकः निरंक	पृष्ठांकः सांक	शांतिनामानि
१		विनायकशांतिः		१२	तत्र देशो मंडपलक्षणं च			दीनां स्थानानि मंत्राश्च
	३	बौधायनोक्तो विनायककल्पः	१३		" कुंडयोनिवेदिलक्षणं		१६	" पूजाद्रव्याणि
४		विनायकशांतिप्रयोगः		१३	" ऋत्विक्संख्या तद्वरणं मधु-		१७	" होमद्रव्याणि
५		एतच्छांत्यभावे वारणदानं			पर्कश्च		१८	" होमसंख्यादि
६		सर्वकर्मस्वग्निनिर्णयः	१४		" ग्रहाणां प्रतिमाद्रव्यवर्गज-		१९	" पूर्णाहुतिरभिषेकश्च
	८	स्मार्ताग्निलक्षणं			न्मस्थानादि		२०	" दक्षिणादि
९		मयूखाद्यनुसारेण परिभाषा	१५		" तेषां मंडलानि मंत्राश्च	२३		ग्रहयज्ञकालाग्न्याहुतिविचारः
	१२	ग्रहयज्ञः		१५	" अधिप्रत्यधिदेवताविनायका-	२३		ग्रहयज्ञप्रयोगः

Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३०	लक्षहोमः
३१	कोटिहोमः
३२	नृसिंहपुराणोक्तो लक्षहोमादौ विशेषः
३२	गायत्र्याद्ययुतहोमः
३३	लक्षहोमे कोटिहोमे च बृहत्पराशरोक्तो विशेषः
३४	कोटिहोमस्य शतमुखादिभेदाः
३७	प्रसवशांतयः
३७	सर्वशांत्युपयोगिकालविचारः
३७	गोमुखप्रसवशांतिः
	तत्प्रयोगः
	...ध्यादिगंडांतलक्षणं शांतिश्च
४१	तिथिलग्नगंडांतशांतिप्रयोगः
४२	नक्षत्रगंडांतशांतिप्रयोगः
४२	उत्तरादिनक्षत्रशांतिः
४३	तत्प्रयोगः
४३	दिनक्षयादिशांतिः
४४	विषघटीशांतिः
४५	तत्प्रयोगः
४६	कृष्णचतुर्दशीशांतिः
४६	तत्प्रयोगः
४७	सिनीवालीकुहूशांतिः
४८	तत्प्रयोगः
४९	सिनीवालीदर्शादिनिर्णयः
५०	दर्शजननशांतिः
५०	तत्प्रयोगः
५१	ज्येष्ठाजननशांतिः
५२	तत्प्रयोगः
५४	मूलजननशांतिः
५४	अभुक्तमूलजातस्य त्यागविचारः
५५	शौनकोक्तमूलशांतिवचनानि.
५९	शतमूलानि
६०	कात्यायनोक्तमूलविधानं
६१	शौनकोक्तस्तत्प्रयोगः
६४	मयूखानुसारी प्रयोगः
६७	गंडांतोत्पत्तौ विशेषः
६८	पितामहसंहितोक्ता मूलाश्लेषाशांतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

६१ शौनकोक्ताश्लेषाशांतिः
७० तत्प्रयोगः ८०
७२ नक्षत्रविशेषफलं शांतिश्च.
७२ एकनक्षत्रशांतिः ८१
७३ तत्प्रयोगः ८२
७३ वैधृतिव्यतिपातसंक्रमशांतिः ८२
७४ तत्प्रयोगः ८२
७५ भद्राजननशांतिः ८३
७६ तत्प्रयोगः
७६ ग्रहणजननशांतिः ८४
७७ तत्प्रयोगः
७८ यमलोत्पत्तिशांतिः
७९ तत्प्रयोगः ८६

७९ त्रिकप्रसवशांतिः
तत्प्रयोगः ८८
८० प्रथमोर्ध्वदंतोत्पत्त्यादिशांतिः
तत्प्रयोगः
षष्ठाष्टममासयोर्दंतोत्पत्तिशांतिः
तत्प्रयोगः ९७
प्रसववैकृतशांतिः
सुखप्रसवोपायः
८३ अधोमुखजननशांतिः
तत्प्रयोगः १०७
८४ पौषे स्त्रीप्रथमप्रसवे सिंहादौ ग-
वादिप्रसवे च शांतिः १०९
तत्प्रयोगः

८७ बालरक्षा
बालग्रहस्तवः
८९ प्रथमदिनादिकृत्यं
९१ पूतनाविधानं
९६ बालग्रहशांतिप्रयोगः
ज्वरोत्पत्तौ नक्षत्रशांतयः
१०३ तत्प्रयोगः
१०३ रोगोत्पत्तौ नक्षत्रतिथिवारशां-
तयः
तत्प्रयोगः
१०७ ग्रहशांतयः
नवग्रहदानानि
१०९ रत्नधारणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११०	ग्रहस्नानानि	११७	निर्घातः	१२२	” सस्यवैकृतं
११०	गुरुपूजा (बृहस्पतिशांतिः)	११७	रश्मिदंडः	१२२	” वृष्टिवैकृतं
१११	तत्प्रयोगः	११७	षड्ग्रहादियोगे शांतिः	१२२	” जलवैकृतं
११२	प्रतिशुक्रादिविधिः	११८	तत्प्रयोगः	१२२	” प्रसववैकृतं
११२	शनिशांतिः	११९	भूमिकंपादि	१२२	” वायुवैकृतं
११३	राहुशांतिः	११९	रजः	१२२	” पक्ष्यादिवैकृतं
११४	ग्रहणशांतिः	११९	दिग्दाहः	१२३	” शक्रध्वजादिवैकृतं
११५	केतुशांतिः	११९	रविच्छिद्रे कृत्यं	१२३	मात्स्योक्ताद्भुतशांतयः
११६	उल्कापतनादि	११९	अद्भुतफलकालः	१२४	तत्र देवताप्रतिमावैकृतशांतिः
११७	प्रतिसूर्यः	१२१	नानोत्पातशांतयः । तत्रादौ	१२४	”अग्निवैकृतशांतिः
११७	परिवेषः	१२१	” लिंगादिवैकृतं	१२४	तत्प्रयोगः
११७	ग्रहयुद्धं		” अग्निवैकृतं	१२५	” वृक्षोत्पातशांतिः
११७	इंद्रधनुः	१२१	” वृक्षवैकृतं	१२५	” कदलीदुष्टप्रसवशांतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

१२६ "वृष्टिवैकृतशांतिः
१२६ " जलाशयवैकृतशांतिः
१२६ " उपस्करवैकृतशांतिः
१२६ " मृगपक्षिवैकृतशांतिः
१२७ " प्रासादादिवैकृतशांतिः
१२७ नानोत्पातशांतिः (गर्गोक्ता)
१३१ दीपपतनादिशांतिः
१३१ तत्प्रयोगः
१३२ प्रासादकलशलिंगार्चाभंगादि-शांतिः
१३२ तत्प्रयोगः
१३३ मदनरत्ने परिशिष्टोक्ताद्भुतशां०
१३३ जनमारशांतिः
...योग.
कुंभविवा...

१३५ तत्प्रयोगाः
१३६ काकमैथुनदर्शनादिशातयः
१३६ काकस्पर्शशांतिः
१३८ तत्प्रयोगः
१३८ गृहे काकप्रवेशशांतिप्रयोगः
१३९ उलूककपोतादिशांतिः
१४० तत्प्रयोगः
१४० पल्लीसरठशांतिः
१४२ तत्प्रयोगः
१४३ आश्विनशुक्लप्रतिपदि रेवंतपूजा
१४४ अश्वशांतिः
१४४ गजाश्वशांतिः
१४५ पशुमारशांतिः

१४५ गोशांतिः
१४६ अश्वशांतिः
१४६ खरशांतिः
१४६ सारमेयशांतिः
१४६ भविष्योक्ता महाशांतिः
१४७ बंधमोक्षः
१४८ शक्रध्वजोच्छ्रायः
१४९ आयुष्यहोमः
१४९ ज्वरशांतिः
१४९ प्रकारांतरेण स्फुटवचनानि
१४९ शौनकोक्तप्रयोगः
१५० स्फुटवचनानुसारी प्रयोगः
१५१ ज्वरहराणि विधानानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५१	अपमृत्युनिवारणं	
१५२	मृत्युंजयहोमः	१६०
१५३	अनावृष्टिशांतिः	१६२
१५४	विनियुक्तमंत्राणां सामान्यविधिः	१६२
१५५	श्रीसूक्तविधिः	१६२
१५५	मंत्रकोशोक्तः श्रीसूक्तप्रयोगः	
१५६	नीराजनं	१६४
१५७	घृतकंबलविधिः	१६८
१५८	शांतिस्नानं	१६९
१५८	एकवस्त्रस्नानं	
१५९	तत्र औषधिप्रार्थना	
१५९	" धान्यस्नानं	
१५९	" फलस्नानं	१७३

१५९	" औषधिस्नानं	१७३
	सूर्यारुणसंवादोक्तमेकवस्त्रस्नानं	१७८
	अकाले गजमदशांतिः	
	गोकरिणीमदशांतिः	१८२
	पंचकमृतौ शांतिः	१८२
१६३	तडागादौ मृतिदोषे जलशुद्धिः	
	मृत्युंजयविधानं वसिष्ठकल्पोक्तं	
	तत्प्रयोगः	
	तत्र हेमाद्रौ शौनकोक्तन्यासः	१८८
१६९	" नामषडंगो द्वितीयषडंगश्च	
१७०	" मंत्रोद्धारः	
१७०	पुरुषसूक्तविधिः	
	दीपस्थानं	

	रुद्रविधिः
	तत्प्रयोगः
१८१	तत्राभिषेकः
	" महास्नानं
	" रुद्रहोमः
१८६	वेदपारायणं
१८६	अनश्नत्पारायणं
१८७	जातवेदाकल्पः
	त्वरितरुद्रविधानं
१८३	स्वप्नाः
१९०	दुःस्वप्नाः तच्छांतिश्च
१९१	वास्तुशांतिः
१९४	तत्प्रयोगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९७ तत्र गृहप्रवेशः
१९७ "प्रासादारामादौ मंडलादिविशेषः
१९८ सूत्रोक्ता वास्तुशांतिः
१९९ बोधायनोक्ता गृहादिशांतिः
१९९ दुष्टरजोदर्शनशांतिः
२०२ तत्प्रयोगः
२०३ ग्रहणे रजोदर्शने विशेषः
२०३ नारायणबलिः
२०४ तत्प्रयोगः
२०४ नागबलिः
२०५ तत्प्रयोगः
२०७ कुंभविवाहो विष्णुमूर्तिदानं च
२०७ तत्प्रयोगः
२०८ अर्कविवाहः
२०९ तत्प्रयोगः
२१० श्रीशांतिः
२१० तत्प्रयोगः
२११ कूष्मांडहोमविधिः
२११ तत्प्रयोगः
२१२ प्रतिकूलदोषशांतिः
२१३ तत्प्रयोगः
२१३ प्रदोषगर्जितादौ शांतिः
२१४ तत्प्रयोगः
२१४ उग्ररथशांत्याख्या षष्टितमाब्दशांतिः
२१५ तत्प्रयोगः
२१६ द्वादशाब्दोत्तरमवलोकनविधिः
२१७ तत्प्रयोगः
२१७ जीवतो मृतिवार्ताश्रवणे विधानं
२१८ पैतृमेधिककरणोत्तरं पुनरागतस्य संग्रहप्रकारः
२१८ वंध्यात्वहरं रुद्रस्नानं
२१९ प्रकारांतरेण रुद्रस्नानं
२१९ तत्प्रयोगः
२२२ शतचंडी सहस्रचंडी च
२२३ तत्र मंडपादिकृत्यं
२२३ चंडीप्रयोगः
२२४ तत्र भूतशुद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२४	प्राणप्रतिष्ठितमातृकान्यासश्च	२३१	" दानानि
२२५	" बहिर्मातृकानिवृत्त्यादिकलान्यासः	२३१	" बलिदाने विशेषः
२२५	" एकादशन्यासाः	२३२	ग्रंथकर्तुः स्ववंशादिकथनं
२२६	" देव्या ध्यानं ब्रह्मादिदेवतास्थापनं च		इति शांतिरत्नस्यानुक्रमणिका समाप्ता.
२२६	" यंत्रे देव्याः स्थापनं		
२२७	" पीठपूजादि		
२२८	" आवरणपूजा		
२२८	" चतुःषष्टियोगिनीपूजा बलिश्च		
२२९	" कुमारीपूजादि		
२२९	" होमः		
२३०	" स्वदेहन्यासादि		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना । कमलाकरसंज्ञेन प्रोच्यंते शांतयः क्रमात् ॥ तत्र । एवं विनायकं पूज्य ग्रहांश्चैव विधानतः । कर्मणां फलमाप्नोति श्रियं चाऽऽप्नोत्यनुत्तमां (पूज्येत्यार्षं पूजयित्वेत्यर्थः । अनुत्तमां उत्कृष्टतमां) ॥ इति याज्ञवल्क्येन सर्वकर्मांगत्वोक्तेर्विनायकशांतिरुच्यते । "बृहत्पराशरः । शांतीनामथ सर्वासां ग्रहशांतिः परा स्मृता । ग्रहेभ्योऽपि गणेशस्तु तस्य शांतिरथोच्यते" ॥ तत्राऽधिकारमाह याज्ञवल्क्यः । विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः । गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ "शां० सा० कर्मणां विघ्नार्थं सिद्ध्यर्थं चेत्यर्थः" तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत । स्वप्नेऽवगाहतेऽत्यर्थं जलं मुंडांश्च पश्यति ॥ काषायवाससश्चैव क्रव्यादांश्चाऽधिरोहति । अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्राऽवतिष्ठते ॥ व्रजन्नपि तथाऽऽत्मानं मन्यतेऽनुगतं परैः । भविष्येऽपि । तैलार्द्रगात्रं विधुरं करवीरविभूषितं । एवं स्वप्नानुक्त्वा प्रत्यक्षदर्शनान्याह याज्ञवल्क्यः। विमना विफलारंभः संसीदत्यनिमित्ततः।।तेनोपसृष्टो लभते न राज्यं राजनंदनः । कुमारी न च भर्तारमपत्यं गर्भमंगना ॥ अंगना गर्भं न लभते गर्भिणी चाऽपत्यं न लभते न जीवतीत्यर्थः । आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ॥ वणिग्लाभं न चाऽऽप्नोति कृषिं चाऽपि कृषीवलः । "शां० म० संसीदति कारणं विना दीनमनस्को भवति । एतदुपलक्षणं यस्य यदिष्टं स चेदिष्टसामग्रीसत्त्वे तन्न प्राप्नोति तदा तदुपद्रुतो बोध्यः । एतदुपद्रवपरिहारार्थं कर्माऽऽह" । स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकं ॥ तस्य उपसृष्टस्य । तेनोपसृष्ट एवाऽधिकारी । स च शूद्रोऽपीति तस्याऽप्यधिकारः । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च सिद्धिकामुकैः । कर्मनिर्विघ्नसिद्ध्यर्थं सुपूज्यस्त्वं गजाननेति लैंगात् । अत एव महार्णवे । यजमानस्तु शूद्रश्चेदद्विजैस्तां नियोजयेदिति कथितं । (यद्यपि श्लोकार्धमिदं महार्णवे सुरानिषेधस्थले उक्तं तथापि यजमानशब्देन शूद्रस्याऽप्यधिकार इत्येतावदेव समर्थयितुं ग्रंथकृताऽत्र निवेशितं) एवं स्त्रीणामप्यधिकारः । अतएव बृहत्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राशरेण । तेनोपहतपुंसां तु कर्म स्यान्निष्फलं कृतं । स्त्रीणामपि तथा सर्वं क्रियमाणं तु निष्फलमिति ॥ उपसृष्टत्वं स्त्रीणामधिकारार्थमुक्तं । अत्रापि कुमारी न च भर्तारमित्यादि । अत्र पुण्येऽह्नीत्युक्तेऽपि । हस्तपुष्याऽश्वयुक्सौम्यवैष्णवाऽन्यतमे शुभे। नक्षत्रे च मुहूर्ते च मैत्रे वा ब्रह्मदैवते इति विष्णुधर्मे विनायकशांतौ विशिष्योक्तानि नक्षत्राणि । शुक्लपक्षे चतुर्थ्यां च वारेण धिषणस्य च । तिष्ये च वीरनक्षत्रे तस्यैव पुरतो नृपेति भविष्यपुराणोक्ता योगविशेषाश्च ज्ञेयाः । " सं० कौ० एतद्वचनमुदाहृत्याऽपरार्कः । तच्छ्रीकामस्य विनायकस्नपनविषयं । उपसृष्टविषयं तु पुण्याहविधानं । उपसृष्टस्य विलंबाऽयोगात् । शां० सा० योगविशेषः काम्यशांतिविषयः । नैमित्तिकी तु कस्मिंश्चित्पुण्याहे भवति " । विवाहादिकर्मांगमुपसर्गनाशार्थं च यत्र क्वचिद्देवनक्षत्रे कृत्तिकादिविशाखांते यत्पुण्यं नक्षत्रमिति श्रुत्युक्ते कार्यं । पुण्याह एव कुरुत इत्युक्तेः । बृहत्पराशरोऽपि " तस्मात्तदुपशांत्यर्थं समभ्यर्च्य गणेश्वरं । स्नपनं कारयेत्तस्य विधिवत्पुण्यवासरे " ॥ (अत्र समभ्यर्च्येत्युक्तेः स्नपनात्प्राग्विनायकं पूजयेत् । इदमुपलक्षणमंबिकापूजनस्य। अतएवाऽन्ते तेनैव । एतेन संपूज्य गणाधिनाथं विघ्नोपशांत्यै जननीं तथाऽस्य । स्मार्तोक्तसम्यग्विधिना स कामान् प्राप्नोति यान्यान्मनसा स इच्छेत् ॥ स्नात्वा विधायाऽर्चनमम्बिकायाः संपूज्य लोकान्सखिबंधुलोकान् । आचार्यवृद्धान्वनिताकुमारीः प्रध्वस्तविघ्नः श्रियमेति गुर्वीमित्युभयोः पूजायाः फलसंबंध उक्तः)॥ चतुर्थ्यां शुक्लपक्षे तु अयने [श्रवणे] चोत्तरे तथा । पुण्यार्थं सर्वसिद्ध्यर्थं कुर्याच्छांतिं विनायकीम् ॥ वृद्ध्यभावश्छांदसः । याज्ञवल्क्यः । (अ० १ श्लो० २७.) । गौरसर्षपकल्केन (सिद्धार्थपिष्टेन) साऽऽज्येनोत्सादितस्य च । सर्वौषधैः सर्वगंधैर्विलिप्ताशिरसस्तथा ॥ भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः । उत्सादितस्य उद्वर्तितस्य । " उपविष्टस्येति कर्तरि षष्ठी । ततश्च तेन ते द्विजाः स्वस्ति भवन्तो ब्रुवन्त्वित्यादिरूपेण वाच्या इत्यपरार्कः " । सर्वौषधानि च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयं । सटी चंपकमुस्ते च सर्वौषधिगणः स्मृत इति महार्णवोक्तानि । कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनं । वचा चंपकमुस्ते च सर्वौषध्यो दश स्मृता इति छंदोगपरिशिष्टोक्तानि च ग्राह्याणि । तत्रैव रूढेः । मुरा महाराष्ट्राणां मोहरी इति प्रसिद्धा । शैलेयं शिलाजं । सर्वगंधा उक्ता हेमाद्रौ मदनरत्ने गारुडे च । कर्पूरश्चन्दनं दर्पः कुंकुमं च समांऽशकं ॥ सर्वगन्धमिति प्रोक्तं समस्तसुरवल्लभमिति ॥ मदनरत्ने तु चन्दनकुंकुमाऽगुरुकर्पूरकस्तूरिकाजातीफलानि सर्वगन्धा उक्तास्तत्र मूलं चिन्त्यं । तथा । अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् । मृत्तिकां रोचनां गन्धान् गुग्गुलुं चाऽप्सु निक्षिपेत् ॥ या आहृता एकवर्णैश्चतुर्भिः कलशैर्हृदात् । (अश्वस्थानादिपञ्चभ्यो देशेभ्य आनीतां मृत्तिकां रोचनाद्याश्च या एकवर्णैः समानाकारैश्चतुर्भिः कलशैर्हृदादाप आनीतास्तास्वप्सु क्षिपेदित्यन्वयः) । गन्धान्सर्वगंधान् । अत्र विशेषमाहाऽपरार्के बैजवापः । चतुर्भ्यः प्रस्त्रवणेभ्यश्चतुरः कुंभानाहृत्य तेषु सर्वौषधीः सर्वगन्धान् हिरण्यं व्रीहियवौ गुग्गुलुं मृदमाखूत्करामिति क्षिपेदिति शेषः । किंच । चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः ॥ इदं च पूर्वं स्थाप्यं । पूर्वं विनियोगोक्तेः । तत्रैकहस्ता द्विहस्ता वा चतुरंगुलोच्चा वेदी कार्येति केचित् । तच्चिंत्यं । वेद्या मानाऽभावात् । करणेऽपि हस्तोच्चा युक्ता । यत्र होमोत्तरमभिषेकस्तत्रोत्तरतः पूर्वतो वा कार्या । अत्र त्वभिषेकोत्तरं होमः । अतः पूर्वतो होमः पश्चाच्च भद्रासनं कार्यं । प्रांच्युदंचि वा कर्माणीति कात्यायनोक्तेः । तेनोत्तरतः स्नानपीठं तद्दक्षिणे होमश्चेति मूर्खाणां हेयः (संप्रदायः) दक्षिणसंस्थतापत्तेः । अत्र मध्ये स्वस्तिकं कृत्वा तत्र रक्तमानडुहं चर्म प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य तत्र श्रीपर्णीपीठं तदुपरि श्वेतवस्त्रमित्येवं भद्रासनं कृत्वा तस्य पूर्वादिचतुर्दिक्षु चतुरः कलशान्संस्थाप्य तेषु वरुणं संपूज्यैशान्यां वेद्यां पीठे वा रक्तवस्त्रे प्रतिमयोर्गणेशांऽबिके तद्गायत्रीभ्यामावाहयेत् । अप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रार्के भविष्येत्वन्या अपि देवता उक्ताः । व्योमकेशं तु संपूज्य पार्वतीं भीमजं तथा । कृष्णस्य पितरं तात अर्कमारं सितं तथा ॥ धिषणं क्लेदपुत्रं च कोणं लक्ष्म च भारत । विधुंतुदं बाहुलेयं नंदकस्य च धारिणं ॥ व्योमकेशः शिवः । भीमः शिवस्तज्जो गणेशः । आरो भौमः । सितः शुक्रः । धिषणो गुरुः । क्लेदपुत्रो बुधः । कोणः शनिः । लक्ष्म चंद्रः । बाहुलेयः स्कंदः । नंदकधारी विष्णुः । सहस्राक्षं शतधारमृषिभिः पावनं कृतं । तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः । भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि । ललाटे केशयोरक्ष्णोरापस्तद् घ्नंतु सर्वदा ॥ एकैकेन मंत्रेण कुंभत्रयं । त्रिभिश्चतुर्थं कुंभमिति विज्ञानेश्वरः । त्रिभिरेकैकं कुंभमित्यपरार्कः । स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु । जुहुयान्मूर्धनि कुशान् सव्येन परिगृह्य च ॥ मितश्च संमितश्चैव तथा शालकटंकटौ । कूष्मांडो राजपुत्रश्चेत्यंते स्वाहासमन्वितैः ॥ नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः । " बृहत्पराशरश्च । नामभिश्च बलिं दद्यान्मंत्रैः स्वाहानमोऽन्वितैः " । यजमानमस्तके (ओंकारादिभिः स्वाहांतैश्चतुर्थ्यंतैः) मितादिनामभिस्तैलं हुत्वा तैरेव चरुं वह्नौ हुत्वा तच्छेषेणेंद्रादिदिक्पालेभ्यो नामभिर्बलिं दद्यादिति विज्ञानेश्वरः । (एतानि च षड्विनायकनामानीति स एव । युक्तं चेदं । पाद्मगाणेशस्थे सहस्रनामस्तवे । कटंकटो राजपुत्रःशालकःसंमितो मित इति दर्शनात् । शालक इत्यत्र स्वार्थे कः । यद्यपि तत्र कूष्मांडसामसंभूतिरिति नाम दृश्यते न कूष्मांड इति तथापि नामैकदेशेनाऽपि नामग्रहणमिति न्यायेन तदपि गणेशनामैव । बृहत्पराशरेणाऽपि याज्ञवल्क्यतुल्यमेव पठितं । ' शां० म० अपरार्कस्तु शालकटंकट इत्येकवचनांतं पपाठ । तेन तन्मते पंचैवाऽऽहुतयो भवंति ' । अथर्वपरिशिष्टे । अथ विनायका भवंति शालाः कटंकटाः कूष्मांडा राजपुत्रा मिताः संमिताश्चेति । अपरार्के तु बैजवापेनाऽपि गृह्याऽनुसारेण नामचतुष्टयमुक्तम्) । पूर्वोक्तनामभिस्तैलं हुत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैरेव कृताऽकृतादिबलिदानं न तु चरुहोम इत्यपरार्कः । बृहत्पराशरोऽपि । नामभिश्च बलिं दद्यान्नमस्कारसमन्वितैरिति सितादिनामभिर्बलि-माह । दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः । कृताऽकृतांस्तंडुलांस्तु पललौदनमेव च ॥ मत्स्यान्पक्कांस्तथैवाऽऽमान्मांसमेतावदेव तु । कृताऽकृता अवहता अनवहताश्च । " म० म० सकृदवहता इति „ पललं तिलपिष्टं मांसमित्यन्ये । तन्मिश्र ओदनः । मत्स्याः पक्का अपक्काश्च । एतावत् पक्कमामं च । पुष्पं चित्रं सुगन्धं च सुरां च त्रिविधामपि । त्रिविधा माध्वी गौडी पैष्टी च । एतच्छूद्रपरं । क्षत्रवैश्याभ्यां पैष्टी विप्रेण तु सर्वाऽपि वर्ज्येति महार्णवः । तन्न । मानाऽभावात् । चतुर्वर्णाऽधिकाराच्च । न च नराऽश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिरिति निषेधः । तस्य सौत्रामण्यामपि सुराग्रहणस्य च संग्रह इत्यनेनोपसंहारात् । हेमाद्रिस्तु निषेधस्य निवृत्तिमात्राऽर्थत्वेन विशेषाऽनपेक्षणान्नोपसंहारः । विशेषनिषेधस्तु दोषाऽधिक्यार्थ इत्याह । अतस्तदभावे शूद्रैर्द्विजैश्च पयो ग्राह्यं । सौत्रामण्यां पयोग्रहा वा स्युरित्यापस्तंबेन सुराऽभावे पयोग्रहस्य विधानात् । तच्च सैंधवमिश्रमिति महार्णवादयः शिष्टाः । " मयूखे तु सुरा मांसं चाऽब्राह्मणविषयं । ब्राह्मणैस्तु मांससुरास्थाने सलवणं पायसं दुग्धं च ग्राह्यं । पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत् । दुग्धं लवणसंमिश्रं सुरास्थाने प्रकल्पयेदिति स्मरणात् । महार्णवेऽप्येवमेव „ मूलकं पूरिकाऽपूपांस्तथैवोंडेरकस्रजः । दध्यन्नं पायसं चैव गुडपिष्टं समोदकं ॥ मूलकं प्रसिद्धमिति महार्णवः । तदाकारः पिष्टविकार इति मदनरत्नविज्ञानेश्वरौ । (पूरिकाः प्रसिद्धाः)। अपूपः स्नेहपक्को गोधूमविकारः । उंडेरकस्रजः क्षुद्राऽपूपा इत्यपरार्कः । वर्तुलै [तंडुलै] श्चतुरस्रैश्च दीर्घैः पिष्टविकारकैः । निर्मिताः स्रज उच्यंते उंडेरकसमाख्ययेति महार्णवे मदनरत्ने च ॥ गुडमिश्रं " शाल्यादि " पिष्टमित्यर्थः । मोदकाः पैष्टा इत्यपरार्कः । लड्डुका इति मदनरत्ने मिताक्षरायां च । बृहत्पराशरेण कुल्माषाः फलानि चाऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकान्युक्तानि । बलिमंत्राः प्रयोगे वक्ष्यंते । एतान् सर्वान्समाहृत्य भूमौ कृत्वा ततः शिरः । शूर्पे निधाय निवेद्येत्यर्थः । विनायकस्य जननीमुपतिष्ठेत्ततोऽबिकां ॥ दूर्वासर्षपपुष्पाणां दत्वाऽर्घ्यं पूर्णमंजलिं । दूर्वादिपूर्णमंजलिं सजलं विनायकायांऽबिकायै चाऽर्घ्यं दत्वोपतिष्ठेतेत्यर्थः । "दूर्वासर्षपपुष्पैश्च पूर्णमर्घाऽजलिंक्षिपेदिति पराशरात् । विज्ञानेश्वरस्तु सकुसुमोदकेनाऽर्घ्यं दत्वा दूर्वासर्षपपुष्पाणां पूर्णमंजलिं दद्यादित्याह" । रूपं देहि यशो देहि भगं भगवति देहि मे । पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे । विनायकोपस्थाने भगवन्नित्यूह इति विज्ञानेश्वरः । तत्तु समानविधानत्वात्प्रकृतिविकाराऽभावे कथं स्यादिति चिंत्यं । अतएवांऽबिकामित्युक्तं । ततः शुक्लांऽबरधरः शुक्लमाल्याऽनुलेपनः । ब्राह्मणान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि ॥ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः । कर्मणां फलमाप्नोति श्रियं चाऽऽप्नोत्यनुत्तमां ॥ "आदित्यस्य तथा पूजां तिलकं स्वामिनस्तथा।महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयादिति हेमाद्रौ याज्ञवल्क्यः" ॥ यजमानोऽभिषेकवस्त्रं चाऽऽचार्याय दद्यात् ।आत्मनो वास आचार्याय ददातीति मदनरत्ने बैजवापोक्तेः। अथ बौधायनतंत्रे विशेषः । अथाऽतो विनायककल्पं व्याख्यास्यामो मासि मासि चतुर्थ्यां शुक्लपक्षस्य पंचम्यां वाऽभ्युदयादौ सिद्धिऋद्धिकामः पशुकामो वा विनायकस्य बलिं हरेत् । पूर्वेद्युःकृतैकभक्तोऽप आचम्य देवयजनोल्लेखनाद्यग्निमुखांतं कृत्वा दक्षिणामुखं हस्तिमुखं दैवतमावाहयति।विघ्न विघ्नेश्वराऽऽगच्छ विघ्नेत्येव नमस्कृत । अविघ्नाय भवाऽस्माकं सदाऽस्माकं भवोद्भवेत्यथ दूर्वाऽक्षतासुमनोमिश्रमर्घ्यं ददाति । इमा आपः शिवतमाः पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः [तमाः] पाद्या अर्घ्या अर्हणीया अभिषेचनीया आचमनीया मार्जनीयाश्च प्रतिगृह्यंतां भगवन् विनायकोमित्यथ तूष्णीं गंधपुष्पधूपदीपैरभ्यर्च्योपतिष्ठते । नमो भूपतये नमो भुवनपतये नमो भूतानां पतये नम इत्यथ तिस्रस्तिस्रो विनायकाऽऽहुतीर्जुहोति। विनायकाय भूपतये नमो विनायकाय स्वाहा । एवं विनायकाय भुवनपतये नमो विनायकाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाहा । विनायकाय भूताना पतये नमो विनायकाय स्वाहा । जयप्रभृतीसिद्धमाधेनुवरप्रदानादपूपं करंभोदकसक्तून् पायसमित्यथाऽस्मा उपकिरति । विघ्नाय स्वाहा। एवं विनायकाय वीराय सु [शू] रायोग्राय भीमाय हस्तिमुखाय वरदाय विघ्नपारिषदेभ्यः स्वाहेत्यथ भूतेभ्यो बलिमुपहरेत् । ये भूताः प्रचरंतीत्यथ पंचसूत्रं कंकणं हस्ते बध्नाति । विनायक महाबाहोऽविघ्नमेतत्त्वाऽऽज्ञया । कामा मे साधिताः सर्वे इदं व्यात्द्वतिभिरावध्नामि कंकणमित्यथाऽग्निं प्रदक्षिणं कृत्वा प्रणम्याऽभिवाद्य विनायकं विसर्जयति । कृतं यदि मया प्राप्तं महाभाग गणेश्वर । उत्तिष्ठ सगणः साधु याहि भद्रं प्रसीदतामिति ॥ दधिमधुपयआज्यविसर्जनं कल्पयति ॥ अथ प्रयोगः ॥ पूर्वोक्तशुभदिने कर्ता देशकालौ स्मृत्वा विनायकोपसर्गशांत्यर्थं अमुककर्मणि निर्विघ्नतासिद्ध्यर्थं अमुकफलसिद्ध्यर्थं लक्ष्मीप्राप्त्यर्थं वा विनायकशांतिं करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजावृद्धिश्राद्धानि कृत्वाऽऽचार्यं वृत्वा चतुरः (विज्ञानेश्वरमते) पराशरमतेऽष्टौ वा ऋत्विजो वृणुयात् । (अष्टौ वा चतुरो वाऽपि स्वस्ति वाच्य शुभान् द्विजानिति बृहत्पराशरोक्तेः) तेषु चत्वारः स्वस्तिवाचका इति मदनरत्ने । "शां० म० अपरे पुण्याहवाचनं नेच्छंति । अग्रे तस्य कर्तव्यत्वात् " (अस्मिन्पक्षे मातृकार्चावृद्धिश्राद्धयोर्लोप आर्थिकः) अथाऽऽचार्यः पंचवर्णैः शुक्लैर्वा पिष्टैर्मध्ये स्वस्तिकं कृत्वा तदुपरि रक्तमानडुहं चर्म प्राग्ग्रीवमुत्तरलोमाऽऽस्तीर्य तत्र श्रीपर्णीकाष्ठजं पीठं संस्थाप्य तत्र श्वेतवस्त्रमाच्छाद्य तच्चतुर्दिक्षु चत्वारि स्वस्तिकानि कृत्वा तेषु प्रागादितः महीद्यौरित्यादिना कांडाऽनुसमयेन एकवर्णांश्चतुरः कुंभान्धान्यराशौ निधाय हृदोदकेन नदीसंगमोदकेन वाऽऽपूर्य । उद्धृतासि वराहेण कृष्णेन शतबाहुना । मृत्तिके हर [हन] मे पापं यन्मया दुष्कृतं कृतमिति मंत्रेण तेषु पंच मृदः क्षिप्त्वा । गंधद्वारामिति चंदनाऽगुरुकेशरकस्तूरीकपूर्रादीन्गंधान् गोरोचनां गुग्गुलुं च क्षिप्त्वा अश्वत्थेव इति पंच पल्लवान्निक्षिप्य चंदनमालाभूषितान्कृत्वा याः फलिनी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिति फलं सहि रत्नानीति पंचरत्नानि हिरण्यरूप इति हेम क्षिप्त्वा युवासुवासा इति वस्त्रेणाऽऽवेष्ट्य पूर्णा दर्वीति पूर्णपात्रं निधायैवं चतुर्दिक्षु कृत्वा " शां० म० अत्र च वरुणाऽऽवाहनपूजने अपि केचिदाहुः " प्रतिकलशं कलशस्यमुखे० देवदानवेत्यादिपठेत् । " नवभिः पावमानीभिः कुंभं तमभिमंत्रयेदिति पराशरः " ततश्चतुर्दिक्षु चत्वार ऋत्विजः त्वं नो अग्ने इति वरुणमावाह्य षोडशोपचारैः (महार्णवे तु वरुणप्रकाशकमंत्रांतरैर्वा व्याहृतिभिर्वा नाममंत्रेण वा पूजा पंचोपचारैर्वेति च) संपूज्य आनोभद्राः शंनोवातःपवतामित्यादि स्वस्वशाखोक्तां शातिं पठेयुः।आनोभद्रा इति दशर्चस्य सूक्तस्य राहूगणो गोतमो विश्वेदेवा जगती । षष्ठी विराट् तिस्रोंऽत्यास्त्रिष्टुभः । शांत्यर्थपठने विनि० । तत आचार्यो भद्रासनस्य पूर्वतो होमार्थं स्थंडिलं कृत्वा तदैशान्यां हस्तमात्रवेदिकायां पीठे वस्त्रादौ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि । तन्नो दंतिः प्रचोदयात् इति विनायकं। सुभगायै विद्महे काममालिन्यै धीमहि । तन्नो गौरी प्रचोदयात् इत्यंबिकां च हैमप्रतिमायासावाहयेत् । तत्परितो यथावकाशं प्रतिमास्वक्षतपुंजेषु वा व्योमकेशं । पार्वतीं । भीमजं । वसुदेवं । अर्क । मंगलं । शुक्रं । बृहस्पतिं । बुधं । शनैश्चरं । चंद्रं । राहुं । बाहुलेयं । विष्णुं । एतान् इंद्रादिलोकपालांश्चाऽऽवाह्याऽऽसनादिनैवेद्यांतैरुपचारैः संपूज्य भद्रासनस्य पूर्वतः स्थंडिले गृह्योक्तविधिनाऽग्निं प्रतिष्ठाप्याऽन्वादध्यात् । केचित्तु ग्रहमखमेतत्समानतंत्रं कुर्वंति । तत्र विनायकादुत्तरे ग्रहाऽऽवाहनं कुर्यात् । तत्राऽन्वाधाने चक्षुषीआज्येनेत्यंतमुक्त्वा अत्र प्रधानं । ग्रहान्समिदाज्यचरुभिः मितं संमितं शालं कटंकटं कूष्मांडं राजपुत्रं चैकैकया चर्वाहुत्या व्योमकेशादीनेकैकया चर्वाहुत्या शेषेण स्विष्टकृतमित्यादि चरुं श्रपयित्वा बर्हिष्यासाद्य गव्याज्यलोलितेन (गोघृतमिश्रेण) गौरसर्षपकल्केनोद्वर्तितसर्वांगं पूर्वोक्तैः सर्वौषधैः सर्वगंधैश्च विलिप्तशिरसं यजमानमाचार्यो मंगलवेदघोषैर्भद्रासने उपवेशयेदिति विज्ञानेश्वरमहार्णवादयः । बृहत्पराशरोऽप्येवमाह । उ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पवेश्योद्दर्त्तयेदिति मदनरत्ने उक्तं । ततो यजमानः पूर्ववृतैश्चतुर्भिरष्टभिर्वा ब्राह्मणैः सह (स्वगृह्योक्तविधिना) स्वस्तिवाचनं कुर्यात् ततः जीवत्पतिपुत्राभिः सुवेषाभिः स्त्रीभिर्नीराजनं कार्यं । ताभ्यश्च यजमानो वस्त्राणि कंचुकानि च दद्यादित्याचारः। तत आचार्यः पूर्वदेशस्थं कलशमादाय । सहस्राक्षं शतधारमृषिभिः पावनं कृतं । तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते इति मंत्रेण यजमानमभिषिंचेत् । भगं ते वरुणो राजा भगं सूर्यो वृहस्पतिः । भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुरिति दक्षिणकुंभेन । ततः यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि । ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नंतु सर्वदा इति पश्चिमकुंभेन । तत उत्तरकलशमादाय सहस्राक्षमित्याद्यैस्त्रिभिर्मंत्रैरभिषिंचेत् । अपरार्कमते तु त्रिभिरेकैककुंभेनाऽभिषेकः । ततश्चतुर्भिर्मिलितैः कुंभैर्वृहत्पराशरोक्तैरभिषिंचेत् । एतद्वै पावनं स्नानं सहस्राक्षमृषिस्मृतं । तेन त्वा शतधारेण पावमान्यः पुनंत्विमाः । [त्वमूः] शक्रादि दशदिक्पाला ब्रह्मेशाः केशवादयः । आपस्ते घ्नंतु दौर्भाग्यं शांतिं ददतु सर्वदा । सुमित्र्या न आप ओषधयः संतु दुर्मित्र्यास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । समुद्रा गिरयो नद्यो मुनयश्च पतिव्रताः । दौर्भाग्यं घ्नंतु ते सर्वे शांतिं यच्छंतु सर्वदा । पादगुल्फोरुजंघाऽऽस्यनितंबोदरनाभिषु । स्तनोरोबाहुहस्ताग्रग्रीवास्कंधाऽगसंधिषु । नासाललाटकर्णभ्रूकेशांतेषु च यत्स्थितं । तदापो घ्नंतु दौर्भाग्यं शांतिं यच्छंतु सर्वदा । " मिलितकुंभैरभिषेक इति केचित् । चतुर्थकलशाऽभिषेचन एवैते मंत्राः पठनीयाः इति मयूखे " तत आचार्यः प्राङ्मुखो यजमानस्य पश्चात्तिष्ठन्सव्यपाणिना कुशान्यजमानस्य मूर्धनि निधाय तत सार्षपं तैलं औदुंबरेण स्रुवेणाऽऽदाय ॐमिताय स्वाहा । मितायेदमिति यजमानः । एवमग्रेऽपि त्यागः । ॐ संमिताय स्वाहा । ॐशालाय स्वाहा । ॐकटंकटाय स्वाहा । ॐ कूष्मांडाय स्वाहा । ॐराजपुत्राय स्वाहेतिषडाहुतीर्जुहुयात् । अपरार्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मते तु शालकटंकटाभ्यामेका। कूष्मांडराजपुत्राय चैकाहुतिरितिचतस्रः । आथर्वणकौशिकगृह्यपरिशिष्टयोरप्येवं । ततो वन्हौ इध्माधानादि कृत्वा पूर्वोक्तैः षड्भिर्मंत्रैरग्नौ चरुं हुत्वा व्योमकेशादिभ्यश्चैकैकामाहुतिं हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते पूर्वादिदिक्षु इंद्रादिदशलोकपालेभ्यो नाममंत्रैश्चरुशेषेण बलिं दत्वा शुद्धोदकेन स्नातो धौतांबरधरो यजमानः साचार्यो विनायकमंबिकां च पूर्वोक्तगायत्रीभ्यां षोडशोपचारैः संपूज्य कृताकृततंडुलान् (कृताकृतस्वरूपमुक्तं प्राक्) तिलयुक्तौदनं पक्काऽपक्कमत्स्यान् त्रिविधसुरां तदभावे सैंधवयुतं पात्रत्रये क्षीरं पक्काऽपक्कमांसं मूलकाऽपूपपूरिकोंडेरस्रग्दध्यन्नपायसगुडमिश्रपिष्टमोदकलड्डुकचित्रसुगंधपुष्पकुल्माषफलानि चैकपात्रे शूर्पे वा कृत्वा पूर्वोक्तमंत्रेण विनायकायैतमुपहारं निवेदयामीत्युपहारं विनायकायैवमंबिकायै च दत्वा कुसुमगंधदूर्वासर्षपसहितेनोदकेनांऽजलिमापूर्य प्रत्येकं पूर्वोक्तमंत्राभ्यामर्घ्यं दत्वा दूर्वासर्षपपुष्पांऽजलिं च मंत्राभ्यां दत्वा भूमौ शिरः कृत्वा। रूपं देहि यशो देहि भगं भगवन् देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे इति विनायकं । रूपं देहि यशो देहि भगं भगवति देहि मे । पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ (अचलां कुरु मे देवि विपुलां ख्यातिसंभवामित्यर्धमधिकं हेमाद्रौ भविष्ये । ख्यातिसंभवा लक्ष्मीः) इत्यंबिकां चोपतिष्ठेत । बृहत्पराशरो मंत्रांतरमाह । सौभाग्यमंबिके देहि भगं रूपं यशोऽपि च । स्त्रियं पुत्रांश्च कामांश्च तथा शौर्यं च देहि मे ॥ गणेशमातरंबाले यत्किंचिन्मदभीप्सितं । एकनाम्नैव तद्देवि देहि गौरि वरान्ममेति ॥ अर्घ्यदानमुपस्थानं च चतुष्पथे बल्यनंतरं कार्यमिति मदनरत्ने । (युक्तं चेदं पराशरयाज्ञवल्क्याभ्यां तथैवोक्तत्वात्) तत आचार्यः शूर्पे कुशानास्तीर्य कृताकृताद्युपहारं तत्र निधाय चतुष्पथे भूमिमभ्युक्ष्य कुशानास्तीर्य तत्र मंत्रोक्ता देवताः संपूज्य तत्र शूर्पं निधाय बलिं दद्यात् । मंत्रास्तु । बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा । मरुतोऽथाश्विनौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च पिशाचा मातरोरगाः । (मातरः उरगाः संधिरार्षः) शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः । दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः । मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखाऽऽवहाः । 'अतस्तु वाससी शुक्ले परिधायाऽहते शुभे । सितचंदनलिप्तांगः सितस्रग्भूषणान्वितः ॥ तानन्यांश्च द्विजान्सर्वान्भोजयेद्विविधाऽशनैः । वस्त्रयुग्मं गुरोर्देयं ते तु तस्य वराऽऽशिष इत्युपस्थानाऽनंतरं पराशरोक्तेः ' ततो यजमानो गृहमागत्य पादौ प्रक्षाल्याऽऽचम्य पूर्णाहुतिं हुत्वा आचार्यं संपूज्य तस्मै वस्त्रयुगं हेम च दक्षिणां दत्वा ऋत्विग्भ्यो यथाशक्त्यन्येभ्यश्च भूयसीं दक्षिणां दत्वा विनायकांऽबिकयोरुत्तरपूजां कृत्वा विसृज्याऽऽचार्याय दत्वाऽग्निं संपूज्य विभूतिं धृत्वाऽग्निं विसृज्य ब्राह्मणान्भोजयित्वा कर्मेश्वरार्पणं कुर्यात्। "सं० कौ० संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना । शांतिरुक्ता गणेशस्य कृत्वातां शुभमाचरेत् ॥ अकृत्वा शांतिकं यस्तु निषिद्धे सति दारुणे। प्रकरोति शुभं कर्म विघ्नस्तस्य पदे पदे ॥" इतिनारायणभट्टसूरिसूनुरामकृष्णभट्टसुतकमलाकरभट्टकृते शांतिरत्ने विनायकशांतिः ॥१॥ हेमाद्रौ भविष्ये । चतुर्थ्यां वारणं हैमं पलादूर्ध्वं तु शोभनं । कारयित्वांऽकुशयुतं तिलद्रोणोपरि न्यसेत् ॥ वस्त्रैः पुष्पैः पूजयित्वा नैवेद्यंवि [धूपदीपौ] निवेद्य च ॥ ततस्तु ब्राह्मणे दद्याद्गणेशः प्रीयतामिति ॥ कार्यारंभेषु सर्वेषु तस्य विघ्नो न जायते । एतेन विनायकशांत्या विकल्पः । वारणाः सप्तजन्मानि भवंति मदविह्वलाः ॥ इदं चैत्रे श्रावणे कार्तिके वा कार्यमिति हेमाद्रिः ॥ अथ सर्वकर्मस्वग्निनिर्णयः । वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि । पंचयज्ञविधानं च पक्तिं चाऽऽन्वाहिकीं गृही ॥ अत्र मेधातिथिः । गृह्याग्निसाध्यमष्टकापार्वणश्राद्धहोमादि गृह्यकारैरुक्तं गृह्यं नह्यन्यद्

CC-0. In Public Domain. Digitization by eGangotri

गृह्यं नाम किंचित्कर्माऽस्ति। तेन गृह्यकारोक्तमेव लक्षणया गृह्यं मंतव्यं। नाऽपि गृहशब्दः शालावचनः। नहि शालायां किंचित्कर्मोक्तं। यदपि वास्तुकर्मोक्तं तदप्यग्निसंबंधि द्विजानामेवोक्तं। नाऽपि दारवचनः । गृहीत्यनेनैव गतत्वात् । पंचयज्ञोक्तिर्वैश्वदेवमात्रपरा । अन्येषामनग्निसाध्यत्वात् । यद्वा गृह्यकर्मत्वेन तत्राप्यग्निसंबंधासिद्धेर्न तदर्थकमिदं । किंतु पंचयज्ञविधानं च गृही कुर्यादिति विभागः। आन्वाहिकीं वैश्वदेवार्थां नित्यां पक्तिं चाऽग्नौ कुर्यादिति।याज्ञवल्क्योऽपि।कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही।दायकालाऽऽहृते वाऽपि श्रौतं वैतानिकाग्निषु॥ अत्र यद्यपि स्मार्तं स्मृत्युक्तं वैश्वदेवादिकं कर्मेत्येवं विज्ञानेश्वरेणोक्तं । तथापि सामान्यस्य विशेषाऽपेक्षत्वादुपसंहारन्यायेन गृह्यपरत्वमेवेति मेधातिथिः। दृष्टश्च स्मृतावप्युपसंहारः। यथा दिवा संध्यासु कर्णस्थब्रह्मसूत्र इत्यत्र पवित्रं दक्षिणे कर्णे कृत्वेति विशेषपरत्वं। अत्राऽपरार्कोऽपि। स्मार्तं गृह्योक्तं कर्म प्रत्यहं नित्यं स्मार्तं होमपार्वणश्राद्धादि । नह्यन्यत्स्मार्तं पौराणं वा ग्रहयज्ञादि नित्यं प्राप्तं । यदनूद्येत तद्विवाहाग्नौ कुर्वीत । नष्टेऽग्नौ वैवाहिककर्मणैवोत्पाद्यतइति तदुक्तिः। दायः पितृधनं। तत्राऽऽहृते वा नित्यं। कार्यं श्रौतमग्निहोत्रादि वैतानिकेषु गार्हपत्यादिषु कुर्वीत। एतच्च स्मार्तपौराणग्रहयज्ञमहारुद्रशतचंडीव्रतयज्ञादिकर्मणां वैवाहिकश्रौताग्निसंबंधनिवृत्त्यर्थं कल्पसूत्रगृह्यसूत्रप्राप्तमेवाऽनूद्यतइति। आन्वाहिकीं नित्यवैश्वदेवार्थां पक्तिं पाकं च गृह्येऽग्नौ कुर्वीत।अपचन्नेकरात्रेण पुनराधानमर्हतीतिस्मृतेः। मिताक्षरायां लिखितोऽपि। यस्य चाऽग्नौ न क्रियते यस्य चाऽन्नं न दीयते। अभोज्यं तद्भवेदन्नं भुक्त्वा तूपवसेदहः। तेन पुरुषार्थोऽन्नसंस्कारार्थश्च वैश्वदेवो गृह्य एवेति मुख्यः पक्षः। वैश्वदेवे कृतेऽन्नोपघाते पुनः पाको लौकिकाग्नावेव न गृह्ये। तदाहाऽपरार्के बौधायनः। अचोदितेन पाकेन कृतेनोद्धरणेन वा। लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हतीति॥ वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्। वैश्वदेवस्याऽग्नौ जुहोत्यग्नये स्वाहेत्यादिसूत्रे पक्षादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरोडाशकपालमितिवत्तदर्थस्यैव ग्रहणात् । अत एवाऽशौचे वैश्वदेवाऽभावान्न गृह्याग्नौ पाकः । पर्वणि तु वैश्वदेवार्थस्यैव भोजननियमः । पराऽग्निपक्वं नाऽश्नीयात्पर्वणि प्रोषितोऽग्निमानिति केचित् । तत्र मूलं चिंत्यं । अतएवाऽन्यदा लौकिकाऽग्निपक्वस्यापि भोजनं सिद्धं । यत्तु प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् । शेषं महानसे कृत्वा तस्मिन्पाकं समाचरेत् । निष्पन्नेषु च पाकेषु पुनरानीय तं क्षिपेत् ॥ उल्मुकं तु समानीय वैश्वदेवं समाचरेदिति । तद्बह्वृचादीनां पचनाऽग्निविधानादग्नेरायतनाद्बहिर्गमने दोषश्रुतेश्च तद्भिन्नपरं । अन्येषां तु । शालाऽग्नौ तु पचेदन्नं लौकिके वाऽपि नित्यशः । यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयत इति शातातपोक्तेः ॥ प्रवासे यदि कुर्वीत पचनं योऽग्निमान्द्विजः । समारोपे कृते वाऽग्नेर्वैश्वदेवं तु लौकिके ॥ शालाऽग्नौ लौकिके वाऽपि हुतशेषं जले क्षितौ । वैश्वदेवःसदा कार्यः पंचसूनाऽपनुत्तये ॥ इति बैजवापोक्तेर्वा कार्यः । यत्तु यज्ञपार्श्वः । पचनाऽग्नौ पचेदन्नं सूतके मृतकेऽपि च । अपक्त्वा तु वसेद्रात्रिं पुनराधानमर्हतीति । तददृष्टार्थपाकपरमित्येके । तत्वं त्वनाकरमेवेदं । अन्यथा अकृतं हावयेत्स्मार्ते तदभावे कृताकृतमित्यादिविरोधात् । आपस्तंबोऽपि । भार्यादिरग्निर्दायादिर्वातस्मिन् गृह्याणि । आश्वलायनोऽपि ॥ उक्तानि वैतानिकानि गृह्याणि वक्ष्याम इति । यानि कर्माणि वक्ष्यामस्तान्येव गृह्याणीत्यर्थः । अन्यत्तु स्मार्तं पौराणं वा शांतिकपौष्टिकव्रतहोमतुलाग्रहयज्ञमहारुद्रादिलौकिक एवेति सिद्धं । देवयाज्ञिकादयस्तु गृहशब्दो दंपत्योर्वर्तते तयोः फलदं यावत्कर्म ग्रहयज्ञशांतिकव्रतहोमपाकादि स्मार्तं पौराणं वा तत्सर्वं गृह्यमावसथ्यादौ कार्यं । तदुक्तं छंदोगपरिशिष्टे । न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां सामिदाहुतिं । स्वगर्भसत्क्रियार्थाश्च यावन्नाऽसौ प्रजायते ॥ अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः । न हि पित्रा समानीतः पुत्रस्य भवति क्वचिदिति ॥ समिदाहुतिरुपाकर्मणि शिष्यकर्तृका । स्वगर्भसंस्कारार्थाश्च सीमंतादीन्मुक्त्वेत्यनुषंगः । ते तु वचनात्स्वेऽग्नौ जातेष्टिवदित्यर्थः । सदारोऽन्यान्पुनर्दारानुद्वोढुंकारणांऽतरात् । यइच्छेदग्निमान्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुं क होमोऽस्य विधीयते॥स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन। न ह्याहिताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयतइति तत्रैवोक्तेश्चेत्याहुः।तदयुक्तं। यथाह्याधानेनोत्पन्नानां श्रौताग्नीनां गार्हपत्ये हवींषि श्रपयत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्यं पचति पिंडपितृयज्ञेन चरंतीत्यादिश्रुतिभिः कर्मविशेषे विनियोगेन नैराकांक्ष्यान्नाऽन्यत्र स्मार्तकर्मपाकादौ विनियोग इति मीमांसकैः कर्कोपाध्यायैश्चोक्तं। तथा गृह्याग्नेरपि गृह्याणि वक्ष्यामः।भार्यादिरग्निस्तस्मिन्गृह्याणि गृह्यस्थालीपाकानां कर्म।गृह्यं कर्म यथाविधीति कल्पसूत्रमन्वादिभिर्गृह्यकर्मसु विनियोगेन नैराकांक्ष्यात्तत्रैव गृह्यनियमान्नाऽन्यत्र स्मार्तपौराणेषु शांतिकपौष्टिकव्रतादिहोमेषु तीर्थगयादिश्राद्धेषु वा गृह्याग्निप्राप्तिः। किं तु लौकिकाग्निरेव। अन्यथा स्मार्तपौराणकर्मविधीनामपि सिद्धाग्निविधानादाय नैराकांक्ष्यान्न कुत्रापि स्मार्तपौराणेष्वपि श्रौताऽग्निहोत्रादिकर्मस्विव निरग्निद्विजस्त्रीशूद्राणामप्यधिकारः स्यात्। न च अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके। तस्माच्छूद्रः पाकयज्ञैर्यजेताऽव्रतवान्स्वयमित्यादिवचनादेव निषादस्थपतेरिवाऽधिकार इति वाच्यं। शूद्रग्रहणस्य पूर्वोक्तन्यायप्राप्ताऽनुवादेनाऽतंत्रत्वात्। अन्यथाऽनग्निद्विजस्त्रीणामनधिकाराऽऽपत्तेः। अतएव हेमाद्रिविज्ञानेश्वराद्यैर्ग्रहयज्ञविनायकशांत्यादौ लौकिकाग्निरेव सर्वेषामुक्तः। वचनात्त्वन्यत्राऽपि विनियोगः। यथा। हेमाद्रौ मार्कंडेयः। आहिताग्निस्तु जुहुयाद्दक्षिणाऽग्नौ समाहितः। अनाहिताग्निरौपसदे अग्न्यभावे द्विजेऽप्सु वा॥ वायवीये। आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः। अग्न्यर्थं लौकिकं वाऽपि जुहुयात्कर्मसिद्धये॥ इदं सर्वाऽऽधानपरं दर्शे विधुराग्निपरं वा। हेमाद्रौ श्राद्धे प्रजापतिः। औपासनेनाऽन्नसिद्धिरग्नौकरणमेव च। इदं गृह्योक्तदर्शाऽष्टकादिश्राद्धपरमनुवादः। गृह्याऽनुक्ते तीर्थगयादौ तु नाऽग्नौकरणांगत्वेन शांत्यादावाज्यभागवन्न गृह्याग्निः। किंतु लौकिके पाणौ जले वा। तद्यदाऽपां समीपे स्याच्छ्राद्धं ज्ञेयो विधिस्तदेति तत्रैव वायवीयोक्तेः। मिताक्षरायां जाबालोऽपि। आरंभे सर्वकृच्छ्राणां समाप्तौ च विशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतः। आज्येनैव हि शालाग्नौ जुहुयाद्व्याहृतीः पृथक् ॥ स्मृत्यर्थसारेऽपि। गार्ह्यमौपासने कुर्यात्सर्वाधानी तु लौकिके । स्मार्तं च लौकिके कुर्याच्छ्रौतं वैतानिकाग्निषु। अतएव गृह्याग्निं विनाऽपि होमे धर्मप्राप्तिरुक्ता कात्यायनसूत्रे। एष एव विधिर्यत्र क्वचिद्धोम इति। अत्र कर्कः। यत्रक्वचिद्धोमः शांतिकपौष्टिकादिष्वपि । क्वचिच्छब्दः स्वगृह्यव्यतिरेकेणाऽपि यथाऽयं विधिः स्यादिति । यथा दावाग्नौ कुशोप्वादिरिति दृष्टांतेन गृह्याग्निं विनाऽपि पौराणशांतिकपौष्टिकादौ लौकिकाग्निं तंत्रप्राप्तिं चाऽऽह । अन्यत्ताऽपि। गृह्ये परिसमूहनादिप्राप्तिः । यत्र तु लौकिकाग्निस्थापनं तत्रोद्धताऽवोक्षितेऽग्निमुपसमादधीतेत्यादिप्राप्तिरित्याह। तदेतल्लौकिके शांत्यादिहोमं गमयति । अन्यथा तेषु गृह्यनियमेऽन्यत्त लौकिकाग्निप्राप्तिस्तंत्रविधिश्च निर्विषयो व्यर्थ एव स्यात्। बव्हृचसूत्रेऽपि। अथ खलु यत्र क्व च होष्यन्स्यात् ।अत्र वृत्तिः । क्व च ग्रहणाद्गृह्याग्निं विनाऽपि लौकिकेऽग्नौ होमे तंत्रप्राप्तिमाह । यदप्युक्तं गृहशब्दो दंपत्योर्वर्तत इति तदप्ययुक्तं । सर्वनिबंधेषु हि दारवचनः शालावचनो वा गृहशब्द उक्तो नतु दंपतिवाची। तेन गृह्यसूत्रं विना स्मार्तपौराणशांतिकपौष्टिकव्रततुलादिहोमः सर्वः साग्नेरपि लौकिकाग्नावेवेति सिद्धं। अन्यथा तेषां कर्मणां गृह्याग्निप्रयोजकत्वमप्रयोजकत्वं चेति वैरूप्यं स्यात् । यत्तु कातीयपरिशिष्टं पूर्वमुक्तं तत्तापि गृह्योक्तेष्वेव स्वगतफलेष्वग्निनियमो नाऽन्यगतेषु गर्भसंस्कारान्विनेति विवेकः। जातेष्टौ यस्मिन्जाते० पूत एव स इति यत्तच्छब्दाद्याक्तिविशेषोक्तेर्बाधः । कथं च तन्मते जातेष्टिः स्वेऽग्नौ स्यादिति चिंत्यं। तेन देवयाज्ञिकादयः कातीयसूत्तकर्कभाष्यार्थस्याऽज्ञानान्मीमांसान्यायाऽज्ञानाच्च मूर्खा एव। यदप्याथर्वणपरिशिष्टे । महाशांतिविधानेन निर्मथ्याऽग्निं समाहितः। निर्मथ्य हावयेत्तत्र समिधो ब्राह्मणान्बहून्। शतं सहस्रं कोटिं वा विंशतिर्दश वा द्विजाः । जुहुयुः शांतवृक्षस्य समिधो घृतसंयुताः । स्वयं वाऽपि यजेद्ब्रह्मा सवितारं दिने दिन इति ।

CC-0. In Public Domain. Digitization by eGangotri

यच्च सामवेदे गौतमसूत्रे । शांतिपुण्याहस्वस्त्ययननाऽऽयुष्यमंगलसंयुक्ताऽभ्युदयिकानि विद्वेषणसंवननाऽभिचारद्विषद्व्द्धियुक्तानि शालाग्नौ कुर्यादिति। तदपि गृह्यसूत्रोक्तशांत्यादिकर्मपरमेव । अन्यथा पूर्वोक्तविरोधात् । यदपि कर्केण गृह्याग्निं विना श्राद्धमेव नास्तीत्युक्तं । तदपि संवत्सरे संवत्सरे प्रेतायाऽन्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादित्यादि दर्शाऽष्टकाऽऽब्दिकादौ सौत्रविधिनिषेधपरं । नतु स्मार्तविधितीर्थसंक्रांत्यादिश्राद्धपरं । अग्निं विना वृद्धिश्राद्धसपिंडनाद्यभावात्तेन विनाऽग्न्यसिद्धेरन्योन्याऽसिद्ध्या सर्वविप्लवाऽऽपत्तेः । तेन सूत्रोक्तेष्वेव गृह्याग्निनियमो नाऽन्यत्रेति सिद्धं । महारुद्रे परशुरामोऽपि । तस्मिन्कुंडे तु गृह्योक्ता कर्तव्या कुशकंडिका । लौकिकाग्निं समानीय कुंडमध्ये ततो न्यसेदिति। यदपि त्रिकांडमंडनीयं पठंति। इक्षुक्षीरविकारांश्च भ्राष्ट्रभृष्टान्यवांस्तथा । फलमूलानि वाऽश्नीयात्पर्वणि प्रोषितोऽग्निमान्॥ पराग्निपक्वं नाऽश्नीयाद्विहाय गुडगोरसौ । शाकपिण्याकसक्त्वादि आममद्यात्फलादिकं॥ सकृत्पर्वणि सर्पिष्मद्धविष्यं लघुभोजनं। न सायं नोपवासश्च सायं शाकास्तथैक्षवमिति । तदपि निर्मूलं पूर्वापरविरुद्धं मूर्खवंध्रणमात्रमिति संक्षेपः। (अत्र वंध्रणेत्यत्र वंचनेति पाठः साधुः) इति कमलाकरभट्टकृतौ सर्वकर्मस्वग्निनिर्णयः॥ (अथ प्रसंगात् स्मार्ताऽग्निलक्षणमुच्यते । ' गृ० का० भा० अत्राऽग्निनिर्णयमाह भगवान् । स्मार्ताऽग्निर्द्विविधो ज्ञेयो गृह्यः पौरुष इत्यपि । यस्मिन्विवाहं कुरुते सोऽग्निर्गृह्य इति स्मृतः ॥जातकर्मादिसिद्ध्यर्थं यो व्याहृतिभिराहृतः । सोऽग्निः पौरुष इत्युक्तः शालाग्निर्लौकिकस्तथा । शालाग्निर्गृह्यः । लौकिकः पौरुष इति यथाक्रमं संज्ञाद्वयं बोध्यं । गृह्ये गृह्याणि कर्माणि चेतराण्यपि पौरुषे इति कारिकायां । चौलकर्मोपनयनं विवाहः प्रथमस्तथा । व्रतादिस्नानमित्येते लौकिकाऽग्नाविति स्थितिः । गृ० वृ० गृहनिमित्तोऽग्निर्गृह्यः । तत्रभवानिकर्माण्यपि लक्षणयागृह्याणीत्युच्यंते । गृहशब्दो भार्यायां शालायां च वर्तते ।यथा स गृहो गृहमागत इति। अत्र हि पूर्वो गृहश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्दो भार्यावचनः । उत्तरः शालावचनः । येषां भार्यासंयोगादुत्पन्नेऽग्नाविमानि कर्माणि प्रवर्तंते तेषामयं गृहशब्दो भार्यावचनः । येषां तु दायविभागकालेऽग्निरुत्पद्यते तेषां शालावचनः॥ ॥ शां०म० अस्पष्टपापविशेषनिदानकैहिकमात्राऽनिष्टनिवर्त्तकं पापाऽप्रयोजकं वैधं कर्म शांतिकं । क्षयादिहरदानादावतिप्रसंगं वारयितुं निदानकांऽतं । आमुष्मिकाऽनिष्टनिवर्त्तके तं वारयितुमैहिकेति । प्रायश्चित्ते वारयितुं मात्रपदं । प्रायश्चित्तं त्वामुष्मिकाऽनिष्टनिवर्त्तकमपि । अभिचारप्रत्यभिचारादौ वारयितुं पापाऽप्रयोजकमिति । तयोः फलतो हिंसात्वेन तदनुष्ठाने प्रायश्चित्तोक्तेश्च पापप्रयोजकत्वात् । अनिष्टनिवर्त्तकत्वं च शांतिकस्य तन्निदानपापनाशरूपसामग्रीविघटकत्वेन । पुष्टिफलकं वैधं कर्म पौष्टिकं । तत्र परिभाषा मार्कंडेयपुराणे । शिरःस्नातश्च कुर्वीत दैवं पित्र्यमथाऽपि वा । प्राङ्मुखोदमुङ्खो वाऽपि श्मश्रुकर्म च कारयेत् ॥ तत्रैव । देवार्चनादिकर्माणि तथा गुर्वभिवादनं । कुर्वीत सम्यगाचम्य प्रयतोऽपि सदा द्विजः ॥ बृहन्मनुः । प्राणानायम्य कुर्वीत सर्वकर्माणि संयतः । मार्कंडेयः । संकल्प्य विधिवत्कुर्यात्स्नानदानव्रतादिकं । देवलः । मासपक्षतिथीनां च निमित्तानां च सर्वशः । उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेदिति॥ 'दा० क० सर्वश इति व्यापकानां व्याप्यानां । येषामार्यावर्तकाश्यंतर्गृहादीनां कार्तिकपौर्णमास्यादीनां देशानां कालानां च वाक्यांतरैः फलं श्रुतं तेषां सर्वेषामुल्लेखः कार्य इत्यर्थः । अतएव प्रभवादौ तिलादिदानोक्तेस्तेषामपि निर्देशः । मासादीनां तु निमित्तत्वाऽभावेऽपि । अन्यथा वैयर्थ्यात् । ' मासपक्षतिथयः प्रयोगाऽधिकरणभूताः सर्वेऽपि । यत्त्वनेकदिनसाध्ये कर्मणि आद्य दिने संकल्पकालीनां तिथिमधिकरणत्वेनोल्लिख्य ज्योतिष्टोमेनाऽहं यक्ष्ये इत्यादि संकल्पवाक्यं प्रयुंजते यायजूकाः । तत्तु पदानामन्वयाऽयोगादनादर्त्तव्यं । यदपि केचित्तेन तेन रूपेण प्रयोगांऽगतया विहितानामेव मासादीनामुल्लेख इति । तदपि न । मा-

CC-0. In Public Domain. Digitization by eGangotri

नाऽभावात् । अविहितमासादिक आधानादौ मासपक्षतिथीनां ज्योतिष्टोम एकादशीव्रतादौ च मासपक्षयोरुल्लेखाऽभावप्रसंगाच्च । अतो ज्योतिष्टोमादावेकादश्यादिपूर्णिमांतानामुल्लेखः । एवमन्यत्राऽपीति दिक् । अत्र च शूद्राणामप्यधिकारः । श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत इत्यादिवाक्येषु श्रावणस्य वृत्त्यर्थतया रागप्राप्तत्वेन तद्विधौ वाक्यवैयर्थ्यापत्तेर्णिजविवक्षया श्रवणविधिना तेषां पुराणश्रवणाऽधिकारेण ज्ञानसद्भावात् । वैदिकमंत्राऽभावे कथं तद्वत्सु कर्मस्वधिकार इति चेच्छृणु । धर्मेप्सवस्तु धर्मज्ञाः सतां धर्ममनुष्ठिताः । मंत्रवर्जं न दुष्यंति प्रशंसां प्राप्नुवंति चेति मनुना मंत्रवर्जनात् । यत्तु मेधातिथिर्मंत्रवर्जितेषूपवासादिष्वाधिकारार्थमिदं न तु समंत्रकेषु मंत्रपर्युदासेनाऽधिकारार्थमिति । तन्न । अमंत्रकोपवासादिषु श्रवणविधिनैवाऽधिकारसिद्धावेतद्वाक्याऽऽनर्थक्यापत्तेः । अतएव मोक्षधर्मेष्वपि । मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीं क्रियामिति । अत्रैतद्वाक्यस्य पौराणत्वेन तत्सामान्योपस्थितपौराणक्रियोद्देशेन मंत्रवर्जनविधौ पौष्टिकीमित्युद्देश्यविशेषणत्वेनाऽविवक्षितं । एवं च मनुवाक्यस्यैतस्य चैकैव श्रुतिर्मूलत्वेन कल्प्यते । गृह्यपरिशिष्टे । आदौ विनायकः पूज्य अंते तु कुलदेवताः । शौनकः । पुण्याहवाचनविधिं वक्ष्यामोऽथ यथाविधि । प्रयोक्तुः कर्मणामादावंते चोदयसिद्धये ॥ कर्मप्रदीपे । कर्मादिषु तु सर्वत्र मातरः सगणाऽधिपाः । पूजनीयाः प्रयत्नेन पूजिताः पूजयंति ताः ॥ प्रतिमासु च सिद्धासु लिखित्वा वा पटादिषु । अपि वाऽक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैः ॥ कुड्यलग्ना वसोर्धाराः सप्त धारा घृतेन तु । कारयेत्पंच धारा वा नाऽतिनीचा न चोच्छ्रिताः ॥ आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहितः । षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेदिति ॥ षड्भ्य इति छंदोगकातीयपरं । अन्येषां तु नवदैवतं । अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि । अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सहेति वचनात् ॥ सर्वत्राऽऽचार्यो यजमानसमशाखीय एव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथाऽऽचार्यस्य यजमानशाखाऽध्ययनाऽभावे तच्छाखीयपदार्थानां निर्वाह एव न स्यात् । स्वशाखयाऽनुष्ठाने तु वैगुण्यं । तथा च पराशरः । यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् । अप्रमाणमृषिं कृत्वा सोंऽधे तमसि मज्जतीति ॥ ऋत्विजस्तु भिन्नशाखीया अपि । सर्वेऽप्याचार्यब्रह्मर्त्विजो मधुपर्केण पूज्याः । ऋत्विजो वृत्वा मधुपर्कमाहरेदित्याश्वलायनोक्तेः । संपूज्य मधुपर्केण ऋत्विजः कर्मकारयेदिति विश्वामित्रोक्तेश्च । य ऋत्विक् यच्छाखीयं कर्म करोति तच्छाखोक्तेन प्रकारेण कांडाऽनुसमयेन मधुपर्कं कुर्वीति यायजूकाः केचित् । परे यजमानशाखोक्तेन । यजमानेन स्वशाखीया ऋत्विग्भिश्च स्वस्वशाखीयाः पदार्था अनेकेष्वृत्विक्षु पदार्थाऽनुसमयेनाऽनुष्ठेया इति तु युक्तं । तत्तच्छाखाऽध्ययनजन्यज्ञानस्यांऽगत्वादेकप्रयोगविधिपरिग्रहाच्च । ऋत्विग्भ्यो देयमुक्तं लिंगपुराणे । वस्त्रयुग्मं तथाऽप्पूरं केयूरं कर्णभूषणं । अंगुलीभूषणं चैव मणिबंधस्य भूषणं ॥ कंठाऽऽभरणयुक्तानि प्रारंभे धर्मकर्मणः । पुरोहिताय दत्वाऽथ ऋत्विग्भ्यश्चाऽपि दापयेदिति ॥ आपः पूर्यतेऽस्मिन्नित्यप्पूरं जलपात्रं । मत्स्यपुराणे । यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः । पश्चिमद्वारमाश्रित्य प्रविशेद्यागमंडपं ॥ संग्रहे । समंततश्च सिद्धार्थान् किरेद्राक्षोघ्नमंत्रतः । प्रतिष्ठासारे । सर्वतः पंचगव्येन प्रोक्षयेद्यागमंडपं । आपोहिष्ठतृचेनैव ततः स्वस्त्ययनं जपेत् ॥ तत्र हेमाद्रौ वास्तुपूजाऽप्युक्ता । स मंडपं प्रविश्याऽथ तोरणादि प्रपूज्य च । वास्तुयागं ततः कुर्यात्प्रासादे मंडपेऽथवा ॥ वास्तुमंडलं च नैर्ऋत्यां । नैर्ऋत्यां दिशि वास्त्वीशं ब्रह्माद्यांश्च समर्चयेदिति शारदोक्तेः । वास्तुहोमस्तु भिन्नस्थंडिले कार्यः । मुख्याऽऽयतने वा । तत्राऽप्यादौ पृथक्प्रयोगतया प्रधानसमतंत्रतया वा । शारदातिलके तु होम एव नोक्तः । सर्वं च शांतिकपौष्टिकमहादानादि लौकिकाग्नौ कार्यं । श्रौतस्मार्ताग्निप्राप्तौ मानाऽभावात् । यत्तु मनुः । वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि । पंचयज्ञविधानं च पक्तिं चाऽऽन्वाहिकीं गृहीति तत्स्पष्टं गृह्योक्तपरं । वैवाहिक इति च दारदायाद्यकालीनयोरप्युपलक्षकं ।

CC-0. In Public Domain. Digitization by eGangotri

तत्सजातीयसंस्कारस्यैव साधनताऽवच्छेदकत्वात् । यदपि याज्ञवल्क्यः । स्मार्त्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाऽऽहृते वाऽपि श्रौतं वैतानिकाग्निष्विति ॥ तत्रापि सामान्यं स्मार्त्तपदं गार्ह्य उपसंह्रियते । एतेनाऽऽहवनीयादयो निरस्ताः । यदाहवनीये जुह्वतीत्यादावश्वप्रतिग्रहेष्टौ वैदिकत्वसाम्येन वैदिकाऽश्वदानप्रतिग्रहोपस्थितिवद्वैदिकहोमोपस्थितेश्च । यद्यप्यत्र गार्ह्ये स्मार्त्त एव श्रौतं च वैतानिक एवेति नियमेन स्मृत्युक्तेऽपि कर्मणि श्रौतस्मार्त्ताग्न्योः प्राप्तिः संभाव्यते । तथापि न साऽऽहवनीयाऽऽवसथ्यत्वरूपेण । किंतु लौकिकसाधारणज्वलनत्वेनैव । अवैधाऽऽहुतिप्रक्षेपे आहवनीयत्वादिविघाताऽऽपत्तेश्च । अतएव सर्वाधानिन औपासनाऽभावाद्वैतानिकाऽप्राप्तेश्च । तेन गार्ह्ये लौकिक एव कार्यं । अमुमेव सर्वमर्थं स्मृत्यर्थसारकृदपि संजग्राह । गार्ह्यमौपासने कुर्यात् सर्वाधानी तु लौकिके । स्मार्तं च लौकिके कुर्याच्छ्रौतं वैतानिकाग्निष्विति ॥ यत्तु नारायणवृत्तौ सर्वाधानिना सीमंतोन्नयनादिगार्ह्यकर्मार्थं स्मार्ताग्निरुत्पादनीय इति । तत्र मूलं बौधायनसूत्रं । यदपि विज्ञानेश्वरो ग्रहयज्ञ औपासने इत्यूचे । तत्र मूलमन्वेष्यं । कातीयपरं वा तत् । तत्सूत्रे तथाऽऽम्नानात् । अतएव स विनायकशांतौ लौकिकाग्निमेवाऽवोचत् । अतः स्मृत्युक्तं लौकिक एवेति दिक् । कृत्यरत्नाकरे । शुभपात्रं तु कांस्यं स्यात्तेनाऽग्निं प्रणयेद्बुधः । तस्याऽभावे शरावेण नवेनाऽभिमुखं च तं ॥ गोभिलीये । आहूय चैव होतव्यो यो यत्र विहितोऽनलः । तथा । लक्षहोमे च वन्हिः स्यात्कोटिहोमे हुताशनः । पूर्णाहुत्यां मृडो नाम शांतिके वरदः सदा ॥ अन्येषु संस्कारादिकर्मस्वग्नेर्नामविशेषाः प्रयोगरत्ने ज्ञेयाः । होमे विशेषो गोभिलीये । न मुक्तकेशो जुहुयान्नाऽनिपातितजानुकः । उत्तानेनैव हस्तेन अंगुष्ठाऽग्रेण पीडितं ॥ संहतांऽगुलिपाणिस्तु वाग्यतो जुहुयाद्धविरिति । बहुकर्तृकहोमे प्रत्याहुति त्यागाऽशक्तेर्होमारंभ एव देवताश्चतुर्थ्यंतेनोद्दिश्य सर्वाणि द्रव्याणि त्यजेदितिहेमाद्र्यादयः ॥ वि० पा० दिशामनुक्तौ प्राची स्यात्तथा हस्तस्तु दक्षिणः । शुभे काले शुभे देशे शांतिकर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाचरेत् ॥ अप० शांतिः फलदानोन्मुखदुरितनिवारणं ।' नैमित्तिकविशेषेण विहितं त्वन्यथाऽपि वा । यथा मूलादिका शांतिर्यथा षष्ठ्यादिपूजनं । प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन । यतस्तदन्यथाभूतं तदारभ्य पुनश्चरेत् । ल० शौ० । उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि । तत्र मुख्यमनादृत्य गौणेनैव समापयेत् ॥ अंतरेणाऽऽज्यभागौ तु अर्वाक् स्विष्टकृतोऽपि च । प्रधानं तत्तु विज्ञेयमंगानि चेतराणि तु ॥, प्रधानस्याऽक्रिया यत्र सांऽगं तत्क्रियते पुनः । तदंगस्याऽक्रियायां तु नाऽऽवृत्तिः सर्वकर्मणः ॥ यज्ञोपवीतिना कार्यं प्रागुदक्संस्थता तथा । शुद्धेन कर्म कर्त्तव्यं विष्णुस्मरणपूर्वकं ॥ ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं । निर्णेजकाऽक्षालितं यदहतं वास उच्यते ॥ दे० । स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता । एकवासा न भुंजीत न कुर्याद्देवतार्चनं । नचाऽर्चयेद्द्विजानग्नौ कुर्यादेवंविधो नरः '॥ दा० क० ब्रह्मांडे । नाऽधिकारी मुक्तकच्छो मुक्तचूडस्तथैवच । दाने प्रतिग्रहे यज्ञे ब्रह्मयज्ञादिकर्मसु ॥ सोत्तरीयस्ततः कुर्यात्सर्वकर्माणि भारत । अधौते कारुधौते वा परिदध्यान्न वाससी ॥ आपस्तंबः । आर्द्रवासास्तु यः कुर्याज्जपहोमप्रतिग्रहान् । सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतं ॥ वसिष्ठः । यज्जले शुष्कवस्त्रेण बहिश्चैवाऽऽर्द्रवाससा । जपो होमस्तथा दानं तत्सर्वं निष्फलं भवेत् ॥ विष्णुपुराणे । होमे देवार्चनाद्यासु क्रियास्वाचमने तथा । नैकवस्त्रः प्रवर्तेत द्विजवाचनके जपे ॥ शातातपः । सव्यादंसात्परिभ्रष्टकटिदेशधृतांऽबरः । एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च वर्जयेत् ॥ वृद्धयाज्ञवल्क्यः । परिधानाद्बहिः कच्छा निबद्धा ह्यासुरी भवेत् । धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥ बहिर्निर्गतकच्छ इत्यर्थः । दानमाचमनं होमं भोजनं देवतार्चनं । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं । आसनारूढपादस्तु जान्वोर्वा जंघयोस्तथा । कृताऽवसक्थिको यश्च प्रौढपादः स उच्यते ॥ ल० शौ० । अभिषेकं मूर्ध्नि होमं मांगल्यं स्वस्तिवाचनं । आशीर्वादान् क्रतौ प्रैषानूर्ध्वस्थश्चैव कारयेत् ॥ गृहस्थस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षडग्निः स्यात्पंचाग्निश्चतुराग्निकः । स्यात् त्र्यग्निरथवैकाग्निर्नाऽग्निहीनः कथंचन ॥' सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः शुभा । अभिषेके वामभागे संस्कार्यश्चैव दक्षिणे ॥ आर्षं छंदो दैवतं च विनियोगस्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विपश्चिता ॥ अविदित्वा तु यः कुर्याद्याजनाऽध्यापनं जपं । यदन्यत्कुरुते किंचित्तत्सर्वं निष्फलं भवेत् [होममंतर्जलादीनि तस्य चाऽल्पं फलं भवेत्] ॥ अग्निप्रतिष्ठाकर्मादि स्वशाखोक्तं समाचरेत् । विशेषविहितं यत्तु तत्सर्वेषामपीष्यते ॥ यन्नाऽऽम्नातं स्वशाखायां पारक्यमविरोधि यत् ।विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि-कर्मवत् ॥ पुण्याहवाचनं मातृस्थापनं श्राद्धमेव च । शांतिकर्माऽगमुद्दिष्टं शौनकस्य वचो यथा ॥ स्वस्तिवाचनमेवैके ब्रूयुः शांतिककर्मणि । वृद्धिश्राद्धं न कर्त्तव्यं बौधायनवचो यथा ॥ शाखांतरे स्वशाखायां यच्छांत्यादिकमीरितं । स्वशाखोक्तं तदा कार्यं परोक्तं न समाचरेत् ॥ स्वशाखाश्रयमुत्सृज्य परशाखोक्तमाचरन् । शाखारंडः स विज्ञेयः सर्वकर्मबहिष्कृतः ॥ ल० आ० । कर्मणां याजुषादीनां स्वस्वशाखा न विद्यते । ऋक्शाखाविहितं कर्म समानं सर्वशाखिनां ॥ बह्वृचानां तु यत्कर्म यदि स्याद-न्यशाखया । पुनश्चैवाऽपि तत्कर्म कुर्याद्बह्वृचशाखया ॥ शौ० का० । इदं कार्यमनेनेति न क्वचिद्दृश्यते विधिः । लिंगादेवेदमर्थत्वं येषां ते मंत्रसंज्ञकाः । प्राजापत्य उपांशुः स्यान्मंत्रः सावित्र एव च । कात्या० । कृतमोदनसक्त्वादि तंडुलादि कृताऽकृतं । व्रीह्यादि चाऽकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ॥ व्र० रा० मदनरत्ने ब्राह्मे । यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि यत् । यवाऽभावे तु गोधूमा व्रीह्यभावे च तंडुलाः ॥ दा० क्र० विष्णुधर्मे । दध्यलाभे पयः कार्यं मध्वलाभे तथा गुडः । घृतप्रातिनिधिं कुर्यात्पयो वा दधि वा नृप ॥ पैठीनसिः । सर्वाऽलाभे यवः प्रतिनिधिः । मैत्रपरिशिष्टे । घृतमन्यार्थे प्रतिनिधिस्तदलाभे दधि पयो वा ' । खंडत्रयं तु मूलानां फलानां स्वप्रमाणतः । ग्रासमात्रम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाऽन्नस्य पंच सूत्राणि होमयेत् ॥ पनसस्य फलस्याऽथ शतं भागाः प्रकीर्तिताः । शतं तथैव भागाश्च कूष्मांडस्य प्रकीर्तिताः ॥ नारीकेलस्य विद्वद्भिर्भागाः प्रोक्तास्तु षोडश । तावंत एव भागाः स्युः कदलस्य क्रतूत्तमे ॥ खर्जूरीफलभागाश्च पंच प्रोक्ता मनीषिभिः । पत्रमेकैकमेव स्यात्तथा पुष्पं च हूयते ॥ तिला अशीतिसंख्याकास्तथा षष्टिर्यवाः स्मृताः । व्रीहयश्च शतं ग्राह्या गोधूमाः षष्टिसंमिताः ॥ प्रियंगवश्च विज्ञेया बिडालपदमात्रकाः । तथैव तंडुलाः प्रोक्ता होमलक्षणकोविदैः ॥ फलानि बदरादीनि पंच पंचैव हावयेत् । आदिशब्देन बदरमात्राण्येव । इक्षवः पर्वमात्राश्च पल्लवाः कोमलाः स्मृताः ॥ शर्करा च गुडश्चैव बिडालपदमात्रकः । अतिसूक्ष्माणि बीजानि फलान्यपि तथैव च ॥ यज्ञकृद्यज्ञसिद्ध्यर्थं वल्लमात्राणि हावयेत् । चतुर्धा बीजपूराणि दाडिमानि तथैव च ॥ कंदास्त्वेकैकशः प्रोक्ता आर्द्रमंकुरशः शुभं । कंदेष्वपि विशेषात्तु सूरणो दशधा भवेत् ॥ जंबीराऽऽमलकद्राक्षास्तथा भल्लातकाः कणाः । अक्षाऽभयाऽम्रउर्वाद्याः प्रोक्ता ह्येकैकशो यजौ ॥ दूर्वास्तिस्रश्च होतव्याः समिधस्त्वेकिकाः स्मृताः । आज्यं च पृषदाज्यं च दधि दुग्धं तथैव च ॥ दधिमिश्रितमाज्यं पृषदाज्यं । स्रुववक्त्रप्रमाणं तु होतव्यं यज्ञकोविदैः । एवं बृहस्पतेरुक्तिरथ मुद्रा निगद्यते ॥ मयूरी कुक्कुटी हंसी सूकरी च मृगी तथा । पंच मुद्रा विजानीयाद्धौम्यद्रव्यग्रहे बुधः ॥ न्युब्जेन पाणिना द्रव्यं तर्जनीरहितेन यत् । आदाय हूयते विप्रैर्मयूरीं तां विदुर्बुधाः ॥ अंगुष्ठयंत्रिताः सर्वा अंगुल्योत्तानलक्षिताः । हवनं क्रियते ताभिः कुक्कुरी सा प्रकीर्त्तिता ॥ विकनिष्ठा तु हंसी स्यान्मुकुलाऽऽभा च सूकरी । मध्यमाऽनामिकांऽगुष्ठैर्मृगी सैवोपलक्षिता ॥ फलमूलयजौ श्रेष्ठा मुद्रा ज्ञेया शिखंडिनी । जारणे मारणे तद्वत् कुक्कुटी परिकीर्तिता ॥ वश्योच्चाटनपूर्वाणां कर्मणां सूकरी मता । शांतिके पौष्टिके कार्ये मृगी हंसी प्रशस्यते ॥ कुकुटी पत्रपुष्पाणां शालिहोमे तु सूकरी । यवानां च तिलानां च हंसी प्रोक्ता मनीषिभिः ॥ या यत्र विहिता मुद्रा

CC-0. In Public Domain. Digitization by eGangotri

तया तत्र तु होमयेत् । अन्यथा जुहुयाद्यस्तु न कर्मफलभाग्भवेत् ॥ ल० शौ० । जुह्वतामृत्विजामग्नौ बहिः पतति यद्धविः । स एष वारुणो भागस्तस्मादप्सु विनिक्षिपेत् ॥ हूयमाने हविर्यज्ञे यद्धविः स्रंसते बहिः। द्रप्सश्चस्कंदमंत्रेण तदग्नौ निक्षिपेत्पुनः ॥ त्रि० मा० । अग्रे धृतो विनाशाय धृतो मध्ये प्रजाक्षयः । मूले धृतस्तु होतुश्च मृतिं दद्यात्स्रुवो ध्रुवं ॥ अग्रान्मध्याच्च मध्ये तु मूलान्मध्याच्च मध्यतः । स्रुवः प्रधार्यो विद्वद्भिः सर्वकार्यार्थसिद्धये) ॥ अथ सर्वशांतिप्रकृतित्वात् ग्रहयज्ञ उच्यते। " बृ० प० । स्मृत्युक्तमंत्रैर्विधिवत्प्रयुक्तमित्यद्रिजानंदनपूजनं च । कृत्वांऽतरायान्विनिहत्य सर्वान् कुर्यादथाऽतो ग्रहयागमेतं ॥ शां० म० प्रयोगपारिजाते उत्पलपरिमलः । कार्याऽऽरंभेषु सर्वेषु प्रतिष्ठास्वध्वरेषु च । नववेश्मप्रवेशे च गर्भाधानादिकर्मसु ॥ आरोग्यस्नानसमये संक्रांतौ रोगसंभवे । अभिचारे च यः कुर्याद् ग्रहपूजां विधानतः ॥ सोऽभीष्टफलमाप्नोति निर्विघ्नेन न संशयः । ,, स्कंदयाज्ञवल्क्यौ । श्रीकामः शांतिकामोवा ग्रहयज्ञं समाचरेत् । वृष्ट्यायुःपुष्टिकामो वा तथैवाऽभिचरन्नपि॥ (अदृष्टोपायेन परपीडा अभिचारस्तत्कामश्चेत्यर्थः) स चतुर्धा । केवलोऽयुतहोमो लक्षहोमः कोटिहोमश्चेति । आद्यो याज्ञवल्क्याद्यैरुक्तः । अन्ये मात्स्ये उक्ताः । ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिचोदितः । प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परं ॥ तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः । ते च द्वेधा । नैमित्तिकाः काम्याश्च । तद्देशस्तत्रैव । गृहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः । रुद्राऽऽयतनभूमौ वा चतुरस्रमुदक्प्लवं ॥(उत्तरे निम्नं)॥ दशहस्तमथाऽष्टौ वा हस्तान्कुर्याद्विधानतः । तस्य द्वाराणि चत्वारि कर्तव्यानि विचक्षणैः ॥ मंत्रमुक्तावल्यां । चतुरस्राश्चतुर्द्वारा अष्टहस्तादितस्त्रयः । चतुर्विंशतिहस्तांऽता हीनमध्योत्तमाः क्रमात् ॥ यद्वा द्वादशहस्ताद्या द्विहस्ताद् वृद्धितो नव । अष्टाविंशतिपर्यंताः कैश्चिदुक्ता मनीषिभिः ॥ अग्निपुराणेऽप्यत्र । अयं मंडपः काम्ये नित्यो न नैमित्तिकादौ । नित्यं नैमित्तिकं हित्वा सर्वमन्यत्समं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डपमिति शारदातिलकात् । कुंडमंडपप्रकारोऽस्मत्पितृकृतप्रयोगदीपिकायां मत्कृते दानकमलाकरे च ज्ञेयः । स्कांदे । नवग्रहमखे कुंडं हस्तमात्रं समं भवेत् । “ म० म० समं चतसृष्वपि दिक्षु हस्तप्रमाणं ” चतुरस्रमधोहस्तं योनिवक्रं समेखलं । “ शां० म० योनिरेव वक्रं यस्य तत् । पुत्रादिकामनायां तु योन्याद्याकारा अपि भवंति ” चतुरंगुलविस्तारा मेखला तद्वदुच्छ्रिता । “ शां० म० अत्र विशेषोपदेशादेकैव मेखला । म० म० त्रिमेखलं वा कुर्वीत ” मानहीनाऽधिकं कुंडमनेकभयदं स्मृतं ॥ “ ल० शौ० गृहस्यैशानदिग्भागे पूर्वे वा चोत्तरेऽथवा । तत्र कुंडं प्रकर्तव्यं चतुरस्रं कराऽवधि ॥ शते शताऽर्धके होमे मुष्ट्यरत्निप्रमाणतः । सहस्राऽयुतहोमे तु हस्तं हस्तद्वयं मतं ॥ त्रिमेखलं सहस्रे तु अथवा चैकमेखलं ।” योनिलक्षणं मात्स्ये । वितस्तिमात्रा योनिः स्यात्षट्सप्तांऽगुलविस्तृता । “ म० म० वितस्तिमात्रमित्येतच्च योनेर्दैर्घ्यं । षड्वा सप्त वेति विस्तारे विकल्पः । शां० सा० वितस्तिशब्दः कुंडार्धपरः । ” कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांऽगुलोच्छ्रिता ॥ गजोष्ठसदृशी तद्वदायता छिद्रसंयुता । मेखलोपरि सर्वत्र अश्वत्थदलसंनिभा ॥ कुंडाऽभावे स्थंडिलं वा कार्यं । नित्यं नैमित्तिकं होमं स्थंडिले वा समाचरेदिति शारदातिलकात् । कुंडमेवंविधं न स्यात्स्थंडिलं वा समाश्रयेदिति प्रपंचसाराच्च। स्कांदे । तस्य चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं । तस्य कुंडस्य स्थंडिलं वेदी । त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रायसंमितं ॥ व्द्यंगुलोच्छ्रायवान् वप्रः प्रथमः समुदाहृतः । त्र्यंगुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि ॥ (वप्रो मेखला) द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः । “ शां० म० वेद्यां विशेषमाह गोभिलः । कुंडस्य प्रागुदीच्यां वा प्राच्यामुत्तरतोऽपि वा । चतुरस्रं चतुर्द्वारं कर्तव्यं ग्रहपीठकं ॥ श्रीकामः पूर्वतः कुर्यात् पुष्ट्यर्थं दक्षिणेन तु । पश्चाद्द्विजन्मसिद्ध्यर्थं शांत्यर्थं चोत्तरेण तु ॥ ऐशान्यां सर्वकामार्थमाग्नेय्यामभिचारके । नैर्ऋत्यां पुत्रलाभाय पुष्ट्यर्थं वायवेन त्विति ॥ वेदी तु

Nepal Sanskrit University, Beljhundi Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थंडिलपक्षेऽपि कार्या । वसिष्ठः । लिखेदष्टदलं पद्मं वेदिकोपरि तंडुलैः । ल० शौ० । कुर्यादष्टदलं पद्मं वेद्यां शुक्लपटेऽहते । ” वेद्यां संभवे सर्वतोभद्रं कार्यं । मंडलं सर्वतो भद्रमेतत्साधारणं स्मृतमिति शारदातिलकात् । नवग्रहमखे कुर्यादृत्विजश्चतुरः शुभान् । अथवा चैकमभ्यर्चेद्विधिना ब्रह्मणा सह ॥ मात्स्ये । नवग्रहमखे विप्राश्चत्वारो वेदवादिनः । “ शां० सा० चतुः पक्षे ब्रह्मा आचार्यो द्वौ च ऋत्विजावित्येवं व्यवस्थेति हेमाद्रिः । ” अथ वा ऋत्विजौ शांतौ द्वावेव श्रुतिकोविदौ ॥ कार्यावयुतहोमे तु न प्रसज्जेत विस्तरे । “ शां० सा० । एकमप्यर्चयेद्भक्त्या ब्राह्मणं वेदपारगं । दक्षिणाभिः प्रयत्नेन न बहूनल्पवित्तवान् ॥ अनेनाऽऽचार्यमात्रकर्तृकः प्रयोग उक्तः । ल० शौ० । आचार्यश्चाऽत्र कर्तव्यः सर्वज्ञः शुभलक्षणः । ऋत्विजोऽष्टौ च चत्वारो द्वावप्येकं विदुर्बुधाः ॥ वि० मा० यजमानः शुचिः स्नातः श्रद्धायुक्तो जितेंद्रियः । पादशौचाऽर्घ्यवस्त्राद्यैराचार्यादींस्ततोऽर्चयेत् ॥ अस्य यागस्य निष्पत्तौ० ॥ इति संप्रार्थ्य विप्रांस्तान् दद्यात्पूगीफलं करे । आचार्यत्वे वृतोऽसीति ब्रह्मत्वे च वृतोऽस्यथ ॥ ल० शौ० । आदित्यादिग्रहमखमहं कुर्वेऽत्र कर्मणि । ऋग्वेदाऽध्यायकर्माणमाचार्यं त्वामहं वृणे ॥ एवमेवेतरान्व्यस्तान् समस्तान्वा तदूह्य च । अस्य यागस्य० ॥ इत्युक्त्वोपविशेत्तत्र यावत्कर्म समाप्यते ।” हेमाद्रौ विश्वामित्रः । संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत् । अन्यथा विफलं कर्म भवतीह न संशयः ॥ स च तत्तच्छाखया कार्यः । अर्च्यशाखया मधुपर्क इति तत्रैव स्मृतेः । “ शां० सा० मंत्रवद्वरण एव मधुपर्क इति केचित् । मधुपर्कस्य वरणांऽगत्वाद्यत्र वरणं तत्र मधुपर्क इति वृत्तिकृत् । वस्तुतस्तु ऋत्विजो वृत्वा मधुपर्कमाहरेदित्यत्र क्रममात्रविधानान्मधुपर्कस्य न वरणांऽगत्वं किंतूभयोर्ऋत्विगंगत्वं । तेन स्मार्ते मंत्रवद्वरणाऽभावेऽपि ऋत्विक्सत्वान्मधुपर्को भवति।तेनाऽत्र वरणोत्तरमाशौचादिपाते न ऋत्विक्परावृत्तिरिति युक्तं ।” मात्स्ये ।पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनं । अग्निप्रणयनं कृत्वा वेद्यामावाहयेत्सुरान् ॥ देवतानां ततः स्थाप्या विंशतिर्द्वादशाऽधिका । आदित्याभिमुखाः सर्वे साऽधिप्रत्यधिदेवताः॥ " म० म० स्थापनीया मुनिश्रेष्ठ नांऽतरेण पराङ्मुखाः । नांतरेणेति । आदित्यस्याऽन्यस्य च स्थापितग्रहस्य मध्येऽन्यो ग्रहो न स्थापनीय इत्यर्थः । न च पराङ्मुखाः स्थापनीयाः " प्रतिमा आह याज्ञवल्क्यः । ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ । रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात् ॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा । (सूर्यादीनां मूर्तयस्ताम्रादिभिर्यथाक्रमं कार्याः । तदलाभे स्ववर्णैर्वर्णकैः पटे लेख्या मंडलकेषु वा गंधैरक्तचंनादिभिर्यथावर्णेन लेख्या इत्यन्वयः) " गृ० प० सुवर्णमेकमेव वा सर्वेषां । शां० म० वसिष्ठः । यथारुचिप्रमाणेन प्रतिमाः कल्पयेत्सुधीः । " मात्स्ये । पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताऽश्वः सप्तरज्जुश्च द्विभुजः स्यात्सदा रविः ॥१॥ श्वेतः श्वेतांऽवरधरो दशाऽश्वः श्वेतभूषणः । गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥२॥ रक्तमाल्यांऽबरधरः शक्तिशूलगदाधरः । चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥३॥ पीतमाल्यांऽबरधरः कर्णिकारसमद्युतिः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥४॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ । दंडिनौ वरदौ कार्यौ साऽक्षसूत्रकमंडलू ॥ ५ ॥६॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः । बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥७॥ करालवदनः खड्गचर्मशूली वरप्रदः । नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते ॥८॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताऽऽननाः । गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥९॥ सर्वे किरीटिनः कार्या ग्रहा लोकहिताऽऽवहाः । स्वांऽगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा ॥ " दा० क० स्वांऽगुलं प्रतिमालब्धांऽगुलं म० म० नवग्रहसाधारणधर्मान्पादत्रयेण चतुर्थचरणेन केतुसंख्यां चाऽऽह । सर्वे किरी० । अंगुलेनो० ॥ शतमिति केतूनामानंत्यप्रदर्शनार्थं नतु नियमार्थं । पूजायां त्वेकैव मूर्तिः । शिष्टाचारात् । " स्कांदे जन्म भूर्गोत्रमग्निश्च वर्णस्थानमुखानि च । योऽज्ञात्वा कुरुते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांतिं ग्रहास्तेनाऽवमानिताः ॥ " शां० म० तत्र वर्णजन्मनी आह दामोदरीये वृद्धपराशरः । रक्तः कश्यपजो भानुः शुक्लो ब्रह्मसुतः शशी । रक्तो रुद्रसुतो भौमः पीतः सोमसुतो बुधः ॥ पीतो ब्राह्मः सुराचार्यः शुक्लः शुक्रो भृगूद्वहः । कृष्णः शनी रवेः पुत्रः कृष्णो राहुः प्रजापतेः ॥ कृष्णः केतुः कृशानूत्थः कृष्णाः पापास्त्रयोऽप्यमी । " उत्पन्नोऽर्कः कलिंगेषु यमुनायां च चंद्रमाः । अंगारकस्त्ववंत्यां च मगधायां हिमांशुजः ॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा । शनैश्चरस्तु सौराष्ट्रे राहुर्वै राठिनापुरे ॥ अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः । आदित्यः काश्यपे गोत्रे आत्रेयश्चंद्रमा भवेत् ॥ भारद्वाजो भवेद्भौमस्तथाऽऽत्रेयश्च सोमजः । गुरुश्चैवांऽगिरोगोत्रः शुक्रो वै भार्गवस्तथा ॥ शनिः काश्यप एवाऽथ राहुः पैठीनसिस्तथा । केतवो जैमिनीयाश्च ग्रहाग्निस्तदनंतरं ॥ आदित्ये पिंगलो नाम पिंगलः सोम उच्यते । धूमकेतुस्तथा भौमे जठराग्निर्बुधे स्मृतः ॥ गुरौ चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहुकेत्वोर्हुताशनः ॥ भास्करांऽगारकौ रक्तौ शुक्लौ शुक्रनिशाकरौ । सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ ॥ कृष्णं शनैश्चरं विद्याद्राहुं चित्राश्च केतवः । गोभिलेन तु । ब्राह्मणौ भार्गवाऽचार्यौ क्षत्रियावर्कलोहितौ । वैश्यौ सोमबुधौ ज्ञेयौ शेषान् शूद्रान्विनिर्दिशेदिति वर्णा उक्ताः । स्कांदे । मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे । दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु ॥ उत्तरेण गुरुं विद्यात्पूर्वेणैव तु भार्गवं । (सप्तम्यर्थे तृतीया) पश्चिमे तु शनिं विद्याद्राहुं दक्षिणपश्चिमे ॥ पश्चिमोत्तरतः केतून् स्थापयेच्छुक्लतंडुलैः । " म० म० शुक्लतंडुलैर्ग्रहस्थापनप्रदेशं स्थंडिलं वेदिं वा परिपूर्य तेषामुपरि तत्तद्वर्णतंडुलैरुपलक्षितेषु प्रदेशेष्वादित्यादीन्ग्रहान् स्वस्वाऽऽयतनाऽनतिक्रमेण स्थापयेत् । अथवा तत्तद्वर्णतंडुलोपलक्षितेषु प्रदेशेषु ग्रहप्रतिमा निधाय पश्चाच्छुक्लतंडुलैः कृत्वा स्थापयेत् ।" अथवा वर्णकैः कार्याः कार्याः स्वर्णादिधातुभिः ॥ शुक्राऽर्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ । प्रत्यङ्मुखः शनिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमः शेषा दक्षिणतोमुखाः ॥ प्राङ्मुखौ ऊर्ध्वदृष्टी । उदङ्मुखौ वामदृष्टी । प्रत्यङ्मुखावधोदृष्टी । दक्षिणतोमुखा दक्षिणदृष्टयः । आदित्याऽभिमुखा इति मात्स्योक्तेरिति हेमाद्रिः । " शां० म० यत्तु हेमाद्रिर्विकल्पपरिजिहीर्षया प्राङ्मुखावूर्ध्वदृष्टी इत्यादि व्याचष्ट । तत्र मूलं चिंत्यं विरोधतादवस्थ्यं च । " विकल्प इति तु युक्तं (मयूखेऽप्येवं) वर्णरूपगुणैर्युक्तान्व्यात्दृत्याऽऽवाहयेत्तु तान् । ग्रहमंडलानि स्कांदे । भानुं तु मंडलाकारं सोमं तु चतुरस्रकं । अंगारकं त्रिकोणं तु बुधं बाणाकृतिं तथा । गुरुं तु पट्टिशाकारं [दीर्घं गुरुं चतुरस्रं] (पट्टिशं आयुधविशेषः । धोप इति भाषायां) पंचाऽस्रं भार्गवं तथा । धनुस्तुल्यं शनिं विद्याद्राहुं शूर्पाकृतिं तथा ॥ ध्वजाऽऽकाराः केतवः स्युर्गणेशं तत्र रूपिणं । " म० म० अत्र भान्वादिशब्दैस्तत्तद्वर्णाऽक्षतविरचितानि ग्रहाऽऽयतनानि वर्तुलचतुरस्रादीनि धिष्ण्यानि लक्ष्यंते । तथा सूर्यादिमूर्त्युल्लेखनाऽधिकरणानि ताम्रादिनिर्मितानि वर्तुलादीनि वस्तून्यपि । गोभिलीयनवग्रहे । द्वादशांऽगुलं लिखेदर्कं सोमं तद्द्विगुणं लिखेत् । भृगुं नवांऽगुलं चैव गुरुं चैव षडंगुलं ॥ बुधं भूमिसुतं सौरिं चतुस्त्रिद्व्यंगुलं लिखेत् । सोमादर्धाऽगुलं राहुं केतुं चैव षडंगुलं ॥ शां० म० रूपिणं हस्तपादाद्यवयवोपेतं । स्थापयेच्छुक्लतंडुलैर्वर्णकैर्लेख्याइत्येतत्पक्षयोर्मंडलाद्याकारतेति हेमाद्रिः । " तत्तद्वर्णमंडलेषु ताम्रादिप्रतिमासु तंडुलैः स्थापयेदित्यर्थः । मंडलमूर्त्योर्विकल्प इति हेमाद्रिः । " ल० आ० । ऋष्यादि सर्वं विज्ञाय जपेदर्चेद्धुनेद्बुधः । नाऽन्यथा सिद्धिमाप्नोति कामेच्छुरपि यत्नवान् ॥ " ग्रहमंत्रानाह याज्ञवल्क्यः । आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत् । उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः ॥ बृहस्पते अतियदर्यस्तथैवाऽन्नात्परिस्रुतः । शंनोदेवीस्तथाकांडात्केतुं कृण्वन्निमास्तथा ॥ स्कांदे तु कयान इति राहोश्चेत्युक्तं । मात्स्ये त्वन्ये उक्ताः । अग्निं दूतं दिनेशाय सोमायाऽप्स्वग्न इत्यपि । स्योनापृथिवि भौमाय इदं विष्णुर्बुधाय च ॥ इंद्र आसां सुरेज्याय शुक्रं ज्योतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिताय च । प्रजापतेति सौराय आयंगौरिति राहवे ॥ केतवे ब्रह्मजज्ञानं स्वैः स्वैर्मंत्रैः प्रतिष्ठिताः । “ शां० म० विष्णुधर्मोत्तरे । अतःपरं प्रवक्ष्यामि यो देवो यो ग्रहः स्मृतः । अग्निरर्कः स्मृतः सोमो वरुणः परिकीर्तितः ॥ अंगारकः कुमारश्च बुधश्च भगवान् हरिः । बृहस्पतिः स्मृतः शक्रः शुक्रो देवी च पार्वती ॥ प्रजापतिः शनिश्चैव राहुर्ज्ञेयो गणाऽधिपः। विश्वकर्मा स्मृतः केतुर्ये ग्रहास्ते सुराः स्मृताः ॥ अतएवाऽग्न्यादिलिंगका मंत्राः सूर्यादिस्थापने उक्ताः ” । अन्यार्थानामपि मंत्राणां वचनात्त्वयथार्थमैंद्रीस्यादिति न्यायेन विनियोगः । “ म० म० विनियोगो नाम संबंधः । सचांऽगांगिभावरूपः । एकस्यैव मंत्रस्य विधिबलादनेकेषु सजातीयेषु विजातीयेषु च कर्मस्वंगत्वमस्ति । अतो यस्मिन्कर्मणि यदांऽगभावं भजते तदा तस्मिन्कर्मणि विनियोगो ज्ञेयः ” होमेऽप्येत एव । (व्याहृत्याऽऽवाहयेत्तुतान् इत्युक्त्या एभिर्मंत्रैर्व्याहृतिभिर्वाऽऽवाहनं कार्यं) “ म० पा० व्याहृतिभिरावाहनं मंत्रैः स्थापनं । प्र० पा० प्रणवंत्वादितः कृत्वा भूर्भुवःस्वस्ततः परं । चतुर्थ्यानामसंयुक्तं नमस्कारांतयोजितं ॥ एष मंत्रः समाख्यातो ग्रहपूजाविधायकः । अनेनाऽऽवाहनं कुर्यादनेनैव विसर्जनमित्यूचे वामनः ” अधिदेवताः स्कांदे । सूर्यस्य चोत्तरे शंभुमुमां सोमस्य दक्षिणे । स्कंदमंगारकाच्चैव दक्षिणस्यां निवेशयेत् ॥ सौम्यात्पश्चिमतो विष्णुं ब्रह्मा जीवस्य पूर्वतः । इंद्रमैंद्र्यां सितािद्दिङ्कि मंदस्याऽऽग्नेयतो यमं ॥ राहोः पूर्वोत्तरे कालं सर्वभूतभयावहं । केतोर्नैर्ऋतिदिग्भागे चित्रगुप्तं निधापयेत् ॥ ईश्वरं त्र्यंबकं चेति श्रीश्च ते इति पार्वतीं । यदक्रंदेति च स्कंदं विष्णुं विष्णोरराटतः ॥ आब्रह्मन्निति ब्रह्माणं सजोषा इंद्रवासवं । यमायत्वेति च यमं कालं कार्षिरसीति च ॥ चित्रावस्विति मंत्रेण चित्रगुप्तं निधापयेत् । अग्निरापः क्षितिर्विष्णुरिंद्रेंद्राणी प्रजापतिः ॥ सर्पा ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमं । अग्निं दूतमितिह्यग्नेर्वरुणस्य उदुत्तमं ॥ स्योनापृथिविमेदिन्यां इदं विष्णुस्तु विष्णवे । इंद्रायेंदो इतींद्रस्योत्तानपर्णे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शचीस्थितौ ॥ प्रजापते प्रजेशस्य एष ब्रह्मेति वै विधेः । मंत्रो नमोऽस्तु सर्पेभ्यः सर्पाणां स्थापने मतः ॥ " शां० म० अत्र सूर्यादयो ग्रहा ईश्वरादयो देवा अग्न्यादयोऽधिदेवाः । तत्रेश्वरादिदेवानां सूर्यस्यैवोत्तरेशंभुमित्यादिना पूर्वं स्थलान्युक्तानि । अग्न्याद्यधिदेवास्तु ग्रहदेवयोर्मध्ये स्थाप्याः । तथा च मदनरत्ने गोभिलवसिष्ठौ । ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत् । " गोभिलवसिष्ठौ । ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत् । मदनरत्ने संग्रहे तु । अधिदेवा दक्षिणतो वामे प्रत्यधिदेवताः । स्थापनीयाः प्रयत्नेन व्याहृतिभिः पृथक् पृथक् ॥ उत्पलपरिमले । ग्रहस्य दक्षिणे पार्श्वे स्थापयेदधिदेवतां । ग्रहस्योत्तरपार्श्वे तु न्यसेत्प्रत्यधिदेवतां ॥ वासिष्ठ्यां त्वन्यथोक्तं । रुद्रं त्र्यंबकमंत्रेण रवेरुत्तरतो न्यसेत् । सोमस्याऽऽग्नेयदिग्भागे श्रीश्च ते मेनकात्मजां ॥ यदक्रंदेति भौमस्य स्कंदं याम्ये प्रपूजयेत् ॥ विष्णुं विष्णोरराटेति यजेत्पूर्वे बुधस्य च ॥ गुरोरुत्तरतः स्थाप्यो ब्रह्मा ब्रह्मेति मंत्रतः । सजोषेंद्रेति शुक्रस्य प्राच्यां शक्रं निधापयेत् ॥ शनेः पश्चिमतः स्थाप्यो यमाय त्वेत्यृचा यमः । कार्षिरसीति मंत्रेण राहोः कालं तथोत्तरे ॥ चित्रगुप्तं तु केतूनां चित्रावस्विति नैर्ऋते । ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत् । " शां० म० एतानि च वासिष्ठीयवचांसि कैश्चिन्नाऽऽद्रियंते " मात्स्ये । विनायकं तथा दुर्गां वायुमाकाशमेव च । आवाहयेद्व्याहृतिभिस्तथैवाऽश्विकुमारकौ ॥ मदनरत्ने स्कांदे । उत्तरे शनिसूर्याभ्यां गुरोः केतोश्च दक्षिणे । विनायकं प्रतिष्ठाप्य सर्वदेवनमस्कृतं ॥ तत्रैव संग्रहे । राहुमंददिनेशानामुत्तरस्यां यथाक्रमं । गणेशदुर्गावायूंश्च राहुकेत्वोस्तु दक्षिणे ॥ आकाशमश्विनौ चेति पंचैतान्स्थापयेद्बुधः । " शां० म० एते पंच ग्रहेभ्य उत्तरतः स्थाप्या इति सांप्रदायिकाः । दक्षिणपश्चिमवायव्योत्तरपूर्वेषु यथाक्रममित्यन्ये । राहुमंददिनेशानामित्यादिसंग्रहवचनाऽनुसारेणेति पितामहचरणाः । रूपनारायणश्च । स्कांदे । उत्तरे शनिसूर्याभ्यां गुरु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केत्वोश्व दक्षिणे । गणाधिपं प्रतिष्ठाप्य सर्वदेवनमस्कृतं ॥ रविशनिकेतुगुरूणां मध्य इति फलितोऽर्थः । विनायकपदमुपलक्षणं । तेन दुर्गादयोऽप्यत्रैव स्थाप्या इति केचित् । " म० र० अस्मिन्पक्षे विनायकं पारितो दुर्गादीनामावाहनं ।" वसिष्ठः । विनायकं गणानां त्वा दुर्गां वै जातवेदसे । वायोयेते तथा वायुं घृतं घृतेति चांऽबरं ॥ यावांकशेति संपूज्यौ द्वावप्येतौ ततोऽश्विनौ । शौनकः । क्षेत्रस्य पतिना क्षेत्रपालं भूजोत्तरे न्यसेत् । भूजो भौमः । अत्र मंत्राणां वाचनिकत्वेऽपि स्वशाखीयैस्तत्तत्प्रकाशकैरावाहनादि कार्यं । संहितायां तु ये मंत्रास्तद्देवत्याः श्रुतौ स्मृताः । तैः पूजा लोकपालानां कर्तव्या तु समंतत इति हेमाद्रौ गारुडस्योपलक्षणार्थत्वादिति केचिदाहुः । गोभिलीये । द्वात्रिंशद्देवताः स्थाप्या दिशां पालाश्च दिग्गताः । " शां० म० प्रयोगपारिजाते । पद्मप्राग्दलमारभ्य दलाऽग्रेषु क्रमान्न्यसेत् । इंद्रादिलोकपालांश्च तत्तन्मंत्रैः प्रपूजयेत् ॥ तत्तन्मंत्रैर्जपं कुर्यात्ततो होमं समाचरेत् । शां० सा० वसिष्ठसंहितायामपि इंद्रादिपूजोक्ता । लोकपालक्षेत्रपालादीनां चाऽऽवाहनमनित्यं । द्वात्रिंशदिति मात्स्योक्तेः । केवलग्रहमखे त्वधिदेवतादीनामप्यनित्यं । याज्ञवल्क्यादिभिरनुक्तेः"। याज्ञवल्क्यः । यथावर्णं प्रदेयानि वासांसि कुसुमानि च । गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः ॥ स्कांदे । दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं। चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत् ॥ कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः । अगुरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च ॥ ग्रहवर्णानि पुष्पाणि गायत्र्या धूपमादहेत् [हरेत्] । रवेः कुंदुरुकं धूपं शशिनस्तु घृताऽक्षतान्।भौमे सर्जरसं चैव अगुरुश्च बुधे स्मृतः ॥ सिह्लकं गुरवे दद्याच्छुक्रे बिल्वाऽगुरुं तथा । गुग्गुलुं मंदचारे तु लाक्षां राहोश्च केतवे ॥ " म० म० कुंदुरुकं शल्लकी-निर्यासः कवड्याऊद इति ख्यातः । सर्जरसः राळ इति भाषायां। सिह्लकं सिल्हा इति मध्यदेशे प्रसिद्धं । बिल्वाऽगुरुं बिल्वफलमज्जासहितमगुरुं । मंदचारः शनिः । शां०म०उप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यइत्याहुः । यवाद्यन्यतमद्रव्येण ग्रहादिभ्यः प्रत्येकं दशाऽऽहुतीस्तत्तन्मंत्रैर्हुत्वा तेनैव द्रव्येण व्यस्तसमस्तव्याहृतिभिरयुतलक्षकोट्यन्यतमसंख्यया जुहुयादिति हेमाद्रिमदनौ । तानि च द्रव्याणि देवीपुराणे । यवव्रीहिघृतक्षीरतिलकंगुप्रसारिकाः । पंकजोशीरबिल्वाऽर्कदला होमे प्रकीर्तिताः ॥ सं० कौ० दशसंख्या प्रागुक्ताऽष्टोत्तरसहस्रादिसंख्याभिर्विकल्पत इत्युक्तं ।" नैवेद्यशेषहोमः केषां चिन्मते हेमाद्रौ । ततोऽवदानधर्मेण स्रुचैव जुहुयाच्चरुं । घृताक्ताऽर्कसमिद्भिश्च स्रुवेणाऽऽज्यं च होमयेत् ॥ आकृष्णेनेति मंत्रेण तिलान्व्याहृतिभिर्हुनेत् । चरुणा च समिद्भिश्च सर्पिषा च तिलैः क्रमात् ॥ तत्तन्मंत्रैश्च होतव्याः क्रमात्तदधिदेवताः । तेन चरोः प्रत्याहुत्यवदानधर्मः । केचिद्धस्तेन होममाहुस्तच्चिंत्यं । मात्स्ये । होतव्यं च समित्सर्पिश्चरुभक्ष्यादिकं ततः । " शां० सा० स्कांदे । अष्टोत्तरं च साहस्रं शतमष्टाऽधिकं तथा । अष्टाविंशातिमष्टौ वा एकैकस्य तु होमयेत् ॥ वसिष्ठः । आदौ तु समिदन्नाऽऽज्यैः पृथगष्टोत्तरं शतं । इयं च संख्या द्विविधेऽपि ग्रहमखे । प्रधानदेवतानां विशेषपरत्वे प्रमाणाऽभावात् । चरौ तु एकाऽऽहुतिपक्षोऽपि मात्स्ययाज्ञवल्क्याभ्यामुभयत्रोक्तः । ' ल० शौ० एकैकाहुतिराज्यस्य एकैका च चरोस्तथा । स्वकीयेन च मंत्रेण देया चैव ग्रहान्प्रति ॥ मध्वाज्यक्षीरसंयुक्तान् सयवान् जुहुयात्तिलान् । ' अधिदेवतादीनां संख्या गृह्यपरिशिष्टे पारिजाते । प्रधानदशांशेन पार्श्वदेवतयोरिति । वासिष्ठे तु । द्वित्राश्चैवाऽधिदेवत्याः पंचानां चैव पंचधा । द्वित्राः द्वे तिस्रो वेत्यर्थः । मयूखे तु द्वित्राः पंचेत्युक्तं । पंचानां गणेशादीनां पंचधा एकैकेत्यर्थः । पंच पंचेत्यर्थ इतिकेचित् । म० म० अधिदेवतादीनां प्रत्येकं तिस्रस्तिस्र एकैकां वा दद्यात् । आसां च समिधः पालाश्य एव ।" होमं समारभेत्सर्पिर्यवव्रीहितिलादिभिः । मंत्रैर्दशाऽऽहुतीर्हुत्वा होमं व्याहृतिभिस्ततः ॥ उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः ॥ अत्र व्याहृतिभिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वंद्वाऽपवादैकशेषाऽवगतसाहित्यबहुत्वयोरुपादेयगतत्वात् सर्वव्यात्दृतिभिरेकाऽऽहुतिरित्येव युक्तं । हेमाद्रौ भविष्योत्तरेऽपि । होमो व्यात्दृतिभिश्चैव सर्वस्तत्र विधीयते । " शां० म० नृसिंहपुराणे । ततो व्यात्दृतिभिः पश्चाज्जुहुयाच्च तिलादिकं । यावत्प्रपूर्यते संख्या लक्षं वा कोटिरेव वा । वाशब्दादयुतमपि । " भक्ष्यादिकं नैवेद्यशेषं हुत्वा तत्तद्ग्रहमंत्रैरयुतहोमीयतिलादिद्रव्येण प्रत्येकं दशाहुतीर्हुत्वा प्रणवादिभूरादिव्यात्दृतिभिर्व्यस्ताभिस्तिस्रः समस्ताभिश्चैकेत्येवमावृत्त्याऽयुतलक्षहोमादिसंख्या पूरणीयेति हेमाद्रौ मदनरत्ने चोक्तं । एवं विभागे मूलं तु न विद्मः । तत्त्वं तु तिसृभिर्व्यात्दृतिभिरेकाऽऽहुतिरित्येवं सर्वो होम इति प्रतिभाति । तदुक्तं हेमाद्रौ भविष्ये । भूर्भुवःस्वस्तथा स्वाहा लक्षहोमविधिः स्मृत इति । हेमाद्रिस्तु पूर्वाऽपरविरोधान्न्यायविरोधाच्च भ्रांत एव । " शां० सा० अयुतादिहोमे च ऋत्विज एव कर्तार इति कश्चित् । तन्न । ऋत्विग्द्वयपक्षे आचार्यस्यैव होमकर्तृत्वात् । " मात्स्ये । पूर्णाहुतिं च मूर्धानं दिव इत्यभिपातयेत् । अग्निपुराणे । मूर्धानं दिवमंत्रेण संस्रवेण च धारया । दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचन ॥ महार्णवे तु मूर्धानं पुनस्त्वादित्याः पूर्णादर्वि सप्ततेअग्ने इति पूर्णाहुतौ चत्वारो मंत्रा उक्ताः ॥ " शां० म० वसिष्ठः । मंत्रेण सप्ततेअग्न इति पूर्णाहुतिं चरेत् । अत्र भिन्नशाखागतैकादशद्वादशकपालभेदेऽप्यैंद्राग्नैक्यवदनेकमंत्रयुक्ताया अनेकस्मृत्युक्ताया अपि पूर्णाहुतेरेकत्वान्मंत्राणां विकल्पः । उपांशुयाजने च शाखाभेदेन भिन्नानां याज्याऽनुवाक्यानां समुच्चयेन तु पठंति । वसोर्धारा त्वयुतहोमे नास्ति । प्रमाणाऽभावात् ॥ वि० मा० चंदनेनाऽनुलिप्तांऽतौ कृत्वा दर्वीस्रुवौ शुभौ । वामहस्ते धृतां दर्वीमाज्येनैवाऽभिघारयेत् ॥ पूर्णाहुतिं ततः कुर्याद्घृतेनाऽच्छिन्नधारया । निविष्टः प्राङ्मुखः कर्ता शांतात्मा च हुताऽनलः ॥" (निविष्टः स्थिरः) मात्स्ये । अथाऽभिषेकमंत्रेण वाद्यमंगलगीतकैः । पूर्णकुंभेन तेनैव होमांते प्रागुदङ्मुखैः ॥ अव्यंगाऽवयवैर्ब्रह्मन् हेमस्रग्दाम-

Pg 17,18

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूषितैः । यजमानस्य कर्तव्यं चतुर्भिः स्नपनं द्विजैः ॥ " म० म० अभिषेकमंत्रेणेत्येकवचनं मंत्रत्वोपाध्यभिप्रायेण । वाद्यमंगलगीतकैरिति सहाऽर्थे तृतीया । कुंभेन तेनैवेति । तेन पूर्वमीशानदिग्भागस्थापितेन । एवकारेण कलशांऽतरेण तदुदकं नीत्वाऽभिषेको निषिध्यते । प्रागुदङ्मुखैरिति स्नपनकर्तृद्विजविशेषणं । अत्राऽयमाशयः । यदि यजमानः प्राङ्मुखस्तर्हि ऋत्विज उदङ्मुखा ईशानदिङ्मुखा वा । अथ यजमान उदङ्मुखस्तदा ऋत्विजः प्राङ्मुखा ईशानदिङ्मुखा वेति । कुतः । दिक्त्रयस्याऽपि मांगलिकत्वात् । चतुर्भिरित्येतच्च वृतर्त्विगुपलक्षणार्थं । अत्र च वैदिका मंत्राः स्वस्वशाखोक्ता ग्राह्याः । स्मार्तास्तु सुरास्त्वामित्यादयः । शां० म० वसिष्ठः । स्वस्तिकं कल्पयेत्पश्चात् कुंडस्यैशानभागतः । यजमानाऽभिषेकार्थं तत्र भद्रासनं न्यसेत् ॥ प्राङ्मुखस्योपविष्टस्य यजमानस्य तत्र ते । अभिषेकं ततः कुर्युः साचार्याः षोडशर्त्विजः ॥ वि० मा० । यज्ञकुंडात्पश्चिमतो ह्यभिषेकं समाचरेत् । आदाय रुद्रकलशं द्विजैः सार्धं ततो गुरुः ॥ उच्चार्य वारुणान्मंत्रान् जलमश्वत्थपल्लवैः । उद्धृत्योद्धृत्य सिंचेत्तं सकलत्रं सपुत्रकं ॥ आम्रोदुंबरन्यग्रोधप्लक्षा दूर्वाः समूलकाः । सपुष्पाः सकुशाः प्रोक्ता विद्वद्भिरभिषेचने ॥ ल० शौ० । कला कला हि देवानां दानवानां कला कला । विगृह्य निर्मितो येन कलशस्तेन कथ्यते ॥" तत्र सुरास्त्वामित्यादयो मंत्राः प्रयोगे वक्ष्यंते । मात्स्ये । ततः शुक्लांबरधरः शुक्लमाल्याऽनुलेपनः । सर्वौषधैः सर्वगंधैः स्नापितो विप्रपुंगवैः ॥ (स्नापित इत्यत्र स्नापितपूर्व इत्यर्थः । तेन स्नानोत्तरमेव शुक्लांबरधारणादीति बोध्यं) "म० म० । एवं स्नपयित्वा पूर्वोपकल्पितैः सर्वौषधगंधादिभिः सपत्नीकं यजमानं स्नापयेत् । सर्वौषधादिभिः स्नानं नाम तैर्मस्तकप्रभृति गात्राण्यनुलिप्य पश्चान्निर्मलोदकेन स्नानं । शां० म० । ततो मंडपमागत्य ध्यायेदग्निं ग्रहान्सुरान् । प्रत्येकं प्रतिमंत्रेण दद्यात्पुष्पांजलिं तत इति वामनः । ल० शौ० यजमानः सपत्नीको ग्रहपूजां समारभेत् । गंधादिभिर्यथावर्णैर्नामभिस्तु नमोऽन्वितैः ॥ " वसिष्ठः । ऐशान्यामाहरे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रस्म स्रुचा वाऽथ स्रुवेण वा । वंदनं [अंकनं] कारयेत्तेन शिरःकंठाऽसकेषु च ॥ वासिष्ठ्यां । ततस्तस्याऽभिषिक्तस्य रक्षार्थं बलिमुत्क्षिपेत् । दिग्विदिक्षु विचित्राऽन्नैर्दीपैर्नीराजयेत्ततः ॥ प्रयोगपारिजाते वामनः । आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः । समिदाज्यचरूणां च तिलहोमफलं तथा ॥ तेषां जपफलं तद्वद्गृह्णीयाज्जलपूर्वकं । ततस्तेभ्यो यथाशक्ति दातव्या दक्षिणाः पृथक् ॥ मात्स्ये । यजमानः सपत्नीक ऋत्विजस्तान् समाहितः । दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः ॥ ताश्च याज्ञवल्क्येनोक्ताः । धेनुः शंखस्तथाऽनड्वान् हेम वासो हयः क्रमात् । कृष्णा गौरायसं छाग एता वै दक्षिणा नव ॥ मात्स्ये । सुवर्णेन समाः कार्या यजमानेन दक्षिणाः ॥ "शां० म० बुधप्रीत्यर्थदेयहेम्ना सह सर्वा मूल्यतः समा इति केचित् । अस्मिन्पक्षे षोडशमाषविशिष्टहेमवाचिसुवर्णपदाऽसामंजस्याऽऽपत्तेस्तादृशसुवर्णमूल्यं प्रत्येकमिति परे । बह्वल्पमूल्येषु तथा हेमाऽपि देयं । यथा सर्वाः प्रत्येकं दशमाषसुवर्णेन समा भवंतीति तु सम्यक् । म० म० सुवर्णेन समा इति । सूर्यस्य दक्षिणाधेनोर्यावता मूल्येन या या दक्षिणा न्यूना भवति तावत्तावन्मूल्यं सुवर्णं तस्यास्तस्याः पूरणाय तत्तत्समकालमेव दातव्यं । नचाऽत्र सुवर्णमंत्रः पृथक्पठनीयः । स्वमंत्रेण प्रदातव्या इति चिंतामणैदर्शनात् । एतच्चाऽल्पधनविषयं । प्रभूतधनेन तु अश्वमूल्यसमं स्वर्णं दातव्यं । गवाद्यभावेऽपि तत्तन्मूल्यं सुवर्णं दातव्यं । तत्राऽप्यल्पधनेन प्रथमोपात्तगोमूल्यं । तत्राऽप्यशक्तश्चेद्गवामभावे निष्कं स्यात्तदर्धं पादमेव वेति दिशा सर्वत्र परिकल्पनीयं । " सर्वेषामथवा गावो दातव्या हेमभूषिताः । सुवर्णमथवा दद्याद्गुरुर्वा येन तुष्यति ॥ स्वमंत्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः । तेच मंत्रा मत्कृते दानकमलाकरे ज्ञेयाः । अत्रापि प्रयोगे वक्ष्यंते " शां० म० । आचार्याय तु यद्दत्तं तदर्धं ब्रह्मणे भवेत् । ब्रह्मणोऽर्धं सदस्याय ऋत्विग्भ्यश्च तदर्धकं ॥ वि० मा० । शुक्लांबराणि वै धृत्वा कुर्यादाज्याऽवलोकनं । रूपं रूपेति मंत्रेण चित्रं तच्चक्षुरेव वा ॥ शां० सा० आज्यं निरीक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चाराश्च सर्वेषामपि शुक्लाऽक्षतैः सदा। गंधाऽभावे शुक्लगंधं पुष्पाऽभावे सुगंधकं ॥ धूपाऽभावे गुग्गुलुः स्याद्द्रव्याऽभावे तु मिश्रकं। पंचामृतं गवामेव मिश्रकं न कदाचन ॥ ” उद्दीप्यस्वेतिमंत्रेण दीपं दद्यादतंद्रितः “ गृ० प० सर्पिषा दीपस्तिलतैलेन वा। वि० मा०। नववर्तियुतं दीपं घृतेन परिपूरितं। ग्रहाणामग्रतः कुर्यात्तेजोऽस्येतेन मंत्रितं। ” गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं। लोहिताय हविष्यान्नं बुधाय क्षीरषाष्टिकं ॥ दध्योदनं गुरोर्दद्याच्छुक्राय च घृतौदनं। मिश्रितं तिलमाषैश्च नैवेद्यं तु शनैश्वरे ॥ राहोर्मांसौदनं दद्यात्केतोश्चित्रौदनं तथा “ शां० म०। तिलतंडुलमिश्रं स्यादजाक्षीरं च शोणितं। कर्णनासागृहीतं स्यादेतच्चित्रौदनं स्मृतमिति दामोदरः। म० म० पूर्वोक्तविविधनैवेद्याऽभावे यथालाभमोदनादि निवेदयेत्। एवमधिदेवतादीनां। विनाकस्यतु मोदकसहितमोदनादि। वि० मा० द्राक्षेक्षुपूगनारंगजंबीरं बीजपूरकं। खर्जूरीनालिकेरं च दाडिमं च यथाक्रमं ॥ मात्स्ये तुअंगारकाय संयावमित्युक्तं। ग्रहदेवाऽधिदेवानां नैवेद्यं कुसुमानिच ग्रहवच्चाऽऽसनं दानं स्थापनं चाऽनुपूर्वशः ॥ निवेदयित्वाऽहुतिभिर्होमं कुर्यादतांद्रितः। अत्र विशेषो मत्कृते दानकमलाकरे ज्ञेयः। मात्स्ये। धूपो देयोऽत्र सुरभिरुपरिष्टाद्वितानकं। शोभनं कल्पयेत्प्राज्ञः फलपुष्पसमन्वितं ॥ विनायकलोकपालादीनां तूत्पलपरिमले। सर्वेषां लोकपालानां चंदनं च विलेपनं। शतपत्राणि पुष्पाणि दद्याद्गुग्गुलुधूपकं ॥ दीपं गोघृतसंयुक्तं नैवेद्यं च घृतौदनं। मात्स्ये। प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितं। चूतपल्लवसंयुक्तं फलवस्त्रयुगान्वितं ॥ पंचरत्नसमायुक्तं पंचभंग [त्वच] युतं तथा। “ दा० क०। अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः। पंचभंगा इमे प्रोक्ताः सर्वकर्मसु शोभनाः ॥ ” स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत् ॥ “ म०म० अक्षतानामुपरि स्थापयेत् ” गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च। गजाऽश्वरथ्यावल्मीकसंगमह्रदगोकुलात् ॥ मृद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानीय विप्रेंद्र सर्वौषधिसमन्वितां । स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित् ॥ मात्स्ययाज्ञवल्क्यौ । कर्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं । नानाश्रपयेत्समोप्यवेति गृह्यसूत्रवचनात्सह पृथग्वा श्रपयेत् । "ल०शौ०।तिर्यगूर्ध्वं समिन्मात्रा दृढा नाऽतिबृहन्मुखी ।मृन्मय्यौदुंबरी वाऽपि चरुस्थाली प्रशस्यते ॥ (औदुंबरी ताम्रमयी।कांस्यमय्यपि क्वचिदुक्ता)" म०म० केचन गृहपाकादोदनमुद्धृत्य ग्रहादीनुदिश्य जुह्वति तत्र शिष्टाचार एव प्रमाणं।" हेमाद्रौ देवीपुराणे । गणाधिपतये देया प्रथमा तु वराहुतिः। अन्यथा विफलं विप्र भवतीह न संशयः॥ "शां० सा० । म० म० स्वत्वत्यागस्य याजमानिकत्वाद्युगपदनेकर्त्विक्साध्ये कर्मणि प्रत्याहुति त्यागस्य कर्तुमशक्यत्वाच्च सर्वदेवता उद्दिश्य सर्वद्रव्याणि च निर्दिश्य सकृत्त्यागः कार्यः । " याज्ञवल्क्यः । अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः । उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ " ल० शौ० । अलाभे तु प्रकर्तव्याः सर्वाः पालाशवृक्षजाः । आर्द्रा पक्वां समच्छेदां तर्जन्यंगुलिवर्तुलां ॥ होमयेदीदृशीं प्राज्ञः प्राप्नोति विपुलां श्रियं । दा० क० नांऽगुष्ठादधिका ग्राह्या समित्स्थूलतया क्वचित् । प्रादेशान्नाऽधिका नोना तथास्याच्च विशाखिका ॥" एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः ॥ " म० म० मात्स्ये दध्ना चैव समन्विता इत्यनेन वचनेन मध्वाज्यदध्नां समिदंजने समुच्चयोऽवगम्यते । याज्ञवल्क्यस्तु दध्ना क्षीरेण वा युता इति विकल्पमाह । तेन स्मृतिपुराणयोः स्मृतेः प्राबल्यात्पुराणवाक्यस्थश्चशब्दो वाशब्दार्थो ग्राह्यः। तथाच मध्वादीनि समिदंजने विकल्पितानि। शां० म० नचाऽत्र संप्रतिपन्नदेवताकाऽनेकद्रव्याणामेकैवाऽऽहुतिः सांनाय्यवदिति वाच्यं। आदौ तु समिदन्नाज्यैः पृथगष्टोत्तरं शतमिति वासिष्ठात् । अन्यत्राऽपि संप्रतिपन्नदेवताके स्मार्ते कर्मण्यनेकद्रव्यके पृथगेव होम इति सांप्रदायिकाः । बहुषु कर्मसु प्रायो वचनान्यप्येवं । " प्रादेशमात्राः सामिधो ह्यशाखा अपलाशिनीः । (पत्ररहिताः) । देवानामपि सर्वेषामुपांशु पर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्थवत् ॥ स्वेन स्वेनैव मंत्रेण होतव्याः समिधः क्रमात् । होतव्यं च घृतं ह्यत्र चरुभक्ष्यादिकं ततः । "दा० क० वायवीये । दानं प्रतिग्रहो होमो भोजनं बलिरेव च । सांऽगुष्ठेन सदा कार्यमसुरेभ्योऽन्यथा भवेत् ॥ अंगुष्ठसहितांऽगुलिभिरित्यर्थः ।" स्कांदे स्थापनमंत्रा एव होममंत्रा उक्ताः । अधिदेवानां चैवं । वासिष्ठ्यामपि । शेषाणां स्थापने मंत्रैर्होमो व्याहृतिभिस्तिलैः । (स्थापने ये मंत्रास्तैरित्यर्थः) मात्स्ये त्वधिदेवतादीनामन्ये मंत्रा उक्ताः । (अत्र मात्स्ये ग्रहाणामप्यन्ये मंत्रा उपलभ्यंते । तेचेत्थं । आकृष्णेनेति सूर्याय होमः कार्यो द्विजन्मना । आप्यायस्वेति सोमाय मंत्रेण जुहुयात्पुनः ॥ अग्निर्मूर्धादिव इति मंत्रं भौमाय कीर्तयेत् । अग्नेविवस्वदुषस इति सोमसुताय वै ॥ बृहस्पतेपरिदीया रथेनेति गुरोर्मतः । शुक्रंतेअन्यदिति च शुक्रस्याऽपि निगद्यते ॥ शनैश्वराय तु पुनः शंनोदेवीति होमयेत् । कयानश्चित्रआभुवदिति राहोरुदाहृतः ॥ केतुं कृण्वन्निति ब्रूयात्केतूनामपि शांतये इति । महार्णवेऽप्येते श्लोका उक्ताः । तत्र तु उद्बुध्यस्वाग्नइति बुधस्य । बृहस्पतेअतियदर्य इति गुरोः । अन्नात्परिस्रुत इति च शुक्रस्येत्येवं पाठभेदो दृश्यते । विधानमालायां वसिष्ठेन तु । आकृष्णेनाऽऽप्यायस्वाऽग्निर्मूर्धोद्बुध्यध्वं बृहस्पतेअति शुक्रःशुशुकान् शमग्निः कयानश्चित्रः केतुंकृण्वन्नित्यर्कादीनां । त्र्यंबकं गौरीर्मिमाय यदक्रंदो विष्णोर्नुकं ब्रह्मजज्ञानमिंद्रंवो यमाय सोमं मोषुण उषोवाजमित्यधिदेवानां । अग्निंदूतमप्सुमे स्योनापृथिवीदंविष्णुरिंद्रश्रेष्ठानींद्राणीमासु प्रजापत आयंगौर्ब्रह्मजज्ञानमिति प्रत्यधिदेवानां । गणानांत्वा जातवेदसे तववायवादित्प्रत्नस्यैषोउषाः क्षेत्रस्यपतिनेति कर्मसाद्गुण्यदेवतानां । इंद्रंविश्वा अग्निंदूतं यमायसोमं मोषुणस्त्वंनोअग्ने तववायो सोमोधेनुं तमीशानमिति च लोकपालानां क्रमेण मंत्रा उक्ताः) । आवोराजेति रुद्रस्य बलिं होमं समाचरेत् । आपोहिष्ठेत्युमायाश्च स्योनेति स्वामिनस्तथा ॥ विष्णोरिदंविष्णुरिति तमीशेति स्वयंभुवः । इंद्रमिद्देवतातय इंद्राय जुहुयात्पुनः ॥ तथा यमस्य चाऽऽयंगौरिति होमः प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्तितः । कालस्य ब्रह्मजज्ञानमिति मंत्रः प्रशस्यते ॥ चित्रगुप्तस्य चाऽऽज्ञातमिति वेदविदो विदुः । अग्निंदूतंवृणीमह इति वह्नेरुदाहृतः ॥ उदुत्तमंवरुणेति त्वपां मंत्रः प्रकीर्तितः । भूमेः पृथिव्यंतरिक्षमिति वेदेषु पठ्यते ॥ सहस्रशीर्षापुरुष इति विष्णोरुदाहृतः । इंद्रायेंदोमरुत्वत इति शक्रस्य शस्यते ॥ उत्तानपर्णेसुभग इति शच्याः प्रशस्यते । प्रजापतेः पुनर्होमः प्रजापतिरिति स्मृतः ॥ नमोस्तु सर्पेभ्य इति सर्पाणां मंत्र उच्यते । एषब्रह्मायऋत्विय इति ब्रह्मण्युदाहृतः ॥ विनायकस्य चाऽऽतून इति मंत्रो बुधैः स्मृतः । जातवेदसेसुनवाम दुर्गामंत्रोऽय मुच्यते ॥ आदित्प्रत्नस्यरेतस आकाशस्य उदाहृतः । काणाशिशुर्महीनां च वायोर्मंत्रः प्रकीर्तितः ॥ एषोउषा अपूर्व्येति अश्विनोर्मंत्र उच्यते ॥ स्कांदे । नैवेद्यशेषं हुत्वा तु होममंत्रादनंतरं । अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रमं ॥ अष्टोत्तरं च साहस्रं शतमष्टाधिकं तथा ॥ अष्टाविंशातिमष्टौ वा एकैकस्य तु होमयेत् ॥ " शां० म० । होतव्यं च घृतं तत्र चरुर्लक्षादिकं पुनः । मंत्रैर्दशाऽऽहुतीर्हुत्वा होमो व्याहृतिभिः स्मृतः ॥ अथेति अथवेत्यर्थः । गृहीत्वा तामथांऽबिकामितिवत् । मदनस्तु अथवेत्येव पपाठ । तत्तन्मंत्राणां व्याहृतीनां च परस्परं विकल्पः । अष्टोत्तरसहस्रादिसंख्या तु पक्षद्वयेऽपि । नैवेद्यशेषहोमस्तु शाखाविशेषपर इत्यपि स एव । लक्षादिकः पुनर्व्याहृतिभिर्होमो मंत्रैर्दशाऽऽहुतीर्हुत्वा स्मृत इत्यन्वयः । मंत्रैर्ग्रहमंत्रैर्व्याहृतिभिर्व्यस्ताभिः समस्ताभिश्च । तातचरणास्तु अथ व्याहृतिभिर्हुत्वेति पृथग्वाक्यं । एकैकस्येति तु प्रतिदेवतमष्टादिसंख्याऽन्वयार्थं । एकैकस्य तु होमयेदित्यत्र एकैकपदं तु चर्वादिद्रव्यपरं न देवतापरं । अस्मिन्नेव होमे घृतचरुविधिरग्रे । लक्षादिक इत्येतत्तु अथव्याहृतिभिर्हुत्वेति विहिते होमे लक्षादिसंख्यासिद्ध्यर्थं । मंत्रैरित्यादि तु चरुहोमोत्तरं सोमं राजानमितिमंत्रेण यथाप्रकृति स्विष्टकृतं हुत्वा सूर्यादिमंत्रैर्दशदशाऽऽहुतीः प्रतिदैवतं लक्षहोमादिद्रव्येण हुत्वा व्याहृतिभिर्लक्षादिहोमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दत्वा च ब्राह्मणान् भोजयेत्ततः । " याज्ञवल्क्यः । गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं । दध्योदनं हविश्चूर्णं मांसं चित्राऽन्नमेवच ॥ दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः। शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं ॥ गुडमिश्र ओदनो गुडोदनः । हविष्यं मुन्यन्नं नीवारादि । क्षीरषाष्टिकं क्षीरमिश्रः षाष्टिकतंडुलौदनः । हविर्घृतौदनः। चूर्णं तिलचूर्णमिश्रौदनः । मांसं मांसमिश्रौदनः। चित्राऽन्नं नानावर्ण ओदनः । मदनरत्ने आश्वलायनः। एकमेकाहुतौ विप्रं होमे त्वन्नेन भोजयेत्। अत्यर्थो मध्यमश्चाऽपि विप्रमेकं शताहुतौ॥ सहस्राहुतिषु त्वेकं जघन्योऽपि प्रभोजयेत्। अन्यथा दहति क्षिप्रं तद्राष्ट्रं नाऽत्र संशयः ॥ (अत्यर्थः प्रभूतधनवान्। मध्यमस्ततो न्यूनः। जघन्यो दरिद्रः । राष्ट्रं दहति दुर्भिक्षादिकं जनयतीत्यर्थः) " म० पु० । अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः । यष्टारं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥ तस्मान्न दक्षिणाहीनं कर्तव्यं भूतिमिच्छता ॥ " अतो दातुमशक्तो यो दक्षिणां चाऽन्नमेव च। जपैः प्रणामैः स्तोत्रैश्च तोषयेत्तर्पयेद् ग्रहान्॥ " ल० शौ० । जपैर्हुतैस्तर्पणैश्च ध्यानैर्दानैः समाहितः । सर्वाऽऽपदो विजयते तापांश्च त्रिविधानपि ॥ शां० म० स्कांदे । देवदानवगंधर्वा यक्षराक्षसकिंनराः। पीड्यंते ग्रहपीडाभिः किं पुनर्भुवि मानवाः ॥ शनैश्चरेण सौदासो नरमांसे नियोजितः। राहुणा पीडितो राजा नलो भ्रांतो महीतले ॥ अंगारकविरोधेन रामो राष्ट्राद्विवासितः । अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ॥ रविणा सप्तमस्थेन रावणो विनिपातितः । गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः ॥ पांडवा बुधपीडायां विकर्मणि नियोजिताः । षष्ठेनोशनसा युद्धे हिरण्याऽक्षो निपातितः ॥ एते चाऽन्ये च बहवो ग्रहदोषैस्तु पीडिताः । याज्ञवल्क्यः । ग्रहाऽधीना नरेंद्राणामुच्छ्रायाः पतनानि च । भावाऽभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः ॥ ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः ॥ ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ ॥ " स्कांदे । यथा ग्रहो द्विज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तद्दद्विधिज्ञो वेदपारगः । तोषयेन्मृदुवस्त्राद्यैस्तुष्टमेनं विसर्जयेत् ॥ मात्स्ये । एवं समग्रं निष्पाद्य सर्वदेवान्विसर्जयेत् । यांतु देवगणाः सर्वे पूजामादाय पार्थिवात् । इष्टकामप्रदानार्थं पुनरागमनाय च । " म० म० पार्थिवात्प्रदेशाद्यांतु स्वस्थानं गच्छंत्वित्यर्थः । अथवा पार्थिवात् देहात् पार्थिव इत्यधिकार्युपलक्षणं " अनेन विधिना यस्तु ग्रहपूजां समाचरेत् । सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥ यस्तु पीडाकारोऽत्यंतमल्पवित्तस्य वै ग्रहः । तं तु यत्नेन संपूज्य शेषानप्यर्चयेन्नरः ॥ " म० म० तं पीडाकरं ग्रहं प्रयत्नेन पूर्वोक्तरीत्याऽधिप्रत्यधिदेवतासहितं पूजयित्वा शेषानपि ग्रहान्पुष्पांजल्यादिभिर्यथाशक्ति संपूजयेत् । इयं च प्रतिकूलग्रहपूजा तत्तद्वासरे कर्तव्या । राहुकेत्वोः पृथग्वाराऽभावान्मंदवारो ग्राह्यः । शन्यादीन्मंदवारे तु पूजयेत्प्रयतो नर इति बौधायनकारिकातः । शां० म० । ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरादपि । आरोग्यबलसंपन्नो जीवेच्च शरदां शतं ॥ आ० प० । यथा शस्त्रप्रहाराणां कवचं वारणं भवेत् । तथा दैवोपघातानां शांतिर्भवति वारणं॥ " तथा । सदैवाऽयुतहोमोऽयं नवग्रहमखः स्मृतः। विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु॥ निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाऽद्भुतेषु च। अद्भुतं भूकंपादि । वश्यकर्माऽभिचारादि तथैवोच्चाटनादिकं ॥ नवग्रहमखं कृत्वा ततः कर्म समारभेत् । अन्यथा फलदं पुंसां न काम्यं जायते क्वचित ॥ तस्मादयुतहोमस्य विधानं तु समाचरेत् । " शां० म० विवाहेत्यादिना विवाहादिषु काम्येषु च कर्मस्वंगत्वमुक्तं । अत्र ग्रहस्वरूपवर्णदेशगोत्राऽग्निस्थानमुखाऽऽकारस्थापनहोममंत्रचंदनधूपदीपनैवेद्यसमिद्दक्षिणाऽधिदेवताप्रत्यधिदेवतोपदेशकवाक्येषु ग्रहाणां स्वरूपनिर्देशस्थापनहोममंत्रोपदेशकवाक्येषु चाऽधिदेवताप्रत्यधिदेवताविनायकादिपंचकलोकपालानामनेकस्मृतिपुराणभेदेन भूयोविसंवादिभिरनेकैः पर्यायशब्दैरुपस्थितेर्नाऽत्रैकवैधशब्दानियमः । नाऽपि मंत्रवर्णेनैकशब्दोपस्थितिः । शब्दविशेषैर्देवता अनूद्य तत्स्मारकतया मंत्रविनियोगेन मंत्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवताप्रापकत्वाऽयोगात् । तेषां बाहुल्येनाऽस्पष्टलिंगत्वाच्च । अतो द्रव्यत्यागादिषु स्वरूपादिनिर्देशकस्मृतिमंत्रवर्णोपस्थितशब्दानामन्यत-मेन शब्देनोद्देशो ग्रहादीनामिति । शिष्टाचारोऽप्येवं । अत्र व्याहृतिकरणकेऽयुतहोमेऽग्निवायुसूर्यप्रजापतय एव देवताः । न ग्रहाः । ऐंद्या-दिवत्तत्प्रकाशकत्वेन विनियोगाऽभावात् । अतएव पारिजाते । ॐभूर्भुवः सुवश्चेति तिस्रो व्याहृतयो जपेत् । आभिश्च होमे तिसृभिश्चतुर्थी स्यात्समासत इति । समस्ताभिरेव होमः स चाऽग्निवायुसूर्यदेवत्य इति तु मदनः । सर्वथा व्याहृतिहोमे न ग्रहा देवता इति । प्रधानं चाऽत्र ग्रहपूजा । तद्धोमोऽयुतहोमश्च । श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेदित्यादिना तत्पूजातद्धोमयोः फलसंबंधात् । ग्रहयज्ञस्त्रि-धेत्युक्त्वा प्रथमोऽयुतहोम इत्यादिनाऽयुतलक्षकोटिहोमानां ग्रहयज्ञविशेषत्वेनोपक्रमात् । तस्मादयुतहोमस्य विधानं तु समाचरेदित्युपसंहा-राच्च । ग्रहदेवत्यकर्मसमूहे प्राणभृतउपदधातीतिवल्लिंगसमवायेन ग्रहयज्ञशब्दः । तातचरणास्त्वयुतहोमादीनामेव प्राधान्यं ग्रहहोमस्त्वं-गमित्याहुः। तदाशयं न जाने । यो हि कामशब्देन फलसंबंधः श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेदित्यादिः स तावद् ग्रहपूजाहोमयो-रेवोचितः । ग्रहसंबंधप्राप्तेर्ग्रहयज्ञशब्दस्य तन्नामत्वात् । न चाऽयुतहोमादीनां फलसंबंधे तत्प्रकरणपाठात् ग्रहपूजाहोमयोरंगतेति वाच्यं । वैपरीत्यस्याऽपि सुवचत्वात् । अयुतहोमादिशब्दानां ग्रहयज्ञसामानाधिकरण्येन ग्रहयज्ञनामत्वं तु लिंगसमवायेन । न तदंगत्वेन । आर्थ-वादिकः फलसंबंधस्तु । अनेन विधिना यस्तु ग्रहपूजां समाचरेत् । सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते इत्यत्र यज देवपूजासंगति-करणदानेष्वित्यनुशिष्टयोः पूजाहोमयोः । सदैवाऽयुतहोमोऽयमित्याद्युपक्रम्य निर्विघ्नार्थं मुनिश्रेष्ठेत्यादिना त्वयुतहोमादीनामपि । स्मृतिषु तु प्राय आर्थवादिकमेव फलं । अत्र कामशब्दोपनीते फले सति आर्थवादिकं संबध्यते नवेति तु विचारांतरं । किंच याज्ञवल्क्यादिस्मृतिषु न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावदयुतहोमादीनां विधिर्नाऽप्यनुवादः। अतो ग्रहपूजाहोमयोः प्राधान्याऽभावे तत्रत्येतिकर्तव्यतासंबंधो न स्यात्। अतो ग्रहपूजाहोमयोरपि प्राधान्यं भाति। अतएव क्वचित् केवलग्रहमखेषु तदंगकेषु च शांतिकादिकर्मस्वेकस्मृत्युक्तांऽगप्रधानादरेण स्मृत्यंतरोक्तप्रधानभूताऽयुतादिहोमं विनाऽपि शाखांतरोक्तग्रहयागांतराऽभ्यासांतरं विनैकशाखीयग्रहयागाऽभ्यासमात्राणामिव पूजाग्रहदेवत्यहोमयोरेवाऽनुष्ठानं कथंचित् शिष्टानां संगच्छते। ग्रहपूजाहोमयोरंगत्वे त्वंगमात्राऽनुष्ठानमेव स्यात्। म० म० यद्यप्यग्निर्मूर्धादिव इत्यादयो मंत्रा अग्न्यादिप्रकाशकत्वेनाऽग्न्यादिदेवत्या न साक्षाद्भौमादिप्रकाशकास्तथाप्यैंद्र्यागार्हपत्यमुपतिष्ठत इतींद्रप्रकाशिकाया ऋचः श्रुत्या गार्हपत्योपस्थाने शेषत्वबोधनाद्यथाकथंचिदिंद्रादिपदानां इदि परमैश्वर्य इत्याद्यर्थचिंतनेन योगवृत्त्या गार्हपत्ये वृत्तिरिवाऽग्निर्मूर्धादिवइतिमंत्रंभौमायकीर्तयेदित्यादिभिः पूर्वप्रदर्शितवाक्यैरग्निर्मूर्धेत्यादिमंत्राणां भौमादिशेषत्वबोधनादग्न्यादिपदानां भौमादिषु यथाकथंचिद्वृत्तिरवगंतव्या। सा च वृत्तिरेवं। गत्यर्थादगिधातोरग्निशब्द उत्पन्नः। भौमोऽपि गमनशीलः। अथवाऽग्निवर्णत्वाद्भौमस्याऽग्निशब्दवाच्यत्वं। उद्बुध्यस्वाग्न इत्यत्राप्यग्निशब्दः पूर्ववद्बुधे वर्तते। तेजोभूयिष्ठत्वाद्वा। उद्बुध्यस्वेत्यस्मिन्पदे बुधवर्णश्रुतेर्वा। अप्यक्षरसाम्यान्निर्ब्रूयादिति श्रुतेः। यथा पश्यकः कश्यपो भवतीति श्रुतिः। अन्नात्परिस्रुत इत्यस्मिन्मंत्रे विपानंशुक्रमंधस इति शुक्रपदनामसाम्याच्छुक्रे वर्तते। शंनोदेवीरितिमंत्रे शनिनामस्मारकस्य शंन इति वर्णद्वयस्य विद्यमानत्वात्स मंत्रः शनिद्योतकः। कयानश्चित्र इत्यत्र चित्रपदं श्रूयते। चित्रश्च राहुर्यतः शिरसा लक्ष्यते। अनयैव दिशाऽन्यत्राप्यूहनीयं। एवं तत्तद्देवताप्रकाशकत्वमवगंतव्यं। या तेनोच्यते सा देवतेति सर्वानुक्रमणीपरिभाषाऽभिधानात्। अन्यथाऽन्या पूज्या अन्या मंत्राऽभिधेयेति विरोधः स्यात्।" भविष्योत्तरे। न संख्यानियमश्चाऽत्र ब्राह्मणानां नरोत्तम। न कालनियमश्चैव स्वेच्छायज्ञोऽयमुच्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यश्चाऽत्र विशेषोऽस्मत्पितृकृतप्रयोगदीपिकायां ज्ञेयः। यत्तु शिष्टा ग्रहाणामयुतसहस्राादिसंख्यया जपं कृत्वा तद्दशांशेन तिलैर्होमं कुर्वंति तत्कुत्राऽपि जपाऽनुक्तेः किंमूलकमिति न विद्मः। इत्ययुतहोमविधिः॥ (अत्र यद्यपि नकालनियमश्चैवेत्यनेन ग्रहयज्ञस्य साधारणत्वेन यत्रकुत्रापि दिने कर्तव्यता प्रतीयते तथापि पुण्येऽह्नि विप्रकथिते इत्यादिना तस्य काम्येतरपरत्वेन व्याख्यातुमुचितत्वात्काम्ये कालविचारस्त्वावश्यक इति स एवाऽत्र प्रथमं संगृह्यते। मु॰ सिं॰। खेटेज्या शनिभौमवर्जितदिने वैवाहिकर्क्षाऽश्विनीत्वाष्ट्रेज्ये त्रिषु जन्मभेषु चरभे रिक्ताविहीने तिथौ। शस्तेऽब्जे शुभखेटवीर्यसहिते वह्नेः शुभत्वे सतो वत्केऽथाऽऽहुतिपातनेऽर्कशशिनोर्ग्रासेऽयने वैषुवे॥ खेटा ग्रहास्तेषामिज्या यजनं। शेषं स्पष्टं। अथाऽग्निवासाऽऽहुतिपातविचारः। मु॰ मा॰ शुक्लादितस्तिथिः सैका वारयुक्ताऽब्धिशेषिता। खे गुणे भुवि वासोऽग्नेर्द्येकयोः स्यादधो दिवि॥ सौख्याय होमो भौमेऽग्नावर्थप्राणहृदन्यतः। शेषिता भक्ताऽवशिष्टा। मु॰ चिं॰। सूर्यभात्त्रित्रिगे चंद्रे सूर्यविच्छुक्रपंगवः। चंद्राऽऽरेज्याऽगुशिखिनो नेष्टा होमाहुतिः खले॥ पंगुः शनिः। अगू राहुः। शां॰ सा॰ कश्यपसंहितायां। दुष्टे न कुर्याद्धवनमित्याहुर्भार्गवादय इतीदं च काम्यविषयं। संस्कारेषु विचारोऽस्य न कार्यो नाऽपि वैष्णवे। नित्ये नैमित्तिके कार्ये न चाऽब्दे मुनिभिः स्मृतः॥ शुभग्रहमुखे आहुतिपाताऽभावे तत्प्रतीकार उक्तस्तत्रैव विष्णुधर्मोत्तरे। क्रूरग्रहमुखे चैव संजाते हवने शुभे। शांतिं विधाय गां दद्याद्ब्राह्मणाय कुटुंबिने॥ शांतिं अनंतरोक्तां। आयसीं प्रतिमां कृत्वा निक्षिपेत्तामधोमुखीं। गोमूत्रमधुगंधाद्यैरर्चितां प्रतिमां ततः॥ श्वभ्रे निधाय संपूज्य तत्र होमो विधीयते।) अथ प्रयोगः॥ स च यद्यप्यस्मत्पितामहकृतोऽस्त्येव तथापि संक्षेपेणोच्यते। कर्ता कृतनित्यक्रियः शुचिः परिहितधौतवासा दर्भपाणिः पीठोपविष्टः प्राङ्मुखो वाग्यतो द्विराचम्य प्राणानायम्य देवगुरुब्राह्मणाऽभिवादनपूर्वं देशकालौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृत्वा श्रीकामः वृष्ट्यायुःपुष्ट्यादिकामः ग्रहपीडायामुत्पाते रोगे वा तच्छांतिकामः शत्रुपराजयकामो वाऽयुतहोमाख्यनवग्रहयज्ञेनाऽहं यक्ष्ये । केवले तु ग्रहयज्ञं करिष्य इति वा संकल्प्य गणेशं संपूज्य स्वस्तिवाचनं मातृकापूजनं वृद्धिश्राद्धं च कृत्वाऽऽचार्यं वृत्वा प्रार्थयेत् । आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रतेति । कोटिहोमे त्वाचार्यप्रार्थने विशेषः । त्वं मे यतः पिता माता त्वं गतिस्त्वं परायणः । त्वत्प्रसादेन विप्रर्षे सर्वं मे स्यान्मनोगतं ॥ आपद्विमोक्षाय च मे कुरु यज्ञमनुत्तमं । कोटिहोमाख्यमतुलं शांत्यर्थं सार्वकामिकमिति ॥ ततश्चतुर ऋत्विजो वृत्वा प्रार्थयेत् । यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा द्विजपते भवेति ब्रह्माणं ॥ त्वं नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणं । त्वत्प्रसादाच्च विप्रर्षे सर्वं मे स्यान्मनोगतं ॥ आपद्विमोक्षणार्थाय कुरु यज्ञमतंद्रितः । ऋत्विग्भिः सहितः शुद्धैः संयतैः सुसमाहितैः ॥ आचार्येण च संयुक्तः कुरु कर्म यथोदितमिति सदस्यं ॥ प्रारिप्सितस्य यज्ञस्य जपस्य हवनस्य च । निर्विघ्नेन समाप्त्यर्थं त्वामहं गणपं वृण इति गणपं ॥ भगवन् सर्वधर्मज्ञ सर्वधर्मभृतांवर । वितते मम यज्ञेऽस्मिन्नुपद्रष्टा भव द्विजत्युपद्रष्टारं ॥ अस्य यागस्य निष्पत्तौ भवंतोऽभ्यर्चिता मया । सुप्रसन्नाः प्रकुर्वंतु कर्मेदं विधिपूर्वकमिति ऋत्विजः ॥ यद्वाऽऽचार्यो ब्रह्मा चेति द्वौ तेषां तच्छाखया मधुपर्कः । कर्ता अमुककर्म कर्तुं मंडपं करिष्य इति संकल्प्य गणेशं कूर्मं शेषं वसुधां द्विजांश्च संपूज्य । आगच्छ देवि कल्याणि वसुधे लोकधारिणि । उद्धृताऽसित्वराहेण सशैलवनकानना ॥ मंडपं कारयाम्यद्य त्वदूर्ध्वे शुभलक्षणं । गृहाणाऽर्घ्यं मया दत्तं प्रसन्ना वरदा भवेति वसुधाया अर्घ्यं दत्वा स्योनापृथिवीति तां प्रार्थ्य यथोक्तलक्षणं मंडपं कूटं वा कृत्वा तन्मध्ये (हेमाद्रिमते ऐशान्यां वा) हस्तमात्रं कुंडं कुर्यात् । तदैशान्यां ग्रहवेदी हस्तविस्तृता वितस्त्युच्चा वप्रत्रययुता चतुरस्रा कार्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राऽऽद्यवप्रो द्व्यंगुलोच्चो द्वितीयतृतीयौ त्र्यंगुलोच्चौ । त्रयोऽपि द्व्यंगुलविस्ताराः । साचार्यो यजमानो भद्रंकर्णेभिरिति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य कुंडपश्चिमभागे उपविश्य देशकालौ स्मृत्वा ग्रहयज्ञकर्मणि मंडपपूजादिकरिष्य इति संकल्प्य तदंगत्वेन गणपतिपूजनं वास्तुमंडपदेवतास्थापनादि च करिष्य इत्युक्त्वा गणेशपूजांते आचार्यो यदत्र संस्थितमिति सर्षपान्विकीर्य शुचीवोहव्येति पंचगव्येन आपोहिष्ठेति कुशोदकेन च यागभूमिं प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं जपेत् । ततो मंडपनैर्ऋत्यां मृदा वेदिं कृत्वैशानादिकोणचतुष्टये । विशंतु भूतले नागा लोकपालाश्च सर्वतः । अस्मिन्मंडपेऽवतिष्ठंतु आयुर्बलकराः सदेति शंकून् रोपयेत् । अग्निभ्योऽप्यथ सर्पेभ्यो ये चाऽन्ये तत्समाश्रिताः । तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति माषभक्तबलीन् दत्वा वेद्युपरि वस्त्रे कुंकुमादिना सुवर्णादिशलाकया । शांता यशोवती कांता विशाला प्राणवाहिनी । सती च सुमती नंदा सुभद्रा नवमी मतेति प्रागायता नवरेखाः कृत्वा । हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया । जया काला विशोका चेत्युदगायताश्च नवरेखाः कृत्वा मध्यकोष्ठचतुष्टयमेकीकृत्य कोणेषु रेखा दत्वा देवता आवाहयेत् । मध्यमपदचतुष्के हृदये ब्रह्मा । पूर्वपदद्वये दक्षिणस्तने अर्यमा । दक्षिणपदद्वये जठरदक्षिणे विवस्वान् । पश्चिमपदद्वये जठरवामे मित्रः । उदक्पदद्वये वामस्तने पृथ्वीधरः । आग्नेयपदार्धयोर्दक्षिणहस्ते सावित्रसवितारौ । नैर्ऋतपदार्धयोर्वृषणमेढ्रयोर्विबुधाऽधिपजयौ । वायव्यपदार्धयोर्वामहस्ते राजयक्ष्मरुद्रौ । ऐशानपदार्धयोरुरोमुखयोरापाऽऽपवत्सौ । ऐशानपददक्षिणार्धे शिरसि शिखी। तद्दक्षिणसार्धपदद्वये दक्षिणनेत्रे पर्जन्यः । तद्दक्षिणपदद्वये दक्षिणश्रोत्रे जयंतः । तद्दक्षिणपदद्वये दक्षिणांऽसे कुलिशायुधः । तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्यः । तद्दक्षिणपदद्वये दक्षिणबाहावेव सत्यः । तद्दक्षिणसार्धपदे दक्षिणकूर्परे भृशः । तद्दक्षिणाऽऽग्नेयपदार्धे दक्षिणप्रबाहावाकाशः । तत्पश्चिमार्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणप्रवाहावेव वायुः । तत्पश्चिमसार्धपदे दक्षिणमणिबंधे पूषा । तत्पश्चिमपदद्वये दक्षिणपार्श्वे वितथः । तत्पश्चिमपदद्वये दक्षिणपार्श्वे एव गृहक्षतः । तत्पश्चिमपदद्वये दक्षिणोरौ यमः । तत्पश्चिमपदद्वये दक्षिणजानौ गंधर्वः । तत्पश्चिमसार्धपदे दक्षिणजंघायां भृंगराजः । तत्पश्चिमनैर्ऋतपदार्धे दक्षिणस्फिचि मृगः । तदुत्तरार्धे पादयोः पितरः । तदुत्तरसार्धपदे वामस्फिचि दौवारिकः ॥ तदुत्तरपदद्वये वामजंघायां सुग्रीवः । तदुत्तरपदद्वये वामजानौ पुष्पदंतः । तदुत्तरपदद्वये वामोरौ वरुणः । तदुत्तरपदद्वये वामपार्श्वे असुरः । तदुत्तरसार्धपदे वामपार्श्वे एव शोषः । तदुत्तरवायव्यपदार्धे वाममणिबंधे पापः । तत्प्राक्पदार्धे वामबाहौ रोगः। तत्प्राक्सार्धपदे वामबाहावेवाऽहिः । तत्प्राक्पदद्वये वामकूर्परे मुख्यः । तत्प्राक्पदद्वये वामबाहौ भल्लाटः ॥ तत्प्राक्पदद्वये वामबाहावेव सोमः ॥ तत्प्राक्पदद्वये वामांऽसे सर्पः । तत्प्राक्सार्धपदे वामश्रोत्रे अदितिः । तत्प्रागर्धपदे वामनेत्रे दितिः । उत्तरे वास्तोष्पत इति वास्तोष्पतिः । ऐशान्यादिविदिक्षु । चरकी विदारी पूतना पापराक्षसी । प्रागादिदिक्षु । स्कंदः । अर्यमा ।जृंभकः । पिलिपिच्छःततस्तान्संपूज्य ।मंडलादैशाने महीद्यौरित्यादिना कलशं संस्थाप्य वरुणं तत्राऽऽवाह्य संपूज्य ब्रह्मादिभ्यः पायसबलींश्चरक्यादिभ्यो माषभक्तबलींश्च दत्त्वा मंडपं पावमानेन राक्षोघ्नेन च त्रिसूत्र्यावेष्टयेत् । ततः पूर्वस्यामग्निमीळे पुरोहितमिति सुदृढं तोरणमावाह्य सुदृढतोरणाय नम इति संपूज्य तत्र राहुबृहस्पती संपूज्य कलशं संस्थाप्य ध्रुवं पूजयेत् । ततो दाक्षिणे इषेत्वेति सुभद्रतोरणमावाह्य तत्र सूर्याऽगारकौ संपूज्य कलशं संस्थाप्य धरां पूजयेत् । ततः पश्चिमे अग्नआयाहीति सुकर्मतोरणमावाह्य तत्र शुक्रबुधौ संपूज्य कलशं संस्थाप्य तत्र वाक्पतिं पूजयेत् । तत उत्तरे शंनोदेवीरिति सुहोत्रतोरणमावाह्य सोमकेतुशनीन्संपूज्य कलशं संस्थाप्य विघ्नेशं पूजयेत् । ततः पूर्वद्वारे कलशद्वयं संस्थाप्य (प्रतिद्वारशाखमेकैकमित्यर्थः) तत्र ऐरावतं संपूज्य । ऋग्वेदः पद्मपत्राक्षो गायत्रः सोम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवतः ॥ अत्रिगोत्रस्तु विप्रेंद्र ऋत्विक् त्वं मे मखे भवेति ॥ ह्यावृग्वेदिनावृत्विजौ वृत्वाऽग्निमीळे इति संपूज्य इंद्रं ध्यात्वा । एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधराऽमरेश। संवीज्यमानोऽप्सरसां गणेन रक्षाऽध्वरं नो भगवन्नमस्ते ॥ भो इंद्र इहागच्छेहतिष्ठेतींद्रं कलशयोरावाह्याऽऽशुः शिशान इति पीतां पताकां पीतं ध्वजं चोच्छ्रित्य त्रातारमितींद्रं संपूज्य। इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः। शतयज्वा च यो देवस्तस्मै नित्यं नमो नम इति नत्वा इंद्राय सांगाय सपरिवाराय माषभक्तबलिं समर्पयामीति बलिं दत्वाऽऽचामेत् । तत आग्नेयें कलशं संस्थाप्य तत्र पुंडरीकममृतं च संपूज्याग्निं ध्यात्वा ॐ । एह्येहि सर्वाऽमरहव्यवाहमुनिप्रवीरैरभितोऽभिजुष्ट । तेजस्विना लोकगणेन सार्धं समाऽध्वरं पाहि कवे नमस्ते ॥ इत्यावाह्याऽग्निं दूतमिति रक्तां पताकां ध्वजं चोच्छ्रित्याऽग्निं संपूज्य । आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः । धूमकेतुरजोऽध्यक्षस्तस्मै नित्यं नमो नम इति बलिं समर्प्याऽऽचामेत् । ततो दक्षिणे कलशौ संस्थाप्य तत्र वामनं दिग्गजं संपूज्य यजुर्वेदिनावृत्विजौ। कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः । काश्यपेयस्तु विप्रेंद्र ऋत्विक् त्वं मे मखे भवेति वृत्वा इषेत्वोति संपूज्य यमं ध्यात्वा । एह्येहि वैवस्वत धर्मराज सर्वाऽमरैरर्चितधर्ममूर्त्ते । शुभाऽशुभाऽऽनंदशुचामधीश शिवाय नः पाहि मखं नमस्ते ॥ इत्यावाह्याऽऽयंगौरिति कृष्णां पताकां ध्वजं चोच्छ्रित्य यमाय सोमामिति संपूज्य। महामाहिषमारूढं दंडहस्तं महाबलं । आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यतामिति बलिं दत्वाऽऽचामेत् । ततो नैर्ऋत्यां कलशं संस्थाप्य तत्र कुमुदं दुर्जयं च संपूज्य निर्ऋतिं ध्यात्वा। एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः । ममाऽध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥ इत्यावाह्य मोषुण इति नीलां पताकां ध्वजं चोच्छ्रित्य संपूज्य। निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनं । आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यतामिति बलिं समर्प्याऽऽचामेत् । ततः पश्चिमे कलशौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्थाप्य तत्रांऽजनं दिग्गजं संपूज्य सामवेदिनावृत्विजौ । सामवेदस्तु पिंगाक्षो जागतः शक्रदैवतः । भारद्वाजस्तु विप्रेंद्र ऋत्विक् त्वं मे मखे भवेति वृत्वा अग्नआयाहीति संपूज्य वरुणं ध्यात्वा । एह्येहि यादोगणवारिधीनां गणेन पर्जन्य सहाऽप्सरोभिः । विद्याधरेंद्राऽमरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥ इत्यावाह्येमंमेवरुणेति श्वेतां पताकां ध्वजं चोच्छ्रित्य संपूज्य । पाशहस्तं च वरुणमर्णसां पतिमीश्वरं । आवाहयामि यज्ञेऽस्मिन् वरुणाय नमो नम इति बलिं समर्प्याऽऽचामेत् । ततो वायव्ये कलशं निधाय तत्र पुष्पदंतं सिद्धार्थं चाऽऽवाह्य वायुं ध्यात्वा । एह्येहि यज्ञे मम रक्षणाय मृगाऽधिरूढः सह सिद्धसंघैः । प्राणाऽधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते ॥ इत्यावाह्य वायोशतमिति धूम्रां पताकां ध्वजं चोच्छ्रित्य संपूज्य । वायुमाकाशगं चैव पवनं वेगवद्गतिं । आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यतां ॥ अनाकारो महौजाश्च यथादृष्टगतिर्दिवि । तस्मै पूज्याय जगतो वायवेऽहं नमामि चेति बलिं दत्वाऽऽचामेत् । तत उत्तरे कलशौ संस्थाप्य तत्र सार्वभौमं दिग्गजं संपूज्य अथर्ववेदिनावृत्विजौ । बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः। वैशंपायन विप्रेंद्र ऋत्विक् त्वं मे मखे भवेति वृत्वा शंनोदेवीरिति संपूज्य कुबेरं ध्यात्वा । एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्धं । सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥ इत्यावाह्याऽऽप्यायस्वेति हरितां पताकां ध्वजं चोच्छ्रित्य संपूज्य। सर्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थितः। तस्मै सोमाय देवाय नक्षत्रपतये नम इति बलिं दत्वाऽऽचामेत्। तत ऐशान्यां कलशं निधाय तत्र सुप्रतीकं मंगलं च संपूज्य ईशानं ध्यात्वा। एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगधरेण सार्धं। लोकेन यज्ञेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ इत्यावाह्य अभित्वादेवसवितरिति श्वेतां पताकां ध्वजं चोच्छ्रित्य संपूज्य । वृषस्कंधसमारूढ शूलहस्त त्रिलोचन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यतां ॥ सर्वाऽधिपो महादेव ईशानः शुक्ल ईश्वरः । शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नम इति बलिं दत्वाऽऽचामेत् । तत ऐशानीपूर्वयोर्मध्येऽनंतं ध्यात्वा । एह्येहि पातालधराऽमरेंद्रनागांऽगनाकिंनरगीयमान । यक्षोरगेंद्राऽमरलोकसंघैरनंत रक्षाऽध्वरमस्मदीयमित्यावाह्य श्वेतां पताकां ध्वजं चोच्छ्रित्याऽऽयंगौरिति संपूज्य । योऽसावनंतरूपेण ब्रह्मांडं सचराचरं । पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नम इति बलिं दत्वाऽऽचामेत् । ततः पश्चिमनैर्ऋत्योर्मध्ये ब्रह्माणं ध्यात्वा । एह्येहि सर्वाधिपते सुरेंद्रलोकेन सार्धं पितृदेवताभिः । सर्वस्य धाताऽस्यमितप्रभावो विशाऽध्वरं नः सततं शिवायेत्यावाह्य ब्रह्मजज्ञानमिति रक्तां पताकां ध्वजं चोच्छ्रित्य संपूज्य । पद्मयोनिश्चतुर्मूर्तिर्वेदाऽऽवासः पितामहः । यज्ञाऽध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नम इति बलिं दत्वाऽऽचामेत् । ततो मंडपमध्ये इंद्रस्यवृष्ण इति महाध्वजमुच्छ्रित्य तत्र ब्रह्मजज्ञानमिति ब्रह्माणं संपूज्य मंडपस्तंभेषु सर्वेभ्यो देवेभ्यो नमः । वंशेषु किंनरेभ्यो नमः । पृष्ठे पन्नगेभ्यो नम इति संपूज्य पूर्वस्यां किंचिद्भूमिमुपलिप्य । त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वंतु तानि मे । देवदानवगंधर्वा यक्षराक्षसपन्नगाः । ऋषयो मनवो गावो देवमातर एव च । सर्वे ममाऽध्वरे रक्षां प्रकुर्वंतु मुदान्विताः ॥ ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह । रक्षंतु मंडपं सर्वे घ्नंतु रक्षांसि सर्वतः ॥ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः । त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः । ब्रह्मणे विष्णवे शिवाय देवेभ्यो दानवेभ्यो गंधर्वेभ्यो यक्षेभ्यो राक्षसेभ्यो पन्नगेभ्य ऋषिभ्यो मनुष्येभ्यो गोभ्यो देवमातृभ्यो नम इति संपूज्य बलिं दद्यात् ॥ इति मंडपप्रतिष्ठा ॥ सा च मंडपाऽभावे न कार्या । द्वारलोपात् । कूटमंडपे तु कार्यैव । विंशद्धस्तप्रमाणेन मंडपं कूटमेव चेति लैंगे विकल्पोक्त्या व्रीहियववत्समानविधानत्वादित्यन्यत्र विस्तरः । तत आचार्योऽमुकहोमे अग्निप्रतिष्ठां कर्तुमुपलेपनादिकुंडसंस्कारं मेखलायोनिदेवतास्था-

CC-0. In Public Domain. Digitization by eGangotri

पनपूजनं च करिष्ये इति संकल्प्य कुंडं संस्कृत्य कुशोदकेन प्रोक्ष्योर्ध्वमेखलायां रक्तवर्णाऽलंकृतायां ब्रह्मजज्ञानमिति ब्रह्माणं। मध्यमेखलायां श्वेतवर्णाऽलंकृतायां इदंविष्णुरिति विष्णुं। अधोमेखलायां कृष्णवर्णयुतायां कद्रुद्रायेति रुद्रं। योन्यां गौरीर्मिमायेति गौरीं च संपूज्याऽग्निं प्रतिष्ठाप्य ग्रहवेद्यां सर्वतोभद्रं कृत्वा तत्र वक्ष्यमाणदेवता आवाहयेत्। यथा। मध्ये। ब्रह्मजज्ञानं वामदेवो ब्रह्मा त्रिष्टुप्। ब्रह्मावाहने विनियोगः। उत्तरादिषु। आप्यायस्व गोतमः सोमो गायत्री। अभित्वा शुनःशेप ईशानो गायत्री। इंद्रंवो मधुच्छंदा इंद्रो गायत्री। अग्निंदूतं मेधातिथिरग्निर्गायत्री। यमायसोमं यमो यमोऽनुष्टुप्। मोषुणः कण्वो निर्ऋतिर्गायत्री। तत्त्वायामि शुनः शेपो वरुणस्त्रिष्टुप्। वायोशतं वामदेवो वायुरनुष्टुप्। वायुसोममध्यादिषु। उमयाअत्र वसिष्ठो वसवस्त्रिष्टुप्। आरुद्रासः श्यावाश्वो रुद्रा जगती। त्वांनु मत्स्यो मान्यो वाऽऽदित्या गायत्री। अश्विनावर्तिर्गोतमोऽश्विनावुष्णिक्। ओमासो मधुच्छंदा विश्वेदेवा गायत्री। अभित्वं वामदेवः सप्तयक्षा अष्टिः। आयंगौः सर्पराज्ञी सर्पा गायत्री। अप्सरसामृष्यशृंगो गंधर्वाप्सरसोऽनुष्टुप्। ब्रह्मसोमयोर्मध्ये। यदक्रंदो दीर्घतमाः स्कंदस्त्रिष्टुप्। ऋषभमृषभो नंदीश्वरोऽनुष्टुप्। कद्रुद्राय कण्वःशूलो गायत्री। कुमारं कुमारो महाकालस्त्रिष्टुप्। ब्रह्मेशानमध्ये। अदितिर्बृहस्पतिर्दक्षोऽनुष्टुप्। ब्रह्मेंद्रमध्ये। तामग्निवर्णा सौभरिर्दुर्गा त्रिष्टुप्। इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री। ब्रह्माग्निमध्ये। उदीरतां शंखः स्वधा त्रिष्टुप्। ब्रह्मयमयोर्मध्ये। परंमृत्यो संकुसुको मृत्युरोगास्त्रिष्टुप्। ब्रह्मनिर्ऋतिमध्ये। गणानांत्वा गृत्समदो गणपतिर्जगती। ब्रह्मवरुणमध्ये। शंनोदेवीः सिंधुद्वीप आपो गायत्री। ब्रह्मवायुमध्ये। मरुतायस्य गोतमो मरुतो गायत्री। ब्रह्मणःपादमूले। स्योना मेधातिथिर्भूमिर्गायत्री। तत्रैव। इमंमेगंगे सिंधुक्षित्नद्यो जगती। तत्रैव। धाम्नोधाम्नो वामदेवः सप्तसागरा अनुष्टुप्। तदुपरि मेरुं। बाह्ये सोमादिसंनिधौ क्रमेणाऽऽयुधानि। गदां। त्रिशूलं। वज्रं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तिं । दंडं । खड्गं । पाशं । अंकुशं । उत्तरादिषु ऋषीन् । गौतमं । भरद्वाजं । विश्वामित्रं । कश्यपं । जमदग्निं । वसिष्ठं । अत्रिं । अरुंधतीं । पूर्वादिषु मातॄः । ऐंद्रीं कौमारीं । ब्राह्मीं । वाराहीं । चामुंडां । वैष्णवीं । माहेश्वरीं । वैनायकीं । तदस्तु । गृहावै इत्यावाह्य संपूज्य ग्रहमंडलं विलिख्य ग्रहान् स्थापयेत् । तद्यथा । ग्रहवेद्यां वस्त्रेऽष्टदलं पद्मं गंधादिना कृत्वा मध्ये कर्णिकायां वर्तुलमंडले ताम्रप्रतिमायां अक्षतपुंजे फलादौ वा आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् । सूर्यावाहने विनियोगः । ॐआकृष्णेन० । ॐभूर्भुवःस्वः कलिंगदेशोद्भव काश्यपसगोत्र सूर्येहाऽऽगच्छेहतिष्ठ सूर्याय नमः सूर्यमावाहमायामीति सूर्यं स्थापयेत् । एवमग्रेऽपि । आग्नेयदले चतुरस्रे स्फटिकप्रतिमायां । आप्यायस्व गोतमः सोमो गायत्री । सोमाऽऽवाहने० । ॐआप्यायस्व० ॐभू० यमुनातीरोद्भवाऽऽत्रेयसगोत्र सोमेहा० । दक्षिणे त्रिकोणे रक्तचंदनप्र० । अग्निर्मूर्धाविरूपोंऽगारको गायत्री । अंगारकावा० । ॐअग्निर्मूर्धा० ॐभू० अवंतीसमुद्भव भारद्वाजसगोत्र अंगारकेहा० । ऐशाने बाणाकारे स्वर्णप्र० । उद्बुध्यध्वं बुधो बुधस्त्रिष्टुप् । बुधावा० । ॐउद्बुध्यध्वं० ॐभू० मगधदेशोद्भवाऽऽत्रेयसगोत्र बुधेहा० । उत्तरे दीर्घचतुरस्रे स्वर्णप्र० । बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप् । बृहस्पत्यावा० । ॐबृहस्पतेअति० ॐभू० सिंधुदेशोद्भवांऽऽगिरससगोत्र बृहस्पते इहा० । पूर्वे पंचकोणे रजतप्र० । शुक्रः पराशरः शुक्रो द्विपदा विराट् । शुक्रावा० । ॐशुक्रःशुशु० ॐभू० भोजकटदेशोद्भव भार्गवसगोत्र शुक्रेहा० । पश्चिमे धनुराकारे आयसप्र० । शमग्निरिरिंबिठिः शनिरुष्णिक् । शन्यावाहने० । ॐशमाग्नि० ॐभू० सौराष्ट्रदेशोद्भव काश्यपसगोत्र शने इहा० । नैर्ऋते शूर्पाकारे ससिप्र० । कयानो वामदेवो राहुर्गायत्री । राह्वावा० । ॐकयानश्चित्र० ॐभू० राठिनापुरोद्भव पैठीनासिसगोत्र राहो इहा० । वायव्ये ध्वजाकारे कांस्यप्र० । केतुंकृण्वन्मधुच्छंदाः केतुर्गायत्री । केत्वावाहने० । ॐकेतुंकृण्व० ॐभू० अंतर्वेदिसमुद्भव जैमिनिसगोत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केतो इहा० । ततः सूर्यादीनां दक्षिणेऽधिदेवता वामे च प्रत्यधिदेवताः क्रमेणाऽऽवाहयेत् । ताश्च तत्तद्ग्रहनिर्माणद्रव्यैरेव कार्याः । अधि-
प्रत्यधिदेवांश्च तत्तद्वर्णाकृतींल्लिखेदिति याज्ञवल्क्योक्तेः । तत्राऽधिदेवतास्तु । त्र्यंबकं वसिष्ठो रुद्रोऽनुष्टुप् । रुद्रावाहने० । रुद्रेहा० । गौ-
रीर्मिमाय दीर्घतमा उमा जगती । उमे इहा० । यदक्रंदो दीर्घतमाः स्कंदस्त्रिष्टुप् । स्कंदेहा० । विष्णोर्नुकं दीर्घतमा नारायणस्त्रिष्टुप् ।
नारायणेहा० । ब्रह्मजज्ञानं वामदेवो ब्रह्मा त्रिष्टुप् । ब्रह्मन्निहा० । इंद्रं वो मधुच्छंदा इंद्रो गायत्री । इंद्रेहा० । यमायसोमं यमो यमोऽनुष्टुप् ।
यमेहा० । मोषुणः कण्वः कालो गायत्री । कालेहा० । उषोवाजं प्रस्कण्वश्चित्रगुप्तो बृहती । चित्रगुप्तेहा० । अथ प्रत्यधिदेवताः । अग्निंदूतं मे-
धातिथिरग्निर्गायत्री । अग्न इहा० । अप्सु मे मेधातिथिरापोऽनुष्टुप् । आपः इहागच्छतेहतिष्ठत० । स्योना मेधातिथिर्भूमिर्गायत्री । भूमे इहा० ।
इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री । विष्णो इहा० । इंद्रश्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप् । इंद्रेहा० । इंद्राणीं वृषाकपिरिंद्राणी पंक्तिः । इंद्राणी-
हा० । प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । प्रजापते इहा० । आयंगौः सर्पराज्ञी सर्पा गायत्री । सर्पाः इहागच्छतेहतिष्ठत० । ब्रह्मजज्ञानं
वामदेवो ब्रह्मा त्रिष्टुप् । ब्रह्मन्निहा० । अथ साद्गुण्यदेवताः । तत्र रविशनिकेतुगुरूणां मध्ये गणपतिं परितः प्रागादिषु दुर्गादिचतुष्टयं तदु-
त्तरे च क्षेत्रपालमावाहयेत् । गणानांत्वा गृत्समदो गणपतिर्जगती । गणपते इहा० । जातवेदसे कश्यपो दुर्गात्रिष्टुप् । दुर्गे इहा० । तववायो
व्यश्वो वायुर्गायत्री । वायो इहा० । आदिद्त्स आकाशो गायत्री । आकाशेहा० । एषोउषाः प्रस्कण्वोऽऽश्विनौ गायत्री । अश्विनाविहाग-
च्छतमिहतिष्ठतं० । क्षेत्रस्यपतिना वामदेवः क्षेत्रपालोऽनुष्टुप् । क्षेत्रपालेहा० । तदुत्तरे च वास्तोष्पतिमप्यावाहयेदित्येके । वास्तोष्पते वसिष्ठो
वास्तोष्पतिस्त्रिष्टुप् । वास्तोष्पते इहा० । ततः प्रागादिदलाग्रेषु लोकपालानावाहयेत् । इंद्रंविश्वा जेतेंद्रोऽनुष्टुप् । इंद्रेहा० । अग्निंदूतं मेधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिथिरग्निर्गायत्री । अग्ने इहा० । यमायसोमं यमो यमोऽनुष्टुप् । यमेहा० । मोषुणःकण्वो निर्ऋतिर्गायत्री । निर्ऋते इहा० । त्वं नो अग्ने वामदेवो वरुणस्त्रिष्टुप् । वरुणेहा० । तववायो व्यश्वो वायुर्गायत्री । वायो इहा० । सोमोधेनुं गोतमः सोमस्त्रिष्टुप् । सोमेहा० । तमीशानं गोतम ईशानो जगती । ईशानेहा० । लक्षहोमे तु ग्रहाणां पूर्वे गरुत्मंतं । मनोजवा नेमोगरुत्माननुष्टुप् । गरुत्मदावाहने० । मनोजवा अयमान० । सामध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः । विषपापहरो नित्यमतः शांतिं प्रयच्छ मे । इति गरुत्मंतमावाहयेत् । कोटिहोमे वेद्यां पूर्वे ब्रह्मजज्ञानमिति ब्रह्माणं । मध्ये इदंविष्णुरिति विष्णुं । पश्चिमे त्र्यंबकमिति रुद्रं । उत्तरे ज्मयाअत्रेति वसून् । ऐशान्यां नवग्रहान् । आग्नेय्यां मरुतो यस्येति मरुतः । उत्तरे वायुं । ऐशान्यां लोकपालांश्चाऽऽवाह्य संपूज्य प्रार्थयेत् । आदित्या वासवो रुद्रा मरुतो लोकपास्तथा । ब्रह्मा जनार्दनश्चैव शूलपाणिर्महेश्वरः ॥ अत्र संनिहिताः सर्वे भवंतु मखभागिनः । पूजां गृह्णंतु सर्वेऽत्र मया भक्त्योपपादितां ॥ कुर्वंतु च शुभं सर्वे यज्ञकर्तुः समाहिताः । ततो ग्रहादीन् प्रणवादिनमोंऽतनामभिरुक्ततत्तद्वर्णवस्त्रगंधपुष्पधूपदीपनैवेद्यफलतांबूलदक्षिणानमस्कारैः संपूजयेत् । एवमाहोमसमाप्ति प्रत्यहं कुर्यात् । ततः फलपुष्पमालापल्लवोपशोभितं वितानं बृहस्पतिदेवत्यं सूर्यादिभ्य इदं नममेत्युत्सृज्य ग्रहवेद्युपरि बध्नीयात् । ततो ग्रहवेदेरैशान्यां महीद्यौरिति भूमिं स्पृष्ट्वौषधयःसमिति यवान्निक्षिप्याऽऽकलशोष्विति कुंभं निधायेमंमेगंगइति तीर्थजलेनाऽऽपूर्य तत्र गंधद्वारामिति गंधं । याओषधीरिति सर्वौषधीः । दधिक्राव्ण इति दधि । ओषधयःसमित्यक्षतान् । कांडात्कांडादिति दूर्वाः । अश्वत्थेव इति चूताऽश्वत्थवटोदुंबरप्लक्षपल्लवान् । स्योनापृथिवीत्यश्वगजस्थानवल्मीकसंगमह्रदगोकुलराजद्वारेभ्यः सप्तमृदः । याःफलिनीरिति फलं । सिहरत्नानीति पंचरत्नानि । हिरण्यरूप इति हिरण्यं च क्षिप्त्वा युवासुवासा इति वस्त्रयुग्मेनाऽऽवेष्ट्य पूर्णादर्वीति पूर्णपात्रं निधायाऽवेतहेळोवरुणेति वरुणमावाह्य सर्वे

CC-0. In Public Domain. Digitization by eGangotri

समुद्राः सरितः सरांसि च नदास्तथा। आयांतु यजमानस्य दुरितक्षयकारकाः। इति तीर्थान्यावाह्य संपूज्य। कलशस्य मुखे०। देवदानवसंवादे
इत्याद्यैः कुंभं संप्रार्थ्य कुंडेऽन्वाधानादि। प्रत्येकं निर्वापप्रोक्षणादिना समोप्यैकत्र भिन्नान्वा चरून् श्रपयित्वाऽऽज्यभागवराहुत्यंते यजमानो
द्रव्याणि तत्तद्देवताश्चतुर्थ्यंता उद्दिश्योत्सृजेन्नमम यथादैवतमस्त्विति त्यजेत्। ततो ग्रहाणामुक्तसमिधः प्रादेशमात्रा मधुघृतदधियुताश्चरुमाज्यं
च तत्तन्मंत्रैः प्रत्येकमष्टोत्तरसहस्राद्यन्यतमसंख्ययाऽधिदेवप्रत्यधिदेवसाद्गुण्यदेवतालोकपालेभ्यश्च तान्येव द्रव्याण्युक्तमंत्रैरुक्तसंख्यया हुत्वा
लक्षहोमे गरुत्मते कोटिहोमे तु ब्रह्मादिदेवताभ्यस्तान्येव द्रव्याण्यष्टशताद्यन्यतमसंख्यया तत्तन्मंत्रैर्जुहुयात्। ततश्चरोः सोमंराजानमिति स्वि-
ष्टकृतं हुत्वा यवाद्यन्यतमद्रव्येण ग्रहेभ्यस्तत्तन्मंत्रैर्दशदशाहुतीर्हुत्वा समस्तव्याहृतिभिरयुतादिसंख्यया होमः कार्यः। स्विष्टकृच्चांऽते भिन्नः।
अयुतलक्षहोमादिसमाप्तौ स्विष्टकृन्नास्त्येव प्रायश्चित्तादि पूर्णाहुत्याद्येव कार्यमिति हेमाद्रिमदनरत्नादयः। तन्न। अयुतहोमादावतिदेशप्राप्तस्य
तस्य बाधे मानाऽभावात्। एतच्चरोरधार्यत्वात्पर्युषितत्वापत्तेश्चोक्तं। तस्यैव स्विष्टकृद्द्रव्यत्वादिति कातीयशाखोक्तेः। अन्ये त्वंत्यदिने एव स्वि-
ष्टकृत्। अन्यथा सुत्योत्कर्षे सवनीयपशुयागादौ का गतिः। शेषस्थापनार्थं त्वाज्यप्रक्षेपादिरुपाय आस्थेय इति वदंति। वयं तु स्विष्टकृद्या-
गद्वयं कार्यं। स्विष्टकृद्यागो हि माभूच्छेषस्य तत्स्थापनस्य च प्रयोजकः। परप्रयुक्तद्रव्योपजीवित्वात्। शेषस्तु तस्य प्रयोजक एव। संस्कार्य-
त्वात्। अन्यथा पशुपुरोडाशादावपि पृथक्स्विष्टकृदिदं न स्यात्। हेमाद्र्यादिलिखनाच्चैवमाभाति। एकबार्हिरिध्माज्यस्विष्टकृतः स्युस्तुल्यकाला
इत्याश्वलायनोक्तेः। दिनरूपकालैक्ये एकः स्विष्टकृत्। कालभेदे तु नानेति युक्तमुत्पश्यामः। ततः शुभे मुहूर्ते होमं समाप्य स्विष्टकृदादि प्रायश्चित्तहो-
मांते दिक्पालेभ्यो ग्रहेभ्यो विनायकादिभ्यः क्षेत्रपालाय च बलीन्दत्वा स्रुचि द्वादशगृहीतमाज्यं फलयुतं गृहीत्वा तस्यां गंधपुष्पाऽक्षताऽलंकृताग्रं स्रु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वमधोबिलं निधाय स्रुक्स्रुवं शंखमुद्रया गृहीत्वोर्ध्वस्तिष्ठन् मूर्धानं भरद्वाजोऽग्निर्वैश्वानरस्त्रिष्टुप्। पूर्णाहुतौ विनि०।अनेन पूर्णाहुतिं हुत्वा अग्नये वैश्वानरायेदं नममेति त्यागः। यद्वा मूर्धानं०। पुनस्त्वाग्निर्वसुरुद्रादित्यास्त्रिष्टुप्। पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप्। सप्ततेअग्ने सप्तवानग्निर्जगती। पूर्णाहुतौ०।इति चतुर्भिर्हुत्वा इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नये च नममेति त्यागः कार्यः। ततो लक्षकोटिहोमयोर्वसोर्धारां जुहुयात्। सा चेत्थं। वह्नेरुपरि स्तंभद्वयविधृतामौदुंबरीमृज्वीमकोटरां बाहुप्रमाणामार्द्रां स्रुचं पूर्वाग्रां निधाय तदुपरि शृंखलाऽवलंबितेन निर्मलघृतपूरितेन ताम्रेण मृन्मयेन वा कुंभेनाऽधो यवमात्रच्छिद्रेणाऽऽज्यं मुंचता स्रुक्प्रणालिकयाऽग्रे सुवर्णजिह्वातोऽधो निपतंतीमग्नेरुपरि वसोर्धारां पातयेत्। पतंत्यां च तस्यां चमकाऽनुवाकानाग्नेयादीनि सूक्तानि श्रावयेत्। तत्र कूयवाश्रम इत्ययं मंत्रो द्वादशवारमावर्तनीयः। चमकाऽनुवाकानामग्निः कांड ऋषिः। आद्याऽऽग्नावैष्णवी गायत्री। शिष्टानां वाजादयोऽन्नादिविशेषा देवताः। यजुश्छंदः। अग्निमीळे नवानां मधुच्छंदा अग्निर्गायत्री। विष्णोर्नुकमिति षण्णां दीर्घतमा विष्णुरनुष्टुप्। आतोपितरिति पंचदशानां गृत्समदो रुद्रस्त्रिष्टुप्। स्वादिष्ठयेति दशानां मधुच्छंदाः सोमः पवमानो गायत्री। कायमान इति महावैश्वानरसाम्नो वैश्वानरो महावैश्वानरः पथ्या बृहती। मूर्धानमिति ज्येष्ठसाम्नो भरद्वाजो वैश्वानरस्त्रिष्टुप्। वसोर्धारायां विनि०। सामगानाऽसंभवे ऋङ्मात्रं पठेत्। एतच्चोपलक्षणं। तेनाऽन्यदप्याग्नेयादि यथाऽभ्यासं पठेत्। ततो वसोर्धारांजुहोतीत्यनुवाकमपि पठेत्। एवं वसोर्धारां विधाय संस्रावहोमादिकर्मशेषं समापयेत्। ततः सर्वौषधैः सर्वगंधैश्च प्रागुक्तैर्विलिप्तांऽगं प्राङ्मुखं यजमानं सपरिवारं चत्वारो विप्रा उदङ्मुखा ऐशानीमुखा वा ग्रहकुंभोदकेन समुद्रज्येष्ठा इत्याद्यैरभिषिंचेयुः। पौराणैश्च। तेच। सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥ प्रद्युम्नश्चाऽनिरुद्धश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवंतु विजयाय ते । आखंडलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शांतिः क्षांतिस्तुष्टिश्च मातरः ॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः । आदित्यश्चंद्रमा भौमो बुधजीवसिताऽर्कजाः ॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः । देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाऽप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्याऽवयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये इति । ततः स्नात्वा शुक्लांबरगंधमाल्यधरः प्राङ्मुखो यजमानो मंडपदेवतानां ग्रहादीनां चोत्तरपूजां विधायाऽग्निं संपूज्य विभूतिं धारयेत् । ततो वरणक्रमेण ऋत्विजः प्रतिनिधयश्चोदङ्मुखाः प्राङ्मुखयजमानहस्ते श्रेयः संपादनं कुर्युः । तद्यथा । आचार्यः अमुककर्मणि मया यत्कृतमाचार्यत्वं (ब्रह्मादिभिस्तु ब्रह्मत्वं सदस्यत्वमित्याद्यूह्यं) तदुत्पन्नश्रेयोदानं क० । यजमानः । आचार्यादिभ्यः अ० कर्मणः श्रेयोग्रहणं क० । तत आचार्यः शिवा आपः संत्विति यजमानहस्ते जलं क्षिपेत् । सौमनस्य० पुष्पं । अक्षतं चारिष्टं० अक्षतान् । दीर्घमायुः० पुनर्जलं । मया भवन्नियोगेन अ० कर्मणि यथांशेन यत्कृतं जपहोमादि तदुत्पन्नं यच्छ्रेयस्तत्तुभ्यमहं संप्रददे । तेन त्वं श्रेयस्वी भव । सच तथास्त्विति वदेत् । एवं ब्रह्मादयः । ततः कर्ताऽग्नेः पश्चादाचार्यर्त्विजः उदङ्मुखान् संपूज्य देशकालौ संकीर्त्य कृतैतदयुतहोमाख्यग्रहयज्ञस्य प्रतिष्ठासिद्ध्यर्थं श्रीसूर्यप्रीत्यर्थं इमां कपिलां रुद्रदेवत्याममुकगोत्रेभ्योऽमुकशर्मणे आचार्याय दक्षिणां संप्रददे नममेत्युक्त्वा । कपिले सर्वदेवानां पूजनीयाऽसि रोहिणि । तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे इति पठेत् । एवमग्रे । पुण्यस्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंख पुण्यानां मंगलानां च मंगलं । विष्णुना विधृतो नित्यमतः शांतिं० ॥ इति सोमाय शंखं । धर्मस्त्वं वृषरूपेण जगदानंदकारकः । अष्ट-मूर्त्तेरधिष्ठानमतः पाहि सनातनेति भौमाय वृषं ॥ हिरण्यगर्भगर्भस्थं० ॥ इति बुधाय हेम । पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं । प्रदानात्तस्य वै विष्णो अतः शांतिं० ॥ इति गुरवे पीतवस्त्रं । विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः । चंद्राऽर्कवाहनं नित्यमतः शांतिं० ॥ इति शुक्रायाऽश्वं । यस्मात्त्वं पृथिवी कृष्णा धेनुः केशवसंनिभा । सर्वपापहरा नित्यमतः शांतिं० ॥ इति शनये कृष्णां गां । यस्मादायस कर्माणि त्वदधीनानि सर्वदा । लांगलान्यायुधादीनि तस्माच्छांतिं० ॥ इति राहवे लोहं । यस्मात्त्वं छाग यज्ञानामंगत्वेन व्यवस्थितः । यानं विभावसोर्नित्यमतः शांतिं० ॥ इति केतवे छागं । सर्वेषां वा गावः । तांश्च । गवामंगेषु तिष्ठंति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र चेति देयाः । सर्वेभ्यो वा सुवर्णं । सर्वपक्षेषु शय्या रत्नानि भूमिश्चाऽधिकानि । तन्मंत्रास्तु । यस्मादशून्यं शयनं केशवस्य शिवस्य च । शय्या ममाऽप्यशून्याऽस्तु दत्ता जन्मनि जन्मनीति शय्यां ॥ यथा रत्नेषु सर्वेषु सर्वे देवाः प्रतिष्ठिताः । तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराइति रत्नानि ॥ यथा भूमिप्रदानस्य कलां नाऽर्हंति षोडशीं । दानान्यन्यानि मे शांतिर्भूमिदानाद्भवत्विहेति भूमिं ॥ वस्त्रकांचनरत्नान्यपि यथाश्रद्धं दद्यात् । ततो ब्रह्मादिऋत्विग्भ्यो द्वारजापकेभ्योऽन्येभ्यश्चोक्तरीत्या यथाशक्ति दक्षिणां दत्वा यांतुदेवेति देवान् गच्छगच्छेत्यग्निं च विसृज्य तत्पीठं सोपस्करमाचार्यहस्ते प्रतिपाद्य पत्न्या सह रूपंरूपमित्याज्यावलोकनांते तदाज्यं सदक्षिणं ब्राह्मणाय दत्वोक्तसंख्यया गुडौदनादिभिर्विप्रान् संभोज्याशिषो गृहीत्वा कर्मेश्वरार्पणं कुर्यात् ॥ इतिकमलाकरभट्टकृतावयुतहोमप्रयोगः ॥ अथ लक्षहोमः ॥ मात्स्ये । कथितोऽयुतहोमोऽयं लक्षहोममतः शृणु । सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः ॥ पितॄणां वल्लभं साक्षाद्भुक्तिमुक्तिफलप्रदं । ग्रहताराबलं

Nepal Sanskrit University, Balmeeki Campus, Exhibhwandi

CC-0. In Public Domain. Digitization by eGangotri

लब्ध्वा कुर्याद्ब्राह्मणवाचनं ॥ " शां० सा० अत्र वर्ज्य कैश्चिदुक्तं । अर्कश्चंद्रादष्टमे ज्ञश्चतुर्थे मंदः शुक्रादष्टमेंऽगारकश्चेत् । राहुर्धर्मे जीवतः खेटसुप्तौ होमे नाशः पुत्रदाराधनानां ॥ अस्माद्दशगुणः प्रोक्तो लक्षहोमः स्वयंभुवा । आहुतीभिः प्रयत्नेन दक्षिणाभिस्तथैव च ॥ अन्येन गुडौदनादिनैवेद्येन दशगुणत्वं ज्ञेयं । अथ कुंडमंडपादि । द्विहस्तविस्तृतं तद्वच्चतुर्हस्ताऽऽयतं पुनः । लक्षहोमे भवेत्कुंडं योनिवत्कं त्रिमेखलं ॥ " शां० म० व्यासतो द्विहस्तविस्तृतं फलतश्चतुर्हस्तायतं भवतीत्यर्थः । " चतुर्हस्तायतमिति पक्षांतरं चिरदाहियवादिविषयं । अन्ये तु क्षेत्रफलोक्तिरियं । द्विहस्तकरण्यां हि चतुर्हस्तं क्षेत्रं भवति । तेनैक एव पक्ष इत्याहुः ॥ अत्रर्त्विजो बृहत्पराशरेणोक्ताः । युग्मास्तु ऋत्विजः कार्या ब्राह्मणा ये विपश्चितः । नित्यं जपपराश्चैव नियोज्यास्ते दश द्विजाः ॥ कंदमूलफलाऽऽहारा दधिक्षीराऽशिनोऽपि वा ॥ मात्स्ये । द्विरंगुलोच्छ्रिता कार्या प्रथमा मेखला बुधैः । द्विरंगुलोन्नता तत्र द्वितीया समुदाहृता ॥ उच्छ्रायविस्तराभ्यां च तृतीया चतुरंगुला । चतुरंगुलविस्तारः पूर्वयोरपि शस्यते ॥ तस्य चोत्तरपूर्वेण वितस्तित्रयसंमितं । प्रागुदक्प्रवणं तद्वच्चतुरस्रं समंततः ॥ विष्कंभार्धोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणा । अष्टादशांगुलोच्चमित्यर्थः । संस्थापनाय देवानां वप्रत्रयसमावृतं । द्विरंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः ॥ (द्विरंगुलेत्यार्षं) अंगुलोच्छ्रायकं प्रोक्तं वप्रद्वयमथोपरि । द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः ॥ दशांगुलोच्छ्रिता भित्तिः स्थंडिले स्यात्तथोपरि । तस्मिन्नावाहयेद्देवान् पूर्ववच्छुक्लतंडुलैः ॥ आदित्याऽभिमुखाः सर्वे साऽधिप्रत्यधिदेवताः । स्थापनीयाः प्रयत्नेन नांऽतरेण पराङ्मुखाः ॥ गरुत्मानधिकस्तत्र संस्थाप्यः श्रियमिच्छता । स च सर्वांते वेद्यां पूर्वभागे स्थाप्यः । अंते तु बादरायण इति न्यायात् । ग्रहमध्ये गरुत्मदादिदेवा न स्थाप्या इति हेमाद्रिः । तदावाहने मंत्रः । सामध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः । विषपापहरो नित्यमतः शांतिं प्रयच्छ मे ॥ विषाऽपहरण इति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्ववत्कुंभमामंत्र्य तद्धोमं समाचरेत् । सहस्राणा शतं हुत्वा समित्संख्याधिकं पुनः ॥ पूर्ववत्समिदाज्यचरून् हुत्वा सुपर्णोसिगरुत्मानिति 'इंद्रंमित्रमिति वा' गरुडहोमं कृत्वा समस्ताभिर्व्याहृतिभिर्लक्षहोमं कुर्यादित्यर्थः । घृतकुंभवसोर्धारां पातयेदनलोपरि । औदुंबरीमथाऽऽर्द्रां च ऋज्वीं कोटरवर्जितां [पर्णशाखाविवर्जितां] ॥ बाहुमात्रां स्रुचं कृत्वा ततः स्तंभद्वयोपरि । बाहोर्मात्रा प्रमाणं यस्यास्तां हस्तद्वयांऽतरालदीर्घामित्यर्थः । कुंभमूले यवमात्रं छिद्रं कार्यमित्युक्तं हेमाद्रौ । घृतधारां ततः सम्यगग्नेरुपरि पातयेत् ॥ श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवं । महावैश्वानरं साम ज्येष्ठसाम च पाठयेत् ॥ स्नानं च यजमानस्य पूर्ववत् स्वतिवाचनं । पूर्ववत् सुरास्त्वामित्यादिमंत्रैरभिषेकपूर्वकमित्यर्थः । दातव्या यजमानेन पूर्ववद्दक्षिणाः पृथक् । कामक्रोधविहीनेन ऋत्विग्भ्यः शांतचेतसा ॥ न कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवः । अदत्वा लोभमोहाद्वा कुलक्षयमवाप्नुयात् ॥ तद्वच्च दश चाऽष्टौ वा लक्षहोमेऽपि ऋत्विजः । कर्तव्याः शक्तितस्तद्वच्चत्वारो वा विमत्सराः ॥ "शां० म० ब्रह्माचार्यसहितानामेवेयं संख्येति केचित् ।" नवग्रहमखात्सर्वं लक्षहोमे दशोत्तरं । कृत्वा दद्यान्मुनिश्रेष्ठ भूषणान्यपि शक्तितः ॥ शयनानि सवस्त्राणि हैमानि कटकानि च । कर्णांगुलीपवित्राणि कंठसूत्राणि शक्तितः ॥ अन्नदानं यथाशक्त्या कर्तव्यं भूतिमिच्छता । अन्नहीनः कृतो यस्माद्दुर्भिक्षफलदो भवेत् ॥ न चाऽत्यल्पधनः कुर्याल्लक्षहोमं नरः कचित् । तस्मात्पीडाकरो नित्यं य एव भवति ग्रहः । तमेव पूजयेद्भक्त्या द्वौ वा त्रीन्वा यथाविधि ॥ एकमप्यर्चयेद्भक्त्या ब्राह्मणं वेदपारगं । दक्षिणाभिः प्रयत्नेन न बहूनल्पवित्तवान् ॥ लक्षहोमस्तु कर्तव्यो यदा वित्तं भवेद्गृहे । यतः सर्वानवाप्नोति कुर्वन्कामान् विधानतः ॥ फलं तु । पूज्यते शिवलोके च वस्वादित्यमरुद्गणैः । यावत्कल्पशतान्यष्टावथ मोक्षमवाप्नुयात् ॥ सकामो यस्त्विमं कुर्याल्लक्षहोमं यथाविधि । सर्वान्कामानवाप्नोति पदं चाऽनंतमश्नुते ॥ पुत्रार्थी लभते पु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्धनार्थी लभते धनं । भार्यार्थी लभते भार्यां कुमारी च शुभं पतिं ॥ भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् । यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलं ॥ निष्कामः कुरुते यस्तु परं ब्रह्माऽधिगच्छति ॥ इति लक्षहोमः ॥ अथ कोटिहोमः ॥ मात्स्ये । अस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा । आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च ॥ पूर्ववद् ग्रहदेवानामावाहनविसर्जने । होममंत्रास्त एवोक्ताः स्नाने दाने तथैव च ॥ कुंडमंडपवेदीनां विशेषोऽयं निबोध मे ॥ कोटिहोमे चतुर्हस्तं चतुरस्रं च सर्वतः । योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलं ॥ " शां० म० सर्वतश्चतुर्हस्तमिति विस्ताराऽऽयामखातेष्वित्यर्थः । वक्त्रं कंठः । योनिकंठयुतमिति पितामहचरणाः ।" एकं योनिवक्त्रं पश्चिमेऽपरं दक्षिण इति हेमाद्रौ मदनरत्ने चोक्तं । वेदिश्च कोटिहोमे स्याद्वितस्तीनां चतुष्टयं । चतुरस्रा समंतात्तु त्रिभिर्वप्रैः समावृता ॥ वप्रप्रमाणं पूर्वोक्तं वेदिकायास्तथोच्छ्रयः । यत्तु भविष्ये । कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः । चतुर्हस्तां समां चैव हस्तमात्रोच्छ्रितां नृपेति तत्क्षेत्रफलपरं । तथा षोडशहस्तः स्यान्मंडपश्च चतुर्मुखः ॥ पूर्वद्वारे च संस्थाप्य बह्वृचं वेदपारगं । यजुर्वेदविदं याम्ये पश्चिमे सामवेदिनं॥ अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः । अष्टौ तु होमकाः कार्या वेदवेदांगवेदिनः ॥ एवं द्वादश तान्विप्रान् वस्त्रमाल्याऽनुलेपनैः । पूर्ववत्पूजयेद्भक्त्या सर्वाभरणभूषणैः ॥ रात्रिसूक्तं च रौद्रं च पावमानं सुमंगलं । पूर्वतो बह्वृचः शांतिं पठन्नास्त उदङ्मुखः ॥ शाक्रं सौम्यं च रौद्रं च कौष्मांडं शांतिमेव च । पाठयेद्दक्षिणद्वारे यजुर्वेदिनमुत्तमं ॥ सौपर्णमथ वैराजमाग्नेयं रुद्रसंहितां । ज्येष्टसाम तथा शांतिं छंदोगः पश्चिमे पठेत् ॥ शांतिसूक्तं च सौरं च तथा शाकुनिकं शुभं । पौष्टिकं च तथा राजन्नुत्तरेणाऽप्यथर्ववित् ॥ पंचभिः सप्तभिर्वाऽपि होमः कार्योऽथ पूर्ववत् । पूर्वद्वारे इति जापका उक्ताः । द्वारपालास्तु भिन्ना इति हेमाद्रिः । पंचभिः सप्तभिरिति द्वादश होमकाः । वाशब्दोऽष्टापेक्षयोक्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्स्ये एवं षोडशाऽप्युक्ताः । तत्रापि ऋत्विजः कार्या रविनंदन षोडश । सर्वहोमेषु राजर्षे दयाचिंचेषु पावना इति । हेमाद्रौ तु विंशति-श्चतुर्विंशतिर्द्वात्रिंशाच्चतुःषष्टिः शतं वा होतार इत्युक्तं । स्नाने दाने च मंत्राः स्युस्त एव मुनिसत्तम । वसोर्धाराविधानं च लक्षहोमवदिष्यते ॥ अनेन विधिना यस्तु कोटिहोमं समाचरेत् । सर्वान् कामानवाप्नोति ततो विष्णुपदं व्रजेत् ॥ अश्वमेधसहस्राणि दश चाऽष्टौ च धर्मवित् । कृत्वा यत्फलमाप्नोति कोटिहोमात्तदश्नुते ॥ ब्रह्महत्यासहस्राणि भ्रूणहत्याऽर्बुदानि च । नश्यंति कोटिहोमेन यथावच्छिवभाषितं ॥ इति मात्स्ये कोटिहोमः ॥ अथलक्षहोमादौ हेमाद्रिमदनरत्नयोर्नृसिंहपुराणे विशेषः । दुःस्वप्नदर्शने घोरे ग्रहपीडासु चात्मनः । हसंतीं प्रतिमां चैव ज्वलंतीं च विशेषतः ॥ प्रस्वेदयुक्तां प्रतिमां दृष्ट्वा च नृपनंदन । तथा महाज्वरग्रस्तो धारां देवस्य मूर्धनि ॥ संततं नरसिंहस्य कुर्याद्वा कारयेद्बुधः । अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ नरसिंहः समाराध्यो लक्षहोमं च कारयेत् ॥ अनावृष्टिमहामारीज्वररोगभये तथा ॥ नरसिंहं समाराध्य ब्राह्मणैर्वेदपारगैः । कारयेल्लक्षहोमं तु ग्रामपश्च नराधिपः ॥ दृष्ट्वोपसर्गमरणं प्रजानामात्मनश्च यः । सम्यगाराध्य यत्नेन नरसिंहस्य मंदिरे ॥ शंकरायतने वाऽपि कोटिहोमं समाचरेत् । प्रमाणं बाहुमात्रं तु सर्वतः कुंडलक्षणं ॥ ब्रह्मचारी व्रते युक्तस्त्रिरात्रं तु विशेषतः । अहोरात्रमुपोष्याऽथ गायत्रीमयुतं जपेत् ॥ निराहाराश्च शुचयस्ते सर्वे संयतेंद्रियाः । आरभेयुस्ततो यज्ञं ततो होममतंद्रिताः ॥ यवधान्यतिलैर्मिश्रैर्गायत्र्या प्रथमाहुतिं । जुहुयादेकचित्तेन स्वाहाकाराऽन्वितं बुधः ॥ ततो व्याहृतीभिः पश्चाज्जुहुयाच्च तिलादिकं । यावत्प्रपूर्यते संख्या लक्षं वा कोटिरेव वा ॥ समस्तव्याहृतिभिरेकाहुतिरित्यर्थः । तावद्दिने दिने कुर्यादच्युताऽर्चनपूर्वकं । तावच्च भोजनं दद्याद्यावद्धोमं समाचरेत् ॥ समाप्ते दक्षिणां दद्यात्ततः प्रोक्ष्योदकेन च । एवं कृते तु ग्रामस्य राज्ञा जनपदस्य च ॥ सर्वबाधाप्रशमना शां-

CC-0. In Public Domain. Digitization by eGangotri

तिर्भवति सर्वदा । अथ गायत्र्याद्ययुतहोमः । हेमाद्रौ मदनरत्ने च देवीपुराणे । षडस्रं लक्षणोपेतं वैडूर्यं कारयेच्छिवं । हेमपीठं सुशोभाढ्यं चंद्रार्कौ तत्र मातरः ॥ चर्चिकाद्याः प्रकर्तव्याः पूर्वादिपरिकल्पिताः । ग्रहाणां प्राग्वत्पूजा कार्या । लक्षहोमः प्रकर्तव्यः सर्वपीडानिवारणः ॥ गायत्र्या ग्रहमंत्रैश्च कूष्मांडैर्जातवेदसे । ऐंद्रवारुणवाह्नेयैर्वायुयाम्यैः सवैष्णवैः ॥ होमः शतसहस्रस्तु अत्रोत्कृष्टो विधीयते । अत्र मंत्रविभागं तु बृहत्पराशरोक्तं वक्ष्यामः । सर्वपीडाविनाशाय कोटिहोमः शुभावहः । यवव्रीहिघृतक्षीरतिलाः कंगुप्रसारिकाः । पंकजोशीरबिल्वाम्रदला होमे प्रकीर्तिताः ॥ तत्रैव ब्रह्मोवाच । लक्षहोमं प्रवक्ष्यामि यथा प्रोक्तं तु शंभुना । भूमिकंपे दिशां दाहे ग्रहयुद्ध उपस्थिते ॥ केतुसंदर्शने चैव आदित्यस्य च कंपने । कृष्णवर्णेऽथ वा सूर्ये तथा छिद्रसमन्विते ॥ रक्तवृष्टिस्तथा नद्यो विपरीता वहंति च । निर्गतं गगनाद्धूमं वारिमध्येऽग्निसंस्थितिः ॥ यस्य राशौ ग्रहाः पंच षट् सप्त च सुराधिप । ग्रहणं चंद्रसूर्यस्य ग्रहैर्वाऽष्टमसंस्थितैः ॥ सूर्यस्याऽभ्यर्चनं कार्यं शिवस्याऽशुभनाशनं । लक्षहोमं महाहोमं कोटिहोमं पुरोदितं ॥ गोभूहिरण्यवस्त्राऽन्नतिलदानं शुभावहं । पायसं दधि क्षीराज्यं देयं नैवेद्यमुत्तमं ॥ एकलिंगे प्रकर्तव्यमथो विप्रगृहेषु च । वृषादिरहितमेकलिंगं । बाहुमात्रे ततः कुंडे जंघामात्रेऽथवा पुनः ॥ होतव्यं सुरराजेंद्र नाऽन्येषु विधिरीदृशः । अहं ते कथयिष्यामि लक्षहोमस्य यो विधिः ॥ चतुर्हस्तं तथा कुंडं विस्तारं सुरसत्तम । षोडशांगुलविस्तारमुच्छ्राये षोडशांगुलं ॥ चतुरंगुलं सवेदोष्ठं चतुर्हस्तस्य कीर्तितं । द्वादशांगुलविस्तारा दैर्घ्याद्द्विगुणविस्तरा ॥ योनिः कुंडे प्रकर्तव्या नाऽधिका शस्यते क्वचित् । यवव्रीहिघृतं क्षीरं तिलाः कंगुर्दलानि च ॥ चूतस्य सुरराजेंद्र पालाश्यः समिधस्तथा । दूर्वाः कुशाः शमी ज्येष्ठा औदुंबर्यः शुभावहाः ॥ गायत्री त्र्यंबकं चाऽपि शंभवायेत्यथापि च । जातवेदसमंत्रेण महाँइंद्रेण चैव हि ॥ सहस्रशीर्षेण नमोहिरण्येनेत्यथापि हि । रुद्रमंत्रैस्तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौरैः पंचरात्रागमोदितैः ॥ होतव्यं शतमष्टौ तु सहस्रमथ संख्यया । पंकजोत्पलबिल्वादिहोमद्रव्यं शुभावहं ॥ कंपनं स्वेदनं गात्रे अश्रुपातार्थजल्पनं । देवतानां सुराध्यक्ष उत्पाताः क्षयकारकाः ॥ लक्षहोमं प्रकुर्वीत कोटिहोममथाऽपि वा । गोदोहं रुद्रभवने महास्नानं शुभावहं ॥ अन्यथा नरको घोरो जायते राजविभ्रमः ॥ ये देवास्ते ग्रहाः सर्वे ये ग्रहास्ते तु जंगमाः । तेषां संपूजनान्नित्यं दीर्घायुः पुरुषो भवेत् ॥ इति गायत्र्याद्ययुतादिहोमः ॥ अत्र लक्षहोमे कोटिहोमे च बृहत्पराशरोक्तो विशेषः । युग्माश्च ऋत्विजः कार्या ब्राह्मणा ये विपश्चितः । नियमव्रतसंपन्नाः सहिताः पार्थिवेन तु ॥ नित्यं जपपराश्चैव नियोज्यास्ते दश द्विजाः । कंदमूलफलाहारा दधिक्षीराऽशिनोऽपि वा ॥ अग्निं सोमं च सूर्यं च विष्णुं चैव प्रजापतिं । विश्वान्देवान्महेंद्रं च पितॄन् स्विष्टकृतं तथा ॥ दधिमधुघृताक्ताश्च समिधश्चैव यज्ञियाः । होमयेच्छतसाहस्रं मंत्रैश्चैव यथाक्रमं ॥ चतुर्विंशति गायत्र्या मानस्तोकेति षट् तथा । त्रिंशद् ग्रहादिमंत्रैश्च चत्वारि विष्णुदैवतैः ॥ कूष्मांडैर्जुहुयात्पंच किरिकया तु षोडश । हुनेद्दशसहस्राणि जातवेदस इत्यृचा ॥ पंचैव तु सहस्राणि जुहुयादिंद्रदैवतैः । तथा । कोटिहोमे चतुर्हस्तं चतुरस्रायतं पुनः । योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलं ॥ वेदी च कोटिहोमे स्याद्धस्तानां च चतुष्टयं । चतुरस्रा समा तद्वत्त्रिभिर्वप्रैः समावृता । वेदचतुष्टयंस्थांश्चतुरो द्वारपालानुक्त्वाऽऽह । अष्टौ तु होमकाः कार्या वेदवेदांगवेदिनः । एवं द्वादश ते पूज्या वस्त्रमाल्याऽनुलेपनैः । अन्यत्प्राग्वत् । कोटिहोमे विशेषो भविष्योत्तरे । संवरण उवाच । भगवन्महदुत्पातसंभवे भूप्रकंपने । निर्घाते पांसुवर्षे च गृहभंगे तथैवच ॥ जन्मनक्षत्रपीडासु अनावृष्टिभयेषु च । क्रूरासु ग्रहपीडासु दुर्भिक्षे राष्ट्रविड्वरे ॥ व्याधीनां संभवे जाते शरीरे चाऽतिपीडिते । क्लेशे महति चोत्पन्ने किं कर्तव्यं नरैस्ततः ॥ स्वर्गस्य साधनं यत्तत्कीर्तिदं धनदं तथा । प्रब्रूहि त्वं द्विजश्रेष्ठ तथाऽऽरोग्यप्रदं नृणां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनत्कुमार उवाच । शृणु राजन्प्रवक्ष्यामि शांतिकर्मण्यनुत्तमं । कोटिहोमाख्यमतुलं सर्वकामफलप्रदं ॥ ब्रह्महत्यादिपापानि येन नश्यंति तत्क्षणात् । उत्पाताः प्रशमं यांति महत्संपद्यते सुखं ॥ विधानं तस्य वक्ष्यामि शृणुष्वैकमना भव । देवाऽगारे च भवने तीर्थे वा शिवसंनिधौ ॥ पर्वते वाऽथ कुर्वीत य इच्छेत्क्षेममात्मनः । शुभनक्षत्रयोगे च वारे सर्वगुणान्विते ॥ यजमानस्याऽनुकूले कोटिहोमं समाचरेत् । पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगं ॥ वस्त्रैर्विभूषणैश्चैव गंधमाल्याऽनुलेपनैः । प्रणम्य विधिवत्तस्मा आत्मानं च निवेदयेत् ॥ त्वं मे यतः पिता० सार्वकामिकं ॥ पुरोहितस्ततः प्राज्ञः शुक्लांबरधरः शुचिः । ब्राह्मणैः संवृतः पुण्यैः संयतः सुसमाहितैः ॥ भूमिभागे समे शुद्धे प्रागुदक्प्रवणे तथा । पुण्याहंवाचयेत्पूर्वं कृत्वा विप्रांस्तु पूजयेत् ॥ ततः समाहितो विप्रैः सूत्रयेन्मंडपं शुभं । उत्तमं शतहस्तं तु तदर्धेन तु मध्यमं ॥ जघन्यं तु तदर्धेन शक्तिकालाद्यपेक्षया । मध्ये तु मंडपस्याऽथ कुंडं कुर्याद्विचक्षणः ॥ अष्टहस्तप्रमाणेन आयामेन तथैवच । मेखलात्रितयं तस्य द्वादशांगुलविस्तृतं ॥ तत्प्रमाणां तथा योनिं कुर्वीत सुसमाहितः । कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः ॥ चतुर्हस्तां समां चैव हस्तमात्रोच्छ्रितां नृप । स्थापनं तत्र देवानां कुर्याद्यत्नेन बुद्धिमान् ॥ उपलिप्य ततो भूमिं मंडपस्य समंततः । विन्यसेत्कलशांस्तत्र जलपूर्णांश्चतुर्दिशं ॥ अश्वत्थप्लक्षचूताद्यैः पल्लवैरुपशोभितान् । वितानमुपरिष्टाच्च मंडपस्य प्रकल्पयेत् ॥ स्थापयेद्दिक्षु सर्वासु तोरणानि विचक्षणः । एवं संभृतसंभारः पुरोधाः सुसमाहितः ॥ पुण्याहजयघोषेण होमकर्म समाचरेत् । स्थापयित्वा सुरान्वेद्यां वक्ष्यमाणानरिंदम ॥ ब्रह्माणं पूर्वभागे तु मध्ये देवं जनार्दनं । पश्चिमे तु तथा रुद्रं वसूनुत्तरतस्तथा ॥ ऐशान्यां च ग्रहान्सर्वानाग्नेय्यां मरुतस्तथा । वायुं सौम्यां तथैशान्यां लोकपालान् क्रमेण तु ॥ एवं संस्थाप्य विबुधान् यथास्थानं नृपोत्तम । पूजयेद्विधिवद्वस्त्रैर्गंधमाल्याऽनुलेपनैः ॥ वेदोक्तमंत्रैस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्लिंगैः पुराणोक्तैः पृथक्पृथक् । आदित्या वसवो० कर्तुः समाहिताः ॥ एवं संपूज्य देवांस्तान्प्रयत्नेन विशुद्धधीः । नैवेद्यैर्विविधैर्भक्ष्यैः फलैर्दीपैः सुशोभनैः ॥ ततस्तु तैर्द्विजैः सार्धं कुंडस्य विधिपूर्वकं । कुर्यात्संस्कारकरणं यथोक्तं वेदवित्तमैः ॥ ततः समाह्वयेद्वह्निं नाम्नाख्यातं घृतार्चिषं । नियोजयेद्द्विजांस्तत्र शतसंख्यान्नृपोत्तम ॥ अलाभे च बहूनां तु यथालाभं नियोजयेत् । विद्यावित्तवयोवृद्धान् गृहस्थान्संयतेंद्रियान् ॥ स्वकर्मनिरतान् शुद्धान् ज्ञानशीलान्प्रयत्नतः । चिंतयेत्तत्र देवेशं पंचास्यं नृप पावकं ॥ मुखानि तस्य चत्वारि सप्तजिह्वानि पार्थिव । एकजिह्वमथैकं तु तत्स्मृतं सार्वकामिकं ॥ धूमायमाने न वृथा होतव्यं ज्वलितेऽनले । ऋग्भिः पूर्वामुखैर्होमो यजुर्भिश्चोत्तरामुखैः ॥ सामभिः पश्चिमे कार्योऽथर्वभिर्दक्षिणामुखैः । ऋग्भिः ऋग्वेदिभिः । आघारावाज्यभागौ तु पूर्वं हुत्वा विचक्षणः ॥ परितश्च परिस्तीर्णे कल्पिते च तथाऽऽसने । ब्राह्मणाः पूर्वमेवं तु सर्वं पश्चात्समाचरेत् ॥ होमो व्याहृतिभिश्चैव सर्वस्तत्र विधीयते । प्रणवादिभिश्च तल्लिंगैः स्वाहाकारांतयोजितैः ॥ जुहुयात्सर्वदेवानां वेद्यां ये चोपकल्पिताः । एवं प्रकल्पयेद्यज्ञं कोटिहोमाख्यमुत्तमं ॥ तिलाः कृष्णा घृताऽभ्यक्ताः किंचिद्व्रीहिसमन्विताः । किंचिद्यवसमायुता इति क्वचित्पाठः । होतव्याः कोटिहोमे तु समिधः सुपलाशजाः ॥ दक्षिणा च सहस्रं धेनवः सहस्रं शंखा इत्यादि । सर्वेषामथवागाव इति पक्षे नवशतं गावो नवशतं सुवर्णाः । पूर्णे पूर्णे सहस्रे तु दद्यात्पूर्णाहुतिं शुभां । पंचमे तन्मुखे राजन्सर्वकामार्थसिद्धये ॥ पूर्णाहुत्यः समाख्याताः कोटिहोमे नराधिप । सहस्राणि नृपश्रेष्ठ दश शास्त्रविशारदैः ॥ प्रारंभदिनमारभ्य ब्राह्मणैर्ब्रह्मवादिभिः । होतव्यं यजमानैश्च अथवा सुपुरोहितैः ॥ क्रोधलोभादयो दोषा वर्जनीयाः प्रयत्नतः । यजमानेन राजेंद्र सर्वकामानभीप्सता ॥ अथकोटिहोमस्य शतमुखदशमुखद्विमुखैकमुखभेदा उच्यंते । ते च हेमाद्रौ भविष्योत्तरे । संवरण उवाच । बहुत्वात्कर्मणो ब्रह्मन् कोटिहोमः सुदुष्करः । कालेन महता चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्यः प्राप्तुं कथंचन ॥ नियमा ब्रह्मचर्याद्या दुष्करा इति मे मतिः । निरोधो ब्राह्मणानां च भूशय्यादिः सुदुष्करः ॥ कार्ये गुरुलघीयस्त्वपर्वकालाद्यपेक्षया । कोटिहोमस्य संक्षेपं वद मे ब्रह्मसंभव ॥ सनत्कुमार उवाच । शताननो दशमुखो द्विमुखैकमुखस्तथा । चतुर्विधो महाराज कोटिहोमो विधीयते ॥ कार्यस्य गुरुतां ज्ञात्वा नैकट्यमथ पर्वणः । पर्व ग्रहणादि । यथा संक्षेपतः कार्यः कोटिहोमस्तथा शृणु ॥ कृत्वा कुंडशतं दिव्यं यथोक्तं हस्त संमितं । एकैकस्मिंस्तथा कुंडे दश विप्रान्नियोजयेत् ॥ सद्यःपक्षे तु विप्राणां सहस्रं परिकीर्तितं । प्रतिलक्षं दशेत्याशयः । एकस्थानप्रणीतेऽग्नौ सर्वतः परिभाविते ॥ " शां० म० एकस्थानात्सर्वतः सर्वस्मिन्कुंडे परिभाविते संस्कृतेऽग्नौ प्रणीते इत्यर्थः " होमं कुर्युर्द्विजाः सर्वे कुंडे कुंडे यथोदितं । (अत्र सर्वेतिकर्तव्यता प्राग्वत्) यथा कुंडबहुत्वेऽपि राजसूये महाक्रतौ ॥ स्यादेवाऽग्निबहुत्वं तु नच यज्ञो विभिद्यते । तथा कुंडशतेऽप्यत्र घृतार्चिषि नियोजिते ॥ एक एव भवेद्यज्ञः कोटिहोमो न संशयः । एवं यः क्रियते क्षिप्रं व्याकुलैः कार्यगौरवात् ॥ शताननः स विज्ञेयः कोटिहोमो न संशयः । अत्र कुंडानां हस्तमात्रता शीघ्रदाहिघृतादिपरा । तिलयवादौ तु । लक्षार्धे त्रिकरं कुंडं लक्षहोमे चतुष्करं । तथा । अयुतेत्वथ होतव्ये कुंडं स्याद्धस्तमात्रकं । द्विगुणं लक्षहोमे च कोटिहोमे चतुर्गुणमिति तंत्रांतरोक्तं ज्ञेयं । " शां० सा० अत्र चाऽऽचार्यो नैर्ऋतकुंडेऽग्निं प्रतिष्ठापयेत् । ततस्तदग्निमन्येषु कुंडेषु ऋत्विजः प्रणयेयुः " अत्र ऋत्विगाचार्यसहित इत्युक्त्याऽऽचार्यस्य विशेषाऽनुक्तेः सहस्रसंख्या ऋत्विजामेव ॥ इति शतमुखः ॥ स्वल्पैर्होभिः कार्यः स्याद्वर्षाकालादिके यदा । तदा दशमुखः कार्यः कोटिहोमो महामते ॥ विप्राणां द्वे शते तत्र विभज्य विनियोजयेत् । अत्र कोटिदशांशदशलक्षाण्येककुंडे इति । कुंडं पंचकरं प्रोक्तं दशलक्षाहुतौ क्रमादित्युक्तेः पंचहस्तकुंडानि प्रतिकुंडं च ऋत्विजां विंशतिः सि- ॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यति । मंडपश्च पंचाशत्करः पंचविंशतिकरो वा ॥ इति दशमुखः ॥ यत्र कुंडद्वयं कृत्वा विभज्य च विभावसुं । होमं कुर्युर्द्विजा भूयः संस्कृत्य विधिपूर्वकं ॥ शतं तत्र नियोज्यं च विप्राणां प्रविभज्य वै । मासेऽथवाऽर्धमासे वा कार्यकाले ह्युपस्थिते ॥ तदा तु द्विमुखः कार्यः कोटिहोमो विचक्षणैः । यदा तु स्वेच्छया यज्ञं यजमानः समापयेत् ॥ कालेन बहुना राजंस्तदा चैकमुखो भवेत् । एककुंडस्थितो वह्निरेकश्चित्तैः समाहितः ॥ यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्विचक्षणैः । न संख्यानियमश्चाऽत्र ब्राह्मणानां नरोत्तम । न कालनियमश्चैव स्वेच्छया यज्ञ उच्यते ॥ “ शां० म० । एकरात्रं त्रिरात्रं वा पंचरात्रमथापि वा । शिवगाथां विष्णुगाथां शांतिं ब्राह्मणभोजनं ॥ समापयेत्प्रतिदिनमेवं भक्तिसमन्वित इति वासिष्ठेऽप्येकरात्रादिग्रहणं नियमाऽनादरार्थं । ” आवृत्त्या कर्तुकामस्य चातुर्मास्यादिकर्मवत् । सदा प्रसक्तः कर्तव्यो यज्ञोऽयं सार्वकामिकः ॥ अयमेकमुखो राजन् कालेन बहुना भवेत् । बहुविघ्नश्च कालो वै तस्मात्संक्षेपमाचरेत् ॥ यतो हि वित्तमायुश्च चित्तं चैवाऽस्थिरं सदा । अतः संक्षेपतः कार्यं धर्मकार्यं प्रशस्यते ॥ ततः समाप्ते यज्ञे तु कारयेत्सुमहोत्सवं । शंखतूर्यनिनादेन ब्रह्मघोषरवेण च ॥ (ब्रह्म वेदः) ततस्तु दक्षयेद्विप्रानृत्विजः श्रद्धयाऽन्वितः । निष्कैश्च कंकणैश्चैव कुंडलैर्विविधैर्नृप ॥ गोशतं चैव दातव्यमश्वानां च शतं तथा । सहस्रं च सुवर्णानां सर्वेषामपि दापयेत् ॥ ग्रामैर्गजैरथैरश्वैः पूजयेच्च पुरोहितं । दीनांऽधकृपणांश्चाऽन्यान्वरैरन्नैश्च तोषयेत् ॥ ततश्चाऽवभृथे स्नायात्तैर्घटैः पूर्वकल्पितैः । लक्षहोमोक्तमंत्रेण सदा विजयकारिणा ॥ एवं समापयेद्यस्तु कोटिहोममखं शुभं । तस्याऽऽरोग्यं प्रियाः पुत्रा आयुर्वृद्धिश्च संपदः ॥ सर्वपापक्षयश्चाऽऽशु जायते नृपसत्तम । अनावृष्टिभयं नैव उत्पातभयमेव च । दुर्भिक्षग्रहपीडाश्च प्रशमं यांति भूतले ॥ एतत्पुण्यं पापहरं सर्वकामफलप्रदं । सनत्कुमारमुनिना पार्थिवाय निवेदितं ॥ सर्वोपसर्गशमनं भवनाशनं च ये कारयंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुजा नृप कोटिहोमं । भोगानवाप्य मनसोऽभिमतान्प्रकामं ते यांति शक्रसदनं भुवि शुद्धसत्वाः ॥ " शां० म० अत्र यथैते साहस्राः साद्यस्क्रा इत्येकसंज्ञयोपक्रांतेषु क्रमाम्नातेषु च निकायिसंज्ञकेषु यागेषु प्रथमस्याऽऽम्नातधर्मकस्य धर्मा उत्तरेष्वनाम्नातधर्मकेषु निकायित्वाऽवांतरसामान्यात्साहस्रसाद्यस्क्राद्येकनामकत्वाच्च प्रवर्तेत इत्यष्टमे निकायिनां तु पूर्वस्योत्तरेषु प्रवृत्तिः स्यादित्यत्र निरणायि । तथेह चतुर्विधो महाराजकोटिहोमइति चतुर्णां कोटिहोमत्वाऽवांतरसामान्येनाऽऽम्नातधर्मकस्यैकमुखस्य धर्मा अनाम्नातधर्मकेषु द्विमुखादिषु प्रवर्त्तंते। तेन तेषां विकृतित्वं । तत्र द्विमुखे तावत्कुंडद्वयं प्रकृतिप्राप्तेषु शतपंचाशत्पंचविंशतिहस्तमंडपेषु मध्यमनवमांशे कार्यं । तस्यैव मध्यमेनवमांशेतु कुंडंकुर्याद्विचक्षण इति प्रकृतौ वचनेनाऽत्रापि तथाप्राप्तेः । तच्च कुंडद्वयं षड्ढस्तं । दशलक्षमिते होमे षट्करं संप्रचक्षत इति भविष्यत्पुराणात् । पंचहस्तं वा । कुंडं पंचकरं प्रोक्तं दशलक्षाहुतौ क्रमादिति तंत्रांतराच्च । दशलक्षोत्तरमेकोनकोटिपर्यंतं पंचषट्करमित्यर्थः । अयुतहोमतः प्राप्तमेकहस्तत्वं प्राकृतं परिमाणं त्वदृष्टार्थत्वापत्त्याऽप्राकृतकार्यत्वाद्बाध्यते । अर्थात्परिमाणमिति कात्यायनोक्तेश्च । तत्र पंचविंशतिहस्ते मंडपे मध्यनवांशे दक्षिणोत्तरयोः कुंडद्वयं निविशते । कथंचित्प्रकृतितो द्वादशांगुलमेखलाप्राप्तेः । इतरयोस्तु मंडपयोः सुगम एव निवेशः । एवं दशमुखेऽपि प्राकृतैकहस्तत्वबाधेन पंचकराणि षट्कराणि वा दश कुंडानि । तेषु प्रत्येकं दशलक्षाहुतयः । तत्र पंचविंशतिहस्ते मंडपे मध्यमांशे पूर्वादिषु चतुर्दिक्षु मध्ये संलग्नानि चत्वारि कुंडानि । प्राकृतमध्यमांशाऽधिकरणत्वस्य यावत्संभवमनुग्रहस्य न्याय्यत्वात्प्राचि नवमांशे तु प्राकृती चतुष्करा वेदी । सप्तस्वंशेषु षट्कुंडानि। यः कश्चिदेकोंऽशस्तु रिक्त एव ॥ कुंडद्वयं मध्यमांऽशे अष्टस्वंशेष्वष्टावित्यपि केचित् । शतमुखेऽपि पंचविंशतिहस्ते तावन्मंडपे शतकुंड्या निवेशो बाधित एव । पंचाशद्धस्ते यद्यपि संभवति तथापि सहस्रविप्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखेन निवेशो बाधितः । अतः शतहस्ते एव निवेश उच्यते । तत्र मध्यमांशे प्राग्भागे उदक्संस्था पंचानामेका पंक्तिः । तेषां च कुंडानां प्रत्येकमंतरं सार्धपंचहस्ताश्चत्वार्यंगुलानि च । ततः प्रतीच्यामेतादृशमेवाऽन्यत्पंक्तित्रयं कार्यं । पंक्तीनामंतरं चाऽष्टौ हस्ता अष्टांगुलानि च । एवं विंशतिकुंडानि मध्यभागे। अन्येष्वष्टसु भागेषु मध्ये द्वेद्वे अष्टसु दिक्ष्वष्टावष्टाविति । प्रत्येकं दशदशेति । ननु शतकुंडेषु प्रत्येकं लक्षाहुतिप्राप्तिः । नचैतत्सद्यः कोटिहोमपक्षे संभवति । कृत्वा कुंडशतं दिव्यं यथोक्तं हस्तसंमितमिति शतमुखप्रकरणे कुंडानां हस्तपरिमाणोक्तेरिति । तत्रकेचिद्धस्तसंमितमित्यत्र हस्ताभ्यां हस्तैर्वा संमितमिति विग्रहेण द्वित्रिचतुर्हस्तताऽपि युज्यते । द्विहस्तेऽपि तु लक्षमाहुतयः संमात्येव । अतएव हेमाद्रौ । अयुते त्वथ होतव्ये कुंडं स्याद्धस्तमात्रकं । द्विगुणं लक्षहोमे तु कोटिहोमे चतुर्गुणमिति । यद्यप्यौत्सर्गिक एकवचनांतेनैव विग्रहस्तथाप्यनुपपत्त्या द्विबहुवचनांतेनाऽपि क्रियते । यथा सप्तदशप्राजापत्यान्पशूनालभत इत्यत्र चोदकप्राप्तैकपशुनिष्पन्नहृदयाद्येकादशाऽवदानगणाऽनुरोधेन प्रजापतिर्देवता यस्याऽसौ प्राजापत्यः प्राजापत्यः प्राजापत्यश्च प्राजापत्या इति कृत्तद्धितानामेकशेषः। ननु अयं चाऽयं चाऽयं चैत इत्येकशेषोत्तरं तद्धितः । चोदकबाधापत्तेरित्युक्तं । एवं च द्विचतुर्हस्तकुंडसंपत्त्या युज्यंत एकैकस्मिन्कुंडे लक्षमाहुतय इत्याहुः । तातचरणास्तु । व्यासतुल्यखातेन षट्पंचचतुस्त्रिद्व्यंगुलानां पंचमेखलानां विंशत्यंगुलोच्चतया च मध्याऽवकाशविवृद्ध्या एकैकहस्तेष्वपि शक्या एव लक्षमाहुतयः कर्तुं । अनारभ्याऽऽम्नातपंचमेखलापक्षेण प्राकृतमेखलात्रयबाधस्तूपदिष्टैकहस्तत्वाऽनुरोधेनेति युक्तमाहुः । अतैकस्मिन्कुंडे आज्यभागांतं कृत्वाऽन्यकुंडेष्वग्निप्रणयनमिति केचित् । तन्न । वारुणप्राघासिकदक्षिणोत्तरवेद्योरनुष्ठीयमानायां मारुत्यामाग्नेयाद्यष्टहविष्षु चाऽऽघाराज्यभागप्रयाजाद्यंगानांपृथगनुष्ठानवदिहाऽपि तिस्रआहुतीर्जुहोतीतिवत्संख्यया भिन्नेषु कोटिसंख्याकेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होमेषु लक्षशः शतकुंडेष्वनुष्ठीयमानेष्वाज्यभागातस्विष्टकृदाद्यंगाऽनुष्ठानभेदस्यैव न्याय्यत्वात् । किंच अप्रमादार्थेन दीक्षाकालीनजागरेण दीक्षोपयुक्तसंभारसंरक्षणेऽपि प्रायणीयाद्यर्थसंभारसंरक्षणार्थाऽऽतिदेशिकजागरणावृत्तिवदिहाऽप्यग्निसमिंधनार्थेध्माधानावृत्तिः कथमप्यवार्यैव । नह्याचार्यकुंडस्थेऽग्नौ समिद्धे कुंडांतरस्थानां समिंधनं भवति । अतएवाऽयुतहोमे पूर्वलिखिततत्तद्ग्रहाकारनवकुंडीपक्षे प्रधानायतनादग्निं विभज्य कुंडेषु प्रणीय नवाचार्या आज्यभागांतं कृत्वेत्यादिना होमशेषं समाप्य पूर्णाहुतीर्हुत्वेत्यंतेनाऽऽज्यभागांताना स्विष्टकृदादीनां चांऽगा-नामावृत्तिलिखनं प्रयोगपारिजातीयं संगच्छते । तदेव च कोटिहोमे चोदकात्प्राप्तं । प्राकृताऽष्टसंख्याबाधेन नवनवतिसंख्यामात्रं विधी-यते । यद्यपि प्रणयनांतरं तथापि तद्धर्मकमेव । सर्वथांऽगानामावृत्तिरेव । एतावान्परं विशेषः । शतसंख्यया कुंडेषु नवसंख्या ग्रहाद्याकार-स्थलविशेषाश्च निवर्तंते । अतोऽग्निस्थापनोत्तरमेव प्रणयनं । यत्तु पारिजाते मध्यकुंडात्प्रणयनमुक्तं । तन्न । प्रागुदगपवर्गप्रचारबाधात् । तेन तत्संरक्षणार्थं नैर्ऋत्यकुंडादेव प्रणयनं कार्यं । अस्तु वा कथंचिदयुतहोमे मध्यकुंडसद्भावात्तस्य च सर्वप्रधानभूतसूर्यदेवत्यत्वात्कथंचित्ततः प्रणयनं । शतमुखे तु मध्ये कुंडनिवेशाऽभावान्न ततोऽग्निप्रणयनं। मध्यस्थलसमीपवर्तिष्वनेककुंडेषु तु विनिगमनाविरहः । सर्वोऽप्ययं कोटि-होमविचारस्तातचरणैर्द्वैतनिर्णये सुविवृत इति नेह विस्तरः ॥" केचित् ग्रामगजादेः पुरोहितस्य चाऽन्यत्राऽसंभवाच्चतुरोऽपि प्रकारान् राजा-धिकारिकानाहुः । पितृचरणास्तु फलवाक्ये मनुजोक्तेरन्यस्याऽपि बहुधनत्वे राजदत्तग्रामादिदाने वाऽधिकारः । पुरोहितशब्दस्तु गुरवे ग्रा-मरत्नानीतिवदाचार्येऽप्युपपन्न इत्याहुः । अत्र उत्तमं शतहस्तं तु तदर्धेन तु मध्यमं । जघन्यं तु तदर्धेन देशकालाद्यपेक्षयेति भविष्योत्तरो-क्तो मंडपो ज्ञेयः । तत्र शतहस्ते बहिः पंच हस्तान् मध्ये स्तंभचतुष्कमष्टहस्तं दशहस्तं वा दत्वा मध्ये दशदशहस्तोपरि मध्यस्तंभसमान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तंभान् दत्वोपरि तिर्यक्काष्ठानि दत्वा सर्वं मध्यचतुष्कोपर्युच्चं कुर्यात् । अस्याऽशास्त्रीयत्वेऽपि सौकर्यार्थत्वात् । ततः प्रागुदक्सूत्रे दशधा विभज्य दशदश प्रागपराण्युदंचि च सूत्राणि दद्यात् । तेन दशहस्ताः शतं कोष्ठका भवंति । तेषां मध्यं प्रसाध्य द्विहस्तकर्णिकानि चतुरस्राणि पद्मानि संभिन्नानि वा शतं कुंडानि कुर्यात् । तेन दशकुंडानि दशवीथ्यो भवंति । अत्रैकादशन्यायेन दशभेदाद्वारुणप्राघासिक दक्षिणोत्तरविहारवत्तद्देशस्थान्येवांऽगानि तद्देशस्थप्रधानस्योपकुर्वंतीति भूसंस्काराद्याज्यभागांतमिध्माबर्हिःस्रुक्स्रुवप्रणीताचरुश्रपणादिभेदेन पृथक्कुर्यात् । एकस्थानप्रणीतेऽग्नावित्युक्तेराद्यपंक्तावाद्यकुंडे गृह्यं लौकिकं वाऽग्निं निधायाऽन्येषु प्रणयेत् । स्विष्टकृत्पूर्णाहुतिवसोर्धाराद्यपि पृथगेव । सर्वतोमुखयज्ञवत् । तत्राऽध्वर्युभेदात्कर्तृभेदः । अत्र तु तदैक्यमिति विशेषः । इति कमलाकरभट्टकृतौ भविष्योत्तरे शतमुखादिकोटिहोमः ॥ (अत्र कोटिहोमात्परं कतिपयपुस्तकेषु बह्वृचपरिशिष्टोक्तो ग्रहयज्ञप्रयोगोऽधिको दृश्यते । तस्य तु प्रयोगरत्नादौ विस्तरेणोक्तत्वाल्लोकेऽपि विरलप्रचारतयाऽनावश्यकत्वाच्च नेहोपात्तः । किंतु पूर्वमयुतहोमीयप्रयोगे ग्रंथकृता निर्दिष्टानामिमंदेवा इत्यादिमंत्राणां माध्यंदिनशाखागोचरत्वेन बह्वृचाऽनुपयोगित्वात् तत्रैवाऽग्रे स्वस्वशाखीयानामेव तेषामावाहनादौ ग्रहणोपदेशाच्च मयूखधृता वसिष्ठोक्तक्रमाऽनुसारेणैव ग्रहादिमंत्रा दर्शिताः । मंडपकरणार्थं च गणेशकूर्माऽर्चनाद्यप्यत्राऽनुक्तत्वात्तत एवोद्धृतं । एवमन्यत्राऽपि यथायथं ज्ञेयं । ग्रहयज्ञकालनिर्देशकखेटेज्येतिश्लोकात्पूर्वं अथ ग्रहयज्ञकालविचार इति वक्तव्ये अत्रयद्यपीत्यादिसंगृह्यते इत्यंतो लेखस्तत्र भ्रमात्पतित इत्यवधार्यं)

॥ अथ प्रसवशांतयः । “ वि० पा० दुष्टनक्षत्रजननशांतिविधानानि जननाऽशौचोत्तरकाले कार्याणि । सगतिकत्वात् । जन्मतोद्वादशाहेवेत्यादिवक्ष्यमाणवचननिचयाच्छुचिकर्तृकत्वाच्च । एतानि जनननिमित्तकशांतिविधानानि नामकरणात्पूर्वं कार्याणि । नैमित्तिकत्वात् । दु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टनक्षत्रजातानां शांतिं कृत्वा विधानतः । द्वादशैकादशे वाऽह्नि नाम कुर्यात्ततः परमिति स्मृत्यंतराच्च । यदा बहुनिमित्तसंपातस्तदा प्रतिनिमित्तं नैमित्तिकमिति न्यायेन सर्वाणि नैमित्तिकानि कार्याणि । यथाऽमावास्यायां ज्येष्ठानक्षत्रे व्यतीपातादौ जातस्याऽमावास्यादिशांतिः क्रियते । तत्र क्रमस्त्वैच्छिकः । यद्वा तंत्रेणैव कार्याणि । कर्त्रादीनामेकत्वात् । कुमार्या अप्येतत्कार्यं । न्यायसाम्यात् । सुतः सुतावेत्यादिवक्ष्यमाणवचनाच्च । " (अथ सामान्यत्वेन सर्वशांत्युपयोगिकालविचारः । मु० सिं० । स्याच्छांतिकं सह सुमंगलपौष्टिकाभ्यां क्षिप्रध्रुवांऽत्यचरमित्रमघासु शस्तं । खेऽर्के विधौ सुखगते तनुगे गुरौ नो भृग्विज्यमौढ्यमुखरे शुभदं निमित्ते ॥ खेऽर्के लग्नाद्दशमस्थे रवौ । सुखगते चतुर्थस्थिते चंद्रे । तनुगे जन्मस्थे गुरौ च प्रशस्तं । भृग्विज्येति गुरुशुक्रयोर्बाल्यवार्धकाऽस्तेषु न प्रशस्तमित्यर्थः । ध० सिं० मुख्यकालं प्रवक्ष्यामि शांतिहोमस्य यत्नतः । जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने ॥ जननाद्द्वादशाहे शांतिकरणे शांत्युक्तनक्षत्राहुतिवह्निचक्राऽवलोकनादिकं नावश्यकं । कालांतरे त्वावश्यकं । एवमन्यशांतिष्वपि ज्ञेयं । संस्कारनित्यकर्मसु निमित्ताऽव्यवहितनैमित्तिकेषु रोगातुरे च वह्निचक्रादिकं नाऽपेक्षितं । अग्नेः स्थापनवेलायां पूर्णाहुत्यामथापि वा । आहुतिर्वह्निवासश्च विलोक्यौ शांतिकर्मणि ॥ त्र्युत्तरारोहिणीश्रवणधनिष्ठाशततारकापुनर्वसुस्वातिमघाऽश्विनीहस्तपुष्याऽनुराधारेवतीनक्षत्रेषु गुरुशुक्राऽस्तमलमासरहिते शुभवारतिथ्यादौ शांतिः कार्या । निमित्ताऽव्यवहितनैमित्तिके रोगशांतौ चऽस्तादि विचारणा नास्ति । इति प्रसंगात्सर्वशांत्युपयोगी शुभदिननिर्णयः) तत्र बहुप्रसवेषु तच्छांतिषु चोक्तत्वादादौ गोमुखप्रसव उच्यते । गर्गः । प्रणिपत्य रविं वक्ष्ये प्रायश्चित्तमनुस्मरन् । सर्वाऽरिष्टविनाशाय यदुक्तं ज्योतिरर्णवे ॥ (अत्र शांतिके प्रायश्चित्तपदं गौणं । तद्बीजं तु शांतिमयूखारंभे द्रष्टव्यं) पित्ररिष्टे सुताऽरिष्टे मात्ररिष्टे तथैव च । यन्नक्षत्रोत्पत्तौ पित्राद्यरिष्टं श्रुतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेदं कुर्यादित्यर्थः । (अरिष्टं मरणं । नत्वशुभसामान्यं । जातकेऽरिष्टपदस्य मरणवाचित्वेन दृष्टत्वात् । अन्यथा धनहान्यादावपि गोप्रसवशांतिरापद्येतेति भाति) प्रायश्चित्तं तदा कुर्यात्तत्तद्दोषस्य शांतये । " शां० म० तादृशनक्षत्रोत्पत्त्या सूचिते पित्राद्यरिष्टे । प्रायश्चित्तमित्यत्रापि तत्तदित्यन्वेति । देहलीदीपवत् । तेन तत्तद्दोषशांत्यै तत्तत्प्रायश्चित्तं कुर्यादित्यर्थः । " पौष्णाऽश्विन्योर्गुरौ सार्पमघाचित्रेंद्रमूलभे । एषु ऋक्षेषु जातस्य कुर्याद्गोजननं तथा ॥ (पौष्णं रेवती । गुरुः पुष्यः । सार्पमाश्लेषा । इंद्रो ज्येष्ठा) तथाशब्दः समुच्चयार्थः । " शां० सा० तेनाऽत्र प्रायश्चित्तं मूलादिशांतिं गोजननं च कुर्यादिति समुच्चयो विधीयते । अन्यथा गोप्रसवस्याऽप्यनिष्टनिरासार्थत्वेन मूलादिशांत्या विकल्पः स्यात् । नचाऽदृष्टार्थत्वात्समुच्चयः । एकप्रकरणाऽधीतत्वाऽभावात् । अन्यथा क्षयादिनिरसनार्थकदलीदानादेरपि समुच्चयाऽऽपत्तेः । तत्राऽपि शांतिकात्पूर्वं वा पश्चाद्वा गोजननं कार्यं । वि० पा० अयं च गोप्रसवो नक्षत्रादिशांतेः प्राक् कार्यः । प्रथमं गोमुखाज्जन्म ततः शांतिकमाचरेदिति व्यतीपातप्रकरणोक्तेः । बाधकांतराऽभावाच्च । " (अत्र पश्चात्करणमयुक्तं । गोप्रसवात्प्राक् पुत्रमुखदर्शनाऽभावेन शांतिकांतरांऽगभूताऽभिषेकाऽनुपपत्तेः । गोमुखप्रसवं कुर्याच्छांतिं कुर्यात्प्रयत्नतः । प्रथमं गोमुखाज्जन्म ततः शांतिं समाचरेदिति व्यतीपातादिशांतिस्थशौनकीयलिंगाविरोधाच्चेति कश्चित्) तेन पित्ररिष्टादौ तत्तन्नक्षत्रादिशांतिं कृत्वा एतच्च कुर्यादित्यर्थः । पितरिष्टे इत्यनेनैव मूलादावपि प्राप्तेः पुनर्मूलादिग्रहणं यत्र मूलादेश्चतुर्थपादादौ तदभावस्तत्रापि प्राप्त्यर्थं । जन्मर्क्षे वा त्रिजन्मर्क्षे शुभवारे शुभे दिने । (त्रिजन्मर्क्षे जन्मनक्षत्रे तस्माद्दशमे एकोनविंशे चेति नक्षत्रत्रये इत्यर्थः ॥ दिनं चांद्रं तिथिरिति यावत् । अन्यथा पौनरुक्त्याऽऽपत्तेः) कृत्वाऽभ्यंगादिकं सर्वं गृहाऽलंकारपूर्वकं ॥ गोमयेनोपलिप्याऽथ गृहस्यैशानभागके । पंकजं कर्णिकायुक्तं रजोभिः श्वेतवर्णकैः ॥ व्रीहींस्तत्र विनिक्षिप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथावित्ताऽनुसारतः । नवशूर्पे तु तन्मध्ये रक्तवस्त्रं प्रसारयेत् ॥ स्थापयित्वा शिशुं तत्र पुनः सूत्रेण वेष्टयेत् । प्राङ्मुखं तमवाक्पादं तिल-गर्भगतं शिशुं ॥ (अवाक् अवाच्यां दक्षिणस्यां पादौ यस्य तं । अवाक्शब्दस्याऽवाचीशब्दसमानार्थकत्वं व्याकरणे स्पष्टं । अवाङ्मुखः पीडयमान इत्यादाववाक्शब्दस्याऽधोवाचित्वेऽपि प्रकृते न तत् । शिशोरुपवेशनाऽसंभवेन तदसंभवात्) गोमुखं दर्शयित्वाऽथ पुनर्जातं तु गोमुखात् । " शां० सा० शिशुमभि गोमुखं दर्शयित्वेत्यर्थः " त्रिष्णुर्योनिमिति सूक्तेन गव्येन स्नापयेच्छिशुं ॥ (गव्येन पंचगव्येन विष्णु-र्योनिमिति सूक्तेनेत्यस्य देहलीदीपवज्जातमित्यनेन स्नापयेदित्यनेन च संबंधः । सूक्तेन जन्म विचिंत्य पुनरावृत्तेन तेनैव स्नापयेदित्यर्थः। कौस्तुभेऽप्येवं) गवामंगेषुमंत्रेण गवामंगेषु [गोवामांगेषु] संस्पृशेत् । विष्णोः श्रेष्ठेन मंत्रेण गोप्रसूतं तु बालकं ॥ आचार्यस्तु समादाय पश्चान्मात्रे ददेत्तदा । [साचार्यस्तु समादाय पश्चान्मात्रे ददेत्पिता] माता जघन्यभागस्था शिशुमानीय तन्मुखात् ॥ (जघन्यभागः पश्चाद्भागः । तन्मुखाद्गोमुखात्) ततः पित्रे तदा दद्यात्ततो मात्रे प्रदापयेत् । वस्त्रं स्थाप्य पिताऽस्याऽथ [वस्त्रे नवे च संस्थाप्य] पुत्र-स्य मुखमीक्षयेत् । " शां० सा० वस्त्रं स्थाप्य निष्काश्येत्यर्थः " गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च संयुतं (सर्पिः कुशोदकं) । आपोहि-ष्ठादिभिर्मंत्रैरभिषिंचेत्ततः शिशुं ॥ मूर्ध्नि चाऽऽघ्राय तं पुत्रं तन्मंत्रेण तदा पिता । " शां० सा० तन्मंत्रेण अंगादंगादित्यनेन " (कन्या-यास्तूष्णीमाघ्राणं । स इति मंत्रगतपुँल्लिंगविरोधात् । आश्वलायनीयप्रवासप्रकरणे तथैव दर्शनाच्च) अंगादंगात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतं ॥ मूर्धनि त्रिरवघ्राय तं शिशुं स्थापयेत्ततः । पुण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः ॥ दरिद्रायाऽथ विप्राय तां गामभ्यर्च्य दापयेत् । गोवस्त्रस्वर्णधान्यानि दद्यादर्कादितः क्रमात् ॥ " शां० म० अर्कादितः अर्कादीनां प्रीतये ब्राह्मणेभ्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दद्यात् "(गवादिदानमाचार्यादिभ्य एव । उपस्थितत्वात् । अंते दक्षिणाऽनुक्तेश्च) यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तथा पिता ॥ ततो होमं प्रकुर्वीत स्वस्यशाखोक्तमार्गतः ॥ उल्लेखनादिकं कृत्वा चाऽऽज्यभागांतमाचरेत् । (अग्निस्थापनांते ग्रहपूजेति शांतिसारादौ । मयूखे तु सा नोक्ता । इदमेव युक्तं । मूलादिशांतौ अपूजिताभ्योऽपि देवताभ्यो होमस्य सर्वैः स्वीकारात् । भेदे मानाऽभावाच्च) होमस्यैशानदिग्भागे धान्योपरि शुभं घटं ॥ (होमस्य होमदेशस्य) पंचगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत् । क्षीरद्रुमकषायांश्च पंचरत्नानि निक्षिपेत् ॥ कषायो निर्यासः । वस्त्रयुग्मेन संछाद्य गंधादिभिरथाऽर्चयेत् । विष्णुं वरुणमभ्यर्च्य प्रतिमायां विधानतः [प्रतिमां च विधानतः] ॥ " शां० म० प्रतिमां यक्ष्मघ्नः । अग्रे तद्देवत्यहोमविधानात् । चकाराच्च । सं० कौ० प्रतिमां० चकाराच्चेति केचित् । तन्न । विष्ण्वादिपूजायां प्रतिमा-नियमसंभवे अपूर्वपूजांऽतरविधिकल्पनस्याऽन्याय्यत्वात् । चकारस्य विधानशब्दोक्ततत्तदुचितेतिकर्तव्यतानिरूपितसमुच्चयाऽर्थत्वात् । " (वस्तुतस्तु यद्यपि प्रकृतपूजायां प्रतिमानियमस्वीकारे लाघवं तथाप्येकवचनाऽनुपपत्तेर्दुष्परिहरत्वान्मयूखोक्तमेव साधु) यतइंद्रादिभि-र्मंत्रैः कुंभं स्पृष्ट्वाऽभिमंत्रयेत् । यतइंद्रेति षड़्चः सूक्तशेषः । दधिमध्वाज्ययुक्तेन होमं कुर्यात्प्रयत्नतः ॥ युक्तेनेति भावे क्तः । योगेनेत्यर्थः । आपोहिष्ठेति तिसृभिरप्सुमेसोम इत्यथ । (अप्सुम इत्यस्याऽननुष्टुभो ग्रहणमिति कौस्तुभे । युक्तं चैतदेव । पूर्वोत्तरसाहचर्येण गायत्रीछं-दस्कस्यैव लाभात् । तेन क्वचिदनुष्टुभो ग्रहणमिति पाठोऽपपाठ एवेति ज्ञेयं) तद्विष्णोःपरमंपदमक्षीभ्यामिति सूक्ततः ॥ ऋग्भिराभिः प्र-तिऋचमष्टाविंशतिसंख्यया ॥ अशक्तावष्टसंख्यं वा दधिमध्वाज्यसंयुतं ॥ आदित्यादिग्रहाणां च होमं कुर्यात्समंत्रकं । ग्रहाणां च दध्या-दिसंयुतं होमं कुर्यादित्यर्थः । अन्यथा पुनर्दध्यादिग्रहणस्य वैयर्थ्याऽऽपत्तेः ॥ ॥ अथ प्रयोगः ॥ कर्ता पूर्वोक्तशुभकाले उपलेपनादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शां० गृहमलंकृत्य भार्यापुत्राभ्यां सहाऽभ्यंगस्नानं कृत्वा देशकालकीर्तनांऽते अस्य बालकस्याऽमुकदुष्टकालोत्पत्तिसूचितसकलाऽरिष्टपरिहारद्वारा क०
॥३९॥ श्रीपरमेश्वरप्रीत्यर्थं गर्गोक्तां गोप्रसवशांतिं करिष्ये ॥ इति संकल्प्य गणेशं संपूज्याऽऽचार्यं वृणुयात् । आचार्यः प्रादेशकरणांते गृहस्यैशान-
भागे गोमयोपलिप्ते श्वेतवर्णरजोभिः कर्णिकायुक्तं महत्कमलं विलिख्य तत्र यथाशक्ति व्रीहीन्निक्षिप्य तन्मध्ये नवे शूर्पे प्रागग्रे रक्तवस्त्रं प्र-
सार्य तत्र तिलान्विकीर्य तेषु प्राङ्मुखं दक्षिणदिक्पादं शिशुं निधाय रक्तवस्त्रेणाऽऽच्छाद्य सशिशु शूर्पं सूत्रेणाऽऽवेष्ट्य शिशुसमीपे गोमुख-
मानीय तस्मात्प्रसवं भावयेत् । विष्णुर्योनिमित्यादितिसृणां त्वष्टा विष्णुरनुष्टुप् । जन्मचिंतने स्नापने च विनि० । विष्णुर्योनिं० ३ । आवृत्ताभि-
स्ताभिरेव पंचगव्येन शिशुं संस्नाप्य गोः सर्वाऽगानि वामांऽगानि वा स्पृशेत् । मंत्रस्तु । गवामंगेषु तिष्ठंति भुवनानि चतुर्दश । यस्मात्त-
स्माच्छिवं मे स्यादिह लोके परत्र चेति । ततः विष्णोः श्रेष्ठेनेत्यस्य त्वष्टा विष्णुरनुष्टुप् । बालाऽऽदाने विनि० । विष्णोः श्रेष्ठेन० । इति
बालमादाय मात्रे दद्यात् । माता तं गृहीत्वा गोमुखसमीपादानीय तत्पश्चिमभागस्था सती पित्रे दद्यात् । ततः पिता मात्रे दत्वा पुनरादाय
नवे वस्त्रे संस्थाप्य (मातुरुत्संगे कृत्वेति केचित्) आच्छादनमपसार्य पुत्रमुखं निरीक्ष्य पंचगव्येनाऽऽपोहिष्ठेति तिसृभिस्तमभिषिंचेत् । आ-
पोहिष्ठेति तिसृणां सिंधुद्वीप आपो गायत्री । शिशोरभिषेके वि नि० । आपोहिष्ठा० ३ । ततस्तं हस्ताभ्यां परिगृह्य अंगादंगाद्धिरण्यगर्भो धा-
ताऽनुष्टुप् । अवघ्राणे० । अंगादंगात्० शतमिति तन्मूर्धानं त्रिराजिघ्रेत् । प्रत्याघ्राणं मंत्राऽऽवृत्तिः ॥ कन्यायास्तूष्णीमाघ्राणं । ततः शि-
शुमन्यत्र निधाय पुण्याहवाचनं कुर्यात् । तत्र विष्णुवरुणयक्ष्माणः प्रीयंतां । कृतगोजननकर्मणे स्वस्तीति विशेषः । एतदसंभवे तु कृत- ॥३९॥
स्याऽस्य गोमुखप्रसवस्य पुण्याहं भवंतो ब्रुवंतु । एवं स्वस्ति ऋद्धिं श्रीः कल्याणमिति त्रिस्त्रिर्वाचयित्वा धेनुं संपूज्य तां कस्मैचित् दरिद्रब्राह्मणाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधिना दत्वा अर्कादिनवग्रहप्रीत्यर्थं गोवस्त्रस्वर्णधान्यान्याचार्यादिभ्य ऋत्विग्भ्यो दद्यात् । तानि चाऽदक्षिणानि । तत्र मंत्राः । गवामंगेषु० इति गोः । शरण्यं सर्वलोकानां लज्जाया रक्षणं परं । सुवेषधारित्वं यस्माद्वासः शांतिं प्रयच्छतु । इति वस्त्रस्य । हिरण्यगर्भ० इति स्वर्णस्थ । धन्यं करोति दातारमिहलोके परत्र च । तस्मात्प्रदीयते धान्यमतः शांतिं० इति धान्यस्य । ततो ब्राह्मणेभ्यो भूयसीं दक्षिणां दद्यात् । आचार्यः गोजननशांतिहोमं कर्तुं अग्निप्रतिष्ठां क० । स्थंडिले वरदनामानमग्निं (तत्पूर्वं ग्रहांश्चेति केचित्) प्रतिष्ठाप्याऽन्वादध्यात् । चक्षुषी आज्येनेत्यंते अपः प्रधानदेवतां संयुक्तदधिमध्वाज्येन द्वादशोत्तरशतसंख्याभिराहुतिभिः । द्वात्रिंशतसंख्याभिर्वा । विष्णुं प्रधानदेवं संयुक्त० अष्टाविंशतिसंख्या० । अष्टसंख्याभिर्वा । यक्ष्माणं प्रधान० अष्टषष्ट्यधिकशतसं० । अष्टचत्वारिंशत्संख्याभिर्वा । आदित्यादिनवग्रहान् संयुक्त० प्रत्येकं अष्टाविंशति० । अष्टसंख्याभिर्वा । शेषेणस्विष्ट० । (अत्र कमलाकरेण अपः विष्णुं ग्रहांश्चोद्दिश्य प्रतिमंत्रमेकैकाहुतिरुक्ता । तस्य तु मूलोक्तेन विसंवादान्मयूखकौस्तुभशांतिसारविधानपारिजातादिष्वदर्शनाच्च मूलानुसारी मयूखादिधृतः क्रमएवांऽगीकृतः । ग्रंथकृदाशयं तु न विद्मः) अत्र षट्पात्रासादनं । दधिमध्वाज्येन सहाऽऽज्यस्य पर्यग्निकरणं । अथाऽऽज्यभागांऽते अग्नेरैशान्यां गोजननशांतिकर्मणि मुख्यदेवतास्थापनं० । महीद्यौरित्यादिविधिना कुंभं संस्थाप्य तत्र पंचगव्यं तिलान् क्षीरद्रुमकषायान् पंचरत्नानि च क्षिप्त्वा वस्त्रयुग्मेन संछाद्य गंधपुष्पादिभिरलंकृत्य तदुपरि पूर्णपात्रे कृताऽग्न्युत्तारणासु प्रतिमासु विष्ण्वादीनावाहयेत् । (अथ नूतनप्रतिमानामग्न्युत्तारणविधिर्लिख्यते । अद्ये० अस्याः प्रतिमायाः अंगप्रत्यंगसंधिषु विघट्टनोच्छेदनतापनादिजन्यपीडानिरासपूर्वकं देवताऽधिष्ठानत्वयोग्यतासिद्ध्यर्थं अग्न्युत्तारणं क० । स्वर्णादिशलाकया प्रतिमां मधुसर्पिर्भ्यामभ्यज्य इमंमेगंग इति पुरुषसूक्तेन च कुशवारिणाऽभ्युक्ष्य पंचगव्येन प्रोक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निःसातिमिति सप्तर्चेन सूक्तेन अग्निपदरहितेन पुनस्तत्सहितेन च तदुपरि संततजलधारां कुर्यात्) तद्विष्णोर्मेधातिथिर्विष्णुर्गायत्री। विष्ण्वावाहने० । तद्विष्णोः० । अस्यां सुवर्णप्रतिमायां विष्णुं सांगं० । अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरंतु च । अस्यै देवत्वमर्चायै माऽमहेति च कश्चनेति विष्णुं । तत्त्वायामि शुनःशेपो वरुणस्त्रिष्टुप् । वरुणावा० । तत्त्वायामि० इति वरुणं । अक्षीभ्यामित्यस्य विवृहा यक्ष्माऽनुष्टुप् । यक्ष्मावाहने० । अक्षीभ्याते० इति यक्ष्माणं चाऽऽवाह्य संपूज्य (यक्ष्मपूजनं नेत्येके) कुंभं स्पृष्ट्वाऽभिमंत्रयेत । यतइंद्रेति षण्णां भर्ग इंद्रो बृहती । समानां सतोबृहती पंक्तिः । कुंभाऽभिमंत्रणे विनियोगः । यतइंद्रभयामहे० ६ । ततो यजमानेन द्रव्यत्यागे कृते स्रुवेण दधिमध्वाज्यहोमः कार्यः । आपोहिष्ठेतितिसृणां सिंधुद्वीप आपो गायत्री । अप्सुमे सिंधुद्वीप आपो गायत्री । तद्विष्णोर्मेधातिथिर्विष्णु-र्गायत्री । अक्षीभ्यामिति षण्णां विवृहा यक्ष्माऽनुष्टुप् । विहितहोमे० । (अत्र यक्ष्महोमे सूक्तावृत्तिरेवेष्टा । सूक्तत इति मूले दर्शनात् । तंत्रावृत्तिस्तु न दुष्यति) ततो नवग्रहमंत्राः । आकृष्णेन० ९ । एतैः प्रत्यृचं २८ । ८ वा आहुतीर्हुत्वा स्रुवेण स्विष्टकृदादिहोमशेषं समाप्य स्थापितदेवताः संपूज्य ता अग्निं च विसृजेत् । यजमान आचार्याय प्रतिमादि दत्वाऽच्छिद्रं वाचयित्वा ब्राह्मणान्संभोज्य आभि-र्गीर्भिरित्यादिकर्मशेषं समापयेत् । (अत्र केचिद्विष्णुवरुणकलशोदकेनाऽभिषेकं कुर्वंति तत्र तेषामाचारः प्रमाणं) इति गोमुखप्रसवशांति-प्रयोगः ॥ ॥ अथ तिथिनक्षत्रयोगक्रमेण शांतय उच्यंते । तत्रादौ गंडांतः । स त्रिविधः । तिथिलग्ननक्षत्रभेदात् । गंडांतो नाम सं-धिघटिकाः । स चोक्तो ज्योतिर्निबंधे । पूर्णानंदाख्ययोस्तिथ्योः संधिनाडीद्वयं तथा । गंडांतं मृत्युदं जन्म यात्रोद्वाहव्रतादिषु ॥ (पूर्णाः पंचमीदशमीपूर्णिमाः । नंदाश्च षष्ठ्येकादशीप्रतिपदः) कुलीरसिंहयोः कीटचापयोर्मीननमेषयोः । गंडांतमंतरालं स्याद् घटिकार्धं मृतिप्रदं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(कुलीरः कर्कः । कीटो वृश्चिकः । चापं धनुः । मुहूर्तमार्तंडे त्वेकघटिकात्मकं लग्नगंडांतमुक्तं) सार्पेंद्रपौष्णभेष्वंत्यषोडशांशा भसंधयः । तदग्रभेष्वाद्यपादा भाना गंडांतसंज्ञिताः ॥ रत्नमालायां तु नक्षत्रेष्वन्यथोक्तं । पौष्णाऽश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतरालं । तद्गंडांतं स्याच्चतुर्नाडिकं हि यात्राजन्मोद्वाहकालेष्वनिष्टं ॥ अत्र दोषतारतम्यं ज्ञेयं । रत्नसंग्रहे । तिथ्यृक्षगंडे पितृमातृनाशो लग्ने तु संधौ तनयस्य नाशः । सर्वेषु नो जीवति हंति बंधून् जीवन्पुनः स्याद्बहुवारणाऽश्वः ॥ प्रयोगपारिजाते गर्गब्राह्मौ । अश्विनीमघमूलादौ त्रिषट्क-नवनाडिकाः । रेवतीसार्पशाक्रांते मासाश्च ऋतुसायकाः ॥ (सार्पमाश्रेषा । शाक्रंज्येष्ठा । मासाद्वादशऋतवः षट् । सायकाः पंच घटिका इत्यध्याहार्यं) प्रकारांतरेण गंडांतमाह । अश्विनीमघमूलादौ नाडिकाद्वितयं तथा । रेवतीसार्पशाक्रांते नाडिकाद्वयमेव हि ॥ (चतुर्नाडिके एव नक्षत्रगंडांते शांतिः कार्येति संप्रदायः) अश्विनमिघमूलानां पूर्वार्धे बाध्यते पिता । पूषाऽहिशाक्रपश्चार्धे जननी बाध्यते शिशोः ॥ (पूषा रेवती । अहिराश्लेषा) पितृघ्नश्च दिवाजातो रात्रिजातस्तु मातृहा । दिनस्थगंडांतजात इत्यर्थः । आत्मघ्नः संध्ययोर्जातो नास्ति गंडे निरामयः ॥ सर्वेषां गंडजातानां परित्यागो विधीयते । वर्जयेद्दर्शनं श्रावं [तेषां] यावत् षाण्मासिकं भवेत् ॥ तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्तिमान् । कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवं ॥ अष्टाभिश्च चतुर्भिर्वा द्वाभ्यां वा शोभनं तथा । तन्मध्ये पायसे शंखे नवनीतेन पूरिते ॥ राजतं चंद्रमभ्यर्चेत् सितपुष्पसहस्रकैः । दैवज्ञः क्षौमवासास्तु शुक्लमाल्यांबराऽर्चितः ॥ सोमोऽहमिति संचिंत्य पूजां कुर्यादतंद्रितः । जपेत्साहस्रकं मंत्रं श्रद्दधानः समाहितः ॥ आप्यायस्वेति मंत्रेण पूजां कुर्यात्समाहितः । दद्याद्दि दक्षिणामिष्टां गंडदोषप्रशांतये ॥ शुक्लं वागीश्वरं चैव ताम्रपात्रसमन्वितं । गंडदोषोपशांत्यर्थं दद्याद्वेदविदे शुचिः ॥ ज्यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिर्निबंधे त्वेतदंतेऽधिकमप्युक्तं । कुंकुमं चंदनं कुष्ठं गोरोचनमथापि वा ॥ घृतपूर्णेषु कुंभेषु चतुर्षु प्रक्षिपेत्क्रमात् ॥ सहस्राक्षेण मंत्रेण बालकं स्नापयेत्ततः । पितृयुक्तं दिवाजातं मातृयुक्तं तु रात्रिजं ॥ स्नापयेत्पितृमातृभ्यां संध्ययोरुभयोरपि । कांस्यपात्रं घृताऽऽपूर्णं गंडदोषोपशांतये ॥ सक्षीरं मौक्तिकं शंखं श्वेतवस्त्रयुगं शुभं । यजुर्वेदविदे दद्याद्गंडदोषाऽपनुत्तये ॥ दद्याद्धेनुं हिरण्यं च ग्रहांश्चाऽपि प्रपूजयेत् । आयुर्वृद्धिकरं जप्त्वा कुर्याद्ब्राह्मणतर्पणं ॥ " सं० कौ० अत्र चाऽश्विन्यादीनामाद्यभागे त्र्यादिसंख्या रेवत्यादीनामंत्यभागे च द्वादशादिसंख्या घटिका दुष्टाः । तत्तदाद्यांत्यभागस्थे द्वेद्वे घटिके दुष्टतरे । अश्विन्याद्यादिभागो दिवा रेवत्याद्यंत्यभागो रात्रौ दुष्टतमः । तत्रापि द्वे घटिके अतिदुष्टे । अतएव निमित्ततारतम्येन नैमित्तिकतारतम्यं कांस्यपात्रपरिमाणचतुष्टयोपन्यासेन सूचितं । अतएव चंद्रवागीश्वरप्रतिमादावपि कर्षादिपरिमाणतारतम्यमूह्यं । ध० सिं० तिथिगंडांते पूर्वार्धे जन्मनि तत्कालं स्नात्वा वृषभदानं तन्मूल्यदानं वा कृत्वा सूतकांते शांतिः कार्या । उत्तरार्धे जन्मनि तु शांतिमांत्रं । लग्नगंडांते पूर्वार्धे जन्मनि कांचनदानं । उत्तरार्धे शांतिमात्रं । " अत्र गोमुखप्रसवो ग्रहशांतिश्च कार्या । अन्यत्स्पष्टमिति प्रयोगो नोच्यते । उत्तरगार्ग्यः ॥ अभुक्तेतरजातस्य सूतकांऽत्यदिने तथा । शांतिं शुभेऽह्नि वा कुर्यात्तावत्पुत्रं न लोकयेत् ॥ तिथिगंडे त्वनड्वाहं नक्षत्रे धेनुरुच्यते । कांचनं लग्नगंडे तु गंडदोषो विनश्यति ॥ आद्यभागे पितुर्गंडे त्रयाणामभिषेचनं । मातृपितृशिशूनामित्यर्थः । इतरत्र शिशोर्मातुरभिषेकं च कारयेत् ॥ द्वयोरेवेत्यर्थः । इति गर्गाद्युक्ततिथिलग्ननक्षत्रगंडांतशांतयः । " सं० कौ० अथ प्रयोगः । तिथिगंडपूर्वार्धजन्मनि कर्त्ता तत्कालं स्नात्वा पुत्रमनालोक्याऽस्यशिशोस्तिथिगंडपूर्वार्धजननसूचितसर्वारिष्टनिरसनद्वारा श्रीपरमे० अनडुत्प्रदानं करिष्ये इति संकल्प्य नालच्छेदनात्पूर्वं गंडदोषे ब्राह्मणपूजनपूर्वकमनड्वाहं दद्यात् । असंभवे कार्षापणाऽष्टकं वा । सूतकांते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभदिने वा स्नातोऽनडुत्प्रदानमित्यस्य स्थाने गर्गोक्तां शांतिमित्यूहेन संकल्प्य गणेशपूजाद्याचार्यवरणांतं कुर्यात् । सच यदत्रेत्यादिना भूशुद्धिकलशस्थापने कृत्वा कलशे याओषधीः सहिरत्नानि स्योनापृथिवि रुवत्यश्वत्थेव इति शतौषधी रत्नानि मृदं त्वचः पल्लवांश्च क्रमेण निक्षिप्य पूर्णादर्वीति निहितपूर्णपात्रे स्थापितहैमवरुणप्रतिमायां तत्त्वायामीति वरुणं पूजयेत् । ततोऽग्निं प्रतिष्ठाप्य ग्रहान्संपूज्याऽन्वादध्यात् । ग्रहोत्कीर्तनांतेऽत्रप्रधानं । वरुणं प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः समिधां चरोराज्यस्य तिलयवानां चाहुतिभिः शेषेणेत्यादिबलिदानपूर्णाहुतिप्रणीताविसर्गांते कलशद्वयोदकेन समुद्रज्येष्ठाइत्यादिभिः पित्रादित्रयाणामभिषेको यवव्रीहिमाषतिलमुद्गानां दक्षिणात्वेन दानं विसर्जनादि यथाशक्तिब्राह्मणभोजनं चेति । तिथिगंडोत्तरार्धजन्मनि तु नतात्कालिकदानं । शांतौ मातुः शिशोश्चाऽभिषेक इति विशेषः । लग्नगंडपूर्वार्धजन्मनि कांचनमिति विशेषः । नक्षत्रगंडस्योत्तरादिनिषिद्धभागस्य च पूर्वार्धजन्मनि धेनोस्तिलपात्रादेश्च दानं । शांतौ नक्षत्रप्रतिमायास्तत्तद्वाक्याऽष्टकेन पूजनं । उत्तरार्धे जन्मनि न दानं । दक्षिणाकाले उत्तरादौ तिलपात्रादेर्दानं । इतरत्र यवव्रीह्यादेरभिषेकव्यवस्था च पूर्ववत् । इति तिथ्यादिगंडांतशांतिप्रयोगः ॥ अथ नक्षत्रगंडांतशांतिप्रयोगः ॥ षण्मासोत्तरमेकादशे वादिने प्रथमतो गोप्रसवं कृत्वा देशकालो संकीर्त्य ममाऽस्य शिशोः रेवत्यश्विनीसंध्यात्मकगंडांतजननसूचितसर्वारिष्टनिरसनद्वारा० गर्गोक्तां शांतिं करिष्ये इति संकल्प्य गणेशपूजनादियजुर्वेदविद्दैवज्ञाचार्यऋत्विग्वरणांतं कुर्यात् । ततस्तं चंदनशुक्लमाल्यैः क्षौमशुक्लवासोभ्यां पूजयेत् । तत आचार्यो निर्मितस्याऽपिनिमित्तानुसारिपरिमाणकांस्यपात्रस्य पुनर्निर्माणमाप्यायस्वेति मंत्रेण कुर्याच्चंद्रप्रतिमाऽभ्युत्तारणं च । ततो यदत्रेति सर्षपविकिरणादिना भूसंस्कारं कृत्वा उपलिप्ते देशे कांस्यपात्रे पायसं पयो वा निक्षिप्य तत्र नवनीतपूर्णं शंखं निधाय तत्र राजतं चंद्रबिंबं स्थापयित्वा सोमोऽहमिति

CC-0. In Public Domain. Digitization by eGangotri

ध्यानपूर्वकं समाहितचेता आप्यायस्वेति मंत्रेणावाहनादिषोडशोपचारैस्तत्र चंद्रपूजनं कुर्यात् । तत्र श्वेतं सदशं वस्त्रद्वयं समर्पणीयं । पुष्पाणि श्वेतानि सहस्रमर्पणीयानि । मौक्तिकं दक्षिणा तदसंभवे इष्टमन्यत् । पूजांते तमेव मंत्रं सविश्वासं चंद्रं ध्यायन् सहस्रं सप्रणवमृष्यादिस्मरणपूर्वकं जपेत् । तदुत्तरतस्ताम्रकलशं महीद्यौरित्यादिविधिना स्थापयित्वा तत्र रजतप्रतिमायां बृहस्पतिमंत्रेण वागीश्वरं संपूज्य तदुत्तरतः क्रमेण तेनैव विधिना निहितकुंभचतुष्टये अश्वत्थेवोनिषदनमित्याम्रपल्लवप्रक्षेपांतं कृत्वा चतुर्षु क्रमेण द्रवीभूतानि कुंकुमचंदनकुष्ठगोरोचनानि सिंचेत् । तेषु वरुणं पूजयेत् । ततः पश्चिमदेशे स्थंडिलाद्यग्निप्रतिष्ठापनांतं कृत्वा स्थापितकलशोत्तरभागे ग्रहावाहनादिवरुणपूजांतं कृत्वाऽन्वाधानादिग्रहमखं पूर्णाहुत्यंतं कुर्यात् । अभिषेककाले वरुणकलशचतुष्टयस्थोदकेन दिवागंडांतजातं बालं पित्रा सह रात्रिजातं मात्रा सह संध्ययोर्जातमुभाभ्यां सहाऽभिषिंचेत् । सहस्राक्षेणेत्यस्य यक्ष्मनाशनः प्राजापत्य इंद्रस्त्रिष्टुप् । अभिषेके विनि० । सहस्राक्षेण० । ततः सर्वकलशोदकैः समुद्रज्येष्ठा इत्यादिभिः सुरास्त्वामित्यादिभिर्मंत्रैश्चाऽभिषेकांते सुस्नातः सपत्नीकः कर्ता धृतश्वेतचंदनादिर्विभूतिधारणांते आचार्याय शंखदानं कुर्यात् । स्वस्त्यस्तु० । इमं सचंद्रं शंखं सवस्त्रयुगं समौक्तिकं नवनीताद्युपस्करसहितं गंडदोषाऽपनुत्तये दैवज्ञाय यजुर्वेदविदे तुभ्यमहं संप्रदद इति । तत्सांगतासिद्ध्यर्थं सहिरण्यां धेनुं दद्यात् । ततो वागीश्वरं ताम्रपात्रसहितं तुभ्यं गंडदोषशांत्यर्थं संप्रदद इति बृहस्पतिप्रतिमादानं तदंगत्वेन यथाशक्तिदक्षिणादानं च । ततः स्थापितेतरदेवतानामुत्तरपूजापूर्वकं विसर्जनमाचार्यहस्ते प्रतिपादनं च । ततः सहस्राक्षेणेति मंत्रस्यायुर्वृद्ध्यर्थं यथाशक्तिजपो दशाऽवरब्राह्मणभोजनं च ।। इति नक्षत्रगंडांतशांति प्रयोगः" अथोत्तरादिशांतिः । उत्तरातिष्यचित्रासु पूर्वाषाढोद्भवस्य च । कुर्याच्छांतिं प्रयत्नेन नक्षत्राकारजं बुधः ॥ तामेवाह । सुवर्णेन तदर्धेन यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वित्ताऽनुसारतः । नक्षत्राऽधिपते रूपं कृत्वा वस्त्रद्वयाऽन्वितं ॥ वरुणस्याऽर्चनं कार्यं स्वस्तिवाचनपूर्वकं । कुंभे वरुणं नक्षत्राधिपतिं च पूजयेदित्यर्थः " शां० सा० कुंभे वरुणमभ्यर्च्य पूर्णपात्रोपरि नक्षत्राधिपतिं पूजयेदित्यर्थः" शतौषधानि रत्नानि मृत्त्वक्पल्लवसंयुतं । प्रक्षिप्येति शेषः । पूजांते समिदन्नाज्यैर्होमं तिलयवैश्चरेत् । ततः पूर्णाहुतिं हुत्वा वेदाध्यायिकुटुंबिने ॥ उत्तरे तिलपात्रं स्यात्पुष्ये गोदानमुच्यते । अजां चित्रासु वै दद्यात्पूर्वाषाढे तु कांचनं ॥ यवांश्च व्रीहिमाषांश्च तिलमुद्रान्प्रदापयेत् । यथावित्तानुसारेण कुर्याद्ब्राह्मणभोजनं ॥ पितुरायुष्यवृद्ध्यर्थं शांतिरत्र विधीयते । एवं यः कुरुते सम्यक् शांतिकर्म समाहितः । आयुरारोग्यमैश्वर्यं संप्राप्नोति दिने दिने । " सं० कौ० उत्तरादीनां निषिद्धभागव्यवस्थोक्ता नृसिंहप्रसादे । चित्राद्यार्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये । जातः पुत्रश्चोत्तराद्ये विधत्ते पित्रोर्भ्रातुः स्वस्य चाऽपि प्रणाशमिति । उत्तरफल्गुन्याद्यपादे इत्यर्थः । एवं चोदाहृतगार्ग्यस्मृतावुत्तरादौ तिथिगंडादौ च दानशांत्योर्वक्ष्यमाणवचनालोचनेन समुच्चयप्राप्तावभुक्तेतरजातस्येत्यनेन सर्वनिषिद्धतत्कालानामभुक्तशब्दोक्तपूर्वार्धेतरोत्तरार्धे जन्मनि निमित्ते शांतिरेव । न बहिः प्रयोगं दानमिति बोध्यते। पूर्वार्धे जन्मनि तु दानमप्याह तिथिगंडांत इति । नक्षत्रे नक्षत्रगंडे ज्येष्ठामूलसंध्यादावित्यर्थः । नतूत्तरादौ । तत्र दानांतरस्य वक्ष्यमाणत्वात् । अत्र च निमित्ताऽनंतरं नालच्छेदात्पूर्वं गंडोत्तरार्धाऽधिकरणकं दानं कार्यमिति दर्शयितुं सप्तमीनिर्देशः । पूर्वोत्तरवाक्यपर्यालोचनेनैव निमित्तलाभात् । उत्तरार्धात्पूर्वार्धे दोषाऽऽधिक्यमेव दर्शयितुमाह आद्यभाग इति । एवमुत्तरेतिलपात्रंस्यादित्यादावपि पूर्वार्धजन्मनि उत्तरार्धे दानानि कर्तव्यानीत्युच्यते । अतएव शांतिविधौ प्रयत्नेनेति पूर्वोत्तरार्धयोर्जन्मनि शांतिर्नियमेन कर्तव्येति ज्ञापनार्थं । नक्षत्राकारेति पदं रूपमित्यनेन संबध्यते । अर्चनं कार्यमिति चाऽग्रिमपदद्वयं । ततश्चाऽधिष्ठात्रधिष्ठेययोरभेदचिंतनेन पूजादि कार्यं । अतो मंत्रोऽप्यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयप्रकाशकस्तैत्तिरीयशाखागतो वाक्याऽष्टकरूप एव ग्राह्यः । होमकालीनत्यागोऽपि नक्षत्रेष्टाविवाऽधिष्ठात्रधिष्ठेयोभयोद्देशेन कार्य इति सूच्यते । तिथिलग्नगंडजन्मनि चाऽऽह वरुणस्येति । नक्षत्राधिपतेरितिपदवर्जं पूर्वश्लोकाऽनुषंगः । ततश्च तत्र वरुणपूजनमेव कार्यमित्यर्थः । तत्रैव शांत्यंगत्वेन दानमाह यवांश्चेत्यादिना । कर्तुरकरणे दोषेण शांतेरावश्यकतां सूचयितुमाह । पितुरिति (चित्राद्युत्पत्तौ कौस्तुभमतेनाऽयमनुष्ठेयनिर्णयः । तत्र चित्रायाः प्रथमे पादे शांतिरजादानं गोप्रसवश्च । तृतीये शांतिगोप्रसवौ । उत्तरार्धे गोप्रसवमात्रं । पुष्यस्य द्वितीये पादे शांतिर्गोदानं गोप्रसवश्च । तृतीये शांतिगोप्रसवौ । अवशिष्टपादत्रये न किमपि । उत्तराद्यपादस्य पूर्वार्धे शांतिस्तिलपात्रदानं गोप्रसवश्च । उत्तरार्धे शांतिगोप्रसवौ । अवशिष्टपादत्रये न किमपि) इत्युत्तरादिशांतिः ॥ अथ प्रयोगः ॥ द्विराचमनादिदेशकालकीर्तनांते अस्य शिशोः उत्तरफल्गुन्याद्यपादजननसूचितसकलारिष्ट० गर्गोक्तां सग्रहमखां शांतिं करिष्ये । एवं पुष्यादिषु तत्तदुक्तपादभेदस्योल्लेखेन संकल्पः । गणेशपूजनादिप्रादेशकरणांते महीद्यौरित्यादिना स्थापितकलशे या ओषधीरिति शतौषधीः रुवतिभीम इति त्वचः स्योनेति मृदं च निक्षिप्य तत्र वरुणं नक्षत्राधिपं च संपूज्याऽग्निं ग्रहांश्च प्रतिष्ठाप्याऽन्वादध्यात् । ग्रहोत्कीर्तनांते अर्यमणं प्रधानदेवं (पुष्ये बृहस्पतिं । चित्रासु त्वष्टारं । पूर्वाषाढासु अपः इति विशेषः) समिच्चर्वाज्यतिलमिश्रयवैः प्रतिद्रव्यमष्टोत्तरशतसंख्याहुतिभिः । शेषेणेत्यादि ग्रहादिहोमांते तैत्तिरीयशाखागतेनाऽष्टवाक्यात्मकमंत्रेणोक्तद्रव्यैर्नक्षत्राधिपतये होमं कृत्वा स्विष्टकृद्धोमाद्यभिषेकांते यवव्रीहिमाषतिलमुद्गानां दाक्षिणात्वेनदानं तिलपात्रादितत्तन्नक्षत्रोक्तदानं च कृत्वा पीठदानादि सर्वं समापयेत् ॥ इत्युत्तरादिनक्षत्रशांतिप्रयोगः ॥ अथ दिनक्षयादिशांतिः । उत्तरगार्ग्यः । अथातः संप्रवक्ष्यामि जन्मकाले विशेषतः । गंडांतानां च नामानि महादोषकराणि च ॥ दिनक्षये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यतीपाते व्याघाते विष्टिवैधृतौ । शूले गंडेऽतिगंडे च परिघे यमकंटके ॥ कालदंडे मृत्युयोगे दग्धयोगे सुदारुणे । तस्मिन् गंडादिने प्राप्ते प्रसूतिर्यदि जायते ॥ अतिदोषकरी प्रोक्ता तत्र पापयुते सति । दिनक्षयादौ गंडांतशब्दो गौणः । विचार्य तत्र दैवज्ञः शांतिं कुर्याद्यथा-विधि ॥ यजनं देवतानां च ग्रहाणां चैव पूजनं । यजनं वक्ष्यमाणं । दीपं शिवालये भक्त्या घृतेन परिदापयेत् ॥ अभिषेकं शंकराय अ-श्वत्थस्य प्रदक्षिणं । आयुर्वृद्धिकरं जाप्यं सर्वाऽरिष्टविनाशनं ॥ मृत्युंजयमंत्रस्य आशुःशिशान इत्यादेश्च जप इत्यर्थः । गुरुदैवतविप्राणां पूजनं गोत्रवर्धनं । पुष्ट्यायुस्तुष्टिशांत्यर्थमभीष्टफलसिद्धये ॥ सर्वाऽरिष्टविनाशाय ग्रहयज्ञं समाचरेत् । शिवाय विधिवद्भक्त्या दीपदानं क-रोति यः ॥ अखंडं गोघृतेनैव स वै मृत्युं जयेन्नरः । विष्णुमूर्तिं महापुण्यमश्वत्थं श्रीकरं सदा ॥ प्रदक्षिणं नरो भक्त्या कृत्वा मृत्युंजयं जपेत् । सर्वसंपत्समृद्ध्यर्थं तथा कल्याणवृद्धये ॥ अभीष्टफलसिद्ध्यर्थं कुर्याद्ब्राह्मणभोजनं । अभिषेकं शिवे शांतिं यः करोति नरोत्तमः ॥ अकालमृत्युं निर्जित्य दीर्घायुर्जायते नरः । गाणपत्यं पुरुषसूक्तं सौरं मृत्युंजयं शुभं ॥ शांतिजाप्यं रुद्रजाप्यं कृत्वा मृत्युंजयी भवेत् । मूले वा सार्पगंडे वा कुर्यादेतानि यत्नतः ॥ आयुर्वृद्धिकरार्थाय गंडदोषप्रशांतये । एषां मूलव्यतीपातादिशांत्या समुच्चयः ॥ " सं० कौ० तस्मिन्पापयुतेसतीति विष्ट्यादेरपि निषिद्धांशयुते जन्मकाले सति दोषाधिक्यामित्याशयः । ततश्च प्रतिप्रसूतेर्भद्रापुच्छादौ जन्मनि स्वल्प-दोष इत्यर्थः । शूलादीनां निषिद्धांशानाह वृद्धवसिष्ठः । विरुद्धयोगेषु य आद्यपादः सर्वेषु कार्येषु विवर्जनीयः । सवैधृतिर्यो व्यतिपातयो-गः सर्वोऽपि नेष्टः परिघार्धमाद्यं ॥ तिस्रस्तु नाड्यः प्रथमाश्च वज्रे गंडेऽतिगंडेऽप्यथ षट् च षट् च । व्याघातयोगे नव पंच शूले शुभेषु कार्येषु विवर्जयीया इति । यमकंटकान् स एवाह । अर्कारतमसौम्यार्थमंदा यद्येकराशिगाः । कंटकाख्यो महादोषः सर्वकर्मविनाशकृत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरो भौमः । तमो राहुः । आर्यो गुरुः । मैत्रविश्वांऽबुपाऽऽयेंदुसार्पसूर्याख्यतारकाः । मृत्युयोगा मृतिकराः सूर्यवारादिषु क्रमात् ॥ विश्वेति वैश्वदेवमुत्तराषाढेत्यर्थः । अंबुपं शततारका । यमघंटक इति वा पाठः । तमाह गार्ग्यः । मघा विशाखे आर्द्रा च मूलमृक्षं च कृत्तिकाः । रोहिणी हस्त इत्येते यमघंटाः क्रमाद्रवेरिति । रविवारमारभ्येत्यर्थः । कालदंडो भानुवासरभरणीयोगः । अश्विन्यादिसाऽभिजिन्नक्षत्राणां चतुर्भिश्चतुर्भिः क्रमेणादित्यवारादिषु योगेन निष्पन्नेष्वष्टाविंशतियोगेषु पठित आनंदः कालदंडश्चेति । यजनं देवतानामिति देवतापदेन गुरुदेवताविप्रा गृह्यंते । जपांतोक्तकर्मणां प्रशंसापरे वाक्यशेषे तत्संकीर्तनात् । ब्राह्मणभोजनाऽश्वत्थप्रदक्षिणांतानि समाप्य तन्मध्यपठितस्याऽपि शंकराऽभिषेकस्य शांतिपदसामानाधिकरण्येन पृथक् संकीर्तनं पूर्वोक्तजपादीनामन्यशांतीनां च निरपेक्षः कार्योऽभिषेक इति द्योतनार्थं । जपस्य तदनंतरं संकीर्तनं तत्तुल्यताज्ञापनार्थं । निमित्तभूयस्त्वे चैकादशिन्यभिषेकजपयोः संख्याविवृद्धिः कल्पनीया । मूलेवेति तद्गंडे इत्यर्थः । पूर्वोक्तगंडांतशांत्या सह विकल्पेनाऽभिषेकसहितानि जपकर्माणि कुर्यादित्यर्थः । " इति दिनक्षयादिशांतिः ॥ अथ विषघटीशांतिः ॥ ताश्चाह ज्योतिर्निबंधे वृद्धगर्गः । तिथीषुनागाऽद्रिगिरीशवारिधिर्गजाऽद्रिदिक्पावकदिक् च भास्कराः ॥ मुनीभ— । १५ । ५ । ८ । ७ । ७ । ११ । ४ । ८ । ७ । १० । ३ । १० । १२ । ७ । ८ । संख्या प्रथमातिथेः क्रमात्परं विषाख्यं घटिकाचतुष्टयं ॥ " सं० कौ० तिथीनां पंचदशत्वात्तिथिशब्देन पंचदशसंख्योच्यते । एवमग्रेऽपि । एवं च सति प्रथमायां तिथौ प्रतिपदीत्यर्थः । षोडशीं घटिकामारभ्यैकोनविंशघटीपर्यंतं विषं । द्वितीयायां षष्ठीमारभ्य नवमीपर्यंतं विषं । एवमग्रेऽप्यूह्यं । (वारनक्षत्रेष्वप्येवमेवोक्तसंख्यघटिकोत्तरं घटीचतुष्टयं विषाख्यं बोध्यं) विंशच्चतुर्द्वादशदिक् च शैला बाणाश्च तत्वानि यथाक्रमेण । २० । ४ । १२ । १० । ७ । ५ । २५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यादिवारेषु भवंत्यनंतरं नाड्यो विषाख्यं घटिकाचतुष्टयं ॥ नक्षत्रेष्वाह नारदः । खमार्गणा ५० वेदपक्षाः २४ खरामा ३० व्योमसागराः ४०। वार्धिचंद्रा १४ रूपदस्राः २१ खरामा ३० व्योमबाहवः २० ॥ द्विरामाः ३२ खाऽग्नयः ३० शून्यदस्राः २० कुंजरभूमयः १८। रूपपक्षाः २१ व्योमदस्रा २० वेदचंद्रा १४ श्चतुर्दश १४ ॥ शून्यचंद्रा १० वेदचंद्राः १४ षडक्षा ५६ वेदबाहवः २४। शून्यदस्राः २० शून्यचंद्राः १० पूर्णचंद्रा १० गजेंदवः १८ ॥ तर्कचंद्रा १६ वेदपक्षाः २४ खरामा ३० श्वाऽश्विभात्क्रमात् । आभ्यः पराः स्युर्घटिकाश्चतस्रो विषसंज्ञिताः ॥ शांतिमाह वृद्धगर्गः । विषनाडीषु संजातः सर्वाऽरिष्टभयप्रदः । पितृमातुलमात्मानं घातयेन्नाऽत्र संशयः ॥ मातुश्च विषशस्राऽस्त्रैः क्रूरे लग्नेऽशगेऽपि वा । तद्दोषपरिहाराय शांतिकर्म समाचरेत् ॥ रुद्रो यमोऽग्निर्मृत्युश्च देवताः परिकीर्तिताः । सुवर्णेन यथाशक्त्या तत्तल्लक्षणलक्षिताः ॥ प्रतिमाः कारयित्वा तु आढकव्रीहिभिः स्थले । स्थंडिलं परिकल्प्याऽथ कुंभमोषधिसंयुतं ॥ जलैः संपूज्य संस्थाप्य मृदादि प्रक्षिपेत्ततः। वस्त्रद्वयेन संवेष्ट्य पंचरत्नानि निक्षिपेत् ॥ कुंभोपरि तु संस्थाप्य चतस्रः प्रतिमास्तथा । तत्तन्मंत्रैश्च संपूज्य गंधपुष्पोपहारकैः ॥ कद्रुद्रायेति मंत्रेण यमायसोममित्यथ । अग्निर्मूर्धेति मंत्रेण परंमृत्यो इति त्वथ ॥ एतैश्चतुर्भिर्मंत्रैश्च क्रमादचेंद्रुनेत्तथा । समिच्चरुघृतद्रव्यैः प्रत्येकं च यथाक्रमं ॥ ऋत्विग्भिश्च सहाऽऽचार्यो हुनेदष्टसहस्रकं । अष्टोत्तरशतं वाऽथ अष्टाविंशतिमेव वा ॥ ततस्तिलैर्हुनेद्देवांस्तत्तन्मंत्रैश्च कृत्यवित् । ततोऽभिषेचयेद्बालं मंत्रैः पौराणिकैः क्रमात् ॥ अनंतरोक्तैरिति शेषः । प्रीयतां भगवानीशः पिनाकी सर्वतोमुखः । तव मूर्तिप्रदानेन सर्वाऽभीष्टप्रदो भव ॥ ईषत्पीनो यमः कालो दंडहस्तः प्रसन्नधीः । रक्तदृङ् नीलकायश्च महिषस्थः शिवं कुरु ॥ पिंगभ्रूश्मश्रुकेशांतः साऽक्षसूत्रकमंडलुः । सप्तार्चिः शक्तिधारी च मम पापं व्यपोहतु ॥ दंष्ट्राकरालवदनो नीलांऽजनसमाकृतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्ताक्षोऽसिगदापाणिर्मृत्युर्मा पातु सर्वदा ॥ दानमेवंविधैर्मंत्रैर्यथाविधि समाहितः । गोभूहिरण्यवस्त्रैश्च आचार्यं पूजयेत्सुधीः ॥ एवं कुर्याद्विधानेन विषदोषः प्रशाम्यति । इति विषघटीशांतिः ॥ ॥ अथ प्रयोगः ॥ कर्ता आशौचोत्तरं द्विराचमनादिदेशकालकीर्तनांते अस्य शिशोः अमुकतिथिविषघटीजननसूचितसकलारिष्ट० वृद्धगर्गोक्तां सग्रहमखां शांतिं० । (एवं वारविषनक्षत्रविषेत्याद्यूह्यं) गणेशपूजनाद्याचार्यऋत्विग्वरणांतं कुर्यात् । आचार्यः प्रादेशकरणांते गृहपूर्वभागे महीद्यौरिति भुवं स्पृष्ट्वा तत्र ओषधयःसंवदंत इति चतुःप्रस्थपरिमितान् व्रीहीन् प्रक्षिप्य तैः स्थंडिलं परिकल्प्य तत्र आकलशेष्विति स्थापितकलशे इमंमे इत्युदकमापूर्य याओषधीरिति सर्वौषधीः स्योनेति मृदश्च प्रक्षिप्य गंधद्वारामित्यादिपूर्णपात्रनिधानांते यथालक्षणनिर्मितप्रतिमासु रुद्रादीनावाहयेत् । कद्रुद्रायेति रुद्रं । यमायसोममिति यमं । अग्निर्मूर्धा विरूपोऽग्निर्गायत्री । अग्न्यावा० । अग्निर्मूर्धा० इत्यग्निं । परंमृत्यो संकुसुको मृत्युस्त्रिष्टुप् । मृत्य्वावा० । परंमृत्यो० इति मृत्युं चावाह्य संपूज्य तत्पश्चिमभागे स्थंडिलेऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिदेवतोत्कीर्तनांते प्रधानदेवं रुद्रं यमं अग्निं मृत्युं च समिच्चर्वाज्यतिलैः प्रत्येकं प्रतिद्रव्यं अष्टसहस्राद्यन्यतमसंख्याहुतिभिः शेषेणेत्याद्याऽज्यभागहोमांतं कृत्वा यजमानेन द्रव्यत्यागे कृते ऋत्विक्सहित आचार्यस्तत्तन्मंत्रैर्यथान्वाधानं होमं कुर्यात् । स्विष्टकृदादिप्रायश्चित्तहोमांते लोकपालेभ्यो ग्रहपीठदेवताभ्यो रुद्रादिभ्यश्च बलीन्दत्वा पूर्णाहुत्यंते प्रणीताविमोकादिशेषं समाप्य कलशद्वयोदकेन भार्याशिशुसहितं यजमानं समुद्रज्येष्ठा इत्यादिभिर्मंत्रैः प्रीयतांभगवानीश इत्यादिपूर्वोक्तश्लोकचतुष्टयेन सुरास्त्वामित्यादिभिश्चाऽभिषिंचेत् । अथ यजमानो विभूतिं धृत्वा रुद्रादीन्संपूज्य एकैकां देवतां प्रीयतामित्यादितत्तन्मंत्रेणाचार्याय दत्वा कृतस्य कर्मणः सांगतायै इमां दक्षिणां तुभ्यमहं संप्रदद इति गोभूहिरण्यवस्त्राणि तन्निष्क्रयं वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दद्यात् । एवमृत्विग्भ्योऽपि यथाशक्ति दक्षिणां दत्वा आचार्येण ग्रहादीनामुत्तरपूजने विसर्जने च कृते तद्धस्ते प्रतिमादि सोपस्करं प्रतिपाद्य ब्राह्मणान्संभोज्य शांतिं वाचयित्वा कर्मेश्वरार्पणं कुर्यात् ॥ इति विषवटीशांतिप्रयोगः ॥ ॥ अथ तिथिप्रसवशांतयः । तत्र कृष्णचतुर्दशीशांतिः । प्रयोगपारिजाते उत्तरगर्गः । कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं फलं । चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतं ॥ द्वितीये पितरं हंति तृतीये मातरं तथा । चतुर्थे मातुलं हंति पंचमे वंशनाशनं ॥ षष्ठे च धनहानिः स्यादात्मनो वंशनाशनं । तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्विधानतः ॥ आचार्यमृत्विजो वृत्वा स्वस्तिवाचनपूर्वकं । रुद्राधिदेवतां तस्याः कर्षमात्रसुवर्णतः ॥ तस्याः चतुर्दश्याः । तदर्धार्धेन वा कुर्याद्वित्तशाठ्यविवर्जितः । प्रतिमां कारयेच्छंभोः सर्वलक्षणसंयुतां ॥ वृषभे च समासीनं वरदाऽभयपाणिनं । शुद्धस्फटिकसंकाशं श्वेतमाल्यांबरावृतं ॥ त्रैयंबकेण मंत्रेण पूजां कुर्याद्विधानतः । स्थापयेच्चतुरः कुंभांश्चतुर्दिक्षु यथाक्रमं ॥ आग्नेयीमारभ्य विदिक्ष्वित्यर्थः । आग्नेयकुंभमारभ्येत्यग्रे दर्शनात् । पुण्यतीर्थजलोपेतान् धान्यस्योपरि विन्यसेत् । तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं ॥ पंचमृत्पंचरत्नानि पंचत्वक्पंचपल्लवान् । पंचधान्यं सुवर्णं च तत्तन्मंत्रैर्विनिक्षिपेत् ॥ शतौषधानि निक्षिप्य श्वेतवस्त्रैश्च वेष्टयेत् । सुरभीणि च पुष्पाणि श्वेतानि परिवेष्टयेत् ॥ (श्वेतैः सुरभिपुष्पैर्वेष्टयेदित्यर्थः) सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयांतु यजमानस्य दुरितक्षयकारकाः ॥ आवाह्य वारुणैर्मंत्रैरनेनेन च विधानतः । " शां॰ सा॰ वक्ष्यमाणैर्वारुणैर्वरुणं अनेनोक्तेन समुद्रादींश्चेत्यर्थः " इमंमे वरुणेत्यनया तत्त्वायामीति वै तथा ॥ त्वंनोअग्न इत्यनया सत्वंन इति मंत्रतः । आग्नेयकुंभमारभ्य पूजां कुर्याद्यथाक्रमात् ॥ आनोभद्राख्यसूक्तं च भद्राअग्नेश्च सूक्तकं । जप्त्वा पुरुषसूक्तं च कद्रुद्रं तु क्रमाज्जपेत् ॥ ईश्वरस्याऽभिषेकं च ग्रहपूजां च कारयेत् । "शां॰ सा॰ ईश्वरस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वस्थापितेश्वरप्रतिमाया इत्यर्थः" पूजाकर्म सुनिर्वर्त्य होमं कुर्याद्विधानतः।गृहस्येशानदिग्भागे कुंडं कुर्याद्विधानतः। विस्तारायामखातं च अरत्नि-द्वयसंमितं ॥ कुंडकंठं परित्यज्य समंतादंगुलं क्रमात् । मेखलोच्छ्रायविस्तारौ चतुस्त्रिद्व्यंगुलैः क्रमात् ॥ पश्चिमे मध्यभागे तु योनिं कुर्याद्विधानतः । योनिं षडंगुलां तिर्यक् द्वादशांगुलदैर्घ्यकां ॥ अश्वत्थदलसंकाशां किंचिन्निम्नाऽऽयतां शुभां। कुर्यादाधारपर्यंतं स्वगृह्योक्तविधानतः ॥" शां० सा० आधारांतत्वोक्त्या चक्षुषी नेति केचित्" समिदाज्यचरूंश्चैव तिलमाषांश्च सर्षपैः। सर्षपैः सहितास्तिलमाषा इत्यर्थः। अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः ॥ अष्टोत्तरसहस्रं तु अष्टोत्तरशतं तु वा । अष्टाविंशतिमेतैश्च होमं कुर्यात्पृथक्पृथक् ॥ त्रैयंबकेण मंत्रेण तिलान्व्याहृतिभिः क्रमात् । ग्रहा एवं च होतव्या अस्मदुक्तविधानतः ॥ एवं क्रमेण होतव्यं होमशेषं समापयेत् । सर्वाऽलंकारयुक्तानां त्रयाणामभिषे-चनं ॥ त्रयो मातापितृबालाः । चतुर्भिः कलशैरद्भिर्बृहत्कुंभसमन्वितं । बृहत्कुंभः शतच्छिद्रः । धौतांबराणि धृत्वाऽथ कुर्यादाज्यावलोक-नं ॥ पूर्णाहुतिं च जुहुयाद्यजमानः समाहितः । तत्सर्वं परया भक्त्या ईश्वराय निवेदयेत् ॥ सर्वाऽलंकारसंयुक्तां सवत्सां गां पयस्विनीं । प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत् ॥ ईश्वरप्रीतये शक्त्या कुर्याद्ब्राह्मणभोजनं । अन्येषां चैव सर्वेषां कुर्याद्ब्राह्मणभोजनं ॥ एवं यः कुरुते शांतिं सर्वपापैः प्रमुच्यते । सर्वान्कामानवाप्नोति चिरंजीवी सुखी भवेत् ॥ इति कृष्णचतुर्दशीशांतिः ॥ ॥ अथ प्रयोगः ॥ कर्ता पित्तरिष्टादौ गोमुखप्रसवं कृत्वाऽन्यत्राऽकृत्वा (शांतिसारे षड्भागचतुर्दश्या द्वितीयतृतीयांशयोरुत्पत्तौ गोप्रसव उक्तः । मयूखे तु ष-ष्ठांशेऽपि) देशकालौ संकीर्त्याऽस्य बालकस्य कृष्णचतुर्दशी (अमुकांश) जननसूचिताऽरिष्टनिरसनद्वारा० गर्गोक्तां सग्रहमखां कृ-ष्णचतुर्दशीजननशांतिं करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचननांदीश्राद्धाचार्यर्त्विग्वरणानि कुर्यात् । तत आचार्य प्रादेशकर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णांते स्थंडिलपूर्वभागे महीद्यौरित्यादिमंत्रावृत्त्या मध्ये शतच्छिद्रं तस्य आग्नेय्यादिविदिक्षु चतुरः कलशांश्च संस्थाप्य शतच्छिद्रे स्योनेति पंचमृदः । अश्वत्थेव इति पंचपल्लवान् । सहिरत्नानीति पंचरत्नानि । रुवतिभीम इति पंचत्वचः । ओषधयःसमिति व्रीहियवगोधूमसर्षपतिला इत्येतानि पंचधान्यानि । हिरण्यरूप इति हिरण्यं । याओषधीरिति शतौषधीस्तदलाभे विष्णुक्रांतासहदेवीतुलसीचशतावरीति मूलशांत्युक्ता ओषधीश्च निक्षिप्य युवासुवासा इति श्वेतवस्त्रैः सुगंधिश्वेतपुष्पैश्च संवेष्ट्य पूर्णपात्रे उक्तलक्षणप्रतिमायां त्र्यंबकमितिमंत्रेण रुद्रमावाह्य शुद्धस्फटिकसंकाशं श्वेतमाल्यांबरावृतं तं ध्यात्वा एकादशिन्यभिषेकघटितोपचारैः संपूजयेत् (मयूखे तु स्थंडिलात्पूर्वभागे पीठादौ हैमप्रतिमायां त्र्यंबकमिति मंत्रेण रुद्रावाहनपूजनांते तत्प्राच्यामैशान्यामुदीच्या वा विधिवत्कुंभपंचकस्थापनाद्युक्तं । तत्र च शतच्छिद्रेन पूर्णपात्रनिधानादि । केवलं मृदाद्युक्तद्रव्याणां निक्षेपः । इदमेव युक्तं भाति । मूलोक्तसंवादलभात्) तत आग्नेय्यादिकलशेषु इमंमेगंग इत्यादिमंत्रावृत्त्या उदकपूरणादिपूर्णपात्रनिधानांते आग्नेयकुंभे । इमंमेवरुण शुनःशेपो वरुणो गायत्री । वरुणावा० । इमंमे० । सर्वे समुद्राः० । इति च समुद्रादिसहितं वरुणमावाहयेत् । एवमग्रेऽपि समुद्रादिसहितस्यैव वरुणस्यावाहनं । नैर्ऋते तत्त्वायामि० । वायव्ये । त्वंनोअग्ने वामदेवो वरुणस्त्रिष्टुप् । वरुणावा० । ऐशाने । सत्वंनोअग्ने वाम० । एवमावाह्य सर्वेषां पूजनांते देवदानवेत्यादिश्लोकैः प्रतिकलशं प्रार्थ्य चतर्षु क्रमेण सूक्तानि जपेत् । आनोभद्रा इति दशर्चस्य सूक्तस्य गोतमो विश्वेदेवा जगती । षष्ठी विराट् तिस्रोंत्यास्त्रिष्टुभः । जपे विनि० । भद्राअग्ने इति द्वादशर्चस्य सूक्तस्य सुमित्रोऽग्निराद्ये जगत्यौ शेषास्त्रिष्टुभः । सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोनुष्टुबंत्या त्रिष्टुप् । कद्रुद्रायेति नवर्चस्य सूक्तस्य कण्वो रुद्रो गायत्र्यंत्यानुष्टुप् । एवं सूक्तजपांतेऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहोत्कीर्तनांते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रं प्रधानदेवं अश्वत्थप्लक्षपलाशखदिरसमिदाज्यचरुभिः संमिश्रतिलमाषसर्षपैश्च प्रतिद्रव्यं अष्टोत्तरसहस्राद्यन्यतमसंख्याहुतिभिः प्रजापतिं तिलैः पूर्वोक्तसं० (कौस्तुभमयूखयोस्तु अग्निवायुसूर्यप्रजापतीनुद्दिश्य व्यस्तसमस्तव्याहृतिभिर्होम उक्तः) शेषेणेत्यादि निर्वापादिना चरुं कृत्वा (कौस्तुभादिषु तु निर्वापादि नोक्तं) कर्त्रा त्यागे कृते साचार्यऋत्विजो होमादिबलिदानांते शतच्छिद्रगतैश्चतुःकलशोदकैर्ग्रहकलशोदकेन च पत्नीशिशुसहितं यजमानमब्देवत्यमंत्रैरभिषिंचेयुः । ततो यजमानो विभूतिं धृत्वा कांस्यपात्रे रूपंरूपमित्याज्यं सकुटुंबोऽवलोक्य सदक्षिणं तत्पात्रं विप्राय दत्वा पूर्णाहुत्यादिशेषं समाप्य कृतं कर्म रुद्राय निवेद्याऽऽचार्याय सवत्सां गां वस्त्रयुग्ममृत्विग्भ्योऽन्येभ्यश्च यथाशक्ति दक्षिणां दत्वा देवताविसर्जनांते प्रतिमाद्युपस्करमाचार्यहस्ते प्रतिपाद्य विप्रान्संभोज्य तैः शांतिं वाचयित्वा सुहृद्युतो भुंजीत । इति कमलाकरभट्टकृतकृष्णचतुर्दशीशांतिप्रयोगः ॥ ॥ अथ सिनीवालीकुहूशांतिः ॥ प्रयोगपारिजाते उत्तरगार्ग्यः । सिनीवाल्यां प्रसूता स्याद्दासी [यस्य] भार्यापशुस्तथा । गजाऽश्वा महिषी चैव शक्रस्याऽपि श्रियं हरेत् ॥ ये संति सकलाश्वाऽन्ये स्वप्रसादोपजीविनः । वर्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान् ॥ “ शां० सा० सिनीवालीकुहूत्पन्नानिति शेषः । ” कुहूप्रसूतिरत्यर्थं सर्वदोषकरी स्मृता । यस्य प्रसूतिरेतेषां तस्यायुर्धननाशनं ॥ सर्वगंडसमस्तत्र दोषस्तु प्रबलो भवेत् । शांतिं विना विशेषेण परित्यागो विधीयते ॥ “ शां० सा० विशेषेण उत्तमपक्षेण शांतिकरणं विना परित्यागः । यदा तूत्तमपक्षे न शक्तिस्तदा कियत्कालं त्यागं कृत्वा शांतिः कर्तव्येत्याह ” परित्यागात्तत्र शांतिं कुर्याद्धीमान्विचक्षणः । (परित्यागादिति ल्यब्लोपे पंचमी । परित्यागं कृत्वेत्यर्थः) शांतौ चिकीर्षितायामपि त्यागः कार्य एव । शांतिं विना तु सुतरां त्याग इत्यर्थः । तत्फलं तत्क्षणार्धेन शिशोरेवाऽनुपालने ॥ [तत्कालं० पालनं] शांत्यभावे बा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यागाऽभावे चेत्यर्थः । नत्यजेत्पिंडतो मोहादर्थादज्ञानतोऽपि वा । (पिंडत इति षष्ठ्यर्थंतात्सार्वविभक्तिकस्तसिः । तेन बालदेहस्य मोहादित्यर्थः) शांत्यभावे यदि बालं न त्यजेदित्यर्थः । तद्योगान्नाशयेत्किंचित्स्वयं वा नाशमश्नुते ॥ तद्योगाद्बालयोगादित्यर्थः । कल्पोक्तशांतिः कर्तव्या शीघ्रं दोषाऽपनुत्तये । रुद्रः शक्रश्च पितरः पूज्याः स्युर्देवताः क्रमात् ॥ कर्षमात्रसुवर्णेन तदर्धाऽर्धेन वा पुनः । अथवा शक्तितः कुर्याद्वित्तशाठ्यविवर्जितः ॥ प्रतिमां कारयेच्छंभोश्चतुर्भुजसमन्वितां । त्रिशूलखड्गवरदाऽभयहस्तां यथाक्रमात् ॥ श्वेतवर्णां श्वेतपुष्पां श्वेतांऽबरवृषस्थितां । त्रैयंबकेण मंत्रेण पूजां कुर्याद्यथाविधि ॥ इंद्रश्चतुर्भुजो वज्रांऽकुशचापैः ससायकः । " शां० सा० वज्रांकुशचापैः सहिताः सायका यस्येति विग्रहः " रक्तवर्णो गजारूढो यतइंद्रेति मंत्रतः ॥ पितरः कृष्णवर्णाश्च चतुर्हस्ता विमानगाः । यष्ट्यक्ष [गदाक्ष] सूत्रकमंडल्वभयस्यैव धारिणः ॥ येचेह इति मंत्रेण पूजां कुर्यादनंतरं । " शां० सा० मदनरत्नादिषु तु येसत्या इति पाठः । तस्मिन्पक्षे येसत्यासोहविरद इति मंत्रः " आग्नेयीं दिशमारभ्य कुंभान्कोणेषु विन्यसेत् ॥ तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं । तेष्वेव पंचगव्यादींस्तत्तन्मंत्रैश्च निक्षिपेत् ॥ (चतुर्ष्वित्यर्थः) आदिशब्देन पंचमृत्पंचरत्नादीनि चतुर्दशीशांत्युक्तानि । कल्पोक्तशांतिः कर्त्तव्या कुर्याच्छीघ्रं स्वशक्तितः । शांतिं पठेदित्यर्थः । गोदानं वस्त्रदानं च सुवर्णं चोर्वरां शुभां ॥ दशदानानि चोक्तानि क्षीरमाज्यं गुडस्तथा । गोदानादेर्दशदानांऽतर्गतत्वाद्द्वारद्वयमनुष्ठानं ॥ आज्याऽवेक्षणमेतानि तत्तन्मंत्रैश्च कारयेत् । समिदाज्यचरोर्होमं तिलमाषैश्च सर्षपैः ॥ इतरेतरयोगद्वंद्वात्तिलमाष मिळितं द्रव्यं । अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः । अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुयाद्द्विजः ॥ त्रैयंबकेण मंत्रेण तिलान्व्याहृतिभिः पुनः । " शां० सा० मुख्यमित्युक्तेरधिदेवतादेरष्टाविंशत्यादिन्यूनसंख्यया होमः " च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुर्भिः कलशैर्युक्तं बृहत्कुंभसमन्वितं ॥ शांतिवत्सकलं कार्यमभिषेकं च कारयेत् । चतुर्दशीशातिवदित्यर्थः । पितृमातृशिशूनां च अभिषिंचेत्तु वारुणैः ॥ षष्ठी द्वितियार्था । शंकरस्याऽभिषेकं च कुर्याद्ब्राह्मणभोजनं ॥ अन्येषां चैव सर्वेषां ब्राह्मणानां च तर्पणं ॥ यथाशक्त्यनुसारेण द्विजवाचनपूर्वकं । द्विजवाचनं स्वस्तिवाचनं तत्पूर्वकं सर्वं कुर्यादित्यर्थः । " शां॰ सा॰ ब्राह्मणांस्तर्पयिष्य इति प्रश्नं कर्मसंपूर्णतावाचनं वा कृत्वेत्यर्थः " इति सिनीवालीकुहूशांतिः ॥ ॥ अथ प्रयोगः । कर्ताऽस्य बालस्य सिनीवालीजननसूचितसकलानिष्टपरिहारद्वारा॰ गर्गोक्तां सिनीवालीजननशांतिं करिष्ये इति संकल्प्य गणेशपूजाद्याचार्यर्त्विग्वरणांतं कुर्यात् ।(कुह्वां तु गोमुखप्रसवः । संकल्पे कुहूजननेत्यूहश्चेति विशेषः) । तत आचार्यः प्रादेशकरणांते आग्नेय्यादिषु चतुरः कुंभान्मध्ये च शतच्छिद्रं महीद्यौरित्यादिमंत्रावृत्त्या संस्थाप्य चतुर्षु जलपूरणगंधक्षेपांते गायत्र्यादिमंत्रैः पंचगव्यानि पंचमृत्पल्लवरत्नत्वग्धान्यानि हिरण्यं च तत्तन्मंत्रैर्निक्षिप्य पंचस्वपि पूर्णपात्रनिधानांते शतच्छिद्रे उक्तलक्षणप्रतिमायां त्र्यंबकमिति रुद्रमावाह्य तद्दक्षिणे यतइंद्रेत्यस्य भर्ग इंद्रो बृहती । इंद्रावा॰ । यतइंद्र॰ इतींद्रं । उत्तरे येचेह शंखः पितरस्त्रिष्टुप् । पित्रावा॰ । येचेह॰ इति पितॄंश्चावाह्य पूजयेत् (मयूखे तु स्थंडिलात्पूर्वतः पीठादौ रुद्रेंद्रपितॄन् संपूज्य तत्प्राच्यामैशान्यामुदीच्यां वा कुंभपंचकस्थापनाद्युक्तं । शतच्छिद्रे च न पूर्णपात्रनिधानादि । इदमेव युक्तं) चतुर्षु कुंभेषु वरुणावाहनपूजनांते आनोभद्रा भद्राअग्नेः सहस्रशीर्षा कद्रुद्रायेत्यादिस्वस्वशाखोक्तशांतीः पठेत् । (एषामृष्यादि चतुर्दशीशांतौ द्रष्टव्यं । कौस्तुभादौ तु आनोभद्रा इत्येकस्यैव सूक्तस्य जपमुक्त्वा गवादिदानान्यत्रैव कर्तव्यानीत्युपपादितं) ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहोत्कीर्तनांते रुद्रं प्रधानदेवं अश्वत्थप्लक्षपलाशखदिरसमिदाज्यचरुभिः संमिश्रतिलमाषसर्षपैश्च प्रतिद्रव्यंअष्टोत्तरशतसंख्याभिराहुतीभिः इंद्रं पितॄंश्च तैरेव द्रव्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्येकं प्रतिद्रव्यं अष्टाविंशतिसं० अष्टसंख्याभिर्वा । प्रजापतिं तिलैः २८ । ८ वा । (कौस्तुभमयूखयोस्तु त्र्यंबकमंत्रेण तिलहोमोऽत्राऽधिक उक्तः । सच व्याहृतिहोमात्पूर्वं कार्यः) शेषेणेत्यादिबलिदानांते मूर्धानमिति पूर्णाहुतिं हुत्वा ग्रहकुंभसहितचतुःकलशोदकयुतशतच्छिद्रेण तत्त्वायामीत्यादिवारुणमंत्रैर्मातृपितृशिशूनामभिषेकं कृत्वा संस्रावहोमादिशेषं समापयेत् । ततो यजमानोऽग्नेः पश्चादुपविश्य विभूतिं धृत्वाऽऽचार्यादिभ्यो गवादिदानानि दद्यात् । गवामंगेष्विति गां । शरण्यं सर्वलोकानां लज्जाया रक्षणं परं । सुवेषधारि वस्त्र त्वमतः शांतिं० इति वस्त्रं । हिरण्यगर्भगर्भस्थमिति सुवर्णं । सर्वभूताश्रयाभूमिर्वराहेण समुद्धृता । अनंतसस्यफलदा अतः शांतिं० इति भूमिं । ततो दशदानानि । गोभूतिलहिरण्याज्यवासोधान्यगुडानि च । रौप्यं लवणमित्याहुर्दशदानानि पंडिताः ॥ गां भुवं चोक्तमंत्राभ्यां पुनर्दत्त्वा तिलान्दद्यात् । महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहत्विति । उक्तमंत्रेण पुनर्हिरण्यं दत्वाज्यं दद्यात् । कामधेनुषु संभूतं सर्वक्रतुषु संस्थितं । देवानामाज्यमाहारमतः शांतिं० । उक्तमंत्रेण वासः पुनर्दत्वा धान्यं दद्यात् । सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् । प्राणिनां जीवनोपायमतः शांतिं० ॥ यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः । सामवेदस्तु वेदानां महादेवस्तु योगिनां ॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा । तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां शांतिं ददस्व गुड सर्वदेति गुडं । प्रीतिर्यतः पितॄणां च विष्णुशंकरयोः सदा । शिवनेत्रोद्भवं रूप्यमतः शांतिं० इति रौप्यं । यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना । शंभोः प्रीतिकरं नित्यमतः शांतिं० इति लवणं । इति दशदानानि । ततः क्षीरं दद्यात् । क्षीरजातास्तथा शंखाः क्षीरादमृतसंभवः । क्षीरात्क्षीरोदयत्कीर्तिः क्षीरे प्राणस्य संभवः ॥ तस्मात्क्षीरप्रदानेन अतः शांतिं० । आज्यं गुडं चोक्तमंत्राभ्यां पुनर्दद्यात् । एतानि दक्षिणात्वेनाऽत्र देयानि । अर्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रमेण पाठक्रमस्य बाधात् । अतएवांऽते दक्षिणाऽनुक्तिः । केचिद्दक्षिणामपि पाठक्रमान्मध्ये कुर्वंति । तत आज्यपूर्णे कांस्यपात्रे रूपंरूपमिति सकुटुंबः प्रतिरूपं वीक्ष्य आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं । आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः ॥ इति तदाज्यं सदक्षिणं विप्राय दत्वा रुद्रप्रतिमायात्र्यंबकमितिमंत्रेणाऽभिषेकोत्तरं सर्वेषामुत्तरपूजां कृत्वा विसृज्याचार्यहस्ते दत्वाऽग्निं विसृज्य कर्मसंपूर्णतां वाचयित्वा विप्रानन्यांश्चांऽधपंग्वादीन्भोजयेत् । सिनीवालीकुह्वोर्दर्शशांत्या समुच्चयः । अव्यभिचारादिति केचित् । तत्वं तु सिनीवाल्यामेवेयं शांतिः । कुह्वां तु दोषमात्रमुक्तं । दर्शः सूर्येंदुसंगम इति कुह्वा एव दर्शत्वात्तत्र दर्शशांतिरेवेति । केचित्तु दर्शेष्टयतीपाते पथिकृद्वैश्वानरीयवत्कुह्वां द्वयोः समुच्चयमाहुः । नाऽत्र गोमुखप्रसवः । (ग्रंथकृताऽत्र गोप्रसवो नेत्युक्तेऽपि मूलवाक्ये यस्यप्रसूतिरेतस्यांतस्यायुर्धननाशनमित्यत्राऽऽयुर्नाशपदेनाऽरिष्टबोधनाद्गोप्रसवो नित्यत्वेन प्राप्तः । सिनीवाल्यां तु तदभावान्नेति स्पष्टमेव । शांतिसारेऽप्येतदेवाऽभिप्रेत्य स कार्य इति युक्तमुक्तं) इतिसिनीवालीकुहूशांतिप्रयोगः ॥ ॥ अथ सिनीवालीदर्शादिनिर्णयः । " ध० सिं० तत्राऽमावास्यायाः प्रथमो यामः सिनीवाली । (मयूखे तु चतुर्दश्या अंत्योऽमायाश्चाद्यो यामः सिनीवालीत्युक्तं) अंत्योपांत्ययामौ कुहूः । मध्यवर्तिपंचयामा दर्श इति केचित् । अपरे तु चतुर्दशीमात्रयुतेऽहोरात्रे वर्तमानाऽमावास्या सिनीवाली । प्रतिपन्मात्रयुतेऽहोरात्रे वर्तमाना कुहूः । तेनाऽमाया वारत्रयस्पर्शित्वलक्षणदिनवृद्ध्यभावे सूर्योदयस्पर्शित्वाऽभावलक्षणक्षयाऽभावे च दर्शो नास्त्येव । उदयात्पूर्वाऽहोरात्रे वर्तमानायाः सिनीवालीत्वात् । उदयोत्तरं वर्तमानायाश्च कुहूत्वात् । दिनक्षये सर्वाऽप्यमा दर्शसंज्ञा । न तत्र सिनीवालीकुहूभागौ । केवलचतुर्दशीकेवलप्रतिपद्युक्तत्वाऽभावात् । एवं दिनवृद्धौ त्रिदिनस्पर्शे मध्यदिनस्था षष्टिनाडीमिताऽमावास्या दर्शसंज्ञा । चतुर्दश्यादियोगाऽभावात् । पूर्वोत्तरदिनस्थौ भागौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिनीवालीकुहूसंज्ञावित्याहुः । इदं मयूखे स्पष्टं ” ॥ ॥ अथ दर्शजननशांतिः । नारदः । अथातो दर्शजातानां मातापित्रोर्दरिद्रता । तद्दोषपरिहारार्थं शांतिं वक्ष्यामि नारदः ॥ पुण्याहं वाचयित्वादौ क्रतुसंकल्पपूर्वकं । कुंडं वा मंडलं कुर्यात्तद्देशे स्थापयेद्घटं ॥ “ शां० सा० । कुंडं वा स्थंडिलं० । तद्देशे तत्समीपे” मंडलं सर्वतोभद्रं । “शां० म० मंडलं स्थंडिलं” तत्कुंभे निक्षिपेद्द्रव्यं दधिक्षीरघृतादिकं । आदिश-ब्दाद्गोमूत्रगोमये । न्यग्रोधोदुंवराऽश्वत्थाः सचूता निंबकास्तथा ॥ एतेषां वृक्षमूलानि त्वगादीन्पल्लवांस्तथा । पंचरत्नानि निक्षिप्य वस्त्रयुग्मेन वेष्टयेत् ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयांतु यजमानस्य दुरितक्षयकारकाः ॥ आपोहिष्ठतृचेनाऽथ कयानश्चित्र इत्यृचा । यत्किंचेदमृचा चैव समुद्रज्येष्ठा इत्यृचा ॥ अभिमंत्र्योदकं पश्चादग्नेः पूर्वप्रदेशके । उदकमभिमंत्र्य पश्चाद्दर्शदेवतां स्थापयेदित्यर्थः । मंडलं कुर्यादिति यदुक्तं तदाह । हारिद्रं रक्तकं चैव कृष्णं श्वेतं च नीलकं ॥ एतेषां तंडुलैश्चैव सर्वतोभद्रमुद्धरेत् । “ शां० सा० कुंभतः प-श्चादग्नेश्च पूर्वतो हरिद्रादिरंगरक्तैस्तंडुलैः सर्वतोभद्रमुल्लिखेदित्यर्थः ” दर्शस्य देवतायाश्च सोमसूर्यस्वरूपकं ॥ प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथा । “ वि० पा० अयं धातुक्रमो दर्शसोमसूर्यक्रमाऽपेक्षया द्रष्टव्यः ” दर्शदेवतारूपसोमसूर्यस्वरूपं प्रतिमां स्थापयेदित्यभेदेनाऽन्वयः । “ सं० कौ० दर्शदेवताः पितरस्तद्रूपां प्रतिमां स्थापयेदित्यभेदेनाऽन्वयः । शां० सा० पितृरूपाया दर्शदेवतायाः सोमसूर्ययोश्च स्वरूपं प्रतिमारूपं स्थापयेदित्यर्थ इति प्रयोगपारिजाते ” कुह्वा अपि तत्त्वात्तत्रापीदं । सर्वतोभद्रमध्ये च स्थापयेद्दर्शदेवतां ॥ ग्रहवर्णं वस्त्रयुग्मं तद्वर्णं गंधपुष्पकं । “ वि० पा० श्वेतरक्तवर्णमित्यर्थः ” आप्यायस्वेति मंत्रेण सवितापश्चातात्तथा ॥ उपचारैः समाराध्य ततो होमं समाचरेत् । “ वि० पा० सोमसूर्यपूजाऽपि सर्वतोभद्र एव । सांनिध्यात् ” कृत्वा वह्निं प्रतिष्ठाप्य क्रतुसंकल्पमीदृशं ॥ आयुरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोग्यसिद्ध्यर्थं सर्वानिष्टप्रशांतये । पुत्रस्य दर्शजननदोषनिर्हरणाय च ॥ मातापित्रोः कुमारस्य सर्वानिष्टप्रशांतये । तेषामायुःश्रिये चैव शांतिहोमं करोम्यहं ॥ "शां० सा० आयुरारोग्येति श्लोकद्वयेन क्रतुसंकल्पं कृत्वेत्यर्थः" समिधश्च चरुद्रव्यं क्रमेण जुहुयाद्गृही । हुनेत्सवितृमंत्रेण सोमोधेनुं च मंत्रतः ॥ एतैर्मंत्रैश्च प्रत्येकं हुनेदष्टोत्तरं शतं । एतैरिति बहुवचनात्पितृदेवत्यहोमोऽप्यष्टोत्तरशतं । (प्रयोगपारिजातेऽप्येवं) "सं०कौ० एतैरिति बहुवचनं प्रणवस्वाहाकारसाहित्याऽभिप्रायेणाऽनुवादः । अतएवाह । दर्शस्य०" दर्शस्य देवताहोमस्त्वष्टाविंशतिसंख्यया ॥ "वि० पा० दर्शदेवतामंत्रस्तल्लिंगको ग्राह्यः । यद्वा दर्शदेवतापूजाहोमादि नाममंत्रेण कार्य । वेदमंत्राऽनुपदेशात् ।" होममेवं तु कृत्वाऽथ विदध्यादभिषेचनं । श्रीसूक्तमायुष्यसूक्तं समुद्रज्येष्ठा इत्यृचा ॥ एतैर्मंत्रैरभिषेकं मातापित्रोः शिशोस्तथा । ततः स्विष्टकृदादि स्याद्धोमशेषं समापयेत् ॥ हिरण्यं रजतं चैव कृष्णा धेनुः सदक्षिणा । अन्येभ्योऽपि यथाशक्ति दातव्या दक्षिणा तथा ॥ ब्राह्मणान्भोजयेत्तत्र कारयेत्स्वस्तिवाचनं ॥ इतिनारदोक्तदर्शशांतिः ॥ ॥ अथ प्रयोगः । कर्ता उक्तकाले सपत्नीकः पीठे प्राङ्मुख उपविश्य द्विराचमनादिदेशकालकीर्तनांते ममाऽस्य शिशोः दर्शजननसूचिताऽनिष्टनिरसनद्वाराश्री० सग्रहमखां नारदोक्तां शांतिं करिष्ये इति संकल्प्य गणेशपूजाद्याचार्यर्त्विग्वरणांतं कुर्यात् । अथाचार्यः प्रादेशकरणांते कुंडात्स्थंडिलाद्वा पूर्वे सर्वतोभद्रपर्याप्तं स्थलमतिक्रम्य महीद्यौरित्यादिविधिना कुंभं संस्थाप्य तत्र जलपूरणगंधक्षेपांते गायत्र्यादिमंत्रैः पंचगव्यं । रुवतिभीम इति न्यग्रोधोदुंबराऽश्वत्थचूतनिंबानां मूलत्वचः । अश्वत्थेव इति तेषामेव पल्लवान् । कांडात्कांडादिति दूर्वाश्च निक्षिप्य याः फलिनीरित्यादिवस्त्रयुग्मवेष्टनांते तत्र सर्वेसमुद्राः० इति समुद्रादिसहितं वरुणमावाह्य संपूज्य आपोहिष्ठेति तिसृणामांब० । कयानो वामदेवो० । यत्किंचेदं शुनः शेपो वरुणो जमती । समुद्रज्येष्ठा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यस्य वसिष्ठ आपस्त्रिष्टुप् । उदकाभिमंत्रणे विनि० । इति षण्मंत्रैः कलशोदकमभिमंत्र्य तत्पश्चादग्नेः पूर्वतो हारिद्रादिवर्णैस्तंडुलैर्यथोक्तं सर्वतोभद्रं विरच्य तन्मध्ये स्वर्णप्रतिमायां पित्रादीनावाहयेत् । येचेह शंखः पितरस्त्रिष्टुप् । पित्राद्या० । येचेह पितरो० इति पितॄन् । तद्दक्षिणे रजतप्रतिमायां आप्यायस्वगोत० इति सोमं । उत्तरे ताम्रप्रतिमायां सवितापश्चातान्नाभागः सविता त्रिष्टुप् । सूर्यावाहने० । सवितापश्चाता० इति सूर्यं चावाह्य षोडशोपचारैः सर्वान्पूजयेत् । ततोग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिदेवतोत्कीर्तनांते । पितॄन् समिच्चरुभ्यां प्रतिद्रव्यं अष्टाविंशतिसंख्याहुतिभिः । सोमं सूर्यं च ताभ्यामेव द्रव्याभ्यां प्रत्येकं प्रतिद्रव्यं अष्टोत्तरशतसंख्या० शेषेणेत्याद्याज्यभागहोमांते आयुरारोग्येत्यादिमंत्ताभ्यां होमसंकल्पं कृत्वा यजमानेन त्यागे कृते सर्त्विगाचार्य उक्तरीत्या होमं कुर्यात् । होमांते च स्विष्टकृतः प्राक् कुंभद्वयोदकेन पत्नीशिशुसहितं यजमानमभिषिंचेत् । तत्र मंत्ताः । हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्दमानंदचिक्लीतेंदिरासुताः श्रीरनुष्टुप् । पंचमी षष्ठी च त्रिष्टुभौ चतुर्थ्यंत्या च प्रस्तारपंक्तिः । आयुष्यमित्येकादशर्चस्य सूक्तस्य सनकादयो हिरण्यमनुष्टुप् । पंचम्यष्टमी नवमी च त्रिष्टुभः सप्तमीशक्वर्यंत्या जगती । समुद्रज्येष्ठा इत्यस्य वसिष्ठ० । अभिषेके विनि० । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समापयेत् । अथ यजमानो विभूतिं धृत्वा हिरण्यरजते सदक्षिणां कृष्णां धेनुं चाचार्याय ऋत्विग्भ्यो यथाशक्ति दक्षिणां च दत्वा स्थापितदेवतोत्तरपूजाविसर्जनांते प्रतिमाद्याचार्यहस्ते प्रतिपाद्याऽग्निं संपूज्य विसृज्य शांतीः पाठयित्वा ब्राह्मणान्संभोज्य तेभ्यो दक्षिणादानांते स्वस्ति भवंतो ब्रुवंत्विति वाचयेत् । तेच स्वस्तीति वदेयुः । (अत्र ग्रंथकृता प्रादेशकरणोत्तरं स्थंडिलात् पूर्वे सर्वतोभद्रे कुंभस्थापनादिपूर्णपात्रनिधानांते तत्रैकस्यामेव प्रतिमायां दर्शदेवतात्वेन सोमसूर्ययोरावा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हनमुक्तं । नाऽत्र प्रतिमाघटकद्रव्यस्योल्लेखः । नचाऽऽवाहने पितृदेवतोपादानं । एतत्तु प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथेति मूलोक्तेन विरुद्धं । विधानपारिजाते अयं धातुक्रमो दर्शसोमसूर्यक्रमाऽपेक्षयेति तस्य व्याख्यानान्मयूखादिष्वेवमेवाऽग्रे व्यवस्थादर्शनाच्चेति । अथाऽन्यदपि । मूलविचारे एतैरिति बहुवचनात्पितृदेवत्यहोमोप्यष्टोत्तरशतमिति व्याख्याय प्रयोगे केवलं सोमसूर्याभ्यामेव होम उक्तस्तत्राप्यष्टशताष्टाविंशत्यन्यतरेति संख्यायां विकल्पः । सच न सर्वसंमतः । एवमत्र सर्वतो विप्रतिपत्तिदर्शनान्मूलानुसारी प्रायेण कौस्तुभोक्त एव प्रयोगो गृहीतः) इति दर्शशांतिप्रयोगः ॥ इति तिथिशांतयः ॥ ॥ अथ नक्षत्रशांतयः ॥ तत्रादौ ज्येष्ठाशांतिः । तदुत्पत्तौ फलं ब्रह्मयामले । ज्येष्ठादौ जननीमाता द्वितीये जननीपिता । तृतीये जननीभ्राता स्वस्य माता चतुर्थके ॥ आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत् । सप्तमे चोभयकुलं ज्येष्ठभ्रातरमष्टमे ॥ नवमे श्वशुरं हंति सर्वस्वं दशमेंऽशके । वसिष्ठः । सुरेशताराजनिता धवाऽग्रजं द्विदैवताराजानिता तु देवरं । पुरंदरर्क्षे जनितः सुतस्तथा स्वस्याऽग्रजं हंति न पुत्रिका यदि । "शां० सा० नृसिंहप्रसादे । धवाऽग्रजं हंति सुरेंद्रजाता तथैव पत्न्या भगिनीं पुमांश्च । द्विदैवजा देवरमाशु हन्याद्भार्याऽनुजामाशु निहंति सूनुः ॥ पत्न्यग्रजामग्रजं वा हंति ज्येष्ठर्क्षजः पुमान् । तथा पत्नीस्वसारं च श्यालकं च द्विदैवजः ॥ कन्यका देवरं हंति विशाखांऽत्यसमुद्भवा । आद्यपादत्रये नैव आद्यभे तु पुमान्भवेत् ॥ आद्यपादत्रये देवरं न हन्यात् । पुमांस्तु आद्यपादत्रय एव पत्नीकनिष्ठं हन्यादित्यर्थः । न हन्याद्देवरं कन्या तुलामिश्राद्द्विदैवजा । तद्दक्षांऽत्योद्भवा वर्ज्या दुष्टा वृश्चिकपुच्छवत् ॥ " विशेषो निर्णयसिंधौ ज्ञेयः । प्रयोगपारिजाते । सुखासीनं मुनिश्रेष्ठं गर्गं मुनिगणान्वितं । कृतांऽजलिपुटो भूत्वा परिपप्रच्छ शौनकः ॥ गर्ग उवाच । ज्येष्ठानक्षत्रसंभूतगंडदोषविनिर्णयं । तस्यशांतिविधानं च यथावत्कथयाम्यहं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटिकैका च मैत्रांते ज्येष्ठादौ घटिकाद्वयं । तयोः संधिरिति ज्ञेयं शिशुगंडं समीरितं ॥ मैत्रमनुराधा । प्रथमे च द्वितीये च ज्येष्ठर्क्षे च तृतीयके । पादत्रये नरो जातो ज्येष्ठोऽप्यत्र प्रजायते ॥ " वि० पा० ज्येष्ठाद्यघटिकाद्वयं परित्यज्य प्रथमादिचरणत्रये जातो नरो ज्येष्ठः श्रेष्ठ इत्यर्थः । दोषाऽभावात् " ज्येष्ठांऽत्यपादजातस्तु पितुः स्वस्य च नाशकः । जायते नाऽत्र संदेहो दशाहाऽभ्यंतरे तथा ॥ ज्येष्ठर्क्षे कन्यका जाता हंति शीघ्रं धवाऽग्रजं । तच्छांतिं तस्य वक्ष्यामि गंडदोषप्रशांतये ॥ सुदिने शुभनक्षत्रे चंद्रताराबलान्विते । सूतकांते तथा कुर्याज्ज्येष्ठाशांतिं विधानतः ॥ वज्रांऽकुशधरं देवमैरावतगजान्वितं । कुर्याच्छचीपतिं रम्यं देवेंद्रं सुरनायकं ॥ कर्षमात्रसुवर्णेन कर्षार्धेनाऽथ पादतः । तद्विधानं प्रकुर्वीत वित्तशाठ्यं न कारयेत् ॥ शालितंडुलसंपूर्णकुंभस्योपरि पूजयेत् । इंद्रायेंदोमरुत्वत इतिमंत्रेण वाग्यतः ॥ गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः । पूजयेद्विधिना विप्र लोकपालगणान्वितं ॥ रक्तवस्त्रद्वयोपेतं पूजयेत्सुरनायकं । तत्र सं [तत्पुरः] स्थापयेत्कुंभांश्चतुर्दिक्षु विशेषतः ॥ तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं । पुण्योदकसमायुक्तान् वस्त्रयुग्मेन वेष्टितान् ॥ कुंभेषु विन्यसेद्धीमान्पंचगव्यं समंत्रकं । पंचामृतं पंचरत्नं मृत्तिकाः पंचसंख्यकाः ॥ पंचवृक्षकषायांश्च पंचपल्लवकांस्तथा । सुवर्णं कुशदूर्वाश्च शतौषधिं विनिक्षिपेत् ॥ पूजयेद्वारुणैर्मंत्रैश्चतुःकुंभान्प्रयत्नतः । त्वंनोअग्ने जपेदादौ सत्वंनोऽपि द्वितीयके ॥ समुद्रज्येष्ठा इति चेमंमेगंगे चतुर्थके । पूजयेद्वस्त्रयुग्माद्यैश्चतुरः कलशानपि ॥ कलशस्थान्वरुणानपीत्यर्थः । " शां० सा० । पूजयेयुश्च वस्त्राद्यै० । अत्र पूजयेयुरिति बहुवचनादृत्विक्कर्तृका पूजा " जपं कुर्युः प्रयत्नेन मंत्रैरेभिर्द्विजोत्तमाः ॥ आनोभद्राजपं चादौ भद्राअग्नेर्द्वितीयकं । तृतीयं पौरुषं सूक्तं कद्रुद्राय चतुर्थकं ॥ आचार्यो मूलमंत्रेण जपं कुर्यात्प्रयत्नतः । " वि० पा० मूलमंत्र इंद्रायेंदो इति " इंद्रसूक्तं रुद्रजाप्यं जपेन्मृत्युंजयं ततः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थं संपूज्य देवेंद्रं वरुणं कुंभसंस्थितं । सुसंकल्पविधानेन होमकर्म ततश्चरेत् ॥ समिद्भिर्ब्रह्मवृक्षस्य शतमष्टोत्तरं तथा । सर्पिषा चरुणा चैव मूलमंत्रेण वाग्यतः ॥ हुनेज्जाप्यं च तेनैव यतइंद्रभयेति च । तिलान्व्याहृतिभिर्हुत्वा शतमष्टोत्तरं पृथक् ॥ भार्याशिशुसमोपेतं यजमानं विशेषतः । अभिषेकं प्रकुर्वीत सूक्तैर्वारुणसंज्ञितैः ॥ समुद्रज्येष्ठादिभिर्मंत्रैरिमंमेवरुणस्तथा । द्यौःशांतेत्यादिभिर्मंत्रैरभिषेकं समाचरेत् ॥ अभिषेकनिवृत्तौ तु यजमानः समाहितः । शुक्लांबराणि धृत्वाऽथ कुर्यादाज्यावलोकनं ॥ रूपंरूपेतिमंत्रेण चित्रं तच्चक्षुरेव वा । देवतापुरतः स्थित्वा धूपदीपनिवेदनं ॥ दद्यादाचमनं सम्यक् तांबूलाऽर्घ्यं तथैवच । नमस्ते सुरनाथाय नमस्तुभ्यं शचीपते । गृहाणार्घ्यं मयादत्तं गंडदोषप्रशांतये । कार्यं यत्पूजकादीनां शुभं लब्ध्वा समर्पयेत् । शुभमदृष्टमृत्विग्भ्यः श्रेयःसंपादनाल्लब्ध्वेंद्राय समर्पयेत् । “ शां० सा० आचार्यऋत्विगादीनां कारितं यत्फलं शुभं । लब्ध्वा तु तत्फलं सम्यग् देवेंद्राय निवेदयेत् ॥ आचार्यादिभिः कारितं यत्कर्म तज्जन्यं शुभमाचार्यादिभ्यः प्रतिगृह्येंद्राय समर्पयेत् ” आचार्याय च गां दद्यात्सुशीलां च पयस्विनीं । रक्तवर्णां वत्सयुतां सर्वाऽलंकारभूषितां ॥ वस्त्रयुग्मपिधानां च यथाविभवसारतः । यक्षगंधर्वसिद्धैश्च पूजितोऽसि शचीपते । दानेनाऽनेन देवेश गंडदोषं विनाशय । “ शां० सा० अनेन गां दद्यादित्यर्थः ” अष्टोत्तरशतं संख्या कुर्याद्ब्राह्मणभोजनं ॥ तेभ्योऽपि दक्षिणां दत्वा प्रणिपत्य क्षमापयेत् । अज्ञानादथवा ज्ञानाद्वैकल्याद्वा धनस्य च । यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि ॥ इति संप्रार्थयेद्देवमिंद्राणीपतिमुत्तमं । ज्येष्ठाशांतिमिमां कृत्वा यथाविध्युक्तमार्गतः । गंडदोषं विनिर्जित्य आयुष्मान्जायते नरः ॥ इत्युक्तं वृद्धगार्ग्येण शौनकाय विशेषतः । ज्येष्ठानक्षत्रसंभूतगंडदोषप्रशांतये ॥ इति ज्येष्टानक्षत्रशांतिः ॥

॥ अथ प्रयोगः । कर्ता सूतकांते चंद्रताराबलान्विते शुभदिने गोमुखप्रसवं कृत्वा द्विराचमनादिदेशका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लस्मरणांते अस्य शिशोर्ज्येष्ठानक्षत्र (अमुकांश) जननसूचितसर्वारिष्टपरिहारद्वाराश्री० सग्रहमखां गर्गोक्तां ज्येष्ठाजननशांतिं करिष्य इति संकल्प्य गणेशपूजाद्याचार्यऋत्विग्वरणांतं कुर्यात् । आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वभागे महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति यवान्निक्षिप्याकलशेष्विति कलशं संस्थाप्य गंधपुष्पादिभिरलंकृत्य शालितंडुलैः पूरयित्वा पूर्णपात्रे उक्तलक्षणप्रतिमायां इंद्रायेंदो इत्यस्य कश्यप इंद्रो गायत्री । इंद्रावा० । इंद्रायेंदोमरुत्वते० इतींद्रं परितो लोकपालांश्चावाह्य (शांतिसारमयूखमते तु इंद्रभिन्ना लोकपालाः) वाग्यतः षोडशोपचारैः पूजयेत् । तत्र रक्तवस्त्रद्वयं शष्कुल्यादिनानाभक्ष्यनैवेद्यं च दद्यात् । ततस्तस्य पूर्वादिदिक्षु कुंभचतुष्टयं तत्पूर्वमध्यभागे च शतच्छिद्रं (पारिजाते तु मध्यकुंभात्पुरतः कुंभपंचकस्थापनमुक्तं) महीद्यौरित्यादिमंत्रावृत्त्या संस्थाप्य चतुर्षु इमंम इत्युदकं । गंधद्वारामिति गंधं । गायत्र्यादिमंत्रैः पंचगव्यं । आप्यायस्वेत्यादिभिः पंचामृतं । सहिरत्नानीति पंचरत्नानि । स्योनेति पंचमृदः । अश्वत्थेव इति पंचपल्लवांस्तत्कषायांश्च । हिरण्येति सुवर्णं । शरासइति कुशान् । कांडात्कांडादिति दूर्वाः । या ओषधीरिति शतौषधीश्च प्रादक्षिण्येन मंत्रावृत्त्या निक्षिप्य युवासुवासाइति वस्त्रयुग्मेनावेष्टय पूर्णादर्वीति पूर्णपात्राणि निधाय तेषु क्रमेण वरुणमावाहयेत् । पूर्वे त्वंनोअग्ने वामदेवो वरुणस्त्रिष्टुप् । वरुणावा० । दक्षिणे सत्वंनो वामदेवो० । पश्चिमे समुद्रज्येष्ठा वसिष्ठो वरुणस्त्रिष्टुप् । उत्तरे इमंमेगंगे सिंधुक्षिद्वरुणो जगती । इत्यावाह्य प्रत्येकं वस्त्रयुग्मसमर्पणपूर्वकं षोडशोपचारैः पूजयेत् । ततश्चतुर्षु कुंभेषु ऋत्विजश्चत्वारि सूक्तानि क्रमेण जपेयुः । आनोभद्रा इति दशर्चस्य सूक्तस्य गोतमो विश्वेदेवा जगती । षष्ठी विराट् तिस्रोंत्यास्त्रिष्टुभः । भद्राअग्नेरिति द्वादशर्चस्य सूक्तस्य सुमित्रोग्निराद्ये जगत्यौ शेषास्त्रिष्टुभः । सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोनुष्टुबंत्या त्रिष्टुप् । कद्रुद्रायेति नवर्चस्य सूक्तस्य कण्वो रुद्रो गायत्र्यं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यानुष्टुप् । जपे विनि० । आचार्यस्तु ऐंद्रकलशे इंद्रायेंदो इति मंत्रस्याऽष्टशतादिसंख्यया जपांते इंद्रंविश्वा इत्यष्टर्चस्य सूक्तस्य जेतेंद्रोनुष्टुप् । कद्रुद्राय कण्वो० । जपे० । इति सूक्तद्वयं जप्त्वा त्र्यंबकमंत्रमष्टाविंशत्यादिसंख्यया जपेत् । ततोग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिदेवतोत्कीर्तनांते इंद्रं प्रधानदेवं पलाशसमिदाज्यचरुभिः प्रतिद्रव्यं अष्टोत्तरशतसंख्याहुतिभिः । प्रजापतिं तिलैः अष्टोत्तर० ।शेषेणेत्यादिग्रहादिहोमांते उक्तप्रकारेणेंद्रहोमं विधाय इंद्रायेंदो कश्यप इंद्रो गायत्री । यतइंद्र भर्ग इंद्रो बृहती । जपे विनि० । एतन्मंत्रद्वयजपांते समस्तव्याहृतिभिस्तिलानष्टोत्तरशतसंख्यया हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य कलशोदकैर्भार्याशिशुसहितं यजमानमभिषिंचेत् । तत्र मंत्राः । नहितेक्षत्रमिति दशर्चस्य सूक्तस्य शुनःशेपो वरुणस्त्रिष्टुप् । मोषुवरुणेति पंचर्चस्य सूक्तस्य शुनःशेपो वरुणो गायत्र्यंत्या जगती । इदंकवेरित्येकादशर्चस्य सूक्तस्य गृत्समदो वरुणस्त्रिष्टुप् । समुद्रज्येष्ठा इति चतसृणां० । इमंमेवरुण शुनःशेपो वरुणो गायत्री । अभिषेके० । एभिर्मंत्रैर्द्यौःशांतेति पृथिवीशांतिरिति तयाहंशांत्येति याजुषैस्त्रिभिर्मंत्रैश्चाऽभिषिक्तो यजमानः शुक्लवस्त्रचंदनविभूतिधारणांते रूपंरूपमित्यादिमंत्रेण कांस्यपात्रस्थमाज्यं पत्न्या सहाऽवलोक्य सदक्षिणं तदाज्यं ब्राह्मणाय दत्वेंद्रं गंधादिभिः संपूज्य तांबूलादिदानांते तस्मै गंधपुष्पाक्षतफलद्रव्यसहितमर्घ्यं नमस्ते सुरनाथाय नमस्तुभ्यं शचीपते । गृहाणार्घ्यं मया दत्तं गंडदोषप्रशांतये इति दत्वा आचार्यादिभ्यो होमादिजन्यं श्रेयो गृहीत्वा तदिंद्राय समर्पयेत् । तत आचार्याय सवत्सां वस्त्रद्वयावृतां सपरिकरां रक्तवर्णां पयस्विनीं गां दद्यात् । मंत्रस्तु । यक्षगंधर्वसिद्धैश्च पूजितोऽसि शचीपते । दानेनाऽनेन देवेश गंडदोषं प्रशामयेति । अस्या गोर्दक्षिणात्वान्नदक्षिणांतरं । ततः स्थापितदेवतोत्तरपूजाविसर्जनांते तत्प्रतिमाद्याचार्याय दत्वाऽग्निं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसृज्याऽष्टशतं ब्राह्मणान्भोजयित्वा तैः शांतिं वाचयित्वेंद्रं प्रार्थयेत् । अज्ञानादथवा ज्ञानाद्वैकल्याद्वा धनस्य च । यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि ॥ ततश्च कर्मसमाप्तिः ॥ इति ज्येष्ठाजननशांतिप्रयोगः ॥ ॥ अथ मूलशांतिः ॥ तत्रादौ तदुत्पत्तिदोषः । भल्लाटः । अभुक्तमूलसंभवं परित्यजेत्तु बालकं । समाऽष्टकं पिताऽथवा न तन्मुखं विलोकयेत् ॥ तदाद्यपादके पिता विपद्यते जनन्यथ । तृतीयके धनक्षयश्चतुर्थकः शुभावहः ॥ प्रतीपमंत्यपादतः फलं तदेव सार्पभे । अभुक्तमूलमाह वृद्धवसिष्ठः । ज्येष्ठांते घटिका चैका मूलादौ घटिकाद्वयं । अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत् ॥ बृहस्पतिस्तु । ज्येष्ठांते घटिकार्धं तु मूलादौ घटिकार्धकं । तयोरंतर्गता नाडी अभुक्तं मूलमुच्यते ॥ बृहन्नारदस्तु । अभुक्तमूलं गंडांतं घटिकानां चतुष्टयं । तत्रेंद्रांऽत्यघटीद्वंद्वं मूलाद्यं द्वंद्वमेव चेत्याह । शौनकः । त्यागो वा मूलजातस्य स्यादष्टाब्दात्प्रदर्शनं । अभुक्तमूलजातानां परित्यागो विधीयते ॥ अदर्शनाद्वाऽपि पितुः स तु तिष्ठेत्समाष्टकं । एवं च दुहितुर्ज्ञेयं मूलजातफलं बुधैः ॥ " वि० पा० ग्रंथांतरे तु कन्यकायाः फलमन्यथोक्तं । न बाला हंति मूलर्क्षे पितरं मातरं तथा । मूलजा श्वशुरं हंति व्यालजा च तदंगनां ॥ माहेंद्रजाऽग्रजं हंति देवरं तु द्विदैवजा । शांतिर्वा पुष्कला स्याच्चेत्तर्हि दोषो न कश्चनेति । व्याल आश्लेषा । माहेंद्रं ज्येष्ठा । द्विदैवं विशाखा । शां० सा० अत्र केचिदभुक्तमूलजातस्याऽऽजन्मपरित्यागो वा समाष्टकाऽदर्शनं वा शांत्यकरण एव । तत्करणे तु नोभयमित्याहुः । अन्ये तु त्यागो वा मूलजातस्य स्यादष्टाब्दात्प्रदर्शनमिति शौनकोक्तेरभुक्तमूलजातस्याऽष्टाब्दादर्वाक् न शांतिकरणेऽपि दर्शनं । शांतिश्च त्यागपक्षेऽपि । सिंहप्रसूतगोशांतिवदित्याहुः । निष्कर्षस्तु न शांतिः । त्यागपक्षे दर्शनाऽसंभवेन गोमुखप्रसवाऽसंभवात् । अत्र गंडांतोत्पत्तौ गंडांतशातेस्तन्नक्षत्रशांतेर्गंडांतसामान्यविहितशिवाऽभिषेकादेर्नक्षत्रेधेनुरुच्यतइत्येत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विहितगोदानादेश्च समुच्चयः । अत्र त्यागविधानेन स्वत्वस्याऽपायात्पातकिनंत्यजतीत्यादौ त्यजतेर्दानार्थत्वाऽभावाच्च । सिंहादिप्रसूतवन्मूलप्रसूतस्य दानं न भवतीति केचित् । तत्र त्यागविधानेऽपि स्वत्वाऽपाये प्रमाणाऽभावात् । अतश्चाऽत्र त्यजतिनाऽऽजन्मदर्शनाऽभावो जातकर्माद्यभावो वा विधेयो न स्वत्वाऽभावः । अन्यथैतस्य ज्येष्ठस्य पितृदाहाऽधिकारो न स्यात् । अतएवाऽऽजन्मपरित्यागपक्षे समाष्टकाऽदर्शने वाऽन्यद्द्वारा जातकर्मादिकरणं । मध्ये चाऽऽकस्मिकदर्शने शांतिपूर्वं स्वयं तत्करणं । अतस्त्यागपक्षे दानादि भवत्येवेति । एतेन सिंहाद्युत्पन्नगवादीनामपि दानं सिद्धं । पुण्यं त्वल्पं । अवश्यं त्याज्यत्वात् । मूलोत्पन्नप्रतिग्रहीतुश्च न त्यागशांतिकादि । तंप्रत्युत्पत्तिकाले स्वत्वाऽभावेन मूलोत्पन्नपुत्रत्वाऽभावात् । मूलमध्ये प्रतिग्रहेऽपि न शांतिकं तत्राऽनुत्पत्तेरिति । " कश्यपसंहितायां त्वन्यथा मूलफलमुक्तं । मूलाद्यपादजो हंति पितरं तु द्वितीयजः । मातरं च तृतीयेऽर्थान् सुहृदं तु तुरीयजः ॥ फलं तदेव सार्पर्क्षे प्रतीपं त्वंत्यपादतः । परिशिष्टे कात्यायनोऽपि । प्रथमे पितुर्नेष्टो द्वितीये मातुस्तृतीये धनधान्यस्य चतुर्थे कुलशोकावहः स्वयं पुण्यभागी स्यादिति । वसिष्ठः । तौरीयजः शुभकरः फलमेतदेव वैलोमतो भुजगधिष्ण्यभवस्य सर्वं । पित्रादेः स्वस्य च शुभकर इति ज्ञेयं (कश्यपसंहितादिवचनप्रामाण्याच्चतुर्थे शुभत्वं बालाऽभिप्रायं न पित्राद्यभिप्रायमिति शांतिसारादौ) मूलवृक्ष उक्तो जपार्णवे । मूलं स्तंभस्त्वचा शाखा पत्रं पुष्पं फलं शिखा । वेदाश्च मुनयश्चैव दिशश्च वसवस्तथा ॥ नंदा बाणा रसा रुद्रा मूलभेदाः प्रकीर्तिताः । मूले मूलविनाशः स्यात् स्तंभे हानिर्धनक्षयः । त्वचा भ्रातृविनाशाय शाखा मातुर्विनाशकृत् ॥ पत्रे सपरिवारः स्यात्पुष्पेषु नृपवल्लभः । फलेषु लभते राज्यं शिखायामल्पजीवितं । अन्यत्र त्वन्यथोक्तं । मूले सप्तघटीषु मूलहननं स्तंभेऽष्टसु स्वक्षयं त्वग्दिग्बंधुविनाशनं च विटपे रुद्रैर्हतो मातुलः । प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रेऽर्कैः सुकृती तु बाणकुसुमे मंत्री फले सागरै राजा वह्निशिखाऽल्पमायुरिति सन्मूलांऽघ्रिपे स्यात्फलं ॥ पत्रादिघटिकानां तूत्तमत्वेऽपि चरणदोषोऽस्त्येव । मूलस्य स्वर्गादिस्थितत्वेन फलं च भूपालवल्लभे । वृषाऽलिसिंहेषु घटे च मूलं दिवि स्थितं युग्मतुलांऽगनांऽत्ये । पातालगं मेषधनुःकुलीरनक्रेषु मर्त्येष्विति संस्मरंति ॥ “ शां० सा० अत्र वृषादौ सूर्ये सतीत्यध्याहार्यं ” एतल्लग्नफलं तु । स्वर्गे मूले भवेद्राज्यं पाताले च धनागमः । मृत्युलोके यदा मूलं तदा शून्यं समादिशेत् ॥ “शां० सा० स्वर्गादिस्थितेऽपि चरणदोषोऽस्त्येव । मर्त्यादिस्थितेऽपि शुभं” वसिष्ठः । नैर्ऋत्यभोद्भूतसुतः सुता वा क्षिप्रादवश्यं श्वशुरं निहंति । तदंत्यपादे जनितो न हंति तस्योत्क्रमेणाऽहिभवे कलत्रं ॥ “शां० सा० उत्क्रमेण वैपरीत्येन । तस्य कलत्रमित्यन्वयः ” विशेषो मत्कृते निर्णयसिंधौ ज्ञेयः । वसिष्ठः । व्यतीपातेऽगहानिः स्यात्परिघे मृत्युमादिशेत् । वैधृतौ पितृहानिः स्यान्नष्टेंदावंधतां व्रजेत् ॥ मूले समूलनाशः स्यात्कुलनाशो धृतौ भवेत् । विकृतांऽगे च हीने च संध्ययोरुभयोरपि ॥ पर्वण्यपि प्रसूतौ च सर्वारिष्टभयप्रदः । तद्वत्सदंतजातश्च पादजातस्तथैवच । तस्माच्छांतिं प्रकुर्वीत ग्रहाणां क्रूरचेतसामिति । व्यतीपातादौ शांतिग्रहमखयोः समुच्चयः । अत्र यत् तत्तत्प्रकरणे ग्रहमखविधानं तदनारभ्याधीतस्य साक्षदश्यस्य मित्रविंदाप्रकरणस्थेनेवोपसंहारादितरेषु शांतिकेषु ग्रहमखाऽनावश्यकत्वार्थं । “ शां० सा० व्यतीपातादौ तन्निमित्तकशांतिग्रहमखयोः समुच्चयः । तत्रापि स्वतंत्रप्रयोगता वैकप्रयोगता वा । यत्तु तत्तत्प्रकरणे पुनर्ग्रहमखविधानं तदेकप्रयोगतानियमार्थमिति केचित् । अन्ये त्वंगस्यैकप्रयोगताऽपि न्यायादेव सिद्धेत्यंगभूतग्रहमखाद्भिन्नं ग्रहमखांतरं विधीयत इत्याहुः । ग्रहमखस्य च सर्वशांतिषु पूर्वांगत्वात्सहप्रयोगेऽपि पूर्वं ग्रहहोमः । पश्चात्तत्तत्प्रधानहोम इति । ” शांतिमाह शौनकः । अथातः संप्रवक्ष्यामि मूलजातहिताय च । मातापित्रोर्धनस्याऽपि कुल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातिहिताय च ॥ (शांतिमिति शेषः) मुख्यकालं प्रवक्ष्यामि शांतिहोमस्य यत्नतः । जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने ॥ " शां० सा० अत्र केचिच्छुभदिनपदं द्वादशाहादिविशेषणमिति न स्वतंत्रकालविधानमिति वदंति । अन्ये तु दिनपदस्य द्वादशाहपदांतर्गतस्य चाऽहःपदस्य पौनरुक्त्यापत्तेः स्वतंत्रकालविधानमित्याहुः " समाष्टके द्वादशाहे कुर्याद्वा शांतिमादरात् । अष्टवर्षोत्तरं द्वादशाहे इत्यर्थः । " शां० सा० अभुक्तमूलोत्पत्तौ समाष्टकाऽदर्शनपक्षे समाष्टकानंतरं तद्भिन्नमूलोत्पत्तौ द्वादशाहे इत्यर्थः । मदनरत्ने तु द्वादशाब्दे इति पाठः । अन्यथा पौनरुक्त्यापत्तेः " यदैव शांतिकं कुर्यात्कर्म तत्र प्रचक्ष्महे । सुसमे पुण्यदेशे तु मंडपं कारयेद्बुधः । पुण्यैर्भिर्मंत्रितैस्तोयैः प्रोक्षितायां क्षितौ ततः । " वि० पा० पुण्यर्चं आपोहिष्ठादयः " ऋत्विजस्तु कश्यपेनोक्ताः । ब्राह्मणाः श्रोत्रियाश्चाऽष्टौ द्वादश त्वथ षोडशेति । तत्रोदकुंभं सुश्लक्ष्णं रक्तं व्रणविवर्जितं । अकृष्णमूलं [सुवर्तुलं च] निर्णिक्तं पूरयेन्निर्मलांऽभसा । निर्णिक्तं धौतं । वस्त्राऽवगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा । कूर्चहेमसमायुक्तं चूतपल्लवसंयुतं । " वि० पा० कूर्चं पंचगव्यं । पंचकूर्चेन पीतेनेति स्कांदे तथा दर्शनात् । यद्वा दर्भमुष्टिः " स्वस्तिकोपरि विन्यस्य सक्षीरद्रुमपल्लवं । द्रोणव्रीहींश्च निक्षिप्य ऐशान्यां तं निधापयेत् । पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं । अर्चितं गंधपुष्पाद्यैः श्रीरुद्रं च स्पृशन् जपेत् ॥ " शां० सा० कुंभं स्पृशन् रुद्रं जपेदित्यर्थः । अत्र च पूर्णपात्रोपरि रुद्रप्रतिमां पूजयित्वा जपः कर्तव्यः । तत्कुंभवस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नत इत्यग्रे दर्शनात् " षडंगसहितं सम्यक् तं जपेद्रुद्रसंख्यया । बह्वृचो रुद्रसूक्तैर्वा छंदोगो रुद्रसामभिः ॥ " वि० पा० रुद्रसूक्तानि चत्वारि । कद्रुद्रायेति नवर्चमेकं । इमारुद्रायतवस इत्येकादशर्चं द्वितीयं । आतेपितरिति पंचदशर्चं तृतीयं । इमारुद्रायस्थिरेति चतुर्ऋचं च चतुर्थं । सामगस्तु आवोराजान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्येकादश रुद्रसामानि जपेत् । बह्वृचसामगयोरयं विशेषः । श्रीरुद्रस्तु सर्वसाधारणः । यजुर्वेदिनश्च श्रीरुद्र इत्यन्ये । शां० म० सूक्तानि सामानि च त्रीण्येव । कपिंजलन्यायात् " एकादशाऽष्टत्रिद्व्येकसंख्यया शक्तितो जपेत् । इयं च संख्या रुद्रतत्सूक्तसामसु । तत्राऽप्रतिरथं सूक्तं शतरुद्राऽनुवाककं ॥ अप्रतिरथमाशुःशिशान इति । शतरुद्राऽनुवाकस्त्वमग्नेरुद्र इति । रक्षामंत्रं तथा पुण्यं राक्षोघ्नं च स्पृशन्जपेत् । " वि० पा० रक्षामंत्रो रक्षाणोअग्न इति । राक्षोघ्नं च रक्षोहणमिति पंचविंशर्चं सूक्तं । शां० सा० एतेषामप्येकादशवारं जपः " एतेषामप्येकादशादिसंख्यया जपः । त्रैयंबकं जपेत्सम्यगष्टोत्तरसहस्रकं ॥ एकवारं तथा जापी पावमानीः स्पृशन्जपेत् । " शां० सा० अयं जप ऋत्विजामाचार्यस्य वा " जपस्य [संस्थाप्य] पंच कुंभांश्च द्वयं वा तदलाभतः ॥ " शां० सा० पूर्वोक्त एकः कुंभो वक्ष्यमाणश्छिद्रसहितो द्वितीय एते पंचेत्येवं सप्तकुंभा इति केचित् । अन्ये तु पूर्वोक्तकुंभो मध्ये ऐशानादिकोणचतुष्के चत्वार इति पंच वक्ष्यमाणः षष्ठ इत्याहुः " । रुद्रकुंभो निर्ऋतिकुंभश्च भिन्नः । एवं सप्तकुंभाः । रुद्रकुंभो निर्ऋतिमध्ये ऐशानादिकोणचतुष्के चत्वार इति पंच वा । कश्यपसंहितायां तु मध्ये शतच्छिद्रः कोणेषु चत्वार इत्येवं पंचकुंभाः । ऐशानादिचतुष्कोणेष्वव्रणान्जलपूरितान् । पूर्वोक्तद्रव्यसंयुक्तान् स्थापयेद्रक्तवर्णकान् ॥ शतच्छिद्रं बृहत्कुंभं स्थापयेत्तंडुलोपरीति । तत्र पूर्वादितः सूक्तजपस्तेनैवोक्तः । रुद्रेण क्रमशो भद्राअग्नेः सूक्तेन भक्तितः । आनोभद्रा इत्यनेन पुरुषसूक्तेन चाऽर्चयेत् ॥ मोचनीमूलजामित्यष्टौ वाक्यान्येकको जपेत् । कुंभद्वयपक्षे चतुःप्रस्रवणउक्तः कात्यायनेन । द्वितीयोदकुंभं कृत्वा चतुःप्रस्रवणसंयुक्तं ततो वरुणमुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बत्ध्वेति । पंचकुंभपक्षेऽपि मध्ये शतमूलानि । " शां० सा० पंचकुंभपक्षेऽपि मध्यकुंभोपरि शतमूलानि । तस्य कुंभचतुष्टयसहितस्य चतुःप्रस्रवणस्थानापन्नत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रकुंभाऽतिरिक्तेषु वरुणपूजा निर्ऋतिश्चतुर्विंशतिदलस्थकुंभे एव पूज्यः। जपस्य पंचकुंभा इत्युक्तेः। सर्वेषु पूर्वोक्तमंत्रजपो वा शांतिजपो वा कार्यः " कुंभद्वयमाह। श्रीरुद्रस्यैककुंभश्च सर्वसूक्तानि तत्र तु ॥ तथाऽन्यं च शुभं कुंभं पूर्वोक्तैर्लक्षणैर्युतं। चतुःप्रस्रवणं कुर्यात्पंचवक्त्रं तु तद्भवेत् ॥ " शां० म० अत्राऽयं सांप्रदायिकोऽर्थः। आद्यपक्षे षट् कुंभाः। एको रुद्रस्य। तस्मिन् शतरुद्रियं रुद्रसूक्तानि सामानि वा जप्यानि। अभिषेकार्थं पंच कुंभाः। तत्र पूर्वादिकुंभचतुष्टये तत्राऽप्रतिरथमित्यादिना क्रमात्सूक्तचतुष्टयविधिः। मध्ये च त्र्यंबकमंत्रपावमानीजपविधिः। एवं पंचकुंभाऽशक्तौ चतुःप्रस्रवण एक एव। द्वयमिति द्वित्वं तु रुद्रकुंभमादाय। अतएव श्रीरुद्रस्येतिश्लोकार्धेन रुद्रकुंभ एव पूर्वोक्तो द्वित्वसंख्यापूरणायाऽनूद्यते। चतुःप्रस्रवण एव तु पंचकुंभस्थाने विधीयते। एवं पंचवक्त्रंतुतद्भवेदिति पंचवक्त्रतोक्तिरपि पंचकुंभस्थानापत्त्या संगच्छते " वस्त्राऽवगुंठितं कुर्यात् पूरयेत्तीर्थवारिणा। पंचरत्नसमायुक्तमाम्रपल्लवसंयुतं ॥ गजाऽश्वरथ्यावल्मीकसंगमन्हृदगोकुलात्। राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ कुंभस्य नैर्ऋते देशे होमस्थानं प्रकल्पयेत्। गोमयाऽऽलेपिते देशे कुर्यात्स्थंडिलमुत्तमं ॥ " शां० सा० मंडपपक्षेऽपि स्थंडिलमेव। मंडपमुपक्रम्यैव स्थंडिलविधानात् " कश्यपेन तु। मंडपं चतुरस्रं च चतुर्हस्तप्रमाणतः। चतुर्द्वारसमायुक्तं तोरणाद्यैरलंकृतं। पूर्वोक्तलक्षणोपेतं कुंडमीशानतो बहिरित्युक्तं। कृत्वाऽग्निमुखपर्यंतमुल्लेखादि स्वशाखया। पूर्णपात्रनिधानांतं कृत्वा पूजां समारभेत् ॥ " शां० सा० अग्निमुखमग्निस्थापनं। पूजां तत्सामग्रीं कुर्यादित्यर्थः। नत्वत्र पूजा विधेया। तस्या वक्ष्यमाणत्वात् " नक्षत्रदेवतारूपं सुवर्णेन प्रयत्नतः। निष्कमानेन चाऽर्धेन पादेनाऽथ स्वशक्तितः॥ प्रतिमां लक्षणैर्नैकां कारयित्वा विचक्षणः। यद्वा मूल्यं सुवर्णस्य स्थापयित्वा प्रपूजयेत् ॥ "शां० म० यद्वा मूलं सुवर्णस्य०। मूलं मूलाकारं। मूल्यमिति क्वचित्पाठः। तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिमामूल्यमित्यर्थः ” सुवर्णं सर्वदेवत्यं सर्वदेवात्मकोऽनलः । सर्वदेवात्मको विप्रः सर्वदेवमयो हरिः ॥ संस्मरेन्निर्ऋतिं श्यामं सुमुखं नरवाहनं । रक्षोऽधिपं खड्गहस्तं दिव्याभरणभूषितं ॥ ज्योतिर्निबंधे तु । मूलरूपं विधातव्यं श्वेतं कुणपवाहनं । खड्गखेटधरं चोग्रं द्विभुजं च वृकाननमित्युक्तं । प्रतिमापूजनार्थाय वस्त्रयुग्मं प्रकल्पयेत् । पंकजं कारयेद्भूमौ रक्ताभैर्व्रीहितंडुलैः ॥ चतुर्विंशद्दलोपेतं शुक्लैर्वा कर्णिकान्वितं । तस्योपरि न्यसेत्पात्रं स्वर्णं वा रौप्यमृन्मयं ॥ (पात्रं कलशं) शुद्धवस्त्रेण संछाद्य तत्र मूलानि निक्षिपेत् ॥ मूलानि शतमूलानि । विष्णुक्रांता सहदेवी तुलसी तु शतावरी । मूलानीमानि गृह्णीयाच्छताऽलाभे विशेषतः ॥ स्थापयेत्कर्णिकामध्ये वस्त्रगंधाद्यलंकृतं । कूर्चहेमजलोपेतं कुंकुमौषधिसंयुतं ॥ कूर्चो दर्भस्तंबः । एवंविधं कुंभं न्यसेदित्यर्थः । कुंभोपरि न्यसेद्विद्वान् मूलनक्षत्रदेवतां । अधिप्रत्यधिदेवौ च दक्षिणोत्तरयोः क्रमात् ॥ अधिदेवं यजेदादौ ज्येष्ठानक्षत्रदेवतां । ततः प्रत्यधिदेवं च पूर्वाषाढाधिपं यजेत् ॥ उत्तराषाढऋक्षाद्या अनुराधांतमर्चयेत् । भूमिस्थचतुर्विंशतिदलेषु उत्तराषाढाद्यानि चतुर्विंशतिनक्षत्राणि पूर्वादितः स्थाप्यानीत्यर्थः । “ शां० सा० नक्षत्रदेवताः स्थाप्या इति केचित् । ऐंद्रादैशानपर्यंतं पूजयेत्स्वस्वनामतः ॥ स्वलिंगोक्तैश्च तन्मंत्रैः प्रधानादीन्प्रपूजयेत् । कश्यपेन तु । सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः । यथावित्तानुसारेण प्रतिमां निर्ऋतेः सुधीः ॥ उदुंबरवटाऽश्वत्थप्लक्षाम्रत्वक् सपल्लवं । शतौषधीमूलशंखनवरत्नानि मृत्तिकाः ॥ पंचामृतांऽबु सद्बीजं कुंकुमं रोचनं फलं । कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनं । वचा कचोरकं मुस्ता सर्वौषध्यो दश स्मृताः ॥ गजाऽश्वरथ्यावल्मीकसंगमस्थानसंभवाः । ह्रदगोराजनगरद्वारतश्चाऽष्टमृत्तिकाः ॥ तिलव्रीहियवा माषगोधूमाऽणुप्रियंगवः । चणकैः सहिताश्चाऽष्टौ सद्बीजाख्यानि सर्वदा ॥ (अणुर्व्रीहिभेदः) दधिमध्वक्षतैः कुंभान्वस्त्रैस्तल्लिंगमंत्रकैः । मोषुणइति मंत्रेण निर्ऋतिं चाऽर्चे-

Nagpal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येत्तत इत्युक्तं । पंचामृतेन संस्नाप्य आवाह्याऽथ समर्चयेत् । " सं० कौ० आवाह्येति ल्यब्लोपे पंचमी । अथेति पूर्णपात्रनिधानांतं कृत्वे-
त्युक्ताऽऽनंतर्योऽनुवादः । अतएवाह उपचारैः षोडशभिरिति । आवाहनमारभ्याऽर्चनविवरणं " उपचारैः षोडशभिर्यद्वा पंचोपचारकैः ॥
रक्तचंदनगंधाद्यैः पुष्पैः कृष्णसितादिभिः । मेषशृंगादिधूपैश्च घृतदीपैस्तथोत्तमैः ॥ सुरापोलिकमांसाद्यैर्नैवेद्यैरोदनादिभिः । मत्स्यमांससुरादी-
नि ब्राह्मणानां विवर्जयेत् ॥ सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रितं । पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत् ॥ उक्तगंधाद्यलाभे तु य-
थालाभं समर्पयेत् । पुष्पांतं तु समभ्यर्च्य होमं कुर्याद्यथोदितं ॥ " शां० सा० पुष्पांजल्यंतमित्यर्थः " निर्वापप्रोक्षणादीनि चरोः कुर्याद्य-
थाविधि । हविर्गृहीत्वा विधिवन्नैर्ऋत्यैव ऋचा हुनेत् ॥ मोषुणः परापरेति यत्तेदेवीति वा पुनः । पायसं घृतसंमिश्रं हुनेदष्टोत्तरं शतं । समिदाज्यचरून्प-
श्चाच्छक्तितः संख्यया हुनेत् ॥ " सं० कौ० विधिवदिति पायसचर्वोरवदानधर्मविधेः प्रतिप्रसवः । अन्यथाऽऽनर्थक्यात् । पश्चात् पायसहामोत्तरं "
अधिदेवतयोश्चैव जुहुयात्स्वस्वमंत्रतः । चतुर्थ्यंतैर्नमोऽतैश्च स्वाहांतैः स्वस्वमंत्रकैः ॥ नक्षत्रदेवताभ्यश्च पायसेन तु होमयेत् । स्वस्वमंत्रो ना-
ममंत्रः । कृणुष्वेति पंचदशर्ग्भिर्जुहुयात्कृसरं ततः ॥ " शां० सा० अत्र ऋग्भिरिति ग्रहणात्प्रत्यृचं होमः । यत्र तु अमुकसूक्तेन होमः
कर्तव्य इत्याम्नातं यथाऽत्रैव श्रीसूक्तेनेति तत्र सूक्तेनैव होमः कर्तव्य इति युक्तं । संप्रदायस्तु प्रत्यृचं होम इति " गायत्र्या जातवेदसे
त्र्यंबकमिति च क्रमात् ॥ " शां० सा० अत्र क्रमादित्युक्तेरेतत्पर्यंतं कृसराऽन्वयः । उत्तरत्र वक्ष्यमाणसमिदाज्यचर्वन्वयः । मंत्रक्रमस्य
पाठादेव सिद्धेरिति केचित् " सीरायुंजंति तामग्निं वास्तोष्पत्याग्निमेव च ॥ " वि० पा० अग्निं अग्निदूतंवृणीमहइति मंत्रः । सांनिध्या- ॥५७॥
त् " तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसितरसे नमः ॥ क्षेत्रस्यपतिना गृणानाऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिंदूतंपुरोदधे । " शां० सा० एतत्पर्यंतं कृसरान्वय इत्यपरे । संख्या तु वक्ष्यमाणा " श्रीसूक्तेन तथा विद्वान् समिदाज्यचरून् क्रमात् ॥ अष्टोत्तरशतैर्वाऽथ अष्टाविंशतिभिः क्रमात् । अष्टाष्टसंख्यया वाऽपि जुहुयाच्छक्तितो बुधः ॥ त्वंनःसोमेन पायसं जुहुयात्तु त्रयोदश । चतुर्गृहीतमाज्यं च यातेरुद्रेति मंत्रतः ॥ स्रुवेण जुहुयादाज्यं महाव्याहृतिभिः क्रमात् । " शां० सा० महाव्याहृतीराह पराशरः । संक्षेपायाऽसृजद्ब्रह्मा सप्तेमा व्याहृतीः पुरा । भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च ॥ आद्यास्तिस्रो महा प्रोक्ताः सर्वत्र प्रतियोजयेदिति । शंखस्तु भूर्भुवः स्वर्महो जनस्तपः सत्यमिति महाव्याहृतय इत्याह । बोधायनेन तु भूरग्नयेचेति मंत्रचतुष्टयं महाव्याहृतय इत्युक्तं । चतुर्गृहीतादौ सकृदेव होमः " हुत्वा स्विष्टकृतं पश्चात्प्रायश्चित्ताहुतीर्हुनेत् ॥ कश्यपेन तु । दुर्गाऽश्विग्रहविघ्नेशलोकपालांश्च पूजयेत् । प्रजापतये स्वाहेति मुखांते जुहुयाद्यमं ॥ मूलायस्वाहा प्रजापतयेस्वाहेत्युपहोमौ । पलाशसमिदाज्येन त्वन्नेनाऽष्टसहस्रकं । अथवाऽष्टोत्तरशतं प्रत्येकं जुहुयात्ततः ॥ मूलंप्रजामित्यष्टाभिर्वाक्यैर्मंत्रद्वयेन च । सावित्रसौम्यनैर्ऋत्यमंत्रैरश्वत्थसंभवैः ॥ समिद्भिश्च तिलव्रीहीन् हुत्वा व्याहृतिभिस्तथेत्युक्तं । आचार्यो यजमानो वा अग्नौ पूर्णाहुतिं हुनेत् ॥ समुद्रादूर्मिसूक्तेन प्राजापत्यऋचा तथा । पूर्णादर्वि सप्ततेति मंत्रैः पूर्णाहुतिं हुनेत् ॥ होमशेषं समाप्याऽथ वह्निमारोपयेद्बुधः । ग्रहमखविकृतित्वात्स्मार्ताग्निपक्षेऽत्र वह्निसमारोपः । कुंभाऽभिमंत्रणं कुर्याद्दक्षिणेनाऽभिमर्शयेत् ॥ मृत्यूपशमनार्थाय जपेत्त्रैयंबकं शतं । रुद्रकुंभोक्तमार्गेण रुद्रमंत्रं [कुंभं] स्पृशन्जपेत् ॥ रुद्रकुंभस्य दक्षिणतोऽभिमर्शनं कृत्वा याजुषबह्वृचसामगादिः पूर्वोक्तं स्वं जपं जपेदित्यर्थः । एकादशाऽष्टत्रिद्व्येकसंख्यया रुद्रं रुद्रसूक्तं साम वा जपेदित्यर्थः । " शां० सा० अत्राऽयं नियमः । त्रैयंबकस्य शतवारमेव जपो न सहस्रवारं " धूपं दीपं च नैवेद्यं कुंभयुग्मे निवेदयेत् । रुद्रकुंभे निर्ऋतिकुंभे

Nepal Sanskrit University Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत्यर्थः । प्रसादयेत्ततो देवमभिषेकार्थमादरात् ॥ निर्ऋतिं रुद्रं च । तस्मिन्काले ग्रहातिथ्यं कर्तव्यं भूतिमिच्छता । पृथक् प्रशस्तस्तेनैव न-
क्षत्रेष्ट्या सहैव वा ॥ तेनैव हेतुना ग्रहयज्ञः पृथक् प्रशस्तः । मूलशांत्या सह वेत्यर्थः । (ग्रहातिथ्यं ग्रहमखः) अभिषेकविधिं वक्ष्ये स-
र्वाचार्यैरुदीरितं । भद्रासनोपविष्टस्य यजमानस्य ऋत्विजः ॥ दारपुत्रसमेतस्य कुर्युः सर्वेऽभिषेचनं । अक्षीभ्यामिति सूक्तेन पावमानीभिरेव
च ॥ आपोहिष्ठेति नवभिरापइद्वाद्वयेन च [यतइंद्रद्वयेन च] । सहस्राक्षतृचेनाऽपि देवस्यत्वेति मंत्रकैः ॥ शिवसंकल्पमंत्रेण वक्ष्यमाणै-
श्च मंत्रकैः ॥ वक्ष्यमाणैः श्लोकैः । ते च प्रयोगे वक्ष्यंते । तच्छंयोरभिषेकं तु सर्वदोषोपशांतिदं । सर्वकामप्रदं दिव्यं मंगलानां च मंगलं ॥
वस्त्रांऽतरितकुंभाभ्यां पश्चात्तु स्नपयेद्बुधः । ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ यजमानो दक्षिणाभिस्तोषयेदृत्विगादिकान् । धेनुं पय-
स्विनीं दद्यादाचार्याय सवत्सकां ॥ निर्ऋतिप्रतिमां वस्त्रं कुंभं हेम च दापयेत् । " शां० सा० वस्त्रकुंभौ निर्ऋतिसंबंधिनौ । हेम स्वतंत्रं
यथाशक्ति देयं " ग्रहार्थवस्त्रप्रतिमास्तत्तदुक्ताश्च दक्षिणाः । कश्यपेन तु । आचार्याय वृषं लोहपिंडं दद्यात्सदक्षिणमित्युक्तं । श्रीरुद्रजापिने
देयः कृष्णोऽनड्वान् प्रयत्नतः ॥ तत्कुंभवस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नतः । इतरेभ्योऽपि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणां ॥ उक्ताऽलाभे
ततो दद्यादाचार्यब्रह्मऋत्विजां । तत्तन्मूल्यं प्रदातव्यं शक्त्या वाऽथ प्रदापयेत् ॥ " शां० सा० उत्तमपक्षेण मूल्यं दातव्यं । तदशक्ता-
वधमपक्षेणेत्यर्थः । अथवा शक्त्यावेत्यनेन गवादिमूल्यादप्यल्पीयसी दक्षिणा विधीयते " आचार्याय तु यद्दत्तं तदर्धं ब्रह्मणे भवेत् । ब्रह्म-
णोऽर्धं सदस्याय ऋत्विग्भ्यश्च तदर्धकं ॥ " शां० सा० मुख्यदक्षिणाया अभावेऽर्धादिकल्पना " ज्योतिर्निबंधे त्वत्र शतमूलहोमोऽप्युक्तः ।
प्रच्छादनोर्णावस्त्रादि दद्याद्धेनुं च कांचनं । दानांते होमयेद्विप्रः सर्वमूलानि तत्र वै इति । देवता चाऽत्र मूलमेव । गृह्णीयादाशिषं तेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणम्याऽथ क्षमापयेत् । दद्यादन्नं पायसादि ब्राह्मणान्भोजयेच्छतं ॥ अलाभे सति पंचाशद्दशकं तदलाभतः । सर्वशांतेश्च पठनं ब्राह्मणैरा-शिषस्तथा ॥ गृही क्षमापयेद्विद्वान् निर्ऋतिः प्रीयतामिति । विधाने चरितेऽस्मिंस्तु ततः शांतिर्भवेद्ध्रुवं । गंडांतेऽप्येवमेव स्यात्पुष्यार्धे तद्वदेव तु ॥ पुष्याद्यार्धे प्रसवेऽप्येवं शांतिः कार्येत्यर्थः । इत्युक्तं मनुना सम्यङ् मूलजातहिताय च । मातापित्रोर्धनस्याऽपि बंधुदोषोपशांत-ये ॥ इति मदनरत्ने शौनकोक्तमूलशांतिः ॥ ॥ शतमूलानि दैवज्ञमनोहरे पुराणसमुच्चये । बर्हिशिखा १ हरिक्रांता २ सहदेवी ३ पुनर्नवा ४ । शरपुंखा ५ वराही च ६ काकजंघा ७ सुलक्षणा ८ ॥ तुंबिका चैव ९ कर्कंधूः १० कर्पूरी ११ कारवल्लिका १२ । क-र्कोटिका च १३ चक्रांका १४ श्वेतार्को १५ व्याघ्रपत्रिका १६ ॥ रुदंती १७ चाऽश्वगंधा च १८ मुसली १९ गिरिकर्णिका २० । इंद्रवारुण्य २१ पामार्गः २२ शंखपुष्पी २३ कुमारिका २४ ॥ शल्लकी चाऽथ २५ गांधारी २६ निर्गुंडी २७ देवदालिका २८ । वटः २९ शमी ३० तथा प्लक्षः ३१ पलाशोऽ ३२ श्वत्थ एव च ३३ ॥ चूतश्चो ३४ दुंबरो ३५ जंबू ३६ र्नंदीवृक्षोऽथ ३७ वेतसः ३८ । पुन्नागोऽथाऽ ३९ र्जुनोऽ ४० शोको ४१ बकुलोऽ ४२ श्मंतकस्तथा ४३ ॥ शाल ४४ स्ताल ४५ स्तमालश्च ४६ पाटला ४७ शतपत्रिका ४८ । मधूकश्च ४९ शिरीषश्च ५० श्रीवृक्षो ५१ बृहतीद्वयं ५२ । ५३॥ बला ५४ चाऽतिबला चैव ५५ पाठा ५६ नागबला तथा ५७ । जाती च ५८ बकुलश्चैव ५९ केतकी ६० कदली तथा ६१ ॥ मातुलिंगी ६२ जयंती च ६३ यवानी ६४ पुंड्रिका तथा ६५ । द्रो-णपुष्पी ६६ तथा कुंभी ६७ श्रीपर्णी ६८ दमनस्तथा ६९ ॥ चंपकः ७० पद्मकं चैव ७१ तथा कांचनपुष्पिका ७२ । सिद्धेश्वरी च ७३ ब-दरी ७४ राजवृक्षो ७५ धवस्तथा ७६ ॥ कुंदश्च ७७ मुचुकुंदश्च ७८ गोजिव्हा ७९ क्षीरकंदकः ८० । दाडिमी ८१ बीजपूरी च ८२ ब्राह्मी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८३ चाऽऽमलकी तथा ८४ ॥ भृंगराज ८५ स्वधःपुष्पी ८६ मत्स्याक्षी ८७ चाऽटरूषकः ८८ । तरंगिणी ८९ गुडूची च ९० निशाह्वा ९१ शतमूलिका ९२ ॥ बाकुची ९३ काकजंघा च ९४ बर्बरी ९५ तुलसी तथा ९६ । कुशः ९७ काशः ९८ श्वेक्षुमूलं ९९ तथा सर्षपमूलकं १०० ॥ अलाभे चोक्तवृक्षाणां सद्वृक्षाणां समाहरेत् । एतेषां महाराष्ट्रभाषया नामानि । मण्यारशिखा । विष्णुक्रांता । महाबला । घेंटुळी । सरफोका । कळलावी । कांग । श्वेतरिंगणी । भोंपळी । घोंटी । कापरी । कारली । कर्टुली । तरवड । पांढरी रुई । विषमुंगसी । रुदंती । आस्कंद । मुसळीकंद । सुपली । कौंडळ । आघाडा । सांखवेल । कोरफड । साळई । धमासा । निगडी । देवडांगर । वड । शमी । पिंपरी । पळस । पिंपळ।आंबा । उंबर । जांबुळ । राळेचा वृक्ष । वेत । नागकेशर । अर्जुनसादडा । अशोक । वोलसरी । आपटा । हेद । ताड । तमाल । पाडळी । शेवती । मोहा । शिरस । बेल । रिंगणी । डोरली । कांसोळी । मोठा चिकणा । पाहाडमूळ । गाडेधामण । जाई । बकुळी । केतकी । केळी । माहाळुंगी । टांकळी । ओंवा । मधुमाधवी । कुंभा । देवकुंभा । शिवणी । दवणा । चांपा । कमळ । भुईचांपा । ईश्वरीपाहाड । बोरी । बाहवा । धावडा । कुंद । मुचकुंद । गलकुंभी । भुईकोहळी । डाळिंबी । लिंबुणी । भारंगी । आंवळी । माका । अधहुली । कांगोणी । अडुळसा । शेवाळ । गुळवेल । हळदी । शतावरी । बांवची । कावळी । वावरी । तुळसी । कुश । काश । ऊंस । राई । १०० । स्पष्टमन्यत् । मदनरत्ने हेमाद्रौ च गर्गस्त्वन्यथाऽऽह । स्वयमुत्पाटयेत्प्राज्ञो मूलानां च शतं पिता । लक्ष्मणा शतमूला च शिरीषो वेतसस्तथा ॥ सहका श्वेतमूला च विष्णुक्रांता च शंखिनी । सर्पाक्षी मीननेत्रा च पुत्रपारा कृतांजली ॥ पलाशो बिल्वकश्चैव रोचनं चंदनद्वयं । कृष्णमांसी मुरोशीरं वालकं च तथाऽमला ॥ गोजिह्वा तुळसी हृष्या शतपुष्पा सलांगली । ब्रह्मदंडी द्रोणपुष्पी प्रियंगुः सि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तसर्षपः ॥ पिप्पली काकजंघा च त्रायमाणा हुहूस्तथा । ज्योतिष्मती च गांधारी निर्गंधः पूर्णकौशिकी । भगक्षमा सुभद्रा च गुडूची सेंद्रवारुणी ॥ अलंबुका रुदंती च कदली केतकी तथा । गोक्षुरा शतपर्वा चाऽरिष्टिका चाऽपराजिता ॥ छिन्नरुहा शतपत्रा निकुंभा च सुवर्चेला। अश्वगंधा हस्तिकर्णी हरिद्राद्वितयं तथा । उष्ट्रवो मधुकारश्च अश्वत्थो बकुलस्तथा॥ नष्टक्षीरा त्वपामार्गो मंदारश्चाऽतिमुक्तकः । मालती स्वर्णपुष्पी च श्रीपर्णी श्रीफलं तथा ॥ दर्भमूलं करवीरं मदयंती विकंकता । पाटला सुरदारुश्च अर्धसूदनिकस्तथा ॥ फलं मन्मथवृक्षस्य पलाशस्य च पल्लवाः । रास्ना नदीवृक्षमूलं सुरदारुर्विदारिका ॥ श्वेतवीर्या श्वेतपाका नीलोत्पलं तथैव च । नागकेसरसिंदूरीकुमारीश्चैव निक्षिपेत् ॥ शतमूला शतावरी । वेतसो वंजुलः । सहका सहदेवी। श्वेतमूला पुनर्नवा । मीननेत्रा मत्स्याक्षी । पुत्रपारा पुत्रजीवः । कृतांजली अंजलिनी हातजोडाइति प्रसिद्धा । पलाशं कट्फलं । चंदनद्वयं श्वेतं पीतं च । उशीरं वीरणं । आमला भूम्यामलकी । गोजिह्वा गलकुंभीति प्रसिद्धा । लांगली कलिहारीति प्रसिद्धा । ब्रह्मदंडी अधःपुष्पी । द्रोणपुष्पी कंबुकः । काकजंघा एकांगी । ज्योतिष्मती मालकांगुणी । गांधारी देवगांधारी । पूर्णकौशिकी कोशातकी । भगक्षमा शिग्रुः । सुभद्रा सारिवा । अलंबुका तुंबी । शतपर्वा वचा । अरिष्टिका नागवला । छिन्नरुहा पिंडगुडूची । शतपत्रा कमलिनी । निकुंभा दंतिभेदः । सुवर्चेला सूर्यभक्ता । हस्तिकर्णी एरंडः । उष्ट्रवः पीलुः । मधुकरो मधूकः । सर्जरा बीजकः । अतिमुक्तकः माधवीजाती । स्वर्णपुष्पी कुशली। श्रीफलं विल्वं। मदयंती यूथिका। अर्धसूदनिका पालंकी । मन्मथवृक्षः आम्रः। सुरदारुः देवदारुः । विदारिका भूकूष्मांडी। श्वेतवीर्या गिरिकर्णिका। श्वेतपाका गुंजा । स्पष्टमन्यत् । सर्वौषध्यस्तु। मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयं। सटी चंपकमुस्ता च सर्वौषधिगणः स्मृतः ॥ मुरा एकांगी । मांसी जटामांसी। शैलेयं मनः

CC-0. In Public Domain. Digitization by eGangotri

शिला । सटी कचोरा । स्पष्टमन्यत् । कात्यायनः । मूलनक्षत्रे मूलविधानं कुर्यात्सर्वौषध्या सर्वगंधैश्च संयुक्तमुदकुंभं सवस्त्रं गंधपुष्परत्नसहितं श्वेतसिद्धार्थकुसुमयुक्तं च कुर्यात्तस्मिन्रुद्रमभ्यर्च्य रुद्रान्जपित्वाऽप्रतिरथं राक्षोघ्नं सूक्तं चाऽथ द्वितीयोदकुंभं कृत्वा चतुःप्रस्रवणसंयुक्तमुपरिष्ठान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बध्वा तस्मिन्प्रधानानि मूलानि वक्ष्याम्यष्टादशमाषं हिरण्मयमूलं सप्तधान्यानि कार्ष्मर्या सहदेव्यपराजिता वाला पाठा शंखपुष्पाऽधःपुष्पी मधुयष्टिका चक्रांकिता मयूरशिखा काकजंघा कुमारीद्वयं जीवंत्यपामार्गभृंगराजलक्ष्मणासुलक्ष्मणाजातीव्याघ्रपत्रश्चक्रमर्दकसिद्धेश्वराऽश्वत्थोदुंबरपलाशप्लक्षवटाऽर्कदूर्वा रोहितकशतावरीशमीत्यादिमूलानि पूरयित्वा तस्मिन्निषिद्धानि मूलानि वक्ष्यामि बिल्वधवनिंबकदंबराजवृक्षाऽक्षशेलुप्रियालुदधिकपित्थकोविदारश्लेष्मातकबिभीतकशाल्मलिसरलसर्वकंटकिवर्जं तत्राऽभिषेकं कुर्यात्पितुः शिशोर्जनन्या देवस्यत्वेत्यौदुंबरीमासंदीमुदगग्रामास्तृणाति तत्रासीनान्संपातेनाऽभिषिंचति शिरसोऽध्यनुलोमं शिरो मे श्रीर्यश इति यथालिंगमंगानि संस्पृशति स्नानादूर्ध्वं नैर्ऋतं पायसं श्रपयित्वा कार्ष्मर्यमयं स्रुक्स्रुवं प्रताप्य संमृज्याऽन्वारब्ध आघारावाज्यभागौ हुत्वाऽसुन्वंतमयजमानामिति चतस्रः स्थालीपाकेन जुहुयात्कृणुष्वपाजइति पंचदशाज्याहुतीश्चतुर्गृहीतेन जुहुयान्मानस्तोकइति द्वाभ्यां यातेरुद्रशिवातनूरिति षडग्नेरक्षांसिसेधति शुक्रशोचिरमर्त्यः । शुचिःपावकईड्य इति । त्वंनःसोमविश्वतो रक्षाराजन्नघायतः । नरिष्येत्वावतःसखेति स्विष्टकृदादिप्राशनांते कृष्णागौः कृष्णाश्च तिला हेममयमूलं सप्तधान्यसमेतमाचार्याय दद्यात्कृष्णोऽनड्वान्ब्रह्मणे देयो नक्षत्रसूचकेभ्यो वासो दद्यादन्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात्कृसरपायसेन ब्राह्मणान्भोजयेत्सार्पदैवते गंडजाते एष विधिः कात्यायनोक्तः कृते शांतिर्भवति शांतिर्भवतीति ॥ अष्टादशमाषं तत्परिमितस्वर्णकृतं मूलं । केचित्तु अष्टादशमाषमिति न पठंति । मूलनामानि तु । कार्ष्मर्या गंभारी । वाला उशीरं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधःपुष्पी अधहुली । मधुयष्टिका ज्येष्ठमधु । चक्रांकिता अतिबला । काकजंघा कौवाठोठी । कुमारिकाह्वयं घिधुकुरी बडी धीडकुवारी छोटी । जीवंती चिडुचिरा । भृंगराजः भैंगारिया । सुलक्ष्मणा पुत्तलीसदृशी । जाती चंबेली । व्याघ्रपत्री हंसी । सिद्धेश्वरा जैती । रोहितकं सुगंधितृणं । अन्यानि तत्तन्नाम्ना प्रसिद्धानि । एतानि द्वात्रिंशदावश्यकानि । अन्यानि शतमूलांऽतर्गतानि ग्राह्याणि । तदभावे कानिचिदप्रतिषिद्धानि । यानि विहितानि निषिद्धानि च तेषु विकल्पः ॥ ॥ अथ शौनकोक्तमूलशांतिप्रयोगः । अभुक्तमूलोत्पत्तौ वर्षाष्टकसहितद्वादशाहांते वर्षाष्टकांते द्वादशाब्दांते वा तदन्यमूलोत्पत्तौ तु द्वादशाहे अव्यवहिताऽऽगामिमूलनक्षत्रयुते शुभदिने वा गोप्रसवशांतिमुक्तविधिना कृत्वा द्विराचमनादिदेशकालकीर्तनांते ममाऽस्य कुमारस्य (कुमार्या वा) मूलप्रथमचरणोत्पत्तिसूचितसकलारिष्टपरिहारद्वाराश्रीप० शौनकोक्तां सग्रहमखां मूलजननशांतिं करिष्ये इति संकल्प्य (द्वितीयादिचरणोत्पत्तौ संकल्पे ऊहो बोध्यः) गणेशपूजाद्याचार्यऋत्विग्वरणांतं कुर्यात् । ब्रह्मसदस्यौ कृताकृतौ । ऋत्विजश्च षोडश द्वादशाऽष्टौ वा । अत्यशक्तौ चत्वारोऽपि । ततस्तान्मधुपर्केण वस्त्राऽलंकारादिभिर्यथाविभवं वा संपूज्य प्रार्थयेत् । तत आचार्यः आचमनादिप्रादेशकरणांते मंडपपक्षे मंडपदेवतापूजनमुक्तविधिना कृत्वा तस्य प्रोक्षितभूमेर्वा ऐशान्यां स्वस्तिके महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयःसमिति द्रोणपरिमितव्रीहिराशिं कृत्वा तत्रोक्तलक्षणं प्रक्षालितं रक्तवर्णं कलशं आकलशेष्विति संस्थाप्य इमंमेगंगइति तीर्थोदकेनापूर्य युवंवस्त्राणीति वस्त्रेणावेष्ट्य शरासइति दर्भकूर्चं हिरण्यरूपइति हिरण्यं अश्वत्थेवइति चूतक्षीरद्रुमपल्लवान् सहिरत्नानीति पंचरत्नानि याओषधीरित्योषधीः गंधद्वारामिति गंधं याःफलिनीरिति पुष्पफले ओषधयःसमिति यवान् कांडात्कांडादिति दूर्वाः स्योनेति मृदः आपोहिष्ठेतितृचेन पंचगव्यं च निक्षिप्य पूर्णादर्वीति पूर्णपात्रं निधाय तस्मात्कलशाच्चतुर्दिक्षु महीद्यौरित्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिमंत्रावृत्त्या चतुरः कुंभान्संस्थाप्य तत्रोदकपूरणादिपूर्णपात्रनिधानांते मध्यकुंभे स्वर्णप्रतिमायां त्र्यंबकंवसिष्ठो० । इति रुद्रमावाह्य तेनैव
संपूज्याऽन्येषु वरुणं पूजयेत् । तत एक ऋत्विक् रुद्रकुंभं स्पृशन् याजुषो यजमानश्चेद्रुद्रैकादशिनीं षडंगसहितां बहृचश्चेत्त्रीणि रुद्रसूक्तानि
छंदोगश्चेत्त्रीणि रुद्रसामानि जपेत् । सूक्तसाम्नामेकादशाऽष्टत्रिद्व्येकसंख्यावृत्तिः शक्तितो ज्ञेया । तत्र रुद्रस्य षडंगसंज्ञाः षण्न्यासा अस्मद्गु-
रुकृतरुद्रपद्धतौ द्रष्टव्याः । केचित्तु रुद्रः सर्वसाधारणो बहृचच्छंदोगयोस्तु सूक्तसाम्नो रुद्रेण सह विकल्प इत्याहुः । अथैषामृष्यादि । न-
मकानुवाकानामग्नी रुद्रो महाविराट् । चमकानुवाकानामाग्निः कांड ऋषिः । आद्याग्नावैष्णवी गायत्री । शिष्टानां वाजादयोन्नादिविशे-
षा देवताः । यजुश्छंदः । जपे विनि० । कद्रुद्रायेति नवर्चस्य सूक्तस्य कण्वो रुद्रो गायत्र्यंत्यानुष्टुप् । इमारुद्रायेत्येकादशर्चस्य सूक्तस्य
कुत्सो रुद्रो जगत्यंत्ये त्रिष्टुभौ । आतेपितरिति पंचदशर्चस्य सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप् । जपे वि० । अत्र सूक्तांतरसत्त्वेऽपि न तज्ज-
पः । बहुवचनस्य तिषूपपत्तेः । आवोराजानमित्यादित्रयाणां रुद्रसाम्नां वामदेवो रुद्रस्त्रिष्टुबंत्ययोर्गायत्री । जपेवि० । तत आशुःशिशान-
इत्यादिचतुर्णामपि जपस्तत्रैव केनचित्कार्यः । तत्रत्यजपसंदंशपाठात् । आशुःशिशानइति त्रयोदशर्चस्य सूक्तस्याऽप्रतिरथ इंद्रश्चतुर्थ्या बृहस्प-
तिर्द्वादश्या अप्वांऽत्याया मरुतस्त्रिष्टुबंत्यानुष्टुप् । त्वमग्नेरुद्र इत्यनुवाकस्य हव्यवाडग्न्यात्मा रुद्र आद्या जगती शिष्टानि यजूंषि ।
रक्षाणो अग्ने वामदेवोग्निस्त्रिष्टुप् । रक्षोहणामिति पंचविंशर्चस्य सूक्तस्य पायुराग्निस्त्रिष्टुप् चतस्रोंत्या अनुष्टुभः । जपे० । अत्रा-
पि शक्त्या पूर्वोक्तसंख्यास्वीकारः । ततस्त्र्यंबकमंत्रमष्टोत्तरसहस्रं तिस्रः पावमानीश्च तत्रैव जपेत् । ताश्च । स्वादिष्ठयेति तिसृणां मधुच्छंदाः ॥६१॥
पवमानसोमो गायत्री । जपे० । ततश्चतुर्षु कलशेषु पूर्वादिक्रमेण आनोभद्राः स्वस्तिनोमिमीतां शंनइंद्राग्नी यतइंद्रेति चत्वारि शांतिसू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तानि जपेत् (अयं जपः शिष्टाचाराऽनुमितः) एवं पंचकुंभाऽसंभवे कुंभद्वयं स्थाप्यं । तत्राद्ये रुद्रपूजा पूर्वोक्तरुद्रादिसर्वजपश्च । तदुत्तरस्थे तु वरुणमावाह्य शांतिजपं कुर्यात् । यद्वा कुंभपंचकस्थाने एक एव चतुःप्रस्रवणः । तत्र मध्यकुंभकार्याणि मध्यमुखे । कुंभचतुष्टयकार्याणि चतुर्षु प्रस्रवणेष्विति व्यवस्था । ततः स्थापितकुंभोत्तरतः रक्तवर्णैः शुक्लैर्वा व्रीहितंडुलैश्चतुर्विंशतिदलोपेतं सकर्णिकं पंकजं विरच्य तत्र कर्णिकायां सौवर्णं राजतं मृन्मयं वा कलशं महीद्यौरित्यादिविधिना संस्थाप्य इमंमेगंगइति जलेनापूर्य गंधद्वारामिति गंधं कुंकुमं च क्षिप्त्वा याओषधीरिति शतमूलानि तदलाभे विष्णुक्रांता सहदेवी तुलसी शतावरीति चतस्रो वा शरासइति कुशांश्च निक्षिप्य कांडात्कांडादित्यादिपूर्णपात्रनिधानांतं कृत्वा तदुपरि साष्टदलवस्त्रे उक्तलक्षणप्रतिमात्रयं पंचामृतक्षालितं संस्थाप्य तत्र देवता आवाहयेत् । मोषुणः कण्वो निर्ऋ० इति निर्ऋतिमावाह्योक्तरूपं ध्यात्वा तद्दक्षिणे । इंद्रंवो मधुच्छंदा० इतींद्रं । उत्तरे अप्सुमे मेधातिथि० इत्यपश्चावाह्य पूर्वादिचतुर्विंशतिदलेषु नाममंत्रैरुत्तराषाढाद्यनुराधांतानि नक्षत्राणि तद्देवता वा स्थापयेत् । ताश्चेत्थं । विश्वेभ्योदेवेभ्यो नमः । विश्वान्देवानावाहयामि । विष्णवे० विष्णुं० । वसुभ्यो० वसून्० । वरुणाय० वरुणं० । अजायैकपदे० अजमेकपादं० । अहयेबुध्न्याय० अहिंबुध्न्यं० । पूष्णे० पूषणं० । अश्विभ्यां० अश्विनौ० । यमाय० यमं० । अग्नये० अग्निं० । प्रजापतये० प्रजापतिं० । सोमाय० सोमं० । रुद्राय० रुद्रं० । अदित्यै० अदितिं० । बृहस्पतये० बृहस्पतिं० । सर्पेभ्यो० सर्पान्० । पितृभ्यो० पितॄन्० । भगाय० भगं० । अर्यम्णे० अर्यमणं० । सवित्रे० सवितारं० । त्वष्ट्रे० त्वष्टारं० । वायवे० वायुं० । इंद्राग्निभ्यां० इंद्राग्नी० । मित्राय० मित्रं० । ततो नाममंत्रैरिंद्रादिलोकपालानावाह्य रुद्रकुंभान्नैर्ऋतप्रदेशे स्थंडिलेऽग्निं प्रतिष्ठाप्य स्थापितकुंभोत्तरतो ग्रहस्थापनादिकलशप्रार्थनांतं कृत्वाऽन्वादध्यात् । ग्रहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिदेवतोत्कीर्तनांते निर्ऋतिं प्रधानदेवं घृताक्तपायससमिदाज्यचरुभिः प्रतिद्रव्यं अष्टोत्तरशतसंख्याहुतिभिः (समिदाज्यचरूणां न्यूनसंख्याकरणपक्षे तथैव निर्देशः) इंद्रं अपश्च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्यं अष्टाविंशातिसंख्या० । विश्वदेवादिचतुर्विंशतिदेवताः पायसेन प्रत्येकं अष्टसं० । रक्षोहणमग्निं कृसरेण विंशत्यधिकशतसंख्या० । सवितारं दुर्गां त्र्यंबकं कवीन् दुर्गां वास्तोष्पतिं अग्निं क्षेत्राधिपतिं मित्रावरुणौ अग्निं एता देवताः कृसरेण अष्टसं० । श्रियं समिदाज्यचरुभिः प्रतिद्रव्यं विंशत्यधिकशतसं० । सोमं पायसेन त्रयोदशसं० । रुद्रं स्वराजं चतुर्गृहीताज्येन । अग्निं पृथिवीं महांतं । वायुमंतरिक्षं महांतं । आदित्यं दिवं महांतं । चंद्रमसं नक्षत्राणि दिशो महांतं चाज्येन शेषेणेत्यादिपूर्णपात्रनिधानांते निर्ऋत्यादीनां षोडशोपचारैः पंचोपचारैर्वा तत्तन्मंत्रैः पूजां कुर्यात्। निर्ऋतये वस्त्रयुग्मं रक्तचंदनं कृष्णसितादिपुष्पाणि मेषशृंगधूपः घृतदीपः पोलिकौदनसुरामत्स्यमांसात्मकं पुरुषाहारपर्याप्तं नैवेद्यं । तत्र ब्राह्मणेन सुरास्थाने सैंधवमिश्रं क्षीरं मांसस्थाने च लवणमिश्रं पायसं देयं । अन्यैस्तु सति संभवे मुख्यमेव सर्वं । पुष्पांजल्यंतपूजने कृते अमुष्मैत्वाजुष्टंनिर्वपामीत्याद्यन्वाधानक्रमेण पायसकृसरचरून् श्रपयित्वा आज्यभागहोमांते यजमानेन यथान्वाधानं द्रव्यत्यागे कृते सर्त्विगाचार्यो ग्रहादिहोमोत्तरं मोषुण इति मंत्रेण घृताक्तपायससमिदाज्यचरूनुक्तसंख्यया हुत्वा इंद्रंवो अप्सुमे इत्येताभ्यामष्टाविंशतिसंख्यया तान्येव जुहुयात् । तत्र पायसचर्वोरवदानधर्मेण होमः । ततः विश्वेभ्योदेवेभ्यःस्वाहेत्येवमुक्तचतुर्विंशतिनाममंत्रैः प्रत्येकमष्टाष्टसंख्यया पायसहोमांते वक्ष्यमाणमंत्रैः कृसराहुतीर्जुहुयात् । कृणुष्वेति पंचदशर्चस्य सूक्तस्य वामदेवो रक्षोहाग्निस्त्रिष्टुप् । कृसरहोमे० । प्रत्यृचमष्टाष्टसंख्यया होमः । गायत्र्या विश्वामित्रः० कृसरहोमे० । एवमग्रेपि । जातवेदसे कश्यपो दुर्गा त्रिष्टुप् । त्र्यंबकं वसिष्ठो० । सीरायुंजंतीत्यस्य बुधः कवयो गायत्री । तामग्निवर्णां सोभरिर्दुर्गा त्रिष्टुप् । वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निंदूतं मेधातिथिरग्निर्गायत्री । क्षेत्रस्यपतिना वामदेवः क्षेत्राधिपतिरनुष्टुप् । गृणाना जमदग्निर्मित्रावरुणौ गायत्री । अग्निंदूतंपुरोदधे विरूपोऽग्निर्गायत्री । एभिर्मंत्रैः प्रत्येकमष्टाष्टसंख्यया कृसरं हुत्वा हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्दमानंदचिक्लीतेंदिरासुताः श्रीरनुष्टुप् । पंचमी षष्ठी च त्रिष्टुभौ चतुर्थ्यन्त्या च प्रस्तारपंक्तिः । होमे० । इति प्रत्यृचं समिदाज्यचरून् अष्टाष्टसंख्यया जुहुयात् । त्वंनःसोमविश्वतोवयोधाः प्रगाथः सोमस्त्रिष्टुप् । पायसहोमे० । अनेन त्रयोदशवारं पायसं हुत्वा यातेरुद्र कश्यपो रुद्रः स्वराडनुष्टुप् । आज्यहोमे० । यातेरुद्रशिवातनूरघोरा० । अनेन चतुर्गृहीतमाज्यं हुत्वा स्रुवेणाज्याहुतीर्जुहुयात् । भूरग्नयेचपृथिव्यैचमहतेचस्वाहा । भुवोवायवेचांतरिक्षायचमहतेच० । सुवरादित्यायचादिवेचमहतेच० । भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेच० । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते दिक्पालादिभ्यो रुद्राय निर्ऋतये इंद्रायाऽद्भ्यः क्षेत्रपालाय च बलीन्दत्वा आचार्यो यजमानो वा पूर्णाहुतिं जुहुयात् । तत्र मंत्राः । समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वामदेवोग्निस्त्रिष्टुबंत्या जगती । प्रजापते हिरण्य० । पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप् । सप्ततेअग्ने सप्तवानग्निर्जगती । पूर्णाहुतिहोमे वि० । एतैश्चतुर्दशमंत्रैः पूर्णाहुतिं हुत्वा संस्रावहोमादिकर्मशेषं समाप्य जातारण्यग्नावेतच्छांतिकरणपक्षेऽस्मिन्काले समारोपः । शांत्या सह ग्रहमखाऽकरणे त्विदानीं तस्मिन्नेवाऽग्नौ पृथक् स कार्यः । ततो रुद्रकुंभं दक्षिणतः स्पृशन् त्र्यंबकमितिमंत्रं शतवारं जप्त्वा यजमानस्य याजुषत्वादिनिमित्तकं पूर्ववद्रुद्रैकादशिन्यादिकमपि जपेत् । अत्राप्येकादशादिसंख्याविकल्पः पूर्ववत् । ततो रुद्रं निर्ऋतिमिंद्रमपश्च पंचोपचारैः संपूज्य त्र्यंबकं मोषुण इति चोपस्थाय भवत्प्रसादेन यजमानाभिषेकं करिष्ये इति तान्प्रार्थ्य सर्वकलशोदकं पात्रांतरे गृहीत्वा विनायकशांतिवत् भद्रासनोपविष्टं धृतनववस्त्रं सर्वौषध्यनुलिप्तांगं यजमानं तद्वामतस्ताद्दशीं साऽपत्यां पत्नीं चोपवेश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्त्विगाचार्यस्तानभिषिंचेत् । मंत्रास्तु । अक्षीभ्यामिति षड्टचस्य सूक्तस्य विवृहा यक्ष्मनाशनोऽनुष्टुप् । त्रिभिष्ट्वमिति सप्तर्चस्य सूक्तस्य वसिष्ठ आद्यानां त्रयाणामग्निस्ततो विश्वेदेवा गायत्री द्वितीयांऽत्ये द्वे चाऽनुष्टुभः । आपोहिष्ठेति नवर्चस्य सूक्तस्य० । आपइद्वेति द्वयोः सप्तर्षयो विश्वेदेवा अनुष्टुप् । सहस्राक्षेणेति तृचस्य यक्ष्मनाशनो यक्ष्मा त्रिष्टुबंत्याऽनुष्टुप् । देवस्यत्वेति त्रिभिर्याजुषैर्मंत्रैः । यज्जाग्रत इति षण्णां प्रजापतिर्मनस्त्रिष्टुप् । अभिषेके० । एतन्मंत्रांते । योऽसौ वज्रधरो देवो महेंद्रो गजवाहनः । मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु ॥ १ ॥ योऽसौशक्तिधरो देवो हुतभुङ् मेषवाहनः । सप्तजिह्वश्च देवोग्निर्मूलदोषं व्यपोहतु ॥२॥ योऽसौ दंडधरो देवो धर्मो महिषवाहनः । मूलजातशिशोर्दोषं व्यपोहतु यमो मम ॥ ३ ॥ योऽसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः । प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं ॥ ४ ॥ योऽसौ पाशधरो देवो वरुणः सलिलेश्वरः । नक्रवाहः प्रचेतानो मूलोत्थाऽघं व्यपोहतु ॥ ५ ॥ योऽसौ देवो जगत्प्राणो मारुतो मृगवाहनः । प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः ॥ ६ ॥ योऽसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः । मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु ॥ ७ ॥ योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः । आश्लेषामूलगंडांतदोषमाशु व्यपोहतु ॥ ८ ॥ विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः । सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः ॥ ९ ॥ ततो ग्रहादिमंत्रैः सुरास्त्वामित्यादिपौराणैश्चाऽभिषिच्य तच्छंयोः शंयुर्विश्वेदेवाः शक्करी । अभिषेके०। ततस्तूष्णीं वस्त्रवेष्टितमुखाभ्यां रुद्रनिर्ऋतिकुंभाभ्यामभिषिंचेत् । पितामहकश्यपाभ्यां तु शतच्छिद्रेणाऽभिषेक उक्तः । एवमभिषिक्तो यजमानो धृतशुक्लांबरगंधमाल्यो विभूतिं धृत्वा रुद्रादीनामुत्तरपूजांते आचार्यादीन्संपूज्य तेभ्यो दक्षिणां दद्यात् । तत्र आचार्याय सवत्सां पयस्विनीं गां ग्रहप्रीत्यर्थदक्षिणाश्च । रुद्रजापिने । धर्मस्त्वं वृषरूपेण जगदानंदकारकः । अष्टमूर्तेरधिष्ठानमतः पाहिसनातनेति कृष्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनड्वाहं । ब्रह्मणे तेनैव वृषभं । सदस्याय । उच्चैश्रवास्त्वमश्वाना राज्ञा विजयकारकः । सूर्यवाह नमस्तुभ्यमतः शांतिं० इत्यश्वं । अन्येभ्य ऋत्विग्भ्यो हिरण्यगर्भेति हिरण्यं च दद्यात् । धेन्वनडुहोरसंभवे तन्मूल्यं दशकार्षापणाधेनावष्टावनडुहिस्स्मृता इत्युक्तं देयं । तस्याऽप्यसंभवे सर्वेभ्यो यथाशक्ति दद्यात् । तत्राचार्यदत्तार्धं ब्रह्मणे । तदर्धं सदस्याय । तदर्धं प्रत्येकमृत्विग्भ्य इति व्यवस्था । तत आचार्येण देवताविसर्जने कृते तस्मै निर्ऋतिप्रतिमां तत्कुंभवस्त्रहिरण्यसहितां वस्त्राद्युपस्करसहिता ग्रहप्रतिमाश्च दत्वा रुद्रजापिने रुद्रप्रतिमाः सोपस्करांस्तत्कुंभांश्च दद्यात् । अन्येभ्योपि यथाशक्ति भूयसीं दक्षिणां दत्वा ब्राह्मणैः शांतिं वाचयित्वा तान्प्रणम्य क्षमापयेत् । ततः पायसादिना शतं तदर्धं दश वा ब्राह्मणान् भोजयेत् । तेच शांतिपाठपूर्वकं भुक्त्वाशिषोदद्युः । ततो यजमानो निर्ऋतिः प्रीयतामिति क्षमाप्य कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीतेति ॥ (अथ निर्ऋत्यादीनां स्थापनादि किंचिद्विचार्यते । मयूखे प्रणीतास्थापनोत्तरं कुंभस्थापनप्रभृतिनिर्ऋत्यादिपूजनांतमुक्तं । शांतिसारेऽपि पूर्णपात्रनिधानांतंकृत्वापूजांसमारभेदित्यत्र तत्सामग्रीं कुर्यात् नतु पूजां तस्या वक्ष्यमाणत्वादिति मूले व्याख्यातं । तच्च युक्तं भाति । अक्लेशेनोपपत्तेः । कौस्तुभे तु रुद्रादिसर्वजपांते विधिवत्तेषामावाहनं प्रणीतास्थापनोत्तरं च पूजनमिति वैयाधिकरण्यमुक्तं । कमलाकरेणाऽप्येवमेव प्रयोगे दर्शितं । अत्र सदसत्प्राज्ञैर्विवेचनीयं ॥ अत्राऽयं प्रयोगस्तु प्रायो मूलानुसारित्वात्संप्रदायानुगतत्वाच्च कौस्तुभस्थ एव गृहीतः । ग्रंथकृता तु क्वचित्क्वचिदत्र पदार्थभेदः कृतः । सचैवं । जपकाले मध्यकुंभे चत्वारि रुद्रसूक्तानि । तत्सामानि त्वेकादश । त्र्यंबकमंत्रस्येदानीमेव जपः । ततश्चतुर्षु क्रमेणाऽप्रतिरथादिजपांते चतुर्थे पुनः पावमानजपः । यद्वा एषामपि तत्रैव जपं कृत्वा चतुर्षु शांतिजप इति । होमकाले च त्वंनःसोमाविश्वतोवयोधाः त्वंनःसोमाविश्वतोगोपाः त्वंनःसोमसुक्रतुरितिवेत्येवं सोममंत्रे विकल्पः । महाव्याहृतयस्तु व्यस्तसमस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपाश्वतस्रः । होमोत्तरं रुद्रजपे चाथर्वणस्तु त्र्यंबकमंत्रमात्रं जपेदित्यधिकं । एवमत्राऽन्योन्यविसंवादिषु तत्तदुक्तप्रयोगेषु मयूखोक्त एव सम्यङ्मूलोक्तसंवादलाभाद्युक्ततर इति भाति) इति शौनकोक्तमूलशांतिप्रयोगः॥ (अथ मयूखानुसारी प्रयोगः । कर्ता पूर्वोक्तशुभकाले आचमनादिदेशका० ममास्य कुमारस्य मूलनक्षत्र (अ० चरण) जन्मसूचितसकलारिष्टपरि० शौनकोक्तां सग्रहमखां शांतिं क० । इति संकल्प्य गणपतिपूजनादिऋत्विग्वरणांतं कुर्यात् । आचार्यः प्रादेशकरणांते सुसमीकृतपुण्यदेशे रचिते मंडपे शुचीवइत्यादिमंत्रैर्जलमभिमंत्र्य तेन मंडपभूमिं प्रोक्ष्य मंडपदेवतापूजनं कृत्वा प्रतिमानामग्न्युत्तारणं कुर्यात् । ततो मंडपस्य तदभावे प्रोक्षितभूमेर्वा ऐशान्यां स्वस्तिकं विरच्य तत्र महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयइति षोडशप्रस्थात्मकद्रोणपरिमितव्रीहिराशिं कृत्वा यथोक्तलक्षणं प्रक्षालितं रक्तं कलशं आकलशेष्विति निधायेमंमइति तीर्थवारिणाऽऽपूर्य युवंवस्त्राणीति वाससाऽऽवेष्टय शरासो मैत्रावरुणिरगस्त्योतृणसूर्या अनुष्टुप् । कूर्चप्रक्षेपे० । शरासः० इतिदर्भकूर्चं हिरण्यरूपइति हिरण्यं अश्वत्थेवइति चूतक्षीरिद्रुमपल्लवान्सहिरत्नानीति पंचरत्नानि याओषधीरित्योषधीः गंधद्वारामिति गंधं याःफलिनीरिति पुष्पफलानि कांडात्कांडादिति दूर्वाश्च निक्षिप्य पूर्णादर्वीति पूर्णपात्रं निधाय ततः प्रागुदग्वा पूर्वादिचतुर्दिक्षु ऐशान्यादिविदिक्षु वा चतुरः मध्ये चैकमिति पंचकुंभान् जपार्थे पदार्थानुसमयेन कांडानुसमयेन वा प्रत्येकं मंत्रावृत्त्या भूमिस्पर्शादिपूर्णपात्रनिधानांतोक्तविधिना संस्थाप्य पूर्वस्थापितकुंभे सौवर्णप्रतिमायां रुद्रं त्र्यंबकमिति प्रतिष्ठाप्य पूजयेत् । तत एक ऋत्विक् रुद्रकुंभं स्पृशन्याजुषो यजमानश्चेद्रुद्रैकादशिनीं षडंगसहितां जपेत् । बह्वृचश्चेत्त्रीणि रुद्रसूक्तानि । छंदोगश्चेत्त्रीणि रुद्रसामानि । सूक्तसाम्नामेकादशाष्टत्रिद्व्येकसंख्यावृत्तिः शक्तितो ज्ञेया । तत्र रुद्रस्य षडंगसंज्ञाः षण्न्यासा रुद्रविधौ द्रष्टव्याः । रुद्रसूक्तानां तत्साम्नां च ऋष्यादि पूर्वप्रयोगे उक्तं । ततो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यक्त्विक् जपार्थकुंभपंचके वक्ष्यमाणं जपेत् । तत्र पूर्वकुंभे आशुःशिशान इति त्रयोदशर्चस्य सूक्तस्यैंद्रोऽप्रतिरथ इंद्रश्चतुर्थ्या बृहस्पतिर्द्वादश्या अप्वांत्याया मरुतास्त्रिष्टुबंत्यानुष्टुप् । जपे० । दक्षिणकुंभे त्वमग्नेरुद्रइत्यनुवाकस्य हव्यवाडग्न्यात्मा रुद्र आद्या जगती शिष्टानि यजूंषि । जपे० । तैत्तिरीयशाखीयोऽयं । पश्चिमकुंभे रक्षाणइत्यस्य गौतमो वामदेवोग्निस्त्रिष्टुप् । जपे० । उत्तरकुंभे अग्नेहंसीति नवर्चस्य सूक्तस्याऽऽमहीयव उरुक्षयोग्नी रक्षोहा गायत्री । जपे० । मध्यकुंभे त्र्यंबकमिति मंत्रमष्टोत्तरसहस्रं जप्त्वा स्वादिष्ठयेति तिस्रो जपेत् । एवं षट्कुंभाऽशक्तौ रुद्रकुंभश्चतुःप्रस्रवणश्चेति कुंभद्वयमुक्तविधिना संस्थाप्य चतुःप्रस्रवणे गजाश्वरथस्थानवल्मीकसंगमह्रदगोकुलराजद्वारप्रदेशेभ्य आनीताः सप्तमृदश्च निक्षिप्य रुद्रकुंभे रुद्रैकादशिनीं जप्त्वाऽप्रतिरथादीनि चत्वारि प्रागादिप्रस्रवणेषु त्र्यंबकमंत्रं पावमानीश्च मध्यमुखे जपेत् । एवं मूलानुसारेण षट्कुंभस्थापनमुक्तं । शांतिसारादौ तु रुद्रकुंभादैशान्यादिचतुर्दिक्षु कुंभचतुष्टयमिति पंचकुंभास्तदसंभवे कुंभद्वयं तस्याप्यसंभवे चतुःप्रस्रवण एक एवेति प्रकारांतराणि । तत्र जपव्यवस्था रुद्रकुंभातिरिक्तेषु वरुणपूजनं चेत्येतान्युक्तानि । तानि च मूलवाक्येभ्य उपलभ्यंते चेत् ग्राह्याणि । तत आचार्यो रुद्रकुंभान्नैर्ऋते देशे स्थंडिलेग्निस्थापनादि कृत्वा स्थापितकुंभोत्तरतः कुंभस्थापनपूर्वं ग्रहादीनां स्थापनपूजने कृत्वान्वादध्यात् । तत्र चक्षुषीआज्येनेत्यंते गणपतिं आदित्यादिग्रहादींश्च उक्तरीत्योक्त्वा निर्ऋतिमष्टोत्तरशतसंख्याभिर्घृतसंमिश्रपायसाहुतिभिः अमुकसंख्याभिः समिदाज्यचर्वाहुतिभिश्च । अत्रामुकशब्दस्थाने अष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्यामुच्चारयेत् । एवमग्रेऽपि । इंद्रं अपश्च प्रत्येकं २८ संख्याभिर्घृतसं० अमु० सामिदाज्य० । यद्वाऽनयोः सर्वत्र प्रधानदशांशेन निर्दिशेत् । प्रधानदशांशेन पार्श्वदेवतयोरिति परिशिष्टोक्तसंख्यां सामान्यतया प्राप्तां परित्यज्य संख्यांतरकल्पने मानाभावात् । विश्वान्देवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णु । वसून् । वरुणं । अजमेकपादं । अहिं बुध्य । पूषणं । अश्विनौ । यमं । अग्निं । प्रजापतिं । सोमं । रुद्रं । अदितिं । वृहस्पतिं । सर्पान् । पितॄन् । भगं । अर्यमणं । सवितारं । त्वष्टारं । वायुं । इंद्राग्नी । मित्रं । एतादेवताः प्रत्येकं अमु० पायसाहुतिभिः । अग्निं रक्षोहणं विंशत्यधिकशतसंख्याभिः कृसराहुतिभिः । सवितारं । अग्निं जातवेदसं । रुद्रं । ऋत्विजः । दुर्गां । वास्तोष्पतिं । अग्निं । क्षेत्रपतिं । मित्रावरुणौ । अग्निं । एता देवताः प्रत्येकं अमु० कृसराहुतिभिः । श्रियं प्रतिद्रव्यं अमु० समिदाज्यचर्वाहुतिभिः । इदं सूक्तेन होमपक्षे । प्रत्यृचं तत्पक्षे तु विंशत्यधिकषोडशशतविंशत्यधिकचतुःशतविंशत्यधिकशतानामन्यतमसंख्यां कीर्तयेत् । सोमं त्रयोदशभिः पायसाहुतिभिः । रुद्रं चतुर्गृहीताज्येन । अग्निं पृथिवीं महांतं । वायुमंतरिक्षं महांतं । आदित्यं दिवं महांतं । प्रजापतिं चंद्रमसं नक्षत्राणि दिशो महांतं चाज्येन शेषेणाग्निंस्विष्टकृतमित्यादि । पात्रासादने गृहसिद्धान्नपायसचरुकृसरार्थस्थालीनां स्रुवाणामाज्यस्थालीनां शूर्पाणां चासादनादिप्रणीतास्थापनांतं कृत्वा ग्रहाणामुत्तरतो रक्तैः शुक्लैर्वा व्रीहितंडुलैः कर्णिकायुक्तचतुर्विंशतिदलोपेतं पद्ममुल्लिख्य तत्कर्णिकायां सौवर्णं राजतं मृन्मयं वा कुंभं महीद्यौरित्यादिपूर्वोक्तविधिना प्रतिष्ठाप्य पूर्णपात्रनिधानांतं कुर्यात् । तत्र याओषधीरिति पूर्वोक्तबर्हिःशिखादिशतमूलानि तदभावे विष्णुक्रांतासहदेवीतुलसीशतावरीति चतस्रो वा निक्षिपेत् । गंधक्षेपकाले कुंकुमं च क्षिपेदितिविशेषः । पूर्णपात्रे उक्तलक्षणायां सुवर्णप्रतिमायां तन्मूल्ये वा निर्ऋतिमावाहयेत् । मोषुणो घौरः कण्वो निर्ऋतिर्गायत्री । निर्ऋतिपूजने० । मोषुणः० । संस्मरेन्निर्ऋतिंश्यामंसुमुखंनरवाहनं । रक्षोधिपंखड्गहस्तंदिव्याभरणभूषितमित्युक्तरूपं स्मरन् निर्ऋतिमावाहयामीत्यावाह्य पंचामृतेन संस्नाप्य षोडशभिरुपचारैः पंचभिर्वा पूजयेत् । उभयत्रापि पुष्पातोपचारान्निवेदयेत् । तद्दक्षिणतः । इंद्रमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्काण्वो मेधातिथिरिंद्रो बृहती। इंद्रपू० । इंद्रमिद्देवतातय० । इंद्रमावाहयामीत्यादि प्राग्वत् । उत्तरतः । आपोअस्मानित्यस्य यामायनो देवश्रवा आपस्त्रिष्टुप् । अप्पूजने० । आपोअस्मान्० । अप आवाहयामीत्यादि । यद्वा पदार्थानुसमयेन त्रयाणां पूजनं । तत्र वस्त्रयुगं। रक्तचंदनं । कृष्णसितादिपुष्पाणि । मेषशृंगस्य धूपः । घृतदीपः । ओदनपोलिकामांसमत्स्यसुराद्यात्मकं नैवेद्यं। ब्राह्मणस्य सुरास्थाने सैंधवमिश्रं क्षीरं । मांसस्थाने लवणयुक्तं पायसं। मत्स्यादि तु वर्ज्यमेव । क्षत्रियादीनां मुख्यमेव सर्वं साति संभवे। अत्रोक्तधूपदीपनैवेद्यानां निवेदनं त्वग्रे वक्ष्यते। ततश्चतुर्विंशतिदलेषु प्रागादितः । विश्वेभ्यो देवेभ्यो० विश्वान्देवानावा० । विष्णवे० वसुभ्यो० । वरुणाय०। अजायैकपदे० अहये बुध्न्याय० । पूष्णे० । अश्विभ्यां० । यमाय० । अग्नये० । प्रजापतये० । सोमाय० । रुद्राय० । अदित्यै० । बृहस्पतये० । सर्पेभ्यो० । पितृभ्यो० । भगाय० । अर्यम्णे० । सवित्रे० । त्वष्ट्रे० । वायवे० । इंद्राग्निभ्यां० । मित्राय० । एवं नाममंत्रैश्चतुर्विंशतिदेवताः क्रमेणावाह्य तैरेव पूजयेत । ततः शूर्पे पायसार्थं चतुरो मुष्टीन्निरुप्य शूर्पांतरे चर्वर्थं च चतुरो निर्वपेत् । पुनः पायसार्थं चतुरः । पुनश्चर्वर्थं चतुरः । पुनः पायसार्थं चतुरः। एतान्मुष्टींस्तूष्णीं निरुप्य तथैव तत्तत्संख्यया प्रोक्ष्य क्रमेणाऽवहत्य पात्रत्रये हविःश्रपणादिसंमार्गांते गृहसिद्धान्नस्याऽधिश्रयणादिबर्हिष्यासादनांतं कृत्वा पायसादीनामभिघारणादि तदंतं च कृत्वाऽग्न्यर्चनाद्याज्यभागांतं कुर्यात् । यजमानस्त्यागं कुर्यात् । तत्र ग्रहाद्युद्देशेन ग्रहयज्ञोक्तरीत्या त्यागं कृत्वाऽष्टोत्तरशताहुतिपर्याप्तो घृतसंमिश्रः पायसः इयदाहुतिपर्याप्ताः समिधः इय० स्तमाज्यं इय० स्तश्चरुश्च निर्ऋतये नमम । पूर्वन्यूनसंख्यया हविश्चतुष्टयमुच्चार्य इंद्राय नमम तथैव अग्नो नमम । इयदियदाहुतिपर्याप्तः पायसः विश्वेभ्योदेवेभ्यः १—मित्राय २४ च नमम । विंशत्यधिकशताहुतिपर्याप्तं कृसरं अग्नये रक्षोघ्ने नमम । इयदिय० कृसरं सवित्रे । अग्नये जातवेदसे । रुद्राय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋत्विग्भ्यः। दुर्गायै। वास्तोष्पतये। अग्नये। क्षेत्रपतये। मित्रावरुणाभ्यां। अग्नये च नमम। इयदाहुतिपर्याप्ताः समिधः इय० स्तमाज्यं इय० स्तश्वरुश्च श्रियै नमम। सर्वत्र इयच्छब्दस्थानेऽन्वाधानानुसारेण संख्यां वदेत्। त्रयोदशाहुतिपर्याप्तं पायसं सोमाय०। चतुर्गृहीताज्यं रुद्राय०। एकाहुतिपर्याप्तमाज्यं अग्नये पृथिव्यै महते च०। एकाहु० माज्यं वायवेऽतरिक्षाय महते०। एका० माज्यं आदित्याय दिवे महते०। एका० माज्यं प्रजापतये चंद्रमसे नक्षत्रेभ्यो दिग्भ्यो महते०। एवं त्यागे कृते साचार्यऋत्विजस्तथैव जुहुयुः। तत्र ग्रहादिहोमे जाते आचार्योऽवदानधर्मेण पायसमवदाय जुहुयात्। एवमग्रे चरुकृसरावपि। मोषुणो घौरः०। होमे०। पायसहोमे समाप्ते समिदादिहोमः। प्रधानहोमे समाप्ते एवमेवाधिप्रत्यधिदेवतयोर्होमः। इंद्रमित्काण्वो०। आपोअस्मा०। ततः ॐविश्वेभ्योदेवेभ्योनमःस्वाहेत्येवं प्रणवादिचतुर्थ्यंतनमोंतस्वाहांतनामभिर्विश्वेदेवादिचतुर्विंशतेर्होमः पायसेन। चतुर्थ्यंतविष्ण्वादिशब्दास्त्यागे उक्ताः। ततः कृसरहोमः। कृणुष्वेतिपंचदशर्चस्य सूक्तस्य गौतमो वामदेवोऽग्नी रक्षोहा त्रिष्टुप्। इति प्रत्यृचमष्टसंख्यया होमः। गायत्र्या गाथिनो०। जातवेदसे०। त्र्यंबकं०। सीरायुंजंति सौम्यो बुध ऋत्विजो गायत्री। तामग्निवर्णां सौभरः कुशिको दुर्गा त्रिष्टुप्। वास्तोष्पते०। अग्निंदूतंकाण्वो०। क्षेत्रस्य पतिना०। गृणाना भार्गवो०। अग्निंदूतंपुरइत्यांगिरसो विरूपोग्निर्गायत्री। एतैरष्टाष्टसंख्यया कृसरं हुत्वा हिरण्यवर्णामिति पंचदशर्च०। इति प्रत्यृचमष्टोत्तरशतादिसंख्यया समिदाज्यचरून् जुहुयात्। सूक्तेन होम इति शांतिसारे। तत्पक्षे सूक्तावृत्तयः। ततः पायसहोमः। त्वंनःसोम गोतमः सोमो गायत्री। होमे०। त्वंनःसोमविश्वतोरक्षा०। (अत्र त्वंनःसोमेनेतिमूलोक्तमंत्रप्रतीकनिर्देशादुपस्थितेऽपि तुल्यविकल्पेन मंत्रचतुष्टये गायत्रीछंदस्कस्यैव ग्रहणं युक्तं। गायत्रोवैब्राह्मण इति श्रुतेः) यातेरुद्र कश्यपो०। यातेरुद्रशिवातनूरघोरा०। इति दर्व्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्गृहीताज्यं हुत्वा स्रुवेणाज्यं जुहुयात् । भूरग्नयेच० । भुवोवायवे० । सुवरादित्याय० । भूर्भुवःसुवश्चंद्र० । (यद्यप्ययं होमो मयूखे भूरादिसप्तव्याहृतिभिरुक्तस्तथापि स्मृत्यपेक्षया श्रुतेर्बलीयस्त्वादिह बौधायनोक्ता एव गृहीता इति दिक्) तत आचार्यो गृहसिद्धचर्वाज्यपायसचरुकृसरैः स्विष्टकृदादिप्रायश्चित्तहोमांते पूर्णाहुतिं जुहुयात् । तत्र मंत्राः । समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य० । प्रजापते प्राजा० । पूर्णादर्वि विश्वे० । सप्ततेग्निःसप्तवान् जगती । पूर्णाहुतौ० । समुद्रादूर्मि० । प्रजापते० । पूर्णादर्वि० । सप्ततेअग्ने० । अग्नेः प्रजापतये शतक्रतवेऽग्नये सप्तवते चेदं० । ततः संस्रावहोमादिशेषं समाप्य जातारण्यग्नौ गृह्याग्नौ वा एतच्छांतिकरणपक्षेऽग्निं समारोप्य रुद्रकुंभं दक्षिणतः स्पृशन् त्र्यंबकमंत्रं शतवारं जपेत् । याजुषत्वादिनिमित्तकं च पूर्ववद्रुद्रैकादशिन्यादिकमपि । अत्रापि संख्याविकल्पः पूर्ववत् । ततो रुद्रादीन्धूपादिपुष्पांजल्यंतोपचारैः पूजयेत् । तत्र निर्ऋतये पूर्वोक्तधूपदीपनैवेद्यानि । ततः सादरमभिषेकार्थं प्रसीदंतु भवंत इति रुद्रादीन्प्रसादयेत् । शांत्या सह ग्रहमखो न कृतश्चेदिदानीं पृथक्त्वेन कृत्वाभिषेकं कुर्यात् । सर्वकुंभोदकं कस्मिंश्चित्पात्रे आदाय स्वतिकचर्मपीठनिर्मिते भद्रासने उपविष्टं पत्न्यादिसहितं यजमानमाचार्यादयस्तेनोदकेन प्रतिमंत्रमभिषिंचेयुः । तेच मंत्राः । अक्षीभ्यामितिषड्चस्य सू० । यदंतियच्चेतिद्वादशानां वसिष्ठो विश्वेदेवा गायत्री सप्तम्यंत्ये चानुष्टुभः । आपोहिष्ठेतिनवर्चस्य० । आपइद्वाइति द्वयोः क्रमेण भार्गवो जमदग्निर्मैत्रावरुणिर्वसिष्ठ आपोनुष्टुप् । अनयोः स्थाने यतइंद्रेतिद्वयं वा । यतइंद्रेतिद्वयोः प्रागाथो भर्ग इंद्रो बार्हतः प्रगाथः । सहस्राक्षेणेति तिसृणां प्राजापत्यो यक्ष्मनाशनो विश्वेदेवास्त्रिष्टुबंत्यानुष्टुप् । अभिषे० । देवस्यत्वा० द्यायेत्येकेन यजुषा त्रिभिर्वा याजुषैः । तेच । देवस्यत्वा० भ्याꣳसरस्वत्यैभैषज्येन वीर्यायान्नाद्यायाभिषिं० चामि । देवस्य भ्यामश्विनोर्भैषज्येन । तेजसेब्रह्मवर्चसायाभि० । देव० भ्यामिंद्रस्येंद्रियेण । श्रियैयश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेबलायाभि० । यज्जाग्रतइतिषण्णा० । योसौ वज्रधरो देवो महेंद्रो गजवाहनः । मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु । १ । योसौ शक्तिधरो देवो हुतभुङ् मेषवाहनः । सप्तजिह्वश्च देवोग्निर्मूलदोषं व्यपोहतु । २ । योसौ दंडधरो देवो धर्मो महिषवाहनः । मूलजातशिशोर्दोषं व्यपोहतु यमो मम । ३ । योसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः । प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं । ४ । योसौ पाशधरो देवो वरुणः सलिलेश्वरः । नक्रवाहः प्रचेतानो मूलोत्थाघं व्यपो० । ५ । योसौ देवो जगत्प्राणो मारुतो मृगवाहनः । प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः । ६ । योसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः । मातापित्रोः शिशोश्चैव मूलदोषं व्य० । ७ । योसौ पशुपतिर्देवः पिनाकी वृषवाहनः । आश्रेषामूलगंडांतदोषमाशु व्यपो० । ८ । विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः । सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः । ९ । ततो ग्रहादिमंत्रैरभिषिच्य तच्छंयोरितिबार्ह० । ततो वस्त्रांतरितमुखाभ्यां निर्ऋतिरुद्रकुंभाभ्यामभिषिक्तो यजमानः शुक्लवस्त्रगंधमाल्यधर आचार्यादीन् गंधादिभिः संपूज्याचार्याय सवत्सां पयस्विनीं धेनुं दद्यात् । तेन देवताविसर्जने कृते तस्मै निर्ऋतिप्रतिमां कुंभवस्त्रहिरण्यसहितां वस्त्राद्युपस्करसाहिता ग्रहप्रतिमाश्च दद्यात् । रुद्रजापिने कृष्णमनड्वाहं सोपस्करां रुद्रप्रतिमां च दद्यात् । धेन्वनडुहोरसंभवे मूल्यं दशकार्षापणाधेनावष्टावनडुहिस्मृता इत्युक्तं देयं । एतावदसंभवे यथाशक्ति । इतरेभ्य ऋत्विग्भ्यो यथाशक्ति दक्षिणा । तत्राप्याचार्यार्धं ब्रह्मणे तदर्धं सदस्याय तदर्धमृत्विग्भ्य इति व्यवस्था । ततो ब्राह्मणान्प्रणम्य क्षमध्वमिति क्षमाप्य शतं पंचाशतं दश वा ब्राह्मणान्भोजयिष्यामीति संकल्पयेत् । तेच शांतिपाठपूर्वकं भुक्त्वाशिषो दद्युः । यजमानो निर्ऋतिः प्रीयतामिति क्षमाप्य यस्यस्मृत्येत्युक्त्वा आभिर्गीर्भिरिति जपित्वाचम्य कृतं कर्मेश्वरायार्पयेत् । अत्र गंडांतोत्पत्तौ विशेषः । कर्ता जन्मतो द्वादशाहे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचमनादिदेशकालस्मरणांते अस्य शिशोः मूलनक्षत्रगंडांतजननसूचितसर्वारिष्टपरि० इदं धेनुप्रत्याम्नायभूतं अ० द्रव्यं ब्राह्मणायसंप्रददे। तथा मम गंडांतजातशिशुनिरीक्षणेन उत्पत्स्यमानसकलाऽशुभनिरासपूर्वकं शिशुदर्शनस्य शुभतासिद्ध्यर्थं इदं सुवर्णं (तन्निष्क्रयद्रव्यं वा) ब्राह्मणाय० । एवमाश्लेषादिगंडांतेऽपि धेनुदानं शांतिकात्पूर्वं शिशुदर्शने च तन्निमित्तं सुवर्णदानमपि कृत्वा गंडांतशांतिसहितां नक्षत्र शांतिं कुर्यात् । इति मयूखानुसारी मूलशांतिप्रयोगः ॥ एतच्छांतिमूलभूते शौनककारिकाख्यग्रंथेऽस्यामेव शांतौ विशिष्टविधिबोधकाः केचिदधिकाः श्लोका उपलभ्यंते । तेच निबंधकारैः सर्वैरनुक्ता अपि सुधियां पर्यालोचनार्हा इति मत्वाऽत्र लिखिताः । तेचेत्थं । बालं मूलसमीपे च त्यक्त्वा माता पराङ्मुखी । गृहीत्वा ब्राह्मणैर्बालं तन्मातुस्तेऽर्पयंति च ॥ बालेऽस्माभिरयं बालो युष्मद्दत्तः प्रगृह्यतां । दीर्घायुरपि बालोयं पूर्ववत्कुलवर्धनः ॥ एवं त्यागविधिं कृत्वा ततोऽभिषेकमारभेत् । अभिषेकविधिं० ॥ वारुणै रुद्रसूक्तैश्च आनोभद्रेतिशांतितः । ऐंद्रेण चाऽभिषेकेण शंनोवातोतिशांतितः ॥ आपोहिष्ठेति० । कांस्यपात्रस्थिते चाज्ये स्वरूपं च निरीक्षयेत् । सभार्यो यजमानश्च रूपंरूपंप्रतीत्यृचा ॥ तत्पात्रं दक्षिणायुक्तं ब्राह्मणाय निवेदयेत् । यजमानो दक्षिणाभि० ॥ चतुर्दिक्स्थापितान्कुंभांस्तेभ्यस्तेभ्यः प्रदापयेत् । इतरेभ्योपि० ॥)

॥ अथ मदनरत्ने पितामहसंहितोक्ता मूलाश्लेषाशांतिः । मूलादौ च द्विघटिका ज्येष्ठांते च तथैव च । अभुक्तमूलं तज्ज्ञेयं तत्र जातं शिशुं त्यजेत् ॥ मूलस्यादौ पितुर्गंडं मातुर्गंडं द्वितीयकं । तृतीयं धनधान्यस्य अंत्यपादः शुभावहः ॥ विपरीतं फलं सर्वमाश्लेषास्वपि मूलवत् । शूलो व्याघातवज्रौ च व्यतीपातश्च वैधृतिः ॥ परिघं वारदोषश्च विष्टिश्च विषनाडिकाः । अवयोगादिकैर्युक्ते मूले दोषोऽधिको भवेत् ॥ अथातः संप्रवक्ष्यामि शांतिकर्मविधिं शुभं । निष्केण वा यवानष्टौ सुवर्णेन च निर्ऋतिं ॥ (अष्टयवपरिमित सुवर्णेन वेत्यर्थः) सर्पभे यदि

Sanskrit University, Banaras Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंडं च कुर्यात्सर्पाकृतिं बुधः । कुंडं कुर्याद्धस्तमात्रं आयामे च तथैव च ॥ मेखलात्रयसंयुक्तं योन्या चैव समन्वितं । मंडपं कारयेत्तत्र यथाविभवसारतः ॥ पुण्याहं वाचयित्वा तु सुसंकल्प्य यथाविधि । अलंकृतांश्चतुःसंख्यानृत्विजो वरयेद्बुधः ॥ आचार्यं वरयेत्पश्चाद्वस्त्रादिभिरलंकृतं । आनीय चतुरः कुंभान्कृष्णवर्णान्सुशोभनान् ॥ शतच्छिद्रसमायुक्तं बृहत्कुंभं सुशोभनं । सूत्रेण वेष्टितं मध्ये धान्यस्योपरि विन्यसेत् ॥ शतमूलानि पुण्यानि रत्नानि नवसंख्यया । मृत्तिका दशसंख्याकास्तथा पल्लवपंचकं ॥ पंचवृक्षकषायांश्च पंचगव्यं तथैव च । पंचसौगंधिकं चैव पुण्यं लोहत्रयं तथा ॥ तथा धान्यानि सर्वाणि कुशान्दूर्वास्तथैव च । तीर्थोदकानि सर्वाणि सर्वकुंभेषु विन्यसेत् ॥ मूलानि नामतो वक्ष्ये शतसंख्यानि यानि च । सहदेवी शिखा पुंखा विष्णुक्रांता पुनर्नवा ॥ चंद्रवृक्षोऽसिका गुंजा दुग्धिका च तथा बला । काकवंधुर्यवा दूर्वा काकमाची शतावरी ॥ कर्करं सुरसं ब्राह्मी निर्गुंडी मुसली वचा । वर्षाभूः शंखिनी पाठा समंगा बृहतीद्वयं ॥ अपामार्गः कुशा भृंगः कासखंडकरूषकाः । श्रीवृक्षेंद्रयवप्लक्षा ब्रह्मवृक्षोऽथ चाऽऽम्रकः ॥ जंबूबिल्वौ मुरा मांसी निंबाऽरिष्टनिशाद्वयं । केतकी कदली तालः श्रीपर्णी शल्लकी तथा ॥ पाटला लोध्रकोशीरं कोशातक्यग्निमंथकः । जीवंती दाडिमी शालस्तमालं बीजपूरकं ॥ पुंनागो बकुलः कुंदो मधुरो मुचुकुंदकः । मुद्गमाषबलाश्चैव नद्यावर्तः कुरंटकः ॥ चंपकः कुब्जका कुष्ठं गुडूच्यामलकी तथा । प्रियंगुश्चंदनं दाली देवदारुः शिरीषकं ॥ मुद्गली हेममाक्षी च शताह्वा तामली तथा । उशीरं बालखदिरं करंजं च तथैव च ॥ बदरोऽश्वत्थवृक्षश्च कराह्वा ग्रंथिपर्णिका । रास्ना च शंखिनी चैव नागाह्वा पोतकी तथा ॥ कमलं कुमुदं कोशो नीलोत्पलबृहद्द्वयं । एतानि शतमूलानि सर्वारिष्टहराणि च ॥ अभावे शतमूलानां सर्वौषध्यो विनिक्षिपेत् । सर्वौषधीनां चाऽभावे दशौषध्यो विनिक्षिपेत् ॥ अभावे दशमूलानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेममात्रं विनिक्षिपेत् । देवदारुर्निशायुग्मं पद्मं नीलोत्पलं तथा ॥ कुष्ठं रौद्रं प्रियंगुं च तगरं मूलमेव च । धात्रीफलं वचा कर्णी सर्षपा नागरं तथा ॥ मुरा मांसी तथा चंडी उशीरं वालकं तथा । शैलजं गृध्रपर्णी च श्रीखंडं तालकं तथा ॥ सिद्धिवृद्धिसमायुक्ताः सर्वौषध्यः प्रकीर्तिताः ॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनं । वचा कर्चूरमुस्ते च सर्वौषध्यो दश स्मृताः ॥ याओषधीरितिमंत्रेण औषधानि विनिक्षिपेत् । सहिरत्नानिमंत्रेण नवरत्नानि निक्षिपेत् ॥ उद्धृतासीति मंत्रेण मृदमादाय विन्यसेत् । प्रवोयज्ञेषु मंत्रेण पल्लवानि विनिक्षिपेत् ॥ रुवतिभीममंत्रेण त्वचः पंच विनिक्षिपेत् । गायत्र्याद्यैः पंचगव्यं कांडात्कांडाच्च दूर्वकाः ॥ मधुवातेति च मधु स्वादुःपवस्व शर्करां । कलशस्य मुखे ब्रह्मा मध्ये रुद्रो ह्यधो हरिः ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयांतु यजमानस्य दुरितक्षयकारकाः ॥ इमंमेवरुणेत्याद्यं तत्त्वायामि द्वितीयकं । त्वंनोअग्ने तृतीयं च सत्वंनोअग्ने चतुर्थकं ॥ आचार्यो मूलमंत्रेण बृहत्कुंभं प्रपूजयेत् । मूलंप्रजामिति मूले सार्पेदंसर्प इत्यपि ॥ शतच्छिद्रस्य पुरतो देवं तत्रैव पूजयेत् । निर्ऋतिं सर्पनाथं च वस्त्रयुग्मेन वेष्टयेत् ॥ इंद्रादिलोकपालांश्च स्वेन मंत्रेण पूजयेत् । एवं पूजां च निर्वर्त्य होमकर्म ततश्चरेत् ॥ समिदाज्येन चरुणा तिलैः सम्यक् च होमयेत् । अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा ॥ मूलंप्रजामित्यष्टौ च होमवाक्यान्यनुक्रमात् । अनुहोमं ततः कुर्यादाज्येन चरुणा सह ॥ प्रजापतये स्वाहा मूलाय स्वाहा । प्रजायै स्वाहेति । इदंसर्पेभ्य इति च वाक्यान्यष्टौ तु सार्पभे । सर्पेभ्यः स्वाहाश्रेषाभ्यः स्वाहा । दंदशूकेभ्यः स्वाहेति । तिलैर्व्याहृतिहोमं च कारयेत्सुसमाहितः । पूर्णाहुतिं च जुहुयादभिषेकं च कारयेत् ॥ उत्क्षिप्य च शतच्छिद्रं धारयेच्छिरसोपरि । शतच्छिद्रे क्षिपेयुस्ते मंत्रैर्वारुणसंभवैः ॥ समुद्रज्येष्ठादिमंत्रैर्देवस्यत्वा तथैव च । शिरोमेश्रीरिति मंत्रेणापोहिष्ठादिभिस्त्रिभिः ॥ पुनंतुमांदे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वजना मंत्रैस्त्रातारमित्यथ । द्यौःशांतेत्यादिभिर्मंत्रैर्मानस्तोकेतिमंत्रतः ॥ आर्द्रवासांसि संत्यज्य आचार्याय निवेदयेत् । आज्यावलोकनं कृत्वा सद्दिप्राय निवेदयेत् ॥ आचार्याय वृषं दद्यादयःपिंडं तथैव च । सर्वाऽलंकारसंयुक्तां सवत्सां गां सदक्षिणां ॥ तदर्धं ब्रह्मणे दद्यादृत्विग्भ्योऽपि तदर्धतः । ब्राह्मणान्भोजयेत्पश्चाद्यथाशक्त्यनुसारतः ॥ अनेन विधिना शांतिं यः कुर्यात्प्रीतिमान्नरः । आयुरारोग्यमैश्वर्यं तस्य शांतिर्भवेद्ध्रुवं ॥ इति मदनरत्ने मूलाश्लेषाशांतिः ॥ ॥ अथ शौनकोक्ताश्लेषाशांतिः । तत्र पादफलं प्रागुक्तं । जपार्णवे । मूर्धाऽऽस्यनेत्रगलकांऽसयुगं च बाहुहृज्जानुगुह्यपदमित्यहिदेहभागाः । बाणा ५ ऽद्रि ७ नेत्र २ हुतभुक् ३ श्रुति ४ नाग ८ रुद्र ११ षण् ६ नंद ९ पंच ५ शिरसः क्रमशस्तु नाड्यः ॥ राज्यं पितृक्षयो मातृनाशः कामक्रियारतिः । पितृभक्तो बली स्वघ्नस्त्यागी भोगी धनी क्रमात् ॥ विशेषस्तु निर्णयसिंधौ ज्ञेयः । शांतिमाह शौनकः । आश्लेषायां तु जातानां शांतिं वक्ष्याम्यतः परं । जातस्य द्वादशाहे च शांतिहोमं समाचरेत् ॥ असंभवे तु जन्मर्क्षे अन्यस्मिन्वा शुभेऽहनि । स्नातोऽभ्यंगादिभिस्तस्मिन्वरयेत्तु द्विजोत्तमान् ॥ (ऋत्विक्संख्या तु मूलशांतिवत्) विभवे पंचकुंभांस्तु द्वयं वा तदलाभतः । देवतास्थापने चैकमेकं रुद्राऽभिमंत्रणे ॥ " शां० सा:० चतुर्विंशतिदलोपरि प्रधानदेवतास्थापनार्थमेको द्वितीयश्चतुःप्रस्रवणः " मूलर्क्षोक्तप्रकारेण कुंभे निक्षिप्य पूजयेत् । " शां० सा० चतुप्रस्रवणे पंचरत्नादि चतुर्विंशद्दलस्थे च शतमूलानीत्यर्थः " गोमयालेपिते देशे धात्वाद्यैः [धान्याद्यैः] परिशोभिते ॥ पंकजं कारयेत्तत्र चतुर्विंशद्दलान्वितं । तंडुलैः कारयेद्यद्वा रक्तपीतसिताऽसितैः ॥ कर्णिकायां न्यसेद्व्रीहीन् स्थापयेत्तेषु कुंभकं । आकलशेष्वित्यनया कलशस्थापनं स्मृतं ॥ इमंमेगंगेमंत्रेण पूरयेत्तीर्थवारिणा । कुंभं च गंधवस्त्राद्यैस्तत्तन्मंत्रैः प्रपूजयेत् ॥ (पूजयेदलंकुर्यादित्यर्थः) याःफलिनीरित्यनया क्षिपेद्रत्नौषधादिकान् । कुं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोपरिस्थपात्रे तु आश्लेषाप्रतिमां यजेत् ॥ " शां० म० आश्लेषाप्रतिमां सर्पाख्यां " निष्कनिष्कार्धपादैर्वा कारयित्वा स्वशक्तितः । तत्पूर्वोत्तरनक्षत्रे दक्षिणोत्तरयोर्यजेत् ॥ ऐंद्रादैशानपर्यंतमितरर्क्षाणि पूजयेत् । (पूर्वफल्गुन्यादिपुनर्वस्वंतानीत्यर्थः) " शां० सा० नक्षत्रदेवता इति केचित् " मूलोक्तेन विधानेन कुंभयोरभिमंत्रणं ॥ रुद्रार्चा रुद्रकुंभे तु पूर्ववच्छेषमाचरेत् । " शां० सा० पंचामृतस्नानादि सुरादिनैवेद्यांतमित्यर्थः " नमोअस्तुसर्पेभ्यः पूजामंत्र इतीरितः ॥ सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः पीतवस्त्रकः । फलकाऽसिधरस्तीक्ष्णो दिव्याभरणभूषितः ॥ एवं ध्यात्वा ततोऽभ्यर्च्य होमकर्म समारभेत् । कर्तुः शाखोक्तमार्गेण आचार्यस्याऽथवा चरेत् ॥ मुखांतं कर्म निर्वर्त्य हविरादाय शास्त्रतः । इदं सर्पेभ्यो जुहुयात्साऽधिप्रत्यधिदैवतं ॥ " शां० सा० इदं हविः " अष्टोत्तरशतं वाऽथ अष्टाविंशतिमेव वा । मूलनक्षत्रवच्छेषं होमकर्म समाचरेत् ॥ पूर्णाहुत्यंतकर्माणि कृत्वा संपातकं तथा । संपातश्चाऽऽज्यहोमेषु । कुंभे जलेषु प्रक्षिप्य अभिषेकमथाचरेत् ॥ " शां० सा० पूर्णाहुत्यंतेत्युक्त्या रुद्रकुंभादौ पुनः रुद्रादिजपो नास्ति " दारपुत्रसमेतस्य यजमानस्य पूर्ववत् । अभिषिंचेत्तथाचार्य ऋत्विग्भिः सहितस्ततः ॥ अभिमंत्रितकुंभाद्भिरभिषेकं समाचरेत् । तथा पौराणमंत्रैश्च पल्लवैरभिषेचयेत् ॥ आश्लेषाऋक्षजातस्य मातापित्रोर्धनस्य च । भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु ॥ योऽसौ वागीश्वरो नाम अधिदेवो बृहस्पतिः । मातापित्रोः शिशोश्चैव गंडांतं च व्यपोहतु ॥ पितरः सर्वभूतानां रक्षंतु पितरः सदा । सार्पनक्षत्रजातस्य वित्तं च ज्ञातिबांधवान् ॥ एवं कृतेऽभिषेके तु सार्पशांतिर्भवेद्ध्रुवं । ततः शुक्लांबरधरो यजमानः सुभूषितः ॥ दक्षिणाभिस्ततो विप्रान् मूलवच्च प्रतोषयेत् । भुक्तवद्भ्यश्च विप्रेभ्यः स्वीकुर्यादाशिषं गृही ॥ इत्युक्तेन विधानेन सर्वारिष्टं व्यपोहति । सर्वे कामाश्च सिध्यंति वेदोक्तायुर्भविष्यति ॥ अर्घ्यमंत्रमाह । सर्पाधीश नमस्तुभ्यं नागानां च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शां० गणाधिप । गृहाणार्घ्यं मयादत्तं सर्वारिष्टप्रशांतये ॥ मूलनक्षत्रवत्कुर्यात्सार्पगंडे स्वनामतः । (आभिषेके मूलशब्दस्थाने सार्पशब्द ऊह्य इत्य- क०
॥७०॥ र्थः) " शां० सा० यद्वा मूलगंडांते यथा गंडांतशांतिर्भिन्ना एवमत्रापि । ज्योतिर्निबंधे तु शांतौ विशेष उक्तः । नागप्रतिकृतिं कुर्यात्सौवर्णीं पलमानतः । अथवा शक्तितः कुर्याद्वित्तशाठ्यं विवर्जयेत् ॥ कद्रुद्रायप्रचेतस इति मंत्रं विशेषतः । नैवेद्यमामिषं चास्ति पूजादानकृतिः समा ॥ अयुतं हवनं चाऽत्र तिलैः साज्यैः प्रधानकैः । ब्रह्मवृक्षस्य समिधः शतमष्टोत्तरं शुभा इति " ॥ इति शौनकोक्ताश्लेषाशांतिः ॥

॥ अथ शौनकोक्त आश्लेषाशांतिप्रयोगः । द्वादशाहे तदसंभवे जन्मर्क्षेऽन्यस्मिन् शुभे दिने वा प्रातर्नित्यविधिं कृत्वा सपत्नीकस्तैलाभ्यंगोद्वर्तनादिना स्नातो गोमुखप्रसवं विधाय द्विराचमनादिदेशकालस्मरणांते अस्य शिशोः आश्लेषानक्षत्रजननसूचितसकलारिष्टपरिहारद्वारा श्री० सग्रहमखां शौनकोक्तां शांतिं करिष्ये । इति संकल्प्य गणेशपूजनादिऋत्विग्वरणांतं कुर्यात् । तत्र ऋत्विजोऽष्टौ चत्वारो वा । तत आचार्यः प्रादेशकरणांते मूलशांत्युक्तप्रकारेण कुंभपंचके चतुःप्रस्रवणे एककुंभे वा रुद्रवरुणयोरावाहनादिपूजनं विधाय रुद्रैकादशिन्यादिशांतिसूक्तजपांते रुद्रकुंभोत्तरभागे गोमयेनोपलिप्ते धान्यादिभिः परितः शोभिते शुद्धतंडुलैः रक्तपीतसितकृष्णपिष्टकैर्वा चतुर्विंशतिदलान्वितं पंकजं विरच्य तत्कर्णिकायां महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयःसमिति व्रीहिराशिं कृत्वा आकलशेष्विति कलशं संस्थाप्य इमंमइति तीर्थोदकेनापूर्य गंधद्वारामिति गंधपुष्पाणि प्रक्षिप्य युवासुवासाइति वस्त्रेणावेष्ट्य कांडात्कांडादिति दूर्वाः अश्वत्थेवइति
पंचपल्लवान् स्योनेति सप्तमृदः आपोहिष्ठेति पंचगव्यं ओषधयःसमिति यवान् याओषधीरिति सर्वौषधीश्च निक्षिप्य याःफलिनीरित्यादि- ॥७०॥
पूर्णपात्रनिधानांतं कृत्वा तदुपरि साष्टदलवस्त्रे उक्तलक्षणप्रतिमायां नमोअस्तु वामदेवः सर्पा अनुष्टुप् । सर्पावा० । नमोअस्तुसर्पेभ्यो० । (अयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रो बह्वृचैः खिलस्थो ग्राह्यः) इति सर्पानावाह्य सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः पीतवस्त्रकः । फलकाऽसिधरस्तीक्ष्णो दिव्याभरणभूषितः इत्युक्तरूपान्ध्यात्वा तद्दक्षिणे बृहस्पते गृत्समदो० इति बृहस्पतिं। उत्तरे आहंपितॄन् शंखः पितरस्त्रिष्टुप् । पित्रावा० इति पितॄंश्चावाह्य चतुर्विंशतिदलेषु पूर्वदलमारभ्य प्रादक्षिण्येन पूर्वफल्गुन्यादिपुनर्वस्वंतानि नक्षत्राणि तद्देवता वा स्थापयेत् । भगायनमः भगमावाहयामि । एवमग्रेऽपि । अर्यम्णे० सवित्रे० त्वष्ट्रे० वायवे० इंद्राग्निभ्यां० मित्राय० इंद्राय० निर्ऋतये० अद्भ्यो० विश्वेभ्योदेवेभ्यो० विष्णवे० वसुभ्यो० वरुणाय० अजायैकपदे० अहयेबुध्न्याय० पूष्णे० अश्विभ्यां० यमाय० अग्नये० प्रजापतये० सोमाय० रुद्राय० अदित्यै० । ततः परितः नाममंत्रैरिंद्रादिलोकपालानावाह्योक्तमंत्रैः षोडशोपचारैः सर्वान्पूजयेत् (मयूखादौ तु लोकपालावाहनं नोक्तं । युक्तं चेदं । मूले तस्याऽनुपलंभात्) तत आचार्यः रुद्रकुंभान्नैर्ऋतप्रदेशे यजमानशाखया स्वशाखया वा स्थंडिलेऽग्निं प्रतिष्ठाप्य स्थापितकुंभोत्तरतो ग्रहस्थापनादि कलशप्रार्थनांतं कृत्वाऽन्वादध्यात् । तत्र ग्रहादिदेवतोत्कीर्तनांते प्रधानदेवं सर्पान् घृताक्तपायससमिदाज्यचरुभिः प्रतिद्रव्यं अष्टोत्तरशतसंख्याहुतिभिः अष्टाविंशतिसंख्या भिर्वा । बृहस्पतिं पितॄंश्च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्यं अष्टाविंशतिसं० । अष्टसंख्याभिर्वा । भगादिचतुर्विंशतिदेवताः पायसेन प्रत्येकं अष्टाष्टसंख्या० । रक्षोहणमग्निं कृसरेणेत्याद्याज्यभागहोमांतं मुख्यदेवतापूजावर्जं मूलशांतिवत्कृत्वा यजमानेन त्यागे कृते सर्त्विगाचार्यो यथाऽन्वाधानं होमं कुर्यात् । तत्र ग्रहादिहोमोत्तरं प्रधानाज्यहोमेषु प्रत्याहुति उत्तरतःस्थापितजलकुंभे संपाताख्यमाज्यशेषं प्रक्षिपेदिति विशेषः । सर्पादित्रयहोमे तु पायसचर्वोरवदानधर्मः । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते लोकपालादिभ्यो रुद्राय सर्पेभ्यो बृहस्पतये पितृभ्यः क्षेत्रपालाय च बलीन् दद्यात् । तत आचार्यो यजमानो वा मूलशांतिवत्पूर्णाहुतिं जु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुयात् । तत आचार्यः संस्रावहोमादिकर्मशेषं समाप्य रुद्रकुंभं दक्षिणतः स्पृशन् त्र्यंबकमिति मंत्रं शतवारं जप्त्वा रुद्रैकादशिन्यादिकमपि जपेत् । ततो रुद्रं सर्पादिदेवतात्रयं च पंचोपचारैः संपूज्य त्र्यंबकं नमोअस्त्विति चोपस्थाय भवत्प्रसादेन यजमानाभिषेकं करिष्ये इति तान्प्रार्थयेत् (रुद्रजपादिप्रार्थनांतं तु मूलेऽनुपलब्धत्वादनादेयमिति भाति । शांतिसारस्थव्याख्याशयोऽप्येवं) ततः सर्वकलशोदकं संपातोदकं च पात्रांतरे आदाय ऋत्विग्भिः सह पत्नीशिशुसहितं धृतनववस्त्रं यजमानं मूलशांत्युक्तरीत्याऽभिषिंचेत् । तत्र अक्षीभ्यामित्यादियज्जाग्रतइत्यंते । योसौ वज्रधरो देवो महेंद्रो गजवाहनः । सार्पजातशिशोर्दोषं मातापित्रोर्व्यपोहतु । १ । योसौ शक्तिधरो देवो हुतभुङ् मेषवाहनः । सप्तजिह्वश्च देवोग्निः सार्पदोषं व्यपोहतु । २ । योसौ दंडधरो देवो धर्मो महिषवाहनः । सार्पजातशिशोर्दोषं व्यपोहतु यमो मम । ३ । योसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः । प्रशामयतु सार्पोत्थं दोषं गंडांतसंभवं । ४ । योसौ पाशधरो देवो वरुणः सलिलेश्वरः । नक्रवाहः प्रचेतानः सार्पोत्थाघं व्यपोहतु । ५ । योसौ देवो जगत्प्राणो मारुतो मृगवाहनः । प्रशामयतु सार्पोत्थं दोषं बालस्य शांतिदः । ६ । योसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः । मातापित्रोः शिशोश्चैव सार्पदोषं व्यपोहतु । ७ । योसौ पशुपतिर्देवः पिनाकी वृषवाहनः । आश्लेषामूलगंडांतदोषमाशु व्यपोहतु । ८ । विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः । सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः । ९ । आश्लेषाऋक्षजातस्य मातापित्रोर्धनस्य च ॥ भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु । १० । योसौ वागीश्वरो नाम अधिदेवो बृहस्पतिः । मातापित्रोः शिशोश्चैव गंडांतं स व्यपोहतु । ११ । पितरः सर्वभूतानां रक्षंतु पितरः सदा । सार्पनक्षत्रजातस्य वित्तं च ज्ञातिबांधवान् । १२ । ततो ग्रहादिमंत्रैः सुरास्त्वामित्यादिश्लोकैस्तच्छंयोर्देवस्यत्वेतिमंत्राभ्यां चाभिषेकांते तूष्णीं शतच्छि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रांतर्धनेनाभिषिच्य वस्त्रवेष्टितमुखाभ्या रुद्रसर्पकुंभाभ्यामवशिष्टजलेनाभिषिंचेत् । ततो यजमानो धृतशुक्लाबरगंधमाल्यः स्नानवस्त्रमाचार्याय दत्वा विभूतिं धृत्वा रुद्रादीनामुत्तरपूजांते ताम्रपात्रे गंधाक्षतपुष्पफलादियुक्तमर्घ्यमादाय । सर्पाधीश नमस्तुभ्यं नागानां च गणाधिप । गृहाणार्घ्यं मया दत्तं सर्वारिष्टप्रशांतये इति दत्वा आचार्यादीन्संपूज्य तेभ्यो दक्षिणादानादि सर्वं मूलशांतिवत्कृत्वा कर्म समापयेत् । इति कमलाकरभट्टकृते शांतिरत्ने आश्लेषाशांतिप्रयोगः ॥ ॥ अथ नक्षत्रविशेषफलमुक्तं नृसिंहप्रसादे । चित्राद्यार्धे पुष्यमध्यद्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये । जातः पुत्रश्चोत्तराद्ये विधत्ते मातापित्रोर्भ्रातुरायुष्यनाशं ॥ सर्वनक्षत्रेषु फलावधिस्तत्रैव । द्विमासं चोत्तरादोषः पुष्ये चैव त्रिमासकः । पूर्वाषाढाऽष्टमे मासि चित्रा षाण्मासिकं फलं ॥ नवमासं तथाऽऽश्लेषा मूले चैवाऽष्टवर्षकं । ज्येष्ठा पंचदशे मासि पुत्रदर्शनवर्जिता ॥ यत्र शांतिर्नोक्ता तत्र ग्रहमखः कार्यः । तस्माच्छांतिं प्रकुर्वीत ग्रहाणां क्रूरचेतसामिति वसिष्ठेन सर्वशेषत्वोक्तेः ।

॥ अथैकनक्षत्रशांतिः ॥ वृद्धगर्गः । एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः । प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य निश्चयः ॥ " सं० कौ० भ्रात्रोः पितृपुत्रयोरित्यत्र पुंस्त्वमविवक्षितं । निमित्तविशेषणत्वात् । एकोदरयोर्जन्यजनकयोश्चैकनक्षत्रजनने शांतिरित्याशयः " भ्रात्रोर्भ्रातृभगिन्योरित्यर्थः । पितृपुत्रयोः पित्रोर्नक्षत्रे पुत्रदुहित्रोर्यदि प्रसूतिरित्यर्थः । भ्रात्रोः पुत्रयोरित्यत्र भ्रातृपुत्रौस्वसृदुहितृभ्यामित्येकशेषः । पित्रोरित्यत्र पितामातेत्येकशेषः । मध्यमपदलोपी असमर्थश्च समासश्छांदसः । ज्योतिर्निबंधे । समानभे यदा देवि पितापुत्रौ च सोदरौ । भगिन्यौ वा स्वसा बंधुस्तदा पूर्वस्य नाशनं ॥ तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्यादभिषेचनं च । संपूज्य ऋक्षप्रतिमां तदग्रे दानं च कुर्याद्विभवाऽनुरूपमिति ॥ तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु । शुभर्क्षे शुभवारे च चंद्रताराबलान्विते ॥ रिक्ताविष्टिविवर्ज्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु प्रारभेद्दिवसेसुधीः । आचार्यं वरयेत्पूर्वं चतुरोऽथ द्विजोत्तमान् ॥ " सं० कौ० पूर्वं विधित्सितपुण्याहवाचनात् । अतएव वाचयित्वे-
त्यानंतर्यार्थमुत्तरत्र " पुण्याहं वाचयित्वा तु शांतिकर्म समारभेत् ॥ अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः । तत्तदृक्षोक्तमंत्रेण पूजयेत्क-
लशोपरि ॥ नक्षत्रमंत्रा आपस्तंबशाखायामष्टवाक्येषु प्रसिद्धाः । नक्षत्रदेवतां वा पूजयेत् । नक्षत्रदेवता पूज्या त्वधिप्रत्यधिपूर्वकमिति ज्यो-
तिर्निबंधोक्तेः । रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् । स्वशाखोक्तेन मार्गेण कुर्यादग्निमुखं ततः ॥ अनेनैव तु मंत्रेण हुनेदष्टोत्तरं शतं ।
तत्तदृक्षोक्तेनेत्यर्थः । प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तांतमेव च । ज्योतिर्निबंधे तु । भक्त्या हरिहरौ देवौ स्वर्णरूप्यमयौ शुभौ । (संपूज्येति
शेषः) विविधस्याऽस्य विश्वस्य पितरौ विश्वतोमुखौ । प्रीयेतां मूर्तिदानेन देवौ हरिहरावुभौ ॥ दानं होमविधेः पश्चाद्दानादन्वभिषेचन-
मिति । अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः ॥ " शां० सा० पितृग्रहणमुपलक्षणं । यन्नक्षत्रे जन्म तेन सह बालस्याऽभिषेक इ-
त्यर्थः " वस्त्राऽलंकारगोदानैराचार्यं पूजयेत्पुनः । ऋत्विजां दक्षिणां दद्यान्माषत्रयसुवर्णकं ॥ देवताप्रतिमादानं धान्यवस्त्रादिभिः सह ।
यानशय्यासनादीनि दद्याद्दोषप्रशांतये ॥ भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः । (यद्यप्यत्र कौस्तुभे चाष्टवाक्यात्मकास्तैत्तिरीया
मंत्रा एव सर्वैर्ग्राह्या इति प्रतीयते तथापि मूले विशेषाऽदर्शनात्स्वशाखीया एव नक्षत्रमंत्राः सर्वैर्ग्राह्याः । यच्छाखायां न संति तेषां वि-
कल्पेनाऽन्यदीयाः । तत्र बह्वृचानां नक्षत्रमंत्राः शौनकेन नक्षत्रहोमे उक्ताः । तैत्तिरीयाणां तु तच्छाखीयाः । तत्रापि मंत्रेणेत्येकवचना-
च्चतुर्वाक्यात्मकमंत्रेण होमः । सचोभयोरन्यतरः । प्रथमोपस्थितेराद्य एव वा । नत्वष्टवाक्यात्मक एको मंत्रः । तेषां याज्याऽनुवाक्या-
युगलत्वेन मंत्रद्वयतायाः क्लृप्तत्वात् । अष्टवाक्यात्मकत्वे विशेषाऽभावाच्चेति बोध्यं । अत्र सौकर्यार्थमश्विन्यादिक्रमेण शौनकोक्तनक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रदेवतामंत्रा ऋष्यादिसहिता निर्दिश्यंते । अश्विनावेह सप्तवध्रिरश्विनावुष्णिक् । १ । यमायसोमं यमो० । २ । अग्निर्मूर्धा विरूपोग्निर्गायत्री । ३ । प्रजापते हिरण्य० । ४ । आप्यायस्व गोतमः० । ५ । कद्रुद्राय कण्वो रुद्रो० । ६ । अदितिर्द्यौर्गोतमोऽदितिस्त्रिष्टुप् । ७ । वृहस्पते गृत्समदो० । ८ । आयंगौः सर्पराज्ञी० । ९ । आहंपितॄन् शंखः पितरस्त्रिष्टुप् । १० । शंनोभगो वसिष्ठो भगस्त्रिष्टुप् । ११ । अनृक्षराः सूर्यासावित्र्यर्यमा त्रि० । १२ । सवितापश्चातान्नाभागः सविता त्रि० । १३ । तन्नस्तुरीपं वसिष्ठस्त्वष्टा त्रि० । १४ । वायवायाहि मधुच्छंदा वायुर्गायत्री । १५ । इंद्राग्नीरोचना विश्वामित्र इंद्राग्नी गायत्री । १६ । मित्तोजनान्विश्वामित्तो मित्रस्त्रि० । १७ । इंद्रमिन्मेधातिथिरिंद्रो वृहती । १८ । मोषुणः कण्वो निर्ऋति० । १९ । आपोअस्मान्देवश्रवा आपस्त्रि० । २० । विश्वेदेवाऋतावृध ऋजिश्वा विश्वेदेवा गायत्री । २१ । इदंविष्णुर्मेधा० । २२ । ज्मयाअत्र वसिष्ठो वसवस्त्रि० । २३ । इममेवरुण शुनःशेपो वरुणो गायत्री । २४ । शंनोअजएकपाद्वसिष्ठोऽजएकपात्त्रिष्टुप् । २५ । उतनोनक्तं तान्वोऽहिर्बुध्न्यः प्रस्तारपंक्तिः । २६ । संपूषन्नध्वनः कण्वः पूषा गायत्री । २७ ।) इत्येकनक्षत्रशांतिः ॥ ॥ अथ प्रयोगः । उक्तकाले मातापितृनक्षत्रोत्पत्तौ गोप्रसवं कृत्वा भ्रातृनक्षत्रोत्पत्तौ तमकृत्वा (यद्यप्यत्र कौस्तुभादौ च भ्रातृनक्षत्रोत्पत्तौ गोप्रसवो नोक्तस्तथापि मूलवाक्ये भ्रात्रोरित्यत्रापि तयोरेकस्यमृत्युरित्यन्वयोपपत्त्या पाक्षिकसुतारिष्टयोगसंभवात्तन्नाशाय प्रकृतेऽपि स कार्य इति भाति) द्विराचमनादिदेशकालस्मरणांते अस्य शिशोः पित्रेकनक्षत्रोत्पत्तिसूचितसर्वारिष्टपरि० सग्रहमखां वृद्धगर्गोक्तां शांतिं करिष्ये । इति संकल्प्य (मात्रेकनक्षत्रेत्याद्यूहेनाऽन्यत्र संकल्पः । कौस्तुभमयूखयोर्नात्र ग्रहमखः) गणेशं संपूज्य आचार्यं चतुर ऋत्विजश्च वृत्वा पुण्याहवाचनं कुर्यात् । तत आचार्यः प्रादेशकरणांते स्थंडिलादेशान्यां म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रीद्यौरित्यादिविधिना कलशं संस्थाप्य पूर्णपात्रोपरि रक्तवस्त्रे जन्मर्क्षप्रतिमा तद्देवताप्रतिमां वा पूर्वोक्ततत्तन्मंत्रेणावाह्य वस्त्रयुग्मार्पणपूर्वकं पूजेयत् । ततोग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहोत्कीर्तनांते अमुकं नक्षत्रं (तद्देवतां वा) समिच्चर्वाज्यैः प्रतिद्रव्यं अष्टोत्तरशतसंख्याहुतिभिः शेषेणेत्यादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन ययोरेकनक्षत्रे जन्म तावभिषिंचेत् । ततो यजमानो देवतोत्तरपूजनांते तत्प्रतिमाग्रे आचार्याय वस्त्रालंकारगा ऋत्विग्भ्यश्च माषत्रयसुवर्णं यथाशक्ति वा दत्वा आचार्येण देवताविसर्जने कृते तस्मै तत्प्रतिमादिदानं धान्यवस्त्रयानशय्यासनादिदानं चाचार्यादिभ्योऽन्येभ्यो वा कृत्वा ब्राह्मणान्संभोज्याशिषो गृहीत्वा कर्म समापयेत् । इति शांतिरत्ने एकनक्षत्रशांतिप्रयोगः ॥ ॥ अथ वैधृतिव्यतीपातसंक्रमप्रसवशांतिः । शौनकः । अथातः संप्रवक्ष्यामि शौनकः शांतिमुत्तमां । वैधृतौ च व्यतीपाते महादोषोऽभिजायते ॥ कुमारजन्मकाले तु व्यतीपातश्च वैधृतिः । संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः ॥ “ शां० सा० संक्रमशब्देन संक्रमकालात्पूर्वाः पराश्च षोडशघटिका गृह्यंते । द्वात्रिंशद्दंडैः संपूर्णसूर्यमंडलस्य राश्यंतरप्रवेशात् ” दरिद्राणां महादुःखं व्याधिपीडा महद्भयं । अश्रियं मृत्युमाप्नोति नात्र कार्या विचारणा ॥ स्त्रीणां च शोकदुःखं च सर्वनाशकरो भवेत् । शांतिर्वा पुष्कला कार्या तत्र दोषो न कश्चन ॥ गोमुखप्रसवं कुर्याच्छांतिं कुर्यात्प्रयत्नतः । जपाऽभिषेकदानैश्च होमादपि विशेषतः ॥ नवग्रहमखं कुर्यात्तस्य दोषोपशांतये । प्रथमं गोमुखाज्जन्म ततः शांतिं समाचरेत् ॥ गृहस्य पूर्वदिग्भागे गोमयेनानुलिप्य च । अलंकृते सुदेशे तु व्रीहिराशिं प्रकल्पयेत् ॥ पंचद्रोणमितं धान्यं तदर्धं तंडुलेन च । तदर्धं तु तिलैः कुर्यादन्योन्योपरि कल्पयेत् ॥ “वि० पा०।तदर्धं० दन्योन्यं परिकल्पयेत् ।धान्यं व्रीहिः । प्रथमं व्रीहिपरिधिः । तन्मध्ये तंडुलपरिधिः । तदंतस्तिलप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिधिरिति राशित्रयविवेकः " द्रव्यत्रितयराशौ तु अष्टपत्रं लिखेद्बुधः । पुण्याहं वाचयित्वा तु आचार्यं वृणुयात्पुरा ॥ " शां० सा० पुरा राशिकल्पनात्पूर्वं " पंचांगभूषणं दद्यात्पट्टवस्त्रांगुलीयकं । राशौ प्रतिष्ठितं कुंभमव्रणं सुमनोहरं ॥ तीर्थोदकेन संपूर्य समृदौषधिपल्लवं । सगव्यगंधरत्नं च वस्त्रयुग्मेन वेष्टयेत् ॥ तस्योपरि न्यसेत्पात्रं सूक्ष्मवस्त्रेण संयुतं । प्रतिमां स्थापयेद्धीमान्साऽधिप्रत्यधिदेवतां ॥ चंद्रादित्याकृती पार्श्वे मध्ये वैधृतिमर्चयेत् । वैधृतिं तद्देवतां रुद्रं । एवमेव व्यतीपातशांतौ संक्रमणस्य च ॥ "वि०पा०। एव० संक्रमणस्य तु । वैधृतिर्व्यतीपातश्च प्रधानदेवता । उभयत्रापि सूर्योऽधिदेवश्चंद्रः प्रत्यधिदेवः । संक्रांतौ तु भानुः प्रधानदेवो रुद्रोऽधिदेवोऽग्निः प्रत्यधिदेवः " (मयूखे तु वैधृतिव्यतीपातयोः शांतौ मध्ये रुद्रः दक्षिणोत्तरयोः सूर्यसोमौ । संक्रांतौ च मध्ये सूर्यः दक्षिणोत्तरयोरग्निरुद्रावुक्तौ । तच्च युक्ततरं भाति । सम्यङ्मूलोक्तसंवादलाभात्) भानोरुत्तरतो रुद्रमग्निं दक्षिणतो यजेत् । वैधृतौ मध्ये रुद्रो दक्षिणोत्तरयोश्च सूर्यचंद्रौ । संक्रमपातयोर्मध्ये सूर्यः दक्षिणोत्तरयोरग्निरुद्रावित्यर्थः । निष्कमात्रेण वाऽर्धेन पादेनाऽपि स्वशक्तितः । प्रतिमां कारयेद्धीमांस्तत्तल्लक्षणलक्षितां ॥ तच्च दानपरिभाषायां मयोक्तं । " शां० सा० अंगप्रतिमास्वप्येतन्मानं " प्रतिमापूजनार्थाय वस्त्रयुग्मं निवेदयेत् । अधिदेवो भवेत्सूर्यश्चंद्रः प्रत्यधिदेवता ॥ ततो व्याहृतिपूर्वेण तत्तन्मंत्रेण पूजयेत् । त्र्यंबकेण मंत्रेण प्रधानप्रतिमां यजेत् ॥ उत्सूर्यइति [तत्सूर्यमिति] मंत्रेण सूर्यपूजां समाचरेत् । आप्यायस्वेति मंत्रेण सोमपूजां समाचरेत् ॥ (अग्निमंत्रस्तु तल्लिंगको ग्राह्यः) उपचारैः षोडशभिर्वा पंचोपचारकैः । अर्चितं गंधपुष्पाद्यैः फलं नैवेद्यमर्पयेत् ॥ मृत्युंजयेन मंत्रेण प्रधानप्रतिमां स्पृशन् । अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा ॥ अष्टाविंशति वा चाथ प्रजपेत्स्वस्य शक्तितः । सर्वसौरं प्रजप्याऽथ सोमार्थं सोममंत्रतः ॥ आनोभद्रेति सूक्तं च भद्राअग्नेश्च सू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तकं । जपेच्च पौरुषं सूक्तं त्रैयंबकमतःपरं ॥ कुंभं स्पृष्ट्वा चतुर्दिक्षु जपं कुर्युः स्तथर्त्विजः । कुंभस्य पश्चिमे देशे स्थंडिलेऽग्निं प्रकल्पये-
त् ॥ स्वगृह्योक्तविधानेन कारयेत्संस्कृतानलं । त्रैयंबकेण मंत्रेण समिदाज्यचरून् हुनेत् ॥ अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा । अ-
ष्टाविंशति वा कुर्यात्स्वस्य शक्त्यनुसारतः ॥ (पार्श्वदेवतयोः प्रधानतोऽल्पसंख्या । अयं समिदाज्यचरुहोमस्त्रिष्वपि तुल्यः । मंत्रास्तु तत्त-
द्देवत्याः पृथग्बोध्याः) मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत् । (शांतित्रयेऽप्ययं होमः । संख्या तु पूर्वोक्ता) ततः स्विष्टकृतं हुत्वा
अभिषेकं च कारयेत् ॥ समुद्रज्येष्ठासूक्तेन आपोहिष्ठतृचेन च । अक्षीभ्यामिति सूक्तेन पावमानीभिरेव च ॥ त्र्यंबकेण च उत्सूर्य आ-
प्यायस्वेति मंत्रतः । सुरास्त्वामिति मंत्रेण अभिषेकं समाचरेत् ॥ अभिषेकाप्लुतं वस्त्रमाचार्याय निवेदयेत् । श्वेतवस्त्रधरो भूत्वा भूषणाद्यै-
रलंकृतः ॥ यजमानः स्त्रियायुक्त आज्यावेक्षणमाचरेत् । आचार्यं पूजयेत्पश्चाद्वस्त्रहेमांगुलीयकैः ॥ गोदानं वस्त्रदानं च हेमदानं विशेष-
तः । तद्दोषशमनार्थाय आचार्याय प्रदापयेत् ॥ प्रच्छादनपटं दद्यात्ततः शांतिर्भविष्यति । जापकेभ्यो ब्राह्मणेभ्यो दक्षिणाभिश्च तोषयेत् ॥
दीनांधकृपणेभ्यश्च प्रदद्याद्भूरिदक्षिणां । ब्राह्मणान् शतसंख्याकान्मिष्टान्नैर्भोजयेच्च तान् ॥ "सं० कौ० तान् आचार्यमृत्विजश्चेत्यर्थः"
बंधुभिः सह भुंजीत यथाविभवसारतः । एवं यः कुरुते मर्त्यो नैव दुःखमवाप्नुयात् ॥ आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोरपि । सर्व-
दुःखनिवृत्तिश्च पुत्रपौत्रप्रवर्धनं ॥ सर्वान्कामानवाप्नोति सुखी भूत्वा चिरं वसेत् ॥ इति वैधृत्यादिशांतिः ॥ ॥ अथ प्रयोगः । कर्ता
उक्तकाले गोमुखप्रसवं कृत्वा आचमनादिदेशकालकीर्तनांते अस्य शिशोर्वैधृतिजननसूचितसर्वारिष्टपरिहारद्वारा० सग्रहमखां शौनको-
क्तां शांतिं करिष्ये इति संकल्पयेत् (व्यतीपातसंक्रमयोस्तु तत्तच्छब्दस्योहेन संकल्पः । एकदिने तयोः सत्त्वे तंत्रेणैकैव शांतिः । वैधृति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संक्रांत्योः सत्त्वे तु शांतिद्वयं पृथक्कार्यं) ततो गणेशपूजनपुण्याहवाचनादिऋत्विग्वरणांतं कुर्यात् । तत्राचार्याय पट्टवस्त्रादि दद्यात् । तत आचार्यः प्रादेशकरणांने गृहस्य पूर्वभागे गोमयोपलिप्ते रंगवल्ल्याद्यलंकृते महीद्यौरिति भूमिं स्पृष्ट्वा तत्र ओषधयःसमिति पंचद्रोणमितव्रीहिराशिं तदुपरि सार्धद्रोणद्वयमिततंडुलराशिं तदुपरि सपादद्रोणमिततिलराशिं च कृत्वोपरिभागं समं कृत्वा तत्राष्टदले कुंभं प्रतिष्ठाप्य तीर्थजलेनापूर्य तत्र सप्तमृदः सर्वौषधिपंचपल्लवपंचगव्याष्टगंधपंचरत्नानि निक्षिप्य वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रोपरि सूक्ष्मवस्त्रे उक्तलक्षणप्रतिमासु व्याहृतिपूर्वकमंत्रैर्देवता आवाहयेत् । तत्र मध्ये त्र्यंबकमिति रुद्रं । तद्दक्षिणे उत्सूर्यो वसिष्ठः सूर्यस्त्रिष्टुप् । इति सूर्यं । उत्तरे आप्यायस्वेति सोममावाहयेत् । (व्यतीपातसंक्रमशांत्योस्तु उत्सूर्यइति मध्ये सूर्यं दक्षिणेऽग्निंदूतमित्यग्निं उत्तरे च त्र्यंबकमिति रुद्रमावाहयेत्) ततस्तान् वस्त्रयुग्मगंधपुष्पाद्यलंकृतफलनैवेद्यसहितैः षोडशोपचारैः पंचोपचारैर्वा संपूज्य रुद्रप्रतिमां स्पृशन् त्र्यंबकमितिमंत्रमष्टसहस्रमष्टशतमष्टाविंशतिं वा जप्त्वा सूर्यप्रतिमां स्पृशन् सर्वसौरमंत्रान्जपेत् । तेच । उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य प्रस्कण्वो गायत्र्यंत्याश्चतस्रोऽनुष्टुभः । चित्रंदेवानामिति षड़ृचस्य सूक्तस्य कुत्सस्त्रि० । इंद्रंमित्रमितिद्वयोर्दीर्घतमास्त्रि० । हंसःशुचिषद्वामदेवो जगती । यत्त्वासूर्योत्रिरनुष्टुप् । यदद्येत्येकस्या उत्सूर्यइति तिसृणां उद्वेतीति सार्धचतसृणां उदुत्यदिति तिसृणां च वसिष्ठस्त्रिष्टुप् । उदुत्यद्बृहती । शीर्ष्णःशीर्ष्णः सतोबृहती । तच्चक्षुः पुरउष्णिक् । वण्महानिति द्वयोर्जमदग्निर्बृहत्यंत्या सतोबृहती । नमोमित्रस्येति द्वादशर्चस्य सूक्तस्याभितपा जगती दशमी त्रिष्टुप् । सूर्योनइति पंचर्चस्य सूक्तस्य चक्षुर्गायत्री । विभ्राड्बृहदिति चतुर्ऋचस्य सूक्तस्य विभ्राड् जगत्यंत्याऽऽस्तारपंक्तिः । आयंगौरिति तृचस्य सूक्तस्य सर्पराज्ञी गायत्री । सर्वेषां सूर्यो देवता । जपे० । ततः सोमप्रतिमां स्पृशन्नाप्यायस्वेति जपेत् । (व्यतीपातसंक्रमयोस्तु पूर्वं सौरजपस्ततस्त्र्यंबकमंत्रजपः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्चतुर्दिक्षु ऋत्विजः कुंभं स्पृष्ट्वा क्रमेण सूक्तानि जपेयुः । पूर्वे आनोभद्राइति दशर्चस्य सूक्तस्य गोतमो विश्वेदेवा जगती । षष्ठीविराट् । तिस्रोंत्यास्त्रिष्टुभः । दक्षिणे भद्राअग्नेरिति द्वादशर्चस्य सूक्तस्य सुमित्रोग्निस्त्रि० । आद्ये जगत्यौ । पश्चिमे सहस्रशीर्षेति षोडशर्चस्य० । उत्तरे त्र्यंबकं वसिष्ठो० । (मयूखे तु त्र्यंबकमंत्रस्थाने कद्रुद्रायेति सूक्तमुक्तं । तच्च युक्तं । मूले तथैवोपलंभात् । तत आचार्योग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहोत्कीर्तनांते रुद्रं प्रधानदेवं समिदाज्यचरुभिः प्रतिद्रव्यमष्टोत्तरसहस्रसंख्याभिराहुतिभिः । अष्टोत्तरशतसं० । अष्टाविंशतिसंख्याभिर्वा । सूर्यं सोमं च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्यं अष्टोत्तरशतसंख्या० । अष्टाविंशतिसं० । अष्टसंख्याभिर्वा । (व्यतीपातसंक्रमयोस्तु सूर्यं अष्टोत्तरसहस्राद्यन्यतमसंख्यया अग्निं रुद्रं च अष्टोत्तरशतादिसंख्यया) मृत्युंजयं तिलैः अष्टोत्तरसहस्राद्यन्यतमसं० । शेषेणेत्यादिग्रहादिहोमांते यथान्वाधानं देवतात्रयहोमोत्तरं त्र्यंबकमंत्रेण तिलान् हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य धृतनववस्त्रं पत्नीशिशुसहितं यजमानमभिषिंचेत् । तत्र मंत्राः । समुद्रज्येष्ठाइति चतसृणां० । आपोहिष्ठेतितिसृणां० । अक्षीभ्यामितिषड्चस्य० । स्वादिष्ठयेति तिसृणां० । ततः प्रधानांगदेवतामंत्रैर्ग्रहमंत्रैः सुरास्त्वामित्यादिपौराणैश्चाभिषिक्तो यजमानः शुक्लांबरगंधमाल्यधरोऽभिषेकवस्त्रमाचार्यायदत्वा विभूतिं धृत्वा पत्न्या सह रूपंरूपमित्याज्यमवलोक्य तत्पात्रं सदक्षिणं ब्राह्मणाय दत्वा वस्त्रहेमांगुलीयकैः आचार्यं संपूज्य वैधृत्यादिजननदोषशांत्यर्थे गोवस्त्रस्वर्णानि प्रच्छादनपटं च (तन्निष्क्रयं वा) तुभ्यमहं संप्रददे इति तस्मै दत्वा ऋत्विग्भ्यो यथाशक्ति दक्षिणां दीनांधकृपणेभ्यश्च भूयसीं दत्वोत्तरपूजां कृत्वा विसर्जितदेवतापीठमाचार्यहस्ते प्रतिपाद्य मिष्टान्नैः शतं ब्राह्मणानाचार्यमृत्विजश्च भोजयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत । इति वैधृतिव्यतीपातसंक्रमशांतिप्रयोगः ॥ ॥ अथ भद्राजननशांतिः संगृह्यते । गर्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः परं प्रवक्ष्यामि महतीं शांतिमुत्तमां। भद्रायां तद्दिने वाऽपि जायते बालकं यदि ॥ कुलारिष्टं विजानीयान्मातापित्रोस्तथैव च। अत्र मातापित्रोररिष्टश्रवणात् गोमुखप्रसवोऽपि कार्यः। पित्ररिष्टेइत्यादितत्प्रकरणोक्तेः। तद्दोषपरिहारार्थं शांतिं कुर्याद्विधानतः ॥ सुलग्ने सुमुहूर्ते च तत्तत्कालेऽथवा पुनः। शांतिं कुर्यात्प्रयत्नेन ग्रहयज्ञपुरःसरं॥ पुण्याहादित्रयं कुर्यादाचार्यं वरयेत्सुधीः। गृहस्य पूर्वदिग्भागे पंचपल्लवसंयुतं॥ पंचरत्नयुतं चैव कलशं स्थापयेन्महत्। पूर्णपात्रनिधानांतं कृत्वा तत्पूर्वतः क्रमात् ॥ स्थापयेत्कलशानेवं चतुर्दिक्षु समंततः। पूर्णपात्रोपरि न्यस्य प्रतिमापंचकं शुभं ॥ भद्राअग्नेरिति मंत्रेण मध्ये भद्रां समर्चयेत्। आकृष्णेनेति मंत्रेण सूर्यं प्राक्कलशे यजेत् ॥ कद्रुद्रायेति रुद्रं वै दक्षिणे कलशे यजेत् । पश्चिमे गणपः पूज्यो गणानांत्वेति मंत्रतः ॥ उत्तरे ऋषभंमेति ऋषभं पूजयेत्सुधीः । पूजयेद्देवताः सम्यक् कलशानपि भूषयेत् ॥ ततोग्निस्थापनं कृत्वा ग्रहान्संस्थापयेत्सुधीः । तत्रत्यं कलशं प्रार्थ्य अन्वाधानं समाचरेत् ॥ ततो होमं च चरुणा समिदाज्यतिलैरपि। अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥ अष्टाविंशति वा कुर्याद्यथाविभवसारतः। तत्तद्दैवतमंत्रेण होमं कुर्यादतंद्रितः ॥ बलिदानं ततः कृत्वा अभिषेकं समाचरेत्। अभिषेकाप्लुतं वस्त्रमाचार्याय निवेदयेत् ॥ आचार्यं च सपत्नीकं पूजयेद्वस्त्रभूषणैः । उत्थाप्य प्रतिमाः पंच आचार्याय निवेदयेत् ॥ गुरवे दक्षिणां दद्याद्गोयुग्मं दोषशांतये। ऋत्विजां च यथाशक्ति दद्याद्वै दक्षिणां ततः ॥ आज्यावलोकनं कृत्वा कर्मशेषं समापयेत्। ब्राह्मणान्भोजयेत्सम्यग्घृतपायसलड्डुकैः ॥ एवं यः कुरुते मर्त्यः सोऽक्षय्यं सुखमश्नुते ॥ इति भद्राजननशांतिः ॥

॥ अथ प्रयोगः। कर्ता उक्तकाले गोमुखप्रसवं कृत्वा देशकालौ संकीर्त्य अस्य शिशोः भद्राजननसूचितसकलारिष्टपरिहारद्वारा० सग्रहमखां गर्गोक्तां शांतिं० इति संकल्प्य गणेशपूजनादिनांदीश्राद्धांते आचार्यादीन्वृणुयात्। तत आचार्यः प्रादेशकरणांते गृहस्य पूर्वभागे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थंडिलात्प्राच्यां महीद्यौरित्यादिमंत्रावृत्त्या मध्ये एकं पूर्वादिदिक्षु च चतुर इत्यवं पंचकुंभान्संस्थाप्य तत्र जलपूरणादिपूर्णपात्रनिधानांते प्रतिमासु देवता आवाहयेत् । मध्यकुंभे भद्राअग्नेः सुमित्रो भद्रा जगती । भद्रावा०। इति भद्रां । पूर्वे। आकृष्णेन हिरण्य०इति सूर्यं । दक्षिणे । कद्रुद्राय कण्वो रुद्रो गा० इति रुद्रं । पश्चिमे । गणानांत्वा गृत्समदो० इति गणपतिं । उत्तरे । ऋषभंमा ऋषभ ऋषभोनुष्टुप् । इति ऋषभं चावाह्य सर्वान्संपूज्य पुष्पमालादिभिः कलशान्भूषयित्वाऽग्निं ग्रहांश्च प्रतिष्ठाप्याऽन्वादध्यात् । ग्रहोत्कीर्तनांते भद्रां सूर्यं रुद्रं गणपतिं ऋषभं चैताः प्रधानंदेवताः समिच्चर्वाज्यतिलैः प्रत्येकं प्रतिद्रव्यं अष्टोत्तरसहस्रसंख्याहुतिभिः । अष्टोत्तरशतसं० ।अष्टाविंशतिसंख्याभिर्वा । शेषेणेत्यादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य धृतनववस्त्रं पत्नीशिशुसहितं यजमानं समुद्रज्येष्ठाइत्यादिवारुणैर्ग्रहादिमंत्रैश्चाऽभिषिंचेत् । ततो यजमानो धृतशुक्लांबरोऽभिषेकवस्त्रमाचार्याय दत्वा विभूतिं धृत्वोत्तरपूजां कृत्वा सपत्नीकमाचार्यं वस्त्रभूषणैः संपूज्य तस्मै भद्राजननदोषशांत्यर्थं गोयुग्मं (तन्निष्क्रयं वा) दक्षिणां तुभ्यमहं० इति दत्वा ऋत्विग्भ्योऽन्येभ्यश्च यथाशक्तिदक्षिणादानांते रूपंरूपमिति सपत्नीक आज्यमवेक्ष्य सदक्षिणं तत्पात्रं ब्राम्हणाय दत्वा विसर्जितदेवतापीठं सोपस्करमाचार्यहस्ते प्रतिपाद्य पायसलड्डुकादिभिर्विप्रान्संभोज्याशिषो गृहीत्वा कर्म समापयेत् । इति भद्राशांतिप्रयोगः ॥ ॥ अथ ग्रहणशांतिः । शौनकः । ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते । (चंद्रसूर्ययोरित्यर्थः) व्याधिपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ॥ इत्थं संजायते यस्तु तस्य मृत्युर्न संशयः । व्याधिपीडा च दारिद्र्यं शोकश्च कलहो भवेत् ॥ शांतिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया। यस्मिन्नृक्षे विशेषेण ग्रहणं संप्रजायते ॥ तदृक्षाधिपते रूपं सुवर्णेन प्रकल्पयेत् । यथाशक्त्यनुसारेण वित्तशाठ्यं न कारयेत् ॥ सूर्यग्रहे सूर्यरूपं सुवर्णेन स्वशक्तितः । चंद्रं चंद्रग्रहे धीमान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजतेन विशेषतः ॥ राहुरूपं प्रकुर्वीत सीसकेन विचक्षणः । शुचौ देशे प्रयत्नेन गोमयेन प्रलेपयेत् ॥ तस्योपरि न्यसेद्धीमान्नववस्त्रं सुशोभनं । त्रयाणां चैव देवानां स्थापनं तत्र कारयेत् ॥ रक्ताक्षतं रक्तगंधं रक्तपुष्पांबराणि च । सूर्यग्रहे प्रदातव्यं सूर्यप्रीतिकरं हि यत् ॥ श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधाक्षतादि च । चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकरं च यत् ॥ राहवे चैव दातव्यं कृष्णपुष्पांबरादि च । दद्यान्नक्षत्रनाथाय श्वेतगंधानुलेपनं ॥ सूर्यं संपूजयेद्धीमानाकृष्णेनेति मंत्रतः । चंद्रग्रहे तथा सम्यगाप्यायस्वेति मंत्रतः ॥ स्वर्भानोरितिमंत्रेण राहुं यत्नेन पूजयेत् । एवं संपूजयेद्धीमान् समिद्भिश्चाऽर्कसंभवैः ॥ (सूर्यग्रहे इत्यर्थः) चंद्रग्रहे च पालाशैः समिद्भिर्जुहुयान्नरः । दूर्वाभिर्जुहुयाद्धीमान् राहोः संप्रीणनाय च ॥ समिद्भिर्ब्रह्मवृक्षोत्थैर्भेशाय जुहुयाद्बुधः । (भेशो नक्षत्राधिपः) आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः ॥ इदं सर्वेभ्यः । पंचगव्यैः पंचरत्नैः पंचत्वक्पंचपल्लवैः । जलैरोषधिकल्कैश्च सहितैः कलशोदकैः ॥ अभिषेकं प्रकुर्वीत यजमानस्य यत्नतः । मंत्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः ॥ इमंमेगंगे परतस्तत्त्वायामीति मंत्रतः । अभिषेके निवृत्ते तु यजमानः समाहितः ॥ आचार्यं पूजयेत्पश्चात्सुशांतो विजितेंद्रियः । तस्मै दद्यात्प्रयत्नेन भक्त्या प्रतिकृतित्रयं ॥ (प्रतिकृतिः प्रतिमा) दक्षिणाभिश्च संयुक्तं यथाशक्त्यनुसारतः । ब्राह्मणान् भोजयित्वा तु प्रणिपत्य क्षमापयेत् ॥ तेभ्योऽपि दक्षिणां दद्याद्यजमानः स्वशक्तितः । अनेन विधिना शांतिं कृत्वा सम्यग्विशेषतः ॥ अकालमृत्युं शोकं च व्याधिपीडां नचाप्नुयात् । सौख्यं सौमनसं नित्यं सौभाग्यं लभते नरः ॥ इत्थं ग्रहणजातानां सर्वारिष्टविनाशनं । कथितं भार्गवेणेदं शौनकाय महात्मने ॥ “ध० सिं० वेधकाले जन्मनि नैव शांतिः । किंतु दुष्टकालत्वादुद्राभिषेकः कार्य इति भाति” । इति ग्रहणप्रसवशांतिः ॥ ॥ अथ प्रयोगः । सूर्यग्रहणोत्पत्तौ तत्कालस्थितनक्षत्रदेवतायाः सूर्यस्य च यथाशक्तिहेम्ना प्रतिमे विधाय रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होः सीसेन नागाकृतिं कुर्यात् । चंद्रग्रहे तु सूर्यस्थाने राजतं चंद्रबिंबमि ति विशेषः । कर्ता उक्तकाले गोमुखप्रसवं विधाय आचमनादिदेशका-
लकीर्तनांते ममास्यशिशोः सूर्यग्रहणकालोत्पत्तिसूचितसर्वारिष्टपरिहारद्वारा० शौनकोक्तां सग्रहमखां शांतिं० । (चंद्रग्रहे तु चंद्रग्रहणेत्यूहः)
गणेशपूजादिकृत्विग्वरणांतं कुर्यात् । तत आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे गोमयेनोपलिप्ते शुचिदेशे नववस्त्रं प्रसार्य तत्र उक्तलक्षण-
प्रतिमात्रये देवता आवाहयेत् । आकृष्णेन हिरण्य० इति सूर्यं । (चंद्रग्रहे तु आप्यायस्व गोतम० इति सोमं) तद्दक्षिणे स्वर्भानोरत्री राहुस्त्रि-
ष्टुप् । राहावा० । स्वर्भानोरधयदिंद्र० इति राहुं । उत्तरे प्रसूतिकालस्थितनक्षत्रदेवतामावाहयेत् । तन्मंत्रस्तु बह्वृचैरेकनक्षत्रशांतौ शौनकोक्तो
द्रष्टव्यः । ततस्तान् षोडशोपचारैः पूजयेत् । तत्र वस्त्रगंधाक्षतपुष्पादि रक्तवर्णं सूर्याय । शुक्लवर्णं चंद्रनक्षत्रनाथाभ्यां । कृष्णवर्णं च राहवे इति
विशेषः । ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहोत्कीर्तनांते सूर्यं प्रधानदेवं अर्कसमिदाज्यचरुतिलैः प्रतिद्रव्यं अष्टोत्तरशतसंख्याभिराहु
तिभिः । अष्टाविंशतिसंख्याभिर्वा (चंद्रग्रहे तु चंद्रं पलाशसमिदाज्य०) राहुं दूर्वाज्यचरुतिलैः प्रतिद्रव्यं अष्टाविंशतिसं०अष्टसंख्याभिर्वा ।
अमुकं नक्षत्रदेवतां पलाशसमिदाज्यचरुतिलैः अष्टाविं० । अष्टसंख्याभिर्वा । शेषेणेत्यादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्राव
होमादिशेषं समाप्य पंचगव्यपंचरत्नपंचत्वक्पंचपल्लवैरोषधिकल्कैश्च मिश्रितलौकिकजलैर्ग्रहकलशोदकसहितैः पत्नीशिशुसहितं यजमा-
नमभिषिंचेत् । तत्र मंत्राः । आपोहिष्ठेति तृचस्य० । इमंमेगंगे सिंधुक्षिन्नृयो जगती । तत्त्वायामि शुनः० । ततो ग्रहादिमंत्रैरभिषिक्तो यजमानो
विभूतिं धृत्वोत्तरपूजांते आचार्यादीन्संपूज्य तेभ्यो दक्षिणां दत्वा आचार्येण देवताविसर्जने कृते तस्मै प्रतिमात्रयं सोपस्करं ग्रहपीठं च दत्वा
ब्राह्मणान्संभोज्य भूयसीं दक्षिणां दत्वा तान्प्रणम्य क्षम्यतामिति क्षमाप्याशिषो गृहीत्वा कर्मेश्वरार्पणं कुर्यात् । इति ग्रहणशांतिप्रयोगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ यमलोत्पत्तिशांतिः । “ वि० मा० काशीखंडे सूतशौनकसंवादे । त्रिविधा यमलोत्पत्तिर्जायते योषितामिह । सुतौ च सुतकन्ये च कन्ये एव तथा पुनः ॥ एकलिंगौ विनाशाय द्विलिंगौ मध्यमौ स्मृतौ । यमौ विघ्नकरौ ज्ञेयौ तत्र शांतिर्विधीयते ॥ हेममूर्ती विधातव्ये द्वयोश्चैव द्विजोत्तम । पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥ ब्रह्मवृक्षस्य पत्रे च स्थापयेद्रक्तवाससी । स्वस्तिके तंडुलानां च न्यसेत्पीठं द्विजोत्तम ॥ पूजयेद्रक्तपुष्पैश्च चंदनेनाऽनुलेपयेत् । दशांगेनैव धूपेन धूपयेत्प्रयतः पुमान् ॥ दीपैर्नीराजयेच्चैव नैवेद्यं परिकल्पयेत् । यस्मैत्वंसुकृतेमंत्रेणाक्षतादिभिरर्चयेत् ॥ अनेनैव तु मंत्रेण होमंकुर्यादतंद्रितः । अष्टोत्तरसहस्रं च पायसेन च सर्पिषा ॥ शांतिसूक्तं पठेद्विद्वान् सूर्यसूक्तं जपेत्ततः । विष्णुसूक्तं तथा गाथां वैश्वदेवीं जपेद्बुधः ॥ अश्वदानं ततो दद्यादाचार्याय कुटुंबिने । तयोर्मूर्ती प्रदातव्ये यजमानेन धीमता ॥ दानमंत्रः । अश्वरूपौ महाबाहू अश्विनौ दिव्यचक्षुषौ । अनेन वाजिदानेन प्रीयेतां मे यशस्विनौ ॥ इति वाजिदानमंत्रः । आचार्यः प्रथमो मेधा विष्णुस्तु सविता भगः । दस्रमूर्तिप्रदानेन प्रीयतां मेऽश्विनौ भगः ॥ इति मूर्तिप्रतिमादानं । ततोऽभिषेचनं कार्यं दंपत्योर्विधिवद्बुधैः । ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् । सालंकारैश्च वस्त्रैश्च प्रार्थयेद्वचनैः शुभैः । एवं कृते विधाने च यमलोत्पत्तिशांतिकं ॥ जायते नाऽत्र संदेहः सत्यमेतद्ब्रवीमि ते । इति काशीखंडे सूतशौनकसंवादे यमलोत्पत्तिशांतिः ।” भारतवृद्धगर्गौ । स्त्रिया गोर्वडवायाश्च यमलं चैव जायते । जानीयाद्यमतो भीतिं मारुतं शांतिमाचरेत् ॥ मयूरचित्रे । घोटिका हस्तिनी चैव महिषी यमलौ यदि । प्रसूयते तदा नाशः संग्रामश्च महान्भवेत् ॥ कारयेल्लक्षहोमं च गुडदानं च कारयेत् । भोजनं ब्राह्मणानां च दद्याद्गां चैव दक्षिणां ॥ महिषीयमलोत्पत्तौ वन्यानां चैव जन्मनि । दद्याच्चैव तु तामैंद्रीं शांतिं यद्वा प्रयोजयेत् ॥ कात्यायनः । अथातो यमलजनने प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यश्चित्तविधिं व्याख्यास्यामो यस्य भार्या गौर्दासी महिषी वडवा वा विकृतिं प्रसवेत्स प्रायश्चित्ती भवेत्पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां कषाया-
नुपाहरेत् प्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौरसर्षपास्तेषां मिश्रमपो हिरण्यदूर्वांकुरैराम्रपल्लवैः सर्वौषधीभिरष्टौ कलशान् प्रपूर्य दंपती स्नपये-
दापोहिष्ठेति तिसृभिः कयानश्चित्रइति द्वाभ्यां पंचैंद्रेण पंचवारुणेनेदमापःप्रवहतेत्यपाघमिति स्नापयित्वाऽलंकृत्य तौ दर्भेषूपवेश्य मारुतं स्था-
लीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमंत्रैः स्थालीपाकस्य जुहोत्यग्नयेस्वाहा सोमायस्वाहा पवमानायस्वाहा पाव-
कायस्वाहा मारुतायस्वाहा मरुद्भ्यःस्वाहा यमायस्वाहांऽतकायस्वाहा मृत्यवेस्वाहाऽग्नयेस्विष्टकृतेस्वाहेत्येतदेव ग्रहोत्पातेषूलूको गृध्रः कपोतः
श्येनो वा गृहं प्रविशेत्स्तंभो वा प्ररोहेद्वल्मीकं मधुजालं वा भवेदुदकुंभप्रज्वलने आसनशयनयानभंगे गृहगोधिकाकृकलासशरीरसर्पणे छत्र-
ध्वजविनाशेऽन्येष्वप्युत्पातेषु भूकंपोल्कापातकाकसर्पसंगमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशांतिं चोक्तविधिना कृत्वाचार्याय वरं दत्वा ब्राह्म-
णान् भोजयित्वा स्वस्ति वाच्याशिषः प्रतिगृह्य शांतिर्भवतीति । बह्वृचकारिकायां । अथ यस्य वधूर्गौर्वा जनयेद्यमलौ ततः । स मरुद्भ्य-
श्चरुं कुर्यात्पूर्णाहुतिमथापिवेति । ऐतरेय ब्राह्मणे तु । सोऽग्नये मरुत्वते त्रयोदशकपालं पुरोळाशं निर्वपेदाहुतिं वा जुहुयादित्युक्तं । अत्राहिताग्नेः श्रौतेन
मारुतत्रयोदशकपालेन समुच्चयः “ सं० कौ० आहिताग्नेः कृतप्रकृत्यारंभस्येष्टिरकृततदारंभस्य पूर्णाहुतिरिति वृत्तिकारः । आश्वलायनसूत्रकारेण तु
यस्यभार्यागौर्वायमौजनयेदिष्टिर्मरुतइति मारुतयाग उक्तः । वृत्तिकृद्देवत्राताभ्यां मरुत एवात्र देवतेत्युक्तेः।एवकारवशेन सिद्धांतभाष्यकृताऽपि त-
दुपपादनाच्च न पूर्णाहुतिरिति तदीयमेवकारव्याख्यांतरं वृत्तिकृदाद्यनादरादुपेक्षणीयं । अनाहिताग्नेस्तु गृह्याग्निमत आह कारिकाकारः।अथ यस्य ॥७८॥
वधूर्गौर्वा जययेच्चेद्यमौ ततः । स मरुद्भ्यश्चरुं कुर्यात्पूर्णाहुतिमथापि वेति । गृह्याग्निनाऽपि शून्यो बह्वृचस्तु कात्यायनोक्तप्रायश्चित्तं कुर्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्। स्वगृह्योक्ताऽभावे परगृह्योक्तस्य लौकिकाग्नौ संभवात्। तच्च तदीयगृह्ये पठितं। अथातोयमलजनने०। विकृतिप्रसवो यमलोत्पत्तिः। अद्भिः पूरितेषु कलशेषु कषायैः प्लक्षादिशाखाभिर्गौरसर्षपैर्मिश्रितं हिरण्यं प्रक्षिप्य दुर्वांकुराणां सर्वौषधीनां च प्रक्षेपः कार्यः। पंचैंद्रा मंत्रा यस्मिन् तत्पंचैंद्रं सूक्तं। एवमन्यत्। इदमापइति ऋक्। अपाघं अपनःशोशुचदघमिति सूक्तं। उत्पातेष्वित्यनंतरं भूकंपोल्कापातकाकसर्पसंगमप्रेक्षणादिष्विति क्वचित्पाठः। आहिताग्न्यधिकारिकमारुतपुरोडाशस्थाने विहितस्य मारुतस्थालीपाकस्य प्रायश्चित्तसमाख्यया तुल्यकार्यस्य पुरोडाशेन सह समुच्चयं वदद्भ्यो नमो मान्येभ्यः॥ ॥ अथ प्रयोगः। मम भार्यायाः यमलजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं इष्टया यक्ष्ये इति श्रौताग्निमतः। गृह्याग्निमतस्तु मारुतस्थालीपाकेन यक्ष्य इति संकल्पः। अकृतप्रकृत्यारंभस्य तत्स्थाने पूर्णाहुतिं होष्यामीति। अग्निशून्यस्तु सग्रहमखं कात्यायनोक्तं प्रायश्चित्तं करिष्ये इति संकल्प्य गणेशपूजनाद्याचार्यवरणांतं कुर्यात्। आचार्यो यदत्रेत्यादिना भूमिशुद्धिं विधाय प्रागादिक्रमेण ऐशान्यंतासु दिक्षु महीद्यौरित्यादिविधिना कलशाष्टकपूरणांतं कृत्वा-हिरण्यरूपइति हिरण्यं कषायादिसहितं कांडात्कांडादिति दूर्वा याओषधीरिति सर्वौषधीश्च प्रक्षिप्य गंधप्रक्षेपादिवरुणपूजांतं कुर्यात्। अथ कलशोदकैराचार्यो दंपत्योरभिषेकं कुर्यात्। आपोहिष्ठेतितिसृणामांबरीषः सिंधुद्वीप आपो गायत्री। कयानइति द्वयोर्वामदेव इंद्रो गायत्री। आनस्तुतइति पंचानां वामदेव इंद्रस्त्रिष्टुप्। मोषुवरुणेति पंचानां वसिष्ठो वरुणो गायत्री। अंत्या जगती। इदमापइत्यस्य सिंधुद्वीप आपोऽनुष्टुप्। अपनःशोशुचदित्यष्टर्चस्य सूक्तस्य कुत्सोग्निर्गायत्री। आभिषेके०। एवमभिषक्तौ दंपती श्वेतैर्वस्त्रचंदनपुष्पैः सौवर्णभूषणैश्चाऽलंकृत्य दर्भेषूपवेशयति। तौ तत्रोदङ्मुखौ तिष्ठतः। तत्समीपे प्राङ्मुख आचार्यः स्थंडिलेऽग्निं प्रतिष्ठाप्यैशान्यां ग्रहपूजाकलशस्थापनांतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वाऽन्वाधानं कुर्यात् । ग्रहोत्कीर्तनांते अपस्तिसृभिः इंद्रं सप्तभिः वरुणं पंचभिः अप एकया अग्निमष्टाभिराज्याहुतिभिः अग्निं सोमं पवमानं पावकं मारुतं मरुतः यमं अंतकं मृत्युं च एकैकया चर्वाहुत्या शेषेणेत्यादि। तूष्णीं षट्त्रिंशद्वारं निर्वापप्रोक्षणे। यथान्वाधानमाज्याहुतिषु त्यागः । अग्नयेस्वाहेत्यवदानसंपदा नवाहुतयः । यथालिंगं त्यजताऽपि अग्न्याद्यात्मना मरुतो ध्येयाः। प्रयाजेषु समिध्वइति त्यागेऽपि समिदाद्यात्मना निरुक्तोक्ताग्निध्यानवत् । ततः स्विष्टकृदादिबलिदानांते पूर्णाहुतिः पूर्णपात्रनिनयनं ग्रहकलशेनाभिषेकः । आचार्याय दक्षिणादानं स्थापितदेवतानां पूजनादि आचार्यहस्ते प्रतिपादनांतं च कृत्वा ब्राह्मणान् भोजयित्वा स्वस्तिभवंतोब्रुवंत्विति वाचयीत । तेच स्वस्तीति वदेयुः। ततस्तेभ्य आशिषो गृहीत्वा कर्मेश्वरार्पणं कुर्यात्" इति यमलजननशांतिप्रयोगः ॥ ॥ अथ त्रिकप्रसवशांतिः। शांतिसर्वस्वे गर्गः। सुतत्रये सुता चेत्स्यात्तत्त्रये वा सुतो यदि। पितृमातृकुलस्याऽपि तदाऽनिष्टं महद्भवेत्॥ (रिष्टमिति पीयूषधारायां पाठः) ज्येष्ठनाशो धने हानिर्दुःखं वा सुमहद्भवेत् । (नाशः अदर्शनं । तच्च दर्शनसामान्याऽभावः । मरणमिति यावत्) तत्र शांतिं प्रकुर्वीत वित्तशाठ्यविवर्जितः ॥ जातस्यैकादशाहे वा द्वादशाहे शुभे दिने। आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरं॥ सह वा ग्रहयज्ञः स्यात्स्वस्य वित्तानुसारतः। ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृताः ॥ पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः। पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया ॥ (पूजयेदिति पृथगुपदेशाद्देवताचतुष्टयपूजांते रुद्रकलशस्थापनादि कार्यमिति भाति) रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः । द्विज एको जपेद्धोमकाले शुचिः समाहितः ॥ आचार्यो जुहुयात्तत्र समिदाज्यतिलांश्चरुं । अष्टोत्तरं सहस्रं वा शतं वा त्रिशतं तु वा॥ (पीयूषधारामयूखयोस्तु त्रिशतमित्यत्र विंशतिमिति पाठः। अत्राऽष्टोत्तरमिति पृथक्पदं । तच्चोत्तरयोरपि विशेषणमिति कौस्तुभकाराशयः) देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरःसरं । ब्रह्मादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रैरिंद्रस्य यतइंद्रभयामहे ॥ ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं तथा । अभिषेकं कुटुंबस्य कृत्वाचार्यं प्रपूजयेत् ॥ हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा ततः । प्रतिमा गुरवे देया उपस्करसमन्विताः ॥ आज्यस्याऽवेक्षणं कृत्वा शांतिपाठं तु कारयेत् । ब्राह्मणान्भोजयेच्छक्त्या दीनाऽनाथांश्च तर्पयेत् ॥ एवं शांतिविधानेन सर्वारिष्टं विलीयते । इति त्रिकप्रसवशांतिः ॥ ॥ अथ प्रयोगः । कर्ता उक्तकाले गोप्रसवं विधाय देशकालौ स्मृत्वा मम सुतत्रयजन्मानंतरं सुताजननसूचितसर्वारिष्टपरिहार० । सग्रहमखां गर्गोक्तां शांतिं करिष्ये इति संकल्प्य (निमित्तांतरे तु सुतात्रयजन्मानंतरं सुतजननेत्यूहः । पूर्वं ग्रहमखः कृतश्चेत्तदुल्लेखवर्जं संकल्पः) गणेशपूजनादिऋत्विग्वरणांतं कुर्यात् । तत आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे महीद्यौरित्यादिविधिना प्राक्संस्थमुदक्संस्थं वा कलशपंचकं संस्थाप्य पूर्णपात्रनिधानांते प्रतिमासु देवता आवाहयेत् । ब्रह्मजज्ञानं वामदेवो ब्रह्मा त्रिष्टुप् । इति ब्रह्माणं । इदंविष्णुर्मेधा० इति विष्णुं । तत्पुरुषाय वामदेवो महेशो गायत्री । महेशावाह० । तत्पुरुषायविद्महे० । इति महेशं । यतइंद्र भर्ग इंद्रो बृहती । इतींद्रं । कद्रुद्राय कण्वो० । इति रुद्रं चावाह्य षोडशोपचारैः सर्वान्संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहाद्युत्कीर्तनांते ब्रह्माणं विष्णुं महेशं इंद्रं रुद्रं चैताः प्रधानदेवताः समिदाज्यतिलचरुभिः प्रत्येकं प्रतिद्रव्यं अष्टोत्तरसहस्रसंख्याहुतिभिः । अष्टोत्तरशत० । अष्टोत्तरत्रिशतसंख्याभिर्वा (यद्वा मयूखस्थपाठानुरोधेन अष्टत्रिशतस्थाने अष्टाविंशतिसंख्या ग्राह्या) शेषेणेत्यादिग्रहादिहोमांते ब्रह्मादिमंत्रैः प्रधानहोमं कुर्यात् । होमकाले च कश्चिदृत्विक् रुद्रसूक्तान्येकादशवारं जप्त्वा शांतिसूक्तानि सर्वाणि जपेत् । कद्रुद्रायेति नवर्चस्य सूक्तस्य कण्वो रुद्रो गायत्र्यंत्याऽनुष्टुप् । इमारुद्रायतवसइत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्रो जगत्यंत्ये त्रिष्टुभौ । आतेपितरिति पंचदशर्चस्य सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप् । इमारुद्राये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति चतुर्ऋचस्य सूक्तस्य वसिष्ठो रुद्रो जगत्यंत्या त्रिष्टुप् । आनोभद्राइति दशर्चस्य सूक्तस्य गोतमो विश्वेदेवा जगती षष्ठी विराट् तिस्रों-
त्यास्त्रिष्टुभः । स्वस्तिनइति पंचानां स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुबंत्ये द्वे अनुष्टुभौ । शंनइंद्राग्नीइति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवा-
स्त्रिष्टुप् । यतइंद्रेति षण्णां भर्ग इंद्रो बृहती । समानां सतोबृहती पंक्तिः । आशुःशिशानइति त्रयोदशर्चस्य सूक्तस्याऽप्रतिरथ इंद्रश्चतुर्थ्या
बृहस्पतिर्द्वादश्या अप्वांत्याया मरुतस्त्रिष्टुबंत्याऽनुष्टुप् । जपे० । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहो-
मादिशेषं समाप्य सकुटुंबं यजमानं स्थापितकलशोदकैः समुद्रज्येष्ठाइत्यादिमंत्रैर्ग्रहादिमंत्रैश्चाभिषिंचेत् । ततो यजमानो विभूतिं धृत्वोत्तरपूजां
विधायाचार्यं संपूज्य तस्मै सहिरण्यां धेनुं ऋत्विग्भ्यश्च यथाशक्ति दक्षिणां दत्वा विसर्जितदेवताप्रतिमाः सोपस्करा आचार्यहस्ते प्रतिपाद्य
पत्न्या सहाज्यावेक्षणं ब्राह्मणाय तद्दानं च कृत्वा शक्त्या विप्रान्संभोज्य भूयसीं दत्वा दीनाऽनाथांश्च संतर्प्य शांतिपाठं ब्राह्मणैः कारयित्वाऽऽ-
शिषो गृहीत्वा कर्मेश्वरार्पणं कुर्यात् । इति त्रिकप्रसवशांतिप्रयोगः ॥ ॥ अथ प्रथमोर्ध्वदंतोत्पत्त्यादिशांतिः । पाद्मे विष्णुधर्मोत्तरे च पुष्करः ।
दंतजन्मनि बालानां लक्षणं तन्निबोध मे । उपरि प्रथमं यस्य जायंते च शिशोर्द्विजाः ॥ दंतैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम । द्वितीये
च तृतीये च चतुर्थे पंचमे तथा ॥ यदा दंताश्च जायंते मासे चैव महद्भयं । मासेचैवेति चकारात्पर्यायेऽपि । द्वितीये पर्याये त्वदोषः ।
नित्ये नैमित्तिकत्वाऽयोगात् । मातरं पितरं वाऽथ खादेदात्मानमेव वा । तत्र शांतिं प्रवक्ष्यामि तां मे निगदतः शृणु ॥ गजपृष्ठगतं बालं
नौस्थं वा स्नापयेद्द्विजः । तदभावे तु धर्मज्ञ कांचने तु वरासने ॥ सर्वौषधैः सर्वगंधैर्बीजैः पुष्पैः फलैस्तथा । पंचगव्येन रत्नैश्च मृत्तिका-
भिश्च भार्गव ॥ स्नापयेदित्यन्वयः । स्थालीपाकेन धातारं पूजयेत्तदनंतरं । सप्ताहं चाऽत्र कर्तव्यं तथा ब्राह्मणभोजनं ॥ अष्टमेऽहनि विप्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णां तथा देयाऽथ दक्षिणा । स्थालीपाकोऽपि सप्ताहं कर्तव्य इति केचित् । कांचनं रजतं गाश्च भुवं वा धनमेव च ॥ दद्यादिति शेषः । अद्भुतसागरे तु सदंतोत्पत्तौ पंचदशीशांतिरुक्ता । अत्र साधारण्येन प्रकारांतरमुक्तं पाद्मे । दंतजन्मनि सामान्ये शृणु स्नानमतःपरं "शां॰सा॰ सामान्ये निषिद्धे" भद्रासने निवेश्यैनं मूर्ध्नि मूलफलैस्तथा ॥ सर्वौषधैः सर्वबीजैः सर्वगंधैस्तथैव च । स्नापयेत्पूजयेच्चाऽत्र वह्निं सोमं समीरणं ॥ पर्वतांश्च तथा ख्यातान्देवदेवं च केशवं । एतेषामेव जुहुयाद् घृतमग्नौ यथाविधि ॥ ब्राह्मणानां च दातव्या यथाशक्त्या च दक्षिणेति । इति प्रथमोर्ध्वदंतोत्पत्त्यादिशांतिः ॥ "वि॰ मा॰ बालस्योर्ध्वदंतोद्गमजन्यविघ्नहरं विधानं। ब्रह्मयामले । प्रथमं दंतनिष्पत्तिरूर्ध्वं बालस्य चेद्भवेत् । क्लेशाय मातुलस्येह तदा प्रोक्ता मनीषिभिः॥ विघ्नभंगे प्रवक्ष्यामि विधानं विधिपूर्वकं । सौवर्णं राजतं वाऽपि ताम्रं कांस्यमयं तथा ॥ दध्योदनेन पूर्णं तु पात्रं दद्याच्छिशोः करे । समंत्रं भाजनं दत्वा संपश्येन्मातुलः शिशुं ॥ सालंकारं सवस्त्रं च शिशुमालिंग्य सादरं । तत्र मंत्रः । रक्ष मां भागिनेय त्वं रक्ष मे सकलं कुलं । गृहीत्वा भाजनं साऽन्नं प्रसन्नो भव मे सदा ॥ निर्विघ्नं कुरु कल्याण निर्विघ्नां च स्वमातरं। त्वमप्यात्मानमातिष्ठ चिरं जीव मया सह ॥ इति भाजनदानमंत्रः । ततोऽभिनंदयेद्विद्वान् भगिनीं भगिनीपतिं । ज्येष्ठान् श्रेष्ठान्गुरून्विप्रान् पवित्रानभिवादयेत् ॥ एवं कृते विधाने च विघ्नः कोऽपि न जायते । ऊर्ध्वदंतोद्भवं पापं सर्वं नश्यति तत्क्षणात् ॥ बालको जननी चैव चिरं जीवति मातुलः । तस्मात्प्रयत्नतो विद्वान् विधानं सम्यगाचरेत् ॥" ॥ अथ प्रयोगः । कर्ता उक्तकाले गोप्रसवं कृत्वा देशकालौ स्मृत्वा ममास्य शिशोः प्रथममूर्ध्वदंतोत्पत्तिसूचितसर्वारिष्टपरिहारद्वारा॰ सग्रहमखां पुष्करोक्तां शांतिं करिष्ये इति संकल्प्य (निमित्तांतरे तु सदंतोत्पत्तीत्यूहः । द्वितीयादिपंचमांतमासेषु दंतोत्पत्तौ च तत्तत्पदस्योहेन संकल्पः) गणेशपूजनाद्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चार्यवरणांतं कुर्यात् । तत आचार्यः प्रादेशकरणाते स्थंडिलस्योत्तरतः गजपृष्ठे नौकाया सुवर्णपीठे वा बालमुपवेश्य सर्वौषधिसर्वगंधैरनिषिद्धतरूणां पुष्पफलबीजैः पंचगव्यपंचरत्नमृत्तिकाभिश्च मिश्रितजलैः स्नापयित्वा स्थंडिलात्पूर्वे महीद्यौरित्यादिविधिना कलशं संस्थाप्य पूर्णपात्रे प्रतिमायां धातारं नाममंत्रेणावाह्य संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिकीर्तनांते धातारं प्रधानदेवं चरुणा । शेषेणेत्यादिप्रणीतास्थापनांते धात्रेत्वाजुष्टंनिर्वपामि । धात्रेत्वाजुष्टंप्रोक्षामीति चतुर्वारं निर्वापप्रोक्षणे कृत्वा चरुश्रपणाद्याज्यभागहोमांते ग्रहादिहोमं कृत्वा अवदानधर्मेण चरुमवदाय धात्रेस्वाहेति सकृदाहुतिं हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकैः पत्नीपुत्रसहितं यजमानं समुद्रज्येष्ठादिमंत्रैरभिषिंचेत् । ततो यजमानो विभूतिं धृत्वा देवतोत्तरपूजां आचार्यादिभ्यो दक्षिणादानं आचार्याय विसर्जितदेवतापीठदानं च कृत्वा सप्ताहं यथाशक्ति ब्राम्हणान्भोजयेत् । अष्टमेऽहनि ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दत्वा कांचनादिदानं च कृत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । अत्र दिनाष्टकं ब्रह्मचर्यादिनियमाचरणं कार्यं । एवं विस्तराऽसंभवे पाद्मोक्ता शांतिः कार्या । तत्र प्रयोगः । देशकालस्मरणांते ममास्य शिशोः प्रथममूर्ध्वदंतोत्पत्तिसूचितसर्वा० पाद्मोक्तविधिना सग्रहमखां शांतिं करिष्ये । इति संकल्प्य (निमित्तांतरे तूहः पूर्ववत्) गणेशपूजादि । आचार्यः प्रादेशांते स्थंडिलोत्तरतः भद्रासने बालमुपवेश्य प्रशस्ततरुमूलफलैः सर्वौषधिसर्वबीजसर्वगंधैश्च मिश्रितोदकैस्तं स्नापयित्वा स्थंडिलात्पूर्वे पीठादौ प्रतिमासु अग्निं सोमं वायुं पर्वतान् केशवं च नाममंत्रेणोदक्संस्थमावाह्य संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहाद्युक्तकीर्तनांते अग्निं सोमं वायुं पर्वतान् केशवं च एकैकयाज्याहुत्या शेषेणेत्यादिग्रहादिहोमांते अग्न्यादिदेवताभ्यो नाममंत्रैरेकैकामाज्याहुतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुत्वा स्विष्टकृदादिपीठदानांतं पूर्ववत्कृत्वा यथाशक्ति ब्राह्मणान्संभोज्य भूयसीं दत्वाशिषो गृहीत्वा कर्मेश्वरायार्पयेत् । इति प्रथमोर्ध्वदंतोत्पत्त्यादिशांतिप्रयोगः ॥ ॥ अथ षष्ठाष्टममासयोर्दंतोत्पत्तिशांतिः । अद्भुतसागरे बृहस्पतिः । बालानामष्टमे मासि षष्ठे मासि तथा पुनः । दंता यस्य च जायंते माता वा म्रियते पिता ॥ बालकः पीड्यते तत्र स्वयमेव न संशयः । दधिक्षौद्रघृताक्तानामश्वत्थसमिधां ततः ॥ हुनेदष्टशतं प्राज्ञः समंत्रेण तु मंत्रवित् । धेनुं च दक्षिणां दद्यात्ततः संपद्यते शुभं ॥ यत्तु ज्योतिर्निबंधे अष्टमादिषुमासेषुदंतोत्थानंशुभावहमित्युक्तं तदतद्गुणसंविज्ञानबहुव्रीहिणा नवमादिपरं । इति षष्ठाष्टममासयोर्दंतोत्पत्तिशांतिः ॥ ॥ अथ प्रयोगः । उक्तकाले गोप्रसवं कृत्वा देशकालस्मरणांते ममास्य शिशोः षष्ठे (अष्टमे वा) मासि दंतोत्पत्तिसूचितसर्वारिष्ट० सग्रहमखां बृहस्पत्युक्तां शांतिं करिष्ये । गणेशपूजादि । आचार्यः प्रादेशांते स्थंडिलात्पूर्वे पीठादौ प्रतिमायां बृहस्पते गृत्स० इति बृहस्पतिमावाह्य संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहाद्युत्कीर्तनांते बृहस्पतिं दधिमधुघृताक्ताश्वत्थसमिद्भिः अष्टोत्तरशतसं० । शेषेणेत्यादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य यजमानमभिषिंचेत् । ततो यजमानः उत्तरपूजां विधायाचार्याय धेनुं ऋत्विग्भ्यश्च दक्षिणां दत्वा पीठदानांते विप्रान्संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । इति षष्ठाष्टममासयोर्दंतोत्पत्तिशांतिप्रयोगः ॥ ॥ अथ प्रसववैकृतशांतिः । विष्णुधर्मोत्तरे मात्स्ये । अकालप्रसवा नार्यः कालातीतप्रजास्तथा । विकृतप्रसवाश्चैव युग्मप्रसवकास्तथा ॥ अमानुषा अमुंडाश्च अजातव्यंजनास्तथा । हीनांगा अधिकांगाश्च जायंते यदि वा स्त्रियः ॥ पशवः पक्षिणश्चैव तथैव च सरीसृपाः । विनाशं तस्य देहस्य कुलस्य च विनिर्दिशेत् ॥ निर्वासयेत्तान्नृपतिः स्वराष्ट्रात्स्त्रियश्च पूज्याश्च ततो द्विजेंद्राः । चिकित्सनैर्ब्राह्मणतर्पणैश्च ततोऽस्य शांतिं समुपैति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पापं ॥ उशना । मानुषी जनयेद्यत्र द्वित्रिशीर्षं तथा पशून् । षण्मासोर्ध्वं भयं तीव्रं जायते नात्र संशयः ॥ वाराहेऽपि । अमानुषान्मानुषी
 च मानुषांश्चाऽप्यमानुषी । प्रसूयते प्रजानीयात्परचक्रागमो भवेत् ॥ नारी खरवृषोष्ट्रांश्च शुनः सूकरगर्दभान् । राक्षसांश्च पिशाचांश्च य-
दाप्येवं प्रसूयते ॥ चतुर्विधं भयं घोरं क्षिप्रमेव प्रवर्तते । भारतमयूरचित्रवृद्धगर्गाः। यत्र गर्भे विपर्यासो मानुषाणां गवामपि । अद्भुतानि प्र
सूयंते तत्र देशस्य विप्लवः ॥ अत्रापि दिव्यजा शांतिः कार्या पंचदशी बुधैः । मानुषाऽमानुषाणां च गोऽजाऽश्वमृगपक्षिणां ॥ जायंते
जातिभेदाश्च सदंता विकृतास्तथा । बहुशीर्षा अशीर्षा वा बहुकर्णा अकर्णकाः ॥ एकशृंगा द्वित्रिशृंगास्तथैव त्रिचतुर्भुजाः । दीर्घकर्णा
महाकर्णा गजकर्णाश्च मानवाः ॥ वानरश्वापदव्याघ्रमार्जारतनुधारिणः । जायंते पुरुषा यत्र तत्र संग्राममादिशेत् ॥ राजश्रेष्ठ कुले नाशो
धनस्य च कुलस्य च । यमला यत्र जायंते नारीणां गजवाजिनां ॥ ब्रह्मशांतिं ततः कुर्याद्यत्र ब्रह्मा प्रशासिता । अष्टोत्तरसहस्राणि चरुं
वै जुहुयाद् घृतं ॥ समिधां तु पलाशीनां तर्पयेत्पूर्ववद्द्विजान् । दासीदाससमायुक्तो गोधान्यफलसंयुतं ॥ कांचनं वृषभं वस्त्रं दद्याद्विप्राय दक्षि-
णां । अशिरा जायते जंतुस्तथा द्वित्रिशिरा अपि ॥ सूर्याद्भुतं विजानीयात्पूजयित्वा दिवाकरं । दध्याज्यमधुसंयुक्ताः समिधस्त्वर्कसंभवाः ॥ यद्वा
जनः प्रसृतिभिर्जुहुयाद् घृतमेव च । धेनुं सुवर्णं वस्त्रं च दद्याद्धोत्रे च दक्षिणां ॥ सर्वे दोषा विनश्यंति ततः संपद्यते शुभं । मृगी जनयते
सर्पान्मंडूकांश्चाऽथ मानुषान् ॥ बृहस्पत्यद्भुतमिदं तद्द्वारे तं प्रपूजयेत् । उदुंबरस्य समिधो दधिसर्पिःसमन्विताः ॥ दोषोपशमनार्थाय जुहुयान्नियमे
स्थितः । वस्त्रं सुवर्णं धेनुं च दद्याद्विप्राय दक्षिणां ॥ स्त्रीगर्भपातो यमलं प्रसूयंतेऽथवा स्त्रियः । सदंताश्चैव जायंते जातमात्रा हसंति च ॥
बुधाद्भुतं विजानीयात्तद्द्वारे तं प्रपूजयेत् । वस्त्रं गां च सुवर्णं च दद्याद्विप्राय दक्षिणां ॥ गर्गः । वडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजाति वि … म्रियेत सा ॥ वियोनिष्वधि … शनं । अन्यत्र वेसरोत्पत्तेर्नृणां … तिमैथुनात् ॥ सर्वे
मूषकमार्जार … । ज्ञेया दुर्भिक्षकर्तारः स … अकालजो मदोद्रेकश्चतुष्पान्मृग … । अन्यजातिभयं
तस्माद्धेनुश्च … थाऽनड्वाननड्वाहं धेनुर्धेनुं … यते धेनुं शुनीं धेनुरथापि वा । … योनिं मानुषी वा
परचक्रागमो … मानुषाणि जल्पंति प्राणिनो … सूयंते परचक्रागमो भवेत् । जंग … वरं जातं स्थावरे
वाऽथ जंगम … र्मासे परचक्रागमो भवेत् ।
कारयेत् । म … शोभनैः पूजा च कार्या
नारदः । कृ … सः कपिलं कृष्णमेव च ।
यवैस्तिलैः … क्षेणां तु प्रदापयेत् ॥ यथा
पेत् ॥ शता … त्रैव मंत्रवित् । श्रीफलस्या
शांतिकं च … क्रमे ॥ सहस्रशीर्षामंत्रेण ज
वत्यान्यद्भुत … वंत्युदुत्यंजातवेदसमिति स … पतयस्वाहा
करणायस्वा … र्वपापशमनायस्वाहेति व्य … गायेत् । (अत्र प्रयोगाः प्रायेण सुगमा लोके
रलप्रचारा …) इति कमलाकरभट्टकृ … तशांतिः ॥ ॥ अथ सुखप्रसवोपायः । मदनरत्ने नारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यणीयटीकायां । करंकीभूतगोमूर्धा सूतिकाभवनोपरि । तत्कालनिहितो नार्याः सुखप्रसवकारकः ॥ अस्थिमात्राऽवशिष्टगोमस्तक इत्यर्थः । उपोदक्यास्तु मूलानि तैलयुक्तानि कारयेत् । योनिप्रलेपो दातव्यः सुखं नारी प्रसूयते ॥ अथ वंशनिंबयोस्त्वक् तुलसीमूलं कपित्थपत्रं च । करवीरबीजमेतत्पिष्ट्वा क्षीरेण माहिषेणैव ॥ समतोलितं सतैलं योनिं लिप्त्वा च तेनाऽपि । मृतगर्भं निःसारयति किमत्र चित्रं सुखप्रसवे ॥ "वि० मा० प्रलेपमंत्रस्तु । हिमवदुत्तरपार्श्वे शबरी नाम यक्षिणी । तस्या नूपुरशब्देन विशल्या भवतु गर्भिणीस्वाहेति । अन्यच्च । प्र संदिने० । इति मंत्रेण पानीयं पाययेदभिमंत्रितं । ध० सिं० प्रसवप्रतिबंधे ऋग्विधाने । प्रसंदिने इत्यृचं विजिह्रीष्वेति सूक्तं वा जपेत् । एताभ्यामभिमंत्रितजलं वा पाययेत् । तेन सुखप्रसवः" इति सुखप्रसवोपायः ॥ ॥ अथाऽधोमुखजननशांतिः । बृहच्छौनकीये । प्रसवेच्च यदा नारी बालकं तु अधोमुखं । वंशारिष्टकरं चैव मातापित्रोर्विशेषतः ॥ बालकं तु परित्यज्य यावच्चूडोपकर्मणी । माता पिता विशेषेण तन्मुखं नावलोकयेत् । तस्यारिष्टविनाशार्थं कुर्याच्छांतिं यथाविधि । जन्माहाद्द्वादशाहे तु प्रयत्नेन च कारयेत् ॥ अथवा जन्मदिवसे शुभे काले शुभे दिने । शांतं दांतं कुटुंबं च शास्त्रज्ञं वेदपारगं ॥ आचार्यं वरयेद्धीमानृत्विजश्चतुरोऽपि च । गृहस्येशानदिग्भागे स्थंडिलं तत्र कारयेत् ॥ तस्मात्तु पूर्वदिग्भागे व्रीहिराशिं च कारयेत् । सौवर्णीं प्रतिमां कुर्यान्मृत्युंजयेन नामतः ॥ कलशोपरि संस्थाप्य वस्त्रयुग्मेन वेष्टयेत् । त्रैयंबकेण मंत्रेण पूजयेच्च यथाविधि ॥ ततोऽग्निस्थापनं कृत्वा ग्रहयज्ञं समारभेत् । कुंभं स्पृष्ट्वा ततो जप्त्वा रुद्रसूक्तानि मंत्रतः ॥ (मंत्रत इति सार्वविभक्तिकस्तसिः । मंत्रैः सहेत्यर्थः । तेच आवोराजानमित्यादयश्चत्वारः । रुद्रसूक्तानिचत्वारिचतुर्मंत्रोत्तराणिचेति ऋतुशांतौ दर्शनात्) अथवा रुद्रजाप्येन एकादशावृत्तिस्तथा । अन्वाधानं ततः कृत्वा चरुनिर्वपणं तथा ॥ समिच्चरुतिलाज्यानां प्रत्येकं जुहुयादथ । अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविंशति वा संख्या यथाशक्ति तु होमयेत् । त्रैयंबकेण मंत्रेण जुहुयाच्च हुताशने ॥ होमांते च बलिं दत्वा पूर्णाहुतिमथाचरेत् । होमशेषं समाप्यैवं बालस्य च परिग्रहः ॥ बालं मूलसमीपे च [तूले च संस्थाप्य] त्यक्त्का माता पराङ्मुखी । गृहीत्वा ब्राह्मणा बालं तं मातुस्तेऽर्पयंति च ॥ बालेऽस्माभिरयं बालो युष्मद्दत्तः प्रगृह्य च । दीर्घायुरपि बालोयं पूर्ववत्कुलवर्धनः ॥ एवं त्यागविधिं कृत्वा ततोभिषेकमारभेत् । समुद्रज्येष्ठादिभिर्मंत्रैः सुरास्त्वादिपुराणतः ॥ ऋत्विग्भ्यश्च ततो दद्याद्यथाशक्ति च दक्षिणां । ब्राह्मणान्भोजयेत्पश्चाद्दशकं तु स्वशक्तितः ॥ एवं च शांतिकं कृत्वा सर्वारिष्टनिवारणं । (अत्रोक्तं बालंमूलेत्यादिसार्धश्लोकद्वयं प्रक्षिप्तमिव दृश्यते । शौनककारिकाग्रंथे मूलशांतिप्रकरणेऽस्योपलंभात् । मूलशब्दस्य निर्ऋतिवाचकत्वेन तत्तार्थोपपत्तिलाभाच्च । अत्र तु तदसंभवात् तूलेचसंस्थाप्येत्येवं पाठभेदः केनचित्प्रयोगकुशलेन कल्पित इति भाति । तादृशपाठस्य प्राचीनपुस्तकेष्वनुपलंभात् । तत्वं तु बृहच्छौनकीयादवगंतव्यं) इत्यधोमुखजननशांतिः ॥

॥ अथ प्रयोगः । जन्मतो द्वादशाहे जन्मनक्षत्रेऽन्यास्मिन् शुभदिने वा कर्ता गोमुखप्रसवं कृत्वा देशकालौ संकीर्त्य अस्य शिशोः अधोमुखजननसूचितसर्वारिष्टपरिहारद्वारा॰ सग्रहमखां बृहच्छौनकोक्तां शांतिं करिष्ये इति संकल्प्य गणेशपूजादि ऋत्विग्वरणांतं कुर्यात् । अत्र ऋत्विजश्चत्वारः । ततो गृहस्यैशानभागे स्थंडिलं कृत्वा आचार्यः प्रादेशांते तत्पूर्वभागे महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयःसमिति व्रीहिराशिं कृत्वा तत्र कलशस्थापनादिपूर्णपात्रनिधानांते सुवर्णप्रतिमायां त्र्यंबकं वसिष्ठो॰ इति रुद्रमावाह्य वस्त्रयुग्मसहितोपचारैः संपूज्याग्निं ग्रहांश्च प्रतिष्ठापयेत् । तत एक ऋत्विक् रुद्रकुंभं स्पृष्ट्वा चत्वारि रुद्रसूक्तानि मंत्रचतुष्टयसहितानि रुद्रं वा जपेत् । रुद्रजपस्त्वेकादशवारं कार्यः । तत आचार्योन्वाधानं कुर्यात् । ग्रहाद्युत्कीर्तनांते रुद्रं प्रधानदेवं समिदाज्यतिलचरुभिः प्रतिद्रव्यं अष्टोत्तरसहस्रसंख्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिराहुतिभिः १०८।१२८ वा । शेषेणेत्यादिप्रणीताप्रणयनांतं ... गे कृत्वा चरुं श्रपयित्वाऽ ... देग्रहादिहोमांते
त्र्यंबकमंत्रेणं ... समिच्चरुतिलाज्यैः प्रधानहोमं कृत्व ... प्रश्चित्तहोमांते बलिदानपूर्णाहु ... न्त्रावहोमादिशेषं
समापयेत् । ... बालं कार्पासराशौ संस्थाप्य पराङ्मुख ... गृहीत्वा स्वाभिमुख्यै मात्रे दद्यु ... ः। बालेऽस्मा-
भिरयं बालो ... प्रगृह्य च । दीर्घायुरपि बालोयं पूर्व ... यजमानं पत्नीशिशुसहितं ... समुद्रज्येष्ठादि-
मंत्रैः सुरास्त्व ... श्चाभिषिंचेत् । ततो यजमानोऽग्निं सं ...
र्जितदेवतापी ... ते प्रतिपाद्य दश ब्राह्मणान् यथाशक्ति ...
॥अ ... प्रथमप्रसवे सिंहादौ गवादिप्रसवे च ...
पौषे तु भाय ... तिः कृत्वा तु शांतिं स्वगृहेऽश्नुते ... प्रवक्ष्यामि शौनकोऽहं द्विजा ... कुयाद्धव-
दात्मनः सुर ... नकुर्वाणोऽथ शांतिं च गृहे दुःखमव ... नं समभ्यर्च्य आत्मनः कुल ... स्तिवाचनपूर्वं तु
ब्राह्मणानर्चये ... वा चतुरः शक्त्या पूजयेद्विधिपूर्वकं ... र्वीत शुद्धदेशे समाहितः । गृ ... भागे व्रीहिराशिं
च कारयेत् । ... जतं ताम्रं कलशं स्थापयेत्ततः । कुं ... वस्त्रयुग्मेन वेष्टयेत् ॥ प्रक्षिप ... पंचत्वक्प्रक्षिपे-
त्तथा । सर्वौष ... दः पुण्यतीर्थेन पूरयेत् ॥ मूर्तिद्वयं ... प्रयत्नतः । सौवर्णौ राजतौ ... लोहमयौ तथा ॥ ॥८४॥
कलशोपरि संस्थाप्य तन्मंत्राभ्यां प्रपूजयेत् । ऋत्विजश्च ततं ... सौरतः॥ अथवा मूलमंत्रेण य ... पयेत् । ततोग्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापनं कृत्वा ग्रहयज्ञं समारभेत् ॥ अन्वाधानं ततः कृत्वा चरुनिर्वपणं तथा । ततो होमं प्रकुर्वीत तिलाज्यचरुभिः सह ॥ कद्रुद्रायेतिमंत्रेण आकृष्णेनेति मंत्रतः । अष्टोत्तरशतं चाऽथ अष्टाविंशतिमेव वा॥ प्रतिद्रव्येण प्रतिमंत्रेण जुहुयादित्यर्थः । कुर्याच्च विधिवद्धोमं गां दद्याच्च पयस्विनीं । (गामिति महिष्यादेरप्युपलक्षणं । तासामपि दानस्य वक्ष्यमाणत्वात्) कलशोदकमादाय ततोऽभिषेकमादरात् ॥ समुद्रज्येष्ठादिभिर्मंत्रैः सुरास्त्वादिपुराणतः । होमांतेदक्षिणां दद्याद्रुद्रसूर्यौ प्रपूज्य च ॥ (इयं दक्षिणा रुद्रसूर्यप्रीत्यर्था । गांदद्यादिति यदुक्तं तत्र विशेषमाह) आचार्यं पूजयित्वा तु यन्निमित्तं कृतो विधिः । तस्य दानं प्रकर्तव्यं विना भार्यां च तत्स्मृतं ॥ सुवर्णस्य प्रदानेन भार्यारिष्टं विनश्यति । ऋत्विग्भ्यश्च ततो दद्याद्यथाशक्त्या च दक्षिणां ॥ ब्राह्मणान्भोजयेत्पश्चाच्छतमष्टोत्तरं तथा । शक्त्या वा भोजयेच्चैकं दक्षिणाभिस्तु तोषयेत् ॥ अनेन विधिना कुर्याच्छांतिकं तु द्विजोत्तमः । तस्यारिष्टं शमं याति स्वगृहे सुखमेधते ॥ अद्भुतसागरे नारदः । भानौ सिंहगते चैव यस्य गौः संप्रसूयते । मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ॥ तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शिवं । प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥ ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः । मधुसर्षपैरिति शांतिसारपाठेऽपि मधुवर्णैः पीतसर्षपैरित्यर्थः । आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥ (वस्तुतस्तु वक्ष्यमाणस्य ब्रह्मदैवतमंत्रेणेत्यस्य विनियोगांतराऽकथनाद्धोमे मंत्राऽनुपदेशेन तदाकांक्षासत्त्वाच्च ब्रह्मदैवतमंत्रेणैव होमो युक्त इति भाति) सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणां । वस्त्रयुग्मं यवांश्चैव सुवर्णं च प्रदापयेत् ॥ ब्रह्मदैवतमंत्रेण ततः शांतिर्भविष्यति । प्रकारांतरं सएवाह। सिंहराशौ गते सूर्ये गोप्रसूतिर्यदा भवेत् ॥ पौषे च महिषी सूते दिवैवाऽश्वतरी तथा । (पौषेचेत्यत्र अतीते इत्यध्याहृत्य पौषेऽतीते माघमासे इत्यर्थ इति व्याख्येयं । नामकरणे दशमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽतीते इतिवत् । उक्तवक्ष्यमाणबहुवचोऽनुरोधात् । यद्वा महिषीपदेन श्रेष्ठस्त्रीवाचिना मानुष्येव ग्राह्या । सूते इत्यनेन च प्रथमः प्रसवः । शौनकीयादिषु तस्यैव दुष्टत्वोक्तेः) । तदाऽनिष्टं भवेत्किंचित्तच्छांत्यै शांतिकं चरेत् ॥ अस्यवामेतिसूक्तेन तद्विष्णोरितिमंत्रतः । जुहुयाच्च तिलाज्येन शतमष्टोत्तरादिकं ॥ (आदिनाऽष्टोत्तरसहस्रं) मृत्युंजयविधानेन जुहुयाच्च तथाऽयुतं । श्रीसूक्तेन ततः स्नायाच्छांतिसूक्तेन वा पुनः ॥ मध्यरात्रे निशीथे वा यदा गौः क्रंदते तदा । ग्रामे वा स्वगृहे वाऽपि शांतिकं पूर्ववद्विशेदिति । एवं श्रावणे वडवाप्रसवो दिने निषिद्धः । तदुक्तं अथर्ववेदिनां गार्ग्यपरिशिष्टे । माघे बुधे च महिषी श्रावणे वडवा दिवा । सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायिकाः ॥ अत्र तदुक्ताऽमृताख्या शांतिः कार्या । गर्गः । दिवा प्रसूता वडवा श्रावणे च विशेषतः । माघमासे बुधे चैव प्रसवेन्महिषी यदि ॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायिकाः । त्यागो विवासो दानं वा कृत्वाऽप्याशु शुभं लभेत् ॥ (माघेबुधेचेत्यत्र चकारोपादानान्माघबुधयोः समुच्चयः । दिवेत्यस्याऽनंतरमपि चकारोऽनुषंजनीयः । माघे निषिद्धा महिषी प्रसूता सिंहे च गावो वडवा दिवा च । पौषे च नारी प्रथमप्रसूता देया द्विजेभ्यः सहदक्षिणास्ता इति निर्णयसिंधौ दर्शनात् । द्योते विशेषः । अत्र माघबुधयोः श्रावणदिनयोश्च विशिष्टयोर्निमित्तता । नच विशिष्टोद्देशे वाक्यभेदात्प्रत्येकं निमित्ततेति वाच्यं । महिषीप्रसवस्योद्देश्यत्वेनाऽन्यतरविवक्षायामपि वाक्यभेदात् । अतः पौरुषेयत्वाद्वाक्यभेदो नेति समाधेयमिति । विधानमालायां तु प्रकारांतरं । माघे बुधे च महिषी० दायिकाः ॥ विधानं तत्र कर्तव्यं स्वामिविघ्नविनाशनं । कृष्णपक्षे मध्यमासु कुर्यात्तिथिषु पंचसु ॥ कालायसे तु महिषे स्थितं हेममयं यमं । कालदंडधरं कृत्वा यमिन्या सहितं नृप ॥ पीठे संस्थापयेद्देवं यमायेति च मंत्रतः । दूर्वातिलाज्यद्रव्यैश्च शतमष्टोत्तरं हुनेत् ॥ मृत्युंजयेन मंत्रेण जुहुयाद् घृतपायसं । [दूर्वासमित्तिलाज्यानि तथैव घृतपाय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सं। हुनेदष्टोत्तरशतं यमायेति पृथक्पृथक्] बलिं दत्वा तु राक्षोघ्नैः सूक्तैः शंनादिभिस्तथा ॥ निर्गुंडीपल्लवैः स्निग्धैरभिषेकं प्रकारयेत् । आचार्याय प्रदातव्या यममूर्तिः सदक्षिणा ॥ सदक्षिणं श्राद्धदेवं यमिन्या सहितं यमं । सोपस्करं गृहाण त्वं मम विघ्नहरो भवेति दानमंत्रः ॥ ततः शिशुं प्रजातं तं प्रदद्यादग्रजन्मने । सदक्षिणं नृपश्रेष्ठ तस्माद्विघ्नो विनश्यति ॥ ततः संतर्पयेद्विप्रान्पायसैर्मोदकैर्घृतैः । अपूपैः शर्करायुक्तैर्दक्षिणाभिर्विशेषतः॥ एवं कृते विधाने तु मृत्युस्तुष्यति पूजितः । निष्प्रत्यूहो भवेन्नूनं यजमानो नराधिपेति । अत्र बहुषु वचनेषूक्तत्वान्माघे महिष्याः श्रावणे वडवायाश्च प्रसवो दुष्टः । पौषे मानुष्याः प्रथम एव प्रसवो दुष्टः। श्रावणेतरमासेष्वपि वडवाप्रसवो दिवा चेद्दुष्टः । सिंधूक्तवचनद्वये निषेधात् । श्रावणांतर्गते दिवसे वडवाप्रसवश्चेद्विशेषतो दुष्टः । माघे महिषीप्रसवोऽपि बुधे चेत्तथा । गर्गोक्तौ गार्ग्यपरिशिष्टोक्तौ च द्वयोरपि मृत्युफलश्रवणात् । माघेतरमासेषु बुधे महिषीप्रसवस्य दुष्टत्वे तु न मानं । सिंहेऽर्के गोप्रसवोऽपि विशेषतो दुष्टः । सर्वत्र मृत्युफलश्रवणात् । अत्राऽयं निर्गलितोऽर्थः । सिंहेऽर्के गोः माघस्थबुधे महिष्याः श्रावणस्थदिनेऽश्विन्याश्च प्रसवो विशेषतो दुष्टः । बुधरहिते माघे महिष्याः श्रावणे रात्रौ तदितरमासे दिवा चाऽश्विन्याः प्रसवः पौषे मानुष्याः प्रथमप्रसवश्चाऽल्पदोषः) इति पौषे स्त्रीप्रथमप्रसवादिशांतिः॥

॥ अथ प्रयोगः । कर्ता दशाहोत्तरं शुभदिने स्नात्वा कुलदेवतामभ्यर्च्य आचमनादिदेशकालस्मरणांते मम पत्न्याः पौषे प्रथमप्रसूतिसूचितसर्वारिष्टपरिहारद्वारा० सग्रहमखां शौनकोक्तां शांतिं करिष्ये इति संकल्प्य (गवादिशांतौ तु सिंहस्थे रवौ गोप्रसूतिसू० । माघे महिषीप्रसूति० । श्रावणे वडवाप्रसूति० इत्यूहः) गणेशपूजनस्वस्तिवाचनादिऋत्विग्वरणांतं कुर्यात् । अत्र ऋत्विजोऽष्टौ चत्वारो वा । तत आचार्यः प्रादेशकरणांते गृहस्यैशानभागे महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयःसमिति व्रीहिराशिं कृत्वा आकलशेष्विति सौवर्णं राजतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताम्रमयं वा कलशं संस्थाप्य इमंमइति तीर्थोदकेनापूर्य गंधादिप्रक्षेपांते रुवतिभीमइति पंचत्वचः याओषधीरिति सर्वौषधीः स्योनेति सप्तमृद्श्च प्रक्षिप्य युवासुवासाइति वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रे सौवर्णौ राजतौ ताम्रमयौ वा रुद्रसूर्यौ कद्रुद्राय कण्वो रुद्रो०। आकृष्णेन हिरण्य०। इतिमंत्राभ्यामावाह्य पूजयेत्। ततः एकऋत्विक् होमसमाप्त्यंतं रुद्रसूक्तान्यपरश्च सौरमंत्रान्जपेत्। एषामृष्यादि वैधृत्यादिशांतौ द्रष्टव्यं। यद्वा तत्तन्मूलमंत्रजपः कार्यः। ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। ग्रहादिकीर्तनांते रुद्रं सूर्यं च प्रधानदेवते तिलाज्यचरुभिः प्रत्येकं प्रतिद्रव्यं अष्टोत्तरशतसंख्याहुतिभिः। २८ वा। शेषेणेत्यादिप्रणीतास्थापनांते तूष्णीं निर्वापप्रोक्षणे कृत्वा आज्यसंस्कारादिग्रहादिहोमांते पूजामंत्राभ्यां तिलाज्यचरुभिः प्रधानहोमं कुर्यात्। ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन सकुटुंबं यजमानं समुद्रज्येष्ठादिमंत्रैः सुरास्त्वामित्यादिभिश्चाभिषिंचेत्। ततो यजमानो विभूतिं धृत्वा रुद्रसूर्यादीनामुत्तरपूजां विधाय तेभ्यो दक्षिणां समर्प्याचार्यं संपूज्य तस्मै यथाशक्ति सुवर्णं दत्वा (गवादिप्रसवे तु प्रसूतां गां महिषीं वडवां वा दत्वा) ऋत्विग्भ्यो दक्षिणामाचार्याय विसर्जितदेवतापीठं च दत्वाऽष्टशतं शक्त्या वा विप्रान्संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत्। अत्र यद्यपि सिंधूक्तवाक्ये नार्या दानं प्रतीयते तथापि शौनकीये तस्य पर्युदासात्तदकृत्वा तत्स्थाने यथाशक्ति सुवर्णमाचार्याय देयं। सिंधौ तस्या उपादानं तु निषिद्धताकथनमात्रार्थमिति बोध्यं। तथाच गवादिप्रसवे शांतिदानयोः समुच्चयाऽशक्तौ सिंधूक्तवचोऽनुरोधेन तासां दानमात्रं कार्यं। गोप्रसूतौ शौनकनारदोक्तयोरन्यतरा शांतिः कार्या। निमित्ते विशेषाऽभावात्। माघस्थबुधे महिष्याः श्रावणस्थदिने वडवायाश्च प्रसूतेस्तु विशेषतो दुष्टत्वात्तासां त्यागं विवासं दानं वा कृत्वा नारदोक्तां शांतिं कुर्यात्। तत्र प्रयोगः। आचमनादिदेशकाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरणांते मम माघांतर्गतबुधे महिषीप्रसवसूचित० सग्रहमखां नारदोक्तां शांतिं० । (श्रावणे दिवा वडवाप्रसव० इत्यन्यत्र संकल्पः) गणेशपूजादिऋत्विग्वरणांतं कुर्यात् । आचार्यवरणमैच्छिकं । ततः प्रादेशांतेऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिकीर्तनांते अस्यवामस्येतिसूक्तमंत्रदेवताः विष्णुं च घृताक्ततिलैः अष्टोत्तरसहस्रसं० । १०८ वा । मृत्युंजयं रुद्रं घृताक्ततिलैः अयुतसंख्या० । शेषेणेत्यादि ग्रहादिहोमांते अस्यवामस्येतिसूक्तमंत्रैस्तद्विष्णोरित्यनेन च १००८।१०८ वा । त्र्यंबकमितिमंत्रेण चाऽयुतं घृताक्ततिलहोमं कृत्वा स्विष्टकृदादिहोमशेषे समाप्ते श्रीसूक्तेन शांतिसूक्तेन च स्नात्वा ग्रहादीनामुत्तरपूजां विधाय ऋत्विग्भ्यो दक्षिणां दत्वा विसर्जितदेवतापीठं सोपस्करमाचार्यस्य तदभावेऽन्यस्य वा हस्ते प्रतिपाद्य विप्रान्संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । अत्र त्यागादेर्होमस्य च समुच्चयाऽशक्तावन्यतरत्कार्यं । गर्गवाक्ये त्यागादीनां वचनांतरे होमस्य चेति वाक्यद्वयेन पृथग्विधानात् । ग्रामे स्वगृहे वा रात्रेर्मध्यभागे निशीथे वा गोः क्रंदने इयमेव शांतिः कार्या । नाऽत्र त्यागादि । अत्यशक्तस्तु गवादिप्रसवे विधानमालोक्तां शांतिं कृत्वा शिशुं दद्यात् । तत्र प्रयोगः । कृष्णपक्षे षष्ठ्यादिपंचतिथिषु शांतिकयोग्यकाले प्राग्वत् संकल्पादि कुर्यात् । आचार्यः प्रादेशांते स्थंडिलात्पूर्वे कुंभे लोहमयमहिषारूढं हैमं यमिन्या सहितं यमं यमायसोममित्यावाह्य संपूज्याऽग्निं ग्रहांश्च प्रतिष्ठाप्याऽन्वादध्यात् । ग्रहादिकीर्तनांते यमिन्या सहितं यमं प्रधानदेवं दूर्वातिलाज्यैः प्रतिद्रव्यं अष्टोत्तरशतसं० । रुद्रं प्रधा० घृताक्तपायसेन अष्टोत्तरशतसं० (यद्वा यमिन्या सहितं यमं दूर्वासमित्तिलाज्यघृताक्तपायसैः प्रतिद्रव्यं १०८) शेषेणेत्यादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुतिपूर्वकं संस्रावहोमादिशेषं समाप्य कलशोदकेन राक्षोघ्नसूक्तैः शंनइंद्राग्नीसूक्तेन ग्रहादिमंत्रैश्च निर्गुंडीपल्लवैर्यजमानमभिषिंचेत् । ततः कर्ता देवतोत्तरपूजां विधाय दक्षिणादानांते विसर्जित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिमादानमाचार्याय कुर्यात् । तत्र मंत्रः । सदक्षिणंश्राद्धदेवंयमिन्यासाहितंयमं । सोपस्करंगृहाणत्वंममविघ्नहरोभव ॥ ततः प्रसूतं शिशुं सदक्षिणं विप्राय दत्वा त्र्यवरान्ब्राह्मणान्पायसादिभिः संभोज्य दक्षिणाभिर्विशेषतः संतोष्य कर्म समापयेत् । इति पौषे स्त्रीप्रथमप्रसवादिशांतिप्रयोगः ॥ अथ बालरक्षा । मदनरत्ने क्रियाकालगुणोत्तरे । प्रथमेऽहनि गृह्णाति बालकं गंधिनी [पापिनी] ग्रही । तया गृहीतमात्रस्य चेष्टितान्युपलक्षयेत् ॥ " शां० सा० ग्रीवायां पृष्ठभागे च ललाटे श्रवणे मुखे । उद्वेजयति गात्राणि आहारं च न गृह्णते ॥ " गात्रोद्वेगो निराहारो लाला ग्रीवानिवर्तनं ॥ लिंपेत धातकीलोध्रमंजिष्ठातालचंदनैः । धूपयेन्महिषाक्षेण ततो मुंचति सा ग्रही ॥ (महिषाक्षो गुग्गुलुः) " शां० म० लेपनधूपने बालस्य । शां० सा० भोगं दद्यात्तु मातॄणां सर्वकालं विचक्षणः । गंधं माल्यं च कृसरं सुरा मांसं यथेच्छया ॥ भोगो बलिः । सर्वकालं संध्यात्रयं । निमित्तानंतरं चेति मदनरत्ने " बलिस्तत्रैव । मत्स्यमांससुराभक्ष्यगंधाऽसृग्धूपदीपकैः । मंत्रस्तु प्रयोगसारे । ॐनमश्चामुंडे भगवति विद्युज्जिह्वे हांहां हींहीं अपसरंतु दुष्टग्रहा हुं तद्यथा गच्छंतु याताऽन्यतः स्थाने रुद्रो ज्ञापयति स्वाहा विद्युजिह्वे हां हीं हूं हूं मुंचमुंचस्वाहा । बालग्रहाणां विधेयं शस्ता बलिनिवेदने । नारायणीयेऽन्यो मंत्रः । कामुंडे यवश्चीकंडिचे ॐभगवति हिहि हुहु रक्षां कुरु कुरु बलिं गृहाण गृहाण फट् ठठेति । बालग्रहेषु सर्वत्र बलिमंत्रस्त्वयं स्मृतः । " शां० म० बलिश्च रवेरुदयेऽस्ते दिनार्धे वा देयः " बलिस्थानानि प्रयोगसारे । कदंबश्च करंजश्च बिभीतो निंब एव च । अश्वत्थोदुंबरौ चैव श्लेष्मातकवटौ तथा ॥ मातृवृक्षाः क्रमेणोक्ताः पूर्वादीशांतदिग्गताः । तेषामेकं समाश्रित्य बलिं दद्याद्यथोदितं ॥ प्रतिस्थूलं [कूलं] प्रत्युदकं प्रतिवृक्षमथापि वा । "शां०म० स्थूलं तटं । शां०सा० स्थूलमुच्चदेशः" अत्राशायामनुक्तायां प्राक्प्रोक्ताशानुसारतः ॥ यत्र वा रोचते तत्र मातॄणां बलिमाहरेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वा नीराजनांतं बलिमिति विधिवद्बालमाहूय तत्र संपृश्याद्भिः समंत्रं शिरसि सकुसुमैरक्षतैर्भ्रामयित्वा । क्षिप्त्वाऽग्रे देवताया विधिवदुपहितैस्तत्र गीतैः सुमंत्रैः कुर्याद्रक्षां समीक्ष्य क्षणमिव विलयं याति दुष्टग्रहार्तिः ॥ नीराजनमंत्रस्तु नारायणीये । ब्रह्मा विष्णुश्च रुद्रश्च स्कंदो वैश्रवणस्तथा । रक्षंतु त्वरितं बालं मुंच मुंच कुमारकं ॥ "शां० म० कालगुणोत्तरे । पलाशाऽश्वत्थकापित्थबिल्वोदुंबरपल्लवाः । पंचभंगाः स्मृता ह्येते बालानां हितकारकाः ॥ स्नापितं धूपितं बालं ततो मुंचति सा ग्रही । प्रयोगसारेऽपि । पलाशोदुंबराश्वत्थबिल्वन्यग्रोधपल्लवाः । क्वथितेन कषायेण परिषिंचेत्प्रशांतये ॥ परिषिंचेत्स्नापयेदिति मदनः । अत्र मंत्रः । ॐ नमश्चामुंडेइत्यादिर्बलिदाने पूर्वमुक्तः । रक्षामंत्रः प्रयोगसारे । रक्ष रक्ष महादेव नीलग्रीव जटाधर । ग्रहैस्तु सहितो रक्ष मुंच मुंच कुमारकं ॥ अमुं मंत्रं भूर्जपत्रे विलिख्य तत्पत्रं भुजे बध्नीयादिति मदनः । बालकशिखास्पर्शपूर्वकं जपे मंत्र उक्तः प्रयोगसारे । ॐ सर्वामातर इमं ग्रहं संहरंतु हुं रोदय रोदय स्फोटय २ स्वाहा २ गर्ज २ सर २ गृह्ण २ आमर्दय २ हिम २ हन २ एवं सिद्धिं रुद्रो ज्ञापयति स्वाहा । अत्र होमोपि प्रयोगसारे । ॐ कूष्मांडि भगवति सुरागिणि सुमुंडिते मुंच मुंच दह २ पच २ सर २ गच्छ २ स्वाहा । कृत्वा चतुष्पथे कुंडं मंत्रेणानेन मंत्रवित् । त्रिरात्रं पंचरात्रं वा सहस्रं जुहुयात्तिलैः ॥ यांति दुष्टग्रहाः शांतिं बलिना चाऽनुमोदिताः । बालरोदनपरिहारार्थं यंत्रमुक्तं प्रयोगसारे । षडस्रमध्ये ह्रींकारं तन्मध्ये शिशोर्नाम विलिख्य षट्सु अस्रेषु ॐलुलुवेस्वाहेतिमंत्रस्य षडक्षराणि विलिख्य तद्बहिर्नेमिवद्वृत्तद्वयं विलिख्य तद्बहिरधोमुखैरर्धचंद्रैरावेष्ट्य पंचोपचारैः संपूज्य बालहस्ते बध्नीयादिति । अथ बालग्रहस्तवः प्रयोगसारे । प्रणम्य शिरसा शांतं गणेशानं तमीश्वरं । बालग्रहस्तवं वक्ष्ये समस्ताभ्युदयप्रदं ॥ तपसा यशसा दीप्त्या वपुषा विक्रमेण च । निर्दिष्टो यः सदा स्कंदः स नो देवः प्रसीदतु ॥ रक्तमाल्यांबरधरो रक्तगंधानुलेपनः । रक्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिव्योज्ज्वलः शांतः स नो देवः प्रसीदतु ॥ यो नंदनः पशुपतेर्मातृणां पावकस्य च। गंगोमाकृत्तिकानां च स नो देवः० ॥ देवसेनापरिवृतो देवसेनाऽर्चितः सदा। देवसेनापतिः श्रीमान् स नो दे० ॥ शक्तः शक्तिधरापूरः कुमारः शिखिवाहनः। सुरारिहा महासेनः स नो दे० ॥ प्रकृत्या सुंदरो दांतो दिव्यैश्वर्यो दयान्वितः। नानाविनोदसंपन्नः स नो दे० ॥ प्रबोधा सुप्रबोधा च बोधना सुप्रबोधना। प्रबुद्धा च प्रबोधा च सुप्रीता सुमनास्तथा ॥ मनोन्मनीति विख्याता योगिन्यः पांतु बालकं। सुव्रता रुक्मिणी चैव मंदवेगा विभीषणा ॥ विद्युज्जिव्हा महानासा शतानंदा तथा परा। बालदा प्रमदा चेति योगिन्यः पांतु बालकं ॥ हरिणी चाथ वाराही वानरी क्रोष्टुकी तथा। कुबेरी कोटराक्षी च कुंभकर्णा च चंडिनी ॥ बलाह्विकारिणी चेति योगिन्यः ०। शुद्धा विशुद्धा श्रद्धा च योगसिद्धा मितंवदा ॥ सुभगा शुभदा गौरी बला विकारिणीति च। नानाविज्ञानविख्याता योगिन्यः० ॥ लंबा प्रलंबा च तथा लंबकर्णा च लंबिका। ज्वाला कराली कालिंदी कालिकेति यथोदिताः ॥ स्वच्छंदाचारसंपन्ना योगिन्यः ०। प्रणीता सुप्रणीता च मालिनी विश्वमालिनी ॥ विमला कमला माली लोला रौद्री च विश्रुता। विचरंत्यो यथाकामं योगिन्यः ० ॥ वायुवेगा महावेगा सुवेगा वेगवाहिनी। शशिनी हंसिनी हृष्टिः पुष्टिः पौष्टिकसिद्धिदा ॥ दिव्यानुभावा वाहिन्यो योगिन्यः० । भ्रमिणी भामिनी नित्या निर्भिन्ना सुभगा गुहा ॥ क्लेदिनी द्राविणी वामा योगिन्यः० । रुद्रशक्तिविनिष्क्रांतमेकाशीतिक्रमोदितं ॥ योगिनीवृंदमेतद्धि सिद्धविद्याधरार्चितं । स्कंदग्रहाधिदेवं तद्बालकं पातु सर्वदा ॥ शकुनी रेवती देवी शिखा च मुखचंडिका । प्रलंबा पूतनाख्या च कटपूतनिका पुनः ॥ विजया गोमुखी धूम्रा मुंडमाला तथा परा । अधोलंबा च पाशा च कुमुदाऽप्यथ चांऽबिका ॥ मानिनी चैककाली च देवी प्रेतमुखी तथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऐंद्री मार्जारिका भूयः कुरंगी च शुभा कृशा ॥ कालरात्रिश्च माया च लौहिता गिलिपिंचिका । भीतारणी चक्रवादा भीषणा दुर्जया परा ॥ तापिनी कटकोली च मुक्तकेशी महाबला । अहंकारी जया तद्वदजमेषा त्रिदंडिका ॥ रोदिनी मुकुटाऽभिख्या ललाटा पिंगला तथा । शीतला वालिनी चैव तापसी पापराक्षसी ॥ मानसी धनदा देवी बलना वर्तिनी तथा । यमुना जातवेदा च मालिनी कलहंसिनी ॥ बालिका देवहूती च वायसी पक्षिणी तथा । स्वच्छंदा पालिका चैव वासिनी चांबिकेति च ॥ पंचाशत्तु कुलोत्पन्नाश्चतुःषष्टिः समीरिताः । योगिन्यो नित्यसंतुष्टाः स्कंदापस्मारदेवताः ॥ नानारक्षाधिकारस्था बालकं पांतु सर्वदा । महालक्ष्मीर्महानंगा महासेना महाबला ॥ महाकंपा महाभीमा महातेजा महोत्सवा । महासेना महाचंडा मोहिनी वीरनायिका ॥ एकवीरा विशालाक्षी सुकेशी सुमनास्तथा ॥ सुकेशिनी च संतुष्टा दांडिनी च विलंबिनी ॥ भामिनी चाऽथ सौवर्णी सिंहवक्त्रा करंकिणी । भ्रमरा चंचला चंपा चंडाला सिद्धिदा परा ॥ शाकोदरी धृतिः स्वाहा स्वधाख्या च सनातनी । शंबरा च तथा देवी नीलग्रीवा तथांऽबिका ॥ वितला गंधिनी वामा क्रीडंती चैव वाहिनी । कर्षणी मालती फुल्ला कालकर्षी च चंडिका ॥ चित्रानना गुहा चेति पार्वती संगतिर्गता । पंचाशत्तत्वसंपन्ना शकुनी दैवतप्रिया ॥ योगिन्यः कामरूपिण्यो बालकं पांतु सर्वदा । विश्वंतपा प्रभावज्ञा सर्वज्ञा सर्वगा गुहा ॥ दुर्गा सरस्वती ज्येष्ठा श्रेष्ठा पद्मा पराऽपरा । प्रमदा रोहिणी शीता प्रह्वा प्रल्हादिनी विभा ॥ विभूतिर्विततिः प्रीतिः प्रकृतिः प्रमतिर्यथा । एता भगवता सृष्टा योगिन्यो योगसिद्धिदाः ॥ पंचविंशतिराख्याता रेवती शक्तिगोचरा । जगदाप्यायनकरी बालकं पातु सर्वदा ॥ नंदश्चैवोपनंदश्च गोमतिः सुमतिस्तथा । विद्युज्जिह्वो महाकालः कराकस्तिमिलोचनः ॥ तेजहोडा विरूपाक्षो गोमुखो वडवामुखः । कालाननः करालश्च शंकुकर्णो विभीषणः ॥ एते सकुंदनोत्पन्ना वीराः षोडशराक्षसाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूतनादेवताजुष्टा बालकं पांतु सर्वदा ॥ वज्रिणी शक्तिनी चाढ्या दंडिनी खड्गिनी तथा । पाशिनी ध्वजिनी देवी गदिनी शूलिनी परा ॥ वज्रिणी चक्रिणी चेति सर्वाकारा भयप्रदा । एता दिङ्निर्मिता देव्यो योगिन्यो देवकीर्तिताः ॥ अधिभूतप्रधाना या पायात्सा शांतपूतना । प्रसन्ना मातरः सर्वा बालकं पांतु सर्वदा ॥ अर्थको जनको भूमा उग्रः स्कंदश्च कीर्तितः । वीरेशाः पितृभिः सृष्टा नैगमेयाधिदेवताः ॥ पंचशक्तिप्रधानास्ता बालकं पांतु सर्वदा । भैरवा वीरभूताश्च क्षेत्रपाला विनायकाः ॥ डाकिन्यो रुद्रशाकिन्यो यक्षरक्षांसि पन्नगाः । वराश्चाऽवांतरा भूता मनुष्याः पशवो मृगाः ॥ सरीसृपाश्च संतुष्टा बालकं पांतु सर्वदा । आदित्या वसवो रुद्राः पितरो मरुतस्तथा ॥ मुनयो मनवः काला ग्रहयोगाः सनातनाः । सिद्धाः साध्याश्च गंधर्वा देव्यश्चाऽप्सरसां वराः ॥ विद्याधरा महादैत्या बालकं पांतु सर्वदा । सहजा योगजा चैव वीरजा मंत्रजा तथा ॥ योगिन्यो योगविनियो नानाविभवगोचराः । भवानी नाम संतुष्टा बालकं पांतु सर्वदा ॥ भूर्लोके च भुवर्लोके स्वर्लोके याश्च मातरः । अधश्चोर्ध्वं च तिर्यक् च क्रीडंत्योऽनंतमूर्तयः ॥ प्रपन्नयोगसंपन्ना दिव्यैश्वर्यसमन्विताः । स्वच्छंदयोगसंभूतैर्भैरवैः परिवारिताः ॥ रक्षंतु बालकं प्रीताः शांतिं यच्छंतु चेतसा ॥ दिव्यं स्तोत्रमिदं पुण्यं बालरक्षाधिकारकं । जपेत्संतानरक्षार्थं बालद्रोहोपशांतिदं॥ इति बालग्रहस्तवः । इदं स्तवांतं कृत्यमाद्यमासवर्षयोर्द्वितीयादिदिनमासवर्षेष्वपि कार्यं । विशेषस्तूच्यते । कौमारतंत्रे । प्रथमे दिवसे० । ” मदनरत्ने कौमारतंत्रे । प्रथमे दिवसे मासे वर्षे वा योगिनी तदा । अथवा नंदिनी नाम्ना पूतनाऽऽक्रमते शिशुं ॥ तद्गृहीतस्य बालस्य ज्वरः स्यात्प्रथमं ततः । गात्रशोषश्च वैवर्ण्यं नाऽऽहारेच्छा भृशं भवेत् ॥ छर्दिर्मूर्छा च कंपश्च ग्रहीज्वरयुतस्तथा । विधानं तत्र वक्ष्यामि येन मुंचति पूतना ॥ नदीमृत्तिकया कुर्याच्छोभनां पुतिकां ततः । शुक्लौदनं शुक्लगंधस्तथा शुक्लानुलेपनं ॥ शुक्लपुष्पाणि वै पंचध्वजाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचप्रदीपकाः । स्वस्तिकाः पंच पूर्वाह्णे पूर्वस्यां दिशि संयतः ॥ बलिं दद्यादथो श्वेतसर्षपोशीरमेव वा । शिवनिर्माल्यमार्जारनृकेशान्निंब-पत्रकं ॥ गव्यं घृतं चेत्येतेन धूपयेच्चैव बालकं । एवं दिनत्रयं कृत्वा चतुर्थे शांतिवारिणा ॥ स्नापयेद्बालकं पश्चाद्भोजयेच्चाऽपि भिक्षुकं । क्षीरेण भोजयेदेवं सुस्थो भवति बालकः ॥ " शां० म० शांतिवारिणेति शंनइंद्राग्नीशंनोवातइत्यादिकैः स्वस्वशाखापठितैर्मंत्रैरभिमंत्रितं वारि शांतिवारि । अथवा वक्ष्यमाणमंत्रेण शतकृत्वोऽभिमंत्रितं वारि शांतिवारि "॥१॥ द्वितीये दिवसे मासे हायने वा सुनंदना । गृह्णाति पूतना बालं योगिनी स्वस्तनापि वा ॥ ततो भवेज्ज्वरः पूर्वं संकोचो हस्तपादयोः । दंतान्प्रखादत्यनिशं निमीलयति चक्षुषी ॥ आहारं च न गृह्णाति दिवारात्रं च रोदिति । अक्षिरोगश्छर्दनं च भवेद्भीतिः पुनःपुनः ॥ कृशत्वं च प्रजायेत इत्येतच्छिशुलक्षणं । तंडुलप्रस्थपिष्टेन विनिर्मायाऽथ पुत्रिकां ॥ (पुत्रिकां पुत्तलिकां) त्रयोदश ध्वजा दीपाः स्वस्तिका यवलौदनः । प्रस्थप्रमाणपिष्टेन सिद्धाऽपूपाश्च मत्स्यकाः ॥ मांसं चेत्येतदखिलं पश्चिमायां दिशि क्षिपेत् । पश्चिमायां च संध्यायामेतद्दद्याद्दिनत्रयं ॥" शां० सा० द्वितीयग्रहगृहीतेऽपि प्रथमदिनादिगृहीतवद्बूपस्नान-ब्राह्मणभोजनादि कार्यमिति मदनरत्ने " ॥ २ ॥ तृतीये दिवसे मासे वर्षे वा पूतनाऽभिधा । गृह्णीयाद्योगिनी बालं ततः पूर्वं ज्वरो भवेत् ॥ प्रस्थप्रमाणपिष्टेन पुत्रिकां कारयेत्तु तां । रक्तौदनं ध्वजो रक्तो रक्तः स्वस्तिक एव च ॥ रक्तपुष्पं रक्तगंधस्तथा रक्तानुलेपनं । पश्चिमायां च संध्यायामुदीच्यां निक्षिपेद्बलिं ॥ ३ ॥ चतुर्थेऽहनि मासे तु वर्षे गृह्णाति बालकं । तुषमंडनिका नाम पूतना वाऽथ योगिनी ॥ भीषणाख्या ततस्तस्या जायते प्रथमं ज्वरः । गात्रभंगोऽस्थितिर्मूर्छा वैवर्ण्यं चाऽक्षिमीलनं ॥ वैकल्यं श्यामता श्वासः कंपोऽ [कासो] रुचिरितींगितं। तिलपिष्टमयैः कृत्वा पुत्रिकां बिल्वकंटकैः ॥ अष्टांगं रचयेत्पुष्पं शुक्लं शुक्लध्वजोऽर्जुनः । स्वस्तिकोऽर्धप्रस्थसिद्धं भक्तं तावदपूपकाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" शां० म० तावदिति अर्धप्रस्थपरिमितेनाऽन्नेन कृता इत्यर्थः " त्रिसंध्यं पश्चिमायां च बलिं दद्यात्प्रयत्नतः । गोश्शृंगं सर्पनिर्मोकं लशुनं निंबपत्रकं ॥ मनुष्यकेशमार्जाररलोमान्याजघृतं तथा । एतैश्च धूपयेदेकनिशि संध्यात्रयेऽपि च ॥ " शां० म० एकनिशि एकस्मिन्नेव दिने बलिरित्यर्थः" ॥ ४ ॥ पंचमे दिवसे मासे वर्षे वा पूतना शिशुं । बिडालिकाख्या गृह्णीयात्प्रथमं जायते ज्वरः ॥ हिक्का श्वासश्च शूलश्च गात्रभंगोऽरुचिस्तथा । तंडुलप्रस्थपिष्टेन निर्मायाऽथ तु पुत्रिकां ॥ शुक्लौदनं ध्वजाः पंच स्वस्तिकाः पंच चोज्ज्वलाः । पंच दीपाश्शुक्लानि कुसुमानि च चंदनं ॥ अपराह्णे वृक्षमूले पश्चिमायां दिशि क्षिपेत् । पंचमादिषु चतुर्थदिनोक्तो धूपोऽपीति मदनरत्ने ॥५॥ षष्ठेऽहनि तथा मासे हायने वाऽपि बालकं । पूतना शकुनिर्नाम गृह्णीयात्तदनंतरं ॥ ज्वर उद्वेजनं गात्रे शोषः श्वासोऽरुचिस्तथा । कासश्च हस्तपादाऽक्षिसंकोचश्चेति लक्षणं ॥ तंडुलप्रस्थपिष्टेन विनिर्मायाऽथ पुत्रिकां । कृष्णौदनं ध्वजाः पंच कृष्णाः स्वस्तिकपंचकं ॥ कृष्णमेवाऽथ मत्स्याश्च पायसं दुग्धमेव च । मांसं चाऽपूपकास्त्वर्धप्रस्थपिष्टविनिर्मिताः ॥ अपराह्णे पश्चिमायां निक्षिपेद्बलिपुत्रिकां । पुत्रिकां पूर्ववत्कृत्वा पललं शूलपाचितं ॥ मत्स्याः पर्पटिकाश्चैव रक्तं च प्रस्थसंमितं । उदीच्यां पूर्वसंध्यायां बलिर्देयः प्रशांतये ॥ " शां० म० बलिदानपूजायां मंत्रस्तु ॐ-फट्स्वाहेति " ॥६॥ सप्तमे दिवसे मासे वर्षे वा शुष्करेवती । गृह्णाति पूतना बालं ततः स्यात्प्रथमं ज्वरः ॥ गात्रभंगोऽथ विद्वेष आहारे कंपरोदने । प्रस्थसंमितपिष्टेन सम्यक् कृत्वाऽथ पुत्रिकां ॥ सप्तध्वजाः सप्तदीपाः स्वस्तिकाः सप्त वै तथा ॥ पुष्पाणि मत्स्यमांसं च भक्तं चेत्युदगाहरेत् ॥ " शां० म० मंत्रस्तु ॐह्रीं फट् स्वाहेति " ॥ ७ ॥ अष्टमे दिवसे मासे वर्षे वाऽऽक्रमते शिशुं । बिडालिकानामधेया पूतनाऽस्य ततो ज्वरः ॥ गात्रभेदोऽतरुदितं रोदनं नेत्रमीलनं । जिह्वाशोषः शिरःस्फोट आहारद्वेष एव च ॥ तंडुलप्रस्थपिष्टेन पुत्तलीं कारयेत्ततः । पायसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधु सर्पिश्च क्षीरलाजाश्च शष्कुलीः ॥ गुग्गुलुं मेषमांसं च तथा पर्पटिका अपि । ध्वजा दीपाश्च चत्वारो गंधा नानाविधा अपि ॥ सुमनांसि च रक्तानीत्येवमत्रोदितो बलिः । अमुं समाहरेत्पूर्वं संध्यायां दक्षिणादिशि ॥ कृष्णाष्टम्यां वक्ष्यमाणमंत्रेणाऽनेन संयतः । " शां० म० ॐ-नमोनारायणाय त्रैलोक्यविद्रावणाय ॐ-ह्रींफट्स्वाहा । अनेनैव च मंत्रेण पूजादिबलिहरणांतं कर्मकुर्यात् । धूपस्तु गोशृंगमित्यादिः । अत्र कृष्णाष्टम्यां बलिहरणमिति न नियमार्थं । किंतु सति संभवे प्राशस्त्यार्थं । अन्यथा तत्प्रतीक्षायां शिशुविनाशापत्तेः " ॥ ८ ॥ नवमे दिवसे वर्षे हायने वाऽपि बालकं । गृह्णाति मदनानाम्नी पूतना तदनंतरं ॥ ज्वरश्छर्दिर्घृणाऽऽध्मानं कासः श्वासः सतृष्णता । गात्रभंगश्च शूलं च चिह्नान्येतानि बालके ॥ प्रस्थमात्रेण पिष्टेन विनिर्मायाऽत्र पुत्तिकां । ओदनं मत्स्यमांसं च पर्पटी चेक्षुमूलकं ॥ निक्षिपेत्पूर्वसंध्यायामुत्तरस्यां बलिं दिशि । तत्र मंत्रः । ॐ नमोभगवते वासुदेवाय हुंफट्स्वाहा ॥ ९ ॥ दशमे दिवसे मासे हायने वाऽथ बालकं । पूतना रेवतीनाम्नी गृह्णीयाद्बालकं ततः ॥ ज्वरश्छर्दिः श्वासकासौ शूलं चेत्येतदीरितं । प्रस्थप्रमाणपिष्टेन पुत्रिकां तत्र कल्पयेत् ॥ अष्टांगं लेखयेत्तत्र बिल्ववृक्षस्य कंटकैः । गुडौदनं च सर्पिश्च ध्वजानां पंचविंशतिः ॥ स्वस्तिकानां प्रदीपानां पंचविंशतिरेव च । चत्वारि रक्तपुष्पाणीत्येतद्दक्षिणदिग्गतः ॥ संध्यात्रये वक्ष्यमाणमंत्रेणाऽनेन निक्षिपेत् । ॐ नमोभगवते वासुदेवाय हन हुंफट्स्वाहा ॥ १० ॥ एकादशे दिने मासे हायने पूतनाऽर्चिका । गृह्णाति बालकं पश्चाज्ज्वरस्तस्य प्रजायते ॥ अन्नद्वेषो मुखे शोषो गात्रभंगश्च रोदनं । ऊर्ध्वदृष्टिरपीत्येतल्लक्षणं तद्ग्रहाच्छिशोः ॥ पुत्रिका माषपिष्टेन रचिता शुक्लमोदनं । पुष्पाण्यपि च शुक्लानि ध्वजानां पंचविंशतिः ॥ स्वस्तिकानां प्रदीपानां पंचविंशतिरेव च । एतत्सर्वं यमाशायां संध्यायां प्रातराहरेत् । मंत्रस्तु । ॐ नमोभगवते वज्रहस्ताय ॐफट्स्वाहा । " शां० म० ॐनमोभगवते ताराय चंद्रहासवज्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्ताय ज्वलद्दुष्टग्रहाय ॐफट्स्वाहा "॥ ११ ॥ द्वादशे दिवसे मासे वर्षे वा पूतना शिशुं । अद्भुताख्या प्रगृह्णाति ज्वरः स्यात्प्रथमं ततः ॥ रोदनं सर्वदा दंतखादनं रक्तनेत्रता । रोमांचस्ताप इत्येतदखिलं तस्य लक्षणं ॥ तंडुलप्रस्थपिष्टेन कृत्वा तत्राऽथ पुत्रिकां । त्रयोदशस्वस्तिकाश्च ध्वजा दीपास्त्रयोदश ॥ अपूपा मत्स्यमांसं च तथा पर्पटिका अपि । एतत्सर्वं दक्षिणस्यां दिशि मंत्रेण निक्षिपेत् ॥ ॐनमोनारायणाय हन दुष्टसत्वानां फट्स्वाहा । " शां० म० ॐनमोनारायणाय प्रज्वलद्वज्रहस्ताय हरहर शोषय २ मर्दय २ पातय २ हन २ दुष्टसत्वानां फट्स्वाहा " ॥ १२ ॥ मदनरत्ने प्रयोगसारे । वर्षे त्रयोदशे बालं ग्रही गृह्णाति यक्षिणी । तच्चेष्टा किल त्वच्छूलज्वररोदनहासनं ॥ शाल्योदनसुरामांसमत्स्यकुल्माषपायसैः । दद्यात्सकृसरं प्रोक्तैर्मध्याह्ने त्रिदिनं बलिं ॥ पिबेच्चाऽभ्यंजयेत्सर्पिस्ततो मुंचति सा ग्रही ॥ १३ ॥ वर्षे चतुर्दशे बालं स्वच्छंदा नामतो ग्रही ॥ गृह्णाति चेष्टा तत्र स्याच्छोणितस्रवणं तथा ॥ १४॥ शूलं च नाभिदेशे स्यात्तत्र नास्ति प्रतिक्रिया ॥ वैद्यवंशकेतुना तु अत्र पूर्वोक्तमेव विधानमित्युक्तं । वर्षे पंचदशे बालं ग्रही गृह्णति वारुणी । तत्रेदं चेष्टितं विद्याज्ज्वरो निद्रा विहस्तता ॥ (विहस्तता व्याकुलत्वं) कुल्माषकृसरापूपपोलिकापायसाऽऽसवैः । सपूगकैर्बलिं दद्यात्त्रिरात्रं चापि धूपयेत् ॥ चंदनेनाज्यसंयुक्तं ततो मुंचति सा ग्रही ॥ १५ ॥ षोडशे वत्सरे बालं ग्रही गृह्णाति दुर्जया । तच्चेष्टा हसनं कोपो यास्यामीति वचो मुहुः ॥ कुल्माषकृसरापूपतिलपिष्टान्नफल्गुकैः । दध्ना सह बलिं दद्यात्प्राच्यां दिशि दिनत्रयं ॥ १६ ॥ वर्षे सप्तदशे बालं ग्रही गृह्णाति बालकी । कासश्वासौ च विज्ञेयौ तत्र नास्ति प्रतिक्रिया ॥ संवत्सरग्रहा ह्येते कुमारपदपूर्वकाः । अत्राऽवशिष्टं समानं । इति कमलाकरभट्टकृते शांतिरत्ने मदनरत्नोक्ता बालग्रहशांतयः ॥ अथ पूतनाविधानं । तत्र लुब्धजातके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कांदे सूर्यप्रति स्कंदवाक्यं । येन कर्मविपाकेन शिशूनां जायते गदः [ग्रहः] । तत्सर्वं कथयिष्यामि पृच्छतस्ते दिवाकर ॥ लंकायां
रावणो नाम पौलस्त्यो राक्षसेश्वरः । स्वसारस्तस्य वीरस्य द्वादशाऽऽसन्महाभयाः ॥ ताभिः कृतं तपो घोरं सर्वलोकभयप्रदं । पीडितं ता-
भिरखिलं जगत्तीव्रतपोबलात् ॥ रुद्र आराधितस्ताभिस्तपसा तीव्रतेजसा । प्रसन्नोऽभूत्तदा देवस्ताभ्य एवं वरं ददौ ॥ रुद्र उवाच ।
वरदोऽहं वरार्हाभ्यो युष्मभ्यं रजनीचराः । ताभिर्वृतं तदा भक्ष्यं बालानां देहसंभवं ॥ वसाऽसृङ्मांसमेदोऽस्थिमज्जाशुक्रात्मकं रवे । देहि देवेश
सर्वं भो जीवतामेव शंकर॥तच्छ्रुत्वा वचनं तासां चुकोप परमेश्वरः । ब्रह्मवंशसमुद्भूतास्तपोवृत्तिपरायणाः ॥ तत्कथं बालघाताय चेतो वः
परिवर्तते । सर्वलोकमतं देयं प्रार्थितं तु मनीषिभिः ॥ राक्षस्य ऊचुः । यदि प्रसन्नो भगवान् ददात्वस्मत्प्रियं शिवः । सर्वेषामेव बालानां
मेदसा तृप्तिरेव नः ॥ रुद्र उवाच । या स्त्री निशामुखे स्नाति बालं स्पृशति भुंजती । प्रसूतिसमयेऽभ्यंगं न करोति प्रमादतः ॥ नग्ना
निद्राति रात्रौ वा निष्पन्नसुरता सती । तस्या बालं दिने मासे वर्षेऽपि च विशेषतः ॥ आद्ये तु दिवसे मासे वर्षे वाऽपि विमोचनी । गृह्णातु
मत्प्रसादेन ज्वराद्यैर्वेदनोच्चयैः ॥ द्वितीये मोहिनी नाम सुनंदा तु तृतीयके । चतुर्थे पूतना नाम पंचमे ह्यासुरी तथा ॥ षष्ठे तु रेवती देवी
बालं गृह्णातु सत्वरं । सप्तमे शकुनी नाम त्वष्टमे च पिशाचिका ॥ नवमे पाशिनी देवी शिशुं गृह्णातु सत्वरं । महामारी तु दशमे कालि-
का तु ततःपरं ॥ द्वादशे भामिनी देवी पीडाकरणतत्परा । यूयमेवं कुरुध्वं भोः पीडां बालकविग्रहे ॥ आत्मनो दिवसे मासे वर्षे चाऽपि
पृथक्पृथक् । निमित्ते सति राक्षस्यः शुचौ च न कदाचन ॥ युष्मभ्यं बलिदानं ये विदधत्यखिलं परं । गृहीतमपि बालं तं संतुष्टाः परिमुं-
चत ॥ इति लब्धवराः सर्वाः पीडयंति शिशून्हि ताः । दिनमासाऽब्दमानेन नात्र कार्या विचारणा ॥ प्रथमे दिवसे मासे वर्षे देवी विमो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनी । तस्यास्तु जायते पीडा शिशूनां तीव्रवेदना ॥ ज्वरस्तु प्रथमं तावन्नेत्ररोगस्ततः परं । न गृह्णाति स्तनं डिंभो वांतिरात्यंतिकी भवेत् ॥ (डिंभो बालः) मुष्टीर्बध्नाति वेगेन दंतान्दंतैर्दशत्यलं । इत्थं प्रजायते पीडा विमोचिन्या दिवाकर ॥ तस्याः पूजां प्रवक्ष्यामि बालानां शांतिकारिणीं । करवीरं रक्तपुष्पं चंदनं रक्तपूर्वकं ॥ धूपस्तु शिवनिर्माल्यं साज्यं विल्वदलं स्मृतं । दीपास्तु पंच विज्ञेयास्तथा पंचैव पोलिकाः ॥ मुष्टिकाः पंच विज्ञेया ध्वजाः पंच सुपीतकाः । तांबूलवीटिकाः पंच पूगीफलसमन्विताः ॥ रक्ततंडुलभक्तश्च प्रोक्तः साज्यगुडस्तथा । शरावे नूतने प्राज्ञ निधेयं सर्वमेव तत् ॥ ततस्तु पुत्तलीं कुर्यान्नद्या उभयतोमृदा । निदध्यात्तत्र वै धीमान् पीतवस्त्रसमावृतां ॥ पीतसूत्रोपवीतां तां पूजयेद्भक्तिमान्नरः । पूर्वोक्तैरेव संभारैर्गंधधूपादिभिर्बुधः ॥ वक्ष्यमाणेन मंत्रेण प्रार्थयेत्तां समाहितः । तत्र मंत्रः । ॐ नमो भक्तवत्सले विमोचनि स्वाहा । एवं मंत्रं समुच्चार्य सर्वां पूजां प्रकल्पयेत् ॥ एक एव यदा नेता भवति तदा पुत्तलीं शरावे आदौ निधाय तस्याः पुरतः सर्वं निक्षिप्य तत्रैव गंधादितांबूलांतोपचारान्निधाय पंचपल्लवानेकीकृत्य बालकांगेभ्यः समुत्तार्य सोदकान् ततः पुनर्नीराजनं विधाय तत्सर्वं सकंबलः सशस्त्रो मंत्रमुच्चारयन्नयेत् । ते च पल्लवाः । जंब्वाम्रोदुंबराश्वत्थवटानां पल्लवास्तथा । सर्वांगेभ्यः समुत्तार्य पीडा बालस्य संव्रजेत् ॥ इदं नद्यां चतुष्पथे वा क्षिपेदिति शिष्टाः । इत्थं रात्रित्रये कुर्याद्विधानं सुसमाहितः । ग्रामादुत्तरतो नित्यं पूर्वरात्रे विचक्षणः ॥ तस्मिन्स्थाने जपेन्मंत्रं बालानां शांतिहेतवे । एवं प्रशांतिमायाति शिशुपीडा न संशयः ॥ इति प्रथमदिवसमासाब्देषु पीडाशमनविधानं ॥ ॥ स्कंद उवाच । द्वितीये दिवसे मासे वर्षे चैव दिवाकर । मोहिनी नाम देव्यत्र कुरुते पीडनं शिशोः ॥ ज्वरं नेत्ररुजं कासं श्वासं चैव विशेषतः । छर्दनं ग्रह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णीं द्वेषं जनयत्यनिशं शिशोः ॥ तत्र शांतिविधानं च प्रवक्ष्यामि समासतः । मालतीकुसुमैः पूजा चंदनं मलयोद्भवं ॥ कुंकुमं केसरं दि-
व्यं कर्पूरं सुविलेपनं । (केसरं नागकेसरं) देव्या भक्तिसमाचाराद्दशांगं धूपनं तथा ॥ नैवेद्यं पूर्ववद्देयं तथा स्यात्पूर्ववत्क्रिया । पूर्ववत्पुत्तलीं कृत्वा
शरावे संनिवेशयेत् ॥ वक्ष्यमाणेन मंत्रेण कुर्यात्सर्वमतंद्रितः । तत्र मंत्रः । ॐ सर्वेश्वरि सर्वजनप्रियंकरि त्राहि त्राहि जगत्सर्वं ॐ नमोभगव-
तिस्वाहा । इत्यनेनैव मंत्रेण सर्वं कृत्वा विधानकं ॥ रात्रित्रये निधातव्यं पश्चिमे ग्रामतो बहिः । प्रथमे यामिनीयामे कृतं भवति सौख्यदं ॥ इति
द्वितीयदिवसादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । तृतीये दिवसे मासे वर्षे शृणु विधिं रवे । सुनंदा नाम देव्यत्र बालानां भयदा
भवेत् ॥ अवस्थां कुरुते घोरां सुनंदा चैव भामिनी । हृद्रोगं छर्दनं श्वासो ज्वरेण सह जायते ॥ आकुंचयति गात्राणि शिशू रोदित्यहर्निशं ।
इत्थं संजायते पीडा सुनंदाकोपसंभवा ॥ तस्याः शांतिविधानं च प्रवक्ष्यामि समासतः । शतपत्राणि पुष्पाणि चंदनस्यानुलेपनं ॥ हरिद्रा
कुंकुमं नागकेसरं वालकान्वितं । गंधार्थं धूपनं दद्याद्गुग्गुलुं चाऽतिशोभनं ॥ घृताक्तं खदिरांगारैः संप्रताप्य विरोचनं । पूर्ववत्पुत्तलीं कृत्वा
शरावे संनिवेशयेत् ॥ प्रसृतत्रयशालीनामोदनं सर्पिषा युतं । दीपकाः पोलिकाः पंच तावंतो मुष्टिकाः स्मृताः ॥ ध्वजाः पंचैव विज्ञेयाः सहि-
ताः पंचपल्लवैः । वक्ष्यमाणेन मंत्रेण बलिं सर्वं समाहरेत् ॥ तत्र मंत्रः । ॐ नमः सुनंदायै हुं फट् स्वाहा । इत्यनेन प्रकारेण ग्रामात्पूर्वे विनि-
क्षिपेत् । त्रिरात्रं रजनीपूर्वयामे बालोपशांतये ॥ एवं कृते विधाने च व्याधिमात्रं विनश्यति । वर्धते दीपवद्बालः शुक्लपक्षाब्जवत्सुखं ॥ अ-
ब्जश्चंद्रः । इति तृतीयदिनादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । चतुर्थे दिवसे मासे वर्षे चैव विभाकर । पूतना नाम देव्यत्र पीडां
प्रकुरुते शिशोः ॥ संतापो जायते पूर्वमतिसारस्ततःपरं । मुष्टीर्बध्नाति कंपश्च वारंवारं प्रजायते ॥ तस्याः शांतिं प्रवक्ष्यामि पीडाया उष्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीधिते। पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् ॥ वेष्टयेद्रक्तसूत्रेण कुंकुमेनानुलेपयेत् । पूजयेद्रक्तपुष्पैस्तु बर्बरीपत्रसंयुतैः ॥ मत्स्यमांसस्य धूपोऽत्र गव्येनाज्येन संयुतः । त्रयो दीपास्त्रिकोणास्तु साज्यवर्तिसमन्विताः ॥ तिस्रस्तु पोलिका ज्ञेया मुष्टयस्तु त्रयः स्मृताः । ध्वजास्त्रयः समाख्याता नात्र कार्या विचारणा ॥ प्रसृतित्रयमुद्दिष्टं तंडुलानां प्रभाकर। तद्रक्तं सर्पिषा युक्तं शरावे संनिवेशयेत् ॥ रक्तवस्त्रेण संवीतां नमस्कृत्वा तु पुत्तलीं । दध्यक्षतासमारोपंविदध्यात्तु समाहितः ॥ पल्लवैः पंचभिर्बालं सर्वांगेषु प्रमार्जयेत् । मंत्रः । ॐनमः पूतने मातर्बलिं गृह्ण सुशोभनं । बालकं मुंच वेगेन बलिदानेन हर्षिता ॥ इति मंत्रं समुच्चार्य सर्वं बलिमुपाहरेत् । प्रदोषे क्षणनिर्वृत्ते सप्तसप्ते विधिं शृणु ॥ दक्षिणां दिशमाश्रित्य निक्षिपेद् ग्रामतो बहिः । एवं कृते बलौ सम्यग्बालकः सुखमाप्नुयात् ॥ इति चतुर्थदिवसादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । पंचमे दिवसे मासे वर्षे चैव प्रभाकर । आसुरी नाम देव्यत्र बालकं बाधते भृशं ॥ तत्र चिह्नं प्रवक्ष्यामि बालांगे यत्प्रजायते । ज्वरस्तु प्रथमं पश्चाद्धृद्रोगो ग्रहणी ततः ॥ मुष्टिबंधः प्रलापः स्यादुद्वेगोऽनशनं तथा । शिरोरुग्जायतेऽत्यंतमेतत्तल्लक्षणं रवे ॥ पूर्ववत्पुत्तलीं कृत्वा पीतसूत्रेण वेष्टयेत् । पीतवासो वसानां तां शरावे संनिवेशयेत् ॥ घृताभ्यंगो विधेयोऽत्र हरिद्रालेपने कृते । ततः पूजां प्रकुर्वीत कुसुमैः करवीरजैः ॥ जपापुष्पैर्बंधुजीवैः पुत्तल्याश्च तथाऽनघ। चंदनेनानुलिप्तां तां दिव्यगंधोपशोभितां ॥ राजसर्षपधूपो वै घृताक्तोऽत्र प्रशस्यते । दीपकाः सप्त विज्ञेया ध्वजास्तावंत एव च ॥ मुष्टिकाः पोलिकाः सप्त सप्त सौहालिकास्तथा । नैवेद्यार्थं समुद्दिष्टमोदनं सघृतं बलिः ॥ पल्लवैस्तु यथापूर्वं कारयेन्मार्जनं शिशोः । मंत्रमेतं समुच्चार्य त्रिवारं प्रतिपूजने ॥ मंत्रः । सुकले सुभगे देवि सर्वशत्रुनिवारिणि । कुरु शांतिं शिशोश्चास्य बलिदानेन राक्षसि ॥ इत्युच्चार्य क्षिपेत्पूर्वं मध्यरात्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिवासरं । पश्चिमां दिशमाश्रित्य ग्रामाद्धन्वंतरं रवे ॥ इति पंचमदिवसादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । अथ षष्ठे दिने मासे वर्षे चापि दिवाकर । रेवती नाम देव्यत्र शिशुं गृह्णात्यसंशयं॥ आदौ तु जायते पीडा व्रणानां शिशुमूर्धनि । ज्वरस्तु मुखशोषोऽपि तृषा समभिजायते ॥ प्रकंपंतेच गात्राणि रुदंति च पुनः पुनः । तत्रः शांतिं प्रवक्ष्यामि शृणु सूर्य समाहितः ॥ पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् । गंगातोयेन संस्नाप्य शुक्लसूत्रेण वेष्टितां ॥ शुक्लवस्त्रेण संवीतां शुक्लमाल्यानुलेपनां । शुक्लधूपोऽत्र निर्दिष्टो बिल्वपत्रैः सहाऽनघ ॥ आज्येनाक्तास्तु विश्वात्मन् दीपाः पंच प्रकीर्तिताः । तावंतो मुष्टिका ज्ञेयाः पोलिकाभिः समन्विताः ॥ प्रसृतित्रयमात्राणां व्रीहीणामोदनं स्मृतं । दध्ना सह गुडेनाक्तं बलिं कुर्यात्प्रयत्नतः ॥ ध्वजैश्च पंचभिर्युक्तं बलिमेतं समर्पयेत् । वक्ष्यमाणेन मंत्रेण प्रक्षिपेच्च समाहितः ॥ मंत्रस्तु । राक्षसि त्वं महाभागे वालं मुंच शुभानने । क्षेमं कुरु जगत्यस्मिन् शोभना भव रेवति ॥ इतिमंत्रेण संमंत्र्य प्रदोषे बलिमाहरेत् । संस्नाप्य बालकं पंचपल्लवैः सुसमाहितः ॥ नगरादुत्तरे देशे रेवत्यै बलिमाहरेत् । एवं प्रशांतिमायांति वालपीडाः प्रभाकर ॥ इति षष्ठदिनादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । सप्तमे दिवसे मासे वर्षे चैव दिवाकर । शकुनिर्नाम देव्यत्र बालं गृह्णाति दारुणा ॥ ज्वरस्तु प्रथमं तावच्छिरोरोगस्ततःपरः । प्रलापस्त्वतिसारश्च वांतिरात्यंतिकी भवेत् ॥ अक्ष्णोर्निमीलनं चापि गात्रकंपोऽभिजायते । तत्र शांतिं प्रवक्ष्यामि शकुनिप्रीतिवर्धनीं ॥ रक्तचंदनलिप्तांगीं पूर्ववत्पुत्तलीं कृतां । यथाकालोद्भवैः पुष्पैः पूजयेद्यत्नतः सुधीः ॥ धूपस्तु गुग्गुलुः श्रेयान्दीपाः पंच प्रकीर्तिताः । पोलिका मुष्टिकाः पंच ध्वजाः पंच सुशोभनाः ॥ नैवेद्यमोदनं सर्पिःसहितं प्रसृतेर्मतं । तंडुलानां सुरश्रेष्ठ मंत्रपूतं प्रकल्पयेत् ॥ मंत्रः। ॐनमः पद्मपत्राक्षि विशालवदने शिवे । संगृह्य बलिमेतं त्वं बालं मुंच सुशोभने ॥ इत्युच्चार्य ततो धीमान् बलिं निशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहरेत् । दक्षिणां दिशमाश्रित्य विदध्यात्पल्लवक्रियां ॥ एवं कृते विधाने तु त्रिरात्रं सुरसत्तम। व्याधिमुक्तो भवेद्बालो नात्र कार्या विचारणा ॥ इति सप्तमदिनादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । अष्टमे दिवसे मासे वर्षे देवी पिशाचिका । पीडयत्येव बालानि ज्वरच्छर्दिशिरोर्तिभिः ॥ नेत्रपीडांऽगसंकोचो त्वद्रोगश्चाभिजायते । शृणु तस्य प्रतीकारं येन तुष्येत्पिशाचिका ॥ प्रकुर्याच्च त्रिरात्रेण शांतिं बालार्तिहारिणीं । पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् ॥ पंचामृतैस्तु संस्नाप्य देवीं तां शिशुना सह । चंदनेनानुलिप्तांगीं श्वेतपुष्पैः प्रपूजयेत् ॥ ध्वजाः सप्त समाख्यातास्तावत्यः पोलिकाः स्मृताः । मुष्टिकाश्चापि विज्ञेया हरिद्राक्ताः शुभाः स्मृताः ॥ पीतवर्णेन वस्त्रेण सूत्रेणाऽपि सुसंस्कृताः । विजयाचूर्णधूपोऽत्र घृताक्तः संप्रकीर्तितः ॥ दीपाः सप्त घृतेनैव पूरयित्वा नियोजयेत् । प्रसृतित्रयभक्तस्य घृताक्तस्य विशेषतः ॥ नैवेद्यं कल्पयेद्धीमान्देव्यै भक्त्या न संशयः । तांबूलं च सकर्पूरं भक्त्याऽभ्याशे निधीयते ॥(अभ्याशे समीपे) शक्त्या च दक्षिणा तत्र देवताप्रीतये रवे । वक्ष्यमाणेन मंत्रेण सर्वमेव विधीयते ॥ मंत्रः । ॐनमः सर्वभूतेशि शोभने त्वं पिशाचिके । बलिं चैतमुरीकृत्य त्वरितं मुंच बालकं ॥ यथा पूर्वं तथा कार्या पंचपल्लववत्क्रिया । त्रिरात्रं रजनीवक्रे पूर्वे ग्रामाद्बहिः क्षिपेत् ॥ एवं कृते विधाने तु रोगशांतिः प्रजायते । इत्यष्टमदिवसादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । नवमे दिवसे मासे वर्षे चैव प्रभाकर । देवता पाशिनी नाम बालार्तिं कुरुते भृशं ॥ तत्र चिह्नं प्रवक्ष्यामि समासेन दिवाकर । ज्वरश्छर्दिर्गले पीडा संकोचो नेत्रयोस्तथा ॥ तर्जनीमध्ययोर्योगमग्राभ्यां कुरुते भृशं । अन्नत्यागेन संतोषो मुखे गंधोऽभिजायते ॥ तत्र शांतिं प्रवक्ष्यामि पाशिनीप्रीतये रवे । पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् ॥ शुक्लसूत्रेण संवीतां शुक्लवस्त्रेण वेष्टितां । पूजयेच्छुक्लपुष्पैस्तु मंदाराद्यैः सुगंधिभिः ॥ गंधार्थे घनसारेण युक्तं चंदनमर्पयेत् । दशांगो धूपने धूपस्तत्रो दीपान्प्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पयेत् ॥ नव वा सप्त वाऽपूपान्पोलिका वा नवोत्तमाः । उत्तमा अंगारपक्वा अदग्धा इत्यर्थः । तावंतो मुष्टिका देया ध्वजाश्चैव तथैव च ॥ नवप्रसृतिमानेन तंडुलौदनमुत्तमं । दध्ना क्षीरेण चाभ्युक्ष्य नैवेद्यं परिकल्पयेत् ॥ मध्यरात्रत्रये ग्रामात्पश्चिमे प्रक्षिपेद्बलिं । मंत्रेणाऽनेन पाशिन्यै मंत्रोच्चारणपूर्वकं ॥ मंत्रः । ॐनमः पाशहस्तायै रुद्रदत्तवरे शुभे । गृहाणेमं बलिं दत्तं बालकं मुंच रोगतः ॥ एतावता विधानेन रोगमुक्तो भवेच्छिशुः । पंचानां पल्लवानां तु पूर्ववत्क्रियते क्रिया ॥ इति नवमदिनादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । दशमे दिवसे मासे वर्षे चैव दिवाकर । शक्तिरत्र महामारी राक्षसी घोररूपिणी ॥ मृत्युकल्पं ज्वरं शूलं विदधाति दिवानिशं । विष्टंभं कुरुतेऽत्यर्थं हिक्कां कासमतिक्षयं ॥ तस्य शांतिं प्रवक्ष्यामि बालानां हितकाम्यया । पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् ॥ स्नापयेत्सरितो वार्भिश्चंदनेनानुलेपयेत् । पीतवस्त्रेण संवीतां पुष्पमालोपशोभितां ॥ दशांगं धूपने धूपं महामायै प्रकल्पयेत् । दीपास्तु पंच विज्ञेयास्तावंतः क्षीरषष्टिकाः ॥ मुष्टिकाः पंच वै शस्ता ध्वजाः पंच सुशोभनाः । संस्कृतं सर्पिषा भक्तं तंडुलानां च पुष्कलं ॥ नैवेद्यार्थे न्यसेत्तत्र शरावे सुमनोहरं । तांबूलसहितं भानो दक्षिणासहितं तथा ॥ दक्षिणार्थे नवं वस्त्रं रजतं शक्तितोऽपि वा । पल्लवैः पंचभिर्युक्तं बलिं सर्वं समर्पयेत् ॥ मध्यरात्रादधस्तात्तं बलिं कुर्याद्दिनत्रयं । दक्षिणां दिशमाश्रित्य प्रक्षिपेन्नगराद्बहिः ॥ मंत्रेणानेन मार्तंड वक्ष्यमाणेन ते मया । मंत्रः । ॐ नमो रक्तवर्णाक्षि रक्तपद्मनिभानने । रक्तोष्ठे रक्तदशने महामारि महाभये ॥ महाबले महाकाये महाभयनिवारिके । अनेन बलिदानेन तुष्टा भव सुशोभने ॥ व्याधिना पीडितं बालं रक्ष त्वं परमेश्वरि । इमं मंत्रं समुच्चार्य सर्वं बलिमुपाहरेत् ॥ क्षेमाय बालकानां हि नात्र कार्या विचारणा ॥ इति दशमदिनादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । एकादशे दिने मासे वर्षे चापि दिवाकर । कालिका नाम देव्यत्र तत्पीडा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायते शिशोः ॥ ज्वरस्तु प्रथमं तावद्धृद्रोगस्तदनंतरं । मुखशोषो महाग्लानिस्ततः स्याच्चित्तविभ्रमः ॥ तुदंति सर्वगात्राणि वेपंते च पुनः-पुनः । अवस्था मृत्युकल्पा स्यात्कालिकाकोपसंभवा ॥ तत्र शांतिं प्रवक्ष्यामि बालानां हितकाम्यया । पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् ॥ गंगातोयेन संस्नाप्य चंदनेनानुलेपयेत् । करवीरस्य पुष्पैश्च पूजयेद्बर्बरीदलैः ॥ धूपयेत्पुत्रकेशैश्च सर्पनिर्मोकसर्षपैः । वचालशुनफेनैश्च घृतयुक्तैः ससर्जकैः । दीपैस्तु पंचभिः सूर्य तैस्तु नीराजयेच्च तां ॥ नैवेद्यं पायसं क्षीरषष्टिकास्तिलमोदकाः ॥ अपूपा मुष्टिकाः पोलीः पंच पंच प्रकल्पयेत् । ध्वजाश्च पंच विज्ञेयाः शरावे सर्वमेव तत् ॥ निवेश्य सकलं देव्यै कालिकायै निवेदयेत् । मंत्रेणानेन सप्ताश्च वक्ष्यमाणेन ते मया ॥ मंत्रः । ॐनमो घोररूपायै घोरायै घोरदर्शने । त्राहि सर्वं जगद्धात्रि बालं मुंच बलिप्रिये ॥ एवंविधं विधिं कुर्यात्पूर्ववत्पल्लवक्रियां । एवं कृते विधाने तु रोगमुक्तिर्भवेच्छिशोः ॥ बलिप्रदोषसमये ग्रामाद्दक्षिणतो बहिः । निधेयो मंत्रमुच्चार्य नरेणैव सहेतिना ॥ (सहेतिना सशस्त्रेण) इत्येकादशदिनादिपीडाशमनविधानं ॥ ॥ स्कंद उवाच । द्वादशे दिवसे मासे वर्षे चैव दिवाकर । भामिनी नाम देव्यत्र पीडयत्यनिशं शिशुं ॥ आदौ ज्वरं प्रकुर्याच्च त्वद्द्रोगं तदनंतरं । कासं श्वासमतीसारं प्रलापं जृंभणं तथा ॥ कंपंते सर्वगात्राणि तथा जाड्यं च नेत्रयोः । इत्थं नानाप्रकारैश्च शिशूनां जायते गदः ॥ तत्र शांतिं प्रवक्ष्यामि बालानां हितकारिणीं । पूर्ववत्पुत्तलीं कृत्वा शरावे संनिवेशयेत् ॥ गंधपुष्पाक्षता धूपदीपाश्च विविधा मताः । नैवेद्यं विविधं चात्र भामिन्यै परिकल्पयेत् ॥ वस्त्रं सूत्रं ध्वजांश्छत्रमोदनं पायसान्वितं । अपूपैः पायसैः क्षीरषष्टिकाभिश्च संयुतं ॥ नैवेद्यं कल्पयेद्भक्त्या संध्याकाले निशामुखे। ग्रामादुत्तरतो देशे बलिं दद्यान्न संशयः॥ इत्थं पंचदिनेष्वेव कर्तव्यं रोगमुक्तये । मंत्रेणानेन सप्ताश्च मंत्रयेत्सर्वतो बलिं ॥ बलिं गृहाण बालस्य व्याधीन्संहर संहर । पंचवक्त्रप्रसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देन प्रसन्ना भव भामिनि ॥ एवं कृते विधाने तु बालकः क्षेममाप्नुयात् । इत्थं ते कथितं सूर्य शांतिकृल्लुब्धजातकं ॥ सूर्य उवाच । येन पापेन बालानामज्ञानानां गदो भवेत् । तत्सर्वं पूर्वमेवेत्थमुक्तवानसि षण्मुख ॥ इति द्वादशादिनमासाब्देषु स्कांदोक्तं शिशुपीडाशमनविधानं ॥ मदनरत्ने रावणसूनुकृते कौमारतंत्रे दिनमासवर्षग्रहहराणि । संभेदकूलद्वयमृत्तिकाभ्यां मूर्तिं विधायैककरप्रमाणां । त्रिलोचनां शूलकपालपाणिं जटाधरां रुद्रतनुं दधानां ॥ भुजंगभूषां भसितोज्ज्वलांगीमंगीकृताऽशेषललामलीलां । (संभेदः संगमः । कूलं तीरं) अत्र मूर्तौ समावाह्य रुद्रं सर्वग्रहाधिपं । स्कंदादिपूतनायुक्तं पूजयेच्चंदनादिभिः ॥ विरच्य तंडुलैश्चूर्णैश्चतुरस्रं करद्वयं । तत्र संस्थाप्य पूर्वस्यां तां तदर्चाविधिं चरेत् ॥ तत्तन्मंत्रैर्विचित्रैश्च नानोपकरणादिभिः । ततः सोपस्करां तां तु निक्षिपेच्च चतुष्पथे ॥ कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिंडातकत्वङ्मांसीविषदंशविट्तुषवचाकेशाऽहिनिर्मोककैः । नागेंद्रद्विजाहिंगुश्रृंगमरिचैस्तुल्यैश्च धूपः कृतः स्कंदोन्मादपिशाचराक्षससुराऽऽवेशज्वरघ्नः स्मृतः ॥ रक्षामंत्र उक्तो हरिवंशे । नंदोऽक्रमेनमारोप्य भूरेणुं परिगृह्य च । शिरः प्रदक्षिणं कुर्वन्मंत्रमेनं जजाप सः ॥ विष्णुस्ते पूर्वतः पातु रुद्रो रक्षतु दक्षिणे । ब्रह्मा च पश्चिमे पायाच्चंद्रो रक्षत्वथोत्तरे ॥ उपरिष्टात्तथा सूर्यः पायाच्चाऽधश्च वासुकिः । तिर्यगूर्ध्वमधो वत्सं शिष्टं पातु समीरणः ॥ स्वस्तिं करोतु भगवान्पिनाकी वृषभध्वजः । गावो रक्षंतु सर्वत्र भूमिः पातु सदा शिखां ॥ एवमुच्चार्य नंदस्तु कृष्णं परस्पर्श सर्वतः । एष मंत्रो हि बालानां रक्षायै परिकीर्तित इति । प्रयोगपारिजाते तु । वासुदेवो जगन्नाथः पूतनांतकरो हरिः । रक्षंतु त्वरितं बालं मुंच मुंच कुमारकं ॥ कृष्ण कृष्ण शिशुं रक्ष मधुकैटभमर्दन । प्रातःसंगवमध्याह्नसायाह्नेषु च संध्ययोः ॥ महानिशि सदा रक्ष कंसादीनां निषूदन । यक्षोरगपिशाचांश्च ग्रहान्मातृग्रहानपि ॥ बालग्रहान्विशेषेण छिंधि छिंधि महाभयान् । त्राहि त्राहि हरे नित्यं त्वद्रक्षाभूषितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिशुं ॥ इति भस्माऽभिमंत्र्यैवं भूषयेत्तेन भस्मना । शिरो ललाटाद्यंगेषु रक्षां कुर्याद्यथाविधि ॥ मंत्रसंरक्षणादेव शिशुः संवर्धतेऽन्वहं । इति वालरक्षा ॥ ॥ अथ वालग्रहशांतिप्रयोगः । कर्ता प्रदोषाद्युक्तकाले आचमनादिदेशकालस्मरणांते अस्य शिशोः शरीरे अमुकाख्यपूतनाग्रहग्रहणज-न्यज्वरच्छर्दिकासश्वासमूर्छाग्रहणशूलाहिक्कांऽगसंकोचाऽऽकस्मिकभयप्रकंपाक्षिमीलनगात्रभंगमुखशोषदंतखादनतनुवैवर्ण्यशिरःस्फोटपुलकव्रणो-द्गमत्वद्रोगवैकल्याहारद्वेषदिवारात्रिरोदनाद्यनेकविधव्याधिपीडानां सद्योनिरासेन आरोग्यावाप्तिपूर्वकं क्षेमायुरभिवृद्धिद्वारा श्री० तत्कल्पोक्तवि-धिना शांतिं करिष्ये इति संकल्प्य (अत्राऽमुकपदस्थाने पूतनायाः दिनमासाब्दभेदानुसारेण तत्तन्नाम कीर्तयेत्) गणेशं संपूज्य पुण्याहवाचनं कृत्वा नदीतीरस्थमृदाद्युक्तद्रव्येण पुत्तलिकां विधाय नवे शरावे संस्थाप्य प्राणप्रतिष्ठांते ॐ नमो भक्तवत्सलेविमोचनिस्वाहेति मंत्रेण नाम-मंत्रेण वा षोडशोपचारैः पूजयेत् । तत्र वस्त्रगंधपुष्पधूपदीपनैवेद्यादि तत्तदुक्तं ग्राह्यं । ततस्तस्याः पुरतो भक्तपोलिकामुष्टिकमत्स्यमांससुरा-द्युक्तद्रव्यात्मकं बलिं निधाय तत्रैव तत्तद्वर्णध्वजान्पिष्टदीपांश्च यथोक्तसंख्यया संस्थाप्य देव्यै निवेदयेत् । तत्र साधारणो मंत्रः । ॐ नम-श्चामुंडे भगवतिविद्युज्जिह्वे हांहां हींहीं अपसरंतुदुष्टग्रहा हुं तद्यथागच्छंतु यातान्यतःस्थाने रुद्रोज्ञापयतिस्वाहा विद्युज्जिह्वे हांहीं हूंहूं मुंचमुंच-स्वाहा । यत्र विशेषमंत्र उक्तस्तत्र सोऽपि ग्राह्यः । मंत्रांते अमुकाख्यपूतनायै सांगायै० अमुं सदीपं सर्वोपस्करयुतं बलिं समर्पयामि । भोभोः अ० पूतने इमं बलिं गृहाण ममास्य बालकस्य आयुःकर्त्री० । ततः कश्चिद्वटाम्रोदुंबराश्वत्थजंबूपल्लवानार्द्रान् कुसुमाक्षतानेकीकृत्य बालकां-गेभ्यः समुत्तार्य शरावे निक्षिप्य बालं नीराजयेत् । मंत्रस्तु । ब्रह्मा विष्णुश्च रुद्रश्च स्कंदो वैश्रवणस्तथा । रक्षंतु त्वरितं बालं मुंच मुंच कुमारकमिति । ततस्तत्सर्वमादाय सशस्त्रकंबलः ॐनमो भक्तवत्सले विमोचनिस्वाहेतिमंत्रमुच्चारयन्नप्रमत्तो ग्रामाद्बहिर्गत्वा चतुष्पथनदीतीरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तस्थले निक्षिपेत् । कर्ता च तं द्वारप्रदेशांतमनुव्रजन्सर्षपविकिरणं जलसेकं च कृत्वा भार्यापुत्राभ्यां सह हस्तपादं प्रक्षाल्य गृहं प्रविश्य ब्राह्मणैः शांतिं पाठयेत् । ततः पलाशोदुंबराश्वत्थबिल्ववटपल्लवकषायेण नमश्चामुंडे इत्यादिपूर्वोक्तमंत्रेण बालं संस्नाप्य गंधादिनाऽलंकृत्य धातकीलोध्रमंजिष्ठातालचंदनचूर्णेन तस्यांगान्यनुलिप्य गुग्गुलुधूपेन धूपयेत् । ततो भूर्जपत्रे रक्षरक्षमहादेव नीलग्रीवजटाधर । ग्रहैस्तुसहितोरक्ष मुंचमुंचकुमारकमितिमंत्रं लिखित्वा तत्पत्रं शिशोर्दक्षिणभुजे बत्ध्वा तस्य शिखां स्पृशन्मंत्रं जपेत् । ॐ सर्वामातर इमं ग्रहं संहरंतु हुं रोदय रोदय स्फोटय २ स्वाहा गर्ज २ सर २ गृह्ण २ आमर्दय २ हिम २ हन २ एवंसिद्धिं रुद्रो ज्ञापयतिस्वाहा । ततः सति संभवे चतुष्पथे कुंडं स्थंडिलं वा कृत्वा ॐकूष्मांडि भगवति सुरागिणि सुमुंडिते मुंच २ दह २ पच २ सर २ गच्छ २ स्वाहेतिमंत्रेण सहस्रसंख्यया पूतनायै विधिवत्तिलहोमः कार्यः । ततो बालरोदनपरिहारार्थं भूर्जपत्रादौ षडस्रं तन्मध्ये ह्रींकारं तत्र शिशोर्नाम च लिखित्वा षट्सु कोणेषु क्रमेण आं लु लु वे स्वा हा इति षडक्षराणि तद्बाह्ये नेमिवद्वर्तुलद्वयं तद्बहिरधोमुखानर्धचंद्रांश्च विलिख्य पंचोपचारैः संपूज्य तद्यंत्रं बालहस्ते बध्नीयात् । ततः पूर्वोक्तं बालग्रहस्तवं पठित्वा हरिवंशोक्तेन पारिजातोक्तेन वा रक्षामंत्रेण विभूतिमभिमंत्र्य बालस्यांगे लेपयेत् । ततो ब्राह्मणेभ्यो दक्षिणां दत्वा भोजनं च संकल्प्य तान्प्रणम्याशिषो गृहीत्वा कर्मेश्वरायार्पयेत् । इति बालग्रहशांतिप्रयोगः॥ ॥ अथ ज्वरोत्पत्तौ नक्षत्रशांतयः। तत्र मदनरत्ने हेमाद्रौ च आत्रेय उवाच । अथ नक्षत्रपरिघूनं वक्ष्ये । अश्विनी तितारा । स्त्री । अश्वमुखी । तिर्यङ्मुखी । पीतवर्णा । कांची वृक्षः । कनकपक्षी । लघुः । अश्विनौ देवते । देवगणः । योनिर्वाजी । अक्षरे अकारआकारौ । ऋतुगमनचौलश्राद्धवस्त्राभरणाऽन्नप्राशनभैषज्यबीजवापननालिकेरेक्षुस्थापनाश्वसंग्रहणादि कुर्यात् । पंचाशन्नाडिकांते चतस्रो विषनाड्यः । मकरमासे शून्यं । बुधवारे मृत्युयोगः । अर्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारे आनंदयोगः । केचित्कलहयोगमिच्छंति । भौमवारे सिद्धियोगः । मुद्गान्नभोजनं कृत्वा यात्रां गच्छेत् । आयुधश्रमं कुर्यात् । मध्याह्ने रक्तमेघोत्पत्तिश्चेत्पंचदिनेऽष्टदिने वा वृष्टिः स्यात् । तद्दिने कुजवारे विघ्नो ज्वरोत्पत्तिश्चेद्दशदिनानि पीडा । नीलोत्पलपुष्पैः पूजा । गुग्गुलुर्धूपः । क्षीरलड्डुकं नैवेद्यं । देवस्यत्वेति पूजामंत्रः । क्षीरवृक्षसमित्प्रधानद्रव्यं । गायत्र्याऽष्टशतं हुत्वा दध्योदनबलिं दद्यात् । एकादशदिनादारभ्य पंचविंशतिदिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः ॥ १ ॥ भरणी त्रितारा । त्रिकोणाकृतिः । स्त्री । अधोमुखी । यमो देवता । उग्रा । मनुष्यगणः । गजयोनिः । आमलको वृक्षः । पक्षी कुक्कुटः । अक्षरे इकारईकारौ । श्राद्धं कुर्यात् । मध्याह्ने रक्तमेघोत्पत्तिश्चेत्षोडशदिने वृष्टिः स्यात् । कुजवारे विघ्नं । द्रव्यसंग्रहणं । बृहतीकारवेल्लिकास्थापनं कुर्यात् । चतुर्विंशतिनाड्यंते विषनाड्यः । फाल्गुनमासि शून्यं । बुधसप्तमीभ्यां सह विषयोगः । बुधवारे नाशयोगः । अर्कवारे यमघंटः । अंत्यांशे दिनमृत्युः । कर्कटचापलग्ने कुजांशके धान्यसंग्रहणं । तस्मिँल्लग्ने च कृषिं कुर्यात् । द्रव्यं न दद्यात् । ज्वरोत्पत्तिश्चेन्मृत्युः संदेहो वा । गुडापूपं नैवेद्यं । कृष्णसुरभिपुष्पं । महिषाक्षो धूपः । त्र्यंबकमिति पूजामंत्रः । घृतमधुतिला होमद्रव्यं । पंचदिनांते गायत्र्याऽष्टोत्तरशतं यमाय जुहुयात् । एकविंशतिदिनांते सुखी स्यात् । न शांतिश्चेन्मृत्युः । वृषभवृश्चिककन्यासु भद्रां नवमीं विना सोमांगारकबुधास्तेषामुदयवारेषु च भूमिदर्शनं । संक्रमेऽल्पोऽर्घः ॥ २ ॥ कृत्तिका षट्तारा । क्षुराकृतिः । अधोमुखी । अग्निर्देवता । मिश्रा । राक्षसगणः । पीतवर्णः । अजयोनिः । उदुंबरो वृक्षः । पक्षिणौ क्रौंचकाकौ । अक्षरे उकारऊकारौ । दधि प्राश्य यात्रां गच्छेत् । मुद्गान्नं श्यामं पीतं च दद्यात् । भूषणं दद्यात् । त्रिंशन्नाडिकांते विषनाडिका । कार्तिके मासि शून्यं । बुधवारे मृत्युयोगः । नालिकेरक्रमुकैलालवंगेक्षुस्थापनं कुर्यात् । ज्वरश्चेन्नवदिनानि पीडा । घृतौदनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवेद्यं । यूथिकापुष्पपूजा । सर्पिर्धूपः । पुनंतुमांदेवजनाइति पूजामंत्रः । सावित्र्याऽष्टोत्तरशतं घृतं दध्योदनं च हुत्वा हुतशेषेण बलिं दद्यात् । पंचदिनादारभ्य एकविंशतिदिनांते सुखी स्यात् । संक्रमेऽल्पोऽर्घः ॥ ३ ॥ रोहिणी पंचतारा । त्रिकोणाकृतिः । स्त्री । ऊर्ध्वमुखी । प्रजापतिर्देवता । ध्रुवा । पीतवर्णा । मनुष्यगणः । सर्पयोनिः । जंबूवृक्षः । पक्षिणौ मयूरकुक्कुटौ । अक्षरे ऋकारऋकारौ । ऋतुगमनसीमंतनामकरणाऽन्नप्राशनचौलोपनयनविद्यारंभस्नानविवाहयज्ञवाहनवस्त्राभरणाऽभिषेकदेवतास्थापनसाधुकर्माणि कुर्यात् । चैत्रमासे शून्यं । चत्वारिंशन्नाडयंते विषघटिका । रिक्तापूर्णे विषयोगः । तृतीयया सहोग्रयोगः । गुरुवारे विषयोगः । शुक्रवारे मृत्युयोगः । मंदवारे सिद्धियोगः । स्थिरराश्यंशे विलग्नस्थेऽर्कजे धान्यसंग्रहं कुर्यात् । ज्वरश्चेद्दिनानि त्रीणि नव वा पीडा । क्षीरान्नं नैवेद्यं । कमलपुष्पपूजा । सरलो धूपः । नमोब्रह्मणइति पूजामंत्रः । घृतं सर्वधान्यानि च होमद्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा क्षीरान्नेन प्रजापतये बलिं दद्यात् । त्रिदिनादारभ्य नवदिनांते सुखी स्यात् । संक्रमेऽर्घवृद्धिः ॥४॥ मृगशिरस्त्रितारा । मृगशिरआकृतिः । नपुंसकं । सोमो देवता । मृदुः । देवगणः । योनिः सर्पिणी । खदिरो वृक्षः । मयूरः पक्षी । एकारोऽक्षरं । तिर्यङ्मुखी । मृगमांसभक्षणं कृत्वा यात्रां गच्छेत् । इंद्रचापं चेदष्टदिने वृष्टिः स्यात् । ऋतुगमनसीमंतनामकरणान्नप्राशनवेदोपक्रमयागविद्यारंभकर्णवेधस्नानविवाहबीजवापनाभिषेकवास्तुकर्मगोसंग्रहणानि श्राद्धं च कुर्यात् । चतुर्दशनाडिकांते विषघटिका । कार्तिकमासे शून्यं । गुरुवारे मरणयोगः । मृतिश्च । षष्ठ्या सहोग्रयोगः । रविवारे आनंदयोगः । चंद्रे सिद्धियोगः । चंद्रवारे चंद्रोदये वृषभलग्ने मध्यस्तंभस्थापनं कुर्यात् । घृतादिवृद्धिः स्यात् । अस्मिँल्लग्ने विवाहभूमौ मृत्संग्रहणं कुर्यात् । आत्मसाद्भवति । सस्यस्थापनं च कुर्यात् । ज्वरश्चेत्पंचदिनानि पीडा । पायसं नैवेद्यं । कुमुदोत्पलपुष्पपूजा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशांगो धूपः। नवोनवइति पूजामंत्रः। मुद्गतिलपंचगव्यं होमद्रव्यं। सावित्र्याऽष्टोत्तरशतं हुत्वा मुद्गतिलैश्चंद्राय बलिं दद्यात्। पंचदिनादारभ्य नवदिनांते सुखी स्यात्। संक्रमे मध्यमोऽर्घः॥ ५॥ आर्द्रा एकतारा। स्त्री। रुद्रो देवता। तीक्ष्णा। पीतवर्णा। ऊर्ध्वमुखी। मनुष्यगणः। श्वयोनिः। कृष्णखदिरो वृक्षः। पक्षी पिंगलः। ऐंकारोऽक्षरं। असृजं पीत्वा यात्रां गच्छेत्। इंद्रचापश्चेद्दृष्टिर्नास्ति। मेषलग्ने मेघपरिवेषश्चेत्पंचादिने सप्तदिने वा वृष्टिः स्यात्। तत्कालकुजोदये वृषलग्ने द्रव्यसंग्रहणं विद्याकर्णवेधश्राद्धं च कुर्यात्। एकादशनाडिकांते विषघटिका। आषाढे मासि शून्यं। गुरुवारे मृत्युयोगः। स्नानंदार्केषु वरयोगः। द्वितीयांशे दिनमृत्युः। मंदवारे मंदोदये सेतुबंधनं। अर्ककुजवारे कर्कटलग्ने औषधसेवां कुर्यात्। अस्मिँल्लग्ने विद्यारंभश्च। ज्वरश्चेन्मृत्युः। दिनान्येकत्रिंशत्पीडा वा। सोहलकं नैवेद्यं। धत्तूरपुष्पपूजा। अगुरुर्धूपः। नमःशंभवेइति पूजामंत्रः। मध्वाज्यं होमद्रव्यं। सावित्र्याऽष्टोत्तरशतं हुत्वा पायसान्नेन रुद्राय बलिं दद्यात्। पंचदिनादारभ्य दशदिनांते सुखी स्यात्। अथवा मृतिः। संक्रमे समोऽर्घः॥ ६॥ पुनर्वसू षट्तारा। नावाकृतिः। अदितिर्देवता। चरा। देवगणः। मार्जारयोनिः। वेणुवृक्षः। वायसः पक्षी। अक्षरे ओंकारऔकारौ। पुमान्। तिर्यङ्मुखी। ऋतुगमनसीमंतनामकरणान्नप्राशनचौलोपनयनविद्यारंभसूतिकाभैषज्यवास्तुकर्मदेवताप्रतिष्ठावस्त्राभरणाभिषेकबीजवापनं यागादि च कुर्यात्। त्रिंशन्नाडिकांते विषनाडिका। मिथुनमासि शून्यं। गुरुवारे अमृतयोगः। अर्कवारेऽर्थसाधनयोगः। सिद्धिश्चेति केचित्। ज्वरश्चेत्सप्तदिनानि पीडा। गुडौदनं नैवेद्यं। मल्लिकापुष्पपूजा। मलयजो धूपः। अदितिर्द्यौरिति पूजामंत्रः। घृततंडुलं द्रव्यं। गायत्र्याऽष्टोत्तरशतं हुत्वा अदितये गंधमाल्यौदनैर्बलिं दद्यात्। सप्तदिनादारभ्य सप्तविंशतिदिनांते सुखी स्यात्। संक्रमेऽर्घवृद्धिः॥ ७॥ पुष्योऽष्टतारा। शराकृतिः। पुमान्। तिर्यङ्मुखी। ऊर्ध्वमुखी च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृहस्पतिर्देवता । लघुः। देवगणः । अजो योनिः । अश्वत्थो वृक्षः । जीवंजीवः पक्षी । अक्षरं ककारः । घृतपानं कृत्वा यात्रां गच्छेत् । विंशतिनाड्यंते विषनाडी । ऋतुगमनसीमंतनामकरणाऽन्नप्राशनचौलोपनयनकर्णवेधनविद्यारंभस्थानाभिषेकवीजावापनवास्तुकर्मवस्त्राभरणधारणगोभिलेयदेवतास्थापनश्राद्धानि कुर्यात् । कार्तिके मासि शून्यं । सितवारे विषयोगः । केचिन्नाशयोगमिच्छंति । दशम्या सहोग्रयोगः । सोमार्कयोर्यमकंटकः । अर्के गुरौ सिद्धियोगः । अस्मिन्दिने गृहं कृत्वा प्रवेशनं चित्रालिखनं च । प्रसूतिश्चेत्पितृमरणं । तृतीयांशे सर्वं श्रेयः । चतुर्थांशे बंधुमरणं । ज्वरश्चेत्सप्तदिनानि पीडा । खंडमंडका नैवेद्यं । मल्लिकापुष्पं सरोरुहं वा । गुग्गुलुर्धूपः । बृहस्पतेअतीति मंत्रः । घृतपायसं द्रव्यं । सावित्र्याष्टोत्तरशतं हुत्वा गंधमाल्यौदनैर्बृहस्पतये वलिं दद्यात् । दिनत्रयादारभ्य सप्तदिनांते सुखी स्यात् । संक्रमेऽर्ववृद्धिः ॥ ८ ॥ आश्लेषा चतुस्तारा । लांगूलाकारा । सर्पा देवता । तीक्ष्णा । स्त्री । अधोमुखी । राक्षसगणः । मार्जारयोनिः । नागवृक्षः । द्रोणकाकः पक्षी । अक्षरे खकारगकारौ । पायसं प्राश्य यात्रां गच्छेत् । त्रिंशन्नाडिकांते विषनाडी । तृतीयांशे दिनमृत्युः । शत्रुजयश्च । असितवारे मरणयोगः । कुजबुधयोर्यमकंटकः । केचित्कुजवारे नाशमिच्छंति । कुजवारेण सह मृत्युयोगः । कृष्णरक्तसूर्योदये अस्यार्धघटिकांतरे कार्मुकोदये सर्पमुहूर्ते लग्ने अवाङ्मुखो भूत्वा विवाहनक्षत्रे शयितो मृद्ग्रहणं तत्फलं वा गृह्णीयात् । आत्मसाद्भवति । बृहस्पत्युदये अस्यांशके षट्कर्मारंभं कुर्यात् । सर्वमचिरात्सिध्यति । द्रव्यसंग्रहणं च । अस्यादिवारे इक्षुस्थापनं कृषिकलमप्रसारणं । व्रीहिवृद्धिः स्यात् । कूपादिखननं च कुर्यात् । ज्वरश्चेन्नवदिनानि पीडा । पायसं नैवेद्यं । अतसीपुष्पपूजा । घृतमंडो गुडो वा धूपः । मधुवाता मंत्रः । दधिघृताक्तं कृसरान्नं शालयो यवाश्च द्रव्यं । गायत्र्याऽष्टोत्तरशतं हुत्वा सक्तुसरान्नं नागाय वलिं दद्यात् । न शांतिश्चेदष्टदिने मरणं । संक्रमेऽल्पोऽर्घः ॥ ९ ॥ मघा चतुस्तारा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

युगाकृतिः । पितरो देवता । उग्रा । राक्षसगणः । मूषकयोनिः । पलाशो वृक्षः । अक्षरे घङौ । स्त्री । अधोमुखी । तित्तिरिमांसभक्षणं कृत्वा यात्रां गच्छेत् । त्रिंशन्नाडिकांते विषघटिका । कृषिबीजावापनधान्यसंग्रहणं विवाहमाश्रयणं कृत्वा सहस्रगुणं भवेत् । व्ययं न कुर्यात् । कार्तिके मासि शून्यं । शुक्रवारे मरणयोगः । सूर्यसोमयोर्यमघंटकः । पंचम्या सह मरणयोगः । अर्के मृत्युयोगः । चंद्रोदये सस्यारंभः । अस्मिँल्लग्ने विवाहभूमौ मृद्ग्रहणं लवणं च कुर्यात् । ज्वरश्चेन्मृत्युः । एकविंशतिदिनानि पीडा । घृतपूरकं नैवेद्यं । चंपकपुष्पपूजा । गुग्गुलुर्धूपः । पितृंनुस्तोषमिति मंत्रः । घृतमधुमिश्रतिलाक्षतवटपत्राणि द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वाऽक्षततिलैः पितृभ्यो बलिं दद्यात् । न शांतिश्चेद्दशदिनांते मृत्युः । संक्रमे मध्यमोऽर्घः ॥ १० ॥ पूर्वाफल्गुनी द्वितारा । स्त्री । अधोमुखी । अर्यमा देवता । उग्रा । मनुष्यगणः । मूषकयोनिः । पलाशो वृक्षः । काकः पक्षी । अक्षरं चकारः । श्यामाकान्नभोजनं कृत्वा यात्रां गच्छेत् । जयो भवेत् । ऋणं दद्यात् । आषाढे मासि शून्यं । शुक्रवारे मृत्युयोगः । स्वर्णसंग्रहणविद्यारंभगृहाच्छादनं कुर्यात् । अस्मिन्मासे तन्नक्षत्रपरिवेष इंद्रचापो वा दृष्टश्चेद्दशदिने वृष्टिः स्यात् । विंशति घटिकांते विषघटिका । ज्वरश्चेद्दिनानि नव पंच वा पीडा । रक्तमाल्यौदनं नैवेद्यं । श्वेतकरंजपुष्पं । बिल्वफलं धूपः । अर्यमणंनुदेवमिति पूजा मंत्रः । घृतप्रियंगुद्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा गंधपुष्पेण बलिं दद्यात् । षड्दिनादारभ्याऽष्टदिनांते सुखी स्यात् । न शांतिश्चेन्मृतिः । संक्रमे मध्यमोऽर्घः ॥ ११ ॥ उत्तराफल्गुनी द्वितारा । स्त्री । ऊर्ध्वमुखी । भगो देवता । ध्रुवा । मनुष्यगणः । वृषयोनिः । प्लक्षो वृक्षः । क्रौंचः पक्षी । अक्षरे छजौ । पयः पीत्वा यात्रां गच्छेत् । अष्टादशघटिकांते विषघटिका । ऋतुगमनसीमंतनामकरणान्नप्राशनचौलोपनयनविद्यारंभविवाहस्नानवस्त्राभरणग्रामादिवास्तु-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीजावापनाभिषेकगोसंग्रहणानि कुर्यात् । पौष्टिकं च कुर्यात् । मार्गशीर्षे शून्यं । वस्त्राभरणे महासिद्धिः । अर्कवारे सिद्धियोगः । मंदवारे विषयोगः । शून्यं चेति केचित् । चतुर्थ्या सह मृत्युयोगः । शुक्रवारे कलहयोगः । गुरुवारे नाशयोगः । परिवेषेंद्रचापौ दृष्टौ चेत्पंचदिने सप्तदिने वा वृष्टिः । ज्वरश्चेदेकविंशतिदिनानि पीडा । कृसरं नैवेद्यं । श्वेतकरवीरपुष्पपूजा । बिल्वफलं धूपः । भगप्रणेतरिति मंत्रः । तिलमाषसर्पिर्व्रीहियवद्रव्यं । सावित्र्याष्टोत्तरशतं हुत्वा तैरेव बलिं दद्यात् । अष्टादशदिनादारभ्य एकविंशतिदिनांते वा ज्वरमोक्षः । संक्रमेऽर्घवृद्धिः॥ १२॥ हस्तः पंचतारा । कवचाकारः । पुमान् । तिर्यङ्मुखः । सविता देवता । लघुः । प्रियंगुसमप्रभः । अक्षरे झकारञकारौ । देवगणः । महिषयोनिः । अरिष्टो वृक्षः । घंटकी पक्षी । पयोमिश्रमसूरकं भुक्त्वा यात्रां गच्छेत् । द्वात्रिंशन्नाडिकांते विषघटिका । ऋतुगमनादि शुभकर्म पूर्ववत् । मकरमासे शून्यं । मंदवारे मरणयोगः । विषयोग इत्यपरे । अर्कवारे सिद्धियोगः । वस्त्राभरणधारणे महासिद्धिः । सप्तम्या सह मरणयोगः । अर्कसितवारेणाऽतिवृद्धिः । चतुर्थ्या सह मृत्युयोगः । गुरुवारे कलहयोगः । बुधवारे आनंदयोगः । श्राद्धदेवतास्थापनसैनापत्यादि कुर्यात् । द्रव्यं न दद्यात् । संगृह्णीयादेव । गोसंग्रहणं च । आद्यांशे दिनमृत्युः । इंद्रचापे दृष्टे एकविंशतिदिने वृष्टिः स्यात् । ज्वरश्चेन्मृत्युः संदेहो वा । दिनानि पंचदश पीडा । अपूपं नैवेद्यं । रक्तकरवीरपुष्पपूजा । दशांगो धूपः । उदुत्यमिति मंत्रः । दधिघृतद्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा गंधपुष्पेण बलिं दद्यात् । पंचदशदिनादारभ्य एकविंशतिदिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः ॥ १३ ॥ चित्रा एकतारा । तिर्यङ्मुखी । त्वष्टा देवता । मृदुः । व्याघ्रयोनिः । राक्षसगणः । बिल्वो वृक्षः । हंसः पक्षी । अक्षरे टठौ । चित्रान्नभोजनं कृत्वा यात्रां गच्छेत् । एकविंशतिनाड्यंते विषनाडिका । अन्नप्राशनकर्णवेधचौलोपनयनवस्त्राभरणाभिषेकश्राद्धकर्मकृषिबीजावापनानि कुर्यात् । वैशाखे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासि शून्यं । कुजवारे नाशयोगः । सनंदार्ककुजेषु वरयोगः । इंदुवारे द्वितीयया सह विषयोगः । त्रयोदश्या मरणयोगः । बुधवारे यमकंटकः । मंदवारे नाशयोगः । माघमासे पूर्वाह्णे इंद्रचापे दृष्टे दशदिने वृष्टिः । चैत्रमासि सायाह्ने विशेषमेघे उत्पन्ने विंशतिदिने वृष्टिः । ज्वरश्चेद्दिनानि दश पंच वा पीडा । मोदकं नैवेद्यं । जपापुष्पपूजा । दशांगो धूपः । चित्रंदेवानामिति मंत्रः । जलमिश्रं घृतं चित्रौदनं च द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा त्वष्ट्रे घृतमिश्रमुद्गैर्बलिं दद्यात् । सप्तदिनादारभ्य विंशतिदिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः ॥ १४ ॥ स्वाती एकतारा । रक्तवर्णा । वायुर्देवता । चरा । तिर्यङ्मुखी । देवगणः । महिषयोनिः । उन्मत्तो वृक्षः । मयूरः पक्षी । अक्षरं डकारः । आमलकभक्षणं कृत्वा यात्रां गच्छेत् । चतुर्दशनाड्यंते विषनाडी । ऋतुगमनादिशुभकर्म पूर्ववत् । वैशाखे मासि शून्यं । चंद्रवारे सिद्धियोगः । मंदवारे अमृतयोगः । रविवारे सिद्धियोगः । शुक्रवारे यमकंटकः । त्रयोदश्या सह मरणयोगः । नंदाकुजयोर्वरयोगः । द्रव्यं न दद्यात् । पूर्वपक्षपंचम्यां विजयः । मंदवारे वृषोदये सेतुबंधनं कुर्यात् । ज्वरश्चेत्षष्टिदिनानि पीडा । दध्योदनं नैवेद्यं । दमनकपुष्पपूजा । श्वेतागुरुर्धूपः । सनःपितेवेति मंत्रः । घृताक्तयावकं द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा गंधपुष्पेण वायवे बलिं दद्यात् । दशदिनादारभ्य चत्वारिंशाद्दिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः ॥ १५ ॥ विशाखा चतुस्तारा । स्त्री । शूर्पाकारा । अधोमुखी । इंद्राग्नी देवते । मिश्रा । व्याघ्रयोनिः । वैकंकतो वृक्षः । पिंगलः पक्षी । अक्षरे ढकारणकारौ । पिष्टांबुपानं कृत्वा यात्रां गच्छेत् । चतुर्दशनाड्यंते विषनाडी । शुभकर्माणि पूर्ववत् । बीजावापनवस्त्राभरणग्रहणं च कुर्यात् । द्रव्यं न दद्यात् । गृह्णीयादेव । मार्गशीर्षे शून्यं । अर्के नाशयोगः । केचिद्विषयोगमिच्छंति । बुधगुरुवारयोर्यमकंटकः । द्वितीयांशे दिनमृत्युः । शुक्रवारे शुक्रोदये कृष्यारंभं कुर्यात् । शत्रुदर्शनं चेच्छुभं भवति । मंदवारेऽस्मिँल्लग्ने कर्का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिचापलग्ने कुजांशके वा धान्यसंग्रहणं कुर्यात् । तत्काले भूमिविवादश्चेज्जयः । इंद्रचापे दृष्टेऽष्टदिने वृष्टिः । ज्वरश्चेद्विंशतिदिनानि पीडा । गुडकं नैवेद्यं । बंधूकपुष्पपूजा । देवदारुर्धूपः । शंनइंद्राग्नी पूजामंत्रः । दुग्धौदनं घृतं द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा पयोमिश्रान्नैर्गंध-माल्यैरिंद्राग्निभ्यां बलिं दद्यात् । दशदिनादारभ्य विंशतिदिनांते सुखी स्यात् । संक्रमेऽल्पोऽर्घः ॥ १६ ॥ अनुराधा षट्तारा । चक्रमाला-कृतिः । पुमान् । तिर्यङ्मुखः । मित्रो देवता । देवगणः । मृगयोनिः । बकुलो वृक्षः । पक्षिणौ परपुष्टकाकौ । अक्षराणि तकारथकारदकाराः । द्वादशनाड्यंते विषघटी । कुलित्थभक्षणं कृत्वा यात्रां गच्छेत् । ऋतुगमनसीमंतकर्णान्नप्राशनोपनयनविद्यारंभश्राद्धबीजावापनादीनि कुर्यात् । मार्गशीर्षे मासि शून्यं । अर्कवारे मरणयोगः । केचिन्मृत्युयोगमिच्छंति । बुधवारे सिद्धियोगः । शुक्रे आनंदयोगः । मंदे मृत्युयोगः । दश-म्यामुग्रयोगः । तृतीयांशे दिनमृत्युः । तत्काले चापलग्ने कुजांशके धान्यसंग्रहणं । तत्काले व्यवहारजयो भवति । विवाहभूमौ मृद्ग्रहणं च कुर्यात् । करवीरपुष्पसदृशो मेघो दृश्यते चेत्तृतीयदिने वृष्टिर्भवति । ज्वरश्चेत्पंचविंशतिदिनानि पीडा दश वा । मित्रस्यचर्षणीति पूजामंत्रः । कुंकुमगंधः । पद्मं पुष्पं । साज्यं पायसं नैवेद्यं । चंदनं धूपः । सूरणकंदः प्रधानद्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा मित्राय साज्यपायसमुद्ग-माषैर्बलिं दद्यात् । अष्टदिनादारभ्य पंचविंशतिदिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः ॥ १७ ॥ ज्येष्ठा त्रितारा । कुंडलाकृतिः । तिर्य-ङ्मुखी । इंद्रो देवता । तीक्ष्णा । राक्षसगणः । मृगयोनिः । विषवृक्षः । पक्षी कुक्कुटी । धकारोऽक्षरं । तिलभक्षणं कृत्वा यात्रां गच्छेत् । चतुर्दशनाडिकांते विषघटी । केचित्सैनापत्यं श्राद्धं शालिवापनं चाहुः । फाल्गुने मासि शून्यं । अर्कवारे नाशयोगः । गुरुप्रतिपदि विषयोगः । इंदुवारे भौमलग्ने कूपादिखननं कुर्यात् । करवीरपुष्पसदृशो मेघो दृष्टश्चेद्दशदिने वृष्टिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वरश्चेन्मृत्युः संदेहो वा । दश पंच वा दिनानि पीडा । चित्रौदनं नैवेद्यं । पटोलीपुष्पपूजा । कर्पूरागुरुर्धूपः । इंद्रंवइति पूजा-
मंत्रः । घृतं सूरणकंदमूलं द्रव्यं । सावित्र्याष्टोत्तरशतं हुत्वा गंधपुष्पेणेंद्राय बलिं दद्यात् । न शांतिश्चेन्मृत्युः । अन्यतरां गतिं गच्छती-
त्याश्वलायनो मांडव्यश्च । संक्रमेऽल्पोऽर्घः ॥१८॥ मूलं नवतारा । पश्वाकृतिः । हंसवर्णः । अधोमुखी । नपुंसकं । निर्ऋतिर्देवता । तीक्ष्णा ।
राक्षसगणः । श्वयोनिः । सर्जो वृक्षः । जीवंजीवः पक्षी । शाकभक्षणं कृत्वा यात्रां गच्छेत् । तिलभक्षणं वेति केचित् । विंशतिनाड्यंते विषघ-
टी । अंत्यांशे दिनमृत्युः । ऋतुसंगमनामकरणान्नप्राशनाग्रयणविवाहबीजवापनगोसंग्रहणानि कुर्यात् । उग्रकर्माणि च कुर्यात् । द्रव्यं न दद्यात् ।
गृह्णीयादेव । माघे शून्यं । अर्कवारे मृत्युयोगः । नंदार्ककुजयोर्वैरयोगः । कार्मुकोदये नगरस्थापनं च । रक्तमेघे दृष्टेऽष्टदिने वृष्टिः । ज्वरश्चेन्मृ-
त्युः संदेहो वा । दशदिनानि पीडा । मत्स्यमांससुरापोलिका नैवेद्यं । रक्ताशोकपुष्पपूजा । मेषशृंगो धूपः । मोषुणःपरापरेति मंत्रः । सघृतं कंदमूलं द्रव्यं
। सावित्र्याष्टोत्तरशतं हुत्वा निर्ऋतये पायसान्नेन बलिं दद्यात् । संक्रमेऽर्घवृद्धिः ॥१९॥ पूर्वाषाढा द्वितारा । स्त्री । अधोमुखी । आपो देवता । उग्रा ।
मनुष्यगणः । कपियोनिः । वानीरो वृक्षः । शक्रः पक्षी । अक्षराणि नकारादिबांतानि । कंदभक्षणं कृत्वा यात्रां गच्छेत् । चतुर्दशनाड्यंते विषघटी ।
गोसंग्रहणं शालिवापनं च कुर्यात् । कूपादिखननविद्यारंभव्रतवंधनानुलेपनमुखानि कर्माणि कुर्यात् । द्रव्यं न दद्यात् । गृह्णीयादेव । श्रावणे मासि
शून्यं । चंद्रवारे विषयोगः । कुजवारे यमोदये प्राकारारंभं च कुर्यात् । बंधमालापररक्षाकर्माणि च । अस्मिँल्लग्ने कूपादिखननं च । रक्तमेघे
दृष्टे पंचादिने वृष्टिः । ज्वरश्चेत्पंचविंशतिदिनानि पीडा । मंडका नैवेद्यं । कह्लारपुष्पपूजा । मनःशिला धूपः । आपोहिष्ठेति पूजामंत्रः ।
रक्तशालिर्द्रव्यं । सावित्र्याष्टोत्तरशतं हुत्वा वरुणाय पायसान्नेन बलिं दद्यात् । चतुर्दशदिनादारभ्य विंशतिदिनांते सुखी स्यात् । संक्रमेऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्पोऽर्घः ॥२०॥ उत्तराषाढा द्वितारा । स्त्री । ऊर्ध्वमुखी । विश्वेदेवा देवता । ध्रुवा । मनुष्यगणः । गौर्योनिः । शमलो [पनसो] वृक्षः । पिंगलः पक्षी । अक्षरं भकारः । गजविक्रयणं गजारोहणं च कुर्यात् । शंकुस्थापनं शक्रध्वजं [शक्रव्रतं] च कुर्यात् । तिलभक्षणं कृत्वा यात्रां गच्छेत् । विंशतिनाड्यंते विषघटी । ऋतुगमनादिशुभकर्माणि कुर्यात् । वैशाखे मासि शून्यं । चंद्रवारे मरणयोगः । अर्कवारे सिद्धियोगः । कुजवारे कलहयोगः । मंदवारे मृत्युः । शुक्रवारे आनंदः । तृतीयया सह मरणयोगः । रक्तमेघे दृष्टे एकादशदिने वृष्टिः । ज्वरश्चेद्विंशतिदिनानि पीडा । पंचभक्ष्यं नैवेद्यं । पंचवर्णपुष्पैः पूजा । लाक्षा धूपः । विश्वेदेवासआगतेति मंत्रः । घृतं सल्लकीखंडानि द्रव्यं । साविच्याष्टोत्तरशतं हुत्वा विश्वेभ्योदेवेभ्यः पायसान्नेन बलिं दद्यात् । एकादशदिनादारभ्य विंशतिदिनांते सुखी स्यात् । संक्रमेऽर्घवृद्धिः ॥ २१ ॥ श्रवणं त्रितारा । दंडाकृतिः । पुमान् । ऊर्ध्वमुखः । विष्णुर्देवता । चरः । देवगणः । वानरयोनिः । न्यग्रोधो वृक्षः । मयूरः पक्षी । अक्षरं मकारः । दशनाड्यंते विषघटी । जलं पीत्वा यात्रां गच्छेत् । ऋतुगमनपुंसवनसीमंतनामकरणान्नप्राशनचौलोपनयनाभिषेकाभरणकृषिबीजावापनकर्णसंधानानि कुर्यात् । श्राद्धं च यज्ञं च । माघे शून्यं । अर्कवारे सिद्धियोगः । चंद्रवारे मृत्युयोगः । मंदवारे यमकंटकः । शुक्रवारे षष्ठ्या सहोग्रयोगः । पंचम्या सह कर्कालिचापलग्ने चंद्रांशके धान्यसंग्रहणं कुर्यात् । व्यवहारारंभे जयो भवति । सोमवारे द्वितीयांशे सूर्योदये गृहारंभं कृत्वा प्रवेशनं च कुर्यात् । सकलाभीष्टसिद्धिर्भवति । ज्वरश्चेन्मासद्वयं पीडा मृत्युः संदेहो वा । क्षीरशर्कराघृतमंडका नैवेद्यं । जातीपुष्पपूजा । दशांगो धूपः । अतोदेवाइति मंत्रः । रक्ततंडुलद्रव्यं । सावित्र्याष्टोत्तरशतं हुत्वा गंधपुष्पेण विष्णवे बलिं दद्यात् । मासांते संवत्सरांते वा सुखी स्यात् । संक्रमेऽर्घवृद्धिः ॥ २२ ॥ धनिष्ठा पंचतारा । चक्राकारा । मृदंगाकारा । स्त्री । ऊर्ध्वमुखी । वसवो देवता । चरा । राक्षसगणः । सिंह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योनिः । शमी वृक्षः । काकः पक्षी । अक्षरं यकारः । सक्तुभक्षणं कृत्वा यात्रां गच्छेत् । दशनाड्यंते विषनाडी । ऋतुगंमनादिशुभकर्माणि पूर्ववत् । आषाढे शून्यं । कुजवारे विषयोगः । केचिन्नाशयोगः । मंदवारे मंदोदये आरामभूमिसंचयं कुर्यात् । अस्मिँल्लग्ने युद्धं च कुर्यात् । जयो भवति । कुजोदये व्यापारं द्रव्यसंग्रहणं युद्धं च कुर्यात् । आद्यांशे दिनमृत्युः । रक्तमेघे दृष्टे विंशतिदिने वृष्टिः । ज्वरश्चेत्पंचदश-दिनानि पीडा । पायसं नैवेद्यं । शतपत्रपुष्पपूजा । घृतगुग्गुलुर्धूपः । त्रायंतामिहदेवाइति मंत्रः । बिल्वोदुंबराश्वत्थसमिधो द्रव्यं । सावि-त्र्याऽष्टोत्तरशतं हुत्वा घृतमिश्रमुद्गैर्वसुभ्यो बलिं दद्यात् । दशदिनादारभ्य पंचदशदिनांते सुखी स्यात् । त्रयोदशमासांते वा । संक्रमे मध्य-मोऽर्घः ॥ २३ ॥ शतभिषक् शततारा । पुष्पपुंजनिभाकृतिः । नपुंसकं । ऊर्ध्वमुखी । वरुणो देवता । चरा । राक्षसगणः । तुरगयोनिः । कदंबो वृक्षः । कंटकी पक्षी । अक्षरे रेफलकारौ । अन्नप्राशनचौलपुंसवनकर्णवेधसंधानधान्यवापनश्राद्धशस्त्रारंभांश्च कुर्यात् । प्रोष्ठपदे मासि शून्यं । कुजवारे मरणयोगः । केचिन्मृत्युयोगः । मंदवारे यमकंटकः । सनंदाऽर्ककुजयोर्मरणयोगः । गुरुवारे मृत्युयोगः । अर्के कुज-वारे कुलीरलग्ने त्वौषधोपयोगं कुर्यात् । अस्मिँल्लग्ने कृषिलवनं कुर्यात् । अपूपभक्षणं कृत्वा यात्रां गच्छेत् । अष्टादशनाड्यंते विषघटी । ज्वरश्चेद्दशदिनानि पीडा । घृतमंडका नैवेद्यं । सावित्र्याऽष्टोत्तरशतं जलोद्भवैर्वरुणाय हुत्वा पायसेन बलिं दद्यात् । षष्ठदिनादारभ्य द्वादश-दिनांते सुखी स्यात् । संक्रमेऽल्पोऽर्घः ॥ २४ ॥ पूर्वाभाद्रपदा द्वितारा । स्त्री । अधोमुखी । अजएकपाद्देवता । उग्रा । मनुष्यगणः । सिंह-योनिः । आम्रो वृक्षः । अक्षरे वशौ । कपोतः पक्षी । गुडभक्षणं कृत्वा यात्रां गच्छेत् । षोडशनाड्यंते विषनाडी । अश्वयुजि शून्यं । गोसंग्रहणं विद्यारंभं च कुर्यात् । द्रव्यं न दद्यात् । गृह्णीयादेव । कुजवारे नाशयोगः । अंत्यांशे नागवल्ल्यादिस्थापनं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयांशे शुक्रोदये कूपादिखननं । रक्तमेघे दृष्टेऽष्टदिने वृष्टिः । ज्वरश्चेन्मृत्युः संदेहो वा । द्वाविंशतिदिनानि पीडा । दधिघृतं नैवेद्यं । अर्क-पुष्पपूजा । सर्वौषधिर्धूपः । शंनोअजएकपादिति मंत्रः । घृतकूष्मांडखंडं द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा गंधमाल्यौदनैरजैकपदे बलिं दद्यात् । दशदिनांते शांतिर्मृतिर्वा भवति । संक्रमे मध्यमोऽर्घः ॥२५॥ उत्तराभाद्रपदा द्वितारा । पुमान् । ऊर्ध्वमुखः । अहिर्बुध्न्यो देवता । ध्रुवः । गौर्योनिः । निंबो वृक्षः । चक्रवाकः पक्षी । अक्षरे षसौ । मांसभक्षणं कृत्वा यात्रां गच्छेत् । चतुर्विंशतिनाडयंते विषघटी । ऋतु-गमनसीमंतनामकरणान्नप्राशनचौलोपनयनस्नानविवाहवास्तुबीजावापनवस्त्राभरणाभिषेकगोसंग्रहणानि कुर्यात् । रोगी स्नातश्चेत्सुखी स्यात् । श्रावणमार्गशीर्षयोः शून्यं । तृतीयया सह मरणयोगः । कुजवारे मृत्युयोगः । अर्कवारे सिद्धियोगः । तृतीयपादे दिनमृत्युः । रक्तमेघो दृष्टश्चे-देकादशदिने वृष्टिः । ज्वरश्चेत्पंचदिनानि पीडा । गुडपललघृतौदनं नैवेद्यं । कंजपत्राणि पुष्पं । घृतनिंबपत्रधूपः । विष्णुर्योनिमिति पूजामंत्रः । घृतप्लुतमाषचरुमुद्गानि द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा गंधपुष्पेणाऽहिर्बुध्न्याय बलिं दद्यात् । संक्रमेऽर्घवृद्धिः ॥२६॥ रेवती द्वात्रिंशत्तारा । पीठाकृतिः । स्त्री । तिर्यङ्मुखी । पूषा देवता । मृदुः । देवगणः । गजयोनिः । मधूको वृक्षः । पिंगलः पक्षी । अक्षरं हकारः । क्षीरपानं कृत्वा यात्रां गच्छेत् । त्रिंशन्नाडयंते विषघटी । प्रोष्ठपदे मासि शून्यं । ऋतुसंगमाद्युत्तराभाद्रोक्तकर्माणि कुर्यात् । अर्के सिद्धियोगः । बुधे सोमे च विषयोगः । मंदे नाशयोगः । अष्टम्या सह विषयोगः । नंदार्ककुजयोर्वरयोगः । शुक्रवारे सिद्धियोगः । सप्तम्या सहोग्रयोगः । ज्वरश्चेद्दशदिनानि पीडा । तिलतंडुलपिष्टं नैवेद्यं । मंदारपुष्पपूजा । गुग्गुलुर्धूपः । हंसःशुचिषदिति मंत्रः । घृताम्रफलसहितकदलीफलानि द्रव्यं । सावित्र्याऽष्टोत्तरशतं हुत्वा गंधपुष्पादिभिः पूष्णे बलिं दद्यात् । पंचदिनादारभ्य विंशतिदिनांते सुखी स्यात् । संक्रमे मध्यमोऽर्घः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्घवृद्धिरिति गार्ग्यमांडव्यादयः ॥२७॥ इति कमलाकरभट्टकृते शांतिरत्ने हेमाद्रिमदनरत्नोक्ता ज्वरोत्पत्तौ नक्षत्रशांतयः ॥ ॥ अथ प्रयोगः । कर्ता देशकालौ स्मृत्वा ममाऽमुकनक्षत्रे ज्वरोत्पत्तिसूचितसर्वारिष्टशांतिपूर्वकक्षिप्रारोग्यावाप्तिद्वारा श्रीप० अमुकनक्षत्रशांतिं करिष्य इति संकल्प्य गणेशं संपूज्याचार्यं वृणुयात् । आचार्यः प्रादेशकरणांते स्थंडिलादैशान्यां महीद्यौरित्यादिविधिना कलशं संस्थाप्य पूर्णपात्रोपरि वस्त्रे द्वादशदलं पद्मं कृत्वा तत्र प्रतिमायां नक्षत्रदेवतां तन्मंत्रेणावाह्य द्वादशदलेषु संकर्षणादिद्वादशदेवानष्टदिक्षु लोकपालांश्चावाह्य तत्तदुक्तगंधपुष्पधूपदीपनैवेद्यैः संपूज्याग्निं प्रतिष्ठाप्य तत्तदुक्तद्रव्यैर्गायत्र्याऽष्टोत्तरशतं नक्षत्रदेवतायै संकर्षणादिभ्योऽष्टौ चतस्र एकां वाऽऽहुतिं हुत्वा स्विष्टकृदादिप्रणीताविसर्जनांते तत्तद्द्रव्यैर्बलीन्दत्वाऽग्न्युपस्थानादिशेषं समाप्य स्थापितकुंभोदकेन यजमानमभिषिंचेत् । ततः कर्ता विभूतिधारणांते देवतोत्तरपूजां विधायाचार्यं संपूज्य तस्मै दक्षिणां विसर्जितदेवतापीठं सोपस्करं च दत्वा विप्रान्संभोज्याशिषो गृहीत्वा कर्म समापयेत् । इति ज्वरोत्पत्तौ नक्षत्रशांतिप्रयोगः ॥ ॥ अथ रोगोत्पत्तौ नक्षत्रतिथिवारशांतयः । वसिष्ठसंहितायां । रोगशांतिं प्रवक्ष्यामि रोगार्तानां शरीरिणां । बलिपूजांगहोमैश्च जपब्राह्मणभोजनैः ॥ यस्मिन् धिष्ण्ये यदा नृणां रोगः संजायते तदा । तद्धिष्ण्यपूजा कर्तव्या तदीश्वरसुतुष्टये ॥ सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः । धिष्ण्येशप्रतिमा कार्या यथावित्तानुसारतः ॥ ऐशान्यामथवा प्राच्यामुदीच्यां दिशि संलिखेत् । तंडुलोपर्यष्टदलं पद्मं गोमयमंडले॥पंचामृतैश्च सलिलैस्तत्तन्मंत्रैः पृथक्पृथक् । स्नाप्य कल्पोक्तमंत्रेण प्रतिमां स्थापयेत्ततः ॥ कर्णिकायां सुसंस्थाप्य ध्यात्वा देवं समर्चयेत् । तद्दर्णवस्त्रगंधाद्यैरुक्तधूपोपहारकैः ॥ आरक्तवर्णं कुंभं च पल्लवैः पंचभिर्युतं । शुक्लवस्त्रस्वर्णरत्नशतौषधिसमन्वितं ॥ मृत्पंचगव्यसद्बीजफलक्षौद्रकुशान्वितं । देवस्य पूर्वतः स्थाप्य जलमंत्रैः समर्चयेत् ॥ तत्प्राच्यां [प्रतीच्यां] स्थंडिले वह्निं वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिवत्स्थापयेत्ततः । मुखांते जुहुयादुक्तद्रव्येणाष्टसहस्रकं ॥ उक्तद्रव्येण तत्तन्नक्षत्रशांतावुक्तेन। तिलैर्हुत्वा व्याहृतिभिरष्टोत्तरसहस्रकं । पूर्णाहुतिं च जुहुयात्सम्यग्जपितपूर्वकं ॥ ततः शुद्धोपविष्टस्य रोगिणः प्राङ्मुखस्य च । मंत्रपूतैः कुंभजलैरब्लिंगैर्वारिमंत्रकैः ॥ मार्जनं कारयेत्तस्य सम्यक्संकल्पपूर्वकं । नीराजनं च शुद्धात्मा पूजास्थानं समागतः ॥ देवं हुताशनं भक्त्या प्रणम्य प्रार्थयेदिति । अमृतोद्भव धिष्ण्येश यतस्त्वं शंकरात्मकः । रोगादस्माच्च मां रक्ष तव वश्याश्च धिष्ण्यपाः ॥ इति प्रार्थ्य ततो दद्यात्प्रतिमां वस्त्रसंयुतां । दक्षिणासहितां भक्त्या आचार्याय कुटुंबिने । ब्रह्मणे च यथाशक्त्या ब्राह्मणान्भोजयेत्ततः ॥ कृत्वा नक्षत्रपूजां च तिथिवासरयोरपि । सर्वान्कामानवाप्नोति रोगी रोगात्प्रमुच्यते ॥ पूर्वोक्तं विधिं कृत्वा तिथिवासरयोः शांतिं च कुर्यादित्यर्थः । अश्विन्यामुत्थितो व्याधिर्नवरात्रेण मुंचति । देवस्यत्वेतिमंत्रस्य गायत्री काश्यपोऽश्विनौ ॥ श्वेतवर्णौ सुधापूर्णकुंभांभोजधरौ पृथक् । चंदनोत्पलपुष्पाज्यगुग्गुलेक्षुगुडप्रियौ ॥ क्षीरलड्डुकभोक्तारौ समिधः क्षीरवृक्षजाः । आज्यं गुग्गुलुश्च धूपः । समिद्भिर्होमः । एवमग्रेऽपि। गुडौदनबलिं दद्याद्दीपैः सार्धं निशामुखे ॥ १ ॥ भरण्यामुत्थितो व्याधिराचिरान्निधनप्रदः । मासेन मुंचत्यथवा दैवस्य कुटिला गतिः ॥ त्र्यंबकस्य तु मंत्रस्य प्रोक्ताश्छंदर्षिदेवताः । गंधोऽगुरुः करवीरं पुष्पं धूपश्च गुग्गुलुः ॥ आज्यदीपं च सर्वेषां नैवेद्यं च गुडौदनं । पाशदंडधरो रक्तस्त्वाज्यमध्वक्षता हविः ॥ महिषीनायकारूढः कृसरान्नं बलिं हरेत् । वक्ष्यमाणेन मंत्रेण बलिं सम्यक् प्रदापयेत् ॥ २ ॥ कृत्तिकासूत्थितो व्याधिर्दशरात्रेण मुंचति । स्रुक्स्रुवाऽभयवरदः सुवर्चा मेषवाहनः ॥ मेधातिथिर्जगत्यग्निः पुनंतुमामित्यस्यच । चंदनं यूथिकापुष्पं घृतधूपः सगुग्गुलुः ॥ नैवेद्यं तिलमाषान्नं वटकाद्येन संयुतं। गुडौदनं हविस्तत्र पायसेन बलिं हरेत् ॥ ३ ॥ रोहिण्यामुत्थितो व्याधिर्दशरात्रेण मुंचति । नमोब्रह्मणेमंत्रस्य गायत्री विधिरीश्वरः ॥ शुक्लः कमंडलुस्त्वक्षसूत्राऽभयवरप्रदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंदनं कमलं पुष्पं सदशांगं च गुग्गुलुं ॥ नैवेद्यं पायसं साज्यं सर्वदाऽन्नैर्हविर्भवेत् । दधिक्षीरघृतक्षौद्रशाल्यन्नेन बलिं हरेत् ॥ ४ ॥ चंद्रभे चोत्थितो व्याधिः पंचरात्रेण मुंचति । गदावरदपाणिश्च श्वेतोऽसौ रथवाहनः ॥ नवोनवोभवत्यस्य गायत्री गौतमः शशी । चंदनं कुमुदं पुष्पं दशांगं पायसौदनं ॥ नैवेद्यं मंडकाऽपूपघृतक्षौद्रसमन्वितं । शर्करादधिमिश्रेण शुक्लान्नेन बलिं हरेत् ॥ ५ ॥ आर्द्रायामुत्थितो व्याधिरचिरान्निधनप्रदः । मासेन मुंचत्यथवा दैवस्य कुटिलागतिः ॥ शुद्धस्फटिकसंकाशः शूलखड्गभयेष्टदः । नमःशंकरायेत्यस्य बृहतीशो विधिर्ऋषिः ॥ चंदनं सौरभं पुष्पं दशांगं पायसौदनं । समध्वाज्यं हविस्तत्र दध्योदनबलिं हरेत् ॥ ६ ॥ पुनर्वसौ भवेद्व्याधिर्नवरात्रेण मुंचति । कमंडल्वक्षसूत्रेध्मदर्भस्रुक्स्रुवभृत्सदा ॥ आदितिर्द्यौश्च मंत्रस्य त्रिष्टुभो द्रुहिणोऽदितिः । हरिद्राकुंकुमं गंधः पुष्पं सेवंतिकाह्वयं ॥ धूपो मलयजं पिष्टं घृतान्नं पीतवर्णकं । घृताक्तं तंडुलहविः पीतान्नेन बलिं हरेत् ॥ ७ ॥ पुष्ये समुत्थितो व्याधिः सप्तरात्रेण मुंचति । पीतो दंडकमंडल्वक्षसूत्रेष्टाऽभयोद्यतः ॥ बृहस्पतेपरीत्यस्य त्रिष्टुब् जीवोंऽगिरा ऋषिः । कुंकुमं वारिजं पुष्पं नैवेद्यं घृतपायसं ॥ मंडका गुडसंयुक्तमेतदेव हविर्भवेत् । समंडकघृतान्नेन बलिं तत्र प्रदापयेत् ॥ ८ ॥ आश्लेषासूत्थितो व्याधिः क्लेशान्मासेन मुंचति । नमोअस्त्विति मंत्रस्य हव्यवाडथ सर्पराट् ॥ मधुवर्णो भोगयुक्तः खड्गचर्मधरः शुभः । सकुंकुमाऽगुरुर्गंधः पुष्पं चाऽगस्तिसंभवं ॥ घृतगुग्गुलुधूपोऽत्र नैवेद्यं क्षीरसर्पिषा । हविः साज्यं सदध्यन्नं दध्योदनबलिं हरेत् ॥ ९ ॥ पितृभे चोत्थितो व्याधिरचिरान्निधनप्रदः । अथवा सार्धमासेन धूम्रो दंडविचित्रधृक् ॥ आयंतुनस्त्विति चास्य जगती पितरोऽब्जजः । चंदनं चंपकं पुष्पं धूपः सघृतगुग्गुलुः ॥ नैवेद्यं घृतपिष्टान्नं तिलान्नं सघृतं हविः । सतिलाज्यं च मुद्गान्नं बलिं च पितृतृप्तये ॥१०॥ पूर्वफाल्गुनभे व्याधिरर्धमासेन मुंचति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगएवभगवानित्यस्य त्रिष्टुब् भगो विधिः ॥ पद्माऽभयकरः पद्मवर्णः सिंहासने स्थितः । चंदनं मालतीपुष्पं बिल्वधूपो घृतौदनं ॥ नैवेद्यं शर्कराऽपूपलड्डुकाभिश्च संयुतं । घृतौदनं हविस्तत्र पायसेन बलिं हरेत् ॥ ११ ॥ अर्यमर्क्षे भवेद्व्याधिरर्धमासेन मुंचति । पद्मवर्णः पद्मसंस्थः पद्मगर्भसमद्युतिः ॥ अर्यमाणेतिमंत्रस्य अर्यमा त्रिष्टुबब्जजः । कर्पूरं कुंकुमं गंधं पुष्पं धूपकसंज्ञकं ॥ घृतगुग्गुलुधूपोऽत्र नैवेद्यं घृतपायसं । होमद्रव्यं घृतान्नं स्याच्छाल्यन्नेन बलिं हरेत् ॥ १२ ॥ हस्ते समुत्थितो व्याधिर्नवरात्रेण मुंचति । उदुत्यमिति हिरण्यस्तूपो गायत्र्यदितिं जपेत् ॥ रक्तगंधं कुंकुमं च पुष्पं राजीवसंज्ञकं । गंधगुग्गुलुधूपोऽत्र नैवेद्यं घृतपायसं ॥ मधुपुष्पं तिलाज्यान्नं दूर्वाभिः सहितं हविः । गुडशर्करमध्वाज्यपिष्टान्नेन बलिं हरेत् ॥ १३ ॥ चित्रायामुत्थितो व्याधिर्दशरात्रेण मुंचति । चित्रंदेवानामित्यस्य त्वष्टा त्रिष्टुप् पितामहः ॥ अक्षसूत्राऽभयकरश्चित्रवर्णः शिवे रतः । सकुंकुमाऽगुरुर्गंधः कुसुमं चित्रवर्णकं ॥ नैवेद्यं मोदकाज्यान्नं चित्रान्नं सघृतं हविः । तदन्नेन बलिं दद्यात्सर्वरोगापनुत्तये ॥ १४ ॥ स्वात्यृक्षे चोत्थितो व्याधिः सर्वदा निधनप्रदः । एकद्वित्रिचतुष्पंचमासैर्वाऽपि विमुंचति ॥ सनःपितेतिमंत्रस्य गायत्री मरुदंगिराः । खड्गचर्मधरः कृष्णो गंधः कृष्णागुरुर्भृशं ॥ पुष्पं दमनकं धूपश्चंदनाऽगुरुगुग्गुलुः । नैवेद्यं पायसं साज्यं हविस्तेन बलिं हरेत् ॥ १५ ॥ द्विदैवभे भवेद्व्याधिर्मासैनैकेन मुंचति । इंद्राग्नीआगतमिति गायत्री चास्य चैव हि ॥ मधुच्छंदर्षिरिंद्राग्नी तयोर्ध्यानं च पूर्ववत् । श्रीखंडं कुंकुमं गंधं तयोः पुष्पं सरोरुहं ॥ देवदारुस्तयोर्धूपो नैवेद्यं घृतपायसं । तदेवाऽन्नं हविस्तत्र चित्रान्नेन बलिं हरेत् ॥ १६ ॥ मित्रभे चोत्थितो व्याधिर्दशरात्रेण मुंचति । मित्रस्यचर्षणीधृतो गायत्री चास्य चैव हि ॥ ऋषिर्हिरण्यस्तूपाख्यस्तत्र मित्रोऽधिदेवता । द्विभुजः पद्मगर्भाभः पद्मभृत्पद्मसंस्थितः ॥ कुंकुमं पुंडरीकाख्यं पुष्पं धूपं च चंदनं । नैवेद्यं पायसं साज्यं हविः कंदस्तु सूरणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वलिस्तत्र प्रदातव्यो मधुशर्करपायसं । घृतपूरकमाषान्नं मुद्गगर्भैश्च संयुतं ॥ १७ ॥ ज्येष्ठायामुत्थितो व्याधिर्मृत्युरेव न संशयः । इंद्रंवइति मंत्रस्य गायत्रींद्रोऽगिरा ऋषिः ॥ इंद्राय पूर्ववद्गंधं चंदनं कुसुमं शुभं । कर्पूरधूपो नैवेद्यं चित्रान्नं सुमनोहरं ॥ हविस्तु सूरणं कंदं मधुकंदं सुपायसं । विचित्रपुष्पगंधेन दध्यन्नेन बलिं हरेत् ॥ १८ ॥ मूलभे चोत्थितो व्याधिर्मासार्धेन विमुंचति । खड्गचर्मधरः कृष्णः करालवदनः प्रभुः ॥ मोषुणोऽस्य च गायत्री घौरः कण्वोऽथ निर्ऋतिः । गंधः कृष्णागुरुः पुष्पं पद्मं नीलोत्पलं शुभं ॥ धूपः कृष्णागुरुर्माषमिश्रान्नमुपहारकं । तदेवान्नं हविस्तत्र माषान्नेन बलिं हरेत् ॥ १९ ॥ वारिभे चोत्थितो व्याधी रोगिणो निधनप्रदः । विमुंचत्यथवा मासैर्द्वित्रिषट्पंचसप्तभिः ॥ आप्यायस्वेतिमंत्रस्य गायत्री पद्मजो जलं । सुवर्णो द्विभुजः पद्मपाणिर्गंधस्तु चंदनं ॥ पद्मं शैलेयधूपोऽत्र नैवेद्यं घृतपायसं । हविर्मसूरपिष्टान्नं तदन्नेन बलिं हरेत् ॥ २० ॥ विश्वभे चोत्थितो व्याधिः सार्धमासेन मुंचति । विश्वेदेवासइत्यस्य गायत्री विश्वदेवताः ॥ कमंडल्वभयांऽभोजवरदश्च कुशासनः । चंदनं कमलं पुष्पं धूपः सघृतगुग्गुलुः ॥ नैवेद्यं पायसाज्यान्नं हविरप्येतदेव हि । समिद्भिर्निचुलैः सार्धं तदन्नेन वलिं हरेत् ॥ २१ ॥ श्रवणे चोत्थितो व्याधिर्दशरात्रेण मुंचाति । अतोदेवेतिमंत्रस्य गायत्री पद्मजो हरिः ॥ पीतांबरः कृष्णवर्णः शंखचक्रगदाब्जधृक् । चंदनं मालतीपुष्पं धूपः कर्पूरगुग्गुलुः ॥ शाल्यन्नं षड्रसोपेतं भक्ष्यभोज्यादिभिः सह । नैवेद्यं हविरप्येतत्पायसेन वलिं हरेत् ॥ २२ ॥ वसुभे चोत्थितो व्याधिर्दशरात्रेण मुंचति । त्रायंतामिहमंत्रस्याऽनुष्टुब् व्यासो वसुस्ततः ॥ चापत्राणधरः शुक्लगंधः कर्पूरचंदनं । वारिजं गुग्गुलुर्धूपो नैवेद्यं घृतपायसं ॥ हविश्चोदुंबरसमिद्गुडान्नेन बलिं हरेत् । " शां० म० हविश्चोदुंबरसमिद्गुडपायससंयुतं । लड्डुकापूपमध्वाज्यतिलपिष्टबलिं हरेत् " ॥२३॥ वारुणे चोत्थितो व्याधिरष्टरात्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुंचति। इमंमेवरुणेत्यस्य गायत्री कण्ववारिपः ॥ नागपाशधरः श्रीमान्नवरत्नविभूषितः। मकरस्थोऽगुरुर्गंधः पुष्पं च कमलोत्पलं ॥ कर्पूरं चंदनं धूपो नैवेद्यं घृतपोलिकाः। हविरश्वत्थसमिधश्चित्रान्नेन बलिं हरेत् ॥ २४ ॥ अजपाद्बे भवो व्याधिः सर्वदा निधनप्रदः। अथवा बहुभिर्मासैर्दिवसैर्वा विमुंचति ॥ नामपादकरं भूम्यामाकाशे त्वपरं द्वयं। प्रसादप्रांजलिः साक्षादीश्वरं चिंतयन् स्थितः ॥ शमग्निरित्यस्याजपाद्गायत्री चतुराननः। कुंकुमं चंदनं गंधं पुष्पं श्वेतार्कसंभवं ॥ धूपः शतौषधीमिश्रो नैवेद्यं दधिपायसं । हविः कूष्मांडखंडः स्याद्दध्यन्नेन बलिं हरेत् ॥ २५ ॥ अहिवुध्न्ये भवो व्याधिः सार्धमासेन मुंचति। नमस्तेरुद्रइत्यस्य सर्वे तत्रैव संस्थिताः ॥ गंधं चंदनकर्पूरं पुष्पं पद्मोत्पलं शुभं। सबिल्वगुग्गुलुर्धूपो नैवेद्यं घृतपायसं ॥ मुद्गमाषतिलान्नाज्ययवव्रीहिमयं हविः। [हविस्तदेव सजलमन्नेन च बलिं हरेत्] ॥२६॥ रेवत्यामुत्थितो व्याधिरष्टरात्रेण मुंचति। हंसःशुचिषदित्यस्य जगती वामदेवकः ॥ पूषा च देवतांऽभोजवर्णोऽभोजधरः शुभः। रक्तचंदनगंधोऽत्र पुष्पं मंदारसंज्ञकं ॥ धूपस्तु गुग्गुलुः साज्यो नैवेद्यं घृतपायसं। हविस्तदेव सजलं दध्यन्नेन बलिं हरेत् ॥ मंत्रस्तु। भूतेशानुसृतो यस्माद्रोगनाथ महाज्वर। रोगादस्माच्च मां त्राहि त्वं गृहीत्वोत्तमं बलिं ॥ २७ ॥ प्रतिपद्युत्थितो व्याधिर्द्वादशाहेन मुंचति। अग्निस्तु देवता तत्र कृसरान्नं बलिं हरेत् ॥ १ ॥ द्वितीयायां भवेद्व्याधिः पंचरात्रेण मुंचति। ब्रह्मा तु देवता तत्र पायसेन बलिं हरेत् ॥ २ ॥ तृतीयायां भवेद्व्याधिः सप्तरात्रेण मुंचति। कामस्तु देवता तत्र घृतान्नेन बलिं हरेत् ॥ ३ ॥ चतुर्थ्यामुत्थितो व्याधिर्दशरात्रेण मुंचति । चंद्रस्तु देवता तत्र घृतान्नेन बलिं हरेत् ॥ ४ ॥ पंचम्यामुत्थितो व्याधिर्नवरात्रेण मुंचति। नागस्तु देवता तत्र दुग्धान्नेन बलिं हरेत् ॥ ५ ॥ षष्ठ्यां समुत्थितो व्याधिश्चतूरात्रेण मुंचति। स्कंदस्तु देवता तत्र मुद्गान्नेन बलिं हरेत् ॥ ६ ॥ सप्तम्यामुत्थितो व्याधिरष्टरात्रेण मुंचति । अर्यमा देवता तत्र गुडान्नेन बलिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरेत् ॥ ७ ॥ अष्टम्यामुत्थितो व्याधिर्दशरात्रेण मुंचति । बृहस्पतिर्देवताऽत्र पायसान्नं बलिं हरेत् ॥ ८ ॥ नवम्यामुत्थितो व्याधिर्मरणं निश्चितं भवेत् । यमस्तु देवता तत्र माषान्नेन बलिं हरेत् ॥ ९ ॥ दशम्यामुत्थितो व्याधिः पंचरात्रेण मुंचति । सविता देवता तत्र घृतान्नेन बलिं हरेत् ॥ १० ॥ एकादश्युत्थितो व्याधिस्त्रिरात्रेणैव मुंचति । विष्णुश्च देवता तत्र पायसेन बलिं हरेत् ॥ ११ ॥ द्वादश्यामुत्थितो व्याधिर्मरणं निश्चितं भवेत् । रोगी रोगान्न मुच्येत यमलोकं स गच्छति ॥ १२ ॥ त्रयोदश्युत्थितो व्याधिः सप्तरात्रेण मुंचति । वरुणो देवता तत्र लड्डुकान्नैर्बलिं हरेत् ॥ १३ ॥ चतुर्दश्यां भवेद्व्याधिर्मृत्युदो वा द्विमासतः । मुंचंति देवताः सर्वाः पिष्टान्नेन बलिं हरेत् ॥ १४ ॥ पूर्णिमायां भवेद्व्याधिस्त्रिरात्रेणैव मुंचति । चंद्रस्तु देवता तत्र दध्योदनबलिं हरेत्॥१५॥अमावास्याभवो व्याधिरेकमासेन मुंचति । अथवाऽष्टाचत्वारिंशद्दिनानि दाहपीडितः ॥ महामृत्युर्भवेत्तस्य यमलोकं स गच्छति । तत्र शांतिं प्रवक्ष्यामि सर्वदोषोपशांतये ॥ पितॄणां प्रतिमा कार्या सौवर्णी कर्षसंमिता । येचेहपितरश्चेति पूजामंत्र उदीरितः ॥ कृष्णागुरुश्चंदनं च कृष्णपुष्पैस्तु पूजयेत् । समिदाज्यतिलैर्माषचर्वाज्येन च होमयेत् ॥ अष्टोत्तरशतं वाऽपि अष्टाविंशतिरेव वा । कृष्णा गौश्च प्रदातव्या आचार्याय सदक्षिणा ॥ ब्राह्मणान्भोजयेत्पश्चादेकादश स्वशक्तितः । सर्वारिष्टप्रशांत्यर्थं दीर्घायुश्च सुखी भवेत् ॥ १६ ॥ रविवारे भवेद्व्याधिर्दशरात्रेण मुंचति । सविता देवता तत्र पायसेन बलिं हरेत् ॥ १ ॥ इंदुवारे भवेद्व्याधिः सप्तरात्रेण मुंचति । सोमस्तु देवता तत्र घृतान्नेन बलिं हरेत् ॥ २ ॥ भौमवारे भवेद्व्याधिः क्लेशाय मरणाय वा । कुजस्तु देवता तत्र रक्तान्नेन बलिं हरेत् ॥ ३ ॥ बुधवारे भवेव्द्याधिः सप्तरात्रेण मुंचति । बुधस्तु देवता तत्र मुद्गान्नेन बलिं हरेत् ॥ ४ ॥ गुरुवारे भवेव्द्याधिः पंचरात्रेण मुंचति । गुरुस्तु देवता तत्र हरिद्रान्नं बलिं हरेत् ॥ ५ ॥ भृगुवारे भवेव्द्याधिः सप्तरात्रेण मुंचति । भृगुश्च देवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र हरिद्रान्नं बलिं हरेत् ॥ ६ ॥ शनिवारे भवेव्द्याधिर्मासार्धेन विमुंचति । शनिस्तु देवता तत्र माषान्नेन बलिं हरेत् ॥ ७ ॥ पंचराश्यादि-षड्वर्गाद् बलिं दद्यात्तदीश्वरे । यो बलिं कुरुते सम्यग् रोगी रोगात्प्रमुच्यते॥ आधाननिधनप्रत्यग्जन्माह्वयविपत्करे । नक्षत्रे जनितो व्याधिः क्लेशाय मरणाय च ॥ आश्लेषार्द्रात्रिपूर्वायमवरुणमरुच्छक्रताराऽनलाः स्युर्द्वादश्यां स्कंदरिक्तातिथिषु च रविजाऽऽराऽर्कवारेषु येषां । रोगः संजायते ते यमपुरमचिरात्प्राप्नुवंत्येव चंद्रे जन्मन्यष्टाख्यबंधुव्ययभवनगते मृत्युलग्ने च राशौ ॥ इति शांतिरत्ने रोगोत्पत्तौ नक्षत्रतिथिवारशांतयः ॥ ॥ अथ प्रयोगः । कर्ता शुभकाले आचमनादिदेशकालस्मरणांते ममोत्पन्नस्य व्याधेर्जीवच्छरीराविरोधेन समूलनाशपूर्वकक्षिप्रारोग्यसिद्धिद्वारा श्री० अमुकनक्षत्रतिथिवाराधिपमंत्रस्य अष्टोत्तरसहस्रादिसंख्यया जपं करिष्ये इति संकल्प्य जपं कुर्यात् । अन्यद्वारा तच्चिकीर्षायां तु तथैव संकल्प्य तदर्थं ब्राह्मणवरणाद्यंते पुनर्मासपक्षाद्युल्लिख्य ममोत्पन्नस्य व्याधे० सग्रहमखां वृद्धवसिष्ठोक्तां शांतिं० । गणेशपूजनाद्याचार्यऋत्विग्वरणांतं कुर्यात् । आचार्यः प्रादेशकरणांते गृहस्य प्राच्यामुदीच्यामैशान्यां वा गोमयोपलिप्ते शुचिदेशे तंडुलोपरि कुंकुमादिनाऽष्टदलं पद्मं विरच्य तत्कर्णिकायां यथाशक्तिसुवर्णनिर्मितं पंचामृतैः शुद्धोदकैश्च प्रक्षालितं प्रतिमात्रयं निधाय तत्र तिथिवारनक्षत्राधिपांस्तत्तन्मंत्रैरावाह्य ध्यात्वा षोडशोपचारैः पूजयेत् । तत्र वस्त्रगंधादि तत्तदुक्तं ग्राह्यं (उक्तगंधाऽभावे चंदनं । पुष्पाऽभावे शतपत्रं । धूपाऽभावे गुग्गुलुः । नैवेद्याऽभावे घृतौदनं । मंत्राऽपरिज्ञाने च गायत्रीति दिक्) ततस्तत्पूर्वे महीद्यौरित्यादिविधिना रक्तवर्णं कलशं संस्थाप्य जलेनापूर्य गंधादिक्षेपांते शतौषधिमृत्पंचगव्यसद्बीजमधुकुशांश्च तत्तन्मंत्रैः क्षिप्त्वा शुक्लवस्त्रेणावेष्ट्य तत्र सर्वेसमुद्राइति तीर्थानि तत्त्वायामीति वरुणं चावाह्य पूजयेत् । ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वाधानाद्याज्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागहोमांते ग्रहादिहोमोत्तरं स्थापितदेवताभ्यस्तत्तन्मंत्रैरुक्तद्रव्यैरष्टसहस्रसंख्यया होमं कृत्वा समस्तव्याहृतिभिस्तावतीरेव तिलाहुतीर्जुहुयात् (अत्र सर्वत्र मृत्युनिर्देशेऽष्टसहस्रमन्यत्राऽष्टशतमष्टाविंशतिर्वेति संख्यायां विवेकः । उक्तद्रव्याऽलाभे द्रव्याऽनुक्तौ च तिलैरेव होमः) ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समाप्य शुद्धवस्त्रादिधरं प्राङ्मुखोपविष्टं रोगिणं स्थापितकलशोदकेन समुद्रज्येष्ठादिमंत्रैर्ग्रहमंत्रैः सुरास्त्वामित्यादिपौराणैश्चाभिषिंचेत् । ततः कर्ता पूजास्थानमागत्याऽग्निं संपूज्य प्रणम्य विभूतिं धृत्वा देवतोत्तरपूजां विधाय नीराजनांते कृतांजलिः प्रार्थयेत् । तत्र मंत्रः । अमृतोद्भव धिष्ण्येश यतस्त्वं शंकरात्मकः । रोगादस्माच्च मां रक्ष तव वश्याश्च धिष्ण्यपाः ॥ तत आचार्यादिभ्यो गवादिदक्षिणादानांते विसर्जितदेवताप्रतिमा वस्त्रदक्षिणासहिता आचार्यहस्ते प्रतिपाद्य विप्रान्संभोज्य भूयसीं दत्वा तैः शांतिं वाचयित्वाशिषो गृहीत्वा कर्मेश्वरायार्पयेत् । इति रोगोत्पत्तौ नक्षत्रतिथिवारशांतिप्रयोगः॥ ॥अथ ग्रहशांतयः । तत्रादौ रविशांतिः । मदनरत्ने भविष्ये। अतःपरं प्रवक्ष्यामि रहस्यं त्वेतदुत्तमं । येन लक्ष्मीर्धृतिस्तुष्टिः पुष्टिः कांतिश्च जायते ॥ आदित्यवारं हस्तेन पूर्वं गृह्य विचक्षणः । (हस्तयुक्ते भानुवारे प्रारंभं कुर्यादित्यर्थः) मंत्रोक्तविधिना सर्वं कुर्यात्पूजादिकं रवेः ॥ प्रत्यर्कं सप्त नक्तानि कृत्वा भक्तिपरो नरः । ततस्तु सप्तमे प्राप्ते कुर्याद्ब्राह्मणभोजनं ॥ भास्करं शुद्धसौवर्णं कृत्वा यत्नेन मानवः । ताम्रपात्रे स्थापयित्वा रक्तपुष्पैः प्रपूजयेत् ॥ रक्तवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितं । घृतेन स्नापयित्वा च लड्डुकान्विनिवेद्य च । होमं घृततिलैः कुर्याद्रविनाम्ना च मंत्रवित् । समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च । दध्ना घृतेन च भिन्नो होमः । सामिधोऽर्कसमिधः । मंत्रेणानेन विदुषे ब्राह्मणाय प्रदापयेत् ॥ आदिदेव नमस्तुभ्यं सप्तसप्ते दिवाकर । त्वं रवे तारयस्वास्मानस्मात्संसारसागरात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतेनानेन राजेंद्र भवेदारोग्यमुत्तमं । द्रव्यसंपत्सुतप्राप्तिरिति पौराणिका विदुः ॥ अपि संवादिनी चेयं शांतिः पुष्टिः सदा नृणां । सूर्यपीडासु घोरासु कृता शांतिः शुभप्रदा ॥ ॥ अथ चंद्रशांतिः । तत्रैव । तद्वच्चित्रासु संगृह्य सोमवारं विचक्षणः । तद्वद्धस्तार्कवत् । अनेनैवोक्तविधिना कुर्यात्पूजादिकं विधोः ॥ सप्तमे तु ततः प्राप्ते कुर्याद्ब्राह्मणभोजनं । सप्तमे नक्ते । कांस्यपात्रेऽथ संस्थाप्य सोमं रजतसंभवं । श्वेतवस्त्रयुगच्छन्नं श्वेतपुष्पैः प्रपूजितं ॥ पादुकोपानहौ छत्रं भाजनासनसंयुतं । होमं घृततिलैः कुर्यात्सोमनाम्ना च मंत्रवित् ॥ समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च ॥ समिधः पालाश्यः । दध्यन्नं शशिने कृत्वा ब्राह्मणाय निवेदयेत् । मंत्रेणानेन राजेंद्र सम्यग्भक्तिसमन्वितः ॥ महादेवप्रियोऽसि त्वं शुद्धगोक्षीरपांडुर । सोम सौम्यो भवाऽस्माकं सर्वदा ते नमो नमः ॥ एवं कृते महासौम्यः सोमस्तुष्टिकरो भवेत् । संतुष्टेऽत्रिसुते तस्मिन् सर्वे सानुग्रहा ग्रहाः ॥ ॥ अथांगारकशांतिः । तत्रैव । स्वात्यामंगारकं गृह्य क्षमायां नक्तभोजनं । क्षमायां भूमौ । सप्तमे त्वथ संप्राप्ते हैमं ताम्रे निवेश्य च ॥ रक्तवस्त्रयुगच्छन्नं कुंकुमेनानुलेपितं । निवेद्य भक्त्या कृसरं पुष्पधूपाक्षतादिभिः ॥ होमं तिलघृतैः कुर्यात्कुजनाम्ना च मंत्रवित् । समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च । समिधः खादिर्यः । मंत्रेणानेन तं दद्याद्ब्राह्मणाय कुटुंबिने । कुज कुप्रभवोऽपि त्वं मंगलः परिपठ्यसे । अमंगलं निहत्याशु सर्वदा यच्छ मंगलं ॥ एवं कृते भौमकृतं दुष्कृतं शांतिमाप्नुयात् । कर्तव्यं भौमपीडासु तस्मात्प्रयतमानसैः ॥ ॥ अथ बुधशांतिः। तत्रैव । विशाखासु बुधं गृह्य सप्तनक्तान्यथाचरेत् । गृह्य आरभ्य । बुधं हेममयं कृत्वा स्थापितं कांस्यभाजने ॥ शुक्लवस्त्रयुगच्छन्नं शुक्लमाल्यानुलेपनं । गुडौदनं सोपहारं ब्राह्मणाय निवेदयेत् ॥ बुध त्वं बुद्धिजननो बोधवान्सर्वदा नृणां । तत्वावबोधं कुरु मे सोम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्र नमो नमः ॥ होमं घृततिलैः कुर्याद्बुधनाम्ना च मंत्रवित् । समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव घृतेन च । समिधोऽपामार्गस्य । बुधशांतिरियं प्रोक्ता बुधवैकृतनाशिनी । बुधदोषेषु कर्तव्या तथा शांतिकपौष्टिके ॥ ॥ अथ गुरुशांतिः । तत्रैव । गुरुं चैवाऽनुराधासु पूजयेद्भक्तितो नरः । पूर्वोक्तविधियोगेन सप्त नक्तान्यथाचरेत् ॥ हैमं हेममये पात्रे स्थापयित्वा बृहस्पतिं । पीतांबरयुगच्छन्नं पीतयज्ञोपवीतिनं ॥ पादुकोपानहच्छत्रकमंडलुविभूषितं । पूजयेत्पीतकुसुमैः कुंकुमेन विलेपितं ॥ धूपदीपादिभिर्द्रव्यैः फलैश्चंदनतंडुलैः । खंडखाद्योपहारैश्च गुरोरग्रे निवेदयेत् ॥ धर्मशास्त्रार्थतत्वज्ञ ज्ञानविज्ञानपारग । विबुधार्तिहराऽचिंत्य देवाचार्य नमोस्तु ते ॥ अनेन मंत्रेण दद्यात् । होमस्तु पूर्ववत् घृततिलैरश्वत्थसमिद्भिर्गुरुनाम्ना । विषमस्थे गुरौ कार्या महाशांतिरियं नृभिः ॥ ॥ अथ शुक्रशांतिः । तत्रैव । शुक्रं ज्येष्ठासु संगृह्य क्षमायां नक्तभोजनं । गुरूक्तक्रममार्गेण द्विजसंतर्पणेन च ॥ सप्तमे त्वथ संप्राप्ते रौप्यं शुक्रं तु कारयेत् । वंशपात्रे च संस्थाप्य पूजयेत्सितपंकजैः ॥ तदभावे सितैः पुष्पैस्तांबूलैश्चंदनेन च । अग्रे तस्य प्रदातव्यं पायसं घृतसंप्लुतं ॥ भार्गवो भर्गशुक्रश्च श्रुतिस्मृतिविशारदः । हित्वा ग्रहकृतान्दोषानायुरारोग्यदोऽस्तु नः ॥ अनेन मंत्रेण दद्यात् । होमस्तु पूर्ववत् घृततिलैः उदुंबरसमिद्भिः शुक्रनाम्ना कार्यः ॥ ॥ अथ शनैश्चरादिशांतिः । तत्रैव । शनैश्चरं राहुकेतूँल्लोहपात्रेषु विन्यसेत् । कृष्णागुरुः स्मृतो धूपो दक्षिणा च स्वशक्तितः ॥ यथाक्रमं शमीदूर्वाकुशानां समिधः स्मृताः । सप्तमे त्वथ संप्राप्ते सौवर्णानथ कारयेत् ॥ कृष्णवस्त्रयुगच्छन्नमेकैकं कारयेद्बुधः । मृगनाभ्या समालभ्य कृसरान्नं निवेद्य च ॥ होमावसाने तत्सर्वंब्राह्मणाय निवेदयेत् । होमस्तूक्तसमिद्भिश्च तेषां नाम्ना च कारयेत् ॥ शनैश्चर नमस्तेस्तु नमस्ते राहवे तथा । केतवे च नमस्तुभ्यं सर्वे शांतिं प्रयच्छत ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेन मंत्रेण दद्यात् । इति ग्रहशांतयः ॥ ॥ अथ नवग्रहदानानि । जातकाभरणे सारावल्यां च । ये खेचरा गोचरतोऽष्टवर्गाद्दशाक्रमाद्वाऽप्यशुभा भवंति । दानादिना ते सुतरां प्रसन्नास्तेनाऽधुना दानविधिं प्रवक्ष्ये ॥ माणिक्यगोधूमसवत्सधेनुकौसुंभवासो गुडहेमताम्रं । आरक्तकं चंदनमंबुजं च वदंति दानं हि विरोचनाय ॥ १ ॥ सद्वंशपात्रस्थिततंडुलांश्च कर्पूरमुक्ताफलशुभ्रवस्त्रं । युगोपयुक्तं वृषभं च रौप्यं चंद्राय दद्याद् घृतपूर्णकुंभं ॥ २ ॥ प्रवालगोधूममसूरिकाश्च वृषोऽरुणश्चापि गुडः सुवर्णं । आरक्तवस्त्रं करवीरपुष्पं ताम्रं च भौमाय वदंति दानं ॥ ३ ॥ चैलं च नीलं कलधौतकांस्यं मुद्गाज्यगारुत्मतसर्वपुष्पं । दासी च दंतो द्विरदस्य नूनं वदंति दानं विधुनंदनाय ॥ ४ ॥ शर्करा च रजनी तुरंगमः पीतधान्यमपि पीतमंबरं । पुष्परागलवणं सकांचनं प्रीतये सुरगुरोः प्रदीयते ॥ ५ ॥ चित्रांबरं शुभ्रतरस्तुरंगो धेनुश्च वज्रं रजतं सुवर्णं । सतंडुलाज्योत्तमगंधयुक्तं वदंति दानं भृगुनंदनाय ॥ ६ ॥ माषाश्च तैलं विमलेंद्रनीलस्तिलाः कुलित्था महिषी च लोहं । कृष्णा च धेनुः प्रवदंति नूनं दुष्टाय दानं रविनंदनाय ॥ ७ ॥ गोमेदरत्नं च तुरंगमश्च सुनीलचैलामलकंबलोऽजः । तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदंति ॥ ८ ॥ वैदूर्यरत्नं सतिलं च तैलं सुकंबलश्चापि मदो मृगस्य । शस्त्रं च केतोः परितोषहेतोश्छागश्च दानं कथितं मुनींद्रैः ॥ ९ ॥ एषां दानमंत्रा विधिश्च मत्कृते दानकमलाकरे ज्ञेयः । इति नवग्रहदानानि । " दा० क० ब्रह्मांडे । ग्रहदानक्रमं वक्ष्ये सर्वसिद्धिकरं परं । सर्वशांतिकरं नृणां सर्वपापप्रणाशनं ॥ तथा । हस्तमात्रं द्विहस्तं वा त्रिहस्तं वाऽथ नारद । चतुरस्रां समां भूमिं गोमयेनोपलेपयेत् ॥ रेखाः प्राच्य उदीच्यस्तु चतस्रस्तु तथा समाः । नवकोष्ठेषु पद्मानि विन्यसेच्छ्वेततंडुलैः ॥ आदित्यश्चंद्रमा भौमो बुधो जीवः सितोऽर्कजः । राहुः केतुरिति प्रोक्ता ग्रहा लोकसुखावहाः ॥ एषां हिरण्यरूपाणि कारयित्वा यथाविधि । त्रिनिष्केणाथवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्याद्यथाशक्त्या पृथक्पृथक् ॥ रूपाणि मंत्रेषु वक्ष्यंते । तद्वर्णगंधपुष्पाद्यैरर्चयेत्स्वस्वमंत्रकैः । दानं शूद्रोऽथवा कुर्यात्स्त्री वा तत्र तु नारद ॥ भूलेपनादि यत्कार्यं सर्वं विप्रेण कारयेत् । स्नानकाले तु संप्राप्ते स्नात्वा कुशतिलोदकैः ॥ अर्चयित्वा स्वयं दद्यादहस्करमुखान् ग्रहान् । प्रत्येकमेकविप्राय स्ववर्णं मंत्रमीरयन् ॥ पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः । दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥ १ ॥ श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडधरो द्विबाहुः । चंद्रोऽमृतात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः ॥ २ ॥ रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् । धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ॥ ३ ॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी । चर्मोऽसिधृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधोऽस्तु ॥ ४ ॥ पीतावरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः । दधाति दंडं च कमंडलुं च तथाऽक्षसूत्रं वरदोऽस्तु मह्यं ॥ ५ ॥ श्वेतांबरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः । तथाऽक्षसूत्रं च कमंडलुं च दंडं च बिभ्रद्वरदोऽस्तु मह्यं ॥ ६ ॥ नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् । चतुर्भुजः सूर्यसुतः प्रशांतः स चास्तु मह्यं वरमंदगामी ॥ ७ ॥ नीलांबरो नीलवपुः किरीटी करालवक्त्रः करवालशूली । चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोऽस्तु मह्यं ॥ ८ ॥ धूम्रो द्विबाहुर्वरदो गदाभृद् गृध्रासनस्थो विकृताननश्च । किरीटकेयूरविभूषितांगः सदाऽस्तु मे केतुगणः प्रशांतः ॥ ९ ॥ इत्युक्त्वा दापयेत्सर्वानादित्यादीन्नवग्रहान् । पुरुषो वाऽथ नारी वा यथोक्तं फलमाप्नुयात् ॥ मध्यमं गुरवे दद्यादन्यस्मै वा प्रदापयेत् । अथवा दक्षिणा देया सुवर्णं वाससी शुभे ॥ इति ग्रहदानविधिः ॥ ”

अथ रत्नधारणं । तत्रैव । माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगोर्माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मतं । देवेज्यस्य च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्परागमसुरामात्यस्य वज्रं शनेर्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैदूर्यके ॥ (महामूल्यरत्नधारणाऽशक्तौ । धार्यं तुष्ट्यै विद्रुमं भौमभान्वो रूप्यं शुक्रेंद्वोश्च हेमेंदुजस्य । मुक्ता सूरेर्लोहमर्कात्मजस्य लाजावर्तः कीर्तितः शेषयोश्चेति श्रीपत्युक्तं धार्यं । केचित्तु औषधिमूलानि धार्याणीत्याहुः । तानि तु । मूलं धार्यं त्रिशूल्याः सवितरि विगुणे क्षीरिकामूलमिंदौ जिह्वाऽहेर्भूमिपुत्रे रजनिकरसुते वृद्धदारोश्च मूलं । भार्ङ्गी जीवेऽथ शुक्रे भवति शुभकरं सिंहपुच्छस्य मूलं विच्छोलं चाऽर्कपुत्रे तमसि मलयजं केतुदोषेऽश्वगंधं ॥ त्रिशूली बिल्वः । क्षीरिका क्षीरिणी । अहिजिह्वा मनःशिला । वृद्धदारुर्विधारः । भार्ङ्गी प्रसिद्धा । सिंहपुच्छं वाघोटं । मलयजं चंदनं । अश्वगंधं प्रसिद्धं)

॥ अथ ग्रहस्नानानि । विष्णुधर्मोत्तरे । मंजिष्ठा मदमातंगं कुंकुमं रक्तचंदनं । पूर्णकुंभे कृतं ताम्रे सूर्यस्नानं विधीयते ॥ मदमातंगं गजमदः । उशीरं च शिरीषं च कुंकुमं रक्तचंदनं । शंखन्यस्तमिदं स्नानं चंद्रदोषविनाशनं ॥ खदिरं देवदारुं च तिलानामलकानि च । पूर्णकुंभे कृतं रौप्ये भौमपीडाविनाशनं ॥ नदीसंगमतोयानि तन्मृदा सहितानि च । न्यस्तानि कुंभे माहेये बुधपीडाविनाशनं ॥ माहेये मृन्मये । औदुंबरं तथा बिल्वं वटमामलकं तथा । न्यस्तं तु कुंभे सौवर्णे जीवपीडाविनाशनं ॥ गोरोचना नागमदः शतपुष्पा शतावरी । विन्यस्ता राजते कुंभे शुक्रपीडाविनाशनं ॥ तिलान्माषान्प्रियंगुं च गंधपुष्पं तथैव च । न्यस्तं कार्ष्णायसे कुंभे सौरिपीडाविनाशनं ॥ गुग्गुलुं हिंगुलं तालं शुभां चैव मनःशिलां । शृंगे च माहिषे न्यस्येद्राहुपीडाविनाशनं ॥ तालं हरितालं । वराहविहतां राजन्पर्वताग्रमृदं तथा । छागीक्षीरं खड्गपात्रे केतुपीडाविनाशनं ॥ ग्रहस्नानमिदं प्रोक्तं सर्वपीडाविनाशनं । इति ग्रहस्नानानि ॥

॥ अथ स्कांदे गुरुपूजा । मदनरत्ने पिप्पलाद उवाच । गुरुपूजां प्रवक्ष्यामि यथोक्तां ब्रह्मणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरा । लोकानामुपकाराय सर्वोपद्रवशांतये ॥ कन्याविवाहकाले तु गुरोः शुद्धिर्न विद्यते । ब्राह्मणस्योपनयने यस्य स्याद्दुःस्थितो गुरुः ॥ (दुःस्थितः अष्टमादिस्थानास्थितः) एभिः पूजा गुरोः कार्या विधिवद्भक्तिभावितैः । मदंतीकामपुष्पाणि पत्रं पालाशसर्षपाः ॥ मदंती यूथिका । कामो दमनं । गुडूची चाप्यपामार्गं विडंगं शंखिनी वचा । सहदेवी विष्णुक्रांता सर्वौषध्यः शतावरी ॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनं । वचा कचोरमुस्तं च सर्वौषध्यः प्रकीर्तिताः ॥ तथैवाऽश्वत्थभृंगाश्च पंचगव्यं जलं तथा । नूतनं सोदकुंभं च पीतवस्त्रसमन्वितं ॥ पंचरत्नैः समायुक्तमैशान्यां स्थापितेऽनलात् । याओषधीरितिमंत्रेण सर्वास्त्वस्मिन्विनिक्षिपेत् ॥ कुंभस्योपरिभागे तु स्थापयित्वा बृहस्पतिं । सुवर्णपात्रे सौवर्णी प्रतिमां तु युधिष्ठिर ॥ कारयेत्तु यथाशक्त्या वित्तशाठ्यविवर्जितः । पीतवस्त्रयुगच्छन्नं पीतयज्ञोपवीतिनं ॥ पूजयेद्गंधपुष्पाद्यैस्ततो होमं समाचरेत् । समिधोऽश्वत्थवृक्षस्य हुनेदष्टोत्तरं शतं ॥ तिलव्रीहियवं मिश्रं होतव्यं च यथाक्रमं । “ सं० कौ० अनेन ग्रहमखदृष्टस्य समिद्धोमानंतरभाविनश्चवर्ज्यहोमस्यानंतरमागंतुरयं होमः कार्य इति ज्ञाप्यते ” बृहस्पतेतिमंत्रेण ऋषिच्छंदःसमन्वितं ॥ मंत्रेणानेन जुहुयाद्धान्यपूर्वं च यत्नतः । ततो होमावसाने तु पूजयेच्च बृहस्पतिं ॥ पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्च भक्तितः । दध्योदनं च नैवेद्यं फलतांबूलसंयुतं ॥ मंत्रेणानेन कौंतेय समभ्यर्च्य पुनःपुनः । नमस्तेऽगिरसां नाथ वाक्पतेऽथ बृहस्पते । क्रूरग्रहैः पीडितानाममृताय नमो नमः ॥ पूजयित्वा सुराचार्यं पश्चादर्घ्यं निवेदयेत् । तत्र मंत्रः । गंभीरदृढरूपांग देवेज्य सुमते प्रभो । नमस्ते वाक्पते शांत गृहाणार्घ्यं बृहस्पते ॥ अर्घ्यं दत्वा सुरेशस्य जपहोमं समापयेत् ॥ भक्त्या यत्ते सुराचार्य होमपूजादि सत्कृतं । तत्त्वं गृहाण शांत्यर्थं बृहस्पते नमो नमः ॥ मंत्रेणानेन संकल्प्य पश्चात्संप्रार्थयेन्नृप । जीवो बृहस्पतिः सूरिराचार्यो गुरुरंगिराः । वाचस्पतिर्देवमंत्री शुभं कुर्यात्सदा मम॥ एवं संप्रार्थयेद्देवमाचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यं च प्रपूजयेत् । सर्वोपस्करसंयुक्तां प्रतिमां तां युधिष्ठिर ॥ प्रणम्य च गवा युक्तामाचार्याय निवेदयेत् । अथाचार्यस्तु नियतो वेदवेदांगपारगः ॥ यजमानं सपत्नीकं शांतचित्तं जितेंद्रियं । कुंभोदकं गृहीत्वा तु मंत्रैरेतैः प्रसिंचयेत् ॥ इदमापोऽथ मंत्रेण तामग्नीतिऋचा तथा । याओषधीरश्वावतीः कूष्मांडैश्चाभिषेचयेत् ॥ पश्चात्संभोजयेद्विप्रान् यथाशक्त्या युधिष्ठिर । एवं कृत्वा गुरोः पूजां सर्वान्कामानवाप्नुयात् ॥ संक्रांतौ गुरुसंक्रांतौ । " सं॰ कौ॰ शौनकः । कन्यकोद्वाहकाले तु आनुकूल्यं न विद्यते । ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥ सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् । ऐशान्यां धवलं कुंभं धान्योपरि निधाय च ॥ दमनं मधुपुष्पाणि पत्रपालाशसर्षपान् । मांसीगुडूच्यपामार्गविडंगं शंखिनीं वचां ॥ सहदेवीविष्णुक्रांतासर्वौषधिशतावरीः । कुंभे निक्षिपेदिति शेषः । कृत्वाज्यभागपर्यंतं स्वशाखोक्तविधानतः ॥ ग्रहोक्तमंडलेऽभ्यर्च्य पीतपुष्पाक्षतादिभिः । देवपूजोत्तरे काले ततः कुंभानुमंत्रणं ॥ अश्वत्थसमिधश्चाज्यं पायसं सर्पिषा युतं । यवव्रीहितिलाः साज्या मंत्रेणैव बृहस्पतेः ॥ अष्टोत्तरशतं सर्वं होमशेषं समापयेत् । पुत्रदारसमेतस्य अभिषेकं समाचरेत् ॥ कुंभाभिमंत्रणोक्तैश्च समुद्रज्येष्ठामंत्रतः । प्रतिमां कुंभवस्त्रं च आचार्याय निवेदयेत् ॥ ब्राह्मणान्भोजयेत्पश्चाच्छुभदः स्यान्न संशयः । अत्र च शौनकोक्तौ स्कांदोक्तौ च शाखाभेदेन द्वादशकपालैकादशकपालादिभेदस्येव यूथिकासदसत्त्वादिप्रयुक्तषड्वैलक्षण्यस्यापि कर्मभेदकत्वाऽसंभवादुभयगतगुणोपसंहारेण कुंभानुमंत्रणादिसाधारणधर्माणां दीर्घचतुरस्राद्यसाधारणधर्माणां विनियोगवशेनापेक्षितानां ग्रहमखात्स्वीकारेण तावद्भिरेव ग्रहमेधीयवन्नैराकांक्ष्यसंभवेनाऽवियुक्ततत्तत्यधर्मानादरेण प्रयोगं वदामः । इति बृहस्पतिशांतिः ॥ ॥अथ प्रयोगः । कर्ता देशकालौ स्मृत्व अस्यकुमारस्योपनयनकाले बृहस्पत्यानुकूल्यसिद्धिद्वारा श्री॰ बृहस्पतिशांतिं करिष्ये इति संकल्प्य (कन्याविवाहे तु अस्याः कन्यायाः वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाहकाले इत्यूहः) गणेशपूजनाद्याचार्यऋत्विग्वरणांतं कुर्यात् । आचार्यः प्रादेशांते स्थंडिलादैशान्यां महीद्यौरित्यादिविधिना स्थापिते धवलकुंभे जलपूरणगंधादिक्षेपांते गायत्र्यादिमंत्रैः पंचगव्यं देवस्यत्वा० मभिषिंचामीति कुशोदकं याओषधीरिति यूथिकादमनमधुपुष्पाणि पत्रं (पत्रजमिति प्रसिद्धं) पलाशसर्षपजटामांसीगुडूच्यपामार्गविडंगशंखिनीवचासहदेवीविष्णुक्रांताशतावरीः सर्वौषधीश्च निक्षिप्य पीतवस्त्रेणावेष्ट्य पूर्णपात्रेऽष्टदलं विलिख्य तत्रोत्तरदले हरिताक्षतनिर्मितदीर्घचतुरस्रपीठे उक्तलक्षणसौवर्णप्रतिमायां बृहस्पते गृत्स० इति बृहस्पतिमावाहयेत् । ततः स्थंडिलेग्निं प्रतिष्ठाप्यान्वादध्यात् । चक्षुषीआज्येनेत्यंते बृहस्पतिं प्रधानदेवं अश्वत्थसमिदाज्यघृताक्तपायसैः घृताक्तसंमिश्रयवव्रीहितिलैश्च प्रतिद्रव्यमष्टोत्तरशतसंख्याभिराहुतिभिः शेषेणेत्याद्याज्यभागहोमांते बृहस्पतिं षोडशोपचारैः पूजयेत् । तत्र विशेषाः । पीतवर्णानि वस्त्रयुगोपवीतचंदनाक्षतचंपकादिपुष्पाणि बिल्वमज्जाधूपः घृतदीपः दध्योदनं नैवेद्यं पुष्परागमाणिक्यहेम्नामन्यतमं दक्षिणा । पूजांते कुंभमभिमंत्रयेत । तत्र मंत्राः। आपोहिष्ठेतितिसृणां० । मोषुवरुणेतिपंचानां वसिष्ठो वरुणो गायत्र्यंत्या जगती । स्वादिष्ठयेतितिसृणां मधुच्छंदाः० । कुंभानुमंत्रणे० । ततो यजमानेन त्यागे कृते यथान्वाधानमुक्तद्रव्यैर्बृहस्पतिमंत्रेण होमं कृत्वा स्विष्टकृदादिहोमशेषं समापयेत् । ततो यजमानः पूर्वोक्तैर्गंधाद्युपचारैर्बृहस्पतिं संपूज्य नमस्कृत्य ताम्रपात्रे शुद्धोदकं पीतवर्णानि गंधाक्षतपुष्पाणि फलं हिरण्यं चादाय गंभीरदृढरूपांग देवेज्यसुमतेप्रभो । नमस्तेवाक्पतेशांत गृहाणार्घ्यंबृहस्पते । इत्यर्घ्यं दत्वा । भक्त्यायत्तेसुराचार्य होमपूजादिसत्कृतं । तत्त्वंगृहाणशांत्यर्थं बृहस्पतेनमोनमः इति कृतं कर्म तस्मै निवेद्य । जीवोबृहस्पतिःसूरिराचार्योगुरुरंगिराः । वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदाममेति प्रार्थ्य आचार्यं संपूज्य गोयुक्तां सोपस्करां विसर्जितबृहस्पतिप्रतिमां दक्षिणात्वेन तस्मै दत्वा ऋत्विग्भ्यो यथाशक्तिदक्षिणां दद्यात् । तत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यः कलशोदकेन सपत्नीकं सापत्यं यजमानं मंत्रैरभिषिंचेत् । तेंच । आपोहिष्ठेतितिसृणां० । मोषुवरुणेति पंचाना० । स्वादिष्ठयेति तिसृणां० । समुद्रज्येष्ठाइतिचतसृणां० । इदमापः सिंधु० । तामग्निवर्णां सोभरि० । याओषधीर्भिषगोधयोऽनुष्टुप् । अश्वावतीर्गोमतीर्वसिष्ठ उषसस्त्रिष्टुप् । अभिषेके० । ततो यद्देवादेवहेडनंयददीव्यमायुष्टेविश्वतोदधदित्यापस्तंबशाखीयैरनुवाकैस्तच्छंयोरिति सुरास्त्वामित्यादिभिश्चाभिषिक्तो यजमानोऽग्निं संपूज्य विभूतिं धृत्वा यथाशक्तिविप्रान्संभोज्य भूयसीं दत्वाशिषो गृहीत्वा कर्म समापयेत् । इति कौस्तुभानुसारी बृहस्पतिशांतिप्रयोगः ॥ ॥ अथ प्रतिशुक्रादिविधिः । वृद्धवसिष्ठः । शुक्रे चाऽस्तंगते यात्रा जीवे वाऽस्तमुपागते । तयोर्बाल्ये च वार्ध्ये च सा यात्रा भयरोगदा ॥ प्रतिशुक्रं प्रतिबुधं प्रतिभौमं च गर्हिता । तीर्थयात्राविधौ तेषां प्रतिशुक्रो न विद्यते ॥ कश्यपेषु वसिष्ठेषु भृगुष्वांगिरसेषु च । भरद्वाजेषु वत्सेषु प्रतिशुक्रो न विद्यते ॥ अन्येषां संमुखे दोषः प्रतिशुक्रस्य सर्वदा । कृत्वा शांतिं प्रयत्नेन पश्चात्सर्वं समाचरेत् ॥ उपोष्य भृगुवारे च यावच्छुक्रोदयं व्रती । रजतेन च शुद्धेन कारयेत्प्रतिमां भृगोः ॥ लिखेदष्टदलं पद्मं कांस्यपात्रे च तंडुलैः । शुक्लपुष्पाक्षतैर्गंधैः प्रतिमां तत्र पूजयेत् ॥ उपचारान्निवेद्याथ शुक्रंतेअन्यदित्यृचा । तन्मंत्रेण जपं कुर्यात्सम्यगष्टोत्तरं शतं ॥ क्षीरगंधाक्षतैः पुष्पैर्भक्त्या चार्घ्यं प्रदापयेत् । दैत्यमंत्री दिव्यदर्शी चोशना भार्गवः कविः ॥ श्वेतोऽथ मंडली काव्यो विधिस्थो भृगवे नमः । दत्वेत्यर्घ्यं प्रयत्नेन प्रार्थयेच्चैव भक्तितः ॥ त्वत्पूजयाऽनया शुक्र संमुखत्वसमुद्भवं । दोषं विनाशय क्षिप्रं रक्ष मां तेजसां निधे ॥ दैवज्ञाय ततो दद्यात्प्रतिमां श्वेतगोयुतां । एवं कृते न दोषः स्याद्विजयी चार्थवान्भवेत् ॥ मात्स्येऽपि विशेष उक्तः । अथातः शृणु भूपाल प्रतिशुक्रप्रशांतये । यात्रारंभेऽवसाने च तथा शुक्रोदये सति ॥ शुक्रपूजा प्रकर्तव्या ता निशामय भारत । राजते वाऽथ सौवर्णे कांस्यपात्रेऽथवा पुनः ॥ शुक्लपुष्पांबरयुते श्वेततंडुलपू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिते । निधाय राजतं शुक्रं शुचि [भुवि] मुक्ताफलान्वितं ॥ महाश्वेतगवा युक्तं सामगाय निवेदयेत् । सह तेन सवत्सां गामिति कचित्पाठः । नमस्ते सर्वलोकेश नमस्ते भृगुनंदन। कवे सर्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोस्तु ते ॥ दत्वैवमर्घ्यं कौंतेय प्रणिपत्य विसर्जयेत् । यावच्छुक्रस्य न कृता पूजा सोहलकैः शुभैः ॥ वटकैः पोलिकाभिश्च गोधूमैश्चणकैरपि । तावत्फलं कथं लभ्यं नृभिः कामार्थसिद्धये ॥ एवं शुक्रोदये कुर्वन् यात्रादिषु च भारत । अर्वाग्राश्यागमे चैव अभीष्टं स तदाप्नुयात् ॥ तद्वद्वाचस्पतेः पूजां प्रवक्ष्यामि युधिष्ठिर । सौवर्णपात्रे सौवर्णममरेशपुरोहितं ॥ पीतपुष्पांबरधरं कृत्वा स्नात्वाऽथ सर्षपैः । पलाशाश्वत्थभंगेन पंचगव्यतिलेन तु ॥ भंगः पल्लवः । पीतांगरागवसनो घृतहोमं तु कारयेत् । प्रणम्य च गवा सार्धं ब्राह्मणाय निवेदयेत् ॥ नमस्तेंऽगिरसां नाथ वाक्पते तु बृहस्पते । क्रूरग्रहैः पीडितानाममृताय नमो नमः ॥ इत्यर्घ्यमंत्रः । संक्रांतावपि कौंतेय यात्रास्वभ्युदयेषु च । कुर्वन् बृहस्पतेः पूजां सर्वान्कामान्समश्नुते ॥ संक्रांतौ गुरोः । अथवा मौक्तिकान्येव सुवृत्तानि बृहंति च । भार्गवांगिरसौ चिंत्य तान्येव प्रतिपादयेत् ॥ भक्त्या मौक्तिकदानेन दत्तेन कुरुनंदन । कुरूपता दृशोः पुंसां न कदाचित्प्रजायते ॥ ये भार्गवोदयमवाप्य सवस्त्रपुष्पं कुर्वंत्यनन्यमनसोंऽगिरसश्च पूजां । तेषां गृहं प्रवसतां प्रतिशुक्रजातो विघ्नो न संभवति भारत पुण्यभाजां ॥ इति प्रतिशुक्रादिविधिः ॥ ॥ अथ शनिशांतयः । मदनरत्ने भविष्ये । ततो मंदस्य दिवसे स्नानमभ्यंगपूर्वकं । कार्यं देयं च विप्राय तैलमभ्यंगहेतवे ॥ यस्तु संवत्सरं यावत्प्राप्ते शनिदिने नरः । तैलं ददाति विप्रेभ्यः स्वशक्त्याऽभ्यंजनेऽपि वा ॥ ततः संवत्सरस्यांते प्राप्ते तस्य दिने पुनः । लौहं घटार्पितं सौरिं तैलकुंभे विनिक्षिपेत् ॥ लौहे वा मृन्मये वाऽथ कृष्णवस्त्रयुगान्वितं । कृष्णगोदक्षिणायुक्तं कृष्णकंबलशायिनं ॥ स्वयमभ्यंगतः स्नात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णपुष्पैस्तमर्चयेत् । सुगंधिगंधपुष्पैश्च कृसरान्नैस्तिलौदनैः ॥ पूजयित्वा सूर्यपुत्रं क्षमस्वेति पुनःपुनः । कृष्णाय द्विजमुख्याय तदभावेतराय वा ॥ (इतरायेति छेदः आर्ष चैतत्) देयः शनैश्चरो भक्त्या मंत्रेणानेन वै द्विज । क्रूरावलोकनवशाद्भवनं नाप्नोति यो ग्रहो रुष्टः । तुष्टो धनकनकसुखं ददाति सोऽस्मान्छनैश्वरः पातु ॥ यः पुनर्नष्टराज्याय नराय परितोषितः । स्वप्ने ददौ निजं राज्यं स मे सौरिः प्रसीदतु ॥ कोणं नीलांजनप्रख्यं मंदचेष्टाप्रसारिणं । छायामार्तंडसंभूतं नमस्यामि शनैश्चरं ॥ नमोऽर्कपुत्राय शनैश्चराय नीहारवर्णांजनमेचकाय । श्रुत्वा रहस्यं भव कामदस्त्वं फलप्रदो मे भव सूर्यपुत्र ॥ नमोऽस्तु प्रेतराजाय कृशदेहाय वै नमः । शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने ॥ य एभिर्नामभिः स्तौति तस्य तुष्टिं ददात्यसौ । तदीयं तु भयं तस्य स्वप्नेऽपि न भविष्यति ॥ इत्यनेन विधानेन शनिं नत्वा विसर्जयेत् । एवमेतद्व्रतं नित्यं ये चरिष्यंति मानवाः ॥ वासरे वासरे प्राप्ते वत्सरं यावदेव तु । तेषां शानैश्चरी पीडा क्लेशोपि न भविष्यति ॥ कृष्णायसेन घटितां यमराजमूर्तिं लोहे निधाय घटके तिलतैलपूर्णे । यो ब्राह्मणाय रविजं प्रददाति भक्त्या पीडा शनैश्चरकृता नहि बाधते तं ॥ स्कांदे । स्कंद उवाच । द्वादशाष्टमजन्मस्थे शनौ सर्वग्रहेश्वरे । किं कर्तव्यं नरैः शांतिविधानं क्लेशशांतये ॥ ईश्वर उवाच । श्रावणे मासि संप्राप्ते शोभने शनिवासरे । लोहरूपं शनिं कृत्वा स्नाप्य पंचामृतेन वै ॥ पुष्पैरष्टविधैर्धूपैः फलैश्चैव विशेषतः । नामभिः पूजयेदेतैः क्रमेण ग्रहसत्तमं ॥ कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रो यमोऽतकः । सौरिः शनैश्चरो मंदः पिप्पलादेन संस्तुतः ॥ शंनोदेवीति सर्वत्र वैदिकेन च पूजयेत् । पूजयित्वा तु नैवेद्यं ततः कुर्यात्क्रमेण तु ॥ समाषभक्तं प्रथमे द्वितीये पायसं शुभं । तृतीये त्वंबिली कार्या चतुर्थे पूरिकाः शुभाः ॥ अंबिली तक्रतंडुलपिष्टकृता यवागूः । (आंबिल इति भाषायां) प्रथमादिशब्दा वासरपराः । स्कांदे नागरखंडे । नारद उवाच ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः। पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः ॥ तस्मात्कुरु स्तुतिं चाऽस्य स्वभक्त्या भास्करेः प्रभोः। प्रसादं गच्छते येन कोपं त्यजति पातकं ॥ ततः कृतांजलिर्भूत्वा स्तुतिं चक्रे स बालकः। पिप्पलादो द्विजश्रेष्ठः प्रणिपत्य मुहुर्मुहुः ॥ नमस्ते कोणसंस्थाय पिंगलाय नमोस्तु ते। नमस्ते बभ्रुरूपाय कृष्णाय च नमोस्तु ते॥नमस्ते रौद्रदेहाय नमस्ते चांतकाय च। नमस्ते यमसंज्ञाय नमस्ते सौरये विभो ॥ नमस्ते मंदसंज्ञाय शनैश्चर नमोस्तु ते। प्रसादं कुरु देवेश दीनस्य प्रणतस्य च॥ शनैश्चर उवाच। परितुष्टोऽस्मि ते वत्स स्तोत्रेणाऽनेन सांप्रतं। वरं वरय भो वत्स येन यच्छामि वांछितं ॥ पिप्पलाद उवाच। अद्यप्रभृति नो पीडा बालानां रविनंदन। त्वया कार्या महाभाग न स्वकीया कथंचन ॥ ग्रावद्वर्षाष्टकं जातं मम वाक्येन सूर्यज। स्तोत्रेणानेन योऽन्यस्त्वां स्तूयात्प्रातरुपस्थितः॥ तस्य पीडा न कर्तव्या त्वया भास्करनंदन। तस्य पीडा न कर्तव्या देयो लाभो महाभुज ॥ अर्धाष्टमिकया योगे तावके संस्थितो नरः। सार्धसप्तवर्षाण्यर्धाष्टमिका। (साडेसाती इति भाषायां) तव वारे तु संप्राप्ते यस्तिलाँल्लोहसंयुतान्। शक्त्या ददाति नो तस्य पीडा कार्या त्वया विभो॥ कृष्णां गां यस्तु विप्राय तवोद्देशेन यच्छति। अर्धाष्टमिकया पीडा तस्य कार्या त्वया नच ॥ शमीसमिद्भिर्यो होमं तवोद्देशेन निर्वपेत्। तथा कृष्णतिलैश्चैव कृष्णपुष्पानुलेपनैः ॥ पूजां करोति यस्तुभ्यं धूपं वै गुग्गुलुं दहेत्। कृष्णवस्त्रेण संवेष्ट्य त्याज्या तस्य त्वया व्यथा ॥ सूत उवाच। एवमुक्तः शनिस्तेन बाढमित्येव जल्प्य च। नारदं समनुज्ञाय जगाम निजसंश्रयं॥ मदनरत्ने प्रभासखंडे। यः पुनः श्रद्धया युक्तः शुचिः स्नातः समाहितः। शमीपत्रैः समभ्यर्च्य प्रतिमां लोहजां मम ॥ माषौदनं तिलैर्मिश्रं दद्याल्लोहं च दक्षिणां। कृष्णां गां वृषभं वाऽपि यो मे दद्याद्विजाय वै ॥ तस्य पीडां न चैवाहं करिष्यामि कदाचन। इति शनैश्चरशांतिः ॥ ॥ अथ राहुशांतिः। ज्योतिषे। जन्मांत्यपंच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुरष्टनवद्विसप्त राहुग्रहो यदि च चारवशेन गच्छेत् । आलोडनं नृपभयं क्षयमर्थनाशं रोगं प्रवासमरणाग्निभयं करोति ॥ इति राहुशांतिः॥ ॥ अथ ग्रहणशांतिः। मात्स्ये। होरायां ग्रस्यते यस्य नक्षत्रे वा निशाकरः। प्राणसंदेहमाप्नोति स वा मरणमृच्छति॥ यस्य त्रिजन्मनक्षत्रे ग्रस्येते शशिभास्करौ। तज्जनानां भवेत्पीडा ये जनाः शांतिवर्जिताः॥ यस्य राशिं समासाद्य भवेद् ग्रहणसंभवः। तस्य स्नानं प्रवक्ष्यामि मंत्रौषधिसमन्वितं॥ चंद्रोपरागं संप्राप्य कृत्वा ब्राह्मणवाचनं। संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः॥ पूर्वमेवोपरागस्य समानीयौषधादिकं । स्थापयेच्चतुरः कुंभानग्रतः सागरानिव ॥ गंजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् । राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ पंचगव्यं पंचरत्नं पंचत्वक्पंचपल्लवं। रोचनं पद्मकं शंखं कुंकुमं रक्तचंदनं ॥ शुक्तिस्फटिकतीर्थांबुसितसर्षपगुग्गुलून् । मधूकं देवदारुं च विष्णुक्रांतां शतावरीं॥ बलां च सहदेवीं च निशाद्वितयमेव च। एतत्सर्वं विनिक्षिप्य कुंभेष्वावाहयेत्सुरान् ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयांतु यजमानस्य दुरितंक्षयकारकाः ॥ गंगे च यमुने चैवेति । योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः । सहस्रनयनश्चेंद्रो ग्रहपीडां व्यपोहतु ॥ मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः । चंद्रोपरागसंभूतामग्निः पीडां० ॥ कर्मसाक्षी तु लोकानां धर्मो महिषवाहनः । यमश्चंद्रोपरागोत्थां ग्रहपीडां० ॥ रक्षोगणाधिपः साक्षान्नीलांजनसमप्रभः । खड्गहस्तोऽतिभीमश्च ग्रह० ॥ नागपाशधरो देवः सदा मकरवाहनः । चंद्रोपरागकलुषं वरुणो मे व्यपोहतु ॥ प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः । वायुश्चंद्रोपरागोत्थां ग्रह० ॥ योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः । चंद्रोपरागदुरितं धनदो मे व्यपोहतु ॥ योऽसाविंदुधरो देवः पिनाकी वृषवाहनः । चंद्रोपरागपापानि निवारयतु शंकरः ॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्ण्वर्करुद्राश्च दहंतु मम पातकं ॥ एवमावाहयेत्कुंभान्मंत्रैरेभिश्च वारुणैः । एतानेव तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रान्स्वर्णपट्टे विलेखयेत् ॥ ताम्रपट्टेऽथवाऽऽलिख्य नववस्त्रे तथैव च। मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः॥ कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्। गृहीत्वा स्थापयेद्रूढं भद्रपीठोपरि स्थिते॥ पूर्वोक्तैरेव मंत्रैश्च यजमाने द्विजोत्तमाः। अभिषेकं ततः कुर्युर्मंत्रैर्वारुणसूक्तकैः॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। आचार्यं वरयेत्पश्चात्स्वर्णपट्टं निवेदयेत्॥ आचार्ये दक्षिणां दद्याद्गोदानं च स्वशक्तितः। होमं चैव प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ निवृत्ते ग्रहणे सर्वं ब्राह्मणेभ्यो विशेषतः। दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितं॥ सूर्यग्रहे सूर्यनामयुक्तान्मंत्रांश्च कीर्तयेत्। अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत्। न तस्य ग्रहणे दोषः कदाचिदपि जायते॥ मदनरत्ने ग्रंथांतरे। दूर्वांकुरोशीरशमीशिलाजित्सर्वार्थसर्वौषधिपंचमृद्भिः। स्नानं विदध्याद्ग्रहणे रवींद्वोः पीडाकरं शांतिवहं हि यस्य॥ ज्योतिषे। त्रिषड्दशायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवींद्वोः। द्विसप्तनंदेषुषु मध्यमं स्याच्छेषेष्वनिष्टं कथितं मुनींद्रैः॥ आय एकादश। नंदा नव। इषवः पंच। मदनरत्ने गर्गः। जन्मसप्ताष्टरिःफांकदशमस्थे निशाकरे। दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि च॥ रिःफं द्वादश। अंकाः नव। निधनं सप्तमतारा। पृथ्वीचंद्रोदये विष्णुधर्मे। यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ। तज्जातानां भवेत्पीडा ये नराः शांतिवर्जिताः॥ तत्रैव पुराणांतरे। सूर्यस्य संक्रमो वाऽपि ग्रहणं चंद्रसूर्ययोः। यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथवा मृतिः॥ तस्य दानं च होमं च देवार्चनजपौ तथा। उपरागाभिषेकं च कुर्याच्छांतिर्भविष्यति॥ स्वर्णेन वाऽथ पिष्टेन कृत्वा सर्पस्य चाकृतिं। ब्राह्मणाय ददेत्तस्य न रोगादिश्च तत्कृतः॥ जन्मदशमैकोनविंशतितारा: त्रिजन्मानि। सर्पस्य तदाकारस्य राहोः। अद्भुतसागरे भार्गवः। यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते। राजभंगं सुहृन्नाशं मरणं चाऽत्र निर्दिशेत्॥ राज्याभिषेकनक्षत्रे इत्यर्थः। भार्गवार्चनदीपिकायां ज्योतिः सागरे। सौवर्णं कास्येनागं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पलेनाऽथ पलार्धतः। तदर्धेन तदर्धेन फणायां मौक्तिकं न्यसेत् ॥ ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः। कांस्ये वा कांतिलोहे वा न्यस्य दद्यात्सदक्षिणं ॥ चंद्रग्रहे तु रूप्यस्य बिंबं दद्यात्सदक्षिणं। नागं रुक्ममयं सूर्यग्रहे बिंबं च हेमजं ॥ तुरंगरथगोभूमि [गोधूम] तिलसर्पिश्च कांचनं । कालविवेके। सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनं । सदक्षिणं सवस्त्रं च ब्राह्मणाय निवेदयेत् ॥ सौवर्णं राजतं वाऽपि बिंबं कृत्वा स्वशक्तितः। उपरागभवक्लेशच्छिदे विप्राय कल्पयेत् ॥ मंत्रस्तु । तमोमय महाभीम सोमसूर्यविमर्दन। हेमताराप्रदानेन मम शांतिप्रदो भव ॥ विधुंतुद नमस्तुभ्यं सिंहिकानंदनाच्युत। दानेनानेन नागस्य रक्ष मां वेधजाद्भयादिति। विशेषस्तु मत्कृते निर्णयसिंधौ ज्ञेयः। अपर्वणि ग्रहणे त्वद्भुतसागरे मयूरचित्रे। अपर्वणि शशांकार्कौ त्विष्टो नाम महाग्रहः। आवृणोति तमःश्यामः सर्वलोकविपत्तये ॥ औदुंबरीसहस्राणि चाष्टौ च जुहुयाद्बुधः। मध्वक्तानि च तान्यन्नं जातवेदस इत्यृचा ॥ विप्राय दक्षिणां दद्याद्धेनुं च वृषभं तथा ॥ इति ग्रहणशांतिः ॥ ॥ अथ केतुशांतिः । तत्फलमाह ज्योतिर्वसिष्ठः। केतोरुदयास्तमयं ज्ञातुं गणितान्न शक्यते यस्मात् । दिव्यांतरिक्षभौमास्तस्मात्त्रिविधाश्च केतवो जगति ॥ एकोत्तरशतभेदा दृश्यंते वा सहस्रभेदास्ते। औत्पातिकरूपत्वाद्भवंति बहवस्तथैको वा ॥ दिवि ऋक्षग्रहजास्ते दिव्याख्याः केतवो महाफलदाः । परिवेषेंद्रधनूल्कास्तथैव गंधर्वनगरनिर्घाताः ॥ गगनविकारजमेतन्मध्यमफलदं तथांतरिक्षं च। भूमिभवा भौमाः स्युश्चरस्थिरा वस्तुसंभवा ये च ॥ तेऽधमफलदास्तेषां कथयामि फलानि रूपाणि। वर्षैर्मासैः पक्षैः क्रमशः परिपाकमुपयांति ॥ स्निग्धः प्रसन्नरूपः शुक्लनिभो ह्रस्वदंडवत्सौम्यः। उदयास्तमये त्वेवं सुभिक्षसौख्यावहः केतुः ॥ धूमनिभो धूमाख्यः केतुर्दोषप्रदो भवति। इंद्रशरासनरूपः स्थूलनिभोऽवर्षभीतिदः सम्यक् ॥ बहुभिः शिखाभिरतुला विद्युन्मणिहारहेमनिभाः। अपरेंद्रदिशोर्द्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्या महाहवं तद्दिगीशानां ॥ शुकमुखवंधूकनिभा वह्निसुताः क्षतजसंनिभा रूक्षाः । दृश्यंतेऽनलदिशि यदि तावंतस्तेऽपि शिखिभयदाः ॥
मृत्युसुता वक्रशिखाः कृष्णा रूक्षाश्च प्रहरणाकाराः । दृश्यंते याम्यायां जनमारभयप्रदास्तेऽपि ॥ क्षितितनया द्वात्रिंशद्दर्पणसदृशाः सर-
श्मयो विशिखाः । क्षुद्भयदाः सशिरस्का यमतनया मृत्युदाश्च शैलनिभाः ॥ शशितनयाः कुसुमनिभाः कुंदेंदुक्षीररजतनिभाः । उत्तरभागे
शिखिनो जंतूनां ते सुभिक्षकराः ॥ त्रिशिखस्त्रिवर्णयुक्तो ब्रह्मसुतो ब्रह्मदंडनिभः । अनियतदिक्प्रभवोऽसौ शांतिकरो ब्रह्मदंडाख्यः ॥ शनि-
तनयास्तारास्थाः शुक्ला ऋजवश्च षट्संख्याः । दृश्यंते द्वित्रदिनैः शुभदा मासैश्च रुग्भयदाः ॥ जीवसुता विकचाख्याः शुक्लास्ताराश्रिताः
स्निग्धाः । याम्यायां दिशि संस्था बहवस्ते पापदाः सततं ॥ बुधतनयाश्चोराख्याः शुक्लाः सूक्ष्मा यथेष्टदिक्प्रभवाः । आमयभयदाः सततं जंतूनां
पंचपंचाशत् ॥ कुजतनयाः कैंकेयाः क्षतजानलसंनिभास्त्रिशूलधराः । याम्यायां दिशि संस्थाः क्षुद्भयदाः षष्टिसंख्याकाः ॥ तामसकीलकसंज्ञा
राहुसुताः सूर्यमंडले दृष्टाः । तेषां तन्निखिलफलं सम्यक्कथितं च सूर्यवारेऽपि ॥ अग्निसुतास्त्वाग्नेय्यां विंशत्यधिकाश्च शतसंख्याः । प्रलयानल-
सदृशाभा भान्वग्नितडिद्भयप्रदास्तेऽपि ॥ अरुणाख्याः श्यामनिभाः शुक्रसुता विविधरूपसंकीर्णाः । शस्त्रक्षुद्भयदास्ते सप्तोत्तरसप्ततिश्च संख्या-
ताः ॥ दंडकसंज्ञाश्चाष्टौ तारासदृशाः प्रजापतेस्तनयाः । द्वाचत्वारिंशोत्तरशताधिकाः पापदा विधातृसुताः ॥ वरुणभवाः कंकाख्या द्वात्रिंशद्
गुल्मयष्टिनिभाः । शशिवत्प्रभासमेता राजान्यत्वं प्रकुर्वंति ॥ कालभवाः षण्णवतिः संख्यातास्ते कबंधनिभाः । तन्नामानः शिखिनः पुंड्रा-
मयभीतिदा जगतः ॥ विमलास्ताराकारा दशदिक्षु समुद्भवाः शिखिनः । एवं सहस्रभेदाः पापाश्चैषां विशेषमभिधास्ये ॥ पश्चिमदिशि संभूत-
श्चोत्तरनम्रश्च सौम्यकेतुः सः । कुरुते सुभिक्षमतुलं सितवर्णोऽसौ महास्निग्धः ॥ दक्षिणनम्रः प्राच्यां तथाविधो याम्यकेतुः सः । रूक्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुद्भयकारी मरकभयं वा करोत्येव ॥ धूमनिभो याम्यायां कपालकेतुर्बृहत्तनुः स्निग्धः । दिक्षु विदिक्षु प्रभवः क्षुन्मरकाऽवृष्टिरोगकरः ॥ प्राच्यां दिशि संभूतः प्रदक्षिणं भ्रमति चक्रवद्रूक्षः । स च चक्रकेतुरनिशं कपालकेतोश्च तुल्यफलः ॥ पश्चिमतः संभूतो याम्यदिशि भ्रमति चाऽप्रदक्षिण्यं । धूमनिभो विषमाख्यः केतुर्भूभारमपनयति ॥ कतिपयदिवसं गत्वा गमननिवृत्तिं करोति धूमनिभः । नरपतिकलहाज्जगतः करोति विलयं स चक्राख्यः ॥ गगनत्रिभागदीर्घः श्यामनिभोऽसौ महासटाकारः । ऋजुवक्रगतिं कुरुते क्रमशो जगतस्त्रिभागहरः॥ गतिरहितो ध्रुवकेतुः प्रमाणवर्णाकृतिर्न भवेत् । ग्रहनक्षत्रोपगमे दृष्टो नैवाऽशुभप्रदः केतुः ॥ उपकरणेषु च राज्ञां सुरगृहतरुपर्वतेषु सदनेषु । दर्शनमुपैति पतितो विनाशिनामेव नियमेन ॥ कुमुदनिभः कुमुदाख्यो दिवसैः षड्भिस्तु पश्चिमे दृष्टः । प्रागुत्तरदिशि यदि वा सुभिक्षमतुलं करोत्येव ॥ तारोपरि मणिकेतुर्याम्यायां दिशि सकृद् दृष्टः। उदयास्तमये समये शुभदोऽसौ क्षीरधारेव ॥ जलधारेव हि ऋज्वी नतया शिखया परेण दृष्टः सः । जलकेतुर्जलसदृशः स सुभिक्षकरश्च सर्वजंतूनां ॥ हरिलांगूलनिभोऽसौ भवकेतुः क्रकचसंनिभो वाऽपि । बहुरोगभयं कुरुते सर्पाकारस्तु तद्भयदः ॥ अपरोऽपि पद्मकेतुः पद्मनिभः पद्मगर्भसंकाशः । क्षेमकरो नृपतीनां सुभिक्षदः सर्वजंतूनां ॥ आवर्तकेतुरयमिह प्रादक्षिण्येन दीप्तिमान् शुक्लः । शुभदो व्यत्ययकेतुस्त्वतुलामयभीतिहेतुरीतिकरः॥ आक्रम्य गगनमखिलं संवर्ताख्यः स धूमनिभः । शूलाग्रस्त्वितरो वा स केतुरसकृद्भयप्रदो जगतः ॥ शुभदाः शुक्लनिभा ये कृष्णास्त्वशुभप्रदा जगतः । केतूनां फलमुक्त्वा वक्ष्ये यद्दस्रभेषु जातानां ॥ अश्विन्यां यदि केतुर्जातस्तदिहाश्वजीविनं हन्यात् । याम्ये म्लेच्छाधिपतिं कालिंगं कृत्तिकायां च ॥ रोहिण्यामतुलबलं निहंति केतुश्च शूरसेनेशं । औशीनरमुख्यपतिं सौम्ये रौद्रे च जलजंतून् ॥ अश्मकदेशाधिपतिं त्वादित्ये पुष्यभे च मगधपतिं । आर्याधिपतिं सार्पे पांड्याधिपतिं च पितृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शां० धिष्ण्ये ॥ भाग्यर्क्षे त्वौज्जयिनं चोत्तरभे दंडनायकानखिलान् । हस्तर्क्षे धनिकवरांश्चित्राया कुरुभवानखिलान् ॥ कांबोजनृपतिमुख्यं प्रभंज- क०
॥११६॥ ने जातकेतुरपि । इक्ष्वाकुवंशनाशं द्विदैवभे मित्रभे च गौडेशं ॥ ज्येष्ठायां यदि जातः स हंति वै सर्वमंडलाधीशं । मूले मद्राधिपतिं जलदैव-
र्क्षे कलिंगदेशपतिं॥गुर्जरदेशाधिपतिं हन्याद्वै वैश्वदेवधिष्ण्योत्थः । केकयनाथं हन्याच्छ्रवणर्क्षे वसुभवोऽखिलान्द्रविडान्॥ नैमिषनृपतिं हन्याच्छ-
तभिषजोऽजांघ्रिजश्च पांचालान् । अहिबुध्न्यर्क्षभवो यः सांकरिकानथ किरातकोणभवान् ॥ पौष्णर्क्षभवः केतुर्द्विजसज्जनधर्ममार्गस्थान् । अ-
भिजिन्नक्षत्रभवः कोंकणदेशं च निशिचरांश्चापि ॥ ये केतवश्चाश्विमुखर्क्षजातास्ताराग्रहादिष्वपि संभवाश्च । कुर्वंति ते तीक्ष्णफलं जनानामन्ये
तु सामान्यफलप्रदाः स्युः ॥ आदिशब्दो ध्रुवसप्तर्ष्यादिषु । अन्येऽपि चलकेतुगदकेत्वादयोऽद्भुतसागरे उक्ताः । प्रश्नवैष्णवे । भूकं-
पनिर्घातरजोनिपातादासप्तरात्राद् ग्रहणाद्रवींद्वोः ॥ उल्कानिपाताः परिवेषचापाः स्युर्यत्र तद्देशनृपस्य नाशः ॥ यस्यां शिखा स्या-
द्दिशि धूमकेतोः प्रयाति यस्यामुदितोऽथ केतुः । रौद्रः स्पृशेद्धानि च यानि यानि तेषां सदेशान्नृपतीन् निहन्यात् ॥ ज्येष्ठा-
स्थितोऽर्केण कुजेन युक्तो राहुः शनिर्वाऽप्युदितश्च केतुः । यदा तदानीं भुवि सार्वभौमो रोगाद्रणाद्वा लभते प्रणाशं ॥ अत्र प्रागुक्तः कोटि-
होमो लक्षहोमो वा कार्यः । इति केतुशांतिः ॥ ॥ अथोल्कापतनादि । नारदः । स्वर्गच्युतानां रूपाणि यान्युल्कास्तानि वै भुवि । धिष्ण्यो-
ल्काविद्युदशनिताराः पंचविधाः स्मृताः ॥ पीडाश्वोष्ट्राऽहिगोमायुखरगोगजदंष्ट्रिकाः । कपिगोधा धूमनिभा विविधाः पापदा नृणां ॥ उदया-
स्तमयेऽर्केंद्वोः पतितोल्का शुभप्रदा । सितरक्ता पीतासिता सोल्का हंति द्विजातिनः ॥ राजराष्ट्रविनाशाय प्रासादप्रतिमासु च । गृहेषु स्वामिनां ॥११६॥
पीडा नृपाणां पर्वतेषु च ॥ दिक्षु तत्तद्दिगीशानां कर्षकाणां खलेषु च । गोष्ठे गोस्वामिनां पीडा शिल्पकानां जलेषु च ॥ वर्तुलोल्का पुरं हंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छत्राकारा पुरोहितं। वंशगुल्मलताकारा राष्ट्रविद्राविणी तथा ॥ अत्र प्रागुक्ता गर्गोक्ता ताराविकारशांतिः कार्या ॥ ॥ अथ प्रतिसूर्यः। मयूरचित्रे। उदीयमानः सूर्यो वै दृश्यते प्रतिरूपकः। त्रीण्यब्दानि भवेन्नाशो मासार्धेन न संशयः ॥ ॥ अथ परिवेषः। नारदः। किरणा वायुनिहता उच्छ्रिता मंडलीकृताः। नानावर्णाकृतिभृतः परिवेषाः शशीनयोः ॥ (इनः सूर्यः) मुहुर्मुहुः प्रलीयंते न ते पूर्णफलप्रदाः । अनेकवृत्तवर्णश्च परिवेषो नृपांतकृत् ॥ द्विमंडलश्चमूनाथं नृपघ्नोऽथ त्रिमंडलः। द्वौ ग्रहौ परिवेषस्थौ क्षितीशकलहप्रदौ ॥ कुर्वंति कलहानर्थं परिवेषगतास्त्रयः। चत्वारः परिवेषस्था नृपस्य मरणप्रदाः ॥ परिवेषगताः पंच जगत्प्रलयदा ग्रहाः। नृपहानिः कुजादीनां परिवेषे पृथक्पृथक् ॥ प्रावृष्यृतौ च शरदि परिवेषो जलप्रदः। प्रायेणान्येषु ऋतुषु तदुक्तफलदायिनः ॥ अन्यत्रापि। रविशशिपरिवेषे पूर्वयामे च पीडा रविशशिपरिवेषे मध्यमे चाऽतिवृष्टिः। रविशशिपरिवेषे धान्यनाशस्तृतीये रविशशिपरिवेषे राज्यनाशश्चतुर्थे ॥ ॥ अथ ग्रहयुद्धं। अद्भुतसागरे गर्गः। छादनं रोधनं चैव रश्मिरोधनमेव च। अपसव्यं ग्रहाणां च चतुर्धा युद्धमुच्यते ॥ एतन्नेंदुसूर्ययोः किंत्वन्येषां। ताराग्रहाणांपंचानांयुद्धान्युक्तानियोगतइत्युक्तेः। पराजयलक्षणं च तत्रैव। ग्रहो ग्रहं समागम्य श्यामीभवति यो भृशं । हानिं प्राप्नोति च व्यक्तं स्यंदते च मुहुर्मुहुः ॥ ॥ अथेंद्रधनुः। नारदः। नानावर्णांशवो भानोः साभ्रवायुविघट्टिताः। यद्व्योम्नि चापसंस्थानमिंद्रचापं तदुच्यते ॥ अथवा शेषनागेंद्रदीर्घनिःश्वाससंभवं। विदिक्षुजं दिक्षुजं च तद्दिङ्नृपविनाशनं ॥ अवृष्टौ वृष्टिदं त्वैंद्र्यां दिशि वृष्ट्यामवृष्टिदं। अवनींगाढमच्छिन्नं प्रतिकूलं धनुर्द्वयं ॥ नृपांतकृत्तद्धि भवेदानुकूल्ये तु तच्छुभं ॥ "शां० सा० अथ निर्घातः। वायुना निहतो वायुर्गगनात्पतति क्षितौ। यदा दीप्तः सगुरुतः स निर्घातोऽतिदोषकृत् ॥ अथ रश्मिदंडः। वराहसंहितायां। रविकिरणजलदमरुतां संघातो दंडवत्स्थितो दंडः। स विदिङ्मुखो नृपाणामशुभो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिक्षु द्विजानां च ॥ अत्र मासिकः फलपाकः । अनुक्तफलकालत्वात् । " अत्र शांत्यनुक्तौ वृद्धगर्गोक्ता शांतिर्वक्ष्यते । इत्युल्कापतनादि ॥

॥ अथ षड्ग्रहादियोगे शांतिः । मदनरत्ने ब्रह्मयामले । अथातः संप्रवक्ष्यामि ग्रहयोगाख्यशांतिकं । अमावास्यादितिथिषु ग्रहयोगो भवेद्यदि ॥ एकर्क्षे भिन्नराशौ वा एकराश्यृक्षभेदने । शशिसूर्यसमायुक्ते ग्रहत्रयसमन्विते ॥ दुर्भिक्षादिभयं चैव चतुर्ग्रहसमन्वये । महारोगभयं राष्ट्रक्षयो वृष्टिविनाशनं ॥ पंचग्रहसमायोगे दुर्भिक्षमरकादिकं । नृपवैरं गर्भनाशो जायते जननाशनं ॥ ग्रहषट्कसमायोगे मंत्रिणो मरणं भवेत् । पश्वश्वादिभयं सर्वं संकरादि जनक्षयः ॥ पट्टराज्ञो विनाशो वा महाभयमथापि वा । सप्तग्रहसमायोगे क्षितीशमरणं ध्रुवं ॥ जगत्प्रलय एवापि तदा निर्मानुषं जगत् । अतऊर्ध्वं महोत्पातो नानादुःखभयाकुलं ॥ सूर्यस्तद्व्यतिरिक्तश्चेत्तदा योगो महाद्भुतः । विना चंद्रेण योगोऽपि जगत्प्रलयकारकः ॥ तदृक्षजातजंतूनां महारोगो महाभयं । अर्थनाशः स्थाननाशो मानहानिर्नृपीडनं ॥ वातपित्तादिसंभूतमहापीडा महद्भयं । समायोगे ग्रहा नृणां दोषान्कुर्वंति सर्वदा ॥ षण्मासाभ्यंतरे वापि आयुर्हानिः श्रियस्तथा । जन्माष्टद्वादशे राशौ चतुर्थे पंचमेऽपि वा ॥ पूर्वोक्तफलमेवात्र तस्माच्छांतिं प्रयत्नतः । कुर्याद्दोषानुसारेण वित्तशाठ्यं न कारयेत् ॥ तत्तद्ग्रहाकृतीः कृत्वा सौवर्णेन प्रयत्नतः । सुवर्णेन तदर्धेन पादेनापि कनीयसीं ॥ वित्तशाठ्यं न कर्तव्यं कर्तव्यं शक्तितो बुधैः । पूर्वोक्तलक्षणेनैव ग्रहमूर्तीं च कारयेत् ॥ ग्रहस्यैकैककलशं ग्रहयोगप्रमाणतः । कारयेत्कुंभमेकं वा निर्व्रणं सुदृढं नवं ॥ गृहस्येशानदिग्भागे शुद्धदेशे समस्थले । कुंडे वा स्थंडिले वाऽपि होमं कुर्याद्विधानतः ॥ तस्य पूर्वोत्तरे देशे पूजास्थानं प्रकल्पयेत् । चतुरस्रं हस्तमात्रं स्थंडिलं तंडुलेन तु ॥ लिखेद् ग्रहाकृतिं तत्र स्थापयेत्प्रतिमां ततः । (तत्र कुंभोपरि न तु स्थंडिले । एककुंभपक्षे तदनुपपत्तेः) अधिप्रत्यधिदेवादीन् दक्षिणोत्तरतः क्षिपेत् ॥ उक्तग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धैस्तथा धूपैस्तत्तन्माल्यैः फलैरपि । तत्तद्ग्रहोक्तमंत्रेण पूर्वोक्तेनैव पूजयेत् ॥ स्वस्तिवाचनपूर्वेण आचार्य ऋत्विजैः सह । ग्रहपूजादिकं कृत्वा नैवेद्यांतं समर्पयेत् ॥ ततो होमं प्रकुर्वीत स्वगृह्योक्तविधानतः । चतुर्थ्यंतं प्रकुर्वीत कलशस्थापनं ततः । (चतुर्थ्यंतमिति । द्वे आघाराहुती द्वे आज्यभागाहुती एवं चतस्रः । तत्र चतुर्थी सोमाहुतिः । तदंतं आज्यभागांतमित्यर्थः) पूर्वोक्तेन विधानेन शुद्धतोयेन पूरयेत् । पंचामृतं पंचगव्यं पंचत्वक् पंचपल्लवान् ॥ तत्र मंत्रैर्विनिक्षिप्य औषधानि विनिक्षिपेत् । तत्तद्ग्रहोक्तविधिना मूलान्यादाय निक्षिपेत् ॥ अद्भिर्लिंगैर्वारुणैर्वापि कलशं पूरयेद्गुरुः । तत्तद्ग्रहोक्तैर्विविधैस्तत्तन्मंत्रैर्हुनेदथ ॥ (विविधैरित्यस्य समिद्भिरिति शेषः । एवं हि अथपश्चादित्यादिपदानां स्वरसत उपपत्तिर्नान्यथा) चर्वाज्ये जुहुयात्पश्चात्तिलाहुतिमथाचरेत् । अथ स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ भद्रासनोपविष्टस्य यजमानस्य ऋत्विजैः । कलशस्थोदकेनैवमभिषेकं समाचरेत् ॥ योगग्रहोक्तमंत्रैश्च अधिप्रत्यधिमंत्रतः । (एते च मंत्रा वैदिका एव । ग्रहाभिषेकमंत्राणामग्रिमश्लोके पुनर्विधानात्) नवग्रहोक्तमंत्रैश्च जातवेदादि पंचकैः (जातवेदस इत्येकः त्रैयंबकादयो वक्ष्यमाणाश्चत्वारः । एवं पंचेत्यर्थः) ॥ त्रैयंबकेण मंत्रेण क्षेत्रस्यपतिना तथा । यतइंद्रद्वयेनैव लोकपालाष्टकैरपि ॥ सुरास्त्वामिति मंत्रेण येनदेवादिभिः क्रमात् । अन्यैश्च पुण्यसूक्तैश्च अभिषेकं समाचरेत् ॥ अभिषेकाप्लुतं वस्त्रमाचार्याय निवेदयेत् । ततः शुक्लांबरधरः कुर्यादाज्यावलोकनं ॥ ऋत्विग्भ्यो दक्षिणां दद्याद्धेनुं शंखादिकानपि । तदभावे यथाशक्ति हिरण्यमपि दापयेत् ॥ ब्राह्मणान्भोजयेत्पश्चाद्यथाविभवसारतः । एवं यः कुरुते भक्त्या ग्रहदोषविवर्जितः ॥ पूर्वोक्तसर्वदोषैश्च विमुक्तः पुत्रवान्सुखी । आयुरैश्वर्यसंपन्नो जीवेद्वर्षशतं नरः ॥ इह लोके सुखी भूत्वा पश्चाच्छिवपुरं व्रजेत् । इति षड्ग्रहादियोगशांतिः ॥ ॥ अथ ग्रहयोगशांतिप्रयोगः । कर्ता गृहस्यैशानभागे आचमनादिदेशकालकीर्तनांते मम श्रीपरमेश्वरप्रीतिद्वारा जन्मनक्षत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मराशौ वा जन्मराशेः अमुकस्थाने वा त्रिग्रहयोगसूचितसकलानिष्टनिरासपूर्वकैहिकपुत्रलाभसुखवृद्धिचिरायुरैश्वर्यसंपत्तिपारलौकिकशिवपुरव्रजनसिद्ध्यर्थं ब्रह्मयामलोक्तां ग्रहयोगशांतिं करिष्ये। (चतुरादिग्रहयोगे तु त्रिशब्दस्थाने चतुरादिशब्दोहः कार्यः) तदंगं निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिवाचनं आचार्यादिवरणं च करिष्ये। इति संकल्प्य वरणांते आचार्यः प्रादेशांतं कृत्वा कुंडात्स्थंडिलाद्वा ऐशान्यां चतुरस्रं हस्तमात्रं स्थंडिलं तंडुलैर्निर्माय तत्र योगकर्तॄणां ग्रहाणां संख्यया कलशान्प्राक्संस्थानुदक्संस्थान्वा संस्थाप्य तत्र निहितेषु पूर्णपात्रेषु तत्तद्ग्रहमंडलानि लिखेत्। यद्वा एकमेव कुंभं संस्थाप्य महति पूर्णपात्रे ग्रहमंडलानि लिखेत्। तेषु प्रत्येकं सुवर्णेन तदर्धेन तदर्धेन वा मितेन सुवर्णेन यथाशक्ति सुवर्णेन वा कृतास्तत्तद्ग्रहप्रतिमास्तत्तदधिप्रत्यधिदेवताप्रतिमाश्च निधाय तासु ग्रहादींस्तत्तन्मंत्रैरावाह्य ग्रहयज्ञोक्तप्रकारेण नैवेद्यांतं पूजयेत्॥ ततः स्थंडिलेऽग्निं प्रतिष्ठाप्य ध्यात्वान्वादध्यात्। चक्षुषीआज्येनेत्यंते स्थापितग्रहान् तत्तत्समिच्चर्वाज्यतिलैः प्रत्येकं प्रतिद्रव्यं अष्टोत्तरसहस्रसंख्याभिराहुतिभिः। १०८।२८वा। अधिदेवताः प्रत्यधिदेवताश्च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्यं १०८।२८।८ वा। शेषेण स्विष्टकृतमित्याद्याज्यभागहोमांते ग्रहोत्तरतोऽभिषेकार्थं कलशं महीद्यौरित्यादिविधिना संस्थाप्य आपोहिष्ठेत्यादितिसृभिर्नहितेक्षत्रमित्यादितिसृभिर्वा जलेनापूर्य तत्र पंचामृतं पंचगव्यं पंचत्वचः पंचपल्लवान्सर्वौषधीस्तिस्रो वा त्र्यवराणि यज्ञियतरुमूलानि गंधादि च तत्तन्मंत्रैः प्रक्षिप्य तत्र वरुणं संपूज्यान्वाधानानुसारेण होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते पूर्णाहुतिं हुत्वा होमशेषं समाप्य भद्रासनोपविष्टं यजमानं सर्वकलशजलैरभिषिंचेत्। तत्र मंत्राः। योगकारकाणां तत्तदधिप्रत्यधिदेवतानां च वैदिकमंत्रांते। ग्रहाणामादिरादित्यो० ९।जातवदसे०।त्र्यंबकं०। क्षेत्रस्यपतिना वामदेवः०।यतइंद्रेत्यादिद्द्योर्भर्ग इंद्रो बृहती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीया सतोबृहतीपंक्तिः । इंद्रंवोविश्वतस्परीत्यादयोऽष्टलोकपालमंत्राः । सुरास्त्वामभिषिंचंतु० । येनदेवाःपवित्रेणेत्यादित्रयाणां खिलमंत्राणां वामदेवइंद्रोनुष्टुबंत्यस्य विश्वेदेवास्त्रिष्टुप् । आपोहिष्ठेत्यादिनवर्चस्य सूक्त० स्वादिष्ठयेत्यादिदशर्चस्य सूक्तस्य मधुच्छंदाः सोमः पवमानो गायत्री । अभिषेके० । समुद्रज्येष्ठाइत्यादिभिः पुण्यसूक्तैश्चाभिषिक्तो यजमानो धृतशुक्लांबरः स्नानवस्त्रमाचार्याय दत्वाऽऽज्यावलोकनं तद्दानं च कृत्वाऽऽचार्यादिभ्यो दक्षिणां दद्यात् । तत्र आचार्याय धेनुमितरेभ्यः शंखादितत्तद्ग्रहोक्तदक्षिणास्तदलाभे यथाशक्ति हिरण्यं । ततो यथाशक्ति ब्राह्मणान्संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । इति ग्रहयोगशांतिप्रयोगः ॥ ॥ अथ भूमिकंपादि । नारदः । भूभारखिन्ननागेंद्रशेषविश्रामसंभवः । भूकंपः सोपि जगतामशुभाय भवेत्सदा ॥ यामक्रमेण भूकंपो द्विजातीनामनिष्टदः । रात्रौ विशां क्षितीशानां शूद्राणां संध्ययोरपि ॥ अर्यमाद्यानि चत्वारि दस्रेंद्वदितिभानि च । वायव्यं मंडलं त्वेतदस्मिन्कंपो भवेद्यदि ॥ नृपसस्यवणिग्वैश्यशिल्पिवृष्टिविनाशदः । पुष्यद्विदैवभरणीपितृभाग्याऽजपाग्निभं ॥ आग्नेयं मंडलं त्वेतदस्मिन्कंपो भवेद्यदि । नृपवृष्ट्यर्थनाशाय हंति श्रावकसंकरान् ॥ अभिजिद्धातृवैश्वेंद्रवसुवैष्णवमित्रभं । वासवं मंडलं त्वेतदस्मिन्कंपो भवेद्यदि ॥ राजनाशाय रोगाय हंति मार्जारदर्दुरान् । मूलाहिर्बुध्न्यवरुणपौष्णांब्वार्द्राहिभानि तु ॥ वारुणं मंडलं त्वेतदस्मिन्कंपो भवेद्यदि । राजनाशकरो हंति पौंड्रचीनपुलिंदकान् ॥ प्रायेण निखिलोत्पाताः क्षितीशानामनिष्टदाः । षड्भिर्मासैश्च भूकंपो द्वाभ्यां दाहः फलप्रदः ॥ अनुक्ताः पंचभिर्मासैस्तदानीं फलदं रजः । निदानं मामकः श्लोकः । केचिद्दिक्करिकुंभचालनभवं वाताभिघातोद्भवं केचिन्नीरधिवीचिदोलनभवं तन्मीनजातं परे । भूकंपं ब्रुवते वयं हरिगुणश्रेणीसमाकर्णनप्रोद्यद्धर्षफणींद्रकंपिताशिरःश्रेणीभवं ब्रूमहे ॥ मूलं तु वाराह्यां ज्ञेयं । तत्रैव । प्रथितनरेश्वर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरणं व्यसनान्याग्नेयवायुमंडलयोः । क्षुद्भयमरकाऽवृष्टिभिरुपतप्यंते जनाश्चैव ॥ वारुणपौरंदरयोः सुभिक्षशिववृष्टिर्हार्दयो लोके । गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः ॥ पक्षैश्चतुर्भिरनिलस्त्रिभिरग्निर्देवराट् च सप्ताहात् । सद्यः फलति च वरुणो येषु न कालोऽद्भुतेषूक्तः ॥ त्रिचतुर्थे सप्तदिने मासे पक्षे तथा त्रिपक्षे वा । यदि भवति भूमिकंपः प्रधाननृपनाशनो भवति ॥ अत्र पूर्वोक्तो लक्षहोमः कोटिहोमो वा कार्यः ॥

॥ अथ रजः । नारदः । सितेन रजसा छन्ना दिग्ग्रामवनपर्वताः । यदा तदा भवंत्येते निधनं यांति भूमिपाः ॥ धूमोद्भवस्तु यस्यां वै तस्यां दिशि विनाशनं । ऋतावन्यत्र शिशिरात्संपूर्णफलदं रजः॥ ॥अथ दिग्दाहः । अद्भुतसागरे नारदः । दिग्दाहः पीतवर्णश्चेत्क्षितीशानां भयप्रदः । बृहस्पतिः । यदाऽस्तमित आदित्ये वह्निज्वाला प्रदृश्यते । दिशां दाहं तु तं विद्यादिति भार्गवभाषितं ॥ ॥ अथ रविच्छिद्रे । अद्भुतसागरे मयूरचित्रे । तिलैर्दूर्वादिभिश्चैव तंडुलैश्च यवैस्तथा। धान्यैरौदुंबरीभिश्च श्रीफलैराहुतिक्रिया ॥ समाप्तौ भोजनं कृत्वा नरः प्रेक्षणमादिशेत् । व्योममध्यगतं पश्येद्यदि सूर्यद्वयं नरः ॥ दधिक्षौद्रघृताक्तानां जुहुयादयुतं शुचिः । उपोष्यार्कस्य समिधो धेनुं दद्याद्द्विजातये ॥ इति भूमिकंपादि ॥अथाद्भुतफलकालः । अद्भुतसागरे पराशरः। तत्रोत्पातफलं दिव्यं पूर्णे वर्षे विपच्यते । आंतरिक्षं तथा भौमं मासैः षड्भिश्च तत्त्रिभिः ॥ निर्घातस्तु त्रिभिर्मासैर्गंधर्वनगराणि च। अग्निश्च सप्तरात्रेण मासेनोल्का विपच्यते ॥ पुरध्वजादिभंगेषु फलं मासाद्विपच्यते । अरिष्टं पच्यते षट्सु मासेषु फलहेतुषु ॥ अतिहर्षोऽतिशोकश्च सद्य एव विपच्यते । कीटमूषकसर्पाणां मक्षिकादिषु यत्फलं ॥ पच्यते तद्धि मासेन मधु सप्तसु पच्यते । हयानां हस्तिनां चैव शकुनीनां शुनां तथा ॥ सद्यस्त्र्यहाद्वा नियतमुलूकस्य तथैव च । विदेहवाक्संश्रवणं दर्शनं यक्षरक्षसां ॥ पशूनां विकृतं यच्च षष्ठे मासि विपच्यते । मांसतैलविकारेषु देहागरस्पंदनेषु च ॥ वस्त्रजातिविकारेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलं स्यात्सप्तमेऽहनि । चित्रकर्मणि मासाभ्यां शयने षष्ठमासिकं ॥ सोमध्वजविकारे च विपाकः सप्तमासिकः । गर्गः । पक्षाद्विपाकः सूर्यस्य पाकः सोमस्य मासिकः । मासद्वये स्मृतो राहोस्त्रिभिर्मासैस्तु केतुजः ॥ संवत्सरविपाकौ तु ज्ञेयौ बुधबृहस्पती । षाण्मासिकश्चोशनसः सूर्यजस्य तु पंचभिः ॥ त्रिभिर्मासैस्तु भौमस्य उल्कापातस्तु मासिकः । अष्टभिर्भूमिकंपस्तु निर्घातः पच्यते त्रिभिः ॥ अनार्तवं पुष्पफलं षड्भिर्मासैर्विपच्यते । पक्षिकीटपतंगानां दशाहात्फलमादिशेत् ॥ घृततैलवसावर्षे सद्यः फलमुदाहृतं । रात्राविंद्रधनुर्दृष्ट्वा राज्ञः शीलविपर्ययं ॥ वानराणां नराणां च तथैव गजवाजिनां । नानावादित्रशब्दानां फलं मासाद्विपच्यते ॥ बिडालनकुलानां च वराहव्याघ्रयोस्तथा । श्रुत्वांऽतरिक्षे शब्दं तु फलं मासाद्विपच्यते ॥ अद्भुतफलस्थानान्यद्भुतसागरे । पराशरः । राज्ञः शरीरे लोके च पुरदारपुरोहिते । पाकमायाति पुत्रेषु तथा कोशे च वाहने ॥ " शां. सा. तत्रैव गर्गः । पुरे जनपदे कोशे वाहने च पुरोहिते । पुत्रे स्वामिनि भृत्ये च पच्यते दैवमष्टधा ॥ " मात्स्ये । अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत् । सप्ताहाभ्यंतरे ज्ञेयमद्भुतं निष्फलं हि तत् ॥ "शां. सा. शिवा निर्विकारा" तत्र मासान्यन शांतिरुक्ता वसिष्ठसंहितायां । भौमं शांत्या शमं याति मार्दवं त्वंतरिक्षजं । दिव्यं हेमान्नगोभूमिदानैस्तत्कोटिहोमतः ॥ महोपहाराद्रुद्रस्य गोदोहात्तत्पुरःसरं । अलंकृते क्षितितले यावत्क्षीरं प्लवं भवेत् ॥ अपि दिव्यं शमं याति किं पुनस्त्वितरद्द्वयं । " शां. सा. अत्राधिकारी तत्रैव । अकृत्वा शांतिकं राजा दुःखांभोधौ निमज्जति । अश्वरोमयाष्टवर्षादिरजोदर्शनादौ तत्स्वामिनोऽधिकारः । केचित्तत्रापि राज्ञोऽधिकारमाहुः । अथवा सर्वाद्भुतशांतिषु सर्वेषामधिकारः । अद्भुतसागरे । ये तेषु शांतिं कुर्वंति न ते यांति पराभवं । ये तु न प्रतिकुर्वंति क्रियया श्रद्धयान्विताः । नास्तिक्याद्वा विमोहाद्वा विनश्यंत्येव तेऽचिरादितिगर्गोक्तेः । अश्वादिकं च दत्वा शांतिः कार्या " तत्रैव । हस्तैः षोडशभिः कार्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चतुरस्रः समंततः। मंडपो यज्ञियैर्वृक्षैरथवा वनदारुभिः॥ हस्तैश्चतुर्भिस्तन्मध्ये कुंडं कार्यं समंततः। खातं हस्तैश्चतुर्भिश्च वप्रत्रयसमन्वितं॥ समंततश्चतुर्हस्तं षोडशहस्तमित्यर्थः। षडंगुलोन्नतस्त्वाद्यो द्वादशांगुलविस्तृतः। आद्यः अधोमेखला। अंगुलं च यथाश्रुतमेव। नतु कुंडचतुर्विंशांशः। द्वादशांगुलानि मेखलात्रयमादाय। दशांगुलोन्नतो मध्ये अष्टांगुलसुविस्तृतः। चतुर्दशांगुलोत्सेधश्चतुरंगुलविस्तृतः॥ तृतीयवप्रः कर्तव्यो योनिश्चैका तु पश्चिमे। चतुर्दशांगुलैर्दीर्घा चोन्नता षोडशांगुलैः॥ हीनाऽधिका न कर्तव्या विस्तारः षड्भिरंगुलैः। कुंडस्य लक्षणं त्वेवं कोटिहोमे तु सर्वदा॥ ऐशान्यां वेदिका कार्या सार्धहस्तप्रमाणतः। उन्नता विस्तृता कार्या प्रागुदक्प्रवणा शुभा॥ सर्वदेवमयी त्वाद्या शिवपूजापुरःसरं॥ ग्रहांस्तानर्चयेत्तत्र पूर्वोक्तविधिना ततः। पलाशसमिदाज्यान्नैर्मुखांतेऽष्टशतं पृथक्॥ अघोरमंत्रेण ततो ग्रहहोमं च कारयेत्। तिलहोमं व्याहृतिभिर्घृताक्तैर्जुहुयात्ततः॥ द्वारेषु जापकैः स्वस्ववेदपारायणं क्रमात्। चमकं नमकं सूक्तं पौरुषं चांगजापकैः॥ होमो नवभिराचार्यैः कार्यस्तु ब्राह्मणैः सह। नैवेद्यांते ततः पश्चाच्छांतिवाचनपूर्वकं॥ ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुंजीत बंधुभिः। शिवविष्ण्वोः कथालापैर्दिनशेषं नयेत्ततः॥ एवं यावत्कोटिहोमस्तावत्कार्यमतंद्रितैः। तदर्धं वा तदर्धं वा लक्षहोममथापि वा॥ कार्यं दोषानुसारेण वित्तशाठ्यविवर्जितैः। होमांते दक्षिणां दद्याच्चतुर्विंशतिऋत्विजां॥ प्रतिद्विजमलंकारं सार्धनिष्कशतद्वयं। तदर्धं वा तदर्धं वा दोषवित्तानुसारतः। उक्ता साधारणी शांतिरुत्पातानामतःपरं। उत्पाताश्चैव तच्छांतिर्वक्ष्यतेऽत्र पृथक्पृथक्। अद्भुतसागरे गर्गः। सावित्र्या लक्षहोमं तु कुर्याच्छ्रुतिविशारदः। गां भूमिं च हिरण्यं च धान्यं वस्त्रं तथैव च॥ दद्याच्च गुरवे ग्रामं धेनुं वासोयुगं तथा। अनेन विधिना भौममद्भुतं शमयेद्बुधः॥ एष एव विधिर्ज्ञेयस्त्वंतरिक्षाद्भुतेषु च। विशेषोऽत्र तु सावित्र्या दशलक्षं तु होमयेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होमं समाहितमनाः कुर्याच्च घृतकंबलं। घृतकंबलोऽग्रे वक्ष्यते। धेनूनां द्वादशं देयं शतनिष्कसमायुतं । गुरवे दीयमाने तु शमयेदंबराद्भुतं ॥ दिव्याद्भुतेषु कर्तव्यः कोटिहोमः समाहितैः। गोसहस्रं च दातव्यं गुरवे दक्षिणाविधौ ॥ एष प्रोक्तो विधिः सम्यग् दिव्यारिष्टविपत्करः। सुभिक्षं क्षेमसंपत्स्यात्प्रजानां पुष्टिवर्धनः ॥ अशक्तौ तु स एव। प्रयतस्तेषु सर्वेषु दिव्येष्वद्भुतकेष्वपि। महाशांतिं बुधः कुर्यादमृतां विश्वभेषजां ॥ अमृताऽथर्ववेदे प्रसिद्धा। केचित्तु भविष्योक्ता महाशांतिमाहुः। सा वक्ष्यते। विष्णुधर्मे। सर्वोत्पातप्रशमनी अमृता चाभया स्मृता। नारदः कुंडाद्युक्त्वाह। जुहुयादाज्यभागांते पृथगष्टोत्तरं शतं । यतइंद्रभयामहे स्वस्तिदाऽघोरमंत्रकैः ॥ समिदाज्यचरुव्रीहितिलैर्व्यात्हृतिभिस्तथा । कोटिहोमं तदर्धं वा लक्षहोममथापि वा ॥ यथावित्तानुसारेण न न्यूनाधिककल्पना। एकविंशतिरात्रं वा पक्षं पक्षार्धमेव वा ॥ पंचरात्रं त्रिरात्रं वा होमकर्म समाचरेत्। दक्षिणां च ततो दद्यादाचार्याय कुटुंबिने ॥ गणेशक्षेत्रपालार्कदुर्गाक्षोण्यंगदेवताः। तासां प्रीत्यै जपः कार्यः शेषं पूर्ववदाचरेत् ॥ ऋत्विग्भ्यो दक्षिणां दद्यात्षोडशभ्यः स्वशक्तितः ॥ इति कमलाकरभट्टकृते शांतिरत्नेऽद्भुतसामान्यशांतिः ॥ ॥ अथ नानोत्पातशांतयः। तत्रादौ लिंगादिवैकृतं। वराहमिहिरः। यानन्यानुत्पातान्गर्गः प्रोवाच तानहं वक्ष्ये। तेषां संक्षेपोऽयं प्रकृतेरन्यत्वमुत्पातः ॥ अपचारेण नराणामुपसर्गः पापसंचयाद्भवति। संसूचयंति दिव्यांतरिक्षभौमास्तदुत्पाताः ॥ मनुजानामपचारादपरक्ता देवताः सृजंते तान्। तत्प्रतिघाताय नृपः शांतिं राष्ट्रे प्रयुंजीत ॥ दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः। गंधर्वपुरपुरंदरचापादि यदांतरिक्षं तत् ॥ भौमं चरस्थिरभवं तच्छांतिभिराहतं शममुपैति। नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके ॥ दिव्यमपि शममुपैति प्रभूतकनकाश्वगोमहीदानैः। रुद्रायतने भूमौ गोदोहात्कोटिहोमाच्च ॥ अनिमित्तचलनभंगस्वेदाश्रुनिपातजल्पनाद्यानि। लिं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्चायतनानां नाशाय नरेंद्रदेशानां ॥ दैवतयात्राशकटाक्षचक्रकेतुयुगभंगपतनानि। संपर्यासनसादनसंगाश्च न देशनृपशुभदाः ॥ ऋषिधर्मपि-
तृब्रह्मप्रोद्भूतं वैकृतं द्विजातीनां । यद्रुद्रलोकपालोद्भवं पशूनामनिष्टं तत् ॥ गुरुसितशनैश्चरोत्थं पुरोधसां विष्णुजं च लोकानां । स्कंदविशा-
खसमुत्थं मांडलिकानां नरेंद्राणां॥ वेदव्यासे मंत्रिणि विनायके वैकृतं चमूनाथे । धातरि सविश्वकर्मणि लोकाभावाय निर्दिष्टं ॥ देवकुमारकु-
मारीवनिताप्रेष्येषु वैकृतं यत्स्यात् । तन्नरपतेः कुमारककुमारिकास्त्रीपरिजनानां ॥ रक्षःपिशाचगुह्यकनागानामेतदेव निर्देश्यं । मासैश्चाप्यष्टाभिः
सर्वेषामेव फलपाकः ॥ बुद्ध्वा दैवविकारं शुचिः पुरोधास्त्र्यहोषितः स्नातः । स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत्प्रतिमां ॥ मधुपर्केण पुरोधा
भक्ष्यैर्बलिभिश्च विधिवदुपतिष्ठेत् ॥ स्थालीपाकं जुहुयाद्विधिवन्मंत्रैश्च तल्लिंगैः ॥ इति विबुधविकारे शांतयः सप्तरात्रं द्विजविबुधगणार्चा
गीतनृत्योत्सवाश्च । विधिवदवनिपालैर्यैः प्रयुक्ता न तेषां भवति दुरितपाको दक्षिणाभिश्च रुद्धः॥ ॥ अथाग्निवैकृतं। राष्ट्रे यस्यानग्निः प्रदीप्यतेऽ-
ग्निर्नचेंधनवान् । मनुजेश्वरस्य पीडा तस्य सराष्ट्रस्य विज्ञेया॥ जलमांसार्द्रज्वलने नृपतिवधः प्रहरणे रणो रौद्रः। सैन्यग्रामपुरेषु च नाशो वह्नेर्भयं
कुरुते ॥ प्रासादभवनतोरणकेत्वादिष्वग्निदग्धेषु । तडिता वा षण्मासैः परचक्रस्यागमो नियमात् ॥ धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महाभयदं ।
व्यभ्रे निश्युडुनाशो दर्शनमपि चान्हि दोषकरं ॥ नगरचतुष्पादांडजमनुजानां भयकरं ज्वलनमाहुः। धूमाग्निविस्फुलिंगैः शय्यांबरकोशजै-
र्मृत्युः ॥ आयुधज्वलनसर्पणस्वनाः कोशनिर्गमनवेपनानि वा । वैकृतानि यदि वायुधेऽपराण्याशु रौद्ररणसंकुलं वदेत् ॥ मंत्रैरग्नेः क्षीरवृक्षा-
त्समिद्भिर्होतव्योभिः सर्पिषा सर्षपैश्च ।अग्न्यादीनां वैकृते शांतिरेषा देयं चास्मिन्कांचनं ब्राह्मणेभ्यः ॥ ॥ अथ वृक्षवैकृतं । शाखाभंगेऽकस्माद्वृ-
क्षाणां निर्दिशेद्रणोद्योगं । हसने देशभ्रंशो रुदिते च व्याधिबाहुल्यं ॥ राष्ट्रविभेदोऽन्यर्तौ बालवधोऽतीव बालकुसुमेषु । वृक्षात्क्षीरस्रावे सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यक्षयो भवति ॥ मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः । स्नेहे दुर्भिक्षभयं महद्भयं निःसृते सलिले ॥ शुष्कविरोहे वीर्यान्न-संक्षयः शोषणे च विरुजानां । पतितानामुत्थाने स्वयं भयं दैवजनितं च ॥ पूजितवृक्षे ह्यनृतौ कुसुमफलं नृपवधाय विकृतं वा । धूमस्तस्मिन्ज्वालाथवा भवेन्नृपवधायैव ॥ सर्पत्सु तरुषु जल्पत्सु वापि जनसंक्षयो विनिर्दिष्टः । वृक्षाणां वैकृत्ये दशभिर्मासैः फलविपाकः ॥ स्रग्गंधधूपांबरपूजितस्य छत्रं निधायोपरि पादपस्य । कृत्वा शिवं रुद्रजपोऽत्र कार्यो रुद्रेभ्य इत्यत्र षडेव होमाः ॥ पायसेन मधुना च भोजयेद्ब्राह्मणान्घृतयुतेन भूपतिः । मेदिनी निगदितात्र दक्षिणा वैकृते तरुकृते हितार्थिभिः ॥ ॥ अथ सस्यवैकृतं । नालेऽब्जयवादीनामेकस्मिन् द्वित्रसंभवो मरणं । कथयति तदधिपतीनां यमलं जातं च कुसुमफलं ॥ अतिवृद्धिः सस्यानां नानाफलपुष्पसंभवो वृक्षे । भवति हि यद्येकस्मिन्परचक्रस्यागमो नियमात् ॥ अर्धेन यदा तैलं भवति तिलानामतैलता वा स्यात् । अन्नस्य च वैरस्यं यदा तदा क्षुद्भयं सुमहत् ॥ विकृतं कुसुमफलं वा ग्रामादथवा पुराद्बहिः कार्यं ॥ सौम्योऽत्र चरुः कार्यो निर्वाप्यो वा पशुः शांत्यै ॥ सस्ये तु दृष्ट्वा विकृतिं प्रदेयं तत्क्षेत्रमेव प्रथमं द्विजेभ्यः । तत्क्षेत्रमध्ये चरुमत्र भौमं कृत्वा न दोषं समुपैति तज्ज्ञः ॥ ॥ अथ वृष्टिवैकृतं । दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां क्षुद्भयं परभयं च । रोगोऽन्यर्तुभवायां नृपतिवधोऽनभ्रजातायां ॥ शीतोष्णविपर्यासे यथावदृतुषु च न संप्रवृत्तेषु । षण्मासाद्राष्ट्रभयं रोगभयं दैवजनितं च ॥ अन्यर्तौ सप्ताहं प्रबंधवर्षे प्रधाननृपमरणं । रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः ॥ धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विद्यात् । अंगारपांसुवर्षे विनाशमुपयाति तन्नगरं ॥ उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः । छिद्रं वाऽप्यभिवृष्टं सस्यानामीतिसंजननं ॥ क्षीरघृतक्षौद्राणां दधिलाक्षासोष्णवारिणां वर्षे । देशविनाशः शस्त्रायुधवर्षेपि च भयं सनृपयुद्धं ॥ यद्यमलेऽर्के छाया न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते दृश्यते प्रतीपा वा । देशस्य तदा सुमहद्भयमायातं विनिर्देश्यं ॥ व्यभ्रे नभसि सुरधनुर्दिवा यदा दृश्यतेऽथवा रात्रौ । प्राच्यामपरस्यां वा
तदा भवेत्क्षुद्भयं सुमहत् ॥ सूर्येंदुपर्जन्यसमीरणानां यागः स्मृतो वृष्टिविकारकाले । धान्यान्नगोकांचनदक्षिणाश्च देयास्ततः शांति-
मुपैति पापं॥ ॥अथ जलवैकृतं । अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते । शोषश्चाऽशोष्याणामन्येषां वा ह्रदादीनां ॥ स्नेहासृङ्मां-
सवहाः संकुलकलुषाः प्रतीपगाश्चापि । परचक्रस्यागमनं नद्यः कथयंति षण्मासात् ॥ ज्वालाधूमक्काथा रुदितोत्क्रुष्टानि चैव कूपानां । गीत-
प्रजल्पितानि च जनमरकाय प्रदिष्टानि ॥ सलिलोत्पत्तिरखाते गंधरसविपर्यये च तोयानां । सलिलाशयविकृतौ वा महद्भयं तत्र
शांतिरियं ॥ सलिलविकारे कुर्यात्पूजां वरुणस्य वारुणैर्मंत्रैः । तैरेव च जलहोमं शममेवं पापमुपयाति ॥ ॥अथ प्रसववैकृतं । प्रसवविकारे
नृणां द्वित्रिचतुःप्रभृतिसंप्रसूतौ वा । हीनातिरिक्तकाले देशकुलानां च संक्षयो भवति ॥ वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषां ।
षण्मासात्सूतिफलं शांतौ श्लोकौ च गर्गोक्तौ ॥ नार्यः परस्य देशेषु त्यक्तव्यास्तु हितार्थिना । तर्पयेच्च द्विजान्कामैः शांतिं चैवात्र कारयेत् ॥
चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु । नगरं स्वामिनं यूथमन्यथा तु विनाशयेत् ॥ अन्यत्र वेसरोत्पत्तौ स्त्रीणां चाऽजातिमैथुने । स्थाली-
पाकेन धातारं पशुना च पुरोहितः ॥ प्राजापत्येन मंत्रेण यजेद्बह्वन्नदक्षिणं॥ ॥अथ वायुवैकृतं । यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च
वाहयुतं । राष्ट्रभयं भवति तदा चक्राणां सादभंगे च ॥ अनभिहततूर्यनादः शब्दो वा ताडितेषु यदि न स्यात् । विपरीतो वा तेषां परा-
गमो नृपतिमरणं वा ॥ गोलांगलयोः संगे दर्वीशूर्पाद्युपस्करविकारे । काष्ठनिनादे च तथा शस्त्रभयं मुनिवचश्चेदं ॥ वायव्येष्वेषु नृपतिर्वायुं ॥१२२॥
सक्तुभिरर्चयेत् । आवायोइति पंचर्चो जप्तव्याः प्रयतैर्द्विजैः ॥ बह्वन्नदक्षिणो होमः परमान्नं च भोजयेत्॥ ॥अथ पक्ष्यादिवैकृतं । पुरपक्षिणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनचरा वन्या वा निर्भया विशंति पुरं। नक्तं वा दिवसचराः क्षपाचरा वा चरंत्यहनि ॥ संध्याद्वयेऽपि मंडलभा बध्नंतो मृगा विहंगा वा। दीप्तायां दिश्यथवा क्रोशंतः संहता भयदाः ॥ श्वानः प्ररुदंतीव द्वारे वाशंति जंबुका दीप्ताः। प्रविशेन्नरेंद्रभवने कपोतकः कौशिको यदि वा ॥ कुक्कुटरुतं प्रदोषे हेमंतादौ च कोकिलालापाः। प्रतिलोममंडलचराः श्येनाद्याश्चांबरे भयदाः ॥ गृहचैत्यतोरणेषु द्वारेषु च पक्षिसंपातः। मधुवल्मीकांभोरुहसमुद्भवाश्चापि नाशाय ॥ श्वभिरस्थिशवावयवप्रवेशनं मंदिरेषु मरकाय। पशुशस्त्रव्याहारे नृपमृत्युर्मुनिवचश्चेदं ॥ मृगपक्षिविकारेषु कुर्याद्धोमान्सदक्षिणान्। देवाःकपोतइति च जप्तव्याः पंचभिर्द्विजैः ॥ सुदेवा इति चैकेन देया गावश्च दक्षिणाः। जपेच्छाकुंतसूक्तं च मनोवेदशिरांसि च॥ ॥अथ शक्रध्वजादिवैकृतं। शक्रध्वजेंद्रकीलस्तंभद्वारप्रपातभंगेषु। तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणं ॥ संध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च काननेऽनग्नौ। छिद्राभावे भूमेर्दरणं कंपश्च भयकारी ॥ प्रहर हन छिंधि भिंधीत्यायुधकाष्ठाश्मपाणयो बालाः। निगदंतः प्रहरंते तत्रापि भयं भवत्याशु ॥ अंगारगैरिकाद्यैर्विकृतप्रेताभिलेखनं यस्मिन्। नायकचित्रितमथवा क्षयं क्षयं याति नचिरेण ॥ (क्षयं गृहं) लूतापटांकशबलं न संध्ययोः पूजितं कलहयुक्तं। अशुभं नित्योच्छिष्टं तद्वेहं नाशमुपयाति ॥ दृष्टेषु यातुधानेषु निर्दिशेन्मरकमाशुसंप्राप्तं। प्रतिघातायैतेषां गर्गः शांतिं चकारेमां ॥ महाशांत्योऽथ बलयो भोज्यानि सुमहांति च। कारयीत महेंद्रं च माहेंद्रीभिः समर्चयेत्॥पाखंडानां नास्तिकानां च भक्तः साध्वाचारप्रोज्झितः क्रोधशीलः। ईर्ष्युः क्रूरो विग्रहासक्तचेता यस्मिन् राजा तस्य देशस्य नाशः ॥ नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्कैंद्वोः। उत्पातानां प्रभवः स्वर्तुभवश्चाप्यदोषाय ॥ ये च न दोषान् जनयंत्युत्पातास्तानृतुस्वभावकृतान्। ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः ॥ वज्राऽशनिमहीकंपसंध्यानिर्घातनिःस्वनाः। परिवेषरजोधूमरक्तार्कास्तमनोदयाः ॥ द्रुमे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः । गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ तारोल्कापातकलुषं कपिलार्केंदुमंडलं । अनग्निज्वलनस्फोटधूमरे-
ण्वनिलाहतं ॥ रक्तपद्मारुणं सांध्यं नभः क्षुब्धार्णवोपमं । सरितां चांबुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ शक्रायुधपरीवेषविद्युच्छुष्कविरोहणं ।
कंपोद्वर्तनवैकृत्यं रसनं दरणं क्षितेः ॥ सरोनद्युदपानानां वृद्ध्यूर्ध्वतरणप्लवाः । सरणं चाद्रिगेहानां वर्षासु न भयावहं ॥ दिव्यस्त्रीभूतगंधर्व-
विमानाद्भुतदर्शनं । ग्रहनक्षत्रताराणां दर्शनं च दिवांऽबरे ॥ गीतवादित्रनिर्घोषा वनपर्वतसानुषु । सस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः ॥
शीतानिलतुषारत्वं नर्दनं मृगपक्षिणां । रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी ॥ दिशो धूमांधकाराढ्याः सनभोवनपर्वताः । उच्चैः सूर्योदया-
स्तौ च हेमंते शोभनाः स्मृताः ॥ हिमपातानिलोत्पाता विरूपाद्भुतदर्शनं । कृष्णांजनाभमाकाशं तारोल्कापातपिंजरं ॥ चित्रगर्भोद्भवाः
स्त्रीषु गोऽजाश्वमृगपक्षिषु । पत्रांकुरलतानां च विकाराः शिशिरे शुभाः ॥ ऋतुस्वभावजा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः । ऋतोरन्यत्र
चोत्पाता दृष्टास्ते भृशदारुणाः ॥ उन्मत्तानां च या गाथाः शिशूनां भाषितं च यत् । स्त्रियो यच्च प्रभाषंते तस्य नास्ति व्यतिक्रमः ॥ पूर्वं
चरति देवेषु पश्चाद्गच्छति मानुषान् । नाऽचोदिता वाग्वदति सत्या ह्येषा सरस्वती ॥ उत्पातान्गणितविवर्जितोऽपि बुध्वा विख्यातो
भवति नरेंद्रवल्लभश्च । एतत्तन्मुनिवचनं रहस्यमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी ॥ इति नानोत्पातशांतयः ॥
॥ अथ मात्स्योक्ताद्भुतशांतयः । मदनरत्ने गर्गः । पुरुषापचारान्नियतमपरज्यंति देवताः । अपरागाच्च देवानामुपसर्गः प्रवर्तते ॥
दिव्यांतरिक्षं भौमं च त्रिविधं परिकीर्तितं ॥ ग्रहर्क्षवैकृतं दिव्यमांतरिक्षं निबोध मे ॥ उल्कापातो दिशां दाहः परिवेषस्तथैव च । गं-
धर्वनगरं चैव वृष्टिश्च विकृता तु या ॥ एवमादि तु लोकेऽस्मिन्नांतरिक्षं विनिर्दिशेत् । चरस्थिरभवं भौमं भूकंपाश्चैव भूमिजं ॥ जला- ॥१२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयानां वैकृत्यं भौमं च परिकीर्तितं । भौमे त्वल्पफलं ज्ञेयं चिरेण च विपच्यते ॥ अभ्रजं मध्यफलदं मध्यकालफलप्रदं । अभ्रजमांतरिक्षं । अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत् ॥ सप्ताहाभ्यंतरे ज्ञेयमद्भुतं निष्फलं हि तत् ॥ अद्भुतस्य विपाकश्च विना शांत्या न दृश्यते । त्रिभिर्वर्षैस्तथा ज्ञेयं सुमहद्भयकारकं ॥ राज्ञां शरीरे लोके च पुरे दारे गृहेषु च ॥ पाकमायाति पुत्रेषु तथा वै कोशवाहने ॥ ऋतुस्वभावाद्राजेंद्र भवंत्यद्भुतसंज्ञिताः । शुभावहास्ते विज्ञेयास्तांश्च मे वदतः शृणु ॥ वज्राशनिमहीकंप० विकाराः शिशिरे शुभाः ॥ (एते श्लोकाः पूर्वमुक्ताः) ऋतुस्वभावेन विनाद्भुतस्य जातस्य दुष्टस्य तु शीघ्रमेव । श्रुत्वागमं शांतिरनंतरं तु कार्या यथोक्ता वसुधाधिपेन ॥ ॥ अथ देवताप्रतिमावैकृतशांतिः । गर्गः । देवतार्चाः प्रनृत्यंति वेपंते प्रज्वलंति वा । आरटंति च रोदंति प्रस्विद्यंति हसंति च ॥ (अर्च्यंत इत्यर्चाः प्रतिमा इत्यर्थः) उत्तिष्ठंति निषीदंति प्रधावंति भ्रमंति च । भजंति विकृताश्चेष्टा मानुषाणां भयावहाः ॥ अवाङ्मुखा वा तिष्ठंति स्थानात्स्थानं भ्रमंति च । वमंत्यग्निं तथा धूमं स्नेहरक्ते तथा वसां ॥ एवमादीनि दृश्यंते विकाराः सहजोत्थिताः । लिंगायतनचित्रेषु तत्र वासं न रोचयेत् ॥ राज्ञो वा व्यसनं [च्यवनं] तत्र स च देशो विनश्यति । देवयात्रासु चोत्पातान्दृष्ट्वाऽवश्यं भयं वदेत् ॥ यात्रासूत्पाता यात्रासंबंधिनः शकटाक्षध्वजभंगादयः । पशूनां रुद्रजं ज्ञेयं नृपाणां लोकपालजं । रुद्रजं तत्प्रतिमोत्थं पशुभयदमित्यर्थः । एवं सर्वत्र । ज्ञेयं सेनापतीनां च यत्स्यात्स्कंदविशाखजं ॥ लोकानां विष्णुवस्विंद्रविश्वकर्मसमुद्भवं । विनायकोद्भवं ज्ञेयं गणानां सेवकस्य च ॥ देवदूते च याः प्रेष्या देवस्त्रीषु नृप स्त्रियः । वास्तुदेवेषु विज्ञेयं ग्रहाणामेव नान्यथा ॥ देवतार्चाविकारेषु शुचिः स्नातः [श्रुतेष्वेव] पुरोहितः । देवतार्चां तु गत्वा वै स्नातामाच्छाद्य भूषयेत् । पूजयेत्तां महाभाग गंधमाल्यादिसंपदा ॥ मधुपर्केण विधिवदुपतिष्ठेदनंतरं । तल्लिंगेन च मं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रेण स्थालीपाकं यथाविधि ॥ पुरोधा जुहुयाद्वह्नौ सप्तरात्रमतंद्रितः । विप्राश्च पूज्या मधुरान्नपानैः सदक्षिणैः सप्तदिनं नरेंद्र । प्राप्ते-
ऽष्टमेऽह्नि क्षितिगोप्रदानैः सकांचनैः शांतिमुपैति पापं ॥ ॥ अथाग्निवैकृते शांतिः । गर्गः । अग्निः प्रदीप्यते यत्र राष्ट्रे भृशमनिंधनः ।
न दीप्यते चेंधनवांस्तद्राष्ट्रं पीड्यते नृप ॥ ज्वलेदार्द्रश्च वंशो वा तथार्द्रान्नं मृदा सुधा । प्रासादतोरणद्वारनृपवेश्मसुरालयाः ॥ एतानि
यत्र दह्यंते तत्र राजभयं वदेत् । विद्युता वा प्रदह्यंते तत्रापि नृपतेर्भयं ॥ अनैशानि तमांसि स्युर्विना पांसुरजांसि च । धूमश्चानग्निजो
यत्र तत्र विद्यान्महाभयं ॥ तडिद्विनाभ्रं गगने भयं स्याद्वृष्टिवर्जिते । दिवा सतारे गगने तथैव भयमादिशेत् ॥ ग्रहनक्षत्रवैकृत्ये ताराविकृति-
दर्शने । पुत्रवाहनदारेषु चतुष्पदगृहेषु च ॥ स्वभावाद्वापि हीयेत धेनुवत्सादिकं च यत् । लोहायुधविकारः स्यात्तत्र संग्राममादिशेत् ॥
त्रिरात्रोपोषितस्तत्र पुरोधाः सुसमाहितः ॥ समिद्भिः क्षीरवृक्षाणां सर्षपैश्च घृतेन च । होमं कुर्यादग्निमंत्रैर्ब्राह्मणांश्चैव भोजयेत् ॥ दद्यात्सुव-
र्णं च तथा द्विजेभ्यो गाश्चैव वस्त्राणि तथा भुवं च । एवं कृते तत्समुपैति नाशं यदग्निवैकृत्यभवं द्विजेंद्र ॥ ॥ अथ प्रयोगः ।
त्रिरात्रोपोषितः पुरोधाश्चतुर्थदिने आचमनादिदेशकालकीर्तनांते अस्मिन्प्रासादेऽग्निदाहसूचितसर्वानिष्टपरिहारद्वारा श्री०सग्रहमखां गर्गोक्तां
शांतिं करिष्ये । (विद्युत्पाते तु विद्युत्पातजन्यभंगदाहादिसूचितेत्यूहः) इति संकल्प्य गणेशपूजनं पुण्याहवाचनं च कृत्वा प्रादेशकरणांते
स्थंडिलेऽग्निं वेद्यां ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहोत्कीर्तनांते अग्निं प्रधानदेवं क्षीरवृक्षसमित्सर्षपघृतैः प्रतिद्रव्यं षट्त्रिंशदधिकशतत्रयसं-
ख्याभिराहुतिभिः । शेषेणेत्यादिग्रहादिहोमांते अग्निमीळइतिसूक्तस्थनवमंत्रैरुक्तद्रव्यैर्होमं कुर्यात् । तत्र सूक्तस्य द्वादशोत्तरशतमावृत्तयः
कार्याः । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समाप्य दक्षिणाकाले ब्राह्मणेभ्यः सुवर्णं धेनुत्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्त्रत्रयं भूमिं तत्स्थाने गोमूल्यं वा दत्वा ब्राह्मणान्भोजयित्वा भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । इत्यग्निवैकृतशांतिप्रयोगः ॥

॥ अथ वृक्षोत्पातशांतिः । " शां० सा० वृक्षोत्पाते छेदनमाह नारदः । अकाले पुष्पिता वृक्षा दृश्यंते फलिता यदि । कार्यं तच्छेदनं तत्र ततः शांतिर्मनीषिभिः ॥ " गर्गः । पुरेषु येषु दृश्यंते पादपा दैवचोदिताः । रुदंतो वा हसंतो वा वमंतो वा रसान्भुवि ॥ अरोगो वा सरोगो वा नित्यमेव विचारयेत् । अरोगा वा विना-वातं शाखां मुंचंति पादपाः ॥ फलं पुष्पं तथाऽकाले दर्शयंति च पादपाः । पूर्वावस्थां दर्शयंति फलं पुष्पमनार्तवे ॥ क्षीरं स्नेहं तथा रक्तं मधु तोयं स्रवंति वा । शुष्यंत्यरोगाः सहसा शुष्का रोहंति वा पुनः ॥ उत्तिष्ठंतीह पतिताः पतंति च तथोत्थिताः । तत्र वक्ष्यामि ते ब्रह्मन् विपाके फलमेव च ॥ रोदने व्याधिरभ्येति हसने देशविभ्रमः । शाखाप्रपतने कुर्यात्संग्रामं योधपातनं ॥ वालानां मरणं कुर्याद्बालानां फलपुष्पतः । स्वराष्ट्रभेदं कुरुते फलं पुष्पमनार्तवं ॥ क्षीरं सर्वत्र गंभीरं स्नेहं दुर्भिक्षलक्षणं । वाहनापचयं मद्ये रक्ते संग्राममादिशेत् ॥ मधुस्रावे भवेव्याधिर्जलस्रावे च वर्षति । अरोगशोषणं ज्ञेयं ब्रह्मन्दुर्भिक्षलक्षणं ॥ शुष्केषु संप्ररोहत्सु वीर्यमन्नं च हीयते । उत्थाने पतितानां च भयं खेदकरं भवेत् ॥ स्थानात्· स्थाने तु गमने देशभंगं तथा दिशेत् । जल्पत्स्वपि च वृक्षेषु स्वगत्स्वपि धनक्षयं ॥ एतत्पूजितवृक्षेषु सर्वं राज्ञो विपच्यते । पुष्पैः फलैर्वा विकृते राज्ञो मृत्युं तथा दिशेत् ॥ अन्येषु चैव वृक्षेषु वृक्षोत्पातेष्वतंद्रितः । आच्छादयित्वा तं वृक्षं गंधमाल्यैर्विभूषयेत् ॥ वृक्षोपरि तथा छत्रं कुर्यात्पापप्रशांतये । केचित्तु वृक्षोत्पाते वृक्षच्छेदनमाहुस्तदेतद्विरोधाच्चिंत्यं । शिवमभ्यर्चयेद्देवं पशुं चास्मै निवेदयेत् । रुद्रेभ्य इति वृक्षेषु हुत्वा रुद्रं जपेत्ततः ॥ मध्वाज्ययुक्तेन तु पायसेन संपूज्य विप्रांश्च भुवं च दद्यात् । गीतेन नृत्येन तथाऽर्चयेत्तं देवं हरं पापविनाशहेतोः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" शां. सा. अद्भुतसागरे औशनसे । अश्वत्थे पुष्पिते विप्राः क्षत्रियास्तु उदुंबरे । प्लक्षे वैश्यास्तु पीड्यंते न्यग्रोधे दस्यवस्तथा ॥ कदंब इक्षुर्वंशोऽपि फुल्लितश्च कथंचन । वसंते पुष्पितो यत्र माणो जंबूर्ध्वस्तथा ॥ शृंगबेरोऽथवा यत्र मासैः षड्भिर्जनक्षयः । कुसुमात्कुसुमोत्पत्तिः परचक्रागमं वदेत् ॥ उदुंबराणां समिधो जुहुयादयुतं ततः । महाव्याहृतिभिर्विप्रं भोजयेद्वै सदक्षिणं ॥ कदलीगर्भमूर्धन्यः प्ररोहति गृहे यदि । अरण्यं स भवेद्देशो गर्गस्य वचनं यथा ॥ सहिरण्यं वृषं दद्याद्विजायौदुंबरी समित् । इमारुद्रेतिमंत्रेण होतव्या च सहस्रधा ॥ "

॥ अथ कदलीदुष्टप्रसवशांतिः । पाद्मे उमोवाच । प्रथमप्रसवो देव रंभायां दृश्यते यदा । दक्षिणाभिमुखो विद्वन् विदधाति फलं स हि । भूपाले कर्षके वाऽपि फलं कस्मिंस्तु जायते । श्रीमहादेव उवाच । यदा याम्यमुखा देवी कदली तु प्रसूयते । तदा ग्रामपतेर्नाशं विदधाति न संशयः ॥ एवं विघ्ने समुत्पन्ने विधानं तत्र कारयेत् । सूतकीवोपचर्या सा कदली हितमिच्छता ॥ दर्शे तु जागरं चैव होमः कार्यस्ततःपरं । कदलैर्हवनं कार्यमन्येभ्यः समुपाहृतैः ॥ (अन्येभ्यः कदलीवृक्षेभ्य इति शेषः) सहस्रं प्रयतो वाग्मी जपन् शांतीरनेकशः । विष्णुस्तु देवता तत्र तल्लिंगो मंत्र उच्यते ॥ विप्रेभ्यो विधिवद्दद्यात्सप्त धान्यानि संयतः । दद्यात्तां कदलीं राजा विप्रवर्याय धीमते ॥ (राजाऽत्र ग्रामपतिः) दानमंत्रः । असुराणां कुलोत्पन्ना रंभा बहुफलान्विता । अतस्तव प्रदानेन संततिर्मेऽभिवर्धतां ॥ एवं कृते विधाने च विघ्नशांतिस्तु जायते । पूजिते विप्रवर्ये च कर्ता सुखमवाप्नुयात् ॥ (क्वचित्तु विधानमालास्थत्वेन वचांसि । येनैव लापितो वृक्षः स तस्य फलमश्नुते । प्रसूता पूर्वदिग्भागे रंभा सौख्यविवर्धिनी ॥ दक्षिणे चार्थनाशाय शोकसंतापकारणं । पश्चिमे चोद्वसं ग्रामं कौबेर्यां शुभदा सदा ॥ आग्नेय्यादिविदिक्ष्वत्र मध्यमं फलमुच्यते । तस्य दोषस्य शांत्यर्थं कुर्याच्छांतिकमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमं ॥ दुष्टप्रसूतां रंभां च पीतवस्त्रेण वेष्टयेत् । कंचुकीं कंठसूत्रं च विविधाभरणं तथा ॥ निवेद्य कदलीमूले ततस्तां परिपूजयेत् । तिलै-श्चाज्येन दूर्वाभिर्हुनेदष्टोत्तरं शतं ॥ अतोदेवेतिसूक्तेन सूक्तावृत्तिस्तथैव च । दशदानानि वै दद्यादाचार्याय कुटुंबिने ॥ सर्वारिष्टप्रशांत्यर्थं वित्तशाठ्यविवर्जितः । ततः सा कदली देया विप्रवर्याय धीमते ॥ दानमंत्रः पूर्वोक्त एव । ततस्तु विमले कांस्ये तिलतैलप्रपूरिते। विलोक्य प्रतिबिंबं तु दद्याद्रजतसंयुतं ॥ विप्रानन्यांश्च संतोष्य दक्षिणादिभिरादरात् । एवं कृते विधाने तु विघ्नशांतिः प्रजायते ॥ पुत्रान्पौत्रान् श्रियं चैव लभते नात्र संशयः ॥ ॥ अथ वृष्टिवैकृतशांतिः । गर्गः । अतिवृष्टिरनावृष्टिर्दुर्भिक्षायोभयं मतं । अनृतौ तु दिवानंता वृष्टिर्व्याधिभयाय तु ॥ अनभ्रवैकृताश्चैव विज्ञेया राजमृत्यवे । वैकृता गर्जितादयः । शीतोष्णानां विपर्यासे ऋतूनां रिपुजं भयं । शोणितं वर्षते यत्र तत्र शस्त्रभयं भवेत् ॥ अंगारपांसुवर्षेण नगरं तद्विनश्यति । मज्जाऽस्थिस्नेहमांसानां जनमारभयं भवेत् । फलं पुष्पं तथा धान्यं परेणातिभयाय तु। पांसुजंतूपलानां च वर्षणे रोगजं भयं ॥ छिद्रे वाभिप्रवर्षेण सस्यानामीतिवर्धनं । विरजस्के रवौ व्यभ्रे यदा छाया न दृश्यते ॥ दृश्यते तु प्रतीपा वा तत्र देशभयं भवेत् ॥ प्रतीपा विपरीता । निरभ्रे वा तथा रात्रौ श्वेतं याम्योत्तरेण तु । इंद्रायुधं तथा दृष्ट्वा उल्कापातं तथैव च ॥ दिग्दाहपरिवेषौ च गंधर्वनगरं तथा । परचक्रभयं विद्यादेशोपप्लवमेव च ॥ सूर्येंदुपर्जन्यसमीरणानां यागस्तु कार्यो विधिवद्द्विजेंद्र । धान्यानि गोकांचनदक्षिणाश्च देया द्विजानामघनाशहेतोः ॥ ॥ अथ जलाशयवैकृतशांतिः । गर्गः । नगरादुपसर्पंते समीपमुपयांति च ॥ नद्यो ह्रदप्रस्रवणा विरसा वै भवंति वा ॥ विवर्णं कलुषं तप्तं फेनावर्तातिसंकुलं । क्षीरं स्नेहं सुरां रक्तं वहंते व्याकुलोदकं ॥ षण्मासाभ्यंतरे तत्र परचक्रभयं विदुः । जलाशया नंदते वै प्रज्वलंति क्वथंति च । विमुंचंति तथा ब्रह्मन् ज्वालां धूमं रजांसि च ॥ अखाते वा जलो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पत्तिः ससत्वा वा जलाशयाः। संगीतशब्दा दृश्यंते जनमारभयं विदुः॥ दिव्यं महाभयं विद्धि मधुमात्तावसेचनं। जप्तव्या वारुणा मंत्रास्तैश्च होमो जले भवेत्॥ मध्वाज्ययुक्तं परमान्नमत्र देयं द्विजानामथ भोजनार्थं। गावश्च देयाः सितवस्त्रयुक्तास्तथोदकुंभाः सकलाघशांत्यै॥

॥ अथोपस्करवैकृतशांतिः। यांति यानान्ययुक्तानि युक्तान्यपि न यांति चेत्। चोद्यमानानि तत्र स्यान्महद्भयमुपस्थितं॥ वाद्यमाना न वाद्यंते वाद्यंते वाऽप्यनाहताः। अचलाश्च चलंत्येव चलाश्चैव चलंति न॥ आकाशे तूर्यनादश्च गीतगंधर्वनिःस्वनाः। काष्ठदर्वीकुठारादि विकारं कुरुते यदि॥ गोवालं शूलसंघाश्च स्त्रियं स्त्री चाऽपि घातयेत्। उपस्करादिविकृते घोरं शस्त्रभयं भवेत्॥ वायोश्च पूजां द्विज सक्तुभिश्च कृत्वा नियुक्तांश्च जपेच्च मंत्रान्। दद्यात्प्रभूतं परमान्नमत्र सदक्षिणं तेन शमोऽस्य भूयात्॥

॥ अथ मृगपक्षिवैकृतशांतिः। गर्गः। प्रविशंति यदा ग्रामानारण्या मृगपक्षिणः। अरण्यं यांति वा ग्राम्याः स्थलं यांति जलोद्भवाः। स्थलजा वा जलं यांति घोरा वाशंति निर्भयाः। राजद्वारे पुरद्वारे शिवाश्चाप्यशिवप्रदाः॥ दिवा रात्रिंचरा वाऽपि रात्रौ वाऽपि दिवाचराः॥ ग्राम्यास्त्यजंति वा ग्रामं शून्यतां तस्य निर्दिशेत्॥ दीप्तं वाशंति संध्यासु मंडलानि च कुर्वते। वाशंते विस्वरं यत्र तदाप्येतत्फलं भवेत्॥ प्रदोषे कुररो [कुक्कुटो] वाशेद्धेमंते वापि कोकिलाः। अर्कोदयेऽर्काभिमुखी शिवा वाऽपि भयं दिशेत्॥ भल्लूकः शब्दं कुर्वीत प्रविशन्नगराद्बहिः। गृहं कपोतः प्रविशेत्क्रव्यादो मूर्ध्नि वा पतेत्॥ "शां० सा० क्रव्यादो गृध्रकाकादिः" मधु वा मक्षिका कुर्यान्मृत्युर्गृहपतेर्भवेत्। प्राकारद्वारगेहेषु तोरणापणवीथिषु॥ केतुच्छत्रायुधाद्येषु क्रव्यादः संश्रयेद्यदि। जायते वाऽथ वल्मीको मधु वा दृश्यते यदि॥ स्वदेशो नाशमायाति राजा वा म्रियते तदा। मूषिकाशलभा दृष्ट्वा प्रभूतं क्षुद्भयं वदेत्॥ काष्ठोल्मुकास्थिशृंगास्याः श्वानो मरकवेदनाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्भिक्षवेदना ज्ञेया काका धान्यमुषो यदि ॥ जनानभिभवंतश्च निर्भयारण्यवेदनाः । काको मैथुनयुक्तश्च श्वेताभो यदि दृश्यते ॥ राजा वा म्रियते तत्र स देशो वा विनश्यति । उलूको वाशते यत्र निपतेद्वा तथा गृहे ॥ (वाशते कुशब्दं करोति) ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च । मृगपक्षिविकारेषु कुर्याद्धोमं सदक्षिणं । देवाःकपोतइति च जप्तव्यं पंचभिर्द्विजैः । सुदेवइति चैकेन देया गावश्च दक्षिणाः ॥ जपेच्छकुंतसूक्तं च मनोवेदशिरांसि च । एते मंत्रा ऋग्वेदे प्रसिद्धाः । गावश्च देया विधिवद् द्विजानां सकांचना वस्त्रयुगोत्तरीयाः । एवं कृते शांतिमुपैति पापं मृगैर्द्विजैर्वापि निवेदितं यत् (मृगाः पशवः । द्विजाः पक्षिणः) ॥ ॥ अथ प्रासादादिवैकृतशांतिः । गर्गः । प्रासादतोरणाट्टालद्वारप्राकारवेश्मनां । अनिमित्तं तु पतनं दृढानां राजमृत्यवे ॥ रजसा वाऽथ धूमेन दिशो यत्र समाकुलाः । आदित्यश्चंद्रताराश्च विवर्णा भयवृद्धये ॥ राक्षसा यत्र दृश्यंते ब्राह्मणाश्च विधर्मिणः । ऋतवश्च विपर्यस्ता अपूज्यं पूजयेज्जनः ॥ नक्षत्राणि वियोगीनि तन्महद्भयलक्षणं । केतूदयोपरागौ च छिद्रं वा शशिसूर्ययोः । ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत् ॥ स्त्रियश्च कलहायंते बाला निघ्नंति बालकान् । क्रियाणामुचिताना च विच्छित्तिर्यत्र दृश्यते ॥ अग्निर्यत्र न दृश्येत हूयमानोऽथ शाम्यति । क्रव्यादा वायसा वाहा यांति चोत्तरतस्तथा ॥ पूर्णाः कुंभाः स्रवंते च वह्नयो वा विलुंपते । मांगल्यध्वनयो यत्र न श्रूयंते समंततः ॥ क्षवथुर्बाधते वाथ प्रोत्साहे सति नर्दितः । न दैवतेषु वर्तंते यथावद्ब्राह्मणेषु च ॥ मंदघोषाणि वाद्यानि वाद्यंते विस्वराणि वा । गुरुमित्रद्रुहो यत्र शत्रुपूजारता जनाः ॥ ब्राह्मणाः सुहृदो मान्या जनैर्यत्रावमन्यते । शांतिमंगलहोमेषु नास्तिक्यं यत्र मन्यते ॥ राजा वा म्रियते तत्राथवा देशो विनश्यति । राज्ञो विनाशे संप्राप्ते निमित्तानि निबोध मे ॥ ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणांश्च विनिंदति । ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ॥ नैता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्स्मरति कृत्येषु याचितश्चाभ्यसूयति । रमते निंदया चैषां प्रशंसां नाभिनंदति ॥ अपूर्वं तु करं लोभात्तथा पातयते जने । एतेष्वभ्यर्चयेत्सम्यक् सपत्नीकान् द्विजोत्तमान् ॥ भोज्यानि चैव कार्याणि सुराणां बलयस्तथा । गावश्च देया द्विजपुंगवेभ्यो भुवं तथा कांचनमंबराणि । होमश्च कार्यो द्विजपूजनं च एवं कृते शांतिमुपैति पापं ॥ अद्भुते तु समुत्पन्ने यदि वृष्टिः प्रजायते । सप्ताहाभ्यंतरे ज्ञेयमद्भुतं निष्फलं हि तत् ॥ इति मात्स्योक्ताद्भुतशांतयः ॥ ॥ अथ नानोत्पातशांतिः । मदनरत्ने गर्गः । औत्पातिकीं महाशांतिं तत्वतः शृणु मेऽधुना । यत्र व्याधिरनावृष्टिः परचक्रमुपस्थितं ॥ दुर्भिक्षं जनमारो वा राज्ञो मरणमेव वा । तत्र शांतिक्रमः प्रोक्तो महाक्रतुमिहारभेत् ॥ पुनर्होमश्च कर्तव्यो बृहस्पतिमतं यथा । गावस्तथैव दातव्यास्तथैवायुर्विवृद्धये ॥ राज्ञोऽभिषेकं कुर्वीत तथैव च सऋत्विजः । त्रिरात्रं सप्तरात्रं वा उपोष्य च पुरोहितः ॥ औदुंबरीणां विधिवत्समिधां च शतं दहेत् । ब्राह्मणान्भोजयेत्तत्र हुतांते भूरिदक्षिणा ॥ यवानां होमयेद् द्रोणान् घृताक्तानां दशैव च । द्विजे घृताढकं दद्याद्यवद्रोणं ससेतिकं ॥ राज्ञः कुले प्रधाने वा घृतद्रोणं विधीयते । वृषभैकादशा गाश्च विप्रेभ्यः प्रतिपादयेत् ॥ कुले यस्य न रोहंति पुत्रा दुहितरस्तथा । सर्वजीवोपसर्गश्च तत्र कर्म प्रयोजयेत् ॥ साविञ्या कारयेत्कर्म ततः पापं प्रशाम्यति । अत्युष्णमतिशीतं च अतिवर्षमनूदकं ॥ अनार्तवं पुष्पफलमतिमात्रं च मारुतः । वाहनानां मृतिश्चैव अतिमात्रंच मूषकाः ॥ आरण्यमृगसंघानामथवा पुरसेविनां । यद्वाप्यौत्पातिकं किंचिच्छ्वेतपक्षाश्च वायसाः ॥ भैरवं चातिमात्रं च रुदंति मृगपक्षिणः । विद्युत्स्तनितनिर्घोषमनभ्रे चातिवर्षणं ॥ सिंहव्याघ्रतरक्षूणां दर्शनं च चतुष्पथे । ईदृशैर्लक्षणोत्पातैर्विनाशमभिलक्षयेत् ॥ अन्योऽत्र जायते राजा तथा चान्यः पुरोहितः । तत्र शांतिं प्रवक्ष्यामि पापप्रशमनीं शुभां ॥ औदुंबरीणां समिधां शतमष्टोत्तरं दहेत् । स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह क्षीरघृताक्तानां महामंत्रगणैः शुभैः ॥ हुत्वा शतसहस्रं तु परां शांतिमवाप्नुयात् । यंत्रं वा मुसलं वापि स्फुटते वाप्युलूखलं ॥ (यंत्रं द-
लनयंत्रं) भूतानां चैव विभ्येत गृहे देवकुले तथा । दृषद्वा भद्रपीठं वा आसनं शयनं तथा ॥ अकस्मात्स्फुटते यत्र कंपते वा वसुं-
धरा । तथा युक्तमयुक्तं वा यानं युग्मं प्रधावति ॥ अचलं चलते यत्र विवादश्चैव मंत्रिणां । अयुक्तं ब्राह्मणैः सार्धं विवदंते तथा भृशं ॥
ईदृशेषु निमित्तेषु महाभयमुदाहरेत् । श्रेष्ठिनां सार्थवाहानाममात्यानां भयं वदेत् ॥ महाजनविवादांश्च मंत्रिणां च विनिर्दिशेत् । तत्र शां-
तिं प्रवक्ष्यामि प्राजाप्रत्येति विश्रुतां ॥ अश्वत्थसमिधो हुत्वा घृताक्ता मधुसंयुताः । सावित्र्यष्टसहस्रेण प्राजापत्यांस्तु मंत्रयेत् ॥ पायसं भो-
जयेद्विप्रान् भुक्तांते भूरिदक्षिणाः । ततः प्रशाम्यते पापं प्रजापतिमतं यथा ॥ यमलानि च जायंतेऽशुभानि निजवाहनाः । मुंडवक्रमुखाश्चैव कुब्जाश्च
कुणयस्तथा ॥ अमानुषा मानुषाणां गजानां मृगपक्षिणां । जायंत ऊर्ध्वदंता वा अश्वाश्च विकृताननाः ॥ बहुशीर्षमशीर्षं वा बहुवर्णमवर्ण-
कं । एकशृंगमशृंगं वा चतुर्भुजमथाऽभुजं ॥ दीर्घकर्णमकर्णं वा अजकर्णमुखं तथा । व्यालव्याघ्रमुखाकारं बिडालमुखमुन्नतं ॥ ईदृशानि विरूपाणि
दृश्यंते यत्र गौतम । तत्र संग्रामतो ब्रूयाद्भयं क्षयकरं महत् ॥ जनक्षयं च पौराणां राज्ञः श्रेणिवधं तथा । तत्र शांतिं प्रवक्ष्यामि सर्वपापप्रणाशिनीं ॥
खदिराश्वत्थसमिधां सहस्राष्टोत्तरं दहेत् । विरूपाक्षेण मंत्रेण विधिवत्सुसमाहितः ॥ विरूपाक्षेण अग्निर्मूर्धेत्यादिना । तत्र हि विरूपाक्ष ऋषिः ।
दद्याच्च कपिलां धेनुं हुतांते शांतिमिच्छता । ततस्तच्छाम्यते पापं जातवेदोवचो यथा ॥ तथाऽकार्याणि जायंते अदंड्ये दंडपातनं । अपूज्या-
श्चैव पूज्यंते मान्यश्चैवावमन्यते ॥ अनड्वांश्च पिबेद्धेनुं धेनुश्चानडुहं पिबेत् । विधुनोतिच गां वत्सः प्रजातं नाभिनंदति ॥ प्रजातं वत्सं-
गौरिति शेषः । मैथुनं विपरीतं च अकाले मृगपक्षिणां । ब्राह्मणा भिन्नमर्यादा न तिष्ठंति स्वकर्मसु ॥ ईदृशैर्लक्षणोत्पातैर्विद्याद्देशस्य विभ्रमं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलहं जायते घोरं दुर्भिक्षं जनमारकं ॥ राजामात्यविनाशं च पौराणां च महद्भयं । तत्र शांतिं प्रवक्ष्यामि सर्वपापप्रणाशिनीं ॥ प्रज्वाल्याश्वत्थसमिधां कृत्वा संस्तरणं महत् । औदुंबरीणां समिधां सहस्राष्टोत्तरं बुधः ॥ जुहुयाद्विधिवद्वह्नौ परां शांतिमुपादधत् । दासीदाससमायुक्तं गृहं दद्याद् द्विजातये ॥ ततः प्रशाम्यते पापं गौतमस्य वचो यथा । कृष्णाः पिपीलिका यत्र ग्रामेषु नगरेषु च ॥ दृश्यंते ह्यतिमात्रं चेदूर्ध्ववंशकृतालयाः । शांतेर्गृहे देवगृहे तथा च नृपतेर्गृहे ॥ उपर्युपरिमात्रं तु दृश्यंते वेश्मवत्तदा । मक्षिका मशका दंशा अतिमात्रं भयावहाः ॥ ईदृशैर्लक्षणोत्पातैर्महाचोरभयं भवेत् । द्रव्याणां हरणं ब्रूयात्परचक्रस्य चागमं ॥ तत्र शांतिं प्रवक्ष्यामि विश्वामित्रोपदर्शितां । अश्वत्थसमिधां चैव हुत्वा चाष्टोत्तरं शतं ॥ पूर्णपात्राणि वै दद्याद्धुतांते भूरिदक्षिणां । सर्वोपस्करसंयुक्तं गृहं दद्याद् द्विजातये ॥ तिलपात्रं प्रदातव्यं तिलान्जुहुीत संयतः । अनाग्निर्ज्वलते यत्र अधूमे धूमदर्शनं ॥ बालैः सह कुमाराश्च कलहं यत्र कुर्वते । गवाद्यानां भवेन्नित्यं तथा घोषनिवासिनां ॥ श्रेष्ठिनां सार्थवाहानां कलहो यत्र जायते । राजामात्यविनाशं च पौराणां च महद्भयं ॥ तत्र शांतिं प्रवक्ष्यामि पितामहवचो यथा । पलाशसमिधामग्नौ सहस्राष्टोत्तरं दहेत् ॥ ब्राह्मणान्भोजयेत्तत्र परमान्नं घृताप्लुतं । ततस्तु शाम्यते पापं पितामहवचो यथा । प्राकारे नगरे रम्ये गोपुराट्टालकेषु च । रथ्याचतुष्पथे चैव देवतायतनेषु च ॥ निवासं यत्र कुर्वंति बकाः काकाश्च कौशिकाः । गृध्राः परभृताश्चैव आरण्या मृगपक्षिणः ॥ निरूहेत्कलहं घोरं सिद्धानां वचनं यथा । निरूहेत्तर्कयेत् । तत्र शांतिं प्रवक्ष्यामि नारदेनोपलक्षितां ॥ अश्वत्थसमिधानां तु घृताक्तानां विभावसौ ।वायव्येनेह मंत्रेण निवेद्यं च सुशोणितं ॥ ततस्तु शाम्यते पापं नारदस्य वचो यथा।
मृतः श्मशानं यो नीतः पुनर्जीवति मानवः ॥ गृहे यस्य प्रविष्टोऽसौ तिष्ठेदथ कदाचन । अचिरान्मृत्युमायाति त्वतदारपरिग्रहः ॥ तत्र शांतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवक्ष्यामि धर्मराजमतं यथा। सक्षीराणां घृताक्तानामग्नेर्हुत्वा मुखे बुधः॥ औदुंबरीणां विधिवत्ततः शांतिः कृता भवेत्। सावित्र्याष्टसहस्रेण क्षीरशांतिं च कारयेत्॥ क्षीरशांतिश्च रक्तानामेकवर्णानामित्यादिना वक्ष्यते। कपिलां तिलकांस्यं च हुतांते भूरिदक्षिणां। ततस्तच्छाम्यते पापं धर्मराजमतं यथा॥ श्वा शृगालोऽथवा गृध्रः काको वा यदि मानुषं। श्मशानान्मांसमादाय पुरमध्ये प्रवेशयेत्॥ नगरं पत्तनं वापि ग्रामं वा यदि वा गृहं। अचिरेणैव कालेन तच्छ्मशानं भविष्यति॥ चौरमंडलपातं तु परचक्रस्य चागमं। अनारोग्यमनावृष्टि-दुर्भिक्षं जनमारकं॥ संग्रामं शस्त्रसंपातं क्षिप्रमेव विनिर्दिशेत्। अश्वत्थसमिधो गृह्य तिलांश्च मधुसंयुतान्॥ विरूपाक्षेण मंत्रेण विरूपाक्षान्सुशोभितान्। तिलपात्रोपहारं च क्षीरशांतिं च कारयेत्॥ ततश्च शाम्यते पापं प्रजापतिमतं यथा। सौत्रामणिः पाकयज्ञः पशुबंधस्तथैव च॥ ऋतवश्च प्रवर्तंते अनधीत्यकृतोदयाः। यस्मिंस्तथा प्रवर्तंते क्रोधलोभभयादपि॥ अदत्वा दक्षिणां सम्यङ् महदुत्पातलक्षणं। अनारोग्यमनावृष्टिर्दुर्भिक्षं जनमारकं॥ ज्वरः कासस्तथा श्वासः कच्छूर्दद्रुर्विकोष्ठिकाः। शिरोरोगाक्षिरोगाश्च पांडुरोगो गलग्रहः॥ आधयश्च प्रवर्तंते दुर्दुष्टैः स्वप्नलक्षणैः। तत्र शांतिं प्रवक्ष्यामि बृहस्पतिमतं यथा॥ त्रिरात्रोपोषितो भूत्वा हविष्याशी पुरोहितः। सक्षीराणां घृताक्तानां समिधां च शतं दहेत्। पलाशस्येत्यर्थः। ततस्तच्छाम्यते पापं बृहस्पतिमतं यथा। वज्रमिंद्राशनिर्वापि ज्वलन्वै निपतेदिह॥ पुरे जनपदे वाऽपि तत्र विद्यान्महाभयं। संवत्सरे ततो घोरं विद्याद्भूतजनक्षयं॥ राजामात्यविनाशं च निर्दिशेन्नात्र संशयः। तत्र शांतिं प्रवक्ष्यामि इंद्राग्निवचनं यथा॥ अपामार्गस्य समिधां सहस्राष्टोत्तरं दहेत्। पायसं भोजयेद्विप्रान् क्षीरशांतिं च कारयेत्॥ रक्तानामेकवर्णानां गवां क्षीरं समादिशेत्। हुत्वाहुतिशतं विप्रो माहेंद्रेणैव मंत्रवित्॥ सुवर्णमणिसंकाशा हुतांते भूरिदक्षिणा। ततस्तच्छाम्यते पापमिंद्राग्निवचनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा ॥ प्रतिस्रोतो महानद्यः प्रवहंति जलाशयाः । उन्मार्गपथगामीनि जलान्यपहरंति च ॥ उद्गिरंति जलं भूमौ पुष्करिण्यो जलाशयाः । कुमुदोत्पलपुष्पाणां नद्याः स्रोतसि संभवः ॥ संदर्शनं ससर्पाणां नागानां जलशायिनां। चैत्यवृक्षा महोल्काश्च शुष्यंति च पतंति च ॥ पूयशोणितगंधाश्च कुणपानां सुगंधिता । कृमिशोणितवर्षं च छिन्नभिन्नप्ररोहिता ॥ ईदृशानि निमित्तानि संति यत्रैव गौतम । परचक्रागमं विद्यात्सर्वलोकभयावहं ॥ राजामात्यभयं ब्रूयात्पौराणां च महद्भयं । औदुंबरीणां विधिवत्समिधां वै समाहितः ॥ सहस्राष्टोत्तरं कुर्यादैंद्राग्नेन च मंत्रवित् । रुद्रजापश्च कर्तव्यो वायव्यश्च समंततः ॥ देवालयेषु सर्वेषु नानावादित्रनिस्वनैः । सोदकाक्षतपत्रैश्च ब्राह्मणान्स्वस्ति वाचयेत् ॥ द्विजातीनां गोसहस्रं हुतांते भूरिदक्षिणा । उत्पाता ह्यनिमित्तास्तु ये केचिद्भयदारुणाः ॥ गोप्रदानेन शाम्यंति प्रजापतिमतं यथा । व्रतोपवासनियमैर्होमैर्ब्राह्मणपतर्पणैः ॥ दिव्योत्पाते समुत्पन्ने माहेंद्रं साधयेच्चरुं । वारुणं चांतरिक्षे तु आग्नेयं पार्थिवे तथा ॥ तथा संग्रामकालेऽपि प्रहाराणां निवृत्तये । एवमित्यादिकं लोके दिव्यभौमांतरिक्षगं ॥ व्रतोपवासैर्नियमैः शांतिभिश्च प्रशाम्यति । देवता यत्र पूज्यंते सांवत्सरपुरोहितौ ॥ गुरवो ग्रहनक्षत्रं तदाहुः शुभलक्षणं । तत्र देवीपुराणे । अपचारेण लोकानामुपकाराद्दुरात्मनां । अपरक्ता विनाशाय सृजंते देवता मुने ॥ उत्पातान्विविधाकारान्दिव्यभौमांतरिक्षजान् । स प्राचीं दिशमन्वावर्ततेऽथ यदाऽस्य मणिककुंभस्थालीदरणं यानच्छत्रशय्यासनावसथध्वजपताकागृहैकदेशप्रभंजनेषु गजवाजिमुख्याः प्रमीयंत इत्येवमादीनि तानि सर्वाणींद्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवंतींद्रंवोविश्वतस्परीति स्थालीपाकमष्टशतं हुत्वा पंचभिराज्याहुतीरभिजुहोतींद्रायस्वाहा शचीपतयेस्वाहा वज्रपाणयेस्वाहेश्वरायस्वाहा सर्वपापप्रशमनायस्वाहेति व्याहृतिभिश्च पृथग्जुहोति । स दक्षिणां दिशमन्वावर्ततेऽथ यदाऽस्य प्रजायां पशुषु शरीरे वाऽरिष्टानि प्रादुर्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंति व्याधयो वाऽनेकविधा अतिस्वप्नदुःस्वप्नमतिभोजनमभोजनमालस्याजीर्णानि गृहद्वारेण वा सर्पो गच्छति कपोतः प्रविशति शरीरे वाऽऽरोहति कृष्णा स्त्री अदर्शनमादर्शे इत्येवमादीनि तानि सर्वाणि यमदेवत्यानि भवंति नाकेसुपर्णमिति स्थालीपाकं हुत्वा पंचभिराज्याहुतीरभिजुहोति यमायस्वाहा प्रेताधिपतयेस्वाहा दंडपाणयेस्वाहेश्वरायस्वाहा सर्वपापप्रशमनायस्वाहेति व्याहृतिभिश्च पृथग्जुहोति । स प्रतीचीं दिशमन्वावर्ततेऽथ यदाऽस्य क्षेत्रगृहसंस्थेषु धान्येष्वीतयः प्रादुर्भवंत्युपद्रवा अनेकविधा आखुपतंगपिपीलिकामध्वकभौमकशुकशरभसौक्ष्मकमित्येवमादीनि तान्येतानि सर्वाणि वरुणदेवत्यानि भवंति घृतवतीइति वरुणस्योत्तंभनमसीति स्थालीपाकं हुत्वा पंचभिराज्याहुतीरभिजुहोति वरुणायस्वाहाऽपांपतयेस्वाहा पाशपाणयेस्वाहेश्वरायस्वाहा सर्वपापप्रशमनायस्वाहेति व्याहृतिभिश्च पृथग्जुहोति । स उदीचीं दिशमन्वावर्ततेऽथ यदाऽस्य कनकरजतवस्त्रवैदूर्यमुक्तामणिवियोगो भवत्यारंभा वा विपद्यंते मित्राणि वा विरज्यंते वेश्मानि मधून्यलाबूनि वा जायंते वल्मीकाश्चोच्चीयंते शुष्कवृक्षाः प्ररोहंति तैलं स्त्यायाति रात्राविंद्रधनुर्दृश्या दिवा च श्वेतं वायसं श्मशानेऽनग्नौ धूमो जायतेऽश्वतरी गर्भं गृह्णात्येवमादीनि वैश्रवणदेवत्यान्यद्भुतानि भवंत्यभित्यंदेवमिति स्थालीपाकं हुत्वा पंचभिराज्याहुतीरभिजुहोति वैश्रवणायस्वाहा यक्षाधिपतये॰ हिरण्यपाणये॰ ईश्वराय॰ सर्वपापप्रशमनायस्वाहेति व्याहृतिभिश्च पृथग्जुहोति । स पृथिवीमन्वावर्ततेऽथ यदाऽस्य पृथिवी स्फुटति स्खलति चलति कंपति ज्वलति रुदति धूमायत्यकस्मात्सलिलमुद्गिरति प्लवति मज्जति निमग्नमुत्प्लवत्यकाले पुष्पफलानीत्येवमादीन्यग्निदेवत्यानि भवंत्यग्निंदूतमिति स्थालीपाकं हुत्वा पंचभिराज्यं जुहोत्यग्नयेस्वाहाऽर्चिष्मते॰ शक्तिपाणये॰ ईश्वरायस्वाहा सर्वपापहरायस्वाहेति व्याहृतिभिश्च पृथग्जुहोति । सोंऽतरिक्षमन्वावर्ततेऽथ यदाऽस्य विवाता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाता वायंतेऽभ्रेषु चापरूपाणि दृश्यंते खरकरभगृध्रकंककपोतोलूकश्येनभासवायसगोमायुसंस्थान्युपरिपांसुमांसपेश्यस्थिरुधिरवर्षाणि प्रवर्तंते काकमिथुनानि दृश्यंते रात्रौ मणिधनुः पश्येच्छशका ग्रामं विशंति वृक्षाः स्रवंति रुधिराण्याकाशे नगरमेवमादीनि वायुदेवत्यानि भवंति वातआवात्विति स्थालीपाकं हुत्वा पंचभिराज्याहुतीर्जुहोति वायवेस्वाहा महद्भूताधिपतयेस्वाहा शीघ्रपाणये० ईश्वराय० सर्वपापहरायस्वाहेति व्याहृतिभिर्हुत्वाऽथ साम गायेत् । स दिवमन्वावर्ततेऽथ यदास्य तारावर्षाणि चोल्काः पतंति धूमायंति दिशो दह्यंति केतवश्चोत्तिष्ठंति गवां शृंगेषु धूमो जायते गवां स्तनेषु रुधिरं स्रवत्यत्यर्थं हिमं निपततीत्येवमादीनि सोमदेवत्यान्यद्भुतानि भवंति सोमंराजानमिति स्थालीपाकं हुत्वा पंचभिराज्यं जुहोति सोमायस्वाहा नक्षत्रपतयेस्वाहा शीतपाणये० ईश्वरायस्वाहा सर्वपापहरायस्वाहेति व्याहृतिभिश्च पृथग्जुहोति । स परं दिवमन्वावर्तते देवतायतनानि कंपंते देवताप्रतिमा हसंते नृत्यंति रुदंति गायंति स्फुटंति स्विद्यंत्युन्मीलंति निमीलंति प्रतियांति नद्यः कबंधमादित्ये दृश्यते जलं च परितप्यते केतुपताकाछत्रवज्रविषाणानि प्रज्वलंत्यश्वानां वालधिष्वंगाराः क्षरंत्यहतानि मर्माणि क्रंदंत इत्येवमादीनि विष्णुदेवत्यानि भवंतीदंविष्णुरिति स्थालीपाकं हुत्वा पंचभिराज्याहुतीर्जुहोति विष्णवेस्वाहा सर्वभूताधिपतये० चक्रपाणये० ईश्वराय० सर्वपापहरायस्वाहेति व्याहृतिभिर्हुत्वाऽथ साम गायेत् । खननाद्दहनादभिमर्शनाद्गोभिराक्रमणाच्च चतुर्भिः शुध्यते भूमिः पंचमाच्चोपलेपनात्संभारान्प्रदक्षिणमानीय ब्राह्मणान्स्वस्ति वाच्य संभारैर्यदुपसृष्टं तदभ्युक्षेच्छाम्यतीह ब्राह्मणभोजनं हिरण्यं गौर्वासोऽश्वो भूमिर्दक्षिणेति । सोऽधस्ताद्दिशमन्वावर्ततेऽथ यदाऽस्य गवां मानुषमहिष्यजाश्वोष्ट्राः प्रसूयंते हीनांगान्यतिरिक्तांगानि विकृतरूपाणि वा जायंतेऽचलानि चलंत्येवमादीनि रुद्रदेवत्यानि भवंत्यावोराजानमिति स्थालीपाकं हुत्वा पंचभिराज्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुतीर्जुहोति रुद्रायस्वाहा पशुपतये० शूलपाणये० ईश्वराय० सर्वपापहरायस्वाहेति व्याहृतिभिर्हुत्वाऽथ साम गायेत् । स ऊर्ध्वां दिश-मन्वावर्ततेथ यदाऽस्य मानुषाणामतिदुःखं पर्वताः स्फुटंति निपतंत्याकाशाद्भूमिः कंपते महाद्रुमा उन्मीलंत्यश्मानः प्लवंते चतुष्पादं पंचपादं भवत्येवमादीनि सूर्यदेवत्यानि भवंत्युदुत्यमिति स्थालीपाकं हुत्वा पंचभिराज्याहुतीर्जुहोति सूर्यायस्वाहा सर्वग्रहाधिपतये० किरणपाणये० ईश्वराय० सर्वपापहरायस्वाहेति व्याहृतिभिर्हुत्वाऽथ साम गायेत् । स सर्वा दिशोऽन्वावर्ततेऽथ यदाऽस्य स्त्रियो यमलानि प्रसूयंते श्वेतकाकः काकमैथुनं च दृश्यत उत्पाताश्च सर्वत्र दिशां दाहाश्च जायंते पिशाचराक्षसगोऽजाविपुच्छेष्वग्निश्चोद्भवति पशुषु मानुषो भवति मानुषेषु सर्वाणि सत्वानि पशवो जायंते वाङ्मनःकर्मभिर्वा रुद्रं द्वेष्टि स्त्रीपुंसयोः पौंश्चल्यभावः सर्वपापेषु बुद्धिरित्येवमादीनि रुद्रदेवत्यानि भवंति विश्वतश्चक्षुरिति स्थालीपाकं हुत्वा पंचभिराज्याहुतीर्जुहोति रुद्रायस्वाहोमापतये० शूलपाणये० ईश्वराय० सर्वपाप० व्याहृतिभिः पृथग्जुहोति । भूमिकंपो दिशां दाहो ग्रहयुद्धं तु जायते । गगने दृश्यते केतुरादित्यश्चैव कंपते ॥ आदित्ये दृश्यते छिद्रं कृष्णवर्णोऽभिजायते । विपरीता नदी चैव रुधिरं च प्रवाहयेत् ॥ गगनाच्छ्रूयते गीतं निर्घोषश्चैव जायते । एवमादीनि सर्वाण्यद्भुतानि प्रायश्चित्तानि भवंति । गृहे गृहे भवेच्छांतिर्मातॄणां पूजनं बलिः । दानं रुद्रजपो नित्यं भास्करेज्या ग्रहार्चनं ॥ लक्षहोमं कोटिहोमं दूर्वाहोमं पुरोदितं । गोभूहिरण्यवस्त्रान्नतिलदानं शुभावहं ॥ पायसं दधि क्षीराज्यं देयं विप्रेषु भोजनं ॥ अथ पूर्वाहुतीर्हुत्वा दूर्वादर्भशमीवीरणान् दधिसर्पिःसर्षपान् फलिनीरपामार्गतिलयवव्रीहयः समिधश्चैतान्याहरेत्स्नातः स्थंडिलमुपलिप्य तंत्रेणौदनं कृसरं यवान् सक्तुपायसं दधिमधुघृताक्ताः पृथक्चरवः सर्वेषां पायसमग्निं समाधाय जुहुयादिंद्रंविश्वाअवीवृधन्० नाकेसुपर्णं० वरुणस्योत्तंभनमसि० अभित्यंदेवंसवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तार० अग्निंदूतंवृणीमहे० इदंविष्णुर्विचक्रमे० विश्वतश्चक्षु० गौरीर्मिमाय० कांडात्कांडात्० ध्रुवासिध्रुवोयं० योजिनातिनजीयते० इहैवस्तंमावियौष्टं० पुनःपत्नीमग्निरदादायुषासहवर्चसा । दीर्घायुरस्यायःपतिर्जीवातिशरदःशतमिति ॥ इति नानोत्पातशांतिः ॥ ॥ अथ दीपपतनादिशांतिः संगृह्यते । वह्वृचगृह्यपरिशिष्टे । " स उदीचीं दिशमन्वावर्ततेऽथ यदाऽस्य धनकनकरजतवस्त्रवैदूर्यवज्रमणिमौक्तिकवियोगो भवत्यारंभा वा विपद्यंते भार्या वा विरज्यते मित्राणि वा विरज्यंते काकमैथुनं वा पश्येदरिष्टानि वा वयांसि च गृहमध्य आसते मधूनि वा निलीयंते वल्मीकं छत्राकं वोपजायते वायसकपोताः प्रविशांति वन्यविहंगशशमृगप्रवेशे गौर्म्हंगो वा गृहमारोहेच्छुष्कवृक्षः प्ररोहेद् गृहमध्ये दूर्वाः प्ररोहंति तैलं स्त्यायति रात्राविंद्रधनुर्दृष्ट्वा दिवा श्वेतं च वायसं गृहद्वारेण सर्पो निर्गच्छति मंडूकोऽग्निं प्रविशति सरटो मूर्ध्नि पतति प्रज्वलन्दीपः पतति चुंबलिनी पततीत्येवमादीनि तान्येतानि सर्वाणि वैश्रवणदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवंत्यभित्वंदेवंसवितारमोण्योरिति स्थालीपाकमष्टशतं हुत्वा पंचभिराज्याहुतिभिरभिजुहोति । वैश्रवणायस्वाहा यक्षाधिपतयेस्वाहा हिरण्यपाणयेस्वाहेश्वरायस्वाहा सर्वोत्पातशमनायस्वाहेति महाव्याहृतिभिश्च हुत्वा शंतातीयं जपेत् " इति दीपपतनादिशांतिः ॥ ॥ अथ प्रयोगः । कर्ता शुभकाले आचमनादिदेशकालस्मरणांते मम सपरिवारस्य प्रज्वलद्दीपपतनसूचितसकलानिष्टपरिहारद्वारा श्री० सग्रहमखां पारिशिष्टोक्तां शांतिं करिष्य इति संकल्प्य गणेशपूजनाद्याचार्यवरणांतं कुर्यात् (अत्र ग्रहयज्ञ आचार्यवरणं च कृताकृतं) तत आचार्यः प्रादेशकरणांते स्थंडिलात्प्राच्यां कलशादौ सौवर्णप्रतिमायां अभित्वं वामदेवो वैश्रवणोऽष्टिः । वैश्रवणावा० । इति वैश्रवणमावाह्य पूजयेत् । ततोग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिकीर्तनांते वैश्रवणं प्रधानदेवं चरुणा अष्टोत्तरशतसंख्याभिराहुतिभिः । वैश्रवणं १ यक्षा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिपतिं २ हिरण्यपाणिं ३ ईश्वरं ४ सर्वोत्पातशमनं ५ अग्निं पृथिवीं महांतं ६ वायुमंतरिक्षं महांतं ७ आदित्यं दिवं महांतं ८ प्रजापतिं चंद्रमसं नक्षत्राणि दिशो महांतं ९ चैता देवता आज्येन । शेषेणेत्यादिप्रणीतास्थापनांते तूष्णीमष्टोत्तरशताहुतिपर्याप्तांस्तंडुलान्मुष्टिभिर्निरुप्य तूष्णीं चतुः प्रोक्ष्य चरुश्रपणादिग्रहादिहोमांते अवदानधर्मेण अशक्तौ पाणिना वा चरुमवदाय पूजामंत्रेणाष्टोत्तरशताहुतीर्हुत्वा स्रुवेणाज्यं जुहुयात् । वैश्रवणायस्वाहा । यक्षाधिपतये० । हिरण्यपाणये० । ईश्वराय० । सर्वोत्पातशमनाय० । भूरग्नयेचपृथिव्यैचमहतेचस्वाहा । भुवोवायवेचांतरिक्षायच० । सुवरादित्यायचदिवेच० । भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्च० । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते ग्रहयज्ञकरणपक्षे बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन समुद्रज्येष्ठाइत्यादिभिर्यजमानं सपरिवारमभिषिंचेत् । ततो यजमानो धृतशुक्लांबरो विभूतिं धृत्वा देवतोत्तरपूजां विधाय आचार्यादिभ्यो गवादिदक्षिणादानांते विसर्जितदेवतापीठं सोपस्करमाचार्याय दत्वा शंतातीयं जपेत् । तच्च । उतदेवाइत्यादिसप्तर्चस्य सूक्तस्य सप्तर्षयो विश्वेदेवा अनुष्टुप् । जपे० । शंनइंद्राग्नीसूक्तं जपेदिति केचित् । ततः शक्त्या विप्रान्संभोज्य भूयसीं दत्वा शांतिं वाचयित्वा कर्मेश्वरायार्पयेत् । ईळेद्यावा० । इदंहनूनं० । उतदेवाइति च सूक्तत्रयमिदं शंतातीयमित्युच्यते । शंनइंद्राग्नीसूक्तमपि शंतातीयपदाभिधेयमिति वृद्धा उपदिशंति । काकमैथुनदर्शनसरटपतनवायसकपोतवानरप्रवेशाद्युक्तनिमित्तांतरेष्वप्ययमेव शांतिः कार्या । इति दीपपतनादिशांतिप्रयोगः ॥

॥ अथ प्रासादकलशलिंगार्चाभंगादिशांतिः । अद्भुतसागरे नारदः । यत्र देवकुले वज्रं पतेद् गृध्रोऽथवा पुनः । कंकोऽथ पतते चैव चूडायामग्निदर्शनं ॥ (देवकुलं देवालयं । वज्रं विद्युत् । चूडा प्रासादकलशः) लिंगं वा भिद्यते यत्र कंपते चानिमित्ततः । चूडा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भंगो भवेद्यत्र प्रतिमा भिद्यतेऽथवा ॥ ग्रामोत्सादो भवेत्तत्र स्वामिनो मरणं दिशेत् । तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शुभं ॥ कुंडं कृत्वा विधानेन ततो होमं समारभेत् । चरुं च यमदेवत्यं साधयित्वा विधानतः ॥ ससुवर्णेन हस्तेन ततः कर्म समारभेत् । अष्टोत्तरशतं हुत्वा घृताक्तसमिधां ततः ॥ माषैर्मुद्गैस्तिलैश्चैव घृतेन मधुना सह । एभिः पंचसहस्राणि शक्तिबीजेन होमयेत् ॥ (शक्तिबीजेन ह्रीमित्यनेन) होमांते तर्पयेद्विप्रान् दक्षिणाभोजनादिभिः । भूमिं धेनुमनड्वाहं स्वर्णं धान्यं सदक्षिणं ॥ पंचगव्यं ततः कृत्वा स्नाप्य देवालयं द्विजः । बलिं दत्वा विधानेन कृसरैः पायसैस्तथा ॥ ईशानं स्थापयेत्तत्र बलिं दत्वा विधानतः । एवं कृत्वा विधानं तु कृतकृत्यो भवेन्नरः ॥ मंडपस्य तथा भित्तिश्चूडा देवकुलस्य च । पूजायां पार्थिवस्यापि प्रतिमायास्तथैव च ॥ अकस्मान्निपतेद्यत्र कंपते वाऽनिमित्ततः । दधिक्षौद्रघृताक्तानामश्वत्थसमिधां ततः ॥ हुनेदष्टशतं प्राज्ञ इमारुद्रेतिमंत्रवित् । धेनुं च दक्षिणां दद्यात्तिलपात्रं सकांचनं ॥ इति प्रासादकलशलिंगार्चाभंगादिशांतिः ॥ ॥ अथ प्रयोगः । कर्ता द्विराचमनादिदेशकालस्मरणांते मम श्रीपरमेश्वरप्रीतिद्वारा प्रासादकलशभंगसूचितसकलारिष्टनिरासपूर्वकशुभफलावाप्त्यर्थं सग्रहमखां नारदोक्तां शांतिं करिष्ये इति संकल्प्य गणेशपूजादिऋत्विग्वरणांतं कुर्यात् । तत आचार्यः ससुवर्णहस्तः प्रादेशकरणांते कुंडात्प्राच्यां पीठादौ प्रतिमायां यमं संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिकीर्तनांते यमं प्रधानदेवं चरुघृताक्तसमिद्भिः प्रतिद्रव्यं अष्टोत्तरशतसंख्याभिराहुतिभिः शक्तिं प्रधानदेवतां माषमुद्गतिलघृतमधुभिः प्रतिद्रव्यं सहस्रसंख्याभिराहुतिभिः शेषेणेत्यादि । निर्वापादिविधिना चरुश्रपणं । आज्यभागांते यमायसोमामिति चरुसमिद्धोमं कृत्वा ॐ ह्रीं स्वाहेति माषादिपंचद्रव्याणि जुहुयात् । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुतिपूर्वकं संस्रावहोमादिशेषं समाप्य यथाशक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणान्संभोज्य दक्षिणाभिः परितोष्य भूमिं धेनुमनड्वाहं स्वर्णं धान्यं च सदक्षिणानि दत्वा पंचगव्येन प्रासादं संस्नाप्य कृसरपायसाभ्यां बलिं दत्वा कर्म समापयेत् । विद्युत्पाते कंकपाते चूडाज्वलने लिंगभेदे प्रतिमाभेदे कंपने चैवं कार्यं । संकल्पे तत्तत्पदोहः कार्यः । लिंगप्रतिमाभेदे बलिदानपूर्वं पुनः प्रतिष्ठेति विशेषः । प्रासादकलशमंडपभित्तिपार्थिवप्रतिमानामाकस्मिकपतने कंपने वा इमारुद्रायेतिमंत्रेण दधिमधुघृताक्ता अश्वत्थसमिधोऽष्टोत्तरशतसंख्यया हुत्वा धेनुं ससुवर्णं तिलपात्रं च दक्षिणात्वेन दद्यात् । इति प्रासादकलशलिंगार्चाभंगादिशांतिप्रयोगः ॥ ॥ अथ मदनरत्ने परिशिष्टोक्ताद्भुतशांतिः । गृहमध्ये स्थूणा विरोहति कपोतो वाऽगारमध्ये निपतेद्वायसो वा गृहं प्रविशेद्गौर्वा गृहमारोहेद्वल्मीकं वोपजायेत गौरात्मानं प्रतिधयेदनड्वान्वा भुवमुल्लिखेदनग्नौ वा धूमो जायते छत्राकं निर्यासं वोपजायते मंडूकोऽग्निं प्रविशेदवृष्टौ वाशेत स्वप्नेऽस्थिदंतपतने गृहपतिर्जायया सहोपपतिं विंदेत् । अन्येषु वा गृहोत्पातेषु देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा स्थालीपाकं जुहोति । यतइंद्रभयामहइति पुरोनुवाक्यामनूच्य स्वस्तिदाविशस्पतिरितियाज्यया जुहोत्यथाज्याहुतीरुपजुहोति वास्तोष्पते शंनइंद्राग्नी कयानश्चित्रआभुवत्कोअद्यभवतन्नःसमनसाविति स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानादथाग्रेण शमीपर्णेषु हुतशेषं निदधाति शंनोदेवीरभिष्टयइति स्थालीसंक्षालनमाज्यशेषमुदकशेषं च पात्र्यां समानीय निनयेत्प्रोक्षयेद्वा तच्छंयोरावृणीमहइत्यन्नं संस्कृत्य ब्राह्मणान्संपूज्याशिषो वाचयित्वा शिवमित्यद्भुतो व्याख्यातः । इति मदनपरिशिष्टोक्ताद्भुतशांतिः ॥ ॥ अथ जनमारशांतिः । (जनमारो नाम संघातमरणलक्षणो मरकापरपर्यायो महामारीतिं प्रसिद्धो रोगविशेषः । सच लोभाद्याविष्टराजकृतकरादिपीडाद्यभिभूतप्रजाकृतस्वधर्मादित्यागजन्यरुद्रकोपोत्थ इति गर्गवाक्याशयोऽग्रे वक्ष्यते) "वि० मा० काशीखंडे । साग्रं शतं योजनानां देशः सर्वोऽभिभूयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घोरै राजकृतैर्दोषैः परेषामपि सुव्रत ॥ ब्रह्मवैवर्ते । राजा यत्कुरुते पापं ब्रह्महत्यादि दारुणं । वंशजान् हंति सहसा स्त्रीवधं कुरुते भृशं ॥ तेन राजा च सा पृथ्वी सनरा क्षयमाप्नुयात् । कालस्फोटादयो दोषा वैद्यविज्ञानलक्षणाः ॥ प्रवदंत्यौषधं नैव मंत्रतंत्राणि चैव हि । आशुमृत्युकराश्चैव शोकत्द्वद्रोगकारिणः ॥ रुद्रप्रकोपजस्तस्माज्जनमारोऽभिजायते । तस्मात्प्रसादयेद्देवं पार्वतीवल्लभं शिवं ॥ गाणपत्येन विधिना ह्यथर्वशिरसा तथा । यामलेन विधानेन कुर्याद्देवप्रसादनं ॥ रुद्रसूक्तं तथा गाथां विष्णुसूक्तं तथैव च । वल्युपहारान्विविधांश्चत्वरेषु निवेदयेत् ॥ आवाहयित्वा सगणं रुद्रं शैलसुतान्वितं । शिवद्वारे विधिस्त्वेष कार्यो नान्यत्र वै शुभः ॥ त्रैयंबकेण मंत्रेण होमं तत्र प्रकल्पयेत् । समिधो ब्रह्मवृक्षस्य जुहुयाच्च सहस्रकं॥साज्यं च पायसं चैव सहस्रं जुहुयात्सुधीः । सहस्रं बिल्वपत्रैश्च अविच्छिन्नैर्द्विजोत्तमः॥जुहुयात्क्षीरयष्टीभिस्तथा च तिलसर्पिषा ।(यष्टयः समिधः) सर्वं स्विष्टकृतं चैव जपेच्छांतिं द्विजोत्तमः॥ततोऽभिषेचनं नृणां सर्वेषामपि कारयेत् ।आचार्यब्रह्मऋत्विग्भ्यो हेमदानं प्रकल्पयेत् ॥ गामाचार्याय साध्वीं च सवत्सां च पयस्विनीं । सदक्षिणां सवस्त्रां च सालंकारां सभाजनां ॥ नामगोत्रं समुच्चार्य प्राङ्मुखाय निवेदयेत् । वक्ष्यमाणेन मंत्रेण दाता चैवोत्तरामुखः ॥ दानमंत्रः । धेनुस्त्वं पृथिवीरूपा सर्वपापक्षयंकरी । जनस्यास्य च सर्वस्य मृत्युं नाशय शोभने ॥ सप्तधान्यानि विप्रेभ्यो दद्याद्राजा समाहितः । भूमिदानानि भूरीणि विविधांश्च तुरंगमान् ॥ दद्याच्छकटदानं च धुर्याभ्यां सुनियंत्रितं । ततश्च रुद्रसदने गर्भागारं सुसंस्कृतं ॥ दशांगेन च धूपेन धूपयेत्प्रयतः पुमान् । शतपत्राणि पुष्पाणि पूजार्थं प्रतिपादयेत् ॥ विलिप्य चंदनं श्वेतं सकर्पूरं सुसंस्कृतं । दीपैर्नीराजयेद्देवं नैवेद्यैस्तोषयेच्छिवं ॥ तांबूलं दापयेद्विद्वान्द्रविणं कनकादि च । एवं संपूज्य देवेशं प्रार्थयेत्सजनो नृपः ॥ मंत्रस्तु । देवदेव महादेव महापापविनाशन । जनमारकृतां पीडां सद्यो नाशय शंकर ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रार्थ्य देवेशं कुर्याच्चैव प्रदक्षिणं । जपेच्छिवस्तुतिं धीमान् श्रद्धया परया युतः ॥ प्रसादिते ततो रुद्रे जनमारो निवर्तते । ब्राह्मणान्भोजयेत्पश्चात्सहस्रशतसंख्यया ॥ रुद्रार्चनं गवां दानं गायत्रीजपमुत्तमं । निवारयंति विघ्नानां राशींश्चात्र न संशयः ॥ शिवपूजां शिवध्यानं शिवाराधनसत्क्रियां । ये कुर्वंति सदा भक्त्या ते विघ्नान्न भजंति वै ॥ यो राजा मंगलाविष्टो धर्मकीर्तिपरायणः। न भवेत्तस्य राष्ट्रे तु जनमारः कदाचन ॥ उपवासेन भूपालो विधानमिदमाचरेत् । सभार्यः सजनः श्रीमान् सपुत्रः सपुरोहितः ॥ धर्ममंगलगीतैश्च नृत्यैश्च विविधैरपि । शृणुयाद्वैष्णवाख्यानं हृष्टपुष्टजनावृतः ॥ शां॰ सा॰ हेमाद्रौ मदनरत्ने नृसिंहपुराणे । अनावृष्टिमहामारीज्वररोगभये तथा । नरसिंहं समाराध्य ब्राह्मणैर्वेदपारगैः ॥ कारयेल्लक्षहोमं तु ग्रामे यश्च नराधिपः । नृसिंहमंत्रेणायं होमः । सुश्रुते । स्थानत्यागाज्जपाद्धोमान्महामारी प्रशाम्यति । आथर्वणे तु रौद्री शांतिरुक्ता । ” हेमाद्रौ गर्गः । जनमारसमुत्पत्तिं प्रवक्ष्यामि च शांतिकं । यदा लोभसमाविष्टैः पीड्यंते पार्थिवैः प्रजाः ॥ रमत्यभिद्रवन् राजा नच धर्मेण तिष्ठति । [क्लेशयत्यनिशं राजा नच धर्मं समाचरेत्] वचस्तस्यानुवर्तंते प्रजा धर्मं विहाय ताः ॥ क्रोधलोभसमाविष्टाः साध्वाचारविवर्जिताः । पूजयंति च नो मोहाद्देवान्विप्रांस्तथा पितॄन् ॥ तास्वधर्माभिभूतासु ततो रुद्रः प्रकुप्यति । अंतकोऽप्येष भगवान्भूतानां प्रिय एव च ॥ कुरुतेऽसौ विकारांश्च हंतुं भूतान्पृथग्विधान् । ताराग्रहान्केतुदंडान् राहुकारुककीलकान् ॥ ससूर्यसंध्याविकृतीन्घोरान्वा मृगपक्षिणः । [ताराग्रहोल्कारुद्राश्च राहुकेतूग्रदर्शनं । उदयास्तमये चंद्रसूर्यबिंबविपर्ययः ॥ ‘ विपर्ययशब्देन शीतोष्णता ’ विकारा मृगसिंहानां विद्युत्पातोल्बणानि च ।] भूमिकंपोल्कानिर्घातशीतोष्णानिलविक्रियाः । अतिवर्षमवर्षं च तथैवर्तुविपर्ययः ॥ औषध्यो रसहीनाश्च भवंत्यृतुविपर्यये । रसवीर्यविहीनास्ता रोगानुत्पादयंत्यथ ॥ [गृष्टयो दुग्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हीनाश्व रोगयुक्ता भवंति वै । एतद्राजकृतं पापं विज्ञेयं नात्र संशयः] दिव्यभौमांतरिक्षाः स्युरुत्पाता दोषसूचकाः । संभवंति तदा रोगा दारुणा जनमारणाः ॥ रुद्रप्रकोपजं तस्माज्जनमारं प्रचक्षते । तेनाभिभूताः सर्वेऽपि लभंते बुद्धिवैकृतं ॥ सत्वं बलं च विकृतिं याति प्रायेण जंतुषु । ब्रह्मस्वहरणाच्चापि गुरुद्रोहात्सतां वधात् ॥ लक्ष्यते जनमारोऽयं समुत्पन्न इति श्रुतिः । तस्मात्प्रसादयेद्यत्नाद्देवदेवं महेश्वरं ॥ दैवज्ञानुप्रदिष्टेन विधिना सुसमाहितः । गाणपत्येन विधिना अथर्वशिरसा तथा ॥ यामलेन विधानेन कुर्याद्देवप्रसादनं । शिवसूक्तमुमासूक्तं जपेच्च शतरुद्रियं ॥ बल्युपहारान्विविधांश्चत्वरेषु निवेदयेत् । आवाहयित्वा सगणं रुद्रं रात्रावहस्सु च ॥ ब्राह्मणान्भक्ष्यभोज्यैश्च दक्षिणाभिश्च तोषयेत् । प्रसादिते ततो रुद्रे जनमारो निवर्तते ॥ नह्येष नानादेवत्यैर्विविधैश्चान्यकर्मभिः । बलाच्छमयितुं शक्यो रुद्रकोपसमुत्थितः ॥ तस्मात्प्रसादयेद्यत्नैर्भावाय जगतो हितं । शिवं प्रजानां भवति यदा संप्रीयते शिवः ॥ धर्ममंगलशीलश्च देवब्राह्मणपूजकः । शर्वार्चनरतः सर्वैरुपसर्गैर्विमुच्यते ॥ जपोपवासनिरतो नृपतिश्च यतेंद्रियः । युक्तो होममुपाश्रित्य नियमेन यथाविधि ॥ एवं युक्तस्य नृपतेः कर्मसिद्धिः प्रशस्यते । कर्मणस्तस्य मूलं हि श्रद्दधानो नृपः स्मृतः ॥ उपोषितो नृपः स्नातः शुक्लवस्त्रसमावृतः । आत्मरक्षां स्वयं कृत्वा ततः शांतिं प्रयोजयेत् ॥ धर्मात्मा धर्मविदुषां राजा राजपुरोहितः । राजा वै सगुणो येषां कुशलं तत्र वर्धते ॥ (पूर्वं नानोत्पातशांतौ जनमारशांतिरुक्तास्ति । शांतिसारे तु । याम्यांतुकारयेच्छांतिंसंप्राप्तेमरकेतथेति । एषा शांतिराथर्वणे प्रसिद्धेति तत्रैव) विष्णुधर्मोत्तरे । रुद्राणां च तथा जप्यं सर्वारिष्टनिषूदनं । सर्वकामकरो होमस्तथा सर्वत्र शांतिदः ॥ अजाविकानामश्वानां कुंजराणां तथा गवां । मनुष्याणां नरेंद्राणां बालानां योषितामपि ॥ ग्रामाणां नगराणां च देशानामपि भार्गव । उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च ॥ मरके समनुप्राप्ते रिपुजे च तथा भये । रुद्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होमः परा शांतिः पायसेन घृतेन वा ॥ मार्कंडेयपुराणे । उपसर्गानशेषांस्तु महामारीसमुद्भवान् । तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ मम दुर्गायाः । अत्र प्रागुक्तौ गायत्र्या नृसिंहमंत्रेण वा लक्षहोमकोटिहोमौ च ज्ञेयौ । (अत्र संख्योक्ता कात्यायनतिंत्रे । उपसर्गोपशांत्यर्थं त्रिरावृत्तं पठेन्नरः । ग्रहदोषोपशांत्यर्थं पंचावृत्तं वरानने ॥ महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् । नवावृत्त्या भवेच्छांतिर्मुच्येत्प्राणार्तिजाड्य-यात् ॥ महाभये महोत्पातादिजे इति नागेशभट्टाः । तत्रैव । चंड्याः शतावृत्तपाठात्सर्वाः सिध्यंति सिद्धयः) इति जनमारशांतिः ॥

॥ अथ ब्रह्मवैवर्तोक्तः प्रयोगः । शुभकाले राजा ग्रामाधिपतिर्वा शिवालये आचमनादिदेशकालस्मरणांते श्रीरुद्रप्रसादसिद्धिद्वारा एतन्नगर (एतद्ग्रामेत्यूहः) निवासिसकलप्राणिशरीरेषु उत्पन्नोत्पत्स्यमानजनमाराख्यप्रबलरोगोपसर्गस्य शीघ्रोपशमपूर्वकं सर्वेषामायुरारोग्याद्य-भीष्टसिद्ध्यर्थं सग्रहमखां जनमारशांतिं करिष्ये । इति संकल्प्य गणेशपूजनादिऋत्विग्वरणांतं कुर्यात् । तत आचार्यः प्रादेशकरणांते रु-द्रस्य महापूजां विधाय रुद्रसूक्तानि शतरुद्रियानुवाकं रुद्राथर्वशीर्षं विष्णुसूक्तं च जप्त्वा अग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहा-द्युत्कीर्तनांते रुद्रं प्रधानदेवं पलाशसमिद्घृताक्तपायसबिल्वदलक्षीरवृक्षसमिद्घृताक्ततिलैः प्रतिद्रव्यं सहस्रसंख्याभिराहुतिभिः शेषे-णेत्यादिग्रहादिहोमांते त्र्यंबकमंत्रेणोक्तद्रव्यैरुक्तसंख्यया प्रधानहोमं कुर्यात् । ततः स्विष्टकृदादिप्रायश्चित्तहोमाते इंद्रादिभ्यो बलीन्दत्वा क्षे-त्रपालाय चत्वरे महाबलिं दद्यात् । शांतिसूक्तजपांते पूर्णाहुतिं हुत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन सर्वप्राणिनामभिषे-कं कुर्यात् । ततः कर्ता धृतशुक्लांबरो विभूतिं धृत्वा ग्रहादीनामुत्तरपूजांते उदङ्मुखः प्राङ्मुखोपविष्टायाचार्याय सोपस्करां सद-क्षणां च धेनुं दद्यात् । तत्र मंत्रः । धेनुस्त्वं पृथिवीरूपा सर्वपापक्षयंकरी । जनस्यास्य च सर्वस्य मृत्युं नाशय शोभने ॥ ततस्तस्मै ब्रह्मादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋत्विग्भ्यश्च यथाशक्तिसुवर्णं दत्वाऽन्येभ्यश्च सप्तधान्यानि भूमिमश्वान् सवृषं शकटं च यथासंभवं तत्तन्मंत्रैर्दत्वा शिवस्य गर्भागारं गंधादिनोपलिप्य दशांगधूपेन धूपयित्वा शिवं सकर्पूरश्वेतचंदनेन विलिप्य शतपत्रपुष्पैः संपूज्य धूपादितांबूलसमर्पणांते सुवर्णादिदक्षिणां दत्वा सर्वैः सह कृतांजलिस्तं प्रार्थयेत्। देवदेव महादेव महापापविनाशन। जनमारकृतां पीडां सद्यो नाशय शंकर॥ ततो देवं प्रदक्षिणीकृत्य शिवस्तुतिं पठित्वा सहस्रं शतं वा विप्रान्संभोज्य भूयसीं दत्वा शांतिं वाचयित्वा कर्म समापयेत्॥ १ ॥ यद्वा नृसिंहपुराणोक्तः प्रकारः। तत्र रुद्रपूजास्थाने नृसिंहं संपूज्याग्निग्रहस्थापनांते होमः। नृसिंहं प्रधान० तिलैः लक्षसंख्या०। नृसिंहायविद्महे वज्रनखायधीमहि। तन्नःसिंहःप्रचोदयात्। इति होममंत्रः। शेषं प्राग्वत्॥ २ ॥ यद्वा बौधायनोक्तः प्रकारः। प्राग्वत्संकल्प्य गणेशपूजादि कृत्वा ग्रामस्थं मुख्यदेवं सहस्रकलशैरभिषिच्य यथाविभवं संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। ग्रहाद्युत्कीर्तनांते मृत्युंजयं प्रधानदेवं घृताक्ततिलैः पंचसहस्रसं० शेषं प्राग्वत्॥ ३ ॥ यद्वा गर्गोक्तः प्रकारः। तत्र सग्रहमखामित्युल्लेखवर्जं प्राग्वत्संकल्प्य रुद्राथर्वशीर्षजपांते उमासूक्तं जपित्वा यथाविभवं नानाविधपदार्थैर्महांतं बलिं चत्वरे दत्वा यथाशक्ति विप्रान्संभोज्य दक्षिणाभिः संतोष्य कर्म समाप्य जपोपवासादिधर्मशीलो भवेत्॥ ४ ॥ यद्वा विष्णुधर्मोक्तः प्रकारः। प्राग्वद्रुद्रपूजांतेऽग्निग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। ग्रहादिकीर्तनांते रुद्रं प्रधा० पायसेन (घृतेन वा) अमुकसं०। रुद्राध्यायमंत्रैर्होमः। महाबलिदानांते पूर्णाहुत्यादिकर्मसमाप्तिः॥ ५ ॥ यद्वा रुद्रपूजांते यथासंभवं लघुरुद्रादि जपित्वा कर्मसमाप्तिः॥ ६ ॥ यद्वा मार्कंडेयपुराणोक्तः प्रकारः। संकल्पे श्रीदुर्गाप्रसादेत्यादिसिद्ध्यर्थमित्यंते मार्कंडेयपुराणांतर्गतश्रीदुर्गामाहात्म्यस्य त्रीन् सप्त नव शतं वा पाठान्करिष्येइति संकल्प्य गणेशपूजादि कृत्वा पाठान्कुर्यात्॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति जनमारशांतिप्रयोगः ॥ ॥ अथ काकमैथुनदर्शनादिशांतयः । अद्भुतसागरे गर्गः । काकस्य मैथुनं पश्येत्काकः शिरसि चेद्विशेत् । शिरस्युरसि वा कुर्यात्पक्षघातं नखैस्तथा ॥ विदारणं च कुरुते शयानं संस्पृशेद्यदि । तदा वदेत्तु मरणं महारिष्टमथापि वा ॥ मध्यरात्रे यदा काको वाशते हेतुना विना । तद् गृहारिष्टमाचष्टे ग्रामारिष्टमथापि वा ॥ शांतिं तत्र प्रकुर्वीत विधानेन यथोदितां । उद्दिश्यारिष्टशमनं कुर्यात्संकल्पमादितः ॥ शुचौ देशेऽरत्निमात्रे स्थंडिलेऽग्निं निधाय च । तदैशाने चाष्टदले कुंभस्योपरि शक्तितः ॥ हिरण्यनिर्मितं त्विंद्रं लोकपालसमन्वितं । पूजयित्वा स्वशाखोक्तविधिना श्रपयेच्चरुं ॥ कृत्वाज्यभागपर्यंतं जुहुयात्क्रमशो हविः । पलाशसमिधो व्रीहींश्चरुमाज्यमिति क्रमात् ॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा । यतइंद्रेतिमंत्रेण लोकपालेभ्य एव च ॥ शक्त्या हुत्वा स्वशाखोक्तप्रायश्चित्ताहुतीर्हुनेत् । लोकपालबलिं दत्वा इंद्राग्रे चरुशेषतः ॥ वायसेभ्यो बलिं दद्यादैंद्रवारुणमंत्रतः । पूर्णाहुतिं ततो दत्वा आचार्यं पूजयेत्ततः ॥ कुंभोदकेनाभिषेको यजमानस्य विस्तरात् । आचार्यायेंद्रप्रतिमां दद्यात्सोपस्करां ततः ॥ शक्त्या च भूयसीं दद्याद् द्विजानां भोजनं दिशेत् । शतं तदर्धमर्धं वा शक्त्यभावे दशापि वा ॥ सर्वशांतिं पाठयित्वा गृह्णीयाच्च द्विजाशिषः । एवं कृते भवेच्छांतिः काकारिष्टविनाशिनी ॥ एवं श्वेतकाकदर्शनेऽपि । काको मैथुनयुक्तश्चेच्छ्वेतः स यदि दृश्यते इति हेमाद्रौ गर्गोक्तेः । केचित्तु श्वेतकाकमैथुनदर्शने विशिष्टे दोषो न केवले इत्याहुः । ते चेद्यदिपदाभ्यां दृश्यतेपदावृत्त्या च निमित्तभेदाऽज्ञानाद् भ्रांता इत्युपेक्ष्याः॥ मदनरत्ने नारदः । दिवा वा यदि वा रात्रौ यः पश्येत्काकमैथुनं । स नरो मृत्युमाप्नोति यदि वा स्थाननाशनं ॥ काकघातव्रतं यद्वा विदधीताथ वत्सरं । पितृवद् द्विजान्भक्त्या प्रत्यहं चाभिवादयेत् ॥ जितेंद्रियो जितक्रोधः सत्यधर्मपरायणः । तद्दोषशमनायेत्थं शांतिकर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाचरेत् ॥ गृहस्यैशानभागे तु होमस्थानं प्रकल्पयेत् । स्वगृह्योक्तविधानेन तत्र स्थाप्य हुताशनं ॥ मुखांते समिदन्नाज्यैर्हुनेदष्टोत्तरं शतं । प्रतिमंत्रं त्र्यंबकेण अपमृत्युद्वयेन च ॥ अपमृत्युमपक्षुधमिति मंत्रद्वयं तैत्तिरीये प्रसिद्धं । व्याहृतिभिर्व्रीहितिलैर्जयाद्यंतं प्रकल्पयेत् । पूर्णाहुतिं च जुहुयात्कर्ता शुचिरलंकृतः ॥ स्वर्णशृंगीं रौप्यखुरां कृष्णां धेनुं पयस्विनीं । वस्त्रालंकारसहितां निष्कद्वादशसंयुतां ॥ तदर्धेन तदर्धेन तदर्धेनाथवा पुनः [तदर्धार्धेन वा पुनः] । यथावित्तानुसारेण तन्न्यूनाधिककल्पना ॥ आचार्याय श्रोत्रियाय तां गां दद्यात्कुटुंबिने । यस्मात्त्वं पृथिवी सर्वा धेनो वै कृष्णसंनिभे । सर्वमृत्युहरे नित्यमतः शांतिं० ॥ ब्राह्मणेभ्यो विशिष्टेभ्यो यथाशक्ति च दक्षिणां । ब्राह्मणान्भोजयेत्पश्चात्स्वस्तिवाचनपूर्वकं ॥ एवं यः कुरुते सम्यक्स तद्दोषात्प्रमुच्यते ॥

॥ अथ काकस्पर्शशांतिः । " शां० म० सूर्यास्तमनवेलायां वायसः संस्पृशेद्यदि । निःशब्दो वा सशब्दो वा पुंसो मृत्युप्रदायकः ॥ अंगनां च स्पृशन्काको वैधव्यं तत्र निर्दिशेत् । नदीतीरे गवां गोष्ठे क्षीरवृक्षे सुरालये ॥ नरो वायससंस्पृष्टो वधं बंधनमादिशेत् । प्रतिचंद्रं प्रतिसूर्यं वायसः स्पृशते यदि ॥ अर्थहानिं तथा मृत्युं शस्त्रेण च विनिर्दिशेत् । मासैः पंचभिरेवास्य निशाभिः फलमादिशेत् ॥ तद्दिनादि फलं सद्भिः प्रोक्तमत्र शुभाशुभं । शांतिं तत्र प्रकुर्वीत शास्त्रदृष्टेन कर्मणा ॥ महानद्यंभसि स्नात्वा शिवलिंगं निरीक्षयेत् । नत्वा संपूज्य लिंगं तु स्तुत्वा च दिक्पतीनपि ॥ आरभ्य तद्दिनादेव वायसेभ्यो बलिं हरेत् । शनैश्चरदिने प्राप्ते एकांते शुभमंदिरे ॥ कृष्णानि नव वस्त्राणि अहतानि नवानि च । पूर्वदिक्क्रमयोगेन स्थापयेच्च पृथक्पृथक् ॥ माषप्रस्थप्रमाणेन स्थापयेत्तत्र वायसान् । पूर्वस्यां कपिलं तत्र स्थापयेन्मंत्रपूर्वकं ॥ नीलग्रीवमथाग्नेय्यां याम्यां च विकृतस्वरं । नैर्ऋत्यां च न्यसेत्क्रौंचसपमृत्युविनाशनं ॥ विद्युज्जिह्वं च वारुण्यां वायव्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णकर्बुरं । कौबेर्यां कालनामानमैशान्यां श्वेतमेव च ॥ अहते कृष्णवस्त्रे तु यमं मध्ये प्रपूजयेत् । महिषं कृष्णवर्णं च यमं माषैश्च पूजयेत् ॥ रक्तोत्तमांगं सर्वत्र आयुधैश्च समन्वितं । लोहदंडं चतुर्वाहुं पूजयेन्मंत्रपूर्वकं ॥ यस्मिन्वृक्षे परेयिवांसं सुगंनःपंथामेव च । एते मंत्राः समाख्याताः शूद्राणां नाममंत्रतः ॥ अकालमूलं कलशं स्थापयेत्तस्य संनिधौ । जलपूर्णं रत्नगर्भं पूर्णपात्रसमन्वितं ॥ स्थापयेत्तत्र देवेशं शूलपाणिं महेश्वरं । प्रतिष्ठाप्य च तान्सर्वानथ मंत्रैः प्रपूजयेत् ॥ कपिलस्त्वं च वर्णेन शुभाशुभनिवेदकः । गृहाणार्घ्यं मया दत्तं भवाऽशुभविनाशनः ॥ नीलग्रीव गृहाणार्घ्यं मया दत्तं खगेश्वर । अपमृत्युविनाशाय ददामि बलिमुत्तमं ॥ क्रूरस्त्वं पापिनां नित्यं सौम्यस्त्वं धार्मिके जने । विकृतस्वर गृहाणार्घ्यं मया दत्तं शुभाय नः ॥ क्रूरस्त्वं पापिनां नित्यं वधा शुभं न ऋच्छति । गृहाणार्घ्यं मया दत्तं क्रौंच सौम्यप्रदो भव ॥ विद्युजिह्व नमस्तेस्तु शोकव्याधिविनाशन । बलि पूजां मया दत्तां गृहाण सुखदो भव ॥ कृष्णकर्बुरनामा त्वं भूतभव्यानिवेदकः । गृहाणार्घ्यं मया दत्तं भव वैधव्यनाशनः ॥ काकस्त्वं कालनामासि दुष्टकालनिवेदकः । गृहाण बलिपूजां मे दत्तां दुःखविनाशन ॥ श्वेतस्त्वं सितवर्णोऽसि मृत्युभावस्य सूचकः । गृहाणार्घ्यं मया दत्तं भव मृत्युविनाशनः ॥ तन्मध्ये पूजयेद्देवं धर्मराजं चतुर्भुजं । यमाय धर्मराजाय मृत्यवे चांतकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥ नीलग्रीवाय लोकेश दंडहस्ताय ते नमः । पाशहस्ताय सायुधाय सपरिवाराय ते नमः ॥ चंदनैश्च सुगंधैश्च वासोभिः पूजयेद्यमं । आदौ त्र्यंबकमंत्रेण ईश्वरं च प्रपूजयेत् ॥ मृत्युविनाशिनीं विद्यां कुंभे चैव नियोजयेत् । शतमष्टोत्तरं चैव आचार्यो त्दृष्टमानसः ॥ स्वगृह्योक्तविधानेन चरुं च यमदैवतं । संश्रप्य जुहुयादग्नौ समिदाज्यचरूंस्तिलान् ॥ तद्देवत्या समित्कार्या शतमष्टोत्तरं तथा । समित्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेण जुहुयात्प्रतिद्रव्यं शतं हुनेत् ॥ सुगंनःपंथामंत्रेण होतव्यं सर्वमत्र तु । भद्रासनं प्रकर्तव्यं पंचवर्णकसंयुतं ॥ तस्योपरि न्यसेत्पट्टं यजमानमथाह्वयेत् । निवेश्याच्छादिते पीठे अभिषेकं च कारयेत् ॥ पावमानीभिस्तल्लिंगैर्मंत्रैर्वारुणसंभवैः । तल्लिंगैः सुगंनःपंथामित्यादिभिः । तत्र स्नानं प्रकर्तव्यं तीर्थानीतेन वारिणा ॥ सहस्राक्षादिभिर्मंत्रैः स्नानं कार्यं द्विजोत्तमैः । ततोऽन्यद्वस्त्रमादाय धर्मराजं तु पूजयेत् ॥ उक्तैः षोडशभिर्मंत्रैः सुगंनेत्यर्घ्यमर्पयेत् । तत उत्थाय संप्रार्थ्य भक्तिभावसमन्वितः ॥ रक्ष मे पुत्रपौत्रांश्च रक्ष मे पशुबांधवान् । रक्ष पत्नीं पतिं चैव पितरं मातरं धनं ॥ अग्नितो मे भयं माऽस्तु रोगाच्च व्याधिबंधनात् । शस्त्रतो विषतोयौघाद्भयं नाशय मे सदा ॥ प्रार्थनैवं प्रकर्तव्या नमस्कारसमन्विता । काकस्पृष्टं च यद्वस्त्रं स्नानक्लिन्नं च यद्भवेत् ॥ सहिरण्यं च तत्कृत्वा ब्राह्मणाय निवेदयेत् । मंत्रस्तु । यत्किंचित्स्पर्शदोषोत्थं दुष्कृतं मयि विद्यते । तत्सर्वं नाशमायातु वस्त्रदानेन सूर्यज ॥ वायसांस्तान्यमं चैव आचार्याय निवेदयेत् । माषान्वासांसि कृष्णां तु धेनुं चैव पयस्विनीं ॥ शनिवारे च तत्कार्यं रविवारेऽथवा पुनः । घृतपात्रे ससौवर्णे दर्शयेदात्मनस्तनुं ॥ ब्राह्मणेभ्यो ददेदन्नं भूयसीं चैव शक्तितः । यथोक्तां दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत्॥स्थाने यत्र स्पृशेत्काकस्तत्स्थानं पूजयेत्तदा॥एवं कुर्यात्प्रयत्नेन ध्वांक्षदोषः प्रशाम्यति" ॥मानवसंहितायां । अथातः संप्रवक्ष्यामि वायसः प्रविशेद्गृहं । प्रवेशद्वारतो गच्छेन्मासमेकं विवर्जयेत् ॥ द्वारांतरे यदा गच्छेत्षण्मासांस्तु विवर्जयेत् । गृहप्रवेशने काको गृहाशेषक्षयंकरः ॥ " शां० सा० । देवालयं विशेच्चैव शीघ्रं मृत्युकरो भवेत् । देवो राजा " देवालये नृपाणां तु ग्रामनाशो भविष्यति । श्वानमार्जारतो गत्वा वायसः प्रविशेद्गृहं । गृहस्थमरणं विद्यात्सर्वनाशो गृहे भवेत् ॥ एतेषां दोषजातानां शांतिं वक्ष्ये समासतः । प्रवेशस्थानदेशेषु दक्षिणे वा गृहात्ततः ॥ गोमयेनोपलिप्ते च स्थंडिले समलंकृते । आचार्यं वरयेदादौ ब्राह्मणं वेदपारगं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रीहिद्रोणे च सुश्लक्ष्णं स्थापयेदव्रणं घटं। पंचपल्लवसंयुक्तं पंचगव्यसमन्वितं ॥ पंचरत्नसमायुक्तं पूरयेत्तीर्थवारिणा। तस्योपरि न्यसेत्पात्रे काकरूपं शचीपतिं ॥ कर्षमात्रसुवर्णेन पादेनाथ स्वशक्तितः। प्रतिमां कारयेत्पश्चाद्वस्त्रयुग्मं निवेदयेत् ॥ यतइंद्रेतिमंत्रेण अर्चयित्वा तु दैववित्। इंद्रादीशानपर्यंतमर्चयेल्लोकपान् क्रमात् ॥ कुंभाभिमंत्रणं कुर्याच्छ्रीरुद्रं च स्पृशन् जपेत्। स्वगृह्योक्तेन विधिना होमकर्म समाचरेत् ॥ यतइंद्रेतिमंत्राभ्यां समिदाज्यचरून् हुनेत्। अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा ॥ त्रैयंबकेण मंत्रेण तिलानष्टशतं हुनेत्। इदंविष्णुस्तु मंत्रेण लाजहोमं समाचरेत् ॥ उपहोमं ततः कृत्वा महाव्याहृतिभिर्हुनेत्। इंद्रायस्वाहा। वायसोत्पातशमनायस्वाहा। शांतायस्वाहेति। ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ॥ संपातैरभिषिक्तस्तु गोयुग्मं दक्षिणां दिशेत्। आज्यावलोकनं कृत्वा महाशांतिं पठेत्ततः ॥ नारदः। श्रीरग्निर्बंधुनाशश्च वित्तहानिर्महद्यशः। बंधुलाभः पुत्रहानिः स्त्रीचिंता महती गदः ॥ पूर्वादिषु फलान्येषामिंद्रलुप्ते च मस्तके। पंचत्वक्पल्लवस्वर्णपंचामृतफलोदकैः ॥ अभ्यंगमंत्रितैर्मंत्रैः स्नानाद्दोषं विमुंचति। एवमेवाग्निदाहेऽपि मस्तकेऽमेध्यदूषिते ॥ दंतच्छदे काकहतौ सरठीपतनेऽपि च। लाभदः कुड्यगोधोऽत्र शुभदो व्यत्यये व्ययः ॥ दक्षिणे स्फुरणे लाभो वामे स्फुरणमन्यथा। स्त्रीणां विपरीतं। सीताहरींद्रक्षणदाचराणां वामानिनेत्राणिसमुल्लसंतीति रामायणोक्तेः। इति काकमैथुनदर्शनादिशांतयः ॥ ॥ अथ प्रयोगः। कर्ता शुचिदेशे आचमनादिदेशकालस्मरणांते मम काकमैथुनदर्शनसूचितसकलारिष्टपरिहारद्वारा श्री० सग्रहमखां गर्गोक्तां शांतिं करिष्ये। इति संकल्प्य (शिरसि वायसारोहणसू० शिरस्युरसि वा काकपक्षघात० वायसकृतनखविदारण० शयानस्य काकस्पर्श० मध्यरात्रे अनिमित्तवायसाक्रंदनसूचितेत्यादि निमित्तांतरेषूह्यं) गणेशपूजनादिऋत्विग्वरणांतं कुर्यात्। तत आचार्यः प्रादेशकरणांते अरत्निमात्रं स्थंडिलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वा तत्राग्निं प्रतिष्ठाप्य ध्यात्वा तदैशान्या महीद्यौरित्यादिविधिना कुंभं संस्थाप्य पूर्णपात्रोपर्यष्टदले यथाशक्तिसुवर्णनिर्मितप्रातिमायां यत- इंद्र भर्ग इंद्रो बृहती । इंद्रावा० । इतींद्रं परितो लोकपालांश्चावाह्य षोडशोपचारैः पूजयेत् । ततस्तदुत्तरतो ग्रहस्थापनादिकलशप्रार्थनांतं कृत्वाऽन्वादध्यात् । ग्रहाद्युत्कीर्तनांते इंद्रं प्रधानदेवं पलाशसमिद्व्रीहिचर्वाज्यैः प्रतिद्रव्यं अष्टोत्तरसहस्रसं० । १०८ वा । लोकपालांश्च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्यं अष्टसं० । शेषेणेत्यादिप्रणीतास्थापनांते तूष्णीं निर्वापादिविधिना चरुं श्रपयित्वाज्यसंस्कारादिग्रहहोमांतं कृत्वा यथान्वाधानमिंद्रहोमोत्तरं लोकपालेभ्यस्तान्येव द्रव्याण्युक्तसंख्यया जुहुयात् । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानोत्तरं हुतशेषाच्चरु- मादाय ऐंद्रवारुणवायव्या याम्या वै नैर्ऋताश्च ये । ते काकाः प्रतिगृह्णंतु भूम्यां पिंडं समर्पितमितींद्रस्य पुरतो वायसेभ्यो बलिं दत्वा पूर्णा- हुतिसंस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन सपरिवारं यजमानं समुद्रज्येष्ठाइत्यादिमंत्रैरभिषिंचेत् । ततः कर्ता धृतवस्त्रो विभूतिं धृत्वा देवतोत्तरपूजांते आचार्यं संपूज्य तस्मै सोपस्करामिंद्रप्रतिमां दत्वा ऋत्विग्भ्यो दक्षिणादानांते शतं पंचाशतं दश वा विप्रान्संभोज्य भूयसीं दत्वा तैः शांतिं पाठयित्वाशिषो गृहीत्वा कर्म समापयेत् । श्वेतकाकदर्शनेऽपीयमेव शांतिः कार्या । इति काकमैथुनदर्शनादिशांति- प्रयोगः ॥

॥ अथ गृहे काकप्रवेशशांतिप्रयोगः । तत्र काकस्य प्रवेशमार्गेणैव निर्गमने मासपर्यंतं मार्गांतरेण निर्गमने तु षण्मासप- र्यंतं तद्गृहं वर्जयित्वाऽनंतरं कस्मिंश्चित् शुभे दिने वायसप्रवेशस्थले गृहाद्दक्षिणभागे वा कर्ता आचमनादिदेशकालस्मरणांते मम गृहे वायसप्रवेशसूचितसर्वारिष्टपरिहारद्वारा श्री० सग्रहमखां मनूक्तां शांतिं करिष्ये इति संकल्प्य गणेशपूजनादिऋत्विग्वरणांतं कुर्यात् । तत आचार्यः प्रादेशांते स्थंडिलात्पूर्वे महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयःसमिति द्रोणप्रमाणव्रीहिराशिं कृत्वा आकलशेष्विति कलशं संस्थाप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमंमइति तीर्थोदकेनापूर्य गायत्र्यादिमंत्रैः पंचगव्यानि प्रक्षिप्य गंधक्षेपादिपूर्णपात्रनिधानांते कर्षाद्युक्तप्रमाणेन काकरूपां सुवर्णप्रतिमां कृत्वा तत्र यतइंद्र भर्ग इंद्रो बृ० । इतींद्रमावाह्य षोडशोपचारैः संपूज्य परित इंद्रादिलोकपालानावाह्य पूजयेत् । ततः कुंभं स्पृष्ट्वा रुद्राध्यायं जपेत् । ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहाद्युत्कीर्तनांते इंद्रं प्रधानदेवं पलाशसमिदाज्यचरुभिः प्रतिद्रव्यमष्टोत्तरसहस्रसं० । १०८ वा । त्र्यंबकं तिलैः अष्टोत्तरशतसं० । विष्णुं लाजैः अष्टोत्तरशतसं० । इंद्रं१ वायसोत्पातशमनं२ शांतं३ अग्निं पृथिवीं महांतं ४ वायुमंतरिक्षं महांतं ५ आदित्यं दिवं महांतं ६ प्रजापतिं चंद्रमसं नक्षत्राणि दिशो महांतं च ७ एकैकयाज्याहुत्या शेषेणेत्यादिग्रहादिहोमांते वक्ष्यमाणरीत्या प्रधानहोमं कुर्यात् । तत्र प्रधानाज्यहोमेषु प्रत्याहुति उत्तरतः स्थापितजलकुंभे संपाताख्यमाज्यशेषं प्रक्षिपेत् । यतइंद्रेतिद्वयोर्भर्गइंद्रो बृहती । द्वितीया सतोबृहतीपंक्तिः । होमे० । इतिमंत्राभ्यामुक्तसंख्यया समिदाज्यचरुहोमांते त्र्यंबकमंत्रेण तिलान् इदंविष्णुरिति लाजांश्च हुत्वा इंद्रायस्वाहा । वायसोत्पातशमनायस्वाहा । शांतायस्वाहा । भूरग्नयेचपृथिव्यैचमहतेच० । भुवोवायवेचांतरिक्षाय० । सुवरादित्यायचदिवेच० । भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्च० । इति मंत्रैरेकैकामाज्याहुतिं जुहुयात् । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकैः संपातोदकैश्च सपरिवारं यजमानं समुद्रज्येष्ठाइत्यादिमंत्रैरभिषिंचेत् । ततः कर्ता विभूतिं धृत्वा देवतोत्तरपूजांते आचार्यं संपूज्य तस्मै गोयुग्मं तन्निष्क्रयं वा दत्वा ऋत्विग्भ्यो यथाशक्तिदक्षिणादानांते विसर्जितदेवतापीठमाचार्यहस्ते प्रतिपाद्य आज्ये स्वप्रतिबिंबमवलोक्य सदक्षिणं तद्ब्राह्मणाय दत्वा शक्त्या विप्रान्संभोज्य भूयसीं दत्वा शांतिं वाचयित्वा कर्म समापयेत् । इति गृहे काकप्रवेशशांतिप्रयोगः ॥ ॥ अथोलूककपोतादिशांतिः । " नि० शि० शौनकः । उलूकश्येन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृध्रा वा कपोताः क्रूरपक्षिणः । प्रविशंति गृहे यस्य क्रोशंति च मृतिर्भवेत् ॥ क्रोशंति बहुशो गेहे प्राकारादिषु सर्वतः । तिष्ठंति निर्भयास्ते तु उलूकाद्याश्च पक्षिणः ॥ मंडलीभूय ते सर्वे स्वरान्वै कुर्वते तदा । संध्यासु व्योम्नि तद्गेहपतेर्नाशः प्रजायते ॥ कुर्वंति पक्षिणस्त्वेते शिरस्ताडनमेव वा । षण्मासाभ्यंतरे दुःखमत्यंतं चैव जायते ॥ अविलंब्य ततः कुर्याच्छांतिं तद्दोषशांतये । गृहस्याच्छादनं हित्वा शांतिकर्म समाचरेत् ॥ ब्राह्मणान्वरयेत्तत्र स्वस्तिवाचनपूर्वकं । षोडश द्वादशाष्टौ वा वेदवेदांगपारगान् ॥ सुवर्णप्रतिमां मृत्योः सुवर्णेन विनिर्मितां । (सुवर्णेन सुवर्णाख्यमानेन) तस्यार्धेनापि वा कुर्यात्तदर्धार्धेन वा पुनः ॥ यथावित्तानुसारेण प्रतिमां कारयेद्बुधः । पक्षिरूपां प्रयत्नेन कृत्वा पूजां समाचरेत् ॥ स्थंडिले रचयेत्पद्मं कर्णिकायां न्यसेत्ततः । यदुलूकेतिमंत्रेण कुर्यान्मृत्योस्तु पूजनं ॥ (स्थंडिलं वेदी) देवाःकपोतमंत्रेण पक्षिपूजां समाचरेत् । पिष्टेन पक्षिरूपं तु कृत्वा चैव प्रयत्नतः ॥ रक्तगंधैश्च पुष्पैश्च वस्त्रैश्चैव प्रपूजयेत् । कलशं स्थापयेत्तत्र पंचत्वक्पल्लवैर्युतं ॥ गव्यौषधादि निक्षिप्य रुद्रमिंद्रं ततोऽर्चयेत् ॥ रक्तगंधांश्च पुष्पाणि धूपदीपौ निवदयेत् । त्रैयंबकं चाभयं च ब्राह्मणैः कारयेज्जपं ॥ होमं च कारयेत्पश्चात्कुंडे वा स्थंडिलेऽपि वा । पलाशसमिदाज्यान्नैर्हुनेदष्टसहस्रकं ॥ तिलैर्व्याहृतिमंत्रैश्च हुनेदष्टोत्तरं शतं । पक्षिहोमं ततः कुर्यादंगमंत्रैश्च मंत्रवित् ॥ मानस्तोकेतिमंत्रेण चंचुं तस्य दुरात्मनः । यतइंद्रेति च शिरो ग्रीवां मृत्युंजयेन तु ॥ इंद्रायेंदो च त्वदयं तरत्सइति पक्षकौ । शंनइंद्राग्नी उदरं तववायो तु पुच्छकं ॥ होमं स्विष्टकृतः कुर्यात्पश्चात्पूर्णाहुतिं हुनेत् । होममेवं समाप्याऽथो अभिषेकं तु कारयेत् ॥ समुद्रज्येष्ठामंत्रैश्च आपोहिष्ठेतिमंत्रकैः । सुरास्त्वामभिषिंचंतुमंत्रैः पौराणिकैस्तथा ॥ अभिषेकसमाप्तौ तु कुर्यादाज्यावलोकनं । सवस्त्रं प्रतिमायुग्ममाचार्याय निवेदयेत् ॥ सालंकारां च गां दद्यात्सवस्त्रां च पयस्विनीं । ऋत्विग्भ्यो दक्षिणां दद्याद्ब्राह्मणेभ्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषतः ॥ ब्राह्मणान्भोजयेत्पश्चात्स्वयं भुंजीत बंधुभिः । एवं शांतिं नरः कुर्याद्भक्तियुक्तेन चेतसा ॥ आयुरारोग्यमैश्वर्यं लभते नात्र संशयः। मदनरत्ने नारदः । आरोहेत्तु गृहं यस्य कपोतो वा प्रवेशयेत् । स्थानहानिर्भवेत्तस्य यद्वाऽनर्थपरंपरा ॥ दोषाय धनिनां गेहे दरिद्राणां शिवाय च । तच्छांतिस्तु प्रकर्तव्या जपहोमविधानतः ॥ ब्राह्मणान्वरयेत्तत्र स्वस्तिवाचनपूर्वकं । षोडश द्वादशाष्टौ वा श्रौतस्मार्तक्रिया-परान् ॥ देवाःकपोतइत्यादिऋग्भिः स्यात्पंचभिर्जपः । कुंडं कृत्वा प्रयत्नेन स्वगृह्योक्तविधानतः ॥ ऐशान्यां स्थापयेद्वह्निं मुखांतेऽष्टोत्तरं शतं । प्रत्येकं समिदाज्यान्नैः प्रतिप्रणवपूर्वकं ॥ यतइंद्रभयामहे स्वस्तिदेति त्रियंबकैः । त्रिभिर्मंत्रैश्च जुहुयात्तिलान्व्याहृतिभिः सह ॥ जपादींश्च ततो भक्त्या कर्ता पूर्णाहुतिं स्वयं । विप्रेभ्यो दक्षिणां दद्याद्दोषशांतिं ततो जपेत् ॥ ब्राम्हणान्भोजयेत्पश्चात्स्वयं भुंजीत बंधुभिः । एवं यः कुरुते भक्त्या तस्माद्दोषात्प्रमुच्यते ॥ पिंगलस्य स्वरेऽप्येवं मधुवल्मीकयोरपि । संपूर्णमंदिरे हानिः शून्यसद्मनि मंगलं ॥ प्राकारेषु पुरद्वारे प्रासादाद्येषु वीथिषु । तत्फलं ग्रामपस्यैव सीम्नि सीमाधिपस्य च ॥ शांतिकर्माखिलं कार्यं पूर्वोक्तेन क्रमेण तु । इत्युलूककपोतादिशांतिः ॥

॥ अथ प्रयोगः। कर्ता गृहाच्छादनं निष्कास्य आचमनादिदेशकालकीर्तनांते मम गृहे उलूकप्रवेशसूचितसर्वारिष्टपरिहार॰ सग्रहमखां शौनकोक्तां शांतिं करिष्ये इति संकल्प्य (गृहे प्राकारादौ वा उलूकारोहण॰ उलूकाक्रोश॰ समंततः उलूकपरिभ्रमण॰ उलूककृताशिरस्ताडनसूचितेत्यन्यत्रोह्यं) गणेशपूजनस्वस्तिवाचनादिऋत्विग्वरणांतं कुर्यात् । ऋत्विजश्च षोडश द्वादशाष्टौ वा । तत आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे वेदिं कृत्वा तदुपरि सकर्णिकं पद्मं विरच्य तत्कर्णिकायां उक्तलक्षणसौवर्णप्रतिमायां यदुलूकः कपोतो मृत्युस्त्रिष्टुप्। मृत्योरावाह॰। इति मृत्युमावाह्य षोडशोपचारैः संपूज्य तदुत्तरे पीठादौ तंडुलादिपिष्टनिर्मितं पक्षिरूपं निधाय देवाःकपोतः कपोत उलूकस्त्रिष्टुप् । उलूका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा० । इति तं पक्षिणमावाह्य पूजयेत् । तत्र रक्तवर्णानि वस्त्रगंधपुष्पाणि देयानि । ततस्तदुत्तरे महीद्यौरित्यादिविधिना कलशं संस्थाप्य तत्र जलपूरणगंधक्षेपांते पंचगव्यपंचत्वक्पंचपल्लवान्सर्वौषधीश्च निक्षिप्य दूर्वाप्रक्षेपादिपूर्णपात्रनिधानांते प्रतिमायां त्र्यंबकं० यतइंद्र० इतिमंत्राभ्यां रुद्रमिंद्रं चावाह्य रक्तगंधपुष्पादिभिः संपूज्य तन्मंत्रयोः सहस्रादिसंख्यया जपं ब्राह्मणैः कारयेत् । ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिकीर्तनांते मृत्युं प्रधानदेवं पलाशसमिदाज्यचरुभिः प्रतिद्रव्यं षट्त्रिंशदधिकशतत्रयसं० । अग्निं वायुं सूर्यं प्रजापतिं च तिलैः अष्टोत्तरशतसंख्या । रुद्रं १ इंद्रं २ मृत्युंजयं ३ सोमं पवमानं द्विः ४।५ विश्वान्देवान् ६ वायुं७ चैत देवताः पिष्टमयोलूकस्य चंच्वाद्यवयवैः शेषेणेत्यादिग्रहादिहोमांते यदुलूकइतिमंत्रेण समिदाज्यचरून् व्यस्तसमस्तव्याहृतिभिस्तिलांश्चोक्तसंख्यया हुत्वा पिष्टपक्ष्यवयवान्वक्ष्यमाणमंत्रैर्जुहुयात् । मानस्तोके कुत्सो० इति चंचुं । यतइंद्र भर्ग० इति शिरः । त्र्यंबकं वसिष्ठो मृत्युंजयस्त्रि० इति ग्रीवां । इंद्रायेंदो कश्यपः सोमः पवमानो गा० इति हृदयं । तरत्समंदीत्यवत्सारः सोमः पवमानो गा० इति पक्षौ । शंनइंद्राग्नी वसिष्ठो विश्वेदेवास्त्रि० इत्युदरं । तववायो व्यश्वो वायु० इति पुच्छं च हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुतिपूर्वकं संस्रावहोमादिशेषं समाप्य सपरिवारं यजमानं कलशोदकैः समुद्रज्येष्ठाइति चतुर्भिः आपोहिष्ठेतित्रिभिः सुरास्त्वामित्यादिपौराणमंत्रैश्चाभिषिंचेत् । ततः कर्ता विभूतिं धृत्वा देवतोत्तरपूजां विधाय आज्यावलोकनं तद्दानं च ब्राह्मणाय कृत्वा देवताविसर्जनांते सवस्त्रप्रतिमायुग्मं सालंकारां सवस्त्रां धेनुं चाचार्याय दत्वा ऋत्विग्भ्यो दक्षिणां दत्वा पीठदानांते विप्रान्संभोज्य भूयसीं दत्वा तैः शांतिं वाचयित्वा कर्म समापयेत् । एवं श्येनगृध्रकपोतादिक्रूरपक्षिणां प्रवेशादिनिमित्तेष्वपीयमेव शांतिः कार्या । इत्युलूककपोतादिशांतिप्रयोगः ॥ ॥ अथ पल्लीसरठशांतिः । मदनरत्ने वृद्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गार्ग्यः । फलं पल्ल्याः प्रपातस्य सरठस्य तथैव च । मूर्ध्नि राज्यश्रियोऽवाप्तिर्भाले चैश्वर्यवर्धनं ॥ कर्णयोर्भूषणप्राप्तिर्नेत्रयोर्बंधुदर्शनं । नासिकायां तु सौभाग्यं वक्त्रे मिष्टान्नभोजनं ॥ कंठे नित्यं प्रियाश्लेषः स्कंधयोर्विजयो ध्रुवं । धनलाभो बाहुयुग्मे करयोरर्थसंक्षयः ॥ वक्षःस्थले तु सौभाग्यं हृदि प्रीतिविवर्धनं । पुत्रलाभस्तु कुक्षौ स्यान्नाभौ कीर्तिविवर्धनं ॥ अर्थलाभस्तु पृष्ठे स्यात्पार्श्वयोः सुहृदागमः । कटिस्थाने वस्त्रलाभो गुह्यस्थाने समागमः ॥ गुददेशे विनाशः स्यादूरुजान्वोस्तु वाहनं । जंघयोश्च निरुद्योगः पादयोर्भ्रमणं भवेत् ॥ पादतश्चोर्ध्वगमनं कुर्यादामस्तकाद्यदि । गात्रप्रदक्षिणं वापि राज्यलाभो भवेत्तदा ॥ मस्तकात्पादपर्यंतं यदि गच्छेदधोऽपि वा । गात्राप्रदक्षिणं वापि हानिशोकं समादिशेत् ॥ सरठीपतने हानिः सर्वांगेषु च सर्वदा । ऊर्ध्वं गच्छेदधो वापि कुटुंबकलहागमः ॥ इत्थं पल्ल्याः प्रपातस्य फलं ज्ञेयं विचक्षणैः । एतदेव फलं विद्यात्सरठस्य प्ररोहणे ॥ पल्ल्याः प्रपतने चैव सरठस्य प्ररोहणे । पंचरात्रं भवेत्तस्य व्याधिपीडा विशेषतः ॥ पतनानंतरं तस्य रोहणं यदि जायते । पतने फलमुत्कृष्टं रोहणे विफलं भवेत् ॥ आरोहणं चोर्ध्ववक्त्रे अधोवक्त्रे निपातनं । भवेद्यदि सुशीघ्रेण तत्फलं जायते ध्रुवं ॥ मृत्युयोगे दग्धदिने पाते च यमकंटके । चंद्राष्टमे नैधने च जन्मर्क्षे विषनाडिके ॥ क्रूरलग्ने क्रूरयुते विष्टिवैधृतिसंयुते । दुर्निमित्ते तयोः पाते निधनं जायते ध्रुवं ॥ तयोः स्पर्शनमात्रेण सचैलं स्नानमाचरेत् । गव्यं पंचविधं प्राश्य कुर्यादाज्यावलोकनं ॥ शस्ते वाऽप्यथवा शस्ते यदीच्छेदात्मनः शुभं । पुण्याहं वाचयित्वा तु शांतिकर्म ततश्चरेत् ॥ प्रतिरूपं तयोः कुर्यात्सुवर्णेन स्वशक्तितः । रक्तवस्त्रेण संवेष्ट्य गंधपुष्पैः प्रपूजयेत् ॥ कलशे वस्त्रयुग्मेन पूजयेद्विधिना ततः । अग्निसंस्थापनं कृत्वा होमं कुर्याद्विधानतः ॥ मृत्युंजयेन मंत्रेण समिद्भिः खादिरैः शुभैः । तिलैर्व्याहृतिभिर्होमं चाष्टोत्तरसहस्रकं ॥ अष्टोत्तरशतं वाऽपि कुर्यात्सम्यक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहितः । महाव्याहृतिहोमं च सर्पिःक्षीरेण कारयेत् ॥ अभिषेकं ततः कुर्याद्यजमानस्य मूर्धनि । पुण्यैर्वारुणसूक्तैश्च द्यौःशांतादिकमंत्रतः ॥ धेनुं वस्त्रयुगं दद्याद् [इत्थं मंत्रविधानेन] यः कुर्याच्छांतिमुत्तमां । तस्यायुर्विजयो लक्ष्मीः कीर्तिः पुष्टिश्च जायते ॥ पल्लीसरठयोः शांतिविधानं शौनकोदितं । कीर्तितं च फलोपेतं वृद्धगार्ग्येण धीमता ॥ गर्गः । अथातः संप्रवक्ष्यामि श्रृणु शौनक यत्नतः । पल्ल्याः प्रपतनं नेष्टं सरठस्य प्ररोहणं ॥ तत्र वेलादिफलमाह । पल्ली च प्रथमे यामे मस्तके स्वामिमृत्युदा । मुखे मिष्टान्नभोजी स्यात्पाण्योस्तु मरणं ध्रुवं ॥ मध्याह्ने पतते पल्ली दक्षिणे सुखसंपदा । वामांगे कुरुते व्याधिं पादयोर्हानिकारिणी ॥ संध्यायां पतते पल्ली मस्तके स्वामिमृत्युदा । कपोले कुरुते सौख्यं जंघायां क्लेशदायिनी ॥ शीर्षे राजश्रियोवाप्तिर्ललाटैश्वर्यवर्धनं । कर्णयोर्भूषणावाप्तिर्नेत्रयोर्भद्रदर्शनं ॥ कंठे नित्यं श्रियोवाप्तिः स्कंधयोर्विजयो भवेत् । धनलाभो बाहुयुग्मे करयोस्तु सुखं भवेत् ॥ स्तनयुग्मे तु सौभाग्यं हृदये सौख्यवर्धनं । पृष्ठे नित्यं महालाभः पार्श्वयोर्भयवर्धनं ॥ कटियुग्मे वस्त्रयुग्मे गुह्ये मृत्युसमागमः । जघनेऽर्थक्षयो नित्यं गुदे रोगभयं तथा ॥ ऊर्वोस्तु वाहनावाप्तिर्जानुयुग्मेऽर्थसंग्रहः । निरुद्यमो जंघयोस्तु पादयोर्मरणं तथा ॥ इत्थं पल्लीप्रपातस्य फलं ज्ञेयं विचक्षणैः । एतदेव फलं विद्यात्सरठस्य प्ररोहणे ॥ पतने फलमुत्कृष्टं रोहणे निष्फलं भवेत् । आरोहणं चोर्ध्वचक्त्रे अधोवक्त्रे प्रपातनं ॥ प्रतिपद्रोगसंप्राप्तिर्द्वितीया राज्यमेव च । तृतीयायां सुखप्राप्तिश्चतुर्थ्यां रोग एव च ॥ पंचम्यां च तथा षष्ठ्यां सप्तम्यां च धनागमः । अष्टमी नवमी चैव दशमी मरणप्रदा ॥ एकादश्यां पुत्रलाभो द्वादश्यां धनलाभदा । त्रयोदशीचतुर्दश्योर्हानिः पूर्णे महाधनः ॥ जयः सोमे बुधे जीवे शुक्रवारे सदा शुभा । शेषेषु चाशुभा प्रोक्ता वाराणां फलमीदृशं ॥ अश्विन्यां क्षेममारोग्यं भरणी रोगकारिणी । कृत्तिका धनलाभाय रोहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यां च मृगे धनं ॥ आर्द्रा तु मृत्युदा पुष्यः पुनर्वसू च लाभदौ । आश्रेषायां मृतिः प्रोक्ता मघाया क्षेमदा भवेत् ॥ पूर्वायां मरणं चैव उत्तरा-हस्तयोस्तथा । चित्रा स्वाती शुभा ज्ञेया विशाखा धनदायिनी ॥ अनुराधासु सौराज्यं ज्येष्ठायां कष्टमेव च । मूले चैव तथा राज्यं पूर्वा-षाढा तथा शुभा ॥ उत्तरा रोगदा ज्ञेया अभिजिद्धनसंपदा । श्रवणः पुत्रलाभाय धनिष्ठा राज्यमेव च ॥ नक्षत्रे शततारार्णा मध्यमं फल-मादिशेत् । पूर्वोत्तरारेवतीषु हानिश्चैव प्रजायते ॥ मेषे च शुभदा प्रोक्ता वृषे हानिस्तथैव च । मिथुने रोगसंप्राप्तिः कर्के कलहमेव च ॥ सिंहे च फललाभाय कन्या धनक्षयावहा । तुला च धनलाभाय वृश्चिको धनलाभदः ॥ धनुर्ज्ञानं समाप्नोति मकरे वस्त्रलाभदा । कुंभे हानिश्च वि-ज्ञेया मीने शोकः प्रजायते ॥ मृत्युयोगे दग्धदिने क्रूरे च यमघंटके ॥ चंद्रेऽष्टमे नैधने च जन्मर्क्षे विषनाडिके ॥ क्रूरग्रहे क्रूरलग्ने क्रू-रैरेव निरीक्षिते । अष्टमस्थे क्रूरयुते विष्टिवैधृतिदूषिते ॥ स्पर्शमात्रे तयोः सद्यः सचैलं स्नानमाचरेत् । दुर्निमित्तं तयोर्नित्यं निष्फलं जा-यते ध्रुवं ॥ पंचगव्यं प्राशयित्वा कुर्यादाज्यावलोकनं । शस्ते वाऽप्यथवाऽशस्ते यदीच्छेच्छुभमात्मनः ॥ पुण्याहं वाचयित्वा तु शांतिकर्म स-माचरेत् । प्रतिरूपं तु सौवर्णं कुर्याद्वित्तानुसारतः ॥ रक्तवस्त्रेण संवेष्ट्य गंधपुष्पैश्च पूजयेत् । तस्याग्रे मृन्मयं रक्तं कलशं जलपूरितं ॥ वस्त्र-माल्यैरलंकृत्य स्थापयेत्तंडुलोपरि । पंचामृतं पंचरत्नं पंचपल्लवसंयुतं ॥ गव्यं पंचकुशांश्चैव निक्षिप्यावाहयेत्ततः । पूजयेद्गंधपुष्पाद्यैर्लोकपालान् क्रमेण तु ॥ (अत्र धर्माब्धौ कलशे रुद्रपूजनमुक्तं) अग्नेश्च स्थापनं कुर्याद्धोमकर्म समाचरेत् । मृत्युंजयेन मंत्रेण समिद्भिः खादिरैः शुभैः ॥ तिलैर्व्याहृतिभिर्होम-मष्टोत्तरसहस्रकं । अष्टोत्तरशतं वापि कुर्यात्सम्यक्समाहितः ॥ धूपांगारादिकं कृत्वा शुचिर्भूत्वा समाहितः । स्वर्णदानं वस्त्रदानं तिलदानं च शक्तितः ॥ तद्दोषशमनार्थाय कुर्याद्ब्राह्मणभोजनं । इत्थं सम्यग्विधानेन शांतिकर्म समाचरेत् ॥ तस्यायुर्विजयो लक्ष्मीः कीर्तिर्वृद्धिश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायते । पल्लीसरठयोः शांतिविधानेन शुभं भवेत् ॥ कीर्तितं सत्फलोपेतं सर्वारिष्टविनाशनं । सर्वशत्रुक्षयकरं प्रोक्तं गर्गेण धीमता ॥ नारदः । पल्ल्याः प्रपतने चैव सरठस्य प्ररोहणे । शुभाशुभं विजानीयात्तत्तत्स्थानविशेषतः ॥ पल्ल्याः प्रपतने पूर्वं फलमुक्तं शुभाशुभं । शीर्षे राज्यश्रियोऽवाप्तिर्भाले त्वैश्वर्यवर्धनं ॥ सव्ये भुजे जयः प्रोक्तो ह्यपसव्ये महद्भयं । कुक्षौ दक्षिणभागे तु धनलाभस्तथैव च ॥ वामकुक्षौ तु निधनं गदितं पूर्वसूरिभिः । सव्यहस्ते मित्रलाभो वामहस्ते तु निःस्वता ॥ उदरे दक्षभागे तु सुपुत्रावाप्तिरुच्यते । वामभागे महारोगः कट्यां सव्ये महद्यशः ॥ वामकट्यां तु निधनं मुनिभिस्तत्वदर्शिभिः । जान्वोरेवं विजानीयात्सव्यपादे शुभावहं ॥ वामपादे तु गमनमिति प्राहुर्महर्षयः । स्त्रीणां च सरठे चैव व्यस्तमेतत्फलं वदेत् ॥ फलं प्ररोहणे चैव सरठस्य प्रचारतः । सर्वांगेषु शुभं विद्याच्छांतिं कुर्यात्स्वशक्तितः ॥ शुभस्थाने शुभावाप्त्यै त्वशुभे दोषशांतये । तत्स्वरूपं सुवर्णेन रुद्ररूपं तथैव च ॥ मृत्युंजयेन मंत्रेण वस्त्रादिभिरथार्चयेत् । अग्निं तत्र प्रतिष्ठाप्य जुहुयात्तिलपायसैः ॥ आचार्यो वारुणैः सूक्तैः कुर्यात्तत्राभिषेचनं । आज्यावलोकनं कृत्वा शक्त्या ब्राह्मणभोजनं ॥ गणेशक्षेत्रपालार्कदुर्गाक्षोण्यंगदेवताः । तासां प्रीत्यै जपः कार्यः शेषं पूर्ववदाचरेत् ॥ ऋत्विग्भ्यो दक्षिणां दद्यात्षोडशभ्यः स्वशक्तितः । इति पल्लीसरठशांतिः ॥ ॥ अथ प्रयोगः । पल्ल्याः सरठस्य वा स्पर्शमात्रे सचैलं स्नात्वा विधिवत्पंचगव्यं प्राश्य आज्यपूर्णे कांस्यपात्रे स्वप्रतिबिंबमवलोक्य सदक्षिणं तद्ब्राह्मणाय दत्वाऽशुभनाशार्थं शुभवृद्ध्यर्थं वा शांतिं कुर्यात् । कर्ता आचमनादिदेशकालस्मरणांते मम शरीरे पल्लीपतनसूचितसकलारिष्टपरिहारद्वारा० सग्रहमखां वृद्धगर्गोक्तां शांतिं० इति संकल्प्य (सरठप्ररोहणे तत्पदोहः कार्यः) गणेशपूजनपुण्याहवाचनादिऋत्विग्वरणांतं कुर्यात् । तत आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे महीद्यौरित्यादिभिः कलशस्थापनादिपूर्णपात्रनिधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नांते पल्लयाः सरठस्य वा यथाशक्तिहेमानिर्मितप्रतिमां तत्र निधाय रक्तवस्त्रेण संवेष्ट्य गंधादिभिः संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । ग्रहादिकीर्तनांते मृत्युंजयं प्रधान० खदिरसमिद्भिः अष्टोत्तरशतसं० । प्रजापतिं तिलैः अष्टोत्तरसहस्रसं० (१०८ वा) अग्निं पृथिवीं महांतं १ वायुमंतरिक्षं महांतं २ आदित्यं दिवं महांतं ३ प्रजापतिं चंद्रमसं नक्षत्राणि दिशो महांत ४ चैता देवताः घृतसंमिश्रक्षीरेण एकैकयाहुत्या शेषेणेत्यादिग्रहादिहोमांते त्र्यंबकमंत्रेणोक्तसंख्यया समिद्धोमोत्तरं समस्तव्यात्हृतिभिस्तिलान्हुत्वा भूरग्नयेच० । भुवोवायवे० । सुवरादित्याय० । भूर्भुवःसुवश्चंद्रमसे० । एतैर्मंत्रैर्घृतमिश्रं क्षीरं जुहुयात् । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन यजमानं सपरिवारमभिषिंचेत् । तत्र मंत्राः । नहितेक्षत्रमितिदशर्चस्य सूक्तस्य गृत्समदो वरुणत्रिष्टुप् । अभिषेके० । ततः समुद्रज्येष्ठादिपुण्यसूक्तैर्द्यौःशांतेत्यादिमंत्रैः पौराणमंत्रैश्चाभिषिक्तो यजमानो विभूतिं धृत्वा देवतोत्तरपूजां विधाय आचार्याय धेनुं वस्त्रयुगं ऋत्विग्भ्यो दक्षिणां च दत्वा सोपस्करं विसर्जितदेवतापीठमाचार्यहस्ते प्रतिपाद्य शक्त्या विप्रान्संभोज्य भूयसीं दत्वाशिषो गृहीत्वा कर्म समापयेत् । इति कमलाकरभट्टकृते शांतिरत्ने पल्लीसरठशांतिप्रयोगः ॥ ॥ अथाश्विनशुक्लप्रतिपदि रेवंतपूजा । तत्र मंत्रः । शालिहोत्रे । नमो देवाधिदेवाय तुरंगबलचारिणे । सूर्यपुत्राय देवाय तुरंगाणां हिताय च ॥ तुरंगपरिषद्यस्य नृगजोपरि धावति । साश्वमश्वाधिपं रक्ष शरणं त्वां व्रजाम्यहं ॥ रूपनारायणीये । आचरप्राप्तं मंत्रांतरं यथा । सूर्यपुत्र महाबाहो छायाहृदयनंदन । शांतिं कुरु तुरंगाणां रेवंताय नमोस्तुते ॥ तत्रैव ब्राह्मे । अश्वयुक्शुक्लपक्षे तु स्वातियोगे शुभे दिने । पूर्वमुच्चैःश्रवा नाम प्रथमं सूर्यमावहत् ॥ तस्मात्साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया समं । पूजनीयाश्च तुरगा नवमी यावदेव हि ॥ शांतिस्वस्त्ययने कार्ये तदा तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिने दिने । धान्यं भल्लातकं कुष्ठं वचासिद्धार्थकांस्तथा ॥ पंचरंगेण सूत्रेण तदा तेषां तु बंधयेत् । वायव्यैर्वारुणैः सौरैः शाक्तैर्मंत्रैः सवैष्णवैः ॥ वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने । तुरगा रक्षणीयाश्च पुरुषैः शस्त्रपाणिभिः ॥ न वा ताड्याः क्वचित्तत्र न च वाह्याः कथंचन॥ आश्विनशुक्लपक्षे यस्यां तिथौ प्रातः स्वातियोगस्तदादि नवमीपर्यंतं प्रतिमायां रेवंतपूजा। पूर्वमुच्चैःश्रवसं संपूज्य प्रत्यक्षाश्वान्पूजयेदित्यर्थः। शालिहोत्रे । नीराजितैश्च तुरगैः कृते च लोहाभिसारिके यज्ञे । अभिषिक्ते राजाश्वे ततो नृपाणां भवेद्यात्रा ॥ आश्वयुजशुक्लपक्षे तिथौ द्वितीयादि सप्तरात्रं तु । वडवारूपेणैका स्वातिः सूर्यस्य वहति रथं ॥ सा भारेणाक्रांता क्रुद्धा यान्यान्निरीक्षतेऽभीक्ष्णं । तेषां तेजः सत्वं बलं च कृत्स्नं निगृह्णाति ॥ तस्मात्स्वात्युपतापे वाजिनि पीडा भवेन्महती । एवं च सप्तरात्रं स्वातेः संपात एष निर्दिष्टः ॥ तत्र दिवाकरकिरणैरस्पृष्टा वाजिनो रक्ष्याः । शालां तदोपलिप्तां मनोरमां वर्जितां च रविकिरणैः ॥ नानाकारैः पुष्पैरलंकृतां धूपितां कुर्यात् । तस्यां स्नातास्तुरगाः सुपूजिताभ्यर्चिता द्वितीयायां ॥ पुरुषैश्च शस्त्रहस्तैः सप्ताहं रक्षितव्यास्तु । गुग्गुलुहिंगुवयस्थां सवचापामार्गतंडुलं लोहं ॥ सिद्धार्थाश्चैलस्थान्बध्नीयाद्वाजिनां कंठे । वयस्था आमलकी । तंडुलं बीजं । वेदीं च कल्पयित्वा मध्यविधानेन यावकं जुहुयात् ॥ शालिहोत्रगदितेन मंत्रेणानेन होमयेत् । रोहिताश्व महाभाग हव्यवाडमरोत्तम ॥ धूम्रध्वज ऋतुद्वार स्वर्गस्य प्रथितः पथि । उत्तिष्ठ होमं गृह्णेमं शांतिरस्तु हयेषु च॥ स्वाहेति तत्र मंत्रेण प्रापयेत्प्रथमाहुतिं । ततः प्रजापतींद्राय सोमाय वरुणाय च ॥ विवस्वते कुबेराय सुषेणायाहिशायिने । आदित्येभ्यस्तथाऽश्विभ्यां रुद्रेभ्यो वसुभिः सह ॥ विष्णोश्च विश्वदेवानां साध्यानां मरुद्भिः सह । स्वाहाकारेण जुहुयात्प्रथमं हव्यवाहने ॥ प्रजापत्यादिमरुदंतेभ्यः समस्तेभ्य एकाहुतिरिति रूपनारायणः । विद्याधरयक्षगंधर्वनक्षत्रोडुगणग्रहांबरवासुकिप्रभृतिनागगरुडपौर्णमासीदेवतानदी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नां सागरवनस्पतीनां स्वाहाकारेण जुहुयात् । अन्येभ्यो देवेभ्यः स्वाहेति तिस्रः । वादित्रं वाहनागारे गानं नित्यं प्रयोजयेत् । अतिक्रम्य च सप्ताहमष्टम्यां स्नापयेद्धयान् ॥ वरुणाय बलिं दत्वा पश्चात्तोयेऽवगाहयेत् । अष्टम्यां द्वितीयाद्यष्टमतिथौ नवम्यामित्यर्थः । ततः शुक्लनवम्यां तु निष्क्रम्य गराद्बहिः ॥ नवम्यामतीतायां दशम्यामित्यर्थः । तथाच भोजराजः । उत्सवविधिं प्रावितत बलिं च नीराजनं च बलवृद्धये । आश्वयुजेऽष्टम्यादिषु कुर्वीत यथाक्रमं नृपतिः ॥ दिशि पूर्वोत्तरायां तु देशे प्राक्प्रवणे शुचौ । तत्र तोरणमुत्थाप्य दशहस्तं समुच्छ्रितं ॥ विस्तारेऽष्टौ समाख्यातं ध्वजमालाविभूषितं । शुद्धस्नातास्ततो वाहाः सांनाहिकपुरःसराः ॥ पुण्याहब्रह्मघोषैश्च गीतवादित्रनिस्वनैः । सूतमागधगंधर्वैः स्तूयमानाः स्वलंकृताः ॥ शस्त्रहस्तैश्च पुरुषैस्तथैवाश्वोपजीविभिः । नेतव्या रक्ष्यमाणाश्च तत्र तोरणसंनिधौ ॥ दक्षिणस्तंभनिकटे हुत्वा चाग्निं पुरोहितः । अष्टौ मनुष्या अव्यंगा उल्काहस्ता द्विधा स्थिताः ॥ तेनाग्निव्यतिहारेण कुर्युरुल्काप्रदीपनं । हविःशेषेण राजाऽश्वं प्रोक्षयित्वा तु तर्पयेत् ॥ चरुशेषेण पिंडं वाजिने दद्यादित्यर्थः । अश्वराज पुरोधास्तु विष्णुस्ते पुरतः स्थितः । वरुणः पाशहस्तस्त्वां पृष्ठतः परिरक्षतु ॥ वैवस्वतकुबेरौ च पार्श्वयोरभिरक्षतां । चंद्रादित्यौ पृष्ठवंशमुदरं पृथिवीधराः ॥ रक्षंतु वक्त्रं गंधर्वा बलमिंद्रो ददातु ते । हविःशेषमिदं प्राश्य विजयार्थं महीपतिः ॥ ततस्तं प्राशितं चापि पूजयेद्भिषजां वरः । कर्णजापमिदं चास्य दक्षिणे श्रवणे न्यसेत् ॥ कुलाभिजननं जात्या लक्षणैर्व्यंजनोत्थितं । भर्तारमभिरक्ष त्वं शिवस्तव भवेदिति ॥ अंकुदंडमनिष्टानि क्षमस्व तुरगोत्तम । एवमामंत्रितो वाजी ब्रह्मघोषनिनादितः ॥ सिच्यमानः कुशोत्सृष्टैर्वारिभिर्मंत्रसंस्कृतैः । ततस्तोरणमध्ये तु मंत्रिभिः सह पार्थिवः ॥ निर्गच्छेज्जयमुद्धोष्य शेषैरनुगतो हयैः । कुर्याच्चाश्वयुजं कर्म सर्वमेतदशेषतः ॥ इति रेवंतपूजा ॥ ॥ अथाश्वशांतिः । मदनरत्ने शालिहोत्रे । उत्पातेषु निमित्तेषु वाजिनामिंगितेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च । हयशालोत्तरे भागे स्थंडिलं तत्र कारयेत् ॥ त्रिरात्रोपोषितस्तत्र शांतिं कुर्यात्पुरोहितः । नववासोभिरास्तीर्णं स्थंडिलं तु चतुर्दिशं ॥ उदकुंभास्तु चत्वारः स्थापनीयाश्चतुर्दिशं । रसपात्राणि देयानि पूर्णकुंभेषु तेष्वथ ॥ रसा दुग्धघृतदधिमधुरूपाः । शिरस्यलंकृतोष्णीषो यथावत्कृतमंगलः । आहुतीर्जुहुयाद्दह्नौ घृतेन तु समाहितः ॥ पितामहाय रुद्राय स्कंदाय वरुणाय च । अश्विभ्यां चैव शर्वाय शक्राय च तथाग्नये ॥ वायवे चाथ हरये श्रियै देव्यै तथैव च । गंधर्वेभ्यश्च सोमाय उच्चैःश्रवस एव च ॥ देवता या भवेत्तत्र उत्पातस्य च कारिणी । मंडले तां विदित्वा च बलिभिश्चाथ पूजयेत् ॥ शतमष्टाधिकं हुत्वा प्रतिदेवं पुरोहितः । ततस्तु पूजनं कुर्याद्देवतानां विशेषतः ॥ पायसो-ल्ल्लेपिकादीपैर्धूपमाल्यानुलेपनैः । मधुपायससंमिश्रं विप्रा भोज्याः सदक्षिणाः ॥ एकैकं देवमुद्दिश्य दश सप्ताष्ट पंच वा । सुवर्णं चंदनं वासो गां च कांस्यं च दक्षिणां ॥ निष्कृत्यर्थं तदा देयं त्रिरात्रं तु महीभुजा । वाहांश्च पूजयेत्सर्वान्स्वस्ति वाच्या द्विजोत्तमाः ॥ एतद्धि शांतिकं कार्यं सर्वोत्पातविनाशनं । राज्ञो विजयदं पुण्यं धनधान्यविवर्धनं ॥ इति शांतिरत्ने गजाश्वशांतिः ॥ ॥ अथ गजशांतिः । मदनरत्ने गारुडे । अथ राजा प्रकुर्वीत चतुर्थ्यां गजवाजिनां । शांतिमामयतप्तानां तदुत्पातोदये सति ॥ कवलानि च नादत्ते यदा त्वश्रूणि मुंचति । नानाव्या-धिसमुत्थाभिः पीडाभिः पीड्यते यदा ॥ अरिष्टेऽपि समुत्पन्ने तथोत्पातभयेषु च । तदा शांतिं प्रकुर्वीत गजानां वाजिनां तथा ॥ शांत्यर्थं ग-जवाजीनां मंडपं चतुरस्रकं । द्वादशारत्निमानेन संमितं कारयेत्सुधीः ॥ कुंडं त्रिमेखलं कुर्याद्वृत्तं वा चतुरस्रकं । तत्पुरस्ताद्दक्षिणतः पश्चिमे चोत्तरे तथा ॥ चतुरस्रं ततः कुर्यात्कुंडं हस्तप्रमाणतः । कोणेषु च तथा कुर्याद्वृत्तं वार्धं त्रिकोणकं ॥ अर्कखादिरपालाशबिल्वाश्वत्थवटै-रपि । उदुंबरैरपामार्गैः समिद्भिस्तत्र तत्र च ॥ मध्ये सर्वसमिद्भिर्वा पालाशैर्वाज्यबिल्वकैः । तिलतंडुललाजाभिः सक्तुसिद्धार्थशालिभिः ॥ यवैरपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिमध्वक्तैर्मध्ये सर्वमिति स्थितिः । दध्ना च पयसा चैव घृतेन मधुनाऽपि च ॥ कोणेषु च तथाज्येन मध्ये तु सकलैरपि । स्थापयेच्च ततः कुंभानष्टावष्टासु दिक्षु च ॥ वस्त्रयुग्मेन संछन्नान्सर्वौषधिसमन्वितान् । सर्वरत्नयुतान्युग्मान् गंधपुष्पोदकैरपि ॥ चतुरः कलशांस्तत्र चतुर्षु च समं ततः । कोणेषु च यथान्यायं जलवस्त्रादिकैर्युतान् ॥ स्मरेत्प्रधानकुंभे तु नरसिंहाकृतिं हरिं । शंखचक्रगदापद्मवज्राऽसिशरशक्तयः ॥ पूर्वादिक्रमयोगेन ध्यातव्याः कलशेष्वपि । बहिः शक्रादिदिक्पालांस्तत्र तत्र च पूजयेत् ॥ प्रधानकुंभात्पुरतः कुर्यात्तत्र च मंडलं । तत्र संपूज्य देवेशं पश्चाद्धोमादि साधयेत् ॥ मंडलाग्रे ततः कुंभं कुंभाग्रे कुंडमेव च । सर्वत्रानलसंस्कारः स्वगृह्योक्तेन कर्मणा ॥ जुहुयादग्निसिद्ध्यर्थं साज्याहुतिसहस्त्रकं । आनुष्टुभेन मंत्रेण गुरुर्वाऽस्य पुरोहितः ॥ आनुष्टुभो नृसिंहमंत्रः । समिदाज्यचरूनेवं हुत्वा मंत्री समाहितः । संपाद्याज्याहुतीनां च सहस्त्रं वाऽयुतं चरेत् ॥ ततः स्विष्टकृदित्यादि समाप्य विधिवत्ततः । संस्पृशेदुदकुंभं च जपेद्दशसहस्त्रकं ॥ पर्यंतकलशान्स्पृष्ट्वा जपेत्तत्र सहस्त्रकं । अंतरेषु च कुंभेषु गायत्र्या प्रणवेन वा ॥ ऋत्विग्भिर्युगपत्कार्यं होमतंत्रं तु पूर्ववत् । प्रतिकुंभं सहस्त्रं च जपेत्तानप्युपस्पृशन् ॥ पूजयेल्लोकपालादीन् गंधादिभिरतंद्रितः । अथ राजानमाकार्य स्वास्तीर्णे सिंहविष्टरे ॥ कुंभोदकेन देवाग्रे तन्मंत्रेणाभिषेचयेत् । पर्यंतकलशैश्चापि नृपं पश्चाद्गजादिकं ॥ गजादीनवशिष्टेन तोयेन स्नापयेद्बुधः । अन्यवाहान् द्विपांश्चैव सर्वानेव समाहितः ॥ वाह्यकुंभोदकेनैव स्नापयेत्तत्र साधकः । राज्ञो नीराजनं कुर्याद्वाहनेषु च मंत्रवित् ॥ दक्षिणामप्यलं दत्वा ऋत्विग्भ्यो गुरवे नृप । वाहनं वस्त्रभूषादि आचार्याय निवेदयेत् ॥ ग्रामदानैश्च रत्नैश्च विप्रेंद्रान्पूजयेत्सुधीः । सर्वालंकारसंयुक्तं राजवाहोपरि स्थितं ॥ आचार्यो राजभवने नृपं संवेशयेत्स्वयं । पूर्वस्नानावशिष्टेन कुंभतोयेन मंत्रवित् ॥ गजशालां च संप्रोक्ष्य वाजिशालां तथैव च । सिद्धार्थतंडुलतिलैः पुष्पैश्चाप्यव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्य च ॥ शालामध्ये नृसिंहं च सुदर्शनमनामयं । पूजयेद्गंधपुष्पाद्यैः सर्वालंकारसंयुतं ॥ सक्तुभिः कृसरान्नेन कुर्याद्भूतबलिं बहिः । ततः शालासु सर्वासु ब्राह्मणान्भोजयेद्बहून् ॥ ततः संवेशनं कुर्यादाचार्यो गजवाजिनां । एवं शांतौ कृतायां तु सर्वबाधाविवर्जितः ॥ सपुत्रो गजयुक्तस्तु नृपस्तेन महीयते । इति शांतिरत्ने गजाश्वशांतिः ॥ ॥ अथ पशुमारशांतिः । परशुरामप्रतापे ब्रह्मांडे । यदा पशूनां पुरदेशमध्ये दुष्टव्रणाः स्युः कृमयस्त्वकाले । ज्वरातिपीडा च तदैव विद्यान्मारी पशूनां समुपागतेयं ॥ तत्र मात्स्ये । पशूनां मरके प्राप्ते नराणामथ दारुणे । एतेषु दृश्यमानेषु रौद्री शांतिस्तदेष्यते ॥ इति पशुमारशांतिः ॥ ॥ अथ गोशांतिः । गर्गः । व्याधयस्तु दश प्रोक्ता गवां वक्ष्यामि तांस्तु ते । उद्वेगो त्दृदयग्राही पतनं मोहनं तथा ॥ गोलिंगः पूतना चैव दारुणो घोटकस्तथा । कर्णलंबश्च गोघ्नश्च दशमो व्याधिरुच्यते ॥ तेषां रूपं समुत्थानां शांतिं चापि ब्रवीमि वः । रात्रौ गोष्ठेषु या गावो विवसंति [विचरंति] यतस्ततः ॥ अश्रुप्रमोक्षं कुर्वंति व्रजंति प्रपतंति च । श्रोणितं चैव कुर्वंति पुरीषं मूत्रमेव च ॥ हुंकारं चैव कुर्वंति मंडलानि तथैव च । प्रतिष्ठाप्याग्रतो देवान्वेदिं कुर्यात्प्रमाणतः ॥ देवा ग्रहाः । पूर्णकुंभान्कुशान्माल्यं लाजांश्चैवाथ पोलिकाः । मद्यं मांसं सुपक्कं च तथैव तिलपिंडकान् ॥ घृतसर्षपतैलेन सर्षपानक्षतांस्तथा । शुक्लप्रातिसरान् धातून्समिधश्च समाहरेत् ॥ उदुंबरं पलाशं च खदिरं बिल्वमेव च । अश्वत्थं चैव दूर्वाश्च समिधस्तत्र कारयेत् ॥ ततो रुद्रं संपूज्य स्तुतिः । यथा । ब्राह्मणा ब्रह्मशब्देन स्तुवंति सततं तु यं । स शिवः शाश्वतो देवो गोषु मारीं व्यपोहतु ॥ पूज्यते सततं भक्त्या विष्णुना प्रभविष्णुना । स शिवः० ॥ श्रीमता रुचिरांगेन घंटाकर्णगणेन यः । नित्यं प्रणम्यते भक्त्या त्दृष्टेनानन्यचेतसा । स शिवः० ॥ नित्यं रुद्रबलोपेतो रुद्रभक्तिसमन्वितः । घंटाकर्णगतो देवो यः शिवो ज्ञानसाधकः । शिवयोगानुभावेन गोषु मारीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यपोहतु ॥ शिवाय देवदेवाय महादेवाय योगिने । रुद्राय स्थाणवे नित्यं नागहाराय ते नमः ॥ पराशराय सिद्धाय मंत्रसिद्धिप्रदायिने । त्र्यंबकाय महेशाय अनंताय नमो नमः ॥ अभिमंत्र्य शिवं तोयमेतैर्मंत्रैर्यथाक्रमं । प्रोक्षयेत्तु गवां देहं ततः शांतिर्भवेद्ध्रुवं ॥ इदं यः पठते गोषु रोगार्तासु विशेषतः । गोशांतिकृत्सर्वकालं गोषु शांतिर्भवेद्ध्रुवं ॥ इति गोशांतिः ॥ ॥ अथाश्वशांतिः । परशुरामप्रतापे स्कांदे । देशमन्यं नयेत्क्षिप्रं वाहानन्यांश्च दूरयेत् । रेवंतं पूजयेत्तत्र महाकालीं हरिं हरं ॥ सहस्रकलशस्नानं भवेदद्भुतनाशनं । अश्वानां व्याधयो यत्र शक्त्या ब्राह्मणभोजनं ॥ दद्यादेवं कृते क्षिप्रं व्याधिः शाम्यति वाजिनां । ईश्वरस्य कुबेरस्य यमस्य वरुणस्य च ॥ बृहस्पतेरुशनसो महेंद्रस्य विवस्वतः । पूजां कुर्यान्नरो नित्यं होमं चापि विचक्षणः ॥ तत्र माहेश्वराः सप्त महादेवाद्विनिर्गताः । चत्वारो राजसास्तेषु मुनिभिः परिकीर्तिताः ॥ त्रयो रौद्राः सुरा ज्ञेया ये च निघ्नंति वाजिनः । वाहप्राणहरा राजन् रुद्रस्य वशवर्तिनः ॥ त्रिदिनं चैव सप्ताहं दशाहं पक्षमेव च । यावत्कालं कर्म कुर्यात्पूजयेत्तावदेव हि ॥ तावदेव तु होमं च कुर्याद् ग्रहपुरःसरं । देवतानां प्रसादेन रोगा मुंचंति वाजिनः ॥ शालिहोत्रे । स्थानापकर्षणं कृत्वा शिवपूजा विधीयते । उच्चैःश्रवा हयः पूज्यो नक्षत्रमपि जन्मनः ॥ विनायकोपसृष्टेन पूज्यो गणपतिर्भवेत् । हयमारे समुत्पन्ने हयानां चाप्युपद्रवे ॥ इमां शांतिं प्रवक्ष्यामि तन्मे निगदतः शृणु । अहोरात्रोषितो भूत्वा शांतिं कुर्यात्पुरोहितः ॥ चत्वारो ब्राह्मणास्तस्य सहायाः स्युर्जितेंद्रियाः । ऋग्वेदपारगश्चैको द्वितीयो यजुषां वरः ॥ तृतीयः सामविन्मुख्यश्चतुर्थश्चाप्यथर्ववित् । मध्येऽग्निकुंडं कुर्वीत मंडपं तु समंततः ॥ विदिक्षु विन्यसेत्कुंभान्पूर्णानौषधिवारिणा । रसपात्रं न्यसेत्तेषु ऐशानादिक्रमेण तु ॥ सर्पिषः पयसो दध्नो मधुनश्च यथाक्रमं । कुंभस्थं पूर्वभागे तु यजेद्देवेश्वरं विभुं ॥ दक्षिणे तु यमं कुर्यात्पश्चिमे वरुणं तथा । उत्तरे तु तथा भागे यजेद्वैश्रवणं विभुं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाश्च पूज्या विधिवदाज्यहोमस्ततो भवेत् । ततः पूर्ववत् तत्तद्देवतामंत्रजपश्चाभिषेकश्च । इत्यश्वशांतिः ॥ ॥ अथ खरशांतिः । परशुरामप्रतापे स्कांदगारुडयोः । अष्टोत्तरायुतं कुर्यादग्निसूक्तेन वै द्विजः । जपं होमं चरुघृतात्खराणां शांतिकारकं ॥ अग्निसूक्तमग्निंदूतमित्यादि । इति खरशांतिः ॥ ॥ अथ सारमेयशांतिः । तत्रैव । एवमेव प्रकर्तव्या सारमेयरुजापहा । शांतिः शांतिविधानज्ञैः पूर्वदृष्टेन वर्त्मना ॥ इति सारमेयशांतिः ॥ ॥ अथ भविष्योक्ता महाशांतिः । कृष्ण उवाच । महाशांतिं प्रवक्ष्यामि महादेवेन भाषितां । पार्थिवानां हितार्थाय महादुस्तरतारिणीं ॥ नृपाभिषेके सा कार्या यात्राकाले नृपस्य तु । दुःस्वप्ने दुर्निमित्ते च ग्रहवैगुण्यसंभवे ॥ विद्युदुल्कानिपाते च जन्मर्क्षे ग्रहभेदने । केतूदये च निर्घाते क्षितिकंपस्य संभवे ॥ प्रसूतौ मूलभे जंतोर्यमलस्य तु संभवे । छत्राणां च ध्वजानां च स्वस्थानात्पतने भुवि ॥ काकोलूककपोतानां प्रवेशे वेश्मनस्तथा । क्रूरग्रहाणां वक्रेषु जन्मादिषु विशेषतः ॥ जन्मनि द्वादशे चैव चतुर्थे वाऽष्टमे तथा ॥ यदा स्युर्गुरुमंदाऽऽराः सूर्यश्चैव विशेषतः ॥ आरो भौमः । युद्धे ग्रहाणां सर्वेषां सूर्यशीतांशुकीलके ॥ वस्त्रायुधगवास्येषु मस्तके शयनासने ॥ यद्यग्निः परिदृश्येत रात्राविंद्रधनुस्तथा । वेश्मनश्च तुलाभंगे गर्भेष्वश्वतरीषु च ॥ रविबिंबद्वये दृष्टे महाशांतिः प्रशस्यते । सर्वाणि दुर्निमित्तानि प्रशमं यांति सर्वथा ॥ तां कुर्युर्ब्राह्मणाः पंच कुलशीलसमन्विताः । चतुर्वेदास्त्रिवेदाश्च द्विवेदाश्चापि पांडव ॥ आथर्वणा विशेषेण बह्वृचास्तु सुसंयताः । कृच्छ्रोपवासनक्ताद्यैः कृतकायविशोधनाः ॥ पूर्वमाराध्य मंत्रांस्तु प्रारभेत ततः क्रियाः । दशद्वादशहस्तं वा मंडपं कारयेच्छुभं ॥ तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तप्रमाणतः । आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं ॥ मेखलात्रयसंयुक्तं योन्या वापि समन्वितं । रवींद्वोरुपरागेषु महोल्कापतनेषु च ॥ उत्पातेषु तथाऽन्येषु निमित्तेषु च सर्वशः । सर्वारिष्टोपशमनी महाशांतिः प्रशस्यते ॥ चारुचंदनमालाढ्ये तोरणालंकृते तथा । गोमयेनोपलिप्ते च मं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपे ते द्विजातयः ॥ शुक्लांबरधराः स्नाताः शुक्लमाल्यानुलेपनाः । कर्म कुर्युरिति शेषः । ततश्च पंचकलशांस्तस्यां वेद्यां निवेशयेत् ॥ आग्नेयादिषु कोणेषु पंचमं मध्यतस्तथा । अष्टपत्रकृते पद्मे चूतपल्लवधारिणि ॥ ब्रह्मकूर्चविधानेन पंचगव्यं तु कारयेत् । गोमूत्रं ताम्रवर्णाया इत्यादिना मंत्रवत्पंचगव्यं कृत्वेत्यर्थः । औषधीः पंचरत्नानि रोचना चंदनं तथा ॥ सिद्धार्थकान् शमीदूर्वाकुशान्व्रीहियवांस्तथा । आपामार्गं फलवतीं न्यग्रोधोदुंबरौ तथा॥प्लक्षाश्वत्थकपित्थांश्च प्रियंगूंश्चूतपल्लवान् । हस्तिदंतं मृदं चैव कोणकुंभेषु विन्यसेत्॥फलवती गंधप्रियंगुः । प्रियंगुः कंगुः । पुण्यतीर्थोदकोपेतं पंचगव्यं च मध्यमे । ऋचंवाचमितीदं च वह्निकुंभाभिमंत्रणे ॥ आशुःशिशानो नैर्ऋत्यां यद्देवा वायुगोचरे । ईशावास्यं चतुर्थस्य कुंभस्य त्वभिमंत्रणे ॥ मध्यमे त्वथ जप्तव्या रुद्राः कुंभे यजुर्भवाः । गंधपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः ॥ फलैश्च नारिकेलाद्यैर्दीपकैः कुंभपूजनं । स्वस्तिवाचनकं चैव कारयेत्तदनंतरं ॥ क्रमेणानेन शनकैरग्निकार्यं प्रयोजयेत् । अग्निंदूतमिहाग्निं च पूर्वमेव निधापयेत् ॥ पूर्वं कलशस्थापनात् । हिरण्यगर्भःसमिति ब्रह्मासननियोजने । कयानसाप्रणीतापो मंत्रेण विनिवेशयेत् ॥ कृत्वा संस्करणं वह्नेराज्यसंस्कारमेव च । अथवासादयेदत्र द्रव्यं यस्य प्रयोजनं ॥ ततः पुरुषसूक्तेन पायसश्रपणं भवेत् । अभिघार्याथ सांसिद्धं पायसं स्थापयेद्भुवि ॥ अष्टादशप्रमाणेध्मान्दद्यादथ शमीमयान् । पालाशीः समिधः सप्त सप्तते इति दापयेत् ॥ आघारावाज्यभागौ तु हुत्वा पूर्वक्रमेण तु । जुहुयादाहुतीः सप्त जातवेदस इत्यृचा ॥ स्थालीपाकस्य जुहुयात्पुनर्वै जातवेदसे । तरत्समंदीसूक्तेन चतस्रो जुहुयात्ततः ॥ यमायेतिच सप्तान्याः स्वाहांता जुहुयात्ततः । इदंविष्णुस्ततः सप्त जुहुयादाहुतीर्नृप ॥ नक्षत्रेभ्यस्ततः स्वाहा सप्तविंशतिराहुतीः । नक्षत्राहुतयश्च कृत्तिकाभ्यःस्वाहेत्यादिभिर्मंत्रैः कार्याः । तत्र रोहिणीद्वयपुष्यहस्तादित्रयानुराधादित्रयाभिजिद्द्वयशतभिषग्रेवतीष्वेकवचनं । पुनर्वसुफल्गुनीद्वयविशाखाऽश्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीषु द्विवचनं । शेषेषु बहुवचनं । यत्कर्मणेति जुहुयात्ततः स्विष्टकृतं पुनः ॥ ग्रहहोमस्तथा कार्यस्तिलैराज्यपरिप्लुतैः । प्रायश्चित्तं ततो हुत्वा होमकर्म समापयेत् ॥ ततस्तु तूर्यनिर्घोषैः काहलाशंखनिस्वनैः । यजमानस्य कर्तव्यो ह्यभिषेको द्विजोत्तमैः ॥ काश्मर्यवृक्षसंभूते समे भद्रासने स्थितं । काश्मर्यः श्रीपर्णी । वेदीमध्यगतं कृत्वा दुर्निमित्तप्रशांतये ॥ पंचभिः कलशैः पूर्णैर्मंत्रैरेतैर्यथाक्रमं । सहस्राक्षेण प्रथमं ततश्चैव शतायुषा ॥ सजोषसाचंद्र इति विश्वानिवरुणेति च । द्रुपदादिवेति ततः स्नापयेयुः समाहिताः ॥ ततो दिशां बलिं दद्याद्विचित्रान्नसमन्वितं । नमोस्तुसर्वऋक्षेभ्य इतिमंत्रमुदाहरेत् ॥ स्नातस्य ब्राह्मणाः सर्वे पठेयुः शांतिमुत्तमां । शांतितोयेन धारां च पातयित्वा समंततः ॥ पुण्याहवाचनं कृत्वा शांतिकर्म समापयेत् । तीर्थे देवालये वाऽपि गोदोहं कारयेद्बुधः ॥ क्षितिं हिरण्यं वासांसि शयनान्यासनानि च । विप्रेभ्यो दक्षिणां दद्याद्यथाशक्त्या विमत्सरः ॥ दीनानाथविशिष्टेभ्यो दद्याच्चैव युधिष्ठिर । भोजनं चानिशं दत्वा ततः सर्वं प्रसिध्यति ॥ आयुश्च लभते दीर्घं शत्रून्विजयते क्षणात् । दुर्गाणि चाऽस्य सिध्यंति पुत्रांश्च लभते शुभान् ॥ यथा शस्त्रप्रहाराणां कवचं वारणं भवेत् । तथा दैवोपघातानां शांतिर्भवति वारणं ॥ अहिंसकस्य दांतस्य धर्मार्जितधनस्य च । दयादाक्षिण्ययुक्तस्य सर्वे सानुग्रहा ग्रहाः ॥ अर्थान्समर्थयति वर्धयते च धर्मं कामं प्रसाधयाति तस्य पिनाष्टि पापं । यः कारयेत्सकलदोषहरां महाख्यां शांतिं प्रशांतहृदयः पुरुषः सदैव ॥ इति महाशांतिः ॥

॥ अथ बंधमोक्षः । तत्र महाभारतस्थकृष्णसहस्रनामस्तोत्रस्यायुतं सहस्रं वा जपः कार्यः । तदुक्तं भारते । रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनादिति । तथा भीष्मपर्वस्थार्जुनकृतदुर्गास्तोत्रं वा पूर्वसंख्यया जपेत् । तदुक्तं तत्रैव । विवादे जयमाप्नोति बद्धो मुच्येत बंधनादिति । उभयत्र तद्दशांशेन पायसेन तिलैर्वा होमः । तथा हरिवंशस्थमनिरुद्धकृतमार्यास्तोत्रं कृष्णावतारस्थमार्यास्तोत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वलिकृतवामनस्तोत्रं वा जपेत् । ऋग्विधानेऽपि । बद्धो वाऽप्यवरुद्धो वा वाग्यतिमें । शिष्टैप्येत् । त्यांन्वित्यादित्यदेवत्या सद्यो मुच्येत बंधनात् ॥ तथा । ध्रुवासुत्वा जपेन्मंत्रं यो बद्धः श्रृंखलादिना । बंधनान्मुच्यते सत्यं नारी वा पुरुषोऽपि वा ॥ तदिन्नक्तमुदुत्तममितिद्वयोर्वा जपः कार्यः । वरुणस्य तार्क्ष्यस्य वा पलेन तदर्धेन कृतां वा प्रतिमां दद्यात् । अन्येऽपि बटुकभैरवस्तोत्रमंत्रकार्तवीर्यदीपस्तोत्रजपादयो ज्ञेयाः । यद्वा मंत्रकोशे । तारो हिलियुगं बंदी देवी ङेंऽता नमोंऽतका । एकादशाक्षरो मंत्रो भैरवस्त्रैष्टुभस्तथा ॥ (तारः प्रणवः । ङेंता चतुर्थ्यंता । ॐ हिलिहिलिबंदीदेव्यैनम इति मंत्रः) देवीमुन्यादयः प्रोक्ता एकेन हृद्दशोंऽगकं । विधाय संस्मरेद्बंदीं रत्नसिंहासने स्थितां ॥ सतोयपाथोदसमानकांतिमभीतिपीयूषकरीरहस्तां । सुरांगनाराधितपादपद्मां भजामि बंदीं भवबंधमुक्त्यै ॥ लक्षयुग्मं जपेन्मंत्रं पायसान्नैर्दशांशतः । हुत्वा पूर्वोदिते पीठे पूजयेद्बंधमुक्तये ॥ अष्टदलपद्मगर्भे चतुरस्रे इत्यर्थः । अंगपूजा केसरेषु शक्तयः पत्रमध्यगाः । पीठपूजां ततः कृत्वा षडंगानि प्रपूजयेत् ॥ कामदा मानदा नक्ता मधुरा मधुरानना । नर्मदा भोगदा नंदा प्राणदा पीठशक्तयः ॥ मनोहरा च या बंदी योगपीठाय ते नम इति पीठपूजां कृत्वा शक्तीः पूजयेदित्यर्थः । ताश्च । काली तारा भगवती कुब्जाह्वा शीतलापि च । त्रिपुरा मातृका लक्ष्मीर्दिगीशा आयुधानि च ॥ एवमाराधिता बंदी प्रयच्छेदीप्सितं नृणां । एकविंशत्यहोरात्रं चायुतं प्रत्यहं जपेत् ॥ ब्रह्मचर्यरतो मंत्री गणेशार्चनपूर्वकं । कारागृहनिबद्धस्य मोक्ष एवं कृते भवेत् ॥ चतुरस्रे ठकारांतरपूपोपरि संलिखेत् । ठकारः स्वाहाशब्दः । साध्यनाम घृतेनैव मायाबीजं च दिक्ष्वपि ॥ मनुनाऽष्टादशार्णेन चतुरस्रं प्रवेष्टयेत् । वाग्बीजं भुवनेशानीं रमा बंदी च केशव ॥ अमुष्य बंधतो मोक्षं कुरु युग्मं च ठद्वयं । वसुचंद्रार्णमंत्रोऽयं क्षिप्रं बंधविमोक्षदः ॥ ऐं ह्रीं श्रीं बंदि अमुष्य बंधमोक्षं कुरु कुरु स्वाहेति मंत्रः । तस्मिन्नपूपे संपूज्य बंदीमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरणान्विता ॥ कारानिकेतनस्थाय मित्राय प्रतिदीय तं । स शुद्धो वाग्यतो भूत्वा भक्षयेत्तमपूपकं ॥ तस्मिन्संभक्षिते बद्धो मुच्यते बंधनाद्द्रुतं । एवं वै कथिता बंदी स्मरणाद्बंधमुक्तिदा ॥ इति बंधमोक्षः ॥ ॥ अथ शक्रध्वजोच्छ्रायः । कालिकापुराणे । अथातः शृणु राजेंद्र शक्रोत्थानं महोत्सवं । यं कृत्वा नृपतिर्याति न कदाचित्पराभवं ॥ तथा । अर्जुनश्चाश्वकर्णश्च प्रियको धव एव च । उदुंबरश्च पंचैते केत्वर्थे सत्वचः स्मृताः ॥ अन्ये च देवदार्वाद्याः शालाद्यास्तरवस्तथा । न च वृक्षं रुजेद्रात्रौ स्पृष्ट्वा मंत्रमिमं पठेत् ॥ रुजेच्छेदयेत् । तत्रायं क्रमः । यानि वृक्षेषु भूतानि तेभ्यः स्वस्ति नमो नमः । उपहारं गृहीत्वेमं क्रियते वासवध्वजः ॥ पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम । ध्वजार्थं देवदेवस्य पूजेयं प्रतिगृह्यतां ॥ ततः परेऽह्नि तं छित्वा मूलमष्टांगुलं पुनः । जले क्षिपेत्तथाऽग्रस्य छित्वा च चतुरंगुलं ॥ ततो नीत्वा पुरद्वारं केतुं निर्माय तत्र वै । शुक्लाष्टम्यां भाद्रपदे केतुं वेदीं प्रवेशयेत् । द्वाविंशद्धस्तमानस्तु अधमः केतुरुच्यते ॥ द्वात्रिंशत्तु ततो ज्यायांश्चतुस्त्रिंशत्ततो वरः ॥ कुमार्यः पंच कर्तव्याः शक्रस्य नृपसत्तम । शालमय्यस्तु ताः सर्वा अपराः शक्रमातृकाः ॥ केतोः पादप्रमाणेन कार्याः शक्रकुमारिकाः ॥ मातृकार्धप्रमाणात्तु यंत्रं हस्तद्वयं तथा ॥ एवं कृत्वा कुमारीश्च मातृकाः केतुमेव च ॥ एकादश्यां सिते पक्षे यष्टीनामधिवासनं ॥ अधिवास्य ततो यष्टीगतं शक्रं तु पूजयेत् ॥ शक्रस्य प्रतिमां कुर्यात्कांचनीं दारवीं तथा । अन्यतैजसभूतां वा सर्वाभावे च मृन्मयीं ॥ तां मंडलस्य मध्ये तु पूजयित्वा विशेषतः ॥ ततः शुभे मुहूर्ते तु केतुमुत्थापयेन्नृपः ॥ वज्रहस्त सुरारिघ्न बहुनेत्र पुरंदर । क्षेमार्थं सर्वलोकानां पूजेयं प्रतिगृह्यतां ॥ एह्येहि सर्वामरसिद्धसंघैरभिष्टुतो वज्रधरामरेश । समुत्थितस्त्वं श्रवणाद्यपादे गृहाण पूजां भगवन्नमस्ते ॥ इंद्रमंत्रेण तंत्रेण नानानैवेद्यचंदनैः । घटेषु दशदिक्पालान् ग्रहांश्चापि हरिं वेत् ॥ साध्यादीन्सकलान्देवान् मातॄः सर्वाश्च पूजयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः शुभे मुहूर्ते च ज्ञातृवर्धकिसंयुतः ॥ केतुस्थापनभूमिं च यज्ञवेद्यां च पश्चिमे। शिष्टैः पुरोहितैः सार्धं गच्छेद्राजा सुमंगलैः ॥ बहुभिर्वर्धयन् रम्यं गृहं शिष्टैः समातृकं । कुमारीभिश्च संयुक्तं दिक्पालानां च पंचकैः ॥ यथावर्णैर्यथादेशं योजितैर्वस्त्रवेष्टितं। युक्तं तत्किंकिणीजालैर्बृहद्घंटौघचामरैः॥ चित्रमाल्यांबरैश्चापि चारुभिश्चाथ तोरणैः । उत्थापयेन्महाकेतुं राजाऽमात्यैः शनैः शनैः॥ प्रतिमां तां न्यसेन्मूले केतौ शक्रं विचिंतयेत् । यजेत्तु पूर्ववत्तत्र शचीं मातलिमेव च ॥ जयंतं तनयं तस्य चंद्रमैरावतं तथा । ग्रहांश्चाप्यथ दिक्पालान्सर्वांश्च गणदेवताः ॥ पूजितानां च देवानां होमं चापि समाचरेत् । होमांते तु बलिं दद्याद्वासवाय महात्मने ॥ तिलं घृतं चाक्षतं च पुष्पदूर्वास्तथैव च । एतैरेतान्स्वस्वमंत्रैरर्चयेच्च नरोत्तमः ॥ ततो होमावसाने तु ब्राह्मणानपि भोजयेत् । एवं प्रपूजयेन्नित्यं सप्तरात्रं दिने दिने ॥ त्रातारमिति मंत्रोऽयं वासवस्य प्रियः सदा। एवं कृत्वा दिवाभागे शक्रोत्थापनमादितः ॥ श्रवणर्क्षयुतायां तु द्वादश्यां पार्थिवः स्वयं । अंत्यपादे भरण्यां तु निशि शक्रं विसर्जयेत् ॥ सुप्तेषु सर्वलोकेषु यथा राजा न पश्यति । सार्धं सुरासुरगणैः पुरंदर शतक्रतो । उपहारं गृहीत्वेमं माहेंद्रध्वज गम्यतां ॥ उत्पाते सप्तरात्राणि तथोपप्लवदर्शने । व्यतीत्य शनिभौमौ च अन्यर्क्षेऽपि विसर्जयेत् ॥ तथा रक्षेन्नृपः केतुं न पतेच्छकुनिर्यथा । शनैः शनैः पातयेत्तु यथोत्थापनमादितः ॥ विसृष्टं सर्वकेतुं च सालंकारं तथा निशि । क्षिपेदनेन मंत्रेण अगाधसलिले नृपः ॥ तिष्ठ केतो महाभाग यावत्संवत्सरं जले । भगवन्सर्वलोकानामंतरायविनाशन ॥ उत्थापयेत्तस्य चरैः सर्वलोकस्य वै पुनः । एवं यः कुरुते पूजां वासवस्य महात्मनः । न तस्य राज्ये दुर्भिक्षं तनयो नाप्यधर्मकृत् ॥ इति शक्रध्वजोच्छ्रायः॥ ॥ अथायुष्यहोमः । मदनरत्ने शौनकः । आयुष्यहोमं वक्ष्यामि शौनकोऽहं द्विजन्मनां । कुर्यात्त्रिजन्मनक्षत्रे विषुवे संक्रमे तथा ॥ पौर्णमास्याममायां वा ग्रहणे चंद्रसूर्ययोः । स्नातः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ अलंकृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्ति वाच्य अन्नं दद्याद्द्विजातये। अथाज्यभागपर्यंतं कृत्वोपलेपनादिकं। घृताक्तं जुहुयादन्नमवदानस्य संपदा॥आनोभद्राःक्रतवइत्यृचां तु दशकेन च॥ इमंस्तोममर्हतेइत्यृचां षोडशकेन च। एकया जातवेदस्या हुनेत्स्विष्टकृतं ततः॥ होमशेषं समाप्याथ ब्राह्मणान्भोजयेत्ततः। स्वस्ति वाच्य द्विजाग्र्येभ्यो धेनुं दद्यात्सदक्षिणां॥ इत्यायुष्यहोमः॥ ॥ अथ ज्वरशांतिः संगृह्यते। अथातः संप्रवक्ष्यामि शौनको ज्वरशांतिकं। जन्मत्रयादिदिवसे जन्मनक्षत्रभूषिते॥ पुण्याहवाचनं कृत्वा कलशस्थापनादिकं। त्रिशिरस्कं त्रिपादं च त्रिहस्तं च त्रिशूलधृक्॥ ईश्वरं शक्तिरूपं च ध्यात्वा देवं प्रपूजयेत्। ज्वरराजायनमइत्यष्टोत्तरशतं जपेत्॥ भस्मायुधाय विद्महे एकदंष्ट्राय धीमहि। तन्नो ज्वरः प्रचोदयात्॥ इति मंत्रं प्रजप्याथ स्पृष्ट्वा कुंभाभिमंत्रणं। ततो होमं प्रकुर्वीत स्वगृह्योक्तविधानतः॥ अन्वाधानादिकं कृत्वा चक्षुरंतं च कारयेत्। शांत्यर्थं चरुणाज्येन अष्टोत्तरसहस्रकं॥ अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा। ज्वरराजायस्वाहेति अथ भस्मायुधाय च॥ (अथेति अथवेत्यर्थः। गृहीत्वातामथांबिकामितिवत्) होमशेषं समाप्याथ नमस्कारं ततः परं। ज्वरराजं तर्पयामि ज्वरगायत्रीमंत्रतः॥ फलीकरणमिश्रैर्वा सतिलैस्तर्पयेद्बुधः। त्रिपंचसप्तरात्रेण सर्वज्वरनिवारणं॥ अभिषेकं ततः कृत्वा दानं दद्याद्द्विजातये। ब्राह्मणान्भोजयित्वाऽथ ज्वरमुक्तिर्भविष्यति॥ ॥ अथ प्रकारांतरेण स्फुटवचनानि। ज्वरस्वरूपिणं रुद्रं सुवर्णेन विनिर्मितं। यथाशक्ति प्रकुर्वीत वित्तशाठ्यविवर्जितः॥ शुक्लवस्त्रोपरि लिखेन्मंडलं चाष्टपत्रकं। अक्षतैः कल्पितं भक्त्या रुद्रं तत्र प्रपूजयेत्॥ पर्णैराम्रस्य निर्दोषैरुत्तमैः पयसाप्लुतैः। सहस्रेण कुबेरादिमंत्रेण ज्वरशांतये॥ (जुहुयादिति शेषः) क्षमापयेत्ततो देवं नमस्कृत्य पुनःपुनः। त्रिपाद्भस्म० ३। प्रतिमां मंडलोपेतां ब्राह्मणाय निवेदयेत्॥ ज्वरस्वरूपी०॥ आज्येन पूरितं कांस्यमवलोक्य प्रदापयेत्। शक्त्या विप्रांश्च संभोज्य ज्वरमुक्तिर्भविष्यति॥ इति ज्वरशांतिः॥ ॥अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौनकोक्तप्रयोगः। कर्ता जन्मनक्षत्रे तस्माद्दशमे एकोनविंशे वा नक्षत्रे आचमनादिदेशकालस्मरणांते मम ज्वरराजप्रीतिद्वारा सकलज्वरोत्थपीडापरिहारपूर्वकं आयुरभिवृद्ध्यर्थं सग्रहमखां शौनकोक्तां शांतिं० इति संकल्प्य गणेशपूजनपुण्याहवाचनादिऋत्विग्वरणांतं कुर्यात्। अथाचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे महीद्यौरित्यादिभिः कुंभं संस्थाप्य पूर्णपात्रनिधानांते प्रतिमायां त्रिशिरसं त्रिपादं त्रिहस्तं त्रिशूलधरमीश्वरं शक्तिरूपं ज्वरं ध्यात्वा ॐ ज्वरराजायनमइत्यावाह्य संपूज्य। भस्मायुधाय विद्महे एकदंष्ट्राय धीमहि। तन्नोज्वरः प्रचोदयादितिमंत्रं १०८ संख्यया जप्त्वा कलशस्येत्यादिना कुंभमभिमंत्रयेत। ततोऽग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। ग्रहादिकीर्तनांते ज्वरराजं प्रधानदेवं चर्वाज्याभ्यां प्रतिद्रव्यं चतुरधिकपंचशतसंख्याहुतिभिः चतुःपंचाशदाहुतिभिः १४ संख्याभिर्वा शेषेणेत्यादिग्रहादिहोमांते ज्वरराजायस्वाहेति भस्मायुधायेति मंत्रेण वोक्तसंख्यया चर्वाज्ये हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समापयेत्। ततः कर्ता देवतोत्तरपूजांते नमस्कृत्य तंडुलकणमिश्रैः सतिलैर्वा जलैः भस्मायुधाय० प्रचोदयात्। ज्वरराजंतर्पयामीति तर्पणं कृत्वा आचार्यादिभिः समुद्रज्येष्ठादिमंत्रैः कलशोदकेनाभिषिक्तो विभूतिं धृत्वा आचार्यादिभ्यो गवादिदक्षिणादानांते विसर्जितदेवतापीठं सोपस्करमाचार्याय दत्वा शक्त्या विप्रान्संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत्॥ ॥ अथ स्फुटवचनानुसारी प्रयोगः। आचमनादिदेशकालस्मरणांते मम श्रीज्वरस्वरूपिरुद्रप्रसादसिद्धिद्वारा शरीरे उत्पन्नोत्पत्स्यमानसमस्तामयनिदानभूतवातपित्तश्लेष्मप्रक्षोभजन्यविविधज्वरोत्थनिखिलपीडापरिहारपूर्वकक्षिप्रारोग्यावाप्त्यर्थं सग्रहमखां ज्वरशांतिं करिष्ये इति संकल्प्य गणेशपूजादिऋत्विग्वरणांतं कुर्यात्। तत आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे महीद्यौरित्यादिविधिना कलशं संस्थाप्य पूर्णपात्रोपरि श्वेतवस्त्रं प्रसार्य तत्राक्षतैरष्टदलं कमलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलिख्य तत्कर्णिकायां सुवर्णप्रतिमां निधाय तत्र कुबेरतइतिमंत्रस्य कुबेरो ज्वरस्वरूपी रुद्रोऽनुष्टुप्। रुद्रावा०। कुबेर ते मुखं रौद्रं नंदिन्नानंदमावह। ज्वरमृत्युभयं घोरं विश नाशय मे ज्वरं॥ इति मंत्रेण ज्वरस्वरूपिणं रुद्रमावाह्य पूर्वादिदलेषु देवता आवाहयेत्। ज्वराय नमः। ज्वरमावाहयामि। एवमग्रेपि। वातज्वरा०। पित्तज्व०। श्लेष्मज्व०। शीतज्व०। उष्णज्व०। द्वंद्वजज्व०। संनिपातज्व०। तद्वाह्ये। उग्रज्व०। गंभीरज्व०। सततज्व०। संततज्व०। ऐकाहिकज्व०। द्व्याहिकज्व०। त्र्याहिक०। चातुर्थिक०। तद्वाह्ये। प्राकृतज्व०। वैकृतज्व०। आमज्व०। निरामज्व०। अभिघात०। अभिचारज्व०। अभिषंगज्व०। अभिशाप०। ततः सर्वान्संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात्। ग्रहादिकीर्तनांते ज्वरस्वरूपिणं रुद्रं प्रधानदेवं क्षीराप्लुताम्रदलैः अष्टोत्तरसहस्रसंख्या० ज्वराद्यंगदेवताः एकैकयाज्याहुत्या शेषेणेत्याद्याज्यभागांते कुंभं स्पृष्ट्वा आरुद्रासः श्यावाश्वो रुद्रो जगती। कुंभाभिमंत्रणे०। इतिमंत्रमष्टोत्तरशतवारं जपेत्। ततो यजमानेन त्यागे कृते ग्रहादिहोमं कृत्वा कुबेरते इतिमंत्रेण १००८ संख्यया क्षीराप्लुताम्रदलानि हुत्वा ज्वराद्यंगदेवताभ्यो नाममंत्रेणैकैकामाज्याहुतिं जुहुयात्। ततः पूर्ववत् कुंभमभिमंत्र्य स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानपूर्णाहुती कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकेन समुद्रज्येष्ठाइत्यादिमंत्रैरभिषेकं कुर्यात्। ततः कर्ता धृतशुक्लांबरो विभूतिं धृत्वा देवतोत्तरपूजां विधाय कुबेरतइतिमंत्रांते ज्वरस्वरूपिणं रुद्रं तर्पयामीति पयसा तर्पणं कृत्वा नाममंत्रेण ज्वराद्यंगदेवतास्तर्पयेत्। ततः कृतांजलिः त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः। स मे प्रीतः सुखं दद्यात्सर्वामयपतिर्ज्वरः॥ सततं संततं चैव ज्वरमुग्रं तथैव च। ऐकाहिकं द्व्याहिकं च तृतीयादिमथापि वा॥ ज्वरो रोगपती राजा मृत्युरोगः सनातनः। क्रुद्धो रोगान् ज्वरो हन्याद्रुद्रो भुवनशोभनः॥ इति संप्रार्थ्य आचार्यादिभ्यो दक्षिणादानांते विसर्जितदेवतापीठं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्याय दद्यात् । तत्र रुद्रप्रतिमादाने मंत्रः । ज्वरस्वरूपी यो रुद्रः सुवर्णेन विनिर्मितः । सोपस्करो मयादत्तस्तेन रुद्रः प्रसीदतु ॥ तत आज्यावलोकनं तद्दानं च कृत्वा विप्रान् संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । (अत्रैतन्मूलभूतस्फुटवाक्यगतं सर्वमनुष्ठेयजातं विलिख्य वहिर्भूतमंगदेवतावाहनहोमतर्पणाद्यपि प्रचुराचारदर्शनात्प्रचलितस्फुटप्रयोगेभ्यो यथोचितं संगृहीतमिति दिक्) ॥ इति ज्वरशांतिप्रयोगः ॥ ॥ अथ ज्वरहराणि विधानानि । " म० म० अथ शातातपोक्तं विविधज्वरहरं । देवस्वग्रहणाच्चैव जायते विविधज्वरः । ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव च ॥ ज्वरे रुद्रजपं कुर्यान्महारुद्रं महाज्वरे । महारुद्रं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत् ॥ रौद्रे रुद्रसंबंधिनि माहेश्वरज्वरे कठिनतमेऽसाध्यज्वरे च महारुद्रं जपेत् । वैष्णवे तद्द्वयं रुद्रजपं महारुद्रजपं च । यद्वा तच्छब्देन बुद्धिस्थानि वैष्णवानि पुरुषसूक्तसहस्रनामापामार्जनविष्णुहृदयस्तोत्राणि परामृश्यंते । अतस्तद्द्वयं रुद्रसंबंधि विष्णुसंबंधि च शतरुद्रपुरुषसूक्तादि जपेत् । । अथ सर्वज्वरहरं कुंभदानं । पाद्मे । अगारदाही ज्वरवान् जायते तत्र निष्कृतिः । नवं कुंभं समानीय मृन्मयं चाव्रणं दृढं ॥ लोहितं कार्ष्ण्यरहितं स्थापयेत्तंडुलोपरि । परिमाणं तंडुलानां द्रोणपंचकमिष्यते ॥ विशुद्धास्तंडुला ग्राह्याः श्वेतवस्त्रेण वेष्टयेत् । कुंभमित्यन्वयः । मधुनाऽप्यथवाज्येन खंडेनाथ गुडेन वा ॥ तैलेनाथांऽभसा वा तं पूरयेच्छक्तितो नरः । श्वेतपुष्पैरर्चयेत्तं गंधपुष्पैस्तथाऽपरैः ॥ अपरैः श्वेतरक्तपीतादिभिरित्यर्थः । होमश्च पूर्ववत्कार्यः समिदाज्यचरूत्कटः । सुवर्णेन यथाशक्त्या ब्राह्मणाय निवेदयेत् ॥ सुवर्णेन युतं कुंभं निवेदयेदित्यन्वयः । तस्मै हुतवते वृत्तश्रुतशीलाय संस्कृतं । मंत्रेणानेन विधिवत्पूजयित्वा ज्वरी नरः ॥ महेश देव देवेश वासुदेव परात्पर । कुंभेनानेन दत्तेन ज्वरः क्षिप्रं प्रशाम्यतु ॥ एकांतरं संनिपातं तृतीयकचतुर्थकौ । पाक्षिकं मासिकं वापि सांवत्सरिकमेव च ॥ नाशयेतां मम क्षिप्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शां० वासुदेवमहेश्वरौ । श्लोकद्वयमिदं दानमंत्रः । होमश्च पूर्ववदिति । पूर्वोक्तप्रकारेण । स च प्रकारः शूलहरत्रिशूलदाने द्रष्टव्यः । तत्र तिलस्थाने क०
॥१५१॥ चरुरित्येतावान्विशेषः । कुंभदानमंत्रस्य रुद्रविष्णुप्रकाशकत्वात्कुंभपूजाऽपि रौद्रेण वैष्णवेन वा मंत्रेण कार्या । होमोऽप्यनयोरन्यतमेन । तत्र
च रौद्रो नमःशिवायेति पंचाक्षरः । केचन प्रणवादिं पठंति । अस्य मंत्रस्य वामदेव ऋषिः शिवो देवता पंक्तिश्छंदः । रुद्रगायत्री लिंगपुराणेऽ-
भिहिता । सर्वेश्वरायविद्महे शूलहस्तायधीमहि । तन्नोरुद्रःप्रचोदयादिति । अस्याः श्रीवेदव्यासो रुद्रो गायत्री । अन्ये च त्र्यंबकमित्या-
दयः परिभाषादिषु दर्शिताः । वैष्णवा अपि तद्विष्णोरित्यादयस्तत्रैव । नारायणाष्टाक्षरमंत्रस्तु ॐ नमोनारायणायेति । अस्य साध्यनारायणो
नारायणः परमात्मा दैवी गायत्री । गोपालमंत्रस्तु ऱ्हींकृष्णायगोविंदायगोपीजनवल्लभायस्वाहेति । अस्य नारदो गोपीजनवल्लभो गायत्री ।
अथ ज्वरतर्पणं । तत्रायं क्रमः । गोविंदसंज्ञकं कंचन तापसं तथाऽपुत्रं तापसांतरं च सतिलोदकैरंजलित्रयदानेन पृथक्पृथक् तर्पयित्वा पश्चा-
ज्ज्वरानुसारेणाष्टोत्तरशताद्ययुतांततर्पणं ज्वरमुद्दिश्य कर्तव्यं । ज्वरतर्पणे रक्ताक्षता रक्तपुष्पाणि वा ग्राह्याणि । तत्र तिलतर्पणमंत्रः । योसौ
सरस्वतीतीरे कुत्सगोत्रसमुद्भवः । त्रिरात्रज्वरदाहेन मृतो गोविंदसंज्ञकः॥ज्वरापनुत्तये तस्मै ददाम्येतत्तिलोदकं । तथा ।नद्यां चर्मनदीतीरे अपुत्रस्ता-
पसो मृतः । रात्रौ ज्वरविनाशाय तस्मै दद्यां तिलोदकं । ज्वरतर्पणमंत्रस्तु । त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः। स मे प्रीतः सुखं दद्यात्सर्वामयपति-
र्ज्वरः।" इति ज्वरहराणि विधानानि॥ ॥अथापमृत्युनिवारणं । मदनरत्ने बौधायनः । अथ मृत्युंजयकल्पं व्याख्यास्यामो जन्मनक्षत्रे पुण्यनक्षत्रे
त्रिजन्मनि ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्ति ऋद्धिं वाचयित्वा देवयजनोल्लेखनाद्यग्निमुखांतं कृत्वा सावित्र्या यवान्पक्वान् जुहोति प्रादेशमा- ॥१५१॥
त्रास्तिस्रो दूर्वाः समिधोऽष्टसहस्रमष्टशतं वा दधिमधुघृतपयांसि संमेल्याभ्यज्यादधाति।अपैतुमृत्यु परंमृत्यो मानोमहांतं मानस्तोके त्र्यंबकं येतेसहस्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यथाज्याहुतीरुपजुहोति मृत्युर्नश्यत्वायुर्वर्धतांभूःस्वाहा मृत्युर्नश्यत्वायुर्वर्धतांभुवःस्वाहा मृत्युर्नश्यत्वायुर्वर्धतांस्वःस्वाहेति स्विष्टकृत्प्रभृतिसिद्ध-माधेनुवरप्रदानादथाग्रेणाग्निं दूर्वास्तंबे हुतशेषं निदधाति। तच्छंयोरावृणीमहइत्यथ दक्षिणां ददाति धेनुं वृषभमनड्वाहं हयं हिरण्यं कांस्यं वासो वेत्याह बौधायनः । तत्र क्रमः । कर्ताऽष्टौ चतुरो वा विप्रान्संभोज्य पुण्याहादि वाचयित्वा संकल्प्याग्निं प्रतिष्ठाप्य निर्वापादिना सवित्रे यवमयं चरुं श्रपयित्वाज्यभागांते चरुमवदाय सावित्रीमनूच्य तयैव हुत्वा तिस्रो दूर्वा गव्यदध्यायक्ता अपैतुमृत्युरितिषड्भिर्हुत्वाज्येन मृत्युर्न-श्यत्विति त्रीनुपहोमान्कृत्वा यदस्येति स्विष्टकृतं हुत्वा ब्रह्मविसर्जनांतेऽग्रेणाग्निं दूर्वास्तंबे तच्छंयोरिति हुतशेषं चरुं निधायाग्निं संपूज्य सू-र्यं नमस्कृत्य विप्रान्भोजयेत् । एवं स्वकर्तृकत्वे। आचार्यपक्षे दक्षिणा। एतच्च ग्रहयज्ञयुतं दिनत्रयं रोगिणा कार्यं। प्रबलरोगे यावद्रोगनिवृत्ति प्र-त्यहं कार्यं । ऋग्विधाने । व्याधिना योऽभिभूतः स्याद् घोरेण प्राणहारिणा । चतुर्दशीमुपोष्यैकां कृष्णस्य जुहुयाच्चरुं ॥ आतेसूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः । पूर्वमाज्याहुतीर्हुत्वा अथोपस्थाय शंकरं ॥ हविःशेषेण वर्तेत एकांतरमतंद्रितः । पूर्णे मासे जयेन्मृत्युं रोगेभ्यश्च प्र-मुच्यते ॥ तत्रैव । उपतिष्ठेत राजानं यमसूक्तेन वै द्विजः । स्थालीपाकं च कुर्वीत पक्षयोर्यमदैवतं ॥ अष्टम्यां च चतुर्दश्यां यजेत हविषा यमं । परेयिवांसमित्येतत्सूक्तमत्र प्रयोजयेत् ॥ पुरायुषः प्रमीयेत न जातु स कथंचन । धर्मराजायस्वाहेति मंत्रांते जुहुयाद्धविः ॥ वैशा-ख्यां पौर्णमास्यां तु कर्म नित्यं प्रयोजयेत् । तत्रैव । मृत्युमेव प्रपद्येत परंमृत्यो जपन्द्विजः । नक्तभोजी मिताहारः प्रतिसंवत्सरं सदा ॥ नैनं पुरायुषो मृत्युर्नयते ससुतप्रजं । फलाहारो जयेन्मृत्युं त्रिभिर्वर्षैर्मिताशनः ॥ यद्वा तत्रैव । क्षीणायुरिति मन्येत यं कंचित्सुहृदं प्रियं । यत्तेयममिति स्नातस्तस्य मूर्धानमालभेत् ॥ सहस्रकृत्वः पंचाहं जपेदायुर्लभेत सः । घृतेन सिंधुद्वीपस्य सूक्तेनैनं च लेपयेत् ॥ संविशेच्छयने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यमेतन्मंत्रं जपेत वै । जीवावृत्तिं प्रयुंजीत नित्यमेतां धृतेन तु ॥ स्रोतांस्यभ्यज्य सर्वाणि सुखी भवति विज्वरः । अन्ये च लक्षकोटिपार्थिवलिंगपूजादयो मत्कृते पूर्तकमलाकरे ज्ञेयाः । तथा रुद्रेण तिलतैलेन रुद्राभिषेकोऽप्यपमृत्युहरः । रुद्रविधानं च वक्ष्यामः । इत्यपमृत्युनिवारणं ॥ ॥ अथ मृत्युंजयहोमः । बौधायनः । अथ महामृत्युंजयहोमं व्याख्यास्यामः कृत्याद्रोहेऽभिचारे दीर्घरोगे ग्रहपीडायां मृत्युप्राप्तौ महाव्याधौ महापदि चंद्रसूर्यग्रहणदोषे जन्मनक्षत्रे विषनाड्यां कुह्वां व्रजेद्वाऽन्येषु महाभयेषु परिहारार्थे मासि मासि जन्मनक्षत्रे प्रोक्ते काले वा वत्सरे वाचार्येण वा स्वयं वाऽऽयुष्कामेण कर्तव्यः।स्नात्वा पुण्याहं वाचयित्वा प्राणानायम्यामुकशर्मण आयुष्कामार्थं महामृत्युंजयहोमं करिष्य इति संकल्प्याग्नेरुपसमाधानादि पात्रप्रयोगकाले दूर्वात्रिकस्य षट्त्रिंशदधिकं शतत्रयमासादयेत् । गुडूचीखंडानि चतुरंगुलप्रमाणानि । ब्रह्माणं दक्षिणतो दर्भेषु निषाद्य व्रीहींस्तंडुलान्वा निर्वपति मृत्यवेत्वाजुष्टंनिर्वपामीति तूष्णीमवहननातं कृत्वा प्रक्षालयत्यथाज्यं संस्कृत्य चरुणा सह पर्यग्निकरणं कृत्वा स्रुवस्रुचोर्मार्जनं कृत्वा चरुमभिघार्योदगुद्वास्य प्रतिष्ठितमभिघार्येध्मपरिधानप्रभृत्याग्निमुखात्कृत्वाऽथ पक्वाज्जुहोति । दर्व्यामुपस्तीर्य मध्याद्विरवदाय त्रिः पंचावत्तिनोऽभिघार्य अपैतुमृत्यु० शचीपतिरिति पुरोनुवाक्यामनूच्य परंमृत्यो० वीरानिति याज्यया जुहोति । मृत्यव इदं नममेति त्यागः । पूर्ववदुपस्तीर्य हरिश्हरंत० विक्रमस्वेति पुरोनुवाक्यामनूच्य माछिदो० विधेमेति याज्यया जुहोति । मत्यव इदं० । आज्येन महाव्याहृतिभिश्च जुहोति । भूरग्नयेचपृथिव्यैचमहतेचस्वाहेत्याद्यैः पंचभिः पंचाहुतीर्हुत्वा (अत्र पंचमो मंत्रः नमोदेवेभ्यःस्वधापितृभ्योभूर्भुवःसुवर्महरोमिति तैत्तिरीयोपनिषदि प्रसिद्धः । अस्य महाव्याहृतिसंज्ञाव्यपदेशस्तु साहचर्याज्ज्ञेयः । तत्र देवपितृभूरादिभ्यइदंनममेति त्यागः) अथ दूर्वात्रिकं गुडूचीखंडानि पयसांऽक्ता जुहोति । षट्त्रिंशदधिकशतत्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्येकं । अपैतुमृत्यु० शचीपतिःस्वाहा । वैवस्वताय शचीपतय इदं० । परंमृत्योअनु० वीरान्स्वाहा । मृत्यवइदं० । वातंप्राणं० मशीमहिस्वाहा । प्रजापतय० । अमुत्रभूया० शचीभिःस्वाहा । अश्विभ्यामिदं० । शल्कैरग्नि० तराम्यहंस्वाहा । अग्नय० । हरिंहरंत० विक्रमस्वस्वाहा । देवेभ्य० । माछिदोमृत्यो० विधेमस्वाहा । मृत्यव० । मानोमहांत० रीरिषःस्वाहा । रुद्रायेदं० । मानस्तोके० विधेमतेस्वाहा । रुद्रायेदं० । प्रजापते० रयीणांस्वाहा । प्रजापतय० । यतइंद्र० जहिस्वाहा । इंद्राय मघवत० । स्वस्तिदाविश० करःस्वाहा । इंद्रायाभयंकरायेदं० । त्र्यंबकं० मामृतात्स्वाहा । त्र्यंबकायेदं० । अपमृत्युमपक्षुध० सहस्रिणंस्वाहा । अग्नय० । येतेसहस्र० यजामहेस्वाहा । मृत्यव० । जातवेदसे० त्यग्निःस्वाहा । जातवेदसेऽग्नय० । भूर्भुवःसुवः । ओजोवलं० ददद्भ्याववृत्स्वस्वाहा । जातवेदसेपावकाय (वैश्वानराय वैद्युताय वा) इदं० । अमुकस्यमृत्युर्नश्यत्वायुर्वर्धतां भूःस्वाहा । अग्नय० । अमुकस्य० भुवःस्वाहा । वायव० । अमु० सुवःस्वाहा । सूर्यायेदं० । अमु० भूर्भुवःसुवः स्वाहा । प्रजापतयइदं० । इत्येतैरेकविंशतिमंत्रैः षोडशपर्यायं प्रतिमंत्रं जुहुयात् । षट्त्रिंशदधिकशतत्रयाहुतिर्भवाति । अथाज्येनाष्टपर्यायमेकविंशतिमंत्रैः प्रतिमंत्रं जुहुयात् । अष्टाधिकषष्टिशताहुतिर्भवाति । पुनरनेन गुडूच्या षोडशपर्यायमेकविंशतिमंत्रैः प्रतिमंत्रं जुहुयात् । पट्त्रिंशदधिकशतत्रयाहुति० । पुनरनेनाष्टपर्यायैरेकविंशतिमंत्रैः प्रतिमंत्रं० । अष्टाधिकषष्टिशताहुति० । एवं क्रमेणाष्टाधिकसहस्राहुतिर्भवति । पुनराज्येन मृत्यवेस्वाहेत्यष्टवारं जुहुयात् । पुनर्महाव्याहृतिभिर्हुत्वा स्विष्टकृतमवदाय हव्यवाहमभि० आयुःस्वाहेति स्विष्टकृतं जुहोत्यनंतरं परिध्यंजनं कृत्वा जयादिपरिषेचनांतं कृत्वाऽग्रेणाग्निं दूर्वास्तंबे हुतशेषं निदधाति । सर्वोवैरुद्रस्तस्मै० नमः । विश्वंभूतं० अस्तु । इति द्वाभ्यां मंत्राभ्यां निवेदयेत् । आयुर्दाअग्ने० दिमंस्वाहेत्यग्नौ समिधमादधाति । जातवेदायदिवा० ववृत्स्वेत्युपस्थाय हुतशेषे हविषि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाज्यशेषं निवेदयेत् । अग्निरायुष्मानितिपंचभिः पुनरेकविंशतिऋग्भिश्चतुर्वारमभिमंत्र्य आयुरसि० गेषमिति सर्वं चरुशेषं प्राश्याचम्य जठरमभिमृशति । यतइंद्रस्वस्तिदाविशइत्येताभ्यां गुरवे वरं दत्वा दशदानानि कृत्वाऽवेक्ष्याज्यं दत्वा ऋत्विग्भ्यो दक्षिणां दत्वा ब्राह्मणान्भोजयेदपूपैर्घृतपायसैः । एवं कृत्वायुष्मान्भवति । अयुतहोमाद्दीर्घायुर्भवति । लक्षहोमात्सहस्रायुर्भवति । अत्रान्वाधाने विशेषः । अस्मिन्नन्वाहितेग्नौ जातवेदसमित्यादिचक्षुषीआज्येनेत्यंतेऽत्रप्रधानं मृत्युं द्विवारं चरुद्रव्येण । अग्निपृथिवीमहतः । वाय्वंतरिक्षमहतः । आदित्यद्युमहतः । चंद्रमोनक्षत्रदिङ्महतः । देवपितृभूरादींश्चाज्येन । पुनरत्र प्रधानं । वैवस्वतं शचीपतिं । मृत्युं । प्रजापतिं । अश्विनौ । अग्निं । देवान् । मृत्युं द्विवारं । प्रजापतिं । इंद्रं मघवंतं । इंद्रमभयंकरं । त्र्यंबकं । अग्निं । मृत्युं । जातवेदसमग्निं । जातवेदसं पावकं (वैश्वानरं वैद्युतं वा) अग्निं । वायुं सूर्यं । प्रजापतिं । प्रत्यृचं षोडशपर्यायदूर्वात्रिकयुक्तगुडूचीखंडैः । पुनस्ता एव प्रत्यृचमष्टपर्यायमाज्येन । पुनस्ता एव प्रत्यृचं षोडशपर्यायगुडूचीखंडैः । पुनस्ता एव प्रत्यृचमष्टपर्यायमाज्येन । पुनरत्र प्रधानं । मृत्युमष्टवारमाज्येन । पुनरत्र प्रधानं । अग्निपृथिवीमहतः । वाय्वंतरिक्ष० । आदित्यद्यु० । चंद्रमो नक्षत्र० । देवपितृभूरादींश्चाज्येन । शेषेगस्विष्टकृतमित्यादि । इति मृत्युंजयहोमः ॥ ॥ अथानावृष्टिशांतिः । ऋग्विधाने । अच्छावदेतिसूक्तं तु वृष्टिकामः प्रयोजयेत् । निराहारः क्लिन्नवासा अचिरेण प्रवर्षति ॥ हुत्वाऽयुतं वैतसीनां क्षीराक्तानां हुताशने । महद्वर्षमवाप्नोति सूक्तेनाच्छावदेन हि ॥ तत्रैव । आस्यदघ्नं विगाह्यांभः प्राङ्मुखः प्रयतः शुचिः । सूक्ताभ्यां तिस्र एताभ्यामुपतिष्ठेद्दिवाकरं ॥ तिस्रोवाचः पर्जन्यायप्रगायतेत्याभ्यामित्यर्थः । अनश्नता तु जप्तव्यं वृष्टिकामेन यत्नतः । पंचरात्रे व्यतीते तु महद्वर्षमवाप्नुयात् ॥ यद्वा तत्रैव । वृष्टिकामो यताहारः प्रपद्येत बृहस्पतिं । पायसेनोपहारेण होमेन च समन्वितः ॥ बृहस्पतेप्रतीत्येतद्वृष्टिकामः प्रयोजयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्जन्यं च नमस्कृत्य वृष्टिं विंदति शोभनां। मात्स्ययाज्ञवल्क्यौ । श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत् । वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि ॥ स ग्रहयज्ञोऽयुतहोमो लक्षहोमः कोटिहोमश्चेति त्रिष्वन्यतरः शक्त्या कार्यः । यद्वा एवं विनायकं पूज्य ग्रहांश्चैव विधानतः । कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमामित्युक्तेर्विनायकशांतिपूर्वकं पर्जन्यशांत्यंगत्वेन समानतंत्रो वा ग्रहयज्ञः कार्यः । बौधायनः । अथातः पर्जन्यविधिं व्याख्यास्यामो ब्राह्मणान्वरणपूर्वमभ्यर्च्य वरुणप्रतिमां पूजयित्वोदके स्थित्वा तत्सवितुरिति पच्छोर्धर्चशोऽनवानं जपतीमंमेवरुणेति पंचर्चमुदुत्तममिति षळर्चमापउंदंतूदायुषा महाँइंद्रोयओजसा वाचामैंद्रियेण योवैसप्तदशं मैत्रावरुणींद्विरूपामसावादित्योऽसौ सौरीं वरुणँसुषुवाणं प्रजापतिर्वरुणाय यावामिंद्रावरुणैतद्वाअपांनामधेयं हिरण्यवर्णाः पवमानःसुवर्जनो वृषासोअँशुःपवते सिँहेव्याघ्रे सर्वेषुवाएषुलोकेषु योसौतपन्नुदेति योपांपुष्पंवेदेत्यादिसर्वानुवाकान्सुवर्णघर्मं सहस्रशीर्षोऽद्भ्यःसंभूत आदित्योवाएषएतन्मंडलं पृथिवीसमिदित्यनुवाकान् जपित्वा जलाद्बहिः प्रत्यङ्मुखः पीवोऽन्नामित्यनुवाकमेकादशवारं जपित्वाग्निं प्रतिष्ठाप्याज्यभागांते क्षीराज्यवैतससमिच्चरुभिः प्रत्येकमष्टशतमष्टाविंशतिं वा पुरोवातोवर्षन्निति जुहुयाद्वर्षायपुरोवातायेत्युद्देशत्यागौ जयादीन्पूर्णाहुतिं हुत्वा शांतिपाठं कुर्यादाचार्याय वरुणप्रतिमामृत्विग्भ्यो दक्षिणां दद्यादित्याह भगवान्बौधायनः । अश्विनीयाम्यसंस्थेऽर्के यदा देवो हि वर्षति । सुभिक्षं क्षेममतुलमीतिभीतिश्च वह्निभे ॥ ब्रह्मद्वितयगे भानौ वृष्टिश्चेद्भयदायिनी । रौद्रस्थे स्यादनर्घाय स्वल्पा चेदीतिभीतिदा ॥ रौद्रप्रवेशे यदि वर्षतींद्रस्तत्सार्धमासं नहि वृष्टिरस्ति । दिवाप्रवेशे बहुसस्यहानी रात्रौ सुभिक्षं नच रोगपीडा । सायंकालेऽर्धरात्रे चेत्प्रवेशस्तु महार्घदः । आर्द्रायां रविसंयोगे फलमेतदुदीरितं ॥ आदित्यादिदशर्क्षेषु वृष्टिः सूर्ये सुभिक्षदा । सिंहप्रवेशनं हित्वा कर्कटे व्यत्ययः शुभः ॥ बौधायनः । मारुतमसिमरुतामोजइति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 देवावसव्या देवाःशर्मण्याः कूष्मांडैर्जुहुयात्प्रवातावांतिपतयंतीति । गायत्रींजपयुक्तस्तु महामृत्युंजयं जपेत् । सूक्तजपसंख्या प्रत्येकं शतं ।
 कूष्मांडहोमः आवृत्तित्रयं । गायत्रीजपो लक्षं । महामृत्युंजयजपो दशसहस्रं । रुद्राभिषेकः । इत्यनावृष्टिशांतिः ॥ ॥ अथ विनियुक्त-
मंत्राणां सामान्यविधिः । ऋग्विधाने। पुरश्चरणमादौ तु कर्मणां सिद्धिदायकं । स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद्द्विजः ॥ केशश्मश्रुलो-
मनखान्वापयित्वाऽऽप्लुतः शुचिः । तिष्ठेदहनि रात्रौ तु शुचिरासीत वाग्यतः ॥ सत्यवादी पवित्राणि जपेच्च व्याहृतीस्तथा । ओंकाराद्यास्तु
ता जप्त्वा सावित्रीं च तदित्यृचं ॥ आपोहिष्ठेति सूक्तं तु शुद्धवत्योऽघमर्षणं । शंवत्यः स्वस्तिमत्यश्च पावमान्यस्तथैव च ॥ सर्वत्रैतत्प्रयो-
क्तव्यमादावंते च कर्मणां । आसहस्रादाशताद्वा दशांतमथवा जपेत् ॥ ओंकारं व्याहृतीस्तिस्रः सावित्रीमथ चायुतं । तर्पयित्वाऽङ्गिराचार्या-
नृषिच्छंदांसि देवताः । प्रपद्येत विरूपाक्षं रौद्रमंत्रगणं जपेत् ॥ अनार्यैर्नच भाषेत न शूद्रैर्नापि गर्हितैः । न रजस्वलया नार्या पतितैर्नांत्य-
जैर्नृभिः ॥ मंगलाचारयुक्तः स्यात्त्रिरह्नोऽभ्युपयन्नपः । अंते द्वादशरात्रस्य स्थालीपाकं प्रकल्पयेत् ॥ अग्नये चाथ सोमाय तृतीया च तयोः
सह । वैश्वदेवीं च रौद्रीं च जुहुयादुत्तरे ततः ॥ अवसानस्य पतये तथाऽनुमतयेपि च । धन्वंतरयइत्यन्यां गंधर्वाप्सरसामपि ॥ दशमी
ब्राह्मणस्पत्या परा तु ब्रह्मणे स्मृता । सरस्वत्यै तथा विष्णोरंत्या सौविष्टकृत्यपि ॥ आज्याहुतय एवादौ स्थालीपाके हुते पुनः । हुत्वाऽग्निं
तर्पयेद्विप्रान्पितृभ्यश्च प्रकल्पयेत् ॥ हुतशेषं विधानेन शुचिर्भुंजीत वाग्यतः । तथा प्राजापत्यातिकृच्छ्रचांद्रायणादीन्युक्त्वा । एभिर्व्रतैर्विपूतात्मा
कुर्यात्कर्माण्यतंद्रितः । इष्टान्कामांस्ततः सर्वानवाप्नोति न संशयः ॥ कणपिण्याकतक्राणामेकैकं शोधनं भवेत् । एवं शुद्धस्य कर्माणि मंत्रै-
र्वक्ष्यामि तद्यथा ॥ त्रिरात्रमेवोपवसेदादितः सर्वकर्मणां । त्रीणि नक्तानि वा कुर्यात्ततः कर्म समाचरेत् ॥ तथा । सर्वत्र दक्षिणां दद्याद्दानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

। नत्वेवाऽदक्षिणं कर्म किंचिदस्तीति शौनकः ॥ शक्त्या हि पूर्णपात्रेण संमिताऽथ ततो भवेत् । ऋषभैकादशान्दद्याद्धेनुं वा
बौं० स्मृ० । यान्सिसाधयिषुर्मंत्रान्द्वादशाहानि तान्जपेत् । घृतेन पयसा दध्ना प्राश्य निश्योदनं सकृत् ॥ दशवारं तथा
यं । पूर्वसेवा भवेदेषा मंत्राणां कर्मसिद्धये ॥ ” इति विनियुक्तमंत्राणां सामान्यविधिः ॥ ॥ अथ श्रीसूक्तविधिः ।
रदां देवीं श्रियं नित्यं कुले स्थितां । स शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहं । श्रियः पंचदशर्चं च श्रीकामः
च्छ्रियं पद्मे पंचभिः कनकेऽपि वा । उपहारानुपहरेच्छुक्लान्भक्ष्यान्पयो दधि ॥ स्थालीपाकं च शालीनां पयसा
प्मा तु प्रपचेत्प्रयतः श्रियै ॥ सर्वौषधीभिः पाठाभिः स्नात्वाऽद्भिः पावनैरपि । उपैतुमांदेवसखइति राज्ञोऽभि-
शुकामाभिषेचनी । कर्दमेनेति यः स्नायात्प्रजाकामः शुचिव्रतः ॥ अश्वपूर्णामिति स्नायाद्राज्यकामः शुचिव्रतः ।
थाविधि ॥ राजा चर्मणि वैयाघ्रे क्षत्रियस्त्वथ रौरवे । बस्तचर्मणि वैश्यस्तु होमः कार्यस्त्वनंतरं ॥ चंद्रामि-
। आदित्यवर्णेत्यनया बिल्वहोमो विधीयते ॥ बिल्वोत्थ एव वाऽग्निः स्यात्स्थालीपाकं हुनेद्द्विजः। दशसाह-
हुत्वा तु प्रयुतं सम्यगनंतां विंदते श्रियं । अयुतं शतकृत्वस्तु हुत्वा शुक्लानि सर्पिषा ॥ अनंतामव्यव-
जप एवोक्तो दशसाहस्रिको वरः ॥ जप्त्वा तु प्रयुतं सम्यगनंतां विंदते श्रियं । अयुतं शतकृत्वस्तु
ं पद्मान्ययुतशो निशि । दृष्ट्वा श्रियं चोपरमेत्किलासत्वाद्विधेन वै ॥ बिल्वाशी बिल्वनिलयो जुहु-
र्द्धिं नियच्छति ॥ येन येन च कामेन जुहोति प्रयतः श्रियै । पद्मान्यथापि बिल्वानि स स कामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्यवर्णां हरिणीमृचः पंचदश द्विज । श्रीसूक्तं कथितं पुण्यमृग्वेदे पुष्टिवर्धनं ॥ रथेअक्षे-
ु यजुर्वेदे कथितं पुष्टिवर्धनं ॥ श्रायंतीयं तथा साम सामवेदे प्रकीर्तितं । श्रियंदातुर्मयिदेहि प्रोक्त-
तस्याऽलक्ष्मीर्विनश्यति । जुहुयाद्यश्च धर्मज्ञो हविष्येण विशेषतः ॥ श्रीसूक्तेन तु पद्मानां घृताक्तानां
कयुतो नरः ॥ पद्महस्तद्द्या लक्ष्मीर्नरं तमुपतिष्ठति । दशायुतं तु पद्मानां जुहुयाद्यस्तथा जले ॥ नापै-
ा । घृताक्तानां तु बिल्वानां हुत्वा रामायुतं तथा ॥ बहुवित्तमवाप्नोति स यावन्मनसेच्छति । बिल्वानां
॥ पद्मानामथ बिल्वानां कोटिहोमं समाचरेत् । श्रद्दधानः समाप्नोति देवेंद्रत्वमपि ध्रुवं ॥ संपूज्य देवीं वरदां
ाथाऽन्यैः । क्षीरेण धूपैः परमान्नभक्ष्यैर्लक्ष्मीमवाप्नोति विधानतश्च ॥ इति शांतिरत्ने श्रीसूक्तविधिः ॥
. श्रीसूक्तप्रयोगः । मूर्धाक्षिकर्णनासामुखगलदोर्त्हृदयनाभिगुह्येषु । पायूरुजानुजंघाचरणेषु न्यसेदृचः क्रमशः ॥
मधुपर्काभिषेकान् । वासोभूषणगंधान्सुमनोयुतधूपदीपभोज्यानि ॥ सोद्वासनानि कुर्याद्भक्तियुतः पंचदशभिरथ मनुभिः।
ायाः श्रीः ततआनंदकर्दमचिक्लीतश्रीपुत्रा ऋषयः । आद्यास्तिस्रोनुष्टुभस्ततो बृहती ततस्त्रिष्टुभौ ततोऽष्टावनुष्टुभोऽत्या
याः श्रीरग्निः। अन्यासां श्रीः । जपे विनि०।ततः क्रमेण मूर्धाक्षिकर्णनासामुखग्रीवांऽसबाहुत्हृदयनाभिगुह्यगुदोरुजंघाचरणेषु
त् । प्रणवेन त्रिः करौ प्रमृज्य हिरण्यायैनमः अंगुष्ठाभ्यां०। चंद्रायै० तर्जनी०। रजतस्रजायै० मध्यमा०।हिरण्यस्रजायै० अनामि- ॥१५५॥
ायै० कनिष्ठिका०। हिरण्यवर्णायै० करतलकरपृष्ठाभ्यां०। एवं षडंगः। ध्यानं । अरुणकमलसंस्था तद्रजःपुंजवर्णा करकमलधृतेष्टा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ा च । मणिमुकुटविचित्रालंकृताऽऽकल्पजालैर्भवतु भुवनमाता संततं श्रीः श्रियै नः॥ चतुर्भुजेषु ऊर्ध्वयोः पद्मे अधो वराभये । षट्-
कृत्वा आं आधारशक्त्यै० । मूलप्रकृत्यै० । मंडूकाय०। ततः पीठे । धर्माय०। ज्ञानाय० । वैराग्याय० । ऐश्वर्याय० । पूर्वा-
अज्ञानाय० । अवैराग्याय० । अनैश्वर्याय०। तं तमसे०। रं रजसे० । सं सत्वाय० । मां मायायै० । विं विद्यायै० । आं
ने० । ज्ञां ज्ञानात्मने० । वह्निमंडलाय० । सूर्यमंडलाय० । सोममंडलाय० । विभूत्यै० । उन्नत्यै० । कीर्त्यै० संता-
र्ण्यै० । ऋद्ध्यै० इत्यष्टदलेषु । ततो मध्ये हिरण्यवर्णामित्यावाह्य अग्नीशासुरवायुपुरःपृष्ठेषु हृदयादीनि । प्रागादिदि-
० प्रद्युम्नाय०अनिरुद्धाय० । पुनः पूर्वादिषु । दमनकाय०संतानाय० गुग्गुलाय० कुरंटकाय० दक्षिणे शंखनि-
ततो बलायै० विमलायै० वनमालिकायै० विभीषिकायै० मल्लिकायै० शांकर्यै० वसुमालिकायै० इत्यष्टदलेषु ।
रजतस्रजायै० पद्मवर्णायै० पद्मस्थायै० । हिरण्यवर्णायै० इति षट्कोणेष्वाग्नेयादिषु । तद्बहिरष्टदलेषु पद्मायै०
यै० तर्पयंत्यै० तृप्त्यै० ज्वलंत्यै० स्वर्णप्राकारायै० । ततो लोकपालांस्तदायुधानि च । ततः तामआवहेत्यासनं ।
ं । चंद्रांप्रभासामाचमनीयं । आदित्यवर्णे मधुपर्कस्नानं । उपैतुमामभिषेकं । क्षुत्पिपासां वस्त्रं । गंधद्वारां
ष्पं । आपःस्रजंतु धूपं । आर्द्रांपुष्करिणीं दीपं । आर्द्रांयष्करिणीं नैवेद्यं । तयैव वह्नौ चर्वाहुतिरेका ।
नं पुष्पांजलिश्च । ततः पंचदशऋग्भिराज्यं हुत्वा तामआवहेत्युद्वासनं च । एवं शुक्लप्रतिपदाद्येका-
धुशर्करेतित्रिमधुराक्तैः पद्मैर्बिल्वसमिद्भिः पायसेन घृतेन त्रिशतमेकैकेन होमः । द्वादशविप्रभो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छरो नित्यं श्रीसूक्तैः स्नानकर्मणि । आदित्याभिमुखो जप्त्वा यावत्तावच्च तर्पयेत् ॥ चत्वारिंशच्छु-
नवनीताक्तपद्मानि तत्संख्ययैव जुहुयात् । कांसोस्मितामिति च दशाहुतीर्घृताक्तान्नेन जुहुयान्नित्यं ।
म् तर्पयामि । लक्ष्मीं० वरदां० विष्णुपत्नीं० वल्लभां० हिरण्यरूपां० सुवर्णमालिनीं० पद्मवासिनीं० पद्महस्तां०
द्रां० विश्वप्रियां० ईश्वरीं० भुक्तिं० प्रभुक्तिं० विश्वभूतिं० ऋद्धिं० समृद्धिं० तुष्टिं० धनेश्वरीं० शुद्धां० भोगिनीं०
ारस्तु शारदातिलके द्रष्टव्यः) इति मंत्रकोशोक्तः श्रीसूक्तप्रयोगः ॥ ॥ अथ नीराजनं । विष्णुधर्मो-
दिग्भागे नगरात्सुमनोहरे । विस्तीर्णं कारयेद्राजा सुमनोहरमंडपं ॥ कटैर्गुप्तं कुशास्तीर्णं पताकाध्वजशो-
ाङ्मुखं कारयेच्छुभं ॥ कार्यं षोडशहस्तं तु तत्र कार्यं भृगूत्तम । तोरणाद्दक्षिणे भागे तत्र कार्यमथाश्रमं ॥
हवनक्रिया । पंचरंगकसूत्रेण शतग्रंथिमनोरमां ॥ मध्यमे तोरणे कुर्याच्छतपाशीं तु मध्यगां । छादयित्वा कुशैस्तां
तस्याश्च लंघनं वर्ज्यं प्रयत्नात्सर्वजंतुभिः । न लंघिता सा यावत्स्यात्प्रथमं राजहस्तिना ॥ चित्रां त्यक्त्वा यदा स्वातिं
ततःप्रभृति कर्तव्या यावत्स्वातौ रविः स्थिरः ॥ मंडपे प्रत्यहं देवाः पूजनीया द्विजोत्तम । ब्रह्मा विष्णुश्च शंभुश्च
॥ विनायकः कुमारश्च वरुणो धनदो यमः । विश्वान्देवान्महाभाग उच्चैःश्रवसमेव च ॥ अष्टौ महागजाः पूज्यास्तेषां
। कुमुदैरावतौ पद्मः पुष्पदंतोऽथ वामनः । सुप्रतीकोंऽजनो नील एतेऽष्टौ देवयोनयः ॥ पूजा कार्या ग्रहर्क्षाणां तथैव च
श्च जुहुयाद्दक्षौ पुरोधाः सुसमाहितः ॥ यथाभिमतदेवानां मंत्रैस्तल्लिंगसंज्ञकैः । तथा च मंत्रहीनानां तत्तन्नाम्ना महाभुज ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समिधः क्षीरवृक्षाणां तथा सिद्धार्थकानि च । घृतं तिलांश्च धर्मज्ञ तथा चैवाक्षतानि च ॥ हुत्वा च कलशान्कुर्यात्सोदकान् गंधसंयुतान् । भल्लातशालिसिद्धार्थवचाकुष्ठप्रियंगवः ॥ तोरणात्पश्चिमे भागे कलशैः पूर्वकल्पितैः । ततः संस्नापनीयाः स्युर्मंत्रपूतैर्गजोत्तमाः ॥ तुरगाश्च महाभाग अलंकृत्य ततस्तु तान् । ततोऽभिषेकं नागस्य तथा तत्तुरगस्य च ॥ पिंडान्नं तु ततो देयमभिमंत्र्य पुरोधसा । तस्याभिनंदनं राज्ञो विजयः परिकीर्तितः ॥ त्यागे च तस्य विज्ञेयं महद्भयमुपस्थितं । निष्क्रामयेत्तोरणाधस्ततो हि प्रथमं गजान् ॥ तत्रापि प्रथमं राम अभिषिक्तं गजोत्तमं । तस्यादौ ज्ञातपाशीं तु नरः पंचनखोऽपि वा ॥ यद्यन्यो लंघयेत्तां तु राज्ञो मरणमादिशेत् । लंघयेद्वामपादेन यदि तां नृपकुंजरः ॥ राज्ञीपुरोहितामात्यराजपुत्राऽहितं भवेत् । राज्ञस्तु मरणं ब्रूयादाक्रमेतां पदा यदा ॥ राज्ञो विजयमाचष्टे लंघयन्दक्षिणेन तां । निष्क्रामेयुस्ततः सर्वे प्राङ्मुखास्तोरणैर्गजाः ॥ ततोऽश्वाः सुमहाभाग ततस्तु नरपुंगवाः । ततश्छत्रं ध्वजं चैव राजचिह्नानि यानि च ॥ मंडपे तानि संस्थाप्य पूजयेदायुधानि च । पंचरंगकसूत्रेण यास्ताः प्रतिसराः कृताः ॥ दूष्यादूष्येतिमंत्रेण निबध्नीयात्पुरोहितः । सर्वेषां नृपनागानां तुरगाणां च भार्गव ॥ स्वगृहेषु ततो नेयाः कुंजरास्तुरगैः सह । स्वातिस्थः सविता यावत्तावच्छायासु संस्थितान् ॥ पूजयेत्सततं राम नाक्रोशेन्न च ताडयेत् । राजचिह्नानि सर्वाणि पूजयेन्मंडपे सदा ॥ वरुणेज्या च भूतेज्या रात्रौ बलिभिरुत्तमैः । वसेतामाश्रमे नित्यं सांवत्सरपुरोहितौ ॥ अश्ववैद्यप्रधानश्च तथा नागभिषग्वरः । दीक्षितैस्तैस्तथा भाव्यं ब्रह्मचारिभिरेव च ॥ स्वातिं त्यक्त्वा यदा सूर्यो विशाखां प्रतिपद्यते । अलंकुर्याद्दिने तास्मिन्वाहनं त्वविशेषतः ॥ हस्तिनं तुरगं छत्रं खड्गं चापं च दुंदुभिं । ध्वजं पताकां धर्मज्ञ कालज्ञस्त्वभिमंत्रयेत् ॥ अत्र छत्रादिमंत्रा ज्ञेयाः । अभिमंत्र्य ततः सर्वान्कुर्यात्कुंजरधूर्गतान् । निष्क्रम्य तोरणैर्नागमभिमंत्रितमारुहेत् ॥ तोरणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनिष्क्रम्य कुर्यात्सुरविसर्जनं । बलिं विसृज्य विधिवद्राजा कुंजरधूर्गतः ॥ उल्मुकानां तु निचयमादीपितमनंतरं । राजा प्रदक्षिणं कुर्या-
त्त्रीन्वारान्सुसमाहितः ॥ चतुरंगबलोपेतः सर्वसैन्यसमन्वितः । एवं कृत्वा गृहं गच्छेद्राजा सैन्यपुरःसरं ॥ जनं संपूज्य च ततः सर्वमेव
विसर्जयेत् । शांतिर्नीराजनाख्येयं क्षेम्या वृद्धिकरी तथा । इति नीराजनं ॥ ॥ अथ घृतकंबलविधिः । विष्णुधर्मोत्तरे । राम उवाच ।
शांतिमाचक्ष्व मे देव घृतकंबलसंज्ञितां । पुष्कर उवाच । पूर्वोत्तरे तु दिग्भागे शांत्यागारं तु कारयेत् ॥ आभिषेचनिका मंत्रा ये मयाऽभिहिताः
पुरा । देवादयस्तु तेषां ये स्थानं तत्र प्रकल्पयेत् ॥ आवाहनं ततः कुर्यात्स्नातस्तत्र उपोषितः । आवाहितानां सर्वेषां गंधमाल्यादिसंपदा ॥
दैववित्पूजनं कुर्यात्तथा नृपपुरोहितौ । एवं संपूजनं कृत्वा सोपवासास्तु ते त्रयः ॥ कुर्यात्त्रिभागशेषायां रात्रौ कुर्यात्तु शांतिकं । हुत्वा दशगु-
णानत्र स्नापयेत्तं नराधिपं ॥ पूर्वमेव तथा स्नातं सिद्धार्थोत्सादितं तथा ॥ पूर्णेन घृतकुंभेन मंत्रेणानेन कालवित् ॥ आज्यं तेजः समुद्दिष्टमा-
ज्यं पापहरं परं । आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ॥ भौमांतरिक्षं दिव्यं वा यत्ते किल्बिषमागतं । सर्वं तदाज्यसंस्पर्शात्प्रणाश-
मुपगच्छतु ॥ ततो विरूक्षितं स्नानं स्नानवेदिं नराधिपं । गच्छेतां तु पुरस्कृत्य सांवत्सरपुरोहितौ ॥ स्नानवेदी तु कर्तव्या लाजाकुसुममंडिता ।
चतुर्भिः पूर्णकुंभैश्च विदिक्षु ह्युपशोभिता ॥ चत्वारि तस्यां चर्माणि प्राग्ग्रीवाणि समास्तरेत् । वृषस्य द्वीपिनश्चैव सिंहशार्दूलयोस्तथा ॥
भद्रासनं न्यसेद्राम तेषामुपरि चर्मणां । स्वासीनं नृपतिं तत्र वस्त्रैराच्छादयेन्नवैः ॥ कार्पासकैस्ततः पश्चादाविकैः कृमिजैस्तथा । ततस्तु
सर्पिषः कुंभैः पूर्णैस्तमभिषेचयेत् ॥ कुंभाष्टकं तु कर्तव्यमष्टाविंशतिरेव वा । अथवाष्टशतं राम वृद्धिरेषां गुणोत्तरा ॥ ततोऽपनीय वस्त्राणि त-
स्यां वेद्यां पुरोहितः । शूलेन मृन्मयं भिंद्याच्छत्रुं क्रोधसमन्वितः ॥ राज्ञस्तु कलशं दद्यात्स्वयं सांवत्सरस्ततः । राजाभिषेकमंत्रेण स्वर्चितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पितं दृढं ॥ ज्योतिष्मतीं त्रायमाणामभयामपराजितां । जीवां विश्वेश्वरीं पाठामसंगामभयां तथा ॥ सहां च सहदेवीं च पूर्णकोशां शतावरीं । अरिष्टिकां शिवां भद्रां कलशे तत्र विन्यसेत् ॥ ब्राह्मीं क्षेमां वचां चैव सर्वबीजानि कांचनं । मंगल्याश्च यथालाभं सर्वौषध्यो रसांस्तथा ॥ रत्नानि सर्वगंधांश्च बिल्वं च सविकंकतं । एवं स्नातो घृते दृष्ट्वा वदनं दर्पणे तथा ॥ मंगलालभनं कृत्वा धौतवासाः समाहितः । अभ्यर्चनं ततः कुर्याद्देवादीनां पृथक्पृथक् ॥ तेषामेव ततो वह्नौ चतुर्थ्यंतैस्तु नामभिः । ॐकारयुक्तं जुहुयाद् घृतं बहु पुरोहितः ॥ आयुधाभ्यर्चनं कार्यं वाहनाभ्यर्चनं तथा । राजचिह्नार्चनं कृत्वा त्वलंकृत्य स्वकां तनुं ॥ अनुलेपनमादद्याद्गंधद्वारेतिमंत्रतः । शुभं वसनमादद्याच्छ्रीसूक्तेनाभिमंत्रितं ॥ श्रियंदातुर्मयिदेहि मंत्रः सुमनसां भवेत् । रायस्पोषेति च तथा मंत्रोऽलंकरणे स्मृतः ॥ केशवाभ्यर्चनं कृत्वा वह्निस्थानं ततो व्रजेत् । वह्नेरुत्तरदिग्भागे प्राग्ग्रीवं प्रोक्तचर्मणां ॥ सिंहासनं न्यसेत्पृष्ठे पराध्यास्तरणान्वितं । वृषस्य वृषदंशस्य करेणोः पृषतस्य च ॥ तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परं । एषां तु राम चर्माणि प्राग्ग्रीवाणि तु विन्यसेत् ॥ ध्रुवाद्यौरितिमंत्रेण नृपं तत्रोपवेशयेत् । ततः पुरोधा जुहुयाद्ब्राह्मैर्मंत्रैर्घृतं शुचिः ॥ रौद्रैर्वैष्णववायव्यशाक्रसौम्यैः सवारुणैः । बार्हस्पत्यैस्ततः कुर्यात्तंत्रमुत्तरसंज्ञकं ॥ दैवज्ञः प्रयतः कुर्याद्देवतानां विसर्जनं । अन्नेन ब्राह्मणान्भोज्य ततो दद्याच्च दक्षिणां ॥ इति घृतकंबलविधिः ॥ ॥ अथशांतिस्नानं । अग्निपुराणे । सर्वार्थसाधनं स्नानं वक्ष्ये शांतिकरं शृणु । स्नापयेच्च सरित्तीरे ग्रहाविष्टं विचक्षणः ॥ देवालये ज्वरात्र्यादौ विनायकग्रहार्दिते । त्रिधातीर्थे ह्रदे गेहे जयकामस्य तीर्थके ॥ पद्मिन्याः स्नापयेत्क्षीरे गर्भो यस्या विपद्यते । अशोकसंनिधौ प्राप्य जातो यस्या विनश्यति ॥ पुष्पार्थिनी च पुष्पाढ्ये पुत्रिणी चैव सागरे । गेहे सौभाग्यरूपा या सर्वेषां विष्णुसंनिधौ ॥ विष्णुवृक्षे रेवतीपुष्ये सर्वेषां स्नानमुत्तमं । स्नानकामस्य सप्ताहं पूर्वमुत्सादनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणु ॥ पुनर्नवां रोचनां च शताह्वामरुणां त्वचं । मधूकं रजनी द्वे च तगरं नागकेसरं ॥ असुरां चैव मंजिष्ठां मांसीयवसमर्दकैः । प्रियंगुसर्ष-
पापुष्पं वचां ब्राह्मीं च कुंकुमं ॥ पंचगव्यं सक्तुमिश्रमुद्वर्त्य स्नानमाचरेत् । मंडले कर्णिकायां च विष्णुं ब्रह्माणमर्चयेत् ॥ मध्ये कामह-
रं पूर्वमत्र पूर्वादिदिक्क्रमात् । लिखेदिंद्रादिकान्देवान्सायुधांश्च सवाहनान् ॥ स्नानं मंडलकाद्दिक्षु कुर्याच्चैव विदिक्षु च । विष्णुब्रह्मे-
शशक्रादीन्सहस्राण्यपि होमयेत् ॥ एकैकस्य त्वष्टशतं समिधस्तु तिलैः सह । भद्रः सुभद्रः सिद्धार्थः वलिहा पुष्टिवर्धनः ॥ अमोघाश्चित्रभा-
नुश्च पर्जन्योऽथ सुदर्शनः । स्थापयेत्तु घटानेतान् साश्विरुद्रमरुद्गणान् ॥ विश्वेदेवास्तथादित्या वसवो मुनयस्तथा । श्राद्धेशाः संतु सुप्रीता-
स्तथाऽन्या अपि देवताः ॥ ओषधीर्निक्षिपेत्कुंभे जयंतीं विजयां जयां । शतावरीं शंखपुष्पीं विष्णुक्रांत ऽपराजिते ॥ ज्योतिष्मतीं बलां चैव
चंदनोशीरकेसरं । कस्तूरिकां च कर्पूरं वालुकं पत्रकं त्वचं ॥ जातफलं सुगंधं च मृत्तिकाः पंचगव्यकं । भद्रपीठे स्थितं मध्ये स्नापयेयु-
र्द्विजोत्तमाः ॥ राजाभिषेकमंत्रोक्तदेवानां होमकः पृथक् । पूर्णाहुतिं ततो दत्वा गुरवे दक्षिणां ददेत् ॥ इन्द्रोऽभिषिक्तो गुरुणा पुरा दैत्यान्जघान
ह । दिक्पालस्नानं कथितं संग्रामादौ जयावहं ॥ इति शांतिस्नानं ॥ ॥ अथैकवस्त्रस्नानं । वीरसिंहावलोके रुद्रयामले । शुक्रेण प्रा-
र्थितः शंभुः प्रणिपत्य जगद्गुरुः । एकवासोविधिं ब्रूहि स्वामिन्विस्तरतो मम ॥ शिव उवाच । शृणु भार्गव यत्नेन दुःखवैधव्यनाशनं । वं-
ध्यात्वं विलयं याति यस्मिन्वस्त्रविधौ कृते ॥ शिवोनामेति मंत्रेण दंपती परिधापयेत् । स्नापयेदेकवस्त्रेण भानावनुदिते सति ॥ अष्टपत्रं
लिखेत्पद्मं क्रमतः शुक्लतंडुलैः । वेदोक्तविधिना मंत्रैः सूक्तैर्वेदविधानतः ॥ पंचवक्त्रं दशभुजं त्रिनेत्रं पार्वतीपतिं । पद्ममध्ये न्यसेद्देवं शिवो-
नामेतिमंत्रतः ॥ इंद्रंविश्वेतिमंत्रेण इंद्रमाग्नेयकोणके । येचेहइतिमंत्रेण दक्षिणे दिव्यपूर्वजाः ॥ येदेवासस्तुमंत्रेण नैर्ऋत्यां सनकादयः । वरुणः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रावितामंत्रात्पश्चिमे वरुणं न्यसेत् ॥ गणानांत्वेतिमंत्रेण वायव्यां च गणेश्वरं । अभिगोत्राणिमंत्रेण उत्तरे गर्भमातरः ॥ ऐशान्यां च ग्रहान्सर्वान्स्थापयेत्स्वस्वमंत्रतः । ऋतवःस्थऋतान्मंत्रात्पूर्वस्यां विन्यसेत्स्मरं ॥ तन्मध्ये विन्यसेत्कुंभं पूरितं तीर्थवारिणा । पूर्णपात्रयुतं मध्ये सर्वौषधिसमन्वितं ॥ सहिरण्यं सवस्त्रं च नारिकेलेन संयुतं । प्रतिष्ठां च विधायादौ मंत्रैः पूजनमाचरेत् ॥ रुद्रं चैव जपेत्तत्र षडंगविधिपूर्वकं । स्त्रीपुंसाभ्यां विधातव्यं पूजनं विधिवत्ततः ॥ अभ्यर्च्य केवलं सम्यक्कृत्वा स्नानं विधानतः । नांदीमुखाभिधं श्राद्धं विधेयं विधिवत्पुनः ॥ गर्भोसीतिच मंत्रेण प्राशयेत्पिंडमध्यमं ॥ जलप्रार्थना । प्रत्यगाशापते राजन् जलानामधिप प्रभो । नष्टानष्टप्रस्रष्टा त्वं गर्भं धेहि ममेप्सितं ॥ नदीनदतडागानि कूपाद्यन्यजलाशयाः । तुभ्यं विना न शोभंते गर्भं धेहि जलेश्वर ॥ पूर्वजन्मनि यत्पापं कुसंसर्गात्स्वयं कृतं । इहापि सलिले स्थित्वा गर्भं धेहि प्रसीद मे ॥ अष्टषष्टिसुतीर्थानां नदीनामधिपो भवान् । सप्तानामपि चाब्धीनामीश गर्भं ददस्व मे ॥ त्वमेव पाशपाणिस्तु त्वमेव ह्यंभसां पतिः। आपस्तु प्राणिनां जीवो गर्भं धेहि प्रसीद मे ॥ तव हस्ते जलं वामे दक्षिणे जीवजीवनं । मस्तके च जटाः पिंगा गर्भं धेहि दयापर ॥ भूतप्रेतादिदोषाणां रोगाणामितरस्य च । अंतरायं प्रभो छित्वा गर्भं धेहि दयां कुरु ॥ ॥ अथौषधिप्रार्थना । सर्वेषां जयते भानां ग्रहाणामधिपः सदा । तव स्वामी सदा सोमो धेहि गर्भं महौषधि ॥ औदुंबरी फलवती शाखा या सर्वमंत्रवित् । ओषधयःसामित्येवं कामिन्या ह्यर्पयेद्बुधः ॥ शाखाया लवनं कार्यं हृदि चेतसि निर्मले । समालंब्य करे दूर्वां नारिकेलाक्षतानपि ॥ वरुणोपासनं कुर्यात्स्तुतिपाठपरायणः । ब्रह्मा विष्णुश्च सोमश्च कंदर्पो वृषवाहनः । पार्वती सुभगा भद्रा सावित्री वस्त्रदेवता ॥ एते हि वाससी शुभ्रे अव्यंगे गुरुदैवते । सर्वभूषणरम्ये च गर्भं धत्तां च वांछितं ॥ ॥ अथ धान्यस्नानं । मुद्गतंडुलगोधूमयवकंगुसुशालिभिः । राजमाषादिभिर्विद्वान्वंशपात्रं प्रपूरयेत् ॥ विन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य दीपकं तत्र फलानां सप्तकं तथा। धानावंतेतिमंत्रेण धान्यस्नानं तु कारयेत् ॥ ॥अथ फलस्नानं। नारिकेलं च नारिंगं दाडिमं बीजपूरकं। उत्ततीमथ पूगं च सप्तमं मदनं स्मृतं ॥ कूर्मपृष्ठमिमं पृष्ठे क्षीरनीरप्रपूरितं। त्रिनेत्रं शंभुदेवत्यं नालिकेरं सुतप्रदं ॥ पीतं कनकवर्णाभं सुबीजं सुमनोहरं। तुहिनेन समं शीतं नारंगं गर्भदं मम ॥ उद्यदर्कसमं पुष्पं फलं सिंदूरसंनिभं। बीजपूरयुतं यस्य गर्भदं दाडिमं मम ॥ फलं तच्छक्रदेवत्यं ससूत्रं सुपरिष्कृतं। सुरंगं सोमदेवत्यं गर्भदं बीजपूरकं॥ फलं तच्छक्रदेवत्यं सूत्रं वस्त्रदशोपमं। ज्ञानयोनिप्रपूर्णं तु देहि त्वं गर्भमुत्तति॥ पूगस्तु सूर्यदेवत्यो लाक्षारससमप्रभः। आर्द्रः फलानां प्रवरो गर्भं दद्यात्सदा मम॥ उत्सवेषु च सर्वेषु शुभदं सर्वदैवतं। गोरोचनसमाभासं गर्भदं मदनं फलं॥ ॥अथौषधिस्नानं। वर्धावरश्च रास्ना च एला च वचकस्तथा। धान्यं निशा बहुफला सर्वौषध्य इमाः स्मृताः॥ याओषधीरितिमंत्रेण सर्वौषध्यभिषेचनं । करेण मूर्ध्नि विन्यस्य वंशपात्रं तु भार्गव ॥ ऋग्वेदोक्तान्सप्तमंत्रांस्तत्त्वायामीतिपूर्वकान् । धीमान्प्रत्येकमुच्चार्य दंपती स्नापयेत्ततः॥ वरुणःप्रावितामंत्रं वरुणस्योत्तंभनं ततः। येतेशतमिमंमे च इदमापः पुनंतुमां॥ इमान्वै याजुषान्मंत्रान् शिरोमेइत्यनूक्तया। घृतवतीभुवनानां पावमानीः पुनःपुनः॥ साम्नोवरुणसाम्नाऽथ पावकानःसरस्वती । शंनोदेवीत्याथर्वणैर्मंत्रैः स्नानमुदाहृतं॥ ततो रुद्रजपस्नानं कर्तव्यं सुतमिच्छता। अथ भार्गव संस्थाप्य स्थंडिले पावकं शुभे॥ गृह्योक्तेन विधानेन पायसं श्रपयेच्चरुं। आधारावाज्यभागौ च दद्यात्तत्र घृताहुतीः॥ अपांपृष्ठं निहोता च पुनरस्त्वाऽथ तथा समित् । वाजःपुरस्तादग्नेत्वमादित्यंगर्भमेव च ॥ ततः सरस्वतीयोन्या तंपत्नीभिरतःपरं । अदित्यैरास्नासिमंत्रेण येनऋषयोपि च॥ गर्भोअस्योषधीनां च मंत्रांकाहुतयः क्रमात् । एभिर्मंत्रैश्चरुं हुत्वा ततः स्विष्टकृतं हुनेत्॥ ऋषभं ब्रह्मणे दद्यादाचार्ये सुरभिं तथा। इतरेभ्योपि विप्रेभ्यो दक्षिणां स्वेच्छया पुनः॥ अभिषेकं ततः कुर्यात्पवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रं कुंभवारिणा । सुरास्त्वामितिमंत्राद्यैः पवित्रैर्ब्राह्मणैस्ततः ॥ आशास्य कामदैर्मंत्रैर्गृह्णीयात्फलसप्तकं । सदीपं वंशपात्रं च नीत्वा यायाच्छि-वालयं ॥ शिवस्य पुरतो मुक्त्वा वंशपात्रं प्रणम्य च । देवदेव जगन्नाथ गौरीनाथ महेश्वर । भवेशान महादेव नमोस्तु सुतदो भव ॥ अष्टौ दोषाश्च ये स्त्रीणां नवमः पुरुषस्य च । तत्तद्दोषविनाशाय सस्त्रीकः स्नानमाचरेत् ॥ विकृतं यच्च मे देहात्संतानपरिपीडनं । तत्सर्वं वस्त्रमायातु निर्दोषा स्यां सुपुत्रिणी ॥ वरुण त्वं च भूतानामुच्यसे कारकः प्रभुः । तव तीर्थप्रभावेण संतानं कुरु मे बहु ॥ ततश्चरुपुरोडाशमाधत्तेत्यादि-नाऽऽशयेत् । गर्भं धेहि भगं देह्यायतनं पितरस्तथा ॥ ब्राह्मणान्भोजयित्वाऽथ वरं दत्वा विसर्जयेत् । इदं निर्मूलमपि गुर्जरेषु प्रचारादुक्तं ।

॥ अथ सूर्यारुणसंवादोक्तमेकवस्त्रस्नानं । अरुण उवाच । यत्त्वया कथितं स्वामिन्नेकवस्त्राभिषेचनं । दंपत्योरानपत्यादिदौर्भाग्यशमनं परं ॥ विधिं तस्याखिलं ब्रूहि यथाश्रुतिनिरूपितं । देवता का च के मंत्राः को विधिः किं फलं ततः ॥ कीदृग्वस्त्रं कथं धार्यमुभाभ्यामेव तत्पुनः । तत्कृते कथमापत्यसिद्धिः स्यान्नरयोषितोः ॥ श्रीसूर्य उवाच । पुरा कल्पावसाने तु कल्पस्यास्य समुद्भवे । समारिप्सुर्यदा सृष्टिं श्रुतिश्रुतविधिर्विधिः ॥ सस्मार तनयान्सप्त मानसान् स प्रजापतिः । ते यदा तपसा क्लिष्टा न शेकुः सृष्टिसाधने ॥ शिवमाराध्य तपसा प्रसन्नं तं ययाचिरे । प्रजामेव प्रजाकामाः प्रजापतिसुतास्तु ते ॥ भगवंस्तपसा खिन्नाः प्रजाहेतोः प्रजापतेः । अकार्ष्म वचनाद्दारान्महोदारान्सुलक्ष-णान् ॥ ततोऽपि न प्रजासिद्धिरस्माकं शिव जायते । प्रजार्थं त्वां प्रपन्नाः स्मो ब्रूहि तत्सिद्धिकृद्विधिं ॥ प्रार्थितस्तैस्ततः शंभुः क्षणं ध्यात्वाऽ-ब्रवीच्च तान् । शृणुध्वं मुनयः सर्वे प्रजाया यदसंभवे ॥ कारणं मुनयः सर्वे यद्दृष्टं ज्ञानचक्षुषा । अनपत्यकरं कर्म चक्रे यत्पूर्वसंभवे ॥ का-लाद्भुक्त्वाऽवशेषं यद्दौर्भाग्यं तद्भवं तनौ । विलिप्तमनुमंत्रादिभेदभिन्नं द्वयोरपि ॥ वाससैकेन तद्देहयुगलं परिधाय च । कुरुध्वं विधिवत्स्नानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तद्दौर्भाग्यनाशनं ॥ आनखाग्राच्च केशांतं यावदंगविशुद्धिकृत् । एवमापत्यदौर्भाग्यं पंचधा यत्प्रकीर्तितं ॥ तस्य नाशाय विधिवत्सह पत्न्यैकवाससा । स्नात्वा सम्यग्विधेः पुत्राः संततेः श्रेय आप्स्यथ ॥ इत्युत्वांऽतर्हिते शंभावकुर्वन्मुनयश्च ह । यथैकवसनस्नानं विधिं तं ते वदाम्यहं ॥ यथाश्रुतं यथादृष्टं श्रुतिभ्यो ज्ञानमंडलात् । शुभे मासे सिते पक्षे सानुकूलग्रहे दिने ॥ नदनद्योः समायोगे महानद्योर्द्वयोरपि । प्रत्यूषे शुद्धिमास्थाय शरीरस्य यथाविधि ॥ विधिं विविधमाधाय पत्न्या सह ममार्हणं । विधाय श्रद्धया युक्तो मंत्रमेनमुदीरयेत् ॥ कर्मसाक्षिन् जगन्नाथ यन्मया पूर्वजन्मनि । पंचधाऽपत्यदुःखाख्यं दौर्भाग्यमतुलं महत् ॥ प्राप्तं तस्य विनाशाय विधिवद्विधिमुत्तमं । सह पत्न्या दिवानाथ तत्र सिद्धिं प्रयच्छ मे ॥ एवमुच्चार्य तद्वस्त्रमहतं द्विदशात्मकं । सार्धहस्तद्वयायामं पंचविंशत्करोन्मितं ॥ विततं तंतुभिः श्लक्ष्णैस्तन्मध्ये तद्धृतं घनैः । युवासुवासामंत्रेण मंत्रितं दैववेदिना ॥ सम्यग्दत्तं तदादाय परिदध्यात्सकच्छकं । दृढनीवी नाभिदेशे तत्र त्रिद्विगुणीकृतं ॥ तच्छेषं दाक्षिणांगस्था पत्नी सकंचुकाह्विका । परिदध्यात्प्रयत्नेन तेन संवृतमस्तका ॥ केशान्संमृज्य संगोप्य पतिपृष्ठानुयायिनी । उपविश्य जलस्याग्रे तावुभौ शुभदंपती ॥ प्रक्षाल्य पाणिपादौ च स्वाचांतौ मम संमुखौ । कुशपुष्पफलस्वर्णतोयपूर्णांजली स्थितौ ॥ दैवज्ञेनोदितान्मंत्रान् शृण्वानौ सलिलोन्मुखौ । वैदिकाँल्लौकिकांश्चापि सावधानौ जितेंद्रियौ ॥ आपस्त्वमासि सर्वेषां देवानामग्रणीः प्रभो । जीवनं सर्वजंतूनां गर्भं धेहि मम प्रभो ॥ यानि यानीह पापानि अनपत्यकराणि नौ । हत्वा तान्यखिलानीश गर्भं धेहि०॥ यदावाभ्यां महत्पापं पुराजन्मनि दुःखकृत् । कृतं तन्नौ विनिर्धूय गर्भं०॥ त्वयैवाधिष्ठिताः सर्वे नदीनदजलाशयाः । पुनंति पापिनः सर्वान्गर्भं०॥ यानि यानीह तीर्थानि येच येच जलाशयाः । त्वयैव पावितास्तस्माद्गर्भं०॥त्वमावाभ्यां प्रपन्नाभ्यां शरणं दुःखशांतये । प्रार्थितः परमेशान गर्भं०॥आशास्महे महाभाग संततिं लोकपावनीं । प्रसन्नाद्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतः स्वामिन्गर्भं० ॥ भूतप्रेतपिशाचाद्या ये नौ संततिघातकाः । पाशेनायम्य तान्सर्वान्गर्भं० ॥ सप्तैते तांत्रिका मंत्राश्छांदसाः पंच वारुणाः । त्वंनःप्रभृति यौ द्वौ च वारुणावपरावपि ॥ त्वंनोअग्ने सत्वंनोअग्ने द्वौ॥इमंमेवरुणेति द्वावर्घ्यं दत्वा समं तु तैः । इमंमे तत्त्वायामि द्वौ । एवं तज्जलमामंत्र्य स्तुत्वा मंत्रैः प्रणम्य च ॥ निमज्ज्योन्मज्ज्य च पुनस्तत्र स्नानं समाचरेत् । प्रयोगं विधिवत्कृत्वा पुत्रकामसमृद्धये ॥ स्नास्यावहे स भगवान्प्रचेता नौ प्रसीदतु । स्नायीयातां ततः स्नानमंत्रैर्द्रव्याभिमंत्रितैः ॥ मृत्स्नागोमयगोमूत्रैर्द्रव्यैर्दधिपयोघृतैः । तिलामलकपिष्टैश्च सर्वौषधिकुशोदकैः ॥ निर्वर्त्य विधिवत्स्नानं दंपती तावुभावपि । स्नायीतैव ततः पत्नी एकैकद्रव्यसंचयैः ॥ औदुंबरीं बहुफलां बिभ्रती निजमूर्धनि । मंत्रपूर्वं स्वपतिना दत्तां शाखां स्रजान्वितां ॥ सप्तौषध्यंबुसंपूर्णैः कलशैरथ सप्तभिः । मंत्रपूतैः स दैवज्ञः स्नापयेत्तां विधानतः॥व॰ रकश्च रास्ना च सहदेवी शतावरी । वचैला लक्ष्मणा चेति सप्तौषध्योऽभिषेचने ॥ याओषध्यनुवाकेन सप्तौषध्यभिषेचनं । ततस्तु वैणवं पात्रं सप्तधान्योपसंभृतं ॥ मुद्गतंडुलगोधूमयवशालिसमन्वितैः । कंगुभिः सह माषैश्च धान्यैरपि च सप्तभिः॥ फलानि विन्यसेत्तत्र याःफलिनीरितिमंत्रतः । नालिकेरं च नारिंगं दाडिमं वीजपूरकं ॥ उत्ततीमथ पूगं च जंबीरं चात्र सप्तमं । पूर्वोक्तैर्लौकिकैर्मंत्रैर्वैदिकैश्चापि सप्तभिः ॥ शिरोमेत्यनुवाकेन स्नानं दौर्भाग्यनाशनं । समाप्य विधिवत्पश्चान्मंत्रमेनमुदीरयेत् ॥ शिशुमृत्युकरं यन्मे दौर्भाग्यं प्रागुपस्थितं । पादांगुष्ठनखाग्राद्यदाकेशांतमुदित्वरं ॥ स्नानेनानेन मे देवस्तत्सर्वमपमृज्यतु । इति विज्ञाप्य वरुणं मां च कर्मादिसाक्षिणं ॥ एकचित्तः स्मरेद्देवमुमया सहितं शिवं । ततस्तु तर्पयेद्देवान्मनुष्यान्सह पूर्वजैः ॥ नांदीमुखेन विधिना संतर्प्य पितृदेवताः । विश्वाडित्यनुवाकेन फलपुष्पाक्षतांजलिः॥ उपस्थाय ततः पश्चात्कर्मशेषं समापयेत् । ततस्तद्वैणवं पात्रं शिरस्याधाय योषितः ॥ कुशाग्रेण समालभ्य पठेन्मंत्रान्सुशांतिकान् । स्वस्त्ययनानि सूक्तानि दंपती तौ ज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाद्बहिः ॥ सुस्नाप्य प्राङ्मुखस्तिष्ठेन्मंत्रं सुश्रावयेदिति । इमागिरआदित्येभ्यो मंत्रद्वयमिदं शुभं ॥ श्रावयन्भुवि विन्यस्य पात्रं तत्प्रणमेच्च मां । ततोऽन्ये वाससी शुभ्रे शुचिनी परिधाय तौ ॥ उपविश्यासने शुभ्रे पुष्पस्रक्चंदनार्चितौ । ततः सकनकं सर्पिः स्पृशेतां सुरभीं द्विजान् ॥ प्रणिपत्य ततः शेषं कर्म सर्वं समाचरेत् । आचार्यः स्वविधानेन दैवज्ञेनानुमोदितः ॥ हस्तमात्रे ततस्तत्र स्थंडिलेऽष्टांगुलोच्छ्रये । स्थापये-द्विधिवद्वह्निं निजशाखाविधानतः ॥ पायसं निर्वपेत्तत्र वैधेयं विधिवत्ततः। तस्मादैशानभागे तु स्थंडिले कलशं न्यसेत् ॥ अव्रणं पयसा पूर्णं स्वर्णपुष्पौषधीयुतं । पूर्णपात्रं न्यसेत्तत्र पूर्णं पुष्पफलाक्षतैः ॥ स्वस्वमंत्रैः प्रतिष्ठाप्य महेशमुमया सह । तस्याग्रे प्रजपेयुस्ते ब्राह्मणा मंत्रको-विदाः ॥ पंचांगान्विधिवन्मंत्रान् रुद्रसूक्तैस्तु याजुषैः। उद्वास्याथ चरुं सम्यगाचार्यश्च विधानतः ॥ आघारावाज्यभागौ च हुत्वावाह्य विभाव-सुं ॥ दिक्पतीन्परितः पूज्य स्वस्वमंत्रैः समाहितः ॥ प्रजापते तथाग्नेर्यी गर्भंधेहीति चाऽपरां। अपांपृष्ठं तथा होता इमंमे सप्त वारुणं ॥ ततः स्विष्टकृतं कुर्यात्कर्मशेषं समापयेत् । होमांते शिवमभ्यर्च्य सशिवं विधिपूर्वकं॥(शिवया पार्वत्या सहितं) जपं होमं निवेद्यास्मै विधिवद्विधिकोविदः। ततो विप्राय विदुषे सुशांतां सुपयस्विनीं ॥ वस्त्रस्रग्दक्षिणोपेतां सवत्सां धेनुमुत्तमां । तथाऽलंकृतसर्वांगं वृषभं शुभलक्षणं ॥ दत्वा तौ दंपती पश्चादैवज्ञे-नानुमोदितौ । मंत्रमुचारयेयातां विधिवद्विहिताईणौ ॥ देवदेव जगन्नाथ सर्वपापौघनाशन । कर्मणाऽनेन दानेन तथा गोयुगलस्य च ॥ संतु-ष्टः शंकरो भूत्वा संततिं देहि नौ प्रभो । ततस्तु वैणवं पात्रं शिवस्याग्रे निवेदयेत् ॥ आचार्याय प्रदेयानि दानानि निजशक्तितः । गुरवे वा-ससी दत्वा कर्मशेषं समापयेत् ॥ प्रणम्य देवतास्ताश्च विसृज्य च विधानतः । ततः कुंभांभसा विप्रा अभिषिंचेयुरादृताः ॥ मंत्रैश्च वारुणैः सौरैः शांतिस्वस्त्ययनादिभिः । पौराणैरागमोक्तैस्तु नानाफलविधायिभिः ॥ नांदीमुखेन विधिना ततः श्राद्धं समारभेत् । नमोवइति मंत्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमस्कृत्य मुहुर्मुहुः ॥ मध्यमं पिंडमश्नाति पत्नी दैवज्ञनोदिता । आधत्तपितरोगर्भमितिमंत्रेण मंत्रितं ॥ आचम्य विधिवत्पश्चात्कर्मशेषं समापयेत् । शतं च भोजयेदन्यान्द्विजान्संतोष्य शक्तितः ॥ कृतकृत्यौ च तौ स्यातां पुत्रपौत्रसुखान्वितौ । इत्येकवस्त्रस्नानं ॥ ॥ अथाऽकाले गजमदशांतिः । अद्भुतसागरे गर्गः । ऊर्ध्वं विंशतिवर्षात्तु मदो भवति वारणे । तदर्वाग्यदि माद्येत स्वामिनो मरणं दिशेत् ॥ कारयेत्तत्र शांतिं च ब्राह्मणांश्चापि तर्पयेत् । एकरात्रोषितः स्नात्वा प्रियः प्रयतमानसः ॥ अष्टोत्तरसहस्रं तु मंत्रं चापि जपेच्छुचिः । ततः प्रजप्तमंत्रैस्तु सलिलं चाभिमंत्रयेत् ॥ गजानां गजतत्वज्ञः सर्वदोषहरं शुभं ॥ गजस्नानं प्रकुर्वीत तद्दिने तूर्यनिःस्वनैः ॥ पूर्वाह्णे चाग्निकार्यं तु कृत्वा कुंभशतेन हि । ततो होमं प्रकुर्वीत विधिदृष्टेन होमवित् ॥ अग्नयेस्वाहा । रुद्राय० गणपतये० वरुणाय० बृहस्पतये० शुक्राय० इंद्रायेति । स्नानं कुंभशतेनेह सर्वोपद्रवनाशनं । द्विजपूजनपूर्वं स्यात्सलिलं गुडमिश्रितं ततः कृत्वा । यवयावकसंयुक्तं पिंडं मधुनाऽथ धूपयेद्बहुशः॥ कृतपूजासंस्कारं गणाधिपं वंदयेत्तूर्णं ॥ नैवेद्यमंत्रस्तु । ईश्वरस्य महः सांध्यमुमाललाटसंभवं । इदं कृतोपनीतं तु नैवेद्यं भक्षयस्व नः ॥ इति गजमदशांतिः ॥ ॥ अथ गोकरिणीशांतिः । तत्रैव राजपुत्रः । मदं यदा तु सुरभी विसृजेत्सूतिमेव च । पुरे राष्ट्रे वने वापि गृहे वा हस्तिनी यदि ॥ मत्ता मूत्रपुरीषाणि यदा संप्राप्य तिष्ठति । मत्तया भज्यते युद्धे हस्तिन्या यदि वारणः ॥ महद्भयं भवेत्तत्र देशस्य नगरस्य च । उपोष्य बांधवैस्तत्र सामात्यः सपुरोहितः ॥ हस्तिवत्कल्पितां धेनुं विषाणाभ्यां च योजितां । अथैनां हस्तिनीं नीत्वा शत्रुराष्ट्रे विमोक्षयेत् ॥ इत्येवमेतां कुर्वीत रात्रौ वननिवासिनीं । अथवा पूर्ववत्कृत्वा शांतिं कृत्वा वने ह्ययं । सुवर्णेन सुतप्तेन वनमेव विधारयेत् ॥ इतिगोकरिणीमदशांतिः ॥ ॥ अथ पंचकमृतौ शांतिः । मदनरत्ने गारुडे । आदौ कृत्वा धनिष्ठार्धमेतन्नक्षत्रपंचकं । रेवत्यंतं सदा दूष्यम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभं दाहकर्मणि ॥ शवस्य च समीपे तु क्षेसव्याः पुत्तलास्तदा । दर्भमयास्तु चत्वार ऋक्षमंत्राभिमंत्रिताः ॥ ततो दाहः प्रकर्तव्यस्तैश्च पुत्तलकैः सह । सूतकांते ततः पुत्रैः कार्यं शांतिकपौष्टिकं ॥ पंचकेषु मृतो यो वै न गतिं लभते नरः । तिलांश्चैव हिरण्यं च तमुद्दिश्य घृतं दहेत् ॥ क्रियानिबंधे । भाजनोपानहौ छत्रं हेममुद्रा च वाससी । दक्षिणा दीयते विप्रे सर्वपातकमोचनी ॥ मदनरत्ने गार्ग्यः । यदि भद्रातिथीनां स्याद्वानुभौमशनैश्चरैः । त्रिपादृक्षैश्च संयोगो ह्ययोर्योगे द्विपुष्करः ॥ द्वित्रिपुष्करयोगे तु मृतिर्मृत्यंतरावहा । (अन्यमृतिप्रदेत्यर्थः) दहने मरणे चैव त्रिगुणं स्यात्त्रिपुष्करे ॥ (त्रिगुणिताशुभकारकं स्यात् । त्रयाणां मृतिप्रदमिति यावत्) खनने ऽप्येवमेव स्यादेतद्दोषोपशांतये । तिलपिष्टैर्यवैर्वाऽपि शरीरं कारयेत्ततः ॥ शूर्पे निधायालंकृत्य दाहयेत्प्रेतकोपरि ॥ बौधायनः । अस्मात्त्वमितिमंत्रेण तिलपिष्टं प्रदापयेत् । द्वित्रिपुष्करयोर्दोषं त्रिभिः कृच्छ्रैर्व्यपोहति ॥ वासवे मरणं चेत्स्याद्गृहे वाऽपि पितुर्मृतिः । सुवर्णं दक्षिणां दद्यात्कृष्णवस्त्रमथापि वा ॥ वासवं धनिष्ठा । ब्राह्मे । कुंभमीनस्थिते चंद्रे मरणं यस्य जायते । न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत् ॥ न तस्य दाहः कर्तव्यो विनाशात्स्वेषु जंतुषु । अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकं ॥ धनिष्ठापंचके जीवो मृतो यदि कथंचन । त्रिपुष्करे याम्यभे वा कुलजान्मारयेद्ध्रुवं ॥ तत्रारिष्टविनाशार्थं विधानं समुदीर्यते । दर्भाणां प्रतिमाः कार्याः पंचोर्णासूत्रवेष्टिताः ॥ यवपिष्टेनाऽनुलिप्ताः ताभिः सह शवं दहेत् । प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ॥ प्रेतहर्ता पंचमस्तु नामान्येतान्यनुक्रमात् । अत्र प्रतिमाः संपूज्य शिरोनेत्रवामकुक्षिनाभिपादेषु क्रमेण न्यस्य तन्नामभिर्घृतं हुत्वा यमायसोमं त्र्यंबकमितिमंत्राभ्यां प्रत्येकं तास्वाज्यं हुनेदिति भट्टाः । सूतकांते ततः पुत्रः कुर्याच्छांतिकपौष्टिकं । कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजातये ॥ ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतये ततः । माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति ॥ स्वर्णदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रजाप्यं लक्षहोमं द्विजार्चनं। गोभूदानं षडेतानि कुर्याद्दोषोपशांतये॥ अपरार्के स्मृत्यंतरे। धनिष्ठापंचकमृते पंचरत्नानि तन्मुखे। प्रास्याहुतित्रयं तत्र हुनेद्दहवपामिति॥ ततो निर्हरणं कुर्यादेष साग्नेर्विधिः स्मृतः। इतरं निखनेदेव जले वा प्रतिपादयेत्॥ त्रिपाद्दक्षमृते तद्वद्धिरण्यशकलं मुखे। तस्य पिष्टमयं कुर्यात्पुरुषत्रितयं ततः॥ होमं प्रतिमुखं कुर्यात्तथा वहवपामिति। कार्ष्णायसं च कार्पासं कुसुमं प्रतिपाद्य च। निर्याल्य साग्निं संस्कुर्याद्धुव्यग्नौ वाऽन्यमुत्सृजेत्। तत्रैव। कनकं हीरकं नीलं पद्मरागं च मौक्तिकं। पंचरत्नमिदं प्रोक्तमृषिभिः पूर्वदर्शिभिः॥ रत्नानामप्यभावे तु स्वर्णं कर्षार्धमेव वा। सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः। मदनरत्नेऽप्येवं। तथा। एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकं। नवषट्त्रिपलं वापि दद्याद्विप्राय शक्तितः॥ अन्यत्राऽपि। स्वगृह्योक्तविधानेन कृत्वाऽग्नेः स्थापनं ततः। अन्वाधानं निर्वपणं देवतानां तथाहुतीः॥ यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात्॥ विधिना श्रपणं कुर्यादेकैकामाहुतिं हुनेत्। कृष्णां गां कृष्णवस्त्रां च हेमनिष्कसमन्वितां। दद्याद्विप्राय शांताय प्रीतो भवतु मे यमः। त्रिपादर्क्षेऽप्येतदेव। अपरार्के। पुनर्वसूत्तराषाढा कृत्तिकोत्तरफल्गुनी। पूर्वाभाद्रा विशाखा च ज्ञेयमेतत्त्रिपादभं॥ ब्रह्मचारिमरणे कुष्ठिमरणे गर्भिणीरजस्वलासूतिकामरणे विधिरन्यश्च विशेषो मत्कृते निर्णयसिंधौ ज्ञेयः।

"ध० सिं० पंचकं नाम धनिष्ठोत्तरार्धमारभ्य रेवत्यंतं सार्धनक्षत्रचतुष्टयं। तत्र दाहनिषेधात् दर्भमयपुत्तलैर्यवपिष्टानुलिप्तैः पंचोर्णासूत्रवेष्टितैः सह शवं दहेत्। तत्र तिथ्यादि संकीर्त्य अमुकस्य धनिष्ठापंचकादिमरणसूचितवंशारिष्टविनाशार्थं पंचकविधिं करिष्ये इति संकल्प्योक्तविधाः प्रतिमा नक्षत्रमंत्रैरभिमंत्र्य गंधपुष्पैः संपूज्य दाहसमये प्रेतोपरि न्यसेत्। प्रथमां शिरसि। द्वितीयां नेत्रयोः। तृतीयां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वामकुक्षौ । चतुर्थीं नाभौ । पंचमीं पादयोः । तदुपरि नाममंत्रैर्धृताहुतीर्जुहुयात् । तत्र नामानि क्रमेण । प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः प्रेतहर्ता चेति । तत उदकं दत्वा यमायसोमं त्र्यंबकमितिमंत्राभ्यां प्रत्येकं प्रतिमास्वाज्याहुतीर्जुहुयात् । ततः प्रेतमुखे पंचरत्नं दत्वा पुत्तलैः सह प्रेतं दहेत् । सूतकांते तिलहेमघृतानि दत्वा कांस्यपात्रे तैलं प्रक्षिप्य तत्रात्मप्रतिबिंबं वीक्ष्य विप्राय दद्यात् । शांतिं च कुर्यात् । अत्रायं विशेषः । नक्षत्रांतरे मृतस्य पंचके दाहप्राप्तौ पुत्तलविधिरेव । न शांतिकं । पंचकमृतस्याश्विन्यां दाहप्राप्तौ शांतिकमेव । न पुत्तलविधिः । शांतिश्च लक्षहोमरुद्रजपान्यतररूपा यथाविभवं कार्या । अथवा कुंभे यमप्रतिमां संपूज्य स्वगृह्योक्तविधिना अग्निप्रतिष्ठापनान्वाधानादिचरुश्रपणांतं कृत्वाज्यभागांते नामभिश्चतुर्दश चर्वाहुतीर्जुहुयात् । यमायस्वाहा । धर्मराजाय० । मृत्यवे० । अंतकाय० । वैवस्वताय० । कालाय० । सर्वभूतक्षयाय० । औदुंबराय० । दध्नाय० । नीलाय० । परमेष्ठिने० । वृकोदराय० । चित्राय० । चित्रगुप्ताय० । एवं हुत्वा होमशेषं समाप्य कृष्णां गां कृष्णवस्त्रां च हेमनिष्कसमन्वितां । दद्याद्विप्राय शांताय यमो मे प्रीयतामिति ॥ त्रिपादर्क्षेऽप्येतदेव शांतिकं । त्रिपुष्करयोगे द्विपुष्करयोगे च मृतौ कृच्छ्रत्रयं प्रायश्चित्तं कृत्वा यवपिष्टमयपुरुषत्रयेण सह प्रेतदाहः । पुरुषत्रयस्य प्रेते न्यास आज्याहुतयश्च पूर्ववत् । कनकहीरकनीलपद्मरागमौक्तिकमिति पंचरत्नस्य मुखे प्रक्षेपोऽपि । रत्नाभावे कर्षार्धं स्वर्णं । स्वर्णाभावे घृतं । एवं पूर्वत्रापि । दहने मरणे त्रिद्विपुष्करे त्रिगुणं फलं । द्विगुणं खननेऽप्येवमेतद्दोषोपशांतये ॥ सुवर्णं दक्षिणां दद्यात्कृष्णवस्त्रमथापि वा । शांतिं कुर्यात्सूतकांते पूर्वोक्तां तेन मंगलं" इति पंचकमृतौ शांतिः ॥ ॥ अथ तडागादौ मृतिदोषे जलशुद्धिः । नदीनदसमुद्रेषु मृतिदोषो न विद्यते । वापीकूपतडागेषु मृतेषु शुद्धिरिष्यते ॥ सूतकानंतरं शुद्धिः शौनकेन ह्युदीरिता । उद्धरेच्छतसाहस्रं तदर्धार्धमथापि वा ॥ अष्टोत्तरसहस्रं वा कलशैर्जल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुद्धरेत्। मृततारतम्येन ब्राह्मणादिवर्णभेदेन गवादिपशुभेदेन च कलशोद्धारणं। प्रयोगं विधिवत्कृत्वा जातदोषपुरःसरं॥ जलदेवार्चनं कार्यं मंडले भद्रसंज्ञके॥ जलदेवो वरुणः। लोकपालग्रहांश्चैव स्थापयेत्तु यथाक्रमं। सदीपं च बलिं दद्याद्देवताभ्यो यथाविधि॥ एवं पूजा वियातव्या ततो होमं समारभेत्। लोकपालग्रहादिभ्यो जलाधिपतये तथा॥ अष्टोत्तरशतं चैव प्रत्येकं तिलसर्पिषा। जलशुद्धिं ततः कुर्याद्ब्रह्मकूर्चपुरःसरं॥ मृत्तिकाभिश्च तोयैश्च तिलामलकभस्मभिः। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥ राजद्वाराच्चतुष्पथादिति मृदः। नदीसमुद्रगंगादिजीर्णकूपप्रस्रवणोदकैः कुंडभस्मतिलामलकशंखोदकविष्णुपादोदकैर्जलावगाहनं। पावमानीभिः प्रायश्चित्तसूक्तैः। पौरुषं पावमानं नतमंहोइति च सूक्तत्रयं जपेत्। अन्यान्यपि वारुणानि जप्त्वा जलमवगाह्य शांतिं पठेत्। कस्यनूनमित्यादि। स्वस्तिवाचनपूर्वं तु होमशेषं समापयेत्॥ अभिषेकं ततः कृत्वा ब्राह्मणान्भोजयेदथ। दक्षिणाभिश्च संतोष्य जलशुद्धिर्भवेद्ध्रुवं॥ इति जलशुद्धिः॥

॥ अथ मृत्युंजयवियानं वसिष्ठकल्पोक्तं संक्षेपेणोच्यते। त्र्यंबकस्य विधानं तु कीर्तयिष्ये मुनीश्वराः। यथोक्तविधिना युक्तं संस्मृतं ब्रह्मणा पुरा॥ मृत्युंजयस्त्रिधा प्रोक्त आद्यो मृत्युंजयः स्मृतः। मृतसंजीवनी चैव महामृत्युंजयस्ततः॥ मृत्युंजयः केवलः स्यात्पुटितो व्यात्द्दतित्रयैः। (अनुलोमप्रतिलोमभूतैः) तारं त्रिवीजं व्यात्द्दत्यः पुटितो मृतजीवनी॥ (तारं प्रणवः। त्रिबीजं हौं जूं सः। व्यात्द्दतयश्च। एतैरनुलोमप्रतिलोमैः संपुटितः) तारं त्रिवीजं व्यात्द्दत्यः पुटितस्तैस्त्रियंबकः। महामृत्युंजयः प्रोक्तः सर्वमंत्रविशारदैः॥ मृतसंजीवनी तारं त्रिबीजव्यात्द्दतीः पुरा। ततस्त्रैयंबको मंत्रः पुनरंते तथोच्चरेत्॥ मृत्युंजयोऽयमेवात्र कथितो मंत्रवित्तमैः। माया तारादिका चैव व्यात्द्दतित्रितयं ततः॥ पुटितस्त्र्यंबकमनुर्मृतसंजीवनी मता। त्रिवीजो यस्तु मंत्रो वै महामृत्युंजयः स्मृतः॥ त्रिवीजं व्यात्द्दतीश्चैव प्रणवाद्याः पठेत्पुरा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्च त्र्यंबकमनुरंते व्याहृतयश्च ताः ॥ त्रिबीजप्रणवांते च वह्निजायामथोच्चरेत् । प्रणवांते प्रसादश्च मृतिहारक एव च [तारकं] ॥ भूरादिव्याहृतयश्च त्र्यंबकेति च ऋक् ततः । विपर्ययेण त्रिबीजं तद्वच्च व्याहृतित्रयं ॥ स्वाहांतो मनुरेषोऽत्र शुक्रेणाराधितः पुरा । महामृत्युंजय इति विश्रुतो भुवनत्रये ॥ ओंकारैः संयुतः षड्भिश्चतुर्दशभिरेव वा । मृत्युंजयं तं विधिवदुपास्येप्सितमाप्नुयात् ॥ तथा । विभक्तैर्मंत्रवर्णैर्वा षडंगानां प्रकल्पना । हृदयं त्रिभिराख्यातं चतुर्भिः शिर उच्यते ॥ शिखाऽष्टाभिः समुद्दिष्टा नवभिः कवचं मतं । पंचभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतं ॥ पूर्वपश्चिमयाम्येंदुवक्त्रेषु तदनंतरं । पूर्णमंत्रं न्यसेदूर्ध्वमुखे त्र्यंबकसंज्ञितं ॥ शिरोगलास्याक्षियुगनाभिहृत्पृष्ठकुक्षिषु । लिंगपायूरुमूलांत्रजानुयुग्मे ततः परं ॥ तद्वृत्तयुग्मे स्तनयोः पार्श्वयोः पादयोः पुनः । पाण्योर्नासिकयोः शीर्षे मंत्रवर्णान्न्यसेत्क्रमात् ॥ पदान्येकादश न्यस्य शिरोभ्रूयुगलाक्षिषु । वक्त्रे गंडयुगे भूयो हृदये जठरे पुनः ॥ गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् । एतत्प्रयोगे व्यक्तीभविष्यति । आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतीश्च प्रोच्चार्य त्र्यंबकं यो जपति मृतिहरं भूय एवैतदाद्यं । कृत्वा न्यासं षडंगं स्रवदमृतकरं मंडलांतः प्रविष्टं ध्यात्वा योगीशरुद्रं स जयति मरणं शुक्रविद्याप्रसादात् ॥ वेदादिभूरादिपदत्रयं च मध्ये जपेन्मृत्युहरं त्रियंबकं । जपेत्फलार्थी विधिवत्प्रयुक्तं प्रासादमृत्युंजयसंपुटेन ॥ ओंकारत्रितयाद्यश्च ओंकारत्रितयांतकः । व्याहृतित्रितयं चैव प्रासादत्रितयं तथा ॥ ओंकारैर्मनुसंख्याकैर्जानीयात्सर्वसिद्धये । महामृत्युंजयश्चैव मृत्युंजयस्त्रियंबकः ॥ त्रैयंबकमनुर्युक्तः पूर्वं चांते द्वयेन च । महामृत्युंजयो लोके शुक्राख्यामाप तां ध्रुवं ॥ बीजं विना च शुद्धस्तु मृत्युंजयसमाख्यकः । महामृत्युंजयस्त्वन्य इति विद्यात्रिधा ह्यमुं ॥ तथाऽन्यत्र । चतुर्दशस्वरो युक्तो हकारेण च बिंदुना । प्रासादाख्यं भवेद्बीजं सुप्रसन्नकरं महत् ॥ षष्ठः स्वरश्च संयुक्तो जकारेण च बिंदुना । मृत्युंजयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाख्यातं बीजं मृत्युहरं परं ॥ सविसर्गः सकारश्च तारकं परिकीर्तितं । तारं स्थिरं सकर्णेंदु भृगुः सर्गसमन्वितः ॥ अक्षरात्मा निगदितो मंत्रो मृत्युंजयात्मकः ॥ वसिष्ठकल्पे । कुंडस्य पूर्वदिग्भागे काली जिह्वा प्रकीर्तिता । आग्नेय्यां तु कराली स्याद्दक्षिणे तु सुलोहिता ॥ मनोजया तु नैर्ऋत्यां धूम्रवर्णा तु वारुणे । स्फुलिंगिनी तु वायव्यां सौम्ये विश्वरुचिस्तथा ॥ काल्यां कराल्यां वा कुर्याच्छांतिकं पौष्टिकं तथा । भूतप्रेतपिशाचादिशांतिर्लोहितजिह्वया ॥ मनोजयायां जिह्वायामभिचारो विधीयते । जुहुयाद्धूम्रवर्णायां वृष्टिकामो यदा भवेत् ॥ स्फुलिंगिनी तु या जिह्वा तस्यामुच्चाटनं विदुः । या तु विश्वरुचिर्जिह्वा कुंडस्योत्तरभागतः ॥ सर्वार्थसाधिका सेति प्रोच्यते मंत्रवित्तमैः । अपरे वसुधारेति जिह्वां पूर्वोत्तरे विदुः ॥ (पूर्वोत्तरे ऐशान्यां) कुंडेषु मध्यमं भागमग्नेरास्यं प्रचक्षते ॥ तस्मिन्सर्वाणि कार्याणि कारयेन्मारणं विना ॥ औपसनाग्निमानीय तस्मिन्कुंडे विनिक्षिपेत् । अथवा श्रोत्रियागारान्माथितं वा समानयेत् ॥ अर्चयेल्लोकपालांश्च प्रागारभ्य प्रदक्षिणं । कुंडे कृत्वाऽऽज्यभागांतं सर्वमुल्लेखनादिकं ॥ स्वगृह्योक्तविधानेन पायसेन तु होमयेत् । आयुष्कामो घृतेनाग्नौ जुहुयाल्लक्षसंख्यया ॥ अयुतं वा सहस्रं वा शतमष्टोत्तरं तु वा । दूर्वात्रिकैर्वा जुहुयान्मधुरत्रयसंयुतैः ॥ (मधुरत्रयं घृतमधुशर्कराः) गुडूचीखंडकैर्वापि चतुरंगुलमायतैः । अथवा जुहुयाद्विद्वान्मिश्रितैस्तिलतंडुलैः ॥ प्रक्षालितैस्तिलैर्वापि जुहुयाद्गोघृताप्लुतैः । पलाशसमिधो हुत्वा सर्वमायुरवाप्नुयात् ॥ अथवा गोघृताक्तेन पायसेनैव होमयेत् ॥ अथवा तर्पयेद्देवमुदकेन समाहितः ॥ आसीनः प्राङ्मुखो भूत्वाजपेद्दा पूर्वसंख्यया । ब्राह्मणान्भोजयेन्नित्यं वेदवेदांगपारगान् ॥ आरोग्यकामो जुहुयादर्ककाष्ठैर्घृताप्लुतैः । पयसा वापि जुहुयाद्द्रव्येनाज्येन वा पुनः ॥ पलाशसमिधो वापि सर्वरोगप्रशांतये । एवं रोगप्रशांतिः स्याद्रोगाणां चाप्यनुद्भवः ॥ अच्छिद्रैराम्रपर्णैस्तु पयोऽक्तैर्जुहुयाज्ज्वरे । गुडूचीखंडकैर्वापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खादिरैर्वा घृतप्लुतैः ॥ प्रमेहे मधुना होमः पयसा वा घृतेन वा । औदुंबरसमिद्भिर्वा होम आमलकेन वा ॥ गुल्मे शाल्मलिहोमः स्यात्तिलैः कृष्णैर्घृतेन वा । वर्धमानसमिद्धोमः सद्यः शूलहरो भवेत् ॥ करंजसमिधो वापि निर्गुंडीसमिधोऽपि वा । तैलेनाभ्यज्य जुहुयाद्वातरोगप्रशांतये ॥ शमीसमिद्भिर्जुहुयादतिसारप्रशांतये । शांत्यर्थमक्षिरोगस्य पलाशसमिधः स्मृताः ॥ उन्मत्तसमिधो हुत्वा अपस्मारात्प्रमुच्यते । कुबेराक्षेंद्रवल्लीभ्यां नेत्रशूलेषु होमयेत् ॥ तैलेनाभ्यज्य जुहुयाद्दस्त्रखंडैस्तथैव च । मातुलिंगगुडूचीनां होमः कामलनाशनः ॥ (कामलः कावीळइति प्रसिद्धः) मधुरत्रयहोमेन शांतिः स्याद्राजयक्ष्मणः । होमाच्च फलमूलानां गर्भरोगः प्रशाम्यति ॥ कुष्ठे मसूरिकैर्होमो मधुत्रितयसंयुतैः । छिन्नोत्पलैस्तु जुहुयात्पलाशैर्वा घृतप्लुतैः ॥ अथवा तैलसंयुक्तैर्जुहुयाद्गौरसर्षपैः । ये चान्ये मुखरोगाः स्युः शिरोरोगास्तथैव च ॥ ते सर्वे प्रशमं यांति तिलैर्होमाद् घृतप्लुतैः । औदराणां तु रोगाणां सर्वेषां शांतिमिच्छता ॥ विल्ववृक्षसमिद्धोमः कर्तव्यो द्विजसत्तम। अधःस्रावे तु जुहुयात्पद्मपत्रैर्घृतप्लुतैः ॥ दूर्वाभिर्वा पयोऽक्ताभिर्जुहुयाच्चंदनेन वा । निश्यश्वत्थसमिद्भिश्च रक्तस्रावे तु होमयेत् ॥ अथवा गोघृतेनैव रक्तातीसारशांतये । रोगेष्वन्येषु सर्वेषु कंठरोगे महोदरे ॥ त्रिभिः फलैस्तु जुहुयान्मधुक्षीरघृतप्लुतैः। मधुरत्रयहोमस्तु सर्वरोगप्रशांतिदः ॥ आयुर्वेदेषु यत्प्रोक्तं यस्य रोगस्य भेषजं । तस्य रोगस्य शांत्यर्थं तेन तेन च होमयेत् ॥ अथवाऽनेन मंत्रेण पावमानीभिरेव वा । तीर्थतोयेन देवेशमभिषिंचेत्समाहितः ॥ भूतज्वरग्रहादीनां सर्वेषामपि शांतये । अथवा तर्पणं कुर्यान्मंत्रैः पूर्वोक्तसंख्यया ॥ अथवा नियताहारो जपेन्मंत्रं समाहितः । एवं होमं द्विजः कुर्यात्तर्पणं जपमेव वा ॥ आयुरारोग्यसिद्ध्यर्थमात्मनो वा परस्य वा । एकाहं वा त्र्यहं वापि दशाहं द्वादशाहकं ॥ पक्षं मासं द्विमासं वा मासत्रयमथापि वा । अथवा चतुरो मासान् षण्मासानेकहायनं ॥ भये महति संजाते दीर्घकालं समाहितः । अल्पेऽल्पकालं कुर्वीत जपहोमादिकं त्र्यं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगकालोपयुक्तं यद्द्रव्यं शय्यासनादिकं । रोगमुक्तस्तु तत्सर्वं नोपयुंज्यात्कथंचन ॥ अपमृत्युजयोपायमहं वक्ष्याम्यतःपरं । मधुरत्रय-युक्ताभिर्दूर्वाभिर्जुहुयाद्बुधः ॥ सहस्रमयुतं वापि शतमष्टोत्तरं तु वा । श्वेतार्ककुसुमैर्वापि जुहुयाद्गोघृतेन वा ॥ अपामार्गसमिद्भिर्वा तिलैः कृष्णैर्य-वैरपि । अथवा गोघृतेनैव पयसा वाऽपि होमयेत् ॥ कपिलागोघृतं क्षीरं प्रशंसंति मनीषिणः । शनैश्चरादिनेऽश्वत्थं स्पृशन्मंत्रमिमं जपेत् ॥ साक्षान्मृतोऽपि मुक्तः स्यात्किं पुनस्त्वपमृत्युभिः । अथवा पयसा देवमभिषिच्य घृतेन वा ॥ पलाशखदिराश्वत्थसमिद्भिर्जुहुयात्तु वा । बिल्ववृक्षोद्भवैर्वापि सोऽपमृत्योर्विमुच्यते ॥ अथवा श्रपयित्वा तु चरुं रौद्रं द्विजोत्तम । अष्टोत्तरशतं हुत्वा मृत्युं जयति मानवः ॥ अथोपायां-तरं वक्ष्ये साक्षान्मृत्युनिवर्तनं । हस्तमात्रप्रमाणेन वेदिं कुर्याद्विचक्षणः ॥ तन्मध्ये स्थापयेत्कुंभं सितसूत्रेण वेष्टितं । तंडुलैर्व्रीहिभिर्वापि च-तुरस्रं समंततः ॥ वासोयुग्मेन संवेष्ट्य तीर्थतोयेन पूरितं । पल्लवान्क्षीरवृक्षाणामथवा चूतपल्लवान् ॥ प्रक्षिप्य तत्रालंकृत्य गंधमाल्याक्षतादि-भिः । तत्रावाह्य महादेवं देवदेवं त्रियंबकं ॥ पूजयेद्गंधपुष्पाद्यैस्त्र्यंबकेत्यनया ऋचा । ततोऽभिमंत्रयेत्कुंभं मंत्रेणानेन मंत्रवित् ॥ अष्टोत्तरस-हस्रं तु अभिषिंचेत्ततो नरं । प्रोक्षयेद्वाऽथ कूर्चेन राजानं तु विशेषतः ॥ नापमृत्युभयं तस्य न च व्याधिकृतं भयं । परार्थे धनलोभेन मोहादज्ञानतोऽपि वा ॥ मृत्युंजयजपं कुर्वन् स्वयं मृत्युमवाप्नुयात् । मातरं पितरं पुत्रं राजाचार्यौ विना सदा ॥ अथ रक्षाविधिं वक्ष्ये सर्वभूतभयापहं । औपासनाग्निहोत्रोत्थं गृहीत्वा भस्म वै सितं ॥ ततोऽभिमंत्र्य तद्भस्म तेनांगानि च संस्पृशेत् । अथापरं प्रवक्ष्यामि रोगमृत्युभयापहं ॥ ग्रहप्रेतोरगादिभ्यो भयं येन न जायते । यथेष्टेन सुवर्णेन कारयेदंगुलीयकं ॥ पंचलोहेन वा कुर्यात्त्रिलोहेनैव वा पुनः । ततः संपूज्य देवेशं गंधपुष्पाक्षतादिभिः ॥ त्र्यंबकेणैव मंत्रेण मनसैव समाहितः । कुंडे वा स्थंडिले वापि विधिवन्मंत्रकोविदः ॥ गोघृतेनैव जुहुयाद्ध्यात्वा देवं निरं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनं । शतं सहस्रमयुतं नियुतं वापि तत्वतः ॥ होतुश्च दक्षिणे पार्श्वे हैमे वा राजतेऽपि वा । कांस्ये वा मृन्मये वापि पात्रे न्यस्यांगुलीयकं ॥ सर्वाहुतिषु संपातं तस्मिन्नपि नयेद्बुधः । अंगुलीयं स्पृशन्मंत्रं शतमष्टोत्तरं जपेत् ॥ अंगुल्यां सर्वरक्षार्थं धारयेदंगुलीयकं । अनेनैव विधानेन सर्वान्याभरणानि च ॥ नवानि धारयेन्नित्यं जीवेद्वर्षशतं सुखी । अथ शांतिं प्रवक्ष्यामि सर्वोपद्रवनाशिनीं ॥ अद्भुतेषु च सर्वेषु दुःस्वप्नेषु द्विजोत्तम ॥ दिव्यांतरिक्षभौमानामद्भुतानां च दर्शने । प्रत्यक्षप्रतिभातेषु नानारूपेषु सर्वशः ॥ भूतप्रेतपिशाचानामावेशे शंकिते तथा । गृहमध्येऽग्निमाधाय श्रपयेत्पायसं चरुं ॥ तेनैव जुहुयादग्नौ मंत्रेणानेन संयतः । तिलौदनं वा जुहुयाच्छुद्धौदनमथापि वा ॥ अष्टोत्तरशतं मंत्री जुहुयाद्वाघृतेन वा । पलाशखदिराश्वत्थबिल्वन्यग्रोधसंभवैः ॥ अपामार्गसमिद्भिर्वा जुहुयादथवा तिलैः । अथवाऽनेन मंत्रेण कोटिहोमं तु कारयेत् ॥ गव्येन सर्पिषा विद्वान् यवव्रीहितिलैस्तु वा । अग्निमाधाय जुहुयात्समिच्चरुघृतादिकं ॥ भूतप्रेतपिशाचाश्च येचाप्यन्ये ग्रहादयः । ते सर्वे होमगंधेन धूमसंस्पर्शनेन च ॥ मंत्रस्यास्य प्रभावेण निर्गच्छंतु गृहात्ततः । अथवाऽनेन मंत्रेण पूर्णकुंभं समाहितः ॥ अभिमंत्र्य गृहं सर्वं प्रोक्षयेत्तेन वारिणा । अथ न्यासविधिं वक्ष्ये मंत्रस्यास्य महामुने ॥ अक्षराणि त्रयस्त्रिंदशस्मिन्मंत्रे तु देवता । आदावष्टौ वसून्विद्याद्रुद्रानेकादशोत्तरे ॥ ततश्च द्वादशादित्याः प्रजापतिरनंतरं । वषट्कारस्तूत्तमे तु सर्वाक्षरमयः शिवः ॥ एवमेतानि रूपाणि देवानां कथितानि वै । अक्षराणि न्यसेन्मंत्री सर्वांगेषु समाहितः ॥ मूर्धादिपंचस्थानेषु प्रथमं पंचकं न्यसेत् । दक्षिणस्य करस्यापि संधिस्थानेषु पंचसु ॥ ततः पराणि पंचैव वामहस्ते न्यसेत्ततः । ततस्तु दक्षिणे पादे संधिस्थानेषु पंचसु ॥ पराणि पंच विन्यस्य वामपादे तथा न्यसेत् । ततश्च दक्षिणे पार्श्वे वामपार्श्वे न्यसेत्क्रमात् ॥ पृष्ठे नाभौ च गुह्ये च कुक्षौ च त्रितयं न्यसेत् । भ्रूमध्ये शिरसि गले हृदये मातृका न्यसेत् ॥ एवं विन्यस्य सर्वाणि ततोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते प्रणवं जपेत् । स्वस्यांगे विन्यसेदेनं मंत्री मंत्रसमाहितः ॥ एनं द्रष्टुं न शक्तास्तु कृत्यारक्षोग्रहादयः । अथ काम्यानि कर्माणि प्रवक्ष्यामि समासतः ॥ श्रीकामो बिल्ववृक्षस्य समिद्भिरथवा फलैः ॥ पत्रैर्वाऽप्यस्य जुहुयान्महतीं श्रियमाप्नुयात् । गोकामः पयसा होमाल्लभते गां पयस्विनीं ॥ विद्यार्थी जुहुयाद्यस्तु रुद्राक्षैर्गोघृताप्लुतैः । विद्यां चायुस्तथा वित्तं लभते नाऽत्र संशयः ॥ अन्नाद्यकामो जुहुयादन्नमेव घृतप्लुतं । पलाशसमिधो हुत्वा ब्रह्मवर्चसमाप्नुयात् ॥ वृष्टिकामस्तु संपूज्य देवदेवं त्रियंबकं । अर्घ्यपाद्यादिभिर्देवं गोशृंगैरभिषेचयेत् ॥ आपोहिष्ठेतितिसृभिर्हिरण्यवर्णादिभिस्तथा । पवमानानुवाकेन त्र्यंबकेत्यनया ऋचा ॥ गंधपुष्पं तथा धूपं हविश्चैव निवेदयेत् । एवं संपूज्य देवेशं प्रणिपत्य प्रसाद्य च ॥ वैतसीभिः समिद्भिस्तु जुहुयात्पयसा प्लुतैः । अयुतं वा सहस्रं वा जुहुयात्पयसाऽपि वा ॥ पुण्याहं वाचयेच्चैव ब्राह्मणान्भोजयेत्ततः । दशाहाभ्यंतरे वृष्टिर्भवत्येव न संशयः ॥ वृष्टिकामश्चार्द्रवासा बृहद्घटसमुद्भवैः । समिद्भिर्जुहुयान्मंत्री सद्यो वृष्टिमवाप्नुयात् ॥ नाभिदघ्ने जले स्थित्वा ध्यायन्वै पुष्टिवर्धनं । जपेत्त्रैयंबकं मंत्रं महतीं वृष्टिमाप्नुयात् ॥ अग्निहोत्रात्समादाय सितं भसितमुत्तमं । अनया तु ऋचा हुत्वा जलेऽवृष्टिं निवारयेत् ॥ जले हुत्वेत्यर्थः । पुत्रकामस्तु जुहुयात्पायसं घृतसंयुतं। चरुशेषं स्वयं भुक्त्वा पुत्रं प्राप्नोति मानवः ॥ पौर्णमास्यां तिलान् हुत्वा घृताक्तान् विंदते सुतं । गोचर्ममात्रमालिप्य गोमयेनाथ भूतलं ॥ धान्यराशीन्विनिक्षिप्य तन्मध्ये स्थापयेद्बुधः । विंशतिं कलशांस्तत्र सितसूत्रेण वेष्टितान् ॥ तीर्थतोयेन संपूर्णान्भूषितान्पल्लवादिभिः । त्रैयंबकेण मंत्रेण ततस्तानभिमंत्र्य च ॥ अथ वंध्यां स्त्रियं तैस्तु कलशैरभिषेचयेत् । अचिराल्लभते पुत्रमायुष्मंतं यशस्विनं ॥ वस्त्रकामस्तु जुहुयात्कुसुमैः कालसंभवैः । यद्वर्णं जुहुयात्पुष्पं तद्वर्णं वस्त्रमाप्नुयात् ॥ धान्यं तिलाज्यसंयुक्तं हुत्वा कन्यामवाप्नुयात् । देवतावश्यकामस्तु कृसरं घृतसंयुतं ॥ अष्टोत्तरसहस्रं तु जहुयात्पायसेन वै । हविः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषं स्वयं भुक्त्वा जपेन्मंत्रमिमं पुनः ॥ यां देवतां समुद्दिश्य करोत्येवमतंद्रितः । प्रत्यक्षभूता सा देवी वरमिष्टं प्रयच्छति ॥ इत्थं लोकं वशे कुर्यान्नक्षत्रे रुद्रदैवते । करवीरसमिद्भिस्तु तैलेनाक्तैर्घृतेन वा ॥ अष्टोत्तरसहस्रं तु हुत्वैवोच्चाटयेद्रिपून् । निर्गुंडिकासमिद्भिस्तु श्वेतार्कक्षीरसंयुतैः ॥ कालपंजरहोमं तु कुर्वतो म्रियते रिपुः । उन्मत्तसमिधो होमात्परस्योच्चाटनं भवेत् ॥ अथान्यदपि यत्क्रूरं कल्पोक्तं मारणादिकं । तत्सर्वं नैव कर्तव्यं ब्राह्मणे नृपतौ तथा ॥ ऋत्विजा कारयेदेतत्तदा देया च दक्षिणा ॥ निष्कं सुवर्णं च तदर्धमर्धं सहस्रमाने कथिताऽत्र दक्षिणा । माषस्त्वशक्तैरपि तत्कनिष्ठं कदापि कुर्यादधमाधमं न ॥ लैंगे उत्तरार्धे त्रिपंचाशदध्याये । सूत उवाच । त्र्यंबकेण च मंत्रेण देवदेवं त्रियंबकं । पूजयेद्बाणलिंगे वा स्वयंभूतेऽपि वा पुनः ॥ ऋषितीर्थे देवतीर्थे यथावदनुपूर्वशः । अष्टोत्तरसहस्रेण पुंडरीकेण शंकरं ॥ रक्तोत्पलसहस्रेण तथा नीलोत्पलेन च । संपूज्य पायसं दत्वा घृतमोदनकं पुनः ॥ मुद्रान्नं मधुसंयुक्तं भक्ष्याणि सुरभीणि च । अग्नौ होमश्च विपुलो यथावदनुपूर्वशः ॥ पूर्वोक्तैरपि पुष्पैश्च चरुणा च विशेषतः । जपेद्दै नियुतं सम्यक्कालमृत्यूपशांतये ॥ जातिपुष्पेण वश्यार्थी जुहुयादयुतत्रयं । घृतेन करवीरेण कुर्यादाकर्षणं द्विजः ॥ विद्वेषणं विषेणैव कुर्याद्धालाहलस्य च । तैलेनोच्चाटनं प्रोक्तं स्तंभनं मधुना स्मृतं ॥ तिलेन मोहनं प्रोक्तं ताडनं रुधिरेण तु । खरस्य च गजस्याथ उष्ट्रस्य च यथाक्रमं ॥ स्तंभनं सर्षपैश्चापि पाटनं लशुनेन च । मारणोच्चाटनं चैव द्रोहीबीजेन संयतः ॥ बंधनं स्नुहिपत्रेण सेनास्तंभमतः परं । घृतेन सर्वसिद्धिः स्यात्पयसा ऋद्धिरुच्यते ॥ तिलेन रोगनाशश्च कमलेन धनं लभेत् । कांतिं मधूकपुष्पेण सावित्र्या चायुतत्रयं ॥ जपादिप्रभृतीन्कुर्यात्स्विष्टांतं पूर्ववत्स्मृतं । दानहेमाद्रौ शौनकः । त्र्यंबकंयजामहइति शिखायां न्यसेत् । सुगंधिंपुष्टिवर्धनमिति त्द्दये । उर्वारुकमिवबंधनादिति बाह्वोः । मृत्योर्मुक्षीयमामृतादिति नाभौ । पादगुल्फे च जंघो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुजघने कटिमेढ्रयोः । नाभौ कुक्षिहृये पार्श्वे कक्षयोः कुचयोर्हृदि ॥ स्कंधे कृकाटिकायां च कूर्परे माणिवंधके। कनिष्ठाऽनामिकामध्ये तर्जन्यं-गुष्ठपाणिषु ॥ कंठे च चुबुके वक्रे नासिकाकर्णचक्षुषि । ललाटे मूर्ध्नि चूडायां वर्णान्मंत्रस्य विन्यसेत् ॥ देवीपुराणे । ॐजूंसइति मंत्रोऽयं ख्यातो मृत्युंजयः परः। मृत्युंजयस्तु देवोऽयं चतुर्भुजस्त्रिनेत्रकः ॥ अक्षमालाधरो देवो दक्षिणेन तु पाणिना। वामेनामृतकुंडीं च धारयन्नमृता-न्वितां ॥ वरदाभयपाणिश्च दिव्याभरणभूषितः । शुक्लः सुनीलवासाश्च पद्मस्योपरि संस्थितः ॥ जां जीं तस्य शिरो ज्ञेयं हौंजूंसश्च शिखा मता । जैं वषट्कवचं ज्ञेयं जौं नेत्रं च प्रकीर्तितं ॥ जं फडस्त्रं समुद्दिष्टं षडंगोऽयं भवेत्सदा । ओंकार आह्वानमंत्र ओंकारो वै विसर्जने ॥ अष्टौ तु शक्तयः पूज्याः पंचाक्षरसमन्विताः। जया च विजया चैव अजिता चापराजिता ॥ भद्रकाली कपाली च क्षेम्या मृत्युपराजिता। ॐजूंसइतिमंत्रेण पूज्यो मृत्युंजयः शिव इति "लिं० पु० मृतसंजीवनो मंत्रो मया लब्धस्तु शंकरात् । जप्त्वा हुत्वाऽभिमंत्र्यैवं जलं पीत्वा दिवानिशं ॥ लिंग-स्य संनिधौ ध्यात्वा नास्ति मृत्युभयं द्विज" इति मृत्युंजयविधिः॥ ॥ अथ प्रयोगः। कर्ता देशकालौ स्मृत्वा मम जीवशरीराविरोधेनामुकरो-गस्य समूलनाशेनापमृत्युनिवारणद्वारा क्षिप्रारोग्यार्थममुकसंख्यया महात्युंजयमंत्रजपमहं करिष्ये। विप्रद्वारा कारयिष्यइति वा संकल्प्य गणेश-पूजनपुण्याहवाचनमातृकापूजावृद्धिश्राद्धानि कृत्वा आचार्यं वस्त्राद्यैर्वृणुयात् । अथाचार्य आचम्य प्राणानायम्य देशकालौ स्मृत्वाऽमुक-स्यारोग्यार्थममुकाज्ञया त्र्यंवकपूजनजपादि करिष्ये इत्युक्त्वा पृथ्वीतिमंत्रेणासनं कृत्वा अपसर्पंत्विति भूतान्युत्साद्य तालत्रयं कृत्वा मूलेन लमिति वा १२वारं वामनासामापूर्य मूलेन यमिति वा १६ कुंभकं कृत्वा मूलेन रमिति वा १२ रेचयेत्। यमिति १२ देहं संशोष्य रमित्यग्निबीजेन दग्ध्वा वमित्यमृतबीजेनाप्लाव्य आत्मन आकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी तस्या देहोत्पत्तिं विभाव्य हमित्यमृतं स्रावयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणप्रतिष्ठां कृत्वा शिवोऽहमिति विभाव्येष्टदेवतां नत्वा वामे गुरुपरमगुरुपरात्परगुरुपरमेष्ठिगुरून् स्वबीजनामभिर्नत्वा दक्षिणे गणेशदु-
र्गाक्षेत्रपालान्नत्वा मूलेन करशुद्धिं कृत्वा मूलेन प्राणानायम्य अस्य श्रीमहामृत्युंजयमंत्रस्य वसिष्ठ ऋषिः । अनुष्टुप् छंदः । मृत्युंजयो रुद्रो
देवता । हौं बीजं । जूं शक्तिः । सः कीलकं । जपे विनियोगः । शुद्धत्र्यंबके त्र्यं बीजं अं शक्तिः वं कीलकमिति मंत्रकोशे । शिरोमुखहृदयगुह्य-
पायुपादेषु ऋष्यादीन्विन्यस्य मूलेन करशुद्धिं कृत्वा प्रणवं करतलयोर्न्यस्य ॐअग्नये हृदयाय॰। त्र्यंबकाय शिरसेस्वाहा । त्रिनेत्राय शिखा-
यै वषट् । वासिष्ठाय कवचा॰। अनुष्टुप्छंदसे नेत्रत्रयाय॰ । रुद्रदेवतायै अस्त्रायफट् । अथ षडंगः । त्र्यंबकं हृदयायनमः । यजामहे
शिरसेस्वाहा । सुगंधिं शिखायैवषट्।पुष्टिवर्धनं उर्वारुकमिवबंधनात्कवचायहुं । मृत्योर्मुक्षीय नेत्रत्रयाय॰।माऽमृतात् अस्त्रायफट् । अथाक्षरन्यासः।
सर्वत्र प्रणवादिनमोंऽतत्वं । त्र्यं दक्षपादमूले । बं दक्षजानुनि । कं दक्षगुल्फे । यं दक्षपादांगुलिमूलेषु । जां तदग्रेषु । मं वामपादमूले । हें
वामजानुनि । सुं वामगुल्फे । गं वामपांदागुलिमूलेषु । धिं तदग्रेषु । पुं गुह्ये । ष्टिं आधारे । वं उदरे । र्धं हृदये। नं कंठे । उर्वारुकमी-
त्येतानि दक्षबाहुसंधिषु । वबंधनान्मृ वामबाहुसंधिषु । त्यों मुखे । र्मुं क्षीं दक्षवामनासयोः । यं नेत्रयोरावृत्त्या । मां कर्णयोः । मृं भ्रुवोः ।
तात् शिरसि । अथ पादन्यासः । ॐत्र्यंबकंयजामहे पूर्ववक्राय नमः । सुगंधिंपुष्टिवर्धनं पश्चिमवक्राय॰ । उर्वारुकमिवबंधनात् दक्षिणवक्रा-
य॰। मृत्योर्मुक्षीयमामृतात् उत्तरवक्राय॰। सर्वचर्चा ऊर्ध्ववक्राय॰। अथाक्षरन्यासः। त्र्यं शिरसि । बं कंठे । कं मुखे । यं जां नेत्रयोः । मं नाभौ । हें
हृदि । सुं पृष्ठे । गं धिं कुक्ष्योः । पुं लिंगे। ष्टिं पायौ । वं र्धं ऊर्वोः । नं बस्तौ ।उं तन्मूले । र्वा अंत्रे । रुं कं जान्वोः । मिं वं जंघयोः। बं धं स्तनयोः
। ना न्मृ पार्श्वयोः । त्यो र्मु पादयोः । क्षी य पाण्योः । मा मृ नासयोः । तात् शिरसि । अथ पदन्यासः । सर्वत्र नमोंतं । त्र्यंबकं शिरसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमः । यजामहे भ्रुवोः । सुगंधिं नेत्रयोः । पुष्टिवर्धनं मुखे । उर्वारुकं गंडयोः । इव त्हदये । बंधनात् उदरे । मृत्योः गुह्ये । मुक्षीय ऊर्वोः । मा जानुनोः । अमृतात्पादयोः । एते न्यासा मंत्रकोशेऽपि तुल्याः । अथाक्षरवस्वादिन्यासः । ॐ त्रिं धराय शिरसि नमः । यं ध्रुवाय नेत्रयोः । बं सोमाय कर्णयोः । कं आपाय नासयोः । यं अनिलाय मुखे । जां अनलाय दक्षबाहुमूले । मं प्रत्यूषाय दक्षकूर्परे । हें प्रभासाय दक्षमणिबंधे । सुं वीरभद्राय दक्षांगुलिमूले । गं शंभवे तदग्रेषु । धिं गिरिशाय वामवाहुमूले । पुं अजायैकपदे वामकूर्परे । ष्टिं अहये बुध्न्याय वाममणिबंधे। वं पिनाकिने वामांगुलिमूले । र्धं अपराजिताय तदग्रेषु । नं भुवनाधीश्वराय दक्षपादमूले । उं कपालिने दक्षजानौ । र्वां स्थाणवे दक्षगुल्फे । रुं भर्गाय दक्षपादांगुलिमूले । कं धात्रे तदग्रेषु । मिं अर्यम्णे वामोरुमूले । वं मित्राय वामजानौ । बं वरुणाय वामगुल्फे । धं अंशाय वामपादांगुलिमूलेषु। नां भगाय तदग्रेषु । न्मृं इंद्राय दक्षपार्श्वे । त्यों विवस्वते वामपार्श्वे । र्मुं पूष्णे पृष्ठे । क्षीं पर्जन्याय भ्रूमध्ये । यं त्वष्ट्रे ललाटे । मां विष्णवे शिरसि । मृं प्रजापतये गले । ताङ्‌वषट्काराय त्हदये । प्रणवं जपेत् । अथापरः । त्र्यंबकंयं एतान्मुखस्य पूर्वपश्चिमदक्षिणोत्तरेषु विन्यसेत् । जां उरसि । मं गले । हें मुखे । सुं गं नेत्रयोः । धिं नाभौ । पुं त्हदि । ष्टिं पृष्ठे। वं र्धं कुक्ष्योः । नं लिंगे । उं पायौ । र्वां ऊर्वोः । रुं कं जानुनोः । मिं वं जंघयोः । बं धं स्तनयोः । नां न्मृं पार्श्वयोः । त्यों र्मुं पादयोः । क्षीं यं पाण्योः । मां मृं नासयोः । तात् शिरसि । । अथ हेमाद्रौ शौनकोक्तन्यासः । त्र्यंबकंयजामहे शिखायां । सुगंधिंपुष्टिवर्धनं त्हदये । उर्वारुकमिवबंधनात् बाह्वोः । मृत्योर्मुक्षीयमामृतात् नाभौ । त्र्यं पादयोः । बं गुल्फयोः । कं जंघयोः । यं ऊर्वोः । जां जघने । मं कटौ । हें मेढ्रे । सुं नाभौ । गं कुक्ष्योः । धिं पार्श्वयोः । पुं कक्षयोः । ष्टिं स्तनयोः । वं त्हदि । र्धं स्कंधे । नं कंठे । उं कूर्परयोः । र्वां मणिबंधयोः । रुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कनिष्ठिकयोः । कं अनामिकयोः । मिं मध्यमयोः । वं तर्जन्योः । बं अंगुष्ठयोः । धं पाण्योः । नां कंठे । न्मृं चुबुके । त्यों मुखे । मुं नासयोः । क्षीं कर्णयोः । यं नेत्रयोः । मां ललाटे । मृं मूर्ध्नि । तात् शिखायां । एते केवलमृत्युंजयन्यासाः । महामृत्युंजयेऽप्येत एव । किंतु प्रत्यक्षरं व्याहृतित्रयं प्रणवपूर्वकं जपेत् । ॐभूः ॐभुवः ॐस्वः । ॐ त्र्यं दक्षपादमूलेइत्यादि । ॐहौं ॐजूं ॐसः इति वा प्रतिवर्णं प्रतिपदमादौ वदेत् । अथ नामषडंगः । ॐहौं ॐजूं ॐसः ॐनमोभगवतेरुद्राय शूलपाणयेस्वाहा हृदयाय॰ । ॐहौं॰ रुद्रायामृतमूर्तये मां जीवय शिरसेस्वाहा । ॐहौं॰ रुद्राय चंद्रशिरसे जटिने शिखायैवषट् । ॐहौं॰ रुद्राय त्रिपुरांतकाय ह्रां ह्रीं ह्रूं कवचायहुं । ॐहौं॰ रुद्राय त्रिलोचनाय ऋग्यजुःसाममंत्रायस्वाहा नेत्रत्रयायवौ॰। ॐहौं॰ रुद्राय प्रलयाग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष घोरमूर्तये अस्त्रायफट्स्वाहा ॥ अथ द्वितीयषडंगः । ॐहौं ॐजूं ॐसः ॐनमोभगवते रुद्राय त्र्यंबकाय त्रिनेत्राय त्रिपुरांतकाय त्र्यंबकं हृदयायनमः । ॐहौं॰ रुद्राय नीलग्रीवाय शशांककृतशेखरायामृतवर्षिणे यजामहे शिरसेस्वाहा । ॐहौं॰ रुद्राय व्याघ्रचर्मपरिधानाय शंकराय कपर्दिने सुगंधिंपुष्टिवर्धनं शिखायैवषट् । ॐहौं॰ रुद्राय स्रवदमृतचंद्रबिंबकलाधराय कर्पूरगौराय शांताय उर्वारुकमिवबंधनात् कवचायहुं । ॐहौं रुद्राय ऋग्यजुःसाममंत्राय ज्योतीरूपाय ज्ञानात्मने मृत्योर्मुक्षीय नेत्रत्रयाय॰ । ॐहौं॰ रुद्रायाग्निवीर्याय दुष्टग्रहनिवारणाय धूर्जटयेऽघोरमूर्तये ज्वलज्वल रुद्र शक्तित्रिशूलधर नित्यं मां रक्ष रक्ष सर्वतो दिशं अघोराय मामृतात् अस्त्रायफट् । ततः पीठादौ मध्ये वृत्तं तद्बहिश्चतुरस्रं तद्बहिः षट्कोणं तद्बहिरष्टदलद्वयं ततश्चतुष्कोणमिति यंत्रं विलिख्य । धर्माय॰ ज्ञानाय॰ वैराग्याय॰ ऐश्वर्याय॰ । अधर्माय॰ अज्ञानाय॰ अवैराग्याय॰ अनैश्वर्याय॰ । कृताय॰ त्रेतायै॰ द्वापराय॰। सत्वाय॰ रजसे॰ तमसे॰। सूर्यमंडलाय॰ सोममंडलाय॰ वह्निमंडलाय॰ इति संपूज्य मृत्युं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयस्तु देवोऽयं चतुर्भुजस्त्रिनेत्रकः । अक्षमालाधरो देवो दक्षिणेन तु पाणिना ॥ वामेनामृतकुंडीं च धारयन्नमृतान्वितां । वरदाभयपाणिश्च दिव्याभरणभूषितः ॥ शुक्लः सुनीलवासाश्च पद्मस्योपरि संस्थितः । इति हेमाद्र्युक्तरीत्या । अच्छस्वच्छारविंदस्थितडमरुकरावस्थितं पूर्णकुंभौ द्वाभ्यां वेदाक्षमाले निजकरकमलाभ्यां घटौ नित्यपूर्णौ । द्वाभ्यां तौ च स्रवंतौ शिरसि शशिकलाबंधुरे प्लावयंतौ सोऽयं देवो दधानः प्रदिशतु विशदाकल्पजालः श्रियं नः ॥ इति प्रपंचसारे मंत्रकोशोक्तरीत्या । बद्धपिंगजटाजूटं नागभूषणभूषितं । द्वादशाक्षं पंचवक्त्रमष्टादशभुजं विभुमिति वा । हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलयं द्वाभ्यां वहंतं परं । अंकन्यस्तकरद्वयामृतघटं कैलाससंस्थं शिवं स्वच्छांभोजगतं नवेंदुमुकुटं देवं त्रिनेत्रं भजे । इति वा ध्यात्वा मूलेन नासाग्रमार्गेण मध्ये देवमावाह्य स्थापनीसंनिधापनीसंनिरोधिनीमुद्राः प्रदर्श्य मूलेनासनपाद्यार्घ्याचमनमधुपर्कस्नानवस्त्रयज्ञोपवीतगंधपुष्पाणि समर्प्यावरणपूजां कुर्यात् । मध्ये ईशानं । पूर्ववक्त्रे तत्पुरुषं । दक्षिणे वामदेवं । पश्चिमे अघोरं । उत्तरवक्त्रे सद्योजातं । ततः षट्कोणे । आग्नेयादिकोणेषु । ह्रां हृदयायनमः । ह्रीं शिरसेस्वाहा । ह्रूं शिखायैवषट् । ह्रैं कवचायहुं । ह्रौं नेत्रत्रयायवौषट् । ह्रः अस्त्रायफट् । पुरतः । निर्ऋत्यै० प्रतिष्ठायै० विद्यायै० शांत्यै० इति चतुष्कोणे । गं गणपतयेनमः । मं मृत्यवे० । दुं दुर्गायै० क्षं क्षेत्रपालाय० इति चतुष्पत्रे । अथाष्टदले । ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० चंडिकायै० । तद्बहिः । चंडभैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपालभैरवाय० संहारभैरवाय० आपदुद्धारभैरवाय० कालभैरवाय० गौरभैरवाय० । तद्बहिः । जयायै० विजयायै० अजितायै० अपराजितायै० भद्रकाल्यै० कपाल्यै० क्षेम्यायै० मृत्युपराजितायै० । तद्बहिः । इं इंद्राय० अं अग्नये० यं यमाय० निं निर्ऋतये० वं वरुणाय० वां वायवे० सों

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमाय० ईं ईशानाय० । ईशानेंद्रयोर्मध्ये ह्रां ब्रह्मणे० निर्ऋतिवरुणयोर्मध्ये ह्रीं विष्णवे० इति संपूज्य । मंत्रकोशे तु षडंगैः प्रथमावरणं । सूर्याय० इंदवे० भूम्यै० तोयाय० अग्नये० वायवे० आकाशाय० आत्मने० इति द्वितीयं । रामायै० राकायै० प्रभायै० ज्योत्स्नायै० पूर्णायै० उषायै० पूरिण्यै० उग्रायै० इति तृतीयं । विश्वायै० विद्यायै० सितायै० पुष्ट्यै० संध्यायै० दारायै० शिवायै० निशायै० इति चतुर्थं । लोकपालैः पंचमं । तदस्त्रैः षष्ठमित्यावरणान्युक्तानि । ततो धूपदीपनैवेद्यफलतांबूलदक्षिणानीराजनप्रदक्षिणानमस्कारान्कृत्वा मृत्युंजय महारुद्र त्राहि मां शरणागतं । जन्ममृत्युजरारोगैः पीडितं कर्मबंधनैः ॥ तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड । इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं परं ॥ ततो जपं कृत्वा पुनः षडंगं कृत्वा जपं निवेदयेत् । अयुतं पुरश्चरणं । इति प्रयोगः ॥ ॥ अथ मंत्रोद्धारः । ॐ भूर्भुवः स्वः । ॐ त्र्यंबकं० ऋक् । ॐ स्वः भुवः भूः ॐ । इति मृत्युंजयः । केवलऋग्वा ॥ ॐ हौं जूं सः । ॐ भूर्भुवः स्वः । ॐ त्र्यंबकं० ऋक् । ॐ स्वः भुवः भूः । ॐ सः जूं हौं ॐ । इति मृतसंजीवनी ॥ ॐहौं ॐजूं ॐसः । ॐभूः ॐभुवः ॐस्वः । ॐ त्र्यंबकं० ऋक् । ॐस्वः ॐभुवः ॐभूः । ॐसः ॐजूं ॐहौं ॐस्वाहा । इति महामृत्युंजयः ॥ ऋग्विधाने । त्रिरात्रं नियतोऽनश्नन् श्रपयेत्पायसं चरुं । तेनाहुतिशतं पूर्णं जुहुयात्सर्पिषा द्विजः ॥ समुद्दिश्य महादेवं त्र्यंबकं त्र्यंबकेत्यृचा । एतत्पर्वशतं कृत्वा जीवेदब्दशतं सुखी ॥ इति कमलाकरभट्टकृते शांतिरत्ने मृत्युंजयविधानं ॥ ॥ अथ पुरुषसूक्तविधिः । विष्णुधर्मोत्तरे पुष्कर उवाच । प्रतिवेदं महाभाग यत्सूक्तं पौरुषं स्मृतं । सर्वकामकरं ज्ञेयं पवित्रं मधुसूदन ॥ एकैकया ऋचा राम स्नातो दत्वा जलांजलीन् । पौरुषेण तु सूक्तेन मुच्यते सर्वकिल्बिषैः ॥ अंतर्जलगतो जप्त्वा सूक्तमेतत्तु पौरुषं । सर्वकल्मषनिर्मुक्तो यथेष्टां लभते गतिं ॥ एकैकया ऋचा स्नातः पुष्पं पुष्पं निवेदयेत् । पुरुषाय जले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राम सर्वपापैः प्रमुच्यते ॥ एकैकया ऋचा स्नातो दत्वा राम फलं फलं । सर्वकामानवाप्नोति यान्कांश्चिन्मनसेच्छति ॥ पौरुषेण तु सूक्तेन प्राणायामो महाफलः । जपहोमौ तथा राम सर्वकल्मषनाशनौ ॥ सुरापो ब्रह्महा स्तेनस्तथैव गुरुतल्पगः । पापेभ्यो विप्रमुच्येत जप्त्वा सूक्तं तु पौरुषं ॥ कृच्छ्रैर्विशोधितः पूर्वं मध्याह्ने- सलिलोपगः । स्नातस्तु पौरुषं सूक्तं जपेन्नित्यमतंद्रितः ॥ संवत्सरेण देवेशं वासुदेवं प्रपश्यति । स्वयमेव महाभाग शाकमूलफलाशनः ॥ तं तं काममवाप्नोति यं राम मनसेच्छति । श्रियमग्र्यां तथा रूपं जीवितं दीर्घमेव च ॥ अणिमा लघिमा प्राप्तिर्महिमा च भृगूद्वह । दुरवापमथान्यद्वा यत्किंचिन्मनसेच्छति ॥ अकामः पौरुषं जप्त्वा याति विष्णोः परं पदं । मांगल्यमेतत्परमं पवित्रं संसारदुःखौघविनाशकारि । सुखप्रदं धर्मविदां नराणां मनोरथावाप्तिकरं प्रदिष्टं ॥ महार्णवे ऋग्विधाने । वक्ष्ये पुरुषसूक्तस्य विधानं त्वर्चनं प्रति । अग्निकार्यं जपविधिं स्तोत्रं चैव तदात्मकं ॥ कुर्याद्यथोक्तविधिना प्राङ्मुखः शुद्धमानसः । प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ॥ तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत् । पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे तथा ॥ सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा । नवमीं नाभिदेशे तु दशमीं हृदये तथा ॥ एकादशीं कंठदेशे द्वादशीं वामबाहुके । त्रयोदशीं दक्षिणे च आस्यदेशे चतुर्दशीं ॥ अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् । एवं न्यासविधिं कृत्वा पंचांगानि समाचरेत् ॥ ब्राह्मणोस्येत्यादिकाभिर्ऋग्भिः पंचांगकल्पना । हृदयं शिरः शिखा कवचमस्त्रं चेति पंचांगानि । यथा देहे तथा देवे न्यासं कृत्वा विधानतः [मंत्रन्यासं पुरा कृत्वा स्वदेहे देवतासु च] गायत्र्योंकारन्यस्तांगः पूजयेद्विष्णुमव्ययं । तत्रादौ संकल्पं कृत्वा न्यासद्वयं कुर्यात् । अस्य सूक्तस्य श्रीनारायण ऋषिः । पुरुषो देवता अनुष्टुप् छंदः । अंत्या त्रिष्टुप् । जपादौ विनियोगः । तत्र जपे होमे चार्चनं नियतमिति तदेवाह । आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमं । द्वितीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यासनं दद्यात्पाद्यं चैव तृतीयया ॥ चतुर्थ्याऽर्घ्यं प्रदातव्यं पंचम्याऽऽचमनं तथा । षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥ यज्ञोपवीतमष्टम्या नवम्याभरणं तथा । (पुष्पं दशम्या दातव्यमेकादश्या तु धूपकं । द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनं ॥ चतुर्दश्या नमस्कारः पंचदश्या प्रदक्षिणा । इति पाठांतरं) दशम्या गंधदानं स्यादेकादश्या च माल्यकं । द्वादश्या धूपदानं स्यात्त्रयोदश्या च दीपकं ॥ चतुर्दश्या च नैवेद्यं पंचदश्या नमस्क्रिया । उद्वासनं तु षोडश्या उपचारास्तु षोडश ॥ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं । दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा । अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरं । दक्षिणां तु यथाशक्त्या षोडशर्चा प्रदापयेत् । ततः प्रदक्षिणां कृत्वा जपं कुर्यात्समाहितः । यथाशक्ति जपित्वा च सूक्तं चास्मै निवेदयेत् । देवस्य दक्षिणे पार्श्वे कुंडं स्थंडिलमेव वा । कारयेत्प्रथमर्चा तु प्रोक्षणं तु द्वितीयया ॥ तृतीययाऽग्निमादध्याच्चतुर्थ्या तु समिंधनं । पंचम्या त्वाज्यसंस्कारश्चरोश्च श्रपणं तथा ॥ षष्ठ्याऽनलस्य मध्ये तु कल्पयेत्पद्मासनं । चिंतयेत्तत्र देवेशं कालानलसमप्रभं ॥ विवृतास्यं वाहशीर्षं रक्तास्यं रक्तलोचनं । (वाहो हयः) ततो गंधं च पुष्पं च धूपं दीपं न्निवेदयेत् । पंचर्ग्भिश्च ततः कुर्यात्सप्तम्यादि यथाक्रमं ॥ वह्नौ पूजयेदित्यर्थः । समिधः प्रत्यृचं पूर्वं जुहुयादभिघारितः । ततो घृतेन जुहुयाच्चरुणा च ततः पुनः ॥ एवं हुत्वा ततस्तस्य समीपे स्तोत्रमुच्चरेत् ॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे । ओँ नमो वासुदेवाय शुद्धज्ञानस्वभाविने ॥ देवानां दानवानां च सामान्यमधिदैवतं । सर्वदा चरणद्वंद्वं व्रजामि शरणं तव ॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा । अध्यक्षश्चानुमंता च गुणमायासमावृतः ॥ संसारसागरं घोरमनंतं क्लेशसाधनं । त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः ॥ न ते रूपं न चाकारो नायुधानि न चास्पदं । तथापि पु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुषाकारो भक्तानां त्वं प्रकाशसे ॥ नैव किंचित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् । नैव किंचिदसिद्धं ते न त्वं साध्योऽसि कस्यचित् ॥ कार्याणां कारणं पूर्वं वचसां वाक्यमुत्तमं । योगिनां परमां सिद्धिं वदंति परमं पदं ॥ अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे । पाहि मां पुंडरीकाक्ष न जाने शरणं परं॥कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत । शरीरेऽपि मतौचापि वर्धते मे महद्भयं॥त्वत्पादकमलादन्यन्न मे जन्मांतरेष्वपि । निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिं ॥ विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमर्जितं । जन्मांतरेऽपि मे देव मा भूदस्यपरिक्षयः ॥ दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम । दुर्गतावपि जातस्य त्वद्गतो मे मनोरथः ॥ यदि नाथं च विंदेयं तावताऽस्मि कृती सदा । अकामकलुषं चित्तं मम ते पादयोः स्थितं ॥ कामये वैष्णवत्वं तु सर्वजन्मसु केवलं । इत्येवमनया स्तुत्या स्तुत्वा देवं दि[illegible] ॥ किंकरोऽस्मीति चात्मानं देवाय विनिवेदयेत् । पुरुषस्य हरेः सूक्तं स्वर्ग्यं धन्यं यशस्करं ॥ आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परं । फलाहारो जपेन्नित्यं पश्यन्नात्मानमात्मनि ॥ फलानि भुक्त्वोपवसेन्मासमद्भिश्च वर्तयेत् । अरण्ये निवसेन्नित्यं जपन्निममृषिं मुनिः ॥ ऋषिं मंत्रं । ऋग्भिस्त्रिषवणे काले स्नायादप्सु समाहितः । स्नाने एताभिर्मार्जिनमघमर्षणं चेत्यर्थः । आदित्यमुपतिष्ठेत सूक्तेनानेन नित्यशः । आज्याहुतीरनेनैव हुत्वैवं चिंतयेदृषिं ॥ ऋषिः सूक्तद्रष्टा नारायणः । ऊर्ध्वं मासात्फलाहारस्त्रिभिर्वर्षैर्जपेदिदं । तद्भक्तस्तन्मना युक्तो दशवर्षाण्यनन्यभाक् ॥ साक्षात्पश्यति तं देवं नारायणमनामयं । अनासदयमानोऽपि भक्तिं न परिहापयेत् ॥ भक्तानुकंपी भगवान् जायते पुरुषोत्तमः । येन च कामेन जपेत्तत्प्रयतः सदा ॥ स स कामः समृद्धः स्याच्छ्रद्दधानस्य कुर्वतः ॥ होमं वाप्यथवा जाप्यमुपहारमथो चरुं । कुर्वीत येन कामेन तत्सिद्धिमुपधारयेत् ॥ ज्ञातिश्रैष्ठ्यं महद्वित्तं यशो लोके परा गतिः । पापेभ्यो विप्रमोक्षश्च भवेत्सर्वं न संशयः ॥ अथाभिधीयते कर्म पु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रकामस्य वैष्णवं । शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे ॥ द्वादश्या पुत्रकामस्तु चरुं कुर्वीत वैष्णवं ॥ दंपत्योरुपवासः स्यादेकादश्यां सुरालये ॥ ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनं ॥ चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया ॥ प्राप्नुयाद्वैष्णवं पुत्रमचिरात्संततिक्षमं । द्वादशद्वादशीष्वेवं पयसा निर्वपेच्चरुं ॥ यः करोति सहस्रं तु याति विष्णोः परं पदं । हुत्वाऽग्नौ विधिवत्सम्यगृग्भिः षोडशभिर्बुधः ॥ कृतांजलिपुटो भूत्वा स्तवं ताभिः प्रयोजयेत् । केशवं मार्गशीर्षे तु पौषे नारायणं विदुः ॥ माधवं माघमासे तु गोविंदं फाल्गुने तथा ॥ चैत्रे चैव तथा विष्णुं वैशाखे मधुसूदनं ॥ ज्येष्ठे त्रिविक्रमं विद्यादाषाढे वामनं विदुः । श्रावणे श्रीधरं विद्याद्धृषीकेशं ततः परे ॥ आश्विने पद्मनाभं तु दामोदरमतः परे । द्वादशैतानि नामानि प्रतिमासं तु पूजयेत् ॥ आयुष्मंतं सुतं सूते यशोमेधासमन्वितं । धनवंतं प्रजावंतं धार्मिकं सात्विकं तथा ॥ अत्र स्वगृह्योक्तविधिना पयसि चरुः कार्यः । श्रपणसमये सूक्तमावर्तयेत् । सकलसूक्तेनैकाहुतिः । एवं सहस्रहोमः । स चायुतजपोत्तरं कार्यः । कृष्णैकादश्यामुपक्रम्यायुतं जप्त्वा शुक्लैकादश्यां दंपती उपोष्य द्वादश्यां चरुं सहस्रं जुहुयादिति महार्णवः । अथापरः प्रकारोऽयमेकादश्यामभोजनं । दंपत्योः पुरुषस्तत्र नित्यकर्माविरोधिनि ॥ काले जपेत्तिं सूक्तमेकादश्यां निरंतरं । द्वादश्यां प्रयतो भूत्वा पयसा निर्वपेच्चरुं ॥ द्वादश० । एवमेकादश्युपवासादिना । हुत्वाज्यं विधिवच्चान्नः ऋग्भिः षोडशभिर्बुधः । कृतांजलिपुटो भूत्वा स्तवं चाभिः प्रयोजयेत् ॥ समिधोऽश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात्पुनः । उपस्थानं हुताशस्य मत्वा च मधुसूदनं ॥ आग्नेयैर्मंत्रैरुपस्थानमिति महार्णवः । युक्तं तु पुरुषसूक्तेनैव । हविर्होमं ततः कुर्यात्प्रत्यृचं वाग्यतः शुचिः । सूक्तेन जुहुयादाज्यमादावंते च पूर्ववत् ॥ हविःशेषं नमस्कृत्य नारी नारायणं पतिं । भक्षयित्वा हविःशेषं लब्धाशीः संविशेत्क्षणं ॥ आहारांतरत्यागेन हविःशेषं भुक्त्वा वामशायिनी स्यादित्यर्थः । ततः कृत्वा त्विदं कर्म कर्तव्यं द्विजतर्पणं । द्वितीया स्त्री निवर्तेत यावद्गर्भं न विंदति ॥ यया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दं कर्म कृतं तां विहायान्यामृतावपि नोपेयात् । सर्वाभिः सह कर्तृत्वे तु न दोषः । ऋतावन्यस्त्रिया अगमने नियमातिक्रमदोषोऽस्त्येव ।
ल्पः । तत्र शक्तौ प्रत्यृतु प्राजापत्यः । अशक्तौ त्रिरात्रद्विरात्रादि । अपुत्रा मृतपुत्रा च या च कन्यां प्रसूयते । क्षिप्रं सा जनयेत्पुत्र-
ृगो यथाऽब्रवीत् ॥ बृहत्पराशरोऽप्येवं विधिमुक्त्वा । होमांते दक्षिणां दद्याद्धेनुं वासस्तथा तिलान्। भूमिं हिरण्यं वस्त्राणि यथासंभवमेव
॥ इति शांतिरत्ने पुरुषसूक्तविधिः ॥ ॥ अथ दीपस्थानं । सर्वत्र जपो दीपस्थाने कार्यः । तद्यथा । युग्मं स्वराणां विलिखेच्च पूर्वे
श्च वर्गान् क्रमशः क्षमीशे । स्थानाधिपाद्याक्षरमस्ति यत्र तं दीपदेशं मुनयो वदंति ॥ इदमेव कूर्मचक्रं । इयांस्तु भेदो यद्ग्रामनामाद्यव-
र्मुखमिति । तदुक्तं शिवचंद्रिकायां । अकारादिस्वरद्वंद्वं पूर्वादिष्वष्टसु न्यसेत् । तथा कादीन् सप्तवर्णांश्च्यसेच्छिवदिशं विना ॥ ग्राम-
माद्यवर्णस्तु यो यस्यां दिशि तिष्ठति । तत्र कूर्ममुखं ज्ञेयमन्यांगानीतरत्र च ॥ मंत्रसिद्धिं मुखे विद्यात्करयोरल्पकं फलं । निष्फलं पादयोर्मध्ये
दासीन्यं तु पादयोः ॥ वधबंधनदुःखानि पुच्छदेशे भवंति हि । एवं रुद्रजपादावपीति केचित् । अन्ये त्वस्य तांत्रिकजपपरत्वाद्वैदिकज
नियम इत्याहुः । अस्यापवादस्तत्रैव । कुरुक्षेत्रे प्रयागे च गंगासागरसंगमे । महाकाले च काश्यां च दीपस्थानं न चिंतयेत् ॥ इति दीपस्थानं
॥ अथ रुद्रविधिः । स च रावणभाष्यभट्टभास्करविद्यारण्यभाष्यहेमाद्रिमहार्णवाद्यालोचनेनोच्यते । तत्र रुद्रस्य जपे होमेऽभिषेके च श्रु
स्मृत्यादौ विनियोगो दृश्यते । तत्र जाबालिश्रुतिः । किंजप्येनामृतत्वं नो ब्रूहि शतरुद्रियेणेत्येतानि ह वा अमृतनामधेयान्येतैर्ह वा अमृतो भव
ति । कैवल्योपनिषदि । यः शतरुद्रियमधीते सोऽग्निपूतो भवति स्वर्णस्तेयात्पूतो भवति ब्रह्महत्यायाः पूतो भवति कृत्याकृत्यात्पूतो भवति। अ
न ज्ञानमाप्नोति संसारार्णवनाशनं । तस्मादेनं विदित्वैव कैवल्यफलमश्नुतइति । हेमाद्रौ बौधायनः । अथातः पंचांगरुद्राणां जपहोमार्चनवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्याख्यास्यामः। विधिशब्दस्य जपाद्यैः प्रत्येकमन्वयः। अर्चनमभिषेक इति महार्णवः। शातातपपराशरौ। मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्व
ब्रह्महत्यां च कृत्वा। भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः॥ इदं रहःकृते मासमात्रं ज्ञेयं। रुद्राध्यायी भवेद्भक्त्या
समेकमतंद्रितः। प्रायश्चित्तं भवेदेतद्रहस्यस्य न संशय इति पराशरपुरा[णा]त्। पाद्मे शिवगीतासु। यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृ[तिं]
[ष]डक्षरं वा प्रणवं निष्कामो विजितेंद्रियः॥ अथाथर्वशिरोमंत्रं कैवल्यं [वा] रघूत्तम। स तेनैव च देहेन शिवः संजायते ध्रुवं॥ वायवीये। स[र्व]
[ग्र]हदोषेषु दुःस्वप्नाद्भुतदर्शने। जपन् रुद्रान्सकृद्विप्रः सर्वदोषैः प्रमुच्यते॥ यमः। कुंतापं वालखिल्यांश्च निवित्प्रैषान्वृषाकपिं। होतॄन्रुद्रा[न्]
[स]कृज्जप्त्वा मुच्यते सर्वपातकैः॥ शुक्रियारण्यकजपो गायत्र्या च विशेषतः। सर्वपापहरा ह्येते रुद्रैकादशिनी तथा॥ हेमाद्रौ कौशिकब
यनौ। रुद्रैकादशिनी त्वेषा सर्वकामफलप्रदा। सर्वपापक्षयकरी सर्वशांतिप्रदायिनी॥ विष्णुधर्मोत्तरेऽपि। रुद्राणां च तथा जप्यं सर्वा[घ]
[नि]षूदनं। सर्वकामकरो होमस्तथा सर्वत्र शांतिदः॥ अजाविकानामश्वानां कुंजराणां तथा गवां। मनुष्याणां नरेंद्राणां बालानां योषि-
[ता]नां॥ ग्रामाणां नगराणां च देशानामपि भार्गव। उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च॥ मरके समनुप्राप्ते रिपुजे च तथा भये।
[रु]द्रहोमः परा शांतिः पायसेन घृतेन वा॥ हेमाद्रौ कालिकापुराणे। यः पुनः सततं भक्त्या अभ्यर्च्य शशिशेखरं। जपेद्ध्यायेत्सदा रुद्रा-
[न्]मर्त्योऽपि याति परं पदं॥ अथेहते फलं किंचिदैहिकं पुष्कलं तदा। तानेव हि जपेद्रुद्रान् शुचिर्भूत्वा समाहितः॥ अथवेदं जगत्सर्वं वशी-
[कर्तुं] समीहते। तदा रुद्रं जपेद्भूयो ध्यायमानो महेश्वरं॥ तेन जपरुद्रो होमरुद्रोऽभिषेकरुद्रश्चेति त्रिधा रुद्र उक्तः। आद्यो द्विधा। केवल-
[जपा]त्मको होमांगश्च। अत्र्यंगिरसौ। एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्। महापापैरपि स्पृष्टो मुच्यते नात्र संशयः॥ सर्वपापानि

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंति रुद्रैकादशिनीजपादिति कालिकापुराणादौ जपमात्रोक्तेः । जपाद्दशांशतो होमस्तथा होमात्तु तर्पणं । तर्पणस्य दशांशेन मार्जनं क-
किल ॥ मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् । जपोऽर्चापूर्वको होमस्तर्पणं चाभिषेचनं ॥ भूदेवपूजनं पंचप्रकारोक्ता पुरस्क्रिया।
क्तौ जपं कुर्याद्धोमसंख्याचतुर्गुणं ॥ एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमेति । पुरश्चरणचंद्रिकादौ जपमात्रे दशांशहोमोक्तेः । तेन
सिद्धं । होमरुद्रे तु तर्पणाद्यनाशंक्यमेव । जपमात्रे तदुक्तेः । अन्ये तु पुरश्चरण एवायं विधिः । अतएव हेमाद्रिमहार्णवादौ तर्प-
। तेन तदुक्तं जपो होमो विप्रभोजनं चेत्येव कार्यमित्याहुर्वृद्धाः । वृद्धयाज्ञवल्क्यः । सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः ।
र्षाजापी च मुच्यते सर्वकिल्बिषैः ॥ सर्वपापहरा ह्येते रुद्रैकादशनी तथा । ग्वेदमेकगुणं जप्त्वा ततोऽह्नैव विशुध्यति ॥ हेमाद्रौ कालिका-
णे । यदाऽऽमुष्मिकमीहेत फलं लोकेष्वनल्पकं । दा रुद्रान्जपेन्नित्यं ध्यायमानो महेश्वरं ॥ यश्च सागरपर्यंतां दद्याद्भूमिं सकांचनां ।
स्मादप्यधिकं तस्य सकृद्रुद्रजपाद्भवेत् ॥ वायुपुराणेऽप्येवं । तथा । नमकं चमकं चैव पौरुषं सूक्तमेव च । नित्यं त्रयं प्रयुंजानो ब्रह्मलोके
हीयते ॥ चमकं नमकान्होतॄन्पुरुषसूक्तं च यो जपेत् । प्रविशेत्स महादेवं गृहं गृहपतिर्यथा ॥ रोगवान्पापवांश्चैव रुद्रान्जप्त्वा जितेंद्रियः । रोगा
ात्प्रमुक्तोऽसावतुलं सुखमश्नुते ॥ लैंगे उत्तरार्धे त्रिपंचाशदध्याये । मृत्युंजयविधिं वक्ष्ये वहुना किं द्विजोत्तमाः । रुद्राध्यायेन विधिना घृतेन नि
क्रमात् ॥ सघृतेन तिलेनैव कमलेन च यत्नतः । दूर्वया गोघृक्षीरमिश्रया मधुना तथा ॥ चरुणा सघृतेनैव केवलं पयसाऽपि वा । जुहुयात्क
मृत्योस्तु प्रतीकारः प्रकीर्तितः ॥ सूतसंहितायां । यः श्रद्धया युतो नित्यं शतरुद्रियमभ्यसेत् । स्वर्णस्तेयात्सुरापानाद्दुष्कृताचरणात्तथा
मुच्यते ब्रह्महत्याया इति कैवल्यशाखिनः । वायुपुराणे । तपस्तपति योऽत्यर्थं सहस्राब्दानि संयमी । गवां कोटिप्रदानं यः करोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिवद्गुरौ ॥ न स तत्फलमाप्नोति यत्सकृद्रुद्रजापिनः । रुद्रेभ्यस्तु परं नास्ति जपो ध्यानं हुतं तपः ॥ तथा । अनपत्यादिदोषेषु शाकिन्य
दिग्रहेषु च । सर्वज्वरविनाशाय रुद्रा जप्या न संशयः ॥ आपस्तंबः । यस्य रुद्रः प्रजां पशून्वाभिमन्यते उदङ् परेत्य रुद्रान् जपंश्चरेदित्यय
संयुक्तः कल्प इत्यादि रावणभाष्ये ज्ञेयं । तत्रादौ व्रतमुक्तं हेमाद्रौ कालिकापुराणे । कृच्छ्रमादौ स्वयं चीर्त्वा पराकं च तथा पुनः । कृ
ध्यायन्महादेवमिदं भूयः समाचरेत् ॥ स्नात्वा त्वीशं समभ्यर्च्य उषित्वा सप्तशर्वरीः । जपेद्रुद्रांस्तथाऽजस्रं तदंते प्राशयेद् घृतं ॥ अपरेऽहनि
ाते समाप्यैवं व्रतं पुनः । भास्कराभिमुखो भूत्वा तद्दिने तान् जपेद्बहून् ॥ भूयश्चाह्नि परे रुद्रं संपूज्य विधिवत्ततः । घृताक्तैर्बिल्वपत्रै
द्रहोमं प्रकल्पयेत् ॥ एवं सम्यग्व्रते नूनं कृतेऽसौ जायते द्विजः । साक्षाद्रुद्रो महातेजास्ततः कामांस्तु साधयेत् ॥ शांतिहेमाद्रौ कौशिकः ।
गवनोक्तमेवाहं प्रवक्ष्ये कौशिको द्विजः । कामिनां सर्वकामार्थमकामानां च मुक्तये ॥ अकामः सर्वकामो वा जपेद्यः शतरुद्रियं । लिंगाभ्या-
तीर्थे स्नानं कृत्वा यथाविधि ॥ (अभ्याशे समीपे) रक्षार्थं तु शिखाग्रंथिमूर्ध्वकेशीतिमंत्रतः । भूतानि प्रार्थयेत्तद्वदुत्तिष्ठंत्वितिमंत्र-
त्राणीतिमंत्रेण प्रार्थयेच्च ततो महीं । ककुभः प्रार्थयेत्तिष्ठन्येपथामितिमंत्रतः ॥ उपविश्य शुचौ देशे प्राणानायम्य वाग्यतः । संक-
ामौ तु यदर्थे येन वेति च ॥ रुद्रप्रश्नस्य छंदोऽत्र स्यादनुष्टुबृषिस्तथा । अघोरः सर्वपापघ्न आदित्यो देवता परः ॥ न्यासं भवादिभिः
नमोऽतैः प्रणवान्वितैः । मंत्रैरष्टभिरीशानं बलाद्युक्तैः शुभप्रदैः ॥ भवं च पादयोर्न्यस्य शर्वं न्यस्योरुमध्यतः । ईशानं गुह्यदेशे तु ना-
शुपतिं न्यसेत् ॥ रुद्रं च त्वहृदि विन्यस्य मुखे चोग्रं तु विन्यसेत् । भीमं ललाटदेशे तु महांतं शीर्षिण विन्यसेत् ॥ सर्वैस्तु कवचं कार्यमेकैकेना- ॥१८
ुत्तमं । तथैवांत्यानुवाकस्थैर्मंत्रैर्द्वादशभिः शुचिः ॥ न्यासं कृत्वाऽनुलोम्येन वर्जयित्वाऽभिचारकं । आद्यं तु पादयोर्न्यस्य द्वितीयं जानुदेशके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वोस्तृतीयं विन्यस्य चतुर्थं गुह्यदेशतः। पंचमं नाभिदेशे तु षष्ठं तु हृदये न्यसेत् ॥ सप्तमं कंठदेशे तु मुखे चाष्टममुत्तमं। नवमं नासिका-
तु दशमं नेत्रयोर्द्वयोः ॥ एकादशं ललाटे तु द्वादशं शीर्ष्णि विन्यसेत्। त्रयोदशं तु कवचं हुं कृत्वाऽस्त्रे तु फट् तथा ॥ एवं न्यासविधिं
वा ततो मुद्रां प्रदर्शयेत्। एषतेरुद्रभागस्तमिति मुद्राप्रदर्शनं ॥ श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः। मुखे त्वन्नाद्यकामस्तु
वायां रोगनाशने ॥ हृदये सर्वकामस्तु नाभौ ज्ञानी प्रदर्शयेत्। प्रजाकामस्तु गुह्ये वै पशुकामस्तु जंघयोः ॥ जानुनोर्ग्रामकामस्तु राष्ट्र-
मस्तु पादयोः। वशीकरणकामस्तु वामहस्ते प्रदर्शयेत् ॥ पापक्षयेऽभिचारे वा व्याधेरपगमे तथा। वहिः शरीरात्कुर्वीत शिवस्याक्षेति च
रन् ॥ एवं प्रदर्शयित्वा तु ततो ध्यानं समाचरेत्। त्रिलोचनं चतुर्बाहुं सर्वाभरणभूषितं। नागयज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं ॥ वृष-
कंधसमारूढमुमादेहार्धधारिणं। अमृतेनाप्लुतं शांतं चंद्रार्धकृतशेखरं ॥ शुद्धस्फटिकसंकाशं जटामुकुटमंडितं। वरदाभयहस्तं च सर्वका
फलप्रदं ॥ एवं ध्यात्वा द्विजः सम्यगनंगांगहरं हरं। अंगानां यजनं कुर्यात्सम्यग्भक्तिपरायणः ॥ हृदये हृदयं जप्त्वा मूर्ध्नि सूक्तं च पं
हर्षं। शिखायामुत्तरं चैव नारायणमनुत्तमं ॥ कवचेऽप्रतिरथं तद्वदस्त्रे च शतरुद्रियं। जप्त्वांऽगानि जपेच्छांतिं त्रिः शांतिरिति चोच्चरेत्
शांतिं शंनोवातः ऋचंवाचमित्याद्यां। स त्रिविधोऽपि रुद्रः प्रत्येकं पंचधा। रूपं रुद्रो रुद्री महारुद्रोऽतिरुद्रश्चेति। तत्र नमकचमकमा
भयं रूपं। अन्ये शातातपेनोक्ताः। षडंगैकादशी रुद्रो रुद्रैकादशरुद्रतः। एकादशभिरेताभिर्महारुद्रश्च कथ्यते ॥ एकादशमहारुद्रैरतिरुद्र
रितः। तथा। विधितो नमकावृत्ती रुद्र एकादशात्मिका। रुद्रस्यैकादशावृत्त्या रुद्रैकादशिनी स्मृता ॥ एकादशभिरेताभिर्महारुद्रश्च क
एकादशमहारुद्रैरतिरुद्र इतीष्यते ॥ अस्यार्थमाह महार्णवः। पूर्वन्यासांते एकादशनमकानुवाकान् पठित्वाऽऽद्यं चमकानुवाकं पठेत्। पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा द्वितीयं चमकानुवाकमित्येकादशावृत्त्या रुद्र इत्युच्यते । एकादशिनी रुद्र इति पर्यायः । तदाह बौधायनः।नमस्ते रुद्रमन्यइवत्येकाद
वाकानामेकमेकं जपेदिति । सर्वनमकान्पठित्वा एकैकं चमकानुवाकं पठेदित्यर्थः । तेनैकरूपे सर्वचमकजपो नतु विभागः । तैरेकाद
रुद्रीत्युच्यते । सैव लघुरुद्रो रुद्रैकादशिनीति वोच्यते । ताभिरेकादशभिर्महारुद्रः । तैरेकादशावृत्तैरतिरुद्र इति । एतदेवाहतुर्हेमाद्रौ कौशिक
धायनौ । सद्यादिपंचमंत्रांश्च रुद्रानेकादशैव तु । जपित्वा सर्वरुद्रांश्च चमकाद्यं ततो जपेत् ॥ पुनरेतज्जपेत्सर्वं द्वितीयं चमकं तथा। एवमेकादशगुण
क्रमेण चमकांस्तथा ॥ रुद्रैकादशिनी त्वेषा सर्वकामफलप्रदा । सर्वपापक्षयकरी सर्वशांतिप्रदायिनी ॥ एकादशगुणा सैव रुद्र इत्यभिधीयते
रुद्रो लघुरुद्रः ॥ रुद्र एकादशगुणो महानित्यभिधीयते । महानेकादशगुणस्त्वातिरुद्र इहोच्यते॥ रुद्रं महातिरुद्रं च जपेत्कार्यस्य गौरवात् । अयं
रेकादशिनीक्लृप्त्या महारुद्रादिप्रकारः सर्वशाखिनां जपे होमेऽभिषेके च समानः । काण्वकातीयानां त्वेकादशधा चमकविभागं वक्ष्यामः। तथ
नो होमं प्रकुर्वीत नमःशंभवमंत्रतः । रुद्रैकादशिनीजप्ये त्रयस्त्रिंशदथाहुतीः ॥ रुद्रे शतत्रयं प्रोक्तं षष्ट्या त्र्यधिकयाऽधिकं । चत्वारश्च तथा
द्रे सहस्राः सप्तवर्जिताः ॥ चत्वारिंशत्सहस्राश्च होतव्याश्चतुरुत्तराः । ऊनाश्चैवाष्टसप्तत्या त्वतिरुद्रे विनिश्चयः ॥ पापक्षयेऽभिचारे च
ा व्याधिविमोचने । पालाश्यः समिधः कार्या नान्यत्रोत्पातदर्शनात् ॥ औदुंबर्यश्च समिधो मध्वक्ताश्च तथाऽक्षताः । ग्राह्याश्चान्नाद्यका-
श्रियै शांत्यै च पायसं ॥ सर्वकामेन वा ग्राह्यमायुर्वृद्ध्यै तिलाः स्मृताः । घृताक्ता अथवा दूर्वास्तेजस्कामेन वै घृतं ॥ व्रीहयः प-
कामेन राष्ट्रकामेन वै यवाः । उपविश्य शुचौ देशे दूर्वास्तंबे जपेद्यदि ॥ जुहुयाच्छ्वेतपुष्पाणि स विश्वं कुरुते वशं । स्पृष्ट्वाऽश्वत्थं जपे- ॥१
स्तु रुद्रैकादशिनीं नरः ॥ रोगान् ज्वरातिसारादीन् नाशयेदुल्बणानपि । होमः पलाशसमिधा कर्तव्यो मधुसंयुतः ॥ एकादशमहारुद्रान्परच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ः ॥ जपेदेकादशगुणान् होमस्तु विविधः स्मृतः । तिलैराज्येन संसिक्तैर्विधिवत्तन्निवर्त्तयेत् ॥ रुद्रैकादशिनीजप्ये शतमेकोनमिष्यते ।
था रुद्रे नवत्यैकोनया युताः ॥ एवं त्रिगुणिताः कार्या महारुद्रातिरुद्रयोः । वृष्टिकामेन वा योज्या हस्त्यश्वामयशांतये ॥ उद्भवे
च ग्रहाणां तु विपर्यये । गृहग्रामादिशांत्यै च तिलाश्वाज्येन संयुताः ॥ होमांते सर्वकामानां कूष्मांडैश्चापि वा जपः । होतव्यमाज्यं
हाव्यात्व्हतिभिस्तथा ॥ परिषिच्य ततो वह्निं तत्त्वायामीति चार्च्य च । अभिषेकं ततः कुर्यान्मंत्रैस्तल्लिंगकैः शुचिः ॥ आदावंते
य पार्वतीसहितं शिवं । लोकपालांश्च संपूज्य विधिवच्छिवसंनिधौ ॥ गंगां दुर्गां च मंत्रेण विधिवद् द्विरदाननं । स्नपनोक्तवि-
त्वरितेन नमस्कृतिः ॥ तर्पयेद्विविधै रत्नैः पयसा पायसेन वा । प्रीयतां शंभुरित्युक्त्वा भूमिदेवान् शुचिः शुचीन् ॥ (भूमिदेवा ब्राह्मणः)
तु दक्षिणां तेभ्यः प्रणिप्रत्य विसर्जयेत् ॥ एवं कृते स भगवान्प्रीतः कामान्प्रयच्छति ॥ अकामस्य फलं मुक्तिर्नात्र
ार्या विचारणा । बौधायनोक्तमन्त्रोक्तं सर्वकामसमृद्धये ॥ अयं रुद्रैकादशिनीप्रकार आपस्तंबशाखीयरुद्रपरः । माध्यंदिनकाण्व
देशाखिनां तु चमकेष्वेकादशानुवाकाभावाच्चमकानेकादशधा विभज्यैकैकं भागं नमकेषु संयोज्यैकादशिनीं कुर्यात् । होमेऽप्येवं । अ
षडंगन्यासो वैकल्पिकः । पंचांगरुद्राणामित्युक्तेरिति केचित् । अभिषेके तदुक्तेः षट् । अन्यत्र पंचेति महार्णवः । बौधायनोक्तैस्तैत्तिरी
शाखीयरुद्रे पंचांगन्यासाः । षडंगेतिस्मृतिर्वाजसनेय्यादिपरा । बृहत्पराशरेण तथोक्तेरित्यन्ये । अभिषेकरुद्रपरेत्यपरे । यत्तु छंदोगानां साम
धानब्राह्मणे । आवोराजा तद्वोवर्गं आज्यंदोहानि देवव्रतानि चैषा रौद्री नाम संहितैनां प्रयुंजन् रुद्रं प्रीणातीत्युक्तं । आवोराजेत्येकं साम ।
द्वोवर्गश्चत्वारि । आज्यंदोहानि त्रीणि । देवव्रतानि त्रीणि । एतत्फलांतरार्थं प्रयोगांतरं । नत्वेतैर्महारुद्रादिकरणे प्रमाणमस्ति । तेन यद्रुर्जरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेतद्दशात्सामभिर्महारुद्राद्याचरणं यच्च ऋग्वेदिना रुद्रसूक्तैस्तन्निर्मूलं भ्रांतिकृतमभिमानमात्रमित्युपेक्ष्यं । मंत्रस्य प्रतिनिध्यभावाच्च । अतए
बृहत्पराशरेण कुर्याद्विधानंरुद्राणांयजुर्वेदेनसंमितमित्युक्तं । अथ बृहत्पराशरोक्तः कातीयानां विशेषः । इषेत्वादिषु मंत्रेषु खंब्रह्मांतेषु
क्रियाः । दशप्रणवयुक्तास्ता भूर्भुवःस्वरितीति च ॥ दशप्रणवा द्वेधा । आदौ प्रणवमुच्चार्य व्याहृतीः प्रणवान्विताः । मंत्रादौ प्रणवः
र्यो मंत्रांते प्रणवः पुनः ॥ ततो व्याहृतिसंयुक्तस्त्वंते च प्रणवः सदेत्येकः पक्षः । अन्यस्तु । आदौ प्रणवमुच्चार्य सप्तव्याहृतयस्ततः । मंत्र
प्रणवः कार्यो मंत्रांते प्रणवः पुनरिति । तथा । मनोज्योतिरबोध्यग्निर्मूर्धानं च मर्माणिते । मानस्तोकइति ह्येतत्प्रथमं पंचकं स्मरेत् ॥ त
तेरुद्रेत्याद्यैराद्यं न्यासं दशाक्षरस्य वर्णैर्द्वितीयं त्रातारमित्याद्यैः संपुटं च बौधायनवदुक्त्वाह । सुत्रामादिदिशांपालान् प्राच्यादिषु स्म
रौद्रीकरणमेतद्धि कृत्वा पापात्प्रमुच्यते इत्याद्युक्त्वा । पंचास्यं सौम्यमात्मानं सर्वाभरणभूषितं । मृगलांछनमूर्धानं शुद्धस्फटिकसंनिभं ।
हस्रविस्फूर्जदुरगेंद्रोपवीतिनं । सप्तार्चिरुज्ज्वलज्ज्वालजटाजूटकिरीटिनं ॥ सहस्रकरविभ्राजत्खट्वांगादिविभूषितं । देदीप्यमानं चंद्रार्क-
त्रिनेत्रिणं ॥ जगद्बाधिर्यकृन्नादचंचड्डमरुधारिणं । केयूरबद्धनागेंद्रमूर्धरत्नविराजितं ॥ मेखलाकिंकिणीमालामुक्ताहारविराजितं ।
कनिर्गच्छद्गंभीरारावनूपुरं ॥ सहेमपट्टनीलाभं व्याघ्रचर्मोत्तरीयकं । दिग्देवतासमायुक्तं सुरासुरनमस्कृतं ॥ द्विजो ध्यात्वैवमात्मानं
रूपिणं । संप्रध्वस्तांतरायः संस्ततो यजनमारभेत् ॥ अनुलिप्ते सुगुप्ते च देशे गोचर्ममात्रके । स्थंडिलेऽब्जमालिख्य मंत्रमालिख्य
दशाक्षरमित्यर्थः । तत्र पूजादिकं कुर्यान्नमःशंभवायेति च । यत्तु तेनैकादशकलशस्थापनमुक्त्वा तत्र रुद्रपूजनं रुद्रैश्चाभिमंत्रण-
म्यं प्रयोगांतरं । नतु रुद्रांगं । तच्च वक्ष्यामः । मानोमहांतमिति च सिद्धं मंत्रं स्मरेद्द्विजः । दशाक्षरेण मंत्रेण दद्यात्पाद्यार्घ्यके द्विजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्च सोंकारैर्मानस्तोकइति च्चपि । शंभवायेतिमंत्रेण दद्याद्गंधोदकादिकं ॥ पुष्पधूपप्रदीपादीन् यथालाभं निवेद्य च । दशाक्षरेण
कुर्यात्पुनर्द्विजः ॥ शिखा तस्य तु रुद्रस्योत्तरनारायणः स्मृतः । शिरः पुरुषसूक्तं च शिवसंकल्पकं च त्वत् ॥ कवचं चाऽप्रतिरथं
ाहृतस्मृतं । शतरुद्रियमस्त्रं च देवस्यास्त्रं प्रकल्पयेत् ॥ शतरुद्रियं रुद्राध्यायं । अथातःशतरुद्रियंजुहोतीति तस्यैव शतरुद्रिय-
ानात् । एवं तैत्तिरीयाणामपि । महार्णवस्तु त्वमग्नेरुद्रइति शतरुद्रीयं वदन् भ्रांत एव । रूपशब्देन सादृश्यवाचिना गौणतोक्तेः ।
चांगानि स्मरेदष्टप्रणवं च जपेद्द्विजः । पंचांगानि सद्योजातादीनि । हेमाद्रौ चैवं । उद्धृत्य प्रणवेनेशं विकिरेण विसर्जयेत् ॥ एवं पूजां कृत्वा
पं कुर्यात् । तत्रैकादशिन्यां चमकं विनैव रुद्राध्यायमात्रस्यैकादशधाऽऽवृत्तिः । एकादशगुणान्रुद्रान्जपित्वारुद्रतांव्रजेदिति बृहत्पराशराद्यै
द्रमात्रजपोक्तेः । चमकानां च रुद्रशब्दवाच्यत्वाभावादिति केचित् । तन्न । अस्य प्रयोगांतरत्वादत्र रुद्रैकादशिनीमहारुद्रादिप्रकारानु
जपमात्रोक्त्या होमे तदप्रसंगात्सर्वोपसंहारेण प्राप्तेर्बाधकाभावाच्च । अन्ये तु सर्वचमकानां प्रत्यावृत्ति जपमाहुः । तत्तु निर्मूलं । तेन
ायनहेमाद्र्यादिसंवादात्काण्वानां कातीयानां चाष्टौ चमकानुवाकानेकादशधा कृत्वा प्रत्यावृत्त्येकैकं भागं योजयेदित्येव साधु । एवं होमेऽपि
चमकविभागास्तु । आदौ चत्वारोऽनुवाकाः । ते च वाजश्चमइति चतस्रः । सत्यंचमइति चतस्रः । उर्क्चमइति चतस्रः । अश्माचम
तिस्रः । इति प्रथमः । अग्निश्चमइंद्रश्चमइति तिस्रः कंडिकाः । इति द्वितीयः । अंशुश्चमइति तिस्रः । इति तृतीयः । अग्निश्चमे घर्मश्चम
द्वे । इति चतुर्थः । एकाचमेतिस्रश्चमइत्येका । इति पंचमः । चतस्रश्चमेऽष्टौचमइत्येका । इति षष्ठः । त्र्यविश्चमे त्र्यवीचमइति द्वे । इति सप्तम
वाजायस्वाहेत्येका । इत्यष्टमः । अयंतेराट् । इति नवमः । आयुर्जज्ञेनेति द्वे । इति दशमः । सोमश्चयजुश्चेत्येका । इत्येकादश इति । अत्र मूलं तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवसोर्धारांजुहोतीत्युपक्रम्य इदंचमइदंचमइति चमकानुक्त्वा अथाधैंद्राणिजुहोति । अथग्रहान्जुहोति । अथैतान्यज्ञक्रतून्जुहोति । अथ
युजःस्तोमान्जुहोति । अथयुग्मतोजुहोति । अथवयांसिजुहोति । अथनामग्राहंजुहोति । अथाहेदंतेराट् । अथकल्पान्जुहोति । अथाहस्तोम
यजुश्चेत्यादयः श्रुतयो जाग्रतीति दिक् । अयं हि श्रुतावेकादशधाविभाग एतद्विषय एव । विषयांतराभावात् । तत्त्वं तु भागेष्वनुवाकत्वाभा
मकानुवाकेष्वेकमेकंयोजयेदिति बौधायनसूत्रहेमाद्यादावनुवाकानुषंगेण भागहारयोगादष्टमानुवाकस्यैव प्रयाजैकादशत्वकपालमंत्रस्यां
नवकपाल इवाभ्यासः । अतएव दशमेऽध्याये एकविंशेनातिरात्रेणेत्यादिस्तोमविवृद्धावेकविंशतिमनुब्रूयादिति सामिधेनीवृद्धौ च वेदेऽन्यत्र सत्त्
दागमेन संख्यापूरणमुक्तं । यत्त्वन्यत्राऽप्रसिद्धं तत्र प्रयाजादिनाऽभ्यासेनैव पूरणमुक्तं । आपस्तंबसूत्रेऽप्यंताल्लोपोविवृद्धिर्वेत्युक्तं । एवमत्रांत्यस्यैव
कानुवाकस्य त्रिरभ्यासो युक्तः । अष्टाकपालमंत्रस्यैंद्राग्ने इव सामिधेनीवृद्धौ स्तोमवृद्धौ चैकविंशतिमनुब्रूयादितिवदन्यत्र चमकानुवाकाऽप्
यागमबाधे प्रयाजैकादशत्ववदभ्यासस्यैव प्राप्तेरंताल्लोपोविवृद्धिर्वेत्यापस्तंबोक्तेश्च । यत्तु कातीयाः काण्वाश्च परशुरामीयं पठंति । सामगाद्यं
पिद्रुद्रं केवलानि नवांतरे । सांगं सशीर्षकं चांत्यं निरंगमिति केचनेति । अंत्यं रूपं पठित्वांऽगानीति केचित् । अन्ये तु संपुटे मानाभावा-
निवदादावंगानि ततो रुद्र इत्याहुः । वयंसोमेत्यष्टावृचः शीर्षं । उग्रश्चेत्यादिसप्तरुद्रजपश्चेत्याहुः । तद्वचनाभावान्निर्मूलमंधपरं-
पेक्ष्यं । तथा । शिवसंकल्पं त्वृदयं सूक्तं स्यात्पौरुषं शिरः । प्राहुर्नारायणीयं च शिखां तस्योत्तराभिधं ॥ अब्ध्यःसंभूत-
यणमित्यर्थः । आशुःशिशानः कवचं नेत्रं विभ्राड्बृहत्स्मृतं । शतरुद्रीयमस्त्रं स्यात् षडंगक्रम ईरितः ॥ त्वृच्छिरस्तु शिखा ॥१
स्त्रं महामते । प्राहुर्विधिज्ञा रुद्रस्य षडंगानि स्वशास्त्रतः ॥ अत्र मूलं बृहत्पराशरोक्तं प्रागुक्तं । एषामृषिदैवतच्छंदांसि तेनैवोक्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

। अक्षतान्वा तिलान्वापि यवान्वा समिधोऽपि वा । शंभवायेति जुहुयात्सर्वांस्तानाज्यसिक्तकान् ॥ पंच पंचाथ षड्वाऽऽद्या अष्टावष्टौ
दशापि वा । दशदशैकादश वा जुहुयात्साधको द्विजः ॥ जपतर्पणहोमादौ रतो यो वत्सरं जपेत् । अथ प्रयोगांतराण्याह । अथातः सिद्धि-
कामः सन्कंदमूलफलाशनः । गोमूत्रयावकक्षीरदधिशाकाज्यभोजनः ॥ हविष्यभोजनो वाऽसौ विप्रो मुन्यन्नभोजनः । जपहोमादि कुर्वा-
णो यथोक्तफलभाग्भवेत् ॥ शिरसा सह रुद्राणां जप्त्वैकादशिनीं ध्रुवं । सर्वे मंत्रा भवंत्यस्य ब्राह्मगस्योक्तकारिणः ॥ एकादश शुभान्कुंभा-
नाहरेद्विधिवच्च तान् । सहिरण्यान्सवस्त्रांश्च फलपुष्पोपशोभितान् ॥ गंधोदकाक्षतैर्युक्तान्पूजयेद्रुद्रभक्तितः । अथैकादशभी रुद्रैरेकैकमभिमंत्रये-
॥ एवं संपूज्य तान्कुंभान्नमस्कृत्याभिमंत्र्य च । एकादशाहमात्मानमन्यं वा हितकाम्यया ॥ विनायकोपसृष्टं वा स्नापयेत्काकपद्धतं ।
काकपादस्पृष्टमित्यर्थः) मृतवत्सां काकवंध्यां स्नापयेच्च तथातुरं ॥ अनड्वाहं च वस्त्रं च दद्याद्धेनुं च दक्षिणां । भोजयेद्विदुषो विप्रान्समाप्तौ
कर्मणो द्विजः ॥ नमोगणेभ्य इत्यस्य मंत्रस्य ब्राह्मणोऽयुतं । जप्त्वा च श्रीफलैर्हुत्वा सर्वकार्येषु सिद्धिभाक् ॥ नमोअस्तुनीलग्रीवायेत्येतन्मंत्रेण
तत वा । आवर्त्योदकमामंत्र्य विषार्तश्रवणे जपेत् ॥ विषेण मुच्यते सद्यः कालदष्टोऽपि जीवति । ग्रहग्रस्तं तथा प्रेतरक्षःशाकिनिदूषितं ॥
प्रमुंचधन्वनइति भस्मना सर्षपैस्तथा । ताडयेन्मुंचमुंचेति शीघ्रमेव विमुंचति ॥ नमःशंभवइत्यस्य मंत्रस्य वाऽयुतं द्विजः । जप्त्वा खदि
समिधो हुत्वा विप्रः सहस्रकं ॥ कटुतैलप्लुताः सम्यङ् मंत्रांते चामुकं हन । फट्कारेण च जुहुयात्क्षयोऽरेराचिराद्भवेत् ॥ जलमध्ये
वृत्त्या सद्यो वृष्टिर्निगद्यते । नाभिमात्रे जले विप्रः प्रविश्य जुहुयाज्जलं ॥ कुर्यादेकार्णवां पृथ्वीं मंत्रमाहात्म्यतो भृशं । इत्यादि ज्ञेयं ॥
अथ प्रयोगः । कर्ता देशकालौ स्मृत्वा अमुककामनयाऽमुकरुद्रजपं होममभिषेकं वा स्वयं ब्राह्मणद्वारा वा करिष्ये इति संकल्प्य गणेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजापुण्याहवाचनमातृकापूजानांदीश्राद्धानि कृत्वाचार्यं ब्रह्माणमृत्विजश्च वृणुयात् । तत ऋत्विजो देशकालौ स्मृत्वाऽमुकरुद्रजपं करिष्य इत्यु
क्त्वा न्यासान्कुर्युः । तत्र बौधायनोक्ताः पंच न्यासाः सर्वेषां समानाः । कात्यायनपरिशिष्टे त्वन्ये न्यासा उक्ताः । ब्रह्मयज्ञारंभे यथावि
स्नात्वा छंदःपुरुषं शरीरे न्यसेदित्युक्त्वा तिर्यग्विलश्चमस ऊर्ध्वबुध्नस्तस्य चक्षुषी गोतमभरद्वाजौ श्रोत्रे विश्वामित्रजमदग्नी नासिके
सिष्ठकश्यपौ वागत्रिर्गायत्री छंदोऽग्निं देवतां शिरसि विन्यसेत् । उष्णिहं सवितारं ग्रीवास्वनूके बृहती बृहस्पतिं बाह्वोर्बृहद्रथंतरे द्या
पृथिवी मध्ये त्रिष्टुभामिंद्रं श्रोण्योर्जगतीमादित्यं मेढ्रेऽतिच्छंदसं प्रजापतिं पायौ यज्ञायज्ञियं वैश्वानरमूर्वोरनुष्टुभं विश्वान्देवानष्ठीवतोः पंक्ति
मरुतः पादयोर्द्विपदां विष्णुं प्राणेषु विच्छंदसं वायुं न्यूनातिरिक्तेष्वंगेषु न्यूनाक्षरं छंद आपो देवतेत्येवं सर्वांगेषु योजयित्वा देवमयः संपद्यते
पानुग्रहसमर्थो भवति ब्रह्मतेजः प्रवर्धते न कुतश्चिद्भयं विंदत ऋङ्मयो यजुर्मयः साममयस्तेजोमयोऽमृतमयः संभूय ब्रह्मैवाभ्येति
स्मादेतन्नाऽब्रह्मचारिणे नाऽतपस्विने नाऽसंवत्सरोषिताय नाऽप्रवक्त्रेऽनुब्रूयादित्यादि । तदेतद्ब्रह्मयज्ञे सर्वजपेषु चोक्तमनुक्रमण्यां । अ-
स्य रुद्रजपमात्रांगत्वे किं मानमिति न विद्मः । तथा जातवेदसइति पुरश्चरणं । चतुःस्रक्तिरित्यासनं । मनोज्योतिरिति हृदये । अबोध्यग्निरिति
शिरसि । मूर्धानंदिवइति शिखायां । मर्माणितइति कवचं । विश्वतश्चक्षुरिति नेत्रे । मानस्तोक इत्यस्त्रं । अथ न्यासाः । तत्र पंचांगन्यासेषु
शिखाद्यस्त्रांतमेकत्रिंशदंगन्यासः प्रथमः । मूर्धादिपादांतं दशांगन्यासो द्वितीयः । पादादिमूर्धांतं पंचांगन्यासस्तृतीयः । गुह्यादिमस्तकांतं
पंचांगन्यासश्चतुर्थः । हृदयाद्यस्त्रांतं पंचांगन्यासः पंचमः । षडंगन्यासपक्षे प्रजननादिषोडशांगन्यासः षष्ठः । हेमाद्रौ महार्णवे च बौधायनः । ॥१७
थातः पंचांगरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामो यातेरुद्रशिवातनूरिति शिखायामस्मिन्महत्यर्णवइति शिरसि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्राणीति ललाटे । हंसःशुचिषदिति भ्रुवोर्मध्ये । त्र्यंबकमिति नेत्रयोः । अत्र कातीयानामग्निर्ज्योतिरिति नेत्रं । नमःस्रुत्याय च पथ्याय-चेति कर्णयोर्मानस्तोकइति नासिकायामवतत्येति मुखे । नीलग्रीवौ द्वौ कंठे । नमस्तेअस्त्वायुधायेति बाह्वोः । यातेहेतिरित्युपबाह्वोः । येतीर्थानीति हस्तयोः । सद्योजातमितिपंचानुवाकान् पंचस्वंगुलीषु । नमोवःकिरिकेभ्य इति हृदये । येवृक्षेष्वित्युदरे । नमःशंभवइति कक्षयोः । नमोगणेभ्य इति पृष्ठे । नमोहिरण्यबाहवइति पार्श्वयोः । विज्यंधनुरिति जठरे । हिरण्यगर्भ इति नाभौ । मीढुष्टमेति कट्यां । येभूतानामधिपतयइति गुह्ये । सशिराजातवेदाइत्यपाने । मानोमहांतमित्यूर्वोः।एषतेइति जान्वोः। संसृष्टजिदिति जंघयोः । विश्वंभूतमिति गुल्फयोः । येपथामिति पादयोः । अध्यवोचदिति कवचं । नमोबिल्मिने इत्युपकवचं । नमोअस्तुनीलग्रीवायेति तृतीयनेत्रं । प्रमुंचधन्वनइत्यस्त्रं । यएतावंतश्चेति दिग्बंधः । इति प्रथमो न्यासः । ॐनमोभगवतेरुद्रायेति नमस्कारं न्यसेत् । ओंकारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः । मोकारं तु ललाटे वै भकारं मुखमध्यतः ॥ गकारं कंठदेशे तु वकारं हृदि विन्यसेत् । तेकारं दक्षिणे हस्ते रुकारं वामतो न्यसेत् ॥ द्राकारं नाभिदेशे तु यकारं पादयोर्न्यसेत् । इति द्वितीयः । अत्र कातीयास्तृतीयन्यासांतरमाहुः । यथा। शीर्षे तु विन्यसेद्रुद्रं ललाटे चंद्रशेखरं । नेत्रे त्रिलोचनं देवं भैरवं श्रोत्रयोर्न्यसेत् ॥ घ्राणे तु शंकरं देवं मुखे पशुपतिं तथा । नीलकंठं कंठदेशे हृदये व्यापकं न्यसेत् ॥ करे गंगाधरं देवं शिवं नाभौ तु विन्यसेत् । महादेवं तथा गुह्ये जंघयोस्त्र्यंबकं न्यसेत् ॥ सर्वज्ञं विन्यसेत्पादे शिवं सर्वत्र विन्यसेदिति । तन्निर्मूलं । बौधायनः । सद्यं च पादयोर्न्यस्य वामं न्यस्योरुमध्यतः । अघोरं हृदि विन्यस्य मुखे तत्पुरुषं न्यसेत् ॥ ईशानं मूर्ध्नि विन्यस्य हंसो नाम सदाशिवः । हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः । एवं न्यासविधिं कृत्वा ततः संपुटमारभेत् ॥ इति तृतीयः । त्रातारमिंद्रं त्वंनोअग्ने सुगंनःपंथा असुन्वंतं तत्त्वाया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यानोनियुद्धिर्वयंसोम तमीशानमस्मेरुद्राः स्योनापृथिवीत्येतत्संपुटमिंद्रादीन्दिक्षु विन्यस्यैवमेवात्मनि रौद्रीकरणं कृत्वा त्वगास्थिगतैः पापैः
प्रमुच्यते सर्वभूतेष्वपराजितो भवति। यक्षगंधर्वभूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकिनीसर्पश्वापदतस्कराद्युपद्रवाः सर्वे ज्वलंतं पश्यंतु।
माऽऽरक्षंतु। मनोज्योतिरबोध्यग्निर्मूर्धानं मर्माणिते जातवेदाइति गुह्योदरहृदयमुखशिरःस्वभिमंत्र्यात्मरक्षा कर्तव्या। इति चतुर्थः। शिव-
संकल्पं हृदयं पुरुषसूक्तं शिर उत्तरनारायणं शिखाऽप्रतिरथं कवचं शतरुद्रियमस्त्रं पंचांगं सकृज्जपेदष्टांगं प्रणम्य हिरण्यगर्भो यः-
प्राणतो ब्रह्मजज्ञानं महीद्यौरुपश्वासयाऽग्नेनयेमंयमप्रस्तरमाहिसीद यातेअग्नेयज्ञियातनूस्तये॰ सक्षयएहीत्यंतं। यथावःस्वाहाग्नयेदाशेमेति-
निपाहीत्यंता ऋचो जपेत्। अथात्मानं रुद्ररूपं ध्यायेत्। अत्र कचिदर्थ उच्यते। सर्वत्र तैत्तिरीयः पाठः। उपबाहुः प्रकोष्ठः। स-
द्योजातादीन्पंचस्वंगुलीष्वंगुष्ठतर्जन्यादिषु। नमोवःकिरिकेभ्य इत्यादौ देवानाऽऽहृदयेभ्य इत्यस्योत्तरेष्वनुषंगः। नमोहिरण्येत्यादौ
नमोऽस्तं यजुः। सशिराजातवेदाइत्यपान इति। अस्यार्थः। जातवेदसेसुनवामसोमेत्यस्या ऋचोऽग्रेतनं तामग्निवर्णातपसाऽग्नेत्वंपारय
विश्वानिनोदुर्गहा पृतनाजितऽऽसहमानमुग्रमिति ऋक्चतुष्टयं शिर इत्युच्यते। तेन जातवेदसे इत्याद्याः पंचर्चः अपाने न्यसेदिति।
द्वितीयन्यासे। ॐनम इत्यादिना नमस्कृत्य ॐमूर्ध्ने नमः। नं नासिकायैनमः। मों ललाटाय नम इत्यादि न्यसेत्। तृतीये। सद्योजातं
प्रपद्यामीत्यादिपंचमंत्रान् पंचस्थानेषु न्यसेत्। तत्र ईशानःसर्वविद्यानामित्यंते सदाशिवों हंस इति मूर्ध्नि न्यसेत्। अत्र कातीया हे-
माद्युक्तैः सद्योजातादिपंचभिः पंचवक्त्रन्यासे प्रालेयामलबिंदुकुंदधवलमित्यादिपंचश्लोकैस्तद्ध्यानं ऋद्ध्याद्यष्टत्रिंशत्कलान्यासं चाहुस्तत्प्रतिष्ठाया-
मुक्तं। अत्र तु यजमानप्रतारणामात्रं निर्मूलं चेत्युपेक्ष्यं। चतुर्थे। त्रातारमित्यादिदशमंत्रैरिंद्रायनम इत्याद्यैश्च पूर्वादिदिक्ष्विंद्रादिभ्योऽजलिं कुर्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपुटोऽजलिः । एतैः संपुटं कृत्वा पुनरेतैरावृत्त्या नमस्कुर्यादिति महार्णवः । मनोज्योतिरिति गुह्ये । अबोध्यग्निरित्युदरे । मूर्धानंदिवइति हृदये । मर्माणिते० मदंतुदेवाइति मुखे । जातवेदायदिवापावकोसि० ददृश्यावावृत्स्वेति शिरसि । इयमेवात्मरक्षेत्युच्यते । पंचमन्यासे तु । यज्जाग्रत इति षडृचः पठित्वा हृदयाय०इति हृदये । सहस्रशीर्षेत्यष्टादशर्चं सूक्तं पठित्वा शिरसेस्वाहेति शिरसि । तत्र तथालोकाँऽअकल्पयन्नित्यंते वेदाहमेतंपुरुषंमहांतं० धातापुरस्तात्यमुदाजहारेति ऋग्द्वयमुपांत्यमधिकं । ततोऽद्भ्यःसंभूतःपृथिव्यैरसाच्चेत्यादि सर्वमनिषाणेत्यंतमुत्तरनारायणं पठित्वा शिखायैवषट् इति शिखायां । आशुःशिशानइति पंचदशर्चं विश्वाहाशर्मयच्छत्वित्यंतं सूक्तमुक्त्वा कवचायहुं इति कवचं । कातीयास्तु विभ्राडितिसप्तदशभिर्नेत्रमत्राहुः । ततः त्वमग्नेरुद्रइत्यनुवाकेन शतरुद्रियेण भूर्भुवःसुवःस्वाहेत्यंतेनास्त्रायफट् इत्यस्त्रमिति महार्णवः । तन्न । चयने शतरुद्रियंजुहोतीत्यादौ शतरुद्रियशब्देन रुद्रस्यैवोक्तेः । यत्तु सावित्रचयने श्रुतौ त्वमग्नेरुद्रइति शतरुद्रियस्य रूपमित्युक्तं तद्रूपमित्युक्तेर्गौणं । नचात्र गौणग्रहणे मानमस्ति । तेन रुद्राध्यायेनैवास्त्रं युक्तं । महार्णवस्तु भ्रांत एव । अत्र न्यासांगमंत्राणामृषिदैवतच्छंदांसि पाठभेदश्च महार्णवे ज्ञेयः । विस्तरान्नोच्यते । कातीयास्तु । नमस्तेरुद्रेतिषोडशर्चः शतरुद्रियमाहुः । ततो हिरण्यगर्भ इत्याद्यैरष्टांगं प्रणम्य ध्यानं । यथा । शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं । गंगाधरं दशभुजं सर्वाभरणभूषितं ॥ नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनं । व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं ॥ कमंडल्वक्षसूत्राभ्यामन्वितं शूलपाणिनं । ज्वलंतं पिंगलजटाशिखमुद्योतकारिणं ॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणं । दिव्यसिंहासनासीनं दिव्यभोगसमन्वितं ॥ दिग्देवतासमायुक्तं सुरासुरनमस्कृतं । नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययं ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणं । एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥ इति पंचांगन्यासाः । शातात-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पमते षडंगन्यासाः । तत्र पंचोक्ताः । षष्ठस्तु । प्रजननेब्रह्मातिष्ठतु । तिष्ठतु तिष्ठतां तिष्ठंत्विति यथार्हं सर्वत्र पठेत् । पादयोर्विष्णुः । हस्तयोर्हरः । बाह्वोरिंद्रः । जठरेऽग्निः । हृदये शिवः । कंठे वसवः । वक्त्रे सरस्वती । नासिकयोर्वायुः । नयनयोः सूर्याचंद्रमसौ । कर्णयोरश्विनौ देवौ । ललाटे रुद्रः । मूर्ध्न्यादित्याः । शिरसि शिवः । पृष्ठे पिनाकी । पुरतः शूली । पार्श्वयोः शिवशंकरौ । सर्वत्र वायुः । वहिः सर्वतोऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु । सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु । माꣳरक्षंतु । ततः अग्निर्मेवाचिश्रितइत्याद्यैर्यथालिंगमंगानि संमृशेत् । यथा । अग्निर्मेवाचिश्रितः । वाग्धृदये । हृदयंमयि । अहममृते । अमृतंब्रह्मणि । इति जिह्वां । वायुर्मेप्राणेश्रितः । प्राणोहृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । इति प्राणस्थानं हृदयं । यद्वा नासिके । सूर्योमेचक्षुषिश्रितः । चक्षुर्हृदये इत्यादि । इति चक्षुषी । चंद्रमामेमनसिश्रितः । मनोहृदयेइति वक्षः । दिशोमेश्रोत्रेश्रिताः । श्रोत्रꣳहृदये।इति श्रोत्रे ।आपोमेरेतसिश्रिताः । रेतोहृदये।इति गुह्यं । पृथिवीमेशरीरेश्रिता । शरीरꣳहृदये।इति शरीरं।ओषधिवनस्पतयोमेलोमसुश्रिताः।लोमानि ०। इति लोमानि । इंद्रोमेबलेश्रितः। बलꣳ०। इति वाहू । पर्जन्योमेमूर्ध्निश्रितः।मूर्धा०। इति मूर्धानं । ईशानोमेमन्यौश्रितः।मन्यु०। इति हृदयं । आत्मामआत्मनिश्रितः । आत्माहृदये । तदेव । पुनर्मआत्मापुनरायुरागात् । पुनःप्राणःपुनराकूतमागात्।वैश्वानरोरश्मिभिर्वावृधानः । अंतस्तिष्ठत्वमृतस्यगोपाः । इति सर्वांगं । इति षडंगः । हेमाद्रौ कौशिकस्तु । संकल्प्यजपहोमावित्युक्त्वा न्यासद्वयमाह । तद्यथा । न्यासं भवादिभिः कुर्यान्नमोंतैः प्रणवान्वितैः।भवं च पादयोर्न्यस्य शर्वं न्यस्योरुमध्यतः ॥ ईशानं गुह्यदेशे तु नाभौ पशुपतिं न्यसेत् । रुद्रं च हृदये न्यस्य मुखे चोग्रं तु विन्यसेत् ॥ भीमं ललाटपट्टे च महांतं शीर्ष्णि विन्यसेत् । तथैवांत्यानुवाकस्य मंत्रैर्द्वादशभिः शुचिः ॥ न्यासं कृत्वाऽनुलोम्येन वर्जयित्वाऽभिचारकं । आद्यं तु पादयोर्न्यस्य द्वितीयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जानुदेशतः ॥ ऊर्वोस्तृतीयं विन्यस्य चतुर्थं गुह्यदेशतः । पंचमं नाभिदेशे तु षष्ठं च हृदये न्यसेत् ॥ सप्तमं कंठदेशे तु मुखे चाष्टममुत्तमं । नवमं नासिकायां तु दशमं नेत्रयोर्द्वयोः ॥ एकादशं ललाटे तु द्वादशं शीर्ष्णि विन्यसेत् । त्रयोदशं तु कवचं कृत्वाऽस्त्रेण तु फट् तत इति । अथ सामान्यतो रुद्रस्य ऋष्यादि । तत्र सर्वेषामग्निर्भगवान्वा ऋषिः । रुद्रः शंभुर्वा देवता । महाविराट्छंदः । चमकानुवाकानामग्निः कांड ऋषिः । वाजादयोऽन्नादिविशेषा देवताः । आद्या गायत्र्याग्नावैष्णवी । शिष्टं यजुः । जपे वि० । । अथ विशेषतः । यथा । आद्यायाः कश्यपस्तत आत्रेयस्ततः कश्यपस्ततो द्वयोर्गौतमो धूम्रस्ततः कण्वस्ततो द्वयोः कश्यपो मरुत्वांस्ततो भगवांस्ततस्तिसृणां भगवान् द्वितीयानुवाके मंडूचःस्तृतीये भगवांश्चतुर्थे दुर्वासाः पंचमषष्ठयोर्भगवान्सप्तमानुवाके हेमकेशोऽष्टमे नवमे च नमोवःकिरिकांतं भगवानवशिष्टस्याग्नि-र्दशमानुवाके द्रापेइति द्वयोः पुलह इमारुद्रायेति द्वयोर्मांडव्यस्ततो देवराण् मानस्तोके इति भगवानारात्तइत्यत्रिः स्तुहिश्रुतामिति, इति याग्रः परिणोरुद्रस्येति भगवांस्ततो वैराजस्ततः पुलहस्ततो नारदस्ततश्चतुर्णां दुर्वासास्तत आसमाप्तेर्देवल इत्यृषयः । । अथ देवताख्या-असौयस्ताम्रइति द्वयोरादित्यात्मा यातेरुद्रेति स्कंदात्मा मानोमहांतमिति नंदीश्वरात्मा यातइषुरध्यवोचं नमोअस्तुनीलग्रीवायेत्यलाद्यैः चतुर्थपंचमषष्ठानुवाकानामारात्ते मीढुष्टमेतिद्वयोश्च शंभुर्यातेहेतिस्तिस्रोऽष्टमानुवाके नवमे च नमोवःकिरिकांतं मानस्तोके परिणइत्येतेषां होति-भगवानवशिष्टानां रुद्र इति देवताः । । अथ छंदांस्यसौयस्ताम्रोऽवतन्येत्यनयोरास्तारपंक्तिरसौयोवसर्पतीति षट्पदा जगती इमारुद्राय नतु येति चतस्रो जगत्य आरात्त इति तिस्रस्त्रिष्टुभो मीढुष्टमेति पंचपदा त्रिष्टुप् शिष्टा अनुष्टुभः । यातेरुद्रेति स्वराडनुष्टुप् । यामिषुं निचृदनुष्टुप् ऐक्तं अध्यवोचदित्यनुष्टुप् । द्वितीयानुवाके महागायत्री तृतीये बृहती चतुर्थे उष्णिक् पंचमषष्ठयोर्महाविराट् सप्तमे महापंक्तिरष्टमनवमयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेहातिष्टुप् शिष्टानि यजूंषीति छंदांसि । जपे वि० ॥ ॥ अथाभिषेकः । तत्र पंचांगरुद्राणांजपहोमार्चनविधिमिति बौधायनोक्तेः प्रा-
गुक्ताः पंचन्यासा भवंत्येव । अथातोरुद्रस्नानार्चनविधिंव्याख्यास्यामइति तेनैवोक्त्वा प्रजननेब्रह्मातिष्ठत्वित्यादिषष्ठन्यासोक्तेः षष्ठोऽपि भ-
वति । ततश्च समुच्चयः । तेनाग्निर्मेवाचीत्याद्यैर्यथालिंगमंगानि संस्पृश्येत्यंतं प्रागुक्तन्यासषट्कं कृत्वा आराधितोमनुष्यैस्त्वं सिद्धैर्देवासुरा-
भिः । आराधयामि भक्त्या त्वां मां गृहाण महेश्वरेति मनसाऽऽवाह्य गंधाद्यैः पंचोपचारैः संपूज्य त्र्यंबकंयजामहइत्यथैनमाराधयेत् । अ-
हनभिन्नान् पंच षड्वा त्र्यंबकमित्यनेन कुर्यादित्यर्थः । आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैःसहकेतुमद्भिर्वाताजवैर्बलवद्भिर्मनोजवैराय-
शीघ्रंममहव्यायशर्वोमिति दक्षिणनासया पुष्पेण पीठस्थे लिंगे संयोज्यावाह्य सद्योजातंप्रपद्यामीत्यावाहनं ददाति । त्र्यंबकं सद्योजात-
नमोनमइत्यासनं । त्र्यंबकं भवेभवेनातिभवेभवस्वमामिति पाद्यं । त्र्यंबकं भवोद्भवायनम इत्यापोहिष्ठेत्याद्यब्लिंगाभिश्च स्नान-
अथाद्भिस्तर्पयति । भवं देवं तर्पयामि । शर्वं देवं तर्प० । ईशानं देवं० । पशुपतिं देवं० । रुद्रं देवं० । उग्रं देवं० । भीमं देवं० । महां-
देवं० । त्र्यंबकं ज्येष्ठायनम इत्याचमनीयं । त्र्यंबकं श्रेष्ठायनम इति मधुपर्कं । त्र्यंबकं कालायनमइति गंधं । कलविकरणायनमइति पुष्पं ।
सर्वभूतदमनायनम इति धूपं । मनोन्मनायनम इति दीपं । भवोद्भवायनमइति नैवेद्यं । । अथाष्टौ पुष्पाणि । भवाय देवाय नमः । शर्वाय०
ईशानाय० पशुपतये० रुद्राय० उग्राय० भीमाय० महते देवाय नम इति । अथाऽघोरेभ्यइतित्रिभिः सदाशिवोमित्यंतैरघोरतनूरुपति-
ष्ठते । अथैतस्य हिरण्मयेन मूर्ध्नि कलशेन संततधारां निषिंचेन्मधुना सर्पिषा पयसा वेक्षुरसेन नारिकेलेन वाऽऽम्ररसेन वा तदलाभ उदकेन
वा नमस्तेरुद्रमन्यव इत्येकादशानामनुवाकानामेकमेकं जपेत्सर्वेषां पारे पुनराराधयेदुत्तमाराधने तदेतद्विधानमुक्तं । यत्र रुद्राभिषेक उक्तस्तत्रैत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विधानं ज्ञेयमित्यर्थः । तेनाभिषिक्तेनोदकेनाक्षीभ्याभित्यनुवाकेनाब्लिंगाभिश्चापादात्संमृज्यात्पापक्षयार्थी व्याधिमोचनार्थी जीवनार्थी श्रीकामः शांतिकामः पुष्टिकामो मोक्षार्थी च कुर्यादेवं कुर्वन्सिद्धिमाप्नोत्याचार्याय दक्षिणां ददाति दश गाः सवत्साः स्वर्णभूषिता वृषभैकादशास्तदलाभ एकां गां दद्यादित्याह भगवान् बौधायनः ॥ ॥ अथ महास्नानं । हेमाद्रौ लैंगे । स्नानं पलशतं ज्ञेयमभ्यंगः पंचविंशतिः । पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितं ॥ स्नाप्य लिंगं मदीयं च गव्येनैव घृतेन च । विशोध्य सर्वद्रव्यैस्तु वराद्भिरभिषिंचाति ॥ (वराद्भिः तीर्थादिपुण्योदकैरित्यर्थः) महास्नाने प्रसक्ते तु स्नानमष्टगुणं स्मृतं । जलेन केवलेनैव गंधतोयेन शक्तितः ॥ अनुलेपनं तत्सर्वं पंचविंशत्पलेन वै । शमीपत्रं च विधिना बिल्वपत्रं च पंकजं ॥ दशद्रोणैस्तु नैवेद्यमष्टद्रोणैरथापि वा । दशद्रोणसमं पुण्यमाढके तु विधीयते ॥ वित्तहीनस्य भक्तस्य नात्र कार्या विचारणा । जागरं कारयेत्तत्र प्रार्थयेत्तु यथाक्रमं ॥ भृत्यैः प्रदक्षिणं सार्धं प्रार्थेल्लिंगं महेश्वरं । मंत्रस्तु । द्रव्यहीनैर्मंत्रहीनैः श्रद्धाहीनैः सुरेश्वर । कृतं चाप्यकृतं चापि क्षंतुमर्हसि शंकर ॥ विशेषो मत्कृते व्रतकमलाकरे ज्ञेयः । इति महास्नानं ॥ ॥ अथ रुद्रहोमः । स द्विधा । समग्रहोमः प्रधानभूतो जपांगभूतश्चेति । तत्राद्ये मूलं जपहोमार्चनविधिंव्याख्यास्यामः । रुद्रहोमःपराशांतिःपायसेनघृतेनवेत्यादि बौधायनविष्णुधर्मादिवचनं प्रागुक्तं । अंगभूतस्तु दशांशहोमः शतांशश्च । स च तिलाद्यैः कार्य इति महार्णवः । अत्र यद्यपि तेन मूलं नोक्तं तथाप्यन्यमंत्रजपसामान्येन तेनोक्तं । तन्निर्मूलं । भवन्नपि आज्यद्रव्यमनादेशेजुहोतिषुविधीयतइति सामान्यवचनादाज्येन स्यात् । नतु तिलद्रव्यके मानमस्ति । अतएव हेमाद्रिणा रुद्रजपांगहोमो वाचनिक एवोक्तो नतु दशांशादिः । यथाह तत्रैव बौधायनः । ततो होमं प्रकुर्वीत नमःशंभवमंत्रतः । रुद्रैकादशिनीजप्ये त्रयस्त्रिंशदथाहुतीः ॥ रुद्रे शतत्रयं प्रोक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पङ्गया त्र्यधिकया युतं । रुद्रे लघुरुद्रे । चत्वारश्च महारुद्रे सहस्राः सप्तवर्जिताः ॥ चत्वारिंशत्सहस्राश्च कर्तव्याश्चतुरुत्तराः । ऊनाश्च सप्तसप्तत्या ह्यतिरुद्रे विनिश्चयः ॥ स च होमो नमःशंभवइतिमंत्रेण कार्य इति हेमाद्रिः । स च पूर्वोक्तविष्णुधर्मोक्तेः पायसेन घृतेन वा कार्य इत्युक्तं प्रतिभाति । तेन हेमाद्रिमते मंत्रविभाग एव नास्ति । अयं च जपांगहोम एव । जप्यइति सप्तम्या मंद्रंप्रायणीयायामितिवदंगित्वावगतेः । प्रधानभूते समग्रहोमे त्वस्याऽसंभवान्महार्णवोक्तः श्रुतिकल्पसूत्रादिषु चयनप्रकरणोक्त एव मंत्रविभागो ग्राह्यः । महार्णवेन तु प्रधाने समग्रहोममंत्रविभागस्यावश्यकत्वाजपांगेऽप्ययमेव ग्राह्यः । क्लृप्तत्वादपेक्षितत्वाच्चेत्युक्तं । शिष्टैश्चायमेवादृतः । स इदानीमुच्यते । तत्र मंत्रविभागः पंचधा । त्रेधा षोढा षोडशधा अष्टाचत्वारिंशत्पक्ष एकोनसप्तत्युत्तरशतपक्षश्चेति । अंत्यः प्रतिमंत्रपक्ष इत्युच्यते । तत्राद्यश्चरमायामिष्टकायांजुहोतीत्युक्त्वा त्रेधाविभक्तंजुहोतित्रयइमेलोका इति श्रुत्योक्तः । बौधायनोऽपि । नमस्तेरुद्रमन्यव इत्येताननुवाकांस्त्रेधाविभज्येति । अत्र द्वौ पक्षौ । आद्यानुवाकचतुष्कमेको भागः । अपरं चतुष्कं द्वितीयो भागः । अंत्यानुवाकत्रयं तृतीयो भाग इत्येकः पक्षः । यद्वा नमस्तेरुद्रेत्यारभ्य सभापतिभ्यश्चवोनमइत्यंत एको भागः । नमोअश्वेभ्यइत्यादिनमःपार्यायचावार्यायचेत्यंतो द्वितीयः । नमःप्रतरणायेत्यादिरासमाप्तेस्तृतीयः । षोढाभागस्तु । तिस्रउत्तराआहुतीर्जुहोतिषट्संपद्यंतेषड्वाऋतव इति श्रुत्योक्तः । शतपथेऽपि । सचाशीत्यांचाशीत्यांचस्वाहाकरोतीत्यादिना षोढा विभाग उक्तः । षोडशधा विभागो बौधायनोक्तः । यथापि वा प्रथमादुपक्रम्य नमस्तक्षभ्य इति जानुदघ्ने जुहोति । रथकारेभ्यश्चवइत्युपक्रम्य नमःस्वायुधायेति नाभिदघ्ने शेषेण प्रागवतानेभ्य आस्यदघ्ने हुत्वा सहस्राणिसहस्रशइति दशावतानान्हुत्वाऽन्वारोहाञ्जुहोति । नमोरुद्रेभ्योयेपृथिव्यामिति जानुदघ्ने धारयमाणो नमोरुद्रेभ्योयेऽतरिक्ष इति नाभिदघ्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमोरुद्रेभ्योयेदिवीत्यास्यदघ्ने हुत्वेति । एते त्रयः पक्षा न प्रचरंति। अथाऽष्टाचत्वारिंशत्पक्षः । तत्राद्येऽनुवाके पंचदशमंत्राः। ततोऽष्टावनुवाकाअष्टौयजूंषीति काशकृत्स्नोक्तेर्नवमांतं त्रयोविंशतिः। दशमे द्वादशेति पंचत्रिंशत्। एकादशे दशऋचस्त्रीणि यजूंषीति त्रयोदशेत्यष्टाचत्वारिंशत्। तदयं संग्रहः। आद्ये पंचदश प्रोक्ता दशमे द्वादश स्मृताः। एकादशेऽग्निभूम्यः स्युरष्टौ शिष्टा यजूंषि च ॥ प्रतिमंत्रपक्षे त्वेकोनसप्तत्युत्तरशतं मंत्राः। तत्राद्येऽनुवाके पंचदशमंत्राः। द्वितीये त्रयोदश। तृतीयचतुर्थयोः प्रत्येकं सप्तदश। एते द्वितीयादिचतुर्थ्यंतमुभयतोनमस्कारा मंत्राः। पंचमषष्ठयोः प्रत्येकं पंचदशमंत्राः। सप्तमे षोडश। अष्टमे सप्तदश। नवमे एकोनविंशतिः। एषु पंचमादिनवमांतेषु पुरस्तान्नमस्कारा मंत्राः। तत्र देवानांऽहृदयेभ्य इत्यस्योत्तरमंत्रचतुष्टयेऽनुषंगः। अयं च होमादावेव विभज्य प्रयोगः। जपाभिषेकादौ तु विभागाभावाद्यथाध्ययनं पाठः। एवमन्यत्राप्यनुषंगे ज्ञेयं। दशमे द्वादशमंत्राः। एकादशे त्रयोदशेति। यत्तु शाकपूणिर्द्वितीयादिनवमांतानुवाकेषु नमस्कारादिनमस्कारांतमेकंयजुरित्याह तत्रोभयतोनमस्कारेषु स्पष्टो विभागः। यत्र त्वेको नमःशब्दो यथा नमोभवायच रुद्रायचनमःशर्वायेत्यादौ तत्र द्वितीयो नमःशब्दः पूर्वस्यांतत्वेन द्वितीयस्यादित्वेन च काकाक्षिवदुभयत्र संबध्यते। यद्वा द्वितीयतृतीयचतुर्थानुवाकपरं। यच्च यास्को नमस्काराद्येकंयजुरिति। तत्पंचमादिनवमांतपरमिति महार्णवः। तदयं संग्रहः। बाणेंदवो १५ वह्निभुवोऽ १३ श्वभूम्यो १७ नगेंदवः १७ पंचदशे १५ षुभूमयः १५। नृपाऽ १६ श्वभूम्यं १७ कभुवोऽ १९ थ भास्करा १२ विश्वे १३ समस्ता ग्रहभूमिपाः स्युः १६९ ॥ एते विभागा नमकेष्वेव। चमकेषु त्वाह बौधायनः। अग्नाविष्णूसजोषसइतिचतुर्गृहीतंहुत्वेत्युक्त्वा वाजश्चमेप्रसवश्चमइति संततांवसोर्धारांजुहोत्यामंत्रसमापनादिति। मंत्रः सर्वे चमका आद्योऽनुवाको वा। तेनाद्ययर्चा हुत्वा सर्वैश्चमकैरेका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हुतिः । प्रत्यनुवाकांतमेकादशाहुतयो वा । तेन द्वे आहुती द्वादश वा । इदं वसोर्धारोक्तमप्यपेक्षितत्वाद्धोमेऽपि ज्ञेयं । यद्वा एकादशा-
नामनुवाकानामेकमेकंजपेदितिबौधायनोक्तेर्यथा जपे एकैकस्य चमकस्यावृत्तिस्तथा होमेऽपि । तेनाद्यचमकेन सर्वेण हुत्वाऽन्यैः प्रत्येकमित्येका-
दशाहुतय इति पक्षत्रयं महार्णवे उक्तं । अथ त्रेधाविभागादिना शतांशेन च होमस्य प्रचाराभावाद्दशांशहोमे समग्रहोमे चाष्टाचत्वारिंशत्पक्षे
प्रतिमंत्रपक्षे चाऽऽहुतिसंख्योच्यते । तत्रैकरूपे दशांशहोमो नाशंक्य एव । विभागाभावात् । एकादशिन्यां त्वेकेन रूपेण होमः । शिष्टैकरूपे
विभागाऽयोगात्तद्दशांशहोमः । एवं महारुद्रादावपीति महार्णवः । अस्मद्गुरवस्त्वष्टाचत्वारिंशत्पक्षे पंचाहुतयः प्रतिमंत्रपक्षे च सप्तदशाहुतय
आद्यैर्मंत्रैः कार्याः । अंताल्लोपोविवृद्धिर्वेत्यापस्तंबोक्तेरित्याहुः । तत्तु यत्र त्रिकपालो नवकपाल इति संख्या श्रुता तत्रैव । अत्र तदभावान्न
तद्युक्तं । अतएव समविभागाऽयोगान्मूलाभावाच्च हेमाद्युक्तो वाचनिक एव नमःशंभवेचेतिमूलमंत्रेण होमो नतु दशांशेनेति वयं । महार्ण-
वमंगीकृत्य तूच्यते । अत्र मामकाः श्लोकाः । रुद्र्यां दशांशेऽष्टाचत्वारिंशत्पक्षेंऽकवेदकाः ४९ । समग्रहोमे तत्रैव खवेदशरसंख्यकाः
५४० ॥ प्रतिमंत्रे दशांशे तु खाऽद्रिचंद्राहुतीर्हुनेत् १७० । प्रतिमंत्रे सर्वहोमे शराद्रिवसुचंद्रकाः १८७५ ॥ इति रुद्रैकादशिन्यां संख्या ।
लघुरुद्रे दशांशे तु खांऽकबाणाहुतीर्हुनेत् ५९० । समग्रहोमे तत्रैव खाग्न्यंकखशराः स्मृताः ५०९३० ॥ प्रतिमंत्रे दशांशे तु लघुरुद्रे
प्रकीर्तिताः । चंद्रवेदखखा युग्मं २००४१ सर्वहोमे वदाम्यहं ॥ चंद्राद्रिशरखा युग्मं २०५७१ लघुरुद्रे त्विदं स्मृतं । इति लघुरुद्रे । महा-
रुद्रेऽष्टचत्वारिंशत्पक्षे त्वाहुतीर्हुनेत् । षट्सहस्री शरशती चत्वारिंशद्दशांशके ६०५४० ॥ तत्रैव सर्वहोमे तु खवेदाग्निशरर्तवः ६५३४० ।
प्रतिमंत्रे महारुद्रे दशांशे त्वाहुतीर्हुनेत् ॥ द्वाविंशतिसहस्राणि षट्शतानि दशैव च २२६१० । प्रतिमंत्रे महारुद्रे सर्वहोमे वदाम्यहं ॥

CC-0. In Public Domain. Digitization by eGangotri

लक्षद्वयं सहस्राणि विंशतिश्च षडुत्तरा । द्वे शते सप्ततिश्चैकाऽधिका संख्येयमीरिता २२६२७१ ॥ इति महारुद्रहोमसंख्या । अथातिरुद्रेऽष्टाचत्वारिंशत्पक्षे दशांशके । एकसप्ततिसाहस्रमशीत्यंताऽष्टशत्यपि ७१८८० ॥ प्रतिमंत्रे दशांशे तु सार्धलक्षद्वयं स्मृतं । सहस्रोनं सर्वहोमे त्वतिरुद्रे वदाम्यहं ॥ अष्टचत्वारिंशभागे सप्तलक्षाणि चैव हि । सहस्राणि तथा सप्तदश सार्धचतुःशती ७१७४५० ॥ प्रतिमंत्रे सर्वहोमे पंचविंशतिलक्षकाः । एकादशसहस्रोनास्त्वतिरुद्रे समीरिताः ॥ क्वचिदल्पांतरं त्वत्र न गण्यं सूरिभिर्मम । इदं तैत्तिरीयशाखयोक्तं। वाजसनेयिकाण्वादिशाखया तु प्रतिमंत्रपक्षे षष्ट्युत्तरशतविभागान्न्यूनसंख्या। नमःशंभवायेति वा होमो ज्ञेयः ।इयं च वसोर्धारासहिताहुतिसंख्या । घृतकुंभवसोर्धारां पातयेदनलोपरि । औदुंबरीमथार्द्रां च ऋज्वीं कोटरवर्जितां ॥ बाहुमात्रां स्रुचं कृत्वा ततः स्तंभद्वयोपरि । घृतधारां तया चाज्यमग्नेरुपरि पातयेत् ॥ श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवं । महावैश्वानरं र..म ज्येष्ठसाम च पाठयेदिति मात्स्योक्तेः । आग्नेयसूक्तादि प्रागुक्तबौधायनोक्तेः सर्वचमकांते ज्ञेयं । इयं वसोर्धारा यद्यपि मात्स्ये लक्षहोमे एवोक्ता तथापि चयने दृष्टत्वात्फलहेतुत्वाच्च रुद्रे कार्येति महार्णवः । सा च पूर्णाहुत्यनंतरं कार्या । शौनकोऽपि । अयाश्चेत्यादिभिर्हुत्वा समुद्रादूर्मिसूक्ततः। संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥ अत्र पूर्णाहुतेरुपर्याज्यधारा तूष्णीं देयेति केचित् ।वसोर्धारापरामिदमिति तु युक्तं । अतएव हेमाद्रौ मदनरत्ने च शांतिकांडे देवीपुराणे वसोर्धारोत्पत्तिमुक्त्वा सर्वत्र सोक्ता । अत्र होमसंख्यावशात्कुंडं कार्यं । तदुक्तं भविष्ये । रत्निमात्रं शतार्धे तु शते चारत्निमात्रकं । सहस्रे त्वथ होतव्ये कुर्यात्कुंडं करात्मकं ॥ द्विहस्तमयुते तद्वल्लक्षहोमे चतुष्करं । दशलक्षमिते होमे षट्करं संप्रचक्षते ॥ यत्तु मात्स्ये । द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं पुनः । लक्षहोमे भवेत्कुंडं योनिवक्त्रं त्रिमेखलमिति। तत्तु शीघ्रदाहिघृतादौ द्विहस्तं लक्षहोमे ज्ञेयं । यवचर्वादौ चतुर्हस्तं । सिद्धांत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेखरे । लक्षार्धे त्रिकरं कुंडं लक्षहोमे चतुष्करं । कुंडं पंचकरं प्रोक्तं दशलक्षाहुतौ क्रमात् ॥ षड्ढस्तं लक्षविंशत्यां कोट्यर्धे सप्तहस्तक-
मिति । अत्र न्यूनसंख्योदिते कुंडेऽधिको होमो विधीयत इति कुंडरत्नाकरोक्तेरांतरालिको होमो न्यूनसंख्योक्ते कुंडे कार्यः । तच्च कुंडमै-
शान्यां । मंडपमध्ये च वेदी । तत्रैका वेदिका कार्या यज्ञमंडपमध्यतः । मध्यस्तंभांतरं यावत्तावन्माना करोच्छ्रयेति परशुरामोक्तेरिति केचित् ।
प्रागुत्तरं समासाद्य प्रदेशं मंडपस्य तु । शोभनं कारयेत्कुंडं यथावल्लक्षणान्वितमित्ययुतहोमे मात्स्योक्तेर्हेमाद्र्यादिलिखनाच्चैवमाभाति ।
अस्मद्गुरवस्तु परशुरामोक्तेर्निर्मूलत्वान्मध्ये तु मंडपस्यापि कुंडं कुर्याद्विचक्षणइति वृद्धवसिष्ठोक्तिर्मात्स्ये च प्राक्पूर्वमंडपस्योत्तरमुत्कृष्टं मध्यमं प्र-
देशं प्राप्येत्यर्थान्मध्ये कुंडं । अन्यथा गर्तस्योत्तरपूर्वेण वितस्त्युच्छ्रायसंमिता । पूर्वोत्तरे हस्तमिताऽथवेदी ग्रहादिदेवेश्वरपूजनायेति मात्स्ये बाधा-
पत्तेश्च लक्षहोमवन्मध्ये कुंडं तद्विकृतित्वादित्याहुः । मध्ये वेदिश्च दीक्षातुलादावेव । नात्र । उपयोगाभावात् । रुद्रवेदिश्चैशाने ग्रहवेदेर्भि-
न्नाचारप्राप्ता तांत्रिकी वाऽस्तु । रुद्रस्य काम्यत्वेऽपि ग्रहमखविकृतित्वे न क्षतिः । यत्तु परशुरामः । मंडपोऽष्टगुणः कुंडात्कुंडं होमानुसारत
इति । स चतुर्हस्ते कुंडे द्वात्रिंशद्धस्तस्य मंडपस्य क्वाप्यनुक्तेर्निर्मूलो मूर्खश्चेत्युपेक्ष्यः । अत्र केचिद्वेद्यां रुद्रपीठमाहुः । यथोक्तं स्कांदे । प्रणम्य
जगतामीशमुमादेहार्धधारिणं । यंत्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः ॥ मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरं । बहिरष्टदलं पद्मं ततः
षोडशपत्रकं ॥ चतुर्विंशतिपत्राब्जं द्वात्रिंशत्पत्रकं तथा । चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभं ॥ पंचपद्मात्मकं वृत्तं चतुरस्रं च भूगृहं ।
सत्वं रजस्तमश्चेति त्रिगुणैः परितो वृतं ॥ चतुर्द्वारं द्वारदेशे बहिर्नागसमन्वितं । रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत् ॥ चत्वारिंशच्छतं चैकं
देवतानामुदाहृतं । कर्णिकामध्यदेशे तु रुद्रं पंचास्यमालिखेत् ॥ नमोभगवतेरुद्रायेति तारादिकं न्यसेत् । सोऽयं दशाक्षरो मंत्रः सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामार्थसिद्धिदः ॥ प्रणवादिनमोंतानि पंचास्यानि ततः परं । सद्योजातं वामदेवमघोरं तदनंतरं ॥ ततस्तत्पुरुषं प्रोक्तमीशानं पंचमं क्रमात् । दलेष्वष्टसु नंद्यादीन्पूर्वादिक्रमतो न्यसेत् ॥ पूज्यपूजकयोर्मध्ये प्राची स्याद्यंत्रलेखने । आदौ नंदी महाकालो गणेशवृषभौ क्रमात् ॥ अनंतरं भृंगिरिटिः स्कंदोमाचंडसंज्ञकाः । प्रधानमिदमाख्यातं प्रथमावरणे ततः ॥ षोडशारे ततः पद्मे द्वितीयावरणे यजेत् । अनंतं च तथा सूक्ष्मं शिवं चैकपदं तथा ॥ एकरुद्रं त्रिमूर्तिं च श्रीकंठं वामदेवकं । ज्येष्ठं श्रेष्ठं तथा रुद्रं कालं कलविकरणं ॥ बलं वलविकरणं बलप्रमथनं तथा । तृतीयावरणे पद्मे चतुर्विंशद्दले तथा ॥ अणिमा महिमा चेति लघिमा गरिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराह्यैंद्री च चामुंडा चंडिका चेति ताः क्रमात् ॥ ततोऽष्टस्वसितांगादीन्भैरवान्विन्यसेत्पुनः । असितांगो रुरुश्चंडः क्रोध उन्मत्तभैरवः ॥ कालभीषणसंहारभैरवाश्चाष्ट कीर्तिताः । द्वात्रिंशत्पत्रके पूर्वे भवाष्टकमुदाहृतं ॥ भवः शर्वेशानपशुपतिरुद्रोग्रभीमकाः । महांश्चेवेति विख्याता भवाद्यष्टौ प्रकीर्तिताः ॥ ततोऽनंतो वासुकिश्च तक्षकश्च कुलीरकः । कर्कोटकः शंखपालः कंबलोऽश्वतरस्तथा ॥ ततोऽष्टसु न्यसेद्दैन्यं पृथुं हैहयमर्जुनं । शाकुंतलेयं भरतं बलराममिति क्रमात् ॥ ततः कुलाचलानष्टौ दलेष्वष्टसु विन्यसेत् । हिमवान्निषधो विंध्यो माल्यवान्पारियात्रकः ॥ मलयो हेमकूटश्च गंधमादनसंज्ञकः । चत्वारिंशद्दले पद्मे पंचमावरणे न्यसेत् । इंद्राद्यष्टौ लोकपालानष्टसु क्रमशो लिखेत् ॥ इंद्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा । वायुं कुबेरमीशानं दलेष्वष्टसु विन्यसेत् ॥ इंद्रादिलोकपालानामष्टौ शक्तीस्ततो लिखेत् । शची स्वाहा च वाराही खड्गिनी वारुणी तथा ॥ मृगारूढा च कौबेरी शूलिनी च तथाऽष्टमी । ततोऽष्टानामायुधानि वज्रादीन्यष्टसु न्यसेत् ॥ वज्रं शक्तिर्दंडखड्गौ पाशांकुशगदा अपि । त्रिशूलं लोकपालानामायुधानि क्रमाल्लिखेत् ॥ ततोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टौ वाहनान्येषामष्टसु क्रमशो लिखेत् । ऐरावतं तथा मेषं महिषं प्रेतसंज्ञकं ॥ मकरं च मृगं चैव नरं च वृषभं तथा । ऐरावतादयोऽथाष्टौ दिग्गजास्तदनंतरं ॥ ऐरावतः पुंडरीको वामनः कुमुदोंऽजनः । पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ इंद्रादयोऽष्टौ दिक्पालाः पंचपद्मात्मकाद्बहिः । इंद्रं विन्यस्य पूर्वस्यामाग्नेय्यामग्निमेव च ॥ दक्षिणस्यां यमं चैव नैर्ऋत्यां निर्ऋतिं तथा । प्रतीच्यां वरुणं वायुं वायव्यां विन्यसेत्ततः ॥ कुबेरं चैव कौबेर्यामैशान्यामीशमालिखेत् । विरूपाक्षं तु विन्यस्य आग्नेय्यामग्नियोगतः ॥ नैर्ऋत्यां निर्ऋतेर्योगे विश्वरूपं तु विन्यसेत् । वायव्यां वायुयोगे च लिखेत्पशुपतिं तथा ॥ ऐशान्यामूर्ध्वलिंगं च न्यसेदीशानयोगतः । प्रागादिक्रमतो लेख्याः शेषाद्या भूगृहाद्बहिः ॥ विप्रवर्णं श्वेतरूपं सहस्रफणमंडितं । शेषं विन्यस्य पूर्वस्यां पूजयेदुपचारकैः ॥ तक्षकं वैश्यवर्णं च नीलं पंचशतैः फणैः । युक्तमुत्तुंगकायं च आग्नेय्यां दिशि विन्यसेत् ॥ अनंतं विप्रवर्णं च तथा कुंकुमवर्णकं । सहस्रफणसंयुक्तं दक्षिणस्यां प्रपूजयेत् ॥ वासुकिं क्षत्रियं पीतवर्णं सप्तशतैः फणैः । युक्तमुत्तुंगकायं च नैर्ऋत्यां दिशि विन्यसेत् ॥ शंखपालं क्षत्रियं च पीतं सप्तशतैः फणैः । युक्तमुत्तुंगकायं च वायव्यां दिशि पूजयेत् ॥ कंबलं शूद्रवर्णं च कृष्णं त्रिंशत्फणैर्युतं । कौबेर्यां दिशि विन्यस्य पूजयेच्च विधानतः ॥ कर्कोटकं शूद्रवर्णं श्वेतं त्रिंशत्फणायुतं । ऐशान्यां दिशि विन्यस्य पूजयेद्विधिवत्ततः ॥ रुद्रपीठमिदं सर्वं रुद्रकल्पेषु विश्रुतं । शंभुना स्वयमाख्यातं भक्तानुग्रहकाम्यया ॥ कुंकुमागुरुकर्पूरैर्भूर्जपत्रेऽथवा पटे । लिखितं पूजयेद्भक्त्या सर्वकामार्थसिद्धिदं ॥ यंत्रं मंत्रमयं प्रोक्तमाख्याता देवतेति च । पूजनीयं प्रयत्नेन तेनेदं देवतामयं ॥ नाग्निचोरभयं तत्र न च राजभयं क्वचित् । यत्रेदं लिखितं यंत्रं पूज्यते विधिवत्सदा ॥ (यंत्रं रुद्रयंत्रं) एता देवताश्चतुर्थ्यंतनमोंततत्तन्मंत्रैरावाह्य पूजयेत् । अत्र मूलं चिंत्यं । तदैशान्यां रुद्रकलशं संस्थाप्य तत्र वरुणं संपूज्य रुद्रैकादशिनीजपार्थं विप्रं वृणुयादित्यपि वृद्धाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो यजमानेन त्यागे कृते ग्रहेभ्यः सांगेभ्यो ग्रहयज्ञवद्धुत्वा रुद्रहोमे कृते रुद्रपीठदेवताभ्य आज्यं हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते दिक्पालेभ्यो नवग्रहादिभ्यश्च माषभक्तबलीन्दत्वा समुद्रादूर्मिरितितृचेन मूर्धानं पुनस्त्वादित्याः पूर्णादर्वि सप्तते धामंते इति पूर्णाहुतिं हुत्वा सर्वचमकेनाऽग्निमीळेनवभिः विष्णोर्नुकं षड्विंशतेपितः पंचदशभिः स्वादिष्ठयेति दशभिर्महावैश्वानरज्येष्ठसामभ्यां च वसोर्धारां हुत्वा पूर्णपात्रविमोकादिशेषं समाप्य ऋत्विग्भ्यो दक्षिणां दद्यात् । तत्र रुद्रदक्षिणोक्ता बौधायनसूत्रे । सौवर्णशतं सुवर्णोपधानं वा दद्यादृषभो रुद्रस्य दक्षिणेति । एकादश गा दद्यादिति शालीकिः । उपधानं हैमतंतुकृतमुपबर्हणं । सौवर्णशतं शतच्छिद्रं । रुद्रो लघुरुद्रः । प्रकारांतरमाह महार्णवः । तत्र सौवर्णनिष्काणां दशसाहस्रिकोत्तमा । तदर्धा मध्यमा प्रोक्ता तृतीया त्रिसहस्रिका ॥ उत्तमा त्रिशती वा स्याद्द्विशती मध्यमा मता । शतमात्राऽधमा ज्ञेया प्रकारः कीर्त्यतेऽपरः ॥ उत्तमा तु चतुःषष्टिस्तदर्धं मध्यमा स्मृता । चतुर्विंशतिरन्या स्यादथान्यो विधिरुच्यते ॥ सहस्रं दक्षिणा देया दशपूरुषकर्तृके । शतानि पंच देयानि ऋत्विक्पंचककर्तृके ॥ अथैककर्तृके देयं शतत्रयमिति स्थितिः । बृहत्पराशरः । अनड्वाहं च वस्त्रं च दद्याद्धेनुं च दक्षिणामित्याह । इयं प्रत्येकं । महारुद्रे तु शातातपः । महारुद्रजपं चैव कारयेच्च यथाविधि । जुहुयाच्च दशांशेन दूर्वामाज्यपरिप्लुतां ॥ एकादशस्वर्णनिष्काः प्रदातव्याऽत्र दक्षिणा । एकादश पशूंश्चैव दद्याद्वित्तानुसारतः ॥ पशुर्गौः । रुद्रायगामिति श्रुतेः । अन्येभ्योऽपि यथाशक्त्या द्विजेभ्यो दक्षिणां दिशेदिति । ततो ग्रहादिकलशोदकेनाभिषिक्तो यजमानो ग्रहादीनामुत्तरपूजां कृत्वा विसृज्य । श्रीरुद्रप्रतिमां स्वर्णमयीं वस्त्रयुगान्वितां । श्रीरुद्रप्रीतये चापि प्राप्तानिष्टनिवृत्तये ॥ प्रार्थिताभीष्टसंसिद्ध्यै तुभ्यं श्रीरुद्ररूपिणे । संप्रदद्यां विधानेन यथोक्तफलमस्तु मे ॥ इति रुद्रप्रतिमामाचार्याय दत्वाऽग्निं संपूज्य विसृज्य विप्रान्रुद्रैकादशिन्यां त्रीनेकं वेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संभोज्य कर्मेश्वरार्पणं कुर्यादिति । पुत्रार्थमहारुद्रे विशेषं त्वनपत्यत्वहरे कर्मविपाके वक्ष्यामः । अवांतरमंत्रप्रयोगा भाष्योक्ता भट्टभास्वरो-क्ताश्च महार्णवे ज्ञेयाः । इति शांतिरत्ने रुद्रविधानं ॥ ॥ अथ वेदपारायणं । तत्रादौ कलशस्थापनायुक्तं महार्णवे । तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते । कलशं सुदृढं तत्र सुनिर्णिक्तं सुभूषितं ॥ (निर्णिक्तं क्षालितं) पुष्पपल्लवमालाभिश्चंदनैः कुंकुमादिभिः । मृत्तिकाय-वसंमिश्रं वेदिमध्ये न्यसेत्ततः ॥ पंचाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः । स्थापितः स्थापितः कुंभे चतुर्बाहुश्चतुर्मुखः ॥ वत्सजान्वा-कृतिं वेदमुत्तराग्रैः कुशैः कृतं । ब्रह्मोपधाने कृत्वा तं ततः स्वस्त्ययनं पठेत् ॥ प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते । यज्ञोपवीतनैवेद्य-वस्त्रचंदनकुंकुमैः ॥ स्रग्धूपदीपैस्तांबूलैरक्षतैश्च पितामहं । ब्रह्मजज्ञानमिति वा गायत्र्या वा प्रपूजयेत् ॥ उपाध्यायस्तु संपूज्य यथापाठं पठेत्ततः । ततो वक्ष्यमाणहोमादि कृत्वा पठेदित्यर्थः । तत्रैव बौधायनः । स्थंडिलं कल्पयित्वाऽग्निमुपसमाधाय संपरिस्तीर्याज्येनैताभ्यो देवताभ्यो जुहोत्यग्नये सोमाय विश्वेभ्यो देवेभ्यो ब्रह्मण ऋषिभ्य ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै श्रियै ह्रियै सावित्र्यै सवित्रे प्रजा-पतये कांडऋषये सोमाय कांडऋषयेऽग्नये कांडऋषये विश्वेभ्योदेवेभ्यः कांडऋषिभ्यः सांहितीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो दे-वताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्योदेवेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च हुत्वा पुनः परिषिंचाति-समाप्ते चैता यजुषा तर्पयति । एवमृग्वेदस्य कांडऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वाम-देवायाऽत्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महासूक्तेभ्यो महानाम्नीभ्य इति । ततो वे-दादिमारभ्य संततमधीयीतेत्याह भगवान्बौधायनः ॥ ॥ अथाऽनक्षत्पारायणं । अथातोऽनक्षत्पारायणविधिं व्याख्यास्याम आसमाप्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्नाश्नीयाद्यथाशक्ति वा पयः फलान्योदनं वा हविष्यमात्रमल्पं भुक्त्वा तदा शेषमधीयीत ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्याग्निमुपसमाधाय परिस्तीर्येध्मं प्रदायाज्येनैताभ्यो देवताभ्यो जुहोति। अग्नये सोमायेंद्राय प्रजापतये वृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मण ऋषिभ्य ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतयेऽनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये सोमाय कांडऋषयेऽग्नये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः सा‍ंहितीभ्यो देवताभ्य उपनिषद्भ्यो याज्ञिकीभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो देवेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परिषिंचाति समाप्ते चैता यजुषा तर्पयति। अंते एता अग्निसोमाद्या यजुषा यजुर्वेदेन सह तर्पयेत्। यद्वा भूर्देवांस्तर्पयामीत्यादियजुषा तर्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थमाह महार्णवः। एवमृग्वेदिनां कांडऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यइत्यादिमहानाम्नीभ्यइत्यंतं प्राग्वत्। ततो वेदादिमारभ्य संततमधीयीत। नास्यांतराऽनध्यायो नास्यांतरा जननमरणे अशुचिः। आशौचं नेहेत्यर्थः। नांतरा व्याहरेन्न विरमेद्यावदंतमधीयीत। यावत्पर्यंतं पठेत्तावन्मध्ये न विरमेन्नान्यच्च वदेदित्यर्थः। यदंतरा विरमेत्त्रीन्प्राणानायम्य प्रणवं वा प्रविधाय यावत्कालमधीयीत ततः सर्वनिशांतरं संग्रामारण्यसलिलं लोप्य परिदध्यात्। निशांतरं संध्यानिशादीन् लोप्य विहाय परिदध्यात्समापयेदित्यर्थः। आदावंते च ब्राह्मणभोजनं दक्षिणां च दद्यात्। य एतेन वेदमधीयीत स ततः पूतो वेदो भवति मनःशुद्धिश्च भवति। वेदरूपो भवतीत्यर्थः। द्वाभ्यां पारायणाभ्यामृग्भिश्चाऽभोजन इहाधीतेऽनृतेभ्यः प्रमुच्यते। त्रिभिः पतनीयेभ्यः शूद्रायां रेतः सिक्त्वा गंगाऽप्सु निमग्नश्च भवति। चतुर्भिः शूद्रान्नभोजनात् स्त्रीसेवनाच्च पंचभिरयाज्ययाजनादग्राह्यग्रहणात्। षड्भिर्ब्राह्मणतस्त्रीलोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतितसंयोगाच्च। सप्तभिः प्राजापत्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हीनाचरणाद्यज्ञोपवंधनाच्च । अष्टभिश्चांद्रायणस्य गुरुतल्पगमनाद्रजस्वलागमनाच्च । नवभिः सुरापानाद्दशभिरसोमपानादेकादशभिर्ब्राह्मणहननाद्वा- दशभिः पुनर्जन्मेहजन्मकृतैः सर्वैः पापैः प्रमुच्यते स्वर्गं लोकं गच्छाति पितॄन् स्वर्गं लोकं गमयत्यग्निष्टोमादिक्रतुभिरिष्टं भवति । वेदाध्या- यी सदैव स्याद्दपाप्मा सत्यवाक् शुचिः । यं यं कामयते कामं तं तं वेदेन साधयेत् ॥ असाध्यं नास्ति यत्किंचिद्ब्रह्मणो हि फलं महदिति । ऋग्विधाने । आदावेव तु सावित्र्या कर्म कुर्वीत शांतये । पुष्टये पशुलाभाय धनलाभाय भूतये ॥ एषा हि संहिता देवैः सर्वब्रह्ममयी निचृत् । उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता ॥ होमांश्च जपयज्ञांश्च नित्यं कुर्वीत चैतया । सर्वकामसमृद्ध्यर्थं परब्रह्मेदमुच्यते ॥ एषैव प्रतिलोमोक्ता पच्छः शत्रुविनाशिनी । अक्षरप्रतिलोमेयमभिचारेषु शस्यते ॥ सर्वसंहितया प्रत्यृचं होम आज्येन तिलैर्वा । आज्यं द्रव्यमना- देशे जुहोतिषु विधीयतेइति ब्राह्मोक्तेः । सर्वपापहरो होमास्तिलैः सर्वत्र शस्यतइति विष्णुधर्मोत्तराच्च । एवं सामवेदादावपि । शातातपः । कृच्छ्रो देव्ययुतं चैव वेदपारायणं तथा । तिलहोमसहस्रं च सममेतच्चतुष्टयं ॥ (देवी गायत्री) इदं केवले । अनश्नतस्तु चांद्रसमं । इति वेदपारायणं ॥ ॥ अथ जातवेदाकल्पः । शौनकः । जातवेदस इत्येतत्सूक्तं सर्वार्थसाधनं । आयुरारोग्यसुखदं भूमिदं शत्रुनाशनं ॥ यद्यद्वांछति वा विप्रस्तत्तदाप्नोत्यसंशयं । सूक्तेनानेन जुहुयाच्छुक्लांबरधरः शुचिः ॥ जपेद्वा नियतो मंत्रं हविष्याशी जितेंद्रियः । पशुपुत्र- धनार्थी च प्रत्येकं लक्षमभ्यसेत् ॥ कुंडे वा स्थंडिले वापि होमं कुर्यादतंद्रितः । चतुरस्रं भवेत्कुंडं मेखलाद्वयसंयुतं ॥ स्थंडिलाद्याज्यभागांतं यज्ञतंत्रं प्रकल्पयेत् । दुर्गामावाहयेत्कुंभे सायुधाष्टमहाभुजां ॥ नीलोत्पलदलश्यामां किरीटाद्यैर्विभूषितां । ततश्चाराध्य तां देवीं तस्मिंस्ती- र्थोदकान्विते ॥ आवाहनेन हविषा समिद्भिश्च पृथक्पृथक् । मंत्रेणानेन जुहुयादष्टोत्तरशताहुतीः ॥ ततः स्विष्टकृतं चैव होमशेषं समापयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्थायाथ जपेन्मंत्रमेतं श्रद्धासमन्वितः ॥ ऋग्विधाने । जातवेदसइत्यादि सदा स्वस्त्ययनं जपेत् । दुर्गे पथि प्रयातस्य नास्याऽरिभ्यो भयं भवेत् ॥ राजकार्ये स्वयूथे वा अभिशस्तोऽप्यनेकधा । अशक्ये प्रतिभाकार्ये भये प्राणांतकेऽपि वा ॥ जातवेदसइत्येतां जपंस्तेभ्यः प्रमुच्यते । सिसाधयिषुरर्थं च प्रस्थितो मनसा जपेत् ॥ सिद्धार्थः स्वस्तिमानेति चोरैर्बाध्येत नाऽध्वनि । कृतार्थः स्वगृहानाच्छन्नेतामेव सदाऽभ्यसेत् ॥ उदिते सवितर्येतां जपेदस्तंगते तथा । अहःस्वस्त्ययनं प्राता रात्रिस्वस्त्ययनं निशि ॥ व्युष्टायां च जपेन्नित्यमेतां दुःस्वप्ननाशिनीं । इति जातवेदाकल्पः ॥ ॥ अथ त्वरितरुद्रविधानं । शिवपूजां विधाय संकल्प्य मूलेन प्राणानायम्य अस्य त्वरितरुद्रमंत्रस्याथर्वण ऋषिः । अनुष्टुप् छंदः । श्रीत्वरितरुद्रो देवता । नम इति बीजं । अस्त्विति शक्तिः । त्वरितरुरुद्रप्रीत्यर्थं जपे विनि० । अथ मूलेन कर· शुद्धिं कृत्वा प्रणवं करतलयोर्विन्यस्य षडंगं कुर्यात् । तद्यथा । ॐ योरुद्रः अंगुष्ठाभ्यांनमः । ॐ अग्नौ तर्जनी० । ॐ योअप्सु मध्यमा० । ॐ यओषधीषु अनामिका० । ॐ योरुद्रोविश्वाभुवनाविवेश कनिष्ठिका० । ॐ तस्मैरुद्रायनमोअस्तु करतलकरपृष्ठाभ्या० । एवं हृदयादिन्यासः । ॐयोरुद्रो हृदयाय० । ॐअग्नौ शिरसे० । ॐयोअप्सु शिखायैवषट् । ॐयओषधीषु कवचायहुं । ॐयोरुद्रोविश्वाभुवनाविवेश नेत्रत्रयाय० । ॐतस्मैरुद्रायनमोअस्तु अस्त्रायफट् । ॐह्रीं हुंफट् इत्यस्त्रेण दिग्बंधः । अथ पदन्यासः । ॐ यः पादाभ्यां० । रुद्रः जंघाभ्यां० । अग्नौ जानुभ्यां० । यः ऊरुभ्यां० । अप्सु गुह्याय० । यः मेढ्राय० । ओषधीषु नाभ्यै० । यः उदराय० । रुद्रः हृदयाय० । विश्वा कंठाय० । भुवना मुखाय० । विवेश नासिकायै० । तस्मै नेत्रत्रया० । रुद्राय भ्रूमध्याय० । नमः ललाटाय० । अस्तु शिरसे नमः । अथ ध्यानं । रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाऽभये । दधानमूर्ध्वहस्ताभ्यां शूलं डमरुमेव च ॥ अंकसंस्थामुमां पद्मे दधानां च करद्वये । अधःकरद्वये कुंभं मातुलिं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गं च बिभ्रतीं ॥ एवं ध्यात्वा मूलमंत्रेणावाहनादिषोडशोपचारैरभ्यर्च्य नित्यमष्टोत्तरशतं जपेत् । एषतेरुद्रभागइति मुद्रा। । अथ होमविधिः। लिंगाभिमुख उपविश्य घृताहुतीर्जुहुयात् । एवं कृतपुरश्चरणो भवति । घृताक्षतैर्मुक्तिकामः । दूर्वाभिरायुष्यकामः । कन्याकामो लाजैः । अपामार्गैरर्थकामः । मधुपुष्पैर्वश्यकामः । श्रीफलैः श्रीकामः । सिद्धार्थैः पुष्टिकामः । खादिरैस्तेजस्कामः । औदुंबरैः पुत्रकामः । पलाशैः सर्वकामः । गुडूचीखंडैर्ज्वरनिवृत्तिर्भवति । उत्पलैर्दधिमधुघृतैरष्टसहस्रं जुहुयात् । यथेष्टा श्रीर्भवति । बिल्वपत्रैर्दधिमधुघृताक्तैः सहस्रहोमाज्ज्वरं नाशयति । शाल्मलीसमिद्भिः शशरुधिराक्तैरष्टसहस्रं जुहुयात् । शत्रूणां सद्यो मरणं भवति । अक्लिन्नवासा अर्काभिमुखः सहस्रं मासैकमात्रं जप्त्वा यक्षराक्षसगंधर्वादीन्वशयाति । मासद्वयेनेंद्रादीन्वशयति । मासत्रयेण ब्रह्मादिदेवा समागच्छंति । स नरो विरूपाक्षो भूतगणैः परिवृतो महादेव इत्याह भगवान्बौधायनः । हेमाद्रौ शांतिकांडे । भीष्म उवाच । अथ त्वरितरुद्रस्य न्यासमुद्राः क्रमेण तु । जपहोमादिकं सर्व कथ्यते सर्वसिद्धये ॥ यस्य कुक्षौ जगत्सर्वं स्थावरं जंगमं च यत् । दुःखच्छिदे नमस्तस्मै ब्रह्मविष्णुशिवात्मने ॥ छंदोऽनुष्टुबथर्वा च ऋषिस्त्वरितसंज्ञके । देवता त्वरितो रुद्रो बीजं शक्तिर्नमोस्त्विति ॥ देवागारे नदीतीरे शुचौ देशेऽथ वाग्यतः । उपविश्य नियम्यासून्संकल्प्य त्वहृदि संस्थितं ॥ करयोस्तूभयोश्चैव मूलमंत्रेण विन्यसेत् । क्रमेण तु षडंगानां न्यासः स्याध्दृदयादिभिः॥न्यासं मंत्रपदैः कुर्यात्पंचभिर्हृदयादिकं । योरुद्रोऽग्नौ त्वहृदि न्यस्य शीर्ष्णि योअप्स्विति न्यसेत्॥ यओषधीषु शिखायां योरुद्रः कवचे न्यसेत् । विश्वाभुवनाविवेशेति नेत्रं वै समुदाहृतं ॥ तस्मैरुद्रायइत्यस्त्रं न्यास एवमुदाहृतः । अंगुल्यग्राणि मूलेषु कृत्वांऽगुष्ठेन पडियेत् ॥ सा मुद्रा शुभदा प्रोक्ता ततो ध्यानं समाचरेत् । एषतेरुद्रभागेति लिंगमुद्राप्रदर्शनं ॥ श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः । मुखे त्वन्नाद्यकामस्तु ग्रीवायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगनाशने ॥ हृदये सुखकामस्तु नाभौ ज्ञानप्रदं भवेत् । प्रजाकामस्तु गुह्ये वै पशुकामस्तु जंघयोः ॥ जानुनोर्ग्रामकामस्तु सर्वकामस्तु गुल्फयोः । वशीकरणकामस्तु वामबाहौ प्रदर्शयेत् ॥ पापक्षयेऽभिचारे च व्याधेरपगमे तथा । बाहिः शरीरात्कुर्वीत शिवस्याग्रे तु विन्यसेत् ॥ चतुर्भुजं त्रिनेत्रं च शुद्धस्फटिकसंनिभं । अमृतेन च पूर्णौ द्वौ कलशौ हस्तयोर्द्वयोः ॥ (दधानमिति शेषः) हस्तद्वयेन योगस्य कृतमुद्रं स्थिरासनं । सर्वकामप्रदं शांतं शंकरं करुणाकरं ॥ उग्रकर्मणि चैवोग्रमूर्तिं ध्यायेदुमापतिं । द्विभुजं नागपाशं च शूलपाणिं जटाधरं ॥ एवं ध्यात्वा महादेवंसमभ्यर्च्य सुभक्तित: ॥ अध:शाय्येकभक्ताशी ब्रह्मचारी हविष्यभुक् । अयुते द्वे जपेत्पूर्वं प्रत्यहं पूजयेच्छिवं ॥ जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणं । मार्जनं तद्दशांशेन तद्दशांशेनभोजनं ॥ पुरश्चरणमेवं च कृत्वा संपूज्य शंकरं । जपेत्त्वरितरुद्रं तु सर्वकामफलप्रदं ॥ श्रीकामः शांतिकामो वा जपेल्लक्षमतंद्रितः । बिल्वसमिद्भिः श्रीकामः शांतिकामः शमीमयैः ॥ जुहुयादाज्यसंमिश्रैस्तर्पणं मार्जनं तथा । एवं सर्वेषु कामेषु होमांते जुहुयावैः ॥ जप्त्वा लक्षं तु पुत्रार्थी पायसं जुहुयात्ततः । वित्तार्थी श्रीफलैर्होम आयुर्वृद्ध्यै च दूर्वया ॥ तिलैरप्याज्यसंमिश्रैस्तेजस्कामो घृतेन च । व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः ॥ पायसं सर्वकामेन होतव्यं शर्करान्वितं । मध्वक्तान्याम्रपर्णानि तीव्रज्वरविनाशने । महाभूतज्वरे चैव गुडूचीभिर्हुनेद्ध्रुवं । सर्वरोगविनाशाय सूर्यस्याभिमुखं जपेत् ॥ अयुते द्वे जपेद्धोमः कार्योऽर्कसमिधैः शुभैः । औदुंबरैरन्नकामस्तेजस्कामस्तु खादिरैः ॥ अपामार्गसमिद्धोमाद्भूतबाधा विनश्यति । ग्रहबाधाविनाशाय जपेदश्वत्थसंनिधौ ॥ लवणान्वितदध्यक्तास्तीक्ष्णाग्राश्वत्थसंभवाः । जुहुयात्समिधः शुष्काः स्वाहांतं मंत्रमुच्चरेत् ॥ दशपंचाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत् । यावद्धोमं बलिर्देयः पुरुषाहारसंमितः ॥ एवं कृते विमुच्येत पुमान्स्त्री वा महाग्रहात् । यं जेतुमिच्छेत्पुरुषं तत्स्थानाभिमुखो जपेत् ॥ जुहुयाच्छतप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्राणि स दुष्टः क्षयमाप्नुयात् । लाजहोमेन कन्यार्थी कन्यां प्राप्नोति रूपिणीं ॥ लाजाश्च मधुसंयुक्ताः श्वेतपुष्पाणि वा पुनः । हूयंते हरिते देशे तस्य विश्वं वशे भवेत् ॥ वामांगमुन्नतं कृत्वा स्त्रीवाशीत्वे विचक्षणः। हस्त्यश्वामात्यशांत्यर्थं तिलैश्चाज्येन संयुतैः ॥ होमस्थानं तु संप्राप्य कुंभमेकं जलान्वितं । मंत्रयित्वाऽष्टसाहस्रं चूतशाखां तु निक्षिपेत् ॥ अभिषेकैश्च तैस्तेषां शाखाप्रोक्तैः प्रदक्षिणं । गृहग्रामादिशांतिश्च सर्वैः कार्या तु पूर्ववत् ॥ वास्तुपूजा च कर्तव्या एकाशीतिपदैः शुभैः । ईशानाय बलिः कार्यो भूतानां पतये तथा ॥ एवं कृते पशूनां च प्रजानां शांतिमाप्नुयात् । अद्भुतेषु च सर्वेषु निशायां ग्रामबाह्यतः ॥ उपविश्य जपेद्रुद्रं त्वरितं बलिभिः सह । होमः पलाशसमिधैः कर्तव्यो घृतसंयुतैः ॥ ईशानाय बलिः कार्यो यस्यां दिशि तदद्भुतं ॥ तदाशापतये चैव पशूनां पतये तथा ॥ वृद्धिकामो जपेल्लक्षं तिलैर्होमो घृतान्वितैः । बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च ॥ सर्वकामेषु चैवाथ त्वरितस्य जपो भवेत् । अयुतद्वयमल्पे तु यावल्लक्षं ततोऽधिके ॥ एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवं । ऐहिकामुष्मिकान्भोगान्भुक्त्वा सायुज्यमाप्नुयात् ॥ इति त्वरितरुद्रविधानं ॥ ॥ अथ स्वप्नाः । तत्र दैवज्ञादीन् देवं च संपूज्येत्युक्त्वाऽद्भुतसागरे पराशरः । अभ्यर्च्य मंत्रैस्तु पुरोहितस्तु संयम्य तस्यां भुवि संस्कृतायां । दर्भैस्तु कृत्वा सुरभाक्षतैश्च किरेत्समंतात्सितसर्षपैश्च ॥ ब्राह्मीं सदूर्वामथ नागपुष्पीं कृत्वोपधानं शिरसि क्षितीशः । पूर्णान्घटान्पुष्पफलान्वितास्यानाशासु कुर्याच्चतुरः क्रमेण ॥ यज्जाग्रतोदूरमुदैतिदैवमावर्त्य मंत्रान्प्रणतस्त्रिरेतान् । “ शां० सा० मंत्रानिति बहुवचनेन सर्वं सूक्तं षड़ृचं गृह्यते ” तथैकभुग्दक्षिणपार्श्वशायी स्वप्नं परीक्षेत यथोपदेशं ॥ नमः शंभो त्रिनेत्राय रुद्राय वरदाय ते । वामनाय विरूपाय स्वप्नाधिपतये नमः ॥ भगवन्देवदेवेश शूलभृद्वृषवाहन । इष्टानिष्टे ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वत ॥ एकवस्त्रे कुशास्तीर्णे सुप्तः प्रयतमानसः । निशांते पश्यति स्वप्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभं वा यदि वाऽशुभं ॥ शुभस्वप्नानाह बृहद्यात्रायां वराहः । शैलप्रासादनागाश्ववृषभारोहणं हितं । चंद्रतारार्कग्रहणं परिमार्गणमेव च ॥ भूम्यंबुधीनां ग्रसनं शत्रूणां च वधक्रिया । जयो विवादद्यूतेषु संग्रामे च तथा जयः ॥ भक्षणं चैव मांसानां मत्स्यानां पयसां तथा । दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च ॥ सुरारुधिरमद्यानां पानं क्षीरस्य पायसः । (पायसस्येत्यर्थः) अंत्रेण वेष्टितं भूमौ निर्मलं गगनं तथा ॥ मुखेन दोहनं शस्तं महिषीणां तथा गवां । सिंहीनां हस्तिनीनां च वडवानां तथैव च ॥ प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः । अंभसा त्वभिषेकश्च ज्ञेयं राज्यप्रदं हि तत् ॥ राज्याभिषेकश्च तथा छेदनं शिरसोऽपि च । मरणं वह्निलाभश्च वह्निदाहो गृहादिषु ॥ तथोदकानां तरणं तथा विषमलंघनं । हस्तिनीवडवानां च गवां च प्रसवो गृहे ॥ आरोहणं गजेंद्राणां रोदनं च तथा शुभं । परस्त्रीणां तथा लाभस्तदालिंगनमेव च ॥ निगडैर्बंधनं धन्यं तथा विष्ठाऽनुलेपनं । बीजानां भूमिपालानां सुहृदामपि दर्शनं ॥ शुभान्येतानि प्रोक्तानि राज्यलाभकराणि च । अद्भुतसागरे पराशरः । स्वांगप्रज्वलनं परोपशमनं शक्रध्वजालिंगकृत्संयुक्तापि नरैर्निपत्य च तथा प्रक्षेपणं दिक्षु च । वद्धो वा निगडैर्ग्रसेच्च दहनं नार्योन्मितो बाहुना छन्नं वा द्विरदादिरोहणविधिर्दिव्योऽपि च ब्राह्मणः ॥ दिनकरशशिताराभक्षणस्पर्शनानि विशरणमपि मूर्ध्नः सप्त पंच त्रिधा वा । वृषभगृहनरेंद्रश्वेतसिंहाधिरोहो ग्रसनमुदधिभूम्योर्भूमिराज्यप्रदानि ॥ विपुलरणविमर्दद्यूतवादैर्जयश्च पशुमृगमनुजानां लब्धिरध्यासनं वा । विडशनपरिलेपोऽगम्यनारीगमो वा स्वमरणाशिखिलाभः सस्यसंदर्शनं च ॥ सितसुरभिमनोज्ञालेपमाल्यांबराणां द्विजसुरगुरुराज्ञां दर्शनान्याशिषश्च । मणिरजतसुवर्णांभोजपात्रेषु भुंक्ते घृतदधिपरमान्नं सर्वमेतच्छुभं स्यात् ॥ बृहस्पतिसंहितायां । यस्तु श्वेतेन सर्पेण दंशितो दक्षिणे भुजे । सहस्रलाभस्तस्य स्यात्पूर्णे तु दशमे दिने ॥ उरगो वृश्चिको वापि जलूका दशते यदि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजयं चार्थसिद्धिं च पुत्रं तस्य विनिर्दिशेत् ॥ बलाकां कुक्कुटीं क्रौंचीं लब्ध्वा यः प्रतिबुध्यते । कोशांतां लभते भूमिं भार्यां च प्रियवादिनीं ॥ रुधिरं पिबति स्वप्ने सुरां वा पिबति क्वचित् । ब्राह्मणो लभते विद्यामितरस्तु धनं लभेत् ॥ क्षीरं पिबति यः स्वप्ने सफेनं मेहने कृते । सोमपानं भवेत्तस्य धनं वा बहु निर्दिशेत् ॥ दधिलाभे धनं तु स्याद् घृतलाभे ध्रुवं यशः । घृतप्राशे महाक्लेशो यशस्तु दधिभक्षणे ॥ गोधूमैर्वा यवैर्वापि लाभं सिद्धार्थकेषु च । पुष्पे प्राप्ते धनं विद्यात्फले वृद्धिरनुत्तमा ॥ आसने शयने याने शरीरे वाहने गृहे । ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी ॥ वराहः । वृश्चिकादिदशनं मणिरत्नकांचनं कलशदीपकिशोराः । वत्सहंसशशकार्भकलाभः पुत्रलाभाय ॥ विष्णुधर्मे । एकस्यां यदि वा रात्रौ शुभं वा यदि वाऽशुभं । पश्चाद्दृश्येत यत्तत्र तस्य पाकं विनिर्दिशेत् ॥ ॥ अथ दुःस्वप्नाः । अद्भुतसागरे देवलः । रक्तगंधांबरस्रग्वी गच्छेद्दै दक्षिणामुखः । खरोष्ट्रमहिषारोही त्रिमासान्नाभिजीवति ॥ श्वभ्रे यो निपतेत्स्वप्ने द्वारं चास्य पिधीयते । न चोत्तिष्ठति यस्तस्मात्तदंतं तस्य जीवितं ॥ मार्कंडेयः । वात्या मूत्रपुरीषं तु सुवर्णं रजतं तथा । प्रत्यक्षमथवा स्वप्ने जीवेत्तु दशमासकं ॥ केशांगारं तथा भस्म उरगं निर्जलां नदीं । दृष्ट्वा स्वप्ने दशाहात्तु मृत्युरेकादशे दिने ॥ करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः । पाषाणैस्ताडयते स्वप्ने सद्योमृत्युर्भवेन्नरः ॥ कृष्णरक्तांबरधरा गायंति च हसंति च । दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥ वराहः । हरिणारोहे भ्रमणं मृत्युर्नचिरेण सूकरारोहे । उष्ट्रारोहे व्याधिर्वृद्धिः स्यात्कुंजरारोहे ॥ मात्स्ये विष्णुधर्मे च । मलिनांबरधारित्वमभ्यंगः पंकदिग्धता ॥ उच्चात्प्रपतनं चैव दोलारोहणमेव च ॥ शक्रध्वजस्य पतनं पतनं शशिसूर्ययोः । देवद्विजातिभूपानां प्रजानां क्रोध एव च ॥ आलिंगनं कुमारीणां विधवानां च मैथुनं । हानिश्चैव स्वगात्राणां विरेकवमनक्रिया॥(विरेको मलविसर्जनं) दक्षिणाशाभिगमनं व्याधिनाऽभिभवस्तथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलोपहारश्च तथा शाड्वलानां विशोधनं ॥ गृहाणां चैव भंगश्च गृहसंमार्जनं तथा । क्रीडा पिशाचक्रव्यादवानराश्वतरैरपि ॥ काषायवस्त्रधारित्वं तद्वत्क्रीडनकं तथा । तैलपानावगाहौ च रक्तमाल्यानुलेपनं ॥ एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत् ॥ पराशरः । कायस्यालेपनं वा कलुषजलमषीगोमयस्नेहपंकैर्दंग्जिह्वादंतबाहुप्रपतनमथवाऽनर्थशोकप्रदानि । लैंगे । मुक्तकेशो हसंश्चैव गायते नृत्यते नरः । याम्यां दिशमितो गच्छेत्तदंतं तस्य जीवितं ॥ अन्येऽप्युद्योगभीष्मद्रोणकर्णपर्वयुद्धकांडादौ भारतरामायणादौ ज्ञेयाः । मात्स्ये विष्णुधर्मे च । स्वप्नस्तु प्रथमे यामे संवत्सरफलो भवेत् । षड्भिर्मासैर्द्वितीये च त्रिभिर्मासैस्तृतीयके ॥ चतुर्थे मासमात्रेण फलं भवति नान्यथा । स्वप्नचिंतामणौ । सूर्योदये तु दृष्टः सद्यः फलदायकः स्वप्नः । पराशरः । पादद्विपादोत्तरपादद्वद्व्या वर्षार्धमासत्रयमासकालाः । निशाविभागेषु चतुर्षु दृष्टाः स्वप्ना अनिष्टेष्टफलप्रदाः स्युः ॥ वराहः । आद्ये वर्षाद्वत्सरार्धाद्द्वितीये पाको वर्षार्धार्धभागे तृतीये । मासात्पाकः शर्वरीपश्चिमांते यामे॰ भवेत्सः ॥ ऐतरेयोपनिषदि । अथ स्वप्नाः पुरुषं कृष्णं कृष्णदंतं पश्यति स एनं हंति वराह एनं हंति मर्कट एनमास्कंदयत्याशु वायुरेनं प्रवहति सुवर्णं खादित्वाऽपगिरति मध्वश्नाति बिसानि भक्षयत्येकपुंडरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्राजयति स यद्येतेषां किंचित्पश्येदुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वाऽन्येनान्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयादिति । अत्र लक्षहोमः कार्यः । दुःस्वप्नाद्भुतदर्शने इति पूर्वमुक्तेः । तथा चंडीपाठोऽपि । शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने । ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते इति मार्कंडेयपुराणात् । पराशरः । देवद्विजाग्निप्रतिपूजनानि मंत्रोपवासादि पवित्रसेवा । तिलान्नगोभूमिहिरण्यदानं दुःस्वप्नसंदर्शननाशनानि ॥ नद्यंबुसंस्पर्शन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रहोमतिलप्रदानं जपनं च भूयः। शांतिर्जपो होमजलान्नदानं दुःस्वप्नहंतॄणि पयश्च गांगं॥ तिलानामयुतं तत्र जुहुयात्तु समाहितः। तिलोसीति च मंत्रेण धेनुं दद्याच्च दक्षिणां॥ ब्राह्मणांस्तर्पयेत्तत्र दक्षिणाभोजनादिना। दानं च विविधं देयमशुभानां विनाशने॥ षड्भिर्मासैस्तु संपूर्णैरन्यथा मरणं भवेत्। मात्स्ये। स्तुतिश्च वासुदेवस्य तथा तस्य च पूजनं। गजेंद्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनं॥ स्तुतिः कृष्णसहस्रनामजपः। पुण्योदुःस्वप्ननाशन इत्युक्तेः। प्रयोगपारिजाते शौनकः। स्वप्नोत्पातेषु चैतेषु कालरात्र्यधिदेवता। पूजाविधानं पूर्वोक्तं कुर्यादत्रापि यत्नतः॥ होमं कुर्यात्प्रयत्नेन रात्रावेव द्विजोत्तमः। प्रत्यृचं पायसं हुत्वा रात्रीव्यख्यदिति क्रमात्॥ अष्टोत्तरशतं हुत्वा सूक्तेनानेन यत्नतः। स्वप्नाधिपतिमंत्रेण हुनेदष्टोत्तरं शतं॥ कालरात्रिमंत्रेणेत्यर्थः। गुरवे दक्षिणां दद्याद्वस्त्रहेमपशूनपि। यद्युक्तदक्षिणादानेऽप्यशक्तो होमकर्मणि॥ हिरण्यं दक्षिणां दद्यात्तदानीमेव वा बुधः। वस्त्रकुंभादि सकलं तद्धोत्रे प्रतिपादयेत्॥ स एव। यद्यनिष्टफलं स्वप्नं पश्येत्तस्योच्यते विधिः। अद्यानोदेवसवितरित्यृचा पूर्वमेकया॥ ततः परं यच्चगोषुदुःष्वप्न्यमितिपंचभिः। ऋग्भिः परं ततो योमेराजन्युज्यइति त्वृचा॥ ऋग्भिः सर्वाभिरेताभिरुपतिष्ठेत भास्करं। एवं कृते तु दुःस्वप्नदर्शनं निष्फलं भवेत्॥ अधस्वप्नस्येति जपन्प्रातः प्रातर्दिने दिने। दुःस्वप्नं नुदते कृत्स्नं न तस्माद्विंदते भयं॥ अत्र श्राद्धमपि कार्यं। श्राद्धार्हद्रव्यसंपत्तौ तथा दुःस्वप्नदर्शने। जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छयेति पृथ्वीचंद्रोदये मार्कंडेयपुराणात्। एतदस्माभिर्निर्णयसिंधावुक्तं। इति शांतिरत्ने दुःस्वप्नशांतिः॥ ॥ अथ वास्तुशांतिः। तत्कालोऽस्माभिर्निर्णयसिंधावुक्तः। किंचिदुच्यते। नारदः। सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः। मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः॥ बादरायणः। वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके। सूत्रारंभः शिलान्यासः स्तंभारंभश्च शस्यते॥ दैवज्ञवल्लभः। शोको धान्यं पंचता निष्पशुत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वातिनैंःस्व्यं संगरं मृत्युनाशः । संगरं रत्नधान्यमिति कालादर्शे पाठः । स्वं श्रीप्राप्तिं वह्निभीतिं च लक्ष्मीं कुर्युश्चैत्राद्या गृहारंभकाले ॥ मात्स्ये तु । आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् । मार्गशीर्षे तथा धान्यं पौषे तस्करतो भयमित्याषाढः शुभः पौषश्चाशुभ उक्तः । रत्नमालायां । कर्कनक्रहरिकुंभगतेऽर्के पूर्वपश्चिममुखानि गृहाणि । तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि शुभानि ॥ गर्गः । त्र्युत्तरे मृगरोहिण्योः पुष्ये मैत्रे करत्रये । धनिष्ठाद्वितये पौष्णे गृहारंभः प्रशस्यते ॥ मात्स्ये । आदित्यभौमवर्जं तु सर्वे वाराः शुभावहाः । चंद्रादित्यबलं लब्ध्वा लग्ने शुभनिरीक्षिते ॥ स्तंभोच्छ्रायादि कर्तव्यमन्यत्तु परिवर्जयेत् । प्रासादेष्वेवमेव स्यात्कूपवापीषु चैव हि ॥ पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत् । भूपरीक्षोक्ता तत्रैव । अरत्निमात्रे गर्ते च स्वनुलिप्ते तु सर्वतः । घृतमामशरावस्थं कृत्वा वर्तिचतुष्टयं ॥ ज्वालयेद्भूपरीक्षार्थं पूर्णं तत्सर्वदिङ्मुखं । दीप्तौ पूर्वादि गृह्णीयाद्वर्णानामनुपूर्वशः ॥ वास्तुः सामूहिको नाम दीप्यते सर्वतस्तु यः । शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च ॥ अरत्निमात्रं गर्तं तु कृत्वा तत्खातपूरणे । अधिके श्रियमाप्नोति न्यूने हानिः समे समं ॥ कालकृष्टेऽथवा देशे सर्वबीजानि वापयेत् । त्रिपंचसप्तरात्रेण यत्र रोहंति तान्यपि ॥ ज्येष्ठोत्तमा कनिष्ठा भूर्वर्जनीयतरा मता । वराहः । दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमां । शेषाः प्रदक्षिणेन स्तंभाश्चैवं समुत्थाप्याः ॥ लल्लः । स्नानं च पाकं शयनं च भोज्यं गजालयं वाजिगृहं धनस्य । देवस्य पूर्वादिदिशि क्रमेण मध्ये सभा भूपनिवेशनाय ॥ आश्वलायनसूत्रे । यत्र सर्वत आपो मध्यं समेत्य प्रदक्षिणं शयनीयं परीत्य प्राच्यः स्यंदेरन्प्रवदत्यस्तत्र्वं समृद्धं । वसिष्ठः । स्वगृहात्पश्चिमे भागे पितृस्वाग्रजमंदिरं । गृहपादा गृहस्तंभाः समाः कार्याश्च नाऽसमाः ॥ नात्युच्छ्रितं नातिनीचं कुड्योत्सेधं यथारुचि । भित्तिः पक्वेष्टकाभिर्वा दारुणाप्यथवा मृदा ॥ कार्या चित्रपटैर्वापि तृणैः पत्रैश्च न क्वचित् । गर्गः । द्वारं प्रयत्नात्कर्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वद्वारप्रतिष्ठितं । परकोणैः परद्वारैः परस्तंभैः परद्रुमैः ॥ कूपवृक्षादिभिश्चैव हतं द्वारं निरर्थकं । राजतो भयमत्युच्चैरतिनीचैस्तु चौरतः ॥ विनाशश्चातिविस्तीर्णे संवृते चाति च क्षुधा । अतिप्रमाणे दारिद्र्यमत्यल्पे व्याधितो भयं ॥ जिह्मे त्वर्था विनश्यंति कुटिले ऋणवद्भवेत् । “ शां॰ सा॰ कूपस्थानं वसिष्ठसंहितायां । ऐश्वर्यं पुत्रहानिश्च स्त्रीनाशो निधनं भवेत् । संपच्छत्रुभयं सौख्यं पुष्टिः प्रागादितः क्रमात् ॥ कूपे कृते मध्यमे तु धनहानिश्च वास्तुतः । तस्मात्सम्यग्विचार्याथ कूपं कुर्वीत बुद्धिमान् ॥ तत्रैव । पुंनागाऽशोकतिलकशमीबकुलचंपकाः । दाडिमीपिप्पलीद्राक्षापिचुमर्दजपामराः ॥ बंधूकपूगपनससरोजगृहमल्लिकाः । मल्लिकापाटलीजातिनालिकेरास्तृणद्रुमाः ॥ एते गृहांगणे वृक्षाः सर्वदा मंगलप्रदाः । प्लक्षकर्कंधुवृक्षौ द्वौ गृहस्योत्तरतः शुभौ ॥ न्यग्रोधोदुंबराश्वत्थाः प्रागादिषु शुभप्रदाः । अगस्तिमातुलिंगाख्यहरिद्राकदलीस्तुषाः । स्वयं प्रजाता अप्येते दुःखशोकभयप्रदाः ॥ नारदसंहितायां । स्नानागारं दिशि प्राच्यामाग्नेय्यां पाचकालयं । याम्यायां शयनागारं नैर्ऋत्यां शस्त्रमंदिरं ॥ प्रतीच्यां भोजनगृहं वायव्यां पशुमंदिरं । भांडागारं तूत्तरस्यामैशान्यां देवमंदिरं ॥ ” नारदः । प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोः । माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः ॥ रत्नकोशे । पुष्ये धनिष्ठामृदुवारुणेषु स्वायंभुवर्क्षे तिसृषूत्तरासु । अक्षीणचंद्रे शुभदो नृपस्य तिथावरिक्ते च गृहप्रवेशः ॥ वसिष्ठः । कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान्पूज्यानग्रतः पूर्णकुंभं । रम्यं हर्म्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वी गीतवाद्यैर्विशेच्च ॥ लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी निवेशयेत् । एकमेकं न्यसेत्कोणे वामशुक्रं विचिंतयेत् ॥ नारदः । अकपाटमनाच्छन्नमदत्तबलिभोजनं । गृहं न प्रविशेद्धीमानापदामाकरो हि तत् ॥ मृत्पेटिकां स्वर्णरत्नधान्यशैवलसंयुतां । गृहमध्ये हस्तमात्रगर्ते वास्तुं च विन्यसेत् ॥ हेमाद्रौ मात्स्ये । एकाशीतिपदं कृत्वा रेणुभिः [रेखाभिः] कनकेन तु । पश्चात्पिष्टेनानुलिंपे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सूत्रेणालोड्य सर्वतः ॥ दश पूर्वायता रेखा दश चैवोत्तरायताः । सर्ववास्तुविभागेषु विज्ञेया नवका नव ॥ पदस्थान्पूजयेद्देवांस्त्रिशत्पंचदशै-
व तु । द्वात्रिंशद्बाह्यतस्तेषु पूज्याश्चांतस्त्रयोदश ॥ मध्ये नवपदो ब्रह्मा चत्वारस्त्रिपदाः स्मृताः । विंशतिस्त्वेकपदिकास्तावंतो द्विपदाः स्मृ-
ताः ॥ नामतस्तान्प्रवक्ष्यामि स्थानानि च निबोधत । ईशानकोणादिषु तान्पूजयेत्क्रमशो नरः ॥ शिखी चैवाथ पर्जन्यो जयंतः कुलिशायुधः ।
सूर्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥ पूषा च वितथश्चैव गृहक्षतयमावुभौ । गंधर्वो भृंगराजश्च मृगः पितृगणस्तथा ॥ दौवारिकोऽथ
सुग्रीवः पुष्पदंतो जलाधिपः । असुरः शोषपापौच रोगोऽहिर्मुख्य एव च ॥ भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा । बहिर्द्वात्रिंशदेते
तु तदंतश्चतुरः शृणु ॥ ऐशानादिचतुष्कोणसंस्थितान्पूजयेद्बुधः । आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥ मध्ये नवपदे ब्रह्मा तस्याष्टौ
च समीपगान् । साध्यानेकांतरान्विद्यात्पूर्वादौ नामतः शृणु ॥ अर्यमा सविता चैव विवस्वान्विबुधाधिपः ॥ मित्रोऽथ राजयक्ष्मा च तथा
पृथ्वीधरः स्मृतः ॥ अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः । आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ॥ पदिकानां तु वर्गोऽयमेवं कोणे-
ष्वशेषतः ॥ तन्मध्ये तु बहिर्विंशद्द्विपदास्ते तु सर्वतः । अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥ ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व-
तः । मूर्धन्यग्निः समाविष्टो मुखे चाऽऽपः समाश्रितः ॥ पृथ्वीधरोऽर्यमा चैव स्तनयोस्तावधिष्ठितौ । वक्षःस्थले चापवत्सः पूजनीयः सदा
बुधैः ॥ नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयंतकौ । सर्पैंद्रावंससंस्थौ तु पूजनीयौ प्रयत्नतः ॥ सूर्यसोमादयस्तद्वद्बाह्वोः पंच च पंच च । रुद्रश्च
राजयक्ष्मा च वामहस्ते समास्थितौ ॥ सावित्रः सविता तद्वद्धस्तं दक्षिणमास्थितौ । विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ॥ पूषा च पापयक्ष्मा
च हस्तयोर्मणिबंधने ॥ तथैवासुरशोषौ च वामपार्श्वे समास्थितौ । पार्श्वे तु दक्षिणे तद्वद्वितथः सगृहक्षतः ॥ ऊर्वोर्यमांबुपौ ज्ञेयौ जान्वोर्गं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्वपुष्पकौ ॥ जंघयोर्भृंगसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः । जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा ॥ मध्ये नवपदे ब्रह्मा हृदये स तु पूज्यते । "अ० पु० । गृहे च नगरादौ च एकाशीतिपदैर्यजेत् ।" चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः । ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्धपदास्तथा । बहिः कोणेषु चाष्टौ तु सार्धाश्चोभयसंस्थिताः ॥ विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः । पूजामाह नारदः । वास्तुमंत्रेण वास्तुज्ञो दूर्वादध्यक्षतादिभिः । वसिष्ठः । प्रणवेनार्चयेद्वापि अथवा स्वस्वनामभिः ॥ मात्स्ये । होमस्त्रिमेखले कार्यः कुंडे हस्तप्रमाणके । कार्यस्तु पंचभिर्यवैः कृष्णतिलैश्चैव समिद्भिः क्षीरवृक्षजैः ॥ पलाशैः खदिरैश्चापामार्गोदुंबरसंभवैः । कुशदूर्वाभवैर्वाऽपि मधुसर्पिःसमन्वितैः ॥ बिल्वैर्बिल्वबीजैरथापि वा । होमांते भक्ष्यभोज्यैस्तु वास्तुदेशे बलिं हरेत् ॥ तद्वद्विशेषनैवेद्यमिदं दद्यात्क्रमेण तु ॥ ईशकोणे घृताक्तान्नं शिखिने विनिवेदयेत् ॥ ओदनं सोत्पलं [सफलं] दद्यात्पर्जन्याय घृतान्वितं । जयंताय ध्वजं पीतं पैष्टं कूर्मं च संत्यजेत् ॥ इंद्राय पंचरत्नानि पैष्टं च कुलिशं तथा । वितानकं च सूर्यायापूपं सक्तूंस्तथैव च ॥ सत्याय घृतगोधूमं मत्स्यान्दद्याद्भृशाय च । शष्कुलीश्चांतरिक्षाय दद्यात्सक्तूंश्च वायवे ॥ लाजाः पूष्णे तु दातव्या वितथे चणकौदनं । गृहक्षताय मध्वन्नं यमाय पिशितौदनं ॥ गंधौदनं च गंधर्वे भृंगे मेषस्य जिह्विकां [भृंगराजस्य भृंगकं]। मृगाय यावकं दद्यात्पितृभ्यः कृसरं तथा ॥ दौवारिके दंतकाष्ठं पैष्टं कृष्णबलिं तथा । सुग्रीवेऽपूपकान्दद्यात्पुष्पदंताय पायसं ॥ कुशस्तंबेन संयुक्तं तथा पद्मं च वारुणे । पिष्टं हिरण्मयं दद्यादसुराय सुरा मता ॥ घृतौदनं च शोषाय यवान्नं पापयक्ष्मणे । घृतलड्डूंस्तु रोगाय नागे पुष्पफलानि तु ॥ सर्पिर्मुख्याय दातव्यं मुद्गौदनमतःपरं । भल्लाटस्थानके दद्यात्सोमाय घृतपायसं ॥ नागाय शालिजं पिष्टमदित्यै पोलिकास्तथा । दितेस्तु पूरिका दद्यादित्येवं बाह्यतो बलिः ॥ क्षीरमापाय दातव्यमापवत्साय वै दधि । सावित्रे लड्डुकान्दद्यात्समरीचं कुशो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकं ॥ सवित्रे गुडपूपांश्च जयाय घृतचंदनं । विवस्वते पुनर्दद्याद्रक्तचंदनपायसं ॥ हरितालौदनं दद्यादिंद्राय घृतसंयुतं । गुडौदनं तु मित्राय रुद्राय घृतपायसं ॥ आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे । पृथ्वीधराय मांसानि कूष्मांडानि च दापयेत् ॥ शर्करापायसं दद्यादर्यम्णे पुनरेव हि । पंचगव्यं यवांश्चैव तिलाक्षतमयं चरुं ॥ भक्ष्यं भोज्यं च विविधं ब्रह्मणे तु निवेदयेत् । एवं संपूजिता देवाः शांतिं कुर्वंति ते सदा ॥ सर्वेषां कांचनं दद्याद्ब्रह्मणे गां पयस्विनीं । राक्षसीनां बलिर्देयः स च यादृग्यथा शृणु ॥ मांसौदनं घृतं पद्मकेसरं रुधिरान्वितं । ईशानभागमाश्रित्य चरक्यै विनिवेदयेत् ॥ मांसौदनं सरुधिरं हरिद्रौदनमेवच । आग्नेयीं दिशमाश्रित्य विदार्यै च निवेदयेत् ॥ दध्योदनं सरुधिरं मत्स्यखंडैश्चसंयुतं। पीतरक्तं बलिं दद्यात्पूतनायै तु नैर्ऋते ॥ वायव्यां पापराक्षस्यै मत्स्यमांसं सुरासवं । " वि.मा. मांसौदनं तु स्कंदाय अर्यम्णे घृतपोलिकां। मांसं सरुधिरं दद्याज्जृंभकाय तु पश्चिमे । पिलिपिच्छाय रक्तानि पीतानि विनिवेदयेत्॥भक्ष्यं भोज्यं दिगीशेभ्यस्तत्तन्मंत्रैर्निवेदयेत्।"पायसं वापि दातव्यं स्वनाम्ना सर्वतः क्रमात् ॥ नमस्कारांतयुक्तेन प्रणवाद्येन सर्वतः । तदभावे दर्भपुष्पदध्यक्षतयुतं बलिं ॥ गोमयेनोपलिप्तायां मंडलात्पूर्वतः क्षितौ । गंधादिपूर्वकं सार्वभौतिकं च बलिं हरेत् ॥ भूतेभ्यश्च पितृभ्यश्च राक्षसेभ्यस्ततः पृथक् । पिशाचेभ्योऽपि मातृभ्यो गणेभ्यश्च पृथक्पृथक् ॥ दिव्यांतरिक्षभौमेभ्यः प्रणवाद्यैर्नमोंतकैः । ततः सर्वौषधिस्नानं यजमानस्य कारयेत् ॥ द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः । एतद्वास्तूपशमनं कृत्वा कर्म समाचरेत् ॥ प्रासादभवनोद्यानप्रारंभे परिवर्तने । जीर्णोद्धारे तथोत्थाने तथा गृहनिवेशने ॥ द्वाराभिवर्तने तद्वत्प्रासादपरिवर्तने । पुरवेश्मप्रवेशे च सर्वदोषोपशांतये ॥ वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् । राक्षोघ्नपावमानेन सूक्तेन भवनादिकं ॥ अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः । गृहे वाऽऽयतने कुर्यान्न स दुःखमवाप्नुयात् ॥ न च व्याधिभयं तस्य न च बंधुधनक्षयः । जीवेद्वर्षशतं स्वर्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पमेकं वसेन्नरः ॥ गृह्योक्तहोमविधिना बलिकर्म कुर्यात्प्रासादवास्तुशमने च विधिर्य उक्तः । गृह्योक्तशांतेरस्याश्च समुच्चय इत्यर्थः । संतर्पयेद्द्विजवरानथ भक्ष्यभोज्यैः शुक्लांबरः स्वभवनं प्रविशेत्सुरूपं ॥ कृत्वाऽग्रतो द्विजवरानथ पूर्णकुंभं दध्यक्षताम्रदलपुष्पफलोपशोभि । दत्वा हिरण्यवसनानि तथा द्विजेभ्यो मांगल्यशांतिनिलयं स्वगृहं विशेच्च ॥ आश्वलायनः । बीजवतोगृहान्प्रपद्येतेति । वसिष्ठसंहितायामप्येवमेव शांतिरुक्ता किंचिद्विशेषयुक्ता । तत्रैव । वास्तुपूजामकृत्वा यः प्रविशेन्नवमंदिरं । रोगान्नानाविधान् क्लेशानश्नुते सर्वसंकटान् ॥ इति शांतिरत्ने वास्तुशांतिः ॥ ॥ अथास्मत्पितृकृतो वास्तुशांतिप्रयोगः । गृहप्रवेशे प्रागुक्तप्रवेशदिनात्पूर्वे शुभे पूर्वाह्णे गृहारंभादौ तु सद्यो यजमानः सस्त्रीकः शुचिः प्राङ्मुख आचमनादिदेशकालस्मरणांते अस्य वास्तोः शुभतासिद्ध्यर्थं (मम सपरिवारस्य अस्मिन्वास्तौ चिरकालसुखनिवाससिद्धिपूर्वकं सर्वसंकटनानाविधरोगक्लेशबंधुधनक्षयदुःस्वरक्षोविघ्नोपशमसंपदारोग्यपुत्रपौत्रादिधनधान्यसमृद्धिचिरजीवनस्वर्निवाससिद्धिद्वारा श्रीपर०) सग्रहमखां वास्तुशांतिं करिष्ये इति संकल्प्य गणेशपूजादि ऋत्विग्वरणांतं कुर्यात् । तत्र ऋत्विजश्चत्वारः । तत आचार्यः पुरुषसूक्तजपांते यदत्रेतिद्वाभ्यां भूतप्रेतपिशाचाद्या अपक्रामंतु राक्षसाः । स्थानादस्माद्व्रजंत्वन्यत्स्वीकरोमि भुवं त्विमामित्यनेन च गौरसर्षपान्विकीर्य पंचगव्येन दर्भैः शुचीवोहव्येति त्रिभिरापोहिष्ठेतितृचेन च सर्वं गृहं प्रोक्ष्य स्वस्त्ययनजपादि प्रादेशकरणांतं कुर्यात् । ततो गृहादौ यजमानैकहस्तमितं चतुरस्रं सयोनि त्रिमेखलं कुंडं चतुरंगुलोत्सेधं स्थंडिलं वा विधाय तत्पूर्वतश्चतुरंगुलोन्नतं हस्तमितं वेदिद्वयं मृदा विधाय उत्तरवेदेरैशानादिकोणचतुष्टये विशंतु भूतले नागा लोकपालाश्च सर्वतः । अस्मिन् गृहेवतिष्ठंतु आयुर्बलकराः सदेतिमंत्रेण चतुरः शंकून् रोपयेत् (मयूखे तु लोहकीलरोपणमुक्तं) प्रतिरोपणं मंत्रावृत्तिः । प्रासादादौ तु गृहशब्दस्थाने तत्तन्नामोहनीयं । एवं प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादेऽपीति सर्वांतेऽतिदेशात् । ततो रोपणक्रमेण शंकुपार्श्वे अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः । तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति मंत्रावृत्त्या माषभक्तबलीन्दद्यात् । ततो वेद्युपरिवस्त्रे कुंकुमादिना सुवर्णरजतादिशलाकया । ॐशांतायैनमः १ यशोवत्यै० २ कांतायै० ३ विशालायै० ४ प्राणवाहिन्यै० ५ सत्यै० ६ सुमत्यै० ७ नंदायै० ८ सुभद्रायै० ९ सुरथायै० १० इत्योंकारादिनमोंतैर्नामभिः पश्चादारभ्य प्रागंता उदक्संस्थाः समा अंगुलद्वयांतरा दशरेखाः कृत्वा पुनः हिरण्यायै० १ सुव्रतायै० २ लक्ष्म्यै० ३ विभूत्यै० ४ विमलायै० ५ प्रियायै० ६ जयायै० ७ ज्वालायै० ८ विशोकायै० ९ इडायै० १० इतिनामभिस्तथैव दक्षिणारंभा उदगंताः प्राक्संस्था दशरेखाः कृत्वा कुंडे स्थंडिले वाऽग्निं प्रतिष्ठाप्य दक्षिणवेद्यां वस्त्रे ग्रहमंडलं विलिख्य तत्र ग्रहादीन्संस्थाप्य षोडशोपचारैः संपूज्य तदैशान्यां कलशं संस्थाप्य वास्तुमंडलं गत्वा तत्र ऐशानकोणपदादारभ्य प्रतिमासु तंडुलपुंजेषु वा शिख्यादिदेवताः प्रणवादिनमोंतनाममंत्रैरावाहयेत् । तत्र ऐशानकोणपदे वास्तोः शिरसि । शिखिनेनमः शिखिनमावाहयामि १ एवमग्रेऽपि । तद्दक्षिणैकपदे दक्षिणनेत्रे पर्जन्यं २ तद्दक्षिणपदे तत्पश्चिमपदे च दक्षिणश्रोत्रे जयंतं ३ तद्दक्षिणपदद्वये दक्षिणांसे कुलिशायुधं ४ तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्यं ५ तद्दक्षिणपदद्वये दक्षिणबाहावेव सत्यं ६ तद्दक्षिणपदद्वये दक्षिणकूर्परे भृशं ७ तद्दक्षिणोपरिस्थैकपदे दक्षिणप्रबाहावाकाशं ८ तद्दक्षिणाग्नेयकोणपदे दक्षिणप्रबाहावेव वायुं ९ तत्पश्चिमैकपदे दक्षिणमणिबंधे पूषणं १० तत्पश्चिमपदे तदुत्तरपदे च दक्षिणपार्श्वे वितथं ११ तत्पश्चिमपदद्वये दक्षिणपार्श्वे एव गृहक्षतं १२ तत्पश्चिमपदद्वये दक्षिणोरौ यमं १३ तत्पश्चिमपदद्वये दक्षिणजानौ गंधर्वं १४ तत्पश्चिमपदद्वये दक्षिणजंघायां भृंगराजं १५ तत्पश्चिमोपरिस्थैकपदे दक्षिणस्फिचि मृगं १६ तत्पश्चिमे नैर्ऋतकोणपदे पादयोः पितॄन् १७ तदुत्तरैकपदे वामस्फिचि दौवारिकं १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुत्तरपदे तत्प्राक्पदे च वामजंघायां सुग्रीवं १९ तदुत्तरपदद्वये वामजानौ पुष्पदंतं २० तदुत्तरपदद्वये वामोरौ जलाधिपं २१ तदुत्तरपदद्वये वामपार्श्वे असुरं २२ तदुत्तरपदद्वये वामपार्श्वे एव शोषं २३ तदुत्तरोपरिस्थैकपदे वाममणिबंधे पापं २४ तदुत्तरवायव्यकोणपदे वामप्रबाहौ रोगं २५ तत्प्रागेकपदे वामप्रबाहावेवाऽहिं २६ तत्प्राक्पदे तद्दक्षिणपदे च वामकूर्परे मुख्यं २७ तत्प्राक्पदद्वये वामबाहौ भल्लाटं २८ तत्प्राक्पदद्वये वामबाहावेव सोमं २९ तत्प्राक्पदद्वये वामांसे सर्पं ३० तत्प्राक्पदद्वये वामश्रोत्रे अदितिं ३१ तत्प्रागुपरिस्थैकपदे वामनेत्रे दितिं ३२ तद्दक्षिणे शिखिपदाधःकोणपदे मुखे आपं ३३ आग्नेये वायुपदाधःकोणपदे दक्षिणहस्ते सावित्रं ३४ नैर्ऋते पितृपदाधःकोणपदे मेढ्रे जयं ३५ वायव्ये रोगपदाधःकोणपदे वामहस्ते रुद्रं ३६ मध्यगतनवकोष्ठात्मकब्रह्मस्थानसंलग्नैशानकोणपदाद्दक्षिणपदत्रये दक्षिणस्तने अर्यमणं ३७ तदक्षिणाग्नेयकोणपदे दक्षिणहस्ते सवितारं ३८ तत्पश्चिमपदत्रये जठरदक्षिणभागे विवस्वंतं ३९ तत्पश्चिमनैर्ऋतकोणपदे वृषणयोर्विबुधाधिपं ४० तदुत्तरपदत्रये जठरवामभागे मित्रं ४१ तदुत्तरवायव्यकोणपदे वामहस्ते राजयक्ष्माणं ४२ तत्प्राक्पदत्रये वामस्तने पृथ्वीधरं ४३ तत्प्रागैशानकोणपदे उरस्यापवत्सं ४४ मध्ये नवपदेषु हृन्नाभ्योर्ब्रह्माणं ४५। तत उत्तरे वास्तोष्पतेप्रतीत्यस्य वसिष्ठो वास्तोष्पतिस्त्रिष्टुप्। वास्तोष्पत्यावाहने०। वास्तोष्पतेप्रतिजानीह्यस्मानिति मंत्रेण सौवर्णं राजतं वा वृषवास्तुं स्थापयेत् ४६। ततो मंडलाद्बहिरैशानादिकोणेषु क्रमेण चरकीं ४७ विदारीं ४८ पूतनां ४९ पापराक्षसीं ५०। पूर्वादिदिक्षु च क्रमेण स्कंदं ५१ अर्यमणं ५२ जृंभकं ५३ पिलिपिच्छं ५४ च प्राग्वन्नाममंत्रैः संस्थाप्य प्रागाद्यष्टदिक्षु इंद्रादींस्तत्तन्मंत्रैर्नामभिर्वा संस्थाप्य तदस्त्वित्यावाह्यासनाद्युपचारैः प्रत्येकमेकत्र वा कांडानुसमयेन पदार्थानुसमयेन वाऽभ्यर्च्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंडलादैशान्यामकालकमव्रणं कलशं संस्थाप्य तत्र गंधौषधीयवदूर्वापंचपल्लवसप्तमृत्फलपंचरत्नानि प्रक्षिप्य वस्त्रेणाभिवेष्ट्य यवपूरितं पूर्णपात्रं निधाय वरुणमावाह्य तत्र तीर्थान्यावाहयेत्। तत आचार्योऽन्वाधानं कुर्यात् । तत्र चक्षुषीआज्येनेत्यंते ग्रहान् अमुकसंख्याभिः समित्तिलाज्याहुतिभिः । अधिदेवताः प्रत्यधिदेवताः विनायकादीन् अमुक० समित्तिलाज्याहुतिभिः । शिख्यादिपंचचत्वारिंशद्देवताः अष्टसहस्राष्टशताष्टाविंशत्यष्टान्यतमसंख्याभिः औदुंबरसमित्तिल (यव) पायसाज्याहुतिभिः । वास्तुं वास्तोष्पतइति चतसृभिर्ऋग्भिः क्रमेण अष्टसहस्राद्यन्यतमसंख्याभिः औदुंबरसमित्तिल० । पुनर्वास्तुं वास्तोष्पतइति चतसृभिः वास्तोष्पतेध्रुवास्थूणामित्यनया च क्रमेण प्रत्यृचं पंचैकान्यतरसंख्याभिर्बिल्वाहुतिभिस्तद्बीजाहुतिभिर्वा । चरक्यादीन् अष्टोत्तरशताद्यन्यतमसंख्याभिः औदुंबरसमित्तिल० । शेषेणेत्यादिप्रणीताप्रणयनांते शिख्यादिदेवताभ्यः प्रत्येकममुष्मैत्वेति निर्वापप्रोक्षणपूर्वकमाज्यभागांतं कुर्यात्। ततो यजमानेनाग्नेर्दक्षिणत उपविश्याऽन्वाधानोक्तदेवताभ्य उक्तसंख्यया तत्तद्द्रव्याण्युत्सृज्ये नममेति त्यागे कृते ऋत्विग्भिः सह प्रधानहोमं कुर्यात् । स चेत्थं । नवग्रहेभ्यः क्रमेणार्कपलाशखदिरापामार्गपिप्पलोदुंबरशमीदूर्वाकुशाख्याः समिधः प्रत्येकमष्टशतमष्टाविंशतिमष्टौ वा प्रादेशमात्रास्तत्संख्याश्च तिलाज्याहुतीस्तत्तन्मंत्रैर्जुहुयात् । यदा तेभ्यश्चरुरपि तदाप्याहुतिसंख्या सैव । केचित्त्वेकैका चर्वाहुतिरित्याहुः । ततोऽधिदेवताप्रत्याधिदेवताविनायकादिभ्यस्तन्न्यूनसंख्यया तथव तत्तद्ग्रहाधिदेवतादिभ्यस्तत्तद्ग्रहसमिधः पालाश्यो वा। ग्रहाणामष्टपक्षे एताभ्यश्चतस्र इति शिष्टाः । अत्र तिसृभिर्दूर्वाभिरकाहुतिरिति सख्या कार्या । कुशेषु त्रिपत्रेणैकेति। ततः शिख्यादिभ्यः प्रागुक्तप्रणवादिस्वाहांतनामभिः प्रत्येकमष्टसहस्रमष्टशतमष्टाविंशतिमष्टौ वाऽऽहुतीः समित्तिलयवपायसाज्यैर्जुहुयात् । अत्र समिध उदुंबरस्य मुख्यास्तदलाभेऽश्वत्थादीनामपि । सर्वाः समिधो मधुघृतदधिभिर्मधुघृतक्षीरैर्वाऽभ्यक्ता होतव्याः । तिलाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णा एव । पयो गोरेव । केचित्तिलेषु यवानाहुः । ततो वास्तवे वास्तोष्पतइति चतसृभिः क्रमेण समित्तिल (यव) पायसाज्यानि जुहुयात् । पुनर्वास्तवे वास्तोष्पत इति चतसृभिर्वास्तोष्पतेध्रुवेत्यनया च प्रत्यृचं पंच एकैकं वा घृताक्तं बिल्वं जुहुयात् । वास्तोष्पतइति चतसृणां वसिष्ठो वास्तोष्पतिस्त्रिष्टुबंत्या गायत्री । वास्तोष्पतेध्रुवास्थूणामितीरिंबिठिर्वास्तोष्पतिर्बृहती । होमे वि० । ततश्चरक्यादिभ्यो मुख्यन्यूनसंख्यया समिदादिद्रव्याणि जुहुयात् । मुख्येभ्योऽष्टसंख्यायामत्र चतुःसंख्यत्वमिति शिष्टाः । एतानि सर्वाणि द्रव्याणि हस्तेनैव होतव्यानि । ततः स्विष्टकृदादिप्रायश्चित्तहोमांते इंद्रादिदिक्पालेभ्यो नवग्रहेभ्यो विनायकादिभ्यश्च सदीपमाषभक्तबलीन्दत्वा स्रुच्याज्यं द्वादशगृहीतं चतुर्गृहीतं वा कृत्वा नारिकेलादिफलं तत्र संस्थाप्य मूर्धानमिति पूर्णाहुतिं जुहुयात् । मूर्धानंदिवो भरद्वाजो वैश्वानरस्त्रिष्टुप् । पूर्णाहुतिहोमे विनि० । ततः प्रणीतानिनयनादिकर्मशेषं समाप्य वास्तुमंडलपश्चिमदेशे ॐ शिखिनेनमः एषपायसबलिर्नममेत्येवं शिख्यादिभ्यो बलीन्दद्यात् । तान्विप्रे घृतयुतपायसेन । क्षत्रियादौ वक्ष्यमाणैः पक्वैस्तदभावे पायसेनेति (ततः शक्तौ सत्यां सर्वेभ्यः सुवर्णेन बलिदानं । ब्रह्मणे तु गां पयस्विनीं दद्यादिति विशेषः) ततश्चरक्यादिभ्यस्तथैव माषभक्तबलीन्दद्यात् । तत आचार्यादयः समुद्रज्येष्ठा इत्यादिवैदिकैः सुरास्त्वामित्यादिपौराणैश्च मंत्रैर्यजमानं सामात्यं सपत्नीकं शांतिकलशोदकेनाभिषिच्य सर्वौषधीभिरनुलिप्य स्नापयेयुः । तत आचार्यो ब्रह्मस्थाने सुरूपां भूषितां स्त्रीरूपां पृथ्वीं ध्यात्वा ॐधरायैनम इति मंत्रेण पूजयेत् । सर्वदेवमयं वास्तु वास्तुदेवमयं परमिति पठित्वा पावमानेन सूक्तेन राक्षोघ्नेन च वेष्टयेत् । छिन्ने सूत्रेऽशुभं । ततो दुग्धपूर्णया जलपूर्णया च सस्तनकुंभ्या तथैव सूक्तद्वयेन धाराद्वयमविच्छिन्नं कुर्यात् । अथ यजमानो गृहस्याग्नेये आकाशपदे जानुदघ्नमवटं खनित्वा तं गोमयेनोपलिप्य शुक्लचंदनपुष्पाक्षतादिभिरलंकृत्य शाल्यादिसप्तबीजानि दध्योदनं च प्रक्षिप्य नवकुंभं जलपूर्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्लैकपुष्पयुतं गंधादिभिरर्चितं हस्तद्वयेनादाय जानुभ्यामवनिं गत्वा ॐनमोवरुणायेति तज्जलेन गर्तं पूरयेत् । तत्रावर्तें प्रदक्षिणे पुष्पे चोर्ध्वमुखे शुभं । वैपरीत्ये त्वशुभं । ततो मृन्निर्मितपेटिकायां सप्तवीजदध्योदनशैवालफलपुष्पाणि प्रक्षिप्य पूर्वस्थापितं वृषवास्तुं तूर्यमंगलघोषेणानीय तस्यां संस्थाप्य गंधादिभिः संपूज्य प्रार्थयेत् । पूजितोऽसि मया वास्तो होमाद्यैरर्चनैः शुभैः । प्रसीद पाहि विश्वेश देहि मे गृहजं सुखं ॥ वास्तुपुरुष नमस्तेऽस्तु भूशय्याभिरत प्रभो । मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदेति । ततः पेटिकामाच्छाद्य तस्मिन्गर्ते शनैर्निक्षिपेत् । सशैलसागरां पृथ्वीं यथा वहसि मूर्धनि । तथा मां वह कल्याण संपत्संततिभिः सहेति । गर्ते च तयैव मृदा पूरिते मृद आधिक्ये उत्तमं । साम्ये मध्यमं । न्यूनत्वे त्वधमं फलं विद्यात् । गर्तोपरिभूमिं गोमयेनोपलिप्य शुक्लगंधपुष्पाक्षतैर्भूषयेत् (धरापूजाद्येतदंतं मानसोल्लासे जयमाधवीयेऽप्यस्ति) ततोऽग्नेः पश्चिमत आचार्यं संपूज्यालंकृतां सवत्सां गां वासोयुगं च दक्षिणां दत्वा ब्रह्मऋत्विग्भ्यो यथाशक्ति दत्वा ग्रहाणां शिख्यादिवास्तुदेवतानां च पूजां कृत्वा क्षमाप्य उत्तिष्ठ॰ यांतुदेवेति च विसर्जने कृते तत्प्रतिमाद्याचार्यहस्ते प्रतिपाद्याग्निं संपूज्य गच्छगच्छेति विसृज्य ब्राह्मणैः शांतिं पाठयित्वा ग्रहादीनां शिख्यादीनां च प्रीत्यर्थं प्रत्येकं त्रींस्त्रीनेकैकं यथाशक्ति वा ब्राह्मणान्संभोज्याशिषो गृहीत्वा सुहृद्युतो भुंजीत ॥ एवं प्रथमेऽह्नि वास्तुशांतिं विधाय द्वितीयेऽन्हि गृहप्रवेशं कुर्यात् । स चेत्थं । नवं जलपूर्णं पल्लवोपेतं दूर्वायुतं सुधालिप्तं वस्त्रवेष्टितं सपूर्णपात्रं सफलं कलशमंजलिना गृहीत्वा यजमानो ब्राह्मणान्वितः सदारपुत्रस्तूर्यघोषेण स्वस्तिसूक्तेन कनिक्रददिति च गृहं प्रविश्य प्रधानगृहमध्ये धान्योपरि तं कलशं स्थापयेत् । ततो गृहस्थैर्यार्थं पुण्याहं वाचयित्वा ब्राह्मणान्संपूज्य भोजयित्वाऽऽशिषो गृहीत्वा सुहृद्युतो भुंजीत । केचित्त्वेकाशीतिपदे एव मंडले स्थापनपूजनहोमबलिदानेषु ब्रह्मादिपूर्वत्वामिच्छंति । यथा । मध्यनवपदेषु वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तोर्हृन्नाभ्योर्ब्रह्मा । तत्प्राक्संलग्नपदत्रये दक्षिणस्तनेऽर्यमा । ब्रह्मपदसंलग्नदक्षिणपदत्रये जठरदक्षिणभागे विवस्वान् । तस्यैव पश्चिमसंलग्न-
पदत्रये जठरवामभागे मित्रः । तस्यैवोदक्संलग्नपदत्रये वामस्तने पृथ्वीधरः । ब्रह्मपदसंलग्ने ईशानपदे उरस्यापवत्सः । आग्नेयपदे दक्षिहस्ते
सविता । नैर्ऋतपदे वृषणयोर्विबुधाधिपः । वायव्यपदे वामहस्ते राजयक्ष्मा । आपवत्सपदसंलग्नैशानपदे मुखे आपः । सवितृपदसंलग्नाग्नेयपदे द-
क्षिणहस्ते सावित्रः । विबुधाधिपपदसंलग्ननैर्ऋतपदे मेढ्रे जयः । यक्ष्मपदसंलग्नवायव्यपदे वामहस्ते रुद्रः । मंडलैशानकोणपदात् शिख्यादीन्दि
त्यंतान्प्राग्वत् संस्थाप्य चरक्यादीन्प्राग्वदावाह्य तेनैव क्रमेण पूजनहोमादि कुर्यात् । इतरत्पूर्ववदिति ॥ ॥ प्रासादारामादौ तु चतुःष-
ष्टिपदं मंडलं कुर्यात् । तत्र । लक्ष्मीः यशोवती कांता सुप्रिया विमला शिवा सुभगा सुमतिः इडा ९ इत्येतैर्नमोंतनामभिः प्रागग्रा उदक्संस्था
नवरेखाः कृत्वा । धन्या प्राणा विशाला स्थिरा भद्रा जया निशा विरजा विभवा ९ एतैर्नमोंतैर्नामभिरुदगग्राः प्राक्संस्था नवरेखाः कृ-
त्वा मध्यमपदचतुष्टयमेकीकृत्य तत्कोणचतुष्टयाद्बहिः कोणचतुष्टयगतरेखाभिः पदान्यर्धीकृत्य शिख्यादीन् स्थापयेत् । तत्रैशानपददक्षिणार्धे
शिरसि शिखिनं । तद्दक्षिणसार्धपदे दक्षिणनेत्रे पर्जन्यं । तद्दक्षिणपदद्वये दक्षिणश्रोत्रे जयंतं । तद्दक्षिणपदद्वये दक्षिणांसे कुलिशायुधं । तद्दक्षि-
णपदद्वये दक्षिणबाहौ सूर्यं । तद्दक्षिणपदद्वये दक्षिणबाहावेव सत्यं । तद्दक्षिणसार्धपदे दक्षिणकूर्परे भृशं । तद्दक्षिणाग्नेयकोणपदार्धे दक्षिणप्रबा-
हावाकाशं । तत्पश्चिमार्धे दक्षिणप्रबाहावेव वायुं । तत्पश्चिमसार्धपदे दक्षिणमणिबंधे पूषणं । तत्पश्चिमपदद्वये दक्षिगपार्श्वे वितथं । तत्पश्चिमप-
दद्वये दक्षिणपार्श्व एव गृहक्षतं । तत्पश्चिमपपदद्वये दक्षिणोरौ यमं । तत्पश्चिमपदद्वये दक्षिणजानौ गंधर्वं । तत्पश्चिमसार्धपदे दक्षिणजंघायां
भृंगराजं । तत्पश्चिमे नैर्ऋतपदार्धे दक्षिणस्फिचि मृगं । तदुत्तरार्धे पादयोः पितॄन् । तदुत्तरसार्धपदे वामस्फिचि दौवारिकं । तदुत्तरपदद्वये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वामजंघायां सुग्रीवं । तदुत्तरपदद्वये वामजानौ पुष्पदंतं । तदुत्तरपदद्वये वामोरौ जलाधिपं । तदुत्तरपदद्वये वामपार्श्वे असुरं । तदुत्तरसार्धपदे वामपार्श्व एव शोषं । तदुत्तरवायव्यपदार्धे वाममणिबंधे पापं । तत्प्राक्पदार्धे वामप्रबाहौ रोगं। तत्प्राक्सार्धपदे वामप्रबाहावेवाऽहिं । तत्प्राक्पदद्वये वामकूर्परे मुख्यं । तत्प्राक्पदद्वये वामबाहौ भल्लाटं । तत्प्राक्पदद्वये वामबाहावेव सोमं । तत्प्राक्पदद्वये वामांसे सर्पं । तत्प्राक्सार्धपदे वामश्रोत्रेऽदितिं । तत्प्रागर्धपदे वामनेत्रे दितिं । मध्यपदेष्वैशानपदोत्तरार्धे मुखे आपं । आग्नेयपदोत्तरार्धे दक्षिणहस्ते सावित्रं। नैर्ऋतपदोत्तरार्धे मेढ्रे जयं । वायव्यपदोत्तरार्धे वामहस्ते रुद्रं । मध्ये प्राक्पदद्वये दक्षिणस्तनेऽर्यमणं । आग्नेयपददक्षिणार्धे दक्षिणहस्ते सवितारं । तत्पश्चिमपदद्वये जठरदक्षिणे विवस्वंतं । नैर्ऋतपदपूर्वार्धे वृषणयोर्विबुधाधिपं । तदुत्तरपदद्वये जठरवामे मित्रं । वायव्यपदपश्चिमार्धे वामहस्ते राजयक्ष्माणं । तत्प्राक्पदद्वये वामस्तने पृथ्वीधरं । ऐशानपददक्षिणार्धे उरस्यापवत्सं । मध्यपदचतुष्टये तन्नाभ्योर्ब्रह्माणं । तत उत्तरे वास्तोष्पतइति कलशवास्तुं । चरक्यादिस्थापनं तु पूर्ववत् । तत्र तत्र गृहपदे प्रासादादिपदमूह्यं। अपरेऽह्नि प्रवेशश्चात्र नास्ति। अन्यत्सर्वमविशिष्टं । (यद्वा ब्रह्मादीनावाहयेत् । तत्र मध्यमपदचतुष्टये हृदये ब्रह्मा। पूर्वपदद्वये दक्षिणस्तनेऽर्यमा। दक्षिणपदद्वये जठरदक्षिणे विवस्वान् । पश्चिमपदद्वये जठरवामे मित्रः । उत्तरपदद्वये वामस्तने पृथ्वीधरः । आग्नेयपदार्धयोर्दक्षिणोत्तरयोर्दक्षिणहस्ते सावित्रसवितारौ । नैर्ऋतपदार्धयोर्वृषणमेढ्रयोर्विबुधाधिपजयौ । वायव्यपदार्धयोर्वामहस्ते राजयक्ष्मरुद्रौ । ऐशानपदार्धयोरुरोमुखयोरापापवत्सौ । तत ऐशानपददक्षिणार्ध इत्यादि प्राग्वत् । ततो वास्तुपूजादि सर्वं पूर्ववत्) इति श्रीमन्नारायणभट्टसूरिसूनुभट्टरामकृष्णविरचितः पौराणवास्तुशांतिप्रयोगः ॥ ॥ अथ सूत्रोक्ता वास्तुशांतिः । सा च द्विजानां पूर्वोक्तया समुच्चीयते । पूर्वोक्तायां त्वशक्तौ स्वस्वसूत्रोक्तैव कर्तव्या । तयापि सिद्धेः । येषां तु सूत्रे नास्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषां शूद्राणां च पूर्वोक्तैव। तस्याः सर्वसाधारण्येन विधानात् । अतश्च न शूद्रमात्रविषयत्वं । तस्मात्सूत्रोक्ता पूर्वया समुच्चीयते । तत्राश्वलायनीयगृह्योक्तायाः प्रयोगः । काष्ठादिनिर्मितं संपन्नं गृहं व्रीह्यादिबीजसंयुतं शोभने मुहूर्ते ब्राह्मणैः सह सतूर्यघोषं प्रविश्य शुचिदेशे चतस्रः शिलाः संस्थाप्य तासु दूर्वा निधाय तत्र मणिकसंज्ञं मृद्भांडं स्थापयेत् । पृथिव्याअधिसंभवेति ।अरंगरोवावदीतित्रेधाबद्धोवरत्रया। इरामुहप्रशंसत्यनिरामपबाधतामिति वा । ततो मणिके जलमासिंचेत् । ऐतुराजावरुणोरेवतीभिरस्मिन्स्थानेतिष्ठतुमोदमानः । इरांवहंतोघृतमुक्षमाणामित्रेणसाकंसहसंविशंत्विति। ततस्तज्जलं पात्रांतर आदाय तत्र गंधदूर्वाः शमीशाखामुदुंबरशाखां वा व्रीहीन्यवान्फलं हिरण्यं च क्षिप्त्वा दूर्वाभिः शाखया च सर्वगृहं प्रागादितः प्रदक्षिणं व्रजन् शंनइंद्राग्नीइतिसूक्तेन त्रिः प्रोक्षेत्। शंनइंद्राग्नीइति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप् । प्रोक्षणे वि०। सकृत्सूक्तपाठः। तत आपोहिष्ठेतित्रिभिः प्रागादितस्त्रिराविच्छिन्नामुदकधारां दद्यात्। आपोहिष्ठेतितृचस्यांबरीषः सिंधुद्वीप आपो गायत्री । धारायां वि० । अत्रापि सकृत्पाठः। ततो मध्येगृहं गृह्यमग्निं प्रतिष्ठाप्य वास्तोष्पतिं चतुर्वारं चरुणेति प्रधानं संकीर्त्यान्वाधाय पूर्णपात्रनिधानांते वास्तोष्पतये चतुष्कृत्वस्तूष्णीं निरुप्य तथैव प्रोक्ष्याज्यभागांतं कृत्वाऽवदानधर्मेणावदाय वास्तोष्पतइति चतुर्भिर्मंत्रैः स्वाहांतैर्जुहुयात् । वास्तोष्पतइति चतसृणां वसिष्ठो वास्तोष्पतिस्त्रिष्टुबंत्या गायत्री । होमे० । वास्तोष्पतयइदंनममेति सर्वत्र त्यागः । ततः स्विष्टकृदादिहोमशेषं समाप्य शिष्टेन चरुणाऽन्येन चान्नेन शतं तदर्धं तदर्धं सामान्यपरिभाषया बहुवचनादशक्तस्त्रीन्वा ब्राह्मणान्भोजयेत् । चरोः पूर्वं तत्रान्यः पाको न कार्यः । ततः शिवंवास्तुशिवंवास्त्वितिभवंतोब्रुवंत्विति ब्राह्मणान्ब्रूयात् । तैः शिवंवास्तुशिवंवास्त्वित्युक्तः सुहृद्युतो भुंजीतेति । विशीर्णगृहसज्जीकरणेऽप्येतदिष्यते । साधारणशांतिवत् । प्रासादवास्तुशांतिदुर्गप्रतिष्ठाराजाभिषेकादिकं तु मत्कृते पूर्तकम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाकरे ज्ञेयं। इति श्रीभट्टरामकृष्णविरचित आश्वलायनगृह्योक्तवास्तुशांतिप्रयोगः ॥ ॥ अथ बौधायनसूत्रोक्ता गृहादिशांतिः । अथातो गृहशांतिकर्म गृहवृद्धिमिच्छन्मासि मास्यृतावृतौ संवत्सरे संवत्सरे वाऽऽपूर्यमाणपक्षे पुण्ये नक्षत्रे गृहशांतिमारभेताऽपामार्गशमीशिरीषपलाशोदुंबरसदाभद्रमुस्तातृणैरिंद्रवल्लया गृहं संमार्ष्टि मानस्तोकइति पंचगव्येन दर्भमुष्टिना वा संप्रोक्षति यतइंद्रस्वस्तिदाविशइति द्वाभ्यां कृणुष्वपाजइत्येतेनानुवाकेन सिद्धार्थान्प्रकीर्य वास्तुमध्येऽथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति वास्तोष्पते वास्तोष्पतइति द्वाभ्यामथाज्याहुतीरुपजुहोति वास्तोष्पतेध्रुवास्थूणामिति षड्भिरनुच्छंदसं सावित्र्या सहस्रं जुहुयात्स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानाद् ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्तिऋध्दिमिति वाचयीतैवं प्रयुंजानो महांतं पोषं पुष्यति बहवः पुत्रा भवंति नैव बालाः प्रमीयंते न ग्रहा व्याधयो गृह्णंति न दंष्ट्रिणोऽपघातयेयुर्न तस्करसर्पराक्षसपिशाचा बाधंते यदि गावः [illegible]प्येरन् गवां मध्ये आहुतिसहस्रं जुहुयाद्गवां शांतिरित्याचक्षते द्विपाच्चतुष्पदां चैतदेव व्याख्यातं वासो दक्षिणेत्याह भगवान्बौधायनः। इति बौधायनोक्ता गृहादिशांतिः ॥ ॥ अथ दुष्टरजोदर्शनशांतिः । तत्फलमाह मदनरत्ने नारदः । अमारिक्ताऽष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि । परिघस्य तु पूर्वार्धे व्यतिपाते च वैधृतौ ॥ संध्यासूपप्लवे विष्ट्यामशुभं प्रथमार्तवं । उपप्लवो ग्रहणं। रोगी पतिव्रता दुःखी पुत्रिणी भोगभागिनी । पतिव्रता क्लेशभागी सूर्यवारादिषु क्रमात् ॥ वैधव्यं सुतलाभश्च मैत्र्यं शत्रुविनाशनं । मित्रलाभः शत्रुहानिः कुमतिर्बंधुनाशनं ॥ मरणं वंशवृद्धिश्च निराहारः कुलक्षयः । तेजश्च सुतनाशश्च कुलहानिस्तिथिक्रमात् ॥ गर्गः ।सुभगा चैव दुःशीला वंध्या पुत्रसमन्विता । धर्मयुक्ता व्रतघ्नी च परसंतानमोदिनी॥ सुपुत्रा चैव दुष्पुत्रा पितृवेश्मरता सदा ॥ दीना प्रजावती चैव पुत्राढ्या चित्रकारिणी ॥ साध्वी पतिप्रिया नित्यं सुपुत्रा कष्टचारिणी । स्वकर्मनिरता हिंस्रा पुण्यपुत्रादिसंयुता ॥ नित्यं धनचयासक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुत्रधान्यसमन्विता। मूर्खा चाऽज्ञा पुण्यवती दस्रर्क्षादेः क्रमात्फलं॥ नारदः । कुलीरवृषचापांत्यनृयुक्कन्यातुलाघटाः । राशयः शुभदा ज्ञेया नारीणां प्रथमार्तवे॥ गर्गः। सुभगा श्वेतवस्त्रा स्याद्दृढवस्त्रा पतिव्रता। क्षौमवस्त्रा क्षितीशा स्यान्नववस्त्रा सुखान्विता ॥ दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा। नीलांबरधरा नारी पुष्पिता विधवा भवेत्॥ वस्त्रे स्युर्विषमा रक्तबिंदवः पुत्रमाप्नुयात्। समाश्चेत्कन्यका चेति फलं स्यात्प्रथमार्तवे॥ ज्योतिर्निबंधे वसिष्ठः। आद्यर्तौ पौषशुक्रोर्जमधुशुचिनभस्याश्वयुक्पापवारा रिक्तापर्वाष्टषष्ठ्यः पितृपरसदने रात्रिसंध्याऽपराह्णाः। मिश्रोग्राऽमूलतीक्ष्णं विवरमनरुणाल्पाधिकास्रं च राष्ट्रोत्पातः पापस्य लग्नं न सदरुणजरन्नीलचित्रांबरं च॥ आद्यर्तौ दुर्भगा नारी विष्कंभे चेद्रजस्वला। वंध्या चैवातिगंडे च शूले शूलवती भवेत्॥ गंडे तु पुंश्चली नारी व्याघाते चात्मघातिनी। वज्रे च स्वैरिणी प्रोक्ता पाते च पतिनाशिनी॥ परिघे मृतवंध्या च वैधृतौ पतिमारिणी। शेषाः शुभावहा योगा यथानामफलप्रदाः॥ अत्र स्त्रीसंगवर्जनमाह वसिष्ठः। प्रभूतदोषे यदि दृश्यते तु रजस्तदा शांतिककर्म कार्यं। विवर्जयेदेव तथैकशय्यां यावद्रजोदर्शनमुत्तमेऽह्नि॥ शांतौ कृतायामपीत्यर्थः "शां० सा० प्रभूतदोषे वैधव्यनिःसंततित्वापादके इति केचिदर्थमाहुः। ग्रहणे तु रजोदर्शने दोषैकत्वेऽपि शांतिः । ग्रहणे चंद्रसूर्यस्य० ऋतुदर्शनादिति शौनकेन निरपेक्षस्यैव तस्य निमित्तत्वोक्तेः"। शांतिमाह प्रयोगपारिजाते शौनकः। सार्तवानां तु नारीणां शांतिं वक्ष्यामि शौनकः । तिथिवारर्क्षयोगेभ्यो लग्नमध्यमसप्तमात्॥ ग्रहेभ्यो दुःस्थितेभ्यश्च तत्तद्दोषक्षयाय च। अर्थपुत्रादिलाभाय दंपत्योरभिवृद्धये॥ पंचमेऽह्नि चतुर्थे वा ग्रहातिथ्यपुरःसरं। तस्मिन्नहनि कर्तव्य ऋतुहोमो विधानतः॥ आचार्यं वरयेत्प्राज्ञं भुवनेश्वरितुष्टये। होमार्थं च जपार्थं च वरयेद्द्विजो बहून्॥ यजमानो द्विजैः सार्धं शांतिहोमं समाचरेत्। गृहादीशानदिग्भागे देवतापूजनाय च॥ द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत्। "सं०

CC-0. In Public Domain. Digitization by eGangotri

कौ० । पलं सुवर्णाश्चत्वारः कुडवः प्रस्थमाढकः । द्रोणश्च खारिका चेति पूर्वपूर्वाच्चतुर्गुणं ॥ " कुंभत्रयं न्यसेद्राशौ तंतुवस्त्रादिवेष्टितं ॥ पूरयेत्तीर्थसलिलैः प्रतिकुंभं पृथक्पृथक् । सूक्तेनाथ नवर्चेन प्रसुवआपइत्यथ ॥ ऋचा याःप्रवतस्तद्वद्गायत्र्या च ततः क्रमात् । मध्यकुंभे क्षिपेद्धान्यमौषधानि च हेम च ॥ (धान्यपदेन सप्तधान्यानीति कौस्तुभादौ । धान्यंव्रीहिःस्तंबकरितिकोशाद् व्रीहय एव वा) ततश्च पंचरत्नानि गंधपुष्पाक्षतादिकान् । औषधानि तु वक्ष्यंते मुनिभिः शांतिकर्मणि ॥ उदुंबरः कुशा दूर्वा राजीववटबिल्वकाः । विष्णुक्रांता च तुलसी वर्हिषं शंखपुष्पिका ॥ शतावर्यश्वगंधा च निर्गुंडी सर्षपद्वयं । अपामार्गः पलाशश्च पनसो जीवकस्तथा ॥ प्रियंगवश्च गोधूमा व्रीहयोऽश्वत्थ एव च । क्षीरं च दधि सर्पिश्च पद्मपत्रं तथोत्पलं ॥ कुरंटकत्रयं गुंजा वचाभद्रकमुस्तकाः । द्वात्रिंशदौषधानीह यथासंभवमाहरेत् ॥ गजाश्वरथ्यावल्मीकसंगमन्हदगोकुलात् । राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ मृत्तिकाश्चौषधादीनि तन्मंत्रेण क्षिपेत्क्रमात् । कुंभोपरि न्यसेत्पात्रं कांस्यमृद्वेणुताम्रजं ॥ तस्योपरि न्यसेद्वस्त्रे प्रतिमां भुवनेश्वरीं । तन्मूल्यं वा न्यसेत्तत्र इंद्राणीं च पुरंदरं ॥ आचार्यः पूजयेद्देवीमंगाद्यावरणानि च । अन्यो वा पूजनं कुर्याद् गायत्र्या मंत्रसारतः ॥ इंद्राणीं पूजयेद्देवीमिंद्राणीमासुनारिषु । इंद्रत्वावृषभं त्विंद्रमुपचारैः प्रपूजयेत् ॥ तन्मध्यमं स्पृशन्कुंभं मंत्रेण भुवनेश्वरीं । जपेद्गायत्रीं आहोमाच्छ्रीसूक्तं च जपेत्ततः ॥ " सं० कौ० । जपेदाचार्य आहोमा० । अन्वाधानात्मकहोमतंत्रारंभपर्यंतमित्यर्थः । अनेनैवाशयेनाऽन्वाधानंततः कुर्यादितिश्लोके आचार्यग्रहणं । ततश्चाग्निस्थापनादिग्रहपूजांतं यजमानेन कर्तुमुचितं " स्पृशन्वै दक्षिणं कुंभमृत्विगेको जपेदथ । चत्वारि रुद्रसूक्तानि चतुर्मंत्रोत्तराणि तु ॥ संस्पृशन्नुत्तरं कुंभं श्रीरुद्रं रुद्रसंख्यया । शंनइंद्राग्नीसूक्तं च तत्रैव संस्पृशन् जपेत् ॥ (रुद्रं नमस्तेरुद्रेत्याद्येकादशानुवाकात्मकं । यत्तु चमकसहितस्य जप इत्युक्तं तत्प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादिकं । महाग्निचयनस्थविनियोगपर्यालोचनया तस्य रुद्रत्वाभावात् । एकादशिन्यादौ तु वाचनिकं चमकस्य रुद्रांगत्वं । अतएव भट्टभास्करीयभाष्ये वायुपुराणे चमकंनमकंचैवेत्यादिना पृथगुपादानेन विनियोग उक्तः । आपस्तंबोऽपि । रुद्रान्जपेत्प्रथमोत्तमौवेति । रुद्रान्नमस्ते-रुद्रमन्यवइत्यादीनेकादशानुवाकानिति तद्व्याख्यायां हरदत्तः) कुंभस्य पश्चिमे देशे शांतिहोमं समाचरेत् । अन्वाधानं ततः कुर्याद्धोमतंत्रं समारभेत् ॥ पूर्णपात्रनिधानांतं कृत्वाचार्यो द्विजैः सह । दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च ॥ (जुहुयादिति शेषः) पायसं श्रपयेत्तत्र सावित्रं च हविश्च तत् । "सं० कौ० श्रपयेत्तत्रेति गृहसिद्धान्नग्रहणं व्यावर्त्यते । सावित्रंचहविश्चतादित्यत्र तच्छब्देन हविश्चतुष्टयकाले सवित्र-इति चतुर्थ्यंतेन देवतोद्देशः कार्य इति ज्ञाप्यते । लभ्यते चात्र मंत्रसंवादः । पार्वणेष्विति तद्धितविसंवादिनो मंत्रात्पूर्णमासायेत्युद्देशोऽगीक्रियते याज्ञिकैः । संवादे तु कैमुतिकन्यायेनैव तत्सिद्धिः । नचैवं भुवनेश्वरीदेवत्यहोमाभावापत्तिः । वाचनिकत्वेनेष्टत्वात् । वस्तुतस्तु षुञ् प्राणिप्रसव इतिधातोर्व्युत्पन्नः सावितृशब्दः प्रकृतफलदातृत्वेन प्रथमप्रयाजे समिच्छब्दोऽग्नेरिव लिंगानादरेण भुवनेश्वरीप्रतिपादक इति न विरोधः" कृत्वाज्यभागपर्यंतं हविरुद्वासनादिकं । तिसृभिश्चैव दूर्वाभिरेकैका चाहुतिर्भवेत् ॥ आभिर्मंत्रप्रयुक्ताभिर्गायत्र्या जुहुयात्क्रमात् । (मंत्रप्रयुक्ताभिरित्यनेनैव सिद्धे गायत्र्येति वचनं गायत्र्यैव जुहुयादिति नियमार्थं । तेनैंद्राग्णींद्रमंत्राभ्यां न होमः । अभिमंत्र्यप्रयुक्ताभिरितिपाठेऽपि सावित्रीकरणकाभिमंत्रणस्य दृष्टार्थत्वाय स एवार्थः । गायत्र्यैवतुहोतव्यमिति वक्ष्यमाण एवकारोऽप्यत्रानुकूल एव) अष्टोत्तर-सहस्रं वा शतमष्टोत्तरं तु वा ॥ अष्टाविंशतिभिर्वापि अथवा चाष्टसंख्यया । (एतदर्धमधिकं संस्कारेंदौ शौनककारिकाख्यमूलग्रंथे चोपलभ्यते । अत खलेकपोतन्यायेन भावनायां संख्याया द्रव्याणां च प्रथममन्वये जाते पाष्ठिकान्वयकाले पूर्वान्वितसंख्यायामेव यावद्द्रव्यसंबंधः । प्रतिद्रव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संख्यासंबंधे पूर्वान्वितसंख्याबाधापत्तेः। अतो न संख्यावृद्धिः। यत्र त्वावृत्तिबोधकं पृथक्पदाद्यस्ति तत्र विशेषवचनाद्भवत्वावृत्तिः । नतु तदभावे सेति बोध्यं) तिलमिश्रैश्च गोधूमैर्द्रव्येणाज्याहुतीर्हुनेत् ॥ (घृताक्ततिलमिश्रगोधूमैरित्यर्थः) जुहुयात्पायसेनैव आज्येन च हुनेत्क्रमात् । (क्रमादित्युक्तेरेकद्रव्यहोमोत्तरमपरद्रव्यहोमः) हविश्चतुष्टयेनैव प्रत्येकं समसंख्यया ॥ गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयं । " शां० सा० एवकारादिंद्राणींद्रयोर्होमो नास्तीति केचित् । सं० रें० अनादिष्टत्वादाज्येन तयोर्होम इत्यनंतोक्तिस्तु होमविध्यभावान्नादर्तव्या " ततः स्विष्टकृतं हुत्वा रज्जुप्रहरणं तथा । अयाश्चेत्यादिभिर्हुत्वा समुद्रादूर्मिसूक्ततः ॥ संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् । परिषेचनपर्यंतं होमशेषं समापयेत् ॥ अथाभिषेकं कुर्वीत प्रतिकुंभस्थितोदकैः । ऋतुमत्याः स्त्रियाः शांत्यै दंपतिभ्यां सुखाय च ॥ आपोहिष्ठेति नवभिः सूक्तेन च ततः परं । इंद्रोअंगतृचेनैव पावमानीः क्रमेण तु ॥ उभयंशृणवच्चनः स्वस्तिदाविश एकया । त्रैयंबकेण मंत्रेण जातवेदस एकया ॥ समुद्रज्येष्ठा इत्यादि त्रायंतामिति च त्रिभिः । इमाआपस्तृचेनैव देवस्यत्वेतिमंत्रतः ॥ (अत्र सार्वविभक्तिकेन तसिना प्रथमत्यागे कारणाभावात्तृतीयैकवचनमेवोपस्थाप्यते । तथाच देवस्यत्वेतिमंत्रेणेत्यर्थः । स च स्वशाखीय एव । तत्त्यागे मानाभावात् । तैत्तिरीयमंत्रोपादानं तु विचार्यं) मंत्रेणाथ तमीशानं त्वमग्नेरुद्र इत्यथ । तमुष्टुहीति मंत्रेण भुवनस्यपितरं तथा ॥ यातेरुद्रेतिमंत्रेण शिवसंकल्पमंत्रतः । (अत्रापि प्राग्वदेव व्याख्यानं । नच स्वशाखायां शिवसंकल्पमंत्राभाव इति वाच्यं । प्राचीनतरपुस्तकेष्वष्टमाष्टकेऽष्टमाध्याये २४ वर्गांते शिवसंकल्पसूक्तस्य परिशिष्टत्वेनोपलंभात् । ऋग्विधाने तस्मिन्नेव स्थले तद्विनियोगोपलंभाच्च) इंद्रत्वावृषभं पंचमंत्रैश्चैवाभिषेचयेत् ॥ सा च वस्त्रांतरं धृत्वा पुनश्चोपवसेत्सती । (उपवसनं समीपोपवेशनं) विप्रान्विधिवदभ्यर्च्य गंधपुष्पाक्षतादिभिः ॥ धेनुं पयस्विनीं दद्यादा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चार्याय च भूषणैः। (सहेति शेषः। दक्षिणात्वेन चास्या न दक्षिणांतरं। अनवस्थाप्रसंगात्। अतएव धेनुन्यायेनाऽदक्षिणत्वे प्राप्ते सदक्षिणमित्यग्रिमवचने प्रतिप्रसवकरणात्सदक्षिणत्वमिति प्रयोगरत्ने) सदक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने ॥ ऋत्विग्भ्यश्चाथ सर्वेभ्यो दद्याद्दै दक्षिणां ततः। महाशांतिं प्रजप्याथ विप्राशीर्वचनं ततः॥ (प्रजप्येति क्त्वाप्रत्ययेन समानकर्तृकत्वाद्यजमान एव शांतिं जपेत्। भट्टास्तु ब्राह्मणा महाशांतिं जपेयुरित्यूचुस्तद्विचार्यमिति संस्कारेंदौ) ब्राह्मणान्भोजयेत्पश्चाद्भुंजीत स्वजनैः सह। [इयं शांतिः पंचमेऽह्नि चतुर्थे वेति पूर्वमुक्तेः रजोनिवृत्त्यनुरोधेन चतुर्थे पंचमे वा दिने विष्ट्यादिरहिते कार्या। तदतिक्रमे तु शुद्धे कालेऽग्निचक्रादि विचार्य। एवमन्यत्राप्युक्तकाले शांतिकादौ। कौस्तुभे तु बहुतरदोषदुष्टे प्रथमरजोदर्शने द्वितीयादिरजोदर्शनोत्तरं स्वल्पदोषदुष्टे तु तदनंतरमेव गर्भाधानप्रत्यासन्नदिने सा कार्येत्युक्तं। तत्राद्यः पक्षः प्रभूतदोषेयादिदृश्यतइत्यादिवसिष्ठोक्तिविरुद्धः। द्वितीयस्तु पंचमेह्नि चतुर्थे वेति स्वोदाहृतमूलविरुद्ध इति स्पष्टमेव) मदनरत्ने ऋषिपुत्रसंहितायां त्वन्यथोक्तं। प्रथमार्तवदोषाणां शांतिं कुर्यादनंतरं। तिथिनक्षत्रवारादिदेवानां पूजनं पृथक्॥ स्थंडिलं कारयेत्तत्र चतुराढकशालिभिः। आढकं तंडुलाश्चैव आढकौ तिलयावकौ॥ आढकस्तु। पलं च कुडवः प्रस्थ आढको द्रोणखारिके। धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणा इत्युक्तं। उपर्युपरि संस्तीर्य तन्मध्ये नलिनं लिखेत्॥ दर्भैराच्छाद्य तन्मध्ये कर्णिकायां न्यसेद्घटं। पुण्योदकेन संपूर्णमौषधादिमसन्वितं॥ सहदेव्येकपत्रा च विष्णुक्रांता सभद्रिका। बिल्वपत्रसहितानि चूर्णयित्वा न्यसेद्घटे॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनं। वचा कचोरमुस्ताख्याः सर्वौषध्यो दश स्मृताः॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्। राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत्॥ पंचगव्यं च कुमुदं तथा मुक्ताफलानि च। वज्रवैदूर्यमाणिक्यविद्रुमानि विनिक्षिपेत्॥ एवं कुंभं समासाद्य अर्चे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रंधादिभिः शुभैः । सावित्र्या च जपेत्कुंभं स्पृशन्दशशतं द्विजः ॥ एवं प्रदोषकाले तु तोयैस्तां स्नापयेत्ततः । स्वगृह्योक्तविधानेन होमं कुर्यात्प्रयत्नतः ॥ दूर्वाज्येन तिलैर्हुत्वा सावित्र्या चैव मंत्रतः । अष्टोत्तरसहस्रं या शतमष्टाधिकं तथा ॥ तत्संख्यया त्रिधा हुत्वा दूर्वाज्येन तिलैः समं ॥ ब्राह्मणान्भोजयित्वा तु देवं संपूजयेत्ततः । एवं समासतः प्रोक्तं नारीणां प्रथमार्तवे इति। तत्रैव नारदः । तिथ्यृक्षवारा निंद्या-श्चेच्छेफकर्म निवारयेत् । दोषाधिक्ये गुणाल्पत्वे तत्तथापि न कारयेत् ॥ दोषाल्पत्वे गुणाधिक्ये शेफकर्म समाचरेत् ॥ निंद्यर्क्षतिथिवारेषु यत्र पुष्पं प्रदृश्यते ॥ तत्र शांतिं प्रकुर्वीत घृतदूर्वातिलाक्षतैः । प्रत्येकं शतमष्टौ च गायत्र्या जुहुयात्ततः॥ स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये । भर्ता तत्राभिगमनं त्यजेदाशस्तदर्शनादिति । शिष्टैः प्रयोगपारिजाताद्यैश्च शौनकोक्तैवादृता।इति दुष्टरजोदर्शनशांतिः ॥ ॥ अथ प्रयोगः। कर्ता रजोदर्शनात्पंचमे चतुर्थे वा दिने विष्ट्यादिरहिते तदसंभवे दिनांतरे वा शांतियोग्ये ऋतुस्नातया पत्न्या सहित उपविश्याचमनादिदेशकालस्मरणांते मम पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासादिसूचितसकलानिष्टपरिहारपूर्वकमर्थपुत्रादिलाभदंपत्यभिवृद्धिद्वारा श्रीप॰ सग्रहमखां शौनकोक्तां रजोदर्शनशांतिं करिष्ये इति संकल्प्य गणेशपूजादिऋत्विग्वरणांतं कुर्यात् । तत आचार्यः प्रादेशांते गृहस्यैशान्यां मध्ये दक्षिणोत्तरयोश्च महीद्यौरिति मंत्रावृत्त्या भूमिं स्पृशेत् । एवमुत्तरक्रियास्वपि मंत्रावृत्तिः क्रमश्च । (भूमिप्रार्थनपक्षे तु सकृदेव पाठः) ओषधयःसमिति द्रोणप्रमाणव्रीहिभी राशित्रयं कृत्वा तत्राकलशेष्विति कुंभत्रयं संस्थाप्य प्रसुवआपइतिनवर्चस्य सूक्तस्य सिंधुक्षिन्नद्यो जगती । याःप्रवतो वसिष्ठो नद्यः शक्वरी । कलशेषूदकपूरणे॰ । इति जलेनापूर्य गंधद्वाराभिति गंधं त्रिषु क्षिप्त्वा मध्यकुंभे गायत्र्या यवव्रीहितिलमाषकंगुश्यामा-कमुद्गान् व्रीहीनेव वा क्षिप्त्वा याओषधीरित्युदुंबरादिद्वात्रिंशदौषधानि यथासंभवं वा क्षिपेत्। ततस्त्रिष्वपि गायत्र्यादिमंत्रैः पंचगव्यानि। स्योने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति मृदः । काडात्कांडादिति दूर्वाः । अश्वत्थेवइति पंचपल्लवान् । याःफलिनीरिति पुष्पफले । सहिरत्नानीति पंचरत्नानि । हिरण्यरूपइति हिरण्यं च निक्षिप्य युवासुवासाइति वस्त्रेणावेष्ट्य पूर्णादर्वीति यवादिपूरितं पूर्णपात्रत्रयं निधाय तदुपरिनिहितवस्त्रत्रये कुंकुमादिनाऽष्टदलानि कृत्वा मध्यकुंभे प्रतिमायां तन्मूल्ये वा गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री । भुवनेश्वर्यावा० । मंत्रांते अंगाद्यावरणसहितां भुवनेश्वरीमावाह्य दक्षिणकुंभे प्रतिमायां तन्मूल्ये वा इंद्राणीं वृषाकपिरिंद्राणी पंक्तिः । इंद्राण्यावा० । इतींद्राणीं । उत्तरकुंभे प्रतिमायां तन्मूल्ये वा इंद्रत्वा विश्वामित्र इंद्रो गायत्री । इंद्रावाह० । इतींद्रं चावाह्यावाहनक्रमेण तत्तन्मंत्रैः कांडानुसमयेन षोडशोपचारैः संपूज्य मध्यकुंभं स्पृशन्गायत्रीमष्टसहस्रं १०८ वा जपित्वा श्रीसूक्तं जपेत् । हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य कर्दमानंदचिक्लीतेंदिरासुताः श्रीरनुष्टुप् । पंचमी षष्ठी च त्रिष्टुभौ चतुर्थ्यंत्या च प्रस्तारपंक्तिः । जपे० । तत एकऋत्विग्दक्षिणकुंभं स्पृशन्रुद्रसूक्तानि जपेत् । कद्रुद्रायेति नवर्चस्य सूक्तस्य कण्वो रुद्रो गायत्र्यंत्यानुष्टुप् । इमारुद्रायतवसइत्येकादशर्चस्य सूक्तस्य कुत्सो रुद्रो जगत्यंत्ये त्रिष्टुभौ । आतेपितरितिपंचदशर्चस्य सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप् । इमारुद्रायेतिचतुर्ऋचस्य सूक्तस्य वसिष्ठो रुद्रो जगत्यंत्या त्रिष्टुप् । आवोराजानं वामदेवो रुद्रस्त्रिष्टुप् । तमुष्टुह्यत्री रुद्रस्त्रिष्टुप् । भुवनस्यपितरम्वजिश्वा रुद्रस्त्रिष्टुप् । त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् । जपे० । अथान्यऋत्विगुत्तरकुंभं स्पृशन्नेकादशवारं रुद्रं जपित्वा शंनइंद्राग्नीसूक्तं जपेत् । नमकानुवाकानामग्नी रुद्रो महाविराट् । शंनइति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप् । जपे० । तत आचार्यः स्थापितदेवतानां पश्चिमतः स्थंडिलेऽग्निं तदैशान्यां ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् । तत ग्रहादिकीर्तनांते भुवनेश्वरीं (सवितारं वा) प्रधान० दूर्वातिलमिश्रगोधूमपायसाज्यैः प्रतिद्रव्यं अष्टसहस्राष्टशताद्यन्यतमसंख्याहुतिभिः । इंद्राणीमिंद्रं च तैरेव द्रव्यैः प्रत्येकं प्रतिद्रव्यं अष्टशताष्टाविं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत्यष्टान्यतमसं० (इंद्राणींद्रयोर्होमाभावपक्षे तु तदुत्कीर्तनं न कार्यं) शेषेणेत्यादिप्रणीतास्थापनांते उक्तदेवताभ्यनूष्णीं निर्वापप्रोक्षणपूर्वकमाज्यभागहोमांते यजमानेन त्यागे कृते यथान्वाधानं होमं कुर्यात्। तत्र तिसृभिर्दूर्वाभिर्दधिमध्वाज्याक्ताभिरेकाहुतिः। दूर्वाहोमोत्तरं घृताक्ततिलमिश्रगोधूमैर्मृगीमुद्रया होमः। तदुत्तरं पायसेन तदुत्तरं घृतेनेत्येवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमांते दिक्पालेभ्यो नवग्रहेभ्यो विनायकादिभ्यो भुवनेश्वरींद्राणींद्रेभ्यः क्षेत्रपालाय च सदीपमाषभक्तबलीन्दत्वा समूद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वामदेवोग्निस्त्रिष्टुवंत्या जगती। पूर्णाहुतौ०। इति पूर्णाहुतिं हुत्वा संस्रावहोमादिशेषं समाप्य धृतनववस्त्रं प्राङ्मुखं यजमानं तादृशीं च पत्नीं सऋत्विगाचार्य उदङ्मुखः कुंभचतुष्टयोदकैरभिषिंचेत्। तत्र मंत्राः। आपोहिष्ठेति नवर्चस्य०। इंद्रोअंगेतितिसृणां गृत्समद इंद्रो गायत्री। त्रिभिष्ट्वमितिसप्तानां वसिष्ठ आद्यानां त्रयाणामग्निस्ततो विश्वेदेवा गायत्री। द्वितीयांऽत्ये द्वे चानुष्टुभौ। उभयंश्रृणवद्धर्ग इंद्रो वृहती। स्वस्तिदाविशः शास इंद्रोऽनुष्टुप्। त्र्यंबकं वसिष्ठो०। जातवेदसे कश्यपोग्निर्जातवेदास्त्रिष्टुप्। समुद्रज्येष्ठाइति चतसृणां वसिष्ठ आपस्त्रिष्टुप्। त्रायंतामिति तिसृणां सप्तर्षय आपोनुष्टुप्। इमाआपइतितिसृणामैतरेय आपोऽनुष्टुजगत्यनुष्टुभः। देवस्यत्वेत्यस्यैतरेयः सविताऽश्विनौ पूषा च यजुः। तमीशानं गोतम ईशानो जगती। त्वमग्नेरुद्रो गृत्समदोग्निर्जगती। तमुष्टुह्यत्री रुद्रस्त्रिष्टुप्। भुवनस्यपितरमृजिश्वा रुद्रस्त्रिष्टुप्। यातेरुद्र कश्यपो रुद्रः स्वराडनुष्टुप्। यज्जाग्रतइति षण्णां प्रजापतिर्मनस्त्रिष्टुप्। इंद्रत्वेतिपंचानां विश्वामित्र इंद्रो गायत्री। अभिषेके०। ततो ग्रहादिमंत्रैः सुरास्त्वामित्यादिपौराणैस्तच्छंयोरिति चाभिषेकांते सुस्नातौ दंपती शुक्लांबरगंधमाल्यादि धृत्वोपविशेतां। तत आचार्येण देवतोत्तरपूजने कृते यजमानो विभूतिं धृत्वाचार्यादीन्गंधादिभिः संपूज्याचार्याय धेनुं रुद्रजापिने सदक्षिणमनड्वाहं ऋत्विभ्यो यथाशक्तिदक्षिणामाचार्याय विसर्जितदेवतापीठं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च दत्वा महाशांतिमंत्रान्जपेत् । ते च । आनोभद्राः० स्वस्तिनोमिमीता० शंनइंद्राग्नी० त्यमूषुवाजिनमिति सूक्तानि तच्छंयोरिति च जप्त्वा श-
क्त्या विप्रान्संभोज्य भूयसीं दत्वाऽऽशिषो गृहीत्वा कर्म समापयेत् । ।ग्रहणे रजोदर्शने तु विशेषः । "प्र०र० स चोपरागस्य पौर्णमास्यमा-
वास्याभ्यामविनाभावात्तदरितिक्तवारादौ दुष्टे प्रागुक्तशांत्या समुच्चीयते । निमित्तभेदात् । अदृष्टार्थत्वाच्च । प्रत्यक्षविध्यभावे तत्कार्यकारित्वाऽ-
नवगमेनामनहोमैर्नारिष्टहोमानामिवानया तन्निवृत्तियोगात् । ग्रहणमात्रे त्वियमेव । अत्र च पुनःश्रवणाभावान्नवग्रहमखः कृताकृत इति
विवेकः । यदा तु पूर्वशांतिसमुच्चयस्तदा कालैक्यात्कर्त्रैक्याच्चाग्नेयादिवत्तंत्रप्रयोगः" तत्र केवलायाः प्रयोगः पूर्वं ग्रहणजननशांत्युक्तो द्रष्टव्यः।
तत्र मम पत्न्याः चंद्रोपरागे प्रथमरजोदर्शनसूचितेत्यादि संकल्पे वाच्यं । सूर्यग्रहणे तु सूर्योपराग इत्यूहः । पूर्वोक्तशांतिसमुच्चये तु मम
पत्न्याः अ० दुष्टमासादौ चंद्रोपरागे च (सूर्योपरागे इत्यूहः) प्रथमरजोदर्शनसूचित० सग्रहमखां शौनकोक्तां दुष्टमासादिविहितां ग्रहण-
विहितां शांतिं च समानतंत्रेण करिष्य इति संकल्प्य ऋत्विक्पूजांतं कुर्यात् । तत आचार्यः भुवनेश्वर्यादिपूजातः प्राक्पश्चाद्वा तत उदीच्यां
चंद्रादीन्संपूज्य यथोपक्रमं निर्वापहोमाभिषेकान्कुर्यादिति विशेषः । अन्यत्सर्वं समानं । इति शांतिरत्ने दुष्टरजोदर्शनशांतिप्रयोगः ॥

॥ अथ नारायणबलिः संगृह्यते । " ध० सिं० कृतेऽपि गर्भाधाने यदि गर्भोत्पत्त्यभावो मृतापत्यता वा तदा प्रतिबंधकप्रेतोपद्रव-
निवृत्त्यर्थं नारायणबलिर्नागबलिश्च कार्यः । तत्र नारायणबलिः शुक्लैकादश्यां पंचम्यां श्रवणे वा । कालांतरानुपलब्धेः " गृह्यपरिशिष्टे । अथ
नारायणबलिरर्वाक्संवत्सराच्छुद्धे काले शुक्लैकादश्यां स्नातः शुचौ देशे विष्णुं वैवस्वतं यमं च यथावदभ्यर्च्य तदग्रे तिलमिश्रान्मधुघृतप्लु-
तान्दशपिंडान्विष्णुरूपं प्रेतं ध्यायन् काश्यपगोत्रदेवदत्तायंतेपिंडइति दक्षिणाग्रेषु दर्भेषु दक्षिणामुखः प्राचीनावीती पराचीनेन पाणिना दत्वा

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिंडान्गंधादिभिरभ्यर्च्य प्रवाहणांतं कृत्वा नद्यां क्षिपेदथ रात्रावयुग्मान्ब्राह्मणान्निमंत्र्योपोषितः श्वो मध्यंदिने विष्णुमभ्यर्च्य प्रेतमुद्दिश्य ब्राह्मणानेकोद्दिष्टविधिना भोजयित्वा तृप्तेषु ब्राह्मणसमीपे पिंडविधिना निनयनांतं तूष्णीं कृत्वा विष्णवे ब्रह्मणे शिवाय सपरिवाराय यमाय विष्णोऽयंतेपिंड इत्येवं चतुरः पिंडान्भुक्तशेषेण दक्षिणसंस्थं दत्वाऽथ पंचमं काश्यपगोत्र देवदत्तेति प्रेतं ध्यात्वा तद्रूपाय विष्णवे विष्णोऽयंत इति दद्यादथाचांतान्दक्षिणया संतोष्यैकं तेषु गुणवंतं विशेषतो वस्त्राभरणगोहिरण्यैः प्रेतबुद्ध्या तोषयेदथ तैः पवित्रपाणिभिः प्रेताय काश्यपगोत्रायायंते तिलोदकांजलिरिति तिलोदकं दापयित्वाऽनेन नारायणबलिकर्मणा भगवान्विष्णुरिमं देवदत्तं शुद्धमपापं कर्मार्हं करोत्विति वाचयित्वा विसृजेदेष नारायणबलिकल्प एवमन्यामपि स्वाभिमतदेवतां यमद्वितीयायामभ्यर्च्य विधिमिमं कुर्यात्सोऽप्येनमपापं करोति ननु पुण्यकृतोऽपि बलिमेनमकृत्वा पारलौकिकं कुर्यात्कृतं नोपतिष्ठतेंऽतरिक्षे विनश्यति तस्माद्यथासंभवमपि कुर्यात् । इति नारायणबलिः ॥

॥ अथ प्रयोगः । कर्ता शुक्लैकादश्याद्युक्तकाले नदीतीरे देवालयादौ वा स्नातः आचमनादिदेशकालस्मरणांते मदीयकुलाभिवृद्धिप्रतिबंधकप्रेतस्य प्रेतत्वनिवृत्तिद्वारा श्री० नारायणबलिं करिष्ये इति संकल्प्य महीद्यौरित्यादिविधिना कलशद्वयं संस्थाप्य तत्र प्रतिमयोः विष्णुं वैवस्वतं यमं चावाह्य पुरुषसूक्तेन यमायसोमामिति च षोडशोपचारैः पूजयेत् (अत्र क्वचित्परिशिष्टपुस्तके विष्णुं ब्रह्माणं शिवं वैवस्वतं यमं प्रेतं चेति पाठांतरोपलंभात् कुंभपंचके पंचाप्येते पूज्या इति केचिदाहुः) ततस्तत्पूर्वतो दर्भेण तूष्णीं लेखामुल्लिख्य तत्र दक्षिणाग्रान्कुशानास्तीर्य तेषु शुंधतांविष्णुरूपीप्रेत इति दशस्थानेषु दक्षिणसंस्थमपो निनीय दक्षिणामुखः प्राचीनावीती सव्यं जान्वाच्य काश्यपगोत्रदेवदत्तप्रेत विष्णुदैवतायंतेपिंडइति कुशेषु मधुघृततिलयुतान्दशपिंडान् विष्णुरूपं प्रेतं ध्यायन्पितृतीर्थेन दत्वा गंधादिभिस्तानभ्यर्च्य विसृज्य नद्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिपेत् । तस्यामेव रात्रौ श्वः करिष्यमाणश्राद्धे क्षणः क्रियतामित्येकं त्रीन्पंच वेत्येवमयुग्मान्विप्रान्निमंत्र्योपोषितो जागरं कुर्यात् । श्वोभूते मध्याह्ने विष्णुं संपूज्य विष्णुरूपं प्रेतं (विष्णुब्रह्मशिवयमप्रेतान्वा) उद्दिश्यैकोद्दिष्टविधिना प्रादप्रक्षालनादितृप्तिप्रश्नांते ब्राह्मणसमीपे पिंडपितृयज्ञवद्रेषाकरणाद्यवनेजनांतं तूष्णीं कृत्वा विष्णवे बह्मणे शिवाय सपरिवाराय यमायेति चतुरः पिंडान्नाममंत्रैर्दत्वा विष्णुरूपं प्रेतं ध्यायन् काश्यपगोत्र देवदत्तविष्णुरूपप्रेतायंतेपिंडइति पंचमं पिंडं च दत्वाऽर्चनादिप्रवाहणांते आचांतान्दक्षिणादिभिः संतोष्य तेष्वेकस्मै गुणवते प्रेतबुद्ध्या वस्त्राभरणगोहिरण्यानि दत्वा भवंतः प्रेताय तिलोदकांजलिदानं कुर्वंत्विति विप्रान्वदेत् । ते च पवित्रपाणयः कुश-तिलतुलसीदलयुतं जलांजलिं प्रेताय काश्यपगोत्राय विष्णुरूपिणेऽयं तिलोदकांजलिरिति दद्युः । ततः अनेन नारायणबलिकर्मणा भगवा-न्विष्णुरिमं देवदत्तं प्रेतं शुद्धमपापं कर्मार्हं करोत्विति तान्वाचयित्वा विसृज्य कर्म समाप्य स्नात्वा भुंजीत । अत्र निर्णयसिंधौ कश्चि-द्विशेष उक्तः । स तत्रैव ज्ञेयः । इति नारायणबलिप्रयोगः ॥ ॥ अथ नागबलिः । शौनकः । अथ वक्ष्यामि सर्पस्य संस्कारवि-धिमुत्तमं । सिनीवाल्यां पौर्णमास्यां पंचम्यां वाऽपि कारयेत् ॥ कृतसर्पवधो विप्रः पूर्वजन्मनि वा यदि । स्नात्वागत्य ततो ब्रह्मदंडं दद्याद्द्विजातये ॥ वधमाख्यापयेत्पापी चरेत्कृच्छ्रांश्चतुर्दश । वधेऽत्र जन्मनि कृते लोहदंडं द्विजातये ॥ दद्यात्पापविशुद्ध्यर्थं श्रोत्रियाय कुटुंबिने । विप्राय दंडमूल्यं वा ह्यभावे सति दापयेत् ॥ याज्ञवल्क्योऽप्याह । उरगेष्वायसोदंडइति । मूल्यमाह । निष्कत्रयं द्विनिष्कं वा निष्कमेकं कनीयसं । अनुमत्यादिकर्तॄणां निष्कमर्धं तदर्धकं ॥ इदं स्वर्णरौप्ययोः शक्त्या ज्ञेयं । वित्तशाठ्यं न कुर्वीत दद्याद्वित्तानुसारतः । अनुज्ञां च गुरोर्लब्ध्वा संस्कुर्यात्तदनंतरं ॥ तथा । प्रियंगुव्रीहिगोधूमतिलपिष्टेन वा पुनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वा सर्पाकृतिं शूर्पे निधाय प्रार्थयेदहिं ॥ मंत्रस्तु । एहि पूर्वमृत सर्प अस्मिन्पिष्टे समाविश । संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः ॥ वस्त्रोपवीतगंधाद्यैः संपूज्य च हरेद्बलिं । प्रक्षालितांघ्रिपाणिस्तु आचम्योपविशेद्भुवि ॥ कुर्यात्संस्कारसंकल्पं प्राणायामपुरःसरं । यज्ञोपवीतिना कार्यं सर्पसंस्कारकर्म तु ॥ लौकिकाग्निं प्रतिष्ठाप्य समिदाधानमाचरेत् । ततोऽग्नेरग्निदिग्भागे भूमिं संप्रोक्ष्य वारिभिः ॥ चितिं कृत्वाऽथ संस्तीर्य कुशैराग्नेयकाग्रकैः । पर्युक्ष्याग्निं परिस्तीर्य परिषिच्य समर्चयेत् ॥ कृत्वेध्माधानमाघारौ चक्षुषी च यथाविधि । सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः ॥ अपः स्पृष्ट्वा स्पृशेच्छ्रोत्रं गत्वा चाग्निसमीपतः । स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः ॥ सर्पास्ये जुहुयादाज्यं व्याहृत्या च समस्तया । आज्यशेषं स्रुवेणैव सर्पदेहे निषेचयेत् ॥ स्रुवं तत्र निधायाथ यज्ञपात्राणि बर्हिषि । चितिं प्रदक्षिणीकृत्य प्रणिपत्य क्षमापयेत् ॥ चमसस्थैर्जलैः सर्पं व्याहृत्याऽभ्युक्ष्य पाणिना । अग्नेरक्षाणइत्यनया सर्पायाग्निं प्रदापयेत् ॥ उपतिष्ठेद्दह्यमानं नमोस्तुसर्पमंत्रतः । ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया ॥ पूर्वजन्मनि वा सर्प तत्सर्वं क्षंतुमर्हसि । इति संप्रार्थ्य नागेंद्रं स्नात्वागत्य ततः पुनः॥क्षीराज्येन ततश्चाग्निं प्रोक्ष्य व्याहृतिभिस्त्रिभिः । हुते सर्पे जलेनाग्निमभिषिंचेत्ततःपरं ॥ नास्थिसंचयनं कुर्यात्स्नात्वाचम्य गृहं व्रजेत् । ब्रह्मचर्यादिकं कार्यं त्रिरात्राशौचामिष्यते ॥ सचैलं तु चतुर्थेऽह्नि स्नात्वा विप्रान्समर्चयेत् । सर्पोऽनंतस्तथा शेषः कपिलो नाग एव च । कालिकः शंखपालश्च भूधरश्चेति वै क्रमात् ॥ पादप्रक्षालनं कुर्यादेभिर्नामपदैः पृथक् । गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान् ॥ घृतपायसभक्ष्यैश्च द्विजानष्टौ तु भोजयेत् । "सं० कौ० । इति सर्पस्य संस्कारं कृत्वा नागबलिं ततः । दत्वा स्वर्णमयं नागमपराधात्प्रमुच्यते ॥ ब्रह्मलोके च ये सर्पाः० सदा ॥ एवं स्तुत्वा तु नागेंद्रमाचार्याय निवेदयेत् । आचार्याय ततो दद्यात्कृष्णां गां वृषभेण हि । वस्त्रालंकरणैः पूज्य ब्राह्मणं ब्राह्मणीं तथा । पूजये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विधिवद्भक्त्या ब्राह्मणांश्चैव तोषयेत् ॥ " एवं कृते विधाने तु सर्पसंस्कारकर्मणि । सर्पहिंसाकृतात्पापान्मुच्यते नात्र संशयः ॥ कृत्वा सर्पस्य संस्कारमनेन विधिना नरः । विरोगो जायते क्षिप्रं संततिं लभते शुभां ॥ उपद्रवविनिर्मुक्तो भवेत्सर्पप्रसादतः । ततः पूर्वकृतं कर्म याति नाशं महामते । क्षीणपापो विशुद्धात्मा विष्णुलोके महीयते ॥ इति नागबलिः ॥ ॥ अथ प्रयोगः । स च सिनीवाल्यां पौर्णमास्यां पंचम्यामाश्लेषायुतनवम्यां वा कार्यः । कर्ता पर्षदं प्रदक्षिणीकृत्य नत्वा तदग्रे गोवृषनिष्क्रयं निधाय मम सभार्यस्येहजन्मनि जन्मांतरे वा ज्ञानतोऽज्ञानतो वा जातसर्पवधोत्थदोषपरिहारार्थं प्रायश्चित्तमुपदिशंतु भवंतः । सर्वेधर्मविवेक्तारइत्यादिश्लोकांते प्रणम्य तैरुपदिष्ट आचमनादिदेशकालस्मरणांते पर्षदुपदिष्टं चतुर्दशकृच्छ्रप्रायश्चित्तं अमुकप्रत्याम्नायेनाहमाचरिष्यामीति संकल्प्य वपनादिविधिना तदाचरेत् । वपनासंभवे द्विगुणः कृच्छ्रप्रत्याम्नायः । पुनर्देशकालौ स्मृत्वा मम सर्पवधदोषपरिहारार्थं ब्राह्मणाय लोहदंडदानं (तन्मूल्यदानं वा) करिष्ये इति संकल्प्य ब्राह्मणं संपूज्य स्वस्त्यस्तु० इमं लोहदंडं सर्पवधदोषहरं सदक्षिणं अ० शर्मणे ब्राह्मणाय तुभ्यमहं० इति दत्वा गुर्वनुज्ञां लब्ध्वा प्रियंगुव्रीहिगोधूमतिलान्यतमपिष्टेन सर्परूपं कृत्वा शूर्पे निधाय प्रार्थयेत् । एहि पूर्वमृत सर्प अस्मिन्पिष्टे समाविश । संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः ॥ ततः भुजंगेशायविद्महे सर्पजातायधीमहि । तन्नोनागःप्रचोदयादित्यावाहनादिषोडशोपचारैः संपूज्य नत्वा भोः सर्प इमंबलिंगृहाणममाभ्युदयंकुर्विति पायसादिना बलिं दत्वा हस्तौ पादौ प्रक्षाल्याचामेत् । ततः शुद्धभूमावुपविश्य प्राणानायम्य देशकालौ स्मृत्वा मम सभार्यस्येह० हारशुभसंततिप्राप्तिद्वारा श्री सर्पसंस्कारकर्म करिष्ये इति संकल्प्य स्थंडिले लौकिकाग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वादध्यात्- चक्षुषीआज्येनेत्यंते अग्निं वायुं सूर्यं चाज्येन सर्पमुखे प्रजापतिमाज्येन सर्पमाज्यशेषेण च सद्यो यक्ष्ये इत्युक्त्वा समिधावग्नावाधायाग्ने

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राग्नेयभागे प्रोक्षितभूमौ चितिं कृत्वाऽग्निं चितिं च परिसमुह्याग्नेयाग्रदर्भैः परिस्तीर्य परिषिच्य षट्पात्रासादनाद्याज्यभागहोमांते सर्पं चित्यामारोप्य जलं श्रोत्रं च स्पृष्ट्वाऽग्निसमीपमेत्य व्यस्तसमस्तव्याहृतीनां प्रजापतिरग्निवायुसूर्यप्रजापतयो गायत्र्युष्णिगनुष्टुब्बृहत्यः । सर्पसंस्कारप्रधानाज्यहोमे० । इति व्यस्ताभिरग्नौ समस्ताभिश्च सर्पमुखे आज्यं हुत्वा हुतशेषमाज्यं स्रुवेणैव सर्पदेहे निषिंचेत् । नात्र स्विष्टकृदादि । स्रुवं तत्रैव निधाय यज्ञपात्राणि बर्हिषि निदध्यात् । ततश्चितिं प्रदक्षिणीकृत्य प्रणम्य क्षमाप्य हस्तगृहीतैश्चमसजलैः भूर्भुवःस्वरिति सर्पं पाणिनाऽभ्युक्ष्य अग्नेरक्षाणो वसिष्ठोग्निर्गायत्री । सर्पायाग्निदाने० । इति मंत्रेण सर्पायाग्निं दत्वा नमोअस्तुसर्पेभ्यो० । येदोरोचने० । याइषवो० । कर्कोटक नमस्तेस्तु शंखपाल नमोस्तु ते । नागराज महादेव दिव्यरूपाय ते नमः ॥ अफणाः फणिनो ये च सविषा निर्विषाश्च ये । सर्वेऽवटेशयाः सर्पाः पुण्यमूर्ते नमोस्तु ते ॥ त्वया भगवते श्रीमद्वासुदेवाय निर्मितं । स्वभोगेनैव पर्यंकमायतं भोगिनां वर ॥ त्वयेयं जगती स्वामिन्स्वफणामंडलोपरि । धृतैकदेशे ह्यणुवत्तस्मै तुभ्यं नमोनम इति दह्यमानं सर्पमुपस्थाय । त्राहि त्राहि महाभोगिन्सर्पोपद्रवदुःखतः । संततिं देहि मे पुण्यां निर्दुष्टां दीर्घदेहिनीं ॥ प्रपन्नं पाहि मां भक्त्या कृपालो दीनवत्सल । ज्ञानतोऽज्ञानतो वाऽपि कृतः सर्पवधो मया ॥ जन्मांतरे तथैतस्मिन्मत्पूर्वैरथवा विभो । तत्पापं नाशय क्षिप्रमपराधं क्षमस्व मे ॥ इति प्राथ्र्य स्नात्वाऽऽगत्य व्याहृतिभिः क्षीराज्येनाग्निं संप्रोक्ष्य हुते सर्पे जलेनाग्निं सिंचेत् । नात्राऽस्थिसंचयनं । इदं सर्वं सव्येनैव कार्यं । ततः स्नात्वाचम्य गृहं गच्छेत् । कर्ता सभार्यस्त्रिरात्रमाशौचं ब्रह्मचर्यं च कुर्यात् । बौधायनमते त्वेकरात्राशौचं । ततश्चतुर्थेऽहनि सचैलं स्नात्वाऽष्टौ विप्रान्निमंत्र्याचम्य प्राणानायम्य देशकालौ संकीर्त्य नागवल्यंगविहितं ब्राह्मणभोजनं करिष्ये । सर्पस्वरूपिणे ब्राह्मणाय इदंते पाद्यं । अनंतस्वरूपिणे० शेषस्व० कपिलस्व० नागस्व० कालि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्त्र० शंखपाल० भूधरस्त्र० इति क्रमेण तेषां पादौ प्रक्षाल्य तानाचमय्य स्त्रयं चाचम्य विप्रान् प्राङ्मुखानुदङ्मुखान्वोपवेश्य सर्पस्वरू० इदमासनं । आस्यतां । एवममनंतादिभ्यः । सर्पस्थाने क्षणः क्रियतां । प्राप्नोतु भवान् । एवमनंतस्थाने इत्यादि । भोः सर्पस्वरूप अयंते गंधः । ततः पुष्पधूपदीपवस्त्रादि । एव मन्येषामपि पूजनांते चतुरस्रमंडलेषु पात्राणि निधाय पायसक्षभ्यादीन्परिविष्य सावित्र्या प्रोक्ष्य परिषिच्य सर्पायेदमन्नममृतरूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा संपद्यतां नमम । एवं सर्वेषां । आचांतेषु प्रागग्रास्तीर्णदर्भेषु भोः सर्प अयंतेवलिर्नममेत्यादिनाममंत्रैः पिंडरूपान्पायसत्रलीन्दत्वा वस्त्रादिभिरभ्यर्च्य विप्रेभ्यस्तांबूलं दक्षिणां च दत्वा विसर्जयेत् । इदमपि सर्वं सव्येनैव कार्यं । ततो महीद्यौरित्यादिविधिना स्थापितकलशे सौवर्णं नागं षोडशोपचारैरभ्यर्च्य प्रार्थयेत् । ब्रह्मलोके च ये सर्पाः शेषनाग-पुरोगमाः । नमोस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु ते सदा ॥ विष्णुलोके च ये सर्पा वासुकिप्रमुखाश्च ये । नमोस्तु तेभ्यः० ॥ रुद्रलोके च ये सर्पास्तक्षकप्रमुखास्तथा । नमोस्तु० ॥ खांडवस्य तथा दाहे स्वर्गं ये च समाश्रिताः । नमो०॥ सर्पसत्रे च ये सर्पा आस्तिकेनाभिरक्षिताः । नमोस्तु०॥ मलयाद्रौ च ये सर्पाः कर्कोटकमुखाश्च ये । नमो०॥धर्मलोके च ये सर्पा वैतरण्यां समाश्रिताः । नमो०॥ ये सर्पाः पर्वतीयेषु दरी-संधिषु संस्थिताः । नमोस्तु०॥ ग्रामे वा यदि वाऽरण्ये ये सर्पाः प्रचरंति हि । नमो०॥ पृथिव्यामथ ये सर्पा ये सर्पा बलिसंस्थिताः । नमो० ॥ र-सातले च ये सर्पा अनंताद्या महाबलाः । नमो० ॥ एवं स्तुत्वाचार्यं संपूज्य कृतस्य सर्पसंस्कारकर्मणः सांगतासिद्ध्यर्थं इमं हैमं नागं कल-शवस्त्रदक्षिणायुतं अ० शर्मणे आचार्याय तुभ्यमहं० इति दत्वा तस्मै सवृषभां कृष्णां गां तन्निष्क्रयं वा दद्यात् । ततो दंपती वस्त्रालंका-रादिभिर्यथाविभवमन्यान्ब्राह्मणांश्च संपूज्य यस्यस्मृत्या० । मया यत्कृतं सर्पसंस्काराख्यं कर्म तद्भवतां विप्राणां वचनाच्छ्रीपरमेश्वरप्रसादात्सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिपूर्णमस्तु । तथास्त्विति ते ब्रूयुः । ततः कर्मणः सांगतायै यथाशक्ति ब्राह्मणान्संभोज्य भूयसीं दत्वा कर्म समापयेत् । इति नागबलिप्रयोगः ॥

॥ अथ कन्यावैधव्यहरः कुंभविवाहविष्णुमूर्तिदानविधिः । मार्कंडेयः । बालवैधव्ययोगे तु कुंभद्रुप्रतिमादिभिः । कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे ॥ तत्र पुनर्भूत्वाऽभाव उक्तो विधानखंडे । स्वर्णांबुपिप्पलानां तु प्रतिमा विष्णुरूपिणी । तया सह विवाहे तु पुनर्भूत्वं न जायते ॥ सूर्यारुणसंवादे । विवाहात्पूर्वकाले च चंद्रताराबलान्विते । विवाहोक्तेन विधिना कुंभेन सह चोद्वहेत् ॥ सूत्रेण वेष्टयेत्पश्चाद्दशतंतुविधानतः । कुंकुमालंकृतं देहं तयोरेकांतमंदिरे ॥ " सं० कौ० आसमंताच्चंदनपुष्पादिभिरलंकृतं कुंभं कन्यादेहं च वेष्टयेदित्यर्थः । मंदिरे तदुभयसंबंधिनि " ततः कुंभं च निःसार्य प्रभज्य सलिलाशये । ततोऽभिषेचनं कुर्यात्पंचपल्लववारिभिः ॥ कुंभप्रार्थना तत्रैव । वरुणांगस्वरूपाय जीवनानां समाश्रय । पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥ देहि विष्णो वरं देव कन्यां पालय दुःखतः । ततोऽलंकारवस्त्राढ्यां वराय प्रतिपादयेत् ॥ मूर्तिदानमपि तत्रैवोक्तं । ब्राह्मणं साधुमामंत्र्य संपूज्य विविधार्हणैः । तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजां ॥ शुद्धवर्णसुवर्णेन वित्तशक्त्याऽथवा पुनः । निर्मितां रुचिरां शंखगदाचक्राब्जसंयुतां ॥ दधानां वाससी पीते कुमुदोत्पलमालिनीं । सदक्षिणां च तां दद्यान्मंत्रानेतानुदीरयेत् ॥ यन्मया जन्मनि प्राचि मत्या पतिसमागमं । विषोपविषशस्त्राद्यैर्हतो वाऽतिविरक्तया ॥ प्राप्नुवंत्या महाघोरं यशःसौख्यधनापहं । वैधव्याद्यतिदुःखौघं तन्नाशाय सुखाप्तये ॥ बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुं । सुवर्णनिर्मितां शक्त्या तुभ्यं संप्रददे द्विज ॥ अनघाऽद्याहमस्मीति त्रिवारं प्रजपेत्ततः । एवमस्त्विति तस्योक्तिं गृहीत्वा स्वगृहं विशेत् ॥ (स्वगृहं विशेदित्युक्त्या गृहाद्बहिर्देवालयादाविदं कर्म कार्यमिति भाति) ततो वैवाहिकं कुर्याद्विधिं दाता मृगीदृश इत्यादि निर्णयसिंधौ ज्ञेयं । इति कुंभविवाहविष्णुमूर्तिदान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधिः ॥ ॥अथ प्रयोगः। विवाहात्पूर्वं चंद्रताराबलान्विते शुभदिने पूर्वाह्णे पित्रादिः कर्ता आचमनादिदेशकालस्मरणांते अस्याः अ० नाम्न्याः मम कन्याया जन्मकालीनग्रहादियोगसूचितप्रबलवैधव्यदोषनिवृत्तिपूर्वकभर्तृचिरजीवनपुत्रादिसुखप्राप्तिद्वारा श्रीपर० कुंभेन सह विवाहं करिष्ये इति संकल्प्य गणेशपूजनादिनांदीश्राद्धांते महीद्यौरित्यादिविधिना कुंभं प्रतिष्ठाप्य पूर्णपात्रे प्रतिमयोः तत्त्वायामीति वरुणं इदंविष्णुरिति विष्णुं चावाह्य षोडशोपचारैः संपूज्य। वरुणांगस्वरूपाय जीवनानां समाश्रय। पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु। देहि विष्णो वरं देव कन्यां पालय दुःखतइति प्रार्थ्य विष्णुरूपिणे कुंभाय इमां कन्यां वस्त्राद्यलंकृतां श्रीरूपिणीं समर्पयामीति समर्प्य कुंभं कन्यां च कुंकुमेनालंकृत्य दुग्धाक्तद्विगुणशुक्लसूत्रेण परित्वेत्यादिभिरधस्तादुपरिष्टाच्च मंत्रावृत्त्या कुंभं कन्यां च पंचवारं परिवेष्ट्य सूत्रे निष्काश्य वरुणं विष्णुं च विसृज्य पूर्णपात्रमपसार्य कुंभं नीत्वा जलाशये प्रभज्य पंचपल्लवैः शुद्धोदकेन समुद्रज्येष्ठाइत्यादिभिः कन्यामभिषिच्य सोपस्करं प्रतिमाद्वयं कन्यावाससी च सदक्षिणानि ब्राह्मणाय दत्वा कर्म समाप्य ब्राह्मणान्भोजयेदिति। यद्वा ब्राह्मणाय विष्णुमूर्तिदानं कुर्यात्। तद्यथा। कन्या स्नात्वा देवालयादिपुण्यदेशे गत्वा आचम्य देशकालौ संकीर्त्य मम जन्मकालीन० श्रीप० महाविष्णुमूर्तिदानं करिष्ये इति संकल्प्य गणेशपूजनांते उक्तलक्षणसुवर्णप्रतिमायां महाविष्णुं षोडशोपचारैः संपूज्य श्रुतशीलादिसंपन्नं ब्राह्मणमाहूय यथाविभवं वस्त्रादिभिः संपूज्य तस्मै विष्णुमूर्तिं दद्यात्। तत्र मंत्राः। यन्मया जन्मनि प्राचि घ्नंत्या पतिसमागमं। विषोपविषशस्त्राद्यैर्हतो वाऽतिविरक्तया॥ प्राप्नुवंत्या महाघोरं यशःसौख्यधनापहं। वैधव्याद्यतिदुःखौघं तन्नाशाय सुखाप्तये॥ बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुं। सुवर्णनिर्मितां शक्त्या तुभ्यं संप्रददे द्विजेति। ततस्तत्सांगतायै यथाशक्तिसुवर्णं दक्षिणां दत्वा अनघाद्याहमस्मीति त्रिर्वदेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमस्त्विति ब्राह्मणोऽपि त्रिः । ततो ब्राह्मणभोजनं संकल्प्य कर्म समाप्य स्वगृहं गच्छेत् । इति शांतिरत्ने कुंभविवाहविष्णुमूर्तिदानप्रयोगः ॥ ॥ अथार्कविवाहः । तृतीयमानुषीविवाहनिषेधात्तदर्थमर्कविवाह उच्यते । प्रयोगपारिजाते मात्स्ये । उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन । मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं ॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथा । संग्रहे । तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् । चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ॥ आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे । शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकं ॥ ब्राह्मे । ग्रामात्प्राच्यामुदीच्यां वा सपुष्पं फलसंयुतं । परीक्ष्य यत्नतोऽधस्तात्स्थंडिलादि यथाविधि । कृत्वाऽर्कपुरतस्तिष्ठन् प्रार्थयेत्तं द्विजोत्तमः ॥ त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे । तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥ तत्राध्यारोप्य देवेशं छायया सहितं रविं । वस्त्रैर्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत् ॥ (तन्मंत्र आकृष्णेनेतीति प्रांचः । वस्तुतस्तु अर्कमभ्यर्च्यसौर्याचेत्यत्र शौनकेन सौरीविधानात् आकृष्णेनेत्यस्य लिंगेनानुक्रमण्या च सौरीत्वाभावाद्देवतावाचके पर्यायशब्दप्रयोगाभावस्य मीमांसकसंमतत्वाच्च सौर्यचैव पूजा युक्ता) श्वेतवस्त्रेण संवेष्ट्य तथा कार्पासतंतुभिः । गंधपुष्पैः समभ्यर्च्य अंब्लिंगैरभिषिच्य च । गुडौदनं तु नैवेद्यं तांबूलं च समर्पयेत् । चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूज्य च । विसृज्य होममग्नौ च उद्वहेन्मानुषीं परां ॥ व्यासः । स्नात्वाऽलंकृतवासास्तु रक्तगंधादिभूषितं । सपुष्पफलशाखैकमर्कगुल्मं समाश्रयेत् ॥ सल्लक्षणेन संयुक्तमर्कं संस्थाप्य यत्नतः । अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्पुरा ॥ अर्कसंनिधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नांदीश्राद्धं हिरण्येन अष्टवर्गान्प्रपूजयेत् ॥ (महालये॰मघासुचेति सिंधुस्थनिगमोक्त्या नांदीश्राद्धस्य द्वादशदैवतत्वे मात्रादिवर्गचतुष्टयार्थमष्टब्राह्मणेष्वष्टवर्गान् द्विशोवृत्तान्मात्रादींश्चतुरो वर्गान्पूजयेदित्यर्थः) पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः । (विप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यः) यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणं । उष्णीषं गंधमाल्यादि वरायास्मै प्रदापयेत् ॥ स्वशाखोक्तप्रकारेण मधुपर्कं समाचरेत् ।
(विप्रहस्तेन वरं पूजयेदित्युक्तेः प्रदापयेदित्युक्तेश्च संकल्पाद्याचार्यवरणांतमन्यकर्तृकमिति भाति । प्रयोगेषु तु वरकर्तृकमेवोक्तं) अर्कं प्र-
दक्षिणं कुर्वन् जपेन्मंत्रमिमं बुधः ॥ मम प्रीतिकरा येयं मया सृष्टा पुरातनी । अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु ॥ पुनः प्रदक्षिणी-
कुर्यान्मंत्रेणानेन मंत्रवित् ॥ नमस्ते मंगले देवि नमः सवितुरात्मजे । त्राहि मां कृपया देवि पत्नी त्वं म इहागता ॥ अर्क त्वं ब्रह्मण
सृष्टः सर्वप्राणिहिताय च । वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय ॥ ततश्च कन्यावरणं त्रि-
पुरुषं कुलमुच्चरेत् ॥ आदित्यः सविता चार्कः पुत्री पौत्री प्रपौत्रिका ॥ गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत् ॥ मुहूर्तेऽर्कं निरीक्षेत
स्वस्तिसूक्तमुदीरयन् ॥ आशीर्भिः सहितैः कुर्यादाचार्यप्रमुखैर्द्विजैः । अथाचार्यं समाहूय विधिना तन्मुखाच्च तं । प्रतिगृह्य ततो होमं
गृह्योक्तविधिना चरेत् ॥ (प्रतिगृह्येत्यनेन तदुक्तकंकणबंधादि वक्ष्यमाणविष्णुपूजांतमुपलक्ष्यते) अर्ककन्यामिमां विप्र यथाशक्ति विभू-
षितां । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ अंजल्यक्षतकर्माणि कृत्वा कंकणपूर्वकं । यावत्पंचावृतं सूत्रं तावदर्कं प्रवेष्टयेत् ॥ स्व-
शाखोक्तेन मंत्रेण गायत्रीमथवा जपेत् । पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः ॥ बृहत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत् । अर्कस्य
पुरतः पश्चाद्दक्षिणोत्तरयोस्तथा ॥ कुंभांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये । सवस्त्रं प्रतिकुंभं च त्रिसूत्रेणैव वेष्टयेत् ॥ हरिद्रागंधसंयुक्तं पूरये-
च्छीतलं जलं । प्रतिकुंभे महाविष्णुं संपूज्य परमेश्वरं ॥ पाद्यार्घ्यादिनिवेद्यांतं कुर्यान्नाम्नैव मंत्रवित् । पुनः प्रदक्षिणं कृत्वा मंत्रमेतमुदीरयेत् ॥
मया कृतमिदं कर्म स्थावरेषु जरायुणा । अर्कापत्यानि नो देहि तत्सर्वं क्षंतुमर्हसि ॥ इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसृजेत्पुनः । तं सूर्यं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(इदं सद्यः सूर्यविसर्जनं तु ब्राह्मोक्तचतुर्दिनव्यवधानासंभवे ज्ञेयं) गोयुग्मं दक्षिणा दद्यादाचार्याय च भक्तितः ॥ इतरेभ्योऽपि विप्रेभ्यो दक्षिणां च स्वशक्तितः । तत्सर्वं गुरवे दद्यादंते पुण्याहमाचरेत् ॥ शौनकः । तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य च । आर्कं विवाहं वक्ष्यामि शौनकोऽहं विधानतः ॥ अर्कसंनिधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नांदीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत् ॥ अर्कमभ्यर्च्य सौर्यां च गंधपुष्पाक्षतादिभिः । स्वयं चालंकृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः ॥ अर्कस्योत्तरदेशे तु समन्वारब्ध एतया । (एतयाऽर्ककन्यया) उल्लेखनादिकं कुर्यादाघारांतमतः परं ॥ आज्याहुतिं च जुहुयात्संगोभिरनयैकया । यस्मैत्वाकामकामायेत्येतयर्चा ततः परं ॥ व्यस्ताभिश्च समस्ताभिस्ततस्तु स्विष्टकृद्भवेत् । परिषेचनपर्यंतमयाश्चेत्यादिकं क्रमात् ॥ अत्र प्रयोगो मत्कृते निर्णयसिंधौ ज्ञेयः । " वि० मा० अथ तृतीयभार्यापरिणयने तृतीयचतुर्थीकरणे तृतीयास्थाने स्त्रीलिंगवृक्षपरिणयविधानं । यदि चतुर्थीमपि परिणयति तदा तृतीयापरिणयने वृक्षपरिणयनं नास्ति । तथाच स्कांदे । चतुर्थीमपि कुर्यात्तु नोचेत्कुर्याद्विधानकं । विधानमादौ कृत्वा च पश्चात्परिणयेद्वधूं ॥ तृतीयां विधिवच्छ्रेष्ठां साधुसंततिसिद्धये । तथाच कालिकापुराणे । हे भार्ये च मृते पुंसस्तृतीयां कुरुते यदि । चतुर्थीमपि कुर्यात्तु नोचेत्कुर्याद्विधानकं ॥ भार्या त्वं मे नवा श्रेष्ठा तृतीया सुखसिद्धये । साक्षात्संग्रहसिद्ध्यर्थं ममात्र भव शोभना ॥ इत्युक्त्वा वृक्षोपर्यक्षतान्निक्षिपेत् । तदाऽर्कया विधातव्यं विवाहं विधिवच्छुभं ॥ अर्कयेति यदुक्तं तदर्कवृक्षस्य द्विलिंगता विद्यते । यदा त्वर्केणेति पुंस्त्वेन व्यवन्हियते तदा विशेषोऽस्ति । मंदारोऽर्कविशेषः । मंदारादितरो मंदारसजातीयो वृक्षविशेषोऽर्कशब्देनाभिधीयतइति । अर्कया सह यदा विवाहस्तदाऽर्काया ब्रह्मक्षत्रविड्जातीयत्वाभावात्पाणिशरप्रतोदग्रहणासंभवात्तद्रूपावलोकनेनैव विवाहः । तच्च रूपावलोकनमरिष्टपरिहारार्थं । यदि जीवत्पत्नीकस्तृतीयां परिणयति तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदरी मातुलिंगी दाडिमी धात्रीत्येतासु सर्वासु मध्ये कयाचिदेकया सह कर्तव्यं विधानं । न त्वर्केयेति निश्चयः ” इति शांरत्नेऽर्कविवाहः ॥

॥ अथ प्रयोगः । तृतीयविवाहात्प्राक् दिनचतुष्टयाधिकव्यवहिते रविवारे हस्तनक्षत्रे शनिवारे शुभे दिनांतरे वा पूर्वाह्णे ग्रामात्प्राच्यामुदीच्यां वा पुष्पफलयुतस्य रक्तगंधादिभूषितस्यार्कस्याधस्तादैशाने स्थंडिलं कृत्वा वराधिकवयस्कः पित्रादिर्वर एव वाऽर्कसमीपमागत्य आचमनादिदेशकालस्मरणांते मम करिष्यमाणतृतीयमानुषीपरिणयजन्यसकलारिष्टपरिहारपूर्वकसुखप्राप्तिद्वारा श्री० अर्कविवाहं करिष्य इति संकल्प्य (पित्रादिः कर्ता चेत्तेन ममेत्यत्र अ० शर्मणः पुत्रस्येत्याद्यूहः कार्यः) गणेशपूजनादिनांदीश्राद्धांतं कुर्यात् । तत्र नांदीश्राद्धे द्वादशदेवताः पूज्याः । ततः कन्यादानार्थमाचार्यं वृत्वा अर्कतरौ उदुत्यं प्रस्कण्वः सूर्यो गायत्री । सूर्याय० । इति छायासहितं सूर्यमावाह्य षोडशोपचारैः पूजयेत् । तत्र आपोहिष्ठेतितिसृभिरभिषिच्य वस्त्रार्पणकाले श्वेतवाससा कार्पासतंतुभिश्चावेष्ट्य गंधाद्युपचारैर्गुडौदननैवेद्यतांबूलसहितैरर्चनांते तिष्ठन्प्रार्थयेत् । त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे । तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥ ततः । मम प्रीतिकरा येयं मया सृष्टा पुरातनी । अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु ॥ इति प्रदक्षिणीकृत्य । नमस्ते मंगले देवि नमः सवितुरात्मजे । त्राहि मां कृपया देवि पत्नी त्वं म इहागता ॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च । वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः । तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति पुनः प्रदक्षिणं कुर्यात् । ततोऽर्ककन्यावरणं । वरपक्षीया द्वौ चत्वारो वा वरगोत्रादि चतुर्थ्यंतमुच्चार्य अ० शर्मणेवरायेत्यंते काश्यपगोत्रां आदित्यस्य प्रपौत्रीं सवितुः पौत्रीमर्कस्य पुत्रीमर्ककन्यां भार्यात्वाय वृणीमह इति वदेयुः । वृणीध्वमित्याचार्यः । एवं त्रिः । वाग्दानं कृताकृतं । करणपक्षे । आचार्यः प्राग्वद्वरगोत्राद्युच्चार्य अर्ककन्यां दास्ये इत्युक्त्वा वरं मधुपर्केण पूजयेत् । तत्र सति संभवे वराय वस्त्रयज्ञोपवीताभरणोष्णी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षाणि देयानि । ततो विप्रा अंतःपटं धारयंतो मंगलपद्यानि पठेयुः । अपसारिते च तस्मिन्वरः स्वस्तिनोमिमीतामितिसूक्तं पठन्सुमुहूर्तेऽर्कं निरीक्षेत । द्विजैश्चाशिषो देयाः । तत उदङ्मुख आचार्यः श्रीपर० काश्यपगोत्रामादित्यस्य० अर्ककन्यां तुभ्यमहंसंप्रददेइति वरहस्ते साक्षतं जलं क्षिप्त्वा प्रार्थयेत् । अर्ककन्यामिमां विप्र० समाश्रय । अथ वरोऽर्कं स्पृशन् कइदंकस्मा० गृह्णात्विति मंत्रं पठेत् । आचार्यो वराय दक्षिणां दद्यात् । ततो वरः परित्वेत्यादिभिर्गायत्र्या वा दुग्धाक्तद्विगुणशुक्लसूत्रेणार्कं पंचवारं प्रदक्षिणमावेष्ट्य सूत्रं वहिर्निष्कास्य पंचगुणीकृत्य कुंकुमाद्यलंकृतं तत्तूष्णीमर्कस्कंधे बद्ध्वा बृहत्सामेति कंकणरक्षां विधायाक्षतारोपणं कुर्यात् । तत्राचार्यः कन्याप्रतिनिधिः । ततोऽर्कस्य पूर्वपश्चिमदक्षिणोत्तरास्वाग्नेय्यादिविदिक्षु च क्रमेणाष्टौ कुंभान्संस्थाप्य हरिद्रागंधयुतजलेनापूर्य वस्त्रैर्वेष्टितान्सर्वांस्त्रिसूत्रेणावेष्ट्य पूर्णपात्रेषु महाविष्णुं नाममंत्रेणावाह्य पाद्यादिभिरभ्यर्च्य होमं कुर्यात् । वस्त्रमाल्याद्यलंकृतो वरः पूर्वोपकल्पितस्थंडिलस्य पश्चादुपविश्य देशकालौ स्मृत्वा अर्कविवाहहोमं करिष्ये इति संकल्प्य स्थंडिले योजकसंज्ञमग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वादध्यात् । तत्र आघारदेवतेआज्येनेत्यंते बृहस्पतिं १ कामं सम्राजं २ अग्निं ३ वायुं ४ सूर्यं ५ प्रजापतिं ६ चैताः प्रधानदेवता आज्येन शेषेणस्विष्टकृतमित्याद्यग्न्यर्चनांते दक्षिणभागस्थयाऽर्ककन्ययाऽन्वारब्ध इध्माधानमाघारहोमं च कृत्वा प्रधानहोमं कुर्यात् । संगोभिरयास्यो बृहस्पतिस्त्रिष्टुप् । अर्कविवाहप्रधानाज्यहोमे० । संगोभिरांगिरसो० । बृहस्पतय इदं० । यस्मैत्वा वामदेवः कामः सम्राडनुष्टुप् । अर्कवि० । यस्मैत्वाकामकामाय० । कामाय सम्राज इदं० । व्यस्तसमस्तव्याहृतीनां० । एवं षडाहुतीर्हुत्वा स्विष्टकृद्धोमादिशेषं समाप्य पुनरर्कं प्रदक्षिणीकृत्य । मया कृतमिदं कर्म स्थावरेषु जरायुणा । अर्कापत्यानि नो देहि तत्सर्वं क्षंतुमर्हसीतिमंत्रांते शांतिसूक्तानि पठित्वा भुंजीत । द्वितीयादिदिनेषु प्राग्वत्सूर्यपूजनमग्निरक्षणं च कुर्यात् । पंचमेऽहनि पूजांते उत्तिष्ठेत्यनेनार्कस्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यं गच्छगच्छेत्यग्निं च विसृज्याचार्याय गोयुग्ममितरेभ्योऽपि शक्त्या दक्षिणां दत्वा नववस्त्राणि धृत्वा त्यक्तवस्त्राद्युपस्करमाचार्याय दत्वा पुण्याहं वाचयित्वा शक्त्या विप्रान्संभोज्याशिषो गृहीत्वा कर्म समापयेत् । अत्र चतुर्दिनव्यवधानाऽसंभवे शांतिसूक्तजपांते एव विसर्जनादि कार्यं । इत्यर्कविवाहप्रयोगः ॥ ॥ अथ श्रीशांतिः । " शां० सा० मेधातिथिः । चौले च व्रतबंधे च विवाहे यज्ञकर्मणि । भार्या रजस्वला यस्य प्रायस्तस्य न शोभनं ॥ सं० कौ० वृद्धगार्ग्यः । विवाहव्रतचूडासु माता यदि रजस्वला । तस्याः शुद्धेः परं कार्यं मांगल्यं मनुरब्रवीत् ॥ यदि चौलादिप्रारंभोत्तरं रजः प्रारंभात्प्रागपि रजसि मुहूर्तांतराभावो वा तदा शांतिं कृत्वा तदैव कार्यं । यथोक्तं कारिकानिबंधे । सूतिकोदक्ययोः शुद्ध्यै गां दद्याद्धोमपूर्वकं । प्राप्ते कर्मणि शुद्धा स्यादितरस्मिन्न शुध्यति ॥ अलाभे सुमुहूर्तस्य रजोदोष उपस्थिते । श्रियं संपूज्य तत्कुर्याद्बृत्रहत्याभयंकरीं [श्रियं संपूज्य विधिवत्ततो मंगलमाचरेत्] ॥ हैमीं माषमितां पद्मां श्रीसूक्तविधिनाऽर्चयेत् । प्रत्यृचं पायसं हुत्वाऽभिषिच्य शुभमाचरेदिति ॥ श्लोकभेदेन प्राप्तपदोक्तारंभस्य मुहूर्तांतरालाभस्य च श्रवणान्न परस्परसापेक्षत्वं " इति श्रीशांतिः ॥ ॥ अथ प्रयोगः । कर्ता आचमनादिदेशकालस्मरणांते ममामुकस्य अमुकमंगले (मंगलारंभात्पूर्वं वा) संस्कार्यजननीरजोदोषोपस्थितिसूचितसकलानिष्टनिरासपूर्वकशुभफलप्राप्तिद्वारा श्री० श्रीशांतिं करिष्ये इति संकल्प्य (अमुकस्येत्यत्र पुत्रस्य कन्यायाः पौत्रस्येत्यादि यथायथमूह्यं) गणेशं संपूज्य पुण्याहं वाचयित्वाचार्यं वृणुयात् । आचार्यः प्रादेशकरणांते स्थंडिलात्पूर्वे महीद्यौरित्यादिविधिना कलशं संस्थाप्य तत्रोक्तलक्षणप्रतिमायां हिरण्यवर्णामितिपंचदशर्चस्यसूक्तस्य कर्दमानंदचिक्लीतेंदिरासुताः श्रीरनुष्टुप् । पंचमी षष्ठी च त्रिष्टुभौ । चतुर्थ्यस्या च प्रस्तारपंक्तिः । श्रीपूजने० । इतिसूक्तेन आवाहनाद्युपचारैः श्रियं संपूज्य स्थंडिलेऽग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यात् । चक्षुषीआज्येनेत्यंते श्रियं प्रधानदेवतां पायसेन पंचदशाहुतिभिः शेषेणेत्यादि । गृहसिद्धपायसाधिश्रयणाद्याज्यभागहोमांते श्रीसूक्तेन प्रत्यृचमवदानधर्मेण पायसं हुत्वा स्विष्टकृद्धोमादिशेषं समाप्य स्थापितकलशोदकेन ससंस्कार्यं यजमानं श्रीसूक्तेन समुद्रज्येष्ठाइत्यादिमंत्रैश्चाभिषिंचेत् । ततो यजमानो विभूतिं धृत्वा देवतोत्तरपूजांते आचार्यं संपूज्य दक्षिणां दत्वा विसर्जितदेवताप्रतिमाद्युपस्करदानांते विप्रेभ्यो भूयसीं दत्वा कर्म समापयेत् । ततः पुनराचम्य देशकालौ स्मृत्वा मम पुत्रस्यामुकमंगले संस्कार्यजनन्याः शुद्धिसिद्ध्यर्थं कूष्मांडैर्होष्यामि।होमे समाप्ते पुनर्देशका० शुद्धिसिद्ध्यर्थं ब्राह्मणाय पयस्विधेनुदानं (तन्मूल्यदानं वा) करिष्ये । पूजांते इमां पयस्विनीं धेनुं सदक्षिणां अ० शर्मणे ब्राह्मणायसंप्रददेनममेति दत्वा विष्णुं स्मरेत् । पित्रतिरिक्तकर्त्रंतरस्य पत्न्यां रजस्वलायां तु अ०शर्मणः संस्कार्यस्यामुकमंगले ममपत्नीरजोदोषेत्याद्यूहः । शेषं प्राग्वत् । इति श्रीशांतिप्रयोगः॥ ॥अथ कूष्मांडहोमविधिः संगृह्यते । "ध० सिं० नांदीश्राद्धोत्तरं सूतकमृतकयोः प्राप्तौ न विवाहादिप्रतिबंधः । विवाहव्रतयज्ञेषु श्राद्धे होमेऽर्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकं ॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः । नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेत्युक्तेः । इदं संनिहितमुहूर्तांतराभावादिसंकटे एव ज्ञेयं । संकटाभावे तु नांदीश्राद्धे जातेऽपि सूतकांते मुहूर्तांतरे एव मंगलं । सर्वोऽप्याशौचापवादोऽनन्यगतित्वे आर्तौ च ज्ञेय इति सिंधूक्तेः । सं० कौ० मुहूर्तांतरालाभे सामग्र्यां च कृतायां सूतकिनोऽप्यधिकारोपायमाह विष्णुः। अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जुहुयाद् घृतं । गां दद्यात्पंचगव्याशी ततः शुध्यति सूतकी ॥ ततः शुध्यतीति पुनरुक्तिर्विवाहाद्युपयोगिपाकपरिवेषणादावपि शुद्धिज्ञापनार्था । गां पयस्विनीं दद्यात् । संकटे समनुप्राप्ते सूतके समुपस्थिते । कूष्मांडीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीं ॥ चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् । यदैव सूतकप्राप्तिस्तदैवाभ्युदयक्रियेति संग्रहोक्तेः ,, इदं जननाशौचमात्रवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयमिति मार्तंडादौ । प्रारंभोत्तरं सूतकप्राप्तावप्ययं होमः कार्य इति कौस्तुभे धर्मसिंधौ च चौलप्रकरणे उक्तं । होमप्रकारमाह जमदग्निः । आज्यभागानंतरेण कूष्मांडैर्जुहुयाद्द्विजः । यद्देवेत्यनुवाकैश्च त्रिभिर्हुत्वाऽऽज्यमन्वहमिति । अन्वहमित्युक्तिः पापस्य लघुगुरुत्वतारतम्येन तिरात्रादिपक्षाभिप्रायपरा । अत्र तु सूतकिनः शुद्धिसंपादनेन केवलं विवाहाद्यधिकारसिद्ध्यर्थमेव होमस्यास्य विधानात्तन्नापेक्षितं । इति कूष्मांडहोमविधिः ॥ ॥ अथ प्रयोगः । कर्ता आचमनादिदेशकालस्मरणांते मम पुत्रस्य कन्याया वा अमुकमंगले (मंगलारंभात्पूर्वं वा) उपस्थितसूतकदोषनिवृत्तिपूर्वकं शरीरशुद्ध्या प्राप्तकर्मण्यधिकारसिद्धिद्वारा श्रीपर० जमदग्निप्रोक्तं कूष्मांडहोमं करिष्य इति संकल्प्य गणेशं संपूज्य पुरुषसूक्तजपादिप्रादेशकरणांते स्थंडिले पावकसंज्ञमग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वादध्यात् । तत्र चक्षुषी-आज्येनेत्यंते देवानादित्यान् । विश्वान्देवान् । द्यावापृथिवीसरस्वतीः । इंद्राग्निमित्रावरुणसोमधातृबृहस्पतीन् । जातवेदसं । अग्निं गार्हपत्यं । ज्योतिः । अग्निं । अग्निं गार्हपत्यं । अग्निं । अग्निं गार्हपत्यं द्विः । अग्निं । अग्निं गार्हपत्यं । अपः शुंधनीः । अपो हिरण्य-वर्णाः । वरुणं द्विः । अग्नीवरुणौ द्विः। अग्निमयासं । अग्नींद्रौ । उग्रंपश्याराष्ट्रभृतावप्सरसौ । उग्रंपश्याराष्ट्रभृतौ । वरुणं चतुः । अग्नीवरुणौ द्विः । सं-कुसुकविकुसुकनिर्ऋथनिस्वनान् । कृत्यानिर्ऋती । दुःशंसानुशंसघणानुघणान् । त्वष्टारं । अग्निं । अग्निमायुर्दां । अग्निवरुणादितिविश्वदेवान् । अग्निं पवमानं त्रिः । अग्निं जातवेदसं । जातवेदसं । अग्निं वृत्रहणं । अग्निं । उषोनिम्रुचौ । देवान् । अग्निं जातवेदसं । अग्निं द्विः । ब्र-ह्माणं । वैश्वानरं ५१ चैताः प्रधानदेवता आज्येन शेषेणस्विष्टकृतमित्याद्याज्यभागहोमांते प्रधानहोमः । यद्देवाइत्यनुवाकत्रयस्य ब्रह्मा स्वयंभू-ऋषिः । देवादयो देवताः । पंक्त्यादीनि छंदांसि । होमे० । ॐयद्देवादेवहेळनं० मितस्वाहा । देवेभ्य आदित्येभ्य इदं० । देवाजीवनकाम्या०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सजोपसःस्वाहा । विश्वेभ्यो देवेभ्य० । ऋतेनद्यावापृथिवी० मूदिमस्वाहा । द्यावापृथिवीसरस्वतीभ्य० । इंद्राग्नीमित्रावरुणौ० मारिमस्वाहा ।
इंद्राग्निमित्रावरुणसोमधातृबृहस्पतिभ्य० । सजातशंश्सा० मुमुग्धिस्वाहा । जातवेदस० । यद्वाचा० दुष्कृतास्वाहा । अग्नये गार्हपत्यायेदं० ।
येनत्रितो० आक्षिस्वाहा । ज्योतिषइ० । यत्कुसीद० दधामिस्वाहा । अग्नयइ० । यन्मयिमाता० मनेनसंश्स्वाहा । अग्नये गार्हपत्यायेदं० ।
यदापिपेषमातरं० भवामिस्वाहा । अग्नय इदं० । यदंतरिक्षं० मनेनसंश्स्वाहा । अग्नये गार्हपत्यायेदं० । यदाशसा० नसंश्स्वाहा । अग्नये
गार्हपत्यायेदं० । अतिक्रामामि० लोकंश्स्वाहा । अग्नयइ० । त्रितेदेवा० नसंश्स्वाहा । अग्नये गार्हपत्यायेदं० । दिविजाता० शुंधनीःस्वाहा ।
अद्भ्यः शुंधनीभ्य० । यदापोनक्तं० तनस्वाहा । अद्भ्यो हिरण्यवर्णाभ्य० । इमंमेवरुण० चकेस्वाहा । वरुणायेदं० । तत्त्वायामि० प्रमोषीः-
स्वाहा । वरुणाये० । त्वंनोअग्ने० मुग्ध्यस्मत्स्वाहा । अग्नीवरुणाभ्यामिदं० । सत्वंनोअग्ने० एधिस्वाहा । अग्नीवरुणाभ्यामिदं० । त्वमग्नेअ-
यास्य० भेषजंश्स्वाहा । अग्नये अयासइदं० । यददीव्यं० मुंचताश्स्वाहा । अग्नींद्राभ्यामिदं० । यद्धस्ताभ्यां० मृणानिस्वाहा । उग्रंपश्याराष्ट्रभृ-
द्भ्यामप्सरोभ्यामि० । उग्रंपश्येराष्ट्र० रायस्वाहा । उग्रंपश्याराष्ट्रभृद्भ्यामिदं० । अवतेहेडो० कृतानिस्वाहा । वरुणायेदं० । उदुत्तमंवरुण०
स्यामस्वाहा । वरुणायेदं० । इंममेवरुण० चकेस्वाहा । वरुणाये० । तत्त्वायामि० प्रमोषीःस्वाहा । वरुणाये० । त्वंनोअग्नेवरुणस्य० मुग्ध्यस्म-
त्स्वाहा । अग्नीवरुणाभ्यामिदं० । सत्वंनोअग्नेवमो० नएधिस्वाहा । अग्नीवरुणाभ्या० । संकुसुकोविकुसुको० चीचतश्स्वाहा । संकुसुकविकु-
सुकानिर्ऋथनिस्वनेभ्यइदं० । निर्यक्ष्ममचीचते० मासिस्वाहा । कृत्यानिर्ऋतिभ्यामिदं० । दुःशंश्सानुशंश्साभ्यां० मसिस्वाहा । दुःशंसानुशं-
सघणानुघणेभ्यइदं० । संवर्चसापयसा० हृिलिष्टश्स्वाहा । त्वष्ट्रइदं० । आयुष्टेविश्वतोदध० सुवामितेस्वाहा । अग्नयइदं० । आयुर्दाअग्ने० दि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मꣳस्वाहा।अग्नयआयुर्द०। इममग्नआयुषे०यथासत्स्वाहा। अग्निवरुणादितिविश्वदेवेभ्यइदं०।अग्नआयूꣳषि०दुच्छुनाꣳस्वाहा। अग्नये पवमानायेदं०। अग्नेपवस्व० पोषꣳस्वाहा। अग्नये पवमानायेदं०। अग्निर्ऋषिः० गयꣳस्वाहा। अग्नये पवमानायेदं०। अग्नेजातान्प्रणु० उद्धौस्वाहा। अग्नये जातवेदसइदं०। सहसाजातान्० सपत्नान्स्वाहा। जातवेदस०। अग्नेयोनोभितो० माभरस्वाहा। अग्नये वृत्रघ्नइदं०। अग्नेयोनोभिदासति० दध्मसिस्वाहा। अग्नयइदं०। योनःशपादशपतो०समूहनाꣳस्वाहा। उभोनिम्रुग्भ्यामिदं०। योनःसपत्नोयोरणा०किंचनस्वाहा। देवेभ्य०। योमांद्वेष्टि० माꣳस्वाहा। अग्नये जातवेदस०। योअस्मभ्य० कुरुस्वाहा। अग्नयइदं०। सꣳशितंमे० हितःस्वाहा। अग्नयइदं०। उदेषांबाहू० अहꣳस्वाहा। ब्रह्मणइदं०। पुनर्मनःपुनरायु० विश्वास्वाहा। वैश्वानरायदेनंमम ॥ ५१ ॥ एवमाज्याहुतीर्हुत्वा स्विष्टकृद्धोमादिकर्मशेषं समाप्य गायत्र्यादिमंत्रैः पंचगव्यं कृत्वा समंत्रं प्राश्य गां पयस्विनीं तन्निष्क्रयं वा ब्राह्मणाय दद्यात्। इति कूष्मांडहोमप्रयोगः ॥

॥ अथ प्रतिकूलदोषशांतिः संगृह्यते। “ शां० सा० स्मृतिचंद्रिकायां भृगुः। वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः। तदोद्वाहो नैव कार्यः कृते वैधव्यमाप्नुयात् ॥ कुलयोर्वधूवरकुलयोरित्यर्थः। शौनकः। पिता पितामहश्चैव माता चैव पितामही। पितृव्यः स्त्री सुतो भ्राता भगिनी चाऽविवाहिता ॥ एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतं। अन्यैरपि विपन्नैस्तु केचिदूचुर्न तद्भवेत् ॥ एतच्च त्रिपुरुषोपलक्षणं। पुरुषत्रयपर्यंतं प्रतिकूलं स्वगोत्रिणां। प्रवेशनिर्गमौ तद्वत्तथा मुंडनमंडने ॥ प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियां। आचतुर्थं ततः पुंसि पंचमे शुभदं भवेदिति मेधातिथिवाक्येनोपसंहारात्। वधूवरयोः पितरमादाय पुरुषत्रयपर्यंतमित्यर्थः। अन्यथा आचतुर्थमित्यस्य पंचमइत्यस्य चाऽसंगत्यापत्तेः। (वधूवरावादाय जन्यतिपुरुषी जनकत्रिपुरुषी च ग्राह्येति कौस्तुभादौ) प्रतिकूलकृतश्च दोषो वर्षावधिरेव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच मेधातिथिः । वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः । तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् ॥ संकटे तु मासोत्तरं शांतिं कृत्वा विवाहः कार्यः । प्रतिकूलेऽपि कर्तव्यो विवाहो मासतः परं । शांतिं विधाय गां दत्वा वाग्दानादि चरेत्पुनरिति ज्योतिःप्रकाशे वचनात् । वाग्दानादीत्येतदतद्गुणसंविज्ञानो बहुव्रीहिः । वाग्दानस्य पूर्वं कृतत्वेनावृत्त्ययोगादिति केचित् । पुनःपदेनावृत्त्युत्पत्तेरदृष्टार्थं पुनर्वाग्दानमिति गागाभट्टीये । सं० कौ० ज्योतिःसागरे । दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये । प्रौढायामपि कन्यायां नानुकूलं प्रतीक्ष्यते॥ अन्यत्रापि । दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च । उदासीनस्थितस्यापि प्रतिकूलं न विद्यते ॥ त्रि० मा० स्मृतिचंद्रिकायां गर्गः । कृते वाङ्निश्चये पश्चान्मृत्युर्मर्त्यस्य कस्यचित् । तन्मंगलं न कर्तव्यं नारीवैधव्यशंकया ॥ दंपत्योः पितरौ भ्राता उपनीतश्च सोदरः । पितृव्यस्तादृशश्चैव पितामहपितामही ॥ कृते वाङ्निश्चये पश्चान्मृतो भवति मानवः । एषां मध्ये तु यः कश्चित्प्रतिकूलं तदुच्यते ॥ प्रतिकूले तु संजाते विवाहं नैव कारयेत् । नारी वैधव्यमाप्नोति ह्यन्यथा कारयेद्यदि ॥ अतो दोषविनाशाय शांतिं कुर्याद्विचक्षणः । पुण्येऽह्नि विप्रकथिते कृत्वा पुण्याहवाचनं ॥ पूजयेत्प्रयतो देवान्यथाशक्ति हिरण्मयान् । श्रियं हरिं शिवां शंभुं मृत्युं चैव विशेषतः ॥ श्रीसूक्तेन श्रियं विष्णुमिदंविष्णुस्तु इत्यृचा । गौरीर्मिमायेति शिवां त्र्यंबकेण महेश्वरं ॥ परंमृत्योस्तु मंत्रेण मृत्युं संपूजयेत्ततः । वासःस्रग्गंधपुष्पाद्यानुपचारान्प्रकल्पयेत् ॥ अथाज्यभागपर्यंतमुपलेपादि पूर्ववत् । दूर्वातिलाज्यचरुणा हुनेदष्टोत्तरं पृथक् ॥ भूःस्वाहामृत्युर्नश्यतु सुखायवर्धतामिति । एवं व्याहृतिभिर्हुत्वा घृतेन च विचक्षणः ॥ स्विष्टकृदिध्मसंधानं प्रायश्चित्ताहुतीस्तथा । एवं समाप्य होमं तु दद्याद्विप्राय दक्षिणां ॥ गोहिरण्यं च वासांसि दत्वा त्वस्मात्प्रमुच्यते । इदं रिष्टप्रशमनं विधानं तु विचक्षणः ॥ ऐश्वर्यकीर्तिजननं पुत्रपौत्रविवर्धनं । सर्वमृत्युमति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्य दीर्घमायुरवाप्नुयात् ॥ " अत्र विस्तरो विशेषश्च कौस्तुभादौ द्रष्टव्यः । इति प्रतिकूलदोषशांतिः ॥ ॥ अथ प्रयोगः । कर्ता दैवज्ञोक्ते शुभदिवसे आचमनादिदेशकालस्मरणांते मम पुत्रस्य कन्याया वा विवाहनिश्चयोत्तरं अमुकस्य मृत्युवशेनोपस्थितप्रतिकूलदोषसूचितसकरिष्टपरिहारपूर्वकं दीर्घायुःपुत्रपौत्रादिसुखैश्वर्यप्राप्तिद्वारा श्रीप० गर्गोक्तां शांतिं करिष्ये । गणेशं संपूज्य पुण्याहं वाचयित्वाचार्यं वृणुयात् । आचार्यः प्रादेशकरणांते पीठादौ प्रतिमासु हिरण्यवर्णामितिपंचदशर्चस्य सूक्तस्य कर्दमानंदचिक्लीतेंदिरासुताः श्रीरनुष्टुप् । पचमी षष्ठी च त्रिष्टुभौ । चतुर्थ्यंत्या च प्रस्तारपंक्तिः । श्रीपूजने० । इतिसूक्तेन श्रियं । इदंविष्णुर्मेधा० इति विष्णुं । गौरीर्मिमाय दीर्घतमा गौरी जगती । इति गौरीं । त्र्यंबकं वसिष्ठो० इति रुद्रं । परंमृत्यो सकुसुको मृत्युस्त्रिष्टुप् । इति मृत्युं चावाहनाद्युपचारैः संपूज्य तत्पश्चिमतः स्थंडिलेऽग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वादध्यात् । तत्र चक्षुषीआज्येनेत्यंते अग्निं प्रधानदेवं दूर्वातिलाज्यचरुभिः प्रतिद्रव्यं अष्टोत्तरशतसंख्याभिराहुतिभिः । अग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेणेत्याद्याज्यभागहोमांते भूःस्वाहामृत्युर्नश्यतुसुखायवर्धतांस्वाहेतिमंत्रेणोक्तद्रव्यैरुक्तसंख्यया होमं कृत्वा व्यस्तसमस्तव्याहृतिभिराज्यं हुत्वा स्विष्टकृद्धोमादिशेषं समाप्य देवतोत्तरपूजां कुर्यात् । ततो यजमान आचार्यं संपूज्य तस्मै गोहिरण्यवासांसि विसर्जितदेवतापीठं च दत्वा शक्त्या विप्रान्संभोज्य भूयसीं दत्वा शांतिं वाचयित्वा कर्म समापयेत् । इति प्रतिकूलदोषशांतिप्रयोगः ॥

॥ अथ ब्रह्मौदनात्पूर्वं प्रदोषगर्जितादौ शांतिः संगृह्यते । " वि० मा० । ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं भवेत् । (गर्जितमिति वृष्ट्युत्पातयोरप्युपलक्षणं) तदा विघ्नकरं ज्ञेयं बटोरध्ययनस्य तत् ॥ तस्य शांतिविधानं तु वक्ष्ये शास्त्रानुसारतः । स्वस्तिवाचनपूर्वं तु हवनं कारयेद्बुधः ॥ प्रधानं पायसं तत्र साज्यं साष्टशतं यजिः । (यजिर्होमः) सूक्तं बृहस्पतेर्विद्वान्पठेत्प्रज्ञाविवृद्धये ॥ गायत्री यजने मंत्रः प्रायश्चित्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु सर्पिषा । धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीं ॥ शीलान् होमविधेः पश्चाद्ब्राह्मणान्भोजयेत्ततः । शतमष्टोत्तरं धीमांस्ततो ब्रह्मौदनं पचेत् ॥" इति प्रदोषगर्जितादिशांतिः ॥ ॥ अथ प्रयोगः । कर्ता आचमनादिदेशकालस्मरणांते ब्रह्मौदनपाकात्पूर्वं प्रदोषकालिकगर्जितेन सूचितस्य ब्रह्मचारिकर्तृकाध्ययनविघ्नस्य निरसनद्वारा श्रीप० शांतिं करिष्ये इति संकल्प्य गणेशं संपूज्य स्वस्तिवाचनं कृत्वा आचार्यं वृणुयात् । आचार्यः प्रादेशकरणांते स्थंडिलेऽग्निं प्रतिष्ठाप्यान्वादध्यात् । तत्र चक्षुषीआज्येनेत्यंते सवितारं प्रधानदेवं घृताक्तपायसेन अष्टोत्तरशतसंख्याभिराहुतिभिः । शेषेणस्विष्टकृतमित्यादिमरुतश्चाज्येनेत्यंते सवितारमाज्येन विश्वान्देवानाज्यसंस्रावेणेत्यादि । गृहसिद्धपायसाधिश्रयणाद्याज्यभागहोमांते गायत्र्या १०८ संख्यया पायसं हुत्वा इमांधियमितिद्वादशर्चस्य सूक्तस्यायास्यो बृहस्पतिस्त्रिष्टुप् । जपे० । ततः स्विष्टकृदादियद्देवादेवाइत्याहुत्यंते गायत्र्याऽऽज्याहुतिं हुत्वा कर्मशेषं समापयेत् । ततो यजमान आचार्यं संपूज्य तस्मै सवत्सां पयस्विनीं गां दत्वा सुशीलान् १०८ ब्राह्मणान् भोजयित्वा भूयसीं दत्वा शांतिं वाचयित्वा कर्म समापयेत् । वृष्ट्युत्पातयोरपीयमेव शांतिः कार्या । तत्र संकल्पे प्रदोषकालिकगर्जितेनेत्यत्र अकालवृष्ट्या अमुकोत्पातेनेति वा यथायथमूह्यं । इति प्रदोषगर्जितादिशांतिप्रयोगः ॥ ॥ अथोग्ररथशांत्याख्या षष्टितमाब्दशांतिः संगृह्यते । शौनकः । अथातः संप्रवक्ष्यामि शांतिं चोग्ररथस्य तु । ब्रह्मक्षत्रियवैश्यानां शूद्राणां चैव योषितां ॥ यदि स्यात्षष्टिवर्षे तु तदा मृत्युर्भवेद्ध्रुवं । दुःस्वप्नानि च जायंते मातापित्रोर्मृतिस्तदा ॥ भार्यापुत्रवियोगश्च रोगव्याधिभयं तथा । ग्रहपीडा राजभयं रोगाश्च विविधाश्च ये ॥ दंतरोगा दृष्टिमांद्यं छाया॥ विकृतिस्तथा । नक्षत्राणि न दृश्यंते ध्रुवादीनि स्फुटान्यपि ॥ भूतप्रेतपिशाचाद्या दृश्यंते विविधाश्च ये । एते चान्ये महोत्पाता जायंते षष्टिवत्सरे ॥ तद्विष्टपरिहारार्थं शांतिं वक्ष्यामि शौनकः । लोभादनादरो यस्तु शांति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्म न कारयेत् ॥ तस्मिन्वर्षे भवेन्मृत्युः सत्यमेव न संशयः । तस्मिन्वर्षे जन्मदिने जन्मर्क्षे वा यदा भवेत् ॥ तस्मिन्दिने तु संप्राप्ते मंगलस्नानमाचरेत् । दैवज्ञोक्ते शुभे काले चंद्रताराबलान्विते ॥ नित्यकर्माणि निर्वर्त्य ब्राह्मणानभिमंत्र्य च । (अभिमंत्रणमामंत्रणमनुज्ञापनं वा) आचार्यं वरयेदादौ वेदवेदांगपारगं ॥ आचारवंतं धर्मज्ञं शांतिकर्मणि कोविदं । कामक्रोधविहीनं च रागद्वेषविवर्जितं ॥ गणेशं पूजयेदादौ ततः पुण्याहवाचनं । मातृकाः पूजयित्वा तु नांदीश्राद्धमतः परं ॥ आचार्यब्रह्मवरणमन्वाधानमतः परं । सर्वौषधीः समानीय पंचत्वक्पंचपल्लवं ॥ पंचरत्नं पंचगव्यं ततः पंचामृतं क्षिपेत् । कलशे च समानीय ग्रहातिथ्यपुरःसरं ॥ नवग्रहं समाराध्य मार्कंडेयं प्रधानकं । पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥ मार्कंडेयस्य प्रतिमां कारयेच्च प्रयत्नतः । प्रतिमां स्थापयेत्कुंभे वस्त्रयुग्मेन वेष्टयेत् ॥ उपचारैः षोडशभिः संपूज्य च विधानतः । (अत्र चकारेण होमे वक्ष्यमाणानां मृत्युंजयाश्वत्थामाद्युपदेवानां पूजा कार्या । गोमुखप्रसवे यक्ष्महपूजावदिति कश्चित् । वस्तुतस्तु तत्र प्रतिमांचविधानतइतिवदत्र विशेषवचनाभावान्मूलशांतावपूजितानामपि देवतानां होमस्य सर्वसंमतत्वाच्च नात्र तेषां पूजनमपेक्षितमिति बोध्यं) समिदाज्यचरुद्रव्यैर्दूर्वाभिः परमान्नकैः ॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा । प्रत्येकं जुहुयादेतैर्मार्कंडेयेति मंत्रतः ॥ मार्कंडेय महाभाग सप्तकल्पांतजीवन । आयुरारोग्यमैश्वर्यं देहि मे मुनिपुंगव ॥ मृत्युंजयं समुद्दिश्य दूर्वाभिश्च तिलैः सह । अयुतं वाऽयुतार्धं वा त्रिसहस्रं वा सहस्रकं ॥ होमं कृत्वा विधानेन उपदेवान्यजेत्पृथक् । अश्वत्थामा बलिर्व्यासो हनुमांश्च बिभीषणः ॥ कृपः परशुरामश्च एतांश्चैव पृथक्पृथक् । लाजहोमं प्रकुर्वीत यथाविभवविस्तरं ॥ श्रीसूक्तं रुद्रजाप्यं च आयुष्यं पुरुषसूक्तकं । वेदपारायणं चैव कर्तव्यं तु विशेषतः ॥ होमशेषं समाप्याथ पूर्णाहुतिमतः परं । कलशोदकमादाय अभिषेकं तु कारयेत् ॥ यजमानं सपत्नीकं बंधुवर्गसमन्वितं । शांति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूक्तं पुरुषसूक्तं परंमृत्यो तथैव च ॥ आयुष्यं पावमानं च शिवसंकल्पषड्टचं । महाशांतिं प्रजप्याथ कलशं च प्रदापयेत् ॥ अभिषेकाप्लुतं वस्त्रमाचार्याय निवेदयेत् । सालंकारां सवत्सां गामाचार्याय निवेदयेत् ॥ दशदानानि विप्रेभ्यः सुवर्णं शतमानकं । आज्यस्यावेक्षणं कुर्यात्तिलदानं तथैव च ॥ ब्रह्मणामाशिषो ग्राह्या नववस्त्रं तु धारयेत् । नीराजनं प्रकुर्वीत देवानामभिवादनं ॥ ब्राह्मणान्भोजयेत्पश्चात्सहस्रं वा शतं तु वा । बंधुभिः सह भुंजीत दीर्घमायुश्च विंदति ॥ एवं यः कुरुते सम्यग्ग्रहशांतिं विधानतः । तस्यायुः शतवर्षांतं भवेदिति विनिश्चितं ॥ सर्वारिष्टविनाशश्च सर्वसंपद्भविष्यति । इत्युग्ररथशांत्याख्या षष्टितमाब्दशांतिः ॥ ॥ अथ प्रयोगः । कर्ता षष्टितमवर्षारंभदिने तदंर्तगतजन्मर्क्षे वा शुभे काले चंद्रताराबलान्विते मंगलस्नानं विधाय कृतनित्यक्रियो विप्रानामंत्र्य तेभ्योऽनुज्ञां प्राप्य द्विराचमनादिदेशकालस्मरणांते मम जन्मनः सकाशात्षष्टितमवर्षप्राप्त्या भविष्यत्त्वेन सूचितानां अपमृत्युदुःस्वप्नदर्शनमातापितृमृतिभार्यापुत्रवियोगग्रहपीडाराजभयविविधरोगच्छायाविकृतिस्फुटनक्षत्रध्रुवाद्यदर्शनयक्षरक्षोभूतप्रेतपिशाचादिविविधदर्शनानां अन्येषां च महोत्पातानां रिष्टरूपाणां सद्यः परिहारपूर्वकं सर्वारिष्टविनाशदीर्घायुरारोग्यसर्वसंपद्भवनद्वारा श्रीप॰ सग्रहमखां शौनकोक्तां उग्ररथशांतिं करिष्ये इति संकल्प्य गणेशपूजादिनांदीश्राद्धांते आचार्यं ब्रह्माणमृत्विजश्च वृणुयात् । तत आचार्य आचमनादिप्रादेशकरणांते ग्रहस्थापनादिकलशप्रार्थनांतं कृत्वा तन्नैर्ऋत्यां स्थंडिलेऽग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वादध्यात् । ग्रहादिकीर्तनांते मार्कंडेयं प्रधानदेवं समिदाज्यचरुदूर्वापायसैः प्रतिद्रव्यं १००८ संख्याभिराहुतिभिः । अष्टोत्तरशतसंख्याभिर्वा । मृत्युंजयं दूर्वातिलैः प्रतिद्रव्यं५०००।२५००।१५००पंचशतसंख्याभिर्वा । यद्वा तिलमिश्रदूर्वाभिः १००००।५०००।३००० सहस्रसंख्याभिर्वा । अश्वत्थामानं १ बलिं २ व्यासं ३ हनुमंतं ४ बिभीषणं ५ कृपं ६ परशुरामं ७ चैतानुप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवान् लाजैः प्रत्येकं २८ अष्टसंख्याभिर्वा। शेषेणेत्यादिसमिदाधानांते ग्रहाणामुत्तरतः महीद्यौरित्यादिविधिना कलशं संस्थाप्य इमंमइति जलेनापूर्य गंधद्वारामिति गंधं। याओषधीरिति सर्वौषधीः। रुवतिभीमइति पंचत्वचः। गायत्र्यादिमंत्रैः पंचगव्यानि। आप्यायस्वेत्यादिभिः पंचरत्नानि च क्षिप्त्वा दूर्वानिक्षेपादिपूर्णपात्रनिधानांते उक्तलक्षणप्रतिमायां मार्कंडेयं नाममंत्रेणावाह्य वस्त्रयुग्मेनावेष्ट्य षोडशोपचारैः संपूज्येध्मावर्हिषोः संनहनाद्याज्यभागांतं कृत्वा यजमानेन त्यागे कृते ग्रहादिहोमोत्तरं मार्कंडेय महाभाग सप्तकल्पांतजीवन। आयुरारोग्यमैश्वर्यं देहि मे मुनिपुंगवस्वाहेतिमंत्रेण समिदाज्यचरुदूर्वापायसानि त्र्यंबकमितिमंत्रेण दूर्वातिलान् तिलमिश्रदूर्वा वा उक्तसंख्यया हुत्वा अश्वत्थाम्नेस्वाहा। बलये० व्यासाय० हनुमते० बिभीषणाय० कृपाय०परशुरामायस्वाहेतिमंत्रैः प्रत्येकं २८ अष्टसंख्याभिर्वा लाजान् जुहुयात्। ततः श्रीसूक्तं रुद्राध्यायं च जपित्वायुष्यमंत्रान् जपेत्। ते च। एषवांदेवावितिद्वयोर्वामदेवोऽश्विनौ गायत्री। परावतोयइतिसप्तदशर्चस्य सूक्तस्य गयो विश्वेदेवा जगत्यंत्ये त्रिष्टुभौ। जपे०। (आनोभद्राइति वाऽऽयुष्यसूक्तं) ततः पुरुषसूक्तं च जपित्वा वेदपारायणं कार्यं। तदसंभवेऽग्निमीळइतिसूक्तजपः। ततः स्विष्टकृदादिप्रायश्चित्तहोमांते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावहोमादिशेषं समाप्य स्थापितकलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानमभिषिंचेत्। तत्र मंत्राः। शंनइंद्राग्नीइतिपंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्। सहस्रशीर्षेति षोडशर्चस्य०। परंमृत्योइति चतुर्दशर्चस्य सूक्तस्य संकुसुको विश्वेदेवास्त्रिष्टुप्। एकादशी प्रस्तारपंक्तिस्त्रयोदशी जगती चतुर्दश्यनुष्टुप्। एषवांदेवावितिद्वयो०। परावतोयइति सप्तदशर्चस्य०। स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुच्छंदाः सोमः पवमानो गायत्री। यज्जाग्रतइति षण्णां प्रजापतिर्मनस्त्रिष्टुप्। अभिषेके०। ततो ग्रहमंत्रैः सुरास्त्वामित्यादिपौराणैस्तच्छंयोरित्येतेन चाभिषिक्तो यजमानो धृतशुक्लांबरगंधमाल्योऽभिषेकवस्त्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माचार्याय दत्वा विभूतिं धृत्वा आचार्येण आनोभद्राइत्यादिमहाशांतिमंत्र पपूर्वकं देवतोत्तरपूजने कृते मार्कंडेयादीन् प्रार्थयेत् । मार्कंडेय
महाभाग० ॥ द्रौणे मे त्वं महाभाग रुद्रतेजःसमुद्भव । आयुर्बलं यशो देहि अश्वत्थामन्नमोस्तु ते ॥ दैत्येंद्रकुलसंभूत यज्ञदानक्रियारत ।
बले त्वां शरणं यामि दीर्घमायुः प्रयच्छ मे ॥ वसिष्ठकुलसंभूत वेदशास्त्र विशारद । नारायणांशसंभूत वेदव्यास नमोस्तु ते ॥ अंजनागर्भ-
संभूत कपींद्रसचिवोत्तम । रामप्रिय नमस्तुभ्यं हनुमन्रक्ष मां सदा ॥ विभीषण नमस्तुभ्यं रामपादाब्जपूजक । आयुरारोग्यमैश्वर्यं देहि
पौलस्त्यनंदन ॥ द्विजेंद्र भरताचार्य सर्वविद्याविशारद । शरणं त्वां प्रपन्नोऽस्मि कृप मां रक्ष सर्वदा ॥ रैणुकेय महावीर्य कार्तवीर्यकृतांतक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोस्तु ते ॥ तत आचार्यादीन् संपूज्याचार्याय मार्कंडेयप्रतिमासहितं कलशं सालंकारां सवत्सां
गां च दत्वा ब्रह्मादिभ्यो गवादिदशदानानि शतगुंजापरिमितं सुवर्णं च विभज्य दद्यात् । एतावत्स्वर्णाशक्तौ सर्षपादिशतसम-
तोलितं । गवादीनां प्रत्यक्षदानासंभवे तन्मूल्यं देयं । ततः विसर्जित ग्रहपीठदानांते कांस्यपात्रे आज्यं विलोक्य सदक्षिणं तत्पात्रं
ब्राह्मणाय दत्वा तिलदानं च कृत्वा ब्राह्मणाशिषो गृहीत्वा नववस्त्रं धृत्वा पुरंध्रीभिर्नीराजितो देवानभिवाद्य सहस्रं शतं वा
विप्रान्संभोज्य भूयसीं दत्वा कर्म समाप्य सुहृद्युतो भुंजीत । इत्युग्ररथशांत्याख्यषष्टितमाब्दशांतिप्रयोगः ॥ ॥ अथ द्वादशाब्दोत्तरं
प्रवासादागतस्यावलोकनविधिः संगृह्यते । भविष्ये स्मृत्यंतरे च । दंपती पितृपुत्रौ च स्वसारौ भ्रातरौ तथा । पुत्रिकापितरौ चैव
भगिनीभ्रातरौ तथा ॥ पितृव्यो मातुलश्चैव दौहित्रो भागिनेयकः ॥ (पितृपुत्रौ पुत्रिकापितरावित्युभयत्र पितृपदेन मातुरप्युपलक्षणं ।
तौल्यात् । पितृव्यादिपदानां संबंधिशब्दत्वेन अर्थात्तैर्भ्रातृव्यादय द उपलक्ष्यंते । मातुलपदेनैव भागिनेयोपलक्षणे सिद्धे पुनस्तद्ग्रहणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृभगिन्युपलक्षणार्थं । तथा च दंपत्यादिद्वंद्वाष्टकं पितृव्यभ्रातृव्यौ मातुलभागिनेयौ दौहित्रमातामहौ दौहित्रमातामह्यौ भागिनेयमातृभगिन्यौ इत्येवं त्रयोदशद्वंद्वानां परस्परावलोकनं नेत्यर्थः) द्वादशाब्दे व्यतीते तु दूरदेशं गतो यदि ॥ एतेषामेकमेकोऽपि नान्योन्यमवलोकयेत् । इच्छंति केचिदाचार्या अन्योन्यमवलोकनं ॥ शिवालयेऽथवा तीर्थे स्नात्वा प्रज्वाल्य दीपकौ । शिवं संपूज्य विधिवदुभौ तौ देवमध्यतः ॥ धृत्वा कांस्यमयं पात्रं सजलं रत्नपूरितं । शांतिजैर्मंत्रघोषैश्च द्विजैः सह विलोकयेत् ॥ आननं चैकमेकस्य दृष्ट्वा सम्यक् शिवं नमेत् । ब्राह्मणेभ्यो यथाशक्ति दद्यात्पात्रं सदक्षिणं ॥ अन्येभ्यश्चाथ विप्रेभ्यो यथावित्तानुसारतः । दद्याच्च दक्षिणां भक्त्या पूजयेच्च शिवं पुनः ॥ नत्वा देवद्विजान्सूर्यमागच्छेत्स्वस्य मंदिरं । ततो व्याहृतिभिर्होमं शतमष्टोत्तरं तिलैः ॥ कृत्वाऽथ भोजयेद्विप्रान्यथावित्तानुसारतः । बांधवैः सह भुंजीत सर्वारिष्टप्रशांतये ॥ इत्थं यः कुरुते मर्त्यस्तस्यारिष्टं न विद्यते । आयुष्कामो नरश्चैवमकृत्वा नावलोकयेत् ॥ पूर्वावलोकितानां तु विधिरेष उदाहृतः । न चैवाऽदृष्टपूर्वाणामिति प्राहुर्मनीषिणः ॥ " शां० सा० पारिजाते । द्वादशाब्दे व्यतीते तु न कुर्याद्भ्रातृदर्शनं । पित्रोः पुत्रस्य नैवाहुर्महाहानिकरं भवेत् ॥ दर्शनं तु प्रकुर्वीत शिवं पूज्य शिवालये । कांस्यपात्रे विलोक्याज्यमंतःपटविधानतः ॥ मुखावलोकनं पश्चात्समालिंग्य विपर्ययात् । एवं कृते विधाने तु दोषशांतिर्भविष्यति ॥ सूर्यारुणसंवादे तु । गणेशमृत्युंजयविष्णुलक्ष्मीरघोरसंज्ञं ग्रहकं घटेषु । आवाह्य संपूज्य च धान्यराशौ होमं च कुर्यादिह देवमंत्रैः ॥ शिवपूजां प्रकुर्वीत प्रतिमापूजनं ततः । अघोरप्रतिमां दद्याद्ब्राह्मणाय सदक्षिणां ॥ अनेन सह गच्छ त्वं क्रीडस्व च सुखं चिरं । मां तथैवाधुना मुंच क्षमां कुरु ममोपरि ॥ शिवाग्रे तु समागत्य कृत्वा चैवांतरे पटं । उभाभ्यां नारिकेलं च भुक्त्वा भूयोऽभिगम्यतां ॥ निवर्तसूक्तं जप्त्वादावघोरं द्विजपुंगवं । अघोरप्रतिग्राहिणं ब्राह्मणमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसर्जयेत्पुनस्तं च नैव पश्येत्कदाचन ॥ कांस्यपात्रे घृतं कृत्वा दृष्ट्वा रूपं स्वकं स्वकं । तत्पात्रं ब्राह्मणे दद्याद्दक्षिणासंयुतं ततः । पादप्रक्षालनं कृत्वा आचम्य च यथाविधि ॥ शांतिमंत्रान्पठेत्पश्चात्पूजां गृह्य शिवं व्रजेत् ॥ धूपदीपैश्च नैवेद्यतांबूलैर्दक्षिणादिभिः ॥ वस्त्रैराभरणैर्दिव्यैस्तोषयेच्छंकरं ततः । शिवस्य प्रार्थनां कृत्वा जपेत्सूक्तं कनिक्रदत् ॥ प्रदक्षिणिदभिचेति पठेत्सूक्तं शिवोपरि । पुष्पांजलिं च युगपद्दत्वा निष्कास्य तं पटं ॥ पुनःपुनर्नमस्कृत्य पश्चात्तं च विलोकयेत् । प्रणामालिंगनं कुर्यात्स्वागतं क्षेम पृच्छति ॥ ततो द्विजवराः सर्वे सूक्तानि स्वस्तिमंति च । पठित्वा होमदेशं च गच्छेयुश्च मुदान्विताः ॥ प्रतिमापूजनं कृत्वा वह्नेश्चापि यथाक्रमं । दूर्वातिलाज्यचरुणा हुनेदष्टोत्तरं शतं ॥ होमशेषं समाप्यैवं ब्रह्माचार्यादिकान्यजेत् । अभिषेकं ततः कुर्युरुभयोर्मंगलं वदेत् ॥ स्वस्तिशब्दं तथा कुर्युर्गां च दद्यात्पयस्विनीं । देवान्वह्निं विसृज्याथ कुंभे लक्ष्मीं निधाय च ॥ आचार्यब्रह्मऋत्विग्भिर्वाद्यघोषपुरःसरं । स्वगृहं च शनैर्गच्छेत्सार्धं तेन प्रवासिना ॥ देवानां चैव तृप्त्यर्थं कर्तव्यं द्विजभोजनं । एवं कृते विधाने तु न स्याद्विघ्नः कदाचन । देवद्विजप्रसादेन कल्याणं स्यान्न संशयः ॥ आयुष्यं क्षेममारोग्यं पुत्रपौत्रप्रवर्धनं । सौभाग्यमतुलं चैव लभेदस्य प्रसादतः ॥ आरामे पुण्यतीर्थे वा देवागारेऽथ संगमे । कर्तव्यं च सरित्तीरे विधानं क्षेमदं भवेत् ॥" इति द्वादशाब्दोत्तरमवलोकनविधिः ॥ ॥ अथ प्रयोगः । उभौ स्नात्वा देशकालौ संकीर्त्य मम अमुकस्यावलोकने विदेशगमनेन द्वादशवत्सरात्ययसूचितसर्वारिष्टपरिहारद्वारा श्री० यथाविध्यवलोकनं करिष्ये इति संकल्प्य गणेशपूजांते शिवालये तीर्थे वा गत्वा दीपौ प्रज्वाल्य पटांतर्हितौ भूत्वा शिवस्योभयत उपविश्योभौ शिवं संपूज्य ब्राह्मणैः सह शांतिमंत्रपाठांते रत्नसहिते जलपूर्णे कांस्यपात्रेऽन्योन्यमवलोक्य शिवं नमेतां । ततो ब्राह्मणाभ्यां सदक्षिणे कांस्यपात्रे दत्वाऽन्येभ्यश्च यथाशक्ति दक्षिणां दत्वा पुनरुभौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवं द्विजान्सूर्यं ... नत्वा स्वगृहमागत्य पृथग्घोमं कुर्यातां । सचेत्थं । आचमनादिदेशकालस्मरणांते मया कृताऽमुकावलोकनविध्यंगभूतं होमं करिष्ये इति संकल्प्य स्थंडिले पावकसंज्ञमग्निं प्रतिष्ठाप्य ध्यात्वाऽन्वादध्यात् । चक्षुषीआज्येनेत्यंते अग्निं वायुं सूर्यं प्रजापतिं च तिलैः प्रत्येकं सप्तविंशतिसंख्याभिराहुतिभिः । शेषेणस्विष्टकृतमित्याद्याज्यभागहोमांते व्यस्तसमस्तव्याहृतिभिस्तिलान् हुत्वा स्विष्टकृद्धोमादिशेषं समाप्य शक्त्या विप्रान्संभोज्य कर्म समाप्य बांधवैः सह भुंजीत । इति द्वादशाब्दादूर्ध्वमवलोकनप्रयोगः ॥ ॥ अथ जीवतो मृतिवार्ताश्रवणे विधानं संगृह्यते । " वि० मा० गर्गसंहितायां । दुष्टस्थाने यदा पुंसो भवेत्क्रूरो नभश्चरः । प्रकोपो वा दैवतस्य तदा विघ्नोऽभिजायते ॥ मृत एवेति वार्ता स्यात्सर्वदेशे दुरत्यया । विधानं तत्र कर्तव्यं नरेण हितमिच्छता ॥ आहूय ब्राह्मणान्भक्त्या चतुर्वेदपरायणान् । स्नात्वा तैलेन शुद्धेन पूजयेत्कुलदेवतां ॥ पितॄन्संतर्प्य विधिवत्स्वस्ति वाच्या द्विजोत्तमाः । जुहुयाद्विधिवद्वह्नाविंद्रप्रीत्यै समाहितः ॥ स्वादिष्ठयेतिमंत्रेण जुहुयादयुतं सुधीः । पायसं सर्पिषा युक्तं प्रधानं द्रव्यमुत्तमं ॥ मूर्तिमिंद्रस्य हेम्नस्तु पीठे देवतरोः शुभे । पूजितां विधिवद्भक्त्या आचार्याय निवेदयेत् ॥ हुत्वा स्विष्टकृतं विद्वान् गां च दद्यात्पयस्विनीं । तैलं दद्याद्द्विजातिभ्यो विघ्ननाशाय भूरिशः ॥ ब्राह्मणान्भोजयेत्पश्चाच्छतं वा शक्त्यपेक्षया । आत्मनस्त्वायसीं मूर्तिं पलैस्तु दशभिः कृतां ॥ तैलाभ्यक्तां ततो दद्याद्ब्राह्मणाय सदक्षिणां । तत्र मंत्रौ । सहस्राक्ष महाबाहो सर्वविघ्नविनाशन । अनेन मूर्तिदानेन सुप्रीतो भव मे सदा ॥ अपमृत्युविनाशाय मूर्तिमेतां ददाम्यहं । तुष्टेन मृत्युनाऽनेन पातकं मे व्यपोहतु ॥ ततः पुण्यस्त्रियो वृद्धा विप्राश्च गुरवस्तथा । नीराजनं तु दुर्वार्ताहरणाय पुनःपुनः ॥ ततोऽभिषेचनं कुर्युर्दुर्वार्तापीडितस्य तु । वृद्धान्प्रणमतस्तस्य दद्युराशीर्वचो द्विजाः ॥ (शतंजीवेत्यादय आशीर्मंत्राः) ग्रहं तु पूजयेद्दुष्टं प्रणमेत्कुलदेवतां । एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृते विधाने च विघ्नः कोऽपि न जायते ॥ " यो जीवन्नेव स्वस्य मृतिवार्तां शृणुयात्स आहिताग्निश्चेदग्नये सुरभयेऽग्नये सुरभिमते वाऽष्टाकपालेनेष्टिं कुर्यात् । तत्र मम स्वमृतिवार्ताश्रवणसूचितसकलानिष्टनिरसनद्वारा श्रीपर० सौरभिमतेष्ट्या यक्ष्य इति संकल्पः । गृह्याग्निमांस्तु स्थालीपाकमुभयातिरिक्तस्तु लौकिकेऽग्नौ स्थालीपाकं कुर्यात् । यस्य तु मृतिवार्ताश्रवणेनौर्ध्वदेहिकमपि कृतं तस्य पुनरागमने संग्रहप्रकार उच्यते । संग्राह्यापेक्षया वयोधिकः पित्रादिर्देशकालौ स्मृत्वा अमुकगोत्रस्यामुकशर्मणः पैतृमेधिककरणोत्तरं पुनरागतस्य संग्रहासिद्धिद्वारा श्री० संग्रहविधिं करिष्य इति संकल्प्य तं घृतकुंडे मज्जयित्वा सुलग्ने उत्थाप्य पुनर्देशकालौ स्मृत्वा अमुकगोत्रस्यामुक० जातकर्मादिसंस्कारान्करिष्ये इति संकल्प्य गणेशपूजादिनांदीश्राद्धांते जातकर्मादिचौलांतान्संस्कारांस्तल्लोपप्रायश्चित्तं वा कृत्वा पुनरुपनयनं विधाय त्रिरात्रं व्रतचर्यां कारयित्वा बह्वृचश्चेन्मेधाजननमपि कुर्यात् । संस्कार्यस्तु वेदव्रतलोपप्रायश्चित्तं समावर्तनं च विधाय पूर्वा पत्नी चेत्तया सह विवाहहोमं गृहप्रवेशहोमं च कुर्यात् । अयं विधिरनाहिताग्नेः । आहिताग्नेस्तु श्रौताग्न्याधानाद्यधिकमस्ति । स्त्रीणां तु प्रथमस्थालीपाको ब्राह्मणद्वारा कार्यः । उपनयनादिसमावर्तनांतं नास्ति । सुवासिनी चेत्पूर्वपतिना सह विवाहहोमादीति विशेषः । शूद्राणामप्येवं । एवं कृते कर्माधिकारः । इति जीवतो मृतिवार्ताश्रवणविधानं ॥ ॥ अथ वंध्यात्वहरं रुद्रस्नानं । हेमाद्रौ भविष्ये । युधिष्ठिर उवाच । रुद्रस्नानं विधानेन कथयस्व जनार्दन । सर्वारिष्टोपशमनं सर्वशांतिप्रदं नृणां ॥ कृष्ण उवाच । देवसेनापतिं स्कंदं रुद्रपुत्रं षडाननं । अगस्त्यो मुनिशार्दूलः सुखासीनमुवाच ह ॥ सर्वज्ञोऽसि कुमारस्त्वं प्रसादाच्छंकरस्य वै । स्नानं रुद्रविधानेन स्त्रीणां ब्रूहि कथं भवेत् ॥ स्कंद उवाच । मृतवत्सा तु या नारी दुर्भगा ऋतुवर्जिता । या सूते कन्यका वंध्या स्नानमासां विधीयते ॥ अष्टम्यां च चतुर्दश्यामुपवासपरायणः । ऋतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धे चतुर्थेऽह्नि प्राप्ते सूर्यदिनेऽथ वा ॥ नद्योस्तु संगमे कुर्यान्महानद्योर्विशेषतः । शिवालयेऽथ वा गोष्ठे विविक्ते वा गृहांगणे ॥ आहिताग्निं द्विजं शांतं धर्मज्ञं सत्यवादिनं । स्नानार्थं प्रार्थयेदेनं निपुणं रुद्रकर्मणि ॥ ततस्तु मंडपं कुर्याच्चतुरस्रमुदक्प्लवं । (उत्तरे निम्नं) बद्धचंदनमालं च गोमयेनानुलेपितं ॥ तन्मध्ये श्वेतरजसा संपूर्णं पद्ममालिखेत् । तस्य मध्ये महादेवं स्थापयेत्कर्णिकोपरि ॥ दध्याद्दलेषु नंद्यादींश्चतुर्षु विधिपूर्वकं । इंद्रादिलोकपालांश्च दलेष्वष्टसु विन्यसेत् ॥ देवीं विनायकं चैव स्थापयेत्तत्र पार्थिव । दत्वाऽर्घ्यं गंधधूपं च पुष्पदीपं गुडौदनं ॥ भक्ष्यान्नानाविधान्दद्यात्फलानि विविधानि च । चतुःकोणेषु भृंगारमश्वत्थदलपूरितं ॥ (भृंगारं द्विमुखपात्रं । झारीलि भाषायां) एकैकं विन्यसेद्रक्षन् सर्वौषधिसमन्वितं । मंडपस्य चतुर्दिक्षु दद्याद्भूतबलिं तदा ॥ आग्नेय्यां दिशि कर्तव्यं मंडपस्य समीपतः । अग्निकार्यं शुभे कुंडे पत्रपुष्पैरलंकृते ॥ लवणं पयसा युक्तं घृतेन मधुना सह । मानस्तोकेन जुहुयात्कृते होमे नवग्रहे ॥ द्वितीयस्याग्निकार्यस्य कर्ता च ब्राह्मणो भवेत् । रुद्रजप्यकृदाचार्यः सितचंदनचर्चितं ॥ सितवस्त्रपरीधानं सितमाल्यविभूषितं । शोभयेत्कंकणै रुक्मकर्णवेष्टांगुलीयकैः ॥ पूर्वमंडलवत्कार्यं द्वितीयं मंडलं शुभं । तस्य मध्ये तु सा नारी श्वेतपुष्पैरलंकृता ॥ श्वेतवस्त्रपरीधाना श्वेतगंधानुलेपना । सुखासनोपविष्टा स्यादाचार्यो रुद्रजापकः ॥ अभिषिंचेत्ततश्चैनामर्कपत्रपुटांबुना । चतुःषष्टिऋचेनैव रुद्रेणैकादशेन तु ॥ शतानि सप्तपर्णानां चतुर्भिरधिकानि तु । पर्णानामिति ऋचां तासां चतुःषष्टिसंख्यानामेकादशकृत्वः पठितानामियं संख्या । अच्छिद्रेणेतिमंत्रेण स्नानार्थं विनिवेशयेत् ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् । वेश्यांगणाद्राजगृहाद्गोष्ठादानीय वै मृदं ॥ सर्वौषधी रोचनां च नदीतीर्थोदकानि च । एतत्संक्षिप्य कलशे कुशला काचिदंगना । रुद्राभिजप्तेन ततः स्नापयेत्कलशेन तां ॥ तोयपूर्णोदकलशैरश्वत्थदलपूरितैः । सर्वदिक्संस्थितैः पश्चात्स्नापयेत्कल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शास्तेतः ॥ एवं स्नाता स्नापकाय दद्याद्वां कांचनं तथा । होतुरेवात्र निर्दिष्टा दक्षिणा गौः पयस्विनी ॥ ब्राह्मणानामथान्येषां स्वशक्त्या मुनिपुंगव । स्त्रग्वस्त्रकांचनादीनि दत्वा सर्वान्क्षमापयेत् ॥ कृतेनानेन विप्रेंद्र रुद्रस्नानेन भामिनी । सुभगा कांतिसंयुक्ता बहुपुत्रा प्रजायते ॥ सर्वेष्वपि हि मासेषु ब्राह्मणानुमतेषु च । तस्मादवश्यं कर्तव्यं पुत्रं स्त्री सुखमृच्छति ॥ या स्नानमाचरति रुद्रमिति प्रसिद्धं श्रद्धान्विता द्विजवरानुमते नतांगी । दोषान्निहंति सकलान्स्वशरीरभाजो भर्तुः प्रिया भवति भारत जीववत्सा ॥ ॥ अथ हेमाद्रावन्यथा स्नानं । पार्वत्युवाच । प्रेतप्रजाऽप्रजा वापि स्त्रीप्रजा वापि जायते । ग्रहरोगान्विता वापि त्यक्ता त्यजति वा यदि ॥ वद देव कथं तस्याः सर्वमेतद्विनश्यति । जायते च तथाऽभीष्टमतः पृच्छामि शंकर ॥ ईश्वर उवाच । शृणु येन प्रणश्यंति दोषाः स्त्रीणां त्वयोदिताः । जायते च तथाऽभीष्टं यथावत्कथयामि ते ॥ गोमूत्रगोमयाभ्यां च भूशुद्धिं परिकल्पयेत् । आवृते वितते देशे यत्र नान्यः प्रपश्यति ॥ कुंभान्समानयेत्तद्वद्दशैकं च तथा द्विजान् । आहूय प्रार्थयेत्सर्वानर्चयेत्प्रियकृच्छ्रिया ॥ प्रक्षाल्य स्थापयेत्कुंभान्पूरयेत्तीर्थवारिणा । कृत्वात्मरक्षां विधिवत्स्वास्तिकं च तथासनं ॥ यजेन्मां सर्वकामेशं प्राणानायम्य वाग्यतः । संकल्प्यावाह्य कुंभेषु मामेवाऽऽत्वाहंत्विति ॥ आसादितं समस्तं तु तत्रैव परिकल्पयेत् । कुंभस्य बाह्यदेशे तु लोकपालान्प्रपूजयेत् ॥ बौधायनोक्तविधिना गंगामीशानसंनिधौ । त्वरितश्च ततो नत्वा इंद्रादीन्मूलमंत्रतः ॥ प्रणवश्चादितः कार्यो नमश्चांते तथैव च । देवतापदमध्यस्तु मूलमंत्रः प्रकीर्तितः ॥ रुद्रैकादशिनीमेकां स्पृष्ट्वा कुंभोदकं जपेत् । पुनः संपूज्य विधिवन्मामिंद्रादींस्तथैव च ॥ एवं सर्वेषु कुंभेषु सर्वैः कार्यं द्विजोत्तमैः । ततः कुंभान्समादाय क्रमान्मूर्ध्नि विसर्जयेत् ॥ एतदेकादशगुणं कर्तव्यं द्विजसत्तमैः । एकादशेऽह्नि विधिवत्कर्तव्यं द्विजतर्पणं ॥ दत्वा च दक्षिणां तेभ्यो नमस्कृत्य विसर्जयेत् । एवं दोषाः प्रणश्यंति जायते तु यथेप्सितं ॥ पुरुषस्यापि कर्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहरोगान्वितस्य च । पुत्र्यायुर्बलकामस्य क्षत्रियस्य जयार्थिनः । प्रतिसंवत्सरं यस्तु चैत्रशुक्ले शुभे दिने ॥ करोति श्रद्धया युक्तस्त्वनेकाघापनुत्तये ॥ इति रुद्रस्नानं ॥ ॥ अथास्मत्पितृकृतो रुद्रस्नानप्रयोगः । उदगयनादौ गुरुशुक्रास्तादिरहिते शुद्धे मासि शुक्लपक्षे ऋतौ च विशेषेण चतुर्थेह्नि अष्टम्यां चतुर्दश्यां वा रविवासरे वा शुभनक्षत्रे चंद्रताराद्यानुकूल्ये तत्कर्तव्यं । इदं च चतुर्विधवंध्यात्वे विशेषतो मृतापत्यत्वे भवति । एतन्महाद्योर्नद्योर्वाऽशोष्यसंगमे संगममात्रे वा कार्यं । इदं चोदगयनासंभवे सर्वमासेषु दक्षिणायने च कार्यं । सर्वेष्वपि हि मासेषु ब्राह्मणानुमतेषु च । तस्मादवश्यं कर्तव्यं पुत्रं स्त्री सुखमृच्छतीति हेमाद्रौ भविष्योत्तरोक्तेः । तत्र पूर्वं कर्ता सभार्यः दीर्घायुःसुपुत्राद्युत्पत्तिप्रतिबंधकदुरितनिरासार्थं यथाशक्ति प्रायश्चित्तमनुतापयुक्तः कुर्यात् । तच्च फलतारतम्यावगतदुरिततारतम्येन षडब्दत्र्यब्दसार्धाब्दरूपं चांद्रायणकृच्छ्रातिकृच्छ्ररूपं वा द्रव्यजप्यहोमतीर्थब्राह्मणभोजनादिप्रत्याम्नायैः कार्यं सभ्योपदिष्टं । ततः श्रीरुद्रप्रीत्यर्थं कृष्णामेकां धेनुं शक्त्योपस्करयुतां दद्यात् । तदशक्तौ लक्षतदर्धतदर्धमितमयुतं वा गायत्रीजपं तद्दशांशेन तिलहोमं च कुर्यात् । एवं कृते रुद्रस्नानेऽधिकारी भवति । ततः प्रागुक्ते काले देशे च कर्ता सभार्यः कृतस्नानः शुद्धः शुद्धे वाससी परिधाय आसनोपविष्ट आचांतो भूमिशुद्धिपूर्वकं प्राणानायम्य देशकालौ स्मृत्वा मम सभार्यस्य दीर्घायुःसुपुत्रादिसंततिप्रतिबंधकेन इहजन्मन्यन्यजन्मनि वा कृतेनाऽष्टकापर्वादिपैतृकनैमित्तिकाकरणेन वा परद्वेषेण वा गुरुद्वेषेण वा मृगशावभक्षणेन वा बालघातेन वा रत्नापहरणेन वा वत्सवियोजनेन वा पितृमातृद्वेषेण वाऽन्येन वा कर्मणोत्पन्नचतुर्विधवंध्यात्वान्यतरवंध्यात्वदोषनिरासेन तथा स्त्रियाः कुक्षिदोषज्ञाताज्ञातान्यदुष्टस्त्रीचैलांचलस्पर्शदोषतदेकासनाशनशयनादिजनितदोषादिसर्वसंततिप्रतिबंधकनिरासेन च दीर्घायुःसुपुत्रादिसंतत्यवाप्तिद्वारा उमास-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितश्रीरुद्रप्रीत्यर्थं बौधायनोक्तविधिना रुद्रकलशस्नानाख्यं कर्म करिष्य इति संकल्प्य गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च संकल्पपूर्वकं कुर्यात् । एतानि कृत्वा प्रधानसंकल्पः । तत आचार्यब्रह्मर्त्विग्वरणं करिष्य इति संकल्प्य वरणं कर्तुं ब्राह्मणान्प्रार्थयेत् । ब्राह्मणाः संतु मे शांताः पापात्पांतु समाहिताः । वेदानां चैव दातारस्त्रातारः सर्वदेहिनां ॥ जपैर्यज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः । देवानां च पितॄणां च तृप्त्यर्थं याजकाः स्मृताः ॥ येषां देहस्थिता वेदाः पावयंति जगत्त्रयं । ते मां रक्षंतु सततं जपयज्ञैर्व्यवस्थिताः ॥ आहिताग्निं द्विजं शांतं धर्मज्ञं सत्यवादिनं । स्नानार्थं प्रार्थयेदेनं निपुणं रुद्रकर्मणि ॥ इति लक्षणयुतमाचार्यं ब्रह्माणमृत्विजश्चैकादश वृणुयात् । ततः सर्वान्मधुपर्कवस्त्रालंकारादिभिः पूजयेद्यथाशक्ति । तत आचार्यादिसहितो मंडपं प्रविशेत् । ततः सऋत्विगाचार्यः संकल्पपूर्वकं सलक्षणे कूटे वा मंडपे वा ऐशान्यां सर्वतोभद्रं लिंगतोभद्रमष्टदलं वा प्रत्येकं कृत्वा तत्समीपे परितः सप्तधान्यानि मंगलार्थं निधाय रक्षोहणमित्याद्यैः यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभे । इति च सर्षपान्विकीर्य पंचगव्येन शुचीवोहव्येति तृचेनाभ्युक्ष्य मंडपपूजां विधाय चित्रासने कंबलासने वोपविश्य भूतशुद्ध्यादिकमात्मरक्षां च कृत्वा श्रीरुद्रं ध्यात्वा आराधितो मनुष्यैस्त्वꣳ सिद्धैर्देवासुरादिभिः । आराधयामि भक्त्या त्वां मां गृहाण महेश्वरेति प्रार्थयेत् । ततः प्रत्येकमिंद्रादिदिक्पालान्प्रणवादिनमोंततत्तन्नाममंत्रैर्नत्वा महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयःसमिति यवान् क्षिप्त्वा आकलशेष्विति क्षालितान्कलशान् यवेषु निधाय इमंमेगंगइति तीर्थजलेनापूर्य तत्र गंधद्वारामिति गंधं । ओषधयःसमिति यवान् । याओषधीरिति सर्वौषधीः । कांडात्कांडादिति दूर्वाः । याःफलिनीरिति फलं । स्योनापृथिवीति सप्तमृदः । अश्वत्थे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वइति पंचपल्लवान् । सहिरत्नानीति पंचरत्नानि । हिरण्यरूपइति हिरण्यं च क्षिप्त्वा युवंवस्त्राणीति वस्त्रेण रक्तसूत्रेण च वेष्टयित्वा पूर्णा-
दर्वीति वंशमयानि पूर्णपात्राणि निधाय कलशस्यमुखेविष्णुरित्यादिना कलशेषु देवतीर्थान्यावाह्य देवदानवसंवादेइत्यादिना कलशं संप्रार्थ्य
त्र्यंबकमिति श्रीरुद्रमावाहयेत् । ततः समुद्रादूर्मिरिति समुद्रं कलशजले भावयित्वा कलशस्य मूले ब्रह्मजज्ञानमिति ब्रह्माणं । मध्ये इदं-
विष्णुरिति विष्णुं । कंठे नमःशंभवेइति रुद्रं । मुखे इंद्राग्नीआगतमितींद्राग्नी यमेनदत्तमिति यमं च । सर्वत इषेत्वेति देवान् । आदित्प्रत्नस्येति
सूर्यं । विश्वतश्चक्षुरिति परमेष्ठिनं च । पार्श्वयोर्नमोस्तुसर्पेभ्यइति सर्पान् । पूर्वे अग्निमीळइति ऋग्वेदं । दक्षिणत इषेत्वेति यजुर्वेदं । पश्चिमे
अग्नआयाहिवीतयइति सामवेदं । उत्तरे शंनोदेवीरित्यथर्ववेदं । मध्ये तत्सवितुरिति गायत्रीं न्यसेत् । पूर्वाद्यष्टदिक्षु तत्तन्मंत्रैर्नामभिर्वा इंद्रादी-
नष्टौ न्यस्य कांडात्कांडादिति दूर्वाः शिरसि निक्षिपेत् । ततो वंशपात्रेष्वष्टदलयुतानि वस्त्राणि संस्थाप्य तत्र निष्कतदर्धतदर्धसुवर्णनिर्मिता
अशक्तौ कृष्णलावष्ठाऽवरसुवर्णनिर्मिताः श्रीरुद्रप्रतिमा अग्न्युत्तारणपंचामृताभिषेकपूर्वकं संस्थाप्य तास्वात्वावहंतुहरयइत्युमासहितं श्रीरुद्र-
मावाह्य सद्योजातंप्रपद्यामीत्यासनं । सद्योजातायवैनमोनमइति पाद्यं । भवेभवेनातिभवेभवस्वमामित्यर्घ्यं । भवोद्भवायनम इत्याचमनीयं ।
वामदेवायनमइत्यापोहिष्ठेत्याद्यैश्च स्नानं दत्वाचमनं च दत्वाऽष्टभिस्तर्पयेत् । भवं देवं तर्पयामि । शर्वं देवं० रुद्रं देवं० पशुपतिं देवं० उग्रं
देवं० ईशानं देवं० भीमं देवं० महांतं देवं० । ततो ज्येष्ठायनमइति वस्त्रं । तूष्णीमाचमनं । श्रेष्ठायनम इत्युपवीतं । तूष्णीमाचमनं । रुद्रायनम
इत्यलंकारं । कालायनमइति गंधं । कलविकरणायनमइति पुष्पं । बलविकरणायनमइति धूपं । बलायनमइति दीपं । बलप्रमथनायनम-
इति नैवेद्यं । तूष्णीमाचमनं । सर्वभूतदमनायनमइति तांबूलं । मनोन्मनायनमइति दक्षिणां दद्यात् । केचित्तु सद्योजातमिति प्रतिष्ठाप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सद्योजातायेत्यासनं। भवेभवेइति पाद्यं । भवोद्भवायेति स्नानं। तर्पणमष्टभिः। ज्येष्ठायेत्याचमनं। श्रेष्ठायेति मधुपर्कं। रुद्रायेति वस्त्रं । कालायेति गंधं । कलविकरणायेति पुष्पं । सर्वभूतदमनायेति धूपं । मनोन्मनायेति दीपं । भवोद्भवायेति नैवेद्यं । त्र्यंबकमिति वस्त्रादीनि दद्यादित्याहुः। अथाष्टौ पुष्पांजलीन्दद्यात् । भवाय देवाय नमः । शर्वाय देवाय॰ रुद्राय॰ पशुपतये॰ उग्राय॰ ईशानाय॰ भीमाय॰ महते देवाय नम इति । अथास्याघोरतनूरघोरेभ्य इत्युपतिष्ठेत । ततो नमस्कारः । विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव । शरणं भव भूतेश करुणाकर शंकर ॥ हर शंभो महादेव विश्वेशामरवल्लभ । शिव शंकर सर्वात्मन्नीलकंठ नमोऽस्तु ते ॥ मृत्युंजयाय रुद्राय नीलकंठाय शंभवे । अमृतेशाय शर्वाय महादेवाय ते नम इति । ततः प्रार्थना । राजसेन स्वयं ब्रह्मा सात्विकेन स्वयं हरिः । तामसेन स्वयं रुद्रस्त्रितयं त्वयि संस्थितं ॥ नमामि त्वां विरूपाक्ष नीलग्रीव नमोऽस्तु ते । त्रिनेत्राय नमस्तुभ्यमुमादेहार्धधारिणे ॥ त्रिशूलधारिणे तुभ्यं भूतानां पतये नमः । पिनाकिने नमस्तुभ्यं मीढुष्टमाय ते नमः ॥ नमामि त्वां महादेव पतये त्वां नमाम्यहं । भोक्ता भोज्यस्त्वमेवेश भक्तानां शर्मदः स्वयं ॥ सूर्यरूपं समासाद्य देहिनां देहधारकः । मुनीनां मुक्तिदाता च भक्तानां मुक्तिदः स्वयं ॥ यदृच्छया सर्वमिदं त्वामध्येति च याति च । नान्यस्य विजयं दातुं शक्तिरस्ति त्वया विनेति । ततः आराधितो मनुष्यैस्त्वं२ सिद्धैर्देवासुरादिभिः । आराधयामि भक्त्या त्वां मां गृहाण महेश्वरेत्यात्मानं निवेदयेत् । ततः पूर्वाद्यष्टकमलदलेष्विंद्राद्यष्टदिक्पालान्संपूज्याऽन्नादिबलिमुपहृत्य प्रार्थयेत् । इंद्राद्याश्च सुराः सर्वे लोकपालास्तथैव च । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ ते सर्वे पूजिताः शांतिं प्रयच्छंतु सुखानि च । बलिदानादिना तुष्टाः प्रयच्छंतु यथेप्सितमिति । ततः सर्वे प्राणानायम्य देशकालौ स्मृत्वा यजमानस्यायुष्मत्सुपुत्रादिसंतत्यवाप्त्यर्थं रुद्रैकादशिनीजपं संकल्प्य साधारण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यासांते विशेषन्यासं कुर्युः । सद्योजातमित्यादिपंचभिः प्रणवव्याहृतिपूर्वकैर्व्याहृतिप्रणवांतैर्व्यस्तैरंते समस्तैर्हृदयशिरःशिखाकवचनेत्रास्त्राणि स्वस्मिन्विन्यस्यैवमेव कलशेषु न्यसेदिति । ततो राजसेनस्वयंब्रह्मेति स्तुतिपूर्वकं स्वस्वकलशान् स्पृष्ट्वा यजमानस्य शुभं ध्यायंतः प्रत्येकं रुद्रैकादशिनीजपं कृत्वा राजसेनस्वयंब्रह्मेति स्तुत्वा क्षमापयेयुः । हीनो विभक्तिवर्णैश्च व्यंजनैश्च स्वरैस्तथा । जपो मे क्षम्यतां देव प्रसादं कुरु किंकरे ॥ महारुद्रजपो होमो न्यूनश्चैवाधिकश्च यः । सर्वः संपूर्णतां यातु त्वत्प्रसादात्सदाशिव ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वरेति । तत आचार्यः कुंडे स्थंडिले वा स्वशाखोक्तविधिनाऽग्निं प्रतिष्ठाप्य तूष्णीं निर्वापादिना चरुं पक्त्वाज्यभागांतं कृत्वा समित्तिलचर्वाज्यैः प्रतिद्रव्यं जपदशांशेन ऋत्विग्भिः सह होमं कुर्यात् । अत्र सर्वेषां द्वादशैकादशिनीजपरूपाणि शतं द्वात्रिंशच्च । तद्दशांशस्त्रयोदशरूपाणि । तदाहुतयोऽष्टाचत्वारिंशत्पक्षे षट्शतानि चतुर्विंशतिश्च । शिष्टरूपद्वये दशांशाहुतयो दश । चमकाहुतयश्चतुर्दश । सर्वा ह्यन्यूनसार्धषट्शतानि ६४८।एतावान्प्रतिद्रव्यं होमः । अशक्तौ षोडशधादिपक्षेण । शक्तौ तु प्रतिमंत्रपक्षेण होमः कार्यः । तत एकादशशतसंख्यैरर्कपत्रैर्मूलमंत्रेण होमः कार्यः। सर्वोऽपि वा होमो मूलमंत्रेणैव कार्यः । मूलमंत्रस्य परमेष्ठिऋषिः । रुद्रो देवता। पंक्तिश्छंदः । होमादौ विनियोगः । अस्य न्यासः । परमेष्ठिने ऋषयेनमइति शिरसि। पंक्त्यै छंदसेनमइति मुखे। रुद्राय देवतायैनम इति हृदये । नमइति शिखायां । शंभवइति शिरसि । चेति ललाटे । मयइति नेत्रयोः । भवइति श्रोत्रयोः । चेति नासिकायां । नमइति मुखे । शंकरायेति ग्रीवायां । चेति हृदये । मयइति जठरे । करायेति नाभौ । चेति श्रोण्योः । नमइति कट्यां । शिवायेत्यूर्वोः । चेति गुह्ये । शिवतरायेति जानुनोः । चेति पादयोः । नमःशंभवेचेति हृदयायनमः । मयोभवेचेति शिरसेस्वाहा । नमःशंकरायचेति शिखायैवषट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयस्करायचेति कवचायहुं । नमःशिवायचेति नेत्रत्रयायवौषट् । शिवतरायचेत्यस्त्रायफट् । एवं होमं कृत्वा स्विष्टकृदादिपूर्णाहुतिप्राक्तनं होमशेषं समाप्याचार्यादयो गंधाद्युपचारैः रुद्रस्योत्तरपूजां कृत्वाऽभिषेकार्थं रुद्रं प्रसाद्याग्नेरुत्तरतश्चतुरस्रं स्वस्तिकोपेतं मंडलं कृत्वा तत्रोदुंबरकाष्ठपीठद्वये परिहिताऽहतश्वेतवस्त्रौ दंपती प्राङ्मुखावुपवेश्य स्वयमुदङ्मुखाश्चतुरधिकसप्तशतार्कपत्रै रुद्रैकादशिन्या मूलमंत्रेण वाऽभिषिंचेयुः । अत्र माध्यंदिनशाखायां रुद्राध्यायगतानां चतुःषष्टिमंत्राणामेकादशिन्यां चतुरधिकसप्तशतसंख्या भवति । तेनैकैकेन मंत्रेणैकैकेनार्कपत्रेणाभिषिच्य पत्राणि त्यजेत् । अन्येषां तु शाखिनां मूलमंत्रेणैव तावद्वारावृत्तेन तथैवाभिषेक इति बौधायनसंप्रदायः । ततः पल्लवैराशुःशिशानइति सूक्तेनाप्यायस्वेति सोमसूक्तेन यदंतियच्चेत्यादिपावमानीभिरापोहिष्ठेत्यादिभिः समुद्रज्येष्ठाइत्यादिभिः सहस्राक्षेणेतितृचेन सुरास्त्वामित्यादिपौराणैश्चाभिषिच्य शिवंशिवमिति वदेयुः । इह वाचार्योऽन्यान्यर्कपत्राणि गृह्णीयादित्येके। ऋत्विज एवार्कपत्रैरेकादशिन्याचार्यस्तु पंचपल्लवैः सूक्तैरभिषिंचेदित्यन्ये। ततः सर्वौषधीभिः सप्तमृद्भिर्नद्या उभयकूलमृदा च सर्वांगेऽनुलिप्तौ दंपती विशेषतः कुक्षिदेशेऽनुलिप्तां स्त्रियं शिष्टेनोद्धृतेन सर्वकलशोदकेन क्षालितांगौ शुद्धोदकेन स्नापयेयुः। ततस्तौ शरीरस्थाश्च ये दोषा ये दोषा गर्भबीजयोः । ते सर्वे नाशमायांतु कर्मणाऽनेन भो द्विजाइति मंत्रमुच्चार्याभिषेकवाससी त्यक्त्वा शुद्धे वाससी परिधाय शुक्लचंदनमालायलंकृतौ भवेतां । तत आचार्यो यजमानान्वारब्धः समुद्रादूर्मिरित्यादिमंत्रैः पूर्णाहुतिं हुत्वा वसोर्धारां जुहुयात् । तत्र श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवं । महावैश्वानरं साम ज्येष्ठसाम च पाठयेत् ॥ ततो यजमानः सपत्नीकः कृतत्र्यायुषकरणः पूजापूर्वकमाचार्याय पयस्विनीं धेनुं सुवर्णं च यथाशक्ति दक्षिणां दत्वा ब्रह्मणे वृषभमृत्विग्भ्यो यथाशक्ति दत्वा क्षमाप्य श्रीरुद्राद्यावाहितदेवता विसृज्य श्रीरुद्रप्रीत्यर्थं शतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्धं तदर्धं वा ब्राह्मणान्भोजयित्वा तैः संपूर्णतां वाचयित्वा जीवत्पतिपुत्रादिभिर्वर्धापनादिकृतमंगलो ब्राह्मणाशिषो गृह्णीयात् । अनेन विधिना कार्यो रुद्रः कलशसंज्ञकः । भुंक्ते स सकलान्भोगान् प्रसादाच्छंकरस्य चेत्याह भगवान्बौधायनः । भट्टरामेश्वरसुतो भट्टनारायणात्मजः । रामकृष्णस्त्विमां चक्रे श्रीरुद्रस्नानपद्धतिं ॥ इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टकृतो रुद्रस्नानप्रयोगः ॥ ॥ अथ शतचंडी सहस्रचंडी च । वाराहीतंत्रे । चंडीपाठे फलं देवि शृणुष्व गदतो मम । संकल्पपूर्वं संपूज्य न्यस्यांगेषु मनून् क्रमात् ॥ पठनाद्बलिदानाच्च सिद्धिमाप्नोति साधकः । उपसर्गोपशांत्यर्थं त्रिरावृत्तिं पठेन्नरः ॥ ग्रहोपशांत्यै कर्तव्या पंचावृत्तिर्वरानने । महाभये समुत्पन्ने सप्तावृत्तिं समुन्नयेत् ॥ नवावृत्त्याद्भवेच्छांतिर्वाजपेयफलं लभेत् । राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ॥ अर्कावृत्ते काम्यसिद्धिर्वैरिहानिश्च जायते । मन्वावृत्त्याद्रिपुनाशस्तथा स्त्री वश्यतामियात् ॥ सौख्यं पंचदशावृत्तौ श्रियमाप्नोति मानवः । कलावृत्तौ पुत्रपौत्रधनधान्यागमं विदुः ॥ राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च । कुर्यात्सप्तदशावृत्तं तथाऽष्टादशकं प्रिये ॥ महाव्रणविमोक्षाय विंशावृत्तं पठेत्सुधीः । पंचविंशावर्तनात्तु भवेद्बंधविमोक्षणं ॥ संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा । जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते ॥ वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये । तथैव त्रिविधोत्पाते तथा चैवातिपातके ॥ कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभं । श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथा परा ॥ मनसा चिंतितं देवि सिध्येदष्टोत्तराच्छतात् । सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥ भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात् । चंड्याः शतावृत्तिपाठात्सर्वाः सिध्यंति सिद्धयः ॥ शतसाहस्रिकावृत्त्या दिक्चक्राधिपतिर्भवेत् । ॐ नारायणाय नमः । नराय० नरोत्तमाय० देव्यै० सरस्वत्यै० व्यासाय० इति नत्वा पठेत् । विधिवाक्यपाठस्त्वमूलो भ्रांतानां । अध्यायं प्राप्य विरमेन्नतु मध्ये कदाचन । कृते विरामे मध्ये तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायादि पठेन्नरः ॥ तथा । देव्यर्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः । ग्रंथिं वा शिथिलं कुर्याद्वाचकः कुरुनंदन ॥ (देव्या अर्चां प्रतिमां) इति शतचंडी सहस्रचंडी च ॥ ॥ अथ मंडपादि । नत्वा गणेश्वरं देवीं पितरौ राघवं शिवं । रामकृष्णतनूजेन कमलाकरशर्मणा ॥ डामरं यामलं चैव योगिनीतंत्रमेव च । वाराहीतंत्रमन्यांश्च ग्रंथानालोक्य यत्नतः ॥ सहस्रचंडिकायाश्च शतचंड्यास्तथैव च । नवार्णन्यासविधिना प्रयोगः प्रोच्यतेऽधुना ॥ तत्र यजमानः शुभे देशे मंडपं चिकीर्षुर्गणेशकूर्मशेषवसुधानां पूजनं कृत्वा शतचंड्यां षोडशहस्तं सहस्रचंड्यां विंशतिहस्तं मंडपं प्रसाध्य तदाग्नेयस्तंभावटे मध्ये वा पूर्वोक्तदेवानां पूजां, कृत्वा ताम्रपात्रेऽर्घ्यमादाय जानुभ्यामवनिं गत्वा आगच्छ सर्वकल्याणि वसुधे लोकधारिणि । उद्धृतासि वराहेण सशैलवनकानना ॥ मंडपं कारयाम्यद्य त्वदूर्ध्वे शुभलक्षणं । गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भवेति भूम्यै अर्घ्यं दत्वा मंडपं विधाय तन्मध्ये ऐशान्यां हस्तमात्रां द्व्यंगुलवप्रां ग्रहवेदीं कृत्वा पश्चिमे शतचंड्यां द्विहस्तं सहस्रचंड्यां चतुर्हस्तं षड्ढस्तं वा चतुरस्रं पद्मकुंडं वा कुर्यात् । तत्राष्टाचत्वारिंशदंगुलानि चतुर्हस्ते करणी । अष्टपंचाशदंगुलानि सप्तयवा यूकाद्वयं च षड्ढस्ते करणी । एवं कुंडं कृत्वा मंडपमध्येऽष्टकोणां वेदीं कुर्यात् । तद्यथा । मध्यस्तंभचतुष्कमध्यसमं चतुरस्रं कृत्वा षोडशहस्तमंडपेऽष्टादशांगुलै-र्विंशतिहस्ते चतुर्विंशत्यंगुलाधिकहस्तेन कोणेषूभयतोऽकयित्वाऽष्टसूत्रदानादष्टास्रमिति राघवभट्टोक्तप्रकारः । अथवा षोडशांगुलाधिकहस्त-मात्रं मध्ये चतुरस्रं कृत्वा तत्संलग्नानि चतुर्दिक्षु तन्मानानि चत्वारि चतुरस्राणि कृत्वा बाह्यचतुरस्राणां कोणेष्वक्ष्णया सूत्राणि दत्वा दिक्षु चतुरश्चतुर्थांशांस्त्यजेदित्यष्टास्रं । एवमष्टकोणां हस्तोच्चां वेदिं कृत्वा तदुपरि वारुणं मंडलं सर्वतोभद्रं वा कृत्वोपरि वितानं किंकिणीचामरा-दियुतं [illegible]तचंड्यां पलेन तदर्धेन तदर्धेन तदर्धेन वा सहस्र[illegible]ड्यां तु पलपंचकेन तदर्धेन तदर्धेन वा देवीमूर्तिमष्टादशभुजां कुर्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

: प्रयोगः । शुभेऽह्नि कर्ता सपत्नीकस्तिलतैलेन [illegible]ाभ्यंगो भूषितसंपूर्णकलशहस्तो भद्रंकर्णेभिरिति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्य देशकालौ स्मृत्वा ममेहजन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यनवाच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं ममामुककार्यसिद्ध्यर्थं वा सनवग्रहमखां शतचंडीं सहस्रचंडीं वा स्वयं ब्राह्मणद्वारा वा करिष्ये । तदंगतया गणेशपूजनं पुण्याहवाचनं मातृकापूजां नांदीश्राद्धं च कृत्वाचार्यं वृत्वा प्रार्थयेत् । आचार्यस्तुयथास्वर्गे शक्रादीनांबृहस्पतिः । तथात्वंममयज्ञेऽस्मिन्नाचार्योभवसुव्रतेति । ततो ब्रह्माणं वृत्वा यथाचतुर्मुखोब्रह्मा स्वर्गेलोकेपितामहः । तथात्वंममयज्ञेऽस्मिन् ब्रह्माणंत्वामहंवृणेइति प्रार्थयेत् ।ततः सदस्यं गणेशजपार्थं वृत्वाऽस्मिन्कर्मणि ऋत्विक्त्वेन त्वामहं वृणे इति शतचंड्यां नवऋत्विजो वृणुयात् । सहस्रचंड्यां शतं । ततोऽष्टौ द्वारपालान्वृत्वा संभवे सर्वेषां मधुपर्कपूजां कृत्वांऽगुलीयकर्णभूषणवस्त्रद्वयजलपात्रासनार्घ्यपात्राणि दद्यात् । द्विगुणमाचार्याय । अथाचार्यो यदत्रसंस्थितंभूतमिति सर्षपान्विकीर्य पंचगव्येन कुशैः शुचीवोहव्येति तृचेन मंडपं प्रोक्ष्य स्वस्त्ययनंतार्क्ष्यमिति मंत्रद्वयं पठेत् । ततो मत्कृततुलापद्धातिमार्गेण मंडपपूजां प्रागग्निस्थापनात्कुर्यात् । ततः पूर्वे कादंबरि गजारूढे वज्रहस्ते एह्येहि आगच्छागच्छ गंधपुष्पसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहेति बलिं दत्व। द्वारशाखयोर्ब्राह्मयै माहेश्वर्यै चिच्छक्त्यै मायाशक्त्यै धात्रे विधात्रे शंखनिधये पद्मनिधये द्वारश्रियैनम इति संपूज्याधस्ताद्वास्तुपुरुषमसितांगभैरवं च पूजयेत् । तत आग्नेये । उल्के अजारूढे शक्तिहस्ते एह्येहीत्यादि । रुरुभैरवश्च । ततो दक्षिणे । करालिमहिषारूढे दंडहस्ते एह्येहीत्यादि । द्वारशाखयोः कौमारीं वैष्णवीं पूर्ववच्चिच्छक्त्यादींश्च संपूज्य चंडभैरवं पूजयेत् । ततो नैर्ऋत्यां । रक्ताक्षि प्रेतारूढे खड्गहस्ते एह्येहीत्यादि । क्रोधभैरवश्च । ततः पश्चिमे । कौबेरि अश्वारूढे पाशहस्ते एह्येही-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

…न्ते। ने-

त्यादि। द्वारशाखयोर्वाराहीमिंद्राणीं चिच्छक्त्यादींश्च संपूज्योन्मत्तभैरवं पूजयेत्। ततो वायव्ये। मृगवाहनेंऽकुशहस्ते एह्येहीत्यादि। कपालभैरवश्च। तत उत्तरे।यक्षिणि सिंहवाहिनि गदाहस्ते एह्येहीत्यादि। द्वारशाखयोश्चामुंडां महालक्ष्मीं चिच्छक्त्यादींश्च संपूज्य भीषणभैरवं पूजयेत्।तत ऐशान्या। कालि वृषभारूढे शूलहस्ते एह्येहीत्यादि। संहारभैरवश्च। ऐशानपूर्वमध्ये सर्वराज्ये अहिवाहने चक्रहस्ते एह्येहीत्यादि। भूमिपूजा च। पश्चिमनैर्ऋतीमध्ये।सुरश्रेष्ठे हयवाहनेऽक्षसूत्रकमंडलुहस्ते एह्येहीत्यादि। अंतरिक्षपूजा च।ततो वेद्यामाग्नेये विष्णवे। पूर्वे रुद्राय। ऐशान्यां ब्रह्मणे। पश्चिमे गणेशाय। मध्ये महाकाल्यै महालक्ष्म्यै महासरस्वत्यै च ध्वजपताकोच्छ्रयणं कृत्वा पूजयेत्। अथाचार्यो ग्रहवेद्यां ग्रहान्संस्थाप्य संपूज्य मध्यवेद्यां पीठे उपविश्य गुं गुरवे गं गणपतये द्वां द्वारश्रियै दुं दुर्गायै क्षं क्षेत्रपालाय ऱ्हः अस्त्रायफडिति वास्तुपुरुषाय महालक्ष्म्यैनमइति नत्वा पृथ्वीत्यासनं कृत्वा अनंतासनाय॰विमलासनाय॰पद्मासनायनमइति नत्वा अपसर्पंतुतेभूता अपक्रामंतुभूतानीतिद्वाभ्यां वामपादघातत्रयं कृत्वा ऱ्हः अस्त्रायफडिति तालत्रयं कृत्वा गणपतिसरस्वतीक्षेत्रपालान्नत्वा रः फडित्यग्निप्राकारं विचिंत्य समंताज्जलधारां दत्वा मूलेनाचम्य (मूलं नवार्णमंत्रः) प्राणानायम्य देशकालौ स्मृत्वाऽस्मिन् शतचंडीकर्मणि श्रीमहालक्ष्म्याः नवार्णविधानेन न्यासपूजादि करिष्ये इति संकल्प्य भूतशुद्धिं कुर्यात्। स्वजीवं हंसःसोहमिति शिरःस्थितपरमात्मनि संयोज्य पादाद्याजानु लं पृथ्वीमप्सुसंहरामीति सर्वत्रानुषंगः। जान्वाद्यानाभि वं अपस्तेजसि नाभेराकंठं रं तेजो वायौ कंठाद्याभ्रूमध्यं यं वायुमाकाशे भ्रूमध्याद्ब्रह्मरंध्रं हं आकाशमहंकारे अहंकारं महति महांतं प्रकृतौ प्रकृतिं पुरुषे पुरुषं परमात्मनि महालक्ष्मीसंज्ञे ब्रह्मणि संहरामीत्यनुषंगेण भूतानि संहृत्य वामकुक्षावंगुष्ठमात्रं पापपुरुषं यमिति पूरकेण १६ वारं संशोष्य [illegible]मित्यग्निबीजेन कुंभकेन ६४ दग्ध्वा वमिति रेचकेन ३२ निःसार्य वमित्यमृतबीजेनाप्लाव्य लमिति संमेल्य ग्लौमिति घनीकृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हांमा॰ ...जेन देहावयवान्ध्यात्वा जीवं ह्रीं सोहंहंसइति तत्र संयोज्य ब्रह्मणः प्रकृतिः प्रकृतेर्महान् महतोऽहंकारोऽहंकारादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी पृथिव्या ओषधय ओषधीभ्योऽन्नमन्नाद्रेतो रेतसः पुरुष इति देहोत्पत्तिं विभाव्य प्राणप्रतिष्ठां कुर्यात् । प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुःसामानि छंदांसि । चैतन्यरूपिणी जगत्सृष्टिकर्त्री प्राणशक्तिर्देवता ।आं बीजं । ह्रीं शक्तिः । क्रों कीलकं । प्राणप्रतिष्ठायां विनियोगः ।ॐ आं ह्रीं क्रों अं कं खं गं घं ङं पृथिव्यप्तेजोवाय्वाकाशात्मने आं अंगुष्ठाभ्यांनमः।ॐ इं चं छं॰ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां॰। ॐ उं टं ठं॰णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां॰ । ॐ एं तं थं॰नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां॰। ॐ ओं पं फं॰मं वचनादानविहरणोत्सर्गानंदात्मने औं कनिष्ठिकाभ्यां॰। ॐ अं यं रं लं वं शं षं सं हं क्षं मनोबुद्ध्यहंकारचित्तविज्ञानात्मने अः करतलकरपृष्ठाभ्यां॰। एवं षडंगः । ॐ आं ह्रीं क्रों अं यं॰क्षं हंसः सोहं क्रों ह्रीं आं मम प्राणाइहप्राणाः । पुनरेवं ।मम जीवइहस्थितः । पुनरेवं । मम सर्वेंद्रियाणि । पुनरेवं । मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठंतुस्वाहेति शिरसि हृदि वा करं दत्वा त्रिः सकृद्वा जपित्वा पंचदशवारं प्रणवं जपन् १५संस्कारान्भावयेत् । ।अथ मातृकान्यासः । अस्य मातृकामंत्रस्य ब्रह्मा ऋषिः । गायत्री छंदः । मातृकासरस्वती देवता।हलो बीजानि।स्वराः शक्तयः।क्षं कीलकं । न्यासे विनियोगः । ॐ अं कं॰आं अंगुष्ठाभ्यां॰।इं चं॰ईं तर्जनीभ्यां॰। ॐ उं टं॰ऊं मध्यमा॰। ॐ एं तं॰ऐं अनामिका॰। ॐ ओं पं॰औं कनिष्ठिका॰ । ॐ अं यं॰ अः करतलकरपृष्ठाभ्यां॰ । एवं हृदयादिषडंगः । ततः कंठस्थषोडशदलपद्मे अकारादिषोडशस्वरान्न्यसेत् । अं नमः आंनमइत्यादि । हृदि द्वादशदले कादिठांतान्।नाभौ दशदले डादिफांतान्। तदधः षड्दले बादिलांतान् । आधारे चतुर्दशदले वादिसांतान्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

।अः

फान्यासः । ऋष्यादिषडंगांत ... त् । अं नमः शिरसि। आं नमः मुखवृत्ते। ने-
ऌंॡं एंऐं ओंऔं इति न्यसेत् । अं जिह्वायां। अः कंठे। दक्षकरसंध्यग्रेषु कवर्गं।
भ्युदरेषु पवर्गं ।यं त्वदि । रं कंठे । लं ककुदि । वं स्कंधयोः । शं त्वदादिद-
दिवामपादे । ळं क्षमिति व्यापकं ॥ ॥ अथ निवृत्त्यादिकलान्यासः । अं
शांत्यै॰ नेत्रयोः । उं रंधिकायै॰ ऊं दीपिकायै॰ कर्णयोः । ऋं रेचिकायै॰
: । एं सूक्ष्मामृतायै॰ ऐं ज्ञानामृतायै॰ दंतपंक्त्योः। ओं सावित्र्यै॰ औं व्या-
ठे । अथ दक्षकरे । कं सृष्ट्यै॰ खं ऋद्ध्यै॰ गं स्मृत्यै॰ घं मेधायै॰ ङं
॰झं स्थित्यै॰ञं सिद्ध्यै॰। अथ दक्षपादे । टं जरायै॰ठं पालिन्यै॰डं शां-
॰थं वरदायै॰ दं ह्लादिन्यै॰ धं प्रीत्यै॰ नं दीर्घायै॰ इति। पं तीक्ष्णायै॰
मं तंद्र्यै॰ उदरे । यं क्षुधायै॰ हृदि । रं क्रोधिन्यै॰ कंठे । लं कृपायै॰
वामकरे । सं श्वेतायै॰ दक्षपादे । हं अरुणायै॰ वामपादे । ळं असि-
ासः । ततो मूलेन त्रिः प्राणानायम्य अस्य श्रीनवार्णमंत्रस्य ब्रह्मवि-
ष्णिगनुष्टुप् छंदांसि । नंदाशाकंभरीभीमाशक्तयः । रक्तदंतिकादुर्गा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थैकादश न्यासाः । ऱ्हींबीजयुक्तानकारादिक्षकारांतान्वर्णान्बहिर्मातृका-
त्रैत्राद्यौ प्रणवः । ऐंऱ्हींक्लींबीजानि करद्वये कनिष्ठाद्यंगुष्ठांतं करतलकर-
एवं हृदयादिषडंगः । एवं दशदिक्षु च । इति द्वितीयः । ऱ्हीं ऐं ब्राह्म्यै-
दक्षिणे । ऱ्हीं श्रीं वैष्णव्यै० नैर्ऋत्यां । ऱ्हीं ऱ्हूं वाराह्यै० पश्चिमे ।
त्रैं चामुंडायै०ऐशान्यां । ऱ्हीं व्योमेश्वर्यै० ऊर्ध्वे । ऱ्हीं सप्तद्वीपेश्वर्यै० अधः।
त्झैं रक्तदंतिकायै० दक्षिणांगे । त्झैं शाकंभर्यै० पश्चिमांगे । त्झैं दुर्गायै०
रांतं । इति चतुर्थः । ऱ्हीं ऐं ब्रह्मणेनमः पादाद्यानाभि । ऱ्हीं श्रीं विष्णवे०
पादद्वये । ऱ्हीं वैनतेयाय० करद्वये । ऱ्हीं वृषभाय० चक्षुषोः । ऱ्हीं ग-
महालक्ष्म्यै० मध्यदेहे । ऐं सरस्वत्यै० ऊर्ध्वदेहे । क्लीं महाकाल्यै० अधो-
ह्रीं ऱ्हूं महिषप्रेताभ्यांनमः पादयोः । ऱ्हीं चंडिकायै० सर्वांगे । इति षष्ठः ।
दक्षिणकर्णे । मुं०वामकर्णे । डां०नासिकायां । यैं०मुखे । विं० लिंगे । च्चें०
। डां० नासिकायां । मुं० वामकर्णे । चां० दक्षिणकर्णे । क्लीं० वामनेत्रे । ॥२२५॥
च्चेस्वाहेति मूलमंत्रं स्वाग्रे द[illegible]पश्चिमवामांगेष्वारोहावरोहाभ्यां शिरसः पादांतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण त्द्दयादिषडंगः । इति ै । अ: । ततः खड्गिनीशूलिनीघोरेत्येकं श्लोकमुक्त्वा
चतुष्टयं पठित्वा रक्तवर्णं ध्यात्वा शिरसेस्वाहा । सर्वस्वरूपेसर्वेशेइति श्लोक-
सा: । ततो योनिमुद्रां प्रदर्शयेत् । सा चैवं । दक्षिणकरस्य तर्जन्यां वामस्या-
ुलीद्वयं तदग्रे कनिष्ठिकाद्वयं तदग्रेऽगुष्ठद्वयमिति ॥ ॥ अथ ध्यानं ।
नीलजंघोरुरुन्मदा ॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा । चित्रानुलेपना
। सती । आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥ अक्षमाला च कमलं
शकः ॥ शक्तिर्दंडश्चर्मचापं पानपात्रं कमंडलुरिति । ततो वेद्यां सर्वतोभद्रं
उत्तरादिषु तत्तन्मंत्रैः सोमादीन् । वायुसोममध्यादिषु क्रमेण ज्मयाअत्रेति
न् । अश्विनावर्तिरित्यश्विनौ । ओमासइति विश्वान्देवान् । अभित्यंदेवमिति
र्प्सरसः । ब्रह्मसोममध्ये कुमारंमातेतिं कुमारं । ऋषभंमेत्यृषभं । यत्तेगात्रा-
ननिष्टेति दक्षं । ब्रह्मेंद्रमध्ये तामग्निवर्णामिति दुर्गां । इदंविष्णुरिति विष्णुं
ति मृत्युरोगान् । ब्रह्मनिर्ऋतिमध्ये गणानांत्वेति गणपतिं । ब्रह्मवरुणमध्ये
ले स्योनेति भूमिं । तत्रैवेमंमेगंग इति गंगादिनदीः । धाम्नोधाम्नइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थं दंडं खड्गं पाशमंकुशं च । पुनरुत्तरादि । गोतमं भरद्वाजं विश्वामित्रं
ब्राह्मीं वाराहीं चामुंडां वैष्णवीं माहेश्वरीं वैनायकीं च । ततस्तदस्त्वित्यावाह्य
ति सप्तधान्यानि क्षिप्त्वा आकलशेष्विति हैमं राजतं ताम्रं मृन्मयं वा
ओषधीरिति सर्वौषधीः । कांडात्कांडादिति दूर्वाः । अश्वत्थेवइति पंचपल्ल-
पंचरत्नानि । हिरण्यरूपइति हिरण्यं च क्षिप्त्वा युवासुवासाइति रक्तवस्त्रेण
यंत्रं लिखेत् । यथा । चतुर्द्वारं चतुरस्रत्रयं कृत्वा तन्मध्ये त्रिकोणं कृत्वा
त्रिकोणं कृत्वा तत्संलग्नमन्यत्रिकोणं कुर्यात् । तेन बहिरष्टौ कोणा मध्ये
न्यत्रिकोणमिति । यद्वा मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बाह्ये वृत्तं तद्बाह्येऽष्टौ द-
शतचंड्यां हेमपलेन तदर्धेन तदर्धेन वा कृतां सहस्रचंड्यां तु विंशति-
भुजां वा महिषासुरहंत्रीं सिंहस्थां देवीमूर्तिं रक्तपट्टदुकूलयुगच्छन्नां संस्थाप्य
रितं कुंभं निधाय गंधपुष्पाक्षतादिभिर्मूलेन तत्पात्राण्यापूर्य देवदक्षिणे न्यसेत् ।
ह्ये वृत्तं गोमयेन जलेन वा विलिख्य शंखमुद्रयाऽवष्टभ्य वह्नये दशकलात्मने
सुश्रियै० सुरूपायै० कपि[illegible] हव्यवाहायै० कव्यवाहायैनम इत्यभ्यर्च्य षट्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिखायैवषट् कवचायहुमिति । अग्रे नेत्रत्रयायवौषट् । सर्वतः अस्त्रायफडित्यक्षतैः
मनेनमः । तपिन्यै॰ तापिन्यै॰ धूम्रायै॰ मरीच्यै॰ ज्वालिन्यै॰ रुच्यै॰ सुषुम्नायै॰
ांखेऽक्षतैः संपूज्य तत्र गंधपुष्पाणि हृदयमंत्रेण क्षिप्त्वा क्षंनमः हंनम इत्यादि-
षोडशकलात्मने॰ अमृतायै॰ मानदायै॰ पूषायै॰ तुष्ट्यै॰ पुष्ट्यै॰ रत्यै॰ श-
नायै॰ पूर्णायै॰ पूर्णामृतायै॰ कामदायिन्यैनम इत्यभिमंत्र्यांकुशमुद्रया सूर्य-
मालिनीमुद्रां गरुडमुद्रां च दर्शयेत् (करद्वयांगुष्ठतर्जन्यग्रसंयोगे मालिनीमुद्रा।
न्यौ च संयोज्य मध्यमानामिकयोर्मुक्तयोः पक्षतुल्यत्वेन गरुडमुद्रा) नेत्रमंत्रेण
ा रक्षां कृत्वा मूलेन गंधपुष्पैरभ्यर्च्य हस्तेनाच्छाद्य मूलेन सप्तवारमभिमंत्र्य
ाद्रव्याणि च संप्रोक्ष्य मूलेन षडंगं कृत्वात्मानं गंधपुष्पैरभ्यर्च्य मूलेन त्रिः
रूपः सन् मूलं जपित्वा देवाय जपं निवेद्य पुष्पमाघ्राय कुंभोदरायनमइति
रुभ्यो॰ पं परमगुरुभ्यो॰ पं परात्परगुरुभ्यो॰ पं परमेष्ठिगुरुभ्योनम इति सं-
रशक्त्यै॰ मूलप्रकृत्यै॰ कालाग्निरुद्राय॰ महामंडपाय॰ कूर्माय॰ वरा-
नंदनोद्यानाय॰ मणिभूम्यै॰ रत्नमंडपाय॰ कल्पतरवे॰ रत्नसिंहास-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॰ ऐश्वर्यायेति संपूज्य । पूर्वादिदिक्षु अधर्माय॰ अज्ञानाय॰ अवैरा-
ग्यायेति संपूज्य । मध्ये सं सत्वाय॰ रं रजसे॰ तं तमसे॰ मां मायायै॰
रगिरिपीठेश्वर्यंबापादुकां पूजयामि । उड्डानपीठेश्वरसहितामुड्डानपीठेश्वर्यं-
जालंधरपीठेश्वरसहितां जालंधरपीठेश्वर्यंबा॰ । कों कोल्हागिरिपीठेश्वर-
रिपीठेश्वर्यंबा॰ । सं संहारगिरिपीठेश्वरसहितां संहारगिरिपीठेश्वर्यंबा॰ । कां
सबीजनमोंतैः सर्वत्र । गणेशाय॰ क्षेत्रपालाय॰ पादुकाभ्या॰ बटुकेभ्यो॰ ।
त्रैव अग्निमुखवेतालाय प्रेतवाहनवेतालाय ज्वालामुखवेतालाय॰ धूम्राक्षवेता-
अं सूर्यमंडलाय॰ उं सोममंडलाय॰ मं वह्निमंडलाय॰ अं आत्मने॰ उं अंत-
ायै॰ चें चेतनायै॰ बुं बुद्ध्यै॰ निं निद्रायै॰ क्षुं क्षुधायै॰ इति पूर्वे । छां
लं लज्जायै॰ इति दक्षिणे । शां शांत्यै॰ श्रं श्रद्धायै॰ कां कांत्यै॰ लं॰ ल-
यायै॰ तुं तुष्ट्यै॰ पुं पुष्ट्यै॰ मां मातृकायै॰ भ्रां भ्रांत्यै॰ इत्युत्तरे । ॐ ह्रीं
ः । इति पीठपूजा । ततो हृदिस्थां ज्योतिर्मयीं सपरिवारां महालक्ष्मीं ध्यात्वा
मस्ते शंकरप्रिये । दुर्गे देवि समागच्छ सांनिध्यमिह कल्पय । बलिपूजां गृहाण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ुष्पांजलावानीय मूलेन मूर्तावावाह्यावाहन्यादिमुद्रा योनिमुद्रां च प्रदर्श्य मूर्तेः
नमधुपर्कान्निवेदयेत् । तत्र पात्रचतुष्टयमस्त्रेण प्रक्षाल्य गंधादि निक्षिपेत् । तत्र
सर्षपयवदूर्वाः । आचमनीये जातीफलकंकोललवंगानि । मधुपर्के दधि मधु
स्वतीसूक्तैरभिषिच्य पुनराचमनं दत्वा पट्टदुकूलयुगकंचुकाभरणाष्टगंधबिल्व-
विंशतिं द्वादश त्रीणि सहस्राण्येकं वा सहस्रं पुष्पाणि समर्पयेत् । । अथा-
चेनमः । अभीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या समर्पये तुभ्यं
यथायथमूह्यं) ॥ १ ॥ वामे हूं महिषाय० । दक्षिणे क्षौं सिंहाय० । पुरतः
ेषु । ऱ्हैं रुद्राय० ऱ्हैं गौर्यै० श्रीं विष्णवे० श्रीं लक्ष्म्यै० ऐं ब्रह्मणे० ऐं
शिखायैवषट् । ऱ्हैं कवचायहुं । ऱ्हौं नेत्रत्रयायवौषट् । ऱ्हः अस्त्रायफट्
हरये० हराय० गणेशाय० ॥ ५ ॥ अष्टदलेषु । नं नंदजायैविच्चे०
र्यै० लौं इंद्राण्यै० क्षौं नारसिंह्यै० रः म्रौं चामुंडायै० ॥६॥ दिक्षु । अं
उन्मत्तभैर० कं कपालभै० भिं भीषणभै०सं संहारभै०॥ ७ ॥ पूर्वादिषु।
ाक्षवे० सं सोमाय० हं ईशानाय० ॥ ८ ॥ बहिः । वज्राय० शक्त्यै०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो मूलेन धूपदीपौ दत्वा नैवेद्यमस्त्रेणाभिमंत्र्य मूलेन प्रोक्ष्य कवचे-
प्रदर्श्य मध्येपानीयमुत्तराचमनं च दत्वा करोद्वर्तनफलतांबूलदक्षिणानी-
धिना माषभक्तकूष्माडादिबलिं दत्वा पूजां समर्पयेत् । । अथ चतुः-
। एवमष्टौ त्र्यस्रपंक्तीः कृत्वा वक्ष्यमाणनामभिरावाह्य संपूज्य पायसबली-
जये एह्येहागच्छागच्छेमं पायसबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा ।
गिनि गणेश्वरि । ततो गौरवर्णेऽक्षमालांकुशपुस्तकवीणाधरे प्रेताशिनि
निशाचरि टंकारिणि रुद्रवेतालि हुंकारि । ततो रक्तवर्णे ज्वालाश-
रूपाक्षि शुष्कांगि नरभोजनि फट्कारिणि वीरभद्रे धूम्रांगि कलहप्रिये ।
वं रक्ताक्षि विश्वरूपे भयंकरि वीरकौमारि चंडिके वाराहि मुंडधारिणि ।
। एवं ध्वांक्षिणि धूम्रांगि प्रेतवाहिनि खड्गिनि दीर्घलंबोष्ठि मालिनि मं-
एह्येहीत्यादि । एवं चक्रिणि कंकालिनि भुवनेश्वरि त्राटकि महामारि यम-
शिनि एह्येहीत्यादि । एवं मर्दिनि रोमजंघे निवारिणि विशालि कार्मुकि लो-
ाग्रधारिणि एह्येहीत्यादि । एवं व्याघ्रि कांक्षिणि प्रेतरूपिणि धूर्जटि घोरि करालि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरनेत्राय बलिं गृह्ण गृह्ण रक्ष रक्ष कदन कदन ह्रां ह्रीं ह्रूं स्वाहेति बटुकाय
पपीठानि द्वारोपस्तरणानि च । क्षेत्रक्षेत्रज्ञसंदोहः सर्वे दिग्भागसंस्थिताः ॥
अटव्यां सरितस्तटे ॥ वापीकूपेषु वृक्षेषु श्मशाने च चतुष्पथे । नानारूप-
मे सदा । शरणागतोऽस्म्यहं तेषां ते सर्वे मे सुखप्रदाः ॥ बलिनाऽनेन
र्वदेति ॥ ॥ अथ कुमारीपूजा । ताश्च प्रत्यहं शतं नव वा पूज्याः ।
र्थे शूद्रवंशजां ॥ दारुणे चांत्यजातां तु पूजयेद्द्विविना नर इत्युक्ता ग्राह्याः।
सेकैकेन श्रियं लभेत् ॥ वर्ज्यास्तु । एकवर्षा तु या कन्या पूजार्थे तां वि-
 काणीं कुरूपां तनुरोमशां । वर्जयेत्सर्वकार्येषु दासीगर्भसमुद्भवामिति ।
त्वाऽलंकृतां पीठे उपवेश्य देशकालौ स्मृत्वाऽमुकफलसिद्ध्यर्थममुककर्मणि
र्ये । मंत्राक्षरमयींलक्ष्मीं मातॄणांरूपधारिणीं । नवदुर्गात्मिकांसाक्षात्कन्या-
याद्यर्घाचमनस्नानपट्टदुकूलवस्त्रकंचुकालंकारादि दत्वा सुगंधेनानुलिप्य
पायसनानाभक्ष्यैर्भोजयेत् । भोजनकाले च मूलमंत्रं सप्तशतीं वा
एवमन्याः पूजयेत् । आवाहने तु मंत्रभेदः । मंत्राक्षरमयी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...णकौमारि जगन्मातर्नमोस्तुते इति प्रथमां । त्रिपुरांत्रिगुणाधारां
...यां । कालिकांतुकलातीतां कारुण्यैकपरांशिवां । कल्याणजननींनित्यं
...त्मिकां । अनंतशक्तिसहितां कामाक्षींपूजयाम्यहमिति चतुर्थीं । काम-
...याम्यहमिति पंचमीं । चंडवीरां चंडमायां चंडमुंडप्रभंजनीं । ब्रह्मेशवि-
...वनमस्कृतां । सर्वभूतात्मिकांदेवीं शांभवींपूजयाम्यहमिति सप्तमीं । सुं-
...याम्यहमित्यष्टमीं । दुर्गमेदुस्तरेकार्ये भयशोकविनाशिनीं । पूजयामिसदा-
...ा । एवं देवीकुमार्यादिपूजा नवरात्रेऽपि प्रत्यहं कार्या । इयं शतचंड्यां
...ः । ततः पूजां देव्यै समर्प्य सर्वे विप्राः कृतांगन्यासाः शतं नवार्णमंत्रं
... नवार्णशतं च जपेयुः । कवचादीनां प्रत्यावृत्ति नावृत्तिः । एवं साचार्य-
...रि रूपाणीत्येवं जपं कुर्युः । ऋत्विजां कर्तुश्च प्रत्यहं क्षीरमात्राशनमशक्तौ हवि-
...य होमः । नवरात्रे तु नवम्यामेव ॥ ॥ अथ होमः । तत्र स्वगृह्योक्तस्या-
... । तद्यथा । देशकालौ स्मृत्वा ब्राह्मणद्वारा कृतस्य नवचंडीशतचंडीसहस्र-
...पायसद्रव्येण होमं करिष्ये । तदंगं कुंडसंस्काराग्निस्थापनादि करिष्ये इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवचेनाभ्युक्ष्याश्वत्थसमिधा मूलेन प्रागग्रा उदगग्राश्च तिस्रो लेखाः कृत्वा
त्र्यस्रषट्कोणाष्टदलचतुरस्राणि लिखित्वा योगपीठं वागीश्वरं च संपूज्या-
ठरेण चैकीकृत्य ह्रीमित्युद्भवमुद्रया रेचकेन ॐ ह्रीं वह्निचैतन्यायनमइति
र्यास्त्रेण संरक्ष्य कवचेनावगुंठ्य गंधाद्यैः संपूज्य मूलेन प्रतिष्ठाप्य ॐ चित्पिं-
प्रदश्यैंधनैः समिध्यास्त्रेण दर्व्या कंकणं बद्ध्वाऽग्नेर्गर्भाधानादिसंस्कारा-
तमंगलनामासित्वंहुताशनेति नाम कृत्वा जुहुयात् । अथ स्वदेहे न्यासः ।
श्र्यूं भद्रलोहितायै॰ शिरसि । व्र्यूं लोहितायै॰ मुखे । ल्र्यूं श्वेतायै॰ घ्राणे ।
यायनमः । स्वस्तिपूर्णाय॰ शिरसेस्वाहा । उत्तिष्ठपुरुषाय॰ शिखायैवषट् ।
स्त्रायफट् । अग्नये जातवेदसेनमः मूर्ध्नि । अग्नये सप्तजिह्वाय॰ दक्षकरे ।
वैश्वानराय॰ वामकट्यां । अग्नये कौमारतेजसे॰ वामपार्श्वे । अग्नये वि-
परिसमुह्य परिस्तीर्य परिधीन्निक्षिप्योपरिमेखलाक्रमेण ब्रह्मविष्णुरुद्रान्
पुरतः पश्चान्मध्ये च रुर्यूंपद्मरागायैइत्यादिपूर्वोक्तसप्तजिह्वाः संपूज्याग्ने-
पूर्वादिदिक्षु अग्नयेजातवेदसेइत्याद्यष्टौ मूर्तीः संपूज्य चतुरस्रे इंद्रादी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्ना निर्वापादिना प्रभूतपायसं श्रपयित्वाज्यं चरुं च ह्रीमित्यभिमंत्र्य
क्षिणयोरिडापिंगले मध्ये सुषुम्नां च ध्यात्वा चक्षुषी हुत्वाऽग्नीषोमा-
मंत्रैरेकैकामाज्याहुतिं हुत्वा मर्त्येभ्यः पितृभ्यो यक्षेभ्यो नागेभ्यश्च हुत्वा
स्वाहावौषडिति हुत्वा गणेशमंत्रेण जुहुयात् । ततः पूर्वोक्तसर्वन्यासान्कृत्वा
षोडशोपचारैः संपूज्य मूलेन शतमेकादशाधिकमाज्याहुतीर्हुत्वा नव-
पलाशपुष्पसर्षपपूगीफललाजदूर्वांकुरयवबिल्वफलरक्तचंदनगुग्गुलुद्रव्याणि
कृतस्य जपस्य दशांशेन प्रतिश्लोकं सप्तशतीमंत्रेणोक्तद्रव्याणि तिलपा-
अध्यायसमाप्तौ उवाचस्थले च पत्रपुष्पफलैर्होमः । यद्वा नमोदेव्याइत्येतेन
णाज्यं पायसं च जुहुयात् । यथा। कादंबर्यैस्वाहा । उल्कायै० करालयै०
सुरश्रेष्ठायै० सर्वराज्यै० । ब्राह्म्यै० माहेश्वर्यै० कौमार्यै० वैष्णव्यै० वा-
निधये० पद्मनिधये० द्वारश्रियै० वास्तुपुरुषाय० । ऐरावताय० पुंडरीकाय०
सुप्रतीकाय० । दमनकाय० पुंडरीकाय० गुग्गुलाय० कुरंटकाय० । ऋग्वे-
क्पालानां च नामभिः । असितांगभैरवाय० रुरुभैरवाय० चंडभै० क्रोध०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुत्वा ॐ ह्रीं ब्राह्मीमाहेश्वरीकौमारीवैष्ण
ठदेवताभ्य आवरणदेवताभ्यश्च हुत्वा ॐ ह्रीं ब्राह्मीमाहेश्वरीकौमारीवैष्ण
ाऽऽज्यं जुहुयात् । ह्रीं नंदायैविच्चेस्वाहा । ह्रीं रक्तदंतिकायै०। ह्रीं
कायै०। ह्रीं शिवदूत्यैविच्चे०। ह्रीं प्रजापतयेस्वाहेति हुत्वा प्रायश्चित्तहो-
त्वा द्वादशगृहीतेन समुद्रादूर्मिरितितृचेन मूर्धानंदिवः० पुनस्त्वादित्या०
ग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नयेऽद्भ्यो महालक्ष्म्यै
मोकादिकर्मशेषं समाप्य मूलमंत्रेण होमदशांशेन दुग्धेन जलेन वा
ः संपूज्याचार्याय शतं तदर्धं तदर्धमष्टौ वा गोमिथुनानि सुवर्णचतुष्टयं
त्रयं गोमिथुनं च। इदं सहस्रचंड्यां। तदर्धं शतचंड्यां । तदर्धं नवचंड्यां।
द्यात् । यथा। विप्रं संपूज्य कपिलां गां स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं
तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमेइतिमंत्रेण दद्यात् ।१। यथारत्नेषुसर्वेषु
गं ॥ २ ॥ अथ श्वेताश्वदानं । विप्रं संपूज्य अश्वं हेमपल्याणरौ-
ग्रैवेयसुवस्त्रयुतं धान्यरत्नोपरिस्थं कृत्वा मार्तंडायुधवेगाय काश्यपा-
शाखाध्यायिने सूर्यलोकनिवासकामनया देवीप्रीतिकामनया वा इमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा ऽमृतहार्णवेसमुत्पन्न उच्चैःश्रवसपुत्रक । मयात्वंविप्रमुख्याय ...
दा मयादत्तंसुशोभनमिति । ततः सुवर्णदक्षिणां दद्यात् । ३ । ततः इहा-
तन् छत्रं । ४ । शशांककरसंकाश हिमडिंडीरपांडुर । प्रोत्सारयाशुदुरितं
स्वा नस्यफलदा अतःशांतिंप्रयच्छमेइति भूमिं ।६। यथानकृष्णशयनं शून्यंसा-
वा ७ । तृप्तिंकरोतिभूतानामिहलोकेपरत्रच । तस्मात्प्रदीयतेधान्यमतःशां-
न्यश्च दक्षिणां दद्यात् । ततः सर्वकलशोदकेन सामात्यं यजमानं समुद्र-
ग्रहाणामुत्तरपूजां कृत्वा विसृज्याचार्यहस्ते दत्वा देवीं संपूज्य बलिं
ष्मांडं बिल्वमिक्षवश्च देयाः । यथा । देवीं द्रोणपुष्पबिल्वाग्रदलजाती-
ऽभ्यर्च्य पशुस्त्वंबलिरूपेण ममभाग्यादुपस्थितः । प्रणमामिततःसर्वरू-
रूपाय बलेतुभ्यंनमोनमः ॥ यज्ञार्थेबलयःसृष्टाः स्वयमेवस्वयंभुवा ।
तत्र पुष्पं क्षिप्त्वा । रसनात्वंचंडिकायाः सुरलोकप्रसाधकः ॥ ह्रांह्रीं-
हिदंडायैनमइति छेदयित्वा ॐह्रींऐंह्रांकौशिकीरुधिरेणाप्यायतामिति देदै-
माषपिष्टमयं शत्रुं कृत्वा खड्गेन छेदयित्वा स्कंदाय विशाखाय च दद्या०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचना.

या ग्रंथांत उतारे घेतलेल्या ग्रंथांचीं नांवें संक्षेपानें दिलेलीं साद्यंत खालीं लिहिलीं आहेत.

शां० सा० शांतिसार
शां० म० शांतिमयूख
सं० कौ० संस्कारकौस्तुभ
म० म० मदनमहार्णव
गृ० का० भा० गृह्यकारिकाभाष्य
गृ० वृ० गृह्यसूत्रवृत्ति
दा० क० दानकमलाकर
वि० पा० विधानपारिजात
अप० अपरार्क
ल० शौ० लघुशौनक
दे० देवल

ल० आ० लघुआश्वलायन
कात्या० कात्यायन
व्र० रा० व्रतराज
वि० मा० विधानमाला
बृ० प० बृहत्पराशर
गृ० प० गृह्यपरिशिष्ट
म० पा० मदनपारिजात
प्र० पा० प्रयोगपारिजात
म० र० मदनरत्न
म० पु० मत्स्यपुराण
आ० प० आश्वलायनपरिशिष्ट

मु० सिं० मुहूर्तसिंधु
मु० मा० मुहूर्तमाला
मु० चिं० मुहूर्तचिंतामणि
ध० सिं० धर्मसिंधु
नि० शि० निबंधशिरोमणि
बौ० स्मृ० बौधायनस्मृति
सं० रें० संस्कारेंदु
प्र० र० प्रयोगरत्न
लिं० पु० लिंगपुराण
अ० पु० अग्निपुराण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हा ग्रंथ पुणें जगद्धितेच्छु छापखान्यांत छापिला.

तारीख १६ माहे एप्रेल सन १८९०

सन १८६७ चा आक्ट २५ प्रमाणें या ग्रंथाचा सर्व प्रकारें हक्क
गोंधळेकर यांणीं आपणाकडे ठेविला आहे.

आवृत्ति १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या ग्रंथात कित्येक शांतींचीं वचनें अपूर्ण होतीं, तीं अन्य ग्रंथांत पाहून पूर्ण केलीं आहेत; व कित्येक ठिकाणीं वचनें असून प्रयोग नव्हते; त्यापैकीं उपयुक्त व नेहेमी गरज लागणाऱ्या शांतींचे प्रयोग, मूलग्रंथ व मयूखादि प्राचीन ग्रंथ यांच्याशीं साधली तितकी एकवाक्यता करून प्रायः मूलानुसारी विस्तारपूर्वक लिहिले आहेत. तसेंच, यांत नसलेल्या व उपयुक्त अशा अन्य शांत्यादिकांचाही आरंभीं ' संगृह्यते ' असा शेरा देऊन संग्रह केला आहे. जेथें इतर ग्रंथांशीं विरोध आढळला तेथें तो जागचेजागीं किंवा प्रयोगाचे शेवटीं दिला आहे; व जेथें ग्रंथकारानें इतर ठिकाणचा हवाला दिला आहे तेथें तो विशेष उपयुक्त असा पाहून जशाचा तसा घेतला आहे. सारांश, कोणत्याही शांतिविषयीं अन्य ग्रंथाची गरज न लागतां यावरून तें सर्व काम चांगल्या रीतीनें होईल अशी याची योजना केली आहे.

या कामीं कै० वे० शा० सं० गंगाधरशास्त्री दातार यांचे हातचे कित्येक उपयुक्त लेख त्यांचे चिरंजिवांनीं मेहेरबानी करून आह्मांस दिले त्यांचा पुष्कळ ठिकाणीं चांगला उपयोग झाला आहे. (एकनक्षत्रशांति, ऋतुशांति, गोप्रसवशांति, अर्कविवाह इ० पहा) महत्त्वाच्या विषयावरील व्याख्या बहुतेक त्यांच्या लेखांतूनच घेतल्या आहेत.

ग्रंथ तयार झाल्यावर तो तपासून देण्याचे कामीं, महामहोपाध्याय वे० शा० रा० रा० बाळशास्त्री बुवा आगाशे वास्तव्य रत्नागिरी, यांनीं फार श्रम घेतले याबद्दल आह्मी त्यांचे फार आभारी आहों.

प्रस्तुत ग्रंथ लोकांत ' शांतिकमलाकर ' या नांवानें प्रसिद्ध आहे. परंतु, ग्रंथकर्त्यानें यास ' शांतिरत्न ' असें नांव दिलें असल्यामुळें आह्मीं मुखपृष्ठावरही तेंच नांव घातलें आहे.

रावजी श्रीधर गोंधळेकर.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावना.

हा ग्रंथ, प्रसिद्ध निर्णयसिंधुकार कमलाकर भट्ट यांनीं केला असून, यांत शांति वगैरेचा पुष्कळ संग्रह आहे. परंतु, ग्रंथाच्या दुर्बोधत्वामुळें व लोकांत चालू असलेल्या कांहीं शांति (उदाहरणार्थ ज्वरशांति, भद्राशांति, अधोमुखशांति इ०) व कित्येकींचे प्रयोग ही यांत नसल्यामुळें सामान्य विद्वानांस याचा तादृश उपयोग होत नाहीं. शास्त्री लोकांचें प्रस्तुत विषयाकडे मुळींच दुर्लक्ष्य झाल्यामुळें व कालमानाप्रमाणें गृहस्थांसही त्याची फारशी गरज राहिली नसल्यामुळें, सामान्य भिक्षुकांनीं, कारण पडल्यास जुनीं पुराणीं टिपणें, अगर कोणापाशीं संग्रहास असलेले किरकोळ प्रयोग आणून त्यांच्या साहाय्यानें कसा तरी प्रसंग पार पाडावा; असा क्रम चालविल्यामुळें दिवसेंदिवस या ग्रंथाची अनास्था होतजाऊन याच्या उपलब्ध असलेल्या प्रतींत फारच अशुद्धें व पाठभेद राहिले. कित्येक प्रतींतून तर ग्रंथाचा कांहीं भागही गलित झालेला आढळतो. असें जरी आहे तरी ग्रंथ फार महत्त्वाचा व उपयुक्त असल्यामुळें खर्चाकडे व श्रमाकडे विशेष लक्ष न देतां याच्या निरनिराळ्या ठिकाणच्या सात आठ प्राचीन प्रती मिळवून त्याची शुद्धता व पाठैक्य शास्त्री व याज्ञिक मंडळीकडून करवून लोकोपयोगार्थ आह्मीं प्रसिद्ध केला आहे.

या ग्रंथांत मदनमहार्णव, विधानमाला, विधानपारिजात, शांतिमयूख, शांतिसार, कौस्तुभ इत्यादि प्राचीन ग्रंथांतील उपयुक्त लेख योग्यस्थळीं " " अशा चिन्हांत देऊन, जेथें अर्थ दुर्बोध किंवा संक्षिप्त असा भासला तेथें त्याची व्याख्या ( ) अशा चिन्हांत, व जेथें पाठभेद आढळला तेथें तो [ ] अशा चिन्हांत दिला आहे.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृक्स्मेभभू१८१२मितेशाके द्वादश्यां माधवेसिते॥
जगद्धितेच्छुयंत्रेऽयं ग्रंथः पुण्यपुरेऽङ्कितः॥१॥
श्रुतसागरपारदृश्वनेदं रचितं श्रीकमलाकरेण रम्यं॥
बहुसंग्रहशालिशांतिरत्नं तदबोधाद्विरलप्रचारमासीत्॥२॥
कालेशनैर्याति ततोऽस्य पुस्तकेष्वशक्तकल्पेषु लिपीकरभ्रमात्
व्यत्यस्तमूनाधिकयोगिकिंचन क्वचित्तु पाठांतरवृद्धिरप्यभूत्॥३॥
तथाप्यतीवास्य हि सारवत्त्वं शांत्यादिकर्मण्युपयोगितां च
ग्रंथस्य विद्वत्सुखतोऽवगम्य विशीर्यतां रत्नमिदं न धूल्यां॥४॥
इत्थेतिचित्ते बहुलार्थसंव्ययात्प्राचीनमानाय्य च पुस्तकोच्चयं,
संशोध्य यत्नाद्विबुधैरुदारधीरमुद्रयद्वावजि गोंधळेकरः॥५॥

चतुःषष्टियोगिनीपीठं



यान्यासन्वचनानि काश्चिदितः शांतिष्वपूर्णानि ता-
न्यन्यग्रंथचये यथोचितमवेक्ष्यापूरितानि क्वचित्।
नव्याऽस्मिन्विहिता प्रयोगरचना नासीत्पुरा यत्र सा
लोके येविधयोऽपरे प्रचलिता स्तेऽप्यन्यतोऽत्राहृताः॥६॥
लेखाः प्रबंधांतरतो गृहीताः प्रमाणमित्यर्थसमर्थनार्थं।
व्याख्या श्च पाठांतरमप्यशेषं प्रकल्पितं चिन्हविशेषलक्ष्यं
मूलानुसारिक्रमशो निबद्धं वाक्यैः सुबोधैरनतिप्रभूतैः॥
प्रायोगिकाणामितरानपेक्षं प्रयोगजातं भवतूपकारि॥८॥
दातारवंशमणिना गुणिना सुवृत्ते नानेकशास्त्रपथतत्त्ववि-
दा निबंधे॥ गंगाधरेण विविधाह्युपपादितार्था व्याख्याद्द्यहा-
प्युपहृतास्ततएव मान्याः॥९॥

ग्रंथोऽतियत्नात्परिशोधितो ह्यसावाकाशसंज्ञैः किल बालशास्त्रिभिः॥ सद्विद्यया यैः पदवीमहामहोपाध्याय इत्युच्चतरापि पर्षदि॥१०॥
यथामति विचार्यात्र यन्न्यूनमधिकं कृतं॥ कृपयावीक्ष्य तत्संतः स्खलितं शोधयंतु नः॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुःषष्टिपदं वास्तुमंडलं



एकाशीतिपदं वास्तुमंडलं



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेदं दुर्गादेवी यंत्रं.



बंदीमोक्ष यंत्रं.



ग्रहमंडलम्



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्युंजययंत्रं





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२३		४	कृत्वा शत	कर्तुं शत
	२२३	६	गणेशजपार्थं वृत्वा	गाणेशं जपार्थं च वृत्वा
२२४		३	राज्ये आहि	राज्यहि
	२२४	१३	चतुर्दशदले	चतुर्दले
२२५		३	तर्जन्यां	तर्जन्या
२२५		८	सोममध्यादिषु	सोमादिमध्येषु
	२२६	२	ऐं ह्रीं	ऐंद्रीं
	२२६	८	वान्य	चान्य
	२२६	१२	त्मने धूम्राच्यैं	त्मने० धूम्रार्चिषे
२२७		३	क्षंनमः हं	क्षंनमः ळंनमः हं
२२८		१२	भिं भीषण	भीं भीषण
	२२८	११	त्राटकि	त्रोटकि

॥ शुद्धिपत्रं समाप्तं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८८	११	स्तूभयो	स्तलयो	२०१	११	मसन्वितं	समन्वितं
१८९	८	द्ययावैः	याद्यवैः	२०३	८	सप्तर्षय आपोनुष्टुप्	क्रमेण विश्वामित्रजमदग्नि-
१८९	८	वित्तार्थी	वित्तार्थे				वसिष्ठा विश्वेदेवा अनुष्टुप्
१८९	११	वरैन्न	वरैरन्न	२०३	३	दरितिक्त	दतिरिक्त
१९०	८	युक्तापि	युक्तोऽपि	२०३	४	वृत्तियोगात्	वृत्त्ययोगात्
१९२	१२	त्यस्तर्वं	त्यस्तत्सर्वं	२०४	६	द्वितीयाया	द्वितीया
१९६	१२	यव	(यव)	२०५	४	सर्भाय	सभार्य
१९६	८	वक्ष्यमाणैः पक्कै	तूक्तैः पलै	२०५	७	कृच्छ्रप्रत्याम्नायः	कृच्छ्रः
१९६	११	पठित्वा पाव	पठित्वा गृहं प्रागादितस्त्रि-	२०५	१२	हारशुभ	हारपूर्वकशुभ
			सूत्र्या पाव	२०६	३	क्षभ्यादी	भक्ष्यादी
१९७	४	मद्गुहं	मद्गृहं	२०९	७	तृतीयचतु	तृतीयाचतु
१९८	१०	पदार्थे	पदार्धे	२११	५	होमं करिष्य	होमं पयस्विधेनुदानं पंचगव्य-
१९९	३	मार्ष्टि मान	मार्ष्टि मानोमहांतं मान				प्राशनं च करिष्य
१९९	४	वास्तोष्पते वास्तो	वास्तो	२१५	२	पंचरत्नानि	पंचामृतानि
१९९	९	पूर्वोर्धे	पूर्वार्धे	२१९	४	महाद्या	महानद्यो
१९९	१२	वेरश्मता	वेश्मरता	२२०	२	कत्वा प्रधान	कृत्वा वा प्रधान
२००	३	करिति	करिरिति	२२२	२	सुतो भट्ट	सुतभट्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शु०
॥ ३ ॥

१८१		५	धूम्रस्ततः	धूम्रो वा ततः
१८१		५	द्वयोः कश्यपो मरु	द्वयोर्मरु
१८१		५	सृणां भग	सृणां नारदस्ततास्तिसृणां भग
१८१		७	द्रापेइतिद्वयोः पुलह इमा	द्रापेइत्यस्य पुलहो यातइत्यस्य-स्कंद इमा९
१८१		८	नारदस्ततश्चतु	नारद एकादशे चतु
१८१		१०	किरिकांतंमान	किरिकप्राङ्मान
१८१		११	स्ताम्रोऽवतत्येत्य	स्ताम्रो द्रापे इत्य
१८१		१३	वोचदित्यनु	वोचन्निचृदनु
	१८१	१	त्रिष्टुप्	नुष्टुप्
	१८१	१३	राधने	राधनेन
	१८२	५	होमेमंत्र	होममंत्र
	१८३	५	योगात्तद्दशां	योगान्न दशां
१८४		२	स्रोनं सर्व	स्रोनं २४९००० सर्व
१८४		४	रिताः ॥	रिताः २४८९००० ॥
	१८४	५	क्मिर्मात्स्ये च प्राक्पूर्व	क्मेर्मात्स्ये च प्राक्पूर्व
१८५		९	बलराम	नलं राम
	१८५	८	फणैः । युक्त	फ[illegible]क्तमावाह्य वारुण्यां पूजयेद्गंधधूपकैः ॥ महापद्मं वैश्यवर्णं नीलं पंचशतैः फणैः। युक्त
	१८६	१	दिति । पुत्रा	दिति । (प्रतिमादानोक्त्या प्रतिमायां रुद्रपूजनमूह्यं)पुत्रा
	१८६	१०	देवेभ्यो	ऽरुणेभ्यो
१८७		३	पतये सोमा	पतये कांडऋषये सोमा
१८७		४	याज्ञिकीभ्य	याज्ञिकीभ्यो देवताभ्य
१८७		५	देवेभ्यो वरुणेभ्यो	ऽरुणेभ्यो
१८७		१०	तरं संध्या	तरं संध्या । संध्या
१८७		१२	जनात् स्त्री	जनात्तत्सेवनात्तत्स्त्री
१८७		१३	ग्रहणात् । षड्भि	ग्रहणादसभ्योपासनाच्च । षड्भि
	१८७	११	भ्यसेत् ॥ कुंडे	भ्यसेत् ॥ सर्वेषामेव देशानां विशिष्टं देवतालयं । कुर्वन्देवालये यस्माद्विशिष्टं फलमश्नुते ॥ कुंडे

प०
॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

	१५७	६	हुत्वा दशगुणानत्र	वद्ध्व दशगुणं सूत्रं
	१५९	२	पृष्ठमिमं	पृष्ठनिभं
१६२		९	करिणीशांतिः	करिणीमदशांतिः
	१६४	५	तदनंतरं	चरणान्नचसेत्
	१६६	९	स्त्रिदश	स्त्रिशद
	१६६	१३	त्रितयं	त्रितये
१६७		१	स्वस्यांगे	यस्यांगे
	१६७	१२	जपादि	जयादि
१६८		१	मध्ये तर्ज	मध्यातर्ज
१६८		१२	१२ रेचयेत्	३२रेचयेत्
१६८		१३	हमित्यमृतं	वमित्यमृतं
	१६८	३	अं शक्तिः वं	कं शक्तिः वं
	१६८	६	शिखायैवषट् । पुष्टिवर्धनं	पुष्टिवर्धनं शिखायैवषट् ।
	१६८	९	दक्षवाहुसंधिषु । ववंधनान्मृवाम	सविंदूनि दक्षवाहुसंधिषु । ववं- धनान्मृ सविंदूनि वाम
	१६८	१२	नं बस्तौ । उं तन्मूले	नं उं तन्मूलयोः
	१६८	१३	शिरसेनमः	नमः शिरसि

१६९		८	भ्रूमध्ये । यं त्वष्ट्रे ललाटे मां विष्णवे शिरसि	नाभिगुह्यकुक्षिषु । यं त्वष्ट्रे भ्रू- मध्ये मां विष्णवे ललाटे
१६९		१३	कंठे	कृकाटिकायां
	१६९	११	श्चतुरस्रं	श्चतुष्पत्रं
	१७०	७	ऋग्वा ॥	ऋग्वा ॐ जूं सइतिपूर्वा ॥
	१७२	१२	लब्धाशीः	लघ्वाशीः
१७३		४	पूर्वं	पूर्वे
१७३		६	वर्णा	वर्गा
१७५		५	शिवस्याक्षे	शिवस्याज्ञे
	१७६	२	संमित	निर्मित
	१७६	१३	सिद्धं मंत्रं	सिद्धिमंत्रं
	१७७	४	दशत्वकपाल	दशत्ववत्कपाल
	१७८	५	इवाभ्यासः	इवचाभ्यासः
	१७७	६	दिनाभ्या	दिष्वभ्या
	१७७	८	सामगाद्यं	[illegible]पाद्यं
१७९		३	हृदये येवृक्षेष्वित्युदरे । नमः- [illegible] शंभव इति कक्षयोः । न[illegible]	[illegible]नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu